THE

MAHĀBHĀRATA

TEXT AS CONSTITUTED IN ITS CRITICAL EDITION

VOLUME II

UDYOGA-, BHĪṢMA-, AND DROṆA-PARVANS

PUBLISHED BY

THE BHANDARKAR ORIENTAL RESEARCH INSTITUTE

POONA

1972

All rights reserved

Printed by Dr. R. N. Dandekar, at the Bhandarkar Institute Press, Poona 4

and

Published by Dr. R. N. Dandekar, Hon. Secretary, Bhandarkar Oriental Research Institute,

Poona 4 (India).

चिकित्सितपाठात्मिका

महाभारत-संहिता

द्वितीयः खण्डः

उद्योग - भीष्म - द्रोण - पर्वाणि

भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरेण

प्रकाशिता

पुण्यपत्तनम्

शकाब्दाः १८९४

अनुक्रमणिका

५	उद्योगपर्व अध्यायाः १–१९७	pp. 877–1128
४९	उद्योगपर्व १–२१	877–901
	इन्द्रविजयोपाख्यानम् ९–१८	855–898
५०	संजययानपर्व २२–३२	901–922
५१	प्रजागरपर्व ३३–४१	922–946
५२	सनत्सुजातपर्व ४२–४५	946–953
५३	यानसंधिपर्व ४६–६९	953–985
५४	भगवद्यानपर्व ७०–१३७	985–1061
	गालवचरितम् १०४–१२१	1025–1040
	विदुरापुत्रानुशासनम् १३१–१३४	1053–1058
५५	कर्णोपनिवादपर्व १३८–१४८	1061–1075
५६	अभिनिर्याणपर्व १४५–१५२	1075–1081
५७	भीष्माभिषेचनपर्व १५३–१५६	1081–1086
५८	उलूकयानपर्व १५७–१६०	1086–1090
५९	रथातिरथसंख्यानपर्व १६१–१६९	1090–1098
६०	अम्बोपाख्यानपर्व १७०–१९७	1098–1128
६	भीष्मपर्व अध्यायाः १–११७	1129–1335
६१	जम्बूखण्डविनिर्माणपर्व १–११	1129–1143
६२	भूमिपर्व १२–१३	1143–1146
६३	भगवद्गीतापर्व १४–४०	1146–1185
६४	भीष्मवधपर्व ४१–११७	1185–1335
	प्रथमयुद्धदिवसः ४१–४५	1185–1197
	द्वितीययुद्धदिवसः ४६–५१	1197–1210
	तृतीययुद्धदिवसः ५२–५५	1210–1220
	चतुर्थयुद्धदिवसः ५६–५७	1220–1224
	पञ्चमयुद्धदिवसः ५८–७०	1224–1242
	षष्ठयुद्धदिवसः ७१–७५	1242–1252
	सप्तमयुद्धदिवसः ७६–८२	1252–1265
	अष्टमयुद्धदिवसः ८३–९२	1265–1284
	नवमयुद्धदिवसः ९३–१०२	1284–1301
	दशमयुद्धदिवसः १०३–११७	1301–1335

७ द्रोणपर्व		अध्यायाः १–१७३	pp. 1336–1638
	६५	द्रोणाभिषेकपर्व १–१५	1336–1360
	६६	संशप्तकवधपर्व १६–३१	1360–1386
	६७	अभिमन्युवधपर्व ३२–५१	1386–1410
	६८	प्रतिज्ञापर्व ५२–६०	1410–1424
	६९	जयद्रथवधपर्व ६१–१२१	1424–1530
	७०	घटोत्कचवधपर्व १२२–१५४	1530–1593
	७१	द्रोणवधपर्व १५५–१६५	1593–1618
	७२	नारायणास्त्रमोक्षपर्व १६६–१७३	1618–1638

द्वितीयः खण्डः

५

उद्योगपर्व

१

वैशंपायन उवाच ।

कृत्वा विवाहं तु कुरुप्रवीरा-
स्तदाभिमन्योर्मुदितस्वपक्षाः ।
विश्रम्य चत्वार्युषसः प्रतीताः
सभां विराटस्य ततोऽभिजग्मुः ॥ १
सभा तु सा मत्स्यपतेः समृद्धा
मणिप्रवेकोत्तमरत्नचित्रा ।
न्यस्तासना माल्यवती सुगन्धा
तामभ्ययुस्ते नरराजवर्याः ॥ २
अथासनान्याविशतां पुरस्ता-
दुभौ विराटद्रुपदौ नरेन्द्रौ ।
वृद्धश्च मान्यः पृथिवीपतीनां
पितामहो रामजनार्दनाभ्याम् ॥ ३
पाञ्चालराजस्य समीपतस्तु
शिनिप्रवीरः सहरौहिणेयः ।
मत्स्यस्य राज्ञस्तु सुसंनिकृष्टौ
जनार्दनश्चैव युधिष्ठिरश्च ॥ ४
सुताश्च सर्वे द्रुपदस्य राज्ञो
भीमार्जुनौ माद्रवतीसुतौ च ।
प्रद्युम्नसाम्बौ च युधि प्रवीरौ
विराटपुत्रश्च सहाभिमन्युः ॥ ५
सर्वे च शूराः पितृभिः समाना
वीर्येण रूपेण बलेन चैव ।
उपाविशन्द्रौपदेयाः कुमाराः
सुवर्णचित्रेषु वरासनेषु ॥ ६
तथोपविष्टेषु महारथेषु
विभ्राजमानाम्बरभूषणेषु ।
रराज सा राजवती समृद्धा
ग्रहैरिव द्यौर्विमलैरुपेता ॥ ७
ततः कथास्ते समवाययुक्ताः
कृत्वा विचित्राः पुरुषप्रवीराः ।
तस्थुर्मुहूर्तं परिचिन्तयन्तः
कृष्णं नृपास्ते समुदीक्षमाणाः ॥ ८
कथान्तमासाद्य च माधवेन
संघट्टिताः पाण्डवकार्यहेतोः ।
ते राजसिंहाः सहिता ह्यशृण्व-
न्वाक्यं महार्थं च महोदयं च ॥ ९

कृष्ण उवाच ।

सर्वैर्भवद्भिर्विदितं यथायं
युधिष्ठिरः सौबलेनाक्षवत्याम् ।
जितो निकृत्यापहृतं च राज्यं
पुनः प्रवासे समयः कृतश्च ॥ १०
शक्तैर्विजेतुं तरसा महीं च
सत्ये स्थितैस्तच्चरितं यथावत् ।
पाण्डोः सुतैस्तद्व्रतमुग्ररूपं
वर्षाणि षट् सप्त च भारताग्र्यैः ॥ ११
त्रयोदशश्चैव सुदुस्तरोऽय-

मज्ञायमानैर्भवतां समीपे ।
क्लेशानसह्यांश्च तितिक्षमाणै-
र्यथोषितं तद्विदितं च सर्वम् ॥ १२
एवं गते धर्मसुतस्य राज्ञो
दुर्योधनस्यापि च यद्धितं स्यात् ।
तच्चिन्तयध्वं कुरुपाण्डवानां
धर्म्यं च युक्तं च यशस्करं च ॥ १३
अधर्मयुक्तं च न कामयेत
राज्यं सुराणामपि धर्मराजः ।
धर्मार्थयुक्तं च महीपतित्वं
ग्रामेऽपि कस्मिंश्चिदयं बुभूषेत् ॥ १४
पित्र्यं हि राज्यं विदितं नृपाणां
यथापकृष्टं धृतराष्ट्रपुत्रैः ।
मिथ्योपचारेण तथाप्यनेन
कृच्छ्रं महत्प्राप्तमसह्यरूपम् ॥ १५
न चापि पार्थो विजितो रणे तैः
स्वतेजसा धृतराष्ट्रस्य पुत्रैः ।
तथापि राजा सहितः सुहृद्भि-
रभीप्सतेऽनामयमेव तेषाम् ॥ १६
यत्तत्स्वयं पाण्डुसुतैर्विजित्य
समाहृतं भूमिपतीन्निपीड्य ।
तत्प्रार्थयन्ते पुरुषप्रवीराः
कुन्तीसुता माद्रवतीसुतौ च ॥ १७
बालास्त्विमे तैर्विविधैरुपायैः
संप्रार्थिता हन्तुममित्रसाहाः ।
राज्यं जिहीर्षद्भिरसद्भिरुग्रैः
सर्वं च तद्वो विदितं यथावत् ॥ १८
तेषां च लोभं प्रसमीक्ष्य वृद्धं
धर्मात्मतां चापि युधिष्ठिरस्य ।
संबन्धितां चापि समीक्ष्य तेषां
मतिं कुरुध्वं सहिताः पृथक्च ॥ १९
इमे च सत्येऽभिरताः सदैव
तं पारयित्वा समयं यथावत् ।
अतोऽन्यथा तैरुपचर्यमाणा
हन्युः समेतान्धृतराष्ट्रपुत्रान् ॥ २०
तैर्विप्रकारं च निशम्य राज्ञः
सुहृज्जनास्तान्परिवारयेयुः ।
युद्धेन बाधेयुरिमांस्तथैव
तैर्बध्यमाना युधि तांश्च हन्युः ॥ २१
तथापि नेमेऽल्पतया समर्था-
स्तेषां जयायेति भवेन्मतं वः ।
समेत्य सर्वे सहिताः सुहृद्भि-
स्तेषां विनाशाय यतेयुरेव ॥ २२
दुर्योधनस्यापि मतं यथाव-
न्न ज्ञायते किं नु करिष्यतीति ।
अज्ञायमाने च मते परस्य
किं स्यात्समारभ्यतमं मतं वः ॥ २३
तस्मादितो गच्छतु धर्मशीलः
शुचिः कुलीनः पुरुषोऽप्रमत्तः ।
दूतः समर्थः प्रशमाय तेषां
राज्यार्धदानाय युधिष्ठिरस्य ॥ २४
निशम्य वाक्यं तु जनार्दनस्य
धर्मार्थयुक्तं मधुरं समं च ।
समाददे वाक्यमथाग्रजोऽस्य
संपूज्य वाक्यं तदतीव राजन् ॥ २५

इति श्रीमहाभारते उद्योगपर्वणि
प्रथमोऽध्यायः ॥ १ ॥

२

बलदेव उवाच ।

श्रुतं भवद्भिर्गदपूर्वजस्य

वाक्यं यथा धर्मवदर्थवच्च ।
अजातशत्रोश्च हितं हितं च
दुर्योधनस्यापि तथैव राज्ञः ॥ १
अर्धं हि राज्यस्य विसृज्य वीराः
कुन्तीसुतास्तस्य कृते यतन्ते ।
प्रदाय चार्धं धृतराष्ट्रपुत्रः
सुखी सहास्माभिरतीव मोदेत् ॥ २
लब्ध्वा हि राज्यं पुरुषप्रवीराः
सम्यक्प्रवृत्तेषु परेषु चैव ।
ध्रुवं प्रशान्ताः सुखमाविशेयु-
स्तेषां प्रशान्तिश्च हितं प्रजानाम् ॥ ३
दुर्योधनस्यापि मतं च वेत्तुं
वक्तुं च वाक्यानि युधिष्ठिरस्य ।
प्रियं मम स्याद्यदि तत्र कश्चि-
द्व्रजेच्छमार्थं कुरुपाण्डवानाम् ॥ ४
स भीष्ममामन्त्र्य कुरुप्रवीरं
वैचित्रवीर्यं च महानुभावम् ।
द्रोणं सपुत्रं विदुरं कृपं च
गान्धारराजं च ससूतपुत्रम् ॥ ५
सर्वे च येऽन्ये धृतराष्ट्रपुत्रा
बलप्रधाना निगमप्रधानाः ।
स्थिताश्च धर्मेषु यथा स्वकेषु
लोकप्रवीराः श्रुतकालवृद्धाः ॥ ६
एतेषु सर्वेषु समागतेषु
पौरेषु वृद्धेषु च संगतेषु ।
ब्रवीतु वाक्यं प्रणिपातयुक्तं
कुन्तीसुतस्यार्थकरं यथा स्यात् ॥ ७
सर्वास्ववस्थासु च तेन कौरव्या-
ग्रस्तो हि सोऽर्थो बलमाश्रितैस्तैः ।
प्रियाभ्युपेतस्य युधिष्ठिरस्य
द्यूते प्रमत्तस्य हृतं च राज्यम् ॥ ८
निवार्यमाणश्च कुरुप्रवीरैः
सर्वैः सुहृद्भिर्ह्ययमप्यतज्ज्ञः ।
गान्धारराजस्य सुतं मताक्षं
समाह्वयद्देवितुमाजमीढः ॥ ९
दुरोदरास्तत्र सहस्रशोऽन्ये
युधिष्ठिरो यान्विषहेत जेतुम् ।
उत्सृज्य तान्सौबलमेव चायं
समाह्वयत्तेन जितोऽक्षवत्याम् ॥ १०
स दीव्यमानः प्रतिदेवनेन
अक्षेषु नित्यं सुपराङ्मुखेषु ।
संरम्भमाणो विजितः प्रसह्य
तत्रापराधः शकुनेर्न कश्चित् ॥ ११
तस्मात्प्रणम्यैव वचो ब्रवीतु
वैचित्रवीर्यं बहुसामयुक्तम् ।
तथा हि शक्यो धृतराष्ट्रपुत्रः
स्वार्थे नियोक्तुं पुरुषेण तेन ॥ १२

वैशंपायन उवाच ।

एवं ब्रुवत्येव मधुप्रवीरे
शिनिप्रवीरः सहसोत्पपात ।
तथापि वाक्यं परिनिन्द्य तस्य
समाददे वाक्यमिदं समन्युः ॥ १३

इति श्रीमहाभारते उद्योगपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

३

सात्यकिरुवाच ।

यादृशः पुरुषस्यात्मा तादृशं संप्रभाषते ।
यथारूपोऽन्तरात्मा ते तथारूपं प्रभाषसे ॥ १
सन्ति वै पुरुषाः शूराः सन्ति कापुरुषास्तथा ।
उभावेतौ दृढौ पक्षौ दृश्येते पुरुषान्प्रति ॥ २

एकस्मिन्नेव जायेते कुले क्लीबमहारथौ ।
फलाफलवती शाखे यथैकस्मिन्वनस्पतौ ॥ ३
नाभ्यसूयामि ते वाक्यं ब्रुवतो लाङ्गलध्वज ।
ये तु शृण्वन्ति ते वाक्यं तानसूयामि माधव ॥ ४
कथं हि धर्मराजस्य दोषमल्पमपि ब्रुवन् ।
लभते परिषन्मध्ये व्याहर्तुमकुतोभयः ॥ ५
समाहूय महात्मानं जितवन्तोऽक्षकोविदाः ।
अनक्षज्ञं यथाश्रद्धं तेषु धर्मजयः कुतः ॥ ६
यदि कुन्तीसुतं गेहे क्रीडन्तं भ्रातृभिः सह ।
अभिगम्य जयेयुस्ते तत्तेषां धर्मतो भवेत् ॥ ७
समाहूय तु राजानं क्षत्रधर्मरतं सदा ।
निकृत्या जितवन्तस्ते किं नु तेषां परं शुभम् ॥ ८
कथं प्रणिपतेच्चायमिह कृत्वा पणं परम् ।
वनवासाद्विमुक्तस्तु प्राप्तः पैतामहं पदम् ॥ ९
यद्ययं परवित्तानि कामयेत युधिष्ठिरः ।
एवमप्ययमत्यन्तं परान्नार्हति याचितुम् ॥ १०
कथं च धर्मयुक्तास्ते न च राज्यं जिहीर्षवः ।
निवृत्तवासान्कौन्तेयान्य आहुर्विदिता इति ॥ ११
अनुनीता हि भीष्मेण द्रोणेन च महात्मना ।
न व्यवस्यन्ति पाण्डूनां प्रदातुं पैतृकं वसु ॥ १२
अहं तु ताञ्शितैर्बाणैरनुनीय रणे बलात् ।
पादयोः पातयिष्यामि कौन्तेयस्य महात्मनः ॥ १३
अथ ते न व्यवस्यन्ति प्रणिपाताय धीमतः ।
गमिष्यन्ति सहामात्या यमस्य सदनं प्रति ॥ १४
न हि ते युयुधानस्य संरब्धस्य युयुत्सतः ।
वेगं समर्थाः संसोढुं वज्रस्येव महीधराः ॥ १५
को हि गाण्डीवधन्वानं कश्च चक्रायुधं युधि ।
मां चापि विषहेत्को नु कश्च भीमं दुरासदम् ॥ १६
यमौ च दृढधन्वानौ यमकल्पौ महाद्युती ।
को जिजीविषुरासीदेद्धृष्टद्युम्नं च पार्षतम् ॥ १७
पञ्चेमान्पाण्डवेयांश्च द्रौपद्याः कीर्तिवर्धनान् ।
समप्रमाणान्पाण्डूनां समवीर्यान्मदोत्कटान् ॥ १८
सौभद्रं च महेष्वासममरैरपि दुःसहम् ।
गदप्रद्युम्नसाम्बांश्च कालवज्रानलोपमान् ॥ १९
ते वयं धृतराष्ट्रस्य पुत्रं शकुनिना सह ।
कर्णेन च निहत्याजावभिषेक्ष्याम पाण्डवम् ॥ २०
नाधर्मो विद्यते कश्चिच्छत्रून्हत्वाततायिनः ।
अधर्म्यमयशस्यं च शात्रवाणां प्रयाचनम् ॥ २१
हृद्गतस्तस्य यः कामस्तं कुरुध्वमतन्द्रिताः ।
निसृष्टं धृतराष्ट्रेण राज्यं प्राप्नोतु पाण्डवः ॥ २२
अद्य पाण्डुसुतो राज्यं लभतां वा युधिष्ठिरः ।
निहता वा रणे सर्वे स्वप्स्यन्ति वसुधातले ॥ २३

इति श्रीमहाभारते उद्योगपर्वणि
तृतीयोऽध्यायः ॥ ३ ॥

४

द्रुपद उवाच ।

एवमेतन्महाबाहो भविष्यति न संशयः ।
न हि दुर्योधनो राज्यं मधुरेण प्रदास्यति ॥ १
अनुवर्त्स्यति तं चापि धृतराष्ट्रः सुतप्रियः ।
भीष्मद्रोणौ च कार्पण्यान्मौर्ख्याद्राधेयसौबलौ ॥ २
बलदेवस्य वाक्यं तु मम ज्ञाने न युज्यते ।
एतद्धि पुरुषेणाग्रे कार्यं सुनयमिच्छता ॥ ३
न तु वाच्यो मृदु वचो धार्तराष्ट्रः कथंचन ।
न हि मार्दवसाध्योऽसौ पापबुद्धिर्मतो मम ॥ ४
गर्दभे मार्दवं कुर्याद्गोषु तीक्ष्णं समाचरेत् ।
मृदु दुर्योधने वाक्यं यो ब्रूयात्पापचेतसि ॥ ५
मृदु वै मन्यते पापो भाष्यमाणमशक्तिजम् ।
जितमर्थं विजानीयादबुधो मार्दवे सति ॥ ६
एतच्चैव करिष्यामो यत्नश्च क्रियतामिह ।
प्रस्थापयाम मित्रेभ्यो बलान्युद्योजयन्तु नः ॥ ७

शल्यस्य धृष्टकेतोश्च जयत्सेनस्य चाभिभोः ।
केकयानां च सर्वेषां दूता गच्छन्तु शीघ्रगाः ॥ ८
स तु दुर्योधनो नूनं प्रेषयिष्यति सर्वशः ।
पूर्वाभिपन्नाः सन्तश्च भजन्ते पूर्वचोदकम् ॥ ९
तत्त्वरध्वं नरेन्द्राणां पूर्वमेव प्रचोदने ।
महद्धि कार्यं वोढव्यमिति मे वर्तते मतिः ॥ १०
शल्यस्य प्रेष्यतां शीघ्रं ये च तस्यानुगा नृपाः ।
भगदत्ताय राज्ञे च पूर्वसागरवासिने ॥ ११
अमितौजसे तथोग्राय हार्दिक्यायाहुकाय च ।
दीर्घप्रज्ञाय मल्लाय रोचमानाय चाभिभो ॥ १२
आनीयतां बृहन्तश्च सेनाबिन्दुश्च पार्थिवः ।
पापजित्प्रतिविन्ध्यश्च चित्रवर्मा सुवास्तुकः ॥ १३
बाह्लीको मुञ्जकेशश्च चैद्याधिपतिरेव च ।
सुपार्श्वश्च सुबाहुश्च पौरवश्च महारथः ॥ १४
शकानां पह्लवानां च दरदानां च ये नृपाः ।
काम्बोजा ऋषिका ये च पश्चिमानूपकाश्च ये ॥१५
जयत्सेनश्च काश्यश्च तथा पञ्चनदा नृपाः ।
क्राथपुत्रश्च दुर्धर्षः पार्वतीयाश्च ये नृपाः ॥ १६
जानकिश्च सुशर्मा च मणिमान्पौतिमत्स्यकः ।
पांसुराष्ट्राधिपश्चैव धृष्टकेतुश्च वीर्यवान् ॥ १७
औड्रश्च दण्डधारश्च बृहत्सेनश्च वीर्यवान् ।
अपराजितो निषादश्च श्रेणिमान्वसुमानपि ॥ १८
बृहद्बलो महौजाश्च बाहुः परपुरंजयः ।
समुद्रसेनो राजा च सह पुत्रेण वीर्यवान् ॥ १९
अदारिश्च नदीजश्च कर्णवेष्टश्च पार्थिवः ।
समर्थश्च सुवीरश्च मार्जारः कन्यकस्तथा ॥ २०
महावीरश्च कद्रुश्च निकरस्तुमुलः क्रथः ।
नीलश्च वीरधर्मा च भूमिपालश्च वीर्यवान् ॥ २१
दुर्जयो दन्तवक्त्रश्च रुक्मी च जनमेजयः ।
आषाढो वायुवेगश्च पूर्वपाली च पार्थिवः ॥ २२
भूरितेजा देवकश्च एकलव्यस्य चात्मजः ।
कारूषकाश्च राजानः क्षेमधूर्तिश्च वीर्यवान् ॥ २३
उद्धवः क्षेमकश्चैव वाटधानश्च पार्थिवः ।
श्रुतायुश्च दृढायुश्च शाल्वपुत्रश्च वीर्यवान् ॥ २४
कुमारश्च कलिङ्गानामीश्वरो युद्धदुर्मदः ।
एतेषां प्रेष्यतां शीघ्रमेतद्धि मम रोचते ॥ २५
अयं च ब्राह्मणः शीघ्रं मम राजन्पुरोहितः ।
प्रेष्यतां धृतराष्ट्राय वाक्यमस्मिन्समर्प्यताम् ॥ २६
यथा दुर्योधनो वाच्यो यथा शांतनवो नृपः ।
धृतराष्ट्रो यथा वाच्यो द्रोणश्च विदुषां वरः ॥ २७

इति श्रीमहाभारते उद्योगपर्वणि
चतुर्थोऽध्यायः ॥ ४ ॥

५

वासुदेव उवाच ।

उपपन्नमिदं वाक्यं सोमकानां धुरंधरे ।
अर्थसिद्धिकरं राज्ञः पाण्डवस्य महौजसः ॥ १
एतच्च पूर्वकार्यं नः सुनीतमभिकाङ्क्षताम् ।
अन्यथा ह्याचरन्कर्म पुरुषः स्यात्सुबालिशः ॥ २
किं तु संबन्धकं तुल्यमस्माकं कुरुपाण्डुषु ।
यथेष्टं वर्तमानेषु पाण्डवेषु च तेषु च ॥ ३
ते विवाहार्थमानीता वयं सर्वे यथा भवान् ।
कृते विवाहे मुदिता गमिष्यामो गृहान्प्रति ॥ ४
भवान्वृद्धतमो राज्ञां वयसा च श्रुतेन च ।
शिष्यवत्ते वयं सर्वे भवामेह न संशयः ॥ ५
भवन्तं धृतराष्ट्रश्च सततं बहु मन्यते ।
आचार्ययोः सखा चासि द्रोणस्य च कृपस्य च ॥६
स भवान्प्रेषयत्वद्य पाण्डवार्थकरं वचः ।
सर्वेषां निश्चितं तन्नः प्रेषयिष्यति यद्भवान् ॥ ७
यदि तावच्छमं कुर्यान्न्यायेन कुरुपुंगवः ।
न भवेत्कुरुपाण्डूनां सौभ्रात्रेण महान्क्षयः ॥ ८

अथ दर्पान्वितो मोहान्न कुर्याद्धृतराष्ट्रजः ।
अन्येषां प्रेषयित्वा च पश्चादस्मान्समाह्वयेः ॥ ९
ततो दुर्योधनो मन्दः सहामात्यः सबान्धवः ।
निष्ठामापत्स्यते मूढः क्रुद्धे गाण्डीवधन्वनि ॥ १०

वैशंपायन उवाच ।

ततः सत्कृत्य वार्ष्णेयं विराटः पृथिवीपतिः ।
गृहान्प्रस्थापयामास सगणं सहबान्धवम् ॥ ११
द्वारकां तु गते कृष्णे युधिष्ठिरपुरोगमाः ।
चक्रुः सांग्रामिकं सर्वं विराटश्च महीपतिः ॥ १२
ततः संप्रेषयामास विराटः सह बान्धवैः ।
सर्वेषां भूमिपालानां द्रुपदश्च महीपतिः ॥ १३
वचनात्कुरुसिंहानां मत्स्यपाञ्चालयोश्च ते ।
समाजग्मुर्महीपालाः संप्रहृष्टा महाबलाः ॥ १४
तच्छ्रुत्वा पाण्डुपुत्राणां समागच्छन्महद्बलम् ।
धृतराष्ट्रसुतश्चापि समानिन्ये महीपतीन् ॥ १५
समाकुला मही राजन्कुरुपाण्डवकारणात् ।
तदा समभवत्कृत्स्ना संप्रयाणे महीक्षिताम् ॥ १६
बलानि तेषां वीराणामागच्छन्ति ततस्ततः ।
चालयन्तीव गां देवीं सपर्वतवनामिमाम् ॥ १७
ततः प्रज्ञावयोवृद्धं पाञ्चाल्यः स्वपुरोहितम् ।
कुरुभ्यः प्रेषयामास युधिष्ठिरमते तदा ॥ १८

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चमोऽध्यायः ॥ ५ ॥

६

द्रुपद उवाच ।

भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः ।
बुद्धिमत्सु नराः श्रेष्ठा नराणां तु द्विजातयः ॥ १
द्विजेषु वैद्याः श्रेयांसो वैद्येषु कृतबुद्धयः ।
स भवान्कृतबुद्धीनां प्रधान इति मे मतिः ॥ २
कुलेन च विशिष्टोऽसि वयसा च श्रुतेन च ।
प्रज्ञयानवमश्चासि शुक्रेणाङ्गिरसेन च ॥ ३
विदितं चापि ते सर्वं यथावृत्तः स कौरवः ।
पाण्डवश्च यथावृत्तः कुन्तीपुत्रो युधिष्ठिरः ॥ ४
धृतराष्ट्रस्य विदिते वञ्चिताः पाण्डवाः परैः ।
विदुरेणानुनीतोऽपि पुत्रमेवानुवर्तते ॥ ५
शकुनिर्बुद्धिपूर्वं हि कुन्तीपुत्रं समाह्वयत् ।
अनक्षज्ञं मताक्षः सन्क्षत्रवृत्ते स्थितं शुचिम् ॥ ६
ते तथा वञ्चयित्वा तु धर्मपुत्रं युधिष्ठिरम् ।
न कस्यांचिदवस्थायां राज्यं दास्यन्ति वै स्वयम् ॥ ७
भवांस्तु धर्मसंयुक्तं धृतराष्ट्रं ब्रुवन्वचः ।
मनांसि तस्य योधानां ध्रुवमावर्तयिष्यति ॥ ८
विदुरश्चापि तद्वाक्यं साधयिष्यति तावकम् ।
भीष्मद्रोणकृपाणां च भेदं संजनयिष्यति ॥ ९
अमात्येषु च भिन्नेषु योधेषु विमुखेषु च ।
पुनरेकाग्रकरणं तेषां कर्म भविष्यति ॥ १०
एतस्मिन्नन्तरे पार्थाः सुखमेकाग्रबुद्धयः ।
सेनाकर्म करिष्यन्ति द्रव्याणां चैव संचयम् ॥ ११
भिद्यमानेषु च स्वेषु लम्बमाने च वै त्वयि ।
न तथा ते करिष्यन्ति सेनाकर्म न संशयः ॥ १२
एतत्प्रयोजनं चात्र प्राधान्येनोपलभ्यते ।
संगत्या धृतराष्ट्रश्च कुर्याद्धर्म्यं वचस्तव ॥ १३
स भवान्धर्मयुक्तश्च धर्म्यं तेषु समाचरन् ।
कृपालुषु परिक्लेशान्पाण्डवानां प्रकीर्तयन् ॥ १४
वृद्धेषु कुलधर्मं च ब्रुवन्पूर्वैरनुष्ठितम् ।
विभेत्स्यति मनांस्येषामिति मे नात्र संशयः ॥ १५
न च तेभ्यो भयं तेऽस्ति ब्राह्मणो ह्यसि वेदवित् ।
दूतकर्मणि युक्तश्च स्थविरश्च विशेषतः ॥ १६
स भवान्पुष्ययोगेन मुहूर्तेन जयेन च ।
कौरवेयान्प्रयात्वाशु कौन्तेयस्यार्थसिद्धये ॥ १७

वैशंपायन उवाच ।

तथानुशिष्टः प्रययौ द्रुपदेन महात्मना ।
पुरोधा वृत्तसंपन्नो नगरं नागसाह्वयम् ॥ १८

इति श्रीमहाभारते उद्योगपर्वणि
षष्ठोऽध्यायः ॥ ६ ॥

७

वैशंपायन उवाच ।

गते द्वारवतीं कृष्णे बलदेवे च माधवे ।
सह वृष्ण्यन्धकैः सर्वैर्भोजैश्च शतशस्तथा ॥ १
सर्वमागमयामास पाण्डवानां विचेष्टितम् ।
धृतराष्ट्रात्मजो राजा दूतैः प्रणिहितैश्चरैः ॥ २
स श्रुत्वा माधवं यातं सदश्वैरनिलोपमैः ।
बलेन नातिमहता द्वारकामभ्ययात्पुरीम् ॥ ३
तमेव दिवसं चापि कौन्तेयः पाण्डुनन्दनः ।
आनर्तनगरीं रम्यां जगामाशु धनंजयः ॥ ४
तौ यात्वा पुरुषव्याघ्रौ द्वारकां कुरुनन्दनौ ।
सुप्तं ददृशतुः कृष्णं शयानं चोपजग्मतुः ॥ ५
ततः शयाने गोविन्दे प्रविवेश सुयोधनः ।
उच्छीर्षतश्च कृष्णस्य निषसाद वरासने ॥ ६
ततः किरीटी तस्यानु प्रविवेश महामनाः ।
पश्चार्धे च स कृष्णस्य प्रह्वोऽतिष्ठत्कृताञ्जलिः ॥ ७
प्रतिबुद्धः स वार्ष्णेयो ददर्शाग्रे किरीटिनम् ।
स तयोः स्वागतं कृत्वा यथार्हं प्रतिपूज्य च ।
तदागमनजं हेतुं पप्रच्छ मधुसूदनः ॥ ८
ततो दुर्योधनः कृष्णमुवाच प्रहसन्निव ।
विग्रहेऽस्मिन्भवान्साह्यं मम दातुमिहार्हति ॥ ९
समं हि भवतः सख्यं मयि चैवार्जुनेऽपि च ।
तथा संबन्धकं तुल्यमस्माकं त्वयि माधव ॥ १०
अहं चाभिगतः पूर्वं त्वामद्य मधुसूदन ।
पूर्वं चाभिगतं सन्तो भजन्ते पूर्वसारिणः ॥ ११
त्वं च श्रेष्ठतमो लोके सतामद्य जनार्दन ।
सततं संमतश्चैव सद्वृत्तमनुपालय ॥ १२

कृष्ण उवाच ।

भवानभिगतः पूर्वमत्र मे नास्ति संशयः ।
दृष्टस्तु प्रथमं राजन्मया पार्थो धनंजयः ॥ १३
तव पूर्वाभिगमनात्पूर्वं चाप्यस्य दर्शनात् ।
साहाय्यमुभयोरेव करिष्यामि सुयोधन ॥ १४
प्रवारणं तु बालानां पूर्वं कार्यमिति श्रुतिः ।
तस्मात्प्रवारणं पूर्वमर्हः पार्थो धनंजयः ॥ १५
मत्संहननतुल्यानां गोपानामर्बुदं महत् ।
नारायणा इति ख्याताः सर्वे संग्रामयोधिनः ॥१६
ते वा युधि दुराधर्षा भवन्त्वेकस्य सैनिकाः ।
अयुध्यमानः संग्रामे न्यस्तशस्त्रोऽहमेकतः ॥ १७
आभ्यामन्यतरं पार्थ यत्ते हृद्यतरं मतम् ।
तद्वृणीतां भवानग्रे प्रवार्यस्त्वं हि धर्मतः ॥ १८

वैशंपायन उवाच ।

एवमुक्तस्तु कृष्णेन कुन्तीपुत्रो धनंजयः ।
अयुध्यमानं संग्रामे वरयामास केशवम् ॥ १९
सहस्राणां सहस्रं तु योधानां प्राप्य भारत ।
कृष्णं चापहृतं ज्ञात्वा संप्राप परमां मुदम् ॥ २०
दुर्योधनस्तु तत्सैन्यं सर्वमादाय पार्थिवः ।
ततोऽभ्ययाद्भीमबलो रौहिणेयं महाबलम् ॥ २१
सर्वं चागमने हेतुं स तस्मै संन्यवेदयत् ।
प्रत्युवाच ततः शौरिर्धार्तराष्ट्रमिदं वचः ॥ २२
विदितं ते नरव्याघ्र सर्वं भवितुमर्हति ।
यन्मयोक्तं विराटस्य पुरा वैवाहिके तदा ॥ २३
निगृह्योक्तो हृषीकेशस्त्वदर्थं कुरुनन्दन ।
मया संबन्धकं तुल्यमिति राजन्पुनः पुनः ॥ २४
न च तद्वाक्यमुक्तं वै केशवः प्रत्यपद्यत ।
न चाहमुत्सहे कृष्णं विना स्थातुमपि क्षणम् ॥२५

नाहं सहायः पार्थानां नापि दुर्योधनस्य वै ।
इति मे निश्चिता बुद्धिर्वासुदेवमवेक्ष्य ह ॥ २६
जातोऽसि भारते वंशे सर्वपार्थिवपूजिते ।
गच्छ युध्यस्व धर्मेण क्षात्रेण भरतर्षभ ॥ २७
इत्येवमुक्तः स तदा परिष्वज्य हलायुधम् ।
कृष्णं चापहृतं ज्ञात्वा युद्धान्मेने जितं जयम् ॥२८
सोऽभ्ययात्कृतवर्माणं धृतराष्ट्रसुतो नृपः ।
कृतवर्मा ददौ तस्य सेनामक्षौहिणीं तदा ॥ २९
स तेन सर्वसैन्येन भीमेन कुरुनन्दनः ।
वृतः प्रतिययौ हृष्टः सुहृदः संप्रहर्षयन् ॥ ३०
गते दुर्योधने कृष्णः किरीटिनमथाब्रवीत् ।
अयुध्यमानः कां बुद्धिमास्थायाहं त्वया वृतः ॥३१

अर्जुन उवाच ।

भवान्समर्थस्तान्सर्वान्निहन्तुं नात्र संशयः ।
निहन्तुमहमप्येकः समर्थः पुरुषोत्तम ॥ ३२
भवांस्तु कीर्तिमाँल्लोके तद्यशस्त्वां गमिष्यति ।
यशसा चाहमप्यर्थी तस्मादसि मया वृतः ॥ ३३
सारथ्यं तु त्वया कार्यमिति मे मानसं सदा ।
चिररात्रेप्सितं कामं तद्भवान्कर्तुमर्हति ॥ ३४

वासुदेव उवाच ।

उपपन्नमिदं पार्थ यत्स्पर्धेथा मया सह ।
सारथ्यं ते करिष्यामि कामः संपद्यतां तव ॥ ३५

वैशंपायन उवाच ।

एवं प्रमुदितः पार्थः कृष्णेन सहितस्तदा ।
वृतो दाशार्हप्रवरैः पुनरायाद्युधिष्ठिरम् ॥ ३६

इति श्रीमहाभारते उद्योगपर्वणि
सप्तमोऽध्यायः ॥ ७ ॥

८

वैशंपायन उवाच ।

शल्यः श्रुत्वा तु दूतानां सैन्येन महता वृतः ।
अभ्ययात्पाण्डवान्राजन्सह पुत्रैर्महारथैः ॥ १
तस्य सेनानिवेशोऽभूदध्यर्धमिव योजनम् ।
तथा हि बहुलां सेनां स बिभर्ति नरर्षभः ॥ २
विचित्रकवचाः शूरा विचित्रध्वजकार्मुकाः ।
विचित्राभरणाः सर्वे विचित्ररथवाहनाः ॥ ३
स्वदेशवेषाभरणा वीराः शतसहस्रशः ।
तस्य सेनाप्रणेतारो बभूवुः क्षत्रियर्षभाः ॥ ४
व्यथयन्निव भूतानि कम्पयन्निव मेदिनीम् ।
शनैर्विश्रामयन्सेनां स ययौ येन पाण्डवः ॥ ५
ततो दुर्योधनः श्रुत्वा महासेनं महारथम् ।
उपायान्तमभिद्रुत्य स्वयमानर्च भारत ॥ ६
कारयामास पूजार्थं तस्य दुर्योधनः सभाः ।
रमणीयेषु देशेषु रत्नचित्राः स्वलंकृताः ॥ ७
स ताः सभाः समासाद्य पूज्यमानो यथामरः ।
दुर्योधनस्य सचिवैर्देशे देशे यथार्हतः ।
आजगाम सभामन्यां देवावसथवर्चसम् ॥ ८
स तत्र विषयैर्युक्तः कल्याणैरतिमानुषैः ।
मेनेऽभ्यधिकमात्मानमवमेने पुरंदरम् ॥ ९
पप्रच्छ स ततः प्रेष्यान्प्रहृष्टः क्षत्रियर्षभः ।
युधिष्ठिरस्य पुरुषाः के नु चक्रुः सभा इमाः ।
आनीयन्तां सभाकाराः प्रदेयार्हा हि मे मताः ॥ १०
गूढो दुर्योधनस्तत्र दर्शयामास मातुलम् ।
तं दृष्ट्वा मद्रराजस्तु ज्ञात्वा यत्नं च तस्य तम् ।
परिष्वज्याब्रवीत्प्रीत इष्टोऽर्थो गृह्यतामिति ॥ ११

दुर्योधन उवाच ।

सत्यवाग्भव कल्याण वरो वै मम दीयताम् ।
सर्वसेनाप्रणेता मे भवान्भवितुमर्हति ॥ १२

वैशंपायन उवाच ।

कृतमित्यब्रवीच्छल्यः किमन्यत्क्रियतामिति ।
कृतमित्येव गान्धारिः प्रत्युवाच पुनः पुनः ॥ १३

स तथा शल्यमामन्त्र्य पुनरायात्स्वकं पुरम् ।
शल्यो जगाम कौन्तेयानाख्यातुं कर्म तस्य तत् ॥१४
उपप्लव्यं स गत्वा तु स्कन्धावारं प्रविश्य च ।
पाण्डवानथ तान्सर्वाञ्शल्यस्तत्र ददर्श ह ॥ १५
समेत्य तु महाबाहुः शल्यः पाण्डुसुतैस्तदा ।
पाद्यमर्घ्यं च गां चैव प्रत्यगृह्णाद्यथाविधि ॥ १६
ततः कुशलपूर्वं स मद्रराजोऽरिसूदनः ।
प्रीत्या परमया युक्तः समाश्लिष्य युधिष्ठिरम् ॥१७
तथा भीमार्जुनौ हृष्टौ स्वस्रीयौ च यमावुभौ ।
आसने चोपविष्टस्तु शल्यः पार्थमुवाच ह ॥ १८
कुशलं राजशार्दूल कच्चित्ते कुरुनन्दन ।
अरण्यवासाद्दिष्ट्यासि विमुक्तो जयतां वर ॥ १९
सुदुष्करं कृतं राजन्निर्जने वसता वने ।
भ्रातृभिः सह राजेन्द्र कृष्णया चानया सह ॥२०
अज्ञातवासं घोरं च वसता दुष्करं कृतम् ।
दुःखमेव कुतः सौख्यं राज्यभ्रष्टस्य भारत ॥ २१
दुःखस्यैतस्य महतो धार्तराष्ट्रकृतस्य वै ।
अवाप्स्यसि सुखं राजन्हत्वा शत्रून्परंतप ॥ २२
विदितं ते महाराज लोकतत्त्वं नराधिप ।
तस्माल्लोभकृतं किंचित्तव तात न विद्यते ॥ २३
ततोऽस्याकथयद्राजा दुर्योधनसमागमम् ।
तच्च शुश्रूषितं सर्वं वरदानं च भारत ॥ २४

युधिष्ठिर उवाच ।

सुकृतं ते कृतं राजन्प्रहृष्टेनान्तरात्मना ।
दुर्योधनस्य यद्वीर त्वया वाचा प्रतिश्रुतम् ।
एकं त्विच्छामि भद्रं ते क्रियमाणं महीपते ॥ २५
भवानिह महाराज वासुदेवसमो युधि ।
कर्णार्जुनाभ्यां संप्राप्ते द्वैरथे राजसत्तम ।
कर्णस्य भवता कार्यं सारथ्यं नात्र संशयः ॥ २६
तत्र पाल्योऽर्जुनो राजन्यदि मत्प्रियमिच्छसि ।
तेजोवधश्च ते कार्यः सौतेरस्मज्जयावहः ।
अकर्तव्यमपि ह्येतत्कर्तुमर्हसि मातुल ॥ २७

शल्य उवाच ।

शृणु पाण्डव भद्रं ते यद्ब्रवीषि दुरात्मनः ।
तेजोवधनिमित्तं मां सूतपुत्रस्य संयुगे ॥ २८
अहं तस्य भविष्यामि संग्रामे सारथिर्ध्रुवम् ।
वासुदेवेन हि समं नित्यं मां स हि मन्यते ॥२९
तस्याहं कुरुशार्दूल प्रतीपमहितं वचः ।
ध्रुवं संकथयिष्यामि योद्धुकामस्य संयुगे ॥ ३०
यथा स हृतदर्पश्च हृततेजाश्च पाण्डव ।
भविष्यति सुखं हन्तुं सत्यमेतद्ब्रवीमि ते ॥ ३१
एवमेतत्करिष्यामि यथा तात त्वमात्थ माम् ।
यच्चान्यदपि शक्ष्यामि तत्करिष्यामि ते प्रियम् ॥३२
यच्च दुःखं त्वया प्राप्तं द्यूते वै कृष्णया सह ।
परुषाणि च वाक्यानि सूतपुत्रकृतानि वै ॥ ३३
जटासुरात्परिक्लेशः कीचकाच्च महाद्युते ।
द्रौपद्याधिगतं सर्वं दमयन्त्या यथाशुभम् ॥ ३४
सर्वं दुःखमिदं वीर सुखोदर्कं भविष्यति ।
नात्र मन्युस्त्वया कार्यो विधिर्हि बलवत्तरः ॥ ३५
दुःखानि हि महात्मानः प्राप्नुवन्ति युधिष्ठिर ।
देवैरपि हि दुःखानि प्राप्तानि जगतीपते ॥ ३६
इन्द्रेण श्रूयते राजन्सभार्येण महात्मना ।
अनुभूतं महद्दुःखं देवराजेन भारत ॥ ३७

इति श्रीमहाभारते उद्योगपर्वणि
अष्टमोऽध्यायः ॥ ८ ॥

९

युधिष्ठिर उवाच ।

कथमिन्द्रेण राजेन्द्र सभार्येण महात्मना ।
दुःखं प्राप्तं परं घोरमेतदिच्छामि वेदितुम् ॥ १

शल्य उवाच ।

शृणु राजन्पुरा वृत्तमितिहासं पुरातनम् ।
सभार्येण यथा प्राप्तं दुःखमिन्द्रेण भारत ॥ २
त्वष्टा प्रजापतिर्ह्यासीद्देवश्रेष्ठो महातपाः ।
स पुत्रं वै त्रिशिरसमिन्द्रद्रोहात्किलासृजत् ॥ ३
ऐन्द्रं स प्रार्थयत्स्थानं विश्वरूपो महाद्युतिः ।
तैस्त्रिभिर्वदनैर्घोरैः सूर्येन्दुज्वलनोपमैः ॥ ४
वेदानेकेन सोऽधीते सुरामेकेन चापिबत् ।
एकेन च दिशः सर्वाः पिबन्निव निरीक्षते ॥ ५
स तपस्वी मृदुर्दान्तो धर्मे तपसि चोद्यतः ।
तपोऽतप्यन्महत्तीव्रं सुदुश्चरमरिंदम ॥ ६
तस्य दृष्ट्वा तपोवीर्यं सत्त्वं चामिततेजसः ।
विषादमगमच्छक्र इन्द्रोऽयं मा भवेदिति ॥ ७
कथं सज्जेत भोगेषु न च तप्येन्महत्तपः ।
विवर्धमानस्त्रिशिराः सर्वं त्रिभुवनं ग्रसेत् ॥ ८
इति संचिन्त्य बहुधा बुद्धिमान्भरतर्षभ ।
आज्ञापयत्सोऽप्सरसस्त्वष्टृपुत्रप्रलोभने ॥ ९
यथा स सज्जेत्त्रिशिराः कामभोगेषु वै भृशम् ।
क्षिप्रं कुरुत गच्छध्वं प्रलोभयत माचिरम् ॥ १०
शृङ्गारवेषाः सुश्रोण्यो भावैर्युक्ता मनोहरैः ।
प्रलोभयत भद्रं वः शमयध्वं भयं मम ॥ ११
अस्वस्थं ह्यात्मनात्मानं लक्षयामि वराङ्गनाः ।
भयमेतन्महाघोरं क्षिप्रं नाशयताबलाः ॥ १२

अप्सरस ऊचुः ।

तथा यत्नं करिष्यामः शक्र तस्य प्रलोभने ।
यथा नावाप्स्यसि भयं तस्माद्बलनिषूदन ॥ १३
निर्दहन्निव चक्षुर्भ्यां योऽसावास्ते तपोनिधिः ।
तं प्रलोभयितुं देव गच्छामः सहिता वयम् ।
यतिष्यामो वशे कर्तुं व्यपनेतुं च ते भयम् ॥१४

शल्य उवाच ।

इन्द्रेण तास्त्वनुज्ञाता जग्मुस्त्रिशिरसोऽन्तिकम् ।
तत्र ता विविधैर्भावैर्लोभयन्त्यो वराङ्गनाः ।
नृत्यं संदर्शयन्त्यश्च तथैवाङ्गेषु सौष्ठवम् ॥ १५
विचेरुः संप्रहर्षं च नाभ्यगच्छन्महातपाः ।
इन्द्रियाणि वशे कृत्वा पूर्णसागरसंनिभः ॥ १६
तास्तु यत्नं परं कृत्वा पुनः शक्रमुपस्थिताः ।
कृताञ्जलिपुटाः सर्वा देवराजमथाब्रुवन् ॥ १७
न स शक्यः सुदुर्धर्षो धैर्याच्चालयितुं प्रभो ।
यत्ते कार्यं महाभाग क्रियतां तदनन्तरम् ॥ १८
संपूज्याप्सरसः शक्रो विसृज्य च महामतिः ।
चिन्तयामास तस्यैव वधोपायं महात्मनः ॥ १९
स तूष्णीं चिन्तयन्वीरो देवराजः प्रतापवान् ।
विनिश्चितमतिर्धीमान्वधे त्रिशिरसोऽभवत् ॥ २०
वज्रमस्य क्षिपाम्यद्य स क्षिप्रं न भविष्यति ।
शत्रुः प्रवृद्धो नोपेक्ष्यो दुर्बलोऽपि बलीयसा ॥२१
शास्त्रबुद्ध्या विनिश्चित्य कृत्वा बुद्धिं वधे दृढाम् ।
अथ वैश्वानरनिभं घोररूपं भयावहम् ।
मुमोच वज्रं संक्रुद्धः शक्रस्त्रिशिरसं प्रति ॥ २२
स पपात हतस्तेन वज्रेण दृढमाहतः ।
पर्वतस्येव शिखरं प्रणुन्नं मेदिनीतले ॥ २३
तं तु वज्रहतं दृष्ट्वा शयानमचलोपमम् ।
न शर्म लेभे देवेन्द्रो दीपितस्तस्य तेजसा ।
हतोऽपि दीप्ततेजाः स जीवन्निव च दृश्यते ॥२४
अभितस्तत्र तक्षाणं घटमानं शचीपतिः ।
अपश्यदब्रवीच्चैनं सत्वरं पाकशासनः ।
क्षिप्रं छिन्धि शिरांस्यस्य कुरुष्व वचनं मम ॥ २५

तक्षोवाच ।

महास्कन्धो भृशं ह्येष परशुर्न तरिष्यति ।
कर्तुं चाहं न शक्ष्यामि कर्म सद्भिर्विगर्हितम् ॥२६

इन्द्र उवाच ।

मा भैस्त्वं क्षिप्रमेतद्वै कुरुष्व वचनं मम ।
मत्प्रसादाद्धि ते शस्त्रं वज्रकल्पं भविष्यति ।। २७

तक्षोवाच ।

कं भवन्तमहं विद्यां घोरकर्माणमद्य वै ।
एतदिच्छाम्यहं श्रोतुं तत्त्वेन कथयस्व मे ।। २८

इन्द्र उवाच ।

अहमिन्द्रो देवराजस्तक्षन्विदितमस्तु ते ।
कुरुष्वैतद्यथोक्तं मे तक्षन्मा त्वं विचारय ।। २९

तक्षोवाच ।

क्रूरेण नापत्रपसे कथं शक्रेह कर्मणा ।
ऋषिपुत्रमिमं हत्वा ब्रह्महत्याभयं न ते ।। ३०

इन्द्र उवाच ।

पश्चाद्धर्मं चरिष्यामि पावनार्थं सुदुश्चरम् ।
शत्रुरेष महावीर्यो वज्रेण निहतो मया ।। ३१
अद्यापि चाहमुद्विग्नस्तक्षन्नस्माद्बिभेमि वै ।
क्षिप्रं छिन्धि शिरांसि त्वं करिष्येऽनुग्रहं तव ।। ३२
शिरः पशोस्ते दास्यन्ति भागं यज्ञेषु मानवाः ।
एष तेऽनुग्रहस्तक्षन्क्षिप्रं कुरु मम प्रियम् ।। ३३

शल्य उवाच ।

एतच्छ्रुत्वा तु तक्षा स महेन्द्रवचनं तदा ।
शिरांस्यथ त्रिशिरसः कुठारेणाच्छिनत्तदा ।। ३४
निकृत्तेषु ततस्तेषु निष्क्रामंस्त्रिशिरास्त्वथ ।
कपिञ्जलास्तित्तिराश्च कलविङ्काश्च सर्वशः ।। ३५
येन वेदानधीते स्म पिबते सोममेव च ।
तस्माद्वक्त्राद्विनिष्पेतुः क्षिप्रं तस्य कपिञ्जलाः ।।३६
येन सर्वा दिशो राजन्पिबन्निव निरीक्षते ।
तस्माद्वक्त्राद्विनिष्पेतुस्तित्तिरास्तस्य पाण्डव ।। ३७
यत्सुरापं तु तस्यासीद्वक्त्रं त्रिशिरसस्तदा ।
कलविङ्का विनिष्पेतुस्तेनास्य भरतर्षभ ।। ३८
ततस्तेषु निकृत्तेषु विज्वरो मघवानभूत् ।
जगाम त्रिदिवं हृष्टस्तक्षापि स्वगृहान्ययौ ।। ३९
त्वष्टा प्रजापतिः श्रुत्वा शक्रेणाथ हतं सुतम् ।
क्रोधसंरक्तनयन इदं वचनमब्रवीत् ।। ४०
तप्यमानं तपो नित्यं क्षान्तं दान्तं जितेन्द्रियम् ।
अनापराधिनं यस्मात्पुत्रं हिंसितवान्मम ।। ४१
तस्माच्छक्रवधार्थाय वृत्रमुत्पादयाम्यहम् ।
लोकाः पश्यन्तु मे वीर्यं तपसश्च बलं महत् ।
स च पश्यतु देवेन्द्रो दुरात्मा पापचेतनः ।। ४२
उपस्पृश्य ततः क्रुद्धस्तपस्वी सुमहायशाः ।
अग्निं हुत्वा समुत्पाद्य घोरं वृत्रमुवाच ह ।
इन्द्रशत्रो विवर्धस्व प्रभावात्तपसो मम ।। ४३
सोऽवर्धत दिवं स्तब्ध्वा सूर्यवैश्वानरोपमः ।
किं करोमीति चोवाच कालसूर्य इवोदितः ।
शक्रं जहीति चाप्युक्तो जगाम त्रिदिवं ततः।। ४४
ततो युद्धं समभवद्वृत्रवासवयोस्तदा ।
संक्रुद्धयोर्महाघोरं प्रसक्तं कुरुसत्तम ।। ४५
ततो जग्राह देवेन्द्रं वृत्रो वीरः शतक्रतुम् ।
अपावृत्य स जग्रास वृत्रः क्रोधसमन्वितः ।। ४६
ग्रस्ते वृत्रेण शक्रे तु संभ्रान्तास्त्रिदशास्तदा ।
असृजंस्ते महासत्त्वा जृम्भिकां वृत्रनाशिनीम् ।।४७
विजृम्भमाणस्य ततो वृत्रस्यास्यादपावृतात् ।
स्वान्यङ्गान्यभिसंक्षिप्य निष्क्रान्तो बलसूदनः ।
ततः प्रभृति लोकेषु जृम्भिका प्राणिसंश्रिता।। ४८
जहृषुश्च सुराः सर्वे दृष्ट्वा शक्रं विनिःसृतम् ।
ततः प्रववृते युद्धं वृत्रवासवयोः पुनः ।
संरब्धयोस्तदा घोरं सुचिरं भरतर्षभ ।। ४९
यदा व्यवर्धत रणे वृत्रो बलसमन्वितः ।
त्वष्टुस्तपोबलाद्विद्वांस्तदा शक्रो न्यवर्तत ।। ५०
निवृत्ते तु तदा देवा विषादमगमन्परम् ।

समेत्य शक्रेण च ते त्वष्टुस्तेजोविमोहिताः ।
अमन्त्रयन्त ते सर्वे मुनिभिः सह भारत ॥ ५१
किं कार्यमिति ते राजन्विचिन्त्य भयमोहिताः ।
जग्मुः सर्वे महात्मानं मनोभिर्विष्णुमव्ययम् ।
उपविष्टा मन्दराग्रे सर्वे वृत्रवधेप्सवः ॥ ५२

इति श्रीमहाभारते उद्योगपर्वणि
नवमोऽध्यायः ॥ ९ ॥

१०

इन्द्र उवाच ।

सर्वं व्याप्तमिदं देवा वृत्रेण जगदव्ययम् ।
न ह्यस्य सदृशं किंचित्प्रतिघाताय यद्भवेत् ॥ १
समर्थो ह्यभवं पूर्वमसमर्थोऽस्मि सांप्रतम् ।
कथं कुर्यां नु भद्रं वो दुष्प्रधर्षः स मे मतः ॥ २
तेजस्वी च महात्मा च युद्धे चामितविक्रमः ।
ग्रसेत्त्रिभुवनं सर्वं सदेवासुरमानुषम् ॥ ३
तस्माद्विनिश्चयमिमं शृणुध्वं मे दिवौकसः ।
विष्णोः क्षयमुपागम्य समेत्य च महात्मना ।
तेन संमन्त्र्य वेत्स्यामो वधोपायं दुरात्मनः ॥ ४

शल्य उवाच ।

एवमुक्ते मघवता देवाः सर्षिगणास्तदा ।
शरण्यं शरणं देवं जग्मुर्विष्णुं महाबलम् ॥ ५
ऊचुश्च सर्वे देवेशं विष्णुं वृत्रभयार्दिताः ।
त्वया लोकास्त्रयः क्रान्तास्त्रिभिर्विक्रमणैः प्रभो ॥ ६
अमृतं चाहृतं विष्णो दैत्याश्च निहता रणे ।
बलिं बद्ध्वा महादैत्यं शक्रो देवाधिपः कृतः ॥ ७
त्वं प्रभुः सर्वलोकानां त्वया सर्वमिदं ततम् ।
त्वं हि देव महादेवः सर्वलोकनमस्कृतः ॥ ८
गतिर्भव त्वं देवानां सेन्द्राणाममरोत्तम ।
जगद्व्याप्तमिदं सर्वं वृत्रेणासुरसूदन ॥ ९

विष्णुरुवाच ।

अवश्यं करणीयं मे भवतां हितमुत्तमम् ।
तस्मादुपायं वक्ष्यामि यथासौ न भविष्यति ॥१०
गच्छध्वं सर्षिगन्धर्वा यत्रासौ विश्वरूपधृक् ।
साम तस्य प्रयुञ्जध्वं तत एनं विजेष्यथ ॥ ११
भविष्यति गतिर्देवाः शक्रस्य मम तेजसा ।
अदृश्यश्च प्रवेक्ष्यामि वज्रमस्यायुधोत्तमम् ॥ १२
गच्छध्वमृषिभिः सार्धं गन्धर्वैश्च सुरोत्तमाः ।
वृत्रस्य सह शक्रेण संधिं कुरुत माचिरम् ॥ १३

शल्य उवाच ।

एवमुक्तास्तु देवेन ऋषयस्त्रिदशास्तथा ।
ययुः समेत्य सहिताः शक्रं कृत्वा पुरःसरम् ॥ १४
समीपमेत्य च तदा सर्व एव महौजसः ।
तं तेजसा प्रज्वलितं प्रतपन्तं दिशो दश ॥ १५
ग्रसन्तमिव लोकांस्त्रीन्सूर्याचन्द्रमसौ यथा ।
ददृशुस्तत्र ते वृत्रं शक्रेण सह देवताः ॥ १६
ऋषयोऽथ ततोऽभ्येत्य वृत्रमूचुः प्रियं वचः ।
व्याप्तं जगदिदं सर्वं तेजसा तव दुर्जय ॥ १७
न च शक्नोषि निर्जेतुं वासवं भूरिविक्रमम् ।
युध्यतोश्चापि वां कालो व्यतीतः सुमहानिह ॥१८
पीड्यन्ते च प्रजाः सर्वाः सदेवासुरमानवाः ।
सख्यं भवतु ते वृत्र शक्रेण सह नित्यदा ।
अवाप्स्यसि सुखं त्वं च शक्रलोकांश्च शाश्वतान्॥१९
ऋषिवाक्यं निशम्याथ स वृत्रः सुमहाबलः ।
उवाच तांस्तदा सर्वान्प्रणम्य शिरसासुरः ॥ २०
सर्वे यूयं महाभागा गन्धर्वाश्चैव सर्वशः ।
यद्ब्रूत तच्छ्रुतं सर्वं ममापि शृणुतानघाः ॥ २१
संधिः कथं वै भविता मम शक्रस्य चोभयोः ।
तेजसोर्हि द्वयोर्देवाः सख्यं वै भविता कथम् ॥२२

ऋषय ऊचुः ।

सकृत्सतां संगतं लिप्सितव्यं
ततः परं भविता भव्यमेव ।
नातिक्रमेत्सत्पुरुषेण संगतं
तस्मात्सतां संगतं लिप्सितव्यम् ॥ २३
दृढं सतां संगतं चापि नित्यं
ब्रूयाच्चार्थं ह्यर्थकृच्छ्रेषु धीरः ।
महार्थवत्सत्पुरुषेण संगतं
तस्मात्सन्तं न जिघांसेत धीरः ॥ २४
इन्द्रः सतां संमतश्च निवासश्च महात्मनाम् ।
सत्यवादी ह्यदीनश्च धर्मवित्सुविनिश्चितः ॥ २५
तेन ते सह शक्रेण संधिर्भवतु शाश्वतः ।
एवं विश्वासमागच्छ मा ते भूद्बुद्धिरन्यथा ॥ २६

शल्य उवाच ।

महर्षिवचनं श्रुत्वा तानुवाच महाद्युतिः ।
अवश्यं भगवन्तो मे माननीयास्तपस्विनः ॥ २७
ब्रवीमि यदहं देवास्तत्सर्वं क्रियतामिह ।
ततः सर्वं करिष्यामि यदूचुर्मां द्विजर्षभाः ॥ २८
न शुष्केण न चार्द्रेण नाश्मना न च दारुणा ।
न शस्त्रेण न वज्रेण न दिवा न तथा निशि ॥२९
वध्यो भवेयं विप्रेन्द्राः शक्रस्य सह दैवतैः ।
एवं मे रोचते संधिः शक्रेण सह नित्यदा ॥ ३०
बाढमित्येव ऋषयस्तमूचुर्भरतर्षभ ।
एवं कृते तु संधाने वृत्रः प्रमुदितोऽभवत् ॥ ३१
यत्तः सदाभवच्चापि शक्रोऽमर्षसमन्वितः ।
वृत्रस्य वधसंयुक्तानुपायाननुचिन्तयन् ।
रन्ध्रान्वेषी समुद्विग्नः सदाभूद्बलवृत्रहा ॥ ३२
स कदाचित्समुद्रान्ते तमपश्यन्महासुरम् ।
संध्याकाल उपावृत्ते मुहूर्ते रम्यदारुणे ॥ ३३
ततः संचिन्त्य भगवान्वरदानं महात्मनः ।
संध्येयं वर्तते रौद्रा न रात्रिर्दिवसं न च ।
वृत्रश्चावश्यवध्योऽयं मम सर्वहरो रिपुः ॥ ३४
यदि वृत्रं न हन्म्यद्य वञ्चयित्वा महासुरम् ।
महाबलं महाकायं न मे श्रेयो भविष्यति ॥ ३५
एवं संचिन्तयन्नेव शक्रो विष्णुमनुस्मरन् ।
अथ फेनं तदापश्यत्समुद्रे पर्वतोपमम् ॥ ३६
नायं शुष्को न चार्द्रोऽयं न च शस्त्रमिदं तथा ।
एनं क्षेप्स्यामि वृत्रस्य क्षणादेव नशिष्यति ॥ ३७
सवज्रमथ फेनं तं क्षिप्रं वृत्रे निसृष्टवान् ।
प्रविश्य फेनं तं विष्णुरथ वृत्रं व्यनाशयत् ॥ ३८
निहते तु ततो वृत्रे दिशो वितिमिराभवन् ।
प्रववौ च शिवो वायुः प्रजाश्च जहृषुस्तदा ॥ ३९
ततो देवाः सगन्धर्वा यक्षराक्षसपन्नगाः ।
ऋषयश्च महेन्द्रं तमस्तुवन्विविधैः स्तवैः ॥ ४०
नमस्कृतः सर्वभूतैः सर्वभूतानि सान्त्वयन् ।
हतशत्रुः प्रहृष्टात्मा वासवः सह दैवतैः ।
विष्णुं त्रिभुवनश्रेष्ठं पूजयामास धर्मवित् ॥ ४१
ततो हते महावीर्ये वृत्रे देवभयंकरे ।
अनृतेनाभिभूतोऽभूच्छक्रः परमदुर्मनाः ।
त्रैशीर्षयाभिभूतश्च स पूर्वं ब्रह्महत्यया ॥ ४२
सोऽन्तमाश्रित्य लोकानां नष्टसंज्ञो विचेतनः ।
न प्राज्ञायत देवेन्द्रस्त्वभिभूतः स्वकल्मषैः ।
प्रतिच्छन्नो वसत्यप्सु चेष्टमान इवोरगः ॥ ४३
ततः प्रनष्टे देवेन्द्रे ब्रह्महत्याभयार्दिते ।
भूमिः प्रध्वस्तसंकाशा निर्वृक्षा शुष्ककानना ।
विच्छिन्नस्रोतसो नद्यः सरांस्यनुदकानि च ॥ ४४
संक्षोभश्चापि सत्त्वानामनावृष्टिकृतोऽभवत् ।
देवाश्चापि भृशं त्रस्तास्तथा सर्वे महर्षयः ॥ ४५
अराजकं जगत्सर्वमभिभूतमुपद्रवैः ।
ततो भीताभवन्देवाः को नो राजा भवेदिति ॥४६

दिवि देवर्षयश्चापि देवराजविनाकृताः ।
न च स्म कश्चिद्देवानां राज्याय कुरुते मनः ॥ ४७

इति श्रीमहाभारते उद्योगपर्वणि
दशमोऽध्यायः ॥ १० ॥

११

शल्य उवाच ।

ऋषयोऽथाब्रुवन्सर्वे देवाश्च त्रिदशेश्वराः ।
अयं वै नहुषः श्रीमान्देवराज्येऽभिषिच्यताम् ।
ते गत्वाथाब्रुवन्सर्वे राजा नो भव पार्थिव ॥ १
स तानुवाच नहुषो देवानृषिगणांस्तथा ।
पितृभिः सहितान्राजन्परीप्सन्हितमात्मनः ॥ २
दुर्बलोऽहं न मे शक्तिर्भवतां परिपालने ।
बलवाञ्जायते राजा बलं शक्रे हि नित्यदा ॥ ३
तमब्रुवन्पुनः सर्वे देवाः सर्षिपुरोगमाः ।
अस्माकं तपसा युक्तः पाहि राज्यं त्रिविष्टपे ॥ ४
परस्परभयं घोरमस्माकं हि न संशयः ।
अभिषिच्यस्व राजेन्द्र भव राजा त्रिविष्टपे ॥ ५
देवदानवयक्षाणामृषीणां रक्षसां तथा ।
पितृगन्धर्वभूतानां चक्षुर्विषयवर्तिनाम् ।
तेज आदास्यसे पश्यन्बलवांश्च भविष्यसि ॥ ६
धर्मं पुरस्कृत्य सदा सर्वलोकाधिपो भव ।
ब्रह्मर्षींश्चापि देवांश्च गोपायस्व त्रिविष्टपे ॥ ७
सुदुर्लभं वरं लब्ध्वा प्राप्य राज्यं त्रिविष्टपे ।
धर्मात्मा सततं भूत्वा कामात्मा समपद्यत ॥ ८
देवोद्यानेषु सर्वेषु नन्दनोपवनेषु च ।
कैलासे हिमवत्पृष्ठे मन्दरे श्वेतपर्वते ।
सह्ये महेन्द्रे मलये समुद्रेषु सरित्सु च ॥ ९
अप्सरोभिः परिवृतो देवकन्यासमावृतः ।
नहुषो देवराजः सन्क्रीडन्बहुविधं तदा ॥ १०
शृण्वन्दिव्या बहुविधाः कथाः श्रुतिमनोहराः ।
वादित्राणि च सर्वाणि गीतं च मधुरस्वरम् ॥ ११
विश्वावसुर्नारदश्च गन्धर्वाप्सरसां गणाः ।
ऋतवः षट् च देवेन्द्रं मूर्तिमन्त उपस्थिताः ।
मारुतः सुरभिर्वाति मनोज्ञः सुखशीतलः ॥ १२
एवं हि क्रीडतस्तस्य नहुषस्य महात्मनः ।
संप्राप्ता दर्शनं देवी शक्रस्य महिषी प्रिया ॥ १३
स तां संदृश्य दुष्टात्मा प्राह सर्वान्सभासदः ।
इन्द्रस्य महिषी देवी कस्मान्मां नोपतिष्ठति ॥ १४
अहमिन्द्रोऽस्मि देवानां लोकानां च तथेश्वरः ।
आगच्छतु शची मह्यं क्षिप्रमद्य निवेशनम् ॥ १५
तच्छ्रुत्वा दुर्मना देवी बृहस्पतिमुवाच ह ।
रक्ष मां नहुषाद्ब्रह्मंस्त्वामस्मि शरणं गता ॥ १६
सर्वलक्षणसंपन्नां ब्रह्मंस्त्वं मां प्रभाषसे ।
देवराजस्य दयितामत्यन्तसुखभागिनीम् ॥ १७
अवैधव्येन संयुक्तामेकपत्नीं पतिव्रताम् ।
उक्तवानसि मां पूर्वमृतां तां कुरु वै गिरम् ॥ १८
नोक्तपूर्वं च भगवन्मृषा ते किंचिदीश्वर ।
तस्मादेतद्भवेत्सत्यं त्वयोक्तं द्विजसत्तम ॥ १९
बृहस्पतिरथोवाच इन्द्राणीं भयमोहिताम् ।
यदुक्तासि मया देवि सत्यं तद्भविता ध्रुवम् ॥२०
द्रक्ष्यसे देवराजानमिन्द्रं शीघ्रमिहागतम् ।
न भेतव्यं च नहुषात्सत्यमेतद्ब्रवीमि ते ।
समानयिष्ये शक्रेण नचिराद्भवतीमहम् ॥ २१
अथ शुश्राव नहुष इन्द्राणीं शरणं गताम् ।
बृहस्पतेरङ्गिरसश्चुक्रोध स नृपस्तदा ॥ २२

इति श्रीमहाभारते उद्योगपर्वणि
एकादशोऽध्यायः ॥ ११ ॥

१२

शल्य उवाच ।

क्रुद्धं तु नहुषं ज्ञात्वा देवाः सर्षिपुरोगमाः ।

अब्रुवन्देवराजानं नहुषं घोरदर्शनम् ॥ १
देवराज जहि क्रोधं त्वयि क्रुद्धे जगद्विभो ।
त्रस्तं सासुरगन्धर्वं सकिंनरमहोरगम् ॥ २
जहि क्रोधमिमं साधो न क्रुध्यन्ति भवद्विधाः ।
परस्य पत्नी सा देवी प्रसीदस्व सुरेश्वर ॥ ३
निवर्तय मनः पापात्परदाराभिमर्शनात् ।
देवराजोऽसि भद्रं ते प्रजा धर्मेण पालय ॥ ४
एवमुक्तो न जग्राह तद्वचः काममोहितः ।
अथ देवानुवाचेदमिन्द्रं प्रति सुराधिपः ॥ ५
अहल्या धर्षिता पूर्वमृषिपत्नी यशस्विनी ।
जीवतो भर्तुरिन्द्रेण स वः किं न निवारितः ॥ ६
बहूनि च नृशंसानि कृतानीन्द्रेण वै पुरा ।
वैधर्म्याण्युपधाश्चैव स वः किं न निवारितः ॥ ७
उपतिष्ठतु मां देवी एतदस्या हितं परम् ।
युष्माकं च सदा देवाः शिवमेवं भविष्यति ॥ ८

देवा ऊचुः ।

इन्द्राणीमानयिष्यामो यथेच्छसि दिवस्पते ।
जहि क्रोधमिमं वीर प्रीतो भव सुरेश्वर ॥ ९

शल्य उवाच ।

इत्युक्त्वा ते तदा देवा ऋषिभिः सह भारत ।
जग्मुर्बृहस्पतिं वक्तुमिन्द्राणीं चाशुभं वचः ॥ १०
जानीमः शरणं प्राप्तामिन्द्राणीं तव वेश्मनि ।
दत्ताभयां च विप्रेन्द्र त्वया देवर्षिसत्तम ॥ ११
ते त्वां देवाः सगन्धर्वा ऋषयश्च महाद्युते ।
प्रसादयन्ति चेन्द्राणी नहुषाय प्रदीयताम् ॥ १२
इन्द्राद्विशिष्टो नहुषो देवराजो महाद्युतिः ।
वृणोत्वियं वरारोहा भर्तृत्वे वरवर्णिनी ॥ १३
एवमुक्ते तु सा देवी बाष्पमुत्सृज्य सस्वरम् ।
उवाच रुदती दीना बृहस्पतिमिदं वचः ॥ १४
नाहमिच्छामि नहुषं पतिमन्वास्य तं प्रभुम् ।
शरणागतास्मि ते ब्रह्मंस्त्राहि मां महतो भयात् ॥१५

बृहस्पतिरुवाच ।

शरणागतां न त्यजेयमिन्द्राणि मम निश्चितम् ।
धर्मज्ञां धर्मशीलां च न त्यजे त्वामनिन्दिते ॥१६
नाकार्यं कर्तुमिच्छामि ब्राह्मणः सन्विशेषतः ।
श्रुतधर्मा सत्यशीलो जानन्धर्मानुशासनम् ॥ १७
नाहमेतत्करिष्यामि गच्छध्वं वै सुरोत्तमाः ।
अस्मिंश्चार्थे पुरा गीतं ब्रह्मणा श्रूयतामिदम् ॥ १८

न तस्य बीजं रोहति बीजकाले
न चास्य वर्षं वर्षति वर्षकाले ।
भीतं प्रपन्नं प्रददाति शत्रवे
न सोऽन्तरं लभते त्राणमिच्छन् ॥ १९
मोघमन्नं विन्दति चाप्यचेताः
स्वर्गाल्लोकाद्भ्रश्यति नष्टचेष्टः ।
भीतं प्रपन्नं प्रददाति यो वै
न तस्य हव्यं प्रतिगृह्णन्ति देवाः ॥ २०
प्रमीयते चास्य प्रजा ह्यकाले
सदा विवासं पितरोऽस्य कुर्वते ।
भीतं प्रपन्नं प्रददाति शत्रवे
सेन्द्रा देवाः प्रहरन्त्यस्य वज्रम् ॥ २१

एतदेवं विजानन्वै न दास्यामि शचीमिमाम् ।
इन्द्राणीं विश्रुतां लोके शक्रस्य महिषीं प्रियाम् ॥ २२
अस्या हितं भवेद्यच्च मम चापि हितं भवेत् ।
क्रियतां तत्सुरश्रेष्ठा न हि दास्याम्यहं शचीम् ॥२३

शल्य उवाच ।

अथ देवास्तमेवाहुर्गुरुमङ्गिरसां वरम् ।
कथं सुनीतं तु भवेन्मन्त्रयस्व बृहस्पते ॥ २४

बृहस्पतिरुवाच ।

नहुषं याचतां देवी किंचित्कालान्तरं शुभा ।
इन्द्राणीहितमेतद्धि तथास्माकं भविष्यति ॥ २५

बहुविघ्नकरः कालः कालः कालं नयिष्यति ।
दर्पितो बलवांश्चापि नहुषो वरसंश्रयात् ॥ २६

शल्य उवाच ।

ततस्तेन तथोक्ते तु प्रीता देवास्तमब्रुवन् ।
ब्रह्मन्साध्विदमुक्तं ते हितं सर्वदिवौकसाम् ।
एवमेतद्द्विजश्रेष्ठ देवी चेयं प्रसाद्यताम् ॥ २७
ततः समस्ता इन्द्राणीं देवाः साग्निपुरोगमाः ।
ऊचुर्वचनमव्यग्रा लोकानां हितकाम्यया ॥ २८
त्वया जगदिदं सर्वं धृतं स्थावरजङ्गमम् ।
एकपत्न्यसि सत्या च गच्छस्व नहुषं प्रति ॥ २९
क्षिप्रं त्वामभिकामश्च विनशिष्यति पार्थिवः ।
नहुषो देवि शक्रश्च सुरैश्वर्यमवाप्स्यति ॥ ३०
एवं विनिश्चयं कृत्वा इन्द्राणी कार्यसिद्धये ।
अभ्यगच्छत सव्रीडा नहुषं घोरदर्शनम् ॥ ३१
दृष्ट्वा तां नहुषश्चापि वयोरूपसमन्विताम् ।
समहृष्यत दुष्टात्मा कामोपहतचेतनः ॥ ३२

इति श्रीमहाभारते उद्योगपर्वणि
द्वादशोऽध्यायः ॥ १२ ॥

१३

शल्य उवाच ।

अथ तामब्रवीद्दृष्ट्वा नहुषो देवराट् तदा ।
त्रयाणामपि लोकानामहमिन्द्रः शुचिस्मिते ।
भजस्व मां वरारोहे पतित्वे वरवर्णिनि ॥ १
एवमुक्ता तु सा देवी नहुषेण पतिव्रता ।
प्रावेपत भयोद्विग्ना प्रवाते कदली यथा ॥ २
नमस्य सा तु ब्रह्माणं कृत्वा शिरसि चाञ्जलिम् ।
देवराजमथोवाच नहुषं घोरदर्शनम् ॥ ३
कालमिच्छाम्यहं लब्धुं किंचित्त्वत्तः सुरेश्वर ।
न हि विज्ञायते शक्रः प्राप्तः किं वा क्व वा गतः ॥४
तत्त्वमेतत्तु विज्ञाय यदि न ज्ञायते प्रभो ।
ततोऽहं त्वामुपस्थास्ये सत्यमेतद्ब्रवीमि ते ।
एवमुक्तः स इन्द्राण्या नहुषः प्रीतिमानभूत् ॥ ५

नहुष उवाच ।

एवं भवतु सुश्रोणि यथा मामभिभाषसे ।
ज्ञात्वा चागमनं कार्यं सत्यमेतदनुस्मरेः ॥ ६

शल्य उवाच ।

नहुषेण विसृष्टा च निश्चक्राम ततः शुभा ।
बृहस्पतिनिकेतं सा जगाम च तपस्विनी ॥ ७
तस्याः संश्रुत्य च वचो देवाः साग्निपुरोगमाः ।
मन्त्रयामासुरेकाग्राः शक्रार्थं राजसत्तम ॥ ८
देवदेवेन संगम्य विष्णुना प्रभविष्णुना ।
ऊचुश्चैनं समुद्विग्ना वाक्यं वाक्यविशारदाः ॥ ९
ब्रह्महत्याभिभूतो वै शक्रः सुरगणेश्वरः ।
गतिश्च नस्त्वं देवेश पूर्वजो जगतः प्रभुः ।
रक्षार्थं सर्वभूतानां विष्णुत्वमुपजग्मिवान् ॥ १०
त्वद्वीर्यान्निहते वृत्रे वासवो ब्रह्महत्यया ।
वृतः सुरगणश्रेष्ठ मोक्षं तस्य विनिर्दिश ॥ ११
तेषां तद्वचनं श्रुत्वा देवानां विष्णुरब्रवीत् ।
मामेव यजतां शक्रः पावयिष्यामि वज्रिणम् ॥ १२
पुण्येन हयमेधेन मामिष्ट्वा पाकशासनः ।
पुनरेष्यति देवानामिन्द्रत्वमकुतोभयः ॥ १३
स्वकर्मभिश्च नहुषो नाशं यास्यति दुर्मतिः ।
कंचित्कालमिमं देवा मर्षयध्वमतन्द्रिताः ॥ १४
श्रुत्वा विष्णोः शुभां सत्यां तां वाणीममृतोपमाम् ।
ततः सर्वे सुरगणाः सोपाध्यायाः सहर्षिभिः ।
यत्र शक्रो भयोद्विग्नस्तं देशमुपचक्रमुः ॥ १५
तत्राश्वमेधः सुमहान्महेन्द्रस्य महात्मनः ।
ववृते पावनार्थं वै ब्रह्महत्यापहो नृप ॥ १६
विभज्य ब्रह्महत्यां तु वृक्षेषु च नदीषु च ।
पर्वतेषु पृथिव्यां च स्त्रीषु चैव युधिष्ठिर ॥ १७

संविभज्य च भूतेषु विसृज्य च सुरेश्वरः ।
विज्वरः पूतपाप्मा च वासवोऽभवदात्मवान् ॥ १८
अकम्प्यं नहुषं स्थानाद्दृष्ट्वा च बलसूदनः ।
तेजोघ्नं सर्वभूतानां वरदानाच्च दुःसहम् ॥ १९
ततः शचीपतिर्वीरः पुनरेव व्यनश्यत ।
अदृश्यः सर्वभूतानां कालाकाङ्क्षी चचार ह ॥ २०
प्रनष्टे तु ततः शक्रे शची शोकसमन्विता ।
हा शक्रेति तदा देवी विललाप सुदुःखिता ॥ २१
यदि दत्तं यदि हुतं गुरवस्तोषिता यदि ।
एकभर्तृत्वमेवास्तु सत्यं यद्यस्ति वा मयि ॥ २२
पुण्यां चेमामहं दिव्यां प्रवृत्तामुत्तरायणे ।
देवीं रात्रिं नमस्यामि सिध्यतां मे मनोरथः ॥२३
प्रयता च निशां देवीमुपातिष्ठत तत्र सा ।
पतिव्रतात्वात्सत्येन सोपश्रुतिमथाकरोत् ॥ २४
यत्रास्ते देवराजोऽसौ तं देशं दर्शयस्व मे ।
इत्याहोपश्रुतिं देवी सत्यं सत्येन दृश्यताम् ॥ २५

इति श्रीमहाभारते उद्योगपर्वणि
त्रयोदशोऽध्यायः ॥ १३ ॥

१४

शल्य उवाच ।

अथैनां रूपिणीं साध्वीमुपातिष्ठदुपश्रुतिः ।
तां वयोरूपसंपन्नां दृष्ट्वा देवीमुपस्थिताम् ॥ १
इन्द्राणी संप्रहृष्टा सा संपूज्यैनामपृच्छत ।
इच्छामि त्वामहं ज्ञातुं का त्वं ब्रूहि वरानने ॥

उपश्रुतिरुवाच ।

उपश्रुतिरहं देवि तवान्तिकामुपागता ।
दर्शनं चैव संप्राप्ता तव सत्येन तोषिता ॥ ३
पतिव्रतासि युक्ता च यमेन नियमेन च ।
दर्शयिष्यामि ते शक्रं देवं वृत्रनिषूदनम् ।
क्षिप्रमन्वेहि भद्रं ते द्रक्ष्यसे सुरसत्तमम् ॥ ४

शल्य उवाच ।

ततस्तां प्रस्थितां देवीमिन्द्राणी सा समन्वगात् ।
देवारण्यान्यतिक्रम्य पर्वतांश्च बहूंस्ततः ।
हिमवन्तमतिक्रम्य उत्तरं पार्श्वमागमत् ॥ ५
समुद्रं च समासाद्य बहुयोजनविस्तृतम् ।
आससाद महाद्वीपं नानाद्रुमलतावृतम् ॥ ६
तत्रापश्यत्सरो दिव्यं नानाशकुनिभिर्वृतम् ।
शतयोजनविस्तीर्णं तावदेवायतं शुभम् ॥ ७
तत्र दिव्यानि पद्मानि पञ्चवर्णानि भारत ।
षट्पदैरुपगीतानि प्रफुल्लानि सहस्रशः ॥ ८
पद्मस्य भित्त्वा नालं च विवेश सहिता तया ।
बिसतन्तुप्रविष्टं च तत्रापश्यच्छतक्रतुम् ॥ ९
तं दृष्ट्वा च सुसूक्ष्मेण रूपेणावस्थितं प्रभुम् ।
सूक्ष्मरूपधरा देवी बभूवोपश्रुतिश्च सा ॥ १०
इन्द्रं तुष्टाव चेन्द्राणी विश्रुतैः पूर्वकर्मभिः ।
स्तूयमानस्ततो देवः शचीमाह पुरंदरः ॥ ११
किमर्थमसि संप्राप्ता विज्ञातश्च कथं त्वहम् ।
ततः सा कथयामास नहुषस्य विचेष्टितम् ॥ १२
इन्द्रत्वं त्रिषु लोकेषु प्राप्य वीर्यमदान्वितः ।
दर्पाविष्टश्च दुष्टात्मा मामुवाच शतक्रतो ।
उपतिष्ठ मामिति क्रूरः कालं च कृतवान्मम ॥ १३
यदि न त्रास्यसि विभो करिष्यति स मां वशे ।
एतेन चाहं संतप्ता प्राप्ता शक्र तवान्तिकम् ।
जहि रौद्रं महाबाहो नहुषं पापनिश्चयम् ॥ १४
प्रकाशयस्व चात्मानं दैत्यदानवसूदन ।
तेजः समाप्नुहि विभो देवराज्यं प्रशाधि च ॥ १५

इति श्रीमहाभारते उद्योगपर्वणि
चतुर्दशोऽध्यायः ॥ १४ ॥

१५

शल्य उवाच ।

एवमुक्तः स भगवाञ्शच्या पुनरथाब्रवीत् ।
विक्रमस्य न कालोऽयं नहुषो बलवत्तरः ॥ १
विवर्धितश्च ऋषिभिर्हव्यैः कव्यैश्च भामिनि ।
नीतिमत्र विधास्यामि देवि तां कर्तुमर्हसि ॥ २
गुह्यं चैतत्त्वया कार्यं नाख्यातव्यं शुभे क्वचित् ।
गत्वा नहुषमेकान्ते ब्रवीहि तनुमध्यमे ॥ ३
ऋषियानेन दिव्येन मामुपैहि जगत्पते ।
एवं तव वशे प्रीता भविष्यामीति तं वद ॥ ४
इत्युक्ता देवराजेन पत्नी सा कमलेक्षणा ।
एवमस्त्वित्यथोक्त्वा तु जगाम नहुषं प्रति ॥ ५
नहुषस्तां ततो दृष्ट्वा विस्मितो वाक्यमब्रवीत् ।
स्वागतं ते वरारोहे किं करोमि शुचिस्मिते ॥ ६
भक्तं मां भज कल्याणि किमिच्छसि मनस्विनि ।
तव कल्याणि यत्कार्यं तत्करिष्ये सुमध्यमे ॥ ७
न च व्रीडा त्वया कार्या सुश्रोणि मयि विश्वस ।
सत्येन वै शपे देवि कर्तास्मि वचनं तव ॥ ८

इन्द्राण्युवाच ।

यो मे त्वया कृतः कालस्तमाकाङ्क्षे जगत्पते ।
ततस्त्वमेव भर्ता मे भविष्यसि सुराधिप ॥ ९
कार्यं च हृदि मे यत्तद्देवराजावधारय ।
वक्ष्यामि यदि मे राजन्प्रियमेतत्करिष्यसि ।
वाक्यं प्रणयसंयुक्तं ततः स्यां वशगा तव ॥ १०
इन्द्रस्य वाजिनो वाहा हस्तिनोऽथ रथास्तथा ।
इच्छाम्यहमिहापूर्वं वाहनं ते सुराधिप ।
यन्न विष्णोर्न रुद्रस्य नासुराणां न रक्षसाम् ॥ ११
वहन्तु त्वां महाराज ऋषयः संगता विभो ।
सर्वे शिबिकया राजन्नेतद्धि मम रोचते ॥ १२
नासुरेषु न देवेषु तुल्यो भवितुमर्हसि ।
सर्वेषां तेज आदत्स्व स्वेन वीर्येण दर्शनात् ।
न ते प्रमुखतः स्थातुं कश्चिदिच्छति वीर्यवान् ॥ १३

शल्य उवाच ।

एवमुक्तस्तु नहुषः प्राहृष्यत तदा किल ।
उवाच वचनं चापि सुरेन्द्रस्तामनिन्दिताम् ॥ १४
अपूर्वं वाहनमिदं त्वयोक्तं वरवर्णिनि ।
दृढं मे रुचितं देवि त्वद्वशोऽस्मि वरानने ॥ १५
न ह्यल्पवीर्यो भवति यो वाहान्कुरुते मुनीन् ।
अहं तपस्वी बलवान्भूतभव्यभवत्प्रभुः ॥ १६
मयि क्रुद्धे जगन्न स्यान्मयि सर्वं प्रतिष्ठितम् ।
देवदानवगन्धर्वाः किंनरोरगराक्षसाः ॥ १७
न मे क्रुद्धस्य पर्याप्ताः सर्वे लोकाः शुचिस्मिते ।
चक्षुषा यं प्रपश्यामि तस्य तेजो हराम्यहम् ॥ १८
तस्मात्ते वचनं देवि करिष्यामि न संशयः ।
सप्तर्षयो मां वक्ष्यन्ति सर्वे ब्रह्मर्षयस्तथा ।
पश्य माहात्म्यमस्माकमृद्धिं च वरवर्णिनि ॥ १९
एवमुक्त्वा तु तां देवीं विसृज्य च वराननाम् ।
विमाने योजयित्वा स ऋषीन्नियममास्थितान् ॥ २०
अब्रह्मण्यो बलोपेतो मत्तो वरमदेन च ।
कामवृत्तः स दुष्टात्मा वाहयामास तानृषीन् ॥ २१
नहुषेण विसृष्टा च बृहस्पतिमुवाच सा ।
समयोऽल्पावशेषो मे नहुषेणेह यः कृतः ।
शक्रं मृगय शीघ्रं त्वं भक्तायाः कुरु मे दयाम् ॥ २२
बाढमित्येव भगवान्बृहस्पतिरुवाच ताम् ।
न भेतव्यं त्वया देवि नहुषाद्दुष्टचेतसः ॥ २३
न ह्येष स्थास्यति चिरं गत एष नराधमः ।
अधर्मज्ञो महर्षीणां वाहनाच्च हतः शुभे ॥ २४
इष्टिं चाहं करिष्यामि विनाशायास्य दुर्मतेः ।
शक्रं चाधिगमिष्यामि मा भैस्त्वं भद्रमस्तु ते ॥ २५
ततः प्रज्वाल्य विधिवज्जुहाव परमं हविः ।

बृहस्पतिर्महातेजा देवराजोपलब्धये ॥ २६
तस्माच्च भगवान्देवः स्वयमेव हुताशनः ।
स्त्रीवेषमद्भुतं कृत्वा सहसान्तरधीयत ॥ २७
स दिशः प्रदिशश्चैव पर्वतांश्च वनानि च ।
पृथिवीं चान्तरिक्षं च विचीयातिमनोगतिः ।
निमेषान्तरमात्रेण बृहस्पतिमुपागमत् ॥ २८

अग्निरुवाच ।

बृहस्पते न पश्यामि देवराजमहं क्वचित् ।
आपः शेषाः सदा चापः प्रवेष्टुं नोत्सहाम्यहम् ।
न मे तत्र गतिर्ब्रह्मन्किमन्यत्करवाणि ते ॥ २९

शल्य उवाच ।

तमब्रवीद्देवगुरुरपो विश महाद्युते ॥ ३०

अग्निरुवाच ।

नापः प्रवेष्टुं शक्ष्यामि क्षयो मेऽत्र भविष्यति ।
शरणं त्वां प्रपन्नोऽस्मि स्वस्ति तेऽस्तु महाद्युते ॥३१
अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् ।
तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥ ३२

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥

१६

बृहस्पतिरुवाच ।

त्वमग्ने सर्वदेवानां मुखं त्वमसि हव्यवाट् ।
त्वमन्तः सर्वभूतानां गूढश्चरसि साक्षिवत् ॥ १
त्वामाहुरेकं कवयस्त्वामाहुस्त्रिविधं पुनः ।
त्वया त्यक्तं जगच्चेदं सद्यो नश्येद्धुताशन ॥ २
कृत्वा तुभ्यं नमो विप्राः स्वकर्मविजितां गतिम् ।
गच्छन्ति सह पत्नीभिः सुतैरपि च शाश्वतीम् ॥३
त्वमेवाग्ने हव्यवाहस्त्वमेव परमं हविः ।
यजन्ति सत्रैस्त्वामेव यज्ञैश्च परमाध्वरे ॥ ४
सृष्ट्वा लोकांस्त्रीनिमान्हव्यवाह
प्राप्ते काले पचसि पुनः समिद्धः ।
सर्वस्यास्य भुवनस्य प्रसूति-
स्त्वमेवाग्ने भवसि पुनः प्रतिष्ठा ॥ ५
त्वामग्ने जलदानाहुर्विद्युतश्च त्वमेव हि ।
दहन्ति सर्वभूतानि त्वत्तो निष्क्रम्य हायनाः ॥ ६
त्वय्यापो निहिताः सर्वास्त्वयि सर्वमिदं जगत् ।
न तेऽस्त्यविदितं किंचित्त्रिषु लोकेषु पावक ॥ ७
स्वयोनिं भजते सर्वो विशस्वापोऽविशङ्कितः ।
अहं त्वां वर्धयिष्यामि ब्राह्मैर्मन्त्रैः सनातनैः ॥ ८

शल्य उवाच ।

एवं स्तुतो हव्यवाहो भगवान्कविरुत्तमः ।
बृहस्पतिमथोवाच प्रीतिमान्वाक्यमुत्तमम् ।
दर्शयिष्यामि ते शक्रं सत्यमेतद्ब्रवीमि ते ॥ ९
प्रविश्यापस्ततो वह्निः ससमुद्राः सपल्वलाः ।
आजगाम सरस्तच्च गूढो यत्र शतक्रतुः ॥ १०
अथ तत्रापि पद्मानि विचिन्वन्भरतर्षभ ।
अन्वपश्यत्स देवेन्द्रं बिसमध्यगतं स्थितम् ॥ ११
आगत्य च ततस्तूर्णं तमाचष्ट बृहस्पतेः ।
अणुमात्रेण वपुषा पद्मतन्त्वाश्रितं प्रभुम् ॥ १२
गत्वा देवर्षिगन्धर्वैः सहितोऽथ बृहस्पतिः ।
पुराणैः कर्मभिर्देवं तुष्टाव बलसूदनम् ॥ १३
महासुरो हतः शक्र नमुचिर्दारुणस्त्वया ।
शम्बरश्च बलश्चैव तथोभौ घोरविक्रमौ ॥ १४
शतक्रतो विवर्धस्व सर्वाञ्शत्रून्निषूदय ।
उत्तिष्ठ वज्रिन्संपश्य देवर्षींश्च समागतान् ॥ १५
महेन्द्र दानवान्हत्वा लोकास्त्रातास्त्वया विभो ।
अपां फेनं समासाद्य विष्णुतेजोपबृंहितम् ।
त्वया वृत्रो हतः पूर्वं देवराज जगत्पते ॥ १६
त्वं सर्वभूतेषु वरेण्य ईड्य-
स्त्वया समं विद्यते नेह भूतम् ।

त्वया धार्यन्ते सर्वभूतानि शक्र
त्वं देवानां महिमानं चकर्थ ॥ १७
पाहि देवान्सलोकांश्च महेन्द्र बलमाप्नुहि ।
एवं संस्तूयमानश्च सोऽवर्धत शनैः शनैः ॥ १८
स्वं चैव वपुरास्थाय बभूव स बलान्वितः ।
अब्रवीच्च गुरुं देवो बृहस्पतिमुपस्थितम् ॥ १९
किं कार्यमवशिष्टं वो हतस्त्वाष्ट्रो महासुरः ।
वृत्रश्च सुमहाकायो ग्रस्तुं लोकानियेष यः ॥ २०

बृहस्पतिरुवाच ।

मानुषो नहुषो राजा देवर्षिगणतेजसा ।
देवराज्यमनुप्राप्तः सर्वान्नो बाधते भृशम् ॥ २१

इन्द्र उवाच ।

कथं नु नहुषो राज्यं देवानां प्राप दुर्लभम् ।
तपसा केन वा युक्तः किंवीर्यो वा बृहस्पते ॥ २२

बृहस्पतिरुवाच ।

देवा भीताः शक्रमकामयन्त
त्वया त्यक्तं महदैन्द्रं पदं तत् ।
तदा देवाः पितरोऽथर्षयश्च
गन्धर्वसंघाश्च समेत्य सर्वे ॥ २३
गत्वाब्रुवन्नहुषं शक्र तत्र
त्वं नो राजा भव भुवनस्य गोप्ता ।
तानब्रवीन्नहुषो नास्मि शक्त
आप्यायध्वं तपसा तेजसा च ॥ २४
एवमुक्तैर्वर्धितश्चापि देवै
राजाभवन्नहुषो घोरवीर्यः ।
त्रैलोक्ये च प्राप्य राज्यं तपस्विनः
कृत्वा वाहान्याति लोकान्दुरात्मा ॥ २५
तेजोहरं दृष्टिविषं सुघोरं
मा त्वं पश्येर्नहुषं वै कदाचित् ।
देवाश्च सर्वे नहुषं भयार्ता
न पश्यन्तो गूढरूपाश्चरन्ति ॥ २६

शल्य उवाच ।

एवं वदत्यङ्गिरसां वरिष्ठे
बृहस्पतौ लोकपालः कुबेरः ।
वैवस्वतश्चैव यमः पुराणो
देवश्च सोमो वरुणश्चाजगाम ॥ २७
ते वै समागम्य महेन्द्रमूचु-
र्दिष्ट्या त्वाष्ट्रो निहतश्चैव वृत्रः ।
दिष्ट्या च त्वां कुशलिनमक्षतं च
पश्यामो वै निहतारिं च शक्र ॥ २८
स तान्यथावत्प्रतिभाष्य शक्रः
संचोदयन्नहुषस्यान्तरेण ।
राजा देवानां नहुषो घोररूप-
स्तत्र साह्यं दीयतां मे भवद्भिः ॥ २९
ते चाब्रुवन्नहुषो घोररूपो
दृष्टीविषस्तस्य बिभीम देव ।
त्वं चेद्राजन्नहुषं पराजये-
स्तद्वै वयं भागमर्हाम शक्र ॥ ३०
इन्द्रोऽब्रवीद्भवतु भवानपां पति-
र्यमः कुबेरश्च महाभिषेकम् ।
संप्राप्नुवन्त्वद्य सहैव तेन
रिपुं जयामो नहुषं घोरदृष्टिम् ॥ ३१
ततः शक्रं ज्वलनोऽप्याह भागं
प्रयच्छ मह्यं तव साह्यं करिष्ये ।
तमाह शक्रो भविताग्ने तवापि
ऐन्द्राग्नो वै भाग एको महाक्रतौ ॥ ३२
एवं संचिन्त्य भगवान्महेन्द्रः पाकशासनः ।
कुबेरं सर्वयक्षाणां धनानां च प्रभुं तथा ॥ ३३
वैवस्वतं पितॄणां च वरुणं चाप्यपां तथा ।

आधिपत्यं ददौ शक्रः सत्कृत्य वरदस्तदा ॥ ३४

इति श्रीमहाभारते उद्योगपर्वणि
षोडशोऽध्यायः ॥ १६ ॥

१७

शल्य उवाच ।

अथ संचिन्तयानस्य देवराजस्य धीमतः ।
नहुषस्य वधोपायं लोकपालैः सहैव तैः ।
तपस्वी तत्र भगवानगस्त्यः प्रत्यदृश्यत ॥ १
सोऽब्रवीदर्च्य देवेन्द्रं दिष्ट्या वै वर्धते भवान् ।
विश्वरूपविनाशेन वृत्रासुरवधेन च ॥ २
दिष्ट्या च नहुषो भ्रष्टो देवराज्यात्पुरंदर ।
दिष्ट्या हतारिं पश्यामि भवन्तं बलसूदन ॥ ३

इन्द्र उवाच ।

स्वागतं ते महर्षेऽस्तु प्रीतोऽहं दर्शनात्तव ।
पाद्यमाचमनीयं च गामर्घ्यं च प्रतीच्छ मे ॥ ४

शल्य उवाच ।

पूजितं चोपविष्टं तमासने मुनिसत्तमम् ।
पर्यपृच्छत देवेशः प्रहृष्टो ब्राह्मणर्षभम् ॥ ५
एतदिच्छामि भगवन्कथ्यमानं द्विजोत्तम ।
परिभ्रष्टः कथं स्वर्गान्नहुषः पापनिश्चयः ॥ ६

अगस्त्य उवाच ।

शृणु शक्र प्रियं वाक्यं यथा राजा दुरात्मवान् ।
स्वर्गाद्भ्रष्टो दुराचारो नहुषो बलदर्पितः ॥ ७
श्रमार्तास्तु वहन्तस्तं नहुषं पापकारिणम् ।
देवर्षयो महाभागास्तथा ब्रह्मर्षयोऽमलाः ।
पप्रच्छुः संशयं देव नहुषं जयतां वर ॥ ८
य इमे ब्रह्मणा प्रोक्ता मन्त्रा वै प्रोक्षणे गवाम् ।
एते प्रमाणं भवत उताहो नेति वासव ।
नहुषो नेति तानाह तमसा मूढचेतनः ॥ ९

ऋषय ऊचुः ।

अधर्मे संप्रवृत्तस्त्वं धर्मं न प्रतिपद्यसे ।
प्रमाणमेतदस्माकं पूर्वं प्रोक्तं महर्षिभिः ॥ १०

अगस्त्य उवाच ।

ततो विवदमानः स मुनिभिः सह वासव ।
अथ मामस्पृशन्मूर्ध्नि पादेनाधर्मपीडितः ॥ ११
तेनाभूद्धततेजाः स निःश्रीकश्च शचीपते ।
ततस्तमहमाविग्नमवोचं भयपीडितम् ॥ १२
यस्मात्पूर्वैः कृतं ब्रह्म ब्रह्मर्षिभिरनुष्ठितम् ।
अदुष्टं दूषयसि वै यच्च मूर्ध्न्यस्पृशः पदा ॥ १३
यच्चापि त्वमृषीन्मूढ ब्रह्मकल्पान्दुरासदान् ।
वाहान्कृत्वा वाहयसि तेन स्वर्गाद्धतप्रभः ॥ १४
ध्वंस पाप परिभ्रष्टः क्षीणपुण्यो महीतलम् ।
दश वर्षसहस्राणि सर्परूपधरो महान् ।
विचरिष्यसि पूर्णेषु पुनः स्वर्गमवाप्स्यसि ॥ १५
एवं भ्रष्टो दुरात्मा स देवराज्यादरिंदम ।
दिष्ट्या वर्धामहे शक्र हतो ब्राह्मणकण्टकः ॥ १६
त्रिविष्टपं प्रपद्यस्व पाहि लोकाञ्शचीपते ।
जितेन्द्रियो जितामित्रः स्तूयमानो महर्षिभिः ॥ १७

शल्य उवाच ।

ततो देवा भृशं तुष्टा महर्षिगणसंवृताः ।
पितरश्चैव यक्षाश्च भुजगा राक्षसास्तथा ॥ १८
गन्धर्वा देवकन्याश्च सर्वे चाप्सरसां गणाः
सरांसि सरितः शैलाः सागराश्च विशां पते ॥ १९
उपगम्याब्रुवन्सर्वे दिष्ट्या वर्धसि शत्रुहन् ।
हतश्च नहुषः पापो दिष्ट्यागस्त्येन धीमता ।
दिष्ट्या पापसमाचारः कृतः सर्पो महीतले ॥ २०

इति श्रीमहाभारते उद्योगपर्वणि
सप्तदशोऽध्यायः ॥ १७ ॥

१८

शल्य उवाच ।

ततः शक्रः स्तूयमानो गन्धर्वाप्सरसां गणैः ।
ऐरावतं समारुह्य द्विपेन्द्रं लक्षणैर्युतम् ॥ १
पावकश्च महातेजा महर्षिश्च बृहस्पतिः ।
यमश्च वरुणश्चैव कुबेरश्च धनेश्वरः ॥ २
सर्वैर्देवैः परिवृतः शक्रो वृत्रनिषूदनः ।
गन्धर्वैरप्सरोभिश्च यातस्त्रिभुवनं प्रभुः ॥ ३
स समेत्य महेन्द्राण्या देवराजः शतक्रतुः ।
मुदा परमया युक्तः पालयामास देवराट् ॥ ४
ततः स भगवांस्तत्र अङ्गिराः समदृश्यत ।
अथर्ववेदमन्त्रैश्च देवेन्द्रं समपूजयत् ॥ ५
ततस्तु भगवानिन्द्रः प्रहृष्टः समपद्यत ।
वरं च प्रददौ तस्मै अथर्वाङ्गिरसे तदा ॥ ६
अथर्वाङ्गिरसं नाम अस्मिन्वेदे भविष्यति ।
उदाहरणमेतद्धि यज्ञभागं च लप्स्यसे ॥ ७
एवं संपूज्य भगवानथर्वाङ्गिरसं तदा ।
व्यसर्जयन्महाराज देवराजः शतक्रतुः ॥ ८
संपूज्य सर्वांस्त्रिदशानृषींश्चापि तपोधनान् ।
इन्द्रः प्रमुदितो राजन्धर्मेणापालयत्प्रजाः ॥ ९
एवं दुःखमनुप्राप्तमिन्द्रेण सह भार्यया ।
अज्ञातवासश्च कृतः शत्रूणां वधकाङ्क्षया ॥ १०
नात्र मन्युस्त्वया कार्यो यत्क्लिष्टोऽसि महावने ।
द्रौपद्या सह राजेन्द्र भ्रातृभिश्च महात्मभिः ॥११
एवं त्वमपि राजेन्द्र राज्यं प्राप्स्यसि भारत ।
वृत्रं हत्वा यथा प्राप्तः शक्रः कौरवनन्दन ॥ १२
दुराचारश्च नहुषो ब्रह्मद्विट् पापचेतनः ।
अगस्त्यशापाभिहतो विनष्टः शाश्वतीः समाः ॥ १३
एवं तव दुरात्मानः शत्रवः शत्रुसूदन ।
क्षिप्रं नाशं गमिष्यन्ति कर्णदुर्योधनादयः ॥ १४
ततः सागरपर्यन्तां भोक्ष्यसे मेदिनीमिमाम् ।
भ्रातृभिः सहितो वीर द्रौपद्या च सहाभिभो ॥१५
उपाख्यानमिदं शक्रविजयं वेदसंमितम् ।
राज्ञा व्यूढेष्वनीकेषु श्रोतव्यं जयमिच्छता ॥ १६
तस्मात्संश्रावयामि त्वां विजयं जयतां वर ।
संस्तूयमाना वर्धन्ते महात्मानो युधिष्ठिर ॥ १७
क्षत्रियाणामभावोऽयं युधिष्ठिर महात्मनाम् ।
दुर्योधनापराधेन भीमार्जुनबलेन च ॥ १८
आख्यानमिन्द्रविजयं य इदं नियतः पठेत् ।
धूतपाप्मा जितस्वर्गः स प्रेत्येह च मोदते ॥ १९
न चारिजं भयं तस्य न चापुत्रो भवेन्नरः ।
नापदं प्राप्नुयात्कांचिद्दीर्घमायुश्च विन्दति ।
सर्वत्र जयमाप्नोति न कदाचित्पराजयम् ॥ २०

वैशंपायन उवाच ।

एवमाश्वासितो राजा शल्येन भरतर्षभ ।
पूजयामास विधिवच्छल्यं धर्मभृतां वरः ॥ २१
श्रुत्वा शल्यस्य वचनं कुन्तीपुत्रो युधिष्ठिरः ।
प्रत्युवाच महाबाहुर्मद्रराजमिदं वचः ॥ २२
भवान्कर्णस्य सारथ्यं करिष्यति न संशयः ।
तत्र तेजोवधः कार्यः कर्णस्य मम संस्तवैः ॥ २३

शल्य उवाच ।

एवमेतत्करिष्यामि यथा मां संप्रभाषसे ।
यच्चान्यदपि शक्ष्यामि तत्करिष्याम्यहं तव ॥ २४

वैशंपायन उवाच ।

तत आमन्त्र्य कौन्तेयाञ्शल्यो मद्राधिपस्तदा ।
जगाम सबलः श्रीमान्दुर्योधनमरिंदमः ॥ २५

इति श्रीमहाभारते उद्योगपर्वणि
अष्टादशोऽध्यायः ॥ १८ ॥

१९

वैशंपायन उवाच ।

युयुधानस्ततो वीरः सात्वतानां महारथः ।
महता चतुरङ्गेण बलेनागाद्युधिष्ठिरम् ॥ १
तस्य योधा महावीर्या नानादेशसमागताः ।
नानाप्रहरणा वीराः शोभयांचक्रिरे बलम् ॥ २
परश्वधैर्भिण्डिपालैः शक्तितोमरमुद्गरैः ।
शक्त्यृष्टिपरशुप्रासैः करवालैश्च निर्मलैः ॥ ३
खड्गकार्मुकनिर्यूहैः शरैश्च विविधैरपि ।
तैलधौतैः प्रकाशद्भिस्तदशोभत वै बलम् ॥ ४
तस्य मेघप्रकाशस्य शस्त्रैस्तैः शोभितस्य च ।
बभूव रूपं सैन्यस्य मेघस्येव सविद्युतः ॥ ५
अक्षौहिणी हि सेना सा तदा यौधिष्ठिरं बलम् ।
प्रविश्यान्तर्दधे राजन्सागरं कुनदी यथा ॥ ६
तथैवाक्षौहिणीं गृह्य चेदीनामृषभो बली ।
धृष्टकेतुरुपागच्छत्पाण्डवानमितौजसः ॥ ७
मागधश्च जयत्सेनो जारासंधिर्महाबलः ।
अक्षौहिण्यैव सैन्यस्य धर्मराजमुपागमत् ॥ ८
तथैव पाण्ड्यो राजेन्द्र सागरानूपवासिभिः ।
वृतो बहुविधैर्योधैर्युधिष्ठिरमुपागमत् ॥ ९
तस्य सैन्यमतीवासीत्तस्मिन्बलसमागमे ।
प्रेक्षणीयतरं राजन्सुवेषं बलवत्तदा ॥ १०
द्रुपदस्याप्यभूत्सेना नानादेशसमागतैः ।
शोभिता पुरुषैः शूरैः पुत्रैश्चास्य महारथैः ॥ ११
तथैव राजा मत्स्यानां विराटो वाहिनीपतिः ।
पार्वतीयैर्महीपालैः सहितः पाण्डवानियात् ॥ १२
इतश्चेतश्च पाण्डूनां समाजग्मुर्महात्मनाम् ।
अक्षौहिण्यस्तु सप्तैव विविधध्वजसंकुलाः ।
युयुत्समानाः कुरुभिः पाण्डवान्समहर्षयन् ॥ १३
तथैव धार्तराष्ट्रस्य हर्षं समभिवर्धयन् ।
भगदत्तो महीपालः सेनामक्षौहिणीं ददौ ॥ १४
तस्य चीनैः किरातैश्च काञ्चनैरिव संवृतम् ।
बभौ बलमनाधृष्यं कर्णिकारवनं यथा ॥ १५
तथा भूरिश्रवाः शूरः शल्यश्च कुरुनन्दन ।
दुर्योधनमुपायातावक्षौहिण्या पृथक्पृथक् ॥ १६
कृतवर्मा च हार्दिक्यो भोजान्धकबलैः सह ।
अक्षौहिण्यैव सेनाया दुर्योधनमुपागमत् ॥ १७
तस्य तैः पुरुषव्याघ्रैर्वनमालाधरैर्बलम् ।
अशोभत यथा मत्तैर्वनं प्रक्रीडितैर्गजैः ॥ १८
जयद्रथमुखाश्चान्ये सिन्धुसौवीरवासिनः ।
आजग्मुः पृथिवीपालाः कम्पयन्त इवाचलान् ॥१९
तेषामक्षौहिणी सेना बहुला विबभौ तदा ।
विधूयमाना वातेन बहुरूपा इवाम्बुदाः ॥ २०
सुदक्षिणश्च काम्बोजो यवनैश्च शकैस्तथा ।
उपाजगाम कौरव्यमक्षौहिण्या विशां पते ॥ २१
तस्य सेनासमावायः शलभानामिवाबभौ ।
स च संप्राप्य कौरव्यं तत्रैवान्तर्दधे तदा ॥ २२
तथा माहिष्मतीवासी नीलो नीलायुधैः सह ।
महीपालो महावीर्यैर्दक्षिणापथवासिभिः ॥ २३
आवन्त्यौ च महीपालौ महाबलसुसंवृतौ ।
पृथगक्षौहिणीभ्यां तावभियातौ सुयोधनम् ॥ २४
केकयाश्च नरव्याघ्राः सोदर्याः पञ्च पार्थिवाः ।
संहर्षयन्तः कौरव्यमक्षौहिण्या समाद्रवन् ॥ २५
इतश्चेतश्च सर्वेषां भूमिपानां महात्मनाम् ।
तिस्रोऽन्याः समवर्तन्त वाहिन्यो भरतर्षभ ॥ २६
एवमेकादशावृत्ताः सेना दुर्योधनस्य ताः ।
युयुत्समानाः कौन्तेयान्नानाध्वजसमाकुलाः ॥ २७
न हास्तिनपुरे राजन्नवकाशोऽभवत्तदा ।
राज्ञां सबलमुख्यानां प्राधान्येनापि भारत ॥ २८
ततः पञ्चनदं चैव कृत्स्नं च कुरुजाङ्गलम् ।

तथा रोहितकारण्यं मरुभूमिश्च केवला ॥ २९
अहिच्छत्रं कालकूटं गङ्गाकूलं च भारत ।
वारणा वाटधानं च यामुनश्चैव पर्वतः ॥ ३०
एष देशः सुविस्तीर्णः प्रभूतधनधान्यवान् ।
बभूव कौरवेयाणां बलेन सुसमाकुलः ॥ ३१
तत्र सैन्यं तथायुक्तं ददर्श स पुरोहितः ।
यः स पाञ्चालराजेन प्रेषितः कौरवान्प्रति ॥ ३२

इति श्रीमहाभारते उद्योगपर्वणि
एकोनविंशोऽध्यायः ॥ १९ ॥

२०

वैशंपायन उवाच ।

स तु कौरव्यमासाद्य द्रुपदस्य पुरोहितः ।
सत्कृतो धृतराष्ट्रेण भीष्मेण विदुरेण च ॥ १
सर्वं कौशल्यमुक्त्वादौ पृष्ट्वा चैवमनामयम् ।
सर्वसेनाप्रणेतॄणां मध्ये वाक्यमुवाच ह ॥ २
सर्वैर्भवद्भिर्विदितो राजधर्मः सनातनः ।
वाक्योपादानहेतोस्तु वक्ष्यामि विदिते सति ॥ ३
धृतराष्ट्रश्च पाण्डुश्च सुतावेकस्य विश्रुतौ ।
तयोः समानं द्रविणं पैतृकं नात्र संशयः ॥ ४
धृतराष्ट्रस्य ये पुत्रास्ते प्राप्ताः पैतृकं वसु ।
पाण्डुपुत्राः कथं नाम न प्राप्ताः पैतृकं वसु ॥ ५
एवं गते पाण्डवेयैर्विदितं वः पुरा यथा ।
न प्राप्तं पैतृकं द्रव्यं धार्तराष्ट्रेण संवृतम् ॥ ६
प्राणान्तिकैरप्युपायैः प्रयतद्भिरनेकशः ।
शेषवन्तो न शकिता नयितुं यमसादनम् ॥ ७
पुनश्च वर्धितं राज्यं स्वबलेन महात्मभिः ।
छद्मनापहृतं क्षुद्रैर्धार्तराष्ट्रैः ससौबलैः ॥ ८
तदप्यनुमतं कर्म तथायुक्तमनेन वै ।
वासिताश्च महारण्ये वर्षाणीह त्रयोदश ॥ ९
सभायां क्लेशितैर्वीरैः सहभार्यैस्तथा भृशम् ।
अरण्ये विविधाः क्लेशाः संप्राप्तास्तैः सुदारुणाः ॥१०
तथा विराटनगरे योन्यन्तरगतैरिव ।
प्राप्तः परमसंक्लेशो यथा पापैर्महात्मभिः ॥ ११
ते सर्वे पृष्ठतः कृत्वा तत्सर्वं पूर्वकिल्बिषम् ।
सामैव कुरुभिः सार्धमिच्छन्ति कुरुपुंगवाः ॥ १२
तेषां च वृत्तमाज्ञाय वृत्तं दुर्योधनस्य च ।
अनुनेतुमिहार्हन्ति धृतराष्ट्रं सुहृज्जनाः ॥ १३
न हि ते विग्रहं वीराः कुर्वन्ति कुरुभिः सह ।
अविनाशेन लोकस्य काङ्क्षन्ते पाण्डवाः स्वकम् ॥१४
यश्चापि धार्तराष्ट्रस्य हेतुः स्याद्विग्रहं प्रति ।
स च हेतुर्न मन्तव्यो बलीयांसस्तथा हि ते ॥१५
अक्षौहिण्यो हि सप्तैव धर्मपुत्रस्य संगताः ।
युयुत्समानाः कुरुभिः प्रतीक्षन्तेऽस्य शासनम् ॥१६
अपरे पुरुषव्याघ्राः सहस्राक्षौहिणीसमाः ।
सात्यकिर्भीमसेनश्च यमौ च सुमहाबलौ ॥ १७
एकादशैताः पृतना एकतश्च समागताः ।
एकतश्च महाबाहुर्बहुरूपो धनंजयः ॥ १८
यथा किरीटी सेनाभ्यः सर्वाभ्यो व्यतिरिच्यते ।
एवमेव महाबाहुर्वासुदेवो महाद्युतिः ॥ १९
बहुलत्वं च सेनानां विक्रमं च किरीटिनः ।
बुद्धिमत्तां च कृष्णस्य बुद्ध्वा युध्येत को नरः ॥२०
ते भवन्तो यथाधर्मं यथासमयमेव च ।
प्रयच्छन्तु प्रदातव्यं मा वः कालोऽत्यगादयम् ॥२१

इति श्रीमहाभारते उद्योगपर्वणि
विंशोऽध्यायः ॥ २० ॥

२१

वैशंपायन उवाच ।

तस्य तद्वचनं श्रुत्वा प्रज्ञावृद्धो महाद्युतिः ।
संपूज्यैनं यथाकालं भीष्मो वचनमब्रवीत् ॥ १
दिष्ट्या कुशलिनः सर्वे पाण्डवाः सह बान्धवैः ।

दिष्ट्या सहायवन्तश्च दिष्ट्या धर्मे च ते रताः ॥ २
दिष्ट्या च संधिकामास्ते भ्रातरः कुरुनन्दनाः ।
दिष्ट्या न युद्धमनसः सह दामोदरेण ते ॥ ३
भवता सत्यमुक्तं च सर्वमेतन्न संशयः ।
अतितीक्ष्णं तु ते वाक्यं ब्राह्मण्यादिति मे मतिः ॥४
असंशयं क्लेशितास्ते वने चेह च पाण्डवाः ।
प्राप्ताश्च धर्मतः सर्वं पितुर्धनमसंशयम् ॥ ५
किरीटी बलवान्पार्थः कृतास्त्रश्च महाबलः ।
को हि पाण्डुसुतं युद्धे विषहेत धनंजयम् ॥ ६
अपि वज्रधरः साक्षात्किमुतान्ये धनुर्भृतः ।
त्रयाणामपि लोकानां समर्थ इति मे मतिः ॥ ७
भीष्मे ब्रुवति तद्वाक्यं धृष्टमाक्षिप्य मन्युमान् ।
दुर्योधनं समालोक्य कर्णो वचनमब्रवीत् ॥ ८
न तन्न विदितं ब्रह्मँल्लोके भूतेन केनचित् ।
पुनरुक्तेन किं तेन भाषितेन पुनः पुनः ॥ ९
दुर्योधनार्थे शकुनिर्द्यूते निर्जितवान्पुरा ।
समयेन गतोऽरण्यं पाण्डुपुत्रो युधिष्ठिरः ॥ १०
न तं समयमादृत्य राज्यमिच्छति पैतृकम् ।
बलमाश्रित्य मत्स्यानां पाञ्चालानां च पार्थिवः ॥११
दुर्योधनो भयाद्विद्वन्न दद्यात्पदमन्ततः ।
धर्मतस्तु महीं कृत्स्नां प्रदद्याच्छत्रवेऽपि च ॥ १२
यदि काङ्क्षन्ति ते राज्यं पितृपैतामहं पुनः ।
यथाप्रतिज्ञं कालं तं चरन्तु वनमाश्रिताः ॥ १३
ततो दुर्योधनस्याङ्के वर्तन्तामकुतोभयाः ।
अधार्मिकामिमां बुद्धिं कुर्युर्मौर्ख्याद्धि केवलम् ॥१४
अथ ते धर्ममुत्सृज्य युद्धमिच्छन्ति पाण्डवाः ।
आसाद्येमान्कुरुश्रेष्ठान्स्मरिष्यन्ति वचो मम ॥ १५

भीष्म उवाच ।

किं नु राधेय वाचा ते कर्म तत्स्मर्तुमर्हसि ।
एक एव यदा पार्थः षड्रथाञ्जितवान्युधि ॥ १६
न चेदेवं करिष्यामो यदयं ब्राह्मणोऽब्रवीत् ।
ध्रुवं युधि हतास्तेन भक्षयिष्याम पांसुकान् ॥ १७

वैशंपायन उवाच ।

धृतराष्ट्रस्ततो भीष्ममनुमान्य प्रसाद्य च ।
अवभर्त्स्य च राधेयमिदं वचनमब्रवीत् ॥ १८
अस्मद्धितमिदं वाक्यं भीष्मः शांतनवोऽब्रवीत् ।
पाण्डवानां हितं चैव सर्वस्य जगतस्तथा ॥ १९
चिन्तयित्वा तु पार्थेभ्यः प्रेषयिष्यामि संजयम् ।
स भवान्प्रतियात्वद्य पाण्डवानेव माचिरम् ॥ २०
स तं सत्कृत्य कौरव्यः प्रेषयामास पाण्डवान् ।
सभामध्ये समाहूय संजयं वाक्यमब्रवीत् ॥ २१

इति श्रीमहाभारते उद्योगपर्वणि
एकविंशोऽध्यायः ॥ २१ ॥

॥ समाप्तमुद्योगपर्व ॥

२२

धृतराष्ट्र उवाच ।

प्राप्तानाहुः संजय पाण्डुपुत्रा-
नुपप्लव्ये तान्विजानीहि गत्वा ।
अजातशत्रुं च सभाजयेथा
दिष्ट्यानघ ग्राममुपस्थितस्त्वम् ॥ १
सर्वान्वदेः संजय स्वस्तिमन्तः
कृच्छ्रं वासमतदर्हा निरुष्य ।
तेषां शान्तिर्विद्यतेऽस्मासु शीघ्रं
मिथ्योपेतानामुपकारिणां सताम् ॥ २
नाहं कचित्संजय पाण्डवानां
मिथ्यावृत्तिं कांचन जात्वपश्यम् ।
सर्वां श्रियं ह्यात्मवीर्येण लब्ध्वा
पर्याकार्षुः पाण्डवा मह्यमेव ॥ ३
दोषं ह्येषां नाधिगच्छे परीक्ष-
न्नित्यं कंचिद्येन गर्हेय पार्थान् ।

धर्मार्थाभ्यां कर्म कुर्वन्ति नित्यं
सुखप्रिया नानुरुध्यन्ति कामान् ॥ ४
घर्मं शीतं क्षुत्पिपासे तथैव
निद्रां तन्द्रीं क्रोधहर्षौ प्रमादम् ।
धृत्या चैव प्रज्ञया चाभिभूय
धर्मार्थयोगान्प्रयतन्ति पार्थाः ॥ ५
त्यजन्ति मित्रेषु धनानि काले
न संवासाज्जीर्यति मैत्रमेषाम् ।
यथार्हमानार्थकरा हि पार्था-
स्तेषां द्वेष्टा नास्त्याजमीढस्य पक्षे ॥ ६
अन्यत्र पापाद्विषमान्मन्दबुद्धे-
र्दुर्योधनात्क्षुद्रतराच्च कर्णात् ।
तेषां हीमे हीनसुखप्रियाणां
महात्मनां संजनयन्ति तेजः ॥ ७
उत्थानवीर्यः सुखमेधमानो
दुर्योधनः सुकृतं मन्यते तत् ।
तेषां भागं यच्च मन्येत बालः
शक्यं हर्तुं जीवतां पाण्डवानाम् ॥ ८
यस्यार्जुनः पदवीं केशवश्च
वृकोदरः सात्यकोऽजातशत्रोः ।
माद्रीपुत्रौ सृञ्जयाश्चापि सर्वे
पुरा युद्धात्साधु तस्य प्रदानम् ॥ ९
स ह्येवैकः पृथिवीं सव्यसाची
गाण्डीवधन्वा प्रणुदेद्रथस्थः ।
तथा विष्णुः केशवोऽप्यप्रधृष्यो
लोकत्रयस्याधिपतिर्महात्मा ॥ १०
तिष्ठेत कस्तस्य मर्त्यः पुरस्ता-
द्यः सर्वदेवेषु वरेण्य ईड्यः ।
पर्जन्यघोषान्प्रवपञ्शरौघा-
न्पतंगसंघानिव शीघ्रवेगान् ॥ ११
दिशं ह्युदीचीमपि चोत्तरान्कुरू-
न्गाण्डीवधन्वैकरथो जिगाय ।
धनं चैषामाहरत्सव्यसाची
सेनानुगान्बलिदांश्चैव चक्रे ॥ १२
यश्चैव देवान्खाण्डवे सव्यसाची
गाण्डीवधन्वा प्रजिगाय सेन्द्रान् ।
उपाहरत्फल्गुनो जातवेदसे
यशो मानं वर्धयन्पाण्डवानाम् ॥ १३
गदाभृतां नाद्य समोऽस्ति भीमा-
द्धस्त्यारोहो नास्ति समश्च तस्य ।
रथेऽर्जुनादाहुरहीनमेनं
बाह्वोर्बले चायुतनागवीर्यम् ॥ १४
सुशिक्षितः कृतवैरस्तरस्वी
दहेत्क्रुद्धस्तरसा धार्तराष्ट्रान् ।
सदात्यमर्षी बलवान्न शक्यो
युद्धे जेतुं वासवेनापि साक्षात् ॥ १५
सुचेतसौ बलिनौ शीघ्रहस्तौ
सुशिक्षितौ भ्रातरौ फल्गुनेन ।
श्येनौ यथा पक्षिपूगान्रुजन्तौ
माद्रीपुत्रौ नेह कुरून्विशेताम् ॥ १६
तेषां मध्ये वर्तमानस्तरस्वी
धृष्टद्युम्नः पाण्डवानामिहैकः ।
सहामात्यः सोमकानां प्रबर्हः
संत्यक्तात्मा पाण्डवानां जयाय ॥ १७
सहोषितश्चरितार्थो वयःस्थः
शाल्वेयानामधिपो वै विराटः ।
सह पुत्रैः पाण्डवार्थे च शश्व-
द्युधिष्ठिरं भक्त इति श्रुतं मे ॥ १८
अवरुद्धा बलिनः केकयेभ्यो
महेष्वासा भ्रातरः पञ्च सन्ति ।

केकयेभ्यो राज्यमाकाङ्क्षमाणा
युद्धार्थिनश्चानुवसन्ति पार्थान् ॥ १९
सर्वे च वीराः पृथिवीपतीनां
समानीताः पाण्डवार्थे निविष्टाः ।
शूरानहं भक्तिमतः शृणोमि
प्रीत्या युक्तान्संश्रितान्धर्मराजम् ॥ २०
गिर्याश्रया दुर्गनिवासिनश्च
योधाः पृथिव्यां कुलजा विशुद्धाः ।
म्लेच्छाश्च नानायुधवीर्यवन्तः
समागताः पाण्डवार्थे निविष्टाः ॥ २१
पाण्ड्यश्च राजामित इन्द्रकल्पो
युधि प्रवीरैर्बहुभिः समेतः ।
समागतः पाण्डवार्थे महात्मा
लोकप्रवीरोऽप्रतिवीर्यतेजाः ॥ २२
अस्त्रं द्रोणादर्जुनाद्वासुदेवा-
त्कृपाद्भीष्माद्येन कृतं शृणोमि ।
यं तं कार्ष्णिप्रतिमं प्राहुरेकं
स सात्यकिः पाण्डवार्थे निविष्टः ॥ २३
अपाश्रिताश्चेदिकरूषकाश्च
सर्वोत्साहैर्भूमिपालैः समेताः ।
तेषां मध्ये सूर्यमिवातपन्तं
श्रिया वृतं चेदिपतिं ज्वलन्तम् ॥ २४
अस्तम्भनीयं युधि मन्यमानं
ज्याकर्षतां श्रेष्ठतमं पृथिव्याम् ।
सर्वोत्साहं क्षत्रियाणां निहत्य
प्रसह्य कृष्णस्तरसा ममर्द ॥ २५
यशोमानौ वर्धयन्यादवानां
पुराभिनच्छिशुपालं समीके ।
यस्य सर्वे वर्धयन्ति स्म मानं
करूषराजप्रमुखा नरेन्द्राः ॥ २६
तमसह्यं केशवं तत्र मत्वा
सुग्रीवयुक्तेन रथेन कृष्णम् ।
संप्राद्रवंश्चेदिपतिं विहाय
सिंहं दृष्ट्वा क्षुद्रमृगा इवान्ये ॥ २७
यस्तं प्रतीपस्तरसा प्रत्युदीया-
दाशंसमानो द्वैरथे वासुदेवम् ।
सोऽशेत कृष्णेन हतः परासु-
र्वातेनेवोन्मथितः कर्णिकारः ॥ २८
पराक्रमं मे यदवेदयन्त
तेषामर्थे संजय केशवस्य ।
अनुस्मरंस्तस्य कर्माणि विष्णो-
र्गावल्गणे नाधिगच्छामि शान्तिम् ॥ २९
न जातु ताञ्शत्रुरन्यः सहेत
येषां स स्यादग्रणीर्वृष्णिसिंहः ।
प्रवेपते मे हृदयं भयेन
श्रुत्वा कृष्णावेकरथे समेतौ ॥ ३०
नो चेद्गच्छेत्संगरं मन्दबुद्धि-
स्ताभ्यां सुतो मे विपरीतचेताः ।
नो चेत्कुरून्संजय निर्दहेता-
मिन्द्राविष्णू दैत्यसेनां यथैव ।
मतो हि मे शक्रसमो धनंजयः
सनातनो वृष्णिवीरश्च विष्णुः ॥ ३१
धर्मारामो ह्रीनिषेधस्तरस्वी
कुन्तीपुत्रः पाण्डवोऽजातशत्रुः ।
दुर्योधनेन निकृतो मनस्वी
नो चेत्क्रुद्धः प्रदहेद्धार्तराष्ट्रान् ॥ ३२
नाहं तथा ह्यर्जुनाद्वासुदेवा-
द्भीमाद्वापि यमयोर्वा बिभेमि ।
यथा राज्ञः क्रोधदीप्तस्य सूत
मन्योरहं भीततरः सदैव ॥ ३३

अलं तपोब्रह्मचर्येण युक्तः
संकल्पोऽयं मानसस्तस्य सिध्येत् ।
तस्य क्रोधं संजयाहं समीके
स्थाने जानन्भृशमस्म्यद्य भीतः ॥ ३४
स गच्छ शीघ्रं प्रहितो रथेन
पाञ्चालराजस्य चमूं परेत्य ।
अजातशत्रुं कुशलं स्म पृच्छेः
पुनः पुनः प्रीतियुक्तं वदेस्त्वम् ॥ ३५
जनार्दनं चापि समेत्य तात
महामात्रं वीर्यवतामुदारम् ।
अनामयं मद्वचनेन पृच्छे-
र्धृतराष्ट्रः पाण्डवैः शान्तिमीप्सुः ॥ ३६
न तस्य किंचिद्वचनं न कुर्या-
त्कुन्तीपुत्रो वासुदेवस्य सूत ।
प्रियश्चैषामात्मसमश्च कृष्णो
विद्वांश्चैषां कर्मणि नित्ययुक्तः ॥ ३७
समानीय पाण्डवान्सृञ्जयांश्च
जनार्दनं युयुधानं विराटम् ।
अनामयं मद्वचनेन पृच्छेः
सर्वांस्तथा द्रौपदेयांश्च पञ्च ॥ ३८
यद्यत्तत्र प्राप्तकालं परेभ्य-
स्त्वं मन्येथा भारतानां हितं च ।
तत्तद्भाषेथाः संजय राजमध्ये
न मूर्च्छयेद्यन्न भवेच्च युद्धम् ॥ ३९

इति श्रीमहाभारते उद्योगपर्वणि
द्वाविंशोऽध्यायः ॥ २२ ॥

२३

वैशंपायन उवाच ।

राज्ञस्तु वचनं श्रुत्वा धृतराष्ट्रस्य संजयः ।
उपप्लव्यं ययौ द्रष्टुं पाण्डवानमितौजसः ॥ १
स तु राजानमासाद्य धर्मात्मानं युधिष्ठिरम् ।
प्रणिपत्य ततः पूर्वं सूतपुत्रोऽभ्यभाषत ॥ २
गावल्गणिः संजयः सूतसूनु-
रजातशत्रुमवदत्प्रतीतः ।
दिष्ट्या राजंस्त्वामरोगं प्रपश्ये
सहायवन्तं च महेन्द्रकल्पम् ॥ ३
अनामयं पृच्छति त्वाम्बिकेयो
वृद्धो राजा धृतराष्ट्रो मनीषी ।
कच्चिद्भीमः कुशली पाण्डवाग्र्यो
धनंजयस्तौ च माद्रीतनूजौ ॥ ४
कच्चित्कृष्णा द्रौपदी राजपुत्री
सत्यव्रता वीरपत्नी सपुत्रा ।
मनस्विनी यत्र च वाञ्छसि त्व-
मिष्टान्कामान्भारत स्वस्तिकामः ॥ ५

युधिष्ठिर उवाच ।

गावल्गणे संजय स्वागतं ते
प्रीतात्माहं त्वाभिवदामि सूत ।
अनामयं प्रतिजाने तवाहं
सहानुजैः कुशली चास्मि विद्वन् ॥ ६
चिरादिदं कुशलं भारतस्य
श्रुत्वा राज्ञः कुरुवृद्धस्य सूत ।
मन्ये साक्षाद्दृष्टमहं नरेन्द्रं
दृष्ट्वैव त्वां संजय प्रीतियोगात् ॥ ७
पितामहो नः स्थविरो मनस्वी
महाप्राज्ञः सर्वधर्मोपपन्नः ।
स कौरव्यः कुशली तात भीष्मो
यथापूर्वं वृत्तिरप्यस्य कच्चित् ॥ ८
कच्चिद्राजा धृतराष्ट्रः सपुत्रो
वैचित्रवीर्यः कुशली महात्मा ।
महाराजो बाह्लिकः प्रातिपेयः

कच्चिद्विद्वान्कुशली सूतपुत्र ॥ ९
स सोमदत्तः कुशली तात कच्चि-
द्भूरिश्रवाः सत्यसंधः शलश्च ।
द्रोणः सपुत्रश्च कृपश्च विप्रो
महेष्वासाः कच्चिदेतेऽप्यरोगाः ॥ १०
महाप्राज्ञाः सर्वशास्त्रावदाता
धनुर्भृतां मुख्यतमाः पृथिव्याम् ।
कच्चिन्मानं तात लभन्त एते
धनुर्भृतः कच्चिदेतेऽप्यरोगाः ॥ ११
सर्वे कुरुभ्यः स्पृहयन्ति संजय
धनुर्धरा ये पृथिव्यां युवानः ।
येषां राष्ट्रे निवसति दर्शनीयो
महेष्वासः शीलवान्द्रोणपुत्रः ॥ १२
वैश्यापुत्रः कुशली तात कच्चि-
न्महाप्राज्ञो राजपुत्रो युयुत्सुः ।
कर्णोऽमात्यः कुशली तात कच्चि-
त्सुयोधनो यस्य मन्दो विधेयः ॥ १३
स्त्रियो वृद्धा भारतानां जनन्यो
महानस्यो दासभार्याश्च सूत ।
वध्वः पुत्रा भागिनेया भगिन्यो
दौहित्रा वा कच्चिदप्यव्यलीकाः ॥ १४
कच्चिद्राजा ब्राह्मणानां यथाव-
त्प्रवर्तते पूर्ववत्तात वृत्तिम् ।
कच्चिद्दायान्मामकान्धार्तराष्ट्रो
द्विजातीनां संजय नोपहन्ति ॥ १५
कच्चिद्राजा धृतराष्ट्रः सपुत्र
उपेक्षते ब्राह्मणातिक्रमान्वै ।
कच्चिन्न हेतोरिव वर्त्मभूत
उपेक्षते तेषु स न्यूनवृत्तिम् ॥ १६
एतज्ज्योतिरुत्तमं जीवलोके
शुक्लं प्रजानां विहितं विधात्रा ।
ते चेल्लोभं न नियच्छन्ति मन्दाः
कृत्स्नो नाशो भविता कौरवाणाम् ॥ १७
कच्चिद्राजा धृतराष्ट्रः सपुत्रो
बुभूषते वृत्तिममात्यवर्गे ।
कच्चिन्न भेदेन जिजीविषन्ति
सुहृद्रूपा दुर्हृदश्चैकमित्राः ॥ १८
कच्चिन्न पापं कथयन्ति तात
ते पाण्डवानां कुरवः सर्व एव ।
कच्चिद्दृष्ट्वा दस्युसंघान्समेता-
न्स्मरन्ति पार्थस्य युधां प्रणेतुः ॥ १९
मौर्वीभुजाग्रप्रहितान्स्म तात
दोधूयमानेन धनुर्धरेण ।
गाण्डीवमुक्तान्स्तनयित्नुघोषा-
नजिह्मगान्कच्चिदनुस्मरन्ति ॥ २०
न ह्यपश्यं कंचिदहं पृथिव्यां
श्रुतं समं वाधिकमर्जुनेन ।
यस्यैकषष्टिर्निशितास्तीक्ष्णधाराः
सुवाससः संमतो हस्तवापः ॥ २१
गदापाणिर्भीमसेनस्तरस्वी
प्रवेपयञ्शत्रुसंघाननीके ।
नागः प्रभिन्न इव नड्वलासु
चङ्क्रम्यते कच्चिदेनं स्मरन्ति ॥ २२
माद्रीपुत्रः सहदेवः कलिङ्गा-
न्समागतानजयद्दन्तकूरे ।
वामेनास्यन्दक्षिणेनैव यो वै
महाबलं कच्चिदेनं स्मरन्ति ॥ २३
उद्यन्नयं नकुलः प्रेषितो वै
गावल्गणे संजय पश्यतस्ते ।
दिशं प्रतीचीं वशमानयन्मे

माद्रीसुतं कच्चिदेनं स्मरन्ति ॥ २४
अभ्याभवो द्वैतवने य आसी-
द्दुर्मन्त्रिते घोषयात्रागतानाम् ।
यत्र मन्दाञ्शत्रुवशं प्रयाता-
नमोचयद्भीमसेनो जयश्च ॥ २५
अहं पश्चादर्जुनमभ्यरक्षं
माद्रीपुत्रौ भीमसेनश्च चक्रे ।
गाण्डीवभृच्छत्रुसंघानुदस्य
स्वस्त्यागमत्कच्चिदेनं स्मरन्ति ॥ २६
न कर्मणा साधुनैकेन नूनं
कर्तुं शक्यं भवतीह संजय ।
सर्वात्मना परिजेतुं वयं चे-
न्न शक्नुमो धृतराष्ट्रस्य पुत्रम् ॥ २७

इति श्रीमहाभारते उद्योगपर्वणि
त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

संजय उवाच ।

यथार्हसे पाण्डव तत्तथैव
कुरून्कुरुश्रेष्ठ जनं च पृच्छसि ।
अनामयास्तात मनस्विनस्ते
कुरुश्रेष्ठान्पृच्छसि पार्थ यांस्त्वम् ॥ १
सन्त्येव वृद्धाः साधवो धार्तराष्ट्रे
सन्त्येव पापाः पाण्डव तस्य विद्धि ।
दद्याद्रिपोश्चापि हि धार्तराष्ट्रः
कुतो दायाँल्लोपयेद्ब्राह्मणानाम् ॥ २
यद्युष्माकं वर्ततेऽसौ न धर्म्य-
मद्रुग्धेषु द्रुग्धवत्तन्न साधु ।
मित्रध्रुक्स्याद्धृतराष्ट्रः सपुत्रो
युष्मान्द्विषन्साधुवृत्तानसाधुः ॥ ३
न चानुजानाति भृशं च तप्यते
शोचत्यन्तः स्थविरोऽजातशत्रो ।
शृणोति हि ब्राह्मणानां समेत्य
मित्रद्रोहः पातकेभ्यो गरीयान् ॥ ४
स्मरन्ति तुभ्यं नरदेव संगमे
युद्धे च जिष्णोश्च युधां प्रणेतुः ।
समुत्कृष्टे दुन्दुभिशङ्खशब्दे
गदापाणिं भीमसेनं स्मरन्ति ॥ ५
माद्रीसुतौ चापि रणाजिमध्ये
सर्वा दिशः संपतन्तौ स्मरन्ति ।
सेनां वर्षन्तौ शरवर्षैरजस्रं
महारथौ समरे दुष्प्रकम्प्यौ ॥ ६
न त्वेव मन्ये पुरुषस्य राज-
न्ननागतं ज्ञायते यद्भविष्यम् ।
त्वं चेदिमं सर्वधर्मोपपन्नः
प्राप्तः क्लेशं पाण्डव कृच्छ्ररूपम् ॥ ७
त्वमेवैतत्सर्वमतश्च भूयः
समीकुर्याः प्रज्ञयाजातशत्रो ।
न कामार्थं संत्यजेयुर्हि धर्मं
पाण्डोः सुताः सर्व एवेन्द्रकल्पाः ॥ ८
त्वमेवैतत्प्रज्ञयाजातशत्रो
शमं कुर्या येन शर्म प्रयुस्ते ।
धार्तराष्ट्राः पाण्डवाः सृञ्जयाश्च
ये चाप्यन्ये पार्थिवाः संनिविष्टाः ॥ ९
यन्माब्रवीद्धृतराष्ट्रो निशाया-
मजातशत्रो वचनं पिता ते ।
सहामात्यः सहपुत्रश्च राज-
न्समेत्य तां वाचमिमां निबोध ॥ १०

इति श्रीमहाभारते उद्योगपर्वणि
चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

युधिष्ठिर उवाच ।

समागताः पाण्डवाः सृञ्जयाश्च
जनार्दनो युयुधानो विराटः ।
यत्ते वाक्यं धृतराष्ट्रानुशिष्टं
गावल्गणे ब्रूहि तत्सूतपुत्र ॥ १

संजय उवाच ।

अजातशत्रुं च वृकोदरं च
धनंजयं माद्रवतीसुतौ च ।
आमन्त्रये वासुदेवं च शौरिं
युयुधानं चेकितानं विराटम् ॥ २
पाञ्चालानामधिपं चैव वृद्धं
धृष्टद्युम्नं पार्षतं याज्ञसेनिम् ।
सर्वे वाचं शृणुतेमां मदीयां
वक्ष्यामि यां भूतिमिच्छन्कुरूणाम् ॥ ३
शमं राजा धृतराष्ट्रोऽभिनन्द-
न्नयोजयत्त्वरमाणो रथं मे ।
सभ्रातृपुत्रस्वजनस्य राज्ञ-
स्तद्रोचतां पाण्डवानां शमोऽस्तु ॥ ४
सर्वैर्धर्मैः समुपेताः स्थ पार्थाः
प्रस्थानेन मार्दवेनार्जवेन ।
जाताः कुले अनृशंसा वदान्या
ह्रीनिषेधाः कर्मणां निश्चयज्ञाः ॥ ५
न युज्यते कर्म युष्मासु हीनं
सत्त्वं हि वस्तादृशं भीमसेनाः ।
उद्भासते ह्यञ्जनबिन्दुवत्त-
च्छुक्ले वस्त्रे यद्भवेत्किल्बिषं वः ॥ ६
सर्वक्षयो दृश्यते यत्र कृत्स्नः
पापोदयो निरयोऽभावसंस्थः ।
कस्तत्कुर्याज्जातु कर्म प्रजान-
न्पराजयो यत्र समो जयश्च ॥ ७
ते वै धन्या यैः कृतं ज्ञातिकार्यं
ये वः पुत्राः सुहृदो बान्धवाश्च ।
उपकृष्टं जीवितं संत्यजेयु-
स्ततः कुरूणां नियतो वै भवः स्यात् ॥ ८
ते चेत्कुरूननुशास्य स्थ पार्था
निनीय सर्वान्द्विषतो निगृह्य ।
समं वस्तज्जीवितं मृत्युना स्या-
द्यज्जीवध्वं ज्ञातिवधे न साधु ॥ ९
को ह्येव युष्मान्सह केशवेन
सचेकितानान्पार्षतबाहुगुप्तान् ।
ससात्यकीन्विषहेत प्रजेतुं
लब्ध्वापि देवान्सचिवान्सहेन्द्रान् ॥ १०
को वा कुरून्द्रोणभीष्माभिगुप्ता-
नश्वत्थाम्ना शल्यकृपादिभिश्च ।
रणे प्रसोढुं विषहेत राज-
न्राधेयगुप्तान्सह भूमिपालैः ॥ ११
महद्बलं धार्तराष्ट्रस्य राज्ञः
को वै शक्तो हन्तुमक्षीयमाणः ।
सोऽहं जये चैव पराजये च
निःश्रेयसं नाधिगच्छामि किंचित् ॥ १२
कथं हि नीचा इव दौष्कुलेया
निर्धर्मार्थं कर्म कुर्युश्च पार्थाः ।
सोऽहं प्रसाद्य प्रणतो वासुदेवं
पाञ्चालानामधिपं चैव वृद्धम् ॥ १३
कृताञ्जलिः शरणं वः प्रपद्ये
कथं स्वस्ति स्यात्कुरुसृञ्जयानाम् ।
न ह्येव ते वचनं वासुदेवो
धनंजयो वा जातु किंचिन्न कुर्यात् ॥ १४
प्राणानादौ याच्यमानः कुतोऽन्य-

देतद्विद्वन्साधनार्थं ब्रवीमि ।
एतद्राज्ञो भीष्मपुरोगमस्य
मतं यद्वः शान्तिरिहोत्तमा स्यात् ॥ १५

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चविंशोऽध्यायः ॥ २५ ॥

२६

युधिष्ठिर उवाच ।

कां नु वाचं संजय मे शृणोषि
युद्धैषिणीं येन युद्धाद्बिभेषि ।
अयुद्धं वै तात युद्धाद्गरीयः
कस्तल्लब्ध्वा जातु युध्येत सूत ॥ १
अकुर्वतश्चेत्पुरुषस्य संजय
सिध्येत्संकल्पो मनसा यं यमिच्छेत् ।
न कर्म कुर्याद्विदितं ममैत-
दन्यत्र युद्धाद्बहु यल्लघीयः ॥ २
कुतो युद्धं जातु नरः प्रजान-
न्को दैवशप्तोऽभिवृणीत युद्धम् ।
सुखैषिणः कर्म कुर्वन्ति पार्था
धर्मादहीनं यच्च लोकस्य पथ्यम् ॥ ३
कर्मोदयं सुखमाशंसमानः
कृच्छ्रोपायं तत्त्वतः कर्म दुःखम् ।
सुखप्रेप्सुर्विजिघांसुश्च दुःखं
य इन्द्रियाणां प्रीतिवशानुगामी ।
कामाभिध्या स्वशरीरं दुनोति
यया प्रयुक्तोऽनुकरोति दुःखम् ॥ ४
यथेध्यमानस्य समिद्धतेजसो
भूयो बलं वर्धते पावकस्य ।
कामार्थलाभेन तथैव भूयो
न तृप्यते सर्पिषेवाग्निरिद्धः ।
संपश्येमं भोगचयं महान्तं
सहास्माभिर्धृतराष्ट्रस्य राज्ञः ॥ ५
नाश्रेयसामीश्वरो विग्रहाणां
नाश्रेयसां गीतशब्दं शृणोति ।
नाश्रेयसः सेवते माल्यगन्धा-
न्न चाप्यश्रेयांस्यनुलेपनानि ॥ ६
नाश्रेयसः प्रावरानध्यवस्ते
कथं त्वस्मान्संप्रणुदेत्कुरुभ्यः ।
अत्रैव च स्यादवधूय एष
कामः शरीरे हृदयं दुनोति ॥ ७
स्वयं राजा विषमस्थः परेषु
सामर्थ्यमन्विच्छति तन्न साधु ।
यथात्मनः पश्यति वृत्तमेव
तथा परेषामपि सोऽभ्युपैति ॥ ८
आसन्नमग्निं तु निदाघकाले
गम्भीरकक्षे गहने विसृज्य ।
यथा वृद्धं वायुवशेन शोचे-
त्क्षेमं मुमुक्षुः शिशिरव्यपाये ॥ ९
प्राप्तैश्वर्यो धृतराष्ट्रोऽद्य राजा
लालप्यते संजय कस्य हेतोः ।
प्रगृह्य दुर्बुद्धिमनार्जवे रतं
पुत्रं मन्दं मूढममन्त्रिणं तु ॥ १०
अनाप्तः सन्नाप्ततमस्य वाचं
सुयोधनो विदुरस्यावमन्य ।
सुतस्य राजा धृतराष्ट्रः प्रियैषी
संबुध्यमानो विशतेऽधर्ममेव ॥ ११
मेधाविनं ह्यर्थकामं कुरूणां
बहुश्रुतं वाग्मिनं शीलवन्तम् ।
सूत राजा धृतराष्ट्रः कुरुभ्यो
न सोऽस्मरद्विदुरं पुत्रकाम्यात् ॥ १२
मानघ्नस्य आत्मकामस्य चेर्ष्योः

संरम्भिणश्चार्थधर्मातिगस्य ।
दुर्भाषिणो मन्युवशानुगस्य
कामात्मनो दुर्हृदो भावनस्य ॥ १३
अनेयस्याश्रेयसो दीर्घमन्यो-
र्मित्रद्रुहः संजय पापबुद्धेः ।
सुतस्य राजा धृतराष्ट्रः प्रियैषी
प्रपश्यमानः प्रजहाद्धर्मकामौ ॥ १४
तदैव मे संजय दीव्यतोऽभू-
न्नो चेत्कुरूनागतः स्यादभावः ।
काव्यां वाचं विदुरो भाषमाणो
न विन्दते धृतराष्ट्रात्प्रशंसाम् ॥ १५
क्षत्तुर्यदा अन्ववर्तन्त बुद्धिं
कृच्छ्रं कुरून्न तदाभ्याजगाम ।
यावत्प्रज्ञामन्ववर्तन्त तस्य
तावत्तेषां राष्ट्रवृद्धिर्बभूव ॥ १६
तदर्थलुब्धस्य निबोध मेऽद्य
ये मन्त्रिणो धार्तराष्ट्रस्य सूत ।
दुःशासनः शकुनिः सूतपुत्रो
गावल्गणे पश्य संमोहमस्य ॥ १७
सोऽहं न पश्यामि परीक्षमाणः
कथं स्वस्ति स्यात्कुरुसृञ्जयानाम् ।
आत्तैश्वर्यो धृतराष्ट्रः परेभ्यः
प्रव्राजिते विदुरे दीर्घदृष्टौ ॥ १८
आशंसते वै धृतराष्ट्रः सपुत्रो
महाराज्यमसपत्नं पृथिव्याम् ।
तस्मिञ्शमः केवलं नोपलभ्यो
अत्यासन्नं मद्गतं मन्यतेऽर्थम् ॥ १९
यत्तत्कर्णो मन्यते पारणीयं
युद्धे गृहीतायुधमर्जुनेन ।
आसंश्च युद्धानि पुरा महान्ति
कथं कर्णो नाभवद्द्वीप एषाम् ॥ २०
कर्णश्च जानाति सुयोधनश्च
द्रोणश्च जानाति पितामहश्च ।
अन्ये च ये कुरवस्तत्र सन्ति
यथार्जुनान्नास्त्यपरो धनुर्धरः ॥ २१
जानन्त्येते कुरवः सर्व एव
ये चाप्यन्ये भूमिपालाः समेताः ।
दुर्योधनं चापराधे चरन्त-
मरिंदमे फल्गुनेऽविद्यमाने ॥ २२
तेनार्थबद्धं मन्यते धार्तराष्ट्रः
शक्यं हर्तुं पाण्डवानां ममत्वम् ।
किरीटिना तालमात्रायुधेन
तद्वेदिना संयुगं तत्र गत्वा ॥ २३
गाण्डीवविस्फारितशब्दमाजा-
वशृण्वाना धार्तराष्ट्रा ध्रियन्ते ।
क्रुद्धस्य चेद्भीमसेनस्य वेगा-
त्सुयोधनो मन्यते सिद्धमर्थम् ॥ २४
इन्द्रोऽप्येतन्नोत्सहेत्तात हर्तु-
मैश्वर्यं नो जीवति भीमसेने ।
धनंजये नकुले चैव सूत
तथा वीरे सहदेवे मदीये ॥ २५
स चेदेतां प्रतिपद्येत बुद्धिं
वृद्धो राजा सह पुत्रेण सूत ।
एवं रणे पाण्डवकोपदग्धा
न नश्येयुः संजय धार्तराष्ट्राः ॥ २६
जानासि त्वं क्लेशमस्मासु वृत्तं
त्वां पूजयन्संजयाहं क्षमेयम् ।
यच्चास्माकं कौरवैर्भूतपूर्वं
या नो वृत्तिर्धार्तराष्ट्रे तदासीत् ॥ २७
अद्यापि तत्तत्र तथैव वर्ततां

शान्तिं गमिष्यामि यथा त्वमात्थ ।
इन्द्रप्रस्थे भवतु ममैव राज्यं
सुयोधनो यच्छतु भारताग्र्यः ॥ २८

इति श्रीमहाभारते उद्योगपर्वणि
षड्विंशोऽध्यायः ॥ २६ ॥

२७

संजय उवाच ।

धर्मे नित्या पाण्डव ते विचेष्टा
लोके श्रुता दृश्यते चापि पार्थ ।
महास्रावं जीवितं चाप्यनित्यं
संपश्य त्वं पाण्डव मा विनीनशः ॥ १
न चेद्भागं कुरवोऽन्यत्र युद्धा-
त्प्रयच्छन्ते तुभ्यमजातशत्रो ।
भैक्षचर्यामन्धकवृष्णिराज्ये
श्रेयो मन्ये न तु युद्धेन राज्यम् ॥ २
अल्पकालं जीवितं यन्मनुष्ये
महास्रावं नित्यदुःखं चलं च ।
भूयश्च तद्वयसो नानुरूपं
तस्मात्पापं पाण्डव मा प्रसार्षीः ॥ ३
कामा मनुष्यं प्रसजन्त एव
धर्मस्य ये विघ्नमूलं नरेन्द्र ।
पूर्वं नरस्तान्धृतिमान्विनिघ्न-
ल्ँलोके प्रशंसां लभतेऽनवद्याम् ॥ ४
निबन्धनी ह्यर्थतृष्णेह पार्थ
तामेषतो बाध्यते धर्म एव ।
धर्मं तु यः प्रवृणीते स बुद्धः
कामे गृद्धो हीयतेऽर्थानुरोधात् ॥ ५
धर्मं कृत्वा कर्मणां तात मुख्यं
महाप्रतापः सवितेव भाति ।
हानेन धर्मस्य महीमपीमां
लब्ध्वा नरः सीदति पापबुद्धिः ॥ ६
वेदोऽधीतश्चरितं ब्रह्मचर्यं
यज्ञैरिष्टं ब्राह्मणेभ्यश्च दत्तम् ।
परं स्थानं मन्यमानेन भूय
आत्मा दत्तो वर्षपूगं सुखेभ्यः ॥ ७
सुखप्रिये सेवमानोऽतिवेलं
योगाभ्यासे यो न करोति कर्म ।
वित्तक्षये हीनसुखोऽतिवेलं
दुःखं शेते कामवेगप्रणुन्नः ॥ ८
एवं पुनरर्थचर्याप्रसक्तो
हित्वा धर्मं यः प्रकरोत्यधर्मम् ।
अश्रद्दधत्परलोकाय मूढो
हित्वा देहं तप्यते प्रेत्य मन्दः ॥ ९
न कर्मणां विप्रणाशोऽस्त्यमुत्र
पुण्यानां वाप्यथ वा पापकानाम् ।
पूर्वं कर्तुर्गच्छति पुण्यपापं
पश्चात्त्वेतदनुयात्येव कर्ता ॥ १०
न्यायोपेतं ब्राह्मणेभ्यो यदन्नं
श्रद्धापूतं गन्धरसोपपन्नम् ।
अन्वाहार्येषूत्तमदक्षिणेषु
तथारूपं कर्म विख्यायते ते ॥ ११
इह क्षेत्रे क्रियते पार्थ कार्यं
न वै किंचिद्विद्यते प्रेत्य कार्यम् ।
कृतं त्वया पारलोक्यं च कार्यं
पुण्यं महत्सद्भिरनुप्रशस्तम् ॥ १२
जहाति मृत्युं च जरां भयं च
न क्षुत्पिपासे मनसश्चाप्रियाणि ।
न कर्तव्यं विद्यते तत्र किंचि-
दन्यत्र वै इन्द्रियप्रीणनार्थात् ॥ १३
एवंरूपं कर्मफलं नरेन्द्र

मात्रावता हृदयस्य प्रियेण ।
स क्रोधजं पाण्डव हर्षजं च
लोकावुभौ मा प्रहासीश्चिराय ॥ १४
अन्तं गत्वा कर्मणां या प्रशंसा
सत्यं दमश्चार्जवमानृशंस्यम् ।
अश्वमेधो राजसूयस्तथेष्टः
पापस्यान्तं कर्मणो मा पुनर्गाः ॥ १५
तच्चेदेवं देशरूपेण पार्थाः
करिष्यध्वं कर्म पापं चिराय ।
निवसध्वं वर्षपूगान्वनेषु
दुःखं वासं पाण्डवा धर्महेतोः ॥ १६
अप्रव्रज्ये योजयित्वा पुरस्ता-
दात्माधीनं यद्बलं ते तदासीत् ।
नित्यं पाञ्चालाः सचिवास्तवेमे
जनार्दनो युयुधानश्च वीरः ॥ १७
मत्स्यो राजा रुक्मरथः सपुत्रः
प्रहारिभिः सह पुत्रैर्विराटः ।
राजानश्च ये विजिताः पुरस्ता-
त्त्वामेव ते संश्रयेयुः समस्ताः ॥ १८
महासहायः प्रतपन्बलस्थः
पुरस्कृतो वासुदेवार्जुनाभ्याम् ।
वरान्हनिष्यन्द्विषतो रङ्गमध्ये
व्यनेष्यथा धार्तराष्ट्रस्य दर्पम् ॥ १९
बलं कस्माद्वर्धयित्वा परस्य
निजान्कस्मात्कर्शयित्वा सहायान् ।
निरुष्य कस्माद्वर्षपूगान्वनेषु
युयुत्ससे पाण्डव हीनकालम् ॥ २०
अप्रज्ञो वा पाण्डव युध्यमानो-
ऽधर्मज्ञो वा भूतिपथाद्व्यपैति ।
प्रज्ञावान्वा बुध्यमानोऽपि धर्मं
संरम्भाद्वा सोऽपि भूतेरपैति ॥ २१
नाधर्मे ते धीयते पार्थ बुद्धि-
र्न संरम्भात्कर्म चकर्थ पापम् ।
अद्धा किं तत्कारणं यस्य हेतोः
प्रज्ञाविरुद्धं कर्म चिकीर्षसीदम् ॥ २२
अव्याधिजं कटुकं शीर्षरोगं
यशोमुषं पापफलोदयं च ।
सतां पेयं यन्न पिबन्त्यसन्तो
मन्युं महाराज पिब प्रशाम्य ॥ २३
पापानुबन्धं को नु तं कामयेत
क्षमैव ते ज्यायसी नोत भोगाः ।
यत्र भीष्मः शांतनवो हतः स्या-
द्यत्र द्रोणः सहपुत्रो हतः स्यात् ॥ २४
कृपः शल्यः सौमदत्तिर्विकर्णो
विविंशतिः कर्णदुर्योधनौ च ।
एतान्हत्वा कीदृशं तत्सुखं स्या-
द्यद्विन्देथास्तदनुब्रूहि पार्थ ॥ २५
लब्ध्वापीमां पृथिवीं सागरान्तां
जरामृत्यू नैव हि त्वं प्रजह्याः ।
प्रियाप्रिये सुखदुःखे च राज-
न्नेवं विद्वान्नैव युद्धं कुरुष्व ॥ २६
अमात्यानां यदि कामस्य हेतो-
रेवंयुक्तं कर्म चिकीर्षसि त्वम् ।
अपाक्रमेः संप्रदाय स्वमेभ्यो
मा गास्त्वं वै देवयानात्पथोऽद्य ॥ २७

इति श्रीमहाभारते उद्योगपर्वणि
सप्तविंशोऽध्यायः ॥ २७ ॥

२८

युधिष्ठिर उवाच ।

असंशयं संजय सत्यमेत-

द्धर्मो वरः कर्मणां यत्त्वमात्थ ।
ज्ञात्वा तु मां संजय गर्हयेस्त्वं
यदि धर्मं यद्यधर्मं चरामि ॥ १
यत्राधर्मो धर्मरूपाणि बिभ्र-
द्धर्मः कृत्स्नो दृश्यतेऽधर्मरूपः ।
तथा धर्मो धारयन्धर्मरूपं
विद्वांसस्तं संप्रपश्यन्ति बुद्ध्या ॥ २
एवमेतावापदि लिङ्गमेत-
द्धर्माधर्मौ वृत्तिनित्यौ भजेताम् ।
आद्यं लिङ्गं यस्य तस्य प्रमाण-
मापद्धर्मं संजय तं निबोध ॥ ३
लुप्तायां तु प्रकृतौ येन कर्म
निष्पादयेत्तत्परीप्सेद्विहीनः ।
प्रकृतिस्थश्चापदि वर्तमान
उभौ गर्ह्यौ भवतः संजयैतौ ॥ ४
अविलोपमिच्छतां ब्राह्मणानां
प्रायश्चित्तं विहितं यद्विधात्रा ।
आपद्यथाकर्मसु वर्तमाना-
न्विकर्मस्थान्संजय गर्हयेत ॥ ५
मनीषिणां तत्त्वविच्छेदनाय
विधीयते सत्सु वृत्तिः सदैव ।
अब्राह्मणाः सन्ति तु ये न वैद्याः
सर्वोच्छेदं साधु मन्येत तेभ्यः ॥ ६
तदर्था न पितरो ये च पूर्वे
पितामहा ये च तेभ्यः परेऽन्ये ।
प्रज्ञैषिणो ये च हि कर्म चक्रु-
र्नास्त्यन्ततो नास्ति नास्तीति मन्ये ॥ ७
यत्किंचिदेतद्वित्तमस्यां पृथिव्यां
यद्देवानां त्रिदशानां परत्र ।
प्राजापत्यं त्रिदिवं ब्रह्मलोकं
नाधर्मतः संजय कामये तत् ॥ ८
धर्मेश्वरः कुशलो नीतिमांश्चा-
प्युपासिता ब्राह्मणानां मनीषी ।
नानाविधांश्चैव महाबलांश्च
राजन्यभोजाननुशास्ति कृष्णः ॥ ९
यदि ह्यहं विसृजन्स्यामगर्ह्यो
युध्यमानो यदि जह्यां स्वधर्मम् ।
महायशाः केशवस्तद्ब्रवीतु
वासुदेवस्तूभयोरर्थकामः ॥ १०
शैनेया हि चैत्रकाश्चान्धकाश्च
वार्ष्णेयभोजाः कौकुराः सृञ्जयाश्च ।
उपासीना वासुदेवस्य बुद्धिं
निगृह्य शत्रून्सुहृदो नन्दयन्ति ॥ ११
वृष्ण्यन्धका ह्युग्रसेनादयो वै
कृष्णप्रणीताः सर्व एवेन्द्रकल्पाः ।
मनस्विनः सत्यपराक्रमाश्च
महाबला यादवा भोगवन्तः ॥ १२
काश्यो बभ्रुः श्रियमुत्तमां गतो
लब्ध्वा कृष्णं भ्रातरमीशितारम् ।
यस्मै कामान्वर्षति वासुदेवो
ग्रीष्मात्यये मेघ इव प्रजाभ्यः ॥ १३
ईदृशोऽयं केशवस्तात भूयो
विद्मो ह्येनं कर्मणां निश्चयज्ञम् ।
प्रियश्च नः साधुतमश्च कृष्णो
नातिक्रमे वचनं केशवस्य ॥ १४

इति श्रीमहाभारते उद्योगपर्वणि
अष्टाविंशोऽध्यायः ॥ २८ ॥

२९

वासुदेव उवाच ।

अविनाशं संजय पाण्डवाना-

मिच्छाम्यहं भूतिमेषां प्रियं च ।
तथा राज्ञो धृतराष्ट्रस्य सूत
सदाशंसे बहुपुत्रस्य वृद्धिम् ॥ १
कामो हि मे संजय नित्यमेव
नान्यद्ब्रूयां तान्प्रति शाम्यतेति ।
राज्ञश्च हि प्रियमेतच्छृणोमि
मन्ये चैतत्पाण्डवानां समर्थम् ॥ २
सुदुष्करश्चात्र शमो हि नूनं
प्रदर्शितः संजय पाण्डवेन ।
यस्मिन्गृद्धो धृतराष्ट्रः सपुत्रः
कस्मादेषां कलहो नात्र मूर्च्छेत् ॥ ३
तत्त्वं धर्मं विचरन्संजयेह
मत्तश्च जानासि युधिष्ठिराच्च ।
अथो कस्मात्संजय पाण्डवस्य
उत्साहिनः पूरयतः स्वकर्म ।
यथाख्यातमावसतः कुटुम्बं
पुराकल्पात्साधु विलोपमात्थ ॥ ४
अस्मिन्विधौ वर्तमाने यथाव-
दुच्चावचा मतयो ब्राह्मणानाम् ।
कर्मणाहुः सिद्धिमेके परत्र
हित्वा कर्म विद्यया सिद्धिमेके ।
नाभुञ्जानो भक्ष्यभोज्यस्य तृप्ये-
द्विद्वानपीह विदितं ब्राह्मणानाम् ॥ ५
या वै विद्याः साधयन्तीह कर्म
तासां फलं विद्यते नेतरासाम् ।
तत्रेह वै दृष्टफलं तु कर्म
पीत्वोदकं शाम्यति तृष्णयार्तः ॥ ६
सोऽयं विधिर्विहितः कर्मणैव
तद्वर्तते संजय तत्र कर्म ।
तत्र योऽन्यत्कर्मणः साधु मन्ये-
न्मोघं तस्य लपितं दुर्बलस्य ॥ ७
कर्मणामी भान्ति देवाः परत्र
कर्मणैवेह प्लवते मातरिश्वा ।
अहोरात्रे विदधत्कर्मणैव
अतन्द्रितो नित्यमुदेति सूर्यः ॥ ८
मासार्धमासानथ नक्षत्रयोगा-
नतन्द्रितश्चन्द्रमा अभ्युपैति ।
अतन्द्रितो दहते जातवेदाः
समिध्यमानः कर्म कुर्वन्प्रजाभ्यः ॥ ९
अतन्द्रिता भारमिमं महान्तं
बिभर्ति देवी पृथिवी बलेन ।
अतन्द्रिताः शीघ्रमपो वहन्ति
संतर्पयन्त्यः सर्वभूतानि नद्यः ॥ १०
अतन्द्रितो वर्षति भूरितेजाः
संनादयन्नन्तरिक्षं दिवं च ।
अतन्द्रितो ब्रह्मचर्यं चचार
श्रेष्ठत्वमिच्छन्बलभिद्देवतानाम् ॥ ११
हित्वा सुखं मनसश्च प्रियाणि
तेन शक्रः कर्मणा श्रैष्ठ्यमाप ।
सत्यं धर्मं पालयन्नप्रमत्तो
दमं तितिक्षां समतां प्रियं च ।
एतानि सर्वाण्युपसेवमानो
देवराज्यं मघवान्प्राप मुख्यम् ॥ १२
बृहस्पतिर्ब्रह्मचर्यं चचार
समाहितः संशितात्मा यथावत् ।
हित्वा सुखं प्रतिरुध्येन्द्रियाणि
तेन देवानामगमद्गौरवं सः ॥ १३
नक्षत्राणि कर्मणामुत्र भान्ति
रुद्रादित्या वसवोऽथापि विश्वे ।
यमो राजा वैश्रवणः कुबेरो

गन्धर्वयक्षाप्सरसश्च शुभ्राः ।
ब्रह्मचर्यं वेदविद्याः क्रियाश्च
निषेवमाणा मुनयोऽमुत्र भान्ति ॥ १४
जानन्निमं सर्वलोकस्य धर्मं
ब्राह्मणानां क्षत्रियाणां विशां च ।
स कस्मात्त्वं जानतां ज्ञानवान्स-
न्व्यायच्छसे संजय कौरवार्थे ॥ १५
आम्नायेषु नित्यसंयोगमस्य
तथाश्वमेधे राजसूये च विद्धि ।
संयुज्यते धनुषा वर्मणा च
हस्तत्राणै रथशस्त्रैश्च भूयः ॥ १६
ते चेदिमे कौरवाणामुपाय-
मधिगच्छेयुरवधेनैव पार्थाः ।
धर्मत्राणं पुण्यमेषां कृतं स्या-
दार्ये वृत्ते भीमसेनं निगृह्य ॥ १७
ते चेत्पित्र्ये कर्मणि वर्तमाना
आपद्येरन्दिष्टवशेन मृत्युम् ।
यथाशक्त्या पूरयन्तः स्वकर्म
तदप्येषां निधनं स्यात्प्रशस्तम् ॥ १८
उताहो त्वं मन्यसे सर्वमेव
राज्ञां युद्धे वर्तते धर्मतन्त्रम् ।
अयुद्धे वा वर्तते धर्मतन्त्रं
तथैव ते वाचमिमां शृणोमि ॥ १९
चातुर्वर्ण्यस्य प्रथमं विभाग-
मवेक्ष्य त्वं संजय स्वं च कर्म ।
निशम्याथो पाण्डवानां स्वकर्म
प्रशंस वा निन्द वा या मतिस्ते ॥ २०
अधीयीत ब्राह्मणोऽथो यजेत
दद्यादियात्तीर्थमुख्यानि चैव ।
अध्यापयेद्याजयेच्चापि याज्या-
न्प्रतिग्रहान्वा विदितान्प्रतीच्छेत् ॥ २१
तथा राजन्यो रक्षणं वै प्रजानां
कृत्वा धर्मेणाप्रमत्तोऽथ दत्त्वा ।
यज्ञैरिष्ट्वा सर्ववेदानधीत्य
दारान्कृत्वा पुण्यकृदावसेद्गृहान् ॥ २२
वैश्योऽधीत्य कृषिगोरक्षपण्यै-
र्वित्तं चिन्वन्पालयन्नप्रमत्तः ।
प्रियं कुर्वन्ब्राह्मणक्षत्रियाणां
धर्मशीलः पुण्यकृदावसेद्गृहान् ॥ २३
परिचर्या वन्दनं ब्राह्मणानां
नाधीयीत प्रतिषिद्धोऽस्य यज्ञः ।
नित्योत्थितो भूतयेऽतन्द्रितः स्या-
देष स्मृतः शूद्रधर्मः पुराणः ॥ २४
एतान्राजा पालयन्नप्रमत्तो
नियोजयन्सर्ववर्णान्स्वधर्मे ।
अकामात्मा समवृत्तिः प्रजासु
नाधार्मिकाननुरुध्येत कामान् ॥ २५
श्रेयांस्तस्माद्यदि विद्येत कश्चि-
दभिज्ञातः सर्वधर्मोपपन्नः ।
स तं दुष्टमनुशिष्यात्प्रजान-
न्न चेद्गृध्येदिति तस्मिन्न साधु ॥ २६
यदा गृध्येत्परभूमिं नृशंसो
विधिप्रकोपाद्बलमाददानः ।
ततो राज्ञां भविता युद्धमेत-
त्तत्र जातं वर्म शस्त्रं धनुश्च ।
इन्द्रेणेदं दस्युवधाय कर्म
उत्पादितं वर्म शस्त्रं धनुश्च ॥ २७
स्तेनो हरेद्यत्र धनं ह्यदृष्टः
प्रसह्य वा यत्र हरेत दृष्टः ।
उभौ गर्ह्यौ भवतः संजयैतौ

किं वै पृथक्त्वं धृतराष्ट्रस्य पुत्रे ।
योऽयं लोभान्मन्यते धर्ममेतं
यमिच्छते मन्युवशानुगामी ॥ २८
भागः पुनः पाण्डवानां निविष्ट-
स्तं नोऽकस्मादाददीरन्परे वै ।
अस्मिन्पदे युध्यतां नो वधोऽपि
श्लाघ्यः पित्र्यः पराज्याद्विशिष्टः ।
एतान्धर्मान्कौरवाणां पुराणा-
नाचक्षीथाः संजय राज्यमध्ये ॥ २९
ये ते मन्दा मृत्युवशाभिपन्नाः
समानीता धार्तराष्ट्रेण मूढाः ।
इदं पुनः कर्म पापीय एव
सभामध्ये पश्य वृत्तं कुरूणाम् ॥ ३०
प्रियां भार्यां द्रौपदीं पाण्डवानां
यशस्विनीं शीलवृत्तोपपन्नाम् ।
यदुपेक्षन्त कुरवो भीष्ममुख्याः
कामानुगेनोपरुद्धां रुदन्तीम् ॥ ३१
तं चेत्तदा ते सकुमारवृद्धा
अवारयिष्यन्कुरवः समेताः ।
मम प्रियं धृतराष्ट्रोऽकरिष्य-
त्पुत्राणां च कृतमस्याभविष्यत् ॥ ३२
दुःशासनः प्रातिलोम्यान्निनाय
सभामध्ये श्वशुराणां च कृष्णाम् ।
सा तत्र नीता करुणान्यवोच-
न्नान्यं क्षत्तुर्नाथमदृष्ट कंचित् ॥ ३३
कार्पण्यादेव सहितास्तत्र राज्ञो
नाशक्नुवन्प्रतिवक्तुं सभायाम् ।
एकः क्षत्ता धर्म्यमर्थं ब्रुवाणो
धर्मं बुद्ध्वा प्रत्युवाचाल्पबुद्धिम् ॥ ३४
अनुक्त्वा त्वं धर्ममेवं सभाया-
मथेच्छसे पाण्डवस्योपदेष्टुम् ।
कृष्णा त्वेतत्कर्म चकार शुद्धं
सुदुष्करं तद्धि सभां समेत्य ।
येन कृच्छ्रात्पाण्डवानुज्जहार
तथात्मानं नौरिव सागरौघात् ॥ ३५
यत्राब्रवीत्सूतपुत्रः सभायां
कृष्णां स्थितां श्वशुराणां समीपे ।
न ते गतिर्विद्यते याज्ञसेनि
प्रपद्येदानीं धार्तराष्ट्रस्य वेश्म ।
पराजितास्ते पतयो न सन्ति
पतिं चान्यं भामिनि त्वं वृणीष्व ॥ ३६
यो बीभत्सोर्हृदये प्रौढ आसी-
दस्थिप्रच्छिन्मर्मघाती सुघोरः ।
कर्णाच्छरो वाङ्मयस्तिग्मतेजाः
प्रतिष्ठितो हृदये फल्गुनस्य ॥ ३७
कृष्णाजिनानि परिधित्समाना-
न्दुःशासनः कटुकान्यभ्यभाषत् ।
एते सर्वे षण्ढतिला विनष्टाः
क्षयं गता नरकं दीर्घकालम् ॥ ३८
गान्धारराजः शकुनिर्निकृत्या
यदब्रवीद्द्यूतकाले स पार्थान् ।
पराजितो नकुलः किं तवास्ति
कृष्णया त्वं दीव्य वै याज्ञसेन्या ॥ ३९
जानासि त्वं संजय सर्वमेत-
द्द्यूतेऽवाच्यं वाक्यमेवं यथोक्तम् ।
स्वयं त्वहं प्रार्थये तत्र गन्तुं
समाधातुं कार्यमेतद्विपन्नम् ॥ ४०
अहापयित्वा यदि पाण्डवार्थं
शमं कुरूणामथ चेच्चरेयम् ।
पुण्यं च मे स्याच्चरितं महोदयं

मुच्येरंश्च कुरवो मृत्युपाशात् ॥ ४१
अपि वाचं भाषमाणस्य काव्यां
धर्मारामामर्थवतीमहिंस्राम् ।
अवेक्षेरन्धार्तराष्ट्राः समक्षं
मां च प्राप्तं कुरवः पूजयेयुः ॥ ४२
अतोऽन्यथा रथिना फल्गुनेन
भीमेन चैवाहवदंशितेन ।
परासिक्तान्धार्तराष्ट्रांस्तु विद्धि
प्रदह्यमानान्कर्मणा स्वेन मन्दान् ॥ ४३
पराजितान्पाण्डवेयांस्तु वाचो
रौद्ररूपा भाषते धार्तराष्ट्रः ।
गदाहस्तो भीमसेनोऽप्रमत्तो
दुर्योधनं स्मारयिता हि काले ॥ ४४
सुयोधनो मन्युमयो महाद्रुमः
स्कन्धः कर्णः शकुनिस्तस्य शाखाः ।
दुःशासनः पुष्पफले समृद्धे
मूलं राजा धृतराष्ट्रोऽमनीषी ॥ ४५
युधिष्ठिरो धर्ममयो महाद्रुमः
स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखाः ।
माद्रीपुत्रौ पुष्पफले समृद्धे
मूलं त्वहं ब्रह्म च ब्राह्मणाश्च ॥ ४६
वनं राजा धृतराष्ट्रः सपुत्रो
व्याघ्रा वने संजय पाण्डवेयाः
मा वनं छिन्धि सव्याघ्रं मा व्याघ्रान्नीनशो वनात्॥
निर्वनो वध्यते व्याघ्रो निर्व्याघ्रं छिद्यते वनम् ।
तस्माद्व्याघ्रो वनं रक्षेद्वनं व्याघ्रं च पालयेत् ॥ ४८
लताधर्मा धार्तराष्ट्राः शालाः संजय पाण्डवाः ।
न लता वर्धते जातु अनाश्रित्य महाद्रुमम् ॥ ४९
स्थिताः शुश्रूषितुं पार्थाः स्थिता योद्धुमरिंदमाः ।
यत्कृत्यं धृतराष्ट्रस्य तत्करोतु नराधिपः ॥ ५०
स्थिताः शमे महात्मानः पाण्डवा धर्मचारिणः ।
योधाः समृद्धास्तद्विद्वन्नाचक्षीथा यथातथम् ॥ ५१

इति श्रीमहाभारते उद्योगपर्वणि
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

३०

संजय उवाच ।

आमन्त्रये त्वा नरदेवदेव
गच्छाम्यहं पाण्डव स्वस्ति तेऽस्तु ।
कच्चिन्न वाचा वृजिनं हि किंचि-
दुच्चारितं मे मनसोऽभिषङ्गात् ॥ १
जनार्दनं भीमसेनार्जुनौ च
माद्रीसुतौ सात्यकिं चेकितानम् ।
आमन्त्र्य गच्छामि शिवं सुखं वः
सौम्येन मां पश्यत चक्षुषा नृपाः ॥ २

युधिष्ठिर उवाच ।

अनुज्ञातः संजय स्वस्ति गच्छ
न नोऽकार्षीरप्रियं जातु किंचित् ।
विद्मश्च त्वा ते च वयं च सर्वे
शुद्धात्मानं मध्यगतं सभास्थम् ॥ ३
आप्तो दूतः संजय सुप्रियोऽसि
कल्याणवाक् शीलवान्दृष्टिमांश्च ।
न मुह्येस्त्वं संजय जातु मत्या
न च क्रुध्येरुच्यमानोऽपि तथ्यम् ॥ ४
न मर्मगां जातु वक्तासि रूक्षां
नोपस्तुतिं कटुकां नोत शुक्ताम् ।
धर्मारामामर्थवतीमहिंस्रा-
मेतां वाचं तव जानामि सूत ॥ ५
त्वमेव नः प्रियतमोऽसि दूत
इहागच्छेद्विदुरो वा द्वितीयः ।
अभीक्ष्णदृष्टोऽसि पुरा हि नस्त्वं

धनंजयस्यात्मसमः सखासि ॥ ६
इतो गत्वा संजय क्षिप्रमेव
उपातिष्ठेथा ब्राह्मणान्ये तदर्हाः ।
विशुद्धवीर्यांश्चरणोपपन्ना-
न्कुले जातान्सर्वधर्मोपपन्नान् ॥ ७
स्वाध्यायिनो ब्राह्मणा भिक्षवश्च
तपस्विनो ये च नित्या वनेषु ।
अभिवाद्या वै मद्वचनेन वृद्धा-
स्तथेतरेषां कुशलं वदेथाः ॥ ८
पुरोहितं धृतराष्ट्रस्य राज्ञ
आचार्याश्च ऋत्विजो ये च तस्य ।
तैश्च त्वं तात सहितैर्यथार्हं
संगच्छेथाः कुशलेनैव सूत ॥ ९
आचार्य इष्टोऽनपगो विधेयो
वेदानीप्सन्ब्रह्मचर्यं चचार ।
योऽस्त्रं चतुष्पात्पुनरेव चक्रे
द्रोणः प्रसन्नोऽभिवाद्यो यथार्हम् ॥ १०
अधीतविद्यश्चरणोपपन्नो
योऽस्त्रं चतुष्पात्पुनरेव चक्रे ।
गन्धर्वपुत्रप्रतिमं तरस्विनं
तमश्वत्थामानं कुशलं स्म पृच्छेः ॥ ११
शारद्वतस्यावसथं स्म गत्वा
महारथस्यास्त्रविदां वरस्य ।
त्वं मामभीक्ष्णं परिकीर्तयन्वै
कृपस्य पादौ संजय पाणिना स्पृशेः ॥१२
यस्मिञ्शौर्यमानृशंस्यं तपश्च
प्रज्ञा शीलं श्रुतिसत्त्वे धृतिश्च ।
पादौ गृहीत्वा कुरुसत्तमस्य
भीष्मस्य मां तत्र निवेदयेथाः ॥ १३
प्रज्ञाचक्षुर्यः प्रणेता कुरूणां
बहुश्रुतो वृद्धसेवी मनीषी ।
तस्मै राज्ञे स्थविरायाभिवाद्य
आचक्षीथाः संजय मामरोगम् ॥ १४
ज्येष्ठः पुत्रो धृतराष्ट्रस्य मन्दो
मूर्खः शठः संजय पापशीलः ।
प्रशास्ता वै पृथिवी येन सर्वा
सुयोधनं कुशलं तात पृच्छेः ॥ १५
भ्राता कनीयानपि तस्य मन्द-
स्तथाशीलः संजय सोऽपि शश्वत् ।
महेष्वासः शूरतमः कुरूणां
दुःशासनं कुशलं तात पृच्छेः ॥ १६
वृन्दारकं कविमर्थेष्वमूढं
महाप्रज्ञं सर्वधर्मोपपन्नम् ।
न तस्य युद्धं रोचते वै कदाचि-
द्वैश्यापुत्रं कुशलं तात पृच्छेः ॥ १७
निकर्तने देवने योऽद्वितीय-
श्छन्नोपधः साधुदेवी मताक्षः ।
यो दुर्जयो देवितव्येन संख्ये
स चित्रसेनः कुशलं तात वाच्यः ॥ १८
यस्य कामो वर्तते नित्यमेव
नान्यः शमाद्भारतानामिति स्म ।
स बाह्लिकानामृषभो मनस्वी
पुरा यथा माभिवदेत्प्रसन्नः ॥ १९
गुणैरनेकैः प्रवरैश्च युक्तो
विज्ञानवान्नैव च निष्ठुरो यः ।
स्नेहादमर्षं सहते सदैव
स सोमदत्तः पूजनीयो मतो मे ॥ २०
अर्हत्तमः कुरुषु सौमदत्तिः
स नो भ्राता संजय मत्सखा च ।
महेष्वासो रथिनामुत्तमो यः

सहामात्यः कुशलं तस्य पृच्छेः ॥ २१
ये चैवान्ये कुरुमुख्या युवानः
पुत्राः पौत्रा भ्रातरश्चैव ये नः ।
यं यमेषां येन येनाभिगच्छे-
रनामयं मद्वचनेन वाच्यः ॥ २२
ये राजानः पाण्डवायोधनाय
समानीता धार्तराष्ट्रेण केचित् ।
वसातयः शाल्वकाः केकयाश्च
तथाम्बष्ठा ये त्रिगर्ताश्च मुख्याः ॥ २३
प्राच्योदीच्या दाक्षिणात्याश्च शूरा-
स्तथा प्रतीच्याः पार्वतीयाश्च सर्वे ।
अनृशंसाः शीलवृत्तोपपन्ना-
स्तेषां सर्वेषां कुशलं तात पृच्छेः ॥ २४
हस्त्यारोहा रथिनः सादिनश्च
पदातयश्चार्यसंघा महान्तः ।
आख्याय मां कुशलिनं स्म तेषा-
मनामयं परिपृच्छेः समग्रान् ॥ २५
तथा राज्ञो ह्यर्थयुक्तानमात्या-
न्दौवारिकान्ये च सेनां नयन्ति ।
आयव्ययं ये गणयन्ति युक्ता
अर्थांश्च ये महतश्चिन्तयन्ति ॥ २६
गान्धारराजः शकुनिः पार्वतीयो
निकर्तने योऽद्वितीयोऽक्षदेवी ।
मानं कुर्वन्धार्तराष्ट्रस्य सूत
मिथ्याबुद्धेः कुशलं तात पृच्छेः ॥ २७
यः पाण्डवानेकरथेन वीरः
समुत्सहत्यप्रधृष्यान्विजेतुम् ।
यो मुह्यतां मोहयिताद्वितीयो
वैकर्तनं कुशलं तात पृच्छेः ॥ २८
स एव भक्तः स गुरुः स भृत्यः
स वै पिता स च माता सुहृच्च ।
अगाधबुद्धिर्विदुरो दीर्घदर्शी
स नो मन्त्री कुशलं तात पृच्छेः ॥ २९
वृद्धाः स्त्रियो याश्च गुणोपपन्ना
या ज्ञायन्ते संजय मातरस्ताः ।
ताभिः सर्वाभिः सहिताभिः समेत्य
स्त्रीभिर्वृद्धाभिरभिवादं वदेथाः ॥ ३०
कच्चित्पुत्रा जीवपुत्राः सुसम्य-
ग्वर्तन्ते वो वृत्तिमनृशंसरूपाम् ।
इति स्मोक्त्वा संजय ब्रूहि पश्चा-
दजातशत्रुः कुशली सपुत्रः ॥ ३१
या नो भार्याः संजय वेत्थ तत्र
तासां सर्वासां कुशलं तात पृच्छेः ।
सुसंगुप्ताः सुरभयोऽनवद्याः
कच्चिद्गृहानावसथाप्रमत्ताः ॥ ३२
कच्चिद्वृत्तिं श्वशुरेषु भद्राः
कल्याणीं वर्तध्वमनृशंसरूपाम् ।
यथा च वः स्युः पतयोऽनुकूला-
स्तथा वृत्तिमात्मनः स्थापयध्वम् ॥ ३३
या नः स्नुषाः संजय वेत्थ तत्र
प्राप्ताः कुलेभ्यश्च गुणोपपन्नाः ।
प्रजावत्यो ब्रूहि समेत्य ताश्च
युधिष्ठिरो वोऽभ्यवदत्प्रसन्नः ॥ ३४
कन्याः स्वजेथाः सदनेषु संजय
अनामयं मद्वचनेन पृष्ट्वा ।
कल्याणा वः सन्तु पतयोऽनुकूला
यूयं पतीनां भवतानुकूलाः ॥ ३५
अलंकृता वस्त्रवत्यः सुगन्धा
अबीभत्साः सुखिता भोगवत्यः ।
लघु यासां दर्शनं वाक्च लघ्वी

वेशस्त्रियः कुशलं तात पृच्छेः ॥ ३६
दासीपुत्रा ये च दासाः कुरूणां
तदाश्रया बह्वः कुब्जखञ्जाः ।
आख्याय मां कुशलिनं स्म तेभ्यो
अनामयं परिपृच्छेर्जघन्यम् ॥ ३७
कच्चिद्वृत्तिर्वर्तते वै पुराणी
कच्चिद्भोगान्धार्तराष्ट्रो ददाति ।
अङ्गहीनान्कृपणान्वामनांश्च
आनृशंस्याद्धृतराष्ट्रो बिभर्ति ॥ ३८
अन्धाश्च सर्वे स्थविरास्तथैव
हस्ताजीवा बह्वो येऽत्र सन्ति ।
आख्याय मां कुशलिनं स्म तेषा-
मनामयं परिपृच्छेर्जघन्यम् ॥ ३९
मा भैष्ट दुःखेन कुजीवितेन
नूनं कृतं परलोकेषु पापम् ।
निगृह्य शत्रून्सुहृदोऽनुगृह्य
वासोभिरन्नेन च वो भरिष्ये ॥ ४०
सन्त्येव मे ब्राह्मणेभ्यः कृतानि
भावीन्यथो नो बत वर्तयन्ति ।
पश्याम्यहं युक्तरूपांस्तथैव
तामेव सिद्धिं श्रावयेथा नृपं तम् ॥ ४१
ये चानाथा दुर्बलाः सर्वकाल-
मात्मन्येव प्रयतन्तेऽथ मूढाः ।
तांश्चापि त्वं कृपणान्सर्वथैव
अस्मद्वाक्यात्कुशलं तात पृच्छेः ॥ ४२
ये चाप्यन्ये संश्रिता धार्तराष्ट्रा-
न्नानादिग्भ्योऽभ्यागताः सूतपुत्र ।
दृष्ट्वा तांश्चैवार्हतश्चापि सर्वा-
न्संपृच्छेथाः कुशलं चाव्ययं च ॥ ४३
एवं सर्वानागताभ्यागतांश्च
राज्ञो दूतान्सर्वदिग्भ्योऽभ्युपेतान् ।
पृष्ट्वा सर्वान्कुशलं तांश्च सूत
पश्चादहं कुशली तेषु वाच्यः ॥ ४४
न हीदृशाः सन्त्यपरे पृथिव्यां
ये योधका धार्तराष्ट्रेण लब्धाः ।
धर्मस्तु नित्यो मम धर्म एव
महाबलः शत्रुनिबर्हणाय ॥ ४५
इदं पुनर्वचनं धार्तराष्ट्रं
सुयोधनं संजय श्रावयेथाः ।
यस्ते शरीरे हृदयं दुनोति
कामः कुरूनसपत्नोऽनुशिष्याम् ॥ ४६
न विद्यते युक्तिरेतस्य काचि-
न्नैवंविधाः स्याम यथा प्रियं ते ।
ददस्व वा शक्रपुरं ममैव
युध्यस्व वा भारतमुख्य वीर ॥ ४७

इति श्रीमहाभारते उद्योगपर्वणि
त्रिंशोऽध्यायः ॥ ३० ॥

३१

युधिष्ठिर उवाच ।

उत सन्तमसन्तं च बालं वृद्धं च संजय ।
उताबलं बलीयांसं धाता प्रकुरुते वशे ॥ १
उत बालाय पाण्डित्यं पण्डितायोत बालताम् ।
ददाति सर्वमीशानः पुरस्ताच्छुक्रमुच्चरन् ॥ २
अलं विज्ञापनाय स्यादाचक्षीथा यथातथम् ।
अथो मन्त्रं मन्त्रयित्वा अन्योन्येनातिहृष्टवत् ॥ ३
गावल्गणे कुरून्गत्वा धृतराष्ट्रं महाबलम् ।
अभिवाद्योपसंगृह्य ततः पृच्छेरनामयम् ॥ ४
ब्रूयाश्चैनं त्वमासीनं कुरुभिः परिवारितम् ।
तवैव राजन्वीर्येण सुखं जीवन्ति पाण्डवाः ॥ ५
तव प्रसादाद्बालास्ते प्राप्ता राज्यमरिंदम ।

राज्ये तान्स्थापयित्वाग्रे नोपेक्षीर्विनशिष्यतः ॥ ६
सर्वमप्येतदेकस्य नालं संजय कस्यचित् ।
तात संहत्य जीवामो मा द्विषद्भ्यो वशं गमः ॥ ७
तथा भीष्मं शांतनवं भारतानां पितामहम् ।
शिरसाभिवदेथास्त्वं मम नाम प्रकीर्तयन् ॥ ८
अभिवाद्य च वक्तव्यस्ततोऽस्माकं पितामहः ।
भवता शंतनोर्वंशो निमग्नः पुनरुद्धृतः ॥ ९
स त्वं कुरु तथा तात स्वमतेन पितामह ।
यथा जीवन्ति ते पौत्राः प्रीतिमन्तः परस्परम् ॥१०
तथैव विदुरं ब्रूयाः कुरूणां मन्त्रधारिणम् ।
अयुद्धं सौम्य भाषस्व हितकामो युधिष्ठिरः ॥ ११
अथो सुयोधनं ब्रूया राजपुत्रममर्षणम् ।
मध्ये कुरूणामासीनमनुनीय पुनः पुनः ॥ १२
अपश्यन्मामुपेक्षन्तं कृष्णामेकां सभागताम् ।
तद्दुःखमतितिक्षाम मा वधीष्म कुरूनिति ॥ १३
एवं पूर्वापरान्क्लेशानतितिक्षन्त पाण्डवाः ।
यथा बलीयसः सन्तस्तत्सर्वं कुरवो विदुः ॥ १४
यन्नः प्राव्राजयः सौम्य अजिनैः प्रतिवासितान् ।
तद्दुःखमतितिक्षाम मा वधीष्म कुरूनिति ॥ १५
यत्तत्सभायामाक्रम्य कृष्णां केशेष्वधर्षयत् ।
दुःशासनस्तेऽनुमते तच्चास्माभिरुपेक्षितम् ॥ १६
यथोचितं स्वकं भागं लभेमहि परंतप ।
निवर्तय परद्रव्ये बुद्धिं गृद्धां नरर्षभ ॥ १७
शान्तिरेवं भवेद्राजन्प्रीतिश्चैव परस्परम् ।
राज्यैकदेशमपि नः प्रयच्छ शममिच्छताम् ॥ १८
कुशस्थलं वृकस्थलमासन्दी वारणावतम् ।
अवसानं भवेदत्र किंचिदेव तु पञ्चमम् ॥ १९
भ्रातॄणां देहि पञ्चानां ग्रामान्पञ्च सुयोधन ।
शान्तिर्नोऽस्तु महाप्राज्ञ ज्ञातिभिः सह संजय ॥२०
भ्राता भ्रातरमन्वेतु पिता पुत्रेण युज्यताम् ।
स्मयमानाः समायान्तु पाञ्चालाः कुरुभिः सह ॥
अक्षतान्कुरुपाञ्चालान्पश्येम इति कामये ।
सर्वे सुमनसस्तात शाम्याम भरतर्षभ ॥ २२
अलमेव शमायास्मि तथा युद्धाय संजय ।
धर्मार्थयोरलं चाहं मृदवे दारुणाय च ॥ २३

इति श्रीमहाभारते उद्योगपर्वणि
एकत्रिंशोऽध्यायः ॥ ३१ ॥

३२

वैशंपायन उवाच ।

अनुज्ञातः पाण्डवेन प्रययौ संजयस्तदा ।
शासनं धृतराष्ट्रस्य सर्वं कृत्वा महात्मनः ॥ १
संप्राप्य हास्तिनपुरं शीघ्रं च प्रविवेश ह ।
अन्तःपुरमुपस्थाय द्वाःस्थं वचनमब्रवीत् ॥ २
आचक्ष्व मां धृतराष्ट्राय द्वाःस्थ
उपागतं पाण्डवानां सकाशात् ।
जागर्ति चेदभिवदेस्त्वं हि क्षत्तः
प्रविशेयं विदितो भूमिपस्य ॥ ३

द्वाःस्थ उवाच ।

संजयोऽयं भूमिपते नमस्ते
दिदृक्षया द्वारमुपागतस्ते ।
प्राप्तो दूतः पाण्डवानां सकाशा-
त्प्रशाधि राजन्किमयं करोतु ॥ ४

धृतराष्ट्र उवाच ।

आचक्ष्व मां सुखिनं काल्यमस्मै
प्रवेश्यतां स्वागतं संजयाय ।
न चाहमेतस्य भवाम्यकाल्यः
स मे कस्माद्द्वारि तिष्ठेत क्षत्तः ॥ ५

वैशंपायन उवाच ।

ततः प्रविश्यानुमते नृपस्य
महद्वेश्म प्राज्ञशूरार्यगुप्तम् ।

सिंहासनस्थं पार्थिवमाससाद
वैचित्रवीर्यं प्राञ्जलिः सूतपुत्रः ॥ ६

संजय उवाच ।

संजयोऽहं भूमिपते नमस्ते
प्राप्तोऽस्मि गत्वा नरदेव पाण्डवान् ।
अभिवाद्य त्वां पाण्डुपुत्रो मनस्वी
युधिष्ठिरः कुशलं चान्वपृच्छत् ॥ ७
स ते पुत्रान्पृच्छति प्रीयमाणः
कच्चित्पुत्रैः प्रीयसे नप्तृभिश्च ।
तथा सुहृद्भिः सचिवैश्च राज-
न्ये चापि त्वामुपजीवन्ति तैश्च ॥ ८

धृतराष्ट्र उवाच ।

अभ्येत्य त्वां तात वदामि संजय
अजातशत्रुं च सुखेन पार्थम् ।
कच्चित्स राजा कुशली सपुत्रः
सहामात्यः सानुजः कौरवाणाम् ॥ ९

संजय उवाच ।

सहामात्यः कुशली पाण्डुपुत्रो
भूयश्चातो यच्च तेऽग्रे मनोऽभूत् ।
निर्णिक्तधर्मार्थकरो मनस्वी
बहुश्रुतो दृष्टिमाञ्शीलवांश्च ॥ १०
परं धर्मात्पाण्डवस्यानृशंस्यं
धर्मः परो वित्तचयान्मतोऽस्य ।
सुखप्रिये धर्महीने न पार्थो-
ऽनुरुध्यते भारत तस्य विद्धि ॥ ११
परप्रयुक्तः पुरुषो विचेष्टते
सूत्रप्रोता दारुमयीव योषा ।
इमं दृष्ट्वा नियमं पाण्डवस्य
मन्ये परं कर्म दैवं मनुष्यात् ॥ १२
इमं च दृष्ट्वा तव कर्मदोषं
पापोदर्कं घोरमवर्णरूपम् ।
यावन्नरः कामयतेऽतिकाल्यं
तावन्नरोऽयं लभते प्रशंसाम् ॥ १३
अजातशत्रुस्तु विहाय पापं
जीर्णां त्वचं सर्प इवासमर्थाम् ।
विरोचतेऽहार्यवृत्तेन वीरो
युधिष्ठिरस्त्वयि पापं विसृज्य ॥ १४
अङ्गात्मनः कर्म निबोध राज-
न्धर्मार्थयुक्तादार्यवृत्तादपेतम् ।
उपक्रोशं चेह गतोऽसि राज-
न्नोहेश्च पापं प्रसजेदमुत्र ॥ १५
स त्वमर्थं संशयितं विना तै-
राशंससे पुत्रवशानुगोऽद्य ।
अधर्मशब्दश्च महान्पृथिव्यां
नेदं कर्म त्वत्समं भारताग्र्य ॥ १६
हीनप्रज्ञो दौष्कुलेयो नृशंसो
दीर्घवैरी क्षत्रविद्यास्वधीरः ।
एवंधर्मा नापदः संतितीर्षे-
द्धीनवीर्यो यश्च भवेदशिष्टः ॥ १७
कुले जातो धर्मवान्यो यशस्वी
बहुश्रुतः सुखजीवी यतात्मा ।
धर्मार्थयोर्ग्रथितयोर्बिभर्ति
नान्यत्र दिष्टस्य वशादुपैति ॥ १८
कथं हि मन्त्राग्र्यधरो मनीषी
धर्मार्थयोरापदि संप्रणेता ।
एवंयुक्तः सर्वमन्त्रैरहीनो
अनानृशंस्यं कर्म कुर्यादमूढः ॥ १९
तवापीमे मन्त्रविदः समेत्य
समासते कर्मसु नित्ययुक्ताः ।
तेषामयं बलवान्निश्चयश्च

कुरुक्षयार्थे निरयो व्यपादि ॥ २०
अकालिकं कुरवो नाभविष्य-
न्पापेन चेत्पापमजातशत्रुः ।
इच्छेज्जातु त्वयि पापं विसृज्य
निन्दा चेयं तव लोकेऽभविष्यत् ॥ २१
किमन्यत्र विषयादीश्वराणां
यत्रः पार्थः परलोकं ददर्श ।
अत्यक्रामत्स तथा संमतः स्या-
न्न संशयो नास्ति मनुष्यकारः ॥ २२
एतान्गुणान्कर्मकृतानवेक्ष्य
भावाभावौ वर्तमानावनित्यौ ।
बलिर्हि राजा पारमविन्दमानो
नान्यत्कालात्कारणं तत्र मेने ॥ २३
चक्षुः श्रोत्रे नासिका त्वक्च जिह्वा
ज्ञानस्यैतान्यायतनानि जन्तोः ।
तानि प्रीतान्येव तृष्णाक्षयान्ते
तान्यव्यथो दुःखहीनः प्रणुद्यात् ॥ २४
न त्वेव मन्ये पुरुषस्य कर्म
संवर्तते सुप्रयुक्तं यथावत् ।
मातुः पितुः कर्मणाभिप्रसूतः
संवर्धते विधिवद्भोजनेन ॥ २५
प्रियाप्रिये सुखदुःखे च राज-
न्निन्दाप्रशंसे च भजेत एनम् ।
परस्त्वेनं गर्हयतेऽपराधे
प्रशंसते साधुवृत्तं तमेव ॥ २६
स त्वा गर्हे भारतानां विरोधा-
दन्तो नूनं भवितायं प्रजानाम् ।
नो चेदिदं तव कर्मापराधा-
त्कुरून्दहेत्कृष्णवर्त्मेव कक्षम् ॥ २७
त्वमेवैको जातपुत्रेषु राज-
न्वशं गन्ता सर्वलोके नरेन्द्र ।
कामात्मनां श्लाघसे द्यूतकाले
नान्यच्छमात्पश्य विपाकमस्य ॥ २८
अनाप्तानां प्रग्रहात्त्वं नरेन्द्र
तथाप्तानां निग्रहाच्चैव राजन् ।
भूमिं स्फीतां दुर्बलत्वादनन्तां
न शक्तस्त्वं रक्षितुं कौरवेय ॥ २९
अनुज्ञातो रथवेगावधूतः
श्रान्तो निपद्ये शयनं नृसिंह ।
प्रातः श्रोतारः कुरवः सभाया-
मजातशत्रोर्वचनं समेताः ॥ ३०

इति श्रीमहाभारते उद्योगपर्वणि
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

॥ समाप्तं संजययानपर्व ॥

३३

वैशंपायन उवाच ।

द्वाःस्थं प्राह महाप्राज्ञो धृतराष्ट्रो महीपतिः ।
विदुरं द्रष्टुमिच्छामि तमिहानय माचिरम् ॥ १
प्रहितो धृतराष्ट्रेण दूतः क्षत्तारमब्रवीत् ।
ईश्वरस्त्वां महाराजो महाप्राज्ञ दिदृक्षति ॥ २
एवमुक्तस्तु विदुरः प्राप्य राजनिवेशनम् ।
अब्रवीद्धृतराष्ट्राय द्वाःस्थ मां प्रतिवेदय ॥ ३

द्वाःस्थ उवाच ।

विदुरोऽयमनुप्राप्तो राजेन्द्र तव शासनात् ।
द्रष्टुमिच्छति ते पादौ किं करोतु प्रशाधि माम् ॥ ४

धृतराष्ट्र उवाच ।

प्रवेशय महाप्राज्ञं विदुरं दीर्घदर्शिनम् ।
अहं हि विदुरस्यास्य नाकाल्यो जातु दर्शने ॥ ५

द्वाःस्थ उवाच ।

प्रविशान्तःपुरं क्षत्तर्महाराजस्य धीमतः ।

न हि ते दर्शनेऽकाल्यो जातु राजा ब्रवीति माम् ॥ ६

वैशंपायन उवाच ।

ततः प्रविश्य विदुरो धृतराष्ट्रनिवेशनम् ।
अब्रवीत्प्राञ्जलिर्वाक्यं चिन्तयानं नराधिपम् ॥ ७
विदुरोऽहं महाप्राज्ञ संप्राप्तस्तव शासनात् ।
यदि किंचन कर्तव्यमयमस्मि प्रशाधि माम् ॥ ८

धृतराष्ट्र उवाच ।

संजयो विदुर प्राप्तो गर्हयित्वा च मां गतः ।
अजातशत्रोः श्वो वाक्यं सभामध्ये स वक्ष्यति ॥९
तस्याद्य कुरुवीरस्य न विज्ञातं वचो मया ।
तन्मे दहति गात्राणि तदकार्षीत्प्रजागरम् ॥ १०
जाग्रतो दह्यमानस्य श्रेयो यदिह पश्यसि ।
तद्ब्रूहि त्वं हि नस्तात धर्मार्थकुशलो ह्यसि ॥ ११
यतः प्राप्तः संजयः पाण्डवेभ्यो
न मे यथावन्मनसः प्रशान्तिः ।
सर्वेन्द्रियाण्यप्रकृतिं गतानि
किं वक्ष्यतीत्येव हि मेऽद्य चिन्ता ॥ १२

विदुर उवाच ।

अभियुक्तं बलवता दुर्बलं हीनसाधनम् ।
हृतस्वं कामिनं चोरमाविशन्ति प्रजागराः ॥ १३
कच्चिदेतैर्महादोषैर्न स्पृष्टोऽसि नराधिप ।
कच्चिन्न परवित्तेषु गृध्यन्विपरितप्यसे ॥ १४

धृतराष्ट्र उवाच ।

श्रोतुमिच्छामि ते धर्म्यं परं नैःश्रेयसं वचः ।
अस्मिन्राजर्षिवंशे हि त्वमेकः प्राज्ञसंमतः ॥ १५

विदुर उवाच ।

निषेवते प्रशस्तानि निन्दितानि न सेवते ।
अनास्तिकः श्रद्दधान एतत्पण्डितलक्षणम् ॥ १६
क्रोधो हर्षश्च दर्पश्च ह्रीस्तम्भो मान्यमानिता ।
यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते ॥ १७
यस्य कृत्यं न जानन्ति मन्त्रं वा मन्त्रितं परे ।
कृतमेवास्य जानन्ति स वै पण्डित उच्यते ॥ १८
यस्य कृत्यं न विघ्नन्ति शीतमुष्णं भयं रतिः ।
समृद्धिरसमृद्धिर्वा स वै पण्डित उच्यते ॥ १९
यस्य संसारिणी प्रज्ञा धर्मार्थावनुवर्तते ।
कामादर्थं वृणीते यः स वै पण्डित उच्यते ॥ २०
यथाशक्ति चिकीर्षन्ति यथाशक्ति च कुर्वते ।
न किंचिदवमन्यन्ते पण्डिता भरतर्षभ ॥ २१
क्षिप्रं विजानाति चिरं शृणोति
विज्ञाय चार्थं भजते न कामात् ।
नासंपृष्टो व्युपयुङ्क्ते परार्थे
तत्प्रज्ञानं प्रथमं पण्डितस्य ॥ २२
नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः ॥ २३
निश्चित्य यः प्रक्रमते नान्तर्वसति कर्मणः ।
अवन्ध्यकालो वश्यात्मा स वै पण्डित उच्यते ॥२४
आर्यकर्मणि रज्यन्ते भूतिकर्माणि कुर्वते ।
हितं च नाभ्यसूयन्ति पण्डिता भरतर्षभ ॥ २५
न हृष्यत्यात्मसंमाने नावमानेन तप्यते ।
गाङ्गो ह्रद इवाक्षोभ्यो यः स पण्डित उच्यते ॥२६
तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणाम् ।
उपायज्ञो मनुष्याणां नरः पण्डित उच्यते ॥ २७
प्रवृत्तवाक्चित्रकथ ऊहवान्प्रतिभानवान् ।
आशु ग्रन्थस्य वक्ता च स वै पण्डित उच्यते ॥२८
श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा ।
असंभिन्नार्यमर्यादः पण्डिताख्यां लभेत सः ॥२९
अश्रुतश्च समुन्नद्धो दरिद्रश्च महामनाः ।
अर्थांश्चाकर्मणा प्रेप्सुर्मूढ इत्युच्यते बुधैः ॥ ३०
स्वमर्थं यः परित्यज्य परार्थमनुतिष्ठति ।
मिथ्या चरति मित्रार्थे यश्च मूढः स उच्यते ॥३१

अकामान्कामयति यः कामयानान्परिद्विषन् ।
बलवन्तं च यो द्वेष्टि तमाहुर्मूढचेतसम् ॥ ३२
अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।
कर्म चारभते दुष्टं तमाहुर्मूढचेतसम् ॥ ३३
संसारयति कृत्यानि सर्वत्र विचिकित्सते ।
चिरं करोति क्षिप्रार्थे स मूढो भरतर्षभ ॥ ३४
अनाहूतः प्रविशति अपृष्टो बहु भाषते ।
विश्वसत्यप्रमत्तेषु मूढचेता नराधमः ॥ ३५
परं क्षिपति दोषेण वर्तमानः स्वयं तथा ।
यश्च क्रुध्यत्यनीशः सन्स च मूढतमो नरः ॥ ३६
आत्मनो बलमज्ञाय धर्मार्थपरिवर्जितम् ।
अलभ्यमिच्छन्नैष्कर्म्यान्मूढबुद्धिरिहोच्यते ॥ ३७
अशिष्यं शास्ति यो राजन्यश्च शून्यमुपासते ।
कदर्यं भजते यश्च तमाहुर्मूढचेतसम् ॥ ३८
अर्थं महान्तमासाद्य विद्यामैश्वर्यमेव वा ।
विचरत्यसमुन्नद्धो यः स पण्डित उच्यते ॥ ३९
एकः संपन्नमश्नाति वस्ते वासश्च शोभनम् ।
योऽसंविभज्य भृत्येभ्यः को नृशंसतरस्ततः ॥ ४०
एकः पापानि कुरुते फलं भुङ्क्ते महाजनः ।
भोक्तारो विप्रमुच्यन्ते कर्ता दोषेण लिप्यते ॥ ४१
एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता ।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्रं सराजकम् ॥ ४२
एकया द्वे विनिश्चित्य त्रींश्चतुर्भिर्वशे कुरु ।
पञ्च जित्वा विदित्वा षट् सप्त हित्वा सुखी भव ॥ ४३
एकं विषरसो हन्ति शस्त्रेणैकश्च वध्यते ।
सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रविस्रवः ॥ ४४
एकः स्वादु न भुञ्जीत एकश्चार्थान्न चिन्तयेत् ।
एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात् ॥ ४५
एकमेवाद्वितीयं तद्यद्राजन्नावबुध्यसे ।
सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव ॥ ४६
एकः क्षमावतां दोषो द्वितीयो नोपलभ्यते ।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥ ४७
एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा ।
विद्यैका परमा दृष्टिरहिंसैका सुखावहा ॥ ४८
द्वाविमौ ग्रसते भूमिः सर्पो बिलशयानिव ।
राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनम् ॥ ४९
द्वे कर्मणी नरः कुर्वन्नस्मिँल्लोके विरोचते ।
अब्रुवन्परुषं किंचिदसतो नार्थयंस्तथा ॥ ५०
द्वाविमौ पुरुषव्याघ्र परप्रत्ययकारिणौ ।
स्त्रियः कामितकामिन्यो लोकः पूजितपूजकः ॥ ५१
द्वाविमौ कण्टकौ तीक्ष्णौ शरीरपरिशोषणौ ।
यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः ॥ ५२
द्वाविमौ पुरुषौ राजन्स्वर्गस्योपरि तिष्ठतः ।
प्रभुश्च क्षमया युक्तो दरिद्रश्च प्रदानवान् ॥ ५३
न्यायागतस्य द्रव्यस्य बोद्धव्यौ द्वावतिक्रमौ ।
अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनम् ॥ ५४
त्रयो न्याया मनुष्याणां श्रूयन्ते भरतर्षभ ।
कनीयान्मध्यमः श्रेष्ठ इति वेदविदो विदुः ॥ ५५
त्रिविधाः पुरुषा राजन्नुत्तमाधममध्यमाः ।
नियोजयेद्यथावत्तांस्त्रिविधेष्वेव कर्मसु ॥ ५६
त्रय एवाधना राजन्भार्या दासस्तथा सुतः ।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम् ॥ ५७

चत्वारि राज्ञा तु महाबलेन
वर्ज्यान्याहुः पण्डितस्तानि विद्यात् ।
अल्पप्रज्ञैः सह मन्त्रं न कुर्या-
न्न दीर्घसूत्रैरलसैश्चारणैश्च ॥ ५८
चत्वारि ते तात गृहे वसन्तु
श्रियाभिजुष्टस्य गृहस्थधर्मे ।
वृद्धो ज्ञातिरवसन्नः कुलीनः
सखा दरिद्रो भगिनी चानपत्या ॥ ५९

चत्वार्याह महाराज सद्यस्कानि बृहस्पतिः ।
पृच्छते त्रिदशेन्द्राय तानीमानि निबोध मे ॥ ६०
देवतानां च संकल्पमनुभावं च धीमताम् ।
विनयं कृतविद्यानां विनाशं पापकर्मणाम् ॥ ६१
पञ्चाग्नयो मनुष्येण परिचर्याः प्रयत्नतः ।
पिता माताग्निरात्मा च गुरुश्च भरतर्षभ ॥ ६२
पञ्चैव पूजयँल्लोके यशः प्राप्नोति केवलम् ।
देवान्पितॄन्मनुष्यांश्च भिक्षूनतिथिपञ्चमान् ॥ ६३
पञ्च त्वानुगमिष्यन्ति यत्र यत्र गमिष्यसि ।
मित्राण्यमित्रा मध्यस्था उपजीव्योपजीविनः ॥ ६४
पञ्चेन्द्रियस्य मर्त्यस्य छिद्रं चेदेकमिन्द्रियम् ।
ततोऽस्य स्रवति प्रज्ञा दृतेः पादादिवोदकम् ॥ ६५
षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्री भयं क्रोध आलस्यं दीर्घसूत्रता ॥ ६६
षडिमान्पुरुषो जह्याद्भिन्नां नावमिवार्णवे ।
अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ॥ ६७
अरक्षितारं राजानं भार्यां चाप्रियवादिनीम् ।
ग्रामकामं च गोपालं वनकामं च नापितम् ॥ ६८
षडेव तु गुणाः पुंसा न हातव्याः कदाचन ।
सत्यं दानमनालस्यमनसूया क्षमा धृतिः ॥ ६९
षण्णामात्मनि नित्यानामैश्वर्यं योऽधिगच्छति ।
न स पापैः कुतोऽनर्थैर्युज्यते विजितेन्द्रियः ॥ ७०
षडिमे षट्सु जीवन्ति सप्तमो नोपलभ्यते ।
चोराः प्रमत्ते जीवन्ति व्याधितेषु चिकित्सकाः ॥ ७१
प्रमदाः कामयानेषु यजमानेषु याजकाः ।
राजा विवदमानेषु नित्यं मूर्खेषु पण्डिताः ॥ ७२
सप्त दोषाः सदा राज्ञा हातव्या व्यसनोदयाः ।
प्रायशो यैर्विनश्यन्ति कृतमूलाश्च पार्थिवाः ॥ ७३
स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पञ्चमम् ।
महच्च दण्डपारुष्यमर्थदूषणमेव च ॥ ७४
अष्टौ पूर्वनिमित्तानि नरस्य विनशिष्यतः ।
ब्राह्मणान्प्रथमं द्वेष्टि ब्राह्मणैश्च विरुध्यते ॥ ७५
ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जिघांसति ।
रमते निन्दया चैषां प्रशंसां नाभिनन्दति ॥ ७६
नैतान्स्मरति कृत्येषु याचितश्चाभ्यसूयति ।
एतान्दोषान्नरः प्राज्ञो बुद्ध्या बुद्ध्वा विवर्जयेत् ॥ ७७
अष्टाविमानि हर्षस्य नवनीतानि भारत ।
वर्तमानानि दृश्यन्ते तान्येव सुसुखान्यपि ॥ ७८
समागमश्च सखिभिर्महांश्चैव धनागमः ।
पुत्रेण च परिष्वङ्गः संनिपातश्च मैथुने ॥ ७९
समये च प्रियालापः स्वयूथेषु च संनतिः ।
अभिप्रेतस्य लाभश्च पूजा च जनसंसदि ॥ ८०
नवद्वारमिदं वेश्म त्रिस्थूणं पञ्चसाक्षिकम् ।
क्षेत्रज्ञाधिष्ठितं विद्वान्यो वेद स परः कविः ॥ ८१
दश धर्मं न जानन्ति धृतराष्ट्र निबोध तान् ।
मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ॥ ८२
त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश ।
तस्मादेतेषु भावेषु न प्रसज्जेत पण्डितः ॥ ८३
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
पुत्रार्थमसुरेन्द्रेण गीतं चैव सुधन्वना ॥ ८४
यः काममन्यू प्रजहाति राजा
पात्रे प्रतिष्ठापयते धनं च ।
विशेषविच्छ्रुतवान्क्षिप्रकारी
तं सर्वलोकः कुरुते प्रमाणम् ॥ ८५
जानाति विश्वासयितुं मनुष्या-
न्विज्ञातदोषेषु दधाति दण्डम् ।
जानाति मात्रां च तथा क्षमां च
तं तादृशं श्रीर्जुषते समग्रा ॥ ८६
सुदुर्बलं नावजानाति कंचि-
द्युक्तो रिपुं सेवते बुद्धिपूर्वम् ।

न विग्रहं रोचयते बलस्थैः
कालेच यो विक्रमते स धीरः ॥ ८७
प्राप्यापदं न व्यथते कदाचि-
दुद्योगमन्विच्छति चाप्रमत्तः ।
दुःखं च काले सहते जितात्मा
धुरंधरस्तस्य जिताः सपत्नाः ॥ ८८
अनर्थकं विप्रवासं गृहेभ्यः
पापैः संधिं परदाराभिमर्शम् ।
दम्भं स्तैन्यं पैशुनं मद्यपानं
न सेवते यः स सुखी सदैव ॥ ८९
न संरम्भेणारभतेऽर्थवर्ग-
माकारितः शंसति तथ्यमेव ।
न मात्रार्थे रोचयते विवादं
नापूजितः कुप्यति चाप्यमूढः ॥ ९०
न योऽभ्यसूयत्यनुकम्पते च
न दुर्बलः प्रातिभाव्यं करोति ।
नात्याह किंचित्क्षमते विवादं
सर्वत्र तादृग्लभते प्रशंसाम् ॥ ९१
यो नोद्धतं कुरुते जातु वेषं
न पौरुषेणापि विकत्थतेऽन्यान् ।
न मूर्च्छितः कटुकान्याह किंचि-
त्प्रियं सदा तं कुरुते जनोऽपि ॥ ९२
न वैरमुद्दीपयति प्रशान्तं
न दर्पमारोहति नास्तमेति ।
न दुर्गतोऽस्मीति करोति मन्युं
तमार्यशीलं परमाहुरग्र्यम् ॥ ९३
न स्वे सुखे वै कुरुते प्रहर्षं
नान्यस्य दुःखे भवति प्रतीतः ।
दत्त्वा न पश्चात्कुरुतेऽनुतापं
न कत्थते सत्पुरुषार्यशीलः ॥ ९४
देशाचारान्समयाञ्जातिधर्मा-
न्बुभूषते यस्तु परावरज्ञः ।
स तत्र तत्राधिगतः सदैव
महाजनस्याधिपत्यं करोति ॥ ९५
दम्भं मोहं मत्सरं पापकृत्यं
राजद्विष्टं पैशुनं पूगवैरम् ।
मत्तोन्मत्तैर्दुर्जनैश्चापि वादं
यः प्रज्ञावान्वर्जयेत्स प्रधानः ॥ ९६
दमं शौचं दैवतं मङ्गलानि
प्रायश्चित्तं विविधाँल्लोकवादान् ।
एतानि यः कुरुते नैत्यकानि
तस्योत्थानं देवता राधयन्ति ॥ ९७
समैर्विवाहं कुरुते न हीनैः
समैः सख्यं व्यवहारं कथाश्च ।
गुणैर्विशिष्टांश्च पुरोदधाति
विपश्चितस्तस्य नयाः सुनीताः ॥ ९८
मितं भुङ्क्ते संविभज्याश्रितेभ्यो
मितं स्वपित्यमितं कर्म कृत्वा ।
ददात्यमित्रेष्वपि याचितः सं-
स्तमात्मवन्तं प्रजहत्यनर्थाः ॥ ९९
चिकीर्षितं विप्रकृतं च यस्य
नान्ये जनाः कर्म जानन्ति किंचित् ।
मन्त्रे गुप्ते सम्यगनुष्ठिते च
स्वल्पो नास्य व्यथते कश्चिदर्थः ॥ १००
यः सर्वभूतप्रशमे निविष्टः
सत्यो मृदुर्दानकृच्छुद्धभावः ।
अतीव संज्ञायते ज्ञातिमध्ये
महामणिर्जात्य इव प्रसन्नः ॥ १०१
य आत्मनापत्रपते भृशं नरः
स सर्वलोकस्य गुरुर्भवत्युत ।

अनन्ततेजाः सुमनाः समाहितः
स्वतेजसा सूर्य इवावभासते ॥ १०२
वने जाताः शापदग्धस्य राज्ञः
पाण्डोः पुत्राः पञ्च पञ्चेन्द्रकल्पाः ।
त्वयैव बाला वर्धिताः शिक्षिताश्च
तवादेशं पालयन्त्याम्बिकेय ॥ १०३
प्रदायैषामुचितं तात राज्यं
सुखी पुत्रैः सहितो मोदमानः ।
न देवानां नापि च मानुषाणां
भविष्यसि त्वं तर्कणीयो नरेन्द्र ॥ १०४

इति श्रीमहाभारते उद्योगपर्वणि
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

३४

धृतराष्ट्र उवाच ।

जाग्रतो दह्यमानस्य यत्कार्यमनुपश्यसि ।
तद्ब्रूहि त्वं हि नस्तात धर्मार्थकुशलः शुचिः ॥ १
त्वं मां यथावद्विदुर प्रशाधि
प्रज्ञापूर्वं सर्वमजातशत्रोः ।
यन्मन्यसे पथ्यमदीनसत्त्व
श्रेयस्करं ब्रूहि तद्वै कुरूणाम् ॥ २
पापाशङ्की पापमेवानुपश्य-
न्पृच्छामि त्वां व्याकुलेनात्मनाहम् ।
कवे तन्मे ब्रूहि सर्वं यथाव-
न्मनीषितं सर्वमजातशत्रोः ॥ ३

विदुर उवाच ।

शुभं वा यदि वा पापं द्वेष्यं वा यदि वा प्रियम् ।
अपृष्टस्तस्य तद्ब्रूयाद्यस्य नेच्छेत्पराभवम् ॥ ४
तस्माद्वक्ष्यामि ते राजन्भवमिच्छन्कुरून्प्रति ।
वचः श्रेयस्करं धर्म्यं ब्रुवतस्तन्निबोध मे ॥ ५
मिथ्योपेतानि कर्माणि सिध्येयुर्यानि भारत ।
अनुपायप्रयुक्तानि मा स्म तेषु मनः कृथाः ॥ ६
तथैव योगविहितं न सिध्येत्कर्म यन्नृप ।
उपाययुक्तं मेधावी न तत्र ग्लपयेन्मनः ॥ ७
अनुबन्धानवेक्षेत सानुबन्धेषु कर्मसु ।
संप्रधार्य च कुर्वीत न वेगेन समाचरेत् ॥ ८
अनुबन्धं च संप्रेक्ष्य विपाकांश्चैव कर्मणाम् ।
उत्थानमात्मनश्चैव धीरः कुर्वीत वा न वा ॥ ९
यः प्रमाणं न जानाति स्थाने वृद्धौ तथा क्षये ।
कोशे जनपदे दण्डे न स राज्येऽवतिष्ठते ॥ १०
यस्त्वेतानि प्रमाणानि यथोक्तान्यनुपश्यति ।
युक्तो धर्मार्थयोर्ज्ञाने स राज्यमधिगच्छति ॥ ११
न राज्यं प्राप्तमित्येव वर्तितव्यमसांप्रतम् ।
श्रियं ह्यविनयो हन्ति जरा रूपमिवोत्तमम् ॥ १२
भक्ष्योत्तमप्रतिच्छन्नं मत्स्यो बडिशमायसम् ।
रूपाभिपाती ग्रसते नानुबन्धमवेक्षते ॥ १३
यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामे यत्तदद्यं भूतिमिच्छता ॥ १४
वनस्पतेरपक्वानि फलानि प्रचिनोति यः ।
स नाप्नोति रसं तेभ्यो बीजं चास्य विनश्यति ॥१५
यस्तु पक्वमुपादत्ते काले परिणतं फलम् ।
फलाद्रसं स लभते बीजाच्चैव फलं पुनः ॥ १६
यथा मधु समादत्ते रक्षन्पुष्पाणि षट्पदः ।
तद्वदर्थान्मनुष्येभ्य आदद्यादविहिंसया ॥ १७
पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत् ।
मालाकार इवारामे न यथाङ्गारकारकः ॥ १८
किं नु मे स्यादिदं कृत्वा किं नु मे स्यादकुर्वतः ।
इति कर्माणि संचिन्त्य कुर्याद्वा पुरुषो न वा ॥१९
अनारभ्या भवन्त्यर्थाः केचिन्नित्यं तथागताः ।
कृतः पुरुषकारोऽपि भवेद्येषु निरर्थकः ॥ २०
कांश्चिदर्थान्नरः प्राज्ञो लघुमूलान्महाफलान् ।

क्षिप्रमारभते कर्तुं न विघ्नयति तादृशान् ॥ २१
ऋजु पश्यति यः सर्वं चक्षुषानुपिबन्निव ।
आसीनमपि तूष्णीकमनुरज्यन्ति तं प्रजाः ॥ २२
चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम् ।
प्रसादयति लोकं यस्तं लोकोऽनुप्रसीदति ॥ २२
यस्मात्त्रस्यन्ति भूतानि मृगव्याधान्मृगा इव ।
सागरान्तामपि महीं लब्ध्वा स परिहीयते ॥ २४
पितृपैतामहं राज्यं प्राप्तवान्स्वेन तेजसा ।
वायुरभ्रमिवासाद्य भ्रंशयत्यनये स्थितः ॥ २५
धर्ममाचरतो राज्ञः सद्भिश्चरितमादितः ।
वसुधा वसुसंपूर्णा वर्धते भूतिवर्धनी ॥ २६
अथ संत्यजतो धर्ममधर्मं चानुतिष्ठतः ।
प्रतिसंवेष्टते भूमिरग्नौ चर्माहितं यथा ॥ २७
य एव यत्नः क्रियते परराष्ट्रावमर्दने ।
स एव यत्नः कर्तव्यः स्वराष्ट्रपरिपालने ॥ २८
धर्मेण राज्यं विन्देत धर्मेण परिपालयेत् ।
धर्ममूलां श्रियं प्राप्य न जहाति न हीयते ॥ २९
अप्युन्मत्तात्प्रलपतो बालाच्च परिसर्पतः ।
सर्वतः सारमादद्यादश्मभ्य इव काञ्चनम् ॥ ३०
सुव्याहृतानि सुधियां सुकृतानि ततस्ततः ।
संचिन्वन्धीर आसीत शिलाहारी शिलं यथा ॥ ३१
गन्धेन गावः पश्यन्ति वेदैः पश्यन्ति ब्राह्मणाः ।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥ ३२
भूयांसं लभते क्लेशं या गौर्भवति दुर्दुहा ।
अथ या सुदुहा राजन्नैव तां विनयन्त्यपि ॥ ३३
यदतप्तं प्रणमति न तत्संतापयन्त्यपि ।
यच्च स्वयं नतं दारु न तत्संनामयन्त्यपि ॥ ३४
एतयोपमया धीरः संनमेत बलीयसे ।
इन्द्राय स प्रणमते नमते यो बलीयसे ॥ ३५
पर्जन्यनाथाः पशवो राजानो मित्रबान्धवाः ।
पतयो बान्धवाः स्त्रीणां ब्राह्मणा वेदबान्धवाः ॥ ३६
सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते ॥ ३७
मानेन रक्ष्यते धान्यमश्वान्रक्ष्यत्यनुक्रमः ।
अभीक्ष्णदर्शनाद्गावः स्त्रियो रक्ष्याः कुचेलतः ॥ ३८
न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः ।
अन्त्येष्वपि हि जातानां वृत्तमेव विशिष्यते ॥ ३९
य ईर्ष्युः परवित्तेषु रूपे वीर्ये कुलान्वये ।
सुखे सौभाग्यसत्कारे तस्य व्याधिरनन्तकः ॥ ४०
अकार्यकरणाद्भीतः कार्याणां च विवर्जनात् ।
अकाले मन्त्रभेदाच्च येन माद्येन्न तत्पिबेत् ॥ ४१
विद्यामदो धनमदस्तृतीयोऽभिजनो मदः ।
एते मदावलिप्तानामेत एव सतां दमाः ॥ ४२
असन्तोऽभ्यर्थिताः सद्भिः किंचित्कार्यं कदाचन ।
मन्यन्ते सन्तमात्मानमसन्तमपि विश्रुतम् ॥ ४३
गतिरात्मवतां सन्तः सन्त एव सतां गतिः ।
असतां च गतिः सन्तो न त्वसन्तः सतां गतिः ॥ ४४
जिता सभा वस्त्रवता समाशा गोमता जिता ।
अध्वा जितो यानवता सर्वं शीलवता जितम् ॥ ४५
शीलं प्रधानं पुरुषे तद्यस्येह प्रणश्यति ।
न तस्य जीवितेनार्थो न धनेन न बन्धुभिः ॥ ४६
आढ्यानां मांसपरमं मध्यानां गोरसोत्तरम् ।
लवणोत्तरं दरिद्राणां भोजनं भरतर्षभ ॥ ४७
संपन्नतरमेवान्नं दरिद्रा भुञ्जते सदा ।
क्षुत्स्वादुतां जनयति सा चाढ्येषु सुदुर्लभा ॥ ४८
प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते ।
दरिद्राणां तु राजेन्द्र अपि काष्ठं हि जीर्यते ॥ ४९
अवृत्तिर्भयमन्त्यानां मध्यानां मरणाद्भयम् ।
उत्तमानां तु मर्त्यानामवमानात्परं भयम् ॥ ५०
ऐश्वर्यमदपापिष्ठा मदाः पानमदादयः ।

ऐश्वर्यमदमत्तो हि नापतित्वा विबुध्यते ॥ ५१
इन्द्रियैरिन्द्रियार्थेषु वर्तमानैरनिग्रहैः ।
तैरयं ताप्यते लोको नक्षत्राणि ग्रहैरिव ॥ ५२
यो जितः पञ्चवर्गेण सहजेनात्मकर्शिना ।
आपदस्तस्य वर्धन्ते शुक्लपक्ष इवोडुराट् ॥ ५३
अविजित्य य आत्मानममात्यान्विजिगीषते ।
अमित्रान्वाजितामात्यः सोऽवशः परिहीयते ॥ ५४
आत्मानमेव प्रथमं देशरूपेण यो जयेत् ।
ततोऽमात्यानमित्रांश्च न मोघं विजिगीषते ॥ ५५
वश्येन्द्रियं जितामात्यं धृतदण्डं विकारिषु ।
परीक्ष्यकारिणं धीरमत्यन्तं श्रीर्निषेवते ॥ ५६
रथः शरीरं पुरुषस्य राज-
न्नात्मा नियन्तेन्द्रियाण्यस्य चाश्वाः ।
तैरप्रमत्तः कुशलः सदश्वै-
र्दान्तैः सुखं याति रथीव धीरः ॥ ५७
एतान्यनिगृहीतानि व्यापादयितुमप्यलम् ।
अविधेया इवादान्ता हयाः पथि कुसारथिम् ॥५८
अनर्थमर्थतः पश्यन्नर्थं चैवाप्यनर्थतः ।
इन्द्रियैः प्रसृतो बालः सुदुःखं मन्यते सुखम् ॥ ५९
धर्मार्थौ यः परित्यज्य स्यादिन्द्रियवशानुगः ।
श्रीप्राणधनदारेभ्यः क्षिप्रं स परिहीयते ॥ ६०
अर्थानामीश्वरो यः स्यादिन्द्रियाणामनीश्वरः ।
इन्द्रियाणामनैश्वर्यादैश्वर्याद्भ्रश्यते हि सः ॥ ६१
आत्मनात्मानमन्विच्छेन्मनोबुद्धीन्द्रियैर्यतैः ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ६२
क्षुद्राक्षेणेव जालेन झषावपिहितावुभौ ।
कामश्च राजन्क्रोधश्च तौ प्रज्ञानं विलुम्पतः ॥ ६३
समवेक्ष्येह धर्मार्थौ संभारान्योऽधिगच्छति ।
स वै संभृतसंभारः सततं सुखमेधते ॥ ६४
यः पञ्चाभ्यन्तराञ्शत्रूनविजित्य मतिक्षयान् ।
जिगीषति रिपूनन्यान्रिपवोऽभिभवन्ति तम् ॥ ६५
दृश्यन्ते हि दुरात्मानो वध्यमानाः स्वकर्मभिः ।
इन्द्रियाणामनीशत्वाद्राजानो राज्यविभ्रमैः ॥ ६६
असंत्यागात्पापकृतामपापां-
स्तुल्यो दण्डः स्पृशते मिश्रभावात् ।
शुष्केणार्द्रं दह्यते मिश्रभावा-
त्तस्मात्पापैः सह संधिं न कुर्यात् ॥ ६७
निजानुत्पततः शत्रून्पञ्च पञ्चप्रयोजनान् ।
यो मोहान्न निगृह्णाति तमापद्ग्रसते नरम् ॥ ६८
अनसूयार्जवं शौचं संतोषः प्रियवादिता ।
दमः सत्यमनायासो न भवन्ति दुरात्मनाम् ॥ ६९
आत्मज्ञानमनायासस्तितिक्षा धर्मनित्यता ।
वाक्चैव गुप्ता दानं च नैतान्यन्त्येषु भारत ॥ ७०
आक्रोशपरिवादाभ्यां विहिंसन्त्यबुधा बुधान् ।
वक्ता पापमुपादत्ते क्षममाणो विमुच्यते ॥ ७१
हिंसा बलमसाधूनां राज्ञां दण्डविधिर्बलम् ।
शुश्रूषा तु बलं स्त्रीणां क्षमा गुणवतां बलम् ॥ ७२
वाक्संयमो हि नृपते सुदुष्करतमो मतः ।
अर्थवच्च विचित्रं च न शक्यं बहु भाषितुम् ॥ ७३
अभ्यावहति कल्याणं विविधा वाक्सुभाषिता ।
सैव दुर्भाषिता राजन्ननर्थायोपपद्यते ॥ ७४
संरोहति शरैर्विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् ॥७५
कर्णिनालीकनाराचा निर्हरन्ति शरीरतः ।
वाक्शल्यस्तु न निर्हर्तुं शक्यो हृदिशयो हि सः ॥७६
वाक्सायका वदनान्निष्पतन्ति
यैराहतः शोचति रात्र्यहानि ।
परस्य नामर्मसु ते पतन्ति
तान्पण्डितो नावसृजेत्परेषु ॥ ७७
यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम् ।

बुद्धिं तस्यापकर्षन्ति सोऽपाचीनानि पश्यति ॥ ७८
बुद्धौ कलुषभूतायां विनाशे प्रत्युपस्थिते ।
अनयो नयसंकाशो हृदयान्नापसर्पति ॥ ७९
सेयं बुद्धिः परीता ते पुत्राणां तव भारत ।
पाण्डवानां विरोधेन न चैनामवबुध्यसे ॥ ८०
राजा लक्षणसंपन्नस्त्रैलोक्यस्यापि यो भवेत् ।
शिष्यस्ते शासिता सोऽस्तु धृतराष्ट्र युधिष्ठिरः ॥८१
अतीव सर्वान्पुत्रांस्ते भागधेयपुरस्कृतः ।
तेजसा प्रज्ञया चैव युक्तो धर्मार्थतत्त्ववित् ॥ ८२
आनृशंस्यादनुक्रोशाद्योऽसौ धर्मभृतां वरः ।
गौरवात्तव राजेन्द्र बहून्क्लेशांस्तितिक्षति ॥ ८३

इति श्रीमहाभारते उद्योगपर्वणि
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

३५

धृतराष्ट्र उवाच ।

ब्रूहि भूयो महाबुद्धे धर्मार्थसहितं वचः ।
शृण्वतो नास्ति मे तृप्तिर्विचित्राणीह भाषसे ॥ १

विदुर उवाच ।

सर्वतीर्थेषु वा स्नानं सर्वभूतेषु चार्जवम् ।
उभे एते समे स्यातामार्जवं वा विशिष्यते ॥ २
आर्जवं प्रतिपद्यस्व पुत्रेषु सततं विभो ।
इह कीर्तिं परां प्राप्य प्रेत्य स्वर्गमवाप्स्यसि ॥ ३
यावत्कीर्तिर्मनुष्यस्य पुण्या लोकेषु गीयते ।
तावत्स पुरुषव्याघ्र स्वर्गलोके महीयते ॥ ४
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
विरोचनस्य संवादं केशिन्यर्थे सुधन्वना ॥ ५

केशिन्युवाच ।

किं ब्राह्मणाः स्विच्छ्रेयांसो दितिजाः स्विद्विरोचन ।
अथ केन स्म पर्यङ्कं सुधन्वा नाधिरोहति ॥ ६

विरोचन उवाच ।

प्राजापत्या हि वै श्रेष्ठा वयं केशिनि सत्तमाः ।
अस्माकं खल्विमे लोकाः के देवाः के द्विजातयः ॥७

केशिन्युवाच ।

इहैवास्स्व प्रतीक्षाव उपस्थाने विरोचन ।
सुधन्वा प्रातरागन्ता पश्येयं वां समागतौ ॥ ८

विरोचन उवाच ।

तथा भद्रे करिष्यामि यथा त्वं भीरु भाषसे ।
सुधन्वानं च मां चैव प्रातर्द्रष्टासि संगतौ ॥ ९

सुधन्वोवाच ।

अन्वालभे हिरण्मयं प्राह्रादेऽहं तवासनम् ।
एकत्वमुपसंपन्नो न त्वासेयं त्वया सह ॥ १०

विरोचन उवाच ।

अन्वाहरन्तु फलकं कूर्चं वाप्यथ वा बृसीम् ।
सुधन्वन्न त्वमर्होऽसि मया सह समासनम् ॥ ११

सुधन्वोवाच ।

पितापि ते समासीनमुपासीतैव मामधः ।
बालः सुखैधितो गेहे न त्वं किंचन बुध्यसे ॥१२

विरोचन उवाच ।

हिरण्यं च गवाश्वं च यद्वित्तमसुरेषु नः ।
सुधन्वन्विपणे तेन प्रश्नं पृच्छाव ये विदुः ॥ १३

सुधन्वोवाच ।

हिरण्यं च गवाश्वं च तवैवास्तु विरोचन ।
प्राणयोस्तु पणं कृत्वा प्रश्नं पृच्छाव ये विदुः ॥१४

विरोचन उवाच ।

आवां कुत्र गमिष्यावः प्राणयोर्विपणे कृते ।
न हि देवेष्वहं स्थाता न मनुष्येषु कर्हिचित् ॥१५

सुधन्वोवाच ।

पितरं ते गमिष्यावः प्राणयोर्विपणे कृते ।
पुत्रस्यापि स हेतोर्हि प्रह्लादो नानृतं वदेत् ॥ १६

प्रह्लाद उवाच ।

इमौ तौ संप्रदृश्येते याभ्यां न चरितं सह ।
आशीविषाविव क्रुद्धावेकमार्गमिहागतौ ॥ १७
किं वै सहैव चरतो न पुरा चरतः सह ।
विरोचनैतत्पृच्छामि किं ते सख्यं सुधन्वना ॥१८

विरोचन उवाच ।

न मे सुधन्वना सख्यं प्राणयोर्विपणावहे ।
प्रह्लाद तत्त्वां पृच्छामि मा प्रश्नमनृतं वदीः ॥ १९

प्रह्लाद उवाच ।

उदकं मधुपर्कं चाप्यानयन्तु सुधन्वने ।
ब्रह्मन्नभ्यर्चनीयोऽसि श्वेता गौः पीवरीकृता ॥ २०

सुधन्वोवाच ।

उदकं मधुपर्कं च पथ एवार्पितं मम ।
प्रह्लाद त्वं तु नौ प्रश्नं तथ्यं प्रब्रूहि पृच्छतोः॥२१

प्रह्लाद उवाच ।

पुत्रो वान्यो भवान्ब्रह्मन्साक्ष्ये चैव भवेत्स्थितः ।
तयोर्विवदतोः प्रश्नं कथमस्मद्विधो वदेत् ॥ २२
अथ यो नैव प्रब्रूयात्सत्यं वा यदि वानृतम् ।
एतत्सुधन्वन्पृच्छामि दुर्विवक्ता स्म किं वसेत् ॥ २३

सुधन्वोवाच ।

यां रात्रिमधिविन्ना स्त्री यां चैवाक्षपराजितः ।
यां च भाराभितप्ताङ्गो दुर्विवक्ता स्म तां वसेत्॥२४
नगरे प्रतिरुद्धः सन्बहिर्द्वारे बुभुक्षितः ।
अमित्रान्भूयसः पश्यन्दुर्विवक्ता स्म तां वसेत्॥२५
पञ्च पश्वनृते हन्ति दश हन्ति गवानृते ।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥ २६
हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन् ।
सर्वं भूम्यनृते हन्ति मा स्म भूम्यनृतं वदीः ॥ २७

प्रह्लाद उवाच ।

मत्तः श्रेयानङ्गिरा वै सुधन्वा त्वद्विरोचन ।
मातास्य श्रेयसी मातुस्तस्मात्त्वं तेन वै जितः ॥२८
विरोचन सुधन्वायं प्राणानामीश्वरस्तव ।
सुधन्वन्पुनरिच्छामि त्वया दत्तं विरोचनम् ॥ २९

सुधन्वोवाच ।

यद्धर्ममवृणीथास्त्वं न कामादनृतं वदीः ।
पुनर्ददामि ते तस्मात्पुत्रं प्रह्लाद दुर्लभम् ॥ ३०
एष प्रह्लाद पुत्रस्ते मया दत्तो विरोचनः ।
पादप्रक्षालनं कुर्यात्कुमार्याः संनिधौ मम ॥ ३१

विदुर उवाच ।

तस्माद्राजेन्द्र भूम्यर्थे नानृतं वक्तुमर्हसि ।
मा गमः ससुतामात्योऽत्ययं पुत्राननुभ्रमन् ॥ ३२
न देवा यष्टिमादाय रक्षन्ति पशुपालवत् ।
यं तु रक्षितुमिच्छन्ति बुद्ध्या संविभजन्ति तम्॥३३
यथा यथा हि पुरुषः कल्याणे कुरुते मनः ।
तथा तथास्य सर्वार्थाः सिध्यन्ते नात्र संशयः॥३४

न छन्दांसि वृजिनात्तारयन्ति
मायाविनं मायया वर्तमानम् ।
नीडं शकुन्ता इव जातपक्षा-
श्छन्दांस्येनं प्रजहत्यन्तकाले ॥ ३५
मत्तापानं कलहं पूगवैरं
भार्यापत्योरन्तरं ज्ञातिभेदम् ।
राजद्विष्टं स्त्रीपुमांसोर्विवादं
वर्ज्यान्याहुर्यश्च पन्थाः प्रदुष्टः ॥ ३६
सामुद्रिकं वणिजं चोरपूर्वं
शलाकधूर्तं च चिकित्सकं च ।
अरिं च मित्रं च कुशीलवं च
नैतान्साक्ष्येष्वधिकुर्वीत सप्त ॥ ३७
मानाग्निहोत्रमुत मानमौनं
मानेनाधीतमुत मानयज्ञः ।
एतानि चत्वार्यभयंकराणि

भयं प्रयच्छन्त्ययथाकृतानि ॥ ३८

अगारदाही गरदः कुण्डाशी सोमविक्रयी ।
पर्वकारश्च सूची च मित्रध्रुक्पारदारिकः ॥ ३९
भ्रूणहा गुरुतल्पी च यश्च स्यात्पानपो द्विजः ।
अतितीक्ष्णश्च काकश्च नास्तिको वेदनिन्दकः ॥४०
स्रुवप्रग्रहणो व्रात्यः कीनाशश्चार्थवानपि ।
रक्षेत्युक्तश्च यो हिंस्यात्सर्वे ब्रह्महणैः समाः ॥ ४१

तृणोल्कया ज्ञायते जातरूपं
युगे भद्रो व्यवहारेण साधुः ।
शूरो भयेष्वर्थकृच्छ्रेषु धीरः
कृच्छ्रास्वापत्सु सुहृदश्चारयश्च ॥ ४२
जरा रूपं हरति हि धैर्यमाशा
मृत्युः प्राणान्धर्मचर्यामसूया ।
क्रोधः श्रियं शीलमनार्यसेवा
ह्रियं कामः सर्वमेवाभिमानः ॥ ४३

श्रीर्मङ्गलात्प्रभवति प्रागल्भ्यात्संप्रवर्धते ।
दाक्ष्यात्तु कुरुते मूलं संयमात्प्रतितिष्ठति ॥ ४४

अष्टौ गुणाः पुरुषं दीपयन्ति
प्रज्ञा च कौल्यं च दमः श्रुतं च ।
पराक्रमश्चाबहुभाषिता च
दानं यथाशक्ति कृतज्ञता च ॥ ४५
एतान्गुणांस्तात महानुभावा-
नेको गुणः संश्रयते प्रसह्य ।
राजा यदा सत्कुरुते मनुष्यं
सर्वान्गुणानेष गुणोऽतिभाति ॥ ४६
अष्टौ नृपेमानि मनुष्यलोके
स्वर्गस्य लोकस्य निदर्शनानि ।
चत्वार्येषामन्ववेतानि सद्भि-
श्चत्वार्येषामन्ववयन्ति सन्तः ॥ ४७
यज्ञो दानमध्ययनं तपश्च
चत्वार्येतान्यन्ववेतानि सद्भिः ।
दमः सत्यमार्जवमानृशंस्यं
चत्वार्येतान्यन्ववयन्ति सन्तः ॥ ४८
न सा सभा यत्र न सन्ति वृद्धा
न ते वृद्धा ये न वदन्ति धर्मम् ।
नासौ धर्मो यत्र न सत्यमस्ति
न तत्सत्यं यच्छलेनानुविद्धम् ॥ ४९

सत्यं रूपं श्रुतं विद्या कौल्यं शीलं बलं धनम् ।
शौर्यं च चित्रभाष्यं च दश संसर्गयोनयः ॥ ५०
पापं कुर्वन्पापकीर्तिः पापमेवाश्नुते फलम् ।
पुण्यं कुर्वन्पुण्यकीर्तिः पुण्यमेवाश्नुते फलम् ॥ ५१
पापं प्रज्ञां नाशयति क्रियमाणं पुनः पुनः ।
नष्टप्रज्ञः पापमेव नित्यमारभते नरः ॥ ५२
पुण्यं प्रज्ञां वर्धयति क्रियमाणं पुनः पुनः ।
वृद्धप्रज्ञः पुण्यमेव नित्यमारभते नरः ॥ ५३
असूयको दन्दशूको निष्ठुरो वैरकृन्नरः ।
स कृच्छ्रं महदाप्नोति नचिरात्पापमाचरन् ॥ ५४
अनसूयः कृतप्रज्ञः शोभनान्याचरन्सदा ।
अकृच्छ्रात्सुखमाप्नोति सर्वत्र च विराजते ॥ ५५
प्रज्ञामेवागमयति यः प्राज्ञेभ्यः स पण्डितः ।
प्राज्ञो ह्यवाप्य धर्मार्थौ शक्नोति सुखमेधितुम् ॥ ५६
दिवसेनैव तत्कुर्याद्येन रात्रौ सुखं वसेत् ।
अष्टमासेन तत्कुर्याद्येन वर्षाः सुखं वसेत् ॥ ५७
पूर्वे वयसि तत्कुर्याद्येन वृद्धः सुखं वसेत् ।
यावज्जीवेन तत्कुर्याद्येन प्रेत्य सुखं वसेत् ॥ ५८
जीर्णमन्नं प्रशंसन्ति भार्यां च गतयौवनाम् ।
शूरं विगतसंग्रामं गतपारं तपस्विनम् ॥ ५९
धनेनाधर्मलब्धेन यच्छिद्रमपिधीयते ।
असंवृतं तद्भवति ततोऽन्यदवदीर्यते ॥ ६०
गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनाम् ।

अथ प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ॥ ६१
ऋषीणां च नदीनां च कुलानां च महात्मनाम् ।
प्रभवो नाधिगन्तव्यः स्त्रीणां दुश्चरितस्य च ॥ ६२
द्विजातिपूजाभिरतो दाता ज्ञातिषु चार्जवी ।
क्षत्रियः स्वर्गभाग्राजंश्चिरं पालयते महीम् ॥ ६३
सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥ ६४
बुद्धिश्रेष्ठानि कर्माणि बाहुमध्यानि भारत ।
तानि जङ्घाजघन्यानि भारप्रत्यवराणि च ॥ ६५
दुर्योधने च शकुनौ मूढे दुःशासने तथा ।
कर्णे चैश्वर्यमाधाय कथं त्वं भूतिमिच्छसि ॥ ६६
सर्वैर्गुणैरुपेताश्च पाण्डवा भरतर्षभ ।
पितृवत्त्वयि वर्तन्ते तेषु वर्तस्व पुत्रवत् ॥ ६७

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

३६

विदुर उवाच ।

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
आत्रेयस्य च संवादं साध्यानां चेति नः श्रुतम् ॥१
चरन्तं हंसरूपेण महर्षिं संशितव्रतम् ।
साध्या देवा महाप्राज्ञं पर्यपृच्छन्त वै पुरा ॥ २

साध्या देवा वयमस्मो महर्षे
दृष्ट्वा भवन्तं न शक्नुमोऽनुमातुम् ।
श्रुतेन धीरो बुद्धिमांस्त्वं मतो नः
काव्यां वाचं वक्तुमर्हस्युदाराम् ॥ ३

हंस उवाच ।

एतत्कार्यममराः संश्रुतं मे
धृतिः शमः सत्यधर्मानुवृत्तिः ।
ग्रन्थिं विनीय हृदयस्य सर्वं
प्रियाप्रिये चात्मवशं नयीत ॥ ४

आक्रुश्यमानो नाक्रोशेन्मन्युरेव तितिक्षतः ।
आक्रोष्टारं निर्दहति सुकृतं चास्य विन्दति ॥ ५

नाक्रोशी स्यान्नावमानी परस्य
मित्रद्रोही नोत नीचोपसेवी ।
न चातिमानी न च हीनवृत्तो
रूक्षां वाचं रुशतीं वर्जयीत ॥ ६

मर्माण्यस्थीनि हृदयं तथासू-
न्घोरा वाचो निर्दहन्तीह पुंसाम् ।
तस्माद्वाचं रुशतीं रूक्षरूपां
धर्मारामो नित्यशो वर्जयीत ॥ ७

अरुंतुदं परुषं रूक्षवाचं
वाक्कण्टकैर्वितुदन्तं मनुष्यान् ।
विद्यादलक्ष्मीकतमं जनानां
मुखे निबद्धां निरृतिं वहन्तम् ॥ ८

परश्चेदेनमधिविध्येत बाणै-
र्भृशं सुतीक्ष्णैरनलार्कदीप्तैः ।
विरिच्यमानोऽप्यतिरिच्यमानो
विद्यात्कविः सुकृतं मे दधाति ॥ ९

यदि सन्तं सेवते यद्यसन्तं
तपस्विनं यदि वा स्तेनमेव ।
वासो यथा रङ्गवशं प्रयाति
तथा स तेषां वशमभ्युपैति ॥ १०

वादं तु यो न प्रवदेन्न वादये-
द्यो नाहतः प्रतिहन्यान्न घातयेत् ।
यो हन्तुकामस्य न पापमिच्छे-
त्तस्मै देवाः स्पृहयन्त्यागताय ॥ ११

अव्याहृतं व्याहृताच्छ्रेय आहुः
सत्यं वदेद्व्याहृतं तद्द्वितीयम् ।
प्रियं वदेद्व्याहृतं तत्तृतीयं
धर्म्यं वदेद्व्याहृतं तच्चतुर्थम् ॥ १२

यादृशैः संविवदते यादृशांश्चोपसेवते ।
यादृगिच्छेच्च भवितुं तादृग्भवति पूरुषः ॥ १३
यतो यतो निवर्तते ततस्ततो विमुच्यते ।
निवर्तनाद्धि सर्वतो न वेत्ति दुःखमण्वपि ॥ १४
न जीयते नोत जिगीषतेऽन्या-
न्न वैरकृच्चाप्रतिघातकश्च ।
निन्दाप्रशंसासु समस्वभावो
न शोचते हृष्यति नैव चायम् ॥ १५
भावमिच्छति सर्वस्य नाभावे कुरुते मतिम् ।
सत्यवादी मृदुर्दान्तो यः स उत्तमपूरुषः ॥ १६
नानर्थकं सान्त्वयति प्रतिज्ञाय ददाति च ।
राद्धापराद्धे जानाति यः स मध्यमपूरुषः ॥ १७
दुःशासनस्तूपहन्ता न शास्ता
नावर्तते मन्युवशात्कृतघ्नः ।
न कस्यचिन्मित्रमथो दुरात्मा
कलाश्चैता अधमस्येह पुंसः ॥ १८
न श्रद्दधाति कल्याणं परेभ्योऽप्यात्मशङ्कितः ।
निराकरोति मित्राणि यो वै सोऽधमपूरुषः १९
उत्तमानेव सेवेत प्राप्ते काले तु मध्यमान् ।
अधमांस्तु न सेवेत य इच्छेच्छ्रेय आत्मनः ॥२०
प्राप्नोति वै वित्तमसद्बलेन
नित्योत्थानात्प्रज्ञया पौरुषेण ।
न त्वेव सम्यग्लभते प्रशंसां
न वृत्तमाप्नोति महाकुलानाम् ॥ २१

धृतराष्ट्र उवाच ।

महाकुलानां स्पृहयन्ति देवा
धर्मार्थवृद्धाश्च बहुश्रुताश्च ।
पृच्छामि त्वां विदुर प्रश्नमेतं
भवन्ति वै कानि महाकुलानि ॥ २२

विदुर उवाच ।

तपो दमो ब्रह्मवित्त्वं वितानाः
पुण्या विवाहाः सततान्नदानम् ।
येष्वेवैते सप्त गुणा भवन्ति
सम्यग्वृत्तास्तानि महाकुलानि ॥ २३
येषां न वृत्तं व्यथते न योनि-
र्वृत्तप्रसादेन चरन्ति धर्मम् ।
ये कीर्तिमिच्छन्ति कुले विशिष्टां
त्यक्तानृतास्तानि महाकुलानि ॥ २४
अनिज्ययाविवाहैश्च वेदस्योत्सादनेन च ।
कुलान्यकुलतां यान्ति धर्मस्यातिक्रमेण च ॥ २५
देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च ।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥ २६
ब्राह्मणानां परिभवात्परिवादाच्च भारत ।
कुलान्यकुलतां यान्ति न्यासापहरणेन च ॥ २७
कुलानि समुपेतानि गोभिः पुरुषतोऽश्वतः ।
कुलसंख्यां न गच्छन्ति यानि हीनानि वृत्ततः ॥२८
वृत्ततस्त्वविहीनानि कुलान्यल्पधनान्यपि ।
कुलसंख्यां तु गच्छन्ति कर्षन्ति च महद्यशः ॥२९
मा नः कुले वैरकृत्कश्चिदस्तु
राजामात्यो मा परस्वापहारी ।
मित्रद्रोही नैकृतिकोऽनृती वा
पूर्वाशी वा पितृदेवातिथिभ्यः ॥ ३०
यश्च नो ब्राह्मणं हन्याद्यश्च नो ब्राह्मणान्द्विषेत् ।
न नः स समितिं गच्छेद्यश्च नो निर्वपेत्कृषिम् ॥३१
तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन ॥ ३२
श्रद्धया परया राजन्नुपनीतानि सत्कृतिम् ।
प्रवृत्तानि महाप्राज्ञ धर्मिणां पुण्यकर्मणाम् ॥ ३३
सूक्ष्मोऽपि भारं नृपते स्यन्दनो वै

शक्तो वोढुं न तथान्ये महीजाः ।
एवं युक्ता भारसहा भवन्ति
महाकुलीना न तथान्ये मनुष्याः ॥ ३४
न तन्मित्रं यस्य कोपाद्बिभेति
यद्वा मित्रं शङ्कितेनोपचर्यम् ।
यस्मिन्मित्रे पितरीवाश्वसीत
तद्वै मित्रं संगतानीतराणि ॥ ३५
यदि चेदप्यसंबन्धो मित्रभावेन वर्तते ।
स एव बन्धुस्तन्मित्रं सा गतिस्तत्परायणम् ॥ ३६
चलचित्तस्य वै पुंसो वृद्धाननुपसेवतः ।
पारिप्लवमतेर्नित्यमध्रुवो मित्रसंग्रहः ॥ ३७
चलचित्तमनात्मानमिन्द्रियाणां वशानुगम् ।
अर्थाः समतिवर्तन्ते हंसाः शुष्कं सरो यथा ॥ ३८
अकस्मादेव कुप्यन्ति प्रसीदन्त्यनिमित्ततः ।
शीलमेतदसाधूनामभ्रं पारिप्लवं यथा ॥ ३९
सत्कृताश्च कृतार्थाश्च मित्राणां न भवन्ति ये ।
तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते ॥ ४०
अर्थयेदेव मित्राणि सति वासति वा धने ।
नानर्थयन्विजानाति मित्राणां सारफल्गुताम् ॥ ४१
संतापाद्भ्रश्यते रूपं संतापाद्भ्रश्यते बलम् ।
संतापाद्भ्रश्यते ज्ञानं संतापाद्व्याधिमृच्छति ॥ ४२
अनवाप्यं च शोकेन शरीरं चोपतप्यते ।
अमित्राश्च प्रहृष्यन्ति मा स्म शोके मनः कृथाः ॥ ४३
पुनर्नरो म्रियते जायते च
पुनर्नरो हीयते वर्धते पुनः ।
पुनर्नरो याचति याच्यते च
पुनर्नरः शोचति शोच्यते पुनः ॥ ४४
सुखं च दुःखं च भवाभवौ च
लाभालाभौ मरणं जीवितं च ।
पर्यायशः सर्वमिह स्पृशन्ति
तस्माद्धीरो नैव हृष्येन्न शोचेत् ॥ ४५
चलानि हीमानि षडिन्द्रियाणि
तेषां यद्यद्वर्तते यत्र यत्र ।
ततस्ततः स्रवते बुद्धिरस्य
छिद्रोदकुम्भादिव नित्यमम्भः ॥ ४६

धृतराष्ट्र उवाच ।

तनुरुच्चः शिखी राजा मिथ्योपचरितो मया ।
मन्दानां मम पुत्राणां युद्धेनान्तं करिष्यति ॥ ४७
नित्योद्विग्नमिदं सर्वं नित्योद्विग्नमिदं मनः ।
यत्तत्पदमनुद्विग्नं तन्मे वद महामते ॥ ४८

विदुर उवाच ।

नान्यत्र विद्यातपसोर्नान्यत्रेन्द्रियनिग्रहात् ।
नान्यत्र लोभसंत्यागाच्छान्तिं पश्यामि तेऽनघ ॥ ४९
बुद्ध्या भयं प्रणुदति तपसा विन्दते महत् ।
गुरुशुश्रूषया ज्ञानं शान्तिं त्यागेन विन्दति ॥ ५०
अनाश्रिता दानपुण्यं वेदपुण्यमनाश्रिताः ।
रागद्वेषविनिर्मुक्ता विचरन्तीह मोक्षिणः ॥ ५१
स्वधीतस्य सुयुद्धस्य सुकृतस्य च कर्मणः ।
तपसश्च सुतप्तस्य तस्यान्ते सुखमेधते ॥ ५२
स्वास्तीर्णानि शयनानि प्रपन्ना
न वै भिन्ना जातु निद्रां लभन्ते ।
न स्त्रीषु राजन्रतिमाप्नुवन्ति
न मागधैः स्तूयमाना न सूतैः ॥ ५३
न वै भिन्ना जातु चरन्ति धर्मं
न वै सुखं प्राप्नुवन्तीह भिन्नाः ।
न वै भिन्ना गौरवं मानयन्ति
न वै भिन्नाः प्रशमं रोचयन्ति ॥ ५४
न वै तेषां स्वदते पथ्यमुक्तं
योगक्षेमं कल्पते नोत तेषाम् ।
भिन्नानां वै मनुजेन्द्र परायणं

न विद्यते किंचिदन्यद्विनाशात् ॥ ५५
संभाव्यं गोषु संपन्नं संभाव्यं ब्राह्मणे तपः ।
संभाव्यं स्त्रीषु चापल्यं संभाव्यं ज्ञातितो भयम् ॥
तन्तवोऽप्यायता नित्यं तन्तवो बहुलाः समाः ।
बहून्बहुत्वादायासान्सहन्तीत्युपमा सताम् ॥ ५७
धूमायन्ते व्यपेतानि ज्वलन्ति सहितानि च ।
धृतराष्ट्रोल्मुकानीव ज्ञातयो भरतर्षभ ॥ ५८
ब्राह्मणेषु च ये शूराः स्त्रीषु ज्ञातिषु गोषु च ।
वृन्तादिव फलं पक्वं धृतराष्ट्र पतन्ति ते ॥ ५९
महानप्येकजो वृक्षो बलवान्सुप्रतिष्ठितः ।
प्रसह्य एव वातेन शाखास्कन्धं विमर्दितुम् ॥ ६०
अथ ये सहिता वृक्षाः संघशः सुप्रतिष्ठिताः ।
ते हि शीघ्रतमान्वातान्सहन्तेऽन्योन्यसंश्रयात् ॥ ६१
एवं मनुष्यमप्येकं गुणैरपि समन्वितम् ।
शक्यं द्विषन्तो मन्यन्ते वायुर्द्रुममिवैकजम् ॥ ६२
अन्योन्यसमुपष्टम्भादन्योन्यापाश्रयेण च ।
ज्ञातयः संप्रवर्धन्ते सरसीवोत्पलान्युत ॥ ६३
अवध्या ब्राह्मणा गावः स्त्रियो बालाश्च ज्ञातयः ।
येषां चान्नानि भुञ्जीत ये च स्युः शरणागताः ॥
न मनुष्ये गुणः कश्चिदन्यो धनवतामपि ।
अनातुरत्वाद्भद्रं ते मृतकल्पा हि रोगिणः ॥ ६५
अव्याधिजं कटुकं शीर्षरोगं
पापानुबन्धं पुरुषं तीक्ष्णमुग्रम् ।
सतां पेयं यन्न पिबन्त्यसन्तो
मन्युं महाराज पिब प्रशाम्य ॥ ६६
रोगार्दिता न फलान्याद्रियन्ते
न वै लभन्ते विषयेषु तत्त्वम् ।
दुःखोपेता रोगिणो नित्यमेव
न बुध्यन्ते धनभोगान्न सौख्यम् ॥ ६७
पुरा ह्युक्तो नाकरोस्त्वं वचो मे
द्यूते जितां द्रौपदीं प्रेक्ष्य राजन् ।
दुर्योधनं वारयेत्यक्षवत्यां
कितवत्वं पण्डिता वर्जयन्ति ॥ ६८
न तद्बलं यन्मृदुना विरुध्यते
मिश्रो धर्मस्तरसा सेवितव्यः ।
प्रध्वंसिनी क्रूरसमाहिता श्री-
र्मृदुप्रौढा गच्छति पुत्रपौत्रान् ॥ ६९
धार्तराष्ट्राः पाण्डवान्पालयन्तु
पाण्डोः सुतास्तव पुत्रांश्च पान्तु ।
एकारिमित्राः कुरवो ह्येकमन्त्रा
जीवन्तु राजन्सुखिनः समृद्धाः ॥ ७०
मेढीभूतः कौरवाणां त्वमद्य
त्वय्याधीनं कुरुकुलमाजमीढ ।
पार्थान्बालान्वनवासप्रतप्ता-
न्गोपायस्व स्वं यशस्तात रक्षन् ॥ ७१
संधत्स्व त्वं कौरवान्पाण्डुपुत्रै-
र्मा तेऽन्तरं रिपवः प्रार्थयन्तु ।
सत्ये स्थितास्ते नरदेव सर्वे
दुर्योधनं स्थापय त्वं नरेन्द्र ॥ ७२

इति श्रीमहाभारते उद्योगपर्वणि
षट्त्रिंशोऽध्यायः ॥ ३६ ॥

३७

विदुर उवाच ।

सप्तदशेमान्राजेन्द्र मनुः स्वायंभुवोऽब्रवीत् ।
वैचित्रवीर्य पुरुषानाकाशं मुष्टिभिर्घ्नतः ॥ १
तानेवेन्द्रस्य हि धनुरनाम्यं नमतोऽब्रवीत् ।
अथो मरीचिनः पादाननाम्यान्नमतस्तथा ॥ २
यश्चाशिष्यं शासति यश्च कुप्यते
यश्चातिवेलं भजते द्विषन्तम् ।
स्त्रियश्च योऽरक्षति भद्रमस्तु ते

यश्चायाच्यं याचति यश्च कत्थते ॥ ३
यश्चाभिजातः प्रकरोत्यकार्यं
यश्चाबलो बलिना नित्यवैरी ।
अश्रद्दधानाय च यो ब्रवीति
यश्चाकाम्यं कामयते नरेन्द्र ॥ ४
वध्वा हासं श्वशुरो यश्च मन्यते
वध्वा वसन्नुत यो मानकामः ।
परक्षेत्रे निर्वपति यश्च बीजं
स्त्रियं च यः परिवदतेऽतिवेलम् ॥ ५
यश्चैव लब्ध्वा न स्मरामीत्युवाच
दत्त्वा च यः कत्थति याच्यमानः ।
यश्चासतः सान्त्वमुपासतीह
एतेऽनुयान्त्यनिलं पाशहस्ताः ॥ ६
यस्मिन्यथा वर्तते यो मनुष्य-
स्तस्मिंस्तथा वर्तितव्यं स धर्मः ।
मायाचारो मायया वर्तितव्यः
साध्वाचारः साधुना प्रत्युदेयः ॥ ७

धृतराष्ट्र उवाच ।

शतायुरुक्तः पुरुषः सर्ववेदेषु वै यदा ।
नाप्नोत्यथ च तत्सर्वमायुः केनेह हेतुना ॥ ८

विदुर उवाच ।

अतिवादोऽतिमानश्च तथात्यागो नराधिप ।
क्रोधश्चातिविवित्सा च मित्रद्रोहश्च तानि षट् ॥ ९
एत एवासयस्तीक्ष्णाः कृन्तन्त्यायूंषि देहिनाम् ।
एतानि मानवान्घ्नन्ति न मृत्युर्भद्रमस्तु ते ॥ १०
विश्वस्तस्यैति यो दारान्यश्चापि गुरुतल्पगः ।
वृषलीपतिर्द्विजो यश्च पानपश्चैव भारत ॥ ११
शरणागतहा चैव सर्वे ब्रह्महणैः समाः ।
एतैः समेत्य कर्तव्यं प्रायश्चित्तमिति श्रुतिः ॥ १२
गृही वदान्योऽनपविद्धवाक्यः
शेषान्नभोक्ताप्यविहिंसकश्च ।
नानर्थकृत्त्यक्तकलिः कृतज्ञः
सत्यो मृदुः स्वर्गमुपैति विद्वान् ॥ १३
सुलभाः पुरुषा राजन्सततं प्रियवादिनः ।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ॥१४
यो हि धर्मं व्यपाश्रित्य हित्वा भर्तुः प्रियाप्रिये ।
अप्रियाण्याह पथ्यानि तेन राजा सहायवान् ॥१५
त्यजेत्कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥१६
आपदर्थं धनं रक्षेद्दारान्रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ १७
उक्तं मया द्यूतकालेऽपि राज-
न्नैवं युक्तं वचनं प्रातिपीय ।
तदौषधं पथ्यमिवातुरस्य
न रोचते तव वैचित्रवीर्य ॥ १८
काकैरिमांश्चित्रबर्हान्मयूरा-
न्पराजैष्ठाः पाण्डवान्धार्तराष्ट्रैः ।
हित्वा सिंहान्क्रोष्टुकान्गूहमानः
प्राप्ते काले शोचिता त्वं नरेन्द्र ॥ १९
यस्तात न क्रुध्यति सर्वकालं
भृत्यस्य भक्तस्य हिते रतस्य ।
तस्मिन्भृत्या भर्तरि विश्वसन्ति
न चैनमापत्सु परित्यजन्ति ॥ २०
न भृत्यानां वृत्तिसंरोधनेन
बाह्यं जनं संजिघृक्षेदपूर्वम् ।
त्यजन्ति ह्येनमुचितावरुद्धाः
स्निग्धा ह्यमात्याः परिहीनभोगाः ॥ २१
कृत्यानि पूर्वं परिसंख्याय सर्वा-
ण्यायव्ययावनुरूपां च वृत्तिम् ।
संगृह्णीयादनुरूपान्सहाया-

न्सहायसाध्यानि हि दुष्कराणि ॥ २२
अभिप्रायं यो विदित्वा तु भर्तुः
सर्वाणि कार्याणि करोत्यतन्द्रीः ।
वक्ता हितानामनुरक्त आर्यः
शक्तिज्ञ आत्मेव हि सोऽनुकम्प्यः ॥ २३
वाक्यं तु यो नाद्रियतेऽनुशिष्टः
प्रत्याह यश्चापि नियुज्यमानः ।
प्रज्ञाभिमानी प्रतिकूलवादी
त्याज्यः स तादृक्त्वरयैव भृत्यः ॥ २४
अस्तब्धमक्लीबमदीर्घसूत्रं
सानुक्रोशं श्लक्ष्णमहार्यमन्यैः ।
अरोगजातीयमुदारवाक्यं
दूतं वदन्त्यष्टगुणोपपन्नम् ॥ २५
न विश्वासाज्जातु परस्य गेहं
गच्छेन्नरश्चेतयानो विकाले ।
न चत्वरे निशि तिष्ठेन्निगूढो
न राजन्यां योषितं प्रार्थयीत ॥ २६
न निह्नवं सत्रगतस्य गच्छे-
त्संसृष्टमन्त्रस्य कुसंगतस्य ।
न च ब्रूयान्नाश्वसामि त्वयीति
सकारणं व्यपदेशं तु कुर्यात् ॥ २७
घृणी राजा पुंश्चली राजभृत्यः
पुत्रो भ्राता विधवा बालपुत्रा ।
सेनाजीवी चोद्धृतभक्त एव
व्यवहारे वै वर्जनीयाः स्युरेते ॥ २८
गुणा दश स्नानशीलं भजन्ते
बलं रूपं स्वरवर्णप्रशुद्धिः ।
स्पर्शश्च गन्धश्च विशुद्धता च
श्रीः सौकुमार्यं प्रवराश्च नार्यः ॥ २९
गुणाश्च षण्मितभुक्तं भजन्ते
आरोग्यमायुश्च सुखं बलं च ।
अनाविलं चास्य भवेदपत्यं
न चैनमाद्यून इति क्षिपन्ति ॥ ३०
अकर्मशीलं च महाशनं च
लोकद्विष्टं बहुमायं नृशंसम् ।
अदेशकालज्ञमनिष्टवेष-
मेतान्गृहे न प्रतिवासयीत ॥ ३१
कदर्यमाक्रोशकमश्रुतं च
वराकसंभूतममान्यमानिनम् ।
निष्ठूरिणं कृतवैरं कृतघ्न-
मेतान्भृशार्तोऽपि न जातु याचेत् ॥ ३२
संक्लिष्टकर्माणमतिप्रवादं
नित्यानृतं चादृढभक्तिकं च ।
विकृष्टरागं बहुमानिनं चा-
प्येतान्न सेवेत नराधमान्षट् ॥ ३३
सहायबन्धना ह्यर्थाः सहायाश्चार्थबन्धनाः ।
अन्योन्यबन्धनावेतौ विनान्योन्यं न सिध्यतः ॥३४
उत्पाद्य पुत्राननृणांश्च कृत्वा
वृत्तिं च तेभ्योऽनुविधाय कांचित् ।
स्थाने कुमारीः प्रतिपाद्य सर्वा
अरण्यसंस्थो मुनिवद्बुभूषेत् ॥ ३५
हितं यत्सर्वभूतानामात्मनश्च सुखावहम् ।
तत्कुर्यादीश्वरो ह्येतन्मूलं धर्मार्थसिद्धये ॥ ३६
बुद्धिः प्रभावस्तेजश्च सत्त्वमुत्थानमेव च ।
व्यवसायश्च यस्य स्यात्तस्यावृत्तिभयं कुतः ॥ ३७
पश्य दोषान्पाण्डवैर्विग्रहे त्वं
यत्र व्यथेरन्नपि देवाः सशक्राः ।
पुत्रैर्वैरं नित्यमुद्विग्नवासो
यशःप्रणाशो द्विषतां च हर्षः ॥ ३८
भीष्मस्य कोपस्तव चेन्द्रकल्प

द्रोणस्य राज्ञश्च युधिष्ठिरस्य ।
उत्सादयेल्लोकमिमं प्रवृद्धः
श्वेतो ग्रहस्तिर्यगिवापतन्खे ॥ ३९
तव पुत्रशतं चैव कर्णः पञ्च च पाण्डवाः ।
पृथिवीमनुशासेयुरखिलां सागराम्बराम् ॥ ४०
धार्तराष्ट्रा वनं राजन्व्याघ्राः पाण्डुसुता मताः ।
मा वनं छिन्धि सव्याघ्रं मा व्याघ्रान्नीनशो वनात् ॥
न स्याद्वनमृते व्याघ्रान्व्याघ्रा न स्युर्ऋते वनम् ।
वनं हि रक्ष्यते व्याघ्रैर्व्याघ्रान्रक्षति काननम् ॥ ४२
न तथेच्छन्त्यकल्याणाः परेषां वेदितुं गुणान् ।
यथैषां ज्ञातुमिच्छन्ति नैर्गुण्यं पापचेतसः ॥ ४३
अर्थसिद्धिं परामिच्छन्धर्ममेवादितश्चरेत् ।
न हि धर्मादपैत्यर्थः स्वर्गलोकादिवामृतम् ॥ ४४
यस्यात्मा विरतः पापात्कल्याणे च निवेशितः ।
तेन सर्वमिदं बुद्धं प्रकृतिर्विकृतिश्च या ॥ ४५
यो धर्ममर्थं कामं च यथाकालं निषेवते ।
धर्मार्थकामसंयोगं सोऽमुत्रेह च विन्दति ॥ ४६
संनियच्छति यो वेगमुत्थितं क्रोधहर्षयोः ।
स श्रियो भाजनं राजन्यश्चापत्सु न मुह्यति ॥ ४७
बलं पञ्चविधं नित्यं पुरुषाणां निबोध मे ।
यत्तु बाहुबलं नाम कनिष्ठं बलमुच्यते ॥ ४८
अमात्यलाभो भद्रं ते द्वितीयं बलमुच्यते ।
धनलाभस्तृतीयं तु बलमाहुर्जिगीषवः ॥ ४९
यत्त्वस्य सहजं राजन्पितृपैतामहं बलम् ।
अभिजातबलं नाम तच्चतुर्थं बलं स्मृतम् ॥ ५०
येन त्वेतानि सर्वाणि संगृहीतानि भारत ।
यद्बलानां बलं श्रेष्ठं तत्प्रज्ञाबलमुच्यते ॥ ५१
महते योऽपकाराय नरस्य प्रभवेन्नरः ।
तेन वैरं समासज्य दूरस्थोऽस्मीति नाश्वसेत् ॥५२
स्त्रीषु राजसु सर्पेषु स्वाध्याये शत्रुसेविषु ।
भोगे चायुषि विश्वासं कः प्राज्ञः कर्तुमर्हति ॥५३
प्रज्ञाशरेणाभिहतस्य जन्तो-
श्चिकित्सकाः सन्ति न चौषधानि ।
न होममन्त्रा न च मङ्गलानि
नाथर्वणा नाप्यगदाः सुसिद्धाः ॥ ५४
सर्पश्चाग्निश्च सिंहश्च कुलपुत्रश्च भारत ।
नावज्ञेया मनुष्येण सर्वे ते ह्यतितेजसः ॥ ५५
अग्निस्तेजो महल्लोके गूढस्तिष्ठति दारुषु ।
न चोपयुङ्क्ते तद्दारु यावन्नो दीप्यते परैः ॥ ५६
स एव खलु दारुभ्यो यदा निर्मथ्य दीप्यते ।
तदा तच्च वनं चान्यन्निर्दहत्याशु तेजसा ॥ ५७
एवमेव कुले जाताः पावकोपमतेजसः ।
क्षमावन्तो निराकाराः काष्ठेऽग्निरिव शेरते ॥ ५८
लताधर्मा त्वं सपुत्रः शालाः पाण्डुसुता मताः ।
न लता वर्धते जातु महाद्रुममनाश्रिता ॥ ५९
वनं राजंस्त्वं सपुत्रोऽम्बिकेय
सिंहान्वने पाण्डवांस्तात विद्धि ।
सिंहैर्विहीनं हि वनं विनश्ये-
त्सिंहा विनश्येयुर्ऋते वनेन ॥ ६०

इति श्रीमहाभारते उद्योगपर्वणि
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

३८

विदुर उवाच ।

ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते ॥ १
पीठं दत्त्वा साधवेऽभ्यागताय
आनीयापः परिनिर्णिज्य पादौ ।
सुखं पृष्ट्वा प्रतिवेद्यात्मसंस्थं
ततो दद्यादन्नमवेक्ष्य धीरः ॥ २
यस्योदकं मधुपर्कं च गां च

नमन्त्रविद्प्रतिगृह्णाति गेहे ।
लोभाद्भयादर्थकार्पण्यतो वा
तस्यानर्थं जीवितमाहुरार्याः ॥ ३
चिकित्सकः शल्यकर्तावकीर्णी
स्तेनः क्रूरो मद्यपो भ्रूणहा च ।
सेनाजीवी श्रुतिविक्रायकश्च
भृशं प्रियोऽप्यतिथिर्नोदकार्हः ॥ ४
अविक्रेयं लवणं पक्वमन्नं
दधि क्षीरं मधु तैलं घृतं च ।
तिला मांसं मूलफलानि शाकं
रक्तं वासः सर्वगन्धा गुडश्च ॥ ५
अरोषणो यः समलोष्टकाञ्चनः
प्रहीणशोको गतसंधिविग्रहः ।
निन्दाप्रशंसोपरतः प्रियाप्रिये
चरन्नुदासीनवदेष भिक्षुकः ॥ ६
नीवारमूलेङ्गुदशाकवृत्तिः
सुसंयतात्माग्निकार्येष्वचोद्यः ।
वने वसन्नतिथिष्वप्रमत्तो
धुरंधरः पुण्यकृदेष तापसः ॥ ७
अपकृत्वा बुद्धिमतो दूरस्थोऽस्मीति नाश्वसेत् ।
दीर्घौ बुद्धिमतो बाहू याभ्यां हिंसति हिंसितः ॥ ८
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ ९
अनीर्ष्युर्गुप्तदारः स्यात्संविभागी प्रियंवदः ।
श्लक्ष्णो मधुरवाक्स्त्रीणां न चासां वशगो भवेत् ॥१०
पूजनीया महाभागाः पुण्याश्च गृहदीप्तयः ।
स्त्रियः श्रियो गृहस्योक्तास्तस्माद्रक्ष्या विशेषतः॥११
पितुरन्तःपुरं दद्यान्मातुर्दद्यान्महानसम् ।
गोषु चात्मसमं दद्यात्स्वयमेव कृषिं व्रजेत् ।
भृत्यैर्वणिज्याचारं च पुत्रैः सेवेत ब्राह्मणान् ॥ १२
अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् ।
तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥ १३
नित्यं सन्तः कुले जाताः पावकोपमतेजसः ।
क्षमावन्तो निराकाराः काष्ठेऽग्निरिव शेरते ॥ १४
यस्य मन्त्रं न जानन्ति बाह्याश्चाभ्यन्तराश्च ये ।
स राजा सर्वतश्चक्षुश्चिरमैश्वर्यमश्नुते ॥ १५
करिष्यन्न प्रभाषेत कृतान्येव च दर्शयेत् ।
धर्मकामार्थकार्याणि तथा मन्त्रो न भिद्यते ॥ १६
गिरिपृष्ठमुपारुह्य प्रासादं वा रहोगतः ।
अरण्ये निःशलाके वा तत्र मन्त्रो विधीयते ॥ १७
नासुहृत्परमं मन्त्रं भारतार्हति वेदितुम् ।
अपण्डितो वापि सुहृत्पण्डितो वाप्यनात्मवान् ।
अमात्ये ह्यर्थलिप्सा च मन्त्ररक्षणमेव च ॥ १८
कृतानि सर्वकार्याणि यस्य वा पार्षदा विदुः ।
गूढमन्त्रस्य नृपतेस्तस्य सिद्धिरसंशयम् ॥ १९
अप्रशस्तानि कर्माणि यो मोहादनुतिष्ठति ।
स तेषां विपरिभ्रंशे भ्रश्यते जीवितादपि ॥ २०
कर्मणां तु प्रशस्तानामनुष्ठानं सुखावहम् ।
तेषामेवाननुष्ठानं पश्चात्तापकरं महत् ॥ २१
स्थानवृद्धिक्षयज्ञस्य षाड्गुण्यविदितात्मनः ।
अनवज्ञातशीलस्य स्वाधीना पृथिवी नृप ॥ २२
अमोघक्रोधहर्षस्य स्वयं कृत्यान्ववेक्षिणः ।
आत्मप्रत्ययकोशस्य वसुधेयं वसुंधरा ॥ २३
नाममात्रेण तुष्येत छत्रेण च महीपतिः ।
भृत्येभ्यो विसृजेदर्थान्नैकः सर्वहरो भवेत् ॥ २४
ब्राह्मणो ब्राह्मणं वेद भर्ता वेद स्त्रियं तथा ।
अमात्यं नृपतिर्वेद राजा राजानमेव च ॥ २५
न शत्रुरङ्कमापन्नो मोक्तव्यो वध्यतां गतः ।
अहताद्धि भयं तस्माज्जायते नचिरादिव ॥ २६
दैवतेषु च यत्नेन राजसु ब्राह्मणेषु च ।

नियन्तव्यः सदा क्रोधो वृद्धबालातुरेषु च ॥ २७
निरर्थं कलहं प्राज्ञो वर्जयेन्मूढसेवितम् ।
कीर्तिं च लभते लोके न चानर्थेन युज्यते ॥ २८
प्रसादो निष्फलो यस्य क्रोधश्चापि निरर्थकः ।
न तं भर्तारमिच्छन्ति षण्ढं पतिमिव स्त्रियः ॥२९
न बुद्धिर्धनलाभाय न जाड्यमसमृद्धये ।
लोकपर्यायवृत्तान्तं प्राज्ञो जानाति नेतरः ॥ ३०
विद्याशीलवयोवृद्धान्बुद्धिवृद्धांश्च भारत ।
धनाभिजनवृद्धांश्च नित्यं मूढोऽवमन्यते ॥ ३१
अनार्यवृत्तमप्राज्ञमसूयकमधार्मिकम् ।
अनर्थाः क्षिप्रमायान्ति वाग्दुष्टं क्रोधनं तथा ॥३२
अविसंवादनं दानं समयस्याव्यतिक्रमः ।
आवर्तयन्ति भूतानि सम्यक्प्रणिहिता च वाक् ॥३३
अविसंवादको दक्षः कृतज्ञो मतिमानृजुः ।
अपि संक्षीणकोशोऽपि लभते परिवारणम् ॥ ३४
धृतिः शमो दमः शौचं कारुण्यं वागनिष्ठुरा ।
मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः ॥
असंविभागी दुष्टात्मा कृतघ्नो निरपत्रपः ।
तादृङ्नराधमो लोके वर्जनीयो नराधिप ॥ ३६
न स रात्रौ सुखं शेते ससर्प इव वेश्मनि ।
यः कोपयति निर्दोषं सदोषोऽभ्यन्तरं जनम् ॥३७
येषु दुष्टेषु दोषः स्याद्योगक्षेमस्य भारत ।
सदा प्रसादनं तेषां देवतानामिवाचरेत् ॥ ३८
येऽर्थाः स्त्रीषु समासक्ताः प्रथमोत्पतितेषु च ।
ये चानार्यसमासक्ताः सर्वे ते संशयं गताः ॥ ३९
यत्र स्त्री यत्र कितवो यत्र बालोऽनुशास्ति च ।
मज्जन्ति तेऽवशा देशा नद्यामश्मप्लवा इव ॥ ४०
प्रयोजनेषु ये सक्ता न विशेषेषु भारत ।
तानहं पण्डितान्मन्ये विशेषा हि प्रसङ्गिनः ॥४१
यं प्रशंसन्ति कितवा यं प्रशंसन्ति चारणाः ।
यं प्रशंसन्ति बन्धक्यो न स जीवति मानवः ॥४२
हित्वा तान्परमेष्वासान्पाण्डवानमितौजसः ।
आहितं भारतैश्वर्यं त्वया दुर्योधने महत् ॥ ४३
तं द्रक्ष्यसि परिभ्रष्टं तस्मात्त्वं नचिरादिव ।
ऐश्वर्यमदसंमूढं बलिं लोकत्रयादिव ॥४४

इति श्रीमहाभारते उद्योगपर्वणि
अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

३९

धृतराष्ट्र उवाच ।

अनीश्वरोऽयं पुरुषो भवाभवे
सूत्रप्रोता दारुमयीव योषा ।
धात्रा तु दिष्टस्य वशे किलायं
तस्माद्वद त्वं श्रवणे धृतोऽहम् ॥ १

विदुर उवाच ।

अप्राप्तकालं वचनं बृहस्पतिरपि ब्रुवन् ।
लभते बुद्ध्यवज्ञानमवमानं च भारत ॥ २
प्रियो भवति दानेन प्रियवादेन चापरः ।
मन्त्रं मूलबलेनान्यो यः प्रियः प्रिय एव सः ॥ ३
द्वेष्यो न साधुर्भवति न मेधावी न पण्डितः ।
प्रिये शुभानि कर्माणि द्वेष्ये पापानि भारत ॥ ४
न स क्षयो महाराज यः क्षयो वृद्धिमावहेत् ।
क्षयः स त्विह मन्तव्यो यं लब्ध्वा बहु नाशयेत् ॥५
समृद्धा गुणतः केचिद्भवन्ति धनतोऽपरे ।
धनवृद्धान्गुणैर्हीनान्धृतराष्ट्र विवर्जयेत् ॥ ६

धृतराष्ट्र उवाच ।

सर्वं त्वमायतीयुक्तं भाषसे प्राज्ञसंमतम् ।
न चोत्सहे सुतं त्यक्तुं यतो धर्मस्ततो जयः ॥ ७

विदुर उवाच ।

स्वभावगुणसंपन्नो न जातु विनयान्वितः ।
सुसूक्ष्ममपि भूतानामुपमर्दं प्रयोक्ष्यते ॥ ८

परापवादनिरताः परदुःखोदयेषु च ।
परस्परविरोधे च यतन्ते सततोत्थिताः ॥ ९
सदोषं दर्शनं येषां संवासे सुमहद्भयम् ।
अर्थादाने महान्दोषः प्रदाने च महद्भयम् ॥ १०
ये पापा इति विख्याताः संवासे परिगर्हिताः ।
युक्ताश्चान्यैर्महादोषैर्ये नरास्तान्विवर्जयेत् ॥ ११
निवर्तमाने सौहार्दे प्रीतिर्नीचे प्रणश्यति ।
या चैव फलनिर्वृत्तिः सौहृदे चैव यत्सुखम् ॥ १२
यतते चापवादाय यत्नमारभते क्षये ।
अल्पेऽप्यपकृते मोहान्न शान्तिमुपगच्छति ॥ १३
तादृशैः संगतं नीचैर्नृशंसैरकृतात्मभिः ।
निशाम्य निपुणं बुद्ध्या विद्वान्दूराद्विवर्जयेत् ॥ १४
यो ज्ञातिमनुगृह्णाति दरिद्रं दीनमातुरम् ।
स पुत्रपशुभिर्वृद्धिं यशश्चाव्ययमश्नुते ॥ १५
ज्ञातयो वर्धनीयास्तैर्य इच्छन्त्यात्मनः शुभम् ।
कुलवृद्धिं च राजेन्द्र तस्मात्साधु समाचर ॥ १६
श्रेयसा योक्ष्यसे राजन्कुर्वाणो ज्ञातिसत्क्रियाम् ।
विगुणा ह्यपि संरक्ष्या ज्ञातयो भरतर्षभ ॥ १७
किं पुनर्गुणवन्तस्ते त्वत्प्रसादाभिकाङ्क्षिणः ।
प्रसादं कुरु दीनानां पाण्डवानां विशां पते ॥ १८
दीयन्तां ग्रामकाः केचित्तेषां वृत्त्यर्थमीश्वर ।
एवं लोके यशःप्राप्तो भविष्यसि नराधिप ॥ १९
वृद्धेन हि त्वया कार्यं पुत्राणां तात रक्षणम् ।
मया चापि हितं वाच्यं विद्धि मां त्वद्धितैषिणम् ॥२०
ज्ञातिभिर्विग्रहस्तात न कर्तव्यो भवार्थिना ।
सुखानि सह भोज्यानि ज्ञातिभिर्भरतर्षभ ॥ २१
संभोजनं संकथनं संप्रीतिश्च परस्परम् ।
ज्ञातिभिः सह कार्याणि न विरोधः कथंचन ॥२२
ज्ञातयस्तारयन्तीह ज्ञातयो मज्जयन्ति च ।
सुवृत्तास्तारयन्तीह दुर्वृत्ता मज्जयन्ति च ॥ २३
सुवृत्तो भव राजेन्द्र पाण्डवान्प्रति मानद ।
अधर्षणीयः शत्रूणां तैर्वृतस्त्वं भविष्यसि ॥ २४
श्रीमन्तं ज्ञातिमासाद्य यो ज्ञातिरवसीदति ।
दिग्धहस्तं मृग इव स एनस्तस्य विन्दति ॥ २५
पश्चादपि नरश्रेष्ठ तव तापो भविष्यति ।
तान्वा हतान्सुतान्वापि श्रुत्वा तदनुचिन्तय ॥ २६
येन खट्वां समारूढः परितप्येत कर्मणा ।
आदावेव न तत्कुर्यादध्रुवे जीविते सति ॥ २७
न कश्चिन्नापनयते पुमानन्यत्र भार्गवात् ।
शेषसंप्रतिपत्तिस्तु बुद्धिमत्स्वेव तिष्ठति ॥ २८
दुर्योधनेन यद्येतत्पापं तेषु पुरा कृतम् ।
त्वया तत्कुलवृद्धेन प्रत्यानेयं नरेश्वर ॥ २९
तांस्त्वं पदे प्रतिष्ठाप्य लोके विगतकल्मषः ।
भविष्यसि नरश्रेष्ठ पूजनीयो मनीषिणाम् ॥ ३०
सुव्याहृतानि धीराणां फलतः प्रविचिन्त्य यः ।
अध्यवस्यति कार्येषु चिरं यशसि तिष्ठति ॥ ३१
अवृत्तिं विनयो हन्ति हन्त्यनर्थं पराक्रमः ।
हन्ति नित्यं क्षमा क्रोधमाचारो हन्त्यलक्षणम् ॥३२
परिच्छदेन क्षेत्रेण वेश्मना परिचर्यया ।
परीक्षेत कुलं राजन्भोजनाच्छादनेन च ॥ ३३
ययोश्चित्तेन वा चित्तं नैभृतं नैभृतेन वा ।
समेति प्रज्ञया प्रज्ञा तयोर्मैत्री न जीर्यते ॥ ३४
दुर्बुद्धिमकृतप्रज्ञं छन्नं कूपं तृणैरिव ।
विवर्जयीत मेधावी तस्मिन्मैत्री प्रणश्यति ॥ ३५
अवलिप्तेषु मूर्खेषु रौद्रसाहसिकेषु च ।
तथैवापेतधर्मेषु न मैत्रीमाचरेद्बुधः ॥ ३६
कृतज्ञं धार्मिकं सत्यमक्षुद्रं दृढभक्तिकम् ।
जितेन्द्रियं स्थितं स्थित्यां मित्रमत्यागि चेष्यते ॥३७
इन्द्रियाणामनुत्सर्गो मृत्युना न विशिष्यते ।
अत्यर्थं पुनरुत्सर्गः सादयेद्दैवतान्यपि ॥ ३८

मार्दवं सर्वभूतानामनसूया क्षमा धृतिः ।
आयुष्याणि बुधाः प्राहुर्मित्राणां चाविमानना ॥३९
अपनीतं सुनीतेन योऽर्थं प्रत्यानिनीषते ।
मतिमास्थाय सुदृढां तदकापुरुषव्रतम् ॥ ४०
आयत्यां प्रतिकारज्ञस्तदात्वे दृढनिश्चयः ।
अतीते कार्यशेषज्ञो नरोऽर्थैर्न प्रहीयते ॥ ४१
कर्मणा मनसा वाचा यदभीक्ष्णं निषेवते ।
तदेवापहरत्येनं तस्मात्कल्याणमाचरेत् ॥ ४२
मङ्गलालम्भनं योगः श्रुतमुत्थानमार्जवम् ।
भूतिमेतानि कुर्वन्ति सतां चाभीक्ष्णदर्शनम् ॥ ४३
अनिर्वेदः श्रियो मूलं दुःखनाशे सुखस्य च ।
महान्भवत्यनिर्विण्णः सुखं चात्यन्तमश्नुते ॥ ४४
नातः श्रीमत्तरं किंचिदन्यत्पथ्यतमं तथा ।
प्रभविष्णोर्यथा तात क्षमा सर्वत्र सर्वदा ॥ ४५
क्षमेदशक्तः सर्वस्य शक्तिमान्धर्मकारणात् ।
अर्थानर्थौ समौ यस्य तस्य नित्यं क्षमा हिता ॥४६
यत्सुखं सेवमानोऽपि धर्मार्थाभ्यां न हीयते ।
कामं तदुपसेवेत न मूढव्रतमाचरेत् ॥ ४७
दुःखार्तेषु प्रमत्तेषु नास्तिकेष्वलसेषु च ।
न श्रीर्वसत्यदान्तेषु ये चोत्साहविवर्जिताः ॥ ४८
आर्जवेन नरं युक्तमार्जवात्सव्यपत्रपम् ।
अशक्तिमन्तं मन्यन्तो धर्षयन्ति कुबुद्धयः ॥ ४९
अत्यार्यमतिदातारमतिशूरमतिव्रतम् ।
प्रज्ञाभिमानिनं चैव श्रीर्भयान्नोपसर्पति ॥ ५०
अग्निहोत्रफला वेदाः शीलवृत्तफलं श्रुतम् ।
रतिपुत्रफला दारा दत्तभुक्तफलं धनम् ॥ ५१
अधर्मोपार्जितैरर्थैर्यः करोत्यौर्ध्वदेहिकम् ।
स तस्य फलं प्रेत्य भुङ्क्तेऽर्थस्य दुरागमात् ॥५२
कान्तारवनदुर्गेषु कृच्छ्रास्वापत्सु संभ्रमे ।
उद्यतेषु च शस्त्रेषु नास्ति शेषवतां भयम् ॥ ५३
उत्थानं संयमो दाक्ष्यमप्रमादो धृतिः स्मृतिः ।
समीक्ष्य च समारम्भो विद्धि मूलं भवस्य तत् ॥५४
तपो बलं तापसानां ब्रह्म ब्रह्मविदां बलम् ।
हिंसा बलमसाधूनां क्षमा गुणवतां बलम् ॥ ५५
अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥ ५६
न तत्परस्य संदध्यात्प्रतिकूलं यदात्मनः ।
संग्रहेणैष धर्मः स्यात्कामादन्यः प्रवर्तते ॥ ५७
अक्रोधेन जयेत्क्रोधमसाधुं साधुना जयेत् ।
जयेत्कदर्यं दानेन जयेत्सत्येन चानृतम् ॥ ५८
स्त्रीधूर्तकेऽलसे भीरौ चण्डे पुरुषमानिनि ।
चौरे कृतघ्ने विश्वासो न कार्यो न च नास्तिके ॥५९
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि संप्रवर्धन्ते कीर्तिरायुर्यशो बलम् ॥ ६०
अतिक्लेशेन येऽर्थाः स्युर्धर्मस्यातिक्रमेण च ।
अरेर्वा प्रणिपातेन मा स्म तेषु मनः कृथाः ॥ ६१
अविद्यः पुरुषः शोच्यः शोच्यं मिथुनमप्रजम् ।
निराहाराः प्रजाः शोच्याः शोच्यं राष्ट्रमराजकम् ॥
अध्वा जरा देहवतां पर्वतानां जलं जरा ।
असंभोगो जरा स्त्रीणां वाक्शल्यं मनसो जरा ॥६३
अनाम्नायमला वेदा ब्राह्मणस्याव्रतं मलम् ।
कौतूहलमला साध्वी विप्रवासमलाः स्त्रियः ॥ ६४
सुवर्णस्य मलं रूप्यं रूप्यस्यापि मलं त्रपु ।
ज्ञेयं त्रपुमलं सीसं सीसस्यापि मलं मलम् ॥ ६५
न स्वप्नेन जयेन्निद्रां न कामेन स्त्रियं जयेत् ।
नेन्धनेन जयेदग्निं न पानेन सुरां जयेत् ॥ ६६
यस्य दानजितं मित्रममित्रा युधि निर्जिताः ।
अन्नपानजिता दाराः सफलं तस्य जीवितम् ॥ ६७
सहस्रिणोऽपि जीवन्ति जीवन्ति शतिनस्तथा ।
धृतराष्ट्र विमुञ्चेच्छां न कथंचिन्न जीव्यते ॥ ६८

यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
नालमेकस्य तत्सर्वमिति पश्यन्न मुह्यति ॥ ६९
राजन्भूयो ब्रवीमि त्वां पुत्रेषु सममाचर ।
समता यदि ते राजन्स्वेषु पाण्डुसुतेषु च ॥ ७०

इति श्रीमहाभारते उद्योगपर्वणि
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

४०

विदुर उवाच ।

योऽभ्यर्थितः सद्भिरसज्जमानः
करोत्यर्थं शक्तिमहापयित्वा ।
क्षिप्रं यशस्तं समुपैति सन्त-
मलं प्रसन्ना हि सुखाय सन्तः ॥ १
महान्तमप्यर्थमधर्मयुक्तं
यः संत्यजत्यनुपाकुष्ट एव ।
सुखं स दुःखान्यवमुच्य शेते
जीर्णां त्वचं सर्प इवावमुच्य ॥ २
अनृतं च समुत्कर्षे राजगामि च पैशुनम् ।
गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया ॥ ३
असूयैकपदं मृत्युरतिवादः श्रियो वधः ।
अशुश्रूषा त्वरा श्लाघा विद्यायाः शत्रवस्त्रयः ॥ ४
सुखार्थिनः कुतो विद्या नास्ति विद्यार्थिनः सुखम् ।
सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा सुखं त्यजेत् ॥५
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वभूतानां न पुंसां वामलोचना ॥ ६
आशा धृतिं हन्ति समृद्धिमन्तकः
क्रोधः श्रियं हन्ति यशः कदर्यता ।
अपालनं हन्ति पशूंश्च राज-
न्नेकः क्रुद्धो ब्राह्मणो हन्ति राष्ट्रम् ॥ ७
अजश्च कांस्यं च रथश्च नित्यं
मध्वाकर्षः शकुनिः श्रोत्रियश्च ।
वृद्धो ज्ञातिरवसन्नो वयस्य
एतानि ते सन्तु गृहे सदैव ॥ ८
अजोक्षा चन्दनं वीणा आदर्शो मधुसर्पिषी ।
विषमौदुम्बरं शङ्खः स्वर्णं नाभिश्च रोचना ॥ ९
गृहे स्थापयितव्यानि धन्यानि मनुरब्रवीत् ।
देवब्राह्मणपूजार्थमतिथीनां च भारत ॥ १०
इदं च त्वां सर्वपरं ब्रवीमि
पुण्यं पदं तात महाविशिष्टम् ।
न जातु कामान्न भयान्न लोभा-
द्धर्मं त्यजेज्जीवितस्यापि हेतोः ॥ ११
नित्यो धर्मः सुखदुःखे त्वनित्ये
नित्यो जीवो धातुरस्य त्वनित्यः ।
त्यक्त्वानित्यं प्रतितिष्ठस्व नित्ये
संतुष्य त्वं तोषपरो हि लाभः ॥ १२
महाबलान्पश्य महानुभावा-
न्प्रशास्य भूमिं धनधान्यपूर्णाम् ।
राज्यानि हित्वा विपुलांश्च भोगा-
न्गतान्नरेन्द्रान्वशमन्तकस्य ॥ १३
मृतं पुत्रं दुःखपुष्टं मनुष्या
उत्क्षिप्य राजन्स्वगृहान्निर्हरन्ति ।
तं मुक्तकेशाः करुणं रुदन्त-
श्चितामध्ये काष्ठमिव क्षिपन्ति ॥ १४
अन्यो धनं प्रेतगतस्य भुङ्क्ते
वयांसि चाग्निश्च शरीरधातून् ।
द्वाभ्यामयं सह गच्छत्यमुत्र
पुण्येन पापेन च वेष्ट्यमानः ॥ १५
उत्सृज्य विनिवर्तन्ते ज्ञातयः सुहृदः सुताः ।
अग्नौ प्रास्तं तु पुरुषं कर्मान्वेति स्वयंकृतम् ॥ १६
अस्माल्लोकादूर्ध्वममुष्य चाधो
महत्तमस्तिष्ठति ह्यन्धकारम् ।

तद्वै महामोहनमिन्द्रियाणां
बुध्यस्व मा त्वां प्रलभेत राजन् ॥ १७
इदं वचः शक्ष्यसि चेद्यथाव-
न्निशम्य सर्वं प्रतिपत्तुमेवम् ।
यशः परं प्राप्स्यसि जीवलोके
भयं न चामुत्र न चेह तेऽस्ति ॥ १८
आत्मा नदी भारत पुण्यतीर्था
सत्योदका धृतिकूला दमोर्मिः ।
तस्यां स्नातः पूयते पुण्यकर्मा
पुण्यो ह्यात्मा नित्यमम्भोऽम्भ एव ॥ १९
कामक्रोधग्राहवतीं पञ्चेन्द्रियजलां नदीम् ।
कृत्वा धृतिमयीं नावं जन्मदुर्गाणि संतर ॥ २०
प्रज्ञावृद्धं धर्मवृद्धं स्वबन्धुं
विद्यावृद्धं वयसा चापि वृद्धम् ।
कार्याकार्ये पूजयित्वा प्रसाद्य
यः संपृच्छेन्न स मुह्येत्कदाचित् ॥ २१
धृत्या शिश्नोदरं रक्षेत्पाणिपादं च चक्षुषा ।
चक्षुःश्रोत्रे च मनसा मनो वाचं च कर्मणा ॥२२
नित्योदकी नित्ययज्ञोपवीती
नित्यस्वाध्यायी पतितान्नवर्जी ।
ऋतं ब्रुवन्गुरवे कर्म कुर्व-
न्न ब्राह्मणश्च्यवते ब्रह्मलोकात् ॥ २३
अधीत्य वेदान्परिसंस्तीर्य चाग्नी-
निष्ट्वा यज्ञैः पालयित्वा प्रजाश्च ।
गोब्राह्मणार्थे शस्त्रपूतान्तरात्मा
हतः संग्रामे क्षत्रियः स्वर्गमेति ॥ २४
वैश्योऽधीत्य ब्राह्मणान्क्षत्रियांश्च
धनैः काले संविभज्याश्रितांश्च ।
त्रेतापूतं धूममाघ्राय पुण्यं
प्रेत्य स्वर्गे देवसुखानि भुङ्क्ते ॥ २५
ब्रह्मक्षत्रं वैश्यवर्णं च शूद्रः
क्रमेणैतान्न्यायतः पूजयानः ।
तुष्टेष्वेतेष्वव्यथो दग्धपाप-
स्त्यक्त्वा देहं स्वर्गसुखानि भुङ्क्ते ॥ २६
चातुर्वर्ण्यस्यैष धर्मस्तवोक्तो
हेतुं चात्र ब्रुवतो मे निबोध ।
क्षात्राद्धर्माद्धीयते पाण्डुपुत्र-
स्तं त्वं राजन्राजधर्मे नियुङ्क्ष्व ॥ २७

धृतराष्ट्र उवाच ।

एवमेतद्यथा मां त्वमनुशाससि नित्यदा ।
ममापि च मतिः सौम्य भवत्येवं यथात्थ माम् ॥२८
सा तु बुद्धिः कृताप्येवं पाण्डवान्प्रति मे सदा ।
दुर्योधनं समासाद्य पुनर्विपरिवर्तते ॥ २९
न दिष्टमभ्यतिक्रान्तुं शक्यं मर्त्येन केनचित् ।
दिष्टमेव कृतं मन्ये पौरुषं तु निरर्थकम् ॥ ३०

इति श्रीमहाभारते उद्योगपर्वणि
चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

धृतराष्ट्र उवाच ।

अनुक्तं यदि ते किंचिद्वाचा विदुर विद्यते ।
तन्मे शुश्रूषवे ब्रूहि विचित्राणि हि भाषसे ॥ १

विदुर उवाच ।

धृतराष्ट्र कुमारो वै यः पुराणः सनातनः ।
सनत्सुजातः प्रोवाच मृत्युर्नास्तीति भारत ॥ २
स ते गुह्यान्प्रकाशांश्च सर्वान्हृदयसंश्रयान् ।
प्रवक्ष्यति महाराज सर्वबुद्धिमतां वरः ॥ ३

धृतराष्ट्र उवाच ।

किं त्वं न वेद तद्भूयो यन्मे ब्रूयात्सनातनः ।
त्वमेव विदुर ब्रूहि प्रज्ञाशेषोऽस्ति चेत्तव ॥ ४

विदुर उवाच ।

शूद्रयोनावहं जातो नातोऽन्यद्वक्तुमुत्सहे ।
कुमारस्य तु या बुद्धिर्वेद तां शाश्वतीमहम् ॥ ५
ब्राह्मीं हि योनिमापन्नः सुगुह्यमपि यो वदेत् ।
न तेन गर्ह्यो देवानां तस्मादेतद्ब्रवीमि ते ॥ ६

धृतराष्ट्र उवाच ।

ब्रवीहि विदुर त्वं मे पुराणं तं सनातनम् ।
कथमेतेन देहेन स्यादिहैव समागमः ॥ ७

वैशंपायन उवाच ।

चिन्तयामास विदुरस्तमृषिं संशितव्रतम् ।
स च तच्चिन्तितं ज्ञात्वा दर्शयामास भारत ॥ ८
स चैनं प्रतिजग्राह विधिदृष्टेन कर्मणा ।
सुखोपविष्टं विश्रान्तमथैनं विदुरोऽब्रवीत् ॥ ९
भगवन्संशयः कश्चिद्धृतराष्ट्रस्य मानसे ।
यो न शक्यो मया वक्तुं तमस्मै वक्तुमर्हसि ।
यं श्रुत्वायं मनुष्येन्द्रः सुखदुःखातिगो भवेत् ॥१०
लाभालाभौ प्रियद्वेष्यौ यथैनं न जरान्तकौ ।
विषहेरन्भयामर्षौ क्षुत्पिपासे मदोद्भवौ ।
अरतिश्चैव तन्द्री च कामक्रोधौ क्षयोदयौ ॥ ११

इति श्रीमहाभारते उद्योगपर्वणि
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

॥ समाप्तं प्रजागरपर्व ॥

४२

वैशंपायन उवाच ।

ततो राजा धृतराष्ट्रो मनीषी
संपूज्य वाक्यं विदुरेरितं तत् ।
सनत्सुजातं रहिते महात्मा
पप्रच्छ बुद्धिं परमां बुभूषन् ॥ १

धृतराष्ट्र उवाच ।

सनत्सुजात यदिदं शृणोमि
मृत्युर्हि नास्तीति तवोपदेशम् ।
देवासुरा ह्याचरन्ब्रह्मचर्य-
ममृत्यवे तत्कतरन्नु सत्यम् ॥ २

सनत्सुजात उवाच ।

अमृत्युः कर्मणा केचिन्मृत्युर्नास्तीति चापरे ।
शृणु मे ब्रुवतो राजन्यथैतन्मा विशङ्किथाः ॥ ३
उभे सत्ये क्षत्रियाद्यप्रवृत्ते
मोहो मृत्युः संमतो यः कवीनाम् ।
प्रमादं वै मृत्युमहं ब्रवीमि
सदाप्रमादममृतत्वं ब्रवीमि ॥ ४
प्रमादाद्वै असुराः पराभव-
न्नप्रमादाद्ब्रह्मभूता भवन्ति ।
न वै मृत्युर्व्याघ्र इवात्ति जन्तू-
न्न ह्यस्य रूपमुपलभ्यते ह ॥ ५
यमं त्वेके मृत्युमतोऽन्यमाहु-
रात्मावसन्नममृतं ब्रह्मचर्यम् ।
पितृलोके राज्यमनुशास्ति देवः
शिवः शिवानामशिवोऽशिवानाम् ॥ ६
आस्यादेष निःसरते नराणां
क्रोधः प्रमादो मोहरूपश्च मृत्युः ।
ते मोहितास्तद्वशे वर्तमाना
इतः प्रेतास्तत्र पुनः पतन्ति ॥ ७
ततस्तं देवा अनु विप्लवन्ते
अतो मृत्युर्मरणाख्यामुपैति ।
कर्मोदये कर्मफलानुरागा-
स्तत्रानु यान्ति न तरन्ति मृत्युम् ॥ ८
योऽभिध्यायन्नुत्पतिष्णून्निहन्या-
दनादरेणाप्रतिबुध्यमानः ।
स वै मृत्युर्मृत्युरिवात्ति भूत्वा
एवं विद्वान्यो विनिहन्ति कामान् ॥ ९

कामानुसारी पुरुषः कामाननु विनश्यति ।
कामान्व्युदस्य धुनुते यत्किंचित्पुरुषो रजः ॥ १०
तमोऽप्रकाशो भूतानां नरकोऽयं प्रदृश्यते ।
गृह्यन्त इव धावन्ति गच्छन्तः श्वभ्रमुन्मुखाः ॥ ११
अभिध्या वै प्रथमं हन्ति चैनं
कामक्रोधौ गृह्य चैनं तु पश्चात् ।
एते बालान्मृत्यवे प्रापयन्ति
धीरास्तु धैर्येण तरन्ति मृत्युम् ॥ १२
अमन्यमानः क्षत्रिय किंचिदन्य-
न्नाधीयते तार्ण इवास्य व्याघ्रः ।
क्रोधाल्लोभान्मोहमयान्तरात्मा
स वै मृत्युस्त्वच्छरीरे य एषः ॥ १३
एवं मृत्युं जायमानं विदित्वा
ज्ञाने तिष्ठन्न बिभेतीह मृत्योः ।
विनश्यते विषये तस्य मृत्यु-
र्मृत्योर्यथा विषयं प्राप्य मर्त्यः ॥ १४

धृतराष्ट्र उवाच ।

येऽस्मिन्धर्मान्नाचरन्तीह केचि-
त्तथा धर्मान्केचिदिहाचरन्ति ।
धर्मः पापेन प्रतिहन्यते स्म
उताहो धर्मः प्रतिहन्ति पापम् ॥ १५

सनत्सुजात उवाच ।

उभयमेव तत्रोपभुज्यते फलं
धर्मस्यैवेतरस्य च ।
धर्मेणाधर्मं प्रणुदतीह विद्वा-
न्धर्मो बलीयानिति तस्य विद्धि ॥ १६

धृतराष्ट्र उवाच ।

यानिमानाहुः स्वस्य धर्मस्य लोका-
न्द्विजातीनां पुण्यकृतां सनातनान् ।
तेषां परिक्रमान्कथयन्तस्ततोऽन्या-
न्नैतद्विद्वन्नैव कृतं च कर्म ॥ १७

सनत्सुजात उवाच ।

येषां बले न विस्पर्धा बले बलवतामिव ।
ते ब्राह्मणा इतः प्रेत्य स्वर्गलोके प्रकाशते ॥ १८
यत्र मन्येत भूयिष्ठं प्रावृषीव तृणोलपम् ।
अन्नं पानं च ब्राह्मणस्तज्जीवन्नानुसंज्वरेत् ॥ १९
यत्राकथयमानस्य प्रयच्छत्यशिवं भयम् ।
अतिरिक्तमिवाकुर्वन्स श्रेयान्नेतरो जनः ॥ २०
यो वाकथयमानस्य आत्मानं नानुसंज्वरेत् ।
ब्रह्मस्वं नोपभुञ्जेद्वा तदन्नं संमतं सताम् ॥ २१
यथा स्वं वान्तमश्नाति श्वा वै नित्यमभूतये ।
एवं ते वान्तमश्नन्ति स्ववीर्यस्योपजीवनात् ॥ २२
नित्यमज्ञातचर्या मे इति मन्येत ब्राह्मणः ।
ज्ञातीनां तु वसन्मध्ये नैव विद्येत किंचन ॥ २३
को ह्येवमन्तरात्मानं ब्राह्मणो हन्तुमर्हति ।
तस्माद्धि किंचित्क्षत्रिय ब्रह्मावसति पश्यति ॥ २४
अश्रान्तः स्याद‍नादानात्संमतो निरुपद्रवः ।
शिष्टो न शिष्टवत्स स्याद्ब्राह्मणो ब्रह्मवित्कविः ॥ २५
अनाढ्या मानुषे वित्ते आढ्या वेदेषु ये द्विजाः ।
ते दुर्धर्षा दुष्प्रकम्प्या विद्यात्तान्ब्रह्मणस्तनुम् ॥ २६
सर्वान्स्विष्टकृतो देवान्विद्याद्य इह कश्चन ।
न समानो ब्राह्मणस्य यस्मिन्प्रयतते स्वयम् ॥ २७
यमप्रयतमानं तु मानयन्ति स मानितः ।
न मान्यमानो मन्येत नामानादभिसंज्वरेत् ॥ २८
विद्वांसो मानयन्तीह इति मन्येत मानितः ।
अधर्मविदुषो मूढा लोकशास्त्रविशारदाः ।
न मान्यं मानयिष्यन्ति इति मन्येदमानितः ॥ २९
न वै मानं च मौनं च सहितौ चरतः सदा ।
अयं हि लोको मानस्य असौ मौनस्य तद्विदुः ॥ ३०
श्रीः सुखस्येह संवासः सा चापि परिपन्थिनी ।

ब्राह्मी सुदुर्लभा श्रीर्हि प्रज्ञाहीनेन क्षत्रिय ॥ ३१
द्वाराणि तस्या हि वदन्ति सन्तो
बहुप्रकाराणि दुरावराणि ।
सत्यार्जवे ह्रीर्दमशौचविद्याः
षण्मानमोहप्रतिबाधनानि ॥ ३२

इति श्रीमहाभारते उद्योगपर्वणि
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

४३

धृतराष्ट्र उवाच ।

ऋचो यजूंष्यधीते यः सामवेदं च यो द्विजः ।
पापानि कुर्वन्पापेन लिप्यते न स लिप्यते ॥ १

सनत्सुजात उवाच ।

नैनं सामान्यृचो वापि न यजूंषि विचक्षण ।
त्रायन्ते कर्मणः पापान्न मे मिथ्या ब्रवीम्यहम् ॥ २
न छन्दांसि वृजिनात्तारयन्ति
मायाविनं मायया वर्तमानम् ।
नीडं शकुन्ता इव जातपक्षा-
श्छन्दांस्येनं प्रजहत्यन्तकाले ॥ ३

धृतराष्ट्र उवाच ।

न चेद्वेदा वेदविदं शक्तास्त्रातुं विचक्षण ।
अथ कस्मात्प्रलापोऽयं ब्राह्मणानां सनातनः ॥ ४

सनत्सुजात उवाच ।

अस्मिँल्लोके तपस्तप्तं फलमन्यत्र दृश्यते ।
ब्राह्मणानामिमे लोका ऋद्धे तपसि संयताः ॥ ५

धृतराष्ट्र उवाच ।

कथं समृद्धमप्यृद्धं तपो भवति केवलम् ।
सनत्सुजात तद्ब्रूहि यथा विद्याम तद्वयम् ॥ ६

सनत्सुजात उवाच ।

क्रोधादयो द्वादश यस्य दोषा-
स्तथा नृशंसादि षडत्र राजन् ।
धर्मादयो द्वादश चाततानाः
शास्त्रे गुणा ये विदिता द्विजानाम् ॥ ७
क्रोधः कामो लोभमोहौ विवित्सा-
कृपासूया मानशोकौ स्पृहा च ।
ईर्ष्या जुगुप्सा च मनुष्यदोषा
वर्ज्याः सदा द्वादशैते नरेण ॥ ८
एकैकमेते राजेन्द्र मनुष्यान्पर्युपासते ।
लिप्समानोऽन्तरं तेषां मृगाणामिव लुब्धकः ॥ ९
विकत्थनः स्पृहयालुर्मनस्वी
बिभ्रत्कोपं चपलोऽरक्षणश्च ।
एते प्राप्ताः षण्नरान्पापधर्मा-
न्प्रकुर्वते नोत सन्तः सुदुर्गे ॥ १०
संभोगसंविद्विषमेधमानो
दत्तानुतापी कृपणोऽबलीयान् ।
वर्गप्रशंसी वनितासु द्वेष्टा
एतेऽपरे सप्त नृशंसधर्माः ॥ ११
धर्मश्च सत्यं च दमस्तपश्च
अमात्सर्यं ह्रीस्तितिक्षानसूया ।
यज्ञश्च दानं च धृतिः श्रुतं च
महाव्रता द्वादश ब्राह्मणस्य ॥ १२
यस्त्वेतेभ्यः प्रवसेद्द्वादशेभ्यः
सर्वामपीमां पृथिवीं प्रशिष्यात् ।
त्रिभिर्द्वाभ्यामेकतो वा विशिष्टो
नास्य स्वमस्तीति स वेदितव्यः ॥ १३
दमस्त्यागोऽप्रमादश्च एतेष्वमृतमाहितम् ।
तानि सत्यमुखान्याहुर्ब्राह्मणा ये मनीषिणः ॥ १४
दमोऽष्टादशदोषः स्यात्प्रतिकूलं कृताकृते ।
अनृतं चाभ्यसूया च कामार्थौ च तथा स्पृहा ॥१५
क्रोधः शोकस्तथा तृष्णा लोभः पैशुन्यमेव च ।
मत्सरश्च विवित्सा च परितापस्तथा रतिः ॥ १६

अपस्मारः सातिवादस्तथा संभावनात्मनि ।
एतैर्विमुक्तो दोषैर्यः स दमः सद्भिरुच्यते ॥ १७
श्रेयांस्तु षड्विधस्त्यागः प्रियं प्राप्य न हृष्यति ।
अप्रिये तु समुत्पन्ने व्यथां जातु न चार्च्छति ॥१८
इष्टान्दारांश्च पुत्रांश्च न चान्यं यद्वचो भवेत् ।
अर्हते याचमानाय प्रदेयं तद्वचो भवेत् ।
अप्यवाच्यं वदत्येव स तृतीयो गुणः स्मृतः ॥ १९
त्यक्तैर्द्रव्यैर्यो भवति नोपयुङ्क्ते च कामतः ।
न च कर्मसु तद्धीनः शिष्यबुद्धिर्नरो यथा ।
सर्वैरेव गुणैर्युक्तो द्रव्यवानपि यो भवेत् ॥ २०
अप्रमादोऽष्टदोषः स्यात्तान्दोषान्परिवर्जयेत् ।
इन्द्रियेभ्यश्च पञ्चभ्यो मनसश्चैव भारत ।
अतीतानागतेभ्यश्च मुक्तो ह्येतैः सुखी भवेत् ॥२१
दोषैरेतैर्विमुक्तं तु गुणैरेतैः समन्वितम् ।
एतत्समृद्धमप्यृद्धं तपो भवति केवलम् ।
यन्मां पृच्छसि राजेन्द्र किं भूयः श्रोतुमिच्छसि ॥२२

धृतराष्ट्र उवाच ।

आख्यानपञ्चमैर्वेदैर्भूयिष्ठं कथ्यते जनः ।
तथैवान्ये चतुर्वेदास्त्रिवेदाश्च तथापरे ॥ २३
द्विवेदाश्चैकवेदाश्च अनृचश्च तथापरे ।
तेषां तु कतमः स स्यायमहं वेद ब्राह्मणम् ॥ २४

सनत्सुजात उवाच ।

एकस्य वेदस्याज्ञानाद्वेदास्ते बहवोऽभवन् ।
सत्यस्यैकस्य राजेन्द्र सत्ये कश्चिदवस्थितः ।
एवं वेदमनुत्साद्य प्रज्ञां महति कुर्वते ॥ २५
दानमध्ययनं यज्ञो लोभादेतत्प्रवर्तते ।
सत्यात्प्रच्यवमानानां संकल्पो वितथो भवेत् ॥२६
ततो यज्ञः प्रतायेत सत्यस्यैवावधारणात् ।
मनसान्यस्य भवति वाचान्यस्योत कर्मणा ।
संकल्पसिद्धः पुरुषः संकल्पानधितिष्ठति ॥ २७
अनैभृत्येन वै तस्य दीक्षितव्रतमाचरेत् ।
नामैतद्धातुनिर्वृत्तं सत्यमेव सतां परम् ।
ज्ञानं वै नाम प्रत्यक्षं परोक्षं जायते तपः ॥ २८
विद्याद्बहु पठन्तं तु बहुपाठीति ब्राह्मणम् ।
तस्मात्क्षत्रिय मा मंस्था जल्पितेनैव ब्राह्मणम् ।
य एव सत्यान्नापैति स ज्ञेयो ब्राह्मणस्त्वया ॥ २९

छन्दांसि नाम क्षत्रिय तान्यथर्वा
जगौ पुरस्तादृषिसर्ग एषः ।
छन्दोविदस्ते य उ तानधीत्य
न वेद्यवेदस्य विदुर्न वेद्यम् ॥ ३०
न वेदानां वेदिता कश्चिदस्ति
कश्चिद्वेदान्बुध्यते वापि राजन् ।
यो वेद वेदान्न स वेद वेद्यं
सत्ये स्थितो यस्तु स वेद वेद्यम् ॥ ३१

अभिजानामि ब्राह्मणमाख्यातारं विचक्षणम् ।
यश्छिन्नविचिकित्सः सन्नाचष्टे सर्वसंशयान् ॥ ३२
तस्य पर्येषणं गच्छेत्प्राचीनं नोत दक्षिणम् ।
नार्वाचीनं कुतस्तिर्यङ् नादिशं तु कथंचन ॥ ३३
तूष्णींभूत उपासीत न चेष्टेन्मनसा अपि ।
अभ्यावर्तेत ब्रह्मास्य अन्तरात्मनि वै श्रितम् ॥ ३४
मौनाद्धि स मुनिर्भवति नारण्यवसनान्मुनिः ।
अक्षरं तत्तु यो वेद स मुनिः श्रेष्ठ उच्यते ॥ ३५
सर्वार्थानां व्याकरणाद्वैयाकरण उच्यते ।
प्रत्यक्षदर्शी लोकानां सर्वदर्शी भवेन्नरः ॥ ३६
सत्ये वै ब्राह्मणस्तिष्ठन्ब्रह्म पश्यति क्षत्रिय ।
वेदानां चानुपूर्व्येण एतद्विद्वन्ब्रवीमि ते ॥ ३७

इति श्रीमहाभारते उद्योगपर्वणि
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

४४

धृतराष्ट्र उवाच ।

सनत्सुजात यदिमां परार्थां
ब्राह्मीं वाचं प्रवदसि विश्वरूपाम् ।
परां हि कामेषु सुदुर्लभां कथां
तद्ब्रूहि मे वाक्यमेतत्कुमार ॥ १

सनत्सुजात उवाच ।

नैतद्ब्रह्म त्वरमाणेन लभ्यं
यन्मां पृच्छस्यभिहृष्यस्यतीव ।
अव्यक्तविद्यामभिधास्ये पुराणीं
बुद्ध्या च तेषां ब्रह्मचर्येण सिद्धाम् ॥ २

धृतराष्ट्र उवाच ।

अव्यक्तविद्यामिति यत्सनातनीं
ब्रवीषि त्वं ब्रह्मचर्येण सिद्धाम् ।
अनारभ्या वसतीहार्य काले
कथं ब्राह्मण्यममृतत्वं लभेत ॥ ३

सनत्सुजात उवाच ।

येऽस्मिँल्लोके विजयन्तीह कामा-
न्ब्राह्मीं स्थितिमनुतितिक्षमाणाः ।
त आत्मानं निर्हरन्तीह देहा-
न्मुञ्जादिषीकामिव सत्त्वसंस्थाः ॥ ४
शरीरमेतौ कुरुतः पिता माता च भारत ।
आचार्यशास्ता या जातिः सा सत्या साजरामरा ॥
आचार्ययोनिमिह ये प्रविश्य
भूत्वा गर्भं ब्रह्मचर्यं चरन्ति ।
इहैव ते शास्त्रकारा भवन्ति
प्रहाय देहं परमं यान्ति योगम् ॥ ६
य आवृणोत्यवितथेन कर्णा-
वृतं कुर्वन्नमृतं संप्रयच्छन् ।
तं मन्येत पितरं मातरं च
तस्मै न द्रुह्येत्कृतमस्य जानन् ॥ ७
गुरुं शिष्यो नित्यमभिमन्यमानः
स्वाध्यायमिच्छेच्छुचिरप्रमत्तः ।
मानं न कुर्यान्न दधीत रोष-
मेष प्रथमो ब्रह्मचर्यस्य पादः ॥ ८
आचार्यस्य प्रियं कुर्यात्प्राणैरपि धनैरपि ।
कर्मणा मनसा वाचा द्वितीयः पाद उच्यते ॥ ९
समा गुरौ यथा वृत्तिर्गुरुपत्न्यां तथा भवेत् ।
यथोक्तकारी प्रियकृत्तृतीयः पाद उच्यते ॥ १०
नाचार्यायेहोपकृत्वा प्रवादं
प्राज्ञः कुर्वीत नैतदहं करोमि ।
इतीव मन्येत न भाषयेत
स वै चतुर्थो ब्रह्मचर्यस्य पादः ॥ ११
एवं वसन्तं यदुपप्लवेद्धन-
माचार्याय तदनुप्रयच्छेत् ।
सतां वृत्तिं बहुगुणामेवमेति
गुरोः पुत्रे भवति च वृत्तिरेषा ॥ १२
एवं वसन्सर्वतो वर्धतीह
बहून्पुत्राँल्लभते च प्रतिष्ठाम् ।
वर्षन्ति चास्मै प्रदिशो दिशश्च
वसन्त्यस्मिन्ब्रह्मचर्ये जनाश्च ॥ १३
एतेन ब्रह्मचर्येण देवा देवत्वमाप्नुवन् ।
ऋषयश्च महाभागा ब्रह्मलोकं मनीषिणः ॥ १४
गन्धर्वाणामनेनैव रूपमप्सरसामभूत् ।
एतेन ब्रह्मचर्येण सूर्यो अह्नाय जायते ॥ १५
य आशयेत्पाटयेच्चापि राज-
न्सर्वं शरीरं तपसा तप्यमानः ।
एतेनासौ बाल्यमत्येति विद्वा-
न्मृत्युं तथा रोधयत्यन्तकाले ॥ १६
अन्तवन्तः क्षत्रिय ते जयन्ति

लोकाञ्जनाः कर्मणा निर्मितेन ।
अत्रैव विद्वांस्तेन अभ्येति सर्वं
नान्यः पन्था अयनाय विद्यते ॥ १७

धृतराष्ट्र उवाच ।

आभाति शुक्लमिव लोहितमिव
अथो कृष्णमथाञ्जनं काद्रवं वा ।
तद्ब्राह्मणः पश्यति योऽत्र विद्वा-
न्कथंरूपं तदमृतमक्षरं पदम् ॥ १८

सनत्सुजात उवाच ।

नाभाति शुक्लमिव लोहितमिव
अथो कृष्णमायसमर्कवर्णम् ।
न पृथिव्यां तिष्ठति नान्तरीक्षे
नैतत्समुद्रे सलिलं बिभर्ति ॥ १९
न तारकासु न च विद्युदाश्रितं
न चाभ्रेषु दृश्यते रूपमस्य ।
न चापि वायौ न च देवतासु
न तच्चन्द्रे दृश्यते नोत सूर्ये ॥ २०
नैवर्क्षु तन्न यजुःषु नाप्यथर्वसु
न चैव दृश्यत्यमलेषु सामसु ।
रथंतरे बार्हते चापि राज-
न्महाव्रते नैव दृश्येद्ध्रुवं तत् ॥ २१
अपारणीयं तमसः परस्ता-
त्तदन्तकोऽप्येति विनाशकाले ।
अणीयरूपं क्षुरधारया त-
न्महच्च रूपं त्वपि पर्वतेभ्यः ॥ २२
सा प्रतिष्ठा तदमृतं लोकास्तद्ब्रह्म तद्यशः ।
भूतानि जज्ञिरे तस्मात्प्रलयं यान्ति तत्र च ॥ २३
अनामयं तन्महदुद्यतं यशो
वाचो विकारान्कवयो वदन्ति ।
तस्मिञ्जगत्सर्वमिदं प्रतिष्ठितं
ये तद्विदुरमृतास्ते भवन्ति ॥ २४

इति श्रीमहाभारते उद्योगपर्वणि
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

४५

सनत्सुजात उवाच ।

यत्तच्छुक्रं महज्ज्योतिर्दीप्यमानं महद्यशः ।
तद्वै देवा उपासन्ते यस्मादर्को विराजते ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १
शुक्राद्ब्रह्म प्रभवति ब्रह्म शुक्रेण वर्धते ।
तच्छुक्रं ज्योतिषां मध्येऽतप्तं तपति तापनम् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ २
आपोऽथ अद्भ्यः सलिलस्य मध्ये
उभौ देवौ शिश्रियातेऽन्तरिक्षे ।
स सध्रीचीः स विषूचीर्वसाना
उभे बिभर्ति पृथिवीं दिवं च ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ३
उभौ च देवौ पृथिवीं दिवं च
दिशश्च शुक्रं भुवनं बिभर्ति ।
तस्माद्दिशः सरितश्च स्रवन्ति
तस्मात्समुद्रा विहिता महान्तः ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ४
चक्रे रथस्य तिष्ठन्तं ध्रुवस्याव्ययकर्मणः ।
केतुमन्तं वहन्त्यश्वास्तं दिव्यमजरं दिवि ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५
न सादृश्ये तिष्ठति रूपमस्य
न चक्षुषा पश्यति कश्चिदेनम् ।
मनीषयाथो मनसा हृदा च
य एवं विदुरमृतास्ते भवन्ति ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ६
द्वादशपूगां सरितं देवरक्षितम् ।

मधु ईशन्तस्तदा संचरन्ति घोरम् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ७
तदर्धमासं पिबति संचित्य भ्रमरो मधु ।
ईशानः सर्वभूतेषु हविर्भूतमकल्पयत् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ८
हिरण्यपर्णमश्वत्थमभिपत्य अपक्षकाः ।
ते तत्र पक्षिणो भूत्वा प्रपतन्ति यथादिशम् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ९
पूर्णात्पूर्णान्युद्धरन्ति पूर्णात्पूर्णानि चक्रिरे ।
हरन्ति पूर्णात्पूर्णानि पूर्णमेवावशिष्यते ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १०
तस्माद्वै वायुरायातस्तस्मिंश्च प्रयतः सदा ।
तस्मादग्निश्च सोमश्च तस्मिंश्च प्राण आततः ॥ ११
सर्वमेव ततो विद्यात्तत्तद्वक्तुं न शक्नुमः ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १२
अपानं गिरति प्राणः प्राणं गिरति चन्द्रमाः ।
आदित्यो गिरते चन्द्रमादित्यं गिरते परः ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १३
एकं पादं नोत्क्षिपति सलिलाद्धंस उच्चरन् ।
तं चेत्सततमृत्विजं न मृत्युर्नामृतं भवेत् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १४
एवं देवो महात्मा स पावकं पुरुषो गिरन् ।
यो वै तं पुरुषं वेद तस्येहात्मा न रिष्यते ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १५
यः सहस्रं सहस्राणां पक्षान्संतत्य संपतेत् ।
मध्यमे मध्य आगच्छेदपि चेत्स्यान्मनोजवः ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १६
न दर्शने तिष्ठति रूपमस्य
पश्यन्ति चैनं सुविशुद्धसत्त्वाः ।
हितो मनीषी मनसाभिपश्ये-
द्ये तं श्रयेयुरमृतास्ते भवन्ति ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १७
गूहन्ति सर्पा इव गह्वराणि
स्वशिक्षया स्वेन वृत्तेन मर्त्याः ।
तेषु प्रमुह्यन्ति जना विमूढा
यथाध्वानं मोहयन्ते भयाय ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १८
सदा सदासत्कृतः स्यान्न मृत्युरमृतं कुतः ।
सत्यानृते सत्यसमानबन्धने
सतश्च योनिरसतश्चैक एव ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १९
न साधुना नोत असाधुना वा
समानमेतद्दृश्यते मानुषेषु ।
समानमेतदमृतस्य विद्या-
देवंयुक्तो मधु तद्वै परीप्सेत् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ २०
नास्यातिवादा हृदयं तापयन्ति
नानधीतं नाहुतमग्निहोत्रम् ।
मनो ब्राह्मीं लघुतामादधीत
प्रज्ञानमस्य नाम धीरा लभन्ते ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ २१
एवं यः सर्वभूतेषु आत्मानमनुपश्यति ।
अन्यत्रान्यत्र युक्तेषु किं स शोचेत्ततः परम् ॥ २२
यथोदपाने महति सर्वतः संप्लुतोदके ।
एवं सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥ २३
अङ्गुष्ठमात्रः पुरुषो महात्मा
न दृश्यतेऽसौ हृदये निविष्टः ।
अजश्चरो दिवारात्रमतन्द्रितश्च
स तं मत्वा कविरास्ते प्रसन्नः ॥ २४
अहमेवास्मि वो माता पिता पुत्रोऽस्म्यहं पुनः ।

आत्माहमपि सर्वस्य यच्च नास्ति यदस्ति च ॥ २५
पितामहोऽसि स्थविरः पिता पुत्रश्च भारत ।
ममैव यूयमात्मस्था न मे यूयं न वोऽप्यहम् ॥२६
आत्मैव स्थानं मम जन्म चात्मा
वेदप्रोक्तोऽहमजरप्रतिष्ठः ॥ २७
अणोरणीयान्सुमनाः सर्वभूतेषु जागृमि ।
पितरं सर्वभूतानां पुष्करे निहितं विदुः ॥ २८

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

॥ समाप्तं सनत्सुजातपर्व ॥

४६

वैशंपायन उवाच ।

एवं सनत्सुजातेन विदुरेण च धीमता ।
सार्धं कथयतो राज्ञः सा व्यतीयाय शर्वरी ॥ १
तस्यां रजन्यां व्युष्टायां राजानः सर्व एव ते ।
सभामाविविशुर्हृष्टाः सूतस्योपदिदृक्षया ॥ २
शुश्रूषमाणाः पार्थानां वचो धर्मार्थसंहितम् ।
धृतराष्ट्रमुखाः सर्वे ययू राजसभां शुभाम् ॥ ३
सुधावदातां विस्तीर्णां कनकाजिरभूषिताम् ।
चन्द्रप्रभां सुरुचिरां सिक्तां परमवारिणा ॥ ४
रुचिरैरासनैः स्तीर्णां काञ्चनैर्दारवैरपि ।
अश्मसारमयैर्दान्तैः स्वास्तीर्णैः सोत्तरच्छदैः ॥ ५
भीष्मो द्रोणः कृपः शल्यः कृतवर्मा जयद्रथः ।
अश्वत्थामा विकर्णश्च सोमदत्तश्च बाह्लिकः ॥ ६
विदुरश्च महाप्राज्ञो युयुत्सुश्च महारथः ।
सर्वे च सहिताः शूराः पार्थिवा भरतर्षभ ।
धृतराष्ट्रं पुरस्कृत्य विविशुस्तां सभां शुभाम् ॥ ७
दुःशासनश्चित्रसेनः शकुनिश्चापि सौबलः ।
दुर्मुखो दुःसहः कर्ण उलूकोऽथ विविंशतिः ॥ ८
कुरुराजं पुरस्कृत्य दुर्योधनममर्षणम् ।
विविशुस्तां सभां राजन्सुराः शक्रसदो यथा ॥ ९
आविशद्भिस्तदा राजञ्शूरैः परिघबाहुभिः ।
शुशुभे सा सभा राजन्सिंहैरिव गिरेर्गुहा ॥ १०
ते प्रविश्य महेष्वासाः सभां समितिशोभनाः ।
आसनानि महार्हाणि भेजिरे सूर्यवर्चसः ॥ ११
आसनस्थेषु सर्वेषु तेषु राजसु भारत ।
द्वाःस्थो निवेदयामास सूतपुत्रमुपस्थितम् ॥ १२
अयं स रथ आयाति योऽयासीत्पाण्डवान्प्रति ।
दूतो नस्तूर्णमायातः सैन्धवैः साधुवाहिभिः ॥ १३
उपयाय तु स क्षिप्रं रथात्प्रस्कन्द्य कुण्डली ।
प्रविवेश सभां पूर्णां महीपालैर्महात्मभिः ॥ १४

संजय उवाच ।

प्राप्तोऽस्मि पाण्डवान्गत्वा तद्विजानीत कौरवाः ।
यथावयः कुरून्सर्वान्प्रतिनन्दन्ति पाण्डवाः ॥ १५
अभिवादयन्ति वृद्धांश्च वयस्यांश्च वयस्यवत् ।
यूनश्चाभ्यवदन्पार्थाः प्रतिपूज्य यथावयः ॥ १६
यथाहं धृतराष्ट्रेण शिष्टः पूर्वमितो गतः ।
अब्रुवं पाण्डवान्गत्वा तन्निबोधत पार्थिवाः ॥ १७

इति श्रीमहाभारते उद्योगपर्वणि
षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

४७

धृतराष्ट्र उवाच ।

पृच्छामि त्वां संजय राजमध्ये
किमब्रवीद्वाक्यमदीनसत्त्वः ।
धनंजयस्तात युधां प्रणेता
दुरात्मनां जीवितच्छिन्महात्मा ॥ १

संजय उवाच ।

दुर्योधनो वाचमिमां शृणोतु
यदब्रवीदर्जुनो योत्स्यमानः ।
युधिष्ठिरस्यानुमते महात्मा

धनंजयः शृण्वतः केशवस्य ॥ २
अन्वत्रस्तो बाहुवीर्यं विदान
उपह्वरे वासुदेवस्य धीरः ।
अवोचन्मां योत्स्यमानः किरीटी
मध्ये ब्रूया धार्तराष्ट्रं कुरूणाम् ॥ ३
ये वै राजानः पाण्डवायोधनाय
समानीताः शृण्वतां चापि तेषाम् ।
यथा समग्रं वचनं मयोक्तं
सहामात्यं श्रावयेथा नृपं तम् ॥ ४
यथा नूनं देवराजस्य देवाः
शुश्रूषन्ते वज्रहस्तस्य सर्वे ।
तथाशृण्वन्पाण्डवाः सृञ्जयाश्च
किरीटिना वाचमुक्तां समर्थाम् ॥ ५
इत्यब्रवीदर्जुनो योत्स्यमानो
गाण्डीवधन्वा लोहितपद्मनेत्रः ।
न चेद्राज्यं मुञ्चति धार्तराष्ट्रो
युधिष्ठिरस्याजमीढस्य राज्ञः ।
अस्ति नूनं कर्म कृतं पुरस्ता-
दनिर्विष्टं पापकं धार्तराष्ट्रैः ॥ ६
येषां युद्धं भीमसेनार्जुनाभ्यां
तथाश्विभ्यां वासुदेवेन चैव ।
शैनेयेन ध्रुवमात्तायुधेन
धृष्टद्युम्नेनाथ शिखण्डिना च ।
युधिष्ठिरेणेन्द्रकल्पेन चैव
योऽपध्यानान्निर्दहेद्गां दिवं च ॥ ७
तैश्चेद्युद्धं मन्यते धार्तराष्ट्रो
निर्वृत्तोऽर्थः सकलः पाण्डवानाम् ।
मा तत्कार्षीः पाण्डवार्थाय हेतो-
रुपैहि युद्धं यदि मन्यसे त्वम् ॥ ८
यां तां वने दुःखशय्यामुवास
प्रव्राजितः पाण्डवो धर्मचारी ।
आशिष्यते दुःखतरामनर्था-
मन्त्यां शय्यां धार्तराष्ट्रः परासुः ॥ ९
ह्रिया ज्ञानेन तपसा दमेन
क्रोधेनाथो धर्मगुप्त्या धनेन ।
अन्यायवृत्तः कुरुपाण्डवेया-
नध्यातिष्ठद्धार्तराष्ट्रो दुरात्मा ॥ १०
मायोपधः प्रणिधानार्जवाभ्यां
तपोदमाभ्यां धर्मगुप्त्या बलेन ।
सत्यं ब्रुवन्प्रीतियुक्त्यानृतेन
तितिक्षमाणः क्लिश्यमानोऽतिवेलम् ॥ ११
यदा ज्येष्ठः पाण्डवः संशितात्मा
क्रोधं यत्तं वर्षपूगान्सुघोरम् ।
अवस्रष्टा कुरुषूद्वृत्तचेता-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ १२
कृष्णवर्त्मेव ज्वलितः समिद्धो
यथा दहेत्कक्षमग्निर्निदाघे ।
एवं दग्धा धार्तराष्ट्रस्य सेनां
युधिष्ठिरः क्रोधदीप्तोऽनुवीक्ष्य ॥ १३
यदा द्रष्टा भीमसेनं रणस्थं
गदाहस्तं क्रोधविषं वमन्तम् ।
दुर्मर्षणं पाण्डवं भीमवेगं
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ १४
महासिंहो गाव इव प्रविश्य
गदापाणिर्धार्तराष्ट्रानुपेत्य ।
यदा भीमो भीमरूपो निहन्ता
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ १५
महाभये वीतभयः कृतास्त्रः
समागमे शत्रुबलावमर्दी ।
सकृद्रथेन प्रतियाद्रथौघा-

न्पदातिसंघान्गदयाभिनिघ्नन् ॥ १६
सैन्याननेकांस्तरसा विमृद्न-
न्यदा क्षेप्ता धार्तराष्ट्रस्य सैन्यम् ।
छिन्दन्वनं परशुनेव शूर-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ १७
तृणप्रायं ज्वलनेनेव दग्धं
ग्रामं यथा धार्तराष्ट्रः समीक्ष्य ।
पक्वं सस्यं वैद्युतेनेव दग्धं
परासिक्तं विपुलं स्वं बलौघम् ॥ १८
हतप्रवीरं विमुखं भयार्तं
पराङ्मुखं प्रायशोऽधृष्टयोधम् ।
शस्त्रार्चिषा भीमसेनेन दग्धं
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ १९
उपासङ्गादुद्धरन्दक्षिणेन
परःशतान्नकुलश्चित्रयोधी ।
यदा रथाग्र्यो रथिनः प्रचेता
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ २०
सुखोचितो दुःखशय्यां वनेषु
दीर्घं कालं नकुलो यामशेत ।
आशीविषः क्रुद्ध इव श्वसन्भृशं
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ २१
त्यक्तात्मानः पार्थिवायोधनाय
समादिष्टा धर्मराजेन वीराः ।
रथैः शुभ्रैः सैन्यमभिद्रवन्तो
दृष्ट्वा पश्चात्तप्स्यते धार्तराष्ट्रः ॥ २२
शिशून्कृतास्त्रानशिशुप्रकाशा-
न्यदा द्रष्टा कौरवः पञ्च शूरान् ।
त्यक्त्वा प्राणान्केकयानाद्रवन्त-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ २३
यदा गतोद्वाहमकूजनाक्षं
सुवर्णतारं रथमाततायी ।
दान्तैर्युक्तं सहदेवोऽधिरूढः
शिरांसि राज्ञां क्षेप्स्यते मार्गणौघैः ॥ २४
महाभये संप्रवृत्ते रथस्थं
विवर्तमानं समरे कृतास्त्रम् ।
सर्वां दिशं संपतन्तं समीक्ष्य
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ २५
ह्रीनिषेधो निपुणः सत्यवादी
महाबलः सर्वधर्मोपपन्नः ।
गान्धारिमार्छंस्तुमुले क्षिप्रकारी
क्षेप्ता जनान्सहदेवस्तरस्वी ॥ २६
यदा द्रष्टा द्रौपदेयान्महेषू-
ञ्शूरान्कृतास्त्रान्रथयुद्धकोविदान् ।
आशीविषान्घोरविषानिवायत-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ २७
यदाभिमन्युः परवीरघाती
शरैः परान्मेघ इवाभिवर्षन् ।
विगाहिता कृष्णसमः कृतास्त्र-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ २८
यदा द्रष्टा बालमबालवीर्यं
द्विषच्चमूं मृत्युमिवापतन्तम् ।
सौभद्रमिन्द्रप्रतिमं कृतास्त्रं
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ २९
प्रभद्रकाः शीघ्रतरा युवानो
विशारदाः सिंहसमानवीर्याः ।
यदा क्षेप्तारो धार्तराष्ट्रान्ससैन्यां-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ३०
वृद्धौ विराटद्रुपदौ महारथौ
पृथक्चमूभ्यामभिवर्तमानौ ।
यदा द्रष्टारौ धार्तराष्ट्रान्ससैन्यां-

स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ३१
यदा कृतास्त्रो द्रुपदः प्रचिन्व-
न्शिरांसि यूनां समरे रथस्थः ।
क्रुद्धः शरैश्छेत्स्यति चापमुक्तै-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ३२
यदा विराटः परवीरघाती
मर्मान्तरे शत्रुचमूं प्रवेष्टा ।
मत्स्यैः सार्धमनृशंसरूपै-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ३३
ज्येष्ठं मात्स्यानामनृशंसरूपं
विराटपुत्रं रथिनं पुरस्तात् ।
यदा द्रष्टा दंशितं पाण्डवार्थे
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ३४
रणे हते कौरवाणां प्रवीरे
शिखण्डिना सत्तमे शंतनूजे ।
न जातु नः शत्रवो धारयेयु-
रसंशयं सत्यमेतद्ब्रवीमि ॥ ३५
यदा शिखण्डी रथिनः प्रचिन्व-
न्भीष्मं रथेनाभियाता वरूथी ।
दिव्यैर्हयैरवमृद्नन्रथौघां-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ३६
यदा द्रष्टा सृञ्जयानामनीके
धृष्टद्युम्नं प्रमुखे रोचमानम् ।
अस्त्रं यस्मै गुह्यमुवाच धीमा-
न्द्रोणस्तदा तप्यति धार्तराष्ट्रः ॥ ३७
यदा स सेनापतिरप्रमेयः
पराभवन्निषुभिर्धार्तराष्ट्रान् ।
द्रोणं रणे शत्रुसहोऽभियाता
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ३८
ह्रीमान्मनीषी बलवान्मनीषी
स लक्ष्मीवान्सोमकानां प्रबर्हः ।
न जातु तं शत्रवोऽन्ये सहेर-
न्येषां स स्यादग्रणीर्वृष्णिसिंहः ॥ ३९
ब्रूयाच्च मा प्रवृणीष्वेति लोके
युद्धेऽद्वितीयं सचिवं रथस्थम् ।
शिनेर्नप्तारं प्रवृणीम सात्यकिं
महाबलं वीतभयं कृतास्त्रम् ॥ ४०
यदा शिनीनामधिपो मयोक्तः
शरैः परान्मेघ इव प्रवर्षन् ।
प्रच्छादयिष्यञ्शरजालेन योधां-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ४१
यदा धृतिं कुरुते योत्स्यमानः
स दीर्घबाहुर्दृढधन्वा महात्मा ।
सिंहस्येव गन्धमाघ्राय गावः
संवेष्टन्ते शत्रवोऽस्माद्यथाग्नेः ॥ ४२
स दीर्घबाहुर्दृढधन्वा महात्मा
भिन्द्याद्गिरीन्संहरेत्सर्वलोकान् ।
अस्त्रे कृती निपुणः क्षिप्रहस्तो
दिवि स्थितः सूर्य इवाभिभाति ॥ ४३
चित्रः सूक्ष्मः सुकृतो यादवस्य
अस्त्रे योगो वृष्णिसिंहस्य भूयान् ।
यथाविधं योगमाहुः प्रशस्तं
सर्वैर्गुणैः सात्यकिस्तैरुपेतः ॥ ४४
हिरण्मयं श्वेतहयैश्चतुर्भि-
र्यदा युक्तं स्यन्दनं माधवस्य ।
द्रष्टा युद्धे सात्यकेर्वै सुयोधन-
स्तदा तप्स्यत्यकृतात्मा स मन्दः ॥ ४५
यदा रथं हेममणिप्रकाशं
श्वेताश्वयुक्तं वानरकेतुमुग्रम् ।
द्रष्टा रणे संयतं केशवेन

तदा तप्स्यत्यकृतात्मा स मन्दः ॥ ४६
यदा मौर्व्यास्तलनिष्पेषमुग्रं
महाशब्दं वज्रनिष्पेषतुल्यम् ।
विधूयमानस्य महारणे मया
गाण्डीवस्य श्रोष्यति मन्दबुद्धिः ॥ ४७
तदा मूढो धृतराष्ट्रस्य पुत्र-
स्तप्ता युद्धे दुर्मतिर्दुःसहायः ।
दृष्ट्वा सैन्यं बाणवर्षान्धकारं
प्रभज्यन्तं गोकुलवद्रणाग्रे ॥ ४८
बलाहकादुच्चरन्तीव विद्यु-
त्सहस्रघ्नी द्विषतां संगमेषु ।
अस्थिच्छिदो मर्मभिदो वमेच्छरां-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ४९
यदा दृष्ट्वा ज्यामुखाद्बाणसंघा-
न्गाण्डीवमुक्तान्पततः शिताग्रान् ।
नागान्हयान्वर्मिणश्चाददानां-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५०
यदा मन्दः परबाणान्विमुक्ता-
न्ममेषुभिर्ह्रियमाणान्प्रतीपम् ।
तिर्यग्विद्धांश्छिद्यमानान्क्षुरप्रै-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५१
यदा विपाठा मद्भुजविप्रमुक्ता
द्विजाः फलानीव महीरुहाग्रात् ।
प्रच्छेत्तार उत्तमाङ्गानि यूनां
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५२
यदा दृष्ट्वा पततः स्यन्दनेभ्यो
महागजेभ्योऽश्वगतांश्च योधान् ।
शरैर्हतान्पातितांश्चैव रङ्गे
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५३
पदातिसंघान्रथसंघान्समन्ता-
द्व्यात्ताननः काल इवाततेषुः ।
प्रणोत्स्यामि ज्वलितैर्बाणवर्षैः
शत्रूंस्तदा तप्स्यति मन्दबुद्धिः ॥ ५४
सर्वा दिशः संपतता रथेन
रजोध्वस्तं गाण्डिवेनापकृत्तम् ।
यदा द्रष्टा स्वबलं संप्रमूढं
तदा पश्चात्तप्स्यति मन्दबुद्धिः ॥ ५५
कांदिग्भूतं छिन्नगात्रं विसंज्ञं
दुर्योधनो द्रक्ष्यति सर्वसैन्यम् ।
हताश्ववीराग्र्यनरेन्द्रनागं
पिपासितं श्रान्तपत्रं भयार्तम् ॥ ५६
आर्तस्वरं हन्यमानं हतं च
विकीर्णकेशास्थिकपालसंघम् ।
प्रजापतेः कर्म यथार्धनिष्ठितं
तदा दृष्ट्वा तप्स्यते मन्दबुद्धिः ॥ ५७
यदा रथे गाण्डिवं वासुदेवं
दिव्यं शङ्खं पाञ्चजन्यं हयांश्च ।
तूणावक्षय्यौ देवदत्तं च मां च
द्रष्टा युद्धे धार्तराष्ट्रः समेतान् ॥ ५८
उद्वर्तयन्दस्युसंघान्समेता-
न्प्रवर्तयन्युगमन्यद्युगान्ते ।
यदा धक्ष्याम्यग्निवत्कौरवेयां-
स्तदा तप्ता धृतराष्ट्रः सपुत्रः ॥ ५९
सहभ्राता सहपुत्रः ससैन्यो
भ्रष्टैश्वर्यः क्रोधवशोऽल्पचेताः ।
दर्पस्यान्ते विहिते वेपमानः
पश्चान्मन्दस्तप्स्यति धार्तराष्ट्रः ॥ ६०
पूर्वाह्णे मां कृतजप्यं कदाचि-
द्विप्रः प्रोवाचोदकान्ते मनोज्ञम् ।
कर्तव्यं ते दुष्करं कर्म पार्थ

योद्धव्यं ते शत्रुभिः सव्यसाचिन् ॥ ६१
इन्द्रो वा ते हरिवान्वज्रहस्तः
पुरस्ताद्यातु समरेऽरीन्विनिघ्नन् ।
सुग्रीवयुक्तेन रथेन वा ते
पश्चात्कृष्णो रक्षतु वासुदेवः ॥ ६२
वव्रे चाहं वज्रहस्तान्महेन्द्रा-
दस्मिन्युद्धे वासुदेवं सहायम् ।
स मे लब्धो दस्युवधाय कृष्णो
मन्ये चैतद्विहितं दैवतैर्मे ॥ ६३
अयुध्यमानो मनसापि यस्य
जयं कृष्णः पुरुषस्याभिनन्देत् ।
ध्रुवं सर्वान्सोऽभ्यतीयादमित्रा-
न्सेन्द्रान्देवान्मानुषे नास्ति चिन्ता ॥ ६४
स बाहुभ्यां सागरमुत्तितीर्षे-
न्महोदधिं सलिलस्याप्रमेयम् ।
तेजस्विनं कृष्णमत्यन्तशूरं
युद्धेन यो वासुदेवं जिगीषेत् ॥ ६५
गिरिं य इच्छेत तलेन भेत्तुं
शिलोच्चयं श्वेतमतिप्रमाणम् ।
तस्यैव पाणिः सनखो विशीर्ये-
न्न चापि किंचित्स गिरेस्तु कुर्यात् ॥ ६६
अग्निं समिद्धं शमयेद्भुजाभ्यां
चन्द्रं च सूर्यं च निवारयेत ।
हरेद्देवानाममृतं प्रसह्य
युद्धेन यो वासुदेवं जिगीषेत् ॥ ६७
यो रुक्मिणीमेकरथेन भोज्या-
मुत्साद्य राज्ञां विषयं प्रसह्य ।
उवाह भार्यां यशसा ज्वलन्तीं
यस्यां जज्ञे रौक्मिणेयो महात्मा ॥ ६८
अयं गान्धारांस्तरसा संप्रमथ्य
जित्वा पुत्रान्नग्नजितः समग्रान् ।
बद्धं मुमोच विनदन्तं प्रसह्य
सुदर्शनीयं देवतानां ललामम् ॥ ६९
अयं कवाटे निजघान पाण्ड्यं
तथा कलिङ्गान्दन्तकूरे ममर्द ।
अनेन दग्धा वर्षपूगान्विनाथा
वाराणसी नगरी संबभूव ॥ ७०
यं स्म युद्धे मन्यतेऽन्यैरजेय-
मेकलव्यं नाम निषादराजम् ।
वेगेनेव शैलमभिहत्य जम्भः
शेते स कृष्णेन हतः परासुः ॥ ७१
तथोग्रसेनस्य सुत प्रदुष्टं
वृष्ण्यन्धकानां मध्यगतं तपन्तम् ।
अपातयद्बलदेवद्वितीयो
हत्वा ददौ चोग्रसेनाय राज्यम् ॥ ७२
अयं सौभं योधयामास खस्थं
विभीषणं मायया शाल्वराजम् ।
सौभद्वारि प्रत्यगृह्णाच्छतघ्नीं
दोर्भ्यां क एनं विषहेत मर्त्यः ॥ ७३
प्राग्ज्योतिषं नाम बभूव दुर्गं
पुरं घोरमसुराणामसह्यम् ।
महाबलो नरकस्तत्र भौमो
जहारादित्या मणिकुण्डले शुभे ॥ ७४
न तं देवाः सह शक्रेण सेहिरे
समागता आहरणाय भीताः ।
दृष्ट्वा च ते विक्रमं केशवस्य
बलं तथैवास्त्रमवारणीयम् ॥ ७५
जानन्तोऽस्य प्रकृतिं केशवस्य
न्ययोजयन्दस्युवधाय कृष्णम् ।
स तत्कर्म प्रतिशुश्राव दुष्कर-

मैश्वर्यवान्सिद्धिषु वासुदेवः ॥ ७६
निर्मोचने षट्सहस्राणि हत्वा
संछिद्य पाशान्सहसा क्षुरान्तान् ।
मुरं हत्वा विनिहत्यौघराक्षसं
निर्मोचनं चापि जगाम वीरः ॥ ७७
तत्रैव तेनास्य बभूव युद्धं
महाबलेनातिबलस्य विष्णोः ।
शेते स कृष्णेन हतः परासु-
र्वातेनेव मथितः कर्णिकारः ॥ ७८
आहृत्य कृष्णो मणिकुण्डले ते
हत्वा च भौमं नरकं मुरं च ।
श्रिया वृतो यशसा चैव धीमा-
न्प्रत्याजगामाप्रतिमप्रभावः ॥ ७९
तस्मै वरानददंस्तत्र देवा
दृष्ट्वा भीमं कर्म रणे कृतं तत् ।
श्रमश्च ते युध्यमानस्य न स्या-
दाकाशे वा अप्सु चैव क्रमः स्यात् ॥ ८०
शस्त्राणि गात्रे च न ते क्रमेर-
न्नित्येव कृष्णश्च ततः कृतार्थः ।
एवंरूपे वासुदेवेऽप्रमेये
महाबले गुणसंपत्सदैव ॥ ८१
तमसह्यं विष्णुमनन्तवीर्य-
माशंसते धार्तराष्ट्रो बलेन ।
यदा ह्येनं तर्कयते दुरात्मा
तच्चाप्ययं सहतेऽस्मान्समीक्ष्य ॥ ८२
पर्यागतं मम कृष्णस्य चैव
यो मन्यते कलहं संप्रयुज्य ।
शक्यं हर्तुं पाण्डवानां ममत्वं
तद्वेदिता संयुगं तत्र गत्वा ॥ ८३
नमस्कृत्वा शांतनवाय राज्ञे
द्रोणायाथो सहपुत्राय चैव ।
शारद्वतायाप्रतिद्वन्द्विने च
योत्स्याम्यहं राज्यमभीप्समानः ॥ ८४
धर्मेणास्त्रं नियतं तस्य मन्ये
यो योत्स्यते पाण्डवैर्धर्मचारी ।
मिथ्याग्लहे निर्जिता वै नृशंसैः
संवत्सरान्द्वादश पाण्डुपुत्राः ॥ ८५
अवाप्य कृच्छ्रं विहितं ह्यरण्ये
दीर्घं कालं चैकमज्ञातचर्याम् ।
ते ह्यकस्माज्जीवितं पाण्डवानां
न मृष्यन्ते धार्तराष्ट्राः पदस्थाः ॥ ८६
ते चेदस्मान्युध्यमानाञ्जयेयु-
र्देवैरपीन्द्रप्रमुखैः सहायैः ।
धर्मादधर्मश्चरितो गरीया-
निति ध्रुवं नास्ति कृतं न साधु ॥ ८७
न चेदिमं पुरुषं कर्मबद्धं
न चेदस्मान्मन्यतेऽसौ विशिष्टान् ।
आशंसेऽहं वासुदेवद्वितीयो
दुर्योधनं सानुबन्धं निहन्तुम् ॥ ८८
न चेदिदं कर्म नरेषु बद्धं
न विद्यते पुरुषस्य स्वकर्म ।
इदं च तच्चापि समीक्ष्य नूनं
पराजयो धार्तराष्ट्रस्य साधुः ॥ ८९
प्रत्यक्षं वः कुरवो यद्ब्रवीमि
युध्यमाना धार्तराष्ट्रा न सन्ति ।
अन्यत्र युद्धात्कुरवः परीप्स-
न्न युध्यतां शेष इहास्ति कश्चित् ॥ ९०
हत्वा त्वहं धार्तराष्ट्रान्सकर्णा-
न्राज्यं कुरूणामवजेता समग्रम् ।
यद्वः कार्यं तत्कुरुध्वं यथास्व-

मिष्टान्दारानात्मजांश्चोपभुङ्क्ष्व ॥ ९१
अप्येवं नो ब्राह्मणाः सन्ति वृद्धा
बहुश्रुताः शीलवन्तः कुलीनाः ।
सांवत्सरा ज्योतिषि चापि युक्ता
नक्षत्रयोगेषु च निश्चयज्ञाः ॥ ९२
उच्चावचं दैवयुक्तं रहस्यं
दिव्याः प्रश्ना मृगचक्रा मुहूर्ताः ।
क्षयं महान्तं कुरुसृञ्जयानां
निवेदयन्ते पाण्डवानां जयं च ॥ ९३
तथा हि नो मन्यतेऽजातशत्रुः
संसिद्धार्थो द्विषतां निग्रहाय ।
जनार्दनश्चाप्यपरोक्षविद्यो
न संशयं पश्यति वृष्णिसिंहः ॥ ९४
अहं च जानामि भविष्यरूपं
पश्यामि बुद्ध्या स्वयमप्रमत्तः ।
दृष्टिश्च मे न व्यथते पुराणी
युध्यमाना धार्तराष्ट्रा न सन्ति ॥ ९५
अनालब्धं जृम्भति गाण्डिवं धनु-
रनालब्धा कम्पति मे धनुर्ज्या ।
बाणाश्च मे तूणमुखाद्विसृज्य
मुहुर्मुहुर्गन्तुमुशन्ति चैव ॥ ९६
सैक्यः कोशान्निःसरति प्रसन्नो
हित्वेव जीर्णामुरगस्त्वचं स्वाम् ।
ध्वजे वाचो रौद्ररूपा वदन्ति
कदा रथो योक्ष्यते ते किरीटिन् ॥ ९७
गोमायुसंघाश्च वदन्ति रात्रौ
रक्षांस्यथो निष्पतन्त्यन्तरिक्षात् ।
मृगाः शृगालाः शितिकण्ठाश्च काका
गृध्रा बडाश्चैव तरक्षवश्च ॥ ९८
सुपर्णपाताश्च पतन्ति पश्चा-
द्दृष्ट्वा रथं श्वेतहयप्रयुक्तम् ।
अहं ह्येकः पार्थिवान्सर्वयोधा-
ञ्शरान्वर्षन्मृत्युलोकं नयेयम् ॥ ९९
समाददानः पृथगस्त्रमार्गा-
न्यथाग्निरिद्धो गहनं निदाघे ।
स्थूणाकर्णं पाशुपतं च घोरं
तथा ब्रह्मास्त्रं यच्च शक्रो विवेद ॥ १००
वधे धृतो वेगवतः प्रमुञ्च-
न्नाहं प्रजाः किंचिदिवावशिष्ये ।
शान्तिं लप्स्ये परमो ह्येष भावः
स्थिरो मम ब्रूहि गावल्गणे तान् ॥ १०१
नित्यं पुनः सचिवैर्यैरवोच-
द्देवानपीन्द्रप्रमुखान्सहायान् ।
तैर्मन्यते कलहं संप्रयुज्य
स धार्तराष्ट्रः पश्यत मोहमस्य ॥ १०२
वृद्धो भीष्मः शांतनवः कृपश्च
द्रोणः सपुत्रो विदुरश्च धीमान् ।
एते सर्वे यद्वदन्ते तदस्तु
आयुष्मन्तः कुरवः सन्तु सर्वे ॥ १०३

इति श्रीमहाभारते उद्योगपर्वणि
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

४८

वैशंपायन उवाच ।

समवेतेषु सर्वेषु तेषु राजसु भारत ।
दुर्योधनमिदं वाक्यं भीष्मः शांतनवोऽब्रवीत् ॥ १
बृहस्पतिश्चोशना च ब्रह्माणं पर्युपस्थितौ ।
मरुतश्च सहेन्द्रेण वसवश्च सहाश्विनौ ॥ २
आदित्याश्चैव साध्याश्च ये च सप्तर्षयो दिवि ।
विश्वावसुश्च गन्धर्वः शुभाश्चाप्सरसां गणाः ॥ ३
नमस्कृत्योपजग्मुस्ते लोकवृद्धं पितामहम् ।

परिवार्य च विश्वेशं पर्यासत दिवौकसः ॥ ४
तेषां मनश्च तेजश्चाप्याददानौ दिवौकसाम् ।
पूर्वदेवौ व्यतिक्रान्तौ नरनारायणावृषी ॥ ५
बृहस्पतिश्च पप्रच्छ ब्रह्माणं काविमाविति ।
भवन्तं नोपतिष्ठेते तौ नः शंस पितामह ॥ ६

ब्रह्मोवाच ।

यावेतौ पृथिवीं द्यां च भासयन्तौ तपस्विनौ ।
ज्वलन्तौ रोचमानौ च व्याप्यातीतौ महाबलौ ॥ ७
नरनारायणावेतौ लोकाल्लोकं समास्थितौ ।
ऊर्जितौ स्वेन तपसा महासत्त्वपराक्रमौ ॥ ८
एतौ हि कर्मणा लोकान्नन्दयामासतुर्ध्रुवौ ।
असुराणामभावाय देवगन्धर्वपूजितौ ॥ ९

वैशंपायन उवाच ।

जगाम शक्रस्तच्छ्रुत्वा यत्र तौ तेपतुस्तपः ।
सार्धं देवगणैः सर्वैर्बृहस्पतिपुरोगमैः ॥ १०
तदा देवासुरे घोरे भये जाते दिवौकसाम् ।
अयाचत महात्मानौ नरनारायणौ वरम् ॥ ११
तावब्रूतां वृणीष्वेति तदा भरतसत्तम ।
अथैतावब्रवीच्छक्रः साह्यं नः क्रियतामिति ॥ १२
ततस्तौ शक्रमब्रूतां करिष्यावो यदिच्छसि ।
ताभ्यां च सहितः शक्रो विजिग्ये दैत्यदानवान् ॥
नर इन्द्रस्य संग्रामे हत्वा शत्रून्परंतपः ।
पौलोमान्कालखञ्जांश्च सहस्राणि शतानि च ॥ १४
एष भ्रान्ते रथे तिष्ठन्भल्लेनापहरच्छिरः ।
जम्भस्य ग्रसमानस्य यज्ञमर्जुन आहवे ॥ १५
एष पारे समुद्रस्य हिरण्यपुरमारुजत् ।
हत्वा षष्टिसहस्राणि निवातकवचान्रणे ॥ १६
एष देवान्सहेन्द्रेण जित्वा परपुरंजयः ।
अतर्पयन्महाबाहुरर्जुनो जातवेदसम् ।
नारायणस्तथैवात्र भूयसोऽन्याञ्जघान ह ॥ १७
एवमेतौ महावीर्यौ तौ पश्यत समागतौ ।
वासुदेवार्जुनौ वीरौ समवेतौ महारथौ ॥ १८
नरनारायणौ देवौ पूर्वदेवाविति श्रुतिः ।
अजेयौ मानुषे लोके सेन्द्रैरपि सुरासुरैः ॥ १९
एष नारायणः कृष्णः फल्गुनस्तु नरः स्मृतः ।
नारायणो नरश्चैव सत्त्वमेकं द्विधाकृतम् ॥ २०
एतौ हि कर्मणा लोकानश्नुवातेऽक्षयान्ध्रुवान् ।
तत्र तत्रैव जायेते युद्धकाले पुनः पुनः ॥ २१
तस्मात्कर्मैव कर्तव्यमिति होवाच नारदः ।
एतद्धि सर्वमाचष्ट वृष्णिचक्रस्य वेदवित् ॥ २२
शङ्खचक्रगदाहस्तं यदा द्रक्ष्यसि केशवम् ।
पर्याददानं चास्त्राणि भीमधन्वानमर्जुनम् ॥ २३
सनातनौ महात्मानौ कृष्णावेकरथे स्थितौ ।
दुर्योधन तदा तात स्मर्तासि वचनं मम ॥ २४
नो चेदयमभावः स्यात्कुरूणां प्रत्युपस्थितः ।
अर्थाच्च तात धर्माच्च तव बुद्धिरुपप्लुता ॥ २५
न चेद्ग्रहीष्यसे वाक्यं श्रोतासि सुबहून्हतान् ।
तवैव हि मतं सर्वे कुरवः पर्युपासते ॥ २६
त्रयाणामेव च मतं तत्त्वमेकोऽनुमन्यसे ।
रामेण चैव शप्तस्य कर्णस्य भरतर्षभ ॥ २७
दुर्जातेः सूतपुत्रस्य शकुनेः सौबलस्य च ।
तथा क्षुद्रस्य पापस्य भ्रातुर्दुःशासनस्य च ॥ २८

कर्ण उवाच ।

नैवमायुष्मता वाच्यं यन्मामात्थ पितामह ।
क्षत्रधर्मे स्थितो ह्यस्मि स्वधर्मादनपेयिवान् ॥ २९
किं चान्यन्मयि दुर्वृत्तं येन मां परिगर्हसे ।
न हि मे वृजिनं किंचिद्धार्तराष्ट्रा विदुः क्वचित् ॥ ३०
राज्ञो हि धृतराष्ट्रस्य सर्वं कार्यं प्रियं मया ।
तथा दुर्योधनस्यापि स हि राज्ये समाहितः ॥ ३१

वैशंपायन उवाच ।

कर्णस्य तु वचः श्रुत्वा भीष्मः शांतनवः पुनः ।
धृतराष्ट्रं महाराजमाभाष्येदं वचोऽब्रवीत् ॥ ३२
यदयं कत्थते नित्यं हन्ताहं पाण्डवानिति ।
नायं कलापि संपूर्णा पाण्डवानां महात्मनाम् ॥ ३३
अनयो योऽयमागन्ता पुत्राणां ते दुरात्मनाम् ।
तदस्य कर्म जानीहि सूतपुत्रस्य दुर्मतेः ॥ ३४
एनमाश्रित्य पुत्रस्ते मन्दबुद्धिः सुयोधनः ।
अवमन्यत तान्वीरान्देवपुत्रानरिंदमान् ॥ ३५
किं चाप्यनेन तत्कर्म कृतं पूर्वं सुदुष्करम् ।
तैर्यथा पाण्डवैः सर्वैरेकैकेन कृतं पुरा ॥ ३६
दृष्ट्वा विराटनगरे भ्रातरं निहतं प्रियम् ।
धनंजयेन विक्रम्य किमनेन तदा कृतम् ॥ ३७
सहितान्हि कुरून्सर्वानभियातो धनंजयः ।
प्रमथ्य चाच्छिनद्वावः किमयं प्रोषितस्तदा ॥ ३८
गन्धर्वैर्घोषयात्रायां ह्रियते यत्सुतस्तव ।
क्व तदा सूतपुत्रोऽभूद्य इदानीं वृषायते ॥ ३९
ननु तत्रापि पार्थेन भीमेन च महात्मना ।
यमाभ्यामेव चागम्य गन्धर्वास्ते पराजिताः ॥ ४०
एतान्यस्य मृषोक्तानि बहूनि भरतर्षभ ।
विकत्थनस्य भद्रं ते सदा धर्मार्थलोपिनः ॥ ४१
भीष्मस्य तु वचः श्रुत्वा भारद्वाजो महामनाः ।
धृतराष्ट्रमुवाचेदं राजमध्येऽभिपूजयन् ॥ ४२
यदाह भरतश्रेष्ठो भीष्मस्तत्क्रियतां नृप ।
न काममर्थलिप्सूनां वचनं कर्तुमर्हसि ॥ ४३
पुरा युद्धात्साधु मन्ये पाण्डवैः सह संगमम् ।
यद्वाक्यमर्जुनेनोक्तं संजयेन निवेदितम् ॥ ४४
सर्वं तदभिजानामि करिष्यति च पाण्डवः ।
न ह्यस्य त्रिषु लोकेषु सदृशोऽस्ति धनुर्धरः ॥ ४५
अनादृत्य तु तद्वाक्यमर्थवद्द्रोणभीष्मयोः ।
ततः स संजयं राजा पर्यपृच्छत पाण्डवम् ॥ ४६
तदैव कुरवः सर्वे निराशा जीवितेऽभवन् ।
भीष्मद्रोणौ यदा राजा न सम्यगनुभाषते ॥ ४७

इति श्रीमहाभारते उद्योगपर्वणि
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

४९

धृतराष्ट्र उवाच ।

किमसौ पाण्डवो राजा धर्मपुत्रोऽभ्यभाषत ।
श्रुत्वेमा बहुलाः सेनाः प्रत्यर्थेन समागताः ॥ १
किमिच्छत्यभिसंरम्भाद्योत्स्यमानो युधिष्ठिरः ।
कस्य स्विद्भ्रातृपुत्राणां चिन्तासु मुखमीक्षते ॥ २
के स्विदेनं वारयन्ति शाम्य युध्येति वा पुनः ।
निकृत्या कोपितं मन्दैर्धर्मज्ञं धर्मचारिणम् ॥ ३

संजय उवाच ।

राज्ञो मुखमुदीक्षन्ते पाञ्चालाः पाण्डवैः सह ।
युधिष्ठिरस्य भद्रं ते स सर्वाननुशास्ति च ॥ ४
पृथग्भूताः पाण्डवानां पाञ्चालानां रथव्रजाः ।
आयान्तमभिनन्दन्ति कुन्तीपुत्रं युधिष्ठिरम् ॥ ५
तमः सूर्यमिवोद्यन्तं कौन्तेयं दीप्ततेजसम् ।
पाञ्चालाः प्रतिनन्दन्ति तेजोराशिमिवोद्यतम् ॥ ६
आ गोपालाविपालेभ्यो नन्दमानं युधिष्ठिरम् ।
पाञ्चालाः केकया मत्स्याः प्रतिनन्दन्ति पाण्डवम् ॥७
ब्राह्मण्यो राजपुत्र्यश्च विशां दुहितरश्च याः ।
क्रीडन्त्योऽभिसमायान्ति पार्थं संनद्धमीक्षितुम् ॥ ८

धृतराष्ट्र उवाच ।

संजयाचक्ष्व केनास्मान्पाण्डवा अभ्ययुञ्जत ।
धृष्टद्युम्नेन सेनान्या सोमकाः किंबला इव ॥ ९

वैशंपायन उवाच ।

गावल्गणिस्तु तत्पृष्टः सभायां कुरुसंसदि ।
निःश्वस्य सुभृशं दीर्घं मुहुः संचिन्तयन्निव ।

तत्रानिमित्ततो दैवात्सूतं कश्मलमाविशत् ॥ १०
तदाचचक्षे पुरुषः सभायां राजसंसदि ।
संजयोऽयं महाराज मूर्छितः पतितो भुवि ।
वाचं न सृजते कांचिद्धीनप्रज्ञोऽल्पचेतनः ॥ ११

धृतराष्ट्र उवाच ।

अपश्यत्संजयो नूनं कुन्तीपुत्रान्महारथान् ।
तैरस्य पुरुषव्याघ्रैर्भृशमुद्वेजितं मनः ॥ १२

वैशंपायन उवाच ।

संजयश्चेतनां लब्ध्वा प्रत्याश्वस्येदमब्रवीत् ।
धृतराष्ट्रं महाराज सभायां कुरुसंसदि ॥ १३
दृष्टवानस्मि राजेन्द्र कुन्तीपुत्रान्महारथान् ।
मत्स्यराजगृहावासादवरोधेन कर्शितान् ।
शृणु यैर्हि महाराज पाण्डवा अभ्ययुञ्जत ॥ १४
यो नैव रोषान्न भयान्न कामान्नार्थकारणात् ।
न हेतुवादाद्धर्मात्मा सत्यं जह्यात्कथंचन ॥ १५
यः प्रमाणं महाराज धर्मे धर्मभृतां वरः ।
अजातशत्रुणा तेन पाण्डवा अभ्ययुञ्जत ॥ १६
यस्य बाहुबले तुल्यः पृथिव्यां नास्ति कश्चन ।
यो वै सर्वान्महीपालान्वशे चक्रे धनुर्धरः ।
तेन वो भीमसेनेन पाण्डवा अभ्ययुञ्जत ॥ १७
निःसृतानां जतुगृहाद्धिडिम्बात्पुरुषादकात् ।
य एषामभवद्द्वीपः कुन्तीपुत्रो वृकोदरः ॥ १८
याज्ञसेनीमथो यत्र सिन्धुराजोऽपकृष्टवान् ।
तत्रैषामभवद्द्वीपः कुन्तीपुत्रो वृकोदरः ॥ १९
यश्च तान्संगतान्सर्वान्पाण्डवान्वारणावते ।
दह्यतो मोचयामास तेन वस्तेऽभ्ययुञ्जत ॥ २०
कृष्णायाश्चरता प्रीतिं येन क्रोधवशा हताः ।
प्रविश्य विषमं घोरं पर्वतं गन्धमादनम् ॥ २१
यस्य नागायुतं वीर्यं भुजयोः सारमर्पितम् ।
तेन वो भीमसेनेन पाण्डवा अभ्ययुञ्जत ॥ २२
कृष्णद्वितीयो विक्रम्य तुष्ट्यर्थं जातवेदसः ।
अजयद्यः पुरा वीरो युध्यमानं पुरंदरम् ॥ २३
यः स साक्षान्महादेवं गिरिशं शूलपाणिनम् ।
तोषयामास युद्धेन देवदेवमुमापतिम् ॥ २४
यश्च सर्वान्वशे चक्रे लोकपालान्धनुर्धरः ।
तेन वो विजयेनाजौ पाण्डवा अभ्ययुञ्जत ॥ २५
यः प्रतीचीं दिशं चक्रे वशे म्लेच्छगणायुताम् ।
स तत्र नकुलो योद्धा चित्रयोधी व्यवस्थितः ॥२६
तेन वो दर्शनीयेन वीरेणातिधनुर्भृता ।
माद्रीपुत्रेण कौरव्य पाण्डवा अभ्ययुञ्जत ॥ २७
यः काशीनङ्गमगधान्कलिङ्गांश्च युधाजयत् ।
तेन वः सहदेवेन पाण्डवा अभ्ययुञ्जत ॥ २८
यस्य वीर्येण सदृशाश्चत्वारो भुवि मानवाः ।
अश्वत्थामा धृष्टकेतुः प्रद्युम्नो रुक्मिरेव च ॥ २९
तेन वः सहदेवेन पाण्डवा अभ्ययुञ्जत ।
यवीयसा नृवीरेण माद्रीनन्दिकरेण च ॥ ३०
तपश्चचार या घोरं काशिकन्या पुरा सती ।
भीष्मस्य वधमिच्छन्ती प्रेत्यापि भरतर्षभ ॥ ३१
पाञ्चालस्य सुता जज्ञे दैवाच्च स पुनः पुमान् ।
स्त्रीपुंसोः पुरुषव्याघ्र यः स वेद गुणागुणान् ॥३२
यः कलिङ्गान्समापेदे पाञ्चालो युद्धदुर्मदः ।
शिखण्डिना वः कुरवः कृतास्त्रेणाभ्ययुञ्जत ॥ ३३
यां यक्षः पुरुषं चक्रे भीष्मस्य निधने किल ।
महेष्वासेन रौद्रेण पाण्डवा अभ्ययुञ्जत ॥ ३४
महेष्वासा राजपुत्रा भ्रातरः पञ्च केकयाः ।
सुमृष्टकवचाः शूरास्तैश्च वस्तेऽभ्ययुञ्जत ॥ ३५
यो दीर्घबाहुः क्षिप्रास्त्रो धृतिमान्सत्यविक्रमः ।
तेन वो वृष्णिवीरेण युयुधानेन संगरः ॥ ३६
य आसीच्छरणं काले पाण्डवानां महात्मनाम् ।
रणे तेन विराटेन पाण्डवा अभ्ययुञ्जत ॥ ३७

यः स काशिपती राजा वाराणस्यां महारथः ।
स तेषामभवद्योद्धा तेन वस्तेऽभ्ययुञ्जत ॥ ३८
शिशुभिर्दुर्जयैः संख्ये द्रौपदेयैर्महात्मभिः ।
आशीविषसमस्पर्शैः पाण्डवा अभ्ययुञ्जत ॥ ३९
यः कृष्णसदृशो वीर्ये युधिष्ठिरसमो दमे ।
तेनाभिमन्युना संख्ये पाण्डवा अभ्ययुञ्जत ॥ ४०
यश्चैवाप्रतिमो वीर्ये धृष्टकेतुर्महायशाः ।
दुःसहः समरे क्रुद्धः शैशुपालिर्महारथः ।
तेन वश्चेदिराजेन पाण्डवा अभ्ययुञ्जत ॥ ४१
यः संश्रयः पाण्डवानां देवानामिव वासवः ।
तेन वो वासुदेवेन पाण्डवा अभ्ययुञ्जत ॥ ४२
तथा चेदिपतेर्भ्राता शरभो भरतर्षभ ।
करकर्षेण सहितस्ताभ्यां वस्तेऽभ्ययुञ्जत ॥ ४३
जारासंधिः सहदेवो जयत्सेनश्च तावुभौ ।
द्रुपदश्च महातेजा बलेन महता वृतः ।
त्यक्तात्मा पाण्डवार्थाय योत्स्यमानो व्यवस्थितः ॥४४
एते चान्ये च बहवः प्राच्योदीच्या महीक्षितः ।
शतशो यानपाश्रित्य धर्मराजो व्यवस्थितः ॥ ४५

इति श्रीमहाभारते उद्योगपर्वणि
एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

५०

धृतराष्ट्र उवाच ।

सर्व एते महोत्साहा ये त्वया परिकीर्तिताः ।
एकतस्त्वेव ते सर्वे समेता भीम एकतः ॥ १
भीमसेनाद्धि मे भूयो भयं संजायते महत् ।
क्रुद्धादमर्षणात्तात व्याघ्रादिव महारुरोः ॥ २
जागर्मि रात्रयः सर्वा दीर्घमुष्णं च निःश्वसन् ।
भीतो वृकोदरात्तात सिंहात्पशुरिवाबलः ॥ ३
न हि तस्य महाबाहोः शक्रप्रतिमतेजसः ।
सैन्येऽस्मिन्प्रतिपश्यामि य एनं विषहेद्युधि ॥ ४
अमर्षणश्च कौन्तेयो दृढवैरश्च पाण्डवः ।
अनर्महासी सोन्मादस्तिर्यक्प्रेक्षी महास्वनः ॥ ५
महावेगो महोत्साहो महाबाहुर्महाबलः ।
मन्दानां मम पुत्राणां युद्धेनान्तं करिष्यति ॥ ६
ऊरुग्राहगृहीतानां गदां बिभ्रद्वृकोदरः ।
कुरूणामृषभो युद्धे दण्डपाणिरिवान्तकः ॥ ७
शैक्यायसमयीं घोरां गदां काञ्चनभूषिताम् ।
मनसाहं प्रपश्यामि ब्रह्मदण्डमिवोद्यतम् ॥ ८
यथा रुरूणां यूथेषु सिंहो जातबलश्चरेत् ।
मामकेषु तथा भीमो बलेषु विचरिष्यति ॥ ९
सर्वेषां मम पुत्राणां स एकः क्रूरविक्रमः ।
बह्वाशी विप्रतीपश्च बाल्येऽपि रभसः सदा ॥ १०
उद्वेपते मे हृदयं यदा दुर्योधनादयः ।
बाल्येऽपि तेन युध्यन्तो वारणेनेव मर्दिताः ॥ ११
तस्य वीर्येण संक्लिष्टा नित्यमेव सुता मम ।
स एव हेतुर्भेदस्य भीमो भीमपराक्रमः ॥ १२
ग्रसमानमनीकानि नरवारणवाजिनाम् ।
पश्यामीवाग्रतो भीमं क्रोधमूर्छितमाहवे ॥ १३
अस्त्रे द्रोणार्जुनसमं वायुवेगसमं जवे ।
संजयाचक्ष्व मे शूरं भीमसेनममर्षणम् ॥ १४
अतिलाभं तु मन्येऽहं यत्तेन रिपुघातिना ।
तदैव न हताः सर्वे मम पुत्रा मनस्विना ॥ १५
येन भीमबला यक्षा राक्षसाश्च समाहताः ।
कथं तस्य रणे वेगं मानुषः प्रसहिष्यति ॥ १६
न स जातु वशे तस्थौ मम बालोऽपि संजय ।
किं पुनर्मम दुष्पुत्रैः क्लिष्टः संप्रति पाण्डवः ॥ १७
निष्ठुरः स च नैष्ठुर्याद्भज्येदपि न संनमेत् ।
तिर्यक्प्रेक्षी संहतभ्रूः कथं शाम्येद्वृकोदरः ॥ १८
बृहदंसोऽप्रतिबलो गौरस्ताल इवोद्गतः ।
प्रमाणतो भीमसेनः प्रादेशेनाधिकोऽर्जुनात् ॥ १९

जवेन वाजिनोऽत्येति बलेनात्येति कुञ्जरान् ।
अव्यक्तजल्पी मध्वक्षो मध्यमः पाण्डवो बली ॥२०
इति बाल्ये श्रुतः पूर्वं मया व्यासमुखात्पुरा ।
रूपतो वीर्यतश्चैव याथातथ्येन पाण्डवः ॥ २१
आयसेन स दण्डेन रथान्नागान्हयान्नरान् ।
हनिष्यति रणे क्रुद्धो भीमः प्रहरतां वरः ॥ २२
अमर्षी नित्यसंरब्धो रौद्रः क्रूरपराक्रमः ।
मम तात प्रतीपानि कुर्वन्पूर्वं विमानितः ॥ २३
निष्कीर्णामायसीं स्थूलां सुपर्वां काञ्चनीं गदाम् ।
शतघ्नीं शतनिर्ह्रादां कथं शक्ष्यन्ति मे सुताः ॥२४
अपारमप्लवागाधं समुद्रं शरवेगिनम् ।
भीमसेनमयं दुर्गं तात मन्दास्तितीर्षवः ॥ २५
क्रोशतो मे न शृण्वन्ति बालाः पण्डितमानिनः ।
विषमं नावबुध्यन्ते प्रपातं मधुदर्शिनः ॥ २६
संयुगं ये करिष्यन्ति नररूपेण वायुना ।
नियतं चोदिता धात्रा सिंहेनेव महामृगाः ॥ २७
शैक्यां तात चतुष्किष्कुं षडस्रिममितौजसम् ।
प्रहितां दुःखसंस्पर्शां कथं शक्ष्यन्ति मे सुताः ॥२८
गदां भ्रामयतस्तस्य भिन्दतो हस्तिमस्तकान् ।
सृक्किणी लेलिहानस्य बाष्पमुत्सृजतो मुहुः ॥ २९
उद्दिश्य पातान्पततः कुर्वतो भैरवान्रवान् ।
प्रतीपान्पततो मत्तान्कुञ्जरान्प्रतिगर्जतः ॥ ३०
विगाह्य रथमार्गेषु वरानुद्दिश्य निघ्नतः ।
अग्नेः प्रज्वलितस्येव अपि मुच्येत मे प्रजा ॥ ३१
वीथीं कुर्वन्महाबाहुर्द्रावयन्मम वाहिनीम् ।
नृत्यन्निव गदापाणिर्युगान्तं दर्शयिष्यति ॥ ३२
प्रभिन्न इव मातङ्गः प्रभञ्जन्पुष्पितान्द्रुमान् ।
प्रवेक्ष्यति रणे सेनां पुत्राणां मे वृकोदरः ॥ ३३
कुर्वन्रथान्विपुरुषान्विध्वजान्भग्नपुष्करान् ।
आरुजन्पुरुषव्याघ्रो रथिनः सादिनस्तथा ॥ ३४
गङ्गावेग इवानूपांस्तीरजान्विविधान्द्रुमान् ।
प्रवक्ष्यति महासेनां पुत्राणां मम संजय ॥ ३५
वशं नूनं गमिष्यन्ति भीमसेनबलार्दिताः ।
मम पुत्राश्च भृत्याश्च राजानश्चैव संजय ॥ ३६
येन राजा महावीर्यः प्रविश्यान्तःपुरं पुरा ।
वासुदेवसहायेन जरासंधो निपातितः ॥ ३७
कृत्स्नेयं पृथिवी देवी जरासंधेन धीमता ।
मागधेन्द्रेण बलिना वशे कृत्वा प्रतापिता ॥ ३८
भीष्मप्रतापात्कुरवो नयेनान्धकवृष्णयः ।
ते न तस्य वशं जग्मुः केवलं दैवमेव वा ॥ ३९
स गत्वा पाण्डुपुत्रेण तरसा बाहुशालिना ।
अनायुधेन वीरेण निहतः किं ततोऽधिकम् ॥ ४०
दीर्घकालेन संसिक्तं विषमाशीविषो यथा ।
स मोक्ष्यति रणे तेजः पुत्रेषु मम संजय ॥ ४१
महेन्द्र इव वज्रेण दानवान्देवसत्तमः ।
भीमसेनो गदापाणिः सूदयिष्यति मे सुतान्॥४२
अविषह्यमनावार्यं तीव्रवेगपराक्रमम् ।
पश्यामीवातिताम्राक्षमापतन्तं वृकोदरम् ॥ ४३
अगदस्याप्यधनुषो विरथस्य विवर्मणः ।
बाहुभ्यां युध्यमानस्य कस्तिष्ठेदग्रतः पुमान् ॥ ४४
भीष्मो द्रोणश्च विप्रोऽयं कृपः शारद्वतस्तथा ।
जानन्त्येते यथैवाहं वीर्यज्ञस्तस्य धीमतः ॥ ४५
आर्यव्रतं तु जानन्तः संगरान्न बिभित्सवः ।
सेनामुखेषु स्थास्यन्ति मामकानां नरर्षभाः ॥ ४६
बलीयः सर्वतो दिष्टं पुरुषस्य विशेषतः ।
पश्यन्नपि जयं तेषां न नियच्छामि यत्सुतान्॥४७
ते पुराणं महेष्वासा मार्गमैन्द्रं समास्थिताः ।
त्यक्ष्यन्ति तुमुले प्राणान्रक्षन्तः पार्थिवं यशः ॥४८
यथैषां मामकास्तात तथैषां पाण्डवा अपि ।

पौत्रा भीष्मस्य शिष्याश्च द्रोणस्य च कृपस्य च ॥४९
यत्त्वस्मदाश्रयं किंचिद्दत्तमिष्टं च संजय ।
तस्यापचितिमार्यत्वात्कर्तारः स्थविरास्त्रयः ॥ ५०
आददानस्य शस्त्रं हि क्षत्रधर्मं परीप्सतः ।
निधनं ब्राह्मणस्याजौ वरमेवाहुरुत्तमम् ॥ ५१
स वै शोचामि सर्वान्वै ये युयुत्सन्ति पाण्डवान् ।
विक्रुष्टं विदुरेणादौ तदेतद्भयमागतम् ॥ ५२
न तु मन्ये विघाताय ज्ञानं दुःखस्य संजय ।
भवत्यतिबले ह्येतज्ज्ञानमप्युपघातकम् ॥ ५३
ऋषयो ह्यपि निर्मुक्ताः पश्यन्तो लोकसंग्रहान् ।
सुखे भवन्ति सुखिनस्तथा दुःखेन दुःखिताः ॥५४
किं पुनर्योऽहमासक्तस्तत्र तत्र सहस्रधा ।
पुत्रेषु राज्यदारेषु पौत्रेष्वपि च बन्धुषु ॥ ५५
संशये तु महत्यस्मिन्किं नु मे क्षममुत्तमम् ।
विनाशं ह्येव पश्यामि कुरूणामनुचिन्तयन् ॥ ५६
द्यूतप्रमुखमाभाति कुरूणां व्यसनं महत् ।
मन्देनैश्वर्यकामेन लोभात्पापमिदं कृतम् ॥ ५७
मन्ये पर्यायधर्मोऽयं कालस्यात्यन्तगामिनः ।
चक्रे प्रधिरिवासक्तो नास्य शक्यं पलायितुम् ॥५८
किं नु कार्यं कथं कुर्यां क्व नु गच्छामि संजय ।
एते नश्यन्ति कुरवो मन्दाः कालवशं गताः ॥५९
अवशोऽहं पुरा तात पुत्राणां निहते शते ।
श्रोष्यामि निनदं स्त्रीणां कथं मां मरणं स्पृशेत् ॥६०

यथा निदाघे ज्वलनः समिद्धो
दहेत्कक्षं वायुना चोद्यमानः ।
गदाहस्तः पाण्डवस्तद्वदेव
हन्ता मदीयान्सहितोऽर्जुनेन ॥ ६१

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चाशोऽध्यायः ॥ ५० ॥

५१

धृतराष्ट्र उवाच ।

यस्य वै नानृता वाचः प्रवृत्ता अनुशुश्रुमः ।
त्रैलोक्यमपि तस्य स्याद्योद्धा यस्य धनंजयः ॥१
तस्यैव च न पश्यामि युधि गाण्डीवधन्वनः ।
अनिशं चिन्तयानोऽपि यः प्रतीयाद्रथेन तम् ॥ २
अस्यतः कर्णिनालीकान्मार्गणान्हृदयच्छिदः ।
प्रत्येता न समः कश्चिद्युधि गाण्डीवधन्वनः ॥ ३
द्रोणकर्णौ प्रतीयातां यदि वीरौ नरर्षभौ ।
माहात्म्यात्संशयो लोके न त्वस्ति विजयो मम ॥ ४
घृणी कर्णः प्रमादी च आचार्यः स्थविरो गुरुः ।
समर्थो बलवान्पार्थो दृढधन्वा जितक्लमः ।
भवेत्सुतुमुलं युद्धं सर्वशोऽप्यपराजयः ॥ ५
सर्वे ह्यस्त्रविदः शूराः सर्वे प्राप्ता महद्यशः ।
अपि सर्वामरैश्वर्यं त्यजेयुर्न पुनर्जयम् ।
वधे नूनं भवेच्छान्तिस्तयोर्वा फल्गुनस्य वा ॥ ६
न तु जेतार्जुनस्यास्ति हन्ता चास्य न विद्यते ।
मन्युस्तस्य कथं शाम्येन्मन्दान्प्रति य उत्थितः ॥ ७
अन्येऽप्यस्त्राणि जानन्ति जीयन्ते च जयन्ति च ।
एकान्तविजयस्त्वेव श्रूयते फल्गुनस्य ह ॥ ८
त्रयस्त्रिंशत्समाहूय खाण्डवेऽग्निमतर्पयत् ।
जिगाय च सुरान्सर्वान्नास्य वेद्मि पराजयम् ॥ ९
यस्य यन्ता हृषीकेशः शीलवृत्तसमो युधि ।
ध्रुवस्तस्य जयस्तात यथेन्द्रस्य जयस्तथा ॥ १०
कृष्णावेकरथे यत्तावधिज्यं गाण्डिवं धनुः ।
युगपत्त्रीणि तेजांसि समेतान्यनुशुश्रुमः ॥ ११
नैव नोऽस्ति धनुस्तादृङ् न योद्धा न च सारथिः ।
तच्च मन्दा न जानन्ति दुर्योधनवशानुगाः ॥ १२
शेषयेदशनिर्दीप्तो निपतन्मूर्ध्नि संजय ।
न तु शेषं शराः कुर्युरस्तास्तात किरीटिना ॥ १३

अपि चास्यन्निवाभाति निघ्नन्निव च फल्गुनः ।
उद्धरन्निव कायेभ्यः शिरांसि शरवृष्टिभिः ॥ १४
अपि बाणमयं तेजः प्रदीप्तमिव सर्वतः ।
गाण्डीवेद्धं दहेताजौ पुत्राणां मम वाहिनीम् ॥१५
अपि सा रथघोषेण भयार्ता सव्यसाचिनः ।
वित्रस्ता बहुला सेना भारती प्रतिभाति मे ॥ १६
यथा कक्षं दहत्यग्निः प्रवृद्धः सर्वतश्चरन् ।
महार्चिरनिलोद्धूतस्तद्वद्धक्ष्यति मामकान् ॥ १७
यदोद्वमन्निशितान्बाणसंघा-
न्स्थाताततायी समरे किरीटी ।
सृष्टोऽन्तकः सर्वहरो विधात्रा
यथा भवेत्तद्वदवारणीयः ॥ १८
यथा ह्यभीक्ष्णं सुबहून्प्रकारा-
ञ्श्रोतास्मि तानावसथे कुरूणाम् ।
तेषां समन्ताच्च तथा रणाग्रे
क्षयः किलायं भरतानुपैति ॥ १९

इति श्रीमहाभारते उद्योगपर्वणि
एकपञ्चाशोऽध्यायः ॥ ५१ ॥

५२

धृतराष्ट्र उवाच ।

यथैव पाण्डवाः सर्वे पराक्रान्ता जिगीषवः ।
तथैवाभिसरास्तेषां त्यक्तात्मानो जये धृताः ॥ १
त्वमेव हि पराक्रान्तानाचक्षीथाः परान्मम ।
पञ्चालान्केकयान्मत्स्यान्मागधान्वत्सभूमिपान् ॥ २
यश्च सेन्द्रानिमाँल्लोकानिच्छन्कुर्याद्वशे बली ।
स श्रेष्ठो जगतः कृष्णः पाण्डवानां जये धृतः ॥ ३
समस्तामर्जुनाद्विद्यां सात्यकिः क्षिप्रमाप्तवान् ।
शैनेयः समरे स्थाता बीजवत्प्रवपञ्शरान् ॥ ४
धृष्टद्युम्नश्च पाञ्चाल्यः क्रूरकर्मा महारथः ।
मामकेषु रणं कर्ता बलेषु परमास्त्रवित् ॥ ५
युधिष्ठिरस्य च क्रोधादर्जुनस्य च विक्रमात् ।
यमाभ्यां भीमसेनाच्च भयं मे तात जायते ॥ ६
अमानुषं मनुष्येन्द्रैर्जालं विततमन्तरा ।
मम सेनां हनिष्यन्ति ततः क्रोशामि संजय ॥ ७
दर्शनीयो मनस्वी च लक्ष्मीवान्ब्रह्मवर्चसी ।
मेधावी सुकृतप्रज्ञो धर्मात्मा पाण्डुनन्दनः ॥ ८
मित्रामात्यैः सुसंपन्नः संपन्नो योज्ययोजकैः ।
भ्रातृभिः श्वशुरैः पुत्रैरुपपन्नो महारथैः ॥ ९
धृत्या च पुरुषव्याघ्रो नैभृत्येन च पाण्डवः ।
अनृशंसो वदान्यश्च ह्रीमान्सत्यपराक्रमः ॥ १०
बहुश्रुतः कृतात्मा च वृद्धसेवी जितेन्द्रियः ।
तं सर्वगुणसंपन्नं समिद्धमिव पावकम् ॥ ११
तमन्तमिव को मन्दः पतिष्यति पतंगवत् ।
पाण्डवाग्निमनावार्यं मुमूर्षुर्मूढचेतनः ॥ १२
तनुरुच्चः शिखी राजा शुद्धजाम्बूनदप्रभः ।
मन्दानां मम पुत्राणां युद्धेनान्तं करिष्यति ॥ १३
तैरयुद्धं साधु मन्ये कुरवस्तन्निबोधत ।
युद्धे विनाशः कृत्स्नस्य कुलस्य भविता ध्रुवम् ॥१४
एषा मे परमा शान्तिर्यया शाम्यति मे मनः ।
यदि त्वयुद्धमिष्टं वो वयं शान्त्यै यतामहे ॥ १५
न तु नः शिक्षमाणानामुपेक्षेत युधिष्ठिरः ।
जुगुप्सति ह्यधर्मेण मामेवोद्दिश्य कारणम् ॥ १६

इति श्रीमहाभारते उद्योगपर्वणि
द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

५३

संजय उवाच ।

एवमेतन्महाराज यथा वदसि भारत ।
युद्धे विनाशः क्षत्रस्य गाण्डीवेन प्रदृश्यते ॥ १
इदं तु नाभिजानामि तव धीरस्य नित्यशः ।
यत्पुत्रवशमागच्छेः सत्त्वज्ञः सव्यसाचिनः ॥ २

नैष कालो महाराज तव शश्वत्कृतागसः ।
त्वया ह्येवादितः पार्था निकृता भरतर्षभ ॥ ३
पिता श्रेष्ठः सुहृद्यश्च सम्यक्प्रणिहितात्मवान् ।
आस्थेयं हि हितं तेन न द्रोग्धा गुरुरुच्यते ॥ ४
इदं जितमिदं लब्धमिति श्रुत्वा पराजितान् ।
द्यूतकाले महाराज स्मयसे स्म कुमारवत् ॥ ५
परुषाण्युच्यमानान्स्म पुरा पार्थानुपेक्षसे ।
कृत्स्नं राज्यं जयन्तीति प्रपातं नानुपश्यसि ॥ ६
पित्र्यं राज्यं महाराज कुरवस्ते सजाङ्गलाः ।
अथ वीरैर्जितां भूमिमखिलां प्रत्यपद्यथाः ॥ ७
बाहुवीर्यार्जिता भूमिस्तव पार्थैर्निवेदिता ।
मयेदं कृतमित्येव मन्यसे राजसत्तम ॥ ८
ग्रस्तान्गन्धर्वराजेन मज्जतो ह्यप्लवेऽम्भसि ।
आनिनाय पुनः पार्थः पुत्रांस्ते राजसत्तम ॥ ९
कुमारवच्च स्मयसे द्यूते विनिकृतेषु यत् ।
पाण्डवेषु वनं राजन्प्रव्रजत्सु पुनः पुनः ॥ १०
प्रवर्षतः शरव्रातानर्जुनस्य शितान्बहून् ।
अप्यर्णवा विशुष्येयुः किं पुनर्मांसयोनयः ॥ ११
अस्यतां फल्गुनः श्रेष्ठो गाण्डीवं धनुषां वरम् ।
केशवः सर्वभूतानां चक्राणां च सुदर्शनम् ॥ १२
वानरो रोचमानश्च केतुः केतुमतां वरः ।
एवमेतानि सरथो वहञ्श्वेतहयो रणे ।
क्षपयिष्यति नो राजन्कालचक्रमिवोद्यतम् ॥ १३
तस्याद्य वसुधा राजन्निखिला भरतर्षभ ।
यस्य भीमार्जुनौ योधौ स राजा राजसत्तम ॥ १४
तथा भीमहतप्रायां मज्जन्तीं तव वाहिनीम् ।
दुर्योधनमुखा दृष्ट्वा क्षयं यास्यन्ति कौरवाः ॥ १५
न हि भीमभयाद्भीता लप्स्यन्ते विजयं विभो ।
तव पुत्रा महाराज राजानश्चानुसारिणः ॥ १६
मत्स्यास्त्वामद्य नार्चन्ति पाञ्चालाश्च सकेकयाः ।
शाल्वेयाः शूरसेनाश्च सर्वे त्वामवजानते ।
पार्थं ह्येते गताः सर्वे वीर्यज्ञास्तस्य धीमतः ॥ १७
अनर्हानेव तु वधे धर्मयुक्तान्विकर्मणा ।
सर्वोपायैर्नियन्तव्यः सानुगः पापपूरुषः ।
तव पुत्रो महाराज नात्र शोचितुमर्हसि ॥ १८
द्यूतकाले मया चोक्तं विदुरेण च धीमता ।
यदिदं ते विलपितं पाण्डवान्प्रति भारत ।
अनीशेनेव राजेन्द्र सर्वमेतन्निरर्थकम् ॥ १९

इति श्रीमहाभारते उद्योगपर्वणि
त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

५४

दुर्योधन उवाच ।

न भेतव्यं महाराज न शोच्या भवता वयम् ।
समर्थाः स्म परान्राजन्विजेतुं समरे विभो ॥ १
वनं प्रव्राजितान्पार्थान्यदायान्मधुसूदनः ।
महता बलचक्रेण परराष्ट्रावमर्दिना ॥ २
केकया धृष्टकेतुश्च धृष्टद्युम्नश्च पार्षतः ।
राजानश्चान्वयुः पार्थान्बहवोऽन्येऽनुयायिनः ॥
इन्द्रप्रस्थस्य चादूरात्समाजग्मुर्महारथाः ।
व्यगर्हयंश्च संगम्य भवन्तं कुरुभिः सह ॥ ४
ते युधिष्ठिरमासीनमजिनैः प्रतिवासितम् ।
कृष्णप्रधानाः संहत्य पर्युपासन्त भारत ॥ ५
प्रत्यादानं च राज्यस्य कार्यमूचुर्नराधिपाः ।
भवतः सानुबन्धस्य समुच्छेदं चिकीर्षवः ॥ ६
श्रुत्वा चैतन्मयोक्तास्तु भीष्मद्रोणकृपास्तदा ।
ज्ञातिक्षयभयाद्राजन्भीतेन भरतर्षभ ॥ ७
न ते स्थास्यन्ति समये पाण्डवा इति मे मतिः ।
समुच्छेदं हि नः कृत्स्नं वासुदेवश्चिकीर्षति ॥ ८
ऋते च विदुरं सर्वे यूयं वध्या महात्मनः ।
धृतराष्ट्रश्च धर्मज्ञो न वध्यः कुरुसत्तम ॥ ९

समुच्छेदं च कृत्स्नं नः कृत्वा तात जनार्दनः ।
एकराज्यं कुरूणां स्म चिकीर्षति युधिष्ठिरे ॥ १०
तत्र किं प्राप्तकालं नः प्रणिपातः पलायनम् ।
प्राणान्वा संपरित्यज्य प्रतियुध्यामहे परान् ॥ ११
प्रतियुद्धे तु नियतः स्यादस्माकं पराजयः ।
युधिष्ठिरस्य सर्वे हि पार्थिवा वशवर्तिनः ॥ १२
विरक्तराष्ट्राश्च वयं मित्राणि कुपितानि नः ।
धिक्कृताः पार्थिवैः सर्वैः स्वजनेन च सर्वशः ॥१३
प्रणिपाते न दोषोऽस्ति बन्धूनां शाश्वतीः समाः ।
पितरं त्वेव शोचामि प्रज्ञानेत्रं जनेश्वरम् ।
मत्कृते दुःखमापन्नं क्लेशं प्राप्तमनन्तकम् ॥ १४
कृतं हि तव पुत्रैश्च परेषामवरोधनम् ।
मत्प्रियार्थं पुरैवैतद्विदितं ते नरोत्तम ॥ १५
ते राज्ञो धृतराष्ट्रस्य सामात्यस्य महारथाः ।
वैरं प्रतिकरिष्यन्ति कुलोच्छेदेन पाण्डवाः ॥ १६
ततो द्रोणोऽब्रवीद्भीष्मः कृपो द्रौणिश्च भारत ।
मत्वा मां महतीं चिन्तामास्थितं व्यथितेन्द्रियम् ॥
अभिद्रुग्धाः परे चेन्नो न भेतव्यं परंतप ।
असमर्थाः परे जेतुमस्मान्युधि जनेश्वर ॥ १८
एकैकशः समर्थाः स्मो विजेतुं सर्वपार्थिवान् ।
आगच्छन्तु विनेष्यामो दर्पमेषां शितैः शरैः ॥१९
पुरैकेन हि भीष्मेण विजिताः सर्वपार्थिवाः ।
मृते पितर्यभिक्रुद्धो रथेनैकेन भारत ॥ २०
जघान सुबहूंस्तेषां संरब्धः कुरुसत्तमः ।
ततस्ते शरणं जग्मुर्देवव्रतमिमं भयात् ॥ २१
स भीष्मः सुसमर्थोऽयमस्माभिः सहितो रणे ।
परान्विजेतुं तस्मात्ते व्येतु भीर्भरतर्षभ ।
इत्येषां निश्चयो ह्यासीत्तत्कालममितौजसाम् ॥ २२
पुरा परेषां पृथिवी कृत्स्नासीद्वशवर्तिनी ।
अस्मान्पुनरमी नाद्य समर्था जेतुमाहवे ।
छिन्नपक्षाः परे ह्यद्य वीर्यहीनाश्च पाण्डवाः ॥ २३
अस्मत्संस्था च पृथिवी वर्तते भरतर्षभ ।
एकार्थाः सुखदुःखेषु मयानीताश्च पार्थिवाः ॥ २४
अप्यग्निं प्रविशेयुस्ते समुद्रं वा परंतप ।
मदर्थे पार्थिवाः सर्वे तद्विद्धि कुरुसत्तम ॥ २५
उन्मत्तमिव चापि त्वां प्रहसन्तीह दुःखितम् ।
विलपन्तं बहुविधं भीतं परविकत्थने ॥ २६
एषां ह्येकैकशो राज्ञां समर्थः पाण्डवान्प्रति ।
आत्मानं मन्यते सर्वो व्येतु ते भयमागतम् ॥ २७
सर्वां समग्रां सेनां मे वासवोऽपि न शक्नुयात् ।
हन्तुमक्षय्यरूपेयं ब्रह्मणापि स्वयंभुवा ॥ २८
युधिष्ठिरः पुरं हित्वा पञ्च ग्रामान्स याचति ।
भीतो हि मामकात्सैन्यात्प्रभावाच्चैव मे प्रभो ॥ २९
समर्थं मन्यसे यच्च कुन्तीपुत्रं वृकोदरम् ।
तन्मिथ्या न हि मे कृत्स्नं प्रभावं वेत्थ भारत ॥
मत्समो हि गदायुद्धे पृथिव्यां नास्ति कश्चन ।
नासीत्कश्चिदतिक्रान्तो भविता न च कश्चन ॥ ३१
युक्तो दुःखोचितश्चाहं विद्यापारगतस्तथा ।
तस्मान्न भीमान्नान्येभ्यो भयं मे विद्यते क्वचित् ॥
दुर्योधनसमो नास्ति गदायामिति निश्चयः ।
संकर्षणस्य भद्रं ते यत्तदैनमुपावसम् ॥ ३३
युद्धे संकर्षणसमो बलेनाभ्यधिको भुवि ।
गदाप्रहारं भीमो मे न जातु विषहेद्युधि ॥ ३४
एकं प्रहारं यं दद्यां भीमाय रुषितो नृप ।
स एवैनं नयेद्घोरं क्षिप्रं वैवस्वतक्षयम् ॥ ३५
इच्छेयं च गदाहस्तं राजन्द्रष्टुं वृकोदरम् ।
सुचिरं प्रार्थितो ह्येष मम नित्यं मनोरथः ॥ ३६
गदया निहतो ह्याजौ मम पार्थो वृकोदरः ।
विशीर्णगात्रः पृथिवीं परासुः प्रपतिष्यति ॥ ३७
गदाप्रहाराभिहतो हिमवानपि पर्वतः ।

सकृन्मया विशीर्येत गिरिः शतसहस्रधा ॥ ३८
स चाप्येतद्विजानाति वासुदेवार्जुनौ तथा ।
दुर्योधनसमो नास्ति गदायामिति निश्चयः ॥ ३९
तत्ते वृकोदरमयं भयं व्येतु महाहवे ।
व्यपनेष्याम्यहं ह्येनं मा राजन्विमना भव ॥ ४०
तस्मिन्मया हते क्षिप्रमर्जुनं बहवो रथाः ।
तुल्यरूपा विशिष्टाश्च क्षेप्स्यन्ति भरतर्षभ ॥ ४१
भीष्मो द्रोणः कृपो द्रौणिः कर्णो भूरिश्रवास्तथा ।
प्राग्ज्योतिषाधिपः शल्यः सिन्धुराजो जयद्रथः ॥
एकैक एषां शक्तस्तु हन्तुं भारत पाण्डवान् ।
समस्तास्तु क्षणेनैतान्नेष्यन्ति यमसादनम् ॥ ४३
समग्रा पार्थिवी सेना पार्थमेकं धनंजयम् ।
कस्मादशक्ता निर्जेतुमिति हेतुर्न विद्यते ॥ ४४
शरव्रातैस्तु भीष्मेण शतशोऽथ सहस्रशः ।
द्रोणद्रौणिकृपैश्चैव गन्ता पार्थो यमक्षयम् ॥ ४५
पितामहो हि गाङ्गेयः शंतनोरधि भारत ।
ब्रह्मर्षिसदृशो जज्ञे देवैरपि दुरुत्सहः ।
पित्रा ह्युक्तः प्रसन्नेन नाकामस्त्वं मरिष्यसि ॥ ४६
ब्रह्मर्षेश्च भरद्वाजाद्द्रोण्यां द्रोणो व्यजायत ।
द्रोणाज्जज्ञे महाराज द्रौणिश्च परमास्त्रवित् ॥ ४७
कृपश्चाचार्यमुख्योऽयं महर्षेर्गौतमादपि ।
शरस्तम्बोद्भवः श्रीमानवध्य इति मे मतिः ॥ ४८
अयोनिजं त्रयं ह्येतत्पिता माता च मातुलः ।
अश्वत्थाम्नो महाराज स च शूरः स्थितो मम ॥
सर्व एते महाराज देवकल्पा महारथाः ।
शक्रस्यापि व्यथां कुर्युः संयुगे भरतर्षभ ॥ ५०
भीष्मद्रोणकृपाणां च तुल्यः कर्णो मतो मम ।
अनुज्ञातश्च रामेण मत्समोऽसीति भारत ॥ ५१
कुण्डले रुचिरे चास्तां कर्णस्य सहजे शुभे ।
ते शच्यर्थे महेन्द्रेण याचितः स परंतपः ।
अमोघया महाराज शक्त्या परमभीमया ॥ ५२
तस्य शक्त्योपगूढस्य कस्माज्जीवेद्धनंजयः ।
विजयो मे ध्रुवं राजन्फलं पाणाविवाहितम् ।
अभिव्यक्तः परेषां च कृत्स्नो भुवि पराजयः ॥ ५३
अह्ना ह्येकेन भीष्मोऽयमयुतं हन्ति भारत ।
तत्समाश्च महेष्वासा द्रोणद्रौणिकृपा अपि ॥ ५४
संशप्तानि च वृन्दानि क्षत्रियाणां परंतप ।
अर्जुनं वयमस्मान्वा धनंजय इति स्म ह ॥ ५५
तांश्चालमिति मन्यन्ते सव्यसाचिवधे विभो ।
पार्थिवाः स भवान्राजन्नकस्माद्व्यथते कथम् ॥ ५६
भीमसेने च निहते कोऽन्यो युध्येत भारत ।
परेषां तन्ममाचक्ष्व यदि वेत्थ परंतप ॥ ५७
पञ्च ते भ्रातरः सर्वे धृष्टद्युम्नोऽथ सात्यकिः ।
परेषां सप्त ये राजन्योधाः परमकं बलम् ॥ ५८
अस्माकं तु विशिष्टा ये भीष्मद्रोणकृपादयः ।
द्रौणिर्वैकर्तनः कर्णः सोमदत्तोऽथ बाह्लिकः ॥ ५९
प्राग्ज्योतिषाधिपः शल्य आवन्त्योऽथ जयद्रथः ।
दुःशासनो दुर्मुखश्च दुःसहश्च विशां पते ॥ ६०
श्रुतायुश्चित्रसेनश्च पुरुमित्रो विविंशतिः ।
शलो भूरिश्रवाश्चोभौ विकर्णश्च तवात्मजः ॥ ६१
अक्षौहिण्यो हि मे राजन्दशैका च समाहृताः ।
न्यूनाः परेषां सप्तैव कस्मान्मे स्यात्पराजयः ॥ ६२
बलं त्रिगुणतो हीनं योध्यं प्राह बृहस्पतिः ।
परेभ्यस्त्रिगुणा चेयं मम राजन्ननीकिनी ॥ ६३
गुणहीनं परेषां च बहु पश्यामि भारत ।
गुणोदयं बहुगुणमात्मनश्च विशां पते ॥ ६४
एतत्सर्वं समाज्ञाय बलाग्र्यं मम भारत ।
न्यूनतां पाण्डवानां च न मोहं गन्तुमर्हसि ॥ ६५

वैशंपायन उवाच ।

इत्युक्त्वा संजयं भूयः पर्यपृच्छत भारत ।

विधित्सुः प्राप्तकालानि ज्ञात्वा परपुरंजयः ॥ ६६

इति श्रीमहाभारते उद्योगपर्वणि
चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

५५

दुर्योधन उवाच ।

अक्षौहिणीः सप्त लब्ध्वा राजभिः सह संजय ।
किं स्विदिच्छति कौन्तेयो युद्धप्रेप्सुर्युधिष्ठिरः ॥ १

संजय उवाच ।

अतीव मुदितो राजन्युद्धप्रेप्सुर्युधिष्ठिरः ।
भीमसेनार्जुनौ चोभौ यमावपि न बिभ्यतः ॥ २
रथं तु दिव्यं कौन्तेयः सर्वा विभ्राजयन्दिशः ।
मन्त्रं जिज्ञासमानः सन्बीभत्सुः समयोजयत् ॥ ३
तमपश्याम संनद्धं मेघं विद्युत्प्रभं यथा ।
स मन्त्रान्समभिध्याय हृष्यमाणोऽभ्यभाषत ॥ ४
पूर्वरूपमिदं पश्य वयं जेष्याम संजय ।
बीभत्सुर्मां यथोवाच तथावैम्यहमप्युत ॥ ५

दुर्योधन उवाच ।

प्रशंसस्यभिनन्दंस्तान्पार्थानक्षपराजितान् ।
अर्जुनस्य रथे ब्रूहि कथमश्वाः कथं ध्वजः ॥ ६

संजय उवाच ।

भौवनः सह शक्रेण बहुचित्रं विशां पते ।
रूपाणि कल्पयामास त्वष्टा धात्रा सहाभिभो ॥ ७
ध्वजे हि तस्मिन्रूपाणि चक्रुस्ते देवमायया ।
महाधनानि दिव्यानि महान्ति च लघूनि च ॥ ८

सर्वा दिशो योजनमात्रमन्तरं
स तिर्यगूर्ध्वं च रुरोध वै ध्वजः ।
न संसज्जेत्तरुभिः संवृतोऽपि
तथा हि माया विहिता भौवनेन ॥ ९
यथाकाशे शक्रधनुः प्रकाशते
न चैकवर्णं न च विद्म किं नु तत् ।
तथा ध्वजो विहितो भौवनेन
बह्वाकारं दृश्यते रूपमस्य ॥ १०
यथाग्निधूमो दिवमेति रुद्ध्वा
वर्णान्बिभ्रत्तैजसं तच्छरीरम् ।
तथा ध्वजो विहितो भौवनेन
न चेद्भारो भविता नोत रोधः ॥ ११
श्वेतास्तस्मिन्वातवेगाः सदश्वा
दिव्या युक्ताश्चित्ररथेन दत्ताः ।
शतं यत्तत्पूर्यते नित्यकालं
हतं हतं दत्तवरं पुरस्तात् ॥ १२
तथा राज्ञो दन्तवर्णा बृहन्तो
रथे युक्ता भान्ति तद्वीर्यतुल्याः ।
ऋश्यप्रख्या भीमसेनस्य वाहा
रणे वायोस्तुल्यवेगा बभूवुः ॥ १३
कल्माषाङ्गास्तित्तिरिचित्रपृष्ठा
भ्रात्रा दत्ताः प्रीयता फल्गुनेन ।
भ्रातुर्वीरस्य स्वैस्तुरंगैर्विशिष्टा
मुदा युक्ताः सहदेवं वहन्ति ॥ १४
माद्रीपुत्रं नकुलं त्वाजमीढं
महेन्द्रदत्ता हरयो वाजिमुख्याः ।
समा वायोर्बलवन्तस्तरस्विनो
वहन्ति वीरं वृत्रशत्रुं यथेन्द्रम् ॥ १५
तुल्याश्चैभिर्वयसा विक्रमेण
जवेन चैवाप्रतिरूपाः सदश्वाः ।
सौभद्रादीन्द्रौपदेयान्कुमारा-
न्वहन्त्यश्वा देवदत्ता बृहन्तः ॥ १६

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

५६

धृतराष्ट्र उवाच ।

कांस्तत्र संजयापश्यः प्रत्यर्थेन समागतान् ।
ये योत्स्यन्ते पाण्डवार्थे पुत्रस्य मम वाहिनीम् ॥ १

संजय उवाच ।

मुख्यमन्धकवृष्णीनामपश्यं कृष्णमागतम् ।
चेकितानं च तत्रैव युयुधानं च सात्यकिम् ॥ २
पृथगक्षौहिणीभ्यां तौ पाण्डवानभिसंश्रितौ ।
महारथौ समाख्यातावुभौ पुरुषमानिनौ ॥ ३
अक्षौहिण्याथ पाञ्चाल्यो दशभिस्तनयैर्वृतः ।
सत्यजित्प्रमुखैर्वीरैर्धृष्टद्युम्नपुरोगमैः ॥ ४
द्रुपदो वर्धयन्मानं शिखण्डिपरिपालितः ।
उपायात्सर्वसैन्यानां प्रतिच्छाद्य तदा वपुः ॥ ५
विराटः सह पुत्राभ्यां शङ्खेनैवोत्तरेण च ।
सूर्यदत्तादिभिर्वीरैर्मदिराश्वपुरोगमैः ॥ ६
सहितः पृथिवीपालो भ्रातृभिस्तनयैस्तथा ।
अक्षौहिण्यैव सैन्यस्य वृतः पार्थं समाश्रितः ॥ ७
जारासंधिर्मागधश्च धृष्टकेतुश्च चेदिराट् ।
पृथक्पृथगनुप्राप्तौ पृथगक्षौहिणीवृतौ ॥ ८
केकया भ्रातरः पञ्च सर्वे लोहितकध्वजाः ।
अक्षौहिणीपरिवृताः पाण्डवानभिसंश्रिताः ॥ ९
एतानेतावतस्तत्र यानपश्यं समागतान् ।
ये पाण्डवार्थे योत्स्यन्ति धार्तराष्ट्रस्य वाहिनीम् ॥ १०
यो वेद मानुषं व्यूहं दैवं गान्धर्वमासुरम् ।
स तस्य सेनाप्रमुखे धृष्टद्युम्नो महामनाः ॥ ११
भीष्मः शांतनवो राजन्भागः क्लृप्तः शिखण्डिनः ।
तं विराटोऽनु संयाता सह मत्स्यैः प्रहारिभिः ॥१२
ज्येष्ठस्य पाण्डुपुत्रस्य भागो मद्राधिपो बली ।
तौ तु तत्राब्रुवन्केचिद्विषमौ नो मताविति ॥ १३
दुर्योधनः सहसुतः सार्धं भ्रातृशतेन च ।
प्राच्याश्च दाक्षिणात्याश्च भीमसेनस्य भागतः ॥१४
अर्जुनस्य तु भागेन कर्णो वैकर्तनो मतः ।
अश्वत्थामा विकर्णश्च सैन्धवश्च जयद्रथः ॥ १५
अशक्याश्चैव ये केचित्पृथिव्यां शूरमानिनः ।
सर्वांस्तानर्जुनः पार्थः कल्पयामास भागतः ॥ १६
महेष्वासा राजपुत्रा भ्रातरः पञ्च केकयाः ।
केकयानेव भागेन कृत्वा योत्स्यन्ति संयुगे ॥ १७
तेषामेव कृतो भागो मालवाः शाल्वकेकयाः ।
त्रिगर्तानां च द्वौ मुख्यौ यौ तौ संशप्तकाविति ॥१८
दुर्योधनसुताः सर्वे तथा दुःशासनस्य च ।
सौभद्रेण कृतो भागो राजा चैव बृहद्बलः ॥ १९
द्रौपदेया महेष्वासाः सुवर्णविकृतध्वजाः ।
धृष्टद्युम्नमुखा द्रोणमभियास्यन्ति भारत ॥ २०
चेकितानः सोमदत्तं द्वैरथे योद्धुमिच्छति ।
भोजं तु कृतवर्माणं युयुधानो युयुत्सति ॥ २१
सहदेवस्तु माद्रेयः शूरः संक्रन्दनो युधि ।
स्वमंशं कल्पयामास श्यालं ते सुबलात्मजम् ॥२२
उलूकं चापि कैतव्यं ये स सारस्वता गणाः ।
नकुलः कल्पयामास भागं माद्रवतीसुतः ॥ २३
ये चान्ये पार्थिवा राजन्प्रत्युद्यास्यन्ति संयुगे ।
समाह्वानेन तांश्चापि पाण्डुपुत्रा अकल्पयन् ॥ २४
एवमेषामनीकानि प्रविभक्तानि भागशः ।
यत्ते कार्यं सपुत्रस्य क्रियतां तदकालिकम् ॥ २५

धृतराष्ट्र उवाच ।

न सन्ति सर्वे पुत्रा मे मूढा दुर्द्यूतदेविनः ।
येषां युद्धं बलवता भीमेन रणमूर्धनि ॥ २६
राजानः पार्थिवाः सर्वे प्रोक्षिताः कालधर्मणा ।
गाण्डीवाग्निं प्रवेक्ष्यन्ति पतङ्गा इव पावकम् ॥ २७
विद्रुतां वाहिनीं मन्ये कृतवैरैर्महात्मभिः ।
तां रणे केऽनुयास्यन्ति प्रभग्नां पाण्डवैर्युधि ॥ २८

सर्वे ह्यतिरथाः शूराः कीर्तिमन्तः प्रतापिनः ।
सूर्यपावकयोस्तुल्यास्तेजसा समितिंजयाः ॥ २९
येषां युधिष्ठिरो नेता गोप्ता च मधुसूदनः ।
योधौ च पाण्डवौ वीरौ सव्यसाचिवृकोदरौ ॥३०
नकुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः ।
सात्यकिर्द्रुपदश्चैव धृष्टद्युम्नस्य चात्मजः ॥ ३१
उत्तमौजाश्च पाञ्चाल्यो युधामन्युश्च दुर्जयः ।
शिखण्डी क्षत्रदेवश्च तथा वैराटिरुत्तरः ॥ ३२
काशयश्चेदयश्चैव मत्स्याः सर्वे च सृञ्जयाः ।
विराटपुत्रो बभ्रुश्च पाञ्चालाश्च प्रभद्रकाः ॥ ३३
येषामिन्द्रोऽप्यकामानां न हरेत्पृथिवीमिमाम् ।
वीराणां रणधीराणां ये भिन्द्युः पर्वतानपि ॥ ३४
तान्सर्वान्गुणसंपन्नानमनुष्यप्रतापिनः ।
क्रोशतो मम दुष्पुत्रो योद्धुमिच्छति संजय ॥ ३५

दुर्योधन उवाच ।

उभौ स्व एकजातीयौ तथोभौ भूमिगोचरौ ।
अथ कस्मात्पाण्डवानामेकतो मन्यसे जयम् ॥ ३६
पितामहं च द्रोणं च कृपं कर्णं च दुर्जयम् ।
जयद्रथं सोमदत्तमश्वत्थामानमेव च ॥ ३७
सुचेतसो महेष्वासानिन्द्रोऽपि सहितोऽमरैः ।
अशक्तः समरे जेतुं किं पुनस्तात पाण्डवाः ॥ ३८
सर्वा च पृथिवी सृष्टा मदर्थे तात पाण्डवान् ।
आर्यान्धृतिमतः शूरानग्निकल्पान्प्रबाधितुम् ॥ ३९
न मामकान्पाण्डवास्ते समर्थाः प्रतिवीक्षितुम् ।
पराक्रान्तो ह्यहं पाण्डून्सपुत्रान्योद्धुमाहवे ॥ ४०
मत्प्रियं पार्थिवाः सर्वे ये चिकीर्षन्ति भारत ।
ते तानावारयिष्यन्ति ऐणेयानिव तन्तुना ॥ ४१
महता रथवंशेन शरजालैश्च मामकैः ।
अभिद्रुता भविष्यन्ति पाञ्चालाः पाण्डवैः सह ॥४२

धृतराष्ट्र उवाच ।

उन्मत्त इव मे पुत्रो विलपत्येष संजय ।
न हि शक्तो युधा जेतुं धर्मराजं युधिष्ठिरम् ॥४३
जानाति हि सदा भीष्मः पाण्डवानां यशस्विनाम् ।
बलवत्तां सपुत्राणां धर्मज्ञानां महात्मनाम् ॥ ४४
यतो नारोचयमहं विग्रहं तैर्महात्मभिः ।
किं नु संजय मे ब्रूहि पुनस्तेषां विचेष्टितम् ॥४५
कस्तांस्तरस्विनो भूयः संदीपयति पाण्डवान् ।
अर्चिष्मतो महेष्वासान्हविषा पावकानिव ॥ ४६

संजय उवाच ।

धृष्टद्युम्नः सदैवैतान्संदीपयति भारत ।
युध्यध्वमिति मा भैष्ट युद्धाद्भरतसत्तमाः ॥ ४७
ये केचित्पार्थिवास्तत्र धार्तराष्ट्रेण संवृताः ।
युद्धे समागमिष्यन्ति तुमुले कवचह्रदे ॥ ४८
तान्सर्वानाहवे क्रुद्धान्सानुबन्धान्समागतान् ।
अहमेकः समादास्ये तिमिर्मत्स्यानिवौदकान् ॥ ४९
भीष्मं द्रोणं कृपं कर्णं द्रौणिं शल्यं सुयोधनम् ।
एतांश्चापि निरोत्स्यामि वेलेव मकरालयम् ॥ ५०
तथा ब्रुवाणं धर्मात्मा प्राह राजा युधिष्ठिरः ।
तव धैर्यं च वीर्यं च पाञ्चालाः पाण्डवैः सह ।
सर्वे समधिरूढाः स्म संग्रामान्नः समुद्धर ॥ ५१
जानामि त्वां महाबाहो क्षत्रधर्मे व्यवस्थितम् ।
समर्थमेकं पर्याप्तं कौरवाणां युयुत्सताम् ।
भवता यद्विधातव्यं तन्नः श्रेयः परंतप ॥ ५२
संग्रामादपयातानां भग्नानां शरणैषिणाम् ।
पौरुषं दर्शयञ्शूरो यस्तिष्ठेदग्रतः पुमान् ।
क्रीणीयात्तं सहस्रेण नीतिमन्नाम तत्पदम् ॥ ५३
स त्वं शूरश्च वीरश्च विक्रान्तश्च नरर्षभ ।
भयार्तानां परित्राता संयुगेषु न संशयः ॥ ५४
एवं ब्रुवति कौन्तेये धर्मात्मनि युधिष्ठिरे ।

धृष्टद्युम्न उवाचेदं मां वचो गतसाध्वसः ॥ ५५
सर्वाञ्जनपदान्सूत योधा दुर्योधनस्य ये ।
सबाह्लीकान्कुरून्ब्रूयाः प्रातिपेयाञ्शरद्वतः ॥ ५६
सूतपुत्रं तथा द्रोणं सहपुत्रं जयद्रथम् ।
दुःशासनं विकर्णं च तथा दुर्योधनं नृपम् ॥ ५७
भीष्मं चैव ब्रूहि गत्वा त्वमाशु
युधिष्ठिरं साधुनैवाभ्युपेत ।
मा वो वधीदर्जुनो देवगुप्तः
क्षिप्रं याचध्वं पाण्डवं लोकवीरम् ॥ ५८
नैतादृशो हि योधोऽस्ति पृथिव्यामिह कश्चन ।
यथाविधः सव्यसाची पाण्डवः शस्त्रवित्तमः ॥५९
देवैर्हि संभृतो दिव्यो रथो गाण्डीवधन्वनः ।
न स जेयो मनुष्येण मा स्म कृध्वं मनो युधि ॥६०

इति श्रीमहाभारते उद्योगपर्वणि
षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

५७

धृतराष्ट्र उवाच ।

क्षत्रतेजा ब्रह्मचारी कौमारादपि पाण्डवः ।
तेन संयुगमेष्यन्ति मन्दा विलपतो मम ॥ १
दुर्योधन निवर्तस्व युद्धाद्भरतसत्तम ।
न हि युद्धं प्रशंसन्ति सर्वावस्थमरिंदम ॥ २
अलमर्धं पृथिव्यास्ते सहामात्यस्य जीवितुम् ।
प्रयच्छ पाण्डुपुत्राणां यथोचितमरिंदम ॥ ३
एतद्धि कुरवः सर्वे मन्यन्ते धर्मसंहितम् ।
यत्त्वं प्रशान्तिमिच्छेथाः पाण्डुपुत्रैर्महात्मभिः ॥ ४
अङ्गेमां समवेक्षस्व पुत्र स्वामेव वाहिनीम् ।
जात एव तव स्रावस्त्वं तु मोहान्न बुध्यसे ॥ ५
न ह्यहं युद्धमिच्छामि नैतदिच्छति बाह्लिकः ।
न च भीष्मो न च द्रोणो नाश्वत्थामा न संजयः ॥
न सोमदत्तो नो शल्यो न कृपो युद्धमिच्छति ।
सत्यव्रतः पुरुमित्रो जयो भूरिश्रवास्तथा ॥ ७
येषु संप्रतितिष्ठेयुः कुरवः पीडिताः परैः ।
ते युद्धं नाभिनन्दन्ति तत्तुभ्यं तात रोचताम् ॥ ८
न त्वं करोषि कामेन कर्णः कारयिता तव ।
दुःशासनश्च पापात्मा शकुनिश्चापि सौबलः ॥ ९

दुर्योधन उवाच ।

नाहं भवति न द्रोणे नाश्वत्थाम्नि न संजये ।
न विकर्णे न काम्बोजे न कृपे न च बाह्लिके ॥१०
सत्यव्रते पुरुमित्रे भूरिश्रवसि वा पुनः ।
अन्येषु वा तावकेषु भारं कृत्वा समाह्वये ॥ ११
अहं च तात कर्णश्च रणयज्ञं वितत्य वै ।
युधिष्ठिरं पशुं कृत्वा दीक्षितौ भरतर्षभ ॥ १२
रथो वेदी स्रुवः खड्गो गदा स्रुक्कवचं सदः ।
चातुर्होत्रं च धुर्या मे शरा दर्भा हविर्यशः ॥ १३
आत्मयज्ञेन नृपते इष्ट्वा वैवस्वतं रणे ।
विजित्य स्वयमेष्यावो हतामित्रौ श्रिया वृतौ ॥ १४
अहं च तात कर्णश्च भ्राता दुःशासनश्च मे ।
एते वयं हनिष्यामः पाण्डवान्समरे त्रयः ॥ १५
अहं हि पाण्डवान्हत्वा प्रशास्ता पृथिवीमिमाम् ।
मां वा हत्वा पाण्डुपुत्रा भोक्तारः पृथिवीमिमाम् ॥
त्यक्तं मे जीवितं राजन्धनं राज्यं च पार्थिव ।
न जातु पाण्डवैः सार्धं वसेयमहमच्युत ॥ १७
यावद्धि सूच्यास्तीक्ष्णाया विध्येदग्रेण मारिष ।
तावदप्यपरित्याज्यं भूमेर्नः पाण्डवान्प्रति ॥ १८

धृतराष्ट्र उवाच ।

सर्वान्वस्तात शोचामि त्यक्तो दुर्योधनो मया ।
ये मन्दमनुयास्यध्वं यान्तं वैवस्वतक्षयम् ॥ १९
रुरूणामिव यूथेषु व्याघ्राः प्रहरतां वराः ।
वरान्वरान्हनिष्यन्ति समेता युधि पाण्डवाः ॥ २०
प्रतीपमिव मे भाति युयुधानेन भारती ।

व्यस्ता सीमन्तिनी त्रस्ता प्रमृष्टा दीर्घबाहुना ॥ २१
संपूर्णं पूरयन्भूयो बलं पार्थस्य माधवः ।
शैनेयः समरे स्थाता बीजवत्प्रवपञ्शरान् ॥ २२
सेनामुखे प्रयुद्धानां भीमसेनो भविष्यति ।
तं सर्वे संश्रयिष्यन्ति प्राकारमकुतोभयम् ॥ २३
यदा द्रक्ष्यसि भीमेन कुञ्जरान्विनिपातितान् ।
विशीर्णदन्तान्गिर्याभान्भिन्नकुम्भान्सशोणितान् ॥
तानभिप्रेक्ष्य संग्रामे विशीर्णानिव पर्वतान् ।
भीतो भीमस्य संस्पर्शात्स्मर्तासि वचनस्य मे ॥२५
निर्दग्धं भीमसेनेन सैन्यं हतरथद्विपम् ।
गतिमग्नेरिव प्रेक्ष्य स्मर्तासि वचनस्य मे ॥ २६
महद्वो भयमागामि न चेच्छाम्यथ पाण्डवैः ।
गदया भीमसेनेन हताः शममुपैष्यथ ॥ २७
महावनमिव छिन्नं यदा द्रक्ष्यसि पातितम् ।
बलं कुरूणां संग्रामे तदा स्मर्तासि मे वचः ॥२८

वैशंपायन उवाच

एतावदुक्त्वा राजा तु स सर्वान्पृथिवीपतीन् ।
अनुभाष्य महाराज पुनः पप्रच्छ संजयम् ॥ २९

इति श्रीमहाभारते उद्योगपर्वणि
सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

५८

धृतराष्ट्र उवाच ।

यदब्रूतां महात्मानौ वासुदेवधनंजयौ ।
तन्मे ब्रूहि महाप्राज्ञ शुश्रूषे वचनं तव ॥ १

संजय उवाच ।

शृणु राजन्यथा दृष्टौ मया कृष्णधनंजयौ ।
ऊचतुश्चापि यद्वीरौ तत्ते वक्ष्यामि भारत ॥ २
पादाङ्गुलीरभिप्रेक्षन्प्रयतोऽहं कृताञ्जलिः ।
शुद्धान्तं प्राविशं राजन्नाख्यातुं नरदेवयोः ॥ ३
नैवाभिमन्युर्न यमौ तं देशमभियान्ति वै ।
यत्र कृष्णौ च कृष्णा च सत्यभामा च भामिनी ॥४
उभौ मध्वासवक्षीबावुभौ चन्दनरूषितौ ।
स्रग्विणौ वरवस्त्रौ तौ दिव्याभरणभूषितौ ॥ ५
नैकरत्नविचित्रं तु काञ्चनं महदासनम् ।
विविधास्तरणास्तीर्णं यत्रासातामरिंदमौ ॥ ६
अर्जुनोत्सङ्गगौ पादौ केशवस्योपलक्षये ।
अर्जुनस्य च कृष्णायां सत्यायां च महात्मनः । ७
काञ्चनं पादपीठं तु पार्थो मे प्रादिशत्तदा ।
तदहं पाणिना स्पृष्ट्वा ततो भूमावुपाविशम् ॥ ८
ऊर्ध्वरेखतलौ पादौ पार्थस्य शुभलक्षणौ ।
पादपीठादपहृतौ तत्रापश्यमहं शुभौ ॥ ९
श्यामौ बृहन्तौ तरुणौ शालस्कन्धाविवोद्गतौ ।
एकासनगतौ दृष्ट्वा भयं मां महदाविशत् ॥ १०
इन्द्रविष्णुसमावेतौ मन्दात्मा नावबुध्यते ।
संश्रयाद्द्रोणभीष्माभ्यां कर्णस्य च विकत्थनात् ॥११
निदेशस्थाविमौ यस्य मानसस्तस्य सेत्स्यते ।
संकल्पो धर्मराजस्य निश्चयो मे तदाभवत् ॥ १२
सत्कृतश्चान्नपानाभ्यामाच्छन्नो लब्धसत्क्रियः ।
अञ्जलिं मूर्ध्नि संधाय तौ संदेशमचोदयम् ॥ १३
धनुर्बाणोचितेनैकपाणिना शुभलक्षणम् ।
पादमानमयन्पार्थः केशवं समचोदयत् ॥ १४
इन्द्रकेतुरिवोत्थाय सर्वाभरणभूषितः ।
इन्द्रवीर्योपमः कृष्णः संविष्टो माभ्यभाषत ॥ १५
वाचं स वदतां श्रेष्ठो ह्लादिनीं वचनक्षमाम् ।
त्रासनीं धार्तराष्ट्राणां मृदुपूर्वां सुदारुणाम् ॥ १६
वाचं तां वचनार्हस्य शिक्षाक्षरसमन्विताम् ।
अश्रौषमहमिष्टार्थां पश्चाद्धृदयशोषिणीम् ॥ १७

वासुदेव उवाच ।

संजयेदं वचो ब्रूया धृतराष्ट्रं मनीषिणम् ।
शृण्वतः कुरुमुख्यस्य द्रोणस्यापि च शृण्वतः ॥१८

यजध्वं विपुलैर्यज्ञैर्विप्रेभ्यो दत्त दक्षिणाः ।
पुत्रैर्दारैश्च मोदध्वं महद्वो भयमागतम् ॥ १९
अर्थांस्त्यजत पात्रेभ्यः सुतान्प्राप्नुत कामजान् ।
प्रियं प्रियेभ्यश्चरत राजा हि त्वरते जये ॥ २०
ऋणमेतत्प्रवृद्धं मे हृदयान्नापसर्पति ।
यद्गोविन्देति चुक्रोश कृष्णा मां दूरवासिनम् ॥२१
तेजोमयं दुराधर्षं गाण्डीवं यस्य कार्मुकम् ।
मद्द्वितीयेन तेनेह वैरं वः सव्यसाचिना ॥ २२
मद्द्वितीयं पुनः पार्थं कः प्रार्थयितुमिच्छति ।
यो न कालपरीतो वाप्यपि साक्षात्पुरंदरः ॥ २३
बाहुभ्यामुद्वहेद्भूमिं दहेत्क्रुद्ध इमाः प्रजाः ।
पातयेत्त्रिदिवाद्देवान्योऽर्जुनं समरे जयेत् ॥ २४
देवासुरमनुष्येषु यक्षगन्धर्वभोगिषु ।
न तं पश्याम्यहं युद्धे पाण्डवं योऽभ्ययाद्रणे ॥ २५
यत्तद्विराटनगरे श्रूयते महदद्भुतम् ।
एकस्य च बहूनां च पर्याप्तं तन्निदर्शनम् ॥ २६
एकेन पाण्डुपुत्रेण विराटनगरे यदा ।
भग्नाः पलायन्त दिशः पर्याप्तं तन्निदर्शनम् ॥ २७
बलं वीर्यं च तेजश्च शीघ्रता लघुहस्तता ।
अविषादश्च धैर्यं च पार्थान्नान्यत्र विद्यते ॥ २८

संजय उवाच ।

इत्यब्रवीद्धृषीकेशः पार्थमुद्धर्षयन्गिरा ।
गर्जन्समयवर्षीव गगने पाकशासनः ॥ २९
केशवस्य वचः श्रुत्वा किरीटी श्वेतवाहनः ।
अर्जुनस्तन्महद्वाक्यमब्रवील्लोमहर्षणम् ॥ ३०

इति श्रीमहाभारते उद्योगपर्वणि
अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

५९

वैशंपायन उवाच ।

संजयस्य वचः श्रुत्वा प्रज्ञाचक्षुर्नरेश्वरः ।
ततः संख्यातुमारेभे तद्वचो गुणदोषतः ॥ १
प्रसंख्याय च सौक्ष्म्येण गुणदोषान्विचक्षणः ।
यथावन्मतितत्त्वेन जयकामः सुतान्प्रति ॥ २
बलाबले विनिश्चित्य याथातथ्येन बुद्धिमान् ।
शक्तिं संख्यातुमारेभे तदा वै मनुजाधिपः ॥ ३
देवमानुषयोः शक्त्या तेजसा चैव पाण्डवान् ।
कुरूञ्शक्त्याल्पतरया दुर्योधनमथाब्रवीत् ॥ ४
दुर्योधनेयं चिन्ता मे शश्वन्नाप्युपशाम्यति ।
सत्यं ह्येतदहं मन्ये प्रत्यक्षं नानुमानतः ॥ ५
आत्मजेषु परं स्नेहं सर्वभूतानि कुर्वते ।
प्रियाणि चैषां कुर्वन्ति यथाशक्ति हितानि च ॥ ६
एवमेवोपकर्तॄणां प्रायशो लक्षयामहे ।
इच्छन्ति बहुलं सन्तः प्रतिकर्तुं महत्प्रियम् ॥ ७
अग्निः साचिव्यकर्ता स्यात्खाण्डवे तत्कृतं स्मरन् ।
अर्जुनस्यातिभीमेऽस्मिन्कुरुपाण्डुसमागमे ॥ ८
जातगृध्याभिपन्नाश्च पाण्डवानामनेकशः ।
धर्मादयो भविष्यन्ति समाहूता दिवौकसः ॥ ९
भीष्मद्रोणकृपादीनां भयादशनिसंमितम् ।
रिरक्षिषन्तः संरम्भं गमिष्यन्तीति मे मतिः ॥ १०
ते देवसहिताः पार्था न शक्याः प्रतिवीक्षितुम् ।
मानुषेण नरव्याघ्रा वीर्यवन्तोऽस्त्रपारगाः ॥ ११
दुरासदं यस्य दिव्यं गाण्डीवं धनुरुत्तमम् ।
वारुणौ चाक्षयौ दिव्यौ शरपूर्णौ महेषुधी ॥ १२
वानरश्च ध्वजो दिव्यो निःसङ्गो धूमवद्गतिः ।
रथश्च चतुरन्तायां यस्य नास्ति समस्त्विषा ॥ १३
महामेघनिभश्चापि निर्घोषः श्रूयते जनैः ।
महाशनिसमः शब्दः शात्रवाणां भयंकरः ॥ १४
यं चातिमानुषं वीर्ये कृत्स्नो लोको व्यवस्यति ।
देवानामपि जेतारं यं विदुः पार्थिवा रणे ॥ १५
शतानि पञ्च चैवेषूनुद्वपन्निव दृश्यते ।

निमेषान्तरमात्रेण मुञ्चन्दूरं च पातयन् ॥ १६
यमाह भीष्मो द्रोणश्च कृपो द्रौणिस्तथैव च ।
मद्रराजस्तथा शल्यो मध्यस्था ये च मानवाः ॥१७
युद्धायावस्थितं पार्थं पार्थिवैरतिमानुषैः ।
अशक्यं रथशार्दूलं पराजेतुमरिंदमम् ॥ १८
क्षिपत्येकेन वेगेन पञ्च बाणशतानि यः ।
सदृशं बाहुवीर्येण कार्तवीर्यस्य पाण्डवम् ॥ १९
तमर्जुनं महेष्वासं महेन्द्रोपेन्द्ररक्षितम् ।
निघ्नन्तमिव पश्यामि विमर्देऽस्मिन्महामृधे ॥ २०
इत्येवं चिन्तयन्कृत्स्नमहोरात्राणि भारत ।
अनिद्रो निःसुखश्चास्मि कुरूणां शमचिन्तया ॥२१
क्षयोदयोऽयं सुमहान्कुरूणां प्रत्युपस्थितः ।
अस्य चेत्कलहस्यान्तः शमादन्यो न विद्यते ॥ २२
शमो मे रोचते नित्यं पार्थैस्तात न विग्रहः ।
कुरुभ्यो हि सदा मन्ये पाण्डवाञ्शक्तिमत्तरान् ॥२३

इति श्रीमहाभारते उद्योगपर्वणि
एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

६०

वैशंपायन उवाच ।

पितुरेतद्वचः श्रुत्वा धार्तराष्ट्रोऽत्यमर्षणः ।
आधाय विपुलं क्रोधं पुनरेवेदमब्रवीत् ॥ १
अशक्या देवसचिवाः पार्थाः स्युरिति यद्भवान् ।
मन्यते तद्भयं व्येतु भवतो राजसत्तम ॥ २
अकामद्वेषसंयोगाद्द्रोहाल्लोभाच्च भारत ।
उपेक्षया च भावानां देवा देवत्वमाप्नुवन् ॥ ३
इति द्वैपायनो व्यासो नारदश्च महातपाः ।
जामदग्न्यश्च रामो नः कथामकथयत्पुरा ॥ ४
नैव मानुषवद्देवाः प्रवर्तन्ते कदाचन ।
कामाल्लोभादनुक्रोशाद्द्वेषाच्च भरतर्षभ ॥ ५
यदि ह्यग्निश्च वायुश्च धर्म इन्द्रोऽश्विनावपि ।
कामयोगात्प्रवर्तेरन्न पार्था दुःखमाप्नुयुः ॥ ६
तस्मान्न भवता चिन्ता कार्यैषा स्यात्कदाचन ।
दैवेष्वपेक्षका ह्येते शश्वद्भावेषु भारत ॥ ७
अथ चेत्कामसंयोगाद्द्वेषाल्लोभाच्च लक्ष्यते ।
देवेषु देवप्रामाण्यं नैव तद्विक्रमिष्यति ॥ ८
मयाभिमन्त्रितः शश्वज्जातवेदाः प्रशंसति ।
दिधक्षुः सकलाँल्लोकान्परिक्षिप्य समन्ततः ॥ ९
यद्वा परमकं तेजो येन युक्ता दिवौकसः ।
ममाप्यनुपमं भूयो देवेभ्यो विद्धि भारत ॥ १०
प्रदीर्यमाणां वसुधां गिरीणां शिखराणि च ।
लोकस्य पश्यतो राजन्स्थापयाम्यभिमन्त्रणात् ॥११
चेतनाचेतनस्यास्य जङ्गमस्थावरस्य च ।
विनाशाय समुत्पन्नं महाघोरं महास्वनम् ॥ १२
अश्मवर्षं च वायुं च शमयामीह नित्यशः ।
जगतः पश्यतोऽभीक्ष्णं भूतानामनुकम्पया ॥ १३
स्तम्भितास्वप्सु गच्छन्ति मया रथपदातयः ।
देवासुराणां भावानामहमेकः प्रवर्तिता ॥ १४
अक्षौहिणीभिर्यान्देशान्यामि कार्येण केनचित् ।
तत्रापो मे प्रवर्तन्ते यत्र यत्राभिकामये ॥ १५
भयानि विषये राजन्व्यालादीनि न सन्ति मे ।
मत्तः सुप्तानि भूतानि न हिंसन्ति भयंकराः ॥ १६
निकामवर्षी पर्जन्यो राजन्विषयवासिनाम् ।
धर्मिष्ठाश्च प्रजाः सर्वा ईतयश्च न सन्ति मे ॥१७
अश्विनावथ वाय्वग्नी मरुद्भिः सह वृत्रहा ।
धर्मश्चैव मया द्विष्टान्नोत्सहन्तेऽभिरक्षितुम् ॥ १८
यदि ह्येते समर्थाः स्युर्मद्द्विषस्त्रातुमोजसा ।
न स्म त्रयोदश समाः पार्था दुःखमवाप्नुयुः ॥ १९
नैव देवा न गन्धर्वा नासुरा न च राक्षसाः ।
शक्तास्त्रातुं मया द्विष्टं सत्यमेतद्ब्रवीमि ते ॥ २०
यदभिध्याम्यहं शश्वच्छुभं वा यदि वाशुभम् ।

नैतद्विपन्नपूर्वं मे मित्रेष्वरिषु चोभयोः ॥ २१
भविष्यतीदमिति वा यद्ब्रवीमि परंतप ।
नान्यथा भूतपूर्वं तत्सत्यवागिति मां विदुः ॥ २२
लोकसाक्षिकमेतन्मे माहात्म्यं दिक्षु विश्रुतम् ।
आश्वासनार्थं भवतः प्रोक्तं न श्लाघया नृप ॥ २३
न ह्यहं श्लाघनो राजन्भूतपूर्वः कदाचन ।
असदाचरितं ह्येतद्यदात्मानं प्रशंसति ॥ २४
पाण्डवांश्चैव मत्स्यांश्च पाञ्चालान्केकयैः सह ।
सात्यकिं वासुदेवं च श्रोतासि विजितान्मया ॥२५
सरितः सागरं प्राप्य यथा नश्यन्ति सर्वशः ।
तथैव ते विनङ्क्ष्यन्ति मामासाद्य सहान्वयाः ॥ २६
परा बुद्धिः परं तेजो वीर्यं च परमं मयि ।
परा विद्या परो योगो मम तेभ्यो विशिष्यते ॥२७
पितामहश्च द्रोणश्च कृपः शल्यः शलस्तथा ।
अस्त्रेषु यत्प्रजानन्ति सर्वं तन्मयि विद्यते ॥ २८
इत्युक्त्वा संजयं भूयः पर्यपृच्छत भारत ।
ज्ञात्वा युयुत्सुः कार्याणि प्राप्तकालमरिंदम ॥ २९

इति श्रीमहाभारते उद्योगपर्वणि
षष्टितमोऽध्यायः ॥ ६० ॥

६१

वैशंपायन उवाच ।

तथा तु पृच्छन्तमतीव पार्था-
न्वैचित्रवीर्यं तमचिन्तयित्वा ।
उवाच कर्णो धृतराष्ट्रपुत्रं
प्रहर्षयन्संसदि कौरवाणाम् ॥ १
मिथ्या प्रतिज्ञाय मया यदस्त्रं
रामाद्धृतं ब्रह्मपरं पुरस्तात् ।
विज्ञाय तेनास्मि तदैवमुक्त-
स्तवान्तकालेऽप्रतिभास्यतीति ॥ २
महापराधे ह्यपि संनतेन
महर्षिणाहं गुरुणा च शप्तः ।
शक्तः प्रदग्धुं ह्यपि तिग्मतेजाः
ससागरामप्यवनिं महर्षिः ॥ ३
प्रसादितं ह्यस्य मया मनोऽभू-
च्छुश्रूषया स्वेन च पौरुषेण ।
ततस्तदस्त्रं मम सावशेषं
तस्मात्समर्थोऽस्मि ममैष भारः ॥ ४
निमेषमात्रं तमृषिप्रसाद-
मवाप्य पाञ्चालकरूषमत्स्यान् ।
निहत्य पार्थांश्च सपुत्रपौत्रा-
ल्लँोकानहं शस्त्रजितान्प्रपत्स्ये ॥ ५
पितामहस्तिष्ठतु ते समीपे
द्रोणश्च सर्वे च नरेन्द्रमुख्याः ।
यथाप्रधानेन बलेन यात्वा
पार्थान्हनिष्यामि ममैष भारः ॥ ६
एवं ब्रुवाणं तमुवाच भीष्मः
किं कत्थसे कालपरीतबुद्धे ।
न कर्ण जानासि यथा प्रधाने
हते हताः स्युर्धृतराष्ट्रपुत्राः ॥ ७
यत्खाण्डवं दाहयता कृतं हि
कृष्णद्वितीयेन धनंजयेन ।
श्रुत्वैव तत्कर्म नियन्तुमात्मा
शक्यस्त्वया वै सह बान्धवेन ॥ ८
यां चापि शक्तिं त्रिदशाधिपस्ते
ददौ महात्मा भगवान्महेन्द्रः ।
भस्मीकृतां तां पतितां विशीर्णां
चक्राहतां द्रक्ष्यसि केशवेन ॥ ९
यस्ते शरः सर्पमुखो विभाति
सदाग्र्यमाल्यैर्महितः प्रयत्नात् ।
स पाण्डुपुत्राभिहतः शरौघैः

सह त्वया यास्यति कर्ण नाशम् ॥ १०
बाणस्य भौमस्य च कर्ण हन्ता
किरीटिनं रक्षति वासुदेवः ।
यस्त्वादृशानां च गरीयसां च
हन्ता रिपूणां तुमुले प्रगाढे ॥ ११

कर्ण उवाच ।

असंशयं वृष्णिपतिर्यथोक्त-
स्तथा च भूयश्च ततो महात्मा ।
अहं यदुक्तः परुषं तु किंचि-
त्पितामहस्तस्य फलं शृणोतु ॥ १२
न्यस्यामि शस्त्राणि न जातु संख्ये
पितामहो द्रक्ष्यति मां सभायाम् ।
त्वयि प्रशान्ते तु मम प्रभावं
द्रक्ष्यन्ति सर्वे भुवि भूमिपालाः ॥ १३

वैशंपायन उवाच ।

इत्येवमुक्त्वा स महाधनुष्मा-
न्हित्वा सभां स्वं भवनं जगाम ।
भीष्मस्तु दुर्योधनमेव राज-
न्मध्ये कुरूणां प्रहसन्नुवाच ॥ १४
सत्यप्रतिज्ञः किल सूतपुत्र-
स्तथा स भारं विषहेत कस्मात् ।
व्यूहं प्रतिव्यूह्य शिरांसि भित्त्वा
लोकक्षयं पश्यत भीमसेनात् ॥ १५
आवन्त्यकालिङ्गजयद्रथेषु
वेदिध्वजे तिष्ठति बाह्लिके च ।
अहं हनिष्यामि सदा परेषां
सहस्रशश्चायुतशश्च योधान् ॥ १६
यदैव रामे भगवत्यनिन्द्ये
ब्रह्म ब्रुवाणः कृतवांस्तदस्त्रम् ।
तदैव धर्मश्च तपश्च नष्टं
वैकर्तनस्याधमपूरुषस्य ॥ १७
अथोक्तवाक्ये नृपतौ तु भीष्मे
निक्षिप्य शस्त्राणि गते च कर्णे ।
वैचित्रवीर्यस्य सुतोऽल्पबुद्धि-
र्दुर्योधनः शांतनवं बभाषे ॥ १८

इति श्रीमहाभारते उद्योगपर्वणि
एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

दुर्योधन उवाच ।

सदृशानां मनुष्येषु सर्वेषां तुल्यजन्मनाम् ।
कथमेकान्ततस्तेषां पार्थानां मन्यसे जयम् ॥ १
सर्वे स्म समजातीयाः सर्वे मानुषयोनयः ।
पितामह विजानीषे पार्थेषु विजयं कथम् ॥ २
नाहं भवति न द्रोणे न कृपे न च बाह्लिके ।
अन्येषु च नरेन्द्रेषु पराक्रम्य समारभे ॥ ३
अहं वैकर्तनः कर्णो भ्राता दुःशासनश्च मे ।
पाण्डवान्समरे पञ्च हनिष्यामः शितैः शरैः ॥ ४
ततो राजन्महायज्ञैर्विविधैर्भूरिदक्षिणैः ।
ब्राह्मणांस्तर्पयिष्यामि गोभिरश्वैर्धनेन च ॥ ५

विदुर उवाच ।

शकुनीनामिहार्थाय पाशं भूमावयोजयत् ।
कश्चिच्छाकुनिकस्तात पूर्वेषामिति शुश्रुम ॥ ६
तस्मिन्द्वौ शकुनौ बद्धौ युगपत्समपौरुषौ ।
तावुपादाय तं पाशं जग्मतुः खचरावुभौ ॥ ७
तौ विहायसमाक्रान्तौ दृष्ट्वा शाकुनिकस्तदा ।
अन्वधावदनिर्विण्णो येन येन स्म गच्छतः ॥ ८
तथा तमनुधावन्तं मृगयुं शकुनार्थिनम् ।
आश्रमस्थो मुनिः कश्चिद्ददर्शाथ कृताह्निकः ॥ ९
तावन्तरिक्षगौ शीघ्रमनुयान्तं महीचरम् ।
श्लोकेनानेन कौरव्य पप्रच्छ स मुनिस्तदा ॥ १०

विचित्रमिदमाश्चर्यं मृगहन्प्रतिभाति मे ।
प्लवमानौ हि खचरौ पदातिरनुधावसि ॥ ११

शाकुनिक उवाच ।

पाशमेकमुभावेतौ सहितौ हरतो मम ।
यत्र वै विवदिष्येते तत्र मे वशमेष्यतः ॥ १२

विदुर उवाच ।

तौ विवादमनुप्राप्तौ शकुनौ मृत्युसंधितौ ।
विगृह्य च सुदुर्बुद्धी पृथिव्यां संनिपेततुः ॥ १३
तौ युध्यमानौ संरब्धौ मृत्युपाशवशानुगौ ।
उपसृत्यापरिज्ञातो जग्राह मृगयुस्तदा ॥ १४
एवं ये ज्ञातयोऽर्थेषु मिथो गच्छन्ति विग्रहम् ।
तेऽमित्रवशमायान्ति शकुनाविव विग्रहात् ॥ १५
संभोजनं संकथनं संप्रश्नोऽथ समागमः ।
एतानि ज्ञातिकार्याणि न विरोधः कदाचन ॥ १६
यस्मिन्काले सुमनसः सर्वे वृद्धानुपासते ।
सिंहगुप्तमिवारण्यमप्रधृष्या भवन्ति ते ॥ १७
येऽर्थं संततमासाद्य दीना इव समासते ।
श्रियं ते संप्रयच्छन्ति द्विषद्भ्यो भरतर्षभ ॥ १८
धूमायन्ते व्यपेतानि ज्वलन्ति सहितानि च ।
धृतराष्ट्रोल्मुकानीव ज्ञातयो भरतर्षभ ॥ १९
इदमन्यत्प्रवक्ष्यामि यथा दृष्टं गिरौ मया ।
श्रुत्वा तदपि कौरव्य यथा श्रेयस्तथा कुरु ॥ २०
वयं किरातैः सहिता गच्छामो गिरिमुत्तरम् ।
ब्राह्मणैर्देवकल्पैश्च विद्याजम्भकवातिकैः ॥ २१
कुञ्जभूतं गिरिं सर्वमभितो गन्धमादनम् ।
दीप्यमानौषधिगणं सिद्धगन्धर्वसेवितम् ॥ २२
तत्र पश्यामहे सर्वे मधु पीतममाक्षिकम् ।
मरुप्रपाते विषमे निविष्टं कुम्भसंमितम् ॥ २३
आशीविषै रक्ष्यमाणं कुबेरदयितं भृशम् ।
यत्प्राश्य पुरुषो मर्त्यो अमरत्वं निगच्छति ॥ २४
अचक्षुर्लभते चक्षुर्वृद्धो भवति वै युवा ।
इति ते कथयन्ति स्म ब्राह्मणा जम्भसाधकाः ॥२५
ततः किरातास्तद्दृष्ट्वा प्रार्थयन्तो महीपते ।
विनेशुर्विषमे तस्मिन्ससर्पे गिरिगह्वरे ॥ २६
तथैव तव पुत्रोऽयं पृथिवीमेक इच्छति ।
मधु पश्यति संमोहात्प्रपातं नानुपश्यति ॥ २७
दुर्योधनो योद्धुमनाः समरे सव्यसाचिना ।
न च पश्यामि तेजोऽस्य विक्रमं वा तथाविधम् ॥
एकेन रथमास्थाय पृथिवी येन निर्जिता ।
प्रतीक्षमाणो यो वीरः क्षमते वीक्षितं तव ॥ २९
द्रुपदो मत्स्यराजश्च संक्रुद्धश्च धनंजयः ।
न शेषयेयुः समरे वायुयुक्ता इवाग्नयः ॥ ३०
अङ्के कुरुष्व राजानं धृतराष्ट्र युधिष्ठिरम् ।
युध्यतोर्हि द्वयोर्युद्धे नैकान्तेन भवेज्जयः ॥ ३१

इति श्रीमहाभारते उद्योगपर्वणि
द्विषष्टितमोऽध्यायः ॥ ६२ ॥

६३

धृतराष्ट्र उवाच ।

दुर्योधन विजानीहि यत्त्वां वक्ष्यामि पुत्रक ।
उत्पथं मन्यसे मार्गमनभिज्ञ इवाध्वगः ॥ १
पञ्चानां पाण्डुपुत्राणां यत्तेजः प्रमिमीषसि ।
पञ्चानामिव भूतानां महतां सुमहात्मनाम् ॥ २
युधिष्ठिरं हि कौन्तेयं परं धर्ममिहास्थितम् ।
परां गतिमसंप्रेक्ष्य न त्वं वेत्तुमिहार्हसि ॥ ३
भीमसेनं च कौन्तेयं यस्य नास्ति समो बले ।
रणान्तकं तर्कयसे महावातमिव द्रुमः ॥ ४
सर्वशस्त्रभृतां श्रेष्ठं मेरुं शिखरिणामिव ।
युधि गाण्डीवधन्वानं को नु युध्येत बुद्धिमान् ॥५
धृष्टद्युम्नश्च पाञ्चाल्यः कमिवाद्य न शातयेत् ।
शत्रुमध्ये शरान्मुञ्चन्देवराडशनीमिव ॥ ६

सात्यकिश्चापि दुर्धर्षः संमतोऽन्धकवृष्णिषु ।
ध्वंसयिष्यति ते सेनां पाण्डवेयहिते रतः ॥ ७
यः पुनः प्रतिमानेन त्रीँल्लोकानतिरिच्यते ।
तं कृष्णं पुण्डरीकाक्षं को नु युध्येत बुद्धिमान् ॥ ८
एकतो ह्यस्य दाराश्च ज्ञातयश्च सबान्धवाः ।
आत्मा च पृथिवी चेयमेकतश्च धनंजयः ॥ ९
वासुदेवोऽपि दुर्धर्षो यतात्मा यत्र पाण्डवः ।
अविषह्यं पृथिव्यापि तद्बलं यत्र केशवः ॥ १०
तिष्ठ तात सतां वाक्ये सुहृदामर्थवादिनाम् ।
वृद्धं शांतनवं भीष्मं तितिक्षस्व पितामहम् ॥ ११
मां च ब्रुवाणं शुश्रूष कुरूणामर्थवादिनम् ।
द्रोणं कृपं विकर्णं च महाराजं च बाह्लिकम् ॥ १२
एते ह्यपि यथैवाहं मन्तुमर्हसि तांस्तथा ।
सर्वे धर्मविदो ह्येते तुल्यस्नेहाश्च भारत ॥ १३
यत्तद्विराटनगरे सह भ्रातृभिरग्रतः ।
उत्सृज्य गाः सुसंत्रस्तं बलं ते समशीर्यत ॥ १४
यच्चैव तस्मिन्नगरे श्रूयते महदद्भुतम् ।
एकस्य च बहूनां च पर्याप्तं तन्निदर्शनम् ॥ १५
अर्जुनस्तत्तथाकार्षीत्किं पुनः सर्व एव ते ।
सभ्रातॄनभिजानीहि वृत्त्या च प्रतिपादय ॥ १६

इति श्रीमहाभारते उद्योगपर्वणि
त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६४

वैशंपायन उवाच ।

एवमुक्त्वा महाप्राज्ञो धृतराष्ट्रः सुयोधनम् ।
पुनरेव महाभागः संजयं पर्यपृच्छत ॥ १
ब्रूहि संजय यच्छेषं वासुदेवादनन्तरम् ।
यदर्जुन उवाच त्वां परं कौतूहलं हि मे ॥ २

संजय उवाच ।

वासुदेववचः श्रुत्वा कुन्तीपुत्रो धनंजयः ।
उवाच काले दुर्धर्षो वासुदेवस्य शृण्वतः ॥ ३
पितामहं शांतनवं धृतराष्ट्रं च संजय ।
द्रोणं कृपं च कर्णं च महाराजं च बाह्लिकम् ॥ ४
द्रौणिं च सोमदत्तं च शकुनिं चापि सौबलम् ।
दुःशासनं शलं चैव पुरुमित्रं विविंशतिम् ॥ ५
विकर्णं चित्रसेनं च जयत्सेनं च पार्थिवम् ।
विन्दानुविन्दावावन्त्यौ दुर्मुखं चापि कौरवम् ॥ ६
सैन्धवं दुःसहं चैव भूरिश्रवसमेव च ।
भगदत्तं च राजानं जलसंधं च पार्थिवम् ॥ ७
ये चाप्यन्ये पार्थिवास्तत्र योद्धुं
समागताः कौरवाणां प्रियार्थम् ।
मुमूर्षवः पाण्डवाग्नौ प्रदीप्ते
समानीता धार्तराष्ट्रेण सूत ॥ ८
यथान्यायं कौशलं वन्दनं च
समागता मद्वचनेन वाच्याः ।
इदं ब्रूयाः संजय राजमध्ये
सुयोधनं पापकृतां प्रधानम् ॥ ९
अमर्षणं दुर्मतिं राजपुत्रं
पापात्मानं धार्तराष्ट्रं सुलुब्धम् ।
सर्वं ममैतद्वचनं समग्रं
सहामात्यं संजय श्रावयेथाः ॥ १०
एवं प्रतिष्ठाप्य धनंजयो मां
ततोऽर्थवद्धर्मवच्चापि वाक्यम् ।
प्रोवाचेदं वासुदेवं समीक्ष्य
पार्थो धीमाँल्लोहितान्तायताक्षः ॥ ११
यथा श्रुतं ते वदतो महात्मनो
मधुप्रवीरस्य वचः समाहितम् ।
तथैव वाच्यं भवता हि मद्वचः
समागतेषु क्षितिपेषु सर्वशः ॥ १२
शराग्निधूमे रथनेमिनादिते

धनुःस्रुवेणास्त्रबलापहारिणा ।
यथा न होमः क्रियते महामृधे
तथा समेत्य प्रयतध्वमादृताः ॥ १३
न चेत्प्रयच्छध्वममित्रघातिनो
युधिष्ठिरस्यांशमभीप्सितं स्वकम् ।
नयामि वः स्वाश्वपदातिकुञ्जरा-
न्दिशं पितॄणामशिवां शितैः शरैः ॥ १४
ततोऽहमामन्त्र्य चतुर्भुजं हरिं
धनंजयं चैव नमस्य सत्वरः ।
जवेन संप्राप्त इहामरद्युते
तवान्तिकं प्रापयितुं वचो महत् ॥ १५

इति श्रीमहाभारते उद्योगपर्वणि
चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

६५

वैशंपायन उवाच ।

दुर्योधने धार्तराष्ट्रे तद्वचोऽप्रतिनन्दति ।
तूष्णींभूतेषु सर्वेषु समुत्तस्थुर्नरेश्वराः ॥ १
उत्थितेषु महाराज पृथिव्यां सर्वराजसु ।
रहिते संजयं राजा परिप्रष्टुं प्रचक्रमे ॥ २
आशंसमानो विजयं तेषां पुत्रवशानुगः ।
आत्मनश्च परेषां च पाण्डवानां च निश्चयम् ॥ ३

धृतराष्ट्र उवाच ।

गावल्गणे ब्रूहि नः सारफल्गु
स्वसेनायां यावदिहास्ति किंचित् ।
त्वं पाण्डवानां निपुणं वेत्थ सर्वं
किमेषां ज्यायः किमु तेषां कनीयः ॥ ४
त्वमेतयोः सारवित्सर्वदर्शी
धर्मार्थयोर्निपुणो निश्चयज्ञः ।
स मे पृष्टः संजय ब्रूहि सर्वं
युध्यमानाः कतरेऽस्मिन्न सन्ति ॥ ५

संजय उवाच ।

न त्वां ब्रूयां रहिते जातु किंचि-
दसूया हि त्वां प्रसहेत राजन् ।
आनयस्व पितरं संशितव्रतं
गांधारीं च महिषीमाजमीढ ॥ ६
तौ तेऽसूयां विनयेतां नरेन्द्र
धर्मज्ञौ तौ निपुणौ निश्चयज्ञौ ।
तयोस्तु त्वां संनिधौ तद्वदेयं
कृत्स्नं मतं वासुदेवार्जुनाभ्याम् ॥ ७

वैशंपायन उवाच ।

ततस्तन्मतमाज्ञाय संजयस्यात्मजस्य च ।
अभ्युपेत्य महाप्राज्ञः कृष्णद्वैपायनोऽब्रवीत् ॥ ८
संपृच्छते धृतराष्ट्राय संजय
आचक्ष्व सर्वं यावदेषोऽनुयुङ्क्ते ।
सर्वं यावद्वेत्थ तस्मिन्यथाव-
द्याथातथ्यं वासुदेवेऽर्जुने च ॥ ९

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

६६

संजय उवाच ।

अर्जुनो वासुदेवश्च धन्विनौ परमार्चितौ ।
कामादन्यत्र संभूतौ सर्वाभावाय संमितौ ॥ १
द्यामन्तरं समास्थाय यथायुक्तं मनस्विनः ।
चक्रं तद्वासुदेवस्य मायया वर्तते विभो ॥ २
सापह्नवं पाण्डवेषु पाण्डवानां सुसंमतम् ।
सारासारबलं ज्ञात्वा तत्समासेन मे शृणु ॥ ३
नरकं शम्बरं चैव कंसं चैद्यं च माधवः ।
जितवान्घोरसंकाशान्क्रीडन्निव जनार्दनः ॥ ४
पृथिवीं चान्तरिक्षं च द्यां चैव पुरुषोत्तमः ।
मनसैव विशिष्टात्मा नयत्यात्मवशं वशी ॥ ५

भूयो भूयो हि यद्राजन्पृच्छसे पाण्डवान्प्रति ।
सारासारबलं ज्ञातुं तन्मे निगदतः शृणु ॥ ६
एकतो वा जगत्कृत्स्नमेकतो वा जनार्दनः ।
सारतो जगतः कृत्स्नादतिरिक्तो जनार्दनः ॥ ७
भस्म कुर्याज्जगदिदं मनसैव जनार्दनः ।
न तु कृत्स्नं जगच्छक्तं भस्म कर्तुं जनार्दनम् ॥ ८
यतः सत्यं यतो धर्मो यतो ह्रीरार्जवं यतः ।
ततो भवति गोविन्दो यतः कृष्णस्ततो जयः ॥ ९
पृथिवीं चान्तरिक्षं च दिवं च पुरुषोत्तमः ।
विचेष्टयति भूतात्मा क्रीडन्निव जनार्दनः ॥ १०
स कृत्वा पाण्डवान्सत्रं लोकं संमोहयन्निव ।
अधर्मनिरतान्मूढान्दग्धुमिच्छति ते सुतान् ॥ ११
कालचक्रं जगच्चक्रं युगचक्रं च केशवः ।
आत्मयोगेन भगवान्परिवर्तयतेऽनिशम् ॥ १२
कालस्य च हि मृत्योश्च जङ्गमस्थावरस्य च ।
ईशते भगवानेकः सत्यमेतद्ब्रवीमि ते ॥ १३
ईशन्नपि महायोगी सर्वस्य जगतो हरिः ।
कर्माण्यारभते कर्तुं कीनाश इव दुर्बलः ॥ १४
तेन वञ्चयते लोकान्मायायोगेन केशवः ।
ये तमेव प्रपद्यन्ते न ते मुह्यन्ति मानवाः ॥ १५

इति श्रीमहाभारते उद्योगपर्वणि
षट्षष्टितमोऽध्यायः ॥ ६६ ॥

६७

धृतराष्ट्र उवाच ।

कथं त्वं माधवं वेत्थ सर्वलोकमहेश्वरम् ।
कथमेनं न वेदाहं तन्ममाचक्ष्व संजय ॥ १

संजय उवाच ।

विद्या राजन्न ते विद्या मम विद्या न हीयते ।
विद्याहीनस्तमोध्वस्तो नाभिजानाति केशवम् ॥ २
विद्यया तात जानामि त्रियुगं मधुसूदनम् ।
कर्तारमकृतं देवं भूतानां प्रभवाप्ययम् ॥ ३

धृतराष्ट्र उवाच ।

गावल्गणेऽत्र का भक्तिर्या ते नित्या जनार्दने ।
यया त्वमभिजानासि त्रियुगं मधुसूदनम् ॥ ४

संजय उवाच ।

मायां न सेवे भद्रं ते न वृथाधर्ममाचरे ।
शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम् ॥ ५

धृतराष्ट्र उवाच ।

दुर्योधन हृषीकेशं प्रपद्यस्व जनार्दनम् ।
आप्तो नः संजयस्तात शरणं गच्छ केशवम् ॥ ६

दुर्योधन उवाच ।

भगवान्देवकीपुत्रो लोकं चेन्निहनिष्यति ।
प्रवदन्नर्जुने सख्यं नाहं गच्छेऽद्य केशवम् ॥ ७

धृतराष्ट्र उवाच ।

अवाग्गान्धारि पुत्रस्ते गच्छत्येष सुदुर्मतिः ।
ईर्ष्युर्दुरात्मा मानी च श्रेयसां वचनातिगः ॥ ८

गान्धार्युवाच ।

ऐश्वर्यकाम दुष्टात्मन्वृद्धानां शासनातिग ।
ऐश्वर्यजीविते हित्वा पितरं मां च बालिश ॥ ९
वर्धयन्दुर्हृदां प्रीतिं मां च शोकेन वर्धयन् ।
निहतो भीमसेनेन स्मर्तासि वचनं पितुः ॥ १०

व्यास उवाच ।

दयितोऽसि राजन्कृष्णस्य धृतराष्ट्र निबोध मे ।
यस्य ते संजयो दूतो यस्त्वां श्रेयसि योक्ष्यते ॥ ११
जानात्येष हृषीकेशं पुराणं यच्च वै नवम् ।
शुश्रूषमाणमेकाग्रं मोक्ष्यते महतो भयात् ॥ १२
वैचित्रवीर्य पुरुषाः क्रोधहर्षतमोवृताः ।
सिता बहुविधैः पाशैर्ये न तुष्टाः स्वकैर्धनैः ॥ १३
यमस्य वशमायान्ति काममूढाः पुनः पुनः ।
अन्धनेत्रा यथैवान्धा नीयमानाः स्वकर्मभिः ॥ १४

एष एकायनः पन्था येन यान्ति मनीषिणः ।
तं दृष्ट्वा मृत्युमत्येति महांस्तत्र न सज्जते ॥ १५

धृतराष्ट्र उवाच ।

अङ्ग संजय मे शंस पन्थानमकुतोभयम् ।
येन गत्वा हृषीकेशं प्राप्नुयां शान्तिमुत्तमाम् ॥ १६

संजय उवाच ।

नाकृतात्मा कृतात्मानं जातु विद्याज्जनार्दनम् ।
आत्मनस्तु क्रियोपायो नान्यत्रेन्द्रियनिग्रहात् ॥ १७
इन्द्रियाणामुदीर्णानां कामत्यागोऽप्रमादतः ।
अप्रमादोऽविहिंसा च ज्ञानयोनिरसंशयम् ॥ १८
इन्द्रियाणां यमे यत्तो भव राजन्नतन्द्रितः ।
बुद्धिश्च मा ते च्यवतु नियच्छैतां यतस्ततः ॥ १९
एतज्ज्ञानं विदुर्विप्रा ध्रुवमिन्द्रियधारणम् ।
एतज्ज्ञानं च पन्थाश्च येन यान्ति मनीषिणः ॥ २०
अप्राप्यः केशवो राजन्निन्द्रियैरजितैर्नृभिः ।
आगमाधिगतो योगाद्वशी तत्त्वे प्रसीदति ॥ २१

इति श्रीमहाभारते उद्योगपर्वणि
सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

६८

धृतराष्ट्र उवाच ।

भूयो मे पुण्डरीकाक्षं संजयाचक्ष्व पृच्छते ।
नामकर्मार्थवित्तात प्राप्नुयां पुरुषोत्तमम् ॥ १

संजय उवाच ।

श्रुतं मे तस्य देवस्य नामनिर्वचनं शुभम् ।
यावत्तत्राभिजानेऽहमप्रमेयो हि केशवः ॥ २
वसनात्सर्वभूतानां वसुत्वाद्देवयोनितः ।
वासुदेवस्ततो वेद्यो वृषत्वाद्वृष्णिरुच्यते ॥ ३
मौनाद्ध्यानाच्च योगाच्च विद्धि भारत माधवम् ।
सर्वतत्त्वलयाच्चैव मधुहा मधुसूदनः ॥ ४
कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
कृष्णस्तद्भावयोगाच्च कृष्णो भवति शाश्वतः ॥ ५
पुण्डरीकं परं धाम नित्यमक्षयमक्षरम् ।
तद्भावात्पुण्डरीकाक्षो दस्युत्रासाज्जनार्दनः ॥ ६
यतः सत्त्वं न च्यवते यच्च सत्त्वान्न हीयते ।
सत्त्वतः सात्वतस्तस्मादार्षभाद्वृषभेक्षणः ॥ ७
न जायते जनित्र्यां यदजस्तस्मादनीकजित् ।
देवानां स्वप्रकाशत्वाद्दमाद्दामोदरं विदुः ॥ ८
हर्षात्सौख्यात्सुखैश्वर्याद्धृषीकेशत्वमश्नुते ।
बाहुभ्यां रोदसी बिभ्रन्महाबाहुरिति स्मृतः ॥ ९
अधो न क्षीयते जातु यस्मात्तस्मादधोक्षजः ।
नराणामयनाच्चापि तेन नारायणः स्मृतः ।
पूरणात्सदनाच्चैव ततोऽसौ पुरुषोत्तमः ॥ १०
असतश्च सतश्चैव सर्वस्य प्रभवाप्ययात् ।
सर्वस्य च सदा ज्ञानात्सर्वमेनं प्रचक्षते ॥ ११
सत्ये प्रतिष्ठितः कृष्णः सत्यमत्र प्रतिष्ठितम् ।
सत्यात्सत्यं च गोविन्दस्तस्मात्सत्योऽपि नामतः ॥ १२
विष्णुर्विक्रमणादेव जयनाज्जिष्णुरुच्यते ।
शाश्वतत्वादनन्तश्च गोविन्दो वेदनाद्गवाम् ॥ १३
अतत्त्वं कुरुते तत्त्वं तेन मोहयते प्रजाः ।
एवंविधो धर्मनित्यो भगवान्मुनिभिः सह ।
आगन्ता हि महाबाहुरानृशंस्यार्थमच्युतः ॥ १४

इति श्रीमहाभारते उद्योगपर्वणि
अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

६९

धृतराष्ट्र उवाच ।

चक्षुष्मतां वै स्पृहयामि संजय
द्रक्ष्यन्ति ये वासुदेवं समीपे ।
विभ्राजमानं वपुषा परेण
प्रकाशयन्तं प्रदिशो दिशश्च ॥ १
ईरयन्तं भारतीं भारताना-

मभ्यर्चनीयां शंकरीं सृञ्जयानाम् ।
बुभूषद्भिर्ग्रहणीयामनिन्द्यां
परासूनामग्रहणीयरूपाम् ॥ २
समुद्यन्तं सात्वतमेकवीरं
प्रणेतारमृषभं यादवानाम् ।
निहन्तारं क्षोभणं शात्रवाणां
मुष्णन्तं च द्विषतां वै यशांसि ॥ ३
द्रष्टारो हि कुरवस्त्वां समेता
महात्मानं शत्रुहणं वरेण्यम् ।
ब्रुवन्तं वाचमनृशंसरूपां
वृष्णिश्रेष्ठं मोहयन्तं मदीयान् ॥ ४
ऋषिं सनातनतमं विपश्चितं
वाचः समुद्रं कलशं यतीनाम् ।
अरिष्टनेमिं गरुडं सुपर्णं
पतिं प्रजानां भुवनस्य धाम ॥ ५
सहस्रशीर्षं पुरुषं पुराण-
मनादिमध्यान्तमनन्तकीर्तिम् ।
शुक्रस्य धातारमजं जनित्रं
परं परेभ्यः शरणं प्रपद्ये ॥ ६
त्रैलोक्यनिर्माणकरं जनित्रं
देवासुराणामथ नागरक्षसाम् ।
नराधिपानां विदुषां प्रधान-
मिन्द्रानुजं तं शरणं प्रपद्ये ॥ ७

इति श्रीमहाभारते उद्योगपर्वणि
एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

॥ समाप्तं यानसंधिपर्व ॥

७०

वैशंपायन उवाच ।

संजये प्रतियाते तु धर्मराजो युधिष्ठिरः ।
अभ्यभाषत दाशार्हमृषभं सर्वसात्वताम् ॥ १
अयं स कालः संप्राप्तो मित्राणां मे जनार्दन ।
न च त्वदन्यं पश्यामि यो न आपत्सु तारयेत् ॥ २
त्वां हि माधव संश्रित्य निर्भया मोहदर्पितम् ।
धार्तराष्ट्रं सहामात्यं स्वमंशमनुयुञ्ज्महे ॥ ३
यथा हि सर्वास्वापत्सु पासि वृष्णीनरिंदम ।
तथा ते पाण्डवा रक्ष्याः पाह्यस्मान्महतो भयात् ॥४

भगवानुवाच ।

अयमस्मि महाबाहो ब्रूहि यत्ते विवक्षितम् ।
करिष्यामि हि तत्सर्वं यत्त्वं वक्ष्यसि भारत ॥ ५

युधिष्ठिर उवाच ।

श्रुतं ते धृतराष्ट्रस्य सपुत्रस्य चिकीर्षितम् ।
एतद्धि सकलं कृष्ण संजयो मां यदब्रवीत् ॥ ६
तन्मतं धृतराष्ट्रस्य सोऽस्यात्मा विवृतान्तरः ।
यथोक्तं दूत आचष्टे वध्यः स्यादन्यथा ब्रुवन् ॥ ७
अप्रदानेन राज्यस्य शान्तिमस्मासु मार्गति ।
लुब्धः पापेन मनसा चरन्नसममात्मनः ॥ ८
यत्तद्द्वादश वर्षाणि वने निर्व्युषिता वयम् ।
छद्मना शरदं चैकां धृतराष्ट्रस्य शासनात् ॥ ९
स्थाता नः समये तस्मिन्धृतराष्ट्र इति प्रभो ।
नाहास्म समयं कृष्ण तद्धि नो ब्राह्मणा विदुः॥१०
वृद्धो राजा धृतराष्ट्रः स्वधर्मं नानुपश्यति ।
पश्यन्वा पुत्रगृद्धित्वान्मन्दस्यान्वेति शासनम् ॥११
सुयोधनमते तिष्ठन्राजास्मासु जनार्दन ।
मिथ्या चरति लुब्धः संश्चरन्प्रियमिवात्मनः ॥१२
इतो दुःखतरं किं नु यत्राहं मातरं ततः ।
संविधातुं न शक्नोमि मित्राणां वा जनार्दन ॥ १३
काशिभिश्चेदिपाञ्चालैर्मत्स्यैश्च मधुसूदन ।
भवता चैव नाथेन पञ्च ग्रामा वृता मया ॥ १४
कुशस्थलं वृकस्थलमासन्दी वारणावतम् ।
अवसानं च गोविन्द किंचिदेवात्र पञ्चमम् ॥ १५

पञ्च नस्तात दीयन्तां ग्रामा वा नगराणि वा ।
वसेम सहिता येषु मा च नो भरता नशन् ॥१६
न च तानपि दुष्टात्मा धार्तराष्ट्रोऽनुमन्यते ।
स्वाम्यमात्मनि मत्वासावतो दुःखतरं नु किम् ॥१७
कुले जातस्य वृद्धस्य परवित्तेषु गृध्यतः ।
लोभः प्रज्ञानमाहन्ति प्रज्ञा हन्ति हता ह्रियम् ॥१८
ह्रीर्हता बाधते धर्मं धर्मो हन्ति हतः श्रियम् ।
श्रीर्हता पुरुषं हन्ति पुरुषस्यास्वता वधः ॥ १९
अस्वतो हि निवर्तन्ते ज्ञातयः सुहृदर्त्विजः ।
अपुष्पादफलाद्वृक्षाद्यथा तात पतत्रिणः ॥ २०
एतच्च मरणं तात यदस्मात्पतितादिव ।
ज्ञातयो विनिवर्तन्ते प्रेतसत्त्वादिवासवः ॥ २१
नातः पापीयसीं कांचिदवस्थां शम्बरोऽब्रवीत् ।
यत्र नैवाद्य न प्रातर्भोजनं प्रतिदृश्यते ॥ २२
धनमाहुः परं धर्मं धने सर्वं प्रतिष्ठितम् ।
जीवन्ति धनिनो लोके मृता ये त्वधना नराः ॥२३
ये धनादपकर्षन्ति नरं स्वबलमाश्रिताः ।
ते धर्ममर्थं कामं च प्रमथ्नन्ति नरं च तम् ॥ २४
एतामवस्थां प्राप्यैके मरणं वव्रिरे जनाः ।
ग्रामायैके वनायैके नाशायैके प्रवव्रजुः ॥ २५
उन्मादमेके पुष्यन्ति यान्त्यन्ये द्विषतां वशम् ।
दास्यमेके निगच्छन्ति परेषामर्थहेतुना ॥ २६
आपदेवास्य मरणात्पुरुषस्य गरीयसी ।
श्रियो विनाशस्तद्ध्यस्य निमित्तं धर्मकामयोः ॥ २७
यदस्य धर्म्यं मरणं शाश्वतं लोकवर्त्म तत् ।
समन्तात्सर्वभूतानां न तदत्येति कश्चन ॥ २८
न तथा बाध्यते कृष्ण प्रकृत्या निर्धनो जनः ।
यथा भद्रां श्रियं प्राप्य तया हीनः सुखैधितः ॥२९
स तदात्मापराधेन संप्राप्तो व्यसनं महत् ।
सेन्द्रान्गर्हयते देवान्नात्मानं च कथंचन ॥ ३०
न चास्मिन्सर्वशास्त्राणि प्रतरन्ति निगर्हणाम् ।
सोऽभिक्रुध्यति भृत्यानां सुहृदश्चाभ्यसूयति ॥ ३१
तं तदा मन्युरेवैति स भूयः संप्रमुह्यति ।
स मोहवशमापन्नः क्रूरं कर्म निषेवते ॥ ३२
पापकर्मात्ययायैव संकरं तेन पुष्यति ।
संकरो नरकायैव सा काष्ठा पापकर्मणाम् ॥ ३३
न चेत्प्रबुध्यते कृष्ण नरकायैव गच्छति ।
तस्य प्रबोधः प्रज्ञैव प्रज्ञाचक्षुर्न रिष्यति ॥ ३४
प्रज्ञालाभे हि पुरुषः शास्त्राण्येवान्ववेक्षते ।
शास्त्रनित्यः पुनर्धर्मं तस्य ह्रीरङ्गमुत्तमम् ॥ ३५
ह्रीमान्हि पापं प्रद्वेष्टि तस्य श्रीरभिवर्धते ।
श्रीमान्स यावद्भवति तावद्भवति पूरुषः ॥ ३६
धर्मनित्यः प्रशान्तात्मा कार्ययोगवहः सदा ।
नाधर्मे कुरुते बुद्धिं न च पापेषु वर्तते ॥ ३७
अह्रीको वा विमूढो वा नैव स्त्री न पुनः पुमान् ।
नास्याधिकारो धर्मेऽस्ति यथा शूद्रस्तथैव सः ॥३८
ह्रीमानवति देवांश्च पितॄनात्मानमेव च ।
तेनामृतत्वं व्रजति सा काष्ठा पुण्यकर्मणाम् ॥ ३९
तदिदं मयि ते दृष्टं प्रत्यक्षं मधुसूदन ।
यथा राज्यात्परिभ्रष्टो वसामि वसतीरिमाः ॥ ४०
ते वयं न श्रियं हातुमलं न्यायेन केनचित् ।
अत्र नो यतमानानां वधश्चेदपि साधु तत् ॥ ४१
तत्र नः प्रथमः कल्पो यद्वयं ते च माधव ।
प्रशान्ताः समभूताश्च श्रियं तानश्नुवीमहि ॥ ४२
तत्रैषा परमा काष्ठा रौद्रकर्मक्षयोदया ।
यद्वयं कौरवान्हत्वा तानि राष्ट्राण्यशीमहि ॥ ४३
ये पुनः स्युरसंबद्धा अनार्याः कृष्ण शत्रवः ।
तेषामप्यवधः कार्यः किं पुनर्ये स्युरीदृशाः ॥ ४४
ज्ञातयश्च हि भूयिष्ठाः सहाया गुरवश्च नः ।
तेषां वधोऽतिपापीयान्किं नु युद्धेऽस्ति शोभनम् ॥

पापः क्षत्रियधर्मोऽयं वयं च क्षत्रबान्धवाः ।
स नः स्वधर्मोऽधर्मो वा वृत्तिरन्या विगर्हिता ॥४६
शूद्रः करोति शुश्रूषां वैश्या विपणिजीविनः ।
वयं वधेन जीवामः कपालं ब्राह्मणैर्वृतम् ॥ ४७
क्षत्रियः क्षत्रियं हन्ति मत्स्यो मत्स्येन जीवति ।
श्वा श्वानं हन्ति दाशार्ह पश्य धर्मो यथागतः ॥४८
युद्धे कृष्ण कलिर्नित्यं प्राणाः सीदन्ति संयुगे ।
बलं तु नीतिमात्राय हठे जयपराजयौ ॥ ४९
नात्मच्छन्देन भूतानां जीवितं मरणं तथा ।
नाप्यकाले सुखं प्राप्यं दुःखं वापि यदूत्तम ॥ ५०
एको ह्यपि बहून्हन्ति घ्नन्त्येकं बहवोऽप्युत ।
शूरं कापुरुषो हन्ति अयशस्वी यशस्विनम् ॥ ५१
जयश्चैवोभयोर्दृष्ट उभयोश्च पराजयः ।
तथैवापचयो दृष्टो व्यपयाने क्षयव्ययौ ॥ ५२
सर्वथा वृजिनं युद्धं को घ्नन्न प्रतिहन्यते ।
हतस्य च हृषीकेश समौ जयपराजयौ ॥ ५३
पराजयश्च मरणान्मन्ये नैव विशिष्यते ।
यस्य स्याद्विजयः कृष्ण तस्याप्यपचयो ध्रुवम् ॥५४
अन्ततो दयितं घ्नन्ति केचिदप्यपरे जनाः ।
तस्याङ्ग बलहीनस्य पुत्रान्भ्रातॄनपश्यतः ।
निर्वेदो जीविते कृष्ण सर्वतश्चोपजायते ॥ ५५
ये ह्येव वीरा ह्रीमन्त आर्याः करुणवेदिनः ।
त एव युद्धे हन्यन्ते यवीयान्मुच्यते जनः ॥ ५६
हत्वाप्यनुशयो नित्यं परानपि जनार्दन ।
अनुबन्धश्च पापोऽत्र शेषश्चाप्यवशिष्यते ॥ ५७
शेषो हि बलमासाद्य न शेषमवशेषयेत् ।
सर्वोच्छेदे च यतते वैरस्यान्तविधित्सया ॥ ५८
जयो वैरं प्रसृजति दुःखमास्ते पराजितः ।
सुखं प्रशान्तः स्वपिति हित्वा जयपराजयौ ॥ ५९
जातवैरश्च पुरुषो दुःखं स्वपिति नित्यदा ।
अनिर्वृतेन मनसा ससर्प इव वेश्मनि ॥ ६०
उत्सादयति यः सर्वं यशसा स वियुज्यते ।
अकीर्तिं सर्वभूतेषु शाश्वतीं स नियच्छति ॥ ६१
न हि वैराणि शाम्यन्ति दीर्घकालकृतान्यपि ।
आख्यातारश्च विद्यन्ते पुमांश्चोत्पद्यते कुले ॥ ६२
न चापि वैरं वैरेण केशव व्युपशाम्यति ।
हविषाग्निर्यथा कृष्ण भूय एवाभिवर्धते ॥ ६३
अतोऽन्यथा नास्ति शान्तिर्नित्यमन्तरमन्ततः ।
अन्तरं लिप्समानानामयं दोषो निरन्तरः ॥ ६४
पौरुषेयो हि बलवानाधिर्हृदयबाधनः ।
तस्य त्यागेन वा शान्तिर्निवृत्त्या मनसोऽपि वा ॥६५
अथ वा मूलघातेन द्विषतां मधुसूदन ।
फलनिर्वृत्तिरिद्धा स्यात्तन्नृशंसतरं भवेत् ॥ ६६
या तु त्यागेन शान्तिः स्यात्तदृते वध एव सः ।
संशयाच्च समुच्छेदाद्द्विषतामात्मनस्तथा ॥ ६७
न च त्यक्तुं तदिच्छामो न चेच्छामः कुलक्षयम् ।
अत्र या प्रणिपातेन शान्तिः सैव गरीयसी ॥ ६८
सर्वथा यतमानानामयुद्धमभिकाङ्क्षताम् ।
सान्त्वे प्रतिहते युद्धं प्रसिद्धमपराक्रमम् ॥ ६९
प्रतिघातेन सान्त्वस्य दारुणं संप्रवर्तते ।
तच्छुनामिव गोपादे पण्डितैरुपलक्षितम् ॥ ७०
लाङ्गूलचालनं क्ष्वेडः प्रतिरावो विवर्तनम् ।
दन्तदर्शनमारावस्ततो युद्धं प्रवर्तते ॥ ७१
तत्र यो बलवान्कृष्ण जित्वा सोऽत्ति तदामिषम् ।
एवमेष मनुष्येषु विशेषो नास्ति कश्चन ॥ ७२
सर्वथा त्वेतदुचितं दुर्बलेषु बलीयसाम् ।
अनादरो विरोधश्च प्रणिपाती हि दुर्बलः ॥ ७३
पिता राजा च वृद्धश्च सर्वथा मानमर्हति ।
तस्मान्मान्यश्च पूज्यश्च धृतराष्ट्रो जनार्दन ॥ ७४
पुत्रस्नेहस्तु बलवान्धृतराष्ट्रस्य माधव ।

स पुत्रवशमापन्नः प्रणिपातं प्रहास्यति ॥ ७५
तत्र किं मन्यसे कृष्ण प्राप्तकालमनन्तरम् ।
कथमर्थाच्च धर्माच्च न हीयेमहि माधव ॥ ७६
ईदृशे ह्यर्थकृच्छ्रेऽस्मिन्कमन्यं मधुसूदन ।
उपसंप्रष्टुमर्हामि त्वामृते पुरुषोत्तम ॥ ७७
प्रियश्च प्रियकामश्च गतिज्ञः सर्वकर्मणाम् ।
को हि कृष्णास्ति नस्त्वादृक्सर्वनिश्चयवित्सुहृत् ॥७८

वैशंपायन उवाच ।

एवमुक्तः प्रत्युवाच धर्मराजं जनार्दनः ।
उभयोरेव वामर्थे यास्यामि कुरुसंसदम् ॥ ७९
शमं तत्र लभेयं चेद्युष्मदर्थमहापयन् ।
पुण्यं मे सुमहद्राजंश्चरितं स्यान्महाफलम् ॥ ८०
मोचयेयं मृत्युपाशात्संरब्धान्कुरुसृञ्जयान् ।
पाण्डवान्धार्तराष्ट्रांश्च सर्वां च पृथिवीमिमाम् ॥८१

युधिष्ठिर उवाच ।

न ममैतन्मतं कृष्ण यत्त्वं यायाः कुरून्प्रति ।
सुयोधनः सूक्तमपि न करिष्यति ते वचः ॥ ८२
समेतं पार्थिवं क्षत्रं सुयोधनवशानुगम् ।
तेषां मध्यावतरणं तव कृष्ण न रोचये ॥ ८३
न हि नः प्रीणयेद्द्रव्यं न देवत्वं कुतः सुखम् ।
न च सर्वामरैश्वर्यं तव रोधेन माधव ॥ ८४

भगवानुवाच ।

जानाम्येतां महाराज धार्तराष्ट्रस्य पापताम् ।
अवाच्यास्तु भविष्यामः सर्वलोके महीक्षिताम् ॥८५
न चापि मम पर्याप्ताः सहिताः सर्वपार्थिवाः ।
क्रुद्धस्य प्रमुखे स्थातुं सिंहस्येवेतरे मृगाः ॥ ८६
अथ चेत्ते प्रवर्तेरन्मयि किंचिदसांप्रतम् ।
निर्दहेयं कुरून्सर्वानिति मे धीयते मतिः ॥ ८७
न जातु गमनं तत्र भवेत्पार्थ निरर्थकम् ।
अर्थप्राप्तिः कदाचित्स्यादन्ततो वाप्यवाच्यता ॥८८

युधिष्ठिर उवाच ।

यत्तुभ्यं रोचते कृष्ण स्वस्ति प्राप्नुहि कौरवान् ।
कृतार्थं स्वस्तिमन्तं त्वां द्रक्ष्यामि पुनरागतम् ॥८९
विष्वक्सेन कुरून्गत्वा भारतांश्शमयेः प्रभो ।
यथा सर्वे सुमनसः सह स्यामः सुचेतसः ॥ ९०
भ्राता चासि सखा चासि बीभत्सोर्मम च प्रियः ।
सौहृदेनाविशङ्क्योऽसि स्वस्ति प्राप्नुहि भूतये ॥९१
अस्मान्वेत्थ परान्वेत्थ वेत्थार्थं वेत्थ भाषितम् ।
यद्यदस्मद्धितं कृष्ण तत्तद्वाच्यः सुयोधनः ॥ ९२
यद्यद्धर्मेण संयुक्तमुपपद्येद्धितं वचः ।
तत्तत्केशव भाषेथाः सान्त्वं वा यदि वेतरत् ॥९३

इति श्रीमहाभारते उद्योगपर्वणि
सप्ततितमोऽध्यायः ॥ ७० ॥

७१

भगवानुवाच ।

संजयस्य श्रुतं वाक्यं भवतश्च श्रुतं मया ।
सर्वं जानाम्यभिप्रायं तेषां च भवतश्च यः ॥ १
तव धर्माश्रिता बुद्धिस्तेषां वैराश्रिता मतिः ।
यदयुद्धेन लभ्येत तत्ते बहुमतं भवेत् ॥ २
न च तन्नैष्ठिकं कर्म क्षत्रियस्य विशां पते ।
आहुराश्रमिणः सर्वे यद्भैक्षं क्षत्रियश्चरेत् ॥ ३
जयो वधो वा संग्रामे धात्रा दिष्टः सनातनः ।
स्वधर्मः क्षत्रियस्यैष कार्पण्यं न प्रशस्यते ॥ ४
न हि कार्पण्यमास्थाय शक्या वृत्तिर्युधिष्ठिर ।
विक्रमस्व महाबाहो जहि शत्रूनरिंदम ॥ ५
अतिगृद्धाः कृतस्नेहा दीर्घकालं सहोषिताः ।
कृतमित्राः कृतबला धार्तराष्ट्राः परंतप ॥ ६
न पर्यायोऽस्ति यत्साम्यं त्वयि कुर्युर्विशां पते ।
बलवत्तां हि मन्यन्ते भीष्मद्रोणकृपादिभिः ॥ ७
यावच्च मार्दवेनैतान्राजन्नुपचरिष्यसि ।

तावदेते हरिष्यन्ति तव राज्यमरिंदम ॥ ८
नानुक्रोशान्न कार्पण्यान्न च धर्मार्थकारणात् ।
अलं कर्तुं धार्तराष्ट्रास्तव काममरिंदम ॥ ९
एतदेव निमित्तं ते पाण्डवास्तु यथा त्वयि ।
नान्वतप्यन्त कौपीनं तावत्कृत्वापि दुष्करम् ॥ १०
पितामहस्य द्रोणस्य विदुरस्य च धीमतः ।
पश्यतां कुरुमुख्यानां सर्वेषामेव तत्त्वतः ॥ ११
दानशीलं मृदुं दान्तं धर्मकाममनुव्रतम् ।
यत्त्वामुपधिना राजन्द्यूतेनावञ्चयत्तदा ।
न चापत्रपते पापो नृशंसस्तेन कर्मणा ॥ १२
तथाशीलसमाचारे राजन्मा प्रणयं कृथाः ।
वध्यास्ते सर्वलोकस्य किं पुनस्तव भारत ॥ १३
वाग्भिस्त्वप्रतिरूपाभिरतुदत्सकनीयसम् ।
श्लाघमानः प्रहृष्टः सन्भाषते भ्रातृभिः सह ॥ १४
एतावत्पाण्डवानां हि नास्ति किंचिदिह स्वकम् ।
नामधेयं च गोत्रं च तदप्येषां न शिष्यते ॥ १५
कालेन महता चैषां भविष्यति पराभवः ।
प्रकृतिं ते भजिष्यन्ति नष्टप्रकृतयो जनाः ॥ १६
एताश्चान्याश्च परुषा वाचः स समुदीरयत् ।
श्लाघते ज्ञातिमध्ये स्म त्वयि प्रव्रजिते वनम् ॥१७
ये तत्रासन्समानीतास्ते दृष्ट्वा त्वामनागसम् ।
अश्रुकण्ठा रुदन्तश्च सभायामासते तदा ॥ १८
न चैनमभ्यनन्दंस्ते राजानो ब्राह्मणैः सह ।
सर्वे दुर्योधनं तत्र निन्दन्ति स्म सभासदः ॥ १९
कुलीनस्य च या निन्दा वधश्चामित्रकर्शन ।
महागुणो वधो राजन्न तु निन्दा कुजीविका ॥ २०
तदैव निहतो राजन्यदैव निरपत्रपः ।
निन्दितश्च महाराज पृथिव्यां सर्वराजसु ॥ २१
ईषत्कार्यो वधस्तस्य यस्य चारित्रमीदृशम् ।
प्रस्कम्भनप्रतिस्तब्धश्छिन्नमूल इव द्रुमः ॥२२
वध्यः सर्प इवानार्यः सर्वलोकस्य दुर्मतिः ।
जह्येनं त्वममित्रघ्न मा राजन्विचिकित्सिथाः ॥ २३
सर्वथा त्वत्क्षमं चैतद्रोचते च ममानघ ।
यत्त्वं पितरि भीष्मे च प्रणिपातं समाचरेः ॥ २४
अहं तु सर्वलोकस्य गत्वा छेत्स्यामि संशयम् ।
येषामस्ति द्विधाभावो राजन्दुर्योधनं प्रति ॥ २५
मध्ये राज्ञामहं तत्र प्रातिपौरुषिकान्गुणान् ।
तव संकीर्तयिष्यामि ये च तस्य व्यतिक्रमाः ॥२६
ब्रुवतस्तत्र मे वाक्यं धर्मार्थसहितं हितम् ।
निशम्य पार्थिवाः सर्वे नानाजनपदेश्वराः ॥ २७
त्वयि संप्रतिपत्स्यन्ते धर्मात्मा सत्यवागिति ।
तस्मिंश्चाधिगमिष्यन्ति यथा लोभादवर्तत ॥ २८
गर्हयिष्यामि चैवैनं पौरजानपदेष्वपि ।
वृद्धबालानुपादाय चातुर्वर्ण्यसमागमे ॥ २९
शमं चेद्याचमानस्त्वं न धर्मं तत्र लप्स्यसे ।
कुरून्विगर्हयिष्यन्ति धृतराष्ट्रं च पार्थिवाः ॥ ३०
तस्मिँल्लोकपरित्यक्ते किं कार्यमवशिष्यते ।
हते दुर्योधने राजन्यदन्यत्क्रियतामिति ॥ ३१
यात्वा चाहं कुरून्सर्वान्युष्मदर्थमहापयन् ।
यतिष्ये प्रशमं कर्तुं लक्षयिष्ये च चेष्टितम् ॥ ३२
कौरवाणां प्रवृत्तिं च गत्वा युद्धाधिकारिकाम् ।
निशाम्य विनिवर्तिष्ये जयाय तव भारत ॥ ३३
सर्वथा युद्धमेवाहमाशंसामि परैः सह ।
निमित्तानि हि सर्वाणि तथा प्रादुर्भवन्ति मे ॥३४

मृगाः शकुन्ताश्च वदन्ति घोरं
हस्त्यश्वमुख्येषु निशामुखेषु ।
घोराणि रूपाणि तथैव चाग्नि-
र्वर्णान्बहून्पुष्यति घोररूपान् ।
मनुष्यलोकक्षपणोऽथ घोरो
नो चेदनुप्राप्त इहान्तकः स्यात् ॥ ३५

शस्त्राणि पत्रं कवचान्रथांश्च
नागान्ध्वजांश्च प्रतिपादयित्वा ।
योधाश्च सर्वे कृतनिश्रमास्ते
भवन्तु हस्त्यश्वरथेषु यत्ताः ।
सांग्रामिकं ते यदुपार्जनीयं
सर्वं समग्रं कुरु तन्नरेन्द्र ॥ ३६
दुर्योधनो न ह्यलमद्य दातुं
जीवंस्तवैतन्नृपते कथंचित् ।
यत्ते पुरस्तादभवत्समृद्धं
द्यूते हृतं पाण्डवमुख्य राज्यम् ॥ ३७

इति श्रीमहाभारते उद्योगपर्वणि
एकसप्ततितमोऽध्यायः ॥ ७१ ॥

७२

भीमसेन उवाच ।

यथा यथैव शान्तिः स्यात्कुरूणां मधुसूदन ।
तथा तथैव भाषेथा मा स्म युद्धेन भीषयेः ॥ १
अमर्षी नित्यसंरब्धः श्रेयोद्वेषी महामनाः ।
नोग्रं दुर्योधनो वाच्यः साम्नैवैनं समाचरेः ॥ २
प्रकृत्या पापसत्त्वश्च तुल्यचेताश्च दस्युभिः ।
ऐश्वर्यमदमत्तश्च कृतवैरश्च पाण्डवैः ॥ ३
अदीर्घदर्शी निष्ठूरी क्षेप्ता क्रूरपराक्रमः ।
दीर्घमन्युरनेयश्च पापात्मा निकृतिप्रियः ॥ ४
म्रियेतापि न भज्येत नैव जह्यात्स्वकं मतम् ।
तादृशेन शमं कृष्ण मन्ये परमदुष्करम् ॥ ५
सुहृदामप्यवाचीनस्त्यक्तधर्मः प्रियानृतः ।
प्रतिहन्त्येव सुहृदां वाचश्चैव मनांसि च ॥ ६
स मन्युवशमापन्नः स्वभावं दुष्टमास्थितः ।
स्वभावात्पापमन्वेति तृणैस्तुन्न इवोरगः ॥ ७
दुर्योधनो हि यत्सेनः सर्वथा विदितस्तव ।
यच्छीलो यत्स्वभावश्च यद्बलो यत्पराक्रमः ॥ ८
पुरा प्रसन्नाः कुरवः सहपुत्रास्तथा वयम् ।
इन्द्रज्येष्ठा इवाभूम मोदमानाः सबान्धवाः ॥ ९
दुर्योधनस्य क्रोधेन भारता मधुसूदन ।
धक्ष्यन्ते शिशिरापाये वनानीव हुताशनैः ॥ १०
अष्टादशेमे राजानः प्रख्याता मधुसूदन ।
ये समुच्चिच्छिदुर्ज्ञातीन्सुहृदश्च सबान्धवान् ॥ ११
असुराणां समृद्धानां ज्वलतामिव तेजसा ।
पर्यायकाले धर्मस्य प्राप्ते बलिरजायत ॥ १२
हैहयानामुदावर्तो नीपानां जनमेजयः ।
बहुलस्तालजङ्घानां कृमीणामुद्धतो वसुः ॥ १३
अजबिन्दुः सुवीराणां सुराष्ट्राणां कुशर्द्धिकः ।
अर्कजश्च बलीहानां चीनानां धौतमूलकः ॥ १४
हयग्रीवो विदेहानां वरप्रश्च महौजसाम् ।
बाहुः सुन्दरवेगानां दीप्ताक्षाणां पुरूरवाः ॥ १५
सहजश्चेदिमत्स्यानां प्रचेतानां बृहद्बलः ।
धारणश्चेन्द्रवत्सानां मुकुटानां विगाहनः ॥ १६
शमश्च नन्दिवेगानामित्येते कुलपांसनाः ।
युगान्ते कृष्ण संभूताः कुलेषु पुरुषाधमाः ॥ १७
अप्ययं नः कुरूणां स्याद्युगान्ते कालसंभृतः ।
दुर्योधनः कुलाङ्गारो जघन्यः पापपूरुषः ॥ १८
तस्मान्मृदु शनैरेनं ब्रूया धर्मार्थसंहितम् ।
कामानुबन्धबहुलं नोग्रमुग्रपराक्रमम् ॥ १९
अपि दुर्योधनं कृष्ण सर्वे वयमधश्चराः ।
नीचैर्भूत्वानुयास्यामो मा स्म नो भरता नशन् ॥ २०
अप्युदासीनवृत्तिः स्याद्यथा नः कुरुभिः सह ।
वासुदेव तथा कार्यं न कुरूननयः स्पृशेत् ॥ २१
वाच्यः पितामहो वृद्धो ये च कृष्ण सभासदः ।
भ्रातॄणामस्तु सौभ्रात्रं धार्तराष्ट्रः प्रशाम्यताम् ॥ २२
अहमेतद्ब्रवीम्येवं राजा चैव प्रशंसति ।

अर्जुनो नैव युद्धार्थी भूयसी हि दयार्जुने ॥ २३

इति श्रीमहाभारते उद्योगपर्वणि
द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

७३

वैशंपायन उवाच ।

एतच्छ्रुत्वा महाबाहुः केशवः प्रहसन्निव ।
अभूतपूर्वं भीमस्य मार्दवोपगतं वचः ॥ १
गिरेरिव लघुत्वं तच्छीतत्वमिव पावके ।
मत्वा रामानुजः शौरिः शार्ङ्गधन्वा वृकोदरम् ॥ २
संतेजयंस्तदा वाग्भिर्मातरिश्वेव पावकम् ।
उवाच भीममासीनं कृपयाभिपरिप्लुतम् ॥ ३
त्वमन्यदा भीमसेन युद्धमेव प्रशंससि ।
वधाभिनन्दिनः क्रूरान्धार्तराष्ट्रान्मिमर्दिषुः ॥ ४
न च स्वपिषि जागर्षि न्युब्जः शेषे परंतप ।
घोरामशान्तां रुशतीं सदा वाचं प्रभाषसे ॥ ५
निःश्वसन्नग्निवर्णेन संतप्तः स्वेन मन्युना ।
अप्रशान्तमना भीम सधूम इव पावकः ॥ ६
एकान्ते निष्टनञ्शेषे भारार्त इव दुर्बलः ।
अपि त्वां केचिदुन्मत्तं मन्यन्तेऽतद्विदो जनाः ॥७
आरुज्य वृक्षान्निर्मूलान्गजः परिभुजन्निव ।
निघ्नन्पद्भिः क्षितिं भीम निष्टनन्परिधावसि ॥ ८
नास्मिञ्जनेऽभिरमसे रहः क्षियसि पाण्डव ।
नान्यं निशि दिवा वापि कदाचिदभिनन्दसि ॥ ९
अकस्मात्स्मयमानश्च रहस्यास्से रुदन्निव ।
जान्वोर्मूर्धानमाधाय चिरमास्से प्रमीलितः ॥ १०
भ्रुकुटिं च पुनः कुर्वन्नोष्ठौ च विलिहन्निव ।
अभीक्ष्णं दृश्यसे भीम सर्वं तन्मन्युकारितम् ॥११
यथा पुरस्तात्सविता दृश्यते शुक्रमुच्चरन् ।
यथा च पश्चान्निर्मुक्तो ध्रुवं पर्येति रश्मिवान् ॥१२
तथा सत्यं ब्रवीम्येतन्नास्ति तस्य व्यतिक्रमः ।
हन्ताहं गदयाभ्येत्य दुर्योधनममर्षणम् ॥ १३
इति स्म मध्ये भ्रातॄणां सत्येनालभसे गदाम् ।
तस्य ते प्रशमे बुद्धिर्धीयतेऽद्य परंतप ॥ १४
अहो युद्धप्रतीपानि युद्धकाल उपस्थिते ।
पश्यसीवाप्रतीपानि किं त्वां भीर्भीम विन्दति ॥१५
अहो पार्थ निमित्तानि विपरीतानि पश्यसि ।
स्वप्नान्ते जागरान्ते च तस्मात्प्रशममिच्छसि ॥ १६
अहो नाशंससे किंचित्पुंस्त्वं क्लीब इवात्मनि ।
कश्मलेनाभिपन्नोऽसि तेन ते विकृतं मनः ॥ १७
उद्वेपते ते हृदयं मनस्ते प्रविषीदति ।
ऊरुस्तम्भगृहीतोऽसि तस्मात्प्रशममिच्छसि ॥ १८
अनित्यं किल मर्त्यस्य चित्तं पार्थ चलाचलम् ।
वातवेगप्रचलिता अष्ठीला शाल्मलेरिव ॥ १९
तवैषा विकृता बुद्धिर्गवां वागिव मानुषी ।
मनांसि पाण्डुपुत्राणां मज्जयत्यप्लवानिव ॥ २०
इदं मे महदाश्चर्यं पर्वतस्येव सर्पणम् ।
यदीदृशं प्रभाषेथा भीमसेनासमं वचः ॥ २१
स दृष्ट्वा स्वानि कर्माणि कुले जन्म च भारत ।
उत्तिष्ठस्व विषादं मा कृथा वीर स्थिरो भव ॥ २२
न चैतदनुरूपं ते यत्ते ग्लानिररिंदम ।
यदोजसा न लभते क्षत्रियो न तदश्नुते ॥ २३

इति श्रीमहाभारते उद्योगपर्वणि
त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

७४

वैशंपायन उवाच ।

तथोक्तो वासुदेवेन नित्यमन्युरमर्षणः ।
सदश्ववत्समाधावद्बभाषे तदनन्तरम् ॥ १
अन्यथा मां चिकीर्षन्तमन्यथा मन्यसेऽच्युत ।
प्रणीतभावमत्यन्तं युधि सत्यपराक्रमम् ॥ २
वेत्थ दाशार्ह सत्त्वं मे दीर्घकालं सहोषितः ।

उत वा मां न जानासि प्लवन्ह्रद इवाप्लवः ।
तस्मादप्रतिरूपाभिर्वाग्भिर्मां त्वं समर्छसि ॥ ३
कथं हि भीमसेनं मां जानन्कश्चन माधव ।
ब्रूयादप्रतिरूपाणि यथा मां वक्तुमर्हसि ॥ ४
तस्मादिदं प्रवक्ष्यामि वचनं वृष्णिनन्दन ।
आत्मनः पौरुषं चैव बलं च न समं परैः ॥ ५
सर्वथा नार्यकर्मैतत्प्रशंसा स्वयमात्मनः ।
अतिवादापविद्धस्तु वक्ष्यामि बलमात्मनः ॥ ६
पश्येमे रोदसी कृष्ण ययोरासन्निमाः प्रजाः ।
अचले चाप्यनन्ते च प्रतिष्ठे सर्वमातरौ ॥ ७
यदीमे सहसा क्रुद्धे समेयातां शिले इव ।
अहमेते निगृह्णीयां बाहुभ्यां सचराचरे ॥ ८
पश्यैतदन्तरं बाह्वोर्महापरिघयोरिव ।
य एतत्प्राप्य मुच्येत न तं पश्यामि पूरुषम् ॥ ९
हिमवांश्च समुद्रश्च वज्री च बलभित्स्वयम् ।
मयाभिपन्नं त्रायेरन्बलमास्थाय न त्रयः ॥ १०
युध्येयं क्षत्रियान्सर्वान्पाण्डवेष्वाततायिनः ।
अधः पादतलेनैतानधिष्ठास्यामि भूतले ॥ ११
न हि त्वं नाभिजानासि मम विक्रममच्युत ।
यथा मया विनिर्जित्य राजानो वशगाः कृताः ॥ १२
अथ चेन्मां न जानासि सूर्यस्येवोद्यतः प्रभाम् ।
विगाढे युधि संबाधे वेत्स्यसे मां जनार्दन ॥ १३
किं मात्यवाक्षीः परुषैर्व्रणं सूच्या इवानघ ।
यथामति ब्रवीम्येतद्विद्धि मामधिकं ततः ॥ १४
द्रष्टासि युधि संबाधे प्रवृत्ते वैशसेऽहनि ।
मया प्रणुन्नान्मातङ्गान्रथिनः सादिनस्तथा ॥ १५
तथा नरानभिक्रुद्धं निघ्नन्तं क्षत्रियर्षभान् ।
द्रष्टा मां त्वं च लोकश्च विकर्षन्तं वरान्वरान् ॥ १६
न मे सीदन्ति मज्जानो न ममोद्वेपते मनः ।
सर्वलोकादभिक्रुद्धान्न भयं विद्यते मम ॥ १७
किं तु सौहृदमेवैतत्कृपया मधुसूदन ।
सर्वांस्तितिक्षे संक्लेशान्मा स्म नो भरता नशन् ॥ १८

इति श्रीमहाभारते उद्योगपर्वणि
चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

७५

भगवानुवाच ।

भावं जिज्ञासमानोऽहं प्रणयादिदमब्रुवम् ।
न चाक्षेपान्न पाण्डित्यान्न क्रोधान्न विवक्षया ॥ १
वेदाहं तव माहात्म्यमुत ते वेद यद्बलम् ।
उत ते वेद कर्माणि न त्वां परिभवाम्यहम् ॥ २
यथा चात्मनि कल्याणं संभावयसि पाण्डव ।
सहस्रगुणमप्येतत्त्वयि संभावयाम्यहम् ॥ ३
यादृशे च कुले जन्म सर्वराजाभिपूजिते ।
बन्धुभिश्च सुहृद्भिश्च भीम त्वमसि तादृशः ॥ ४
जिज्ञासन्तो हि धर्मस्य संदिग्धस्य वृकोदर ।
पर्यायं न व्यवस्यन्ति दैवमानुषयोर्जनाः ॥ ५
स एव हेतुर्भूत्वा हि पुरुषस्यार्थसिद्धिषु ।
विनाशेऽपि स एवास्य संदिग्धं कर्म पौरुषम् ॥ ६
अन्यथा परिदृष्टानि कविभिर्दोषदर्शिभिः ।
अन्यथा परिवर्तन्ते वेगा इव नभस्वतः ॥ ७
सुमन्त्रितं सुनीतं च न्यायतश्चोपपादितम् ।
कृतं मानुष्यकं कर्म दैवेनापि विरुध्यते ॥ ८
दैवमप्यकृतं कर्म पौरुषेण विहन्यते ।
शीतमुष्णं तथा वर्षं क्षुत्पिपासे च भारत ॥ ९
यदन्यद्दिष्टभावस्य पुरुषस्य स्वयंकृतम् ।
तस्मादनवरोधश्च विद्यते तत्र लक्षणम् ॥ १०
लोकस्य नान्यतो वृत्तिः पाण्डवान्यत्र कर्मणः ।
एवंबुद्धिः प्रवर्तेत फलं स्यादुभयान्वयात् ॥ ११
य एवं कृतबुद्धिः सन्कर्मस्वेव प्रवर्तते ।
नासिद्धौ व्यथते तस्य न सिद्धौ हर्षमश्नुते ॥ १२

तत्रेयमर्थमात्रा मे भीमसेन विवक्षिता ।
नैकान्तसिद्धिर्मन्तव्या कुरुभिः सह संयुगे ॥ १३
नातिप्रणीतरश्मिः स्यात्तथा भवति पर्यये ।
विषादमर्छेद् ग्लानिं वा एतदर्थं ब्रवीमि ते ॥ १४
श्वोभूते धृतराष्ट्रस्य समीपं प्राप्य पाण्डव ।
यतिष्ये प्रशमं कर्तुं युष्मदर्थमहापयन् ॥ १५
शमं चेत्ते करिष्यन्ति ततोऽनन्तं यशो मम ।
भवतां च कृतः कामस्तेषां च श्रेय उत्तमम् ॥ १६
ते चेदभिनिवेक्ष्यन्ति नाभ्युपैष्यन्ति मे वचः ।
कुरवो युद्धमेवात्र रौद्रं कर्म भविष्यति ॥ १७
अस्मिन्युद्धे भीमसेन त्वयि भारः समाहितः ।
धूर्जुनेन धार्या स्याद्वोढव्य इतरो जनः ॥ १८
अहं हि यन्ता बीभत्सोर्भविता संयुगे सति ।
धनंजयस्यैष कामो न हि युद्धं न कामये ॥ १९
तस्मादाशङ्कमानोऽहं वृकोदर मतिं तव ।
तुदन्नक्लीबया वाचा तेजस्ते समदीपयम् ॥ २०

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

७६

अर्जुन उवाच ।

उक्तं युधिष्ठिरेणैव यावद्वाच्यं जनार्दन ।
तव वाक्यं तु मे श्रुत्वा प्रतिभाति परंतप ॥ १
नैव प्रशममत्र त्वं मन्यसे सुकरं प्रभो ।
लोभाद्वा धृतराष्ट्रस्य दैन्याद्वा समुपस्थितात् ॥ २
अफलं मन्यसे चापि पुरुषस्य पराक्रमम् ।
न चान्तरेण कर्माणि पौरुषेण फलोदयः ॥ ३
यदिदं भाषितं वाक्यं तथा च न तथैव च ।
न चैतदेवं द्रष्टव्यमसाध्यमिति किंचन ॥ ४
किं चैतन्मन्यसे कृच्छ्रमस्माकं पापमादितः ।
कुर्वन्ति तेषां कर्माणि येषां नास्ति फलोदयः ॥ ५
संपाद्यमानं सम्यक्च स्यात्कर्म सफलं प्रभो ।
स तथा कृष्ण वर्तस्व यथा शर्म भवेत्परैः ॥ ६
पाण्डवानां कुरूणां च भवान्परमकः सुहृत् ।
सुराणामसुराणां च यथा वीर प्रजापतिः ॥ ७
कुरूणां पाण्डवानां च प्रतिपत्स्व निरामयम् ।
अस्मद्धितमनुष्ठातुं न मन्ये तव दुष्करम् ॥ ८
एवं चेत्कार्यतामेति कार्यं तव जनार्दन ।
गमनादेवमेव त्वं करिष्यसि न संशयः ॥ ९
चिकीर्षितमथान्यत्ते तस्मिन्वीर दुरात्मनि ।
भविष्यति तथा सर्वं यथा तव चिकीर्षितम् ॥१०
शर्म तैः सह वा नोऽस्तु तव वा यच्चिकीर्षितम् ।
विचार्यमाणो यः कामस्तव कृष्ण स नो गुरुः ॥११
न स नार्हति दुष्टात्मा वधं ससुतबान्धवः ।
येन धर्मसुते दृष्ट्वा न सा श्रीरुपमर्षिता ॥ १२
यच्चाप्यपश्यतोपायं धर्मिष्ठं मधुसूदन ।
उपायेन नृशंसेन हृता दुर्द्यूतदेविना ॥ १३
कथं हि पुरुषो जातः क्षत्रियेषु धनुर्धरः ।
समाहूतो निवर्तेत प्राणत्यागेऽप्युपस्थिते ॥ १४
अधर्मेण जितान्दृष्ट्वा वने प्रव्रजितांस्तथा ।
वध्यतां मम वार्ष्णेय निर्गतोऽसौ सुयोधनः ॥ १५
न चैतदद्भुतं कृष्ण मित्रार्थे यच्चिकीर्षसि ।
क्रिया कथं नु मुख्या स्यान्मृदुना वेतरेण वा ॥१६
अथ वा मन्यसे ज्यायान्वधस्तेषामनन्तरम् ।
तदेव क्रियतामाशु न विचार्यमतस्त्वया ॥ १७
जानासि हि यथा तेन द्रौपदी पापबुद्धिना ।
परिक्लिष्टा सभामध्ये तच्च तस्यापि मर्षितम् ॥ १८
स नाम सम्यग्वर्तेत पाण्डवेष्विति माधव ।
न मे संजायते बुद्धिर्बीजमुप्तमिवोषरे ॥ १९
तस्माद्यन्मन्यसे युक्तं पाण्डवानां च यद्धितम् ।

तदाशु कुरु वार्ष्णेय यन्नः कार्यमनन्तरम् ॥ २०

इति श्रीमहाभारते उद्योगपर्वणि
षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

७७

भगवानुवाच ।

एवमेतन्महाबाहो यथा वदसि पाण्डव ।
सर्वं त्विदं समायत्तं बीभत्सो कर्मणोर्द्वयोः ॥ १
क्षेत्रं हि रसवच्छुद्धं कर्षकेणोपपादितम् ।
ऋते वर्षं न कौन्तेय जातु निर्वर्तयेत्फलम् ॥ २
तत्र वै पौरुषं ब्रूयुरासेकं यत्नकारितम् ।
तत्र चापि ध्रुवं पश्येच्छोषणं दैवकारितम् ॥ ३
तदिदं निश्चितं बुद्ध्या पूर्वैरपि महात्मभिः ।
दैवे च मानुषे चैव संयुक्तं लोककारणम् ॥ ४
अहं हि तत्करिष्यामि परं पुरुषकारतः ।
दैवं तु न मया शक्यं कर्म कर्तुं कथंचन ॥ ५
स हि धर्मं च सत्यं च त्यक्त्वा चरति दुर्मतिः ।
न हि संतप्यते तेन तथारूपेण कर्मणा ॥ ६
तां चापि बुद्धिं पापिष्ठां वर्धयन्त्यस्य मन्त्रिणः ।
शकुनिः सूतपुत्रश्च भ्राता दुःशासनस्तथा ॥ ७
स हि त्यागेन राज्यस्य न शमं समुपेष्यति ।
अन्तरेण वधात्पार्थ सानुबन्धः सुयोधनः ॥ ८
न चापि प्रणिपातेन त्यक्तुमिच्छति धर्मराट् ।
याच्यमानस्तु राज्यं स न प्रदास्यति दुर्मतिः ॥ ९
न तु मन्ये स तद्वाच्यो यद्युधिष्ठिरशासनम् ।
उक्तं प्रयोजनं तत्र धर्मराजेन भारत ॥ १०
तथा पापस्तु तत्सर्वं न करिष्यति कौरवः ।
तस्मिंश्चाक्रियमाणेऽसौ लोकवध्यो भविष्यति ॥ ११
मम चापि स वध्यो वै जगतश्चापि भारत ।
येन कौमारके यूयं सर्वे विप्रकृतास्तथा ॥ १२
विप्रलुप्तं च वो राज्यं नृशंसेन दुरात्मना ।
न चोपशाम्यते पापः श्रियं दृष्ट्वा युधिष्ठिरे ॥ १३
असकृच्चाप्यहं तेन त्वत्कृते पार्थ भेदितः ।
न मया तद्गृहीतं च पापं तस्य चिकीर्षितम् ॥ १४
जानासि हि महाबाहो त्वमप्यस्य परं मतम् ।
प्रियं चिकीर्षमाणं च धर्मराजस्य मामपि ॥ १५
स जानंस्तस्य चात्मानं मम चैव परं मतम् ।
अजानन्निव चाकस्मादर्जुनाद्याभिशङ्कसे ॥ १६
यच्चापि परमं दिव्यं तच्चाप्यवगतं त्वया ।
विधानविहितं पार्थ कथं शर्म भवेत्परैः ॥ १७
यत्तु वाचा मया शक्यं कर्मणा चापि पाण्डव ।
करिष्ये तदहं पार्थ न त्वाशंसे शमं परैः ॥ १८
कथं गोहरणे ब्रूयादिच्छञ्शर्म तथाविधम् ।
याच्यमानोऽपि भीष्मेण संवत्सरगतेऽध्वनि ॥ १९
तदैव ते पराभूता यदा संकल्पितास्त्वया ।
लवशः क्षणशश्चापि न च तुष्टः सुयोधनः ॥ २०
सर्वथा तु मया कार्यं धर्मराजस्य शासनम् ।
विभाव्यं तस्य भूयश्च कर्म पापं दुरात्मनः ॥ २१

इति श्रीमहाभारते उद्योगपर्वणि
सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

७८

नकुल उवाच ।

उक्तं बहुविधं वाक्यं धर्मराजेन माधव ।
धर्मज्ञेन वदान्येन धर्मयुक्तं च तत्त्वतः ॥ १
मतमाज्ञाय राज्ञश्च भीमसेनेन माधव ।
संशमो बाहुवीर्यं च ख्यापितं माधवात्मनः ॥ २
तथैव फल्गुनेनापि यदुक्तं तत्त्वया श्रुतम् ।
आत्मनश्च मतं वीर कथितं भवतासकृत् ॥ ३
सर्वमेतदतिक्रम्य श्रुत्वा परमतं भवान् ।
यत्प्राप्तकालं मन्येथास्तत्कुर्याः पुरुषोत्तम ॥ ४
तस्मिंस्तस्मिन्निमित्ते हि मतं भवति केशव ।

प्राप्तकालं मनुष्येण स्वयं कार्यमरिंदम ॥ ५
अन्यथा चिन्तितो ह्यर्थः पुनर्भवति सोऽन्यथा ।
अनित्यमतयो लोके नराः पुरुषसत्तम ॥ ६
अन्यथा बुद्धयो ह्यासन्नस्मासु वनवासिषु ।
अदृश्येष्वन्यथा कृष्ण दृश्येषु पुनरन्यथा ॥ ७
अस्माकमपि वार्ष्णेय वने विचरतां तदा ।
न तथा प्रणयो राज्ये यथा संप्रति वर्तते ॥ ८
निवृत्तवनवासान्नः श्रुत्वा वीर समागताः ।
अक्षौहिण्यो हि सप्तेमास्त्वत्प्रसादाज्जनार्दन ॥ ९
इमान्हि पुरुषव्याघ्रानचिन्त्यबलपौरुषान् ।
आत्तशस्त्रान्रणे दृष्ट्वा न व्यथेदिह कः पुमान् ॥१०
स भवान्कुरुमध्ये तं सान्त्वपूर्वं भयान्वितम् ।
ब्रूयाद्वाक्यं यथा मन्दो न व्यथेत सुयोधनः ॥ ११
युधिष्ठिरं भीमसेनं बीभत्सुं चापराजितम् ।
सहदेवं च मां चैव त्वां च रामं च केशव ॥ १२
सात्यकिं च महावीर्यं विराटं च सहात्मजम् ।
द्रुपदं च सहामात्यं धृष्टद्युम्नं च पार्षतम् ॥ १३
काशिराजं च विक्रान्तं धृष्टकेतुं च चेदिपम् ।
मांसशोणितभृन्मर्त्यः प्रतियुध्येत को युधि ॥ १४
स भवान्गमनादेव साधयिष्यत्यसंशयम् ।
इष्टमर्थं महाबाहो धर्मराजस्य केवलम् ॥ १५
विदुरश्चैव भीष्मश्च द्रोणश्च सहबाह्लिकः ।
श्रेयः समर्था विज्ञातुमुच्यमानं त्वयानघ ॥ १६
ते चैनमनुनेष्यन्ति धृतराष्ट्रं जनाधिपम् ।
तं च *पापसमाचारं सहामात्यं सुयोधनम्* ॥ १७
श्रोता चार्थस्य विदुरस्त्वं च वक्ता जनार्दन ।
कमिवार्थं विवर्तन्तं स्थापयेतां न वर्त्मनि ॥ १८

इति श्रीमहाभारते उद्योगपर्वणि
अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

७९

सहदेव उवाच ।

यदेतत्कथितं राज्ञा धर्म एष सनातनः ।
यथा तु युद्धमेव स्यात्तथा कार्यमरिंदम ॥ १
यदि प्रशममिच्छेयुः कुरवः पाण्डवैः सह ।
तथापि युद्धं दाशार्ह योजयेथाः सहैव तैः ॥ २
कथं नु दृष्ट्वा पाञ्चालीं तथा क्लिष्टां सभागताम् ।
अवधेन प्रशाम्येत मम मन्युः सुयोधने ॥ ३
यदि भीमार्जुनौ कृष्ण धर्मराजश्च धार्मिकः ।
धर्ममुत्सृज्य तेनाहं योद्धुमिच्छामि संयुगे ॥ ४

सात्यकिरुवाच ।

सत्यमाह महाबाहो सहदेवो महामतिः ।
दुर्योधनवधे शान्तिस्तस्य कोपस्य मे भवेत् ॥ ५
जानासि हि यथा दृष्ट्वा चीराजिनधरान्वने ।
तवापि मन्युरुद्भूतो दुःखितान्प्रेक्ष्य पाण्डवान् ॥ ६
तस्मान्माद्रीसुतः शूरो यदाह पुरुषर्षभः ।
वचनं सर्वयोधानां तन्मतं पुरुषोत्तम ॥ ७

वैशंपायन उवाच ।

एवं वदति वाक्यं तु युयुधाने महामतौ ।
सुभीमः सिंहनादोऽभूद्योधानां तत्र सर्वशः ॥ ८
सर्वे हि सर्वतो वीरास्तद्वचः प्रत्यपूजयन् ॥ ।
साधु साध्विति शैनेयं हर्षयन्तो युयुत्सवः ॥ ९

इति श्रीमहाभारते उद्योगपर्वणि
एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

८०

वैशंपायन उवाच ।

राज्ञस्तु वचनं श्रुत्वा धर्मार्थसहितं हितम् ।
कृष्णा दाशार्हमासीनमब्रवीच्छोककर्शिता ॥ १
सुता द्रुपदराजस्य स्वसितायतमूर्धजा ।
संपूज्य सहदेवं च सात्यकिं च महारथम् ॥ २

भीमसेनं च संशान्तं दृष्ट्वा परमदुर्मनाः ।
अश्रुपूर्णेक्षणा वाक्यमुवाचेदं मनस्विनी ॥ ३
विदितं ते महाबाहो धर्मज्ञ मधुसूदन ।
यथा निकृतिमास्थाय भ्रंशिताः पाण्डवाः सुखात् ॥ ४
धृतराष्ट्रस्य पुत्रेण सामात्येन जनार्दन ।
यथा च संजयो राज्ञा मन्त्रं रहसि श्रावितः ॥ ५
युधिष्ठिरेण दाशार्ह तच्चापि विदितं तव ।
यथोक्तः संजयश्चैव तच्च सर्वं श्रुतं त्वया ॥ ६
पञ्च नस्तात दीयन्तां ग्रामा इति महाद्युते ।
कुशस्थलं वृकस्थलमासन्दी वारणावतम् ॥ ७
अवसानं महाबाहो किंचिदेव तु पञ्चमम् ।
इति दुर्योधनो वाच्यः सुहृदश्चास्य केशव ॥ ८
तच्चापि नाकरोद्वाक्यं श्रुत्वा कृष्ण सुयोधनः ।
युधिष्ठिरस्य दाशार्ह ह्रीमतः संधिमिच्छतः ॥ ९
अप्रदानेन राज्यस्य यदि कृष्ण सुयोधनः ।
संधिमिच्छेन्न कर्तव्यस्तत्र गत्वा कथंचन ॥ १०
शक्ष्यन्ति हि महाबाहो पाण्डवाः सृञ्जयैः सह ।
धार्तराष्ट्रबलं घोरं क्रुद्धं प्रतिसमासितुम् ॥ ११
न हि साम्ना न दानेन शक्योऽर्थस्तेषु कश्चन ।
तस्मात्तेषु न कर्तव्या कृपा ते मधुसूदन ॥ १२
साम्ना दानेन वा कृष्ण ये न शाम्यन्ति शत्रवः ।
मोक्तव्यस्तेषु दण्डः स्याज्जीवितं परिरक्षता ॥ १३
तस्मात्तेषु महादण्डः क्षेप्तव्यः क्षिप्रमच्युत ।
त्वया चैव महाबाहो पाण्डवैः सह सृञ्जयैः ॥ १४
एतत्समर्थं पार्थानां तव चैव यशस्करम् ।
क्रियमाणं भवेत्कृष्ण क्षत्रस्य च सुखावहम् ॥ १५
क्षत्रियेण हि हन्तव्यः क्षत्रियो लोभमास्थितः ।
अक्षत्रियो वा दाशार्ह स्वधर्ममनुतिष्ठता ॥ १६
अन्यत्र ब्राह्मणात्तात सर्वपापेष्ववस्थितात् ।
गुरुर्हि सर्ववर्णानां ब्राह्मणः प्रसृताग्रभुक् ॥ १७
यथावध्ये भवेद्दोषो वध्यमाने जनार्दन ।
स वध्यस्यावधे दृष्ट इति धर्मविदो विदुः ॥ १८
यथा त्वां न स्पृशेदेष दोषः कृष्ण तथा कुरु ।
पाण्डवैः सह दाशार्ह सृञ्जयैश्च ससैनिकैः ॥ १९
पुनरुक्तं च वक्ष्यामि विश्रम्भेण जनार्दन ।
का नु सीमन्तिनी मादृक्पृथिव्यामस्ति केशव ॥ २०
सुता द्रुपदराजस्य वेदिमध्यात्समुत्थिता ।
धृष्टद्युम्नस्य भगिनी तव कृष्ण प्रिया सखी ॥ २१
आजमीढकुलं प्राप्ता स्नुषा पाण्डोर्महात्मनः ।
महिषी पाण्डुपुत्राणां पञ्चेन्द्रसमवर्चसाम् ॥ २२
सुता मे पञ्चभिर्वीरैः पञ्च जाता महारथाः ।
अभिमन्युर्यथा कृष्ण तथा ते तव धर्मतः ॥ २३
साहं केशग्रहं प्राप्ता परिक्लिष्टा सभां गता ।
पश्यतां पाण्डुपुत्राणां त्वयि जीवति केशव ॥ २४
जीवत्सु कौरवेयेषु पाञ्चालेष्वथ वृष्णिषु ।
दासीभूतास्मि पापानां सभामध्ये व्यवस्थिता ॥ २५
निरामर्षेष्वचेष्टेषु प्रेक्षमाणेषु पाण्डुषु ।
त्राहि मामिति गोविन्द मनसा काङ्क्षितोऽसि मे ॥ २६
यत्र मां भगवान्राजा श्वशुरो वाक्यमब्रवीत् ।
वरं वृणीष्व पाञ्चालि वरार्हासि मतासि मे ॥ २७
अदासाः पाण्डवाः सन्तु सरथाः सायुधा इति ।
मयोक्ते यत्र निर्मुक्ता वनवासाय केशव ॥ २८
एवंविधानां दुःखानामभिज्ञोऽसि जनार्दन ।
त्राहि मां पुण्डरीकाक्ष सभर्तृज्ञातिबान्धवाम् ॥ २९
नन्वहं कृष्ण भीष्मस्य धृतराष्ट्रस्य चोभयोः ।
स्नुषा भवामि धर्मेण साहं दासीकृताभवम् ॥ ३०
धिग्बलं भीमसेनस्य धिक्पार्थस्य धनुष्मताम् ।
यत्र दुर्योधनः कृष्ण मुहूर्तमपि जीवति ॥ ३१
यदि तेऽहमनुग्राह्या यदि तेऽस्ति कृपा मयि ।
धार्तराष्ट्रेषु वै कोपः सर्वः कृष्ण विधीयताम् ॥ ३२

इत्युक्त्वा मृदुसंहारं वृजिनाग्रं सुदर्शनम् ।
सुनीलमसितापाङ्गी पुण्यगन्धाधिवासितम् । ३३
सर्वलक्षणसंपन्नं महाभुजगवर्चसम् ।
केशपक्षं वरारोहा गृह्य सव्येन पाणिना ॥ ३४
पद्माक्षी पुण्डरीकाक्षमुपेत्य गजगामिनी ।
अश्रुपूर्णेक्षणा कृष्णा कृष्णं वचनमब्रवीत् ॥ ३५
अयं ते पुण्डरीकाक्ष दुःशासनकरोद्धृतः ।
स्मर्तव्यः सर्वकालेषु परेषां संधिमिच्छता ॥ ३६
यदि भीमार्जुनौ कृष्ण कृपणौ संधिकामुकौ ।
पिता मे योत्स्यते वृद्धः सह पुत्रैर्महारथैः ॥ ३७
पञ्च चैव महावीर्याः पुत्रा मे मधुसूदन ।
अभिमन्युं पुरस्कृत्य योत्स्यन्ति कुरुभिः सह ॥ ३८
दुःशासनभुजं श्यामं संछिन्नं पांसुगुण्ठितम् ।
यद्यहं तं न पश्यामि का शान्तिर्हृदयस्य मे ॥३९
त्रयोदश हि वर्षाणि प्रतीक्षन्त्या गतानि मे ।
निधाय हृदये मन्युं प्रदीप्तमिव पावकम् ॥ ४०
विदीर्यते मे हृदयं भीमवाक्शल्यपीडितम् ।
योऽयमद्य महाबाहुर्धर्मं समनुपश्यति ॥ ४१
इत्युक्त्वा बाष्पसन्नेन कण्ठेनायतलोचना ।
रुरोद कृष्णा सोत्कम्पं सस्वरं बाष्पगद्गदम् ॥ ४२
स्तनौ पीनायतश्रोणी सहितावभिवर्षती ।
द्रवीभूतमिवात्युष्णमुत्सृजद्वारि नेत्रजम् ॥ ४३
तामुवाच महाबाहुः केशवः परिसान्त्वयन् ।
अचिराद्द्रक्ष्यसे कृष्णे रुदतीर्भरतस्त्रियः ॥ ४४
एवं ता भीरु रोत्स्यन्ति निहतज्ञातिबान्धवाः ।
हतमित्रा हतबला येषां क्रुद्धासि भामिनि ॥ ४५
अहं च तत्करिष्यामि भीमार्जुनयमैः सह ।
युधिष्ठिरनियोगेन दैवाच्च विधिनिर्मितात् ॥ ४६
धार्तराष्ट्राः कालपक्वा न चेच्छृण्वन्ति मे वचः ।
शेष्यन्ते निहता भूमौ श्वशृगालादनीकृताः ॥ ४७
चलेद्धि हिमवाञ्शैलो मेदिनी शतधा भवेत् ।
द्यौः पतेच्च सनक्षत्रा न मे मोघं वचो भवेत् ॥४८
सत्यं ते प्रतिजानामि कृष्णे बाष्पो निगृह्यताम् ।
हतामित्राञ्श्रिया युक्तानचिराद्द्रक्ष्यसे पतीन् ॥ ४९

इति श्रीमहाभारते उद्योगपर्वणि
अशीतितमोऽध्यायः ॥ ८० ॥

८१

अर्जुन उवाच ।

कुरूणामद्य सर्वेषां भवान्सुहृदनुत्तमः ।
संबन्धी दयितो नित्यमुभयोः पक्षयोरपि ॥ १
पाण्डवैर्धार्तराष्ट्राणां प्रतिपाद्यमनामयम् ।
समर्थः प्रशमं चैषां कर्तुं त्वमसि केशव ॥ २
त्वमितः पुण्डरीकाक्ष सुयोधनममर्षणम् ।
शान्त्यर्थं भारतं ब्रूया यत्तद्वाच्यममित्रहन् ॥ ३
त्वया धर्मार्थयुक्तं चेदुक्तं शिवमनामयम् ।
हितं नादास्यते बालो दिष्टस्य वशमेष्यति ॥ ४

भगवानुवाच ।

धर्म्यमस्मद्धितं चैव कुरूणां यदनामयम् ।
एष यास्यामि राजानं धृतराष्ट्रमभीप्सया ॥ ५

वैशंपायन उवाच ।

ततो व्यपेते तमसि सूर्ये विमल उद्गते ।
मैत्रे मुहूर्ते संप्राप्ते मृद्वर्चिषि दिवाकरे ॥ ६
कौमुदे मासि रेवत्यां शरदन्ते हिमागमे ।
स्फीतसस्यसुखे काले कल्यः सत्त्ववतां वरः ॥ ७
मङ्गल्याः पुण्यनिर्घोषा वाचः शृण्वंश्च सूनृताः ।
ब्राह्मणानां प्रतीतानामृषीणामिव वासवः ॥ ८
कृत्वा पौर्वाह्णिकं कृत्यं स्नातः शुचिरलंकृतः ।
उपतस्थे विवस्वन्तं पावकं च जनार्दनः ॥ ९
ऋषभं पृष्ठ आलभ्य ब्राह्मणानभिवाद्य च ।
अग्निं प्रदक्षिणं कृत्वा पश्यन्कल्याणमग्रतः ॥ १०

तत्प्रतिज्ञाय वचनं पाण्डवस्य जनार्दनः ।
शिनेर्नप्तारमासीनमभ्यभाषत सात्यकिम् ॥ ११
रथ आरोप्यतां शङ्खश्चक्रं च गदया सह ।
उपासङ्गाश्च शक्त्यश्च सर्वप्रहरणानि च ॥ १२
दुर्योधनो हि दुष्टात्मा कर्णश्च सहसौबलः ।
न च शत्रुरवज्ञेयः प्राकृतोऽपि बलीयसा ॥ १३
ततस्तन्मतमाज्ञाय केशवस्य पुरःसराः ।
प्रसस्रुर्योजयिष्यन्तो रथं चक्रगदाभृतः ॥ १४
तं दीप्तमिव कालाग्निमाकाशगमिवाध्वगम् ।
चन्द्रसूर्यप्रकाशाभ्यां चक्राभ्यां समलंकृतम् ॥ १५
अर्धचन्द्रैश्च चन्द्रैश्च मत्स्यैः समृगपक्षिभिः ।
पुष्पैश्च विविधैश्चित्रं मणिरत्नैश्च सर्वशः ॥ १६
तरुणादित्यसंकाशं बृहन्तं चारुदर्शनम् ।
मणिहेमविचित्राङ्गं सुध्वजं सुपताकिनम् ॥ १७
सूपस्करमनाधृष्यं वैयाघ्रपरिवारणम् ।
यशोघ्नं प्रत्यमित्राणां यदूनां नन्दिवर्धनम् ॥ १८
वाजिभिः सैन्यसुग्रीवमेघपुष्पबलाहकैः ।
स्नातैः संपादयांचक्रुः संपन्नैः सर्वसंपदा ॥ १९
महिमानं तु कृष्णस्य भूय एवाभिवर्धयन् ।
सुघोषः पतगेन्द्रेण ध्वजेन युयुजे रथः ॥ २०
तं मेरुशिखरप्रख्यं मेघदुन्दुभिनिस्वनम् ।
आरुरोह रथं शौरिर्विमानमिव पुण्यकृत् ॥ २१
ततः सात्यकिमारोप्य प्रययौ पुरुषोत्तमः ।
पृथिवीं चान्तरिक्षं च रथघोषेण नादयन् ॥ २२
व्यपोढाभ्रघनः कालः क्षणेन समपद्यत ।
शिवश्चानुववौ वायुः प्रशान्तमभवद्रजः ॥ २३
प्रदक्षिणानुलोमाश्च मङ्गल्या मृगपक्षिणः ।
प्रयाणे वासुदेवस्य बभूवुरनुयायिनः ॥ २४
मङ्गल्यार्थपदैः शब्दैरन्ववर्तन्त सर्वशः ।
सारसाः शतपत्राश्च हंसाश्च मधुसूदनम् ॥ २५
मन्त्राहुतिमहाहोमैर्हूयमानश्च पावकः ।
प्रदक्षिणशिखो भूत्वा विधूमः समपद्यत ॥ २६
वसिष्ठो वामदेवश्च भूरिद्युम्नो गयः क्रथः ।
शुक्रनारदवाल्मीका मरुतः कुशिको भृगुः ॥ २७
ब्रह्मदेवर्षयश्चैव कृष्णं यदुसुखावहम् ।
प्रदक्षिणमवर्तन्त सहिता वासवानुजम् ॥ २८
एवमेतैर्महाभागैर्महर्षिगणसाधुभिः ।
पूजितः प्रययौ कृष्णः कुरूणां सदनं प्रति ॥ २९
तं प्रयान्तमनुप्रायात्कुन्तीपुत्रो युधिष्ठिरः ।
भीमसेनार्जुनौ चोभौ माद्रीपुत्रौ च पाण्डवौ ॥ ३०
चेकितानश्च विक्रान्तो धृष्टकेतुश्च चेदिपः ।
द्रुपदः काशिराजश्च शिखण्डी च महारथः ॥ ३१
धृष्टद्युम्नः सपुत्रश्च विराटः केकयैः सह ।
संसाधनार्थं प्रययुः क्षत्रियाः क्षत्रियर्षभम् ॥ ३२
ततोऽनुव्रज्य गोविन्दं धर्मराजो युधिष्ठिरः ।
राज्ञां सकाशे द्युतिमानुवाचेदं वचस्तदा ॥ ३३
यो नैव कामान्न भयान्न लोभान्नार्थकारणात् ।
अन्यायमनुवर्तेत स्थिरबुद्धिरलोलुपः ॥ ३४
धर्मज्ञो धृतिमान्प्राज्ञः सर्वभूतेषु केशवः ।
ईश्वरः सर्वभूतानां देवदेवः प्रतापवान् ॥ ३५
तं सर्वगुणसंपन्नं श्रीवत्सकृतलक्षणम् ।
संपरिष्वज्य कौन्तेयः संदेष्टुमुपचक्रमे ॥ ३६
या सा बाल्यात्प्रभृत्यस्मान्पर्यवर्धयताबला ।
उपवासतपःशीला सदा स्वस्त्ययने रता ॥ ३७
देवतातिथिपूजासु गुरुशुश्रूषणे रता ।
वत्सला प्रियपुत्रा च प्रियास्माकं जनार्दन ॥ ३८
सुयोधनभयाद्या नोऽत्रायतामित्रकर्शन ।
महतो मृत्युसंबाधादुत्तरन्नौरिवार्णवात् ॥ ३९
अस्मत्कृते च सततं यया दुःखानि माधव ।
अनुभूतान्यदुःखार्हा तां स्म पृच्छेरनामयम् ॥ ४०

भृशमाश्वासयेश्चैनां पुत्रशोकपरिप्लुताम् ।
अभिवाद्य स्वजेथाश्च पाण्डवान्परिकीर्तयन् ॥ ४१
ऊढात्प्रभृति दुःखानि श्वशुराणामरिंदम ।
निकारानतदर्हा च पश्यन्ती दुःखमश्नुते ॥ ४२
अपि जातु स कालः स्यात्कृष्ण दुःखविपर्ययः ।
यदहं मातरं क्लिष्टां सुखे दध्यामरिंदम ॥ ४३
प्रव्रजन्तोऽन्वधावत्सा कृपणा पुत्रगृद्धिनी ।
रुदतीमपहायैनामुपगच्छाम यद्वनम् ॥ ४४
न नूनं म्रियते दुःखैः सा चेज्जीवति केशव ।
तथा पुत्राधिभिर्गाढमार्ता ह्यानर्तसत्कृता ॥ ४५
अभिवाद्या तु सा कृष्ण त्वया मद्वचनाद्विभो ।
धृतराष्ट्रश्च कौरव्यो राजानश्च वयोधिकाः ॥ ४६
भीष्मं द्रोणं कृपं चैव महाराजं च बाह्लिकम् ।
द्रौणिं च सोमदत्तं च सर्वांश्च भरतान्पृथक् ॥४७
विदुरं च महाप्राज्ञं कुरूणां मन्त्रधारिणम् ।
अगाधबुद्धिं धर्मज्ञं स्वजेथा मधुसूदन ॥ ४८
इत्युक्त्वा केशवं तत्र राजमध्ये युधिष्ठिरः ।
अनुज्ञातो निववृते कृष्णं कृत्वा प्रदक्षिणम् ॥ ४९
व्रजन्नेव तु बीभत्सुः सखायं पुरुषर्षभम् ।
अब्रवीत्परवीरघ्नं दाशार्हमपराजितम् ॥ ५०
यदस्माकं विभो वृत्तं पुरा वै मन्त्रनिश्चये ।
अर्धराज्यस्य गोविन्द विदितं सर्वराजसु ॥ ५१
तच्चेद्दद्यादसङ्गेन सत्कृत्यानवमन्य च ।
प्रियं मे स्यान्महाबाहो मुच्येरन्महतो भयात् ॥५२
अतश्चेदन्यथा कर्ता धार्तराष्ट्रोऽनुपायवित् ।
अन्तं नूनं करिष्यामि क्षत्रियाणां जनार्दन ॥ ५३
एवमुक्ते पाण्डवेन पर्यहृष्यद्वृकोदरः ।
मुहुर्मुहुः क्रोधवशात्प्रावेपत च पाण्डवः ॥ ५४
वेपमानश्च कौन्तेयः प्राक्रोशन्महतो रवान् ।
धनंजयवचः श्रुत्वा हर्षोत्सिक्तमना भृशम् ॥ ५५
तस्य तं निनदं श्रुत्वा संप्रावेपन्त धन्विनः ।
वाहनानि च सर्वाणि शकृन्मूत्रं प्रसुस्रुवुः ॥ ५६
इत्युक्त्वा केशवं तत्र तथा चोक्त्वा विनिश्चयम् ।
अनुज्ञातो निववृते परिष्वज्य जनार्दनम् ॥ ५७
तेषु राजसु सर्वेषु निवृत्तेषु जनार्दनः ।
तूर्णमभ्यपतद्धृष्टः सैन्यसुग्रीववाहनः ॥ ५८
ते हया वासुदेवस्य दारुकेण प्रचोदिताः ।
पन्थानमाचेमुरिव ग्रसमाना इवाम्बरम् ॥ ५९
अथापश्यन्महाबाहुरृषीनध्वनि केशवः ।
ब्राह्म्या श्रिया दीप्यमानान्स्थितानुभयतः पथि ॥६०
सोऽवतीर्य रथात्तूर्णमभिवाद्य जनार्दनः ।
यथावत्तानृषीन्सर्वानभ्यभाषत पूजयन् ॥ ६१
कच्चिल्लोकेषु कुशलं कच्चिद्धर्मः स्वनुष्ठितः ।
ब्राह्मणानां त्रयो वर्णाः कच्चित्तिष्ठन्ति शासने ॥ ६२
तेभ्यः प्रयुज्य तां पूजां प्रोवाच मधुसूदनः ।
भगवन्तः क्व संसिद्धाः का वीथी भवतामिह ॥६३
किं वा भगवतां कार्यमहं किं करवाणि वः ।
केनार्थेनोपसंप्राप्ता भगवन्तो महीतलम् ॥ ६४
तमब्रवीज्जामदग्न्य उपेत्य मधुसूदनम् ।
परिष्वज्य च गोविन्दं पुरा सुचरिते सखा ॥ ६५
देवर्षयः पुण्यकृतो ब्राह्मणाश्च बहुश्रुताः ।
राजर्षयश्च दाशार्ह मानयन्तस्तपस्विनः ॥ ६६
देवासुरस्य द्रष्टारः पुराणस्य महाद्युते ।
समेतं पार्थिवं क्षत्रं दिदृक्षन्तश्च सर्वतः ॥ ६७
सभासदश्च राजानस्त्वां च सत्यं जनार्दन ।
एतन्महत्प्रेक्षणीयं द्रष्टुं गच्छाम केशव ॥ ६८
धर्मार्थसहिता वाचः श्रोतुमिच्छाम माधव ।
त्वयोच्यमानाः कुरुषु राजमध्ये परंतप ॥ ६९
भीष्मद्रोणादयश्चैव विदुरश्च महामतिः ।
त्वं च यादवशार्दूल सभायां वै समेष्यथ ॥ ७०

तव वाक्यानि दिव्यानि तत्र तेषां च माधव ।
श्रोतुमिच्छाम गोविन्द सत्यानि च शुभानि च ॥ ७१
आपृष्टोऽसि महाबाहो पुनर्द्रक्ष्यामहे वयम् ।
यात्वविघ्नेन वै वीर द्रक्ष्यामस्त्वां सभागतम् ॥ ७२

इति श्रीमहाभारते उद्योगपर्वणि
एकाशीतितमोऽध्यायः ॥ ८१ ॥

८२

वैशंपायन उवाच ।

प्रयान्तं देवकीपुत्रं परवीररुजो दश ।
महारथा महाबाहुमन्वयुः शस्त्रपाणयः ॥ १
पदातीनां सहस्रं च सादिनां च परंतप ।
भोज्यं च विपुलं राजन्प्रेष्याश्च शतशोऽपरे ॥ २

जनमेजय उवाच ।

कथं प्रयातो दाशार्हो महात्मा मधुसूदनः ।
कानि वा व्रजतस्तस्य निमित्तानि महौजसः ॥ ३

वैशंपायन उवाच ।

तस्य प्रयाणे यान्यासंस्त्वद्भुतानि महात्मनः ।
तानि मे शृणु दिव्यानिदैवान्यौत्पातिकानि च ॥ ४
अनभ्रेऽशनिनिर्घोषः सविद्युत्समजायत ।
अन्वगेव च पर्जन्यः प्रावर्षद्विघने भृशम् ॥ ५
प्रत्यगूहुर्महानद्यः प्राङ्मुखाः सिन्धुसत्तमाः ।
विपरीता दिशः सर्वा न प्राज्ञायत किंचन ॥ ६
प्राज्वलन्नग्नयो राजन्पृथिवी समकम्पत ।
उदपानाश्च कुम्भाश्च प्रासिञ्चञ्शतशो जलम् ॥ ७
तमःसंवृतमप्यासीत्सर्वं जगदिदं तदा ।
न दिशो नादिशो राजन्प्रज्ञायन्ते स्म रेणुना ॥ ८
प्रादुरासीन्महाञ्शब्दः खे शरीरं न दृश्यते ।
सर्वेषु राजन्देशेषु तदद्भुतमिवाभवत् ॥ ९
प्रामथ्नाद्धास्तिनपुरं वातो दक्षिणपश्चिमः ।
आरुजन्गणशो वृक्षान्परुषो भीमनिस्वनः ॥ १०
यत्र यत्र तु वार्ष्णेयो वर्तते पथि भारत ।
तत्र तत्र सुखो वायुः सर्वं चासीत्प्रदक्षिणम् ॥ ११
ववर्ष पुष्पवर्षं च कमलानि च भूरिशः ।
समश्च पन्था निर्दुःखो व्यपेतकुशकण्टकः ॥ १२
स गच्छन्ब्राह्मणै राजंस्तत्र तत्र महाभुजः ।
अर्च्यते मधुपर्कैश्च सुमनोभिर्वसुप्रदः ॥ १३
तं किरन्ति महात्मानं वन्यैः पुष्पैः सुगन्धिभिः ।
स्त्रियः पथि समागम्य सर्वभूतहिते रतम् ॥ १४
स शालिभवनं रम्यं सर्वसस्यसमाचितम् ।
सुखं परमधर्मिष्ठमत्यगाद्भरतर्षभ ॥ १५
पश्यन्बहुपशून्ग्रामान्रम्यान्हृदयतोषणान् ।
पुराणि च व्यतिक्रामन्राष्ट्राणि विविधानि च ॥ १६
नित्यहृष्टाः सुमनसो भारतैरभिरक्षिताः ।
नोद्विग्नाः परचक्राणामनयानामकोविदाः ॥ १७
उपप्लव्यादथायान्तं जनाः पुरनिवासिनः ।
पथ्यतिष्ठन्त सहिता विष्वक्सेनदिदृक्षया ॥ १८
ते तु सर्वे सुनामानमग्निमिद्धमिव प्रभुम् ।
अर्चयामासुरर्च्यं तं देशातिथिमुपस्थितम् ॥ १९
वृकस्थलं समासाद्य केशवः परवीरहा ।
प्रकीर्णरश्मावादित्ये विमले लोहितायति ॥ २०
अवतीर्य रथात्तूर्णं कृत्वा शौचं यथाविधि ।
रथमोचनमादिश्य संध्यामुपविवेश ह ॥ २१
दारुकोऽपि हयान्मुक्त्वा परिचर्य च शास्त्रतः ।
मुमोच सर्वं वर्माणि मुक्त्वा चैनानवासृजत् ॥ २२
अभ्यतीत्य तु तत्सर्वमुवाच मधुसूदनः ।
युधिष्ठिरस्य कार्यार्थमिह वत्स्यामहे क्षपाम् ॥ २३
तस्य तन्मतमाज्ञाय चक्रुरावसथं नराः ।
क्षणेन चान्नपानानि गुणवन्ति समार्जयन् ॥ २४
तस्मिन्ग्रामे प्रधानास्तु य आसन्ब्राह्मणा नृप ।
आर्याः कुलीना ह्रीमन्तो ब्राह्मीं वृत्तिमनुष्ठिताः ॥ २५

तेऽभिगम्य महात्मानं हृषीकेशमरिंदमम् ।
पूजां चक्रुर्यथान्यायमाशीर्मङ्गलसंयुताम् ॥ २६
ते पूजयित्वा दाशार्हं सर्वलोकेषु पूजितम् ।
न्यवेदयन्त वेश्मानि रत्नवन्ति महात्मने ॥ २७
तान्प्रभुः कृतमित्युक्त्वा सत्कृत्य च यथार्हतः ।
अभ्येत्य तेषां वेश्मानि पुनरायात्सहैव तैः ॥ २८
सुमृष्टं भोजयित्वा च ब्राह्मणांस्तत्र केशवः ।
भुक्त्वा च सह तैः सर्वैरवसत्तां क्षपां सुखम् ॥ २९

इति श्रीमहाभारते उद्योगपर्वणि
द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

८३

वैशंपायन उवाच ।

तथा दूतैः समाज्ञाय आयान्तं मधुसूदनम् ।
धृतराष्ट्रोऽब्रवीद्भीष्ममर्चयित्वा महाभुजम् ॥ १
द्रोणं च संजयं चैव विदुरं च महामतिम् ।
दुर्योधनं च सामात्यं हृष्टरोमाब्रवीदिदम् ॥ २
अद्भुतं महदाश्चर्यं श्रूयते कुरुनन्दन ।
स्त्रियो बालाश्च वृद्धाश्च कथयन्ति गृहे गृहे ॥ ३
सत्कृत्याचक्षते चान्ये तथैवान्ये समागताः ।
पृथग्वादाश्च वर्तन्ते चत्वरेषु सभासु च ॥ ४
उपयास्यति दाशार्हः पाण्डवार्थे पराक्रमी ।
स नो मान्यश्च पूज्यश्च सर्वथा मधुसूदनः ॥ ५
तस्मिन्हि यात्रा लोकस्य भूतानामीश्वरो हि सः ।
तस्मिन्धृतिश्च वीर्यं च प्रज्ञा चौजश्च माधवे ॥ ६
स मान्यतां नरश्रेष्ठः स हि धर्मः सनातनः ।
पूजितो हि सुखाय स्यादसुखः स्यादपूजितः ॥ ७
स चेत्तुष्यति दाशार्ह उपचारैररिंदमः ।
कृत्स्नान्सर्वानभिप्रायान्प्राप्स्यामः सर्वराजसु ॥ ८
तस्य पूजार्थमद्यैव संविधत्स्व परंतप ।
सभाः पथि विधीयन्तां सर्वकामसमाहिताः ॥ ९
यथा प्रीतिर्महाबाहो त्वयि जायेत तस्य वै ।
तथा कुरुष्व गान्धारे कथं वा भीष्म मन्यसे ॥ १०
ततो भीष्मादयः सर्वे धृतराष्ट्रं जनाधिपम् ।
ऊचुः परममित्येवं पूजयन्तोऽस्य तद्वचः ॥ ११
तेषामनुमतं ज्ञात्वा राजा दुर्योधनस्तदा ।
सभावास्तूनि रम्याणि प्रदेष्टुमुपचक्रमे ॥ १२
ततो देशेषु देशेषु रमणीयेषु भागशः ।
सर्वरत्नसमाकीर्णाः सभाश्चक्रुरनेकशः ॥ १३
आसनानि विचित्राणि युक्तानि विविधैर्गुणैः ।
स्त्रियो गन्धानलंकारान्सूक्ष्माणि वसनानि च ॥ १४
गुणवन्त्यन्नपानानि भोज्यानि विविधानि च ।
माल्यानि च सुगन्धीनि तानि राजा ददौ ततः ॥ १५
विशेषतश्च वासार्थं सभां ग्रामे वृकस्थले ।
विदधे कौरवो राजा बहुरत्नां मनोरमाम् ॥ १६
एतद्विधाय वै सर्वं देवार्हमतिमानुषम् ।
आचख्यौ धृतराष्ट्राय राजा दुर्योधनस्तदा ॥ १७
ताः सभाः केशवः सर्वा रत्नानि विविधानि च ।
असमीक्ष्यैव दाशार्ह उपायात्कुरुसद्म तत् ॥ १८

इति श्रीमहाभारते उद्योगपर्वणि
त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

८४

धृतराष्ट्र उवाच ।

उपप्लव्यादिह क्षत्तरुपयातो जनार्दनः ।
वृकस्थले निवसति स च प्रातरिहेष्यति ॥ १
आहुकानामधिपतिः पुरोगः सर्वसात्वताम् ।
महामना महावीर्यो महामात्रो जनार्दनः ॥ २
स्फीतस्य वृष्णिवंशस्य भर्ता गोप्ता च माधवः ।
त्रयाणामपि लोकानां भगवान्प्रपितामहः ॥ ३
वृष्ण्यन्धकाः सुमनसो यस्य प्रज्ञामुपासते ।
आदित्या वसवो रुद्रा यथा बुद्धिं बृहस्पतेः ॥ ४

तस्मै पूजां प्रयोक्ष्यामि दाशार्हाय महात्मने ।
प्रत्यक्षं तव धर्मज्ञ तन्मे कथयतः शृणु ॥ ५
एकवर्णैः सुकृष्णाङ्गैर्बाह्लिजातैर्हयोत्तमैः ।
चतुर्युक्तान्रथांस्तस्मै रौक्मान्दास्यामि षोडश ॥ ६
नित्यप्रभिन्नान्मातङ्गानीषादन्तान्प्रहारिणः ।
अष्टानुचरमेकैकमष्टौ दास्यामि केशवे ॥ ७
दासीनामप्रजातानां शुभानां रुक्मवर्चसाम् ।
शतमस्मै प्रदास्यामि दासानामपि तावतः ॥ ८
आविकं बहु सुस्पर्शं पार्वतीयैरुपाहृतम् ।
तदप्यस्मै प्रदास्यामि सहस्राणि दशाष्ट च ॥ ९
अजिनानां सहस्राणि चीनदेशोद्भवानि च ।
तान्यप्यस्मै प्रदास्यामि यावदर्हति केशवः ॥ १०
दिवा रात्रौ च भात्येष सुतेजा विमलो मणिः ।
तमप्यस्मै प्रदास्यामि तमप्यर्हति केशवः ॥ ११
एकेनापि पतत्यह्ना योजनानि चतुर्दश ।
यानमश्वतरीयुक्तं दास्ये तस्मै तदप्यहम् ॥ १२
यावन्ति वाहनान्यस्य यावन्तः पुरुषाश्च ते ।
ततोऽष्टगुणमप्यस्मै भोज्यं दास्याम्यहं सदा ॥ १३
मम पुत्राश्च पौत्राश्च सर्वे दुर्योधनादृते ।
प्रत्युद्यास्यन्ति दाशार्हं रथैर्मृष्टैरलंकृताः ॥ १४
स्वलंकृताश्च कल्याण्यः पादैरेव सहस्रशः ।
वारमुख्या महाभागं प्रत्युद्यास्यन्ति केशवम् ॥ १५
नगरादपि याः काश्चिद्गमिष्यन्ति जनार्दनम् ।
द्रष्टुं कन्याश्च कल्याण्यस्ताश्च यास्यन्त्यनावृताः ॥ १६
सस्त्रीपुरुषबालं हि नगरं मधुसूदनम् ।
उदीक्षते महात्मानं भानुमन्तमिव प्रजाः ॥ १७
महाध्वजपताकाश्च क्रियन्तां सर्वतोदिशम् ।
जलावसिक्तो विरजाः पन्थास्तस्येति चान्वशात् ॥
दुःशासनस्य च गृहं दुर्योधनगृहाद्वरम् ।
तदस्य क्रियतां क्षिप्रं सुसंमृष्टमलंकृतम् ॥ १९
एतद्धि रुचिराकारैः प्रासादैरुपशोभितम् ।
शिवं च रमणीयं च सर्वर्तु सुमहाधनम् ॥ २०
सर्वमस्मिन्गृहे रत्नं मम दुर्योधनस्य च ।
यद्यदर्हेत्स वार्ष्णेयस्तत्तद्देयमसंशयम् ॥ २१

इति श्रीमहाभारते उद्योगपर्वणि
चतुरशीतितमोऽध्यायः ॥ ८४ ॥

८५

विदुर उवाच ।

राजन्बहुमतश्चासि त्रैलोक्यस्यापि सत्तमः ।
संभावितश्च लोकस्य संमतश्चासि भारत ॥ १
यत्त्वमेवंगते ब्रूयाः पश्चिमे वयसि स्थितः ।
शास्त्राद्वा सुप्रतर्काद्वा सुस्थिरः स्थविरो ह्यसि ॥ २
लेखाश्मनीव भाः सूर्ये महोर्मिरिव सागरे ।
धर्मस्त्वयि महान्राजन्निति व्यवसिताः प्रजाः ॥ ३
सदैव भावितो लोको गुणौघैस्तव पार्थिव ।
गुणानां रक्षणे नित्यं प्रयतस्व सबान्धवः ॥ ४
आर्जवं प्रतिपद्यस्व मा बाल्याद्बहुधा नशीः ।
राज्यं पुत्रांश्च पौत्रांश्च सुहृदश्चापि सुप्रियान् ॥ ५
यत्त्वं दित्ससि कृष्णाय राजन्नतिथये बहु ।
एतदन्यच्च दाशार्हः पृथिवीमपि चार्हति ॥ ६
न तु त्वं धर्ममुद्दिश्य तस्य वा प्रियकारणात् ।
एतदिच्छसि कृष्णाय सत्येनात्मानमालभे ॥ ७
मायैषात्त्वमेवैतच्छद्मैतद्भूरिदक्षिण ।
जानामि ते मतं राजन्गूढं बाह्येन कर्मणा ॥ ८
पञ्च पञ्चैव लिप्सन्ति ग्रामकान्पाण्डवा नृप ।
न च दित्ससि तेभ्यस्तांस्तच्छमं कः करिष्यति ॥९
अर्थेन तु महाबाहुं वार्ष्णेयं त्वं जिहीर्षसि ।
अनेनैवाभ्युपायेन पाण्डवेभ्यो बिभित्ससि ॥ १०
न च वित्तेन शक्योऽसौ नोद्यमेन न गर्हया ।
अन्यो धनंजयात्कर्तुमेतत्तत्त्वं ब्रवीमि ते ॥ ११

वेद कृष्णस्य माहात्म्यं वेदास्य दृढभक्तिताम् ।
अत्याज्यमस्य जानामि प्राणैस्तुल्यं धनंजयम् ॥ १२
अन्यत्कुम्भादपां पूर्णादन्यत्पादावसेचनात् ।
अन्यत्कुशलसंप्रश्नान्नैषिष्यति जनार्दनः ॥ १३
यत्त्वस्य प्रियमातिथ्यं मानार्हस्य महात्मनः ।
तदस्मै क्रियतां राजन्मानार्हो हि जनार्दनः ॥ १४
आशंसमानः कल्याणं कुरूनभ्येति केशवः ।
येनैव राजन्नर्थेन तदेवास्मा उपाकुरु ॥ १५
शममिच्छति दाशार्हस्तव दुर्योधनस्य च ।
पाण्डवानां च राजेन्द्र तदस्य वचनं कुरु ॥ १६
पितासि राजन्पुत्रास्ते वृद्धस्त्वं शिशवः परे ।
वर्तस्व पितृवत्तेषु वर्तन्ते ते हि पुत्रवत् ॥ १७

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

८६

दुर्योधन उवाच ।

यदाह विदुरः कृष्णे सर्वं तत्सत्यमुच्यते ।
अनुरक्तो ह्यसंहार्यः पार्थान्प्रति जनार्दनः ॥ १
यत्तु सत्कारसंयुक्तं देयं वसु जनार्दने ।
अनेकरूपं राजेन्द्र न तद्देयं कदाचन ॥ २
देशः कालस्तथायुक्तो न हि नार्हति केशवः ।
मंस्यत्यधोक्षजो राजन्भयादर्चति मामिति ॥ ३
अवमानश्च यत्र स्यात्क्षत्रियस्य विशां पते ।
न तत्कुर्याद्बुधः कार्यमिति मे निश्चिता मतिः ॥ ४
स हि पूज्यतमो देवः कृष्णः कमललोचनः ।
त्रयाणामपि लोकानां विदितं मम सर्वथा ॥ ५
न तु तस्मिन्प्रदेयं स्यात्तथा कार्यगतिः प्रभो ।
विग्रहः समुपारब्धो न हि शाम्यत्यविग्रहात् ॥ ६

वैशंपायन उवाच ।

तस्य तद्वचनं श्रुत्वा भीष्मः कुरुपितामहः ।
वैचित्रवीर्यं राजानमिदं वचनमब्रवीत् ॥ ७
सत्कृतोऽसत्कृतो वापि न क्रुध्येत जनार्दनः ।
नालमन्यमवज्ञातुमवज्ञातोऽपि केशवः ॥ ८
यत्तु कार्यं महाबाहो मनसा कार्यतां गतम् ।
सर्वोपायैर्न तच्छक्यं केनचित्कर्तुमन्यथा ॥ ९
स यद्ब्रूयान्महाबाहुस्तत्कार्यमविशङ्कया ।
वासुदेवेन तीर्थेन क्षिप्रं संशाम्य पाण्डवैः ॥ १०
धर्म्यमर्थ्यं स धर्मात्मा ध्रुवं वक्ता जनार्दनः ।
तस्मिन्वाच्याः प्रिया वाचो भवता बान्धवैः सह ॥

दुर्योधन उवाच ।

न पर्यायोऽस्ति यद्राजञ्श्रियं निष्केवलामहम् ।
तैः सहेमामुपाश्नीयां जीवञ्जीवैः पितामह ॥ १२
इदं तु सुमहत्कार्यं शृणु मे यत्समर्थितम् ।
परायणं पाण्डवानां नियंस्यामि जनार्दनम् ॥ १३
तस्मिन्बद्धे भविष्यन्ति वृष्णयः पृथिवी तथा ।
पाण्डवाश्च विधेया मे स च प्रातरिहैष्यति ॥ १४
अत्रोपायं यथा सम्यङ्न बुध्येत जनार्दनः ।
न चापायो भवेत्कश्चित्तद्भवान्प्रब्रवीतु मे ॥ १५

वैशंपायन उवाच ।

तस्य तद्वचनं श्रुत्वा घोरं कृष्णाभिसंहितम् ।
धृतराष्ट्रः सहामात्यो व्यथितो विमनाभवत् ॥ १६
ततो दुर्योधनमिदं धृतराष्ट्रोऽब्रवीद्वचः ।
मैवं वोचः प्रजापाल नैष धर्मः सनातनः ॥ १७
दूतश्च हि हृषीकेशः संबन्धी च प्रियश्च नः ।
अपापः कौरवेयेषु कथं बन्धनमर्हति ॥ १८

भीष्म उवाच ।

परीतो धृतराष्ट्रायं तव पुत्रः सुमन्दधीः ।
वृणोत्यनर्थं न त्वर्थं याच्यमानः सुहृद्गणैः ॥ १९
इममुत्पथि वर्तन्तं पापं पापानुबन्धिनम् ।
वाक्यानि सुहृदां हित्वा त्वमप्यस्यानुवर्तसे ॥ २०

कृष्णमक्लिष्टकर्माणमासाद्यायं सुदुर्मतिः ।
तव पुत्रः सहामात्यः क्षणेन न भविष्यति ॥ २१
पापस्यास्य नृशंसस्य त्यक्तधर्मस्य दुर्मतेः ।
नोत्सहेऽनर्थसंयुक्तां वाचं श्रोतुं कथंचन ॥ २२

वैशंपायन उवाच ।

इत्युक्त्वा भरतश्रेष्ठो वृद्धः परममन्युमान् ।
उत्थाय तस्मात्प्रातिष्ठद्भीष्मः सत्यपराक्रमः ॥ २३

इति श्रीमहाभारते उद्योगपर्वणि
षडशीतितमोऽध्यायः ॥ ८६ ॥

८७

वैशंपायन उवाच ।

प्रातरुत्थाय कृष्णस्तु कृतवान्सर्वमाह्निकम् ।
ब्राह्मणैरभ्यनुज्ञातः प्रययौ नगरं प्रति ॥ १
तं प्रयान्तं महाबाहुमनुज्ञाप्य ततो नृप ।
पर्यवर्तन्त ते सर्वे वृकस्थलनिवासिनः ॥ २
धार्तराष्ट्रास्तमायान्तं प्रत्युज्जग्मुः स्वलंकृताः ।
दुर्योधनमृते सर्वे भीष्मद्रोणकृपादयः ॥ ३
पौराश्च बहुला राजन्हृषीकेशं दिदृक्षवः ।
यानैर्बहुविधैरन्ये पद्भिरेव तथापरे ॥ ४
स वै पथि समागम्य भीष्मेणाक्लिष्टकर्मणा ।
द्रोणेन धार्तराष्ट्रैश्च तैर्वृतो नगरं ययौ ॥ ५
कृष्णसंमाननार्थं च नगरं समलंकृतम् ।
बभूवू राजमार्गाश्च बहुरत्नसमाचिताः ॥ ६
न स्म कश्चिद्गृहे राजंस्तदासीद्भरतर्षभ ।
न स्त्री न वृद्धो न शिशुर्वासुदेवदिदृक्षया ॥ ७
राजमार्गे नरा न स्म संभवन्त्यवनिं गताः ।
तथा हि सुमहद्राजन्हृषीकेशप्रवेशने ॥ ८
आवृतानि वरस्त्रीभिर्गृहाणि सुमहान्त्यपि ।
प्रचलन्तीव भारेण दृश्यन्ते स्म महीतले ॥ ९
तथा च गतिमन्तस्ते वासुदेवस्य वाजिनः ।
प्रनष्टगतयोऽभूवन्राजमार्गे नरैर्वृते ॥ १०
स गृहं धृतराष्ट्रस्य प्राविशच्छत्रुकर्शनः ।
पाण्डुरं पुण्डरीकाक्षः प्रासादैरुपशोभितम् ॥ ११
तिस्रः कक्ष्या व्यतिक्रम्य केशवो राजवेश्मनः ।
वैचित्रवीर्यं राजानमभ्यगच्छदरिंदमः ॥ १२
अभ्यागच्छति दाशार्हे प्रज्ञाचक्षुर्नरेश्वरः ।
सहैव द्रोणभीष्माभ्यामुदतिष्ठन्महायशाः ॥ १३
कृपश्च सोमदत्तश्च महाराजश्च बाह्लिकः ।
आसनेभ्योऽचलन्सर्वे पूजयन्तो जनार्दनम् ॥ १४
ततो राजानमासाद्य धृतराष्ट्रं यशस्विनम् ।
स भीष्मं पूजयामास वार्ष्णेयो वाग्भिरञ्जसा ॥ १५
तेषु धर्मानुपूर्वीं तां प्रयुज्य मधुसूदनः ।
यथावयः समीयाय राजभिस्तत्र माधवः ॥ १६
अथ द्रोणं सपुत्रं स बाह्लीकं च यशस्विनम् ।
कृपं च सोमदत्तं च समीयाय जनार्दनः ॥ १७
तत्रासीदूर्जितं मृष्टं काञ्चनं महदासनम् ।
शासनाद्धृतराष्ट्रस्य तत्रोपाविशदच्युतः ॥ १८
अथ गां मधुपर्कं चाप्युदकं च जनार्दने ।
उपजह्रुर्यथान्यायं धृतराष्ट्रपुरोहिताः ॥ १९
कृतातिथ्यस्तु गोविन्दः सर्वान्परिहसन्कुरून् ।
आस्ते संबन्धकं कुर्वन्कुरुभिः परिवारितः ॥ २०
सोऽर्चितो धृतराष्ट्रेण पूजितश्च महायशाः ।
राजानं समनुज्ञाप्य निराक्रामदरिंदमः ॥ २१
तैः समेत्य यथान्यायं कुरुभिः कुरुसंसदि ।
विदुरावसथं रम्यमुपातिष्ठत माधवः ॥ २२
विदुरः सर्वकल्याणैरभिगम्य जनार्दनम् ।
अर्चयामास दाशार्हं सर्वकामैरुपस्थितम् ॥ २३
कृतातिथ्यं तु गोविन्दं विदुरः सर्वधर्मवित् ।
कुशलं पाण्डुपुत्राणामपृच्छन्मधुसूदनम् ॥ २४
प्रीयमाणस्य सुहृदो विदुषो बुद्धिसत्तमः ।

धर्मनित्यस्य च तदा गतदोषस्य धीमतः ॥ २५
तस्य सर्वं सविस्तारं पाण्डवानां विचेष्टितम् ।
क्षत्तुराचष्ट दाशार्हः सर्वप्रत्यक्षदर्शिवान् ॥ २६

इति श्रीमहाभारते उद्योगपर्वणि
सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

८८

वैशंपायन उवाच ।

अथोपगम्य विदुरमपराह्णे जनार्दनः ।
पितृष्वसारं गोविन्दः सोऽभ्यगच्छदरिंदमः ॥ १
सा दृष्ट्वा कृष्णमायान्तं प्रसन्नादित्यवर्चसम् ।
कण्ठे गृहीत्वा प्राक्रोशत्पृथा पार्थाननुस्मरन् ॥ २
तेषां सत्त्ववतां मध्ये गोविन्दं सहचारिणम् ।
चिरस्य दृष्ट्वा वार्ष्णेयं बाष्पमाहारयत्पृथा ॥ ३
साब्रवीत्कृष्णमासीनं कृतातिथ्यं युधां पतिम् ।
बाष्पगद्गदपूर्णेन मुखेन परिशुष्यता ॥ ४
ये ते बाल्यात्प्रभृत्येव गुरुशुश्रूषणे रताः ।
परस्परस्य सुहृदः संमताः समचेतसः ॥ ५
निकृत्या भ्रंशिता राज्याज्जनार्हा निर्जनं गताः ।
विनीतक्रोधहर्षाश्च ब्रह्मण्याः सत्यवादिनः ॥ ६
त्यक्त्वा प्रियसुखे पार्था रुदन्तीमपहाय माम् ।
अहार्षुश्च वनं यान्तः समूलं हृदयं मम ॥ ७
अतदर्हा महात्मानः कथं केशव पाण्डवाः ।
ऊषुर्महावने तात सिंहव्याघ्रगजाकुले ॥ ८
बाला विहीनाः पित्रा ते मया सततलालिताः ।
अपश्यन्तः स्वपितरौ कथमूषुर्महावने ॥ ९
शङ्खदुन्दुभिनिर्घोषैर्मृदङ्गैर्वैणवैरपि ।
पाण्डवाः समबोध्यन्त बाल्यात्प्रभृति केशव ॥ १०
ये स्म वारणशब्देन हयानां हेषितेन च ।
रथनेमिनिनादैश्च व्यबोध्यन्त सदा गृहे ॥ ११
शङ्खभेरीनिनादेन वेणुवीणानुनादिना ।
पुण्याहघोषमिश्रेण पूज्यमाना द्विजातिभिः ॥ १२
वस्त्रै रत्नैरलंकारैः पूजयन्तो द्विजन्मनः ।
गीर्भिर्मङ्गलयुक्ताभिर्ब्राह्मणानां महात्मनाम् ॥ १३
अर्चितैरर्चनार्हैश्च स्तुवद्भिरभिनन्दिताः ।
प्रासादाग्रेष्वबोध्यन्त राङ्कवाजिनशायिनः ॥ १४
ते नूनं निनदं श्रुत्वा श्वापदानां महावने ।
न स्मोपयान्ति निद्रां वै अतदर्हा जनार्दन ॥ १५
भेरीमृदङ्गनिनदैः शङ्खवैणवनिस्वनैः ।
स्त्रीणां गीतनिनादैश्च मधुरैर्मधुसूदन ॥ १६
बन्दिमागधसूतैश्च स्तुवद्भिर्बोधिताः कथम् ।
महावने व्यबोध्यन्त श्वापदानां रुतेन ते ॥ १७
ह्रीमान्सत्यधृतिर्दान्तो भूतानामनुकम्पिता ।
कामद्वेषौ वशे कृत्वा सतां वर्त्मानुवर्तते ॥ १८
अम्बरीषस्य मान्धातुर्ययातेर्नहुषस्य च ।
भरतस्य दिलीपस्य शिबेरौशीनरस्य च ॥ १९
राजर्षीणां पुराणानां धुरं धत्ते दुरुद्वहाम् ।
शीलवृत्तोपसंपन्नो धर्मज्ञः सत्यसंगरः ॥ २०
राजा सर्वगुणोपेतस्त्रैलोक्यस्यापि यो भवेत् ।
अजातशत्रुर्धर्मात्मा शुद्धजाम्बूनदप्रभः ॥ २१
श्रेष्ठः कुरुषु सर्वेषु धर्मतः श्रुतवृत्ततः ।
प्रियदर्शनो दीर्घभुजः कथं कृष्ण युधिष्ठिरः ॥ २२
यः स नागायुतप्राणो वातरंहा वृकोदरः ।
अमर्षी पाण्डवो नित्यं प्रियो भ्रातुः प्रियंकरः ॥ २३
कीचकस्य च सज्ञातेर्यो हन्ता मधुसूदन ।
शूरः क्रोधवशानां च हिडिम्बस्य बकस्य च ॥ २४
पराक्रमे शक्रसमो वायुवेगसमो जवे ।
महेश्वरसमः क्रोधे भीमः प्रहरतां वरः ॥ २५
क्रोधं बलममर्षं च यो निधाय परंतपः ।
जितात्मा पाण्डवोऽमर्षी भ्रातुस्तिष्ठति शासने ॥ २६
तेजोराशिं महात्मानं बलौघममितौजसम् ।

भीमं प्रदर्शनेनापि भीमसेनं जनार्दन ।
तं ममाचक्ष्व वार्ष्णेय कथमद्य वृकोदरः ॥ २७
आस्ते परिघबाहुः स मध्यमः पाण्डवोऽच्युत ।
अर्जुनेनार्जुनो यः स कृष्ण बाहुसहस्रिणा ।
द्विबाहुः स्पर्धते नित्यमतीतेनापि केशव ॥ २८
क्षिपत्येकेन वेगेन पञ्च बाणशतानि यः ।
इष्वस्त्रे सदृशो राज्ञः कार्तवीर्यस्य पाण्डवः ॥ २९
तेजसादित्यसदृशो महर्षिप्रतिमो दमे ।
क्षमया पृथिवीतुल्यो महेन्द्रसमविक्रमः ॥ ३०
आधिराज्यं महद्दीप्तं प्रथितं मधुसूदन ।
आहृतं येन वीर्येण कुरूणां सर्वराजसु ॥ ३१
यस्य बाहुबलं घोरं कौरवाः पर्युपासते ।
स सर्वरथिनां श्रेष्ठः पाण्डवः सत्यविक्रमः ॥ ३२
योऽपाश्रयः पाण्डवानां देवानामिव वासवः ।
स ते भ्राता सखा चैव कथमद्य धनंजयः ॥ ३३
दयावान्सर्वभूतेषु ह्रीनिषेधो महास्त्रवित् ।
मृदुश्च सुकुमारश्च धार्मिकश्च प्रियश्च मे ॥ ३४
सहदेवो महेष्वासः शूरः समितिशोभनः ।
भ्रातॄणां कृष्ण शुश्रूषुर्धर्मार्थकुशलो युवा ॥ ३५
सदैव सहदेवस्य भ्रातरो मधुसूदन ।
वृत्तं कल्याणवृत्तस्य पूजयन्ति महात्मनः ॥ ३६
ज्येष्ठापचायिनं वीरं सहदेवं युधां पतिम् ।
शुश्रूषुं मम वार्ष्णेय माद्रीपुत्रं प्रचक्ष्व मे ॥ ३७
सुकुमारो युवा शूरो दर्शनीयश्च पाण्डवः ।
भ्रातॄणां कृष्ण सर्वेषां प्रियः प्राणो बहिश्चरः ॥३८
चित्रयोधी च नकुलो महेष्वासो महाबलः ।
कच्चित्स कुशली कृष्ण वत्सो मम सुखैधितः ॥३९
सुखोचितमदुःखार्हं सुकुमारं महारथम् ।
अपि जातु महाबाहो पश्येयं नकुलं पुनः ॥ ४०
पक्ष्मसंपातजे काले नकुलेन विनाकृता ।
न लभामि सुखं वीर साद्य जीवामि पश्य माम् ॥४१
सर्वैः पुत्रैः प्रियतमा द्रौपदी मे जनार्दन ।
कुलीना शीलसंपन्ना सर्वैः समुदिता गुणैः ॥ ४२
पुत्रलोकात्पतिलोकान्वृण्वाना सत्यवादिनी ।
प्रियान्पुत्रान्परित्यज्य पाण्डवानन्वपद्यत ॥ ४३
महाभिजनसंपन्ना सर्वकामैः सुपूजिता ।
ईश्वरी सर्वकल्याणी द्रौपदी कथमच्युत ॥ ४४
पतिभिः पञ्चभिः शूरैरग्निकल्पैः प्रहारिभिः ।
उपपन्ना महेष्वासैर्द्रौपदी दुःखभागिनी ॥ ४५
चतुर्दशमिमं वर्षं यन्नापश्यमरिंदम ।
पुत्राधिभिः परिद्यूनां द्रौपदीं सत्यवादिनीम् ॥ ४६
न नूनं कर्मभिः पुण्यैरश्नुते पुरुषः सुखम् ।
द्रौपदी चेत्तथावृत्ता नाश्नुते सुखमव्ययम् ॥ ४७
न प्रियो मम कृष्णाया बीभत्सुर्न युधिष्ठिरः ।
भीमसेनो यमौ वापि यदपश्यं सभागताम् ॥ ४८
न मे दुःखतरं किंचिद्भूतपूर्वं ततोऽधिकम् ।
यद्द्रौपदीं निवातस्थां श्वशुराणां समीपगाम् ॥ ४९
आनायितामनार्येण क्रोधलोभानुवर्तिना ।
सर्वे प्रैक्षन्त कुरव एकवस्त्रां सभागताम् ॥ ५०
तत्रैव धृतराष्ट्रश्च महाराजश्च बाह्लिकः ।
कृपश्च सोमदत्तश्च निर्विण्णाः कुरवस्तथा ॥ ५१
तस्यां संसदि सर्वस्यां क्षत्तारं पूजयाम्यहम् ।
वृत्तेन हि भवत्यार्यो न धनेन न विद्यया ॥ ५२
तस्य कृष्ण महाबुद्धेर्गम्भीरस्य महात्मनः ।
क्षत्तुः शीलमलंकारो लोकान्विष्टभ्य तिष्ठति ॥ ५३
सा शोकार्ता च हृष्टा च दृष्ट्वा गोविन्दमागतम् ।
नानाविधानि दुःखानि सर्वाण्येवान्वकीर्तयत् ॥५४
पूर्वैराचरितं यत्तत्कुराजभिररिंदम ।
अक्षद्यूतं मृगवधः कच्चिदेषां सुखावहम् ॥ ५५
तन्मां दहति यत्कृष्णा सभायां कुरुसंनिधौ ।

धार्तराष्ट्रैः परिक्लिष्टा यथा नकुशलं तथा ॥ ५६
निर्वासनं च नगरात्प्रव्रज्या च परंतप ।
नानाविधानां दुःखानामावासोऽस्मि जनार्दन ।
अज्ञातचर्या बालानामवरोधश्च केशव ॥ ५७
न स्म क्लेशतमं मे स्यात्पुत्रैः सह परंतप ।
दुर्योधनेन निकृता वर्षमद्य चतुर्दशम् ॥ ५८
दुःखादपि सुखं न स्याद्यदि पुण्यफलक्षयः ।
न मे विशेषो जात्वासीद्धार्तराष्ट्रेषु पाण्डवैः ॥ ५९
तेन सत्येन कृष्ण त्वां हतामित्रं श्रिया वृतम् ।
अस्माद्विमुक्तं संग्रामात्पश्येयं पाण्डवैः सह ।
नैव शक्याः पराजेतुं सत्त्वं ह्येषां तथागतम् ॥ ६०
पितरं त्वेव गर्हेयं नात्मानं न सुयोधनम् ।
येनाहं कुन्तिभोजाय धनं धूर्तैरिवार्पिता ॥ ६१
बालां मामार्यकस्तुभ्यं क्रीडन्तीं कन्दुहस्तकाम् ।
अददात्कुन्तिभोजाय सखा सख्ये महात्मने ॥ ६२
साहं पित्रा च निकृता श्वशुरैश्च परंतप ।
अत्यन्तदुःखिता कृष्ण किं जीवितफलं मम ॥ ६३
यन्मा वागब्रवीन्नक्तं सूतके सव्यसाचिनः ।
पुत्रस्ते पृथिवीं जेता यशश्चास्य दिवं स्पृशेत् ॥ ६४
हत्वा कुरून्ग्रामजन्ये राज्यं प्राप्य धनंजयः ।
भ्रातृभिः सह कौन्तेयस्त्रीन्मेधानाहरिष्यति ॥ ६५
नाहं तामभ्यसूयामि नमो धर्माय वेधसे ।
कृष्णाय महते नित्यं धर्मो धारयति प्रजाः ॥ ६६
धर्मश्चेदस्ति वार्ष्णेय तथा सत्यं भविष्यति ।
त्वं चापि तत्तथा कृष्ण सर्वं संपादयिष्यसि ॥ ६७
न मां माधव वैधव्यं नार्थनाशो न वैरिता ।
तथा शोकाय भवति यथा पुत्रैर्विनाभवः ॥ ६८
याहं गाण्डीवधन्वानं सर्वशस्त्रभृतां वरम् ।
धनंजयं न पश्यामि का शान्तिर्हृदयस्य मे ॥ ६९
इदं चतुर्दशं वर्षं यन्नापश्यं युधिष्ठिरम् ।
धनंजयं च गोविन्द यमौ तं च वृकोदरम् ॥ ७०
जीवनाशं प्रनष्टानां श्राद्धं कुर्वन्ति मानवाः ।
अर्थतस्ते मम मृतास्तेषां चाहं जनार्दन ॥ ७१
ब्रूया माधव राजानं धर्मात्मानं युधिष्ठिरम् ।
भूयांस्ते हीयते धर्मो मा पुत्रक वृथा कृथाः ॥ ७२
पराश्रया वासुदेव या जीवामि धिगस्तु माम् ।
वृत्तेः कृपणलब्धाया अप्रतिष्ठैव ज्यायसी ॥ ७३
अथो धनंजयं ब्रूया नित्योद्युक्तं वृकोदरम् ।
यदर्थं क्षत्रिया सूते तस्य कालोऽयमागतः ॥ ७४
अस्मिंश्चेदागते काले कालो वोऽतिक्रमिष्यति ।
लोकसंभाविताः सन्तः सुनृशंसं करिष्यथ ॥ ७५
नृशंसेन च वो युक्तांस्त्यजेयं शाश्वतीः समाः ।
काले हि समनुप्राप्ते त्यक्तव्यमपि जीवितम् ॥ ७६
माद्रीपुत्रौ च वक्तव्यौ क्षत्रधर्मरतौ सदा ।
विक्रमेणार्जितान्भोगान्वृणीतं जीवितादपि ॥ ७७
विक्रमाधिगता ह्यर्थाः क्षत्रधर्मेण जीवतः ।
मनो मनुष्यस्य सदा प्रीणन्ति पुरुषोत्तम ॥ ७८
गत्वा ब्रूहि महाबाहो सर्वशस्त्रभृतां वरम् ।
अर्जुनं पाण्डवं वीरं द्रौपद्याः पदवीं चर ॥ ७९
विदितौ हि तवात्यन्तं क्रुद्धाविव यथान्तकौ ।
भीमार्जुनौ नयेतां हि देवानपि परां गतिम् ॥ ८०
तयोश्चैतदवज्ञानं यत्सा कृष्णा सभां गता ।
दुःशासनश्च कर्णश्च परुषाण्यभ्यभाषताम् ॥ ८१
दुर्योधनो भीमसेनमभ्यगच्छन्मनस्विनम् ।
पश्यतां कुरुमुख्यानां तस्य द्रक्ष्यति यत्फलम् ॥ ८२
न हि वैरं समासाद्य प्रशाम्यति वृकोदरः ।
सुचिरादपि भीमस्य न हि वैरं प्रशाम्यति ।
यावदन्तं न नयति शात्रवाञ्शत्रुकर्शनः ॥ ८३
न दुःखं राज्यहरणं न च द्यूते पराजयः ।
प्रव्राजनं च पुत्राणां न मे तद्दुःखकारणम् ॥ ८४

यत्तु सा बृहती श्यामा एकवस्त्रा सभां गता ।
अशृणोत्परुषा वाचस्ततो दुःखतरं नु किम् ॥ ८५
स्त्रीधर्मिणी वरारोहा क्षत्रधर्मरता सदा ।
नाध्यगच्छत्तथा नाथं कृष्णा नाथवती सती ॥८६
यस्या मम सपुत्रायास्त्वं नाथो मधुसूदन ।
रामश्च बलिनां श्रेष्ठः प्रद्युम्नश्च महारथः ॥ ८७
साहमेवंविधं दुःखं सहेऽद्य पुरुषोत्तम ।
भीमे जीवति दुर्धर्षे विजये चापलायिनि ॥ ८८
तत आश्वासयामास पुत्राधिभिरभिप्लुताम् ।
पितृष्वसारं शोचन्तीं शौरिः पार्थसखः पृथाम् ॥८९
का नु सीमन्तिनी त्वादृग्लोकेष्वस्ति पितृष्वसः ।
शूरस्य राज्ञो दुहिता आजमीढकुलं गता ॥ ९०
महाकुलीना भवती ह्रदाद्ध्रदमिवागता ।
ईश्वरी सर्वकल्याणी भर्त्रा परमपूजिता ॥ ९१
वीरसूर्वीरपत्नी च सर्वैः समुदिता गुणैः ।
सुखदुःखे महाप्राज्ञे त्वादृशी सोढुमर्हति ॥ ९२
निद्रातन्द्री क्रोधहर्षौ क्षुत्पिपासे हिमातपौ ।
एतानि पार्था निर्जित्य नित्यं वीराः सुखे रताः ॥ ९३
त्यक्तग्राम्यसुखाः पार्था नित्यं वीरसुखप्रियाः ।
न ते स्वल्पेन तुष्येयुर्महोत्साहा महाबलाः ॥ ९४
अन्तं धीरा निषेवन्ते मध्यं ग्राम्यसुखप्रियाः ।
उत्तमांश्च परिक्लेशान्भोगांश्चातीव मानुषान् ॥ ९५
अन्तेषु रेमिरे धीरा न ते मध्येषु रेमिरे ।
अन्तप्राप्तिं सुखामाहुर्दुःखमन्तरमन्तयोः ॥ ९६
अभिवादयन्ति भवतीं पाण्डवाः सह कृष्णया ।
आत्मानं च कुशलिनं निवेद्याहुरनामयम् ॥ ९७
अरोगान्सर्वसिद्धार्थान्क्षिप्रं द्रक्ष्यसि पाण्डवान् ।
ईश्वरान्सर्वलोकस्य हतामित्राञ्श्रिया वृतान् ॥ ९८
एवमाश्वासिता कुन्ती प्रत्युवाच जनार्दनम् ।
पुत्राधिभिरभिध्वस्ता निगृह्याबुद्धिजं तमः ॥ ९९
यद्यत्तेषां महाबाहो पथ्यं स्यान्मधुसूदन ।
यथा यथा त्वं मन्येथाः कुर्याः कृष्ण तथा तथा ॥
अविलोपेन धर्मस्य अनिकृत्या परंतप ।
प्रभावज्ञास्मि ते कृष्ण सत्यस्याभिजनस्य च ॥१०१
व्यवस्थायां च मित्रेषु बुद्धिविक्रमयोस्तथा ।
त्वमेव नः कुले धर्मस्त्वं सत्यं त्वं तपो महत् ॥१०२
त्वं त्राता त्वं महद्ब्रह्म त्वयि सर्वं प्रतिष्ठितम् ।
यथैवात्थ तथैवैतत्त्वयि सत्यं भविष्यति ॥ १०३
तामामन्त्र्य च गोविन्दः कृत्वा चाभिप्रदक्षिणम् ।
प्रातिष्ठत महाबाहुर्दुर्योधनगृहान्प्रति ॥ १०४

इति श्रीमहाभारते उद्योगपर्वणि
अष्टाशीतितमोऽध्यायः ॥ ८८ ॥

८९

वैशंपायन उवाच ।

पृथामामन्त्र्य गोविन्दः कृत्वा चापि प्रदक्षिणम् ।
दुर्योधनगृहं शौरिरभ्यगच्छदरिंदमः ॥ १
लक्ष्म्या परमया युक्तं पुरंदरगृहोपमम् ।
तस्य कक्ष्या व्यतिक्रम्य तिस्रो द्वाःस्थैरवारितः ॥२
ततोऽभ्रघनसंकाशं गिरिकूटमिवोच्छ्रितम् ।
श्रिया ज्वलन्तं प्रासादमारुरोह महायशाः ॥ ३
तत्र राजसहस्रैश्च कुरुभिश्चाभिसंवृतम् ।
धार्तराष्ट्रं महाबाहुं ददर्शासीनमासने ॥ ४
दुःशासनं च कर्णं च शकुनिं चापि सौबलम् ।
दुर्योधनसमीपे तानासनस्थान्ददर्श सः ॥ ५
अभ्यागच्छति दाशार्हे धार्तराष्ट्रो महायशाः ।
उदतिष्ठत्सहामात्यः पूजयन्मधुसूदनम् ॥ ६
समेत्य धार्तराष्ट्रेण सहामात्येन केशवः ।
राजभिस्तत्र वार्ष्णेयः समागच्छद्यथावयः ॥ ७
तत्र जाम्बूनदमयं पर्यङ्कं सुपरिष्कृतम् ।
विविधास्तरणास्तीर्णमभ्युपाविशदच्युतः ॥ ८

तस्मिन्गां मधुपर्कं च उपहृत्य जनार्दने ।
निवेदयामास तदा गृहान्राज्यं च कौरवः ॥ ९
तत्र गोविन्दमासीनं प्रसन्नादित्यवर्चसम् ।
उपासांचक्रिरे सर्वे कुरवो राजभिः सह ॥ १०
ततो दुर्योधनो राजा वार्ष्णेयं जयतां वरम् ।
न्यमन्त्रयद्भोजनेन नाभ्यनन्दच्च केशवः ॥ ११
ततो दुर्योधनः कृष्णमब्रवीद्राजसंसदि ।
मृदुपूर्वं शठोदर्कं कर्णमाभाष्य कौरवः ॥ १२
कस्मादन्नानि पानानि वासांसि शयनानि च ।
त्वदर्थमुपनीतानि नाग्रहीस्त्वं जनार्दन ॥ १३
उभयोश्चाददः साह्यमुभयोश्च हिते रतः ।
संबन्धी दयितश्चासि धृतराष्ट्रस्य माधव ॥ १४
त्वं हि गोविन्द धर्मार्थौ वेत्थ तत्त्वेन सर्वशः ।
तत्र कारणमिच्छामि श्रोतुं चक्रगदाधर ॥ १५
स एवमुक्तो गोविन्दः प्रत्युवाच महामनाः ।
ओघमेघस्वनः काले प्रगृह्य विपुलं भुजम् ॥ १६
अनम्बूकृतमग्रस्तमनिरस्तमसंकुलम् ।
राजीवनेत्रो राजानं हेतुमद्वाक्यमुत्तमम् ॥ १७
कृतार्था भुञ्जते दूताः पूजां गृह्णन्ति चैव हि ।
कृतार्थं मां सहामात्यस्त्वमर्चिष्यसि भारत ॥ १८
एवमुक्तः प्रत्युवाच धार्तराष्ट्रो जनार्दनम् ।
न युक्तं भवतास्मासु प्रतिपत्तुमसांप्रतम् ॥ १९
कृतार्थं चाकृतार्थं च त्वां वयं मधुसूदन ।
यतामहे पूजयितुं गोविन्द न च शक्नुमः ॥ २०
न च तत्कारणं विद्मो यस्मिन्नो मधुसूदन ।
पूजां कृतां प्रीयमाणैर्नामंस्थाः पुरुषोत्तम ॥ २१
वैरं नो नास्ति भवता गोविन्द न च विग्रहः ।
स भवान्प्रसमीक्ष्यैतन्नेदृशं वक्तुमर्हति ॥ २२
एवमुक्तः प्रत्युवाच धार्तराष्ट्रं जनार्दनः ।
अभिवीक्ष्य सहामात्यं दाशार्हः प्रहसन्निव ॥ २३

नाहं कामान्न संरम्भान्न द्वेषान्नार्थकारणात् ।
न हेतुवादाल्लोभाद्वा धर्मं जह्यां कथंचन ॥ २४
संप्रीतिभोज्यान्यन्नानि आपद्भोज्यानि वा पुनः ।
न च संप्रीयसे राजन्न चाप्यापद्गता वयम् ॥ २५
अकस्माद्द्विषसे राजञ्जन्मप्रभृति पाण्डवान् ।
प्रियानुवर्तिनो भ्रातॄन्सर्वैः समुदितान्गुणैः ॥ २६
अकस्माच्चैव पार्थानां द्वेषणं नोपपद्यते ।
धर्मे स्थिताः पाण्डवेयाः कस्तान्किं वक्तुमर्हति ॥ २७
यस्तान्द्वेष्टि स मां द्वेष्टि यस्ताननु स मामनु ।
ऐकात्म्यं मां गतं विद्धि पाण्डवैर्धर्मचारिभिः ॥ २८
कामक्रोधानुवर्ती हि यो मोहाद्विरुरुत्सते ।
गुणवन्तं च यो द्वेष्टि तमाहुः पुरुषाधमम् ॥ २९
यः कल्याणगुणाञ्ज्ञातीन्मोहाल्लोभाद्दिदृक्षते ।
सोऽजितात्माजितक्रोधो न चिरं तिष्ठति श्रियम् ॥
अथ यो गुणसंपन्नान्हृदयस्याप्रियानपि ।
प्रियेण कुरुते वश्यांश्चिरं यशसि तिष्ठति ॥ ३१
सर्वमेतदभोक्तव्यमन्नं दुष्टाभिसंहितम् ।
क्षत्तुरेकस्य भोक्तव्यमिति मे धीयते मतिः ॥ ३२
एवमुक्त्वा महाबाहुर्दुर्योधनममर्षणम् ।
निश्चक्राम ततः शुभ्राद्धार्तराष्ट्रनिवेशनात् ॥ ३३
निर्याय च महाबाहुर्वासुदेवो महामनाः ।
निवेशाय ययौ वेश्म विदुरस्य महात्मनः ॥ ३४
तमभ्यगच्छद्द्रोणश्च कृपो भीष्मोऽथ बाह्लिकः ।
कुरवश्च महाबाहुं विदुरस्य गृहे स्थितम् ॥ ३५
तेऽभिगम्याब्रुवंस्तत्र कुरवो मधुसूदनम् ।
निवेदयामो वार्ष्णेय सरत्नांस्ते गृहान्वयम् ॥ ३६
तानुवाच महातेजाः कौरवान्मधुसूदनः ।
सर्वे भवन्तो गच्छन्तु सर्वा मेऽपचितिः कृता ॥
यातेषु कुरुषु क्षत्ता दाशार्हमपराजितम् ।
अभ्यर्चयामास तदा सर्वकामैः प्रयत्नवान् ॥ ३८

ततः क्षत्तान्नपानानि शुचीनि गुणवन्ति च ।
उपाहरदनेकानि केशवाय महात्मने ॥ ३९
तैस्तर्पयित्वा प्रथमं ब्राह्मणान्मधुसूदनः ।
वेदविद्भ्यो ददौ कृष्णः परमद्रविणान्यपि ॥ ४०
ततोऽनुयायिभिः सार्धं मरुद्भिरिव वासवः ।
विदुरान्नानि बुभुजे शुचीनि गुणवन्ति च ॥ ४१

इति श्रीमहाभारते उद्योगपर्वणि
एकोननवतितमोऽध्यायः ॥ ८९ ॥

९०

वैशंपायन उवाच ।

तं भुक्तवन्तमाश्वस्तं निशायां विदुरोऽब्रवीत् ।
नेदं सम्यग्व्यवसितं केशवागमनं तव ॥ १
अर्थधर्मातिगो मूढः संरम्भी च जनार्दन ।
मानघ्नो मानकामश्च वृद्धानां शासनातिगः ॥ २
धर्मशास्त्रातिगो मन्दो दुरात्मा प्रग्रहं गतः ।
अनेयः श्रेयसां पापो धार्तराष्ट्रो जनार्दन ॥ ३
कामात्मा प्राज्ञमानी च मित्रध्रुक्सर्वशङ्कितः ।
अकर्ता चाकृतज्ञश्च त्यक्तधर्मः प्रियानृतः ॥ ४
एतैश्चान्यैश्च बहुभिर्दोषैरेष समन्वितः ।
त्वयोच्यमानः श्रेयोऽपि संरम्भान्न ग्रहीष्यति ॥ ५
सेनासमुदयं दृष्ट्वा पार्थिवं मधुसूदन ।
कृतार्थं मन्यते बाल आत्मानमविचक्षणः ॥ ६
एकः कर्णः पराञ्जेतुं समर्थ इति निश्चितम् ।
धार्तराष्ट्रस्य दुर्बुद्धेः स शमं नोपयास्यति ॥ ७
भीष्मे द्रोणे कृपे कर्णे द्रोणपुत्रे जयद्रथे ।
भूयसीं वर्तते वृत्तिं न शमे कुरुते मनः ॥ ८
निश्चितं धार्तराष्ट्राणां सकर्णानां जनार्दन ।
भीष्मद्रोणकृपान्पार्था न शक्ताः प्रतिवीक्षितुम् ॥ ९
संविच्च धार्तराष्ट्राणां सर्वेषामेव केशव ।
शमे प्रयतमानस्य तव सौभ्रात्रकाङ्क्षिणः ॥ १०
न पाण्डवानामस्माभिः प्रतिदेयं यथोचितम् ।
इति व्यवसितास्तेषु वचनं स्यान्निरर्थकम् ॥ ११
यत्र सूक्तं दुरुक्तं च समं स्यान्मधुसूदन ।
न तत्र प्रलपेत्प्राज्ञो बधिरेष्विव गायनः ॥ १२
अविजानत्सु मूढेषु निर्मर्यादेषु माधव ।
न त्वं वाक्यं ब्रुवन्युक्तश्चाण्डालेषु द्विजो यथा ॥
सोऽयं बलस्थो मूढश्च न करिष्यति ते वचः ।
तस्मिन्निरर्थकं वाक्यमुक्तं संपत्स्यते तव ॥ १४
तेषां समुपविष्टानां सर्वेषां पापचेतसाम् ।
तव मध्यावतरणं मम कृष्ण न रोचते ॥ १५
दुर्बुद्धीनामशिष्टानां बहूनां पापचेतसाम् ।
प्रतीपं वचनं मध्ये तव कृष्ण न रोचते ॥ १६
अनुपासितवृद्धत्वाच्छ्रिया मोहाच्च दर्पितः ।
वयोदर्पादमर्षाच्च न ते श्रेयो ग्रहीष्यति ॥ १७
बलं बलवदप्यस्य यदि वक्ष्यसि माधव ।
त्वय्यस्य महती शङ्का न करिष्यति ते वचः ॥ १
नेदमद्य युधा शक्यमिन्द्रेणापि सहामरैः ।
इति व्यवसिताः सर्वे धार्तराष्ट्रा जनार्दन ॥ १९
तेष्वेवमुपपन्नेषु कामक्रोधानुवर्तिषु ।
समर्थमपि ते वाक्यमसमर्थं भविष्यति ॥ २०
मध्ये तिष्ठन्हस्त्यनीकस्य मन्दो
रथाश्वयुक्तस्य बलस्य मूढः ।
दुर्योधनो मन्यते वीतमन्युः
कृत्स्ना मयेयं पृथिवी जितेति ॥ २१
आशंसते धृतराष्ट्रस्य पुत्रो
महाराज्यमसपत्नं पृथिव्याम् ।
तस्मिञ्शमः केवलो नोपलभ्यो
बद्धं सन्तमागतं मन्यतेऽर्थम् ॥ २२
पर्यस्तेयं पृथिवी कालपक्वा
दुर्योधनार्थे पाण्डवान्योद्धुकामाः ।

समागताः सर्वयोधाः पृथिव्यां
राजानश्च क्षितिपालैः समेताः ॥ २३
सर्वे चैते कृतवैराः पुरस्ता-
त्त्वया राजानो हृतसाराश्च कृष्ण ।
तवोद्वेगात्संश्रिता धार्तराष्ट्रा-
न्सुसंहताः सह कर्णेन वीराः ॥ २४
त्यक्तात्मानः सह दुर्योधनेन
सृष्टा योद्धुं पाण्डवान्सर्वयोधाः ।
तेषां मध्ये प्रविशेथा यदि त्वं
न तन्मतं मम दाशार्ह वीर ॥ २५
तेषां समुपविष्टानां बहूनां दुष्टचेतसाम् ।
कथं मध्यं प्रपद्येथाः शत्रूणां शत्रुकर्शन ॥ २६
सर्वथा त्वं महाबाहो देवैरपि दुरुत्सहः ।
प्रभावं पौरुषं बुद्धिं जानामि तव शत्रुहन् ॥ २७
या मे प्रीतिः पाण्डवेषु भूयः सा त्वयि माधव ।
प्रेम्णा च बहुमानाच्च सौहृदाच्च ब्रवीम्यहम् ॥ २८

इति श्रीमहाभारते उद्योगपर्वणि
नवतितमोऽध्यायः ॥ ९० ॥

९१

भगवानुवाच ।
यथा ब्रूयान्महाप्राज्ञो यथा ब्रूयाद्विचक्षणः ।
यथा वाच्यस्त्वद्विधेन सुहृदा मद्विधः सुहृत् ॥ १
धर्मार्थयुक्तं तथ्यं च यथा त्वय्युपपद्यते ।
तथा वचनमुक्तोऽस्मि त्वयैतत्पितृमातृवत् ॥ २
सत्यं प्राप्तं च युक्तं चाप्येवमेव यथात्थ माम् ।
शृणुष्वागमने हेतुं विदुरावहितो भव ॥ ३
दौरात्म्यं धार्तराष्ट्रस्य क्षत्रियाणां च वैरिताम् ।
सर्वमेतदहं जानन्क्षत्तः प्राप्तोऽद्य कौरवान् ॥ ४
पर्यस्तां पृथिवीं सर्वां साश्वां सरथकुञ्जराम् ।
यो मोचयेन्मृत्युपाशात्प्राप्नुयाद्धर्ममुत्तमम् ॥ ५
धर्मकार्यं यतञ्शक्त्या न चेच्छक्नोति मानवः ।
प्राप्तो भवति तत्पुण्यमत्र मे नास्ति संशयः ॥ ६
मनसा चिन्तयन्पापं कर्मणा नाभिरोचयन् ।
न प्राप्नोति फलं तस्य एवं धर्मविदो विदुः ॥ ७
सोऽहं यतिष्ये प्रशमं क्षत्तः कर्तुममायया ।
कुरूणां सृञ्जयानां च संग्रामे विनशिष्यताम् ॥ ८
सेयमापन्महाघोरा कुरुष्वेव समुत्थिता ।
कर्णदुर्योधनकृता सर्वे ह्येते तदन्वयाः ॥ ९
व्यसनैः क्लिश्यमानं हि यो मित्रं नाभिपद्यते ।
अनुनीय यथाशक्ति तं नृशंसं विदुर्बुधाः ॥ १०
आ केशग्रहणान्मित्रमकार्यात्संनिवर्तयन् ।
अवाच्यः कस्यचिद्भवति कृतयत्नो यथाबलम् ॥ ११
तत्समर्थं शुभं वाक्यं धर्मार्थसहितं हितम् ।
धार्तराष्ट्रः सहामात्यो ग्रहीतुं विदुरार्हति ॥ १२
हितं हि धार्तराष्ट्राणां पाण्डवानां तथैव च ।
पृथिव्यां क्षत्रियाणां च यतिष्येऽहममायया ॥ १३
हिते प्रयतमानं मां शङ्केद्दुर्योधनो यदि ।
हृदयस्य च मे प्रीतिरानृण्यं च भविष्यति ॥ १४
ज्ञातीनां हि मिथो भेदे यन्मित्रं नाभिपद्यते ।
सर्वयत्नेन मध्यस्थं न तन्मित्रं विदुर्बुधाः ॥ १५
न मां ब्रूयुरधर्मज्ञा मूढा असुहृदस्तथा ।
शक्तो नावारयत्कृष्णः संरब्धान्कुरुपाण्डवान् ॥ १६
उभयोः साधयन्नर्थमहमागत इत्युत ।
तत्र यत्नमहं कृत्वा गच्छेयं नृष्ववाच्यताम् ॥ १७
मम धर्मार्थयुक्तं हि श्रुत्वा वाक्यमनामयम् ।
न चेदादास्यते बालो दिष्टस्य वशमेष्यति ॥ १८
अहापयन्पाण्डवार्थं यथाव-
च्छमं कुरूणां यदि चाचरेयम् ।
पुण्यं च मे स्याच्चरितं महार्थं
मुच्येरंश्च कुरवो मृत्युपाशात् ॥ १९

अपि वाचं भाषमाणस्य काव्यां
धर्मारामामर्थवतीमहिंस्राम् ।
अवेक्षेरन्धार्तराष्ट्राः समर्थां
मां च प्राप्तं कुरवः पूजयेयुः ॥ २०
न चापि मम पर्याप्ताः सहिताः सर्वपार्थिवाः ।
क्रुद्धस्य प्रमुखे स्थातुं सिंहस्येवेतरे मृगाः ॥ २१

वैशंपायन उवाच ।

इत्येवमुक्त्वा वचनं वृष्णीनामृषभस्तदा ।
शयने सुखसंस्पर्शे शिश्ये यदुसुखावहः ॥ २२

इति श्रीमहाभारते उद्योगपर्वणि
एकनवतितमोऽध्यायः ॥ ९१ ॥

९२

वैशंपायन उवाच ।

तथा कथयतोरेव तयोर्बुद्धिमतोस्तदा ।
शिवा नक्षत्रसंपन्ना सा व्यतीयाय शर्वरी ॥ १
धर्मार्थकामयुक्ताश्च विचित्रार्थपदाक्षराः ।
शृण्वतो विविधा वाचो विदुरस्य महात्मनः ॥ २
कथाभिरनुरूपाभिः कृष्णस्यामिततेजसः ।
अकामस्येव कृष्णस्य सा व्यतीयाय शर्वरी ॥ ३
ततस्तु स्वरसंपन्ना बहवः सूतमागधाः ।
शङ्खदुन्दुभिनिर्घोषैः केशवं प्रत्यबोधयन् ॥ ४
तत उत्थाय दाशार्ह ऋषभः सर्वसात्वताम् ।
सर्वमावश्यकं चक्रे प्रातःकार्यं जनार्दनः ॥ ५
कृतोदकार्यजप्यः स हुताग्निः समलंकृतः ।
तत आदित्यमुद्यन्तमुपातिष्ठत माधवः ॥ ६
अथ दुर्योधनः कृष्णं शकुनिश्चापि सौबलः ।
संध्यां तिष्ठन्तमभ्येत्य दाशार्हमपराजितम् ॥ ७
आचक्षेतां तु कृष्णस्य धृतराष्ट्रं सभागतम् ।
कुरूंश्च भीष्मप्रमुखान्राज्ञः सर्वांश्च पार्थिवान् ॥ ८
त्वामर्थयन्ते गोविन्द दिवि शक्रमिवामराः ।
तावभ्यनन्दद्गोविन्दः साम्ना परमवल्गुना ॥ ९
ततो विमल आदित्ये ब्राह्मणेभ्यो जनार्दनः ।
ददौ हिरण्यं वासांसि गाश्चाश्वांश्च परंतपः ॥ १०
विसृष्टवन्तं रत्नानि दाशार्हमपराजितम् ।
तिष्ठन्तमुपसंगम्य ववन्दे सारथिस्तदा ॥ ११
तमुपस्थितमाज्ञाय रथं दिव्यं महामनाः ।
महाभ्रघननिर्घोषं सर्वरत्नविभूषितम् ॥ १२
अग्निं प्रदक्षिणं कृत्वा ब्राह्मणांश्च जनार्दनः ।
कौस्तुभं मणिमामुच्य श्रिया परमया ज्वलन् ॥ १३
कुरुभिः संवृतः कृष्णो वृष्णिभिश्चाभिरक्षितः ।
आतिष्ठत रथं शौरिः सर्वयादवनन्दनः ॥ १४
अन्वारुरोह दाशार्हं विदुरः सर्वधर्मवित् ।
सर्वप्राणभृतां श्रेष्ठं सर्वधर्मभृतां वरम् ॥ १५
ततो दुर्योधनः कृष्णं शकुनिश्चापि सौबलः ।
द्वितीयेन रथेनैनमन्वयातां परंतपम् ॥ १६
सात्यकिः कृतवर्मा च वृष्णीनां च महारथाः ।
पृष्ठतोऽनुययुः कृष्णं रथैरश्वैर्गजैरपि ॥ १७
तेषां हेमपरिष्कारा युक्ताः परमवाजिभिः ।
गच्छतां घोषिणश्चित्राश्चारु बभ्राजिरे रथाः ॥ १८
संमृष्टसंसिक्तरजः प्रतिपेदे महापथम् ।
राजर्षिचरितं काले कृष्णो धीमाञ्श्रिया ज्वलन् ॥
ततः प्रयाते दाशार्हे प्रावाद्यन्तैकपुष्कराः ।
शङ्खाश्च दध्मिरे तत्र वाद्यान्यन्यानि यानि च ॥ २०
प्रवीराः सर्वलोकस्य युवानः सिंहविक्रमाः ।
परिवार्य रथं शौरेरगच्छन्त परंतपाः ॥ २१
ततोऽन्ये बहुसाहस्रा विचित्राद्भुतवाससः ।
असिप्रासायुधधराः कृष्णस्यासन्पुरःसराः ॥ २२
गजाः परःशतास्तत्र वराश्चाश्वाः सहस्रशः ।
प्रयान्तमन्वयुर्वीरं दाशार्हमपराजितम् ॥ २३
पुरं कुरूणां संवृत्तं द्रष्टुकामं जनार्दनम् ।

सवृद्धबालं सस्त्रीकं रथ्यागतमरिंदमम् ॥ २४
वेदिकापाश्रिताभिश्च समाक्रान्तान्यनेकशः ।
प्रचलन्तीव भारेण योषिद्भिर्भवनान्युत ॥ २५
संपूज्यमानः कुरुभिः संशृण्वन्विविधाः कथाः ।
यथार्हं प्रतिसत्कुर्वन्प्रेक्षमाणः शनैर्ययौ ॥ २६
ततः सभां समासाद्य केशवस्यानुयायिनः ।
सशङ्खैर्वेणुनिर्घोषैर्दिशः सर्वा व्यनादयन् ॥ २७
ततः सा समितिः सर्वा राज्ञाममिततेजसाम् ।
संप्राकम्पत हर्षेण कृष्णागमनकाङ्क्षया ॥ २८
ततोऽभ्याशगते कृष्णे समहृष्यन्नराधिपाः ।
श्रुत्वा तं रथनिर्घोषं पर्जन्यनिनदोपमम् ॥ २९
आसाद्य तु सभाद्वारमृषभः सर्वसात्वताम् ।
अवतीर्य रथाच्छौरिः कैलासशिखरोपमात् ॥ ३०
नगमेघप्रतीकाशां ज्वलन्तीमिव तेजसा ।
महेन्द्रसदनप्रख्यां प्रविवेश सभां ततः ॥ ३१
पाणौ गृहीत्वा विदुरं सात्यकिं च महायशाः ।
ज्योतींष्यादित्यवद्राजन्कुरून्प्रच्छादयन्श्रिया ॥ ३२
अग्रतो वासुदेवस्य कर्णदुर्योधनावुभौ ।
वृष्णयः कृतवर्मा च आसन्कृष्णस्य पृष्ठतः ॥ ३३
धृतराष्ट्रं पुरस्कृत्य भीष्मद्रोणादयस्ततः ।
आसनेभ्योऽचलन्सर्वे पूजयन्तो जनार्दनम् ॥ ३४
अभ्यागच्छति दाशार्हे प्रज्ञाचक्षुर्महामनाः ।
सहैव भीष्मद्रोणाभ्यामुदतिष्ठन्महायशाः ॥ ३५
उत्तिष्ठति महाराजे धृतराष्ट्रे जनेश्वरे ।
तानि राजसहस्राणि समुत्तस्थुः समन्ततः ॥ ३६
आसनं सर्वतोभद्रं जाम्बूनदपरिष्कृतम् ।
कृष्णार्थे कल्पितं तत्र धृतराष्ट्रस्य शासनात् ॥ ३७
स्मयमानस्तु राजानं भीष्मद्रोणौ च माधवः ।
अभ्यभाषत धर्मात्मा राज्ञश्चान्यान्यथावयः ॥ ३८
तत्र केशवमानर्चुः सम्यगभ्यागतं सभाम् ।
राजानः पार्थिवाः सर्वे कुरवश्च जनार्दनम् ॥ ३९
तत्र तिष्ठन्स दाशार्हो राजमध्ये परंतपः ।
अपश्यदन्तरिक्षस्थानृषीन्परपुरंजयः ॥ ४०
ततस्तानभिसंप्रेक्ष्य नारदप्रमुखानृषीन् ।
अभ्यभाषत दाशार्हो भीष्मं शांतनवं शनैः ॥ ४१
पार्थिवीं समितिं द्रष्टुमृषयोऽभ्यागता नृप ।
निमन्त्र्यन्तामासनैश्च सत्कारेण च भूयसा ॥ ४२
नैतेष्वनुपविष्टेषु शक्यं केनचिदासितुम् ।
पूजा प्रयुज्यतामाशु मुनीनां भावितात्मनाम् ॥ ४३
ऋषीञ्शांतनवो दृष्ट्वा सभाद्वारमुपस्थितान् ।
त्वरमाणस्ततो भृत्यानासनानीत्यचोदयत् ॥ ४४
आसनान्यथ मृष्टानि महान्ति विपुलानि च ।
मणिकाञ्चनचित्राणि समाजह्रुस्ततस्ततः ॥ ४५
तेषु तत्रोपविष्टेषु गृहीतार्घेषु भारत ।
निषसादासने कृष्णो राजानश्च यथासनम् ॥ ४६
दुःशासनः सात्यकये ददावासनमुत्तमम् ।
विविंशतिर्ददौ पीठं काञ्चनं कृतवर्मणे ॥ ४७
अविदूरेऽथ कृष्णस्य कर्णदुर्योधनावुभौ ।
एकासने महात्मानौ निषीदतुरमर्षणौ ॥ ४८
गान्धारराजः शकुनिर्गान्धारैरभिरक्षितः ।
निषसादासने राजा सहपुत्रो विशां पते ॥ ४९
विदुरो मणिपीठे तु शुक्लस्पर्ध्याजिनोत्तरे ।
संस्पृश्यन्नासनं शौरेर्महामतिरुपाविशत् ॥ ५०
चिरस्य दृष्ट्वा दाशार्हं राजानः सर्वपार्थिवाः ।
अमृतस्येव नातृप्यन्प्रेक्षमाणा जनार्दनम् ॥ ५१
अतसीपुष्पसंकाशः पीतवासा जनार्दनः ।
व्यभ्राजत सभामध्ये हेम्नीवोपहितो मणिः ॥ ५२
ततस्तूष्णीं सर्वमासीद्गोविन्दगतमानसम् ।

न तत्र कश्चित्किंचिद्धि व्याजहार पुमान्क्वचित् ॥

इति श्रीमहाभारते उद्योगपर्वणि
द्विनवतितमोऽध्यायः ॥ ९२ ॥

९३

वैशंपायन उवाच ।

तेष्वासीनेषु सर्वेषु तूष्णींभूतेषु राजसु ।
वाक्यमभ्याददे कृष्णः सुदंष्ट्रो दुन्दुभिस्वनः ॥ १
जीमूत इव घर्मान्ते सर्वां संश्रावयन्सभाम् ।
धृतराष्ट्रमभिप्रेक्ष्य समभाषत माधवः ॥ २
कुरूणां पाण्डवानां च शमः स्यादिति भारत ।
अप्रयत्नेन वीराणामेतद्यतितुमागतः ॥ ३
राजन्नान्यत्प्रवक्तव्यं तव निःश्रेयसं वचः ।
विदितं ह्येव ते सर्वं वेदितव्यमरिंदम ॥ ४
इदमद्य कुलं श्रेष्ठं सर्वराजसु पार्थिव ।
श्रुतवृत्तोपसंपन्नं सर्वैः समुदितं गुणैः ॥ ५
कृपानुकम्पा कारुण्यमानृशंस्यं च भारत ।
तथार्जवं क्षमा सत्यं कुरुष्वेतद्विशिष्यते ॥ ६
तस्मिन्नेवंविधे राजन्कुले महति तिष्ठति ।
त्वन्निमित्तं विशेषेण नेह युक्तमसांप्रतम् ॥ ७
त्वं हि वारयिता श्रेष्ठः कुरूणां कुरुसत्तम ।
मिथ्या प्रचरतां तात बाह्येष्वाभ्यन्तरेषु च ॥ ८
ते पुत्रास्तव कौरव्य दुर्योधनपुरोगमाः ।
धर्मार्थौ पृष्ठतः कृत्वा प्रचरन्ति नृशंसवत् ॥ ९
अशिष्टा गतमर्यादा लोभेन हृतचेतसः ।
स्वेषु बन्धुषु मुख्येषु तद्वेत्थ भरतर्षभ ॥ १०
सेयमापन्महाघोरा कुरुष्वेव समुत्थिता ।
उपेक्ष्यमाणा कौरव्य पृथिवीं घातयिष्यति ॥ ११
शक्या चेयं शमयितुं त्वं चेदिच्छसि भारत ।
न दुष्करो ह्यत्र शमो मतो मे भरतर्षभ ॥ १२
त्वय्यधीनः शमो राजन्मयि चैव विशां पते ।
पुत्रान्स्थापय कौरव्य स्थापयिष्याम्यहं परान् ॥ १३
आज्ञा तव हि राजेन्द्र कार्या पुत्रैः सहान्वयैः ।
हितं बलवदप्येषां तिष्ठतां तव शासने ॥ १४
तव चैव हितं राजन्पाण्डवानामथो हितम् ।
शमे प्रयतमानस्य मम शासनकाङ्क्षिणाम् ॥ १५
स्वयं निष्कलमालक्ष्य संविधत्स्व विशां पते ।
सहभूतास्तु भरतास्तवैव स्युर्जनेश्वर ॥ १६
धर्मार्थयोस्तिष्ठ राजन्पाण्डवैरभिरक्षितः ।
न हि शक्यास्तथाभूता यत्नादपि नराधिप ॥ १७
न हि त्वां पाण्डवैर्जेतुं रक्ष्यमाणं महात्मभिः ।
इन्द्रोऽपि देवैः सहितः प्रसहेत कुतो नृपाः ॥ १८
यत्र भीष्मश्च द्रोणश्च कृपः कर्णो विविंशतिः ।
अश्वत्थामा विकर्णश्च सोमदत्तोऽथ बाह्लिकः ॥
सैन्धवश्च कलिङ्गश्च काम्बोजश्च सुदक्षिणः ।
युधिष्ठिरो भीमसेनः सव्यसाची यमौ तथा ॥ २०
सात्यकिश्च महातेजा युयुत्सुश्च महारथः ।
को नु तान्विपरीतात्मा युध्येत भरतर्षभ ॥ २१
लोकस्येश्वरतां भूयः शत्रुभिश्चाप्रधृष्यताम् ।
प्राप्स्यसि त्वममित्रघ्न सहितः कुरुपाण्डवैः ॥ २२
तस्य ते पृथिवीपालास्त्वत्समाः पृथिवीपते ।
श्रेयांसश्चैव राजानः संधास्यन्ते परंतप ॥ २३
स त्वं पुत्रैश्च पौत्रैश्च भ्रातृभिः पितृभिस्तथा ।
सुहृद्भिः सर्वतो गुप्तः सुखं शक्ष्यसि जीवितुम् ॥२४
एतानेव पुरोधाय सत्कृत्य च यथा पुरा ।
अखिलां भोक्ष्यसे सर्वां पृथिवीं पृथिवीपते ॥ २५
एतैर्हि सहितः सर्वैः पाण्डवैः स्वैश्च भारत ।
अन्यान्विजेष्यसे शत्रूनेष स्वार्थस्तवाखिलः ॥ २६
तैरेवोपार्जितां भूमिं भोक्ष्यसे च परंतप ।
यदि संपत्स्यसे पुत्रैः सहामात्यैर्नराधिप ॥ २७
संयुगे वै महाराज दृश्यते सुमहान्क्षयः ।

क्षये चोभयतो राजन्कं धर्ममनुपश्यसि ॥ २८
पाण्डवैर्निहतैः संख्ये पुत्रैर्वापि महाबलैः ।
यद्विन्देथाः सुखं राजंस्तद्ब्रूहि भरतर्षभ ॥ २९
शूराश्च हि कृतास्त्राश्च सर्वे युद्धाभिकाङ्क्षिणः ।
पाण्डवास्तावकाश्चैव तान्रक्ष महतो भयात् ॥ ३०
न पश्येम कुरून्सर्वान्पाण्डवांश्चैव संयुगे ।
क्षीणानुभयतः शूरान्रथेभ्यो रथिभिर्हतान् ॥ ३१
समवेताः पृथिव्यां हि राजानो राजसत्तम ।
अमर्षवशमापन्ना नाशयेयुरिमाः प्रजाः ॥ ३२
त्राहि राजन्निमं लोकं न नश्येयुरिमाः प्रजाः ।
त्वयि प्रकृतिमापन्ने शेषं स्यात्कुरुनन्दन ॥ ३३
शुक्ला वदान्या ह्रीमन्त आर्याः पुण्याभिजातयः ।
अन्योन्यसचिवा राजंस्तान्पाहि महतो भयात् ॥३४
शिवेनेमे भूमिपालाः समागम्य परस्परम् ।
सह भुक्त्वा च पीत्वा च प्रतियान्तु यथागृहम् ॥ ३५
सुवाससः स्रग्विणश्च सत्कृत्य भरतर्षभ ।
अमर्षांश्च निराकृत्य वैराणि च परंतप ॥ ३६
हार्दं यत्पाण्डवेष्वासीत्प्राप्तेऽस्मिन्नायुषः क्षये ।
तदेव ते भवत्वद्य शश्वच्च भरतर्षभ ॥ ३७
बाला विहीनाः पित्रा ते त्वयैव परिवर्धिताः ।
तान्पालय यथान्यायं पुत्रांश्च भरतर्षभ ॥ ३८
भवतैव हि रक्ष्यास्ते व्यसनेषु विशेषतः ।
मा ते धर्मस्तथैवार्थो नश्येत भरतर्षभ ॥ ३९
आहुस्त्वां पाण्डवा राजन्नभिवाद्य प्रसाद्य च ।
भवतः शासनाद्दुःखमनुभूतं सहानुगैः ॥ ४०
द्वादशेमानि वर्षाणि वने निर्व्युषितानि नः ।
त्रयोदशं तथाज्ञातैः सजने परिवत्सरम् ॥ ४१
स्थाता नः समये तस्मिन्पितेति कृतनिश्चयाः ।
नाहास्म समयं तात तच्च नो ब्राह्मणा विदुः ॥ ४२
तस्मिन्नः समये तिष्ठ स्थितानां भरतर्षभ ।
नित्यं संक्लेशिता राजन्स्वराज्यांशं लभेमहि ॥ ४३
त्वं धर्ममर्थं युञ्जानः सम्यङ्नस्त्रातुमर्हसि ।
गुरुत्वं भवति प्रेक्ष्य बहून्क्लेशांस्तितिक्ष्महे ॥ ४४
स भवान्मातृपितृवदस्मासु प्रतिपद्यताम् ।
गुरोर्गरीयसी वृत्तिर्या च शिष्यस्य भारत ॥ ४५
पित्रा स्थापयितव्या हि वयमुत्पथमास्थिताः ।
संस्थापय पथिष्वस्मांस्तिष्ठ राजन्स्ववर्त्मनि ॥ ४६
आहुश्चेमां परिषदं पुत्रास्ते भरतर्षभ ।
धर्मज्ञेषु सभासत्सु नेह युक्तमसांप्रतम् ॥ ४७
यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च ।
हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः ॥ ४८
विद्धो धर्मो ह्यधर्मेण सभां यत्र प्रपद्यते ।
न चास्य शल्यं कृन्तन्ति विद्धास्तत्र सभासदः ।
धर्म एतानारुजति यथा नद्यनुकूलजान् ॥ ४९
ये धर्ममनुपश्यन्तस्तूष्णीं ध्यायन्त आसते ।
ते सत्यमाहुर्धर्मं च न्याय्यं च भरतर्षभ ॥ ५०
शक्यं किमन्यद्वक्तुं ते दानादन्यज्जनेश्वर ।
ब्रुवन्तु वा महीपालाः सभायां ये समासते ।
धर्मार्थौ संप्रधार्यैव यदि सत्यं ब्रवीम्यहम् ॥ ५१
प्रमुञ्चेमान्मृत्युपाशात्क्षत्रियान्क्षत्रियर्षभ ।
प्रशाम्य भरतश्रेष्ठ मा मन्युवशमन्वगाः ॥ ५२
पित्र्यं तेभ्यः प्रदायांशं पाण्डवेभ्यो यथोचितम् ।
ततः सपुत्रः सिद्धार्थो भुङ्क्ष्व भोगान्परंतप ॥ ५३
अजातशत्रुं जानीषे स्थितं धर्मे सतां सदा ।
सपुत्रे त्वयि वृत्तिं च वर्तते यां नराधिप ॥ ५४
दाहितश्च निरस्तश्च त्वामेवोपाश्रितः पुनः ।
इन्द्रप्रस्थं त्वयैवासौ सपुत्रेण विवासितः ॥ ५५
स तत्र निवसन्सर्वान्वशमानीय पार्थिवान् ।
त्वन्मुखानकरोद्राजन्न च त्वामत्यवर्तत ॥ ५६
तस्यैवं वर्तमानस्य सौबलेन जिहीर्षता ।

राष्ट्राणि धनधान्यं च प्रयुक्तः परमोपधिः ॥ ५७
स तामवस्थां संप्राप्य कृष्णां प्रेक्ष्य सभागताम् ।
क्षत्रधर्मादमेयात्मा नाकम्पत युधिष्ठिरः ॥ ५८
अहं तु तव तेषां च श्रेय इच्छामि भारत ।
धर्मादर्थात्सुखाच्चैव मा राजन्नीनशः प्रजाः ॥ ५९
अनर्थमर्थं मन्वाना अर्थं वानर्थमात्मनः ।
लोभेऽतिप्रसृतान्पुत्रान्निगृह्णीष्व विशां पते ॥ ६०
स्थिताः शुश्रूषितुं पार्थाः स्थिता योद्धुमरिंदमाः ।
यत्ते पथ्यतमं राजंस्तस्मिंस्तिष्ठ परंतप ॥ ६१
तद्वाक्यं पार्थिवाः सर्वे हृदयैः समपूजयन् ।
न तत्र कश्चिद्वक्तुं हि वाचं प्राक्रामदग्रतः ॥ ६२

इति श्रीमहाभारते उद्योगपर्वणि
त्रिनवतितमोऽध्यायः ॥ ९३ ॥

९४

वैशंपायन उवाच ।

तस्मिन्नभिहिते वाक्ये केशवेन महात्मना ।
स्तिमिता हृष्टरोमाण आसन्सर्वे सभासदः ॥ १
कः स्विदुत्तरमेतस्माद्वक्तुमुत्सहते पुमान् ।
इति सर्वे मनोभिस्ते चिन्तयन्ति स्म पार्थिवाः ॥२
तथा तेषु च सर्वेषु तूष्णींभूतेषु राजसु ।
जामदग्न्य इदं वाक्यमब्रवीत्कुरुसंसदि ॥ ३
इमामेकोपमां राजञ्शृणु सत्यामशङ्कितः ।
तां श्रुत्वा श्रेय आदत्स्व यदि साध्विति मन्यसे॥४
राजा दम्भोद्भवो नाम सार्वभौमः पुराभवत् ।
अखिलां बुभुजे सर्वां पृथिवीमिति नः श्रुतम् ॥ ५
स स्म नित्यं निशापाये प्रातरुत्थाय वीर्यवान् ।
ब्राह्मणान्क्षत्रियांश्चैव पृच्छन्नास्ते महारथः ॥ ६
अस्ति कश्चिद्विशिष्टो वा मद्विधो वा भवेद्युधि ।
शूद्रो वैश्यः क्षत्रियो वा ब्राह्मणो वापि शस्त्रभृत् ॥ ७
इति ब्रुवन्नन्वचरत्स राजा पृथिवीमिमाम् ।
दर्पेण महता मत्तः कंचिदन्यमचिन्तयन् ॥ ८
तं स्म वैद्या अकृपणा ब्राह्मणाः सर्वतोऽभयाः ।
प्रत्यषेधन्त राजानं श्लाघमानं पुनः पुनः ॥ ९
प्रतिषिध्यमानोऽप्यसकृत्पृच्छत्येव स वै द्विजान् ।
अभिमानी श्रिया मत्तस्तमूचुर्ब्राह्मणास्तदा ॥ १०
तपस्विनो महात्मानो वेदव्रतसमन्विताः ।
उदीर्यमाणं राजानं क्रोधदीप्ता द्विजातयः ॥ ११
अनेकजननं सख्यं ययोः पुरुषसिंहयोः ।
तयोस्त्वं न समो राजन्भवितासि कदाचन ॥ १२
एवमुक्तः स राजा तु पुनः पप्रच्छ तान्द्विजान् ।
क तौ वीरौ कजन्मानौ किंकर्माणौ च कौ च तौ ॥१३

ब्राह्मणा ऊचुः ।

नरो नारायणश्चैव तापसाविति नः श्रुतम् ।
आयातौ मानुषे लोके ताभ्यां युध्यस्व पार्थिव ॥१४
श्रूयते तौ महात्मानौ नरनारायणावुभौ ।
तपो घोरमनिर्देश्यं तप्येते गन्धमादने ॥ १५

राम उवाच ।

स राजा महतीं सेनां योजयित्वा षडङ्गिनीम् ।
अमृष्यमाणः संप्रायाद्यत्र तावपराजितौ ॥ १६
स गत्वा विषमं घोरं पर्वतं गन्धमादनम् ।
मृगयाणोऽन्वगच्छत्तौ तापसावपराजितौ ॥ १७
तौ दृष्ट्वा क्षुत्पिपासाभ्यां कृशौ धमनिसंततौ ।
शीतवातातपैश्चैव कर्शितौ पुरुषोत्तमौ ।
अभिगम्योपसंगृह्य पर्यपृच्छदनामयम् ॥ १८
तमर्चित्वा मूलफलैरासनेनोदकेन च ।
न्यमन्त्रयेतां राजानं किं कार्यं क्रियतामिति ॥ १९

दम्भोद्भव उवाच ।

बाहुभ्यां मे जिता भूमिर्निहताः सर्वशत्रवः ।
भवद्भ्यां युद्धमाकाङ्क्षन्नुपयातोऽस्मि पर्वतम् ।
आतिथ्यं दीयतामेतत्काङ्क्षितं मे चिरं प्रति ॥ २०

नरनारायणावूचतुः ।

अपेतक्रोधलोभोऽयमाश्रमो राजसत्तम ।
न ह्यस्मिन्नाश्रमे युद्धं कुतः शस्त्रं कुतोऽनृजुः ।
अन्यत्र युद्धमाकाङ्क्ष बहवः क्षत्रियाः क्षितौ ।। २१

राम उवाच ।

उच्यमानस्तथापि स्म भूय एवाभ्यभाषत ।
पुनः पुनः क्षम्यमाणः सान्त्व्यमानश्च भारत ।
दम्भोद्भवो युद्धमिच्छन्नाह्वयत्येव तापसौ ।। २२
ततो नरस्त्विषीकाणां मुष्टिमादाय कौरव ।
अब्रवीदेहि युध्यस्व युद्धकामुक क्षत्रिय ।। २३
सर्वशस्त्राणि चादत्स्व योजयस्व च वाहिनीम् ।
अहं हि ते विनेष्यामि युद्धश्रद्धामितः परम् ।। २४

दम्भोद्भव उवाच ।

यद्येतदस्त्रमस्मासु युक्तं तापस मन्यसे ।
एतेनापि त्वया योत्स्ये युद्धार्थी ह्यहमागतः ।। २५

राम उवाच ।

इत्युक्त्वा शरवर्षेण सर्वतः समवाकिरत् ।
दम्भोद्भवस्तापसं तं जिघांसुः सहसैनिकः ।। २६
तस्य तानस्यतो घोरानिषून्परतनुच्छिदः ।
कदर्थीकृत्य स मुनिरिषीकाभिरपानुदत् ।। २७
ततोऽस्मै प्रासृजद्घोरमैषीकमपराजितः ।
अस्त्रमप्रतिसंधेयं तदद्भुतमिवाभवत् ।। २८
तेषामक्षीणि कर्णांश्च नस्तकांश्चैव मायया ।
निमित्तवेधी स मुनिरिषीकाभिः समर्पयत् ।। २९
स दृष्ट्वा श्वेतमाकाशमिषीकाभिः समाचितम् ।
पादयोर्न्यपतद्राजा स्वस्ति मेऽस्त्विति चाब्रवीत् ।।
तमब्रवीन्नरो राजञ्शरण्यः शरणैषिणाम् ।
ब्रह्मण्यो भव धर्मात्मा मा च स्मैवं पुनः कृथाः ।।३१
मा च दर्पसमाविष्टः क्षेप्सीः कांश्चित्कदाचन ।
अल्पीयांसं विशिष्टं वा तत्ते राजन्परं हितम् ।।३२
कृतप्रज्ञो वीतलोभो निरहंकार आत्मवान् ।
दान्तः क्षान्तो मृदुः क्षेमः प्रजाः पालय पार्थिव ।।
अनुज्ञातः स्वस्ति गच्छ मैवं भूयः समाचरेः ।
कुशलं ब्राह्मणान्पृच्छेरावयोर्वचनाद्भृशम् ।। ३४
ततो राजा तयोः पादावभिवाद्य महात्मनोः ।
प्रत्याजगाम स्वपुरं धर्मं चैवाचिनोद्भृशम् ।। ३५
सुमहच्चापि तत्कर्म यन्नरेण कृतं पुरा ।
ततो गुणैः सुबहुभिः श्रेष्ठो नारायणोऽभवत् ।। ३६
तस्माद्यावद्धनुःश्रेष्ठे गाण्डीवेऽस्त्रं न युज्यते ।
तावत्त्वं मानमुत्सृज्य गच्छ राजन्धनंजयम् ।। ३७
काकुदीकं शुकं नाकमक्षिसंतर्जनं तथा ।
संतानं नर्तनं घोरमास्यमोदकमष्टमम् ।। ३८
एतैर्विद्धाः सर्व एव मरणं यान्ति मानवाः ।
उन्मत्ताश्च विचेष्टन्ते नष्टसंज्ञा विचेतसः ।। ३९
स्वपन्ते च प्लवन्ते च छर्दयन्ति च मानवाः ।
मूत्रयन्ते च सततं रुदन्ति च हसन्ति च ।। ४०
असंख्येया गुणाः पार्थे तद्विशिष्टो जनार्दनः ।
त्वमेव भूयो जानासि कुन्तीपुत्रं धनंजयम् ।। ४१
नरनारायणौ यौ तौ तावेवार्जुनकेशवौ ।
विजानीहि महाराज प्रवीरौ पुरुषर्षभौ ।। ४२
यद्येतदेवं जानासि न च मामतिशङ्कसे ।
आर्यां मतिं समास्थाय शाम्य भारत पाण्डवैः ।।
अथ चेन्मन्यसे श्रेयो न मे भेदो भवेदिति ।
प्रशाम्य भरतश्रेष्ठ मा च युद्धे मनः कृथाः ।। ४४
भवतां च कुरुश्रेष्ठ कुलं बहुमतं भुवि ।
तत्तथैवास्तु भद्रं ते स्वार्थमेवानुचिन्तय ।। ४५

इति श्रीमहाभारते उद्योगपर्वणि
चतुर्नवतितमोऽध्यायः ।। ९४ ।।

९५

वैशंपायन उवाच ।

जामदग्न्यवचः श्रुत्वा कण्वोऽपि भगवानृषिः ।
दुर्योधनमिदं वाक्यमब्रवीत्कुरुसंसदि ॥ १
अक्षयश्चाव्ययश्चैव ब्रह्मा लोकपितामहः ।
तथैव भगवन्तौ तौ नरनारायणावृषी ॥ २
आदित्यानां हि सर्वेषां विष्णुरेकः सनातनः ।
अजय्यश्चाव्ययश्चैव शाश्वतः प्रभुरीश्वरः ॥ ३
निमित्तमरणास्त्वन्ये चन्द्रसूर्यौ मही जलम् ।
वायुरग्निस्तथाकाशं ग्रहास्तारागणास्तथा ॥ ४
ते च क्षयान्ते जगतो हित्वा लोकत्रयं सदा ।
क्षयं गच्छन्ति वै सर्वे सृज्यन्ते च पुनः पुनः ॥
मुहूर्तमरणास्त्वन्ये मानुषा मृगपक्षिणः ।
तिर्यग्योन्यश्च ये चान्ये जीवलोकचराः स्मृताः ॥
भूयिष्ठेन तु राजानः श्रियं भुक्त्वायुषः क्षये ।
मरणं प्रतिगच्छन्ति भोक्तुं सुकृतदुष्कृतम् ॥ ७
स भवान्धर्मपुत्रेण शमं कर्तुमिहार्हति ।
पाण्डवाः कुरवश्चैव पालयन्तु वसुंधराम् ॥ ८
बलवानहमित्येव न मन्तव्यं सुयोधन ।
बलवन्तो हि बलिभिर्दृश्यन्ते पुरुषर्षभ ॥ ९
न बलं बलिनां मध्ये बलं भवति कौरव ।
बलवन्तो हि ते सर्वे पाण्डवा देवविक्रमाः ॥ १०
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
मातलेर्दातुकामस्य कन्यां मृगयतो वरम् ॥ ११
मतस्त्रैलोक्यराजस्य मातलिर्नाम सारथिः ।
तस्यैकैव कुले कन्या रूपतो लोकविश्रुता ॥ १२
गुणकेशीति विख्याता नाम्ना सा देवरूपिणी ।
श्रिया च वपुषा चैव स्त्रियोऽन्याः सातिरिच्यते ॥
तस्याः प्रदानसमयं मातलिः सह भार्यया ।
ज्ञात्वा विममृशे राजंस्तत्परः परिचिन्तयन् ॥ १४
धिक्खल्वलघुशीलानामुच्छ्रितानां यशस्विनाम् ।
नराणामृद्धसत्त्वानां कुले कन्याप्ररोहणम् ॥ १५
मातुः कुलं पितृकुलं यत्र चैव प्रदीयते ।
कुलत्रयं संशयितं कुरुते कन्यका सताम् ॥ १६
देवमानुषलोकौ द्वौ मानसेनैव चक्षुषा ।
अवगाह्यैव विचितौ न च मे रोचते वरः ॥ १७
न देवान्नैव दितिजान्न गन्धर्वान्न मानुषान् ।
अरोचयं वरकृते तथैव बहुलानृषीन् ॥ १८
भार्यया तु स संमन्त्र्य सह रात्रौ सुधर्मया ।
मातलिर्नागलोकाय चकार गमने मतिम् ॥ १९
न मे देवमनुष्येषु गुणकेश्याः समो वरः ।
रूपतो दृश्यते कश्चिन्नागेषु भविता ध्रुवम् ॥ २०
इत्यामन्त्र्य सुधर्मां स कृत्वा चाभिप्रदक्षिणम् ।
कन्यां शिरस्युपाघ्राय प्रविवेश महीतलम् ॥ २१

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

९६

कण्व उवाच ।

मातलिस्तु व्रजन्मार्गे नारदेन महर्षिणा ।
वरुणं गच्छता द्रष्टुं समागच्छद्यदृच्छया ॥ १
नारदोऽथाब्रवीदेनं क्व भवान्गन्तुमुद्यतः ।
स्वेन वा सूत कार्येण शासनाद्वा शतक्रतोः ॥ २
मातलिर्नारदेनैवं संपृष्टः पथि गच्छता ।
यथावत्सर्वमाचष्ट स्वकार्यं वरुणं प्रति ॥ ३
तमुवाचाथ स मुनिर्गच्छावः सहिताविति ।
सलिलेशदिदृक्षार्थमहमप्युद्यतो दिवः ॥ ४
अहं ते सर्वमाख्यास्ये दर्शयन्वसुधातलम् ।
दृष्ट्वा तत्र वरं कंचिद्रोचयिष्याव मातले ॥ ५
अवगाह्य ततो भूमिमुभौ मातलिनारदौ ।
ददृशाते महात्मानौ लोकपालमपां पतिम् ॥ ६

तत्र देवर्षिसदृशीं पूजां प्राप स नारदः ।
महेन्द्रसदृशीं चैव मातलिः प्रत्यपद्यत ॥ ७
तावुभौ प्रीतमनसौ कार्यवत्तां निवेद्य ह ।
वरुणेनाभ्यनुज्ञातौ नागलोकं विचेरतुः ॥ ८
नारदः सर्वभूतानामन्तर्भूमिनिवासिनाम् ।
जानंश्चकार व्याख्यानं यन्तुः सर्वमशेषतः ॥ ९

नारद उवाच ।

दृष्टस्ते वरुणस्तात पुत्रपौत्रसमावृतः ।
पश्योदकपतेः स्थानं सर्वतोभद्रमृद्धिमत् ॥ १०
एष पुत्रो महाप्राज्ञो वरुणस्येह गोपतेः ।
एष तं शीलवृत्तेन शौचेन च विशिष्यते ॥ ११
एषोऽस्य पुत्रोऽभिमतः पुष्करः पुष्करेक्षणः ।
रूपवान्दर्शनीयश्च सोमपुत्र्या वृतः पतिः ॥ १२
ज्योत्स्नाकालीति यामाहुर्द्वितीयां रूपतः श्रियम् ।
आदित्यस्यैव गोः पुत्रो ज्येष्ठः पुत्रः कृतः स्मृतः ॥
भवनं पश्य वारुण्या यदेतत्सर्वकाञ्चनम् ।
यां प्राप्य सुरतां प्राप्ताः सुराः सुरपतेः सखे ॥१४
एतानि हृतराज्यानां दैतेयानां स्म मातले ।
दीप्यमानानि दृश्यन्ते सर्वप्रहरणान्युत ॥ १५
अक्षयाणि किलैतानि विवर्तन्ते स्म मातले ।
अनुभावप्रयुक्तानि सुरैरवजितानि ह ॥ १६
अत्र राक्षसजात्यश्च भूतजात्यश्च मातले ।
दिव्यप्रहरणाश्चासन्पूर्वदैवतनिर्मिताः ॥ १७
अग्निरेष महार्चिष्माञ्जागर्ति वरुणह्रदे ।
वैष्णवं चक्रमाविद्धं विधूमेन हविष्मता ॥ १८
एष गाण्डीमयश्चापो लोकसंहारसंभृतः ।
रक्ष्यते दैवतैर्नित्यं यतस्तद्गाण्डिवं धनुः ॥ १९
एष कृत्ये समुत्पन्ने तत्तद्धारयते बलम् ।
सहस्रशतसंख्येन प्राणेन सततं ध्रुवम् ॥ २०
अशास्यानपि शास्त्येष रक्षोबन्धुषु राजसु ।
सृष्टः प्रथमजो दण्डो ब्रह्मणा ब्रह्मवादिना ॥ २१
एतच्छत्रं नरेन्द्राणां महच्छक्रेण भाषितम् ।
पुत्राः सलिलराजस्य धारयन्ति महोदयम् ॥ २२
एतत्सलिलराजस्य छत्रं छत्रगृहे स्थितम् ।
सर्वतः सलिलं शीतं जीमूत इव वर्षति ॥ २३
एतच्छत्रात्परिभ्रष्टं सलिलं सोमनिर्मलम् ।
तमसा मूर्छितं याति येन नार्छति दर्शनम् ॥ २४
बहून्यद्भुतकर्माणि द्रष्टव्यानीह मातले ।
तव कार्योपरोधस्तु तस्माद्गच्छाव माचिरम् ॥ २५

इति श्रीमहाभारते उद्योगपर्वणि
षण्णवतितमोऽध्यायः ॥ ९६ ॥

९७

नारद उवाच ।

एतत्तु नागलोकस्य नाभिस्थाने स्थितं पुरम् ।
पातालमिति विख्यातं दैत्यदानवसेवितम् ॥ १
इदमद्भिः समं प्राप्ता ये केचिद्ध्रुवजङ्गमाः ।
प्रविशन्तो महानादं नदन्ति भयपीडिताः ॥ २
अत्रासुरोऽग्निः सततं दीप्यते वारिभोजनः ।
व्यापारेण धृतात्मानं निबद्धं समबुध्यत ॥ ३
अत्रामृतं सुरैः पीत्वा निहतं निहतारिभिः ।
अतः सोमस्य हानिश्च वृद्धिश्चैव प्रदृश्यते ॥ ४
अत्र दिव्यं हयशिरः काले पर्वणि पर्वणि ।
उत्तिष्ठति सुवर्णाभं वार्भिरापूरयञ्जगत् ॥ ५
यस्मादत्र समग्रास्ताः पतन्ति जलमूर्तयः ।
तस्मात्पातालमित्येतत्ख्यायते पुरमुत्तमम् ॥ ६
ऐरावतोऽस्मात्सलिलं गृहीत्वा जगतो हितः ।
मेघेष्वामुञ्चते शीतं यन्महेन्द्रः प्रवर्षति ॥ ७
अत्र नानाविधाकारास्तिमयो नैकरूपिणः ।
अप्सु सोमप्रभां पीत्वा वसन्ति जलचारिणः ॥ ८
अत्र सूर्यांशुभिर्भिन्नाः पातालतलमाश्रिताः ।

मृता दिवसतः सूत पुनर्जीवन्ति ते निशि ॥ ९
उदये नित्यशश्चात्र चन्द्रमा रश्मिभिर्वृतः ।
अमृतं स्पृश्य संस्पर्शात्संजीवयति देहिनः ॥ १०
अत्र तेऽधर्मनिरता बद्धाः कालेन पीडिताः ।
दैतेया निवसन्ति स्म वासवेन हृतश्रियः ॥ ११
अत्र भूतपतिर्नाम सर्वभूतमहेश्वरः ।
भूतये सर्वभूतानामचरत्तप उत्तमम् ॥ १२
अत्र गोव्रतिनो विप्राः स्वाध्यायाम्नायकर्शिताः ।
त्यक्तप्राणा जितस्वर्गा निवसन्ति महर्षयः ॥ १३
यत्रतत्रशयो नित्यं येनकेनचिदाशितः ।
येनकेनचिदाच्छन्नः स गोव्रत इहोच्यते ॥ १४
ऐरावतो नागराजो वामनः कुमुदोऽञ्जनः ।
प्रसूताः सुप्रतीकस्य वंशे वारणसत्तमाः ॥ १५
पश्य यद्यत्र ते कश्चिद्रोचते गुणतो वरः ।
वरयिष्याव तं गत्वा यत्नमास्थाय मातले ॥ १६
अण्डमेतज्जले न्यस्तं दीप्यमानमिव श्रिया ।
आ प्रजानां निसर्गाद्वै नोद्भिद्यति न सर्पति ॥
नास्य जातिं निसर्गं वा कथ्यमानं शृणोमि वै ।
पितरं मातरं वापि नास्य जानाति कश्चन ॥ १८
अतः किल महानग्निरन्तकाले समुत्थितः ।
धक्ष्यते मातले सर्वं त्रैलोक्यं सचराचरम् ॥ १९

कण्व उवाच ।

मातलिस्त्वब्रवीच्छ्रुत्वा नारदस्याथ भाषितम् ।
न मेऽत्र रोचते कश्चिदन्यतो व्रज माचिरम् ॥ २०

इति श्रीमहाभारते उद्योगपर्वणि
सप्तनवतितमोऽध्यायः ॥ ९७ ॥

९८

नारद उवाच ।

हिरण्यपुरमित्येतत्ख्यातं पुरवरं महत् ।
दैत्यानां दानवानां च मायाशतविचारिणाम् ॥ १
अनल्पेन प्रयत्नेन निर्मितं विश्वकर्मणा ।
मयेन मनसा सृष्टं पातालतलमाश्रितम् ॥ २
अत्र मायासहस्राणि विकुर्वाणा महौजसः ।
दानवा निवसन्ति स्म शूरा दत्तवराः पुरा ॥ ३
नैते शक्रेण नान्येन वरुणेन यमेन वा ।
शक्यन्ते वशमानेतुं तथैव धनदेन च ॥ ४
असुराः कालखञ्जाश्च तथा विष्णुपदोद्भवाः ।
नैरृता यातुधानाश्च ब्रह्मवेदोद्भवाश्च ये ॥ ५
दंष्ट्रिणो भीमरूपाश्च वातवेगपराक्रमाः ।
मायावीर्योपसंपन्ना निवसन्त्यात्मरक्षिणः ॥ ६
निवातकवचा नाम दानवा युद्धदुर्मदाः ।
जानासि च यथा शक्रो नैताञ्शक्नोति बाधितुम् ॥
बहुशो मातले त्वं च तव पुत्रश्च गोमुखः ।
निर्भग्नो देवराजश्च सहपुत्रः शचीपतिः ॥ ८
पश्य वेश्मानि रौक्माणि मातले राजतानि च ।
कर्मणा विधियुक्तेन युक्तान्युपगतानि च ॥ ९
वैडूर्यहरितानीव प्रवालरुचिराणि च ।
अर्कस्फटिकशुभ्राणि वज्रसारोज्ज्वलानि च ॥ १०
पार्थिवानीव चाभान्ति पुनर्नगमयानि च ।
शैलानीव च दृश्यन्ते तारकाणीव चाप्युत ॥ ११
सूर्यरूपाणि चाभान्ति दीप्ताग्निसदृशानि च ।
मणिजालविचित्राणि प्रांशूनि निबिडानि च ॥ १२
नैतानि शक्यं निर्देष्टुं रूपतो द्रव्यतस्तथा ।
गुणतश्चैव सिद्धानि प्रमाणगुणवन्ति च ॥ १३
आक्रीडान्पश्य दैत्यानां तथैव शयनान्युत ।
रत्नवन्ति महार्हाणि भाजनान्यासनानि च ॥ १४
जलदाभांस्तथा शैलांस्तोयप्रस्रवणान्वितान् ।
कामपुष्पफलांश्चैव पादपान्कामचारिणः ॥ १५
मातले कश्चिदत्रापि रुचितस्ते वरो भवेत् ।
अथ वान्यां दिशं भूमेर्गच्छाव यदि मन्यसे ॥ १६

कण्व उवाच ।
मातलिस्त्वब्रवीदेनं भाषमाणं तथाविधम् ।
देवर्षे नैव मे कार्यं विप्रियं त्रिदिवौकसाम् ॥ १७
नित्यानुषक्तवैरा हि भ्रातरो देवदानवाः ।
अरिपक्षेण संबन्धं रोचयिष्याम्यहं कथम् ॥ १८
अन्यत्र साधु गच्छावो द्रष्टुं नार्हामि दानवान् ।
जानामि तु तथात्मानं दित्सात्मकमलं यथा ॥ १९

इति श्रीमहाभारते उद्योगपर्वणि
अष्टनवतितमोऽध्यायः ॥ ९८ ॥

९९

नारद उवाच ।
अयं लोकः सुपर्णानां पक्षिणां पन्नगाशिनाम् ।
विक्रमे गमने भारे नैषामस्ति परिश्रमः ॥ १
वैनतेयसुतैः सूत षड्भिस्ततमिदं कुलम् ।
सुमुखेन सुनाम्ना च सुनेत्रेण सुवर्चसा ॥ २
सुरूपपक्षिराजेन सुबलेन च मातले ।
वर्धितानि प्रसूत्या वै विनताकुलकर्तृभिः ॥ ३
पक्षिराजाभिजात्यानां सहस्राणि शतानि च ।
कश्यपस्य ततो वंशे जातैर्भूतिविवर्धनैः ॥ ४
सर्वे ह्येते श्रिया युक्ताः सर्वे श्रीवत्सलक्षणाः ।
सर्वे श्रियमभीप्सन्तो धारयन्ति बलान्युत ॥ ५
कर्मणा क्षत्रियाश्चैते निर्घृणा भोगिभोजिनः ।
ज्ञातिसंक्षयकर्तृत्वाद्ब्राह्मण्यं न लभन्ति वै ॥ ६
नामानि चैषां वक्ष्यामि यथा प्राधान्यतः शृणु ।
मातले श्लाघ्यमेतद्धि कुलं विष्णुपरिग्रहम् ॥ ७
दैवतं विष्णुरेतेषां विष्णुरेव परायणम् ।
हृदि चैषां सदा विष्णुर्विष्णुरेव गतिः सदा ॥ ८
सुवर्णचूडो नागाशी दारुणश्चण्डतुण्डकः ।
अनलश्चानिलश्चैव विशालाक्षोऽथ कुण्डली ॥ ९
काश्यपिर्ध्वजविष्कम्भो वैनतेयोऽथ वामनः ।
वातवेगो दिशाचक्षुर्निमेषो निमिषस्तथा ॥ १०
त्रिवारः सप्तवारश्च वाल्मीकिर्द्वीपकस्तथा ।
दैत्यद्वीपः सरिद्द्वीपः सारसः पद्मकेसरः ॥ ११
सुमुखः सुखकेतुश्च चित्रबर्हस्तथानघः ।
मेघकृत्कुमुदो दक्षः सर्पान्तः सोमभोजनः ॥ १२
गुरुभारः कपोतश्च सूर्यनेत्रश्चिरान्तकः ।
विष्णुधन्वा कुमारश्च परिबर्हो हरिस्तथा ॥ १३
सुस्वरो मधुपर्कश्च हेमवर्णस्तथैव च ।
मलयो मातरिश्वा च निशाकरदिवाकरौ ॥ १४
एते प्रदेशमात्रेण मयोक्ता गरुडात्मजाः ।
प्राधान्यतोऽथ यशसा कीर्तिताः प्राणतश्च ते ॥
यद्यत्र न रुचिः काचिदेहि गच्छाव मातले ।
तं नयिष्यामि देशं त्वां रुचिं यत्रोपलप्स्यसे ॥ १६

इति श्रीमहाभारते उद्योगपर्वणि
एकोनशततमोऽध्यायः ॥ ९९ ॥

१००

नारद उवाच ।
इदं रसातलं नाम सप्तमं पृथिवीतलम् ।
यत्रास्ते सुरभिर्माता गवाममृतसंभवा ॥ १
क्षरन्ती सततं क्षीरं पृथिवीसारसंभवम् ।
षण्णां रसानां सारेण रसमेकमनुत्तमम् ॥ २
अमृतेनाभितृप्तस्य सारमुद्गिरतः पुरा ।
पितामहस्य वदनादुदतिष्ठदनिन्दिता ॥ ३
यस्याः क्षीरस्य धाराया निपतन्त्या महीतले ।
ह्रदः कृतः क्षीरनिधिः पवित्रं परमुत्तमम् ॥ ४
पुष्पितस्येव फेनस्य पर्यन्तमनुवेष्टितम् ।
पिबन्तो निवसन्त्यत्र फेनपा मुनिसत्तमाः ॥ ५
फेनपा नाम नाम्ना ते फेनाहाराश्च मातले ।
उग्रे तपसि वर्तन्ते येषां बिभ्यति देवताः ॥ ६
अस्याश्चतस्रो धेन्वोऽन्या दिक्षु सर्वासु मातले ।

निवसन्ति दिशापाल्यो धारयन्त्यो दिशः स्मृताः ॥
पूर्वां दिशं धारयते सुरूपा नाम सौरभी ।
दक्षिणां हंसका नाम धारयत्यपरां दिशम् ॥ ८
पश्चिमा वारुणी दिक्च धार्यते वै सुभद्रया ।
महानुभावया नित्यं मातले विश्वरूपया ॥ ९
सर्वकामदुघा नाम धेनुर्धारयते दिशम् ।
उत्तरां मातले धर्म्यां तथैलविलसंज्ञिताम् ॥ १०
आसां तु पयसा मिश्रं पयो निर्मथ्य सागरे ।
मन्थानं मन्दरं कृत्वा देवैरसुरसंहितैः ॥ ११
उद्धृता वारुणी लक्ष्मीरमृतं चापि मातले ।
उच्चैःश्रवाश्चाश्वराजो मणिरत्नं च कौस्तुभम् ॥ १२
सुधाहारेषु च सुधां स्वधाभोजिषु च स्वधाम् ।
अमृतं चामृताशेषु सुरभिः क्षरते पयः ॥ १३
अत्र गाथा पुरा गीता रसातलनिवासिभिः ।
पौराणी श्रूयते लोके गीयते या मनीषिभिः ॥ १४
न नागलोके न स्वर्गे न विमाने त्रिविष्टपे ।
परिवासः सुखस्तादृग्रसातलतले यथा ॥ १५

इति श्रीमहाभारते उद्योगपर्वणि
शततमोऽध्यायः ॥ १०० ॥

१०१

नारद उवाच ।

इयं भोगवती नाम पुरी वासुकिपालिता ।
यादृशी देवराजस्य पुरीवर्यामरावती ॥ १
एष शेषः स्थितो नागो येनेयं धार्यते सदा ।
तपसा लोकमुख्येन प्रभावमहता मही ॥ २
श्वेतोच्चयनिभाकारो नानाविधविभूषणः ।
सहस्रं धारयन्मूर्ध्नां ज्वालाजिह्वो महाबलः ॥ ३
इह नानाविधाकारा नानाविधविभूषणाः ।
सुरसायाः सुता नागा निवसन्ति गतव्यथाः ॥ ४
मणिस्वस्तिकचक्राङ्काः कमण्डलुकलक्षणाः ।
सहस्रसंख्या बलिनः सर्वे रौद्राः स्वभावतः ॥ ५
सहस्रशिरसः केचित्केचित्पञ्चशताननाः ।
शतशीर्षास्तथा केचित्केचित्त्रिशिरसोऽपि च ॥ ६
द्विपञ्चशिरसः केचित्केचित्सप्तमुखास्तथा ।
महाभोगा महाकायाः पर्वताभोगभोगिनः ॥ ७
बहूनीह सहस्राणि प्रयुतान्यर्बुदानि च ।
नागानामेकवंशानां यथाश्रेष्ठांस्तु मे शृणु ॥ ८
वासुकिस्तक्षकश्चैव कर्कोटकधनंजयौ ।
कालीयो नहुषश्चैव कम्बलाश्वतरावुभौ ॥ ९
बाह्यकुण्डो मणिर्नागस्तथैवापूरणः खगः ।
वामनश्चैलपत्रश्च कुकुरः कुकुणस्तथा ॥ १०
आर्यको नन्दकश्चैव तथा कलशपोतकौ ।
कैलासकः पिञ्जरको नागश्चैरावतस्तथा ॥ ११
सुमनोमुखो दधिमुखः शङ्खो नन्दोपनन्दकौ ।
आप्तः कोटनकश्चैव शिखी निष्ठूरिकस्तथा ॥ १२
तित्तिरिर्हस्तिभद्रश्च कुमुदो माल्यपिण्डकः ।
द्वौ पद्मौ पुण्डरीकश्च पुष्पो मुद्गरपर्णकः ॥ १३
करवीरः पीठरकः संवृत्तो वृत्त एव च ।
पिण्डारो बिल्वपत्रश्च मूषिकादः शिरीषकः ॥ १४
दिलीपः शङ्खशीर्षश्च ज्योतिष्कोऽथापराजितः ।
कौरव्यो धृतराष्ट्रश्च कुमारः कुशकस्तथा ॥ १५
विरजा धारणश्चैव सुबाहुर्मुखरो जयः ।
बधिरान्धौ विकुण्डश्च विरसः सुरसस्तथा ॥ १६
एते चान्ये च बहवः कश्यपस्यात्मजाः स्मृताः ।
मातले पश्य यद्यत्र कश्चित्ते रोचते वरः ॥ १७

कण्व उवाच ।

मातलिस्त्वेकमव्यग्रः सततं संनिरीक्ष्य वै ।
पप्रच्छ नारदं तत्र प्रीतिमानिव चाभवत् ॥ १८
स्थितो य एष पुरतः कौरव्यस्यार्यकस्य च ।
द्युतिमान्दर्शनीयश्च कस्यैष कुलनन्दनः ॥ १९

कः पिता जननी चास्य कतमस्यैष भोगिनः ।
वंशस्य कस्यैष महान्केतुभूत इव स्थितः ॥ २०
प्रणिधानेन धैर्येण रूपेण वयसा च मे ।
मनः प्रविष्टो देवर्षे गुणकेश्याः पतिर्वरः ॥ २१
मातलिं प्रीतमनसं दृष्ट्वा सुमुखदर्शनात् ।
निवेदयामास तदा माहात्म्यं जन्म कर्म च ॥ २२
ऐरावतकुले जातः सुमुखो नाम नागराट् ।
आर्यकस्य मतः पौत्रो दौहित्रो वामनस्य च ॥ २३
एतस्य हि पिता नागश्चिकुरो नाम मातले ।
नचिराद्वैनतेयेन पञ्चत्वमुपपादितः ॥ २४
ततोऽब्रवीत्प्रीतमना मातलिर्नारदं वचः ।
एष मे रुचितस्तात जामाता भुजगोत्तमः ॥ २५
क्रियतामत्र यत्नो हि प्रीतिमानस्म्यनेन वै ।
अस्य नागपतेर्दातुं प्रियां दुहितरं मुने ॥ २६

इति श्रीमहाभारते उद्योगपर्वणि
एकाधिकशततमोऽध्यायः ॥ १०१ ॥

१०२

नारद उवाच ।

सूतोऽयं मातलिर्नाम शक्रस्य दयितः सुहृत् ।
शुचिः शीलगुणोपेतस्तेजस्वी वीर्यवान्बली ॥ १
शक्रस्यायं सखा चैव मन्त्री सारथिरेव च ।
अल्पान्तरप्रभावश्च वासवेन रणे रणे ॥ २
अयं हरिसहस्रेण युक्तं जैत्रं रथोत्तमम् ।
देवासुरेषु युद्धेषु मनसैव नियच्छति ॥ ३
अनेन विजितानश्वैर्दोर्भ्यां जयति वासवः ।
अनेन प्रहृते पूर्वं बलभित्प्रहरत्युत ॥ ४
अस्य कन्या वरारोहा रूपेणासदृशी भुवि ।
सत्त्वशीलगुणोपेता गुणकेशीति विश्रुता ॥ ५
तस्यास्य यत्नाच्चरतस्त्रैलोक्यममरद्युते ।
सुमुखो भवतः पौत्रो रोचते दुहितुः पतिः ॥ ६
यदि ते रोचते सौम्य भुजगोत्तम माचिरम् ।
क्रियतामार्यक क्षिप्रं बुद्धिः कन्याप्रतिग्रहे ॥ ७
यथा विष्णुकुले लक्ष्मीर्यथा स्वाहा विभावसोः ।
कुले तव तथैवास्तु गुणकेशी सुमध्यमा ॥ ८
पौत्रस्यार्थे भवांस्तस्माद्गुणकेशीं प्रतीच्छतु ।
सदृशीं प्रतिरूपस्य वासवस्य शचीमिव ॥ ९
पितृहीनमपि ह्येनं गुणतो वरयामहे ।
बहुमानाच्च भवतस्तथैवैरावतस्य च ।
सुमुखस्य गुणैश्चैव शीलशौचदमादिभिः ॥ १०
अभिगम्य स्वयं कन्यामयं दातुं समुद्यतः ।
मातलेस्तस्य संमानं कर्तुमर्हो भवानपि ॥ ११

कण्व उवाच ।

स तु दीनः प्रहृष्टश्च प्राह नारदमार्यकः ।
व्रियमाणे तथा पौत्रे पुत्रे च निधनं गते ॥ १२
न मे नैतद्बहुमतं देवर्षे वचनं तव ।
सखा शक्रस्य संयुक्तः कस्यायं नेप्सितो भवेत् ॥
कारणस्य तु दौर्बल्याच्चिन्तयामि महामुने ।
अस्य देहकरस्तात मम पुत्रो महाद्युते ।
भक्षितो वैनतेयेन दुःखार्तास्तेन वै वयम् ॥ १४
पुनरेव च तेनोक्तं वैनतेयेन गच्छता ।
मासेनान्येन सुमुखं भक्षयिष्य इति प्रभो ॥ १५
ध्रुवं तथा तद्भविता जानीमस्तस्य निश्चयम् ।
तेन हर्षः प्रनष्टो मे सुपर्णवचनेन वै ॥ १६
मातलिस्त्वब्रवीदेनं बुद्धिरत्र कृता मया ।
जामातृभावेन वृतः सुमुखस्तव पुत्रजः ॥ १७
सोऽयं मया च सहितो नारदेन च पन्नगः ।
त्रिलोकेशं सुरपतिं गत्वा पश्यतु वासवम् ॥ १८
शेषेणैवास्य कार्येण प्रज्ञास्याम्यहमायुषः ।
सुपर्णस्य विघाते च प्रयतिष्यामि सत्तम । १९
सुमुखश्च मया सार्धं देवेशमभिगच्छतु ।

कार्यसंसाधनार्थाय स्वस्ति तेऽस्तु भुजंगम ॥ २०
ततस्ते सुमुखं गृह्य सर्व एव महौजसः ।
ददृशुः शक्रमासीनं देवराजं महाद्युतिम् ॥ २१
संगत्या तत्र भगवान्विष्णुरासीच्चतुर्भुजः ।
ततस्तत्सर्वमाचख्यौ नारदो मातलिं प्रति ॥ २२
ततः पुरंदरं विष्णुरुवाच भुवनेश्वरम् ।
अमृतं दीयतामस्मै क्रियताममरैः समः ॥ २३
मातलिर्नारदश्चैव सुमुखश्चैव वासव ।
लभन्तां भवतः कामात्काममेतं यथेप्सितम् ॥ २४
पुरंदरोऽथ संचिन्त्य वैनतेयपराक्रमम् ।
विष्णुमेवाब्रवीदेनं भवानेव ददात्विति ॥ २५

विष्णुरुवाच ।

ईशस्त्वमसि लोकानां चराणामचराश्च ये ।
त्वया दत्तमदत्तं कः कर्तुमुत्सहते विभो ॥ २६

कण्व उवाच ।

प्रादाच्छक्रस्ततस्तस्मै पन्नगायायुरुत्तमम् ।
न त्वेनममृतप्राशं चकार बलवृत्रहा ॥ २७
लब्ध्वा वरं तु सुमुखः सुमुखः संबभूव ह ।
कृतदारो यथाकामं जगाम च गृहान्प्रति ॥ २८
नारदस्त्वार्यकश्चैव कृतकार्यौ मुदा युतौ ।
प्रतिजग्मतुरभ्यर्च्य देवराजं महाद्युतिम् ॥ २९

इति श्रीमहाभारते उद्योगपर्वणि
द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

१०३

कण्व उवाच ।

गरुडस्तु शुश्राव यथावृत्तं महाबलः ।
आयुःप्रदानं शक्रेण कृतं नागस्य भारत ॥ १
पक्षवातेन महता रुद्ध्वा त्रिभुवनं खगः ।
सुपर्णः परमक्रुद्धो वासवं समुपाद्रवत् ॥ २

गरुड उवाच ।

भगवन्किमवज्ञानात्क्षुधां प्रति भये मम ।
कामकारवरं दत्त्वा पुनश्चलितवानसि ॥ ३
निसर्गात्सर्वभूतानां सर्वभूतेश्वरेण मे ।
आहारो विहितो धात्रा किमर्थं वार्यते त्वया ॥ ४
वृतश्चैष महानागः स्थापितः समयश्च मे ।
अनेन च मया देव भर्तव्यः प्रसवो महान् ॥ ५
एतस्मिंस्त्वन्यथाभूते नान्यं हिंसितुमुत्सहे ।
क्रीडसे कामकारेण देवराज यथेच्छकम् ॥ ६
सोऽहं प्राणान्विमोक्ष्यामि तथा परिजनो मम ।
ये च भृत्या मम गृहे प्रीतिमान्भव वासव ॥ ७
एतच्चैवाहमर्हामि भूयश्च बलवृत्रहन् ।
त्रैलोक्यस्येश्वरो योऽहं परभृत्यत्वमागतः ॥ ८
त्वयि तिष्ठति देवेश न विष्णुः कारणं मम ।
त्रैलोक्यराज राज्यं हि त्वयि वासव शाश्वतम् ॥ ९
ममापि दक्षस्य सुता जननी कश्यपः पिता ।
अहमप्युत्सहे लोकान्समस्तान्वोढुमञ्जसा ॥ १०
असह्यं सर्वभूतानां ममापि विपुलं बलम् ।
मयापि सुमहत्कर्म कृतं दैतेयविग्रहे ॥ ११
श्रुतश्रीः श्रुतसेनश्च विवस्वान्रोचनामुखः ।
प्रसभः कालकाक्षश्च मयापि दितिजा हताः ॥ १२
यत्तु ध्वजस्थानगतो यत्नात्परिचराम्यहम् ।
वहामि चैवानुजं ते तेन मामवमन्यसे ॥ १३
कोऽन्यो भारसहो ह्यस्ति कोऽन्योऽस्ति बलवत्तरः ।
मया योऽहं विशिष्टः सन्वहामीमं सबान्धवम् ॥
अवज्ञाय तु यत्तेऽहं भोजनाद्व्यपरोपितः ।
तेन मे गौरवं नष्टं त्वत्तश्चास्माच्च वासव ॥ १५
अदित्यां य इमे जाता बलविक्रमशालिनः ।
त्वमेषां किल सर्वेषां विशेषाद्बलवत्तरः ॥ १६
सोऽहं पक्षैकदेशेन वहामि त्वां गतक्लमः ।

विमृश त्वं शनैस्तात को न्वत्र बलवानिति ॥ १७

कण्व उवाच ।

तस्य तद्वचनं श्रुत्वा खगस्योदर्कदारुणम् ।
अक्षोभ्यं क्षोभयंस्तार्क्ष्यमुवाच रथचक्रभृत् ॥ १८
गरुत्मन्मन्यसेऽऽत्मानं बलवन्तं सुदुर्बलम् ।
अलमसत्समक्षं ते स्तोतुमात्मानमण्डज ॥ १९
त्रैलोक्यमपि मे कृत्स्नमशक्तं देहधारणे ।
अहमेवात्मनात्मानं वहामि त्वां च धारये ॥ २०
इमं तावन्ममैकं त्वं बाहुं सव्येतरं वह ।
यद्येनं धारयस्येकं सफलं ते विकत्थितम् ॥ २१
ततः स भगवांस्तस्य स्कन्धे बाहुं समासजत् ।
निपपात स भारार्तो विह्वलो नष्टचेतनः ॥ २२
यावान्हि भारः कृत्स्नायाः पृथिव्याः पर्वतैः सह ।
एकस्या देहशाखायास्तावद्भारममन्यत ॥ २३
न त्वेनं पीडयामास बलेन बलवत्तरः ।
ततो हि जीवितं तस्य न व्यनीनशदच्युतः ॥ २४
विपक्षः स्रस्तकायश्च विचेता विह्वलः खगः ।
मुमोच पत्राणि तदा गुरुभारप्रपीडितः ॥ २५
स विष्णुं शिरसा पक्षी प्रणम्य विनतासुतः ।
विचेता विह्वलो दीनः किंचिद्वचनमब्रवीत् ॥ २६
भगवँल्लोकसारस्य सदृशेन वपुष्मता ।
भुजेन स्वैरमुक्तेन निष्पिष्टोऽस्मि महीतले ॥ २७
क्षन्तुमर्हसि मे देव विह्वलस्याल्पचेतसः ।
बलदाहविदग्धस्य पक्षिणो ध्वजवासिनः ॥ २८
न विज्ञातं बलं देव मया ते परमं विभो ।
तेन मन्याम्यहं वीर्यमात्मनोऽसदृशं परैः ॥ २९
ततश्चक्रे स भगवान्प्रसादं वै गरुत्मतः ।
मैवं भूय इति स्नेहात्तदा चैनमुवाच ह ॥ ३०
तथा त्वमपि गान्धारे यावत्पाण्डुसुतान्रणे ।
नासादयसि तान्वीरांस्तावज्जीवसि पुत्रक ॥ ३१
भीमः प्रहरतां श्रेष्ठो वायुपुत्रो महाबलः ।
धनंजयश्चेन्द्रसुतो न हन्यातां तु कं रणे ॥ ३२
विष्णुर्वायुश्च शक्रश्च धर्मस्तौ चाश्विनावुभौ ।
एते देवास्त्वया केन हेतुना शक्यमीक्षितुम् ॥ ३३
तदलं ते विरोधेन शमं गच्छ नृपात्मज ।
वासुदेवेन तीर्थेन कुलं रक्षितुमर्हसि ॥ ३४
प्रत्यक्षो ह्यस्य सर्वस्य नारदोऽयं महातपाः ।
माहात्म्यं यत्तदा विष्णोर्योऽयं चक्रगदाधरः ॥ ३५

वैशंपायन उवाच ।

दुर्योधनस्तु तच्छ्रुत्वा निःश्वसन्भृकुटीमुखः ।
राधेयमभिसंप्रेक्ष्य जहास स्वनवत्तदा ॥ ३६
कदर्थीकृत्य तद्वाक्यमृषेः कण्वस्य दुर्मतिः ।
ऊरुं गजकराकारं ताडयन्निदमब्रवीत् ॥ ३७
यथैवेश्वरसृष्टोऽस्मि यद्भावि या च मे गतिः ।
तथा महर्षे वर्तामि किं प्रलापः करिष्यति ॥ ३८

इति श्रीमहाभारते उद्योगपर्वणि
त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

१०४

जनमेजय उवाच ।

अनर्थे जातनिर्बन्धं परार्थे लोभमोहितम् ।
अनार्यकेष्वभिरतं मरणे कृतनिश्चयम् ॥ १
ज्ञातीनां दुःखकर्तारं बन्धूनां शोकवर्धनम् ।
सुहृदां क्लेशदातारं द्विषतां हर्षवर्धनम् ॥ २
कथं नैनं विमार्गस्थं वारयन्तीह बान्धवाः ।
सौहृदाद्वा सुहृत्स्निग्धो भगवान्वा पितामहः ॥ ३

वैशंपायन उवाच ।

उक्तं भगवता वाक्यमुक्तं भीष्मेण यत्क्षमम् ।
उक्तं बहुविधं चैव नारदेनापि तच्छृणु ॥ ४

नारद उवाच ।

दुर्लभो वै सुहृच्छ्रोता दुर्लभश्च हितः सुहृत् ।

तिष्ठते हि सुहृद्यत्र न बन्धुस्तत्र तिष्ठति ॥ ५
श्रोतव्यमपि पश्यामि सुहृदां कुरुनन्दन ।
न कर्तव्यश्च निर्बन्धो निर्बन्धो हि सुदारुणः ॥ ६
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यथा निर्बन्धतः प्राप्तो गालवेन पराजयः ॥ ७
विश्वामित्रं तपस्यन्तं धर्मो जिज्ञासया पुरा ।
अभ्यगच्छत्स्वयं भूत्वा वसिष्ठो भगवानृषिः ॥ ८
सप्तर्षीणामन्यतमं वेषमास्थाय भारत ।
बुभुक्षुः क्षुधितो राजन्नाश्रमं कौशिकस्य ह ॥ ९
विश्वामित्रोऽथ संभ्रान्तः श्रपयामास वै चरुम् ।
परमान्नस्य यत्नेन न च स प्रत्यपालयत् ॥ १०
अन्नं तेन यदा भुक्तमन्यैर्दत्तं तपस्विभिः ।
अथ गृह्यान्नमत्युष्णं विश्वामित्रोऽभ्युपागमत् ॥ ११
भुक्तं मे तिष्ठ तावत्त्वमित्युक्त्वा भगवान्ययौ ।
विश्वामित्रस्ततो राजन्स्थित एव महाद्युतिः ॥ १२
भक्तं प्रगृह्य मूर्ध्ना तद्बाहुभ्यां पार्श्वतोऽगमत् ।
स्थितः स्थाणुरिवाभ्याशे निश्चेष्टो मारुताशनः ॥
तस्य शुश्रूषणे यत्नमकरोद्गालवो मुनिः ।
गौरवाद्बहुमानाच्च हार्देन प्रियकाम्यया ॥ १४
अथ वर्षशते पूर्णे धर्मः पुनरुपागमत् ।
वासिष्ठं वेषमास्थाय कौशिकं भोजनेप्सया ॥ १५
स दृष्ट्वा शिरसा भक्तं ध्रियमाणं महर्षिणा ।
तिष्ठता वायुभक्षेण विश्वामित्रेण धीमता ॥ १६
प्रतिगृह्य ततो धर्मस्तथैवोष्णं तथा नवम् ।
भुक्त्वा प्रीतोऽस्मि विप्रर्षे तमुक्त्वा स मुनिर्गतः ॥
क्षत्रभावादपगतो ब्राह्मणत्वमुपागतः ।
धर्मस्य वचनात्प्रीतो विश्वामित्रस्तदाभवत् ॥ १८
विश्वामित्रस्तु शिष्यस्य गालवस्य तपस्विनः ।
शुश्रूषया च भक्त्या च प्रीतिमानित्युवाच तम् ।
अनुज्ञातो मया वत्स यथेष्टं गच्छ गालव ॥ १९
इत्युक्तः प्रत्युवाचेदं गालवो मुनिसत्तमम् ।
प्रीतो मधुरया वाचा विश्वामित्रं महाद्युतिम् ॥ २०
दक्षिणां कां प्रयच्छामि भवते गुरुकर्मणि ।
दक्षिणाभिरुपेतं हि कर्म सिध्यति मानवम् ॥ २१
दक्षिणानां हि सृष्टानामपवर्गेण भुज्यते ।
स्वर्गे क्रतुफलं सद्भिर्दक्षिणा शान्तिरुच्यते ।
किमाहरामि गुर्वर्थं ब्रवीतु भगवानिति ॥ २२
जानमानस्तु भगवाञ्जितः शुश्रूषणेन च ।
विश्वामित्रस्तमसकृद्गच्छ गच्छेत्यचोदयत् ॥ २३
असकृद्गच्छ गच्छेति विश्वामित्रेण भाषितः ।
किं ददानीति बहुशो गालवः प्रत्यभाषत ॥ २४
निर्बन्धतस्तु बहुशो गालवस्य तपस्विनः ।
किंचिदागतसंरम्भो विश्वामित्रोऽब्रवीदिदम् ॥ २५
एकतःश्यामकर्णानां शतान्यष्टौ ददस्व मे ।
हयानां चन्द्रशुभ्राणां गच्छ गालव माचिरम् ॥ २६

इति श्रीमहाभारते उद्योगपर्वणि
चतुरधिकशततमोऽध्यायः ॥ १०४ ॥

१०५

नारद उवाच ।

एवमुक्तस्तदा तेन विश्वामित्रेण धीमता ।
नास्ते न शेते नाहारं कुरुते गालवस्तदा ॥ १
त्वगस्थिभूतो हरिणश्चिन्ताशोकपरायणः ।
शोचमानोऽतिमात्रं स दह्यमानश्च मन्युना ॥ २
कुतः पुष्टानि मित्राणि कुतोऽर्थाः संचयः कुतः ।
हयानां चन्द्रशुभ्राणां शतान्यष्टौ कुतो मम ॥ ३
कुतो मे भोजनश्रद्धा सुखश्रद्धा कुतश्च मे ।
श्रद्धा मे जीवितस्यापि छिन्ना किं जीवितेन मे ॥
अहं पारं समुद्रस्य पृथिव्या वा परं परात् ।
गत्वात्मानं विमुञ्चामि किं फलं जीवितेन मे ॥ ५
अधनस्याकृतार्थस्य त्यक्तस्य विविधैः फलैः ।

ऋणं धारयमाणस्य कुतः सुखमनीहया ॥ ६
सुहृदां हि धनं भुक्त्वा कृत्वा प्रणयमीप्सितम् ।
प्रतिकर्तुमशक्तस्य जीवितान्मरणं वरम् ॥ ७
प्रतिश्रुत्य करिष्येति कर्तव्यं तदकुर्वतः ।
मिथ्यावचनदग्धस्य इष्टापूर्तं प्रणश्यति ॥ ८
न रूपमनृतस्यास्ति नानृतस्यास्ति संततिः ।
नानृतस्याधिपत्यं च कुत एव गतिः शुभा ॥ ९
कुतः कृतघ्नस्य यशः कुतः स्थानं कुतः सुखम् ।
अश्रद्धेयः कृतघ्नो हि कृतघ्ने नास्ति निष्कृतिः ॥
न जीवत्यधनः पापः कुतः पापस्य तन्त्रणम् ।
पापो ध्रुवमवाप्नोति विनाशं नाशयन्कृतम् ॥ ११
सोऽहं पापः कृतघ्नश्च कृपणश्चानृतोऽपि च ।
गुरोर्यः कृतकार्यः संस्तत्करोमि न भाषितम् ।
सोऽहं प्राणान्विमोक्ष्यामि कृत्वा यत्नमनुत्तमम् ॥
अर्थना न मया काचित्कृतपूर्वा दिवौकसाम् ।
मानयन्ति च मां सर्वे त्रिदशा यज्ञसंस्तरे ॥ १३
अहं तु विबुधश्रेष्ठं देवं त्रिभुवनेश्वरम् ।
विष्णुं गच्छाम्यहं कृष्णं गतिं गतिमतां वरम् ॥
भोगा यस्मात्प्रतिष्ठन्ते व्याप्य सर्वान्सुरासुरान् ।
प्रयतो द्रष्टुमिच्छामि महायोगिनमव्ययम् ॥ १५
एवमुक्ते सखा तस्य गरुडो विनतात्मजः ।
दर्शयामास तं प्राह संहृष्टः प्रियकाम्यया ॥ १६
सुहृद्भवान्मम मतः सुहृदां च मतः सुहृत् ।
ईप्सितेनाभिलापेण योक्तव्यो विभवे सति ॥ १७
विभवश्चास्ति मे विप्र वासवावरजो द्विज ।
पूर्वमुक्तस्त्वदर्थं च कृतः कामश्च तेन मे ॥ १८
स भवानेतु गच्छाव नयिष्ये त्वां यथासुखम् ।
देशं पारं पृथिव्या वा गच्छ गालव माचिरम् ॥

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥

१०६

सुपर्ण उवाच ।

अनुशिष्टोऽस्मि देवेन गालवाज्ञातयोनिना ।
ब्रूहि कामनुसंयामि द्रष्टुं प्रथमतो दिशम् ॥ १
पूर्वां वा दक्षिणां वाहमथ वा पश्चिमां दिशम् ।
उत्तरां वा द्विजश्रेष्ठ कुतो गच्छामि गालव ॥ २
यस्यामुदयते पूर्वं सर्वलोकप्रभावनः ।
सविता यत्र संध्यायां साध्यानां वर्तते तपः ॥ ३
यस्यां पूर्वं मतिर्जाता यया व्याप्तमिदं जगत् ।
चक्षुषी यत्र धर्मस्य यत्र चैष प्रतिष्ठितः ॥ ४
हुतं यतोमुखैर्हव्यं सर्पते सर्वतोदिशम् ।
एतद्द्वारं द्विजश्रेष्ठ दिवसस्य तथाध्वनः ॥ ५
यत्र पूर्वं प्रसूता वै दाक्षायण्यः प्रजाः स्त्रियः ।
यस्यां दिशि प्रवृद्धाश्च कश्यपस्यात्मसंभवाः ॥ ६
यतोमूला सुराणां श्रीर्यत्र शक्रोऽभ्यषिच्यत ।
सुरराज्येन विप्रर्षे देवैश्चात्र तपश्चितम् ॥ ७
एतस्मात्कारणाद्ब्रह्मन्पूर्वेत्येषा दिगुच्यते ।
यस्मात्पूर्वतरे काले पूर्वमेषावृता सुरैः ॥ ८
अत एव च पूर्वेषां पूर्वामाशामवेक्षताम् ।
पूर्वकार्याणि कार्याणि दैवानि सुखमीप्सता ॥ ९
अत्र वेदाञ्जगौ पूर्वं भगवाँल्लोकभावनः ।
अत्रैवोक्ता सवित्रासीत्सावित्री ब्रह्मवादिषु ॥ १०
अत्र दत्तानि सूर्येण यजूंषि द्विजसत्तम ।
अत्र लब्धवरैः सोमः सुरैः क्रतुषु पीयते ॥ ११
अत्र तृप्ता हुतवहाः स्वां योनिमुपभुञ्जते ।
अत्र पातालमाश्रित्य वरुणः श्रियमाप च ॥ १२
अत्र पूर्वं वसिष्ठस्य पौराणस्य द्विजर्षभ ।
सूतिश्चैव प्रतिष्ठा च निधनं च प्रकाशते ॥ १३
ओंकारस्यात्र जायन्ते सूतयो दशतीर्दश ।
पिबन्ति मुनयो यत्र हविर्धाने स्म सोमपाः ॥ १४

प्रोक्षिता यत्र बहवो वराहाद्या मृगा वने ।
शक्रेण यत्र भागार्थे दैवतेषु प्रकल्पिताः ॥ १५
अत्राहिताः कृतघ्नाश्च मानुषाश्चासुराश्च ये ।
उदयंस्तान्हि सर्वान्वै क्रोधाद्धन्ति विभावसुः ॥
एतद्द्वारं त्रिलोकस्य स्वर्गस्य च सुखस्य च ।
एष पूर्वो दिशाभागो विशावैनं यदीच्छसि ॥ १७
प्रियं कार्यं हि मे तस्य यस्यास्मि वचने स्थितः ।
ब्रूहि गालव यास्यामि शृणु चाप्यपरां दिशम् ॥

इति श्रीमहाभारते उद्योगपर्वणि
षडधिकशततमोऽध्यायः ॥ १०६ ॥

१०७

सुपर्ण उवाच ।

इयं विवस्वता पूर्वं श्रौतेन विधिना किल ।
गुरवे दक्षिणा दत्ता दक्षिणेत्युच्यतेऽथ दिक् ॥ १
अत्र लोकत्रयस्यास्य पितृपक्षः प्रतिष्ठितः ।
अत्रोष्मपानां देवानां निवासः श्रूयते द्विज ॥ २
अत्र विश्वे सदा देवाः पितृभिः सार्धमासते ।
इज्यमानाः स्म लोकेषु संप्राप्तास्तुल्यभागताम् ॥ ३
एतद्द्वितीयं धर्मस्य द्वारमाचक्षते द्विज ।
त्रुटिशो लवशश्चात्र गण्यते कालनिश्चयः ॥ ४
अत्र देवर्षयो नित्यं पितृलोकर्षयस्तथा ।
तथा राजर्षयः सर्वे निवसन्ति गतव्यथाः ॥ ५
अत्र धर्मश्च सत्यं च कर्म चात्र निशाम्यते ।
गतिरेषा द्विजश्रेष्ठ कर्मणात्मावसादिनः ॥ ६
एषा दिक्सा द्विजश्रेष्ठ यां सर्वः प्रतिपद्यते ।
वृता त्वनवबोधेन सुखं तेन न गम्यते ॥ ७
नैर्ऋतानां सहस्राणि बहून्यत्र द्विजर्षभ ।
सृष्टानि प्रतिकूलानि द्रष्टव्यान्यकृतात्मभिः ॥ ८
अत्र मन्दरकुञ्जेषु विप्रर्षिसदनेषु च ।
गन्धर्वा गान्ति गाथा वै चित्तबुद्धिहरा द्विज ॥ ९
अत्र सामानि गाथाभिः श्रुत्वा गीतानि रैवतः ।
गतदारो गतामात्यो गतराज्यो वनं गतः ॥ १०
अत्र सावर्णिना चैव यवक्रीतात्मजेन च ।
मर्यादा स्थापिता ब्रह्मन्यां सूर्यो नातिवर्तते ॥ ११
अत्र राक्षसराजेन पौलस्त्येन महात्मना ।
रावणेन तपश्चीर्त्वा सुरेभ्योऽमरता वृता ॥ १२
अत्र वृत्तेन वृत्रोऽपि शक्रशत्रुत्वमीयिवान् ।
अत्र सर्वासवः प्राप्ताः पुनर्गच्छन्ति पञ्चधा ॥ १३
अत्र दुष्कृतकर्माणो नराः पच्यन्ति गालव ।
अत्र वैतरणी नाम नदी वितरणैर्वृता ।
अत्र गत्वा सुखस्यान्तं दुःखस्यान्तं प्रपद्यते ॥ १४
अत्रावृत्तो दिनकरः क्षरते सुरसं पयः ।
काष्ठां चासाद्य धानिष्ठां हिममुत्सृजते पुनः ॥ १५
अत्राहं गालव पुरा क्षुधार्तः परिचिन्तयन् ।
लब्धवान्युध्यमानौ द्वौ बृहन्तौ गजकच्छपौ ॥ १६
अत्र शक्रधनुर्नाम सूर्याज्जातो महानृषिः ।
विदुर्यं कपिलं देवं येनार्ताः सगरात्मजाः ॥ १७
अत्र सिद्धाः शिवा नाम ब्राह्मणा वेदपारगाः ।
अधीत्य सखिलान्वेदानालभन्ते यमक्षयम् ॥ १८
अत्र भोगवती नाम पुरी वासुकिपालिता ।
तक्षकेण च नागेन तथैवैरावतेन च ॥ १९
अत्र निर्याणकालेषु तमः संप्राप्यते महत् ।
अभेद्यं भास्करेणापि स्वयं वा कृष्णवर्त्मना ॥ २०
एष तस्यापि ते मार्गः परितापस्य गालव ।
ब्रूहि मे यदि गन्तव्यं प्रतीचीं शृणु वा मम ॥

इति श्रीमहाभारते उद्योगपर्वणि
सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

१०८

सुपर्ण उवाच ।

इयं दिग्दयिता राज्ञो वरुणस्य तु गोपतेः ।

सदा सलिलराजस्य प्रतिष्ठा चादिरेव च ॥ १
अत्र पश्चादहः सूर्यो विसर्जयति भाः स्वयम् ।
पश्चिमेत्यभिविख्याता दिगियं द्विजसत्तम ॥ २
यादसामत्र राज्येन सलिलस्य च गुप्तये ।
कश्यपो भगवान्देवो वरुणं स्माभ्यषेचयत् ॥ ३
अत्र पीत्वा समस्तान्वै वरुणस्य रसांस्तु षट् ।
जायते तरुणः सोमः शुक्लस्यादौ तमिस्रहा ॥ ४
अत्र पश्चात्कृता दैत्या वायुना संयतास्तदा ।
निःश्वसन्तो महानागैरर्दिताः सुषुपुर्द्विज ॥ ५
अत्र सूर्यं प्रणयिनं प्रतिगृह्णाति पर्वतः ।
अस्तो नाम यतः संध्या पश्चिमा प्रतिसर्पति ॥ ६
अतो रात्रिश्च निद्रा च निर्गता दिवसक्षये ।
जायते जीवलोकस्य हर्तुमर्धमिवायुषः ॥ ७
अत्र देवीं दितिं सुप्तामात्मप्रसवधारिणीम् ।
विगर्भामकरोच्छक्रो यत्र जातो मरुद्गणः ॥ ८
अत्र मूलं हिमवतो मन्दरं याति शाश्वतम् ।
अपि वर्षसहस्रेण न चास्यान्तोऽधिगम्यते ॥ ९
अत्र काञ्चनशैलस्य काञ्चनाम्बुवहस्य च ।
उदधेस्तीरमासाद्य सुरभिः क्षरते पयः ॥ १०
अत्र मध्ये समुद्रस्य कबन्धः प्रतिदृश्यते ।
स्वर्भानोः सूर्यकल्पस्य सोमसूर्यौ जिघांसतः ॥ ११
सुवर्णशिरसोऽप्यत्र हरिरोम्णः प्रगायतः ।
अदृश्यस्याप्रमेयस्य श्रूयते विपुलो ध्वनिः ॥ १२
अत्र ध्वजवती नाम कुमारी हरिमेधसः ।
आकाशे तिष्ठ तिष्ठेति तस्थौ सूर्यस्य शासनात् ॥
अत्र वायुस्तथा वह्निरापः खं चैव गालव ।
आह्निकं चैव नैशं च दुःखस्पर्शं विमुञ्चति ।
अतःप्रभृति सूर्यस्य तिर्यगावर्तते गतिः ॥ १४
अत्र ज्योतींषि सर्वाणि विशन्त्यादित्यमण्डलम् ।
अष्टाविंशतिरात्रं च चङ्क्रम्य सह भानुना ।
निष्पतन्ति पुनः सूर्यात्सोमसंयोगयोगतः ॥ १५
अत्र नित्यं स्रवन्तीनां प्रभवः सागरोदयः ।
अत्र लोकत्रयस्यापस्तिष्ठन्ति वरुणाश्रयाः ॥ १६
अत्र पन्नगराजस्याप्यनन्तस्य निवेशनम् ।
अनादिनिधनस्यात्र विष्णोः स्थानमनुत्तमम् ॥ १७
अत्रानलसखस्यापि पवनस्य निवेशनम् ।
महर्षेः कश्यपस्यात्र मारीचस्य निवेशनम् ॥ १८
एष ते पश्चिमो मार्गो दिग्द्वारेण प्रकीर्तितः ।
ब्रूहि गालव गच्छावो बुद्धिः का द्विजसत्तम ॥ १९

इति श्रीमहाभारते उद्योगपर्वणि
अष्टाधिकशततमोऽध्यायः ॥ १०८ ॥

१०९

सुपर्ण उवाच ।

यस्मादुत्तार्यते पापाद्यस्मान्निःश्रेयसोऽश्नुते ।
तस्मादुत्तारणफलादुत्तरेत्युच्यते बुधैः ॥ १
उत्तरस्य हिरण्यस्य परिवापस्य गालव ।
मार्गः पश्चिमपूर्वाभ्यां दिग्भ्यां वै मध्यमः स्मृतः ॥
अस्यां दिशि वरिष्ठायामुत्तरायां द्विजर्षभ ।
नासौम्यो नाविधेयात्मा नाधर्म्यो वसते जनः ॥ ३
अत्र नारायणः कृष्णो जिष्णुश्चैव नरोत्तमः ।
बदर्यामाश्रमपदे तथा ब्रह्मा च शाश्वतः ॥ ४
अत्र वै हिमवत्पृष्ठे नित्यमास्ते महेश्वरः ।
अत्र राज्येन विप्राणां चन्द्रमाश्चाभ्यषिच्यत ॥ ५
अत्र गङ्गां महादेवः पतन्तीं गगनाच्च्युताम् ।
प्रतिगृह्य ददौ लोके मानुषे ब्रह्मवित्तम ॥ ६
अत्र देव्या तपस्तप्तं महेश्वरपरीप्सया ।
अत्र कामश्च रोषश्च शैलश्चोमा च संबभुः ॥ ७
अत्र राक्षसयक्षाणां गन्धर्वाणां च गालव ।
आधिपत्येन कैलासे धनदोऽप्यभिषेचितः ॥ ८
अत्र चैत्ररथं रम्यमत्र वैखानसाश्रमः ।

अत्र मन्दाकिनी चैव मन्दरश्च द्विजर्षभ ॥ ९
अत्र सौगन्धिकवनं नैर्ऋतैरभिरक्ष्यते ।
शाड्वलं कदलीस्कन्धमत्र संतानका नगाः ॥ १०
अत्र संयमनित्यानां सिद्धानां स्वैरचारिणाम् ।
विमानान्यनुरूपाणि कामभोग्यानि गालव ॥ ११
अत्र ते ऋषयः सप्त देवी चारुन्धती तथा ।
अत्र तिष्ठति वै स्वातिरत्रास्या उदयः स्मृतः ॥ १२
अत्र यज्ञं समारुह्य ध्रुवं स्थाता पितामहः ।
ज्योतींषि चन्द्रसूर्यौ च परिवर्तन्ति नित्यशः ॥ १३
अत्र गायन्तिकाद्वारं रक्षन्ति द्विजसत्तमाः ।
धामा नाम महात्मानो मुनयः सत्यवादिनः ॥ १४
न तेषां ज्ञायते सूतिर्नाकृतिर्न तपश्चितम् ।
परिवर्तसहस्राणि कामभोग्यानि गालव ॥ १५
यथा यथा प्रविशति तस्मात्परतरं नरः ।
तथा तथा द्विजश्रेष्ठ प्रविलीयति गालव ॥ १६
न तत्केनचिदन्येन गतपूर्वं द्विजर्षभ ।
ऋते नारायणं देवं नरं वा जिष्णुमव्ययम् ॥ १७
अत्र कैलासमित्युक्तं स्थानमैलविलस्य तत् ।
अत्र विद्युत्प्रभा नाम जज्ञिरेऽप्सरसो दश ॥ १८
अत्र विष्णुपदं नाम क्रमता विष्णुना कृतम् ।
त्रिलोकविक्रमे ब्रह्मन्नुत्तरां दिशमाश्रितम् ॥ १९
अत्र राज्ञा मरुत्तेन यज्ञेनेष्टं द्विजोत्तम ।
उशीरबीजे विप्रर्षे यत्र जाम्बूनदं सरः ॥ २०
जीमूतस्यात्र विप्रर्षेरुपतस्थे महात्मनः ।
साक्षाद्धैमवतः पुण्यो विमलः कमलाकरः ॥ २१
ब्राह्मणेषु च यत्कृत्स्नं स्वन्तं कृत्वा धनं महत् ।
वव्रे वनं महर्षिः स जैमूतं तद्वनं ततः ॥ २२
अत्र नित्यं दिशापालाः सायं प्रातर्द्विजर्षभ ।
कस्य कार्यं किमिति वै परिक्रोशन्ति गालव ॥ २३
एवमेषा द्विजश्रेष्ठ गुणैरन्यैर्दिगुत्तरा ।
उत्तरेति परिख्याता सर्वकर्मसु चोत्तरा ॥ २४
एता विस्तरशस्तात तव संकीर्तिता दिशः ।
चतस्रः क्रमयोगेन कामाशां गन्तुमिच्छसि ॥ २५
उद्यतोऽहं द्विजश्रेष्ठ तव दर्शयितुं दिशः ।
पृथिवीं चाखिलां ब्रह्मंस्तस्मादारोह मां द्विज ॥ २६

इति श्रीमहाभारते उद्योगपर्वणि
नवाधिकशततमोऽध्यायः ॥ १०९ ॥

११०

गालव उवाच ।

गरुत्मन्भुजगेन्द्रारे सुपर्ण विनतात्मज ।
नय मां तार्क्ष्य पूर्वेण यत्र धर्मस्य चक्षुषी ॥ १
पूर्वमेतां दिशं गच्छ या पूर्वं परिकीर्तिता ।
दैवतानां हि सांनिध्यमत्र कीर्तितवानसि ॥ २
अत्र सत्यं च धर्मश्च त्वया सम्यक्प्रकीर्तितः ।
इच्छेयं तु समागन्तुं समस्तैर्दैवतैरहम् ।
भूयश्च तान्सुरान्द्रष्टुमिच्छेयमरुणानुज ॥ ३

नारद उवाच ।

तमाह विनतासूनुरारोहस्वेति वै द्विजम् ।
आरुरोहाथ स मुनिर्गरुडं गालवस्तदा ॥ ४

गालव उवाच ।

क्रममाणस्य ते रूपं दृश्यते पन्नगाशन ।
भास्करस्येव पूर्वाह्णे सहस्रांशोर्विवस्वतः ॥ ५
पक्षवातप्रणुन्नानां वृक्षाणामनुगामिनाम् ।
प्रस्थितानामिव समं पश्यामीह गतिं खग ॥ ६
ससागरवनामुर्वीं सशैलवनकाननाम् ।
आकर्षन्निव चाभासि पक्षवातेन खेचर ॥ ७
समीननागनक्रं च खमिवारोप्यते जलम् ।
वायुना चैव महता पक्षवातेन चानिशम् ॥ ८
तुल्यरूपाननान्मत्स्यांस्तिमिमत्स्यांस्तिमिंगिलान् ।
नागांश्च नरवक्त्रांश्च पश्याम्युन्मथितानिव ॥ ९

महार्णवस्य च रवैः श्रोत्रे मे बधिरीकृते ।
न शृणोमि न पश्यामि नात्मनो वेद्मि कारणम् ॥
शनैः साधु भवान्यातु ब्रह्महत्यामनुस्मरन् ।
न दृश्यते रविस्तात न दिशो न च खं खग ॥ ११
तम एव तु पश्यामि शरीरं ते न लक्षये ।
मणीव जात्यौ पश्यामि चक्षुषी तेऽहमण्डज ॥ १२
शरीरे तु न पश्यामि तव चैवात्मनश्च ह ।
पदे पदे तु पश्यामि सलिलादग्निमुत्थितम् ॥ १३
स मे निर्वाप्य सहसा चक्षुषी शाम्यते पुनः
तन्निवर्त महान्कालो गच्छतो विनतात्मज ॥ १४
न मे प्रयोजनं किंचिद्गमने पन्नगाशन ।
संनिवर्त महावेग न वेगं विषहामि ते ॥ १५
गुरवे संश्रुतानीह शतान्यष्टौ हि वाजिनाम् ।
एकतःश्यामकर्णानां शुभ्राणां चन्द्रवर्चसाम् ॥ १६
तेषां चैवापवर्गाय मार्गं पश्यामि नाण्डज ।
ततोऽयं जीवितत्यागे दृष्टो मार्गो मयात्मनः ॥ १७
नैव मेऽस्ति धनं किंचिन्न धनेनान्वितः सुहृत् ।
न चार्थेनापि महता शक्यमेतद्व्यपोहितुम् ॥ १८

नारद उवाच ।

एवं बहु च दीनं च ब्रुवाणं गालवं तदा ।
प्रत्युवाच व्रजन्नेव प्रहसन्विनतात्मजः ॥ १९
नातिप्रज्ञोऽसि विप्रर्षे योऽऽत्मानं त्यक्तुमिच्छसि ।
न चापि कृत्रिमः कालः कालो हि परमेश्वरः ॥
किमहं पूर्वमेवेह भवता नाभिचोदितः ।
उपायोऽत्र महानस्ति येनैतदुपपद्यते ॥ २१
तदेष ऋषभो नाम पर्वतः सागरोरसि ।
अत्र विश्रम्य भुक्त्वा च निवर्तिष्याव गालव ॥ २२

इति श्रीमहाभारते उद्योगपर्वणि
दशाधिकशततमोऽध्यायः ॥ ११० ॥

१११

नारद उवाच ।

ऋषभस्य ततः शृङ्गे निपत्य द्विजपक्षिणौ ।
शाण्डिलीं ब्राह्मणीं तत्र ददृशाते तपोन्विताम् ॥ १
अभिवाद्य सुपर्णस्तु गालवश्चाभिपूज्य ताम् ।
तया च स्वागतेनोक्तौ विष्टरे संनिषीदतुः ॥ २
सिद्धमन्नं तया क्षिप्रं बलिमन्त्रोपबृंहितम् ।
भुक्त्वा तृप्तावुभौ भूमौ सुप्तौ तावन्नमोहितौ ॥ ३
मुहूर्तात्प्रतिबुद्धस्तु सुपर्णो गमनेप्सया ।
अथ भ्रष्टतनूजाङ्गमात्मानं ददृशे खगः ॥ ४
मांसपिण्डोपमोऽभूत्स मुखपादान्वितः खगः ।
गालवस्तं तथा दृष्ट्वा विषण्णः पर्यपृच्छत ॥ ५
किमिदं भवता प्राप्तमिहागमनजं फलम् ।
वासोऽयमिह कालं तु कियन्तं नौ भविष्यति ॥ ६
किं नु ते मनसा ध्यातमशुभं धर्मदूषणम् ।
न ह्ययं भवतः स्वल्पो व्यभिचारो भविष्यति ॥ ७
सुपर्णोऽथाब्रवीद्विप्रं प्रध्यातं वै मया द्विज ।
इमां सिद्धामितो नेतुं तत्र यत्र प्रजापतिः ॥ ८
यत्र देवो महादेवो यत्र विष्णुः सनातनः ।
यत्र धर्मश्च यज्ञश्च तत्रेयं निवसेदिति ॥ ९
सोऽहं भगवतीं याचे प्रणतः प्रियकाम्यया ।
मयैतन्नाम प्रध्यातं मनसा शोचता किल ॥ १०
तदेवं बहुमानात्ते मयेहानीप्सितं कृतम् ।
सुकृतं दुष्कृतं वा त्वं माहात्म्यात्क्षन्तुमर्हसि ॥ ११
सा तौ तदाब्रवीत्तुष्टा पतगेन्द्रद्विजर्षभौ ।
न भेतव्यं सुपर्णोऽसि सुपर्ण त्यज संभ्रमम् ॥ १२
निन्दितास्मि त्वया वत्स न च निन्दां क्षमाम्यहम् ।
लोकेभ्यः स परिभ्रश्येद्यो मां निन्देत पापकृत् ॥ १३
हीनयालक्षणैः सर्वैस्तथानिन्दितया मया ।
आचारं प्रतिगृह्णन्त्या सिद्धिः प्राप्तेयमुत्तमा ॥ १४

आचाराल्लभते धर्ममाचाराल्लभते धनम् ।
आचाराच्छ्रियमाप्नोति आचारो हन्त्यलक्षणम् ॥ १५
तदायुष्मन्खगपते यथेष्टं गम्यतामितः ।
न च ते गर्हणीयापि गर्हितव्याः स्त्रियः कचित् ॥ १६
भवितासि यथापूर्वं बलवीर्यसमन्वितः ।
बभूवतुस्ततस्तस्य पक्षौ द्रविणवत्तरौ ॥ १७
अनुज्ञातश्च शाण्डिल्या यथागतमुपागमत् ।
नैव चासादयामास तथारूपां स्तुरंगमान् ॥ १८
विश्वामित्रोऽथ तं दृष्ट्वा गालवं चाध्वनि स्थितम् ।
उवाच वदतां श्रेष्ठो वैनतेयस्य संनिधौ ॥ १९
यस्त्वया स्वयमेवार्थः प्रतिज्ञातो मम द्विज ।
तस्य कालोऽपवर्गस्य यथा वा मन्यते भवान् ॥ २०
प्रतीक्षिष्याम्यहं कालमेतावन्तं तथा परम् ।
यथा संसिध्यते विप्र स मार्गस्तु निशम्यताम् ॥ २१
सुपर्णोऽथाब्रवीद्दीनं गालवं भृशदुःखितम् ।
प्रत्यक्षं खल्विदानीं मे विश्वामित्रो यदुक्तवान् ॥ २२
तदागच्छ द्विजश्रेष्ठ मन्त्रयिष्याव गालव ।
नादत्त्वा गुरवे शक्यं कृत्स्नमर्थं त्वयासितुम् ॥ २३

इति श्रीमहाभारते उद्योगपर्वणि
एकादशाधिकशततमोऽध्यायः ॥ १११ ॥

११२

नारद उवाच ।

अथाह गालवं दीनं सुपर्णः पततां वरः ।
निर्मितं वह्निना भूमौ वायुना वैधितं तथा ।
यस्माद्धिरण्मयं सर्वं हिरण्यं तेन चोच्यते ॥ १
धत्ते धारयते चेदमेतस्मात्कारणाद्धनम् ।
तदेतत्त्रिषु लोकेषु धनं तिष्ठति शाश्वतम् ॥ २
नित्यं प्रोष्ठपदाभ्यां च शुक्रे धनपतौ तथा ।
मनुष्येभ्यः समादत्ते शुक्रश्चित्तार्जितं धनम् ॥ ३
अजैकपादहिर्बुध्न्यै रक्ष्यते धनदेन च ।
एवं न शक्यते लब्धुमलब्धव्यं द्विजर्षभ ॥ ४
ऋते च धनमश्वानां नावाप्तिर्विद्यते तव ।
अर्थं याचात्र राजानं कंचिद्राजर्षिवंशजम् ।
अपीड्य राजा पौरान्हि यो नौ कुर्यात्कृतार्थिनौ ॥ ५
अस्ति सोमान्ववाये मे जातः कश्चिन्नृपः सखा ।
अभिगच्छावहे तं वै तस्यास्ति विभवो भुवि ॥ ६
ययातिर्नाम राजर्षिर्नाहुषः सत्यविक्रमः ।
स दास्यति मया चोक्तो भवता चार्थितः स्वयम् ॥ ७
विभवश्चास्य सुमहानासीद्धनपतेरिव ।
एवं स तु धनं विद्वान्दानेनैव व्यशोधयत् ॥ ८
तथा तौ कथयन्तौ च चिन्तयन्तौ च यत्क्षमम् ।
प्रतिष्ठाने नरपतिं ययातिं प्रत्युपस्थितौ ॥ ९
प्रतिगृह्य च सत्कारमर्घादिं भोजनं वरम् ।
पृष्टश्चागमने हेतुमुवाच विनतासुतः ॥ १०
अयं मे नाहुष सखा गालवस्तपसो निधिः ।
विश्वामित्रस्य शिष्योऽभूद्वर्षाण्ययुतशो नृप ॥ ११
सोऽयं तेनाभ्यनुज्ञात उपकारेप्सया द्विजः ।
तमाह भगवान्कां ते ददानि गुरुदक्षिणाम् ॥ १२
असकृत्तेन चोक्तेन किंचिदागतमन्युना ।
अयमुक्तः प्रयच्छेति जानता विभवं लघु ॥ १३
एकतःश्यामकर्णानां शुभ्राणां शुद्धजन्मनाम् ।
अष्टौ शतानि मे देहि हयानां चन्द्रवर्चसाम् ॥ १४
गुर्वर्थो दीयतामेष यदि गालव मन्यसे ।
इत्येवमाह सक्रोधो विश्वामित्रस्तपोधनः ॥ १५
सोऽयं शोकेन महता तप्यमानो द्विजर्षभः ।
अशक्तः प्रतिकर्तुं तद्भवन्तं शरणं गतः ॥ १६
प्रतिगृह्य नरव्याघ्र त्वत्तो भिक्षां गतव्यथः ।
कृत्वापवर्गं गुरवे चरिष्यति महत्तपः ॥ १७
तपसः संविभागेन भवन्तमपि योक्ष्यते ।
स्वेन राजर्षितपसा पूर्णं त्वां पूरयिष्यति ॥ १८

यावन्ति रोमाणि हये भवन्ति हि नरेश्वर ।
तावतो वाजिदा लोकान्प्राप्नुवन्ति महीपते ।। १९
पात्रं प्रतिग्रहस्यायं दातुं पात्रं तथा भवान् ।
शङ्खे क्षीरमिवासक्तं भवत्वेतत्तथोपमम् ।। २०

इति श्रीमहाभारते उद्योगपर्वणि
द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥

११३

नारद उवाच ।

एवमुक्तः सुपर्णेन तथ्यं वचनमुत्तमम् ।
विमृश्यावहितो राजा निश्चित्य च पुनः पुनः ।। १
यष्टा क्रतुसहस्राणां दाता दानपतिः प्रभुः ।
ययातिर्वत्सकाशीश इदं वचनमब्रवीत् ।। २
दृष्ट्वा प्रियसखं तार्क्ष्यं गालवं च द्विजर्षभम् ।
निदर्शनं च तपसो भिक्षां श्लाघ्यां च कीर्तिताम् ।।३
अतीत्य च नृपानन्यानादित्यकुलसंभवान् ।
मत्सकाशमनुप्राप्तावेतौ बुद्धिमवेक्ष्य च ।। ४
अद्य मे सफलं जन्म तारितं चाद्य मे कुलम् ।
अद्यायं तारितो देशो मम तार्क्ष्य त्वयानघ ।। ५
वक्तुमिच्छामि तु सखे यथा जानासि मां पुरा ।
न तथा वित्तवानस्मि क्षीणं वित्तं हि मे सखे ।।६
न च शक्तोऽस्मि ते कर्तुं मोघमागमनं खग ।
न चाशामस्य विप्रर्षेर्वितथां कर्तुमुत्सहे ।। ७
तत्तु दास्यामि यत्कार्यमिदं संपादयिष्यति ।
अभिगम्य हताशो हि निवृत्तो दहते कुलम् ।। ८
नातः परं वैनतेय किंचित्पापिष्ठमुच्यते ।
यथाशानाशनं लोके देहि नास्तीति वा वचः ।। ९
हताशो ह्यकृतार्थः सन्हतः संभावितो नरः ।
हिनस्ति तस्य पुत्रांश्च पौत्रांश्चाकुर्वतोऽर्थिनाम् ।।१०
तस्माच्चतुर्णां वंशानां स्थापयित्री सुता मम ।
इयं सुरसुतप्रख्या सर्वधर्मोपचायिनी ।। ११
सदा देवमनुष्याणामसुराणां च गालव ।
काङ्क्षिता रूपतो बाला सुता मे प्रतिगृह्यताम् ।।१२
अस्याः शुल्कं प्रदास्यन्ति नृपा राज्यमपि ध्रुवम् ।
किं पुनः श्यामकर्णानां हयानां द्वे चतुःशते ।। १३
स भवान्प्रतिगृह्णातु ममेमां माधवीं सुताम् ।
अहं दौहित्रवान्स्यां वै वर एष मम प्रभो ।। १४
प्रतिगृह्य च तां कन्यां गालवः सह पक्षिणा ।
पुनर्द्रक्ष्याव इत्युक्त्वा प्रतस्थे सह कन्यया ।। १५
उपलब्धमिदं द्वारमश्वानामिति चाण्डजः ।
उक्त्वा गालवमापृच्छ्य जगाम भवनं स्वकम् ।। १६
गते पतगराजे तु गालवः सह कन्यया ।
चिन्तयानः क्षमं दाने राज्ञां वै शुल्कतोऽगमत् ।। १७
सोऽगच्छन्मनसेक्ष्वाकुं हर्यश्वं राजसत्तमम् ।
अयोध्यायां महावीर्यं चतुरङ्गबलान्वितम् ।। १८
कोशधान्यबलोपेतं प्रियपौरं द्विजप्रियम् ।।
प्रजाभिकामं शाम्यन्तं कुर्वाणं तप उत्तमम् ।।१९
तमुपागम्य विप्रः स हर्यश्वं गालवोऽब्रवीत् ।
कन्येयं मम राजेन्द्र प्रसवैः कुलवर्धिनी ।। २०
इयं शुल्केन भार्यार्थे हर्यश्व प्रतिगृह्यताम् ।
शुल्कं ते कीर्तयिष्यामि तच्छ्रुत्वा संप्रधार्यताम् ।।

इति श्रीमहाभारते उद्योगपर्वणि
त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

११४

नारद उवाच ।

हर्यश्वस्त्वब्रवीद्राजा विचिन्त्य बहुधा ततः ।
दीर्घमुष्णं च निःश्वस्य प्रजाहेतोर्नृपोत्तमः ।। १
उन्नतेषून्नता षट्सु सूक्ष्मा सूक्ष्मेषु सप्तसु ।
गम्भीरा त्रिषु गम्भीरेष्वियं रक्ता च पञ्चसु ।। २
बहुदेवासुरालोका बहुगन्धर्वदर्शना ।
बहुलक्षणसंपन्ना बहुप्रसवधारिणी ।। ३

समर्थेयं जनयितुं चक्रवर्तिनमात्मजम् ।
ब्रूहि शुल्कं द्विजश्रेष्ठ समीक्ष्य विभवं मम ॥ ४

गालव उवाच ।

एकतःश्यामकर्णानां शतान्यष्टौ ददस्व मे ।
हयानां चन्द्रशुभ्राणां देशजानां वपुष्मताम् ॥ ५
ततस्तव भवित्रीयं पुत्राणां जननी शुभा ।
अरणीव हुताशानां योनिरायतलोचना ॥ ६

नारद उवाच ।

एतच्छ्रुत्वा वचो राजा हर्यश्वः काममोहितः ।
उवाच गालवं दीनो राजर्षिर्ऋषिसत्तमम् ॥ ७
द्वे मे शते संनिहिते हयानां यद्विधास्तव ।
एष्टव्याः शतशस्त्वन्ये चरन्ति मम वाजिनः ॥ ८
सोऽहमेकमपत्यं वै जनयिष्यामि गालव ।
अस्यामेतं भवान्कामं संपादयतु मे वरम् ॥ ९
एतच्छ्रुत्वा तु सा कन्या गालवं वाक्यमब्रवीत् ।
मम दत्तो वरः कश्चित्केनचिद्ब्रह्मवादिना ॥ १०
प्रसूत्यन्ते प्रसूत्यन्ते कन्यैव त्वं भविष्यसि ।
स त्वं ददस्व मां राज्ञे प्रतिगृह्य हयोत्तमान् ॥ ११
नृपेभ्यो हि चतुर्भ्यस्ते पूर्णान्यष्टौ शतानि वै ।
भविष्यन्ति तथा पुत्रा मम चत्वार एव च ॥ १२
क्रियतां मम संहारो गुर्वर्थं द्विजसत्तम ।
एषा तावन्मम प्रज्ञा यथा वा मन्यसे द्विज ॥ १३
एवमुक्तस्तु स मुनिः कन्यया गालवस्तदा ।
हर्यश्वं पृथिवीपालमिदं वचनमब्रवीत् ॥ १४
इयं कन्या नरश्रेष्ठ हर्यश्व प्रतिगृह्यताम् ।
चतुर्भागेन शुल्कस्य जनयस्वैकमात्मजम् ॥ १५
प्रतिगृह्य स तां कन्यां गालवं प्रतिनन्द्य च ।
समये देशकाले च लब्धवान्सुतमीप्सितम् ॥ १६
ततो वसुमना नाम वसुभ्यो वसुमत्तरः ।
वसुप्रख्यो नरपतिः स बभूव वसुप्रदः ॥ १७
अथ काले पुनर्धीमान्गालवः प्रत्युपस्थितः ।
उपसंगम्य चोवाच हर्यश्वं प्रीतमानसम् ॥ १८
जातो नृप सुतस्तेऽयं बालभास्करसंनिभः ।
कालो गन्तुं नरश्रेष्ठ भिक्षार्थमपरं नृपम् ॥ १९
हर्यश्वः सत्यवचने स्थितः स्थित्वा च पौरुषे ।
दुर्लभत्वाद्धयानां च प्रददौ माधवीं पुनः ॥ २०
माधवी च पुनर्दीप्तां परित्यज्य नृपश्रियम् ।
कुमारी कामतो भूत्वा गालवं पृष्ठतोऽन्वगात् ॥ २१
त्वय्येव तावत्तिष्ठन्तु हया इत्युक्तवान्द्विजः ।
प्रययौ कन्यया सार्धं दिवोदासं प्रजेश्वरम् ॥ २२

इति श्रीमहाभारते उद्योगपर्वणि
चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

११५

गालव उवाच ।

महावीर्यो महीपालः काशीनामीश्वरः प्रभुः ।
दिवोदास इति ख्यातो भैमसेनिर्नराधिपः ॥ १
तत्र गच्छावहे भद्रे शनैरागच्छ मा शुचः ।
धार्मिकः संयमे युक्तः सत्यश्चैव जनेश्वरः ॥ २

नारद उवाच ।

तमुपागम्य स मुनिर्न्यायतस्तेन सत्कृतः ।
गालवः प्रसवस्यार्थे तं नृपं प्रत्यचोदयत् ॥ ३

दिवोदास उवाच ।

श्रुतमेतन्मया पूर्वं किमुक्त्वा विस्तरं द्विज ।
काङ्क्षितो हि मयैषोऽर्थः श्रुत्वैतद्द्विजसत्तम ॥ ४
एतच्च मे बहुमतं यदुत्सृज्य नराधिपान् ।
मामेवमुपयातोऽसि भावि चैतदसंशयम् ॥ ५
स एव विभवोऽस्माकमश्वानामपि गालव ।
अहमप्येकमेवास्यां जनयिष्यामि पार्थिवम् ॥ ६

नारद उवाच ।

तथेत्युक्त्वा द्विजश्रेष्ठः प्रादात्कन्यां महीपतेः ।

विधिपूर्वं च तां राजा कन्यां प्रतिगृहीतवान् ॥ ७
रेमे स तस्यां राजर्षिः प्रभावत्यां यथा रविः ।
स्वाहायां च यथा वह्निर्यथा शच्यां स वासवः ॥ ८
यथा चन्द्रश्च रोहिण्यां यथा धूमोर्णया यमः ।
वरुणश्च यथा गौर्यां यथा चर्द्ध्यां धनेश्वरः ॥ ९
यथा नारायणो लक्ष्म्यां जाह्नव्यां च यथोदधिः ।
यथा रुद्रश्च रुद्राण्यां यथा वेद्यां पितामहः ॥ १०
अदृश्यन्त्यां च वासिष्ठो वसिष्ठश्चाक्षमालया ।
च्यवनश्च सुकन्यायां पुलस्त्यः संध्यया यथा ॥ ११
अगस्त्यश्चापि वैदर्भ्यां सावित्र्यां सत्यवान्यथा ।
यथा भृगुः पुलोमायामदित्यां कश्यपो यथा ॥ १२
रेणुकायां यथार्चीको हैमवत्यां च कौशिकः ।
बृहस्पतिश्च तारायां शुक्रश्च शतपर्वया ॥ १३
यथा भूम्यां भूमिपतिरुर्वश्यां च पुरूरवाः ।
ऋचीकः सत्यवत्यां च सरस्वत्यां यथा मनुः ॥ १४
तथा तु रममाणस्य दिवोदासस्य भूपतेः ।
माधवी जनयामास पुत्रमेकं प्रतर्दनम् ॥ १५
अथाजगाम भगवान्दिवोदासं स गालवः ।
समये समनुप्राप्ते वचनं चेदमब्रवीत् ॥ १६
निर्यातयतु मे कन्यां भवांस्तिष्ठन्तु वाजिनः ।
यावदन्यत्र गच्छामि शुल्कार्थं पृथिवीपते ॥ १७
दिवोदासोऽथ धर्मात्मा समये गालवस्य ताम् ।
कन्यां निर्यातयामास स्थितः सत्ये महीपतिः ॥

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

११६

नारद उवाच ।

तथैव सा श्रियं त्यक्त्वा कन्या भूत्वा यशस्विनी ।
माधवी गालवं विप्रमन्वयात्सत्यसंगरा ॥ १
गालवो विमृशन्नेव स्वकार्यगतमानसः ।
जगाम भोजनगरं द्रष्टुमौशीनरं नृपम् ॥ २
तमुवाचाथ गत्वा स नृपतिं सत्यविक्रमम् ।
इयं कन्या सुतौ द्वौ ते जनयिष्यति पार्थिवौ ॥ ३
अस्यां भवानवाप्तार्थो भविता प्रेत्य चेह च ।
सोमार्कप्रतिसंकाशौ जनयित्वा सुतौ नृप ॥ ४
शुल्कं तु सर्वधर्मज्ञ हयानां चन्द्रवर्चसाम् ।
एकतःश्यामकर्णानां देयं मह्यं चतुःशतम् ॥ ५
गुर्वर्थोऽयं समारम्भो न हयैः कृत्यमस्ति मे ।
यदि शक्यं महाराज क्रियतां मा विचार्यताम् ॥ ६
अनपत्योऽसि राजर्षे पुत्रौ जनय पार्थिव ।
पितॄन्पुत्रप्लवेन त्वमात्मानं चैव तारय ॥ ७
न पुत्रफलभोक्ता हि राजर्षे पात्यते दिवः ।
न याति नरकं घोरं यत्र गच्छन्त्यनात्मजाः ॥ ८
एतच्चान्यच्च विविधं श्रुत्वा गालवभाषितम् ।
उशीनरः प्रतिवचो ददौ तस्य नराधिपः ॥ ९
श्रुतवानस्मि ते वाक्यं यथा वदसि गालव ।
विधिस्तु बलवान्ब्रह्मन्प्रवणं हि मनो मम ॥ १०
शते द्वे तु ममाश्वानामीदृशानां द्विजोत्तम ।
इतरेषां सहस्राणि सुबहूनि चरन्ति मे ॥ ११
अहमप्येकमेवास्यां जनयिष्यामि गालव ।
पुत्रं द्विज गतं मार्गं गमिष्यामि परैरहम् ॥ १२
मूल्येनापि समं कुर्यां तवाहं द्विजसत्तम ।
पौरजानपदार्थं तु ममार्थो नात्मभोगतः ॥ १३
कामतो हि धनं राजा पारक्यं यः प्रयच्छति ।
न स धर्मेण धर्मात्मन्युज्यते यशसा न च ॥ १४
सोऽहं प्रतिग्रहीष्यामि ददात्वेतां भवान्मम ।
कुमारीं देवगर्भाभामेकपुत्रभवाय मे ॥ १५
तथा तु बहु कल्याणमुक्तवन्तं नराधिपम् ।
उशीनरं द्विजश्रेष्ठो गालवः प्रत्यपूजयत् ॥ १६
उशीनरं प्रतिग्राह्य गालवः प्रययौ वनम् ।

रेमे स तां समासाद्य कृतपुण्य इव श्रियम् ॥ १७
कन्दरेषु च शैलानां नदीनां निर्झरेषु च ।
उद्यानेषु विचित्रेषु वनेषूपवनेषु च ॥ १८
हर्म्येषु रमणीयेषु प्रासादशिखरेषु च ।
वातायनविमानेषु तथा गर्भगृहेषु च ॥ १९
ततोऽस्य समये जज्ञे पुत्रो बालरविप्रभः ।
शिबिर्नाम्नाभिविख्यातो यः स पार्थिवसत्तमः ॥
उपस्थाय स तं विप्रो गालवः प्रतिगृह्य च ।
कन्यां प्रयातस्तां राजन्दृष्टवान्विनतात्मजम् ॥ २१

इति श्रीमहाभारते उद्योगपर्वणि
षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

११७

नारद उवाच ।

गालवं वैनतेयोऽथ प्रहसन्निदमब्रवीत् ।
दिष्ट्या कृतार्थं पश्यामि भवन्तमिह वै द्विज ॥ १
गालवस्तु वचः श्रुत्वा वैनतेयेन भाषितम् ।
चतुर्भागावशिष्टं तदाचख्यौ कार्यमस्य हि ॥ २
सुपर्णस्त्वब्रवीदेनं गालवं पततां वरः ।
प्रयत्नस्ते न कर्तव्यो नैष संपत्स्यते तव ॥ ३
पुरा हि कन्यकुब्जे वै गाधेः सत्यवतीं सुताम् ।
भार्यार्थेऽवरयत्कन्यामृचीकस्तेन भाषितः ॥ ४
एकतःश्यामकर्णानां हयानां चन्द्रवर्चसाम् ।
भगवन्दीयतां मह्यं सहस्रमिति गालव ॥ ५
ऋचीकस्तु तथेत्युक्त्वा वरुणस्यालयं गतः ।
अश्वतीर्थे हयाँल्लब्ध्वा दत्तवान्पार्थिवाय वै ॥ ६
इष्ट्वा ते पुण्डरीकेण दत्ता राज्ञा द्विजातिषु ।
तेभ्यो द्वे द्वे शते क्रीत्वा प्राप्तास्ते पार्थिवैस्तदा ॥ ७
अपराण्यपि चत्वारि शतानि द्विजसत्तम ।
नीयमानानि संतारे हृतान्यासन्वितस्तया ।
एवं न शक्यमप्राप्यं प्राप्तुं गालव कर्हिचित् ॥ ८
इमामश्वशताभ्यां वै द्वाभ्यां तस्मै निवेदय ।
विश्वामित्राय धर्मात्मन्षड्भिरश्वशतैः सह ।
ततोऽसि गतसंमोहः कृतकृत्यो द्विजर्षभ ॥ ९
गालवस्तं तथेत्युक्त्वा सुपर्णसहितस्ततः ।
आदायाश्वांश्च कन्यां च विश्वामित्रमुपागमत् ॥

गालव उवाच ।

अश्वानां काङ्क्षितार्थानां षडिमानि शतानि वै ।
शतद्वयेन कन्येयं भवता प्रतिगृह्यताम् ॥ ११
अस्यां राजर्षिभिः पुत्रा जाता वै धार्मिकास्त्रयः ।
चतुर्थं जनयत्वेकं भवानपि नरोत्तम ॥ १२
पूर्णान्येवं शतान्यष्टौ तुरगाणां भवन्तु ते ।
भवतो ह्यनृणो भूत्वा तपः कुर्यां यथासुखम् ॥ १३

नारद उवाच ।

विश्वामित्रस्तु तं दृष्ट्वा गालवं सह पक्षिणा ।
कन्यां च तां वरारोहामिदमित्यब्रवीद्वचः ॥ १४
किमियं पूर्वमेवेह न दत्ता मम गालव ।
पुत्रा ममैव चत्वारो भवेयुः कुलभावनाः ॥ १५
प्रतिगृह्णामि ते कन्यामेकपुत्रफलाय वै ।
अश्वाश्चाश्रममासाद्य तिष्ठन्तु मम सर्वशः ॥ १६
स तया रममाणोऽथ विश्वामित्रो महाद्युतिः ।
आत्मजं जनयामास माधवीपुत्रमष्टकम् ॥ १७
जातमात्रं सुतं तं च विश्वामित्रो महाद्युतिः ।
संयोज्यार्थैस्तथा धर्मैरश्वैस्तैः समयोजयत् ॥ १८
अथाष्टकः पुरं प्रायात्तदा सोमपुरप्रभम् ।
निर्यात्य कन्यां शिष्याय कौशिकोऽपि वनं ययौ ॥
गालवोऽपि सुपर्णेन सह निर्यात्य दक्षिणाम् ।
मनसाभिप्रतीतेन कन्यामिदमुवाच ह ॥ २०
जातो दानपतिः पुत्रस्त्वया शूरस्तथापरः ।
सत्यधर्मरतश्चान्यो यज्वा चापि तथापरः ॥ २१
तदागच्छ वरारोहे तारितस्ते पिता सुतैः ।

चत्वारश्चैव राजानस्तथाहं च सुमध्यमे ॥ २२
गालवस्त्वभ्यनुज्ञाय सुपर्णं पन्नगाशनम् ।
पितुर्निर्यात्य तां कन्यां प्रययौ वनमेव ह ॥ २३

इति श्रीमहाभारते उद्योगपर्वणि
सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥

११८

नारद उवाच ।

स तु राजा पुनस्तस्याः कर्तुकामः स्वयंवरम् ।
उपगम्याश्रमपदं गङ्गायमुनसंगमे ॥ १
गृहीतमाल्यदामां तां रथमारोप्य माधवीम् ।
पूरुर्यदुश्च भगिनीमाश्रमे पर्यधावताम् ॥ २
नागयक्षमनुष्याणां पतत्रिमृगपक्षिणाम् ।
शैलद्रुमवनौकानामासीत्तत्र समागमः ॥ ३
नानापुरुषदेशानामीश्वरैश्च समाकुलम् ।
ऋषिभिर्ब्रह्मकल्पैश्च समन्तादावृतं वनम् ॥ ४
निर्दिश्यमानेषु तु सा वरेषु वरवर्णिनी ।
वरानुत्क्रम्य सर्वांस्तान्वनं वृतवती वरम् ॥ ५
अवतीर्य रथात्कन्या नमस्कृत्वा च बन्धुषु ।
उपगम्य वनं पुण्यं तपस्तेपे ययातिजा ॥ ६
उपवासैश्च विविधैर्दीक्षाभिर्नियमैस्तथा ।
आत्मनो लघुतां कृत्वा बभूव मृगचारिणी ॥ ७
वैडूर्याङ्कुरकल्पानि मृदूनि हरितानि च ।
चरन्ती शष्पमुख्यानि तिक्तानि मधुराणि च ॥ ८
स्रवन्तीनां च पुण्यानां सुरसानि शुचीनि च ।
पिबन्ती वारिमुख्यानि शीतानि विमलानि च ॥ ९
वनेषु मृगराजेषु सिंहविप्रोषितेषु च ।
दावाग्निविप्रमुक्तेषु शून्येषु गहनेषु च ॥ १०
चरन्ती हरिणैः सार्धं मृगीव वनचारिणी ।
चचार विपुलं धर्मं ब्रह्मचर्येण संवृता ॥ ११
ययातिरपि पूर्वेषां राज्ञां वृत्तमनुष्ठितः ।
बहुवर्षसहस्रायुरयुजत्कालधर्मणा ॥ १२
पूरुर्यदुश्च द्वौ वंशौ वर्धमानौ नरोत्तमौ ।
ताभ्यां प्रतिष्ठितो लोके परलोके च नाहुषः ॥ १३
महीयते नरपतिर्ययातिः स्वर्गमास्थितः ।
महर्षिकल्पो नृपतिः स्वर्ग्यग्र्यफलभुग्विभुः ॥ १४
बहुवर्षसहस्राख्ये काले बहुगुणे गते ।
राजर्षिषु निषण्णेषु महीयःसु महर्षिषु ॥ १५
अवमेने नरान्सर्वान्देवानृषिगणांस्तथा ।
ययातिर्मूढविज्ञानो विस्मयाविष्टचेतनः ॥ १६
ततस्तं बुबुधे देवः शक्रो बलनिषूदनः ।
ते च राजर्षयः सर्वे धिग्धिगित्येवमब्रुवन् ॥ १७
विचारश्च समुत्पन्नो निरीक्ष्य नहुषात्मजम् ।
को न्वयं कस्य वा राज्ञः कथं वा स्वर्गमागतः ॥ १८
कर्मणा केन सिद्धोऽयं क वानेन तपश्चितम् ।
कथं वा ज्ञायते स्वर्गे केन वा ज्ञायतेऽप्युत ॥ १९
एवं विचारयन्तस्ते राजानः स्वर्गवासिनः ।
दृष्ट्वा पप्रच्छुरन्योन्यं ययातिं नृपतिं प्रति ॥ २०
विमानपालाः शतशः स्वर्गद्वाराभिरक्षिणः ।
पृष्टा आसनपालाश्च न जानीमेत्यथाब्रुवन् ॥ २१
सर्वे ते ह्यावृतज्ञाना नाभ्यजानन्त तं नृपम् ।
स मुहूर्तादथ नृपो हतौजा अभवत्तदा ॥ २२

इति श्रीमहाभारते उद्योगपर्वणि
अष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥

११९

नारद उवाच ।

अथ प्रचलितः स्थानादासनाच्च परिच्युतः ।
कम्पितेनैव मनसा धर्षितः शोकवह्निना ॥ १
म्लानस्रग्भ्रष्टविज्ञानः प्रभ्रष्टमुकुटाङ्गदः ।
विघूर्णन्स्रस्तसर्वाङ्गः प्रभ्रष्टाभरणाम्बरः ॥ २
अदृश्यमानस्तान्पश्यन्नपश्यंश्च पुनः पुनः ।

शून्यः शून्येन मनसा प्रपतिष्यन्महीतलम् ॥ ३
किं मया मनसा ध्यातमशुभं धर्मदूषणम् ।
येनाहं चलितः स्थानादिति राजा व्यचिन्तयत् ॥ ४
ते तु तत्रैव राजानः सिद्धाश्चाप्सरसस्तथा ।
अपश्यन्त निरालम्बं ययातिं तं परिच्युतम् ॥ ५
अथैत्य पुरुषः कश्चित्क्षीणपुण्यनिपातकः ।
ययातिमब्रवीद्राजन्देवराजस्य शासनात् ॥ ६
अतीव मदमत्तस्त्वं न कंचिन्नावमन्यसे ।
मानेन भ्रष्टः स्वर्गस्ते नार्हस्त्वं पार्थिवात्मज ।
न च प्रज्ञायसे गच्छ पतस्वेति तमब्रवीत् ॥ ७
पतेयं सत्स्विति वचस्त्रिरुक्त्वा नहुषात्मजः ।
पतिष्यंश्चिन्तयामास गतिं गतिमतां वरः ॥ ८
एतस्मिन्नेव काले तु नैमिषे पार्थिवर्षभान् ।
चतुरोऽपश्यत नृपस्तेषां मध्ये पपात सः ॥ ९
प्रतर्दनो वसुमनाः शिबिरौशीनरोऽष्टकः ।
वाजपेयेन यज्ञेन तर्पयन्ति सुरेश्वरम् ॥ १०
तेषामध्वरजं धूमं स्वर्गद्वारमुपस्थितम् ।
ययातिरुपजिघ्रन्वै निपपात महीं प्रति ॥ ११
भूमौ स्वर्गे च संबद्धां नदीं धूममयीं नृपः ।
स गङ्गामिव गच्छन्तीमालम्ब्य जगतीपतिः ॥ १२
श्रीमत्स्ववभृथाग्र्येषु चतुर्षु प्रतिबन्धुषु ।
मध्ये निपतितो राजा लोकपालोपमेषु च ॥ १३
चतुर्षु हुतकल्पेषु राजसिंहमहाग्निषु ।
पपात मध्ये राजर्षिर्ययातिः पुण्यसंक्षये ॥ १४
तमाहुः पार्थिवाः सर्वे प्रतिमानमिव श्रियः ।
को भवान्कस्य वा बन्धुर्देशस्य नगरस्य वा ॥ १५
यक्षो वाप्यथ वा देवो गन्धर्वो राक्षसोऽपि वा ।
न हि मानुषरूपोऽसि को वार्थः काङ्क्षितस्त्वया ॥ १६

ययातिरुवाच ।

ययातिरस्मि राजर्षिः क्षीणपुण्यश्च्युतो दिवः ।
पतेयं सत्स्विति ध्यायन्भवत्सु पतितस्ततः ॥ १७

राजान ऊचुः

सत्यमेतद्भवतु ते काङ्क्षितं पुरुषर्षभ ।
सर्वेषां नः क्रतुफलं धर्मश्च प्रतिगृह्यताम् ॥ १८

ययातिरुवाच ।

नाहं प्रतिग्रहधनो ब्राह्मणः क्षत्रियो ह्यहम् ।
न च मे प्रवणा बुद्धिः परपुण्यविनाशने ॥ १९

नारद उवाच ।

एतस्मिन्नेव काले तु मृगचर्याक्रमागताम् ।
माधवीं प्रेक्ष्य राजानस्तेऽभिवाद्येदमब्रुवन् ॥ २०
किमागमनकृत्यं ते किं कुर्मः शासनं तव ।
आज्ञाप्या हि वयं सर्वे तव पुत्रास्तपोधने ॥ २१
तेषां तद्भाषितं श्रुत्वा माधवी परया मुदा ।
पितरं समुपागच्छद्ययातिं सा ववन्द च ॥ २२
दृष्ट्वा मूर्ध्ना नतान्पुत्रांस्तापसी वाक्यमब्रवीत् ।
दौहित्रास्तव राजेन्द्र मम पुत्रा न ते पराः ।
इमे त्वां तारयिष्यन्ति दिष्टमेतत्पुरातनम् ॥ २३
अहं ते दुहिता राजन्माधवी मृगचारिणी ।
मयाप्युपचितो धर्मस्ततोऽर्धं प्रतिगृह्यताम् ॥ २४
यस्माद्राजन्नराः सर्वे अपत्यफलभागिनः ।
तस्मादिच्छन्ति दौहित्रान्यथा त्वं वसुधाधिप ॥ २५
ततस्ते पार्थिवाः सर्वे शिरसा जननीं तदा ।
अभिवाद्य नमस्कृत्य मातामहमथाब्रुवन् ॥ २६
उच्चैरनुपमैः स्निग्धैः स्वरैरापूर्य मेदिनीम् ।
मातामहं नृपतयस्तारयन्तो दिवश्च्युतम् ॥ २७
अथ तस्मादुपगतो गालवोऽप्याह पार्थिवम् ।
तपसो मेऽष्टभागेन स्वर्गमारोहतां भवान् ॥ २८

इति श्रीमहाभारते उद्योगपर्वणि
एकोनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥

१२०

नारद उवाच ।

प्रत्यभिज्ञातमात्रोऽथ सद्भिस्तैर्नरपुंगवः ।
ययातिर्दिव्यसंस्थानो बभूव विगतज्वरः ॥ १
दिव्यमाल्याम्बरधरो दिव्याभरणभूषितः ।
दिव्यगन्धगुणोपेतो न पृथ्वीमस्पृशत्पदा ॥ २
ततो वसुमनाः पूर्वमुच्चैरुच्चारयन्वचः ।
ख्यातो दानपतिर्लोके व्याजहार नृपं तदा ॥ ३
प्राप्तवानस्मि यल्लोके सर्ववर्णेष्वगर्हया ।
तदप्यथ च दास्यामि तेन संयुज्यतां भवान् ॥ ४
यत्फलं दानशीलस्य क्षमाशीलस्य यत्फलम् ।
यच्च मे फलमाधाने तेन संयुज्यतां भवान् ॥ ५
ततः प्रतर्दनोऽप्याह वाक्यं क्षत्रियपुंगवः ।
यथा धर्मरतिर्नित्यं नित्यं युद्धपरायणः ॥ ६
प्राप्तवानस्मि यल्लोके क्षत्रधर्मोद्भवं यशः ।
वीरशब्दफलं चैव तेन संयुज्यतां भवान् ॥ ७
शिबिरौशीनरो धीमानुवाच मधुरां गिरम् ।
यथा बालेषु नारीषु वैहार्येषु तथैव च ॥ ८
संगरेषु निपातेषु तथापद्व्यसनेषु च ।
अनृतं नोक्तपूर्वं मे तेन सत्येन खं व्रज ॥ ९
यथा प्राणांश्च राज्यं च राजन्कर्म सुखानि च ।
त्यजेयं न पुनः सत्यं तेन सत्येन खं व्रज ॥ १०
यथा सत्येन मे धर्मो यथा सत्येन पावकः ।
प्रीतः शक्रश्च सत्येन तेन सत्येन खं व्रज ॥ ११
अष्टकस्त्वथ राजर्षिः कौशिको माधवीसुतः ।
अनेकशतयज्वानं वचनं प्राह धर्मवित् ॥ १२
शतशः पुण्डरीका मे गोसवाश्च चिताः प्रभो ।
क्रतवो वाजपेयाश्च तेषां फलमवाप्नुहि ॥ १३
न मे रत्नानि न धनं न तथान्ये परिच्छदाः ।
क्रतुष्वनुपयुक्तानि तेन सत्येन खं व्रज ॥ १४
यथा यथा हि जल्पन्ति दौहित्रास्तं नराधिपम् ।
तथा तथा वसुमतीं त्यक्त्वा राजा दिवं ययौ ॥ १५
एवं सर्वे समस्तास्ते राजानः सुकृतैस्तदा ।
ययातिं स्वर्गतो भ्रष्टं तारयामासुरञ्जसा ॥ १६
दौहित्राः स्वेन धर्मेण यज्ञदानकृतेन वै ।
चतुर्षु राजवंशेषु संभूताः कुलवर्धनाः ।
मातामहं महाप्राज्ञं दिवमारोपयन्त ते ॥ १७

राजान ऊचुः ।

राजधर्मगुणोपेताः सर्वधर्मगुणान्विताः ।
दौहित्रास्ते वयं राजन्दिवमारोह पार्थिव ॥ १८

इति श्रीमहाभारते उद्योगपर्वणि
विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥

१२१

नारद उवाच ।

सद्भिरारोपितः स्वर्गं पार्थिवैर्भूरिदक्षिणैः ।
अभ्यनुज्ञाय दौहित्रान्ययातिर्दिवमास्थितः ॥ १
अभिवृष्टश्च वर्षेण नानापुष्पसुगन्धिना ।
परिष्वक्तश्च पुण्येन वायुना पुण्यगन्धिना ॥ २
अचलं स्थानमारुह्य दौहित्रफलनिर्जितम् ।
कर्मभिः स्वैरुपचितो जज्वाल परया श्रिया ॥ ३
उपगीतोपनृत्तश्च गन्धर्वाप्सरसां गणैः ।
प्रीत्या प्रतिगृहीतश्च स्वर्गे दुन्दुभिनिस्वनैः ॥ ४
अभिष्टुतश्च विविधैर्देवराजर्षिचारणैः ।
अर्चितश्चोत्तमार्घेण दैवतैरभिनन्दितः ॥ ५
प्राप्तः स्वर्गफलं चैव तमुवाच पितामहः ।
निर्वृतं शान्तमनसं वचोभिस्तर्पयन्निव ॥ ६
चतुष्पादस्त्वया धर्मश्चितो लोक्येन कर्मणा ।
अक्षयस्तव लोकोऽयं कीर्तिश्चैवाक्षया दिवि ।
पुनस्तवाद्य राजर्षे सुकृतेनेह कर्मणा ॥ ७
आवृतं तमसा चेतः सर्वेषां स्वर्गवासिनाम् ।

येन त्वां नाभिजानन्ति ततोऽज्ञात्वासि पातितः ।।८
प्रीत्यैव चासि दौहित्रैस्तारितस्त्वमिहागतः ।
स्थानं च प्रतिपन्नोऽसि कर्मणा स्वेन निर्जितम् ।
अचलं शाश्वतं पुण्यमुत्तमं ध्रुवमव्ययम् ।। ९

ययातिरुवाच ।

भगवन्संशयो मेऽस्ति कश्चित्तं छेत्तुमर्हसि ।
न ह्यन्यमहमर्हामि प्रष्टुं लोकपितामह ।। १०
बहुवर्षसहस्रान्तं प्रजापालनवर्धितम् ।
अनेकक्रतुदानौघैरर्जितं मे महत्फलम् ।। ११
कथं तदल्पकालेन क्षीणं येनास्मि पातितः ।
भगवन्वेत्थ लोकांश्च शाश्वतान्मम निर्जितान् ।। १२

पितामह उवाच ।

बहुवर्षसहस्रान्तं प्रजापालनवर्धितम् ।
अनेकक्रतुदानौघैर्यत्त्वयोपार्जितं फलम् ।। १३
तदनेनैव दोषेण क्षीणं येनासि पातितः ।
अभिमानेन राजेन्द्र धिक्कृतः स्वर्गवासिभिः ।। १४
नायं मानेन राजर्षे न बलेन न हिंसया ।
न शाठ्येन न मायाभिर्लोको भवति शाश्वतः ।।१५
नावमान्यास्त्वया राजन्नवरोत्कृष्टमध्यमाः ।
न हि मानप्रदग्धानां कश्चिदस्ति समः क्वचित् ।।
पतनारोहणमिदं कथयिष्यन्ति ये नराः ।
विषमाण्यपि ते प्राप्तास्तरिष्यन्ति न संशयः ।। १७

नारद उवाच ।

एष दोषोऽभिमानेन पुरा प्राप्तो ययातिना ।
निर्बन्धतश्चातिमात्रं गालवेन महीपते ।। १८
श्रोतव्यं हितकामानां सुहृदां भूतिमिच्छताम् ।
न कर्तव्यो हि निर्बन्धो निर्बन्धो हि क्षयोदयः ।।
तस्मात्त्वमपि गान्धारे मानं क्रोधं च वर्जय ।
संधत्स्व पाण्डवैर्वीर संरम्भं त्यज पार्थिव ।। २०
ददाति यत्पार्थिव यत्करोति
यद्वा तपस्तप्यति यज्जुहोति ।
न तस्य नाशोऽस्ति न चापकर्षो
नान्यस्तदश्नाति स एव कर्ता ।। २१
इदं महाख्यानमनुत्तमं मतं
बहुश्रुतानां गतरोषरागिणाम् ।
समीक्ष्य लोके बहुधा प्रधाविता
त्रिवर्गदृष्टिः पृथिवीमुपाश्नुते ।। २२

इति श्रीमहाभारते उद्योगपर्वणि
एकविंशत्यधिकशततमोऽध्यायः ।। १२१ ।।

१२२

धृतराष्ट्र उवाच ।

भगवन्नेवमेवैतद्यथा वदसि नारद ।
इच्छामि चाहमप्येवं न त्वीशो भगवन्नहम् ।। १

वैशंपायन उवाच ।

एवमुक्त्वा ततः कृष्णमभ्यभाषत भारत ।
स्वर्ग्यं लोक्यं च मामात्थ धर्म्यं न्याय्यं च केशव
न त्वहं स्ववशस्तात क्रियमाणं न मे प्रियम् ।
अङ्ग दुर्योधनं कृष्ण मन्दं शास्त्रातिगं मम ।। ३
अनुनेतुं महाबाहो यतस्व पुरुषोत्तम ।
सुहृत्कार्यं तु सुमहत्कृतं ते स्याज्जनार्दन ।। ४
ततोऽभ्यावृत्य वार्ष्णेयो दुर्योधनममर्षणम् ।
अब्रवीन्मधुरां वाचं सर्वधर्मार्थतत्त्ववित् ।। ५
दुर्योधन निबोधेदं मद्वाक्यं कुरुसत्तम ।
समर्थं ते विशेषेण सानुबन्धस्य भारत ।। ६
महाप्राज्ञ कुले जातः साध्वेतत्कर्तुमर्हसि ।
श्रुतवृत्तोपसंपन्नः सर्वैः समुदितो गुणैः ।। ७
दौष्कुलेया दुरात्मानो नृशंसा निरपत्रपाः ।
त एतदीदृशं कुर्युर्यथा त्वं तात मन्यसे ।। ८
धर्मार्थयुक्ता लोकेऽस्मिन्प्रवृत्तिर्लक्ष्यते सताम् ।
असतां विपरीता तु लक्ष्यते भरतर्षभ ।। ९

विपरीता त्वियं वृत्तिरसकृल्लक्ष्यते त्वयि ।
अधर्मश्चानुबन्धोऽत्र घोरः प्राणहरो महान् ॥ १०
अनेकशस्त्वन्निमित्तमयशस्यं च भारत ।
तमनर्थं परिहरन्नात्मश्रेयः करिष्यसि ॥ ११
भ्रातृणामथ भृत्यानां मित्राणां च परंतप ।
अधर्म्यादयशस्याच्च कर्मणस्त्वं प्रमोक्ष्यसे ॥ १२
प्राज्ञैः शूरैर्महोत्साहैरात्मवद्भिर्बहुश्रुतैः ।
संधत्स्व पुरुषव्याघ्र पाण्डवैर्भरतर्षभ ॥ १३
तद्धितं च प्रियं चैव धृतराष्ट्रस्य धीमतः ।
पितामहस्य द्रोणस्य विदुरस्य महामतेः ॥ १४
कृपस्य सोमदत्तस्य बाह्लीकस्य च धीमतः ।
अश्वत्थाम्नो विकर्णस्य संजयस्य विशां पते ॥ १५
ज्ञातीनां चैव भूयिष्ठं मित्राणां च परंतप ।
शमे शर्म भवेत्तात सर्वस्य जगतस्तथा ॥ १६
ह्रीमानसि कुले जातः श्रुतवाननृशंसवान् ।
तिष्ठ तात पितुः शास्त्रे मातुश्च भरतर्षभ ॥ १७
एतच्छ्रेयो हि मन्यन्ते पिता यच्छास्ति भारत ।
उत्तमापद्गतः सर्वः पितुः स्मरति शासनम् ॥ १८
रोचते ते पितुस्तात पाण्डवैः सह संगमः ।
सामात्यस्य कुरुश्रेष्ठ तत्तुभ्यं तात रोचताम् ॥ १९
श्रुत्वा यः सुहृदां शास्त्रं मर्त्यो न प्रतिपद्यते ।
विपाकान्ते दहत्येनं किंपाकमिव भक्षितम् ॥ २०
यस्तु निःश्रेयसं वाक्यं मोहान्न प्रतिपद्यते ।
स दीर्घसूत्रो हीनार्थः पश्चात्तापेन युज्यते ॥ २१
यस्तु निःश्रेयसं श्रुत्वा प्राप्तमेवाभिपद्यते ।
आत्मनो मतमुत्सृज्य स लोके सुखमेधते ॥ २२
योऽर्थकामस्य वचनं प्रातिकूल्यान्न मृष्यते ।
शृणोति प्रतिकूलानि द्विषतां वशमेति सः ॥ २३
सतां मतमतिक्रम्य योऽसतां वर्तते मते ।
शोचन्ते व्यसने तस्य सुहृदो नचिरादिव ॥ २४
मुख्यानमात्यानुत्सृज्य यो निहीनान्निषेवते ।
स घोरामापदं प्राप्य नोत्तारमधिगच्छति ॥ २५
योऽसत्सेवी वृथाचारो न श्रोता सुहृदां सदा ।
परान्वृणीते स्वान्द्वेष्टि तं गौः शपति भारत ॥ २६
स त्वं विरुध्य तैर्वीरैरन्येभ्यस्त्राणमिच्छसि ।
अशिष्टेभ्योऽसमर्थेभ्यो मूढेभ्यो भरतर्षभ ॥ २७
को हि शक्रसमाञ्ज्ञातीनतिक्रम्य महारथान् ।
अन्येभ्यस्त्राणमाशंसेत्त्वदन्यो भुवि मानवः ॥ २८
जन्मप्रभृति कौन्तेया नित्यं विनिकृतास्त्वया ।
न च ते जातु कुप्यन्ति धर्मात्मानो हि पाण्डवाः ॥
मिथ्याप्रचरितास्तात जन्मप्रभृति पाण्डवाः ।
त्वयि सम्यङ्महाबाहो प्रतिपन्ना यशस्विनः ॥ ३०
त्वयापि प्रतिपत्तव्यं तथैव भरतर्षभ ।
स्वेषु बन्धुषु मुख्येषु मा मन्युवशमन्वगाः ॥ ३१
त्रिवर्गयुक्ताः प्राज्ञानामारम्भा भरतर्षभ ।
धर्मार्थावनुरुध्यन्ते त्रिवर्गासंभवे नराः ॥ ३२
पृथक्तु विनिविष्टानां धर्मं धीरोऽनुरुध्यते ।
मध्यमोऽर्थं कलिं बालः काममेवानुरुध्यते ॥ ३३
इन्द्रियैः प्रसृतो लोभाद्धर्मं विप्रजहाति यः ।
कामार्थावनुपायेन लिप्समानो विनश्यति ॥ ३४
कामार्थौ लिप्समानस्तु धर्ममेवादितश्चरेत् ।
न हि धर्मादपैत्यर्थः कामो वापि कदाचन ॥ ३५
उपायं धर्ममेवाहुस्त्रिवर्गस्य विशां पते ।
लिप्समानो हि तेनाशु कक्षेऽग्निरिव वर्धते ॥ ३६
स त्वं तातानुपायेन लिप्ससे भरतर्षभ ।
आधिराज्यं महद्दीप्तं प्रथितं सर्वराजसु ॥ ३७
आत्मानं तक्षति ह्येष वनं परशुना यथा ।
यः सम्यग्वर्तमानेषु मिथ्या राजन्प्रवर्तते ॥ ३८
न तस्य हि मतिं छिन्द्याद्यस्य नेच्छेत्पराभवम् ।
अविच्छिन्नस्य धीरस्य कल्याणे धीयते मतिः ॥ ३९

त्यक्तात्मानं न बाधेत त्रिषु लोकेषु भारत ।
अप्यन्यं प्राकृतं किंचित्किमु तान्पाण्डवर्षभान् ॥
अमर्षवशमापन्नो न किंचिद्बुध्यते नरः ।
छिद्यते ह्याततं सर्वं प्रमाणं पश्य भारत ॥ ४१
श्रेयस्ते दुर्जनात्तात पाण्डवैः सह संगमः ।
तैर्हि संप्रीयमाणस्त्वं सर्वान्कामानवाप्स्यसि ॥ ४२
पाण्डवैर्निर्जितां भूमिं भुञ्जानो राजसत्तम ।
पाण्डवान्पृष्ठतः कृत्वा त्राणमाशंससेऽन्यतः ॥ ४३
दुःशासने दुर्विषहे कर्णे चापि ससौबले ।
एतेष्वैश्वर्यमाधाय भूतिमिच्छसि भारत ॥ ४४
न चैते तव पर्याप्ता ज्ञाने धर्मार्थयोस्तथा ।
विक्रमे चाप्यपर्याप्ताः पाण्डवान्प्रति भारत ॥ ४५
न हीमे सर्वराजानः पर्याप्ताः सहितास्त्वया ।
क्रुद्धस्य भीमसेनस्य प्रेक्षितुं मुखमाहवे ॥ ४६
इदं संनिहितं तात समग्रं पार्थिवं बलम् ।
अयं भीष्मस्तथा द्रोणः कर्णश्चायं तथा कृपः ॥
भूरिश्रवाः सौमदत्तिरश्वत्थामा जयद्रथः ।
अशक्ताः सर्व एवैते प्रतियोद्धुं धनंजयम् ॥ ४८
अजेयो ह्यर्जुनः क्रुद्धः सर्वैरपि सुरासुरैः ।
मानुषैरपि गन्धर्वैर्मा युद्धे चेत आधिथाः ॥ ४९
दृश्यतां वा पुमान्कश्चित्समग्रे पार्थिवे बले ।
योऽर्जुनं समरे प्राप्य स्वस्तिमानाव्रजेद्गृहान् ॥ ५०
किं ते जनक्षयेणेह कृतेन भरतर्षभ ।
यस्मिञ्जिते जितं ते स्यात्पुमानेकः स दृश्यताम् ॥
यः स देवान्सगन्धर्वान्सयक्षासुरपन्नगान् ।
अजयत्खाण्डवप्रस्थे कस्तं युध्येत मानवः ॥ ५२
तथा विराटनगरे श्रूयते महदद्भुतम् ।
एकस्य च बहूनां च पर्याप्तं तन्निदर्शनम् ॥ ५३
तमजेयमनाधृष्यं विजेतुं जिष्णुमच्युतम् ।
आशंससीह समरे वीरमर्जुनमूर्जितम् ॥ ५४
मद्द्वितीयं पुनः पार्थं कः प्रार्थयितुमर्हति ।
युद्धे प्रतीपमायान्तमपि साक्षात्पुरंदरः ॥ ५५
बाहुभ्यामुद्धरेद्भूमिं दहेत्क्रुद्ध इमाः प्रजाः ।
पातयेत्त्रिदिवाद्देवान्योऽर्जुनं समरे जयेत् ॥ ५६
पश्य पुत्रांस्तथा भ्रातॄञ्ज्ञातीन्संबन्धिनस्तथा ।
त्वत्कृते न विनश्येयुरेते भरतसत्तम ॥ ५७
अस्तु शेषं कौरवाणां मा पराभूदिदं कुलम् ।
कुलघ्न इति नोच्येथा नष्टकीर्तिर्नराधिप ॥ ५८
त्वामेव स्थापयिष्यन्ति यौवराज्ये महारथाः ।
महाराज्ये च पितरं धृतराष्ट्रं जनेश्वरम् ॥ ५९
मा तात श्रियमायान्तीमवमंस्थाः समुद्यताम् ।
अर्धं प्रदाय पार्थेभ्यो महतीं श्रियमाप्स्यसि ॥ ६०
पाण्डवैः संशमं कृत्वा कृत्वा च सुहृदां वचः ।
संप्रीयमाणो मित्रैश्च चिरं भद्राण्यवाप्स्यसि ॥ ६१

इति श्रीमहाभारते उद्योगपर्वणि
द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥

१२३

वैशंपायन उवाच ।

ततः शांतनवो भीष्मो दुर्योधनममर्षणम् ।
केशवस्य वचः श्रुत्वा प्रोवाच भरतर्षभ ॥ १
कृष्णेन वाक्यमुक्तोऽसि सुहृदां शममिच्छता ।
अनुपश्यस्व तत्तात मा मन्युवशमन्वगाः ॥ २
अकृत्वा वचनं तात केशवस्य महात्मनः ।
श्रेयो न जातु न सुखं न कल्याणमवाप्स्यसि ॥ ३
धर्म्यमर्थं महाबाहुराह त्वां तात केशवः ।
तमर्थमभिपद्यस्व मा राजन्नीनशः प्रजाः ॥ ४
इमां श्रियं प्रज्वलितां भारतीं सर्वराजसु ।
जीवतो धृतराष्ट्रस्य दौरात्म्याद्भ्रंशयिष्यसि ॥ ५
आत्मानं च सहामात्यं सपुत्रपशुबान्धवम् ।
सहमित्रमसद्बुद्ध्या जीविताद्भ्रंशयिष्यसि ॥ ६

अतिक्रामन्केशवस्य तथ्यं वचनमर्थवत् ।
पितुश्च भरतश्रेष्ठ विदुरस्य च धीमतः ॥ ७
मा कुलघ्नोऽन्तपुरुषो दुर्मतिः कापथं गमः ।
पितरं मातरं चैव वृद्धौ शोकाय मा ददः ॥ ८
अथ द्रोणोऽब्रवीत्तत्र दुर्योधनमिदं वचः ।
अमर्षवशमापन्नं निःश्वसन्तं पुनः पुनः ॥ ९
धर्मार्थयुक्तं वचनमाह त्वां तात केशवः ।
तथा भीष्मः शांतनवस्तज्जुषस्व नराधिप ॥ १०
प्राज्ञौ मेधाविनौ दान्तावर्थकामौ बहुश्रुतौ ।
आहतुस्त्वां हितं वाक्यं तदादत्स्व परंतप ॥ ११
अनुतिष्ठ महाप्राज्ञ कृष्णभीष्मौ यदूचतुः ।
मा वचो लघुबुद्धीनां समास्थास्त्वं परंतप ॥ १२
ये त्वां प्रोत्साहयन्त्येते नैते कृत्याय कर्हिचित् ।
वैरं परेषां ग्रीवायां प्रतिमोक्ष्यन्ति संयुगे ॥ १३
मा कुरूञ्जीघनः सर्वान्पुत्रान्भ्रातॄंस्तथैव च ।
वासुदेवार्जुनौ यत्र विद्ध्यजेयं बलं हि तत् ॥ १४
एतच्चैव मतं सत्यं सुहृदोः कृष्णभीष्मयोः ।
यदि नादास्यसे तात पश्चात्तप्स्यसि भारत ॥ १५
यथोक्तं जामदग्न्येन भूयानेव ततोऽर्जुनः ।
कृष्णो हि देवकीपुत्रो देवैरपि दुरुत्सहः ॥ १६
किं ते सुखप्रियेणेह प्रोक्तेन भरतर्षभ ।
एतत्ते सर्वमाख्यातं यथेच्छसि तथा कुरु ।
न हि त्वामुत्सहे वक्तुं भूयो भरतसत्तम ॥ १७
तस्मिन्वाक्यान्तरे वाक्यं क्षत्तापि विदुरोऽब्रवीत् ।
दुर्योधनमभिप्रेक्ष्य धार्तराष्ट्रममर्षणम् ॥ १८
दुर्योधन न शोचामि त्वामहं भरतर्षभ ।
इमौ तु वृद्धौ शोचामि गान्धारीं पितरं च ते ॥ १९
यावनाथौ चरिष्येते त्वया नाथेन दुर्हृदा ।
हतमित्रौ हतामात्यौ लूनपक्षाविव द्विजौ ॥ २०
भिक्षुकौ विचरिष्येते शोचन्तौ पृथिवीमिमाम् ।
कुलघ्नमीदृशं पापं जनयित्वा कुपूरुषम् ॥ २१
अथ दुर्योधनं राजा धृतराष्ट्रोऽभ्यभाषत ।
आसीनं भ्रातृभिः सार्धं राजभिः परिवारितम् ॥ २२
दुर्योधन निबोधेदं शौरिणोक्तं महात्मना ।
आदत्स्व शिवमत्यन्तं योगक्षेमवदव्ययम् ॥ २३
अनेन हि सहायेन कृष्णेनाक्लिष्टकर्मणा ।
इष्टान्सर्वानभिप्रायान्प्राप्स्यामः सर्वराजसु ॥ २४
सुसंहितः केशवेन गच्छ तात युधिष्ठिरम् ।
चर स्वस्त्ययनं कृत्स्नं भारतानामनामयम् ॥ २५
वासुदेवेन तीर्थेन तात गच्छस्व संगमम् ।
कालप्राप्तमिदं मन्ये मा त्वं दुर्योधनातिगाः ॥ २६
शमं चेद्याचमानं त्वं प्रत्याख्यास्यसि केशवम् ।
त्वदर्थमभिजल्पन्तं न तवास्त्यपराभवः ॥ २७

इति श्रीमहाभारते उद्योगपर्वणि
त्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥

१२४

वैशंपायन उवाच ।

धृतराष्ट्रवचः श्रुत्वा भीष्मद्रोणौ समर्थ्य तौ ।
दुर्योधनमिदं वाक्यमूचतुः शासनातिगम् ॥ १
यावत्कृष्णावसंनद्धौ यावत्तिष्ठति गाण्डिवम् ।
यावद्धौम्यो न सेनाग्नौ जुहोतीह द्विषद्बलम् ॥ २
यावन्न प्रेक्षते क्रुद्धः सेनां तव युधिष्ठिरः ।
ह्रीनिषेधो महेष्वासस्तावच्छाम्यतु वैशसम् ॥ ३
यावन्न दृश्यते पार्थः स्वेष्वनीकेष्ववस्थितः ।
भीमसेनो महेष्वासस्तावच्छाम्यतु वैशसम् ॥ ४
यावन्न चरते मार्गान्पृतनामभिहर्षयन् ।
यावन्न शातयत्याजौ शिरांसि गजयोधिनाम् ॥ ५
गदया वीरघातिन्या फलानीव वनस्पतेः ।
कालेन परिपक्वानि तावच्छाम्यतु वैशसम् ॥ ६
नकुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः ।

विराटश्च शिखण्डी च शैशुपालिश्च दंशिताः ॥ ७
यावन्न प्रविशन्त्येते नक्रा इव महार्णवम् ।
कृतास्त्राः क्षिप्रमस्यन्तस्तावच्छाम्यतु वैशसम् ॥ ८
यावन्न सुकुमारेषु शरीरेषु महीक्षिताम् ।
गार्ध्रपत्राः पतन्त्युग्रास्तावच्छाम्यतु वैशसम् ॥ ९
चन्दनागरुदिग्धेषु हारनिष्कधरेषु च ।
नोरःसु यावद्योधानां महेष्वासैर्महेषवः ॥ १०
कृतास्त्रैः क्षिप्रमस्यद्भिर्दूरपातिभिरायसाः ।
अभिलक्ष्यैर्निपात्यन्ते तावच्छाम्यतु वैशसम् ॥११
अभिवादयमानं त्वां शिरसा राजकुञ्जरः ।
पाणिभ्यां प्रतिगृह्णातु धर्मराजो युधिष्ठिरः ॥ १२
ध्वजाङ्कुशपताकाङ्कं दक्षिणं ते सुदक्षिणः ।
स्कन्धे निक्षिपतां बाहुं शान्तये भरतर्षभ ॥ १३
रत्नौषधिसमेतेन रत्नाङ्गुलितलेन च ।
उपविष्टस्य पृष्ठं ते पाणिना परिमार्जतु ॥ १४
शालस्कन्धो महाबाहुस्त्वां स्वजानो वृकोदरः ।
साम्नाभिवदतां चापि शान्तये भरतर्षभ ॥ १५
अर्जुनेन यमाभ्यां च त्रिभिस्तैरभिवादितः ।
मूर्ध्नि तान्समुपाघ्राय प्रेम्णाभिवद पार्थिव ॥ १६
दृष्ट्वा त्वां पाण्डवैर्वीरैर्भ्रातृभिः सह संगतम् ।
यावदानन्दजाश्रूणि प्रमुञ्चन्तु नराधिपाः ॥ १७
घुष्यतां राजधानीषु सर्वसंपन्महीक्षिताम् ।
पृथिवी भ्रातृभावेन भुज्यतां विज्वरो भव ॥ १८

इति श्रीमहाभारते उद्योगपर्वणि
चतुर्विंशत्यधिकशततमोऽध्यायः ॥ १२४ ॥

१२५

वैशंपायन उवाच ।

श्रुत्वा दुर्योधनो वाक्यमप्रियं कुरुसंसदि ।
प्रत्युवाच महाबाहुं वासुदेवं यशस्विनम् ॥ १
प्रसमीक्ष्य भवानेतद्वक्तुमर्हति केशव ।
मामेव हि विशेषेण विभाष्य परिगर्हसे ॥ २
भक्तिवादेन पार्थानामकस्मान्मधुसूदन ।
भवान्गर्हयते नित्यं किं समीक्ष्य बलाबलम् ॥ ३
भवान्क्षत्ता च राजा च आचार्यो वा पितामहः ।
मामेव परिगर्हन्ते नान्यं कंचन पार्थिवम् ॥ ४
न चाहं लक्षये कंचिद्व्यभिचारमिहात्मनः ।
अथ सर्वे भवन्तो मां विद्विषन्ति सराजकाः ॥ ५
न चाहं कंचिदत्यर्थमपराधमरिंदम ।
विचिन्तयन्प्रपश्यामि सुसूक्ष्ममपि केशव ॥ ६
प्रियाभ्युपगते द्यूते पाण्डवा मधुसूदन ।
जिताः शकुनिना राज्यं तत्र किं मम दुष्कृतम् ॥७
यत्पुनर्द्रविणं किंचित्तत्राजीयन्त पाण्डवाः ।
तेभ्य एवाभ्यनुज्ञातं तत्तदा मधुसूदन ॥ ८
अपराधो न चास्माकं यत्ते ह्यक्षपराजिताः ।
अजेया जयतां श्रेष्ठ पार्थाः प्रव्राजिता वनम् ॥ ९
केन चाप्यपवादेन विरुध्यन्तेऽरिभिः सह ।
अशक्ताः पाण्डवाः कृष्ण प्रहृष्टाः प्रत्यमित्रवत् ॥ १०
किमस्माभिः कृतं तेषां कस्मिन्वा पुनरागसि ।
धार्तराष्ट्राञ्जिघांसन्ति पाण्डवाः सृञ्जयैः सह ॥११
न चापि वयमुग्रेण कर्मणा वचनेन वा ।
वित्रस्ताः प्रणमामेह भयादपि शतक्रतोः ॥ १२
न च तं कृष्ण पश्यामि क्षत्रधर्ममनुष्ठितम् ।
उत्सहेत युधा जेतुं यो नः शत्रुनिबर्हण ॥ १३
न हि भीष्मकृपद्रोणाः सगणा मधुसूदन ।
देवैरपि युधा जेतुं शक्याः किमुत पाण्डवैः ॥ १४
स्वधर्ममनुतिष्ठन्तो यदि माधव संयुगे ।
शस्त्रेण निधनं काले प्राप्स्यामः स्वर्गमेव तत् ॥१५
मुख्यश्चैवैष नो धर्मः क्षत्रियाणां जनार्दन ।
यच्छयीमहि संग्रामे शरतल्पगता वयम् ॥ १६
ते वयं वीरशयनं प्राप्स्यामो यदि संयुगे ।

अप्रणम्यैव शत्रूणां न नस्तप्स्यति माधव ॥ १७
कश्च जातु कुले जातः क्षत्रधर्मेण वर्तयन् ।
भयाद्वृत्तिं समीक्ष्यैवं प्रणमेदिह कस्यचित् ॥ १८
उद्यच्छेदेव न नमेदुद्यमो ह्येव पौरुषम् ।
अप्यपर्वणि भज्येत न नमेदिह कस्यचित् ॥ १९
इति मातङ्गवचनं परीप्सन्ति हितेप्सवः ।
धर्माय चैव प्रणमेद्ब्राह्मणेभ्यश्च मद्विधः ॥ २०
अचिन्तयन्कंचिदन्यं यावज्जीवं तथाचरेत् ।
एष धर्मः क्षत्रियाणां मतमेतच्च मे सदा ॥ २१
राज्यांशश्चाभ्यनुज्ञातो यो मे पित्रा पुराभवत् ।
न स लभ्यः पुनर्जातु मयि जीवति केशव ॥ २२
यावच्च राजा ध्रियते धृतराष्ट्रो जनार्दन ।
न्यस्तशस्त्रा वयं ते वाप्युपजीवाम माधव ॥ २३
यद्यदेयं पुरा दत्तं राज्यं परवतो मम ।
अज्ञानाद्वा भयाद्वापि मयि बाले जनार्दन ॥ २४
न तदद्य पुनर्लभ्यं पाण्डवैर्वृष्णिनन्दन ।
ध्रियमाणे महाबाहो मयि संप्रति केशव ॥ २५
यावद्धि सूच्यास्तीक्ष्णाया विध्येदग्रेण माधव ।
तावदप्यपरित्याज्यं भूमेर्नः पाण्डवान्प्रति ॥ २६

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

१२६

वैशंपायन उवाच ।

ततः प्रहस्य दाशार्हः क्रोधपर्याकुलेक्षणः ।
दुर्योधनमिदं वाक्यमब्रवीत्कुरुसंसदि ॥ १
लप्स्यसे वीरशयनं काममेतदवाप्स्यसि ।
स्थिरो भव सहामात्यो विमर्दो भविता महान् ॥ २
यच्चैवं मन्यसे मूढ न मे कश्चिद्व्यतिक्रमः ।
पाण्डवेष्विति तत्सर्वं निबोधत नराधिपाः ॥ ३
श्रिया संतप्यमानेन पाण्डवानां महात्मनाम् ।
त्वया दुर्मन्त्रितं द्यूतं सौबलेन च भारत ॥ ४
कथं च ज्ञातयस्तात श्रेयांसः साधुसंमताः ।
तथान्याय्यमुपस्थातुं जिह्मेनाजिह्मचारिणः ॥ ५
अक्षद्यूतं महाप्राज्ञ सतामरतिनाशनम् ।
असतां तत्र जायन्ते भेदाश्च व्यसनानि च ॥ ६
तदिदं व्यसनं घोरं त्वया द्यूतमुखं कृतम् ।
असमीक्ष्य सदाचारैः सार्धं पापानुबन्धनैः ॥ ७
कश्चान्यो ज्ञातिभार्यां वै विप्रकर्तुं तथार्हति ।
आनीय च सभां वक्तुं यथोक्ता द्रौपदी त्वया ॥ ८
कुलीना शीलसंपन्ना प्राणेभ्योऽपि गरीयसी ।
महिषी पाण्डुपुत्राणां तथा विनिकृता त्वया ॥ ९
जानन्ति कुरवः सर्वे यथोक्ताः कुरुसंसदि ।
दुःशासनेन कौन्तेयाः प्रव्रजन्तः परंतपाः ॥ १०
सम्यग्वृत्तेष्वलुब्धेषु सततं धर्मचारिषु ।
स्वेषु बन्धुषु कः साधुश्चरेदेवमसांप्रतम् ॥ ११
नृशंसानामनार्याणां परुषाणां च भाषणम् ।
कर्णदुःशासनाभ्यां च त्वया च बहुशः कृतम् ॥
सह मात्रा प्रदग्धुं तान्बालकान्वारणावते ।
आस्थितः परमं यत्नं न समृद्धं च तत्तव ॥ १३
ऊषुश्च सुचिरं कालं प्रच्छन्नाः पाण्डवास्तदा ।
मात्रा सहैकचक्रायां ब्राह्मणस्य निवेशने ॥ १४
विषेण सर्पबन्धैश्च यतिताः पाण्डवास्त्वया ।
सर्वोपायैर्विनाशाय न समृद्धं च तत्तव ॥ १५
एवंबुद्धिः पाण्डवेषु मिथ्यावृत्तिः सदा भवान् ।
कथं ते नापराधोऽस्ति पाण्डवेषु महात्मसु ॥ १६
कृत्वा बहून्यकार्याणि पाण्डवेषु नृशंसवत् ।
मिथ्यावृत्तिरनार्यः सन्नद्य विप्रतिपद्यसे ॥ १७
मातापितृभ्यां भीष्मेण द्रोणेन विदुरेण च ।
शाम्येति मुहुरुक्तोऽसि न च शाम्यसि पार्थिव ॥
शमे हि सुमहानर्थस्तव पार्थस्य चोभयोः ।

न च रोचयसे राजन्किमन्यद्बुद्धिलाघवात् ॥ १९
न शर्म प्राप्स्यसे राजन्नुत्क्रम्य सुहृदां वचः ।
अधर्म्यमयशस्यं च क्रियते पार्थिव त्वया ॥ २०
एवं ब्रुवति दाशार्हे दुर्योधनममर्षणम् ।
दुःशासन इदं वाक्यमब्रवीत्कुरुसंसदि ॥ २१
न चेत्संधास्यसे राजन्स्वेन कामेन पाण्डवैः ।
बद्ध्वा किल त्वां दास्यन्ति कुन्तीपुत्राय कौरवाः ॥२२
वैकर्तनं त्वां च मां च त्रीनेतान्मनुजर्षभ ।
पाण्डवेभ्यः प्रदास्यन्ति भीष्मो द्रोणः पिता च ते ॥
भ्रातुरेतद्वचः श्रुत्वा धार्तराष्ट्रः सुयोधनः ।
क्रुद्धः प्रातिष्ठतोत्थाय महानाग इव श्वसन् ॥ २४
विदुरं धृतराष्ट्रं च महाराजं च बाह्लिकम् ।
कृपं च सोमदत्तं च भीष्मं द्रोणं जनार्दनम् ॥ २५
सर्वानेताननादृत्य दुर्मतिर्निरपत्रपः ।
अशिष्टवदमर्यादो मानी मान्यावमानिता ॥ २६
तं प्रस्थितमभिप्रेक्ष्य भ्रातरो मनुजर्षभम् ।
अनुजग्मुः सहामात्या राजानश्चापि सर्वशः ॥ २७
सभायामुत्थितं क्रुद्धं प्रस्थितं भ्रातृभिः सह ।
दुर्योधनमभिप्रेक्ष्य भीष्मः शांतनवोऽब्रवीत् ॥ २८
धर्मार्थावभिसंत्यज्य संरम्भं योऽनुमन्यते ।
हसन्ति व्यसने तस्य दुर्हृदो नचिरादिव ॥ २९
दुरात्मा राजपुत्रोऽयं धार्तराष्ट्रोऽनुपायवित् ।
मिथ्याभिमानी राज्यस्य क्रोधलोभवशानुगः ॥ ३०
कालपक्वमिदं मन्ये सर्वक्षत्रं जनार्दन ।
सर्वे ह्यनुसृता मोहात्पार्थिवाः सह मन्त्रिभिः ॥३१
भीष्मस्याथ वचः श्रुत्वा दाशार्हः पुष्करेक्षणः ।
भीष्मद्रोणमुखान्सर्वानभ्यभाषत वीर्यवान् ॥ ३२
सर्वेषां कुरुवृद्धानां महानयमतिक्रमः ।
प्रसह्य मन्दमैश्वर्ये न नियच्छत यन्नृपम् ॥ ३३
तत्र कार्यमहं मन्ये प्राप्तकालमरिंदमाः ।
क्रियमाणे भवेच्छ्रेयस्तत्सर्वं शृणुतानघाः ॥ ३४
प्रत्यक्षमेतद्भवतां यद्वक्ष्यामि हितं वचः ।
भवतामानुकूल्येन यदि रोचेत भारताः ॥ ३५
भोजराजस्य वृद्धस्य दुराचारो ह्यनात्मवान् ।
जीवतः पितुरैश्वर्यं हृत्वा मन्युवशं गतः ॥ ३६
उग्रसेनसुतः कंसः परित्यक्तः स बान्धवैः ।
ज्ञातीनां हितकामेन मया शस्तो महामृधे ॥ ३७
आहुकः पुनरस्माभिर्ज्ञातिभिश्चापि सत्कृतः ।
उग्रसेनः कृतो राजा भोजराजन्यवर्धनः ॥ ३८
कंसमेकं परित्यज्य कुलार्थे सर्वयादवाः ।
संभूय सुखमेधन्ते भारतान्धकवृष्णयः ॥ ३९
अपि चाप्यवदद्राजन्परमेष्ठी प्रजापतिः ।
व्यूढे देवासुरे युद्धेऽभ्युद्यतेष्वायुधेषु च ॥ ४०
द्वैधीभूतेषु लोकेषु विनश्यत्सु च भारत ।
अब्रवीत्सृष्टिमान्देवो भगवाँल्लोकभावनः ॥ ४१
पराभविष्यन्त्यसुरा दैतेया दानवैः सह ।
आदित्या वसवो रुद्रा भविष्यन्ति दिवौकसः ॥४२
देवासुरमनुष्याश्च गन्धर्वोरगराक्षसाः ।
अस्मिन्युद्धे सुसंयत्ता हनिष्यन्ति परस्परम् ॥ ४३
इति मत्वाब्रवीद्धर्मं परमेष्ठी प्रजापतिः ।
वरुणाय प्रयच्छैतान्बद्ध्वा दैतेयदानवान् ॥ ४४
एवमुक्तस्ततो धर्मो नियोगात्परमेष्ठिनः ।
वरुणाय ददौ सर्वान्बद्ध्वा दैतेयदानवान् ॥ ४५
तान्बद्ध्वा धर्मपाशैश्च स्वैश्च पाशैर्जलेश्वरः ।
वरुणः सागरे यत्तो नित्यं रक्षति दानवान् ॥ ४६
तथा दुर्योधनं कर्णं शकुनिं चापि सौबलम् ।
बद्ध्वा दुःशासनं चापि पाण्डवेभ्यः प्रयच्छत ॥ ४७
त्यजेत्कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ ४८
राजन्दुर्योधनं बद्ध्वा ततः संशाम्य पाण्डवैः ।

त्वत्कृते न विनश्येयुः क्षत्रियाः क्षत्रियर्षभ ॥ ४९

इति श्रीमहाभारते उद्योगपर्वणि
षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥

१२७

वैशंपायन उवाच ।

कृष्णस्य वचनं श्रुत्वा धृतराष्ट्रो जनेश्वरः ।
विदुरं सर्वधर्मज्ञं त्वरमाणोऽभ्यभाषत ॥ १
गच्छ तात महाप्राज्ञां गान्धारीं दीर्घदर्शिनीम् ।
आनयेह तया सार्धमनुनेष्यामि दुर्मतिम् ॥ २
यदि सापि दुरात्मानं शमयेद्दुष्टचेतसम् ।
अपि कृष्णस्य सुहृदस्तिष्ठेम वचने वयम् ॥ ३
अपि लोभाभिभूतस्य पन्थानमनुदर्शयेत् ।
दुर्बुद्धेर्दुःसहायस्य समर्थं ब्रुवती वचः ॥ ४
अपि नो व्यसनं घोरं दुर्योधनकृतं महत् ।
शमयेच्चिररात्राय योगक्षेमवदव्ययम् ॥ ५
राज्ञस्तु वचनं श्रुत्वा विदुरो दीर्घदर्शिनीम् ।
आनयामास गान्धारीं धृतराष्ट्रस्य शासनात् ॥ ६

धृतराष्ट्र उवाच ।

एष गान्धारि पुत्रस्ते दुरात्मा शासनातिगः ।
ऐश्वर्यलोभादैश्वर्यं जीवितं च प्रहास्यति ॥ ७
अशिष्टवदमर्यादः पापैः सह दुरात्मभिः ।
सभाया निर्गतो मूढो व्यतिक्रम्य सुहृद्वचः ॥ ८

वैशंपायन उवाच ।

सा भर्तुर्वचनं श्रुत्वा राजपुत्री यशस्विनी ।
अन्विच्छन्ती महच्छ्रेयो गान्धारी वाक्यमब्रवीत् ॥
आनयेह सुतं क्षिप्रं राज्यकामुकमातुरम् ।
न हि राज्यमशिष्टेन शक्यं धर्मार्थलोपिना ॥ १०
त्वं ह्येवात्र भृशं गर्ह्यो धृतराष्ट्र सुतप्रियः ।
यो जानन्पापतामस्य तत्प्रज्ञामनुवर्तसे ॥ ११
स एष काममन्युभ्यां प्रलब्धो मोहमास्थितः ।
अशक्योऽद्य त्वया राजन्विनिवर्तयितुं बलात् ॥ १२
राज्यप्रदाने मूढस्य बालिशस्य दुरात्मनः ।
दुःसहायस्य लुब्धस्य धृतराष्ट्रोऽश्नुते फलम् ॥ १३
कथं हि स्वजने भेदमुपेक्षेत महामतिः ।
भिन्नं हि स्वजनेन त्वां प्रसहिष्यन्ति शत्रवः ॥ १४
या हि शक्या महाराज साम्ना दानेन वा पुनः ।
निस्तर्तुमापदः स्वेषु दण्डं कस्तत्र पातयेत् ॥ १५
शासनाद्धृतराष्ट्रस्य दुर्योधनममर्षणम् ।
मातुश्च वचनात्क्षत्ता सभां प्रावेशयत्पुनः ॥ १६
स मातुर्वचनाकाङ्क्षी प्रविवेश सभां पुनः ।
अभिताम्रेक्षणः क्रोधान्निःश्वसन्निव पन्नगः ॥ १७
तं प्रविष्टमभिप्रेक्ष्य पुत्रमुत्पथमास्थितम् ।
विगर्हमाणा गान्धारी समर्थं वाक्यमब्रवीत् ॥ १८
दुर्योधन निबोधेदं वचनं मम पुत्रक ।
हितं ते सानुबन्धस्य तथायत्यां सुखोदयम् ॥ १९
भीष्मस्य तु पितुश्चैव मम चापचितिः कृता ।
भवेद्द्रोणमुखानां च सुहृदां शाम्यता त्वया ॥ २०
न हि राज्यं महाप्राज्ञ स्वेन कामेन शक्यते ।
अवाप्तुं रक्षितुं वापि भोक्तुं वा भरतर्षभ ॥ २१
न ह्यवश्येन्द्रियो राज्यमश्नीयाद्दीर्घमन्तरम् ।
विजितात्मा तु मेधावी स राज्यमभिपालयेत् ॥ २२
कामक्रोधौ हि पुरुषमर्थेभ्यो व्यपकर्षतः ।
तौ तु शत्रू विनिर्जित्य राजा विजयते महीम् ॥ २३
लोकेश्वरप्रभुत्वं हि महदेतद्दुरात्मभिः ।
राज्यं नामेप्सितं स्थानं न शक्यमभिरक्षितुम् ॥ २४
इन्द्रियाणि महत्प्रेप्सुर्नियच्छेदर्थधर्मयोः ।
इन्द्रियैर्नियतैर्बुद्धिर्वर्धतेऽग्निरिवेन्धनैः ॥ २५
अविधेयानि हीमानि व्यापादयितुमप्यलम् ।
अविधेया इवादान्ता हयाः पथि कुसारथिम् ॥ २६
अविजित्य य आत्मानममात्यान्विजिगीषते ।

अजितात्माजितामात्यः सोऽवशः परिहीयते ॥ २७
आत्मानमेव प्रथमं देशरूपेण यो जयेत् ।
ततोऽमात्यानमित्रांश्च न मोघं विजिगीषते ॥ २८
वश्येन्द्रियं जितामात्यं धृतदण्डं विकारिषु ।
परीक्ष्यकारिणं धीरमत्यन्तं श्रीर्निषेवते ॥ २९
क्षुद्राक्षेणेव जालेन झषावपिहिताबुभौ ।
कामक्रोधौ शरीरस्थौ प्रज्ञानं तौ विलुम्पतः ॥ ३०
याभ्यां हि देवाः स्वर्यातुः स्वर्गस्यापिदधुर्मुखम् ।
बिभ्यतोऽनुपरागस्य कामक्रोधौ स्म वर्धितौ ॥ ३१
कामं क्रोधं च लोभं च दम्भं दर्पं च भूमिपः ।
सम्यग्विजेतुं यो वेद स महीमभिजायते ॥ ३२
सततं निग्रहे युक्त इन्द्रियाणां भवेन्नृपः ।
ईप्सन्नर्थं च धर्मं च द्विषतां च पराभवम् ॥ ३३
कामाभिभूतः क्रोधाद्वा यो मिथ्या प्रतिपद्यते ।
स्वेषु चान्येषु वा तस्य न सहाया भवन्त्युत ॥ ३४
एकीभूतैर्महाप्राज्ञैः शूरैररिनिबर्हणैः ।
पाण्डवैः पृथिवीं तात भोक्ष्यसे सहितः सुखी ॥
यथा भीष्मः शांतनवो द्रोणश्चापि महारथः ।
आहतुस्तात तत्सत्यमजेयौ कृष्णपाण्डवौ ॥ ३६
प्रपद्यस्व महाबाहुं कृष्णमक्लिष्टकारिणम् ।
प्रसन्नो हि सुखाय स्यादुभयोरेव केशवः ॥ ३७
सुहृदामर्थकामानां यो न तिष्ठति शासने ।
प्राज्ञानां कृतविद्यानां स नरः शत्रुनन्दनः ॥ ३८
न युद्धे तात कल्याणं न धर्मार्थौ कुतः सुखम् ।
न चापि विजयो नित्यं मा युद्धे चेत आधिथाः ॥
भीष्मेण हि महाप्राज्ञ पित्रा ते बाह्लिकेन च ।
दत्तोंऽशः पाण्डुपुत्राणां भेदाद्भीतैररिंदम ॥ ४०
तस्य चैतत्प्रदानस्य फलमद्यानुपश्यसि ।
यद्भुङ्क्षे पृथिवीं सर्वां शूरैर्निहतकण्टकाम् ॥ ४१
प्रयच्छ पाण्डुपुत्राणां यथोचितमरिंदम ।
यदीच्छसि सहामात्यो भोक्तुमर्धं महीक्षिताम् ॥
अलमर्धं पृथिव्यास्ते सहामात्यस्य जीवनम् ।
सुहृदां वचने तिष्ठन्यशः प्राप्स्यसि भारत ॥ ४३
श्रीमद्भिरात्मवद्भिर्हि बुद्धिमद्भिर्जितेन्द्रियैः ।
पाण्डवैर्विग्रहस्तात भ्रंशयेन्महतः सुखात् ॥ ४४
निगृह्य सुहृदां मन्युं शाधि राज्यं यथोचितम् ।
स्वमंशं पाण्डुपुत्रेभ्यः प्रदाय भरतर्षभ ॥ ४५
अलमह्ना निकारोऽयं त्रयोदश समाः कृतः ।
शमयैनं महाप्राज्ञ कामक्रोधसमेधितम् ॥ ४६
न चैष शक्तः पार्थानां यस्त्वदर्थमभीप्सति ।
सूतपुत्रो दृढक्रोधो भ्राता दुःशासनश्च ते ॥ ४७
भीष्मे द्रोणे कृपे कर्णे भीमसेने धनंजये ।
धृष्टद्युम्ने च संक्रुद्धे न स्युः सर्वाः प्रजा ध्रुवम् ॥४८
अमर्षवशमापन्नो मा कुरूंस्तात जीघनः ।
सर्वा हि पृथिवी स्पृष्टा त्वत्पाण्डवकृते वधम् ॥४९
यच्च त्वं मन्यसे मूढ भीष्मद्रोणकृपादयः ।
योत्स्यन्ते सर्वशक्त्येति नैतदद्योपपद्यते ॥ ५०
समं हि राज्यं प्रीतिश्च स्थानं च विजितात्मनाम् ।
पाण्डवेष्वथ युष्मासु धर्मस्त्वभ्यधिकस्ततः ॥ ५१
राजपिण्डभयादेते यदि हास्यन्ति जीवितम् ।
न हि शक्ष्यन्ति राजानं युधिष्ठिरमुदीक्षितुम् ॥ ५२
न लोभादर्थसंपत्तिर्नराणामिह दृश्यते ।
तदलं तात लोभेन प्रशाम्य भरतर्षभ ॥ ५३

इति श्रीमहाभारते उद्योगपर्वणि
सप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥

१२८

वैशंपायन उवाच ।

तत्तु वाक्यमनादृत्य सोऽर्थवन्मातृभाषितम् ।
पुनः प्रतस्थे संरम्भात्सकाशमकृतात्मनाम् ॥ १
ततः सभाया निर्गम्य मन्त्रयामास कौरवः ।

सौबलेन मताक्षेण राज्ञा शकुनिना सह ॥ २
दुर्योधनस्य कर्णस्य शकुनेः सौबलस्य च ।
दुःशासनचतुर्थानामिदमासीद्विचेष्टितम् ॥ ३
पुरायमस्मान्गृह्णाति क्षिप्रकारी जनार्दनः ।
सहितो धृतराष्ट्रेण राज्ञा शांतनवेन च ॥ ४
वयमेव हृषीकेशं निगृह्णीम बलादिव ।
प्रसह्य पुरुषव्याघ्रमिन्द्रो वैरोचनिं यथा ॥ ५
श्रुत्वा गृहीतं वार्ष्णेयं पाण्डवा हतचेतसः ।
निरुत्साहा भविष्यन्ति भग्नदंष्ट्रा इवोरगाः ॥ ६
अयं ह्येषां महाबाहुः सर्वेषां शर्म वर्म च ।
अस्मिन्गृहीते वरदे ऋषभे सर्वसात्वताम् ।
निरुद्यमा भविष्यन्ति पाण्डवाः सोमकैः सह ॥ ७
तस्माद्वयमिहैवैनं केशवं क्षिप्रकारिणम् ।
क्रोशतो धृतराष्ट्रस्य बद्ध्वा योत्स्यामहे रिपून् ॥ ८
तेषां पापमभिप्रायं पापानां दुष्टचेतसाम् ।
इङ्गितज्ञः कविः क्षिप्रमन्वबुध्यत सात्यकिः ॥ ९
तदर्थमभिनिष्क्रम्य हार्दिक्येन सहास्थितः ।
अब्रवीत्कृतवर्माणं क्षिप्रं योजय वाहिनीम् ॥ १०
व्यूढानीकः सभाद्वारमुपतिष्ठस्व दंशितः ।
यावदाख्याम्यहं चैतत्कृष्णायाक्लिष्टकर्मणे ॥ ११
स प्रविश्य सभां वीरः सिंहो गिरिगुहामिव ।
आचष्ट तमभिप्रायं केशवाय महात्मने ॥ १२
धृतराष्ट्रं ततश्चैव विदुरं चान्वभाषत ।
तेषामेतमभिप्रायमाचचक्षे स्मयन्निव ॥ १३
धर्मादपेतमर्थाच्च कर्म साधुविगर्हितम् ।
मन्दाः कर्तुमिहेच्छन्ति न चावाप्यं कथंचन ॥ १४
पुरा विकुर्वते मूढाः पापात्मानः समागताः ।
धर्षिताः काममन्युभ्यां क्रोधलोभवशानुगाः ॥ १५
इमं हि पुण्डरीकाक्षं जिघृक्षन्त्यल्पचेतसः ।
पटेनाग्निं प्रज्वलितं यथा बाला यथा जडाः ॥ १६

सात्यकेस्तद्वचः श्रुत्वा विदुरो दीर्घदर्शिवान् ।
धृतराष्ट्रं महाबाहुमब्रवीत्कुरुसंसदि ॥ १७
राजन्परीतकालास्ते पुत्राः सर्वे परंतप ।
अयशस्यमशक्यं च कर्म कर्तुं समुद्यताः ॥ १८
इमं हि पुण्डरीकाक्षमभिभूय प्रसह्य च ।
निग्रहीतुं किलेच्छन्ति सहिता वासवानुजम् ॥ १९
इमं पुरुषशार्दूलमप्रधृष्यं दुरासदम् ।
आसाद्य न भविष्यन्ति पतंगा इव पावकम् ॥२०
अयमिच्छन्हि तान्सर्वान्यतमानाञ्जनार्दनः ।
सिंहो मृगानिव क्रुद्धो गमयेद्यमसादनम् ॥ २१
न त्वयं निन्दितं कर्म कुर्यात्कृष्णः कथंचन ।
न च धर्मादपक्रामेदच्युतः पुरुषोत्तमः ॥ २२
विदुरेणैवमुक्ते तु केशवो वाक्यमब्रवीत् ।
धृतराष्ट्रमभिप्रेक्ष्य सुहृदां शृण्वतां मिथः ॥ २३
राजन्नेते यदि क्रुद्धा मां निगृह्णीयुरोजसा ।
एते वा मामहं वैनाननुजानीहि पार्थिव ॥ २४
एतान्हि सर्वान्संरब्धान्नियन्तुमहमुत्सहे ।
न त्वहं निन्दितं कर्म कुर्यां पापं कथंचन ॥ २५
पाण्डवार्थे हि लुभ्यन्तः स्वार्थाद्धास्यन्ति ते सुताः ।
एते चेदेवमिच्छन्ति कृतकार्यो युधिष्ठिरः ॥ २६
अद्यैव ह्यहमेतांश्च ये चैताननु भारत ।
निगृह्य राजन्पार्थेभ्यो दद्यां किं दुष्कृतं भवेत् ॥२७
इदं तु न प्रवर्तेयं निन्दितं कर्म भारत ।
संनिधौ ते महाराज क्रोधजं पापबुद्धिजम् ॥ २८
एष दुर्योधनो राजन्यथेच्छति तथास्तु तत् ।
अहं तु सर्वान्समयाननुजानामि भारत ॥ २९
एतच्छ्रुत्वा तु विदुरं धृतराष्ट्रोऽभ्यभाषत ।
क्षिप्रमानय तं पापं राज्यलुब्धं सुयोधनम् ॥ ३०
सहमित्रं सहामात्यं ससोदर्यं सहानुगम् ।
शक्नुयां यदि पन्थानमवतारयितुं पुनः ॥ ३१

ततो दुर्योधनं क्षत्ता पुनः प्रावेशयत्सभाम् ।
अकामं भ्रातृभिः सार्धं राजभिः परिवारितम् ॥ ३२
अथ दुर्योधनं राजा धृतराष्ट्रोऽभ्यभाषत ।
कर्णदुःशासनाभ्यां च राजभिश्चाभिसंवृतम् ॥ ३३
नृशंस पापभूयिष्ठ क्षुद्रकर्मसहायवान् ।
पापैः सहायैः संहत्य पापं कर्म चिकीर्षसि ॥ ३४
अशक्यमयशस्यं च सद्भिश्चापि विगर्हितम् ।
यथा त्वादृशको मूढो व्यवस्येत्कुलपांसनः ॥ ३५
त्वमिमं पुण्डरीकाक्षमप्रधृष्यं दुरासदम् ।
पापैः सहायैः संहत्य निग्रहीतुं किलेच्छसि ॥ ३६
यो न शक्यो बलात्कर्तुं देवैरपि सवासवैः ।
तं त्वं प्रार्थयसे मन्द बालश्चन्द्रमसं यथा ॥ ३७
देवैर्मनुष्यैर्गन्धर्वैरसुरैरुरगैश्च यः ।
न सोढुं समरे शक्यस्तं न बुध्यसि केशवम् ॥ ३८
दुर्ग्रहः पाणिना वायुर्दुःस्पर्शः पाणिना शशी ।
दुर्धरा पृथिवी मूर्ध्ना दुर्ग्रहः केशवो बलात् ॥ ३९
इत्युक्ते धृतराष्ट्रेण क्षत्तापि विदुरोऽब्रवीत् ।
दुर्योधनमभिप्रेक्ष्य धार्तराष्ट्रममर्षणम् ॥ ४०
सौभद्वारे वानरेन्द्रो द्विविदो नाम नामतः ।
शिलावर्षेण महता छादयामास केशवम् ॥ ४१
ग्रहीतुकामो विक्रम्य सर्वयत्नेन माधवम् ।
ग्रहीतुं नाशकत्तत्र तं त्वं प्रार्थयसे बलात् ॥ ४२
निर्मोचने षट्सहस्राः पाशैर्बद्ध्वा महासुराः ।
ग्रहीतुं नाशकंश्चैनं तं त्वं प्रार्थयसे बलात् ॥ ४३
प्राग्ज्योतिषगतं शौरिं नरकः सह दानवैः ।
ग्रहीतुं नाशकत्तत्र तं त्वं प्रार्थयसे बलात् ॥ ४४
अनेन हि हता बाल्ये पूतना शिशुना तथा ।
गोवर्धनो धारितश्च गवार्थे भरतर्षभ ॥ ४५
अरिष्टो धेनुकश्चैव चाणूरश्च महाबलः ।
अश्वराजश्च निहतः कंसश्चारिष्टमाचरन् ॥ ४६
जरासंधश्च वक्रश्च शिशुपालश्च वीर्यवान् ।
बाणश्च निहतः संख्ये राजानश्च निषूदिताः ॥ ४७
वरुणो निर्जितो राजा पावकश्चामितौजसा ।
पारिजातं च हरता जितः साक्षाच्छचीपतिः ॥ ४८
एकार्णवे शयानेन हतौ तौ मधुकैटभौ ।
जन्मान्तरमुपागम्य हयग्रीवस्तथा हतः ॥ ४९
अयं कर्ता न क्रियते कारणं चापि पौरुषे ।
यद्यदिच्छेदयं शौरिस्तत्तत्कुर्यादयत्नतः ॥ ५०
तं न बुध्यसि गोविन्दं घोरविक्रममच्युतम् ।
आशीविषमिव क्रुद्धं तेजोराशिमनिर्जितम् ॥ ५१
प्रधर्षयन्महाबाहुं कृष्णमक्लिष्टकारिणम् ।
पतंगोऽग्निमिवासाद्य सामात्यो न भविष्यसि ॥ ५२

इति श्रीमहाभारते उद्योगपर्वणि
अष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥

१२९

वैशंपायन उवाच ।

विदुरेणैवमुक्ते तु केशवः शत्रुपूगहा ।
दुर्योधनं धार्तराष्ट्रमभ्यभाषत वीर्यवान् ॥ १
एकोऽहमिति यन्मोहान्मन्यसे मां सुयोधन ।
परिभूय च दुर्बुद्धे ग्रहीतुं मां चिकीर्षसि ॥ २
इहैव पाण्डवाः सर्वे तथैवान्धकवृष्णयः ।
इहादित्याश्च रुद्राश्च वसवश्च महर्षिभिः ॥ ३
एवमुक्त्वा जहासोच्चैः केशवः परवीरहा ।
तस्य संस्मयतः शौरेर्विद्युद्रूपा महात्मनः ।
अङ्गुष्ठमात्रास्त्रिदशा मुमुचुः पावकार्चिषः ॥ ४
तस्य ब्रह्मा ललाटस्थो रुद्रो वक्षसि चाभवत् ।
लोकपाला भुजेष्वासन्नग्निरास्यादजायत ॥ ५
आदित्याश्चैव साध्याश्च वसवोऽथाश्विनावपि ।
मरुतश्च सहेन्द्रेण विश्वेदेवास्तथैव च ।
बभूवुश्चैव रूपाणि यक्षगन्धर्वरक्षसाम् ॥ ६

प्रादुरास्तां तथा दोर्भ्यां संकर्षणधनंजयौ ।
दक्षिणेऽथार्जुनो धन्वी हली रामश्च सव्यतः ॥ ७
भीमो युधिष्ठिरश्चैव माद्रीपुत्रौ च पृष्ठतः ।
अन्धका वृष्णयश्चैव प्रद्युम्नप्रमुखास्ततः ॥ ८
अग्रे बभूवुः कृष्णस्य समुद्यतमहायुधाः ।
शङ्खचक्रगदाशक्तिशार्ङ्गलाङ्गलनन्दकाः ॥ ९
अदृश्यन्तोद्यतान्येव सर्वप्रहरणानि च ।
नानाबाहुषु कृष्णस्य दीप्यमानानि सर्वशः ॥ १०
नेत्राभ्यां नस्ततश्चैव श्रोत्राभ्यां च समन्ततः ।
प्रादुरासन्महारौद्राः सधूमाः पावकार्चिषः ।
रोमकूपेषु च तथा सूर्यस्येव मरीचयः ॥ ११
तं दृष्ट्वा घोरमात्मानं केशवस्य महात्मनः ।
न्यमीलयन्त नेत्राणि राजानस्त्रस्तचेतसः ॥ १२
ऋते द्रोणं च भीष्मं च विदुरं च महामतिम् ।
संजयं च महाभागमृषींश्चैव तपोधनान् ।
प्रादात्तेषां स भगवान्दिव्यं चक्षुर्जनार्दनः ॥ १३
तद्दृष्ट्वा महदाश्चर्यं माधवस्य सभातले ।
देवदुन्दुभयो नेदुः पुष्पवर्षं पपात च ॥ १४
चचाल च मही कृत्स्ना सागरश्चापि चुक्षुभे ।
विस्मयं परमं जग्मुः पार्थिवा भरतर्षभ ॥ १५
ततः स पुरुषव्याघ्रः संजहार वपुः स्वकम् ।
तां दिव्यामद्भुतां चित्रामृद्धिमत्तामरिंदमः ॥ १६
ततः सात्यकिमादाय पाणौ हार्दिक्यमेव च ।
ऋषिभिस्तैरनुज्ञातो निर्ययौ मधुसूदनः ॥ १७
ऋषयोऽन्तर्हिता जग्मुस्ततस्ते नारदादयः ।
तस्मिन्कोलाहले वृत्ते तदद्भुतमभूत्तदा ॥ १८
तं प्रस्थितमभिप्रेक्ष्य कौरवाः सह राजभिः ।
अनुजग्मुर्नरव्याघ्रं देवा इव शतक्रतुम् ॥ १९
अचिन्तयन्नमेयात्मा सर्वं तद्राजमण्डलम् ।
निश्चक्राम ततः शौरिः सधूम इव पावकः ॥ २०
ततो रथेन शुभ्रेण महता किङ्किणीकिना ।
हेमजालविचित्रेण लघुना मेघनादिना ॥ २१
सूपस्करेण शुभ्रेण वैयाघ्रेण वरूथिना ।
सैन्यसुग्रीवयुक्तेन प्रत्यदृश्यत दारुकः ॥ २२
तथैव रथमास्थाय कृतवर्मा महारथः ।
वृष्णीनां संमतो वीरो हार्दिक्यः प्रत्यदृश्यत ॥ २३
उपस्थितरथं शौरिं प्रयास्यन्तमरिंदमम् ।
धृतराष्ट्रो महाराजः पुनरेवाभ्यभाषत ॥ २४
यावद्बलं मे पुत्रेषु पश्यस्येतज्जनार्दन ।
प्रत्यक्षं ते न ते किंचित्परोक्षं शत्रुकर्शन ॥ २५
कुरूणां शममिच्छन्तं यतमानं च केशव ।
विदित्वैतामवस्थां मे नातिशङ्कितुमर्हसि ॥ २६
न मे पापोऽस्त्यभिप्रायः पाण्डवान्प्रति केशव ।
ज्ञातमेव हि ते वाक्यं यन्मयोक्तः सुयोधनः ॥ २७
जानन्ति कुरवः सर्वे राजानश्चैव पार्थिवाः ।
शमे प्रयतमानं मां सर्वयत्नेन माधव ॥ २८
ततोऽब्रवीन्महाबाहुर्धृतराष्ट्रं जनेश्वरम् ।
द्रोणं पितामहं भीष्मं क्षत्तारं बाह्लिकं कृपम् ॥ २९
प्रत्यक्षमेतद्भवतां यद्वृत्तं कुरुसंसदि ।
यथा चाशिष्टवन्मन्दो रोषादसकृदुत्थितः ॥ ३०
वदत्यनीशमात्मानं धृतराष्ट्रो महीपतिः ।
आपृच्छे भवतः सर्वान्गमिष्यामि युधिष्ठिरम् ॥ ३१
आमन्त्र्य प्रस्थितं शौरिं रथस्थं पुरुषर्षभम् ।
अनुजग्मुर्महेष्वासाः प्रवीरा भरतर्षभाः ॥ ३२
भीष्मो द्रोणः कृपः क्षत्ता धृतराष्ट्रोऽथ बाह्लिकः ।
अश्वत्थामा विकर्णश्च युयुत्सुश्च महारथः ॥ ३३
ततो रथेन शुभ्रेण महता किङ्किणीकिना ।
कुरूणां पश्यतां प्रायात्पृथां द्रष्टुं पितृष्वसाम् ॥ ३४

इति श्रीमहाभारते उद्योगपर्वणि
एकोनत्रिंशदधिकशततमोऽध्यायः ॥ १२९ ॥

१३०

वैशंपायन उवाच ।

प्रविश्याथ गृहं तस्याश्चरणावभिवाद्य च ।
आचख्यौ तत्समासेन यद्वृत्तं कुरुसंसदि ॥ १

वासुदेव उवाच ।

उक्तं बहुविधं वाक्यं ग्रहणीयं सहेतुकम् ।
ऋषिभिश्च मया चैव न चासौ तद्गृहीतवान् ॥ २
कालपक्वमिदं सर्वं दुर्योधनवशानुगम् ।
आपृच्छे भवतीं शीघ्रं प्रयास्ये पाण्डवान्प्रति ॥ ३
किं वाच्याः पाण्डवेयास्ते भवत्या वचनान्मया ।
तद्ब्रूहि त्वं महाप्राज्ञे शुश्रूषे वचनं तव ॥ ४

कुन्त्युवाच ।

ब्रूयाः केशव राजानं धर्मात्मानं युधिष्ठिरम् ।
भूयांस्ते हीयते धर्मो मा पुत्रक वृथा कृथाः ॥ ५
श्रोत्रियस्येव ते राजन्मन्दकस्याविपश्चितः ।
अनुवाकहता बुद्धिर्धर्ममेवैकमीक्षते ॥ ६
अङ्गावेक्षस्व धर्मं त्वं यथा सृष्टः स्वयंभुवा ।
उरस्तः क्षत्रियः सृष्टो बाहुवीर्योपजीविता ।
क्रूराय कर्मणे नित्यं प्रजानां परिपालने ॥ ७
शृणु चात्रोपमामेकां या वृद्धेभ्यः श्रुता मया ।
मुचुकुन्दस्य राजर्षेरददात्पृथिवीमिमाम् ।
पुरा वैश्रवणः प्रीतो न चासौ तां गृहीतवान् ॥ ८
बाहुवीर्यार्जितं राज्यमश्नीयामिति कामये ।
ततो वैश्रवणः प्रीतो विस्मितः समपद्यत ॥ ९
मुचुकुन्दस्ततो राजा सोऽन्वशासद्वसुंधराम् ।
बाहुवीर्यार्जितां सम्यक् क्षत्रधर्ममनुव्रतः ॥ १०
यं हि धर्मं चरन्तीह प्रजा राज्ञा सुरक्षिताः ।
चतुर्थं तस्य धर्मस्य राजा भारत विन्दति ॥ ११
राजा चरति चेद्धर्मं देवत्वायैव कल्पते ।
स चेदधर्मं चरति नरकायैव गच्छति ॥ १२
दण्डनीतिः स्वधर्मेण चातुर्वर्ण्यं नियच्छति ।
प्रयुक्ता स्वामिना सम्यगधर्मेभ्यश्च यच्छति ॥ १३
दण्डनीत्यां यदा राजा सम्यक्कार्त्स्न्येन वर्तते ।
तदा कृतयुगं नाम कालः श्रेष्ठः प्रवर्तते ॥ १४
कालो वा कारणं राज्ञो राजा वा कालकारणम् ।
इति ते संशयो मा भूद्राजा कालस्य कारणम् ॥१५
राजा कृतयुगस्रष्टा त्रेताया द्वापरस्य च ।
युगस्य च चतुर्थस्य राजा भवति कारणम् ॥ १६
कृतस्य कारणाद्राजा स्वर्गमत्यन्तमश्नुते ।
त्रेतायाः कारणाद्राजा स्वर्गं नात्यन्तमश्नुते ।
प्रवर्तनाद्द्वापरस्य यथाभागमुपाश्नुते ॥ १७
ततो वसति दुष्कर्मा नरके शाश्वतीः समाः ।
राजदोषेण हि जगत्स्पृश्यते जगतः स च ॥ १८
राजधर्मानवेक्षस्व पितृपैतामहोचितान् ।
नैतद्राजर्षिवृत्तं हि यत्र त्वं स्थातुमिच्छसि ॥ १९
न हि वैक्लव्यसंसृष्ट आनृशंस्ये व्यवस्थितः ।
प्रजापालनसंभूतं किंचित्प्राप फलं नृपः ॥ २०
न ह्येतामाशिषं पाण्डुर्न चाहं न पितामहः ।
प्रयुक्तवन्तः पूर्वं ते यया चरसि मेधया ॥ २१
यज्ञो दानं तपः शौर्यं प्रजासंतानमेव च ।
माहात्म्यं बलमोजश्च नित्यमाशंसितं मया ॥ २२
नित्यं स्वाहा स्वधा नित्यं ददुर्मानुषदेवताः ।
दीर्घमायुर्धनं पुत्रान्सम्यगाराधिताः शुभाः ॥ २३
पुत्रेष्वाशासते नित्यं पितरो दैवतानि च ।
दानमध्ययनं यज्ञं प्रजानां परिपालनम् ॥ २४
एतद्धर्ममधर्मं वा जन्मनैवाभ्यजायथाः ।
ते स्थ वैद्याः कुले जाता अवृत्त्या तात पीडिताः॥
यत्तु दानपतिं शूरं क्षुधिताः पृथिवीचराः ।
प्राप्य तृप्ताः प्रतिष्ठन्ते धर्मः कोऽभ्यधिकस्ततः ॥२६
दानेनान्यं बलेनान्यं तथा सूनृतयापरम् ।

सर्वतः प्रतिगृह्णीयाद्राज्यं प्राप्येह धार्मिकः ॥ २७
ब्राह्मणः प्रचरेद्भैक्षं क्षत्रियः परिपालयेत् ।
वैश्यो धनार्जनं कुर्याच्छूद्रः परिचरेच्च तान् ॥ २८
भैक्षं विप्रतिषिद्धं ते कृषिर्नैवोपपद्यते ।
क्षत्रियोऽसि क्षतात्त्राता बाहुवीर्योपजीविता ॥ २९
पित्र्यमंशं महाबाहो निमग्नं पुनरुद्धर ।
साम्ना दानेन भेदेन दण्डेनाथ नयेन च ॥ ३०
इतो दुःखतरं किं नु यदहं हीनबान्धवा ।
परपिण्डमुदीक्षामि त्वां सूत्वामित्रनन्दन ॥ ३१
युध्यस्व राजधर्मेण मा निमज्जीः पितामहान् ।
मा गमः क्षीणपुण्यस्त्वं सानुजः पापिकां गतिम् ॥

इति श्रीमहाभारते उद्योगपर्वणि
त्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥

१३१

कुन्त्युवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
विदुरायाश्च संवादं पुत्रस्य च परंतप ॥ १
अत्र श्रेयश्च भूयश्च यथा सा वक्तुमर्हति ।
यशस्विनी मन्युमती कुले जाता विभावरी ॥ २
क्षत्रधर्मरता धन्या विदुरा दीर्घदर्शिनी ।
विश्रुता राजसंसत्सु श्रुतवाक्या बहुश्रुता ॥ ३
विदुरा नाम वै सत्या जगर्हे पुत्रमौरसम् ।
निर्जितं सिन्धुराजेन शयानं दीनचेतसम् ।
अनन्दनमधर्मज्ञं द्विषतां हर्षवर्धनम् ॥ ४
न मया त्वं न पित्रासि जातः काभ्यागतो ह्यसि ।
निर्मन्युरुपशाखीयः पुरुषः क्लीबसाधनः ॥ ५
यावज्जीवं निराशोऽसि कल्याणाय धुरं वह ।
मात्मानमवमन्यस्व मैनमल्पेन बीभरः ।
मनः कृत्वा सुकल्याणं मा भैस्त्वं प्रतिसंस्तभ ॥ ६
उत्तिष्ठ हे कापुरुष मा शेष्वैवं पराजितः ।
अमित्रान्नन्दयन्सर्वान्निर्मानो बन्धुशोकदः ॥ ७
सुपूरा वै कुनदिका सुपूरो मूषिकाञ्जलिः ।
सुसंतोषः कापुरुषः स्वल्पकेनापि तुष्यति ॥ ८
अप्यरेरारुजन्दंष्ट्रामाश्वेव निधनं व्रज ।
अपि वा संशयं प्राप्य जीवितेऽपि पराक्रम ॥ ९
अप्यरेः श्येनवच्छिद्रं पश्येस्त्वं विपरिक्रमन् ।
विनदन्वाथ वा तूष्णीं व्योम्नि वापरिशङ्कितः ॥१०
त्वमेवं प्रेतवच्छेषे कस्माद्वज्रहतो यथा ।
उत्तिष्ठ हे कापुरुष मा शेष्वैवं पराजितः ॥ ११
मास्तं गमस्त्वं कृपणो विश्रूयस्व स्वकर्मणा ।
मा मध्ये मा जघन्ये त्वं माधो भूस्तिष्ठ चोर्जितः ॥
अलातं तिन्दुकस्येव मुहूर्तमपि विज्वल ।
मा तुषाग्निरिवानर्चिः काकरङ्खा जिजीविषुः ।
मुहूर्तं ज्वलितं श्रेयो न तु धूमायितं चिरम् ॥ १३
मा ह स्म कस्यचिद्गेहे जनी राज्ञः खरीमृदुः ।
कृत्वा मानुष्यकं कर्म सृत्वाजिं यावदुत्तमम् ।
धर्मस्यानृण्यमाप्नोति न चात्मानं विगर्हते ॥ १४
अलब्ध्वा यदि वा लब्ध्वा नानुशोचन्ति पण्डिताः ।
आनन्तर्यं चारभते न प्राणानां धनायते ॥ १५
उद्भावयस्व वीर्यं वा तां वा गच्छ ध्रुवां गतिम् ।
धर्मं पुत्राग्रतः कृत्वा किंनिमित्तं हि जीवसि ॥१६
इष्टापूर्तं हि ते क्लीब कीर्तिश्च सकला हता ।
विच्छिन्नं भोगमूलं ते किंनिमित्तं हि जीवसि ॥१७
शत्रुर्निमज्जता ग्राह्यो जङ्घायां प्रपतिष्यता ।
विपरिच्छिन्नमूलोऽपि न विषीदेत्कथंचन ।
उद्यम्य धुरमुत्कर्षेदाजानेयकृतं स्मरन् ॥ १८
कुरु सत्त्वं च मानं च विद्धि पौरुषमात्मनः ।
उद्भावय कुलं मग्नं त्वत्कृते स्वयमेव हि ॥ १९
यस्य वृत्तं न जल्पन्ति मानवा महदद्भुतम् ।
राशिवर्धनमात्रं स नैव स्त्री न पुनः पुमान् ॥२०

दाने तपसि शौर्ये च यस्य न प्रथितं यशः ।
विद्यायामर्थलाभे वा मातुरुच्चार एव सः ॥ २१
श्रुतेन तपसा वापि श्रिया वा विक्रमेण वा ।
जनान्योऽभिभवत्यन्यान्कर्मणा हि स वै पुमान् ॥२२
न त्वेव जाल्मीं कापालीं वृत्तिमेषितुमर्हसि ।
नृशंस्यामयशस्यां च दुःखां कापुरुषोचिताम् ॥ २३
यमेनमभिनन्देयुरमित्राः पुरुषं कृशम् ।
लोकस्य समवज्ञातं निहीनाशनवाससम् ॥ २४
अहोलाभकरं दीनमल्पजीवनमल्पकम् ।
नेदृशं बन्धुमासाद्य बान्धवः सुखमेधते ॥ २५
अवृत्त्यैव विपत्स्यामो वयं राष्ट्रात्प्रवासिताः ।
सर्वकामरसैर्हीनाः स्थानभ्रष्टा अकिंचनाः ॥ २६
अवर्णकारिणं सत्सु कुलवंशस्य नाशनम् ।
कलिं पुत्रप्रवादेन संजय त्वामजीजनम् ॥ २७
निरमर्षं निरुत्साहं निर्वीर्यमरिनन्दनम् ।
मा स्म सीमन्तिनी काचिज्जनयेत्पुत्रमीदृशम् ॥२८
मा धूमाय ज्वलात्यन्तमाक्रम्य जहि शात्रवान् ।
ज्वल मूर्धन्यमित्राणां मुहूर्तमपि वा क्षणम् ॥ २९
एतावानेव पुरुषो यदमर्षी यदक्षमी ।
क्षमावान्निरमर्षश्च नैव स्त्री न पुनः पुमान् ॥ ३०
संतोषो वै श्रियं हन्ति तथानुक्रोश एव च ।
अनुत्थानभये चोभे निरीहो नाश्नुते महत् ॥ ३१
एभ्यो निकृतिपापेभ्यः प्रमुञ्चात्मानमात्मना ।
आयसं हृदयं कृत्वा मृगयस्व पुनः स्वकम् ॥ ३२
पुरं विषहते यस्मात्तस्मात्पुरुष उच्यते ।
तमाहुर्व्यर्थनामानं स्त्रीवद्य इह जीवति ॥ ३३
शूरस्योर्जितसत्त्वस्य सिंहविक्रान्तगामिनः ।
दिष्टभावं गतस्यापि विघसे मोदते प्रजा ॥ ३४
य आत्मनः प्रियसुखे हित्वा मृगयते श्रियम् ।
अमात्यानामथो हर्षमादधात्यचिरेण सः ॥ ३५

पुत्र उवाच ।

किं नु ते मामपश्यन्त्याः पृथिव्या अपि सर्वया ।
किमाभरणकृत्यं ते किं भोगैर्जीवितेन वा ॥ ३६

मातोवाच ।

किमद्यकानां ये लोका द्विषन्तस्तानवाप्नुयुः ।
ये त्वादृतात्मनां लोकाः सुहृदस्तान्व्रजन्तु नः ॥३७
भृत्यैर्विहीयमानानां परपिण्डोपजीविनाम् ।
कृपणानामसत्त्वानां मा वृत्तिमनुवर्तिथाः ॥ ३८
अनु त्वां तात जीवन्तु ब्राह्मणाः सुहृदस्तथा ।
पर्जन्यमिव भूतानि देवा इव शतक्रतुम् ॥ ३९
यमाजीवन्ति पुरुषं सर्वभूतानि संजय ।
पक्वं द्रुममिवासाद्य तस्य जीवितमर्थवत् ॥ ४०
यस्य शूरस्य विक्रान्तैरेधन्ते बान्धवाः सुखम् ।
त्रिदशा इव शक्रस्य साधु तस्येह जीवितम् ॥ ४१
स्वबाहुबलमाश्रित्य योऽभ्युज्जीवति मानवः ।
स लोके लभते कीर्तिं परत्र च शुभां गतिम् ॥ ४२

इति श्रीमहाभारते उद्योगपर्वणि
एकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥

१३२

विदुरोवाच ।

अथैतस्यामवस्थायां पौरुषं हातुमिच्छसि ।
निहीनसेवितं मार्गं गमिष्यस्यचिरादिव ॥ १
यो हि तेजो यथाशक्ति न दर्शयति विक्रमात् ।
क्षत्रियो जीविताकाङ्क्षी स्तेन इत्येव तं विदुः ॥ २
अर्थवन्त्युपपन्नानि वाक्यानि गुणवन्ति च ।
नैव संप्राप्नुवन्ति त्वां मुमूर्षुमिव भेषजम् ॥ ३
सन्ति वै सिन्धुराजस्य संतुष्टा बहवो जनाः ।
दौर्बल्यादासते मूढा व्यसनौघप्रतीक्षिणः ॥ ४
सहायोपचयं कृत्वा व्यवसाय्य ततस्ततः ।
अनुदुष्येयुरपरे पश्यन्तस्तव पौरुषम् ॥ ५

तैः कृत्वा सह संघातं गिरिदुर्गालयांश्चर ।
काले व्यसनमाकाङ्क्षन्नैवायमजरामरः ॥ ६
संजयो नामतश्च त्वं न च पश्यामि तत्त्वयि ।
अन्वर्थनामा भव मे पुत्र मा व्यर्थनामकः ॥ ७
सम्यग्दृष्टिर्महाप्राज्ञो बालं त्वां ब्राह्मणोऽब्रवीत् ।
अयं प्राप्य महत्कृच्छ्रं पुनर्वृद्धिं गमिष्यति ॥ ८
तस्य स्मरन्ती वचनमाशंसे विजयं तव ।
तस्मात्तात ब्रवीमि त्वां वक्ष्यामि च पुनः पुनः ॥९
यस्य ह्यर्थाभिनिर्वृत्तौ भवन्त्याप्यायिताः परे ।
तस्यार्थसिद्धिर्नियता नयेष्वर्थानुसारिणः ॥ १०
समृद्धिरसमृद्धिर्वा पूर्वेषां मम संजय ।
एवं विद्वान्युद्धमना भव मा प्रत्युपाहर ॥ ११
नातः पापीयसीं कांचिदवस्थां शम्बरोऽब्रवीत् ।
यत्र नैवाद्य न प्रातर्भोजनं प्रतिदृश्यते ॥ १२
पतिपुत्रवधादेतत्परमं दुःखमब्रवीत् ।
दारिद्र्यमिति यत्प्रोक्तं पर्यायमरणं हि तत् ॥ १३
अहं महाकुले जाता ह्रदाद्ध्रदमिवागता ।
ईश्वरी सर्वकल्याणैर्भर्त्रा परमपूजिता ॥ १४
महार्हमाल्याभरणां सुमृष्टाम्बरवाससम् ।
पुरा दृष्ट्वा सुहृद्वर्गो मामपश्यत्सुदुर्गताम् ॥ १५
यदा मां चैव भार्यां च द्रष्टासि भृशदुर्बले ।
न तदा जीवितेनार्थो भविता तव संजय ॥ १६
दासकर्मकरान्भृत्यानाचार्यर्त्विक्पुरोहितान् ।
अवृत्त्यास्मान्प्रजहतो दृष्ट्वा किं जीवितेन ते ॥ १७
यदि कृत्यं न पश्यामि तवाद्येह यथा पुरा ।
श्लाघनीयं यशस्यं च का शान्तिर्हृदयस्य मे ॥ १८
नेति चेद्ब्राह्मणान्ब्रूयां दीर्यते हृदयं मम ।
न ह्यहं न च मे भर्ता नेति ब्राह्मणमुक्तवान् ॥ १९
वयमाश्रयणीयाः स्म नाश्रितारः परस्य च ।
सान्यानाश्रित्य जीवन्ती परित्यक्ष्यामि जीवितम् ॥२०
अपारे भव नः पारमप्लवे भव नः प्लवः ।
कुरुष्व स्थानमस्थाने मृतान्संजीवयस्व नः ॥ २१
सर्वे ते शत्रवः सह्या न चेज्जीवितुमिच्छसि ।
अथ चेदीदृशीं वृत्तिं क्लीबामभ्युपपद्यसे ॥ २२
निर्विण्णात्मा हतमना मुञ्चैतां पापजीविकाम् ।
एकशत्रुवधेनैव शूरो गच्छति विश्रुतिम् ॥ २३
इन्द्रो वृत्रवधेनैव महेन्द्रः समपद्यत ।
माहेन्द्रं च ग्रहं लेभे लोकानां चेश्वरोऽभवत् ॥२४
नाम विश्राव्य वा संख्ये शत्रूनाहूय दंशितान् ।
सेनाग्रं वापि विद्राव्य हत्वा वा पुरुषं वरम् ॥२५
यदैव लभते वीरः सुयुद्धेन महद्यशः ।
तदैव प्रव्यथन्तेऽस्य शत्रवो विनमन्ति च ॥ २६
त्यक्त्वात्मानं रणे दक्षं शूरं कापुरुषा जनाः ।
अवशाः पूरयन्ति स्म सर्वकामसमृद्धिभिः ॥ २७
राज्यं वाप्युग्रविभ्रंशं संशयो जीवितस्य वा ।
प्रलब्धस्य हि शत्रोर्वै शेषं कुर्वन्ति साधवः ॥ २८
स्वर्गद्वारोपमं राज्यमथ वाप्यमृतोपमम् ।
रुद्धमेकायने मत्वा पतोल्मुक इवारिषु ॥ २९
जहि शत्रून्रणे राजन्स्वधर्ममनुपालय ।
मा त्वा पश्येत्सुकृपणं शत्रुः श्रीमान्कदाचन ॥ ३०
अस्मदीयैश्च शोचद्भिर्नदद्भिश्च परैर्वृतम् ।
अपि त्वां नानुपश्येयं दीना दीनमवस्थितम् ॥ ३१
उष्य सौवीरकन्याभिः श्लाघस्वार्थैर्यथा पुरा ।
मा च सैन्धवकन्यानामवसन्नो वशं गमः ॥ ३२
युवा रूपेण संपन्नो विद्ययाभिजनेन च ।
यस्त्वादृशो विकुर्वीत यशस्वी लोकविश्रुतः ।
वोढव्ये धुर्यनड्डुवन्मन्ये मरणमेव तत् ॥ ३३
यदि त्वामनुपश्यामि परस्य प्रियवादिनम् ।
पृष्ठतोऽनुव्रजन्तं वा का शान्तिर्हृदयस्य मे ॥ ३४
नास्मिञ्जातु कुले जातो गच्छेद्योऽन्यस्य पृष्ठतः ।

न त्वं परस्यानुधुरं तात जीवितुमर्हसि ॥ ३५
अहं हि क्षत्रहृदयं वेद यत्परिशाश्वतम् ।
पूर्वैः पूर्वतरैः प्रोक्तं परैः परतरैरपि ॥ ३६
यो वै कश्चिदिहाजातः क्षत्रियः क्षत्रधर्मवित् ।
भयाद्वृत्तिसमीक्षो वा न नमेदिह कस्यचित् ॥ ३७
उद्यच्छेदेव न नमेदुद्यमो ह्येव पौरुषम् ।
अप्यपर्वणि भज्येत न नमेदिह कस्यचित् ॥ ३८
मातङ्गो मत्त इव च परीयात्सुमहामनाः ।
ब्राह्मणेभ्यो नमेन्नित्यं धर्मायैव च संजय ॥ ३९
नियच्छन्नितरान्वर्णान्विनिघ्नन्सर्वदुष्कृतः ।
ससहायोऽसहायो वा यावज्जीवं तथा भवेत् ॥४०

इति श्रीमहाभारते उद्योगपर्वणि
द्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥

१३३

पुत्र उवाच ।

कृष्णायसस्येव च ते संहत्य हृदयं कृतम् ।
मम मातस्त्वकरुणे वैरप्रज्ञे ह्यमर्षणे ॥ १
अहो क्षत्रसमाचारो यत्र मामपरं यथा ।
ईदृशं वचनं ब्रूयाद्भवती पुत्रमेकजम् ॥ २
किं नु ते मामपश्यन्त्याः पृथिव्या अपि सर्वया ।
किमाभरणकृत्यं ते किं भोगैर्जीवितेन वा ॥ ३

मातोवाच ।

सर्वारम्भा हि विदुषां तात धर्मार्थकारणात् ।
तानेवाभिसमीक्ष्याहं संजय त्वामचूचुदम् ॥ ४
स समीक्ष्यक्रमोपेतो मुख्यः कालोऽयमागतः ।
अस्मिंश्चेदागते काले कार्यं न प्रतिपद्यसे ।
असंभावितरूपस्त्वं सुनृशंसं करिष्यसि ॥ ५
तं त्वामयशसा स्पृष्टं न ब्रूयां यदि संजय ।
खरीवात्सल्यमाहुस्तन्निःसामर्थ्यमहेतुकम् ॥ ६
सद्भिर्विगर्हितं मार्गं त्यज मूर्खनिषेवितम् ।
अविद्या वै महत्यस्ति यामिमां संश्रिताः प्रजाः ॥७
तव स्याद्यदि सद्वृत्तं तेन मे त्वं प्रियो भवेः ।
धर्मार्थगुणयुक्तेन नेतरेण कथंचन ।
दैवमानुषयुक्तेन सद्भिराचरितेन च ॥ ८
यो ह्येवमविनीतेन रमते पुत्रनप्तृणा ।
अनुत्थानवता चापि मोघं तस्य प्रजाफलम् ॥ ९
अकुर्वन्तो हि कर्माणि कुर्वन्तो निन्दितानि च ।
सुखं नैवेह नामुत्र लभन्ते पुरुषाधमाः ॥ १०
युद्धाय क्षत्रियः सृष्टः संजयेह जयाय च ।
क्रूराय कर्मणे नित्यं प्रजानां परिपालने ।
जयन्वा बध्यमानो वा प्राप्नोतीन्द्रसलोकताम् ॥११
न शक्रभवने पुण्ये दिवि तद्विद्यते सुखम् ।
यदमित्रान्वशे कृत्वा क्षत्रियः सुखमश्नुते ॥ १२
मन्युना दह्यमानेन पुरुषेण मनस्विना ।
निकृतेनेह बहुशः शत्रून्प्रतिजिगीषया ॥ १३
आत्मानं वा परित्यज्य शत्रून्वा विनिपात्य वै ।
अतोऽन्येन प्रकारेण शान्तिरस्य कुतो भवेत् ॥१४
इह प्राज्ञो हि पुरुषः स्वल्पमप्रियमिच्छति ।
यस्य स्वल्पं प्रियं लोके ध्रुवं तस्याल्पमप्रियम् ॥१५
प्रियाभावाच्च पुरुषो नैव प्राप्नोति शोभनम् ।
ध्रुवं चाभावमभ्येति गत्वा गङ्गेव सागरम् ॥ १६

पुत्र उवाच ।

नेयं मतिस्त्वया वाच्या मातः पुत्रे विशेषतः
कारुण्यमेवात्र पश्य भूत्वेह जडमूकवत् ॥ १७

मातोवाच ।

अतो मे भूयसी नन्दिर्यदेवमनुपश्यसि ।
चोद्यं मां चोदयस्येतद्भृशं वै चोदयामि ते ॥ १८
अथ त्वां पूजयिष्यामि हत्वा वै सर्वसैन्धवान् ।
अहं पश्यामि विजयं कृत्स्नं भाविनमेव ते ॥ १९

पुत्र उवाच ।
अकोशस्यासहायस्य कुतः स्विद्विजयो मम ।
इत्यवस्थां विदित्वेमामात्मनात्मनि दारुणाम् ।
राज्याद्भावो निवृत्तो मे त्रिदिवादिव दुष्कृतेः ॥ २०
ईदृशं भवती कंचिदुपायमनुपश्यति ।
तन्मे परिणतप्रज्ञे सम्यक्प्रब्रूहि पृच्छते ।
करिष्यामि हि तत्सर्वं यथावदनुशासनम् ॥ २१
मातोवाच ।
पुत्रात्मा नावमन्तव्यः पूर्वाभिरसमृद्धिभिः ।
अभूत्वा हि भवन्त्यर्था भूत्वा नश्यन्ति चापरे ॥
अमर्षेणैव चाप्यर्था नारब्धव्याः सुबालिशैः ।
सर्वेषां कर्मणां तात फले नित्यमनित्यता ॥ २३
अनित्यमिति जानन्तो न भवन्ति भवन्ति च ।
अथ ये नैव कुर्वन्ति नैव जातु भवन्ति ते ॥ २४
ऐकगुण्यमनीहायामभावः कर्मणां फलम् ।
अथ द्वैगुण्यमीहायां फलं भवति वा न वा ॥ २५
यस्य प्रागेव विदिता सर्वार्थानामनित्यता ।
नुदेद्वृद्धिसमृद्धी स प्रतिकूले नृपात्मज ॥ २६
उत्थातव्यं जागृतव्यं योक्तव्यं भूतिकर्मसु ।
भविष्यतीत्येव मनः कृत्वा सततमव्यथैः ।
मङ्गलानि पुरस्कृत्य ब्राह्मणैश्चेश्वरैः सह ॥ २७
प्राज्ञस्य नृपतेराशु वृद्धिर्भवति पुत्रक ।
अभिवर्तति लक्ष्मीस्तं प्राचीमिव दिवाकरः ॥ २८
निदर्शनान्युपायांश्च बहून्युद्धर्षणानि च ।
अनुदर्शितरूपोऽसि पश्यामि कुरु पौरुषम् ।
पुरुषार्थमभिप्रेतं समाहर्तुमिहार्हसि ॥ २९
क्रुद्धाँल्लुब्धान्परिक्षीणानवक्षिप्तान्विमानितान् ।
स्पर्धिनश्चैव ये केचित्तान्युक्त उपधारय ॥ ३०
एतेन त्वं प्रकारेण महतो भेत्स्यसे गणान् ।
महावेग इवोद्धूतो मातरिश्वा बलाहकान् ॥ ३१
तेषामग्रप्रदायी स्याः कल्योत्थायी प्रियंवदः ।
ते त्वां प्रियं करिष्यन्ति पुरो धास्यन्ति च ध्रुवम् ॥
यदैव शत्रुर्जानीयात्सपत्नं त्यक्तजीवितम् ।
तदैवास्मादुद्विजते सर्पाद्वेश्मगतादिव ॥ ३३
तं विदित्वा पराक्रान्तं वशे न कुरुते यदि ।
निर्वादैर्निर्वदेदेनमन्ततस्तद्भविष्यति ॥ ३४
निर्वादादास्पदं लब्ध्वा धनवृद्धिर्भविष्यति ।
धनवन्तं हि मित्राणि भजन्ते चाश्रयन्ति च ॥ ३५
स्खलितार्थं पुनस्तात संत्यजन्त्यपि बान्धवाः ।
अप्यस्मिन्नाश्रयन्ते च जुगुप्सन्ति च तादृशम् ॥
शत्रुं कृत्वा यः सहायं विश्वासमुपगच्छति ।
अतः संभाव्यमेवैतद्यद्राज्यं प्राप्नुयादिति ॥ ३७

इति श्रीमहाभारते उद्योगपर्वणि
त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥

१३४

मातोवाच ।
नैव राज्ञा दरः कार्यो जातु कस्यांचिदापदि ।
अथ चेदपि दीर्णः स्यान्नैव वर्तेत दीर्णवत् ॥ १
दीर्णं हि दृष्ट्वा राजानं सर्वमेवानुदीर्यते ।
राष्ट्रं बलममात्याश्च पृथक्कुर्वन्ति ते मतिम् ॥ २
शत्रूनेके प्रपद्यन्ते प्रजहत्यपरे पुनः ।
अन्वेके प्रजिहीर्षन्ति ये पुरस्ताद्विमानिताः ॥ ३
य एवात्यन्तसुहृदस्त एनं पर्युपासते ।
अशक्तयः स्वस्तिकामा बद्धवत्सा इडा इव ।
शोचन्तमनुशोचन्ति प्रतीतानिव बान्धवान् ॥ ४
अपि ते पूजिताः पूर्वमपि ते सुहृदो मताः ।
ये राष्ट्रमभिमन्यन्ते राज्ञो व्यसनमीयुषः ।
मा दीदरस्त्वं सुहृदो मा त्वां दीर्णं प्रहासिषुः ॥ ५
प्रभावं पौरुषं बुद्धिं जिज्ञासन्त्या मया तव ।
उल्लपन्त्या समाश्वासं बलवानिव दुर्बलम् ॥ ६

यद्येतत्संविजानासि यदि सम्यग्ब्रवीम्यहम् ।
कृत्वासौम्यमिवात्मानं जयायोत्तिष्ठ संजय ॥ ७
अस्ति नः कोशनिचयो महानविदितस्तव ।
तमहं वेद नान्यस्तमुपसंपादयामि ते ॥ ८
सन्ति नैकशता भूयः सुहृदस्तव संजय ।
सुखदुःखसहा वीर शतार्हा अनिवर्तिनः ॥ ९
तादृशा हि सहाया वै पुरुषस्य बुभूषतः ।
ईषदुज्जिहतः किंचित्सचिवाः शत्रुकर्शनाः ॥ १०

पुत्र उवाच ।

कस्य त्वीदृशकं वाक्यं श्रुत्वापि स्वल्पचेतसः ।
तमो न व्यपहन्येत सुचित्रार्थपदाक्षरम् ॥ ११
उदके धूरियं धार्या सर्तव्यं प्रवणे मया ।
यस्य मे भवती नेत्री भविष्यद्भूतदर्शिनी ॥ १२
अहं हि वचनं त्वत्तः शुश्रूषुरपरापरम् ।
किंचित्किंचित्प्रतिवदंस्तूष्णीमासं मुहुर्मुहुः ॥ १३
अतृप्यन्नमृतस्येव कृच्छ्राल्लब्धस्य बान्धवात् ।
उद्यच्छाम्येष शत्रूणां नियमाय जयाय च ॥ १४

कुन्त्युवाच ।

सदश्व इव स क्षिप्तः प्रणुन्नो वाक्यसायकैः ।
तच्चकार तथा सर्वं यथावदनुशासनम् ॥ १५
इदमुद्धर्षणं भीमं तेजोवर्धनमुत्तमम् ।
राजानं श्रावयेन्मन्त्री सीदन्तं शत्रुपीडितम् ॥ १६
जयो नामेतिहासोऽयं श्रोतव्यो विजिगीषुणा ।
महीं विजयते क्षिप्रं श्रुत्वा शत्रूंश्च मर्दति ॥ १७
इदं पुंसवनं चैव वीराजननमेव च ।
अभीक्ष्णं गर्भिणी श्रुत्वा ध्रुवं वीरं प्रजायते ॥ १८
विद्याशूरं तपःशूरं दमशूरं तपस्विनम् ।
ब्राह्म्या श्रिया दीप्यमानं साधुवादेन संमतम् ॥
अर्चिष्मन्तं बलोपेतं महाभागं महारथम् ।
धृष्टवन्तमनाधृष्यं जेतारमपराजितम् ॥ २०
नियन्तारमसाधूनां गोप्तारं धर्मचारिणाम् ।
तदर्थं क्षत्रिया सूते वीरं सत्यपराक्रमम् ॥ २१

इति श्रीमहाभारते उद्योगपर्वणि
चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥

१३५

कुन्त्युवाच ।

अर्जुनं केशव ब्रूयास्त्वयि जाते स्म सूतके ।
उपोपविष्टा नारीभिराश्रमे परिवारिता ॥ १
अथान्तरिक्षे वागासीद्दिव्यरूपा मनोरमा ।
सहस्राक्षसमः कुन्ति भविष्यत्येष ते सुतः ॥ २
एष जेष्यति संग्रामे कुरून्सर्वान्समागतान् ।
भीमसेनद्वितीयश्च लोकमुद्वर्तयिष्यति ॥ ३
पुत्रस्ते पृथिवीं जेता यशश्चास्य दिवस्पृशम् ।
हत्वा कुरून्ग्रामजन्ये वासुदेवसहायवान् ॥ ४
पित्र्यमंशं प्रनष्टं च पुनरप्युद्धरिष्यति ।
भ्रातृभिः सहितः श्रीमांस्त्रीन्मेधानाहरिष्यति ॥ ५
तं सत्यसंधं बीभत्सुं सव्यसाचिनमच्युत ।
यथाहमेवं जानामि बलवन्तं दुरासदम् ।
तथा तदस्तु दाशार्ह यथा वागभ्यभाषत ॥ ६
धर्मश्चेदस्ति वार्ष्णेय तथा सत्यं भविष्यति ।
त्वं चापि तत्तथा कृष्ण सर्वं संपादयिष्यसि ॥ ७
नाहं तदभ्यसूयामि यथा वागभ्यभाषत ।
नमो धर्माय महते धर्मो धारयति प्रजाः ॥ ८
एतद्धनंजयो वाच्यो नित्योद्युक्तो वृकोदरः ।
यदर्थं क्षत्रिया सूते तस्य कालोऽयमागतः ।
न हि वैरं समासाद्य सीदन्ति पुरुषर्षभाः ॥ ९
विदिता ते सदा बुद्धिर्भीमस्य न स शाम्यति ।
यावदन्तं न कुरुते शत्रूणां शत्रुकर्शनः ॥ १०
सर्वधर्मविशेषज्ञां स्नुषां पाण्डोर्महात्मनः ।
ब्रूया माधव कल्याणीं कृष्णां कृष्ण यशस्विनीम् ॥ ११

युक्तमेतन्महाभागे कुले जाते यशस्विनि ।
यन्मे पुत्रेषु सर्वेषु यथावत्त्वमवर्तिथाः ॥ १२
माद्रीपुत्रौ च वक्तव्यौ क्षत्रधर्मरतावुभौ ।
विक्रमेणार्जितान्भोगान्वृणीतं जीवितादपि ॥ १३
विक्रमाधिगता ह्यर्थाः क्षत्रधर्मेण जीवतः ।
मनो मनुष्यस्य सदा प्रीणन्ति पुरुषोत्तम ॥ १४
यच्च वः प्रेक्षमाणानां सर्वधर्मोपचायिनी ।
पाञ्चाली परुषाण्युक्ता को नु तत्क्षन्तुमर्हति ॥ १५
न राज्यहरणं दुःखं द्यूते चापि पराजयः ।
प्रव्राजनं सुतानां वा न मे तद्दुःखकारणम् ॥ १६
यत्तु सा बृहती श्यामा सभायां रुदती तदा ।
अश्रौषीत्परुषा वाचस्तन्मे दुःखतरं मतम् ॥ १७
स्त्रीधर्मिणी वरारोहा क्षत्रधर्मरता सदा ।
नाध्यगच्छत्तदा नाथं कृष्णा नाथवती सती ॥१८
तं वै ब्रूहि महाबाहो सर्वशस्त्रभृतां वरम् ।
अर्जुनं पुरुषव्याघ्रं द्रौपद्याः पदवीं चर ॥ १९
विदितौ हि तवात्यन्तं क्रुद्धाविव यमान्तकौ ।
भीमार्जुनौ नयेतां हि देवानपि परां गतिम् ॥ २०
तयोश्चैतदवज्ञानं यत्सा कृष्णा सभागता ।
दुःशासनश्च यद्भीमं कटुकान्यभ्यभाषत ।
पश्यतां कुरुवीराणां तच्च संस्मारयेः पुनः ॥ २१
पाण्डवान्कुशलं पृच्छेः सपुत्रान्कृष्णया सह ।
मां च कुशलिनीं ब्रूयास्तेषु भूयो जनार्दन ।
अरिष्टं गच्छ पन्थानं पुत्रान्मे परिपालय ॥ २२

वैशंपायन उवाच ।

अभिवाद्याथ तां कृष्णः कृत्वा चाभिप्रदक्षिणम् ।
निश्चक्राम महाबाहुः सिंहखेलगतिस्ततः ॥ २३
ततो विसर्जयामास भीष्मादीन्कुरुपुंगवान् ।
आरोप्य च रथे कर्णं प्रायात्सात्यकिना सह ॥ २४
ततः प्रयाते दाशार्हे कुरवः संगता मिथः ।
जजल्पुर्महदाश्चर्यं केशवे परमाद्भुतम् ॥ २५
प्रमूढा पृथिवी सर्वा मृत्युपाशसिता कृता ।
दुर्योधनस्य बालिश्यान्नैतदस्तीति चाब्रुवन् ॥ २६
ततो निर्याय नगरात्प्रययौ पुरुषोत्तमः ।
मन्त्रयामास च तदा कर्णेन सुचिरं सह ॥ २७
विसर्जयित्वा राधेयं सर्वयादवनन्दनः ।
ततो जवेन महता तूर्णमश्वानचोदयत् ॥ २८
ते पिबन्त इवाकाशं दारुकेण प्रचोदिताः ।
हया जग्मुर्महावेगा मनोमारुतरंहसः ॥ २९
ते व्यतीत्य तमध्वानं क्षिप्रं श्येना इवाशुगाः ।
उच्चैःसूर्यमुपप्लव्यं शार्ङ्गधन्वानमावहन् ॥ ३०

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

१३६

वैशंपायन उवाच ।

कुन्त्यास्तु वचनं श्रुत्वा भीष्मद्रोणौ महारथौ ।
दुर्योधनमिदं वाक्यमूचतुः शासनातिगम् ॥ १
श्रुतं ते पुरुषव्याघ्र कुन्त्याः कृष्णस्य संनिधौ ।
वाक्यमर्थवदव्यग्रमुक्तं धर्म्यमनुत्तमम् ॥ २
तत्करिष्यन्ति कौन्तेया वासुदेवस्य संमतम् ।
न हि ते जातु शाम्येरन्नृते राज्येन कौरव ॥ ३
क्लेशिता हि त्वया पार्था धर्मपाशसितास्तदा ।
सभायां द्रौपदी चैव तैश्च तन्मर्षितं तव ॥ ४
कृतास्त्रं ह्यर्जुनं प्राप्य भीमं च कृतनिश्रमम् ।
गाण्डीवं चेषुधी चैव रथं च ध्वजमेव च ।
सहायं वासुदेवं च न क्षंस्यति युधिष्ठिरः ॥ ५
प्रत्यक्षं ते महाबाहो यथा पार्थेन धीमता ।
विराटनगरे पूर्वं सर्वे स्म युधि निर्जिताः ॥ ६
दानवान्घोरकर्माणो निवातकवचान्युधि ।
रौद्रमस्त्रं समाधाय दग्धवानस्त्रवह्निना ॥ ७

कर्णप्रभृतयश्चेमे त्वं चापि कवची रथी ।
मोक्षिता घोषयात्रायां पर्याप्तं तन्निदर्शनम् ॥ ८
प्रशाम्य भरतश्रेष्ठ भ्रातृभिः सह पाण्डवैः ।
रक्षेमां पृथिवीं सर्वां मृत्योर्दंष्ट्रान्तरं गताम् ॥ ९
ज्येष्ठो भ्राता धर्मशीलो वत्सलः श्लक्ष्णवाक्शुचिः ।
तं गच्छ पुरुषव्याघ्रं व्यपनीयेह किल्बिषम् ॥ १०
दृष्टश्चेत्त्वं पाण्डवेन व्यपनीतशरासनः ।
प्रसन्नभ्रुकुटिः श्रीमान्कृता शान्तिः कुलस्य नः ॥ ११
तमभ्येत्य सहामात्यः परिष्वज्य नृपात्मजम् ।
अभिवाद्य राजानं यथापूर्वमरिंदम ॥ १२
अभिवादयमानं त्वां पाणिभ्यां भीमपूर्वजः ।
प्रतिगृह्णातु सौहार्दात्कुन्तीपुत्रो युधिष्ठिरः ॥ १३
सिंहस्कन्धोरुबाहुस्त्वां वृत्तायतमहाभुजः ।
परिष्वजतु बाहुभ्यां भीमः प्रहरतां वरः ॥ १४
सिंहग्रीवो गुडाकेशस्ततस्त्वां पुष्करेक्षणः ।
अभिवादयतां पार्थः कुन्तीपुत्रो धनंजयः ॥ १५
आश्विनेयौ नरव्याघ्रौ रूपेणाप्रतिमौ भुवि ।
तौ च त्वां गुरुवत्प्रेम्णा पूजया प्रत्युदीयताम् ॥ १६
मुञ्चन्त्वानन्दजाश्रूणि दाशार्हप्रमुखा नृपाः ।
संगच्छ भ्रातृभिः सार्धं मानं संत्यज्य पार्थिव ॥ १७
प्रशाधि पृथिवीं कृत्स्नां ततस्त्वं भ्रातृभिः सह ।
समालिङ्गय च हर्षेण नृपा यान्तु परस्परम् ॥ १८
अलं युद्धेन राजेन्द्र सुहृदां शृणु कारणम् ।
ध्रुवं विनाशो युद्धे हि क्षत्रियाणां प्रदृश्यते ॥ १९
ज्योतींषि प्रतिकूलानि दारुणा मृगपक्षिणः ।
उत्पाता विविधा वीर दृश्यन्ते क्षत्रनाशनाः ॥ २०
विशेषत इहास्माकं निमित्तानि विनाशने ।
उल्काभिर्हि प्रदीप्ताभिर्बध्यते पृतना तव ॥ २१
वाहनान्यप्रहृष्टानि रुदन्तीव विशां पते ।
गृध्रास्ते पर्युपासन्ते सैन्यानि च समन्ततः ॥ २२
नगरं न यथापूर्वं तथा राजनिवेशनम् ।
शिवाश्चाशिवनिर्घोषा दीप्तां सेवन्ति वै दिशम् ॥ २३
कुरु वाक्यं पितुर्मातुरस्माकं च हितैषिणाम् ।
त्वय्यायत्तो महाबाहो शमो व्यायाम एव च ॥ २४
न चेत्करिष्यसि वचः सुहृदामरिकर्शन ।
तप्स्यसे वाहिनीं दृष्ट्वा पार्थबाणप्रपीडिताम् ॥ २५
भीमस्य च महानादं नदतः शुष्मिणो रणे ।
श्रुत्वा स्मर्तासि मे वाक्यं गाण्डीवस्य च निस्वनम् ।
यद्येतदपसव्यं ते भविष्यति वचो मम ॥ २६

इति श्रीमहाभारते उद्योगपर्वणि
षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥

१३७

वैशंपायन उवाच ।

एवमुक्तस्तु विमनास्तिर्यग्दृष्टिरधोमुखः ।
संहृत्य च भ्रुवोर्मध्यं न किंचिद्व्याजहार ह ॥ १
तं वै विमनसं दृष्ट्वा संप्रेक्ष्यान्योन्यमन्तिकात् ।
पुनरेवोत्तरं वाक्यमुक्तवन्तौ नरर्षभौ ॥ २

भीष्म उवाच ।

शुश्रूषुमनसूयं च ब्रह्मण्यं सत्यसंगरम् ।
प्रतियोत्स्यामहे पार्थमतो दुःखतरं नु किम् ॥ ३

द्रोण उवाच ।

अश्वत्थाम्नि यथा पुत्रे भूयो मम धनंजये ।
बहुमानः परो राजन्संनतिश्च कपिध्वजे ॥ ४
तं चेत्पुत्रात्प्रियतरं प्रतियोत्स्ये धनंजयम् ।
क्षत्रधर्ममनुष्ठाय धिगस्तु क्षत्रजीविकाम् ॥ ५
यस्य लोके समो नास्ति कश्चिदन्यो धनुर्धरः ।
मत्प्रसादात्स बीभत्सुः श्रेयानन्यैर्धनुर्धरैः ॥ ६
मित्रध्रुग्दुष्टभावश्च नास्तिकोऽथानृजुः शठः ।
न सत्सु लभते पूजां यज्ञे मूर्ख इवागतः ॥ ७

वार्यमाणोऽपि पापेभ्यः पापात्मा पापमिच्छति ।
चोद्यमानोऽपि पापेन शुभात्मा शुभमिच्छति ॥ ८
मिथ्योपचरिता ह्येते वर्तमाना ह्यनु प्रिये ।
अहितत्वाय कल्पन्ते दोषा भरतसत्तम ॥ ९
त्वमुक्तः कुरुवृद्धेन मया च विदुरेण च ।
वासुदेवेन च तथा श्रेयो नैवाभिपद्यसे ॥ १०
अस्ति मे बलमित्येव सहसा त्वं तितीर्षसि ।
सग्राहनक्रमकरं गङ्गावेगमिवोष्णगे ॥ ११
वास एव यथा हि त्वं प्रावृण्वानोऽद्य मन्यसे ।
स्रजं त्यक्तामिव प्राप्य लोभाद्यौधिष्ठिरीं श्रियम् ॥
द्रौपदीसहितं पार्थं सायुधैर्भ्रातृभिर्वृतम् ।
वनस्थमपि राज्यस्थः पाण्डवं कोऽतिजीवति ॥ १३
निदेशे यस्य राजानः सर्वे तिष्ठन्ति किंकराः ।
तमैलविलमासाद्य धर्मराजो व्यराजत ॥ १४
कुबेरसदनं प्राप्य ततो रत्नान्यवाप्य च ।
स्फीतमाक्रम्य ते राष्ट्रं राज्यमिच्छन्ति पाण्डवाः ॥
दत्तं हुतमधीतं च ब्राह्मणास्तर्पिता धनैः ।
आवयोर्गतमायुश्च कृतकृत्यौ च विद्धि नौ ॥ १६
त्वं तु हित्वा सुखं राज्यं मित्राणि च धनानि च ।
विग्रहं पाण्डवैः कृत्वा महद्व्यसनमाप्स्यसि ॥ १७
द्रौपदी यस्य चाशास्ते विजयं सत्यवादिनी ।
तपोघोरव्रता देवी न त्वं जेष्यसि पाण्डवम् ॥ १८
मन्त्री जनार्दनो यस्य भ्राता यस्य धनंजयः ।
सर्वशस्त्रभृतां श्रेष्ठं कथं जेष्यसि पाण्डवम् ॥ १९
सहाया ब्राह्मणा यस्य धृतिमन्तो जितेन्द्रियाः ।
तमुग्रतपसं वीरं कथं जेष्यसि पाण्डवम् ॥ २०
पुनरुक्तं च वक्ष्यामि यत्कार्यं भूतिमिच्छता ।
सुहृदा मज्जमानेषु सुहृत्सु व्यसनार्णवे ॥ २१
अलं युद्धेन तैर्वीरैः शाम्य त्वं कुरुवृद्धये ।
मा गमः ससुतामात्यः सबलश्च पराभवम् ॥ २२

इति श्रीमहाभारते उद्योगपर्वणि
सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥

॥ समाप्तं भगवद्यानपर्व ॥

१३८

धृतराष्ट्र उवाच ।

राजपुत्रैः परिवृतस्तथामात्यैश्च संजय ।
उपारोप्य रथे कर्णं निर्यातो मधुसूदनः ॥ १
किमब्रवीद्रथोपस्थे राधेयं परवीरहा ।
कानि सान्त्वानि गोविन्दः सूतपुत्रे प्रयुक्तवान् ॥ २
ओघमेघस्वनः काले यत्कृष्णः कर्णमब्रवीत् ।
मृदु वा यदि वा तीक्ष्णं तन्ममाचक्ष्व संजय ॥ ३

संजय उवाच ।

आनुपूर्व्येण वाक्यानि श्लक्ष्णानि च मृदूनि च ।
प्रियाणि धर्मयुक्तानि सत्यानि च हितानि च ॥ ४
हृदयग्रहणीयानि राधेयं मधुसूदनः ।
यान्यब्रवीदमेयात्मा तानि मे शृणु भारत ॥ ५

वासुदेव उवाच

उपासितास्ते राधेय ब्राह्मणा वेदपारगाः ।
तत्त्वार्थं परिपृष्टाश्च नियतेनानसूयया ॥ ६
त्वमेव कर्ण जानासि वेदवादान्सनातनान् ।
त्वं ह्येव धर्मशास्त्रेषु सूक्ष्मेषु परिनिष्ठितः ॥ ७
कानीनश्च सहोढश्च कन्यायां यश्च जायते ।
वोढारं पितरं तस्य प्राहुः शास्त्रविदो जनाः ॥ ८
सोऽसि कर्ण तथा जातः पाण्डोः पुत्रोऽसि धर्मतः ।
निग्रहाद्धर्मशास्त्राणामेहि राजा भविष्यसि ॥ ९
पितृपक्षे हि ते पार्था मातृपक्षे च वृष्णयः ।
द्वौ पक्षावभिजानीहि त्वमेतौ पुरुषर्षभ ॥ १०
मया सार्धमितो यातमद्य त्वां तात पाण्डवाः ।
अभिजानन्तु कौन्तेयं पूर्वजातं युधिष्ठिरात् ॥ ११

पादौ तव ग्रहीष्यन्ति भ्रातरः पञ्च पाण्डवाः ।
द्रौपदेयास्तथा पञ्च सौभद्रश्चापराजितः ॥ १२
राजानो राजपुत्राश्च पाण्डवार्थे समागताः ।
पादौ तव ग्रहीष्यन्ति सर्वे चान्धकवृष्णयः ॥ १३
हिरण्मयांश्च ते कुम्भान्राजतान्पार्थिवांस्तथा ।
ओषध्यः सर्वबीजानि सर्वरत्नानि वीरुधः ॥ १४
राजन्या राजकन्याश्चाप्यानयन्त्वभिषेचनम् ।
षष्ठे च त्वां तथा काले द्रौपद्युपगमिष्यति ॥ १५
अद्य त्वामभिषिञ्चन्तु चातुर्वैद्या द्विजातयः ।
पुरोहितः पाण्डवानां व्याघ्रचर्मण्यवस्थितम् ॥ १६
तथैव भ्रातरः पञ्च पाण्डवाः पुरुषर्षभाः ।
द्रौपदेयास्तथा पञ्च पाञ्चालाश्चेदयस्तथा ॥ १७
अहं च त्वाभिषेक्ष्यामि राजानं पृथिवीपतिम् ।
युवराजोऽस्तु ते राजा कुन्तीपुत्रो युधिष्ठिरः ॥ १८
गृहीत्वा व्यजनं श्वेतं धर्मात्मा संशितव्रतः ।
उपान्वारोहतु रथं कुन्तीपुत्रो युधिष्ठिरः ॥ १९
छत्रं च ते महच्छ्वेतं भीमसेनो महाबलः ।
अभिषिक्तस्य कौन्तेय कौन्तेयो धारयिष्यति ॥ २०
किङ्किणीशतनिर्घोषं वैयाघ्रपरिवारणम् ।
रथं श्वेतहयैर्युक्तमर्जुनो वाहयिष्यति ॥ २१
अभिमन्युश्च ते नित्यं प्रत्यासन्नो भविष्यति ।
नकुलः सहदेवश्च द्रौपदेयाश्च पञ्च ये ॥ २२
पाञ्चालास्त्वानुयास्यन्ति शिखण्डी च महारथः ।
अहं च त्वानुयास्यामि सर्वे चान्धकवृष्णयः ।
दाशार्हाः परिवारास्ते दाशार्णाश्च विशां पते ॥ २३
भुङ्क्ष्व राज्यं महाबाहो भ्रातृभिः सह पाण्डवैः ।
जपैर्होमैश्च संयुक्तो मङ्गलैश्च पृथग्विधैः ॥ २४
पुरोगमाश्च ते सन्तु द्रविडाः सह कुन्तलैः ।
आन्ध्रास्तालचराश्चैव चूचुपा वेणुपास्तथा ॥ २५
स्तुवन्तु त्वाद्य बहुशः स्तुतिभिः सूतमागधाः ।
विजयं वसुषेणस्य घोषयन्तु च पाण्डवाः ॥ २६
स त्वं परिवृतः पार्थैर्नक्षत्रैरिव चन्द्रमाः ।
प्रशाधि राज्यं कौन्तेय कुन्तीं च प्रतिनन्दय ॥ २७
मित्राणि ते प्रहृष्यन्तु व्यथन्तु रिपवस्तथा ।
सौभ्रात्रं चैव तेऽद्यास्तु भ्रातृभिः सह पाण्डवैः ॥ २८

इति श्रीमहाभारते उद्योगपर्वणि
अष्टात्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥

१३९

कर्ण उवाच ।

असंशयं सौहृदान्मे प्रणयाच्चात्थ केशव ।
सख्येन चैव वार्ष्णेय श्रेयस्कामतयैव च ॥ १
सर्वं चैवाभिजानामि पाण्डोः पुत्रोऽस्मि धर्मतः ।
निग्रहाद्धर्मशास्त्राणां यथा त्वं कृष्ण मन्यसे ॥ २
कन्या गर्भं समाधत्त भास्करान्मां जनार्दन ।
आदित्यवचनाच्चैव जातं मां सा व्यसर्जयत् ॥ ३
सोऽस्मि कृष्ण तथा जातः पाण्डोः पुत्रोऽस्मि धर्मतः ।
कुन्त्या त्वहमपाकीर्णो यथा न कुशलं तथा ॥ ४
सूतो हि मामधिरथो दृष्ट्वैव अनयद्गृहान् ।
राधायाश्चैव मां प्रादात्सौहार्दान्मधुसूदन ॥ ५
मत्स्नेहाच्चैव राधायाः सद्यः क्षीरमवातरत् ।
सा मे मूत्रं पुरीषं च प्रतिजग्राह माधव ॥ ६
तस्याः पिण्डव्यपनयं कुर्यादस्मद्विधः कथम् ।
धर्मविद्धर्मशास्त्राणां श्रवणे सततं रतः ॥ ७
तथा मामभिजानाति सूतश्चाधिरथः सुतम् ।
पितरं चाभिजानामि तमहं सौहृदात्सदा ॥ ८
स हि मे जातकर्मादि कारयामास माधव ।
शास्त्रदृष्टेन विधिना पुत्रप्रीत्या जनार्दन ॥ ९
नाम मे वसुषेणेति कारयामास वै द्विजैः ।
भार्याश्चोढा मम प्राप्ते यौवने तेन केशव ॥ १०
तासु पुत्राश्च पौत्राश्च मम जाता जनार्दन ।

तासु मे हृदयं कृष्ण संजातं कामबन्धनम् ॥ ११
न पृथिव्या सकलया न सुवर्णस्य राशिभिः ।
हर्षाद्भयाद्वा गोविन्द अनृतं वक्तुमुत्सहे ॥ १२
धृतराष्ट्रकुले कृष्ण दुर्योधनसमाश्रयात् ।
मया त्रयोदश समा भुक्तं राज्यमकण्टकम् ॥ १३
इष्टं च बहुभिर्यज्ञैः सह सूतैर्मयासकृत् ।
आवाहाश्च विवाहाश्च सह सूतैः कृता मया ॥ १४
मां च कृष्ण समाश्रित्य कृतः शस्त्रसमुद्यमः ।
दुर्योधनेन वार्ष्णेय विग्रहश्चापि पाण्डवैः ॥ १५
तस्माद्रणे द्वैरथे मां प्रत्युद्यातारमच्युत ।
वृतवान्परमं हृष्टः प्रतीपं सव्यसाचिनः ॥ १६
वधाद्बन्धाद्भयाद्वापि लोभाद्वापि जनार्दन ।
अनृतं नोत्सहे कर्तुं धार्तराष्ट्रस्य धीमतः ॥ १७
यदि ह्यद्य न गच्छेयं द्वैरथं सव्यसाचिना ।
अकीर्तिः स्याद्धृषीकेश मम पार्थस्य चोभयोः ॥ १८
असंशयं हितार्थाय ब्रूयास्त्वं मधुसूदन ।
सर्वं च पाण्डवाः कुर्युस्त्वद्वशित्वान्न संशयः ॥ १९
मन्त्रस्य नियमं कुर्यास्त्वमत्र पुरुषोत्तम ।
एतदत्र हितं मन्ये सर्वयादवनन्दन ॥ २०
यदि जानाति मां राजा धर्मात्मा संशितव्रतः ।
कुन्त्याः प्रथमजं पुत्रं न स राज्यं ग्रहीष्यति ॥ २१
प्राप्य चापि महद्राज्यं तदहं मधुसूदन ।
स्फीतं दुर्योधनायैव संप्रदद्यामरिंदम ॥ २२
स एव राजा धर्मात्मा शाश्वतोऽस्तु युधिष्ठिरः ।
नेता यस्य हृषीकेशो योद्धा यस्य धनंजयः ॥ २३
पृथिवी तस्य राष्ट्रं च यस्य भीमो महारथः ।
नकुलः सहदेवश्च द्रौपदेयाश्च माधव ॥ २४
उत्तमौजा युधामन्युः सत्यधर्मा च सोमकिः ।
चैद्यश्च चेकितानश्च शिखण्डी चापराजितः ॥ २५
इन्द्रगोपकवर्णाश्च केकया भ्रातरस्तथा ।
इन्द्रायुधसवर्णश्च कुन्तिभोजो महारथः ॥ २६
मातुलो भीमसेनस्य सेनजिच्च महारथः ।
शङ्खः पुत्रो विराटस्य निधिस्त्वं च जनार्दन ॥ २७
महानयं कृष्ण कृतः क्षत्रस्य समुदानयः ।
राज्यं प्राप्तमिदं दीप्तं प्रथितं सर्वराजसु ॥ २८
धार्तराष्ट्रस्य वार्ष्णेय शस्त्रयज्ञो भविष्यति ।
अस्य यज्ञस्य वेत्ता त्वं भविष्यसि जनार्दन ।
आध्वर्यवं च ते कृष्ण क्रतावस्मिन्भविष्यति ॥ २९
होता चैवात्र बीभत्सुः संनद्धः स कपिध्वजः ।
गाण्डीवं स्रुक्तथाज्यं च वीर्यं पुंसां भविष्यति ॥ ३०
ऐन्द्रं पाशुपतं ब्राह्मं स्थूणाकर्णं च माधव ।
मन्त्रास्तत्र भविष्यन्ति प्रयुक्ताः सव्यसाचिना ॥ ३१
अनुयातश्च पितरमधिको वा पराक्रमे ।
ग्रावस्तोत्रं स सौभद्रः सम्यक्तत्र करिष्यति ॥ ३२
उद्गातात्र पुनर्भीमः प्रस्तोता सुमहाबलः ।
विनदन्स नरव्याघ्रो नागानीकान्तकृद्रणे ॥ ३३
स चैव तत्र धर्मात्मा शश्वद्राजा युधिष्ठिरः ।
जपैर्होमैश्च संयुक्तो ब्रह्मत्वं कारयिष्यति ॥ ३४
शङ्खशब्दाः समुरजा भेर्यश्च मधुसूदन ।
उत्कृष्टसिंहनादाश्च सुब्रह्मण्यो भविष्यति ॥ ३५
नकुलः सहदेवश्च माद्रीपुत्रौ यशस्विनौ ।
शामित्रं तौ महावीर्यौ सम्यक्तत्र करिष्यतः ॥ ३६
कल्माषदण्डा गोविन्द विमला रथशक्तयः ।
यूपाः समुपकल्पन्तामस्मिन्यज्ञे जनार्दन ॥ ३७
कर्णिनालीकनाराचा वत्सदन्तोपबृंहणाः ।
तोमराः सोमकलशाः पवित्राणि धनूंषि च ॥ ३८
असयोऽत्र कपालानि पुरोडाशाः शिरांसि च ।
हविस्तु रुधिरं कृष्ण अस्मिन्यज्ञे भविष्यति ॥ ३९
इध्माः परिधयश्चैव शक्त्योऽथ विमला गदाः ।
सदस्या द्रोणशिष्याश्च कृपस्य च शरद्वतः ॥ ४०

इषवोऽत्र परिस्तोमा मुक्ता गाण्डीवधन्वना ।
महारथप्रयुक्ताश्च द्रोणद्रौणिप्रचोदिताः ॥ ४१
प्रातिप्रस्थानिकं कर्म सात्यकिः स करिष्यति ।
दीक्षितो धार्तराष्ट्रोऽत्र पत्नी चास्य महाचमूः ॥४२
घटोत्कचोऽत्र शामित्रं करिष्यति महाबलः ।
अतिरात्रे महाबाहो वितते यज्ञकर्मणि ॥ ४३
दक्षिणा त्वस्य यज्ञस्य धृष्टद्युम्नः प्रतापवान् ।
वैताने कर्मणि तते जातो यः कृष्ण पावकात् ॥४४
यदब्रुवमहं कृष्ण कटुकानि स्म पाण्डवान् ।
प्रियार्थं धार्तराष्ट्रस्य तेन तप्येऽद्य कर्मणा ॥ ४५
यदा द्रक्ष्यसि मां कृष्ण निहतं सव्यसाचिना ।
पुनश्चितिस्तदा चास्य यज्ञस्याथ भविष्यति ॥ ४६
दुःशासनस्य रुधिरं यदा पास्यति पाण्डवः ।
आनर्दं नर्दतः सम्यक्तदा सुत्यं भविष्यति ॥ ४७
यदा द्रोणं च भीष्मं च पाञ्चाल्यौ पातयिष्यतः ।
तदा यज्ञावसानं तद्भविष्यति जनार्दन ॥ ४८
दुर्योधनं यदा हन्ता भीमसेनो महाबलः ।
तदा समाप्स्यते यज्ञो धार्तराष्ट्रस्य माधव ॥ ४९
स्नुषाश्च प्रस्नुषाश्चैव धृतराष्ट्रस्य संगताः ।
हतेश्वरा हतसुता हतनाथाश्च केशव ॥ ५०
गान्धार्या सह रोदन्त्यः श्वगृध्रकुरराकुले ।
स यज्ञेऽस्मिन्नवभृथो भविष्यति जनार्दन ॥ ५१
विद्यावृद्धा वयोवृद्धाः क्षत्रियाः क्षत्रियर्षभ ।
वृथामृत्युं न कुर्वीरंस्त्वत्कृते मधुसूदन ॥ ५२
शस्त्रेण निधनं गच्छेत्समृद्धं क्षत्रमण्डलम् ।
कुरुक्षेत्रे पुण्यतमे त्रैलोक्यस्यापि केशव ॥ ५३
तदत्र पुण्डरीकाक्ष विधत्स्व यदभीप्सितम् ।
यथा कार्त्स्न्येन वार्ष्णेय क्षत्रं स्वर्गमवाप्नुयात् ॥ ५४
यावत्स्थास्यन्ति गिरयः सरितश्च जनार्दन ।
तावत्कीर्तिभवः शब्दः शाश्वतोऽयं भविष्यति ॥५५
ब्राह्मणाः कथयिष्यन्ति महाभारतमाहवम् ।
समागमेषु वार्ष्णेय क्षत्रियाणां यशोधरम् ॥ ५६
समुपानय कौन्तेयं युद्धाय मम केशव ।
मन्त्रसंवरणं कुर्वन्नित्यमेव परंतप ॥ ५७

इति श्रीमहाभारते उद्योगपर्वणि
एकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥

१४०

संजय उवाच ।

कर्णस्य वचनं श्रुत्वा केशवः परवीरहा ।
उवाच प्रहसन्वाक्यं स्मितपूर्वमिदं तदा ॥ १
अपि त्वां न तपेत्कर्ण राज्यलाभोपपादना ।
मया दत्तां हि पृथिवीं न प्रशासितुमिच्छसि ॥ २
ध्रुवो जयः पाण्डवानामितीदं
न संशयः कश्चन विद्यतेऽत्र ।
जयध्वजो दृश्यते पाण्डवस्य
समुच्छ्रितो वानरराज उग्रः ॥ ३
दिव्या माया विहिता भौवनेन
समुच्छ्रिता इन्द्रकेतुप्रकाशा ।
दिव्यानि भूतानि भयावहानि
दृश्यन्ति चैवात्र भयानकानि ॥ ४
न सज्जते शैलवनस्पतिभ्य
ऊर्ध्वं तिर्यग्योजनमात्ररूपः ।
श्रीमान्ध्वजः कर्ण धनंजयस्य
समुच्छ्रितः पावकतुल्यरूपः ॥ ५
यदा द्रक्ष्यसि संग्रामे श्वेताश्वं कृष्णसारथिम् ।
ऐन्द्रमस्त्रं विकुर्वाणमुभे चैवाग्निमारुते ॥ ६
गाण्डीवस्य च निर्घोषं विस्फूर्जितमिवाशनेः ।
न तदा भविता त्रेता न कृतं द्वापरं न च ॥ ७
यदा द्रक्ष्यसि संग्रामे कुन्तीपुत्रं युधिष्ठिरम् ।
जपहोमसमायुक्तं स्वां रक्षन्तं महाचमूम् ॥ ८

आदित्यमिव दुर्धर्षं तपन्तं शत्रुवाहिनीम् ।
न तदा भविता त्रेता न कृतं द्वापरं न च ॥ ९
यदा द्रक्ष्यसि संग्रामे भीमसेनं महाबलम् ।
दुःशासनस्य रुधिरं पीत्वा नृत्यन्तमाहवे ॥ १०
प्रभिन्नमिव मातङ्गं प्रतिद्विरदघातिनम् ।
न तदा भविता त्रेता न कृतं द्वापरं न च ॥ ११
यदा द्रक्ष्यसि संग्रामे माद्रीपुत्रौ महारथौ ।
वाहिनीं धार्तराष्ट्राणां क्षोभयन्तौ गजाविव ॥ १२
विगाढे शस्त्रसंपाते परवीररथारुजौ ।
न तदा भविता त्रेता न कृतं द्वापरं न च ॥ १३
यदा द्रक्ष्यसि संग्रामे द्रोणं शांतनवं कृपम् ।
सुयोधनं च राजानं सैन्धवं च जयद्रथम् ॥ १४
युद्धायापततस्तूर्णं वारितान्सव्यसाचिना ।
न तदा भविता त्रेता न कृतं द्वापरं न च ॥ १५
ब्रूयाः कर्ण इतो गत्वा द्रोणं शांतनवं कृपम् ।
सौम्योऽयं वर्तते मासः सुप्रापयवसेन्धनः ॥ १६
पक्वौषधिवनस्फीतः फलवानल्पमक्षिकः ।
निष्पङ्को रसवत्तोयो नात्युष्णशिशिरः सुखः ॥ १७
सप्तमाच्चापि दिवसादमावास्या भविष्यति ।
संग्रामं योजयेत्तत्र तां ह्याहुः शक्रदेवताम् ॥ १८
तथा राज्ञो वदेः सर्वान्ये युद्धायाभ्युपागताः ।
यद्वो मनीषितं तद्वै सर्वं संपादयामि वः ॥ १९
राजानो राजपुत्राश्च दुर्योधनवशानुगाः ।
प्राप्य शस्त्रेण निधनं प्राप्स्यन्ति गतिमुत्तमाम् ॥ २०

इति श्रीमहाभारते उद्योगपर्वणि
चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥

१४१

संजय उवाच ।

केशवस्य तु तद्वाक्यं कर्णः श्रुत्वा हितं शुभम् ।
अब्रवीदभिसंपूज्य कृष्णं मधुनिषूदनम् ।
जानन्मां किं महाबाहो संमोहयितुमिच्छसि ॥ १
योऽयं पृथिव्याः कार्त्स्न्येन विनाशः समुपस्थितः ।
निमित्तं तत्र शकुनिरहं दुःशासनस्तथा ।
दुर्योधनश्च नृपतिर्धृतराष्ट्रसुतोऽभवत् ॥ २
असंशयमिदं कृष्ण महद्युद्धमुपस्थितम् ।
पाण्डवानां कुरूणां च घोरं रुधिरकर्दमम् ॥ ३
राजानो राजपुत्राश्च दुर्योधनवशानुगाः ।
रणे शस्त्राग्निना दग्धाः प्राप्स्यन्ति यमसादनम् ॥४
स्वप्ना हि बहवो घोरा दृश्यन्ते मधुसूदन ।
निमित्तानि च घोराणि तथोत्पाताः सुदारुणाः ॥ ५
पराजयं धार्तराष्ट्रे विजयं च युधिष्ठिरे ।
शंसन्त इव वार्ष्णेय विविधा लोमहर्षणाः ॥ ६
प्राजापत्यं हि नक्षत्रं ग्रहस्तीक्ष्णो महाद्युतिः ।
शनैश्चरः पीडयति पीडयन्प्राणिनोऽधिकम् ॥ ७
कृत्वा चाङ्गारको वक्रं ज्येष्ठायां मधुसूदन ।
अनुराधां प्रार्थयते मैत्रं संशमयन्निव ॥ ८
नूनं महद्भयं कृष्ण कुरूणां समुपस्थितम् ।
विशेषेण हि वार्ष्णेय चित्रां पीडयते ग्रहः ॥ ९
सोमस्य लक्ष्म व्यावृत्तं राहुरर्कमुपेष्यति ।
दिवश्चोल्काः पतन्त्येताः सनिर्घाताः सकम्पनाः ॥
निष्टनन्ति च मातङ्गा मुञ्चन्त्यश्रूणि वाजिनः ।
पानीयं यवसं चापि नाभिनन्दन्ति माधव ॥ ११
प्रादुर्भूतेषु चैतेषु भयमाहुरुपस्थितम् ।
निमित्तेषु महाबाहो दारुणं प्राणिनाशनम् ॥ १२
अल्पे भुक्ते पुरीषं च प्रभूतमिह दृश्यते ।
वाजिनां वारणानां च मनुष्याणां च केशव ॥ १३
धार्तराष्ट्रस्य सैन्येषु सर्वेषु मधुसूदन ।
पराभवस्य तल्लिङ्गमिति प्राहुर्मनीषिणः ॥ १४
प्रहृष्टं वाहनं कृष्ण पाण्डवानां प्रचक्षते ।
प्रदक्षिणा मृगाश्चैव तत्तेषां जयलक्षणम् ॥ १५

अपसव्या मृगाः सर्वे धार्तराष्ट्रस्य केशव ।
वाचश्चाप्यशरीरिण्यस्तत्पराभवलक्षणम् ॥ १६
मयूराः पुष्पशकुना हंसाः सारसचातकाः ।
जीवंजीवकसंघाश्चाप्यनुगच्छन्ति पाण्डवान् ॥ १७
गृध्राः काका बडाः श्येना यातुधानाः शलावृकाः ।
मक्षिकाणां च संघाता अनुगच्छन्ति कौरवान् ॥
धार्तराष्ट्रस्य सैन्येषु भेरीणां नास्ति निस्वनः ।
अनाहताः पाण्डवानां नदन्ति पटहाः किल ॥ १९
उदपानाश्च नर्दन्ति यथा गोवृषभास्तथा ।
धार्तराष्ट्रस्य सैन्येषु तत्पराभवलक्षणम् ॥ २०
मांसशोणितवर्षं च वृष्टं देवेन माधव ।
तथा गन्धर्वनगरं भानुमन्तमुपस्थितम् ।
सप्राकारं सपरिखं सवप्रं चारुतोरणम् ॥ २१
कृष्णश्च परिघस्तत्र भानुमावृत्य तिष्ठति ।
उदयास्तमये संध्ये वेदयानो महद्भयम् ।
एका सृग्वाशते घोरं तत्पराभवलक्षणम् ॥ २२
कृष्णग्रीवाश्च शकुना लम्बमाना भयानकाः ।
संध्यामभिमुखा यान्ति तत्पराभवलक्षणम् ॥ २३
ब्राह्मणान्प्रथमं द्वेष्टि गुरूंश्च मधुसूदन ।
भृत्यान्भक्तिमतश्चापि तत्पराभवलक्षणम् ॥ २४
पूर्वा दिग्लोहिताकारा शस्त्रवर्णा च दक्षिणा ।
आमपात्रप्रतीकाशा पश्चिमा मधुसूदन ॥ २५
प्रदीप्ताश्च दिशः सर्वा धार्तराष्ट्रस्य माधव ।
महद्भयं वेदयन्ति तस्मिन्नुत्पातलक्षणे ॥ २६
सहस्रपादं प्रासादं स्वप्नान्ते स्म युधिष्ठिरः ।
अधिरोहन्मया दृष्टः सह भ्रातृभिरच्युत ॥ २७
श्वेतोष्णीषाश्च दृश्यन्ते सर्वे ते शुक्लवाससः ।
आसनानि च शुभ्राणि सर्वेषामुपलक्षये ॥ २८
तव चापि मया कृष्ण स्वप्नान्ते रुधिराविला ।
आन्त्रेण पृथिवी दृष्टा परिक्षिप्ता जनार्दन ॥ २९
अस्थिसंचयमारूढश्चामितौजा युधिष्ठिरः ।
सुवर्णपात्र्यां संहृष्टो भुक्तवान्घृतपायसम् ॥ ३०
युधिष्ठिरो मया दृष्टो ग्रसमानो वसुंधराम् ।
त्वया दत्तामिमां व्यक्तं भोक्ष्यते स वसुंधराम् ॥
उच्चं पर्वतमारूढो भीमकर्मा वृकोदरः ।
गदापाणिर्नरव्याघ्रो वीक्षन्निव महीमिमाम् ॥ ३२
क्षपयिष्यति नः सर्वान्स सुव्यक्तं महारणे ।
विदितं मे हृषीकेश यतो धर्मस्ततो जयः ॥ ३३
पाण्डुरं गजमारूढो गाण्डीवी स धनंजयः ।
त्वया सार्धं हृषीकेश श्रिया परमया ज्वलन् ॥ ३४
यूयं सर्वान्वधिष्यध्वं तत्र मे नास्ति संशयः ।
पार्थिवान्समरे कृष्ण दुर्योधनपुरोगमान् ॥ ३५
नकुलः सहदेवश्च सात्यकिश्च महारथः ।
शुद्धकेयूरकण्ठत्राः शुक्लमाल्याम्बरावृताः ॥ ३६
अधिरूढा नरव्याघ्रा नरवाहनमुत्तमम् ।
त्रय एते महामात्राः पाण्डुरच्छत्रवाससः ॥ ३७
श्वेतोष्णीषाश्च दृश्यन्ते त्रय एव जनार्दन ।
धार्तराष्ट्रस्य सैन्येषु तान्विजानीहि केशव ॥ ३८
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ।
रक्तोष्णीषाश्च दृश्यन्ते सर्वे माधव पार्थिवाः ॥ ३९
उष्ट्रयुक्तं समारूढौ भीष्मद्रोणौ जनार्दन ।
मया सार्धं महाबाहो धार्तराष्ट्रेण चाभिभो ॥ ४०
अगस्त्यशास्तां च दिशं प्रयाताः स्म जनार्दन ।
अचिरेणैव कालेन प्राप्स्यामो यमसादनम् ॥ ४१
अहं चान्ये च राजानो यच्च तत्क्षत्रमण्डलम् ।
गाण्डीवाग्निं प्रवेक्ष्याम इति मे नास्ति संशयः ॥४२

कृष्ण उवाच ।

उपस्थितविनाशेयं नूनमद्य वसुंधरा ।
तथा हि मे वचः कर्ण नोपैति हृदयं तव ॥ ४३
सर्वेषां तात भूतानां विनाशे समुपस्थिते ।

अनयो नयसंकाशो हृदयान्नापसर्पति ॥ ४४

कर्ण उवाच ।

अपि त्वा कृष्ण पश्याम जीवन्तोऽस्मान्महारणात् ।
समुत्तीर्णा महाबाहो वीरक्षयविनाशनात् ॥ ४५
अथ वा संगमः कृष्ण स्वर्गे नो भविता ध्रुवम् ।
तत्रेदानीं समेष्यामः पुनः सार्धं त्वयानघ ॥ ४६

संजय उवाच ।

इत्युक्त्वा माधवं कर्णः परिष्वज्य च पीडितम् ।
विसर्जितः केशवेन रथोपस्थादवातरत् ॥ ४७
ततः स्वरथमास्थाय जाम्बूनदविभूषितम् ।
सहास्माभिर्निववृते राधेयो दीनमानसः ॥ ४८
ततः शीघ्रतरं प्रायात्केशवः सहसात्यकिः ।
पुनरुच्चारयन्वाणीं याहि याहीति सारथिम् ॥ ४९

इति श्रीमहाभारते उद्योगपर्वणि
एकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

१४२

वैशंपायन उवाच ।

असिद्धानुनये कृष्णे कुरुभ्यः पाण्डवान्गते ।
अभिगम्य पृथां क्षत्ता शनैः शोचन्निवाब्रवीत् ॥ १
जानासि मे जीवपुत्रे भावं नित्यमनुग्रहे ।
क्रोशतो न च गृह्णीते वचनं मे सुयोधनः ॥ २
उपपन्नो ह्यसौ राजा चेदिपाञ्चालकेकयैः ।
भीमार्जुनाभ्यां कृष्णेन युयुधानयमैरपि ॥ ३
उपप्लव्ये निविष्टोऽपि धर्ममेव युधिष्ठिरः ।
काङ्क्षते ज्ञातिसौहार्दाद्बलवान्दुर्बलो यथा ॥ ४
राजा तु धृतराष्ट्रोऽयं वयोवृद्धो न शाम्यति ।
मत्तः पुत्रमदेनैव विधर्मे पथि वर्तते ॥ ५
जयद्रथस्य कर्णस्य तथा दुःशासनस्य च ।
सौबलस्य च दुर्बुद्ध्या मिथोभेदः प्रवर्तते ॥ ६
अधर्मेण हि धर्मिष्ठं हृतं वै राज्यमीदृशम् ।
येषां तेषामयं धर्मः सानुबन्धो भविष्यति ॥ ७
ह्रियमाणे बलाद्धर्मे कुरुभिः को न संज्वरेत् ।
असाम्ना केशवे याते समुद्योक्ष्यन्ति पाण्डवाः ॥ ८
ततः कुरूणामनयो भविता वीरनाशनः ।
चिन्तयन्न लभे निद्रामहःसु च निशासु च ॥ ९
श्रुत्वा तु कुन्ती तद्वाक्यमर्थकामेन भाषितम् ।
अनिष्टनन्ती दुःखार्ता मनसा विममर्श ह ॥ १०
धिगस्त्वर्थं यत्कृतेऽयं महाञ्ज्ञातिवधे क्षयः ।
वर्त्स्यते सुहृदां ह्येषां युद्धेऽस्मिन्वै पराभवः ॥ ११
पाण्डवाश्चेदिपाञ्चाला यादवाश्च समागताः ।
भारतैर्यदि योत्स्यन्ति किं नु दुःखमतः परम् ॥ १२
पश्ये दोषं ध्रुवं युद्धे तथा युद्धे पराभवम् ।
अधनस्य मृतं श्रेयो न हि ज्ञातिक्षये जयः ॥ १३
पितामहः शांतनव आचार्यश्च युधां पतिः ।
कर्णश्च धार्तराष्ट्रार्थं वर्धयन्ति भयं मम ॥ १४
नाचार्यः कामवाञ्शिष्यैर्द्रोणो युध्येत जातुचित् ।
पाण्डवेषु कथं हार्दं कुर्यान्न च पितामहः ॥ १५
अयं त्वेको वृथादृष्टिर्धार्तराष्ट्रस्य दुर्मतेः ।
मोहानुवर्ती सततं पापो द्वेष्टि च पाण्डवान् ॥ १६
महत्यनर्थे निर्बन्धी बलवांश्च विशेषतः ।
कर्णः सदा पाण्डवानां तन्मे दहति सांप्रतम् ॥ १७
आशंसे त्वद्य कर्णस्य मनोऽहं पाण्डवान्प्रति ।
प्रसादयितुमासाद्य दर्शयन्ती यथातथम् ॥ १८
तोषितो भगवान्यत्र दुर्वासा मे वरं ददौ ।
आह्वानं देवसंयुक्तं वसन्त्याः पितृवेश्मनि ॥ १९
साहमन्तःपुरे राज्ञः कुन्तिभोजपुरस्कृता ।
चिन्तयन्ती बहुविधं हृदयेन विदूयता ॥ २०
बलाबलं च मन्त्राणां ब्राह्मणस्य च वाग्बलम् ।
स्त्रीभावाद्बालभावाच्च चिन्तयन्ती पुनः पुनः ॥ २१
धात्र्या विश्रब्धया गुप्ता सखीजनवृता तदा ।

दोषं परिहरन्ती च पितुश्चारित्ररक्षिणी ॥ २२
कथं नु सुकृतं मे स्यान्नापराधवती कथम् ।
भवेयमिति संचिन्त्य ब्राह्मणं तं नमस्य च ॥ २३
कौतूहलात्तु तं लब्ध्वा बालिश्यादाचरं तदा ।
कन्या सती देवमर्कमासादयमहं ततः ॥ २४
योऽसौ कानीनगर्भो मे पुत्रवत्परिवर्तितः ।
कस्मान्न कुर्याद्वचनं पथ्यं भ्रातृहितं तथा ॥ २५
इति कुन्ती विनिश्चित्य कार्यं निश्चितमुत्तमम् ।
कार्यार्थमभिनिर्याय ययौ भागीरथीं प्रति ॥ २६
आत्मजस्य ततस्तस्य घृणिनः सत्यसङ्गिनः ।
गङ्गातीरे पृथाशृण्वदुपाध्ययननिस्वनम् ॥ २७
प्राङ्मुखस्योर्ध्वबाहोः सा पर्यतिष्ठत पृष्ठतः ।
जप्यावसानं कार्यार्थं प्रतीक्षन्ती तपस्विनी ॥ २८
अतिष्ठत्सूर्यतापार्ता कर्णस्योत्तरवाससि ।
कौरव्यपत्नी वार्ष्णेयी पद्ममालेव शुष्यती ॥ २९
आ पृष्ठतापाज्जप्त्वा स परिवृत्य यतव्रतः ।
दृष्ट्वा कुन्तीमुपातिष्ठदभिवाद्य कृताञ्जलिः ।
यथान्यायं महातेजा मानी धर्मभृतां वरः ॥ ३०

इति श्रीमहाभारते उद्योगपर्वणि
द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥

१४३

कर्ण उवाच ।

राधेयोऽहमाधिरथिः कर्णस्त्वामभिवादये ।
प्राप्ता किमर्थं भवती ब्रूहि किं करवाणि ते ॥ १

कुन्त्युवाच ।

कौन्तेयस्त्वं न राधेयो न तवाधिरथः पिता ।
नासि सूतकुले जातः कर्ण तद्विद्धि मे वचः ॥ २
कानीनस्त्वं मया जातः पूर्वजः कुक्षिणा धृतः ।
कुन्तिभोजस्य भवने पार्थस्त्वमसि पुत्रक ॥ ३
प्रकाशकर्मा तपनो योऽयं देवो विरोचनः ।
अजीजनत्त्वां मय्येष कर्ण शस्त्रभृतां वरम् ॥ ४
कुण्डली बद्धकवचो देवगर्भः श्रिया वृतः ।
जातस्त्वमसि दुर्धर्ष मया पुत्र पितुर्गृहे ॥ ५
स त्वं भ्रातॄनसंबुद्ध्वा मोहाद्यदुपसेवसे ।
धार्तराष्ट्रान्न तद्युक्तं त्वयि पुत्र विशेषतः ॥ ६
एतद्धर्मफलं पुत्र नराणां धर्मनिश्चये ।
यत्तुष्यन्त्यस्य पितरो माता चाप्येकदर्शिनी ॥ ७
अर्जुनेनार्जितां पूर्वं हृतां लोभादसाधुभिः ।
आच्छिद्य धार्तराष्ट्रेभ्यो भुङ्क्ष्व यौधिष्ठिरीं श्रियम् ॥८
अद्य पश्यन्तु कुरवः कर्णार्जुनसमागमम् ।
सौभ्रात्रेण तदालक्ष्य संनमन्तामसाधवः ॥ ९
कर्णार्जुनौ वै भवतां यथा रामजनार्दनौ ।
असाध्यं किं नु लोके स्याद्युवयोः सहितात्मनोः ॥१०
कर्ण शोभिष्यसे नूनं पञ्चभिर्भ्रातृभिर्वृतः ।
वेदैः परिवृतो ब्रह्मा यथा वेदाङ्गपञ्चमैः ॥ ११
उपपन्नो गुणैः श्रेष्ठो ज्येष्ठः श्रेष्ठेषु बन्धुषु ।
सूतपुत्रेति मा शब्दः पार्थस्त्वमसि वीर्यवान् ॥१२

इति श्रीमहाभारते उद्योगपर्वणि
त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥

१४४

वैशंपायन उवाच ।

ततः सूर्यान्निश्चरितां कर्णः शुश्राव भारतीम् ।
दुरत्ययां प्रणयिनीं पितृवद्भास्करेरिताम् ॥ १
सत्यमाह पृथा वाक्यं कर्ण मातृवचः कुरु ।
श्रेयस्ते स्यान्नरव्याघ्र सर्वमाचरतस्तथा ॥ २
एवमुक्तस्य मात्रा च स्वयं पित्रा च भानुना ।
चचाल नैव कर्णस्य मतिः सत्यधृतेस्तदा ॥ ३

कर्ण उवाच ।

न ते न श्रद्दधे वाक्यं क्षत्रिये भाषितं त्वया ।
धर्मद्वारं ममैतत्स्यान्नियोगकरणं तव ॥ ४

अकरोन्मयि यत्पापं भवती सुमहात्ययम् ।
अवकीर्णोऽस्मि ते तेन तद्यशःकीर्तिनाशनम् ॥ ५
अहं च क्षत्रियो जातो न प्राप्तः क्षत्रसत्क्रियाम् ।
त्वत्कृते किं नु पापीयः शत्रुः कुर्यान्ममाहितम् ॥ ६
क्रियाकाले त्वनुक्रोशमकृत्वा त्वमिमं मम ।
हीनसंस्कारसमयमद्य मां समचूचुदः ॥ ७
न वै मम हितं पूर्वं मातृवच्चेष्टितं त्वया ।
सा मां संबोधयस्यद्य केवलात्महितैषिणी ॥ ८
कृष्णेन सहितात्को वै न व्यथेत धनंजयात् ।
कोऽद्य भीतं न मां विद्यात्पार्थानां समितिं गतम् ॥
अभ्राता विदितः पूर्वं युद्धकाले प्रकाशितः ।
पाण्डवान्यदि गच्छामि किं मां क्षत्रं वदिष्यति ॥
सर्वकामैः संविभक्तः पूजितश्च सदा भृशम् ।
अहं वै धार्तराष्ट्राणां कुर्यां तदफलं कथम् ॥ ११
उपनह्य परैर्वैरं ये मां नित्यमुपासते ।
नमस्कुर्वन्ति च सदा वसवो वासवं यथा ॥ १२
मम प्राणेन ये शत्रूञ्शक्ताः प्रतिसमासितुम् ।
मन्यन्तेऽद्य कथं तेषामहं भिन्द्यां मनोरथम् ॥ १३
मया प्लवेन संग्रामं तितीर्षन्ति दुरत्ययम् ।
अपारे पारकामा ये त्यजेयं तानहं कथम् ॥ १४
अयं हि कालः संप्राप्तो धार्तराष्ट्रोपजीविनाम् ।
निर्वेष्टव्यं मया तत्र प्राणानपरिरक्षता ॥ १५
कृतार्थाः सुभृता ये हि कृत्यकाल उपस्थिते ।
अनवेक्ष्य कृतं पापा विकुर्वन्त्यनवस्थिताः ॥ १६
राजकिल्बिषिणां तेषां भर्तृपिण्डापहारिणाम् ।
नैवायं न परो लोको विद्यते पापकर्मणाम् ॥ १७
धृतराष्ट्रस्य पुत्राणामर्थे योत्स्यामि ते सुतैः ।
बलं च शक्तिं चास्थाय न वै त्वय्यनृतं वदे ॥ १८
आनृशंस्यमथो वृत्तं रक्षन्सत्पुरुषोचितम् ।
अतोऽर्थकरमप्येतन्न करोम्यद्य ते वचः ॥ १९
न तु तेऽयं समारम्भो मयि मोघो भविष्यति ।
वध्यान्विषह्यान्संग्रामे न हनिष्यामि ते सुतान् ।
युधिष्ठिरं च भीमं च यमौ चैवार्जुनादृते ॥ २०
अर्जुनेन समं युद्धं मम यौधिष्ठिरे बले ।
अर्जुनं हि निहत्याजौ संप्राप्तं स्यात्फलं मया ।
यशसा चापि युज्येयं निहतः सव्यसाचिना ॥ २१
न ते जातु नशिष्यन्ति पुत्राः पञ्च यशस्विनि ।
निरर्जुनाः सकर्णा वा सार्जुना वा हते मयि ॥ २२

वैशंपायन उवाच ।

इति कर्णवचः श्रुत्वा कुन्ती दुःखात्प्रवेपती ।
उवाच पुत्रमाश्लिष्य कर्णं धैर्यादकम्पितम् ॥ २३
एवं वै भाव्यमेतेन क्षयं यास्यन्ति कौरवाः ।
यथा त्वं भाषसे कर्ण दैवं तु बलवत्तरम् ॥ २४
त्वया चतुर्णां भ्रातॄणामभयं शत्रुकर्शन ।
दत्तं तत्प्रतिजानीहि संगरप्रतिमोचनम् ॥ २५
अनामयं स्वस्ति चेति पृथाथो कर्णमब्रवीत् ।
तां कर्णोऽभ्यवदत्प्रीतस्ततस्तौ जग्मतुः पृथक् ॥ २६

इति श्रीमहाभारते उद्योगपर्वणि
चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥

१४५

वैशंपायन उवाच ।

आगम्य हास्तिनपुरादुपप्लव्यमरिंदमः ।
पाण्डवानां यथावृत्तं केशवः सर्वमुक्तवान् ॥ १
संभाष्य सुचिरं कालं मन्त्रयित्वा पुनः पुनः ।
स्वमेवावसथं शौरिर्विश्रामार्थं जगाम ह ॥ २
विसृज्य सर्वान्नृपतीन्विराटप्रमुखांस्तदा ।
पाण्डवा भ्रातरः पञ्च भानावस्तंगते सति ॥ ३
संध्यामुपास्य ध्यायन्तस्तमेव गतमानसाः ।
आनाय्य कृष्णं दाशार्हं पुनर्मन्त्रममन्त्रयन् ॥ ४

युधिष्ठिर उवाच ।

त्वया नागपुरं गत्वा सभायां धृतराष्ट्रजः ।
किमुक्तः पुण्डरीकाक्ष तन्नः शंसितुमर्हसि ॥ ५

वासुदेव उवाच ।

मया नागपुरं गत्वा सभायां धृतराष्ट्रजः ।
तथ्यं पथ्यं हितं चोक्तो न च गृह्णाति दुर्मतिः ॥ ६

युधिष्ठिर उवाच ।

तस्मिन्नुत्पथमापन्ने कुरुवृद्धः पितामहः ।
किमुक्तवान्हृषीकेश दुर्योधनममर्षणम् ।
आचार्यो वा महाबाहो भारद्वाजः किमब्रवीत् ॥ ७
पिता यवीयानस्माकं क्षत्ता धर्मभृतां वरः ।
पुत्रशोकाभिसंतप्तः किमाह धृतराष्ट्रजम् ॥ ८
किं च सर्वे नृपतयः सभायां ये समासते ।
उक्तवन्तो यथातत्त्वं तद्ब्रूहि त्वं जनार्दन ॥ ९
उक्तवान्हि भवान्सर्वं वचनं कुरुमुख्ययोः ।
कामलोभाभिभूतस्य मन्दस्य प्राज्ञमानिनः ॥ १०
अप्रियं हृदये मह्यं तन्न तिष्ठति केशव ।
तेषां वाक्यानि गोविन्द श्रोतुमिच्छाम्यहं विभो ॥
यथा च नाभिपद्येत कालस्तात तथा कुरु ।
भवान्हि नो गतिः कृष्ण भवान्नाथो भवान्गुरुः ॥ १२

वासुदेव उवाच ।

शृणु राजन्यथा वाक्यमुक्तो राजा सुयोधनः ।
मध्ये कुरूणां राजेन्द्र सभायां तन्निबोध मे ॥ १३
मया वै श्राविते वाक्ये जहास धृतराष्ट्रजः ।
अथ भीष्मः सुसंक्रुद्ध इदं वचनमब्रवीत् ॥ १४
दुर्योधन निबोधेदं कुलार्थे यद्ब्रवीमि ते ।
तच्छ्रुत्वा राजशार्दूल स्वकुलस्य हितं कुरु ॥ १५
मम तात पिता राजञ्शंतनुर्लोकविश्रुतः ।
तस्याहमेक एवासं पुत्रः पुत्रवतां वरः ॥ १६
तस्य बुद्धिः समुत्पन्ना द्वितीयः स्यात्कथं सुतः ।
एकपुत्रमपुत्रं वै प्रवदन्ति मनीषिणः ॥ १७
न चोच्छेदं कुलं यायाद्विस्तीर्येत कथं यशः ।
तस्याहमीप्सितं बुद्ध्वा कालीं मातरमावहम् ॥ १८
प्रतिज्ञां दुष्करां कृत्वा पितुरर्थे कुलस्य च ।
अराजा चोर्ध्वरेताश्च यथा सुविदितं तव ।
प्रतीतो निवसाम्येष प्रतिज्ञामनुपालयन् ॥ १९
तस्यां जज्ञे महाबाहुः श्रीमान्कुरुकुलोद्वहः ।
विचित्रवीर्यो धर्मात्मा कनीयान्मम पार्थिवः ॥ २०
स्वर्याते ऽहं पितरि तं स्वराज्ये संन्यवेशयम् ।
विचित्रवीर्यं राजानं भृत्यो भूत्वा ह्यधश्चरः ॥ २१
तस्याहं सदृशान्दारान्राजेन्द्र समुदावहम् ।
जित्वा पार्थिवसंघातमपि ते बहुशः श्रुतम् ॥ २२
ततो रामेण समरे द्वन्द्वयुद्धमुपागमम् ।
स हि रामभयादेभिर्नागरैर्विप्रवासितः ।
दारेष्वतिप्रसक्तश्च यक्ष्माणं समपद्यत ॥ २३
यदा त्वराजके राष्ट्रे न ववर्ष सुरेश्वरः ।
तदाभ्यधावन्मामेव प्रजाः क्षुद्भयपीडिताः ॥ २४

प्रजा ऊचुः ।

उपक्षीणाः प्रजाः सर्वा राजा भव भवाय नः ।
ईतयो नुद भद्रं ते शंतनोः कुलवर्धन ॥ २५
पीड्यन्ते ते प्रजाः सर्वा व्याधिभिर्भृशदारुणैः ।
अल्पावशिष्टा गाङ्गेय ताः परित्रातुमर्हसि ॥ २६
व्याधीन्प्रणुद्य वीर त्वं प्रजा धर्मेण पालय ।
त्वयि जीवति मा राष्ट्रं विनाशमुपगच्छतु ॥ २७

भीष्म उवाच ।

प्रजानां क्रोशतीनां वै नैवाक्षुभ्यत मे मनः ।
प्रतिज्ञां रक्षमाणस्य सद्वृत्तं स्मरतस्तथा ॥ २८
ततः पौरा महाराज माता काली च मे शुभा ।
भृत्याः पुरोहिताचार्या ब्राह्मणाश्च बहुश्रुताः ।
मामूचुर्भृशसंतप्ता भव राजेति संततम् ॥ २९

प्रतीपरक्षितं राष्ट्रं त्वां प्राप्य विनशिष्यति ।
स त्वमस्मद्धितार्थं वै राजा भव महामते ॥ ३०
इत्युक्तः प्राञ्जलिर्भूत्वा दुःखितो भृशमातुरः ।
तेभ्यो न्यवेदयं पुत्र प्रतिज्ञां पितृगौरवात् ।
ऊर्ध्वरेता ह्यराजा च कुलस्यार्थे पुनः पुनः ३१
ततोऽहं प्राञ्जलिर्भूत्वा मातरं संप्रसादयम् ।
नाम्ना शंतनुना जातः कौरवं वंशमुद्वहन् ।
प्रतिज्ञां वितथां कुर्यामिति राजन्पुनः पुनः ॥ ३२
विशेषतस्त्वदर्थं च धुरि मा मां नियोजय ।
अहं प्रेष्यश्च दासश्च तवाम्ब सुतवत्सले ॥ ३३
एवं तामनुनीयाहं मातरं जनमेव च ।
अयाचं भ्रातृदारेषु तदा व्यासं महामुनिम् ॥ ३४
सह मात्रा महाराज प्रसाद्य तमृषिं तदा ।
अपत्यार्थमयाचं वै प्रसादं कृतवांश्च सः ।
त्रीन्स पुत्रानजनयत्तदा भरतसत्तम ॥ ३५
अन्धः करणहीनेति न वै राजा पिता तव ।
राजा तु पाण्डुरभवन्महात्मा लोकविश्रुतः ॥ ३६
स राजा तस्य ते पुत्राः पितुर्दायाद्यहारिणः ।
मा तात कलहं कार्षी राज्यस्यार्धं प्रदीयताम् ॥३७
मयि जीवति राज्यं कः संप्रशासेत्पुमानिह ।
मावमंस्था वचो मह्यं शममिच्छामि वः सदा ॥३८
न विशेषोऽस्ति मे पुत्र त्वयि तेषु च पार्थिव ।
मतमेतत्पितुस्तुभ्यं गान्धार्या विदुरस्य च ॥ ३९
श्रोतव्यं यदि वृद्धानां मातिशङ्कीर्वचो मम ।
नाशयिष्यसि मा सर्वमात्मानं पृथिवीं तथा ॥ ४०

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥

१४६

वासुदेव उवाच ।

भीष्मेणोक्ते ततो द्रोणो दुर्योधनमभाषत ।
मध्ये नृपाणां भद्रं ते वचनं वचनक्षमः ॥ १
प्रातीपः शंतनुस्तात कुलस्यार्थे यथोत्थितः ।
तथा देवव्रतो भीष्मः कुलस्यार्थे स्थितोऽभवत् ॥ २
ततः पाण्डुर्नरपतिः सत्यसंधो जितेन्द्रियः ।
राजा कुरूणां धर्मात्मा सुव्रतः सुसमाहितः ॥ ३
ज्येष्ठाय राज्यमददाद्धृतराष्ट्राय धीमते ।
यवीयसस्तथा क्षत्तुः कुरुवंशविवर्धनः ॥ ४
ततः सिंहासने राजन्स्थापयित्वैनमच्युतम् ।
वनं जगाम कौरव्यो भार्याभ्यां सहितोऽनघ ॥ ५
नीचैः स्थित्वा तु विदुर उपास्ते स्म विनीतवत् ।
प्रेष्यवत्पुरुषव्याघ्रो वालव्यजनमुत्क्षिपन् ॥ ६
ततः सर्वाः प्रजास्तात धृतराष्ट्रं जनेश्वरम् ।
अन्वपद्यन्त विधिवद्यथा पाण्डुं नराधिपम् ॥ ७
विसृज्य धृतराष्ट्राय राज्यं स विदुराय च ।
चचार पृथिवीं पाण्डुः सर्वां परपुरंजयः ॥ ८
कोशसंजनने दाने भृत्यानां चान्ववेक्षणे ।
भरणे चैव सर्वस्य विदुरः सत्यसंगरः ॥ ९
संधिविग्रहसंयुक्तो राज्ञः संवाहनक्रियाः ।
अवैक्षत महातेजा भीष्मः परपुरंजयः ॥ १०
सिंहासनस्थो नृपतिर्धृतराष्ट्रो महाबलः ।
अन्वास्यमानः सततं विदुरेण महात्मना ॥ ११
कथं तस्य कुले जातः कुलभेदं व्यवस्यसि ।
संभूय भ्रातृभिः सार्धं भुङ्क्ष्व भोगाञ्जनाधिप ॥ १२
ब्रवीम्यहं न कार्पण्यान्नार्थहेतोः कथंचन ।
भीष्मेण दत्तमश्नामि न त्वया राजसत्तम ॥ १३
नाहं त्वत्तोऽभिकाङ्क्षिष्ये वृत्त्युपायं जनाधिप ।
यतो भीष्मस्ततो द्रोणो यद्भीष्मस्त्वाह तत्कुरु ॥ १४
दीयतां पाण्डुपुत्रेभ्यो राज्यार्धमरिकर्शन ।
सममाचार्यकं तात तव तेषां च मे सदा ॥ १५
अश्वत्थामा यथा मह्यं तथा श्वेतहयो मम ।

बहुना किं प्रलापेन यतो धर्मस्ततो जयः ॥ १६
एवमुक्ते महाराज द्रोणेनामिततेजसा ।
व्याजहार ततो वाक्यं विदुरः सत्यसंगरः ।
पितुर्वदनमन्वीक्ष्य परिवृत्य च धर्मवित् ॥ १७
देवव्रत निबोधेदं वचनं मम भाषतः ।
प्रनष्टः कौरवो वंशस्त्वयायं पुनरुद्धृतः ॥ १८
यन्मे विलपमानस्य वचनं समुपेक्षसे ।
कोऽयं दुर्योधनो नाम कुलेऽस्मिन्कुलपांसनः ॥१९
यस्य लोभाभिभूतस्य मतिं समनुवर्तसे ।
अनार्यस्याकृतज्ञस्य लोभोपहतचेतसः ।
अतिक्रामति यः शास्त्रं पितुर्धर्मार्थदर्शिनः ॥ २०
एते नश्यन्ति कुरवो दुर्योधनकृतेन वै ।
यथा ते न प्रणश्येयुर्महाराज तथा कुरु ॥ २१
मां चैव धृतराष्ट्रं च पूर्वमेव महाद्युते ।
चित्रकार इवालेख्यं कृत्वा मा स्म विनाशय ।
प्रजापतिः प्रजाः सृष्ट्वा यथा संहरते तथा ॥ २२
नोपेक्षस्व महाबाहो पश्यमानः कुलक्षयम् ।
अथ तेऽद्य मतिर्नष्टा विनाशे प्रत्युपस्थिते ।
वनं गच्छ मया सार्धं धृतराष्ट्रेण चैव ह ॥ २३
बद्ध्वा वा निकृतिप्रज्ञं धार्तराष्ट्रं सुदुर्मतिम् ।
साध्विदं राज्यमद्यास्तु पाण्डवैरभिरक्षितम् ॥२४
प्रसीद राजशार्दूल विनाशो दृश्यते महान् ।
पाण्डवानां कुरूणां च राज्ञां चामिततेजसाम् ॥ २५
विरराामैवमुक्त्वा तु विदुरो दीनमानसः ।
प्रध्यायमानः स तदा निःश्वसंश्च पुनः पुनः ॥ २६

ततोऽथ राज्ञः सुबलस्य पुत्री
धर्मार्थयुक्तं कुलनाशभीता ।
दुर्योधनं पापमतिं नृशंसं
राज्ञां समक्षं सुतमाह कोपात् ॥ २७
ये पार्थिवा राजसभां प्रविष्टा
ब्रह्मर्षयो ये च सभासदोऽन्ये ।
शृण्वन्तु वक्ष्यामि तवापराधं
पापस्य सामात्यपरिच्छदस्य ॥ २८
राज्यं कुरूणामनुपूर्वभोग्यं
क्रमागतो नः कुलधर्म एषः ।
त्वं पापबुद्धेऽतिनृशंसकर्म-
न्राज्यं कुरूणामनयाद्विहंसि ॥ २९
राज्ये स्थितो धृतराष्ट्रो मनीषी
तस्यानुजो विदुरो दीर्घदर्शी ।
एतावतिक्रम्य कथं नृपत्वं
दुर्योधन प्रार्थयसेऽद्य मोहात् ॥ ३०
राजा च क्षत्ता च महानुभावौ
भीष्मे स्थिते परवन्तौ भवेताम् ।
अयं तु धर्मज्ञतया महात्मा
न राज्यकामो नृवरो नदीजः ॥ ३१
राज्यं तु पाण्डोरिदमप्रधृष्यं
तस्याद्य पुत्राः प्रभवन्ति नान्ये ।
राज्यं तदेतन्निखिलं पाण्डवानां
पैतामहं पुत्रपौत्रानुगामि ॥ ३२
यद्वै ब्रूते कुरुमुख्यो महात्मा
देवव्रतः सत्यसंधो मनीषी ।
सर्वं तदस्माभिरहत्य धर्मं
ग्राह्यं स्वधर्मं परिपालयद्भिः ॥ ३३
अनुज्ञया चाथ महाव्रतस्य
ब्रूयान्नृपो यद्विदुरस्तथैव ।
कार्यं भवेत्तत्सुहृद्भिर्नियुज्य
धर्मं पुरस्कृत्य सुदीर्घकालम् ॥ ३४
न्यायागतं राज्यमिदं कुरूणां
युधिष्ठिरः शास्तु वै धर्मपुत्रः ।
प्रचोदितो धृतराष्ट्रेण राज्ञा

पुरस्कृतः शांतनवेन चैव ॥ ३५

इति श्रीमहाभारते उद्योगपर्वणि
षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥

१४७

वासुदेव उवाच ।

एवमुक्ते तु गान्धार्या धृतराष्ट्रो जनेश्वरः ।
दुर्योधनमुवाचेदं नृपमध्ये जनाधिप ॥ १
दुर्योधन निबोधेदं यत्त्वां वक्ष्यामि पुत्रक ।
तथा तत्कुरु भद्रं ते यद्यस्ति पितृगौरवम् ॥ २
सोमः प्रजापतिः पूर्वं कुरूणां वंशवर्धनः ।
सोमाद्बभूव षष्ठो वै ययातिर्नहुषात्मजः ॥ ३
तस्य पुत्रा बभूवुश्च पञ्च राजर्षिसत्तमाः ।
तेषां यदुर्महातेजा ज्येष्ठः समभवत्प्रभुः ॥ ४
पूरुर्यवीयांश्च ततो योऽस्माकं वंशवर्धनः ।
शर्मिष्ठायाः संप्रसूतो दुहितुर्वृषपर्वणः ॥ ५
यदुश्च भरतश्रेष्ठ देवयान्याः सुतोऽभवत् ।
दौहित्रस्तात शुक्रस्य काव्यस्यामिततेजसः ॥ ६
यादवानां कुलकरो बलवान्वीर्यसंमतः ।
अवमेने स तु क्षत्रं दर्पपूर्णः सुमन्दधीः ॥ ७
न चातिष्ठत्पितुः शास्त्रे बलदर्पविमोहितः ।
अवमेने च पितरं भ्रातॄंश्चाप्यपराजितः ॥ ८
पृथिव्यां चतुरन्तायां यदुरेवाभवद्बली ।
वशे कृत्वा स नृपतीनवसन्नागसाह्वये ॥ ९
तं पिता परमक्रुद्धो ययातिर्नहुषात्मजः ।
शशाप पुत्रं गान्धारे राज्याच्च व्यपरोपयत् ॥ १०
ये चैनमन्ववर्तन्त भ्रातरो बलदर्पितम् ।
शशाप तानपि क्रुद्धो ययातिस्तनयानथ ॥ ११
यवीयांसं ततः पूरुं पुत्रं स्ववशवर्तिनम् ।
राज्ये निवेशयामास विधेयं नृपसत्तमः ॥ १२
एवं ज्येष्ठोऽप्यथोत्सिक्तो न राज्यमभिजायते ।
यवीयांसोऽभिजायन्ते राज्यं वृद्धोपसेवया ॥ १३
तथैव सर्वधर्मज्ञः पितुर्मम पितामहः ।
प्रतीपः पृथिवीपालस्त्रिषु लोकेषु विश्रुतः ॥ १४
तस्य पार्थिवसिंहस्य राज्यं धर्मेण शासतः ।
त्रयः प्रजज्ञिरे पुत्रा देवकल्पा यशस्विनः ॥ १५
देवापिरभवज्ज्येष्ठो बाह्लीकस्तदनन्तरम् ।
तृतीयः शंतनुस्तात धृतिमान्मे पितामहः ॥ १६
देवापिस्तु महातेजास्त्वग्दोषी राजसत्तमः ।
धार्मिकः सत्यवादी च पितुः शुश्रूषणे रतः ॥ १७
पौरजानपदानां च संमतः साधुसत्कृतः ।
सर्वेषां बालवृद्धानां देवापिर्हृदयंगमः ॥ १८
प्राज्ञश्च सत्यसंधश्च सर्वभूतहिते रतः ।
वर्तमानः पितुः शास्त्रे ब्राह्मणानां तथैव च ॥ १९
बाह्लीकस्य प्रियो भ्राता शंतनोश्च महात्मनः ।
सौभ्रात्रं च परं तेषां सहितानां महात्मनाम् ॥२०
अथ कालस्य पर्याये वृद्धो नृपतिसत्तमः ।
संभारानभिषेकार्थं कारयामास शास्त्रतः ।
मङ्गलानि च सर्वाणि कारयामास चाभिभूः ॥२१
तं ब्राह्मणाश्च वृद्धाश्च पौरजानपदैः सह ।
सर्वे निवारयामासुर्देवापेरभिषेचनम् ॥ २२
स तच्छ्रुत्वा तु नृपतिरभिषेकनिवारणम् ।
अश्रुकण्ठोऽभवद्राजा पर्यशोचत चात्मजम् ॥ २३
एवं वदान्यो धर्मज्ञः सत्यसंधश्च सोऽभवत् ।
प्रियः प्रजानामपि संस्त्वग्दोषेण प्रदूषितः ॥ २४
हीनाङ्गं पृथिवीपालं नाभिनन्दन्ति देवताः ।
इति कृत्वा नृपश्रेष्ठं प्रत्यषेधन्द्विजर्षभाः ॥ २५
ततः प्रव्यथितात्मासौ पुत्रशोकसमन्वितः ।
ममार तं मृतं दृष्ट्वा देवापिः संश्रितो वनम् ॥ २६
बाह्लीको मातुलकुले त्यक्त्वा राज्यं व्यवस्थितः ।
पितृभ्रातॄन्परित्यज्य प्राप्तवान्पुरमृद्धिमत् ॥ २७

बाह्लीकेन त्वनुज्ञातः शंतनुर्लोकविश्रुतः ।
पितर्युपरते राजन्राजा राज्यमकारयत् ॥ २८
तथैवाहं मतिमता परिचिन्त्येह पाण्डुना ।
ज्येष्ठः प्रभ्रंशितो राज्याद्धीनाङ्ग इति भारत ॥ २९
पाण्डुस्तु राज्यं संप्राप्तः कनीयानपि सन्नृपः ।
विनाशे तस्य पुत्राणामिदं राज्यमरिंदम ।
मय्यभागिनि राज्याय कथं त्वं राज्यमिच्छसि ॥ ३०

युधिष्ठिरो राजपुत्रो महात्मा
न्यायागतं राज्यमिदं च तस्य ।
स कौरवस्यास्य जनस्य भर्ता
प्रशासिता चैव महानुभावः ॥ ३१
स सत्यसंधः सततप्रमत्तः
शास्त्रे स्थितो बन्धुजनस्य साधुः ।
प्रियः प्रजानां सुहृदानुकम्पी
जितेन्द्रियः साधुजनस्य भर्ता ॥ ३२
क्षमा तितिक्षा दम आर्जवं च
सत्यव्रतत्वं श्रुतमप्रमादः ।
भूतानुकम्पा ह्यनुशासनं च
युधिष्ठिरे राजगुणाः समस्ताः ॥ ३३
अराजपुत्रस्त्वमनार्यवृत्तो
लुब्धस्तथा बन्धुषु पापबुद्धिः ।
क्रमागतं राज्यमिदं परेषां
हर्तुं कथं शक्ष्यसि दुर्विनीतः ॥ ३४
प्रयच्छ राज्यार्धमपेतमोहः
सवाहनं त्वं सपरिच्छदं च ।
ततोऽवशेषं तव जीवितस्य
सहानुजस्यैव भवेन्नरेन्द्र ॥ ३५

इति श्रीमहाभारते उद्योगपर्वणि
सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥

१४८

वासुदेव उवाच ।

एवमुक्ते तु भीष्मेण द्रोणेन विदुरेण च ।
गान्धार्या धृतराष्ट्रेण न च मन्दोऽन्वबुध्यत ॥ १
अवधूयोत्थितः क्रुद्धो रोषात्संरक्तलोचनः ।
अन्वद्रवन्त तं पश्चाद्राजानस्त्यक्तजीविताः ॥ २
आज्ञापयच्च राज्ञस्तान्पार्थिवान्दुष्टचेतसः ।
प्रयाध्वं वै कुरुक्षेत्रं पुष्योऽद्येति पुनः पुनः ॥ ३
ततस्ते पृथिवीपालाः प्रययुः सहसैनिकाः ।
भीष्मं सेनापतिं कृत्वा संहृष्टाः कालचोदिताः ॥ ४
अक्षौहिण्यो दशैका च पार्थिवानां समागताः ।
तासां प्रमुखतो भीष्मस्तालकेतुर्व्यरोचत ।
यदत्र युक्तं प्राप्तं च तद्विधत्स्व विशां पते ॥ ५
उक्तं भीष्मेण यद्वाक्यं द्रोणेन विदुरेण च ।
गान्धार्या धृतराष्ट्रेण समक्षं मम भारत ।
एतत्ते कथितं राजन्यद्वृत्तं कुरुसंसदि ॥ ६
साम आदौ प्रयुक्तं मे राजन्सौभ्रात्रमिच्छता ।
अभेदात्कुरुवंशस्य प्रजानां च विवृद्धये ॥ ७
पुनर्भेदश्च मे युक्तो यदा साम न गृह्यते ।
कर्मानुकीर्तनं चैव देवमानुषसंहितम् ॥ ८
यदा नाद्रियते वाक्यं सामपूर्वं सुयोधनः ।
तदा मया समानीय भेदिताः सर्वपार्थिवाः ॥ ९
अद्भुतानि च घोराणि दारुणानि च भारत ।
अमानुषाणि कर्माणि दर्शितानि च मे विभो ॥ १०
भर्त्सयित्वा तु राज्ञस्तांस्तृणीकृत्य सुयोधनम् ।
राधेयं भीषयित्वा च सौबलं च पुनः पुनः ॥ ११
न्यूनतां धार्तराष्ट्राणां निन्दां चैव पुनः पुनः ।
भेदयित्वा नृपान्सर्वान्वाग्भिर्मन्त्रेण चासकृत् ॥ १२
पुनः सामाभिसंयुक्तं संप्रदानमथाब्रुवम् ।
अभेदात्कुरुवंशस्य कार्ययोगात्तथैव च ॥ १३

ते बाला धृतराष्ट्रस्य भीष्मस्य विदुरस्य च ।
तिष्ठेयुः पाण्डवाः सर्वे हित्वा मानमधश्चराः ॥ १४
प्रयच्छन्तु च ते राज्यमनीशास्ते भवन्तु च ।
यथाह राजा गाङ्गेयो विदुरश्च तथास्तु तत् ॥ १५
सर्वं भवतु ते राज्यं पञ्च ग्रामान्विसर्जय ।
अवश्यं भरणीया हि पितुस्ते राजसत्तम ॥ १६
एवमुक्तस्तु दुष्टात्मा नैव भावं व्यमुञ्चत ।
दण्डं चतुर्थं पश्यामि तेषु पापेषु नान्यथा ॥ १७
निर्याताश्च विनाशाय कुरुक्षेत्रं नराधिपाः ।
एतत्ते कथितं सर्वं यद्वृत्तं कुरुसंसदि ॥ १८
न ते राज्यं प्रयच्छन्ति विना युद्धेन पाण्डव ।
विनाशहेतवः सर्वे प्रत्युपस्थितमृत्यवः ॥ १९

इति श्रीमहाभारते उद्योगपर्वणि
अष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥

॥ समाप्तं कर्णोपनिवादपर्व ॥

१४९

वैशंपायन उवाच ।

जनार्दनवचः श्रुत्वा धर्मराजो युधिष्ठिरः ।
भ्रातॄनुवाच धर्मात्मा समक्षं केशवस्य ह ॥ १
श्रुतं भवद्भिर्यद्वृत्तं सभायां कुरुसंसदि ।
केशवस्यापि यद्वाक्यं तत्सर्वमवधारितम् ॥ २
तस्मात्सेनाविभागं मे कुरुध्वं नरसत्तमाः ।
अक्षौहिण्यस्तु सप्तैताः समेता विजयाय वै ॥ ३
तासां मे पतयः सप्त विख्यातास्तान्निबोधत ।
द्रुपदश्च विराटश्च धृष्टद्युम्नशिखण्डिनौ ॥ ४
सात्यकिश्चेकितानश्च भीमसेनश्च वीर्यवान् ।
एते सेनाप्रणेतारो वीराः सर्वे तनुत्यजः ॥ ५
सर्वे वेदविदः शूराः सर्वे सुचरितव्रताः ।
ह्रीमन्तो नीतिमन्तश्च सर्वे युद्धविशारदाः ।
इष्वस्त्रकुशलाश्चैव तथा सर्वास्त्रयोधिनः ॥ ६
सप्तानामपि यो नेता सेनानां प्रविभागवित् ।
यः सहेत रणे भीष्मं शरार्चिःपावकोपमम् ॥ ७
त्वं तावत्सहदेवात्र प्रब्रूहि कुरुनन्दन ।
स्वमतं पुरुषव्याघ्र को नः सेनापतिः क्षमः ॥ ८

सहदेव उवाच ।

संयुक्त एकदुःखश्च वीर्यवांश्च महीपतिः ।
यं समाश्रित्य धर्मज्ञं स्वमंशमनुयुञ्ज्महे ॥ ९
मत्स्यो विराटो बलवान्कृतास्त्रो युद्धदुर्मदः ।
प्रसहिष्यति संग्रामे भीष्मं तांश्च महारथान् ॥ १०

वैशंपायन उवाच ।

तथोक्ते सहदेवेन वाक्ये वाक्यविशारदः ।
नकुलोऽनन्तरं तस्मादिदं वचनमाददे ॥ ११
वयसा शास्त्रतो धैर्यात्कुलेनाभिजनेन च ।
ह्रीमान्कुलान्वितः श्रीमान्सर्वशास्त्रविशारदः ॥ १२
वेद चास्त्रं भरद्वाजाद्दुर्धर्षः सत्यसंगरः ।
यो नित्यं स्पर्धते द्रोणं भीष्मं चैव महाबलम् ॥ १३
श्लाघ्यः पार्थिवसंघस्य प्रमुखे वाहिनीपतिः ।
पुत्रपौत्रैः परिवृतः शतशाख इव द्रुमः ॥ १४
यस्तताप तपो घोरं सदारः पृथिवीपतिः ।
रोषाद्द्रोणविनाशाय वीरः समितिशोभनः ॥ १५
पितेवास्मान्समाधत्ते यः सदा पार्थिवर्षभः ।
श्वशुरो द्रुपदोऽस्माकं सेनाग्रे प्रकर्षतु ॥ १६
स द्रोणभीष्मावायान्तौ सहेदिति मतिर्मम ।
स हि दिव्यास्त्रविद्राजा सखा चाङ्गिरसो नृपः ॥
माद्रीसुताभ्यामुक्ते तु स्वमते कुरुनन्दनः ।
वासविर्वासवसमः सव्यसाच्यब्रवीद्वचः ॥ १८
योऽयं तपःप्रभावेन ऋषिसंतोषणेन च ।
दिव्यः पुरुष उत्पन्नो ज्वालावर्णो महाबलः ॥ १९
धनुष्मान्कवची खड्गी रथमारुह्य दंशितः ।
दिव्यैर्हयवरैर्युक्तमग्निकुण्डात्समुत्थितः ॥ २०

गर्जन्निव महामेघो रथघोषेण वीर्यवान् ।
सिंहसंहननो वीरः सिंहविक्रान्तविक्रमः ॥ २१
सिंहोरस्को महाबाहुः सिंहवक्षा महाबलः ।
सिंहप्रगर्जनो वीरः सिंहस्कन्धो महाद्युतिः ॥ २२
सुभ्रूः सुदंष्ट्रः सुहनुः सुबाहुः सुमुखोऽकृशः ।
सुजत्रुः सुविशालाक्षः सुपादः सुप्रतिष्ठितः ॥ २३
अभेद्यः सर्वशस्त्राणां प्रभिन्न इव वारणः ।
जज्ञे द्रोणविनाशाय सत्यवादी जितेन्द्रियः ॥ २४
धृष्टद्युम्नमहं मन्ये सहेद्भीष्मस्य सायकान् ।
वज्राशनिसमस्पर्शान्दीप्तास्यानुरगानिव ॥ २५
यमदूतसमान्वेगे निपाते पावकोपमान् ।
रामेणाजौ विषहितान्वज्रनिष्पेषदारुणान् ॥ २६
पुरुषं तं न पश्यामि यः सहेत महाव्रतम् ।
धृष्टद्युम्नमृते राजन्निति मे धीयते मतिः ॥ २७
क्षिप्रहस्तश्चित्रयोधी मतः सेनापतिर्मम ।
अभेद्यकवचः श्रीमान्मातङ्ग इव यूथपः ॥ २८

भीम उवाच ।

वधार्थं यः समुत्पन्नः शिखण्डी द्रुपदात्मजः ।
वदन्ति सिद्धा राजेन्द्र ऋषयश्च समागताः ॥ २९
यस्य संग्राममध्येषु दिव्यमस्त्रं विकुर्वतः ।
रूपं द्रक्ष्यन्ति पुरुषा रामस्येव महात्मनः ॥ ३०
न तं युद्धेषु पश्यामि यो विभिन्द्याच्छिखण्डिनम् ।
शस्त्रेण समरे राजन्संनद्धं स्यन्दने स्थितम् ॥ ३१
द्वैरथे विषहेन्नान्यो भीष्मं राजन्महाव्रतम् ।
शिखण्डिनमृते वीरं स मे सेनापतिर्मतः ॥ ३२

युधिष्ठिर उवाच ।

सर्वस्य जगतस्तात सारासारं बलाबलम् ।
सर्वं जानाति धर्मात्मा गतमेष्यच्च केशवः ॥ ३३
यमाह कृष्णो दाशार्हः सोऽस्तु नो वाहिनीपतिः ।
कृतास्त्रो ह्यकृतास्त्रो वा वृद्धो वा यदि वा युवा ॥ ३४
एष नो विजये मूलमेष तात विपर्यये ।
अत्र प्राणाश्च राज्यं च भावाभावौ सुखासुखे ॥ ३५
एष धाता विधाता च सिद्धिरत्र प्रतिष्ठिता ।
यमाह कृष्णो दाशार्हः स नः सेनापतिः क्षमः ।
ब्रवीतु वदतां श्रेष्ठो निशा समतिवर्तते ॥ ३६
ततः सेनापतिं कृत्वा कृष्णस्य वशवर्तिनम् ।
रात्रिशेषे व्यतिक्रान्ते प्रयास्यामो रणाजिरम् ।
अधिवासितशस्त्राश्च कृतकौतुकमङ्गलाः ॥ ३७

वैशंपायन उवाच ।

तस्य तद्वचनं श्रुत्वा धर्मराजस्य धीमतः ।
अब्रवीत्पुण्डरीकाक्षो धनंजयमवेक्ष्य ह ॥ ३८
ममाप्येते महाराज भवद्भिर्य उदाहृताः ।
नेतारस्तव सेनायाः शूरा विक्रान्तयोधिनः ।
सर्व एते समर्था हि तव शत्रून्प्रमर्दितुम् ॥ ३९
इन्द्रस्यापि भयं ह्येते जनयेयुर्महाहवे ।
किं पुनर्धार्तराष्ट्राणां लुब्धानां पापचेतसाम् ॥ ४०
मयापि हि महाबाहो त्वत्प्रियार्थमरिंदम ।
कृतो यत्नो महांस्तत्र शमः स्यादिति भारत ।
धर्मस्य गतमानृण्यं न स्म वाच्या विवक्षताम् ॥ ४१
कृतार्थं मन्यते बालः सोऽऽत्मानमविचक्षणः ।
धार्तराष्ट्रो बलस्थं च मन्यतेऽऽत्मानमातुरः ॥ ४२
युज्यतां वाहिनी साधु वधसाध्या हि ते मताः ।
न धार्तराष्ट्राः शक्ष्यन्ति स्थातुं दृष्ट्वा धनंजयम् ॥ ४३
भीमसेनं च संक्रुद्धं यमौ चापि यमोपमौ ।
युयुधानद्वितीयं च धृष्टद्युम्नममर्षणम् ॥ ४४
अभिमन्युं द्रौपदेयान्विराटद्रुपदावपि ।
अक्षौहिणीपतींश्चान्यान्नरेन्द्रान्दृढविक्रमान् ॥ ४५
सारवद्बलमस्माकं दुष्प्रधर्षं दुरासदम् ।
धार्तराष्ट्रबलं संख्ये वधिष्यति न संशयः ॥ ४६
एवमुक्ते तु कृष्णेन संप्रहृष्यन्नरोत्तमाः ।

तेषां प्रहृष्टमनसां नादः समभवन्महान् ।। ४७
योग इत्यथ सैन्यानां त्वरतां संप्रधावताम् ।
हयवारणशब्दश्च नेमिघोषश्च सर्वशः ।
शङ्खदुन्दुभिनिर्घोषस्तुमुलः सर्वतोऽभवत् ।। ४८
प्रयास्यतां पाण्डवानां ससैन्यानां समन्ततः ।
गङ्गेव पूर्णा दुर्धर्षा समदृश्यत वाहिनी ।। ४९
अग्रानीके भीमसेनो माद्रीपुत्रौ च दंशितौ ।
सौभद्रो द्रौपदेयाश्च धृष्टद्युम्नश्च पार्षतः ।
प्रभद्रकाश्च पाञ्चाला भीमसेनमुखा ययुः ।। ५०
ततः शब्दः समभवत्समुद्रस्येव पर्वणि ।
हृष्टानां संप्रयातानां घोषो दिवमिवास्पृशत् ।। ५१
प्रहृष्टा दंशिता योधाः परानीकविदारणाः ।
तेषां मध्ये ययौ राजा कुन्तीपुत्रो युधिष्ठिरः ।। ५२
शकटापणवेशाश्च यानयुग्यं च सर्वशः ।
कोशयन्त्रायुधं चैव ये च वैद्याश्चिकित्सकाः ।। ५३
फल्गु यच्च बलं किंचित्तथैव कृशदुर्बलम् ।
तत्संगृह्य ययौ राजा ये चापि परिचारकाः ।। ५४
उपप्लव्ये तु पाञ्चाली द्रौपदी सत्यवादिनी ।
सह स्त्रीभिर्निववृते दासीदाससमावृता ।। ५५
कृत्वा मूलप्रतीकारान्गुल्मैः स्थावरजङ्गमैः ।
स्कन्धावारेण महता प्रययुः पाण्डुनन्दनाः ।। ५६
ददतो गां हिरण्यं च ब्राह्मणैरभिसंवृताः ।
स्तूयमाना ययू राजन्रथैर्मणिविभूषितैः ।। ५७
केकया धृष्टकेतुश्च पुत्रः काश्यस्य चाभिभूः ।
श्रेणिमान्वसुदानश्च शिखण्डी चापराजितः ।। ५८
हृष्टास्तुष्टाः कवचिनः सशस्त्राः समलंकृताः ।
राजानमन्वयुः सर्वे परिवार्य युधिष्ठिरम् ।। ५९
जघनार्धे विराटश्च यज्ञसेनश्च सोमकिः ।
सुधर्मा कुन्तिभोजश्च धृष्टद्युम्नस्य चात्मजाः ।। ६०
रथायुतानि चत्वारि हयाः पञ्चगुणास्ततः ।
पत्तिसैन्यं दशगुणं सादिनामयुतानि षट् ।। ६१
अनाधृष्टिश्चेकितानश्चेदिराजोऽथ सात्यकिः ।
परिवार्य ययुः सर्वे वासुदेवधनंजयौ ।। ६२
आसाद्य तु कुरुक्षेत्रं व्यूढानीकाः प्रहारिणः ।
पाण्डवाः समदृश्यन्त नर्दन्तो वृषभा इव ।। ६३
तेऽवगाह्य कुरुक्षेत्रं शङ्खान्दध्मुररिंदमाः ।
तथैव दध्मतुः शङ्खौ वासुदेवधनंजयौ ।। ६४
पाञ्चजन्यस्य निर्घोषं विस्फूर्जितमिवाशनेः ।
निशम्य सर्वसैन्यानि समहृष्यन्त सर्वशः ।। ६५
शङ्खदुन्दुभिसंसृष्टः सिंहनादस्तरस्विनाम् ।
पृथिवीं चान्तरिक्षं च सागरांश्चान्वनादयत् ।। ६६
ततो देशे समे स्निग्धे प्रभूतयवसेन्धने ।
निवेशयामास तदा सेनां राजा युधिष्ठिरः ।। ६७
परिहृत्य श्मशानानि देवतायतनानि च ।
आश्रमांश्च महर्षीणां तीर्थान्यायतनानि च ।। ६८
मधुरानूषरे देशे शिवे पुण्ये महीपतिः ।
निवेशं कारयामास कुन्तीपुत्रो युधिष्ठिरः ।। ६९
ततश्च पुनरुत्थाय सुखी विश्रान्तवाहनः ।
प्रययौ पृथिवीपालैर्वृतः शतसहस्रशः ।। ७०
विद्राव्य शतशो गुल्मान्धार्तराष्ट्रस्य सैनिकान् ।
पर्यक्रामत्समन्ताच्च पार्थेन सह केशवः ।। ७१
शिबिरं मापयामास धृष्टद्युम्नश्च पार्षतः ।
सात्यकिश्च रथोदारो युयुधानः प्रतापवान् ।। ७२
आसाद्य सरितं पुण्यां कुरुक्षेत्रे हिरण्वतीम् ।
सूपतीर्थां शुचिजलां शर्करापङ्कवर्जिताम् ।। ७३
खानयामास परिखां केशवस्तत्र भारत ।
गुप्त्यर्थमपि चादिश्य बलं तत्र न्यवेशयत् ।। ७४
विधिर्यः शिबिरस्यासीत्पाण्डवानां महात्मनाम् ।
तद्विधानि नरेन्द्राणां कारयामास केशवः ।। ७५
प्रभूतजलकाष्ठानि दुराधर्षतराणि च ।

भक्ष्यभोज्योपपन्नानि शतशोऽथ सहस्रशः ॥ ७६
शिबिराणि महार्हाणि राज्ञां तत्र पृथक्पृथक् ।
विमानानीव राजेन्द्र निविष्टानि महीतले ॥ ७७
तत्रासञ्शिल्पिनः प्राज्ञाः शतशो दत्तवेतनाः ।
सर्वोपकरणैर्युक्ता वैद्याश्च सुविशारदाः ॥ ७८
ज्याधनुर्वर्मशस्त्राणां तथैव मधुसर्पिषोः ।
ससर्जरसपांसूनां राशयः पर्वतोपमाः ॥ ७९
बहूदकं सुयवसं तुषाङ्गारसमन्वितम् ।
शिबिरे शिबिरे राजा संचकार युधिष्ठिरः ॥ ८०
महायन्त्राणि नाराचास्तोमरर्ष्टिपरश्वधाः ।
धनूंषि कवचादीनि हृद्यभूवन्नृणां तदा ॥ ८१
गजाः कङ्कटसंनाहा लोहवर्मोत्तरच्छदाः ।
अदृश्यंस्तत्र गिर्याभाः सहस्रशतयोधिनः ॥ ८२
निविष्टान्पाण्डवांस्तत्र ज्ञात्वा मित्राणि भारत ।
अभिसस्रुर्यथोद्देशं सबलाः सहवाहनाः ॥ ८३
चरितब्रह्मचर्यास्ते सोमपा भूरिदक्षिणाः ।
जयाय पाण्डुपुत्राणां समाजग्मुर्महीक्षितः ॥ ८४

इति श्रीमहाभारते उद्योगपर्वणि
एकोनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥

१५०

जनमेजय उवाच ।

युधिष्ठिरं सहानीकमुपयान्तं युयुत्सया ।
संनिविष्टं कुरुक्षेत्रे वासुदेवेन पालितम् ॥ १
विराटद्रुपदाभ्यां च सपुत्राभ्यां समन्वितम् ।
केकयैर्वृष्णिभिश्चैव पार्थिवैः शतशो वृतम् ॥ २
महेन्द्रमिव चादित्यैरभिगुप्तं महारथैः ।
श्रुत्वा दुर्योधनो राजा किं कार्यं प्रत्यपद्यत ॥ ३
एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधन ।
संभ्रमे तुमुले तस्मिन्यदासीत्कुरुजाङ्गले ॥ ४
व्यथयेयुर्हि देवानां सेनामपि समागमे ।
पाण्डवा वासुदेवश्च विराटद्रुपदौ तथा ॥ ५
धृष्टद्युम्नश्च पाञ्चाल्यः शिखण्डी च महारथः ।
युयुधानश्च विक्रान्तो देवैरपि दुरासदः ॥ ६
एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधन ।
कुरूणां पाण्डवानां च यद्यदासीद्विचेष्टितम् ॥ ७

वैशंपायन उवाच ।

प्रतियाते तु दाशार्हे राजा दुर्योधनस्तदा ।
कर्णं दुःशासनं चैव शकुनिं चाब्रवीदिदम् ॥ ८
अकृतेनैव कार्येण गतः पार्थानधोक्षजः ।
स एनान्मन्युनाविष्टो ध्रुवं वक्ष्यत्यसंशयम् ॥ ९
इष्टो हि वासुदेवस्य पाण्डवैर्मम विग्रहः ।
भीमसेनार्जुनौ चैव दाशार्हस्य मते स्थितौ ॥ १०
अजातशत्रुरप्यद्य भीमार्जुनवशानुगः ।
निकृतश्च मया पूर्वं सह सर्वैः सहोदरैः ॥ ११
विराटद्रुपदौ चैव कृतवैरौ मया सह ।
तौ च सेनाप्रणेतारौ वासुदेववशानुगौ ॥ १२
भविता विग्रहः सोऽयं तुमुलो लोमहर्षणः ।
तस्मात्सांग्रामिकं सर्वं कारयध्वमतन्द्रिताः ॥ १३
शिबिराणि कुरुक्षेत्रे क्रियन्तां वसुधाधिपाः ।
सुपर्याप्तावकाशानि दुरादेयानि शत्रुभिः ॥ १४
आसन्नजलकाष्ठानि शतशोऽथ सहस्रशः ।
अच्छेद्याहारमार्गाणि रत्नोच्चयचितानि च ।
विविधायुधपूर्णानि पताकाध्वजवन्ति च ॥ १५
समाश्च तेषां पन्थानः क्रियन्तां नगराद्बहिः ।
प्रयाणं घुष्यतामद्य श्वोभूत इति माचिरम् ॥ १६
ते तथेति प्रतिज्ञाय श्वोभूते चक्रिरे तथा ।
हृष्टरूपा महात्मानो विनाशाय महीक्षिताम् ॥ १७
ततस्ते पार्थिवाः सर्वे तच्छ्रुत्वा राजशासनम् ।
आसनेभ्यो महार्हेभ्य उदतिष्ठन्नमर्षिताः ॥ १८
बाहून्परिघसंकाशान्संस्पृशन्तः शनैः शनैः ।

काञ्चनाङ्गददीप्तांश्च चन्दनागरुभूषितान् ॥ १९
उष्णीषाणि नियच्छन्तः पुण्डरीकनिभैः करैः ।
अन्तरीयोत्तरीयाणि भूषणानि च सर्वशः ॥ २०
ते रथान्रथिनः श्रेष्ठा हयांश्च हयकोविदाः ।
सज्जयन्ति स्म नागांश्च नागशिक्षासु निष्ठिताः ॥
अथ वर्माणि चित्राणि काञ्चनानि बहूनि च ।
विविधानि च शस्त्राणि चक्रुः सज्जानि सर्वशः ॥
पदातयश्च पुरुषाः शस्त्राणि विविधानि च ।
उपजह्रुः शरीरेषु हेमचित्राण्यनेकशः ॥ २३
तदुत्सव इवोदग्रं संप्रहृष्टनरावृतम् ।
नगरं धार्तराष्ट्रस्य भारतासीत्समाकुलम् ॥ २४
जनौघसलिलावर्तो रथनागाश्वमीनवान् ।
शङ्खदुन्दुभिनिर्घोषः कोशसंचयरत्नवान् ॥ २५
चित्राभरणवर्मोर्मिः शस्त्रनिर्मलफेनवान् ।
प्रासादमालाद्रिवृतो रथ्यापणमहाह्रदः ॥ २६
योधचन्द्रोदयोद्भूतः कुरुराजमहार्णवः ।
अदृश्यत तदा राजंश्चन्द्रोदय इवार्णवः ॥ २७

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥

१५१

वैशंपायन उवाच ।

वासुदेवस्य तद्वाक्यमनुस्मृत्य युधिष्ठिरः ।
पुनः पप्रच्छ वार्ष्णेयं कथं मन्दोऽब्रवीदिदम् ॥ १
अस्मिन्नभ्यागते काले किं च नः क्षममच्युत ।
कथं च वर्तमाना वै स्वधर्मान्न च्यवेमहि ॥ २
दुर्योधनस्य कर्णस्य शकुनेः सौबलस्य च ।
वासुदेव मतज्ञोऽसि मम सभ्रातृकस्य च ॥ ३
विदुरस्यापि ते वाक्यं श्रुतं भीष्मस्य चोभयोः ।
कुन्त्याश्च विपुलप्रज्ञ प्रज्ञा कार्त्स्न्येन ते श्रुता ॥ ४
सर्वमेतदतिक्रम्य विचार्य च पुनः पुनः ।
यन्नः क्षमं महाबाहो तद्ब्रवीह्यविचारयन् ॥ ५
श्रुत्वैतद्धर्मराजस्य धर्मार्थसहितं वचः ।
मेघदुन्दुभिनिर्घोषः कृष्णो वचनमब्रवीत् ॥ ६
उक्तवानस्मि यद्वाक्यं धर्मार्थसहितं हितम् ।
न तु तन्निकृतिप्रज्ञे कौरव्ये प्रतितिष्ठति ॥ ७
न च भीष्मस्य दुर्मेधाः शृणोति विदुरस्य वा ।
मम वा भाषितं किंचित्सर्वमेवातिवर्तते ॥ ८
न स कामयते धर्मं न स कामयते यशः ।
जितं स मन्यते सर्वं दुरात्मा कर्णमाश्रितः ॥ ९
बन्धमाज्ञापयामास मम चापि सुयोधनः ।
न च तं लब्धवान्कामं दुरात्मा शासनातिगः ॥
न च भीष्मो न च द्रोणो युक्तं तत्राहतुर्वचः ।
सर्वे तमनुवर्तन्ते ऋते विदुरमच्युत ॥ ११
शकुनिः सौबलश्चैव कर्णदुःशासनावपि ।
त्वय्ययुक्तान्यभाषन्त मूढा मूढममर्षणम् ॥ १२
किं च तेन मयोक्तेन यान्यभाषन्त कौरवाः ।
संक्षेपेण दुरात्मासौ न युक्तं त्वयि वर्तते ॥ १३
न पार्थिवेषु सर्वेषु य इमे तव सैनिकाः ।
यत्पापं यन्न कल्याणं सर्वं तस्मिन्प्रतिष्ठितम् ॥ १४
न चापि वयमत्यर्थं परित्यागेन कर्हिचित् ।
कौरवैः शममिच्छामस्तत्र युद्धमनन्तरम् ॥ १५
तच्छ्रुत्वा पार्थिवाः सर्वे वासुदेवस्य भाषितम् ।
अब्रुवन्तो मुखं राज्ञः समुदैक्षन्त भारत ॥ १६
युधिष्ठिरस्त्वभिप्रायमुपलभ्य महीक्षिताम् ।
योगमाज्ञापयामास भीमार्जुनयमैः सह ॥ १७
ततः किलकिलाभूतमनीकं पाण्डवस्य ह ।
आज्ञापिते तदा योगे समहृष्यन्त सैनिकाः ॥ १८
अवध्यानां वधं पश्यन्धर्मराजो युधिष्ठिरः ।
निष्टनन्भीमसेनं च विजयं चेदमब्रवीत् ॥ १९
यदर्थं वनवासश्च प्राप्तं दुःखं च यन्मया ।

सोऽयमस्मानुपैत्येव परोऽनर्थः प्रयत्नतः ॥ २०
यस्मिन्यत्नः कृतोऽस्माभिः स नो हीनः प्रयत्नतः।
अकृते तु प्रयत्नेऽस्मानुपावृत्तः कलिर्महान् ॥ २१
कथं ह्यवध्यैः संग्रामः कार्यः सह भविष्यति ।
कथं हत्वा गुरून्वृद्धान्विजयो नो भविष्यति ॥ २२
तच्छ्रुत्वा धर्मराजस्य सव्यसाची परंतपः ।
यदुक्तं वासुदेवेन श्रावयामास तद्वचः ॥ २३
उक्तवान्देवकीपुत्रः कुन्त्याश्च विदुरस्य च ।
वचनं तत्त्वया राजन्निखिलेनावधारितम् ॥ २४
न च तौ वक्ष्यतोऽधर्ममिति मे नैष्ठिकी मतिः ।
न चापि युक्तं कौन्तेय निवर्तितुमयुध्यतः ॥ २५
तच्छ्रुत्वा वासुदेवोऽपि सव्यसाचिवचस्तदा ।
स्मयमानोऽब्रवीत्पार्थमेवमेतदिति ब्रुवन् ॥ २६
ततस्ते धृतसंकल्पा युद्धाय सहसैनिकाः ।
पाण्डवेया महाराज तां रात्रिं सुखमावसन् ॥ २७

इति श्रीमहाभारते उद्योगपर्वणि
एकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥

१५२

वैशंपायन उवाच ।

व्युषितायां रजन्यां तु राजा दुर्योधनस्ततः ।
व्यभजत्तान्यनीकानि दश चैकं च भारत ॥ १
नरहस्तिरथाश्वानां सारं मध्यं च फल्गु च ।
सर्वेष्वेतेष्वनीकेषु संदिदेश महीपतिः ॥ २
सानुकर्षाः सतूणीराः सवरूथाः सतोमराः ।
सोपासङ्गाः सशक्तीकाः सनिषङ्गाः सपोथिकाः ॥३
सध्वजाः सपताकाश्च सशरासनतोमराः ।
रज्जुभिश्च विचित्राभिः सपाशाः सपरिस्तराः ॥ ४
सकचग्रहविक्षेपाः सतैलगुडवालुकाः ।
साशीविषघटाः सर्वे ससर्जरसपांसवः ॥ ५
सघण्टाफलकाः सर्वे वासीवृक्षादनान्विताः ।
व्याघ्रचर्मपरीवारा वृताश्च द्वीपिचर्मभिः ॥ ६
सवस्तयः सशृङ्गाश्च सप्रासविविधायुधाः ।
सकुठाराः सकुद्दालाः सतैलक्षौमसर्पिषः ॥ ७
चित्रानीकाः सुवपुषो ज्वलिता इव पावकाः ।
तथा कवचिनः शूराः शस्त्रेषु कृतनिश्रमाः ॥ ८
कुलीना हययोनिज्ञाः सारथ्ये विनिवेशिताः ।
बद्धारिष्टा बद्धकक्ष्या बद्धध्वजपताकिनः ॥ ९
चतुर्युजो रथाः सर्वे सर्वे शस्त्रसमायुताः ।
संहृष्टवाहनाः सर्वे सर्वे शतशरासनाः ॥ १०
धुर्ययोर्हययोरेकस्तथान्यौ पार्ष्णिसारथी ।
तौ चापि रथिनां श्रेष्ठौ रथी च हयवित्तथा ॥ ११
नगराणीव गुप्तानि दुरादेयानि शत्रुभिः ।
आसन्रथसहस्राणि हेममालीनि सर्वशः ॥ १२
यथा रथास्तथा नागा बद्धकक्ष्याः स्वलंकृताः ।
बभूवुः सप्त पुरुषा रत्नवन्त इवाद्रयः ॥ १३
द्वावङ्कुशधरौ तेषु द्वावुत्तमधनुर्धरौ ।
द्वौ वरासिधरौ राजन्नेकः शक्तिपताकधृक् ॥ १४
गजैर्मत्तैः समाकीर्णं सवर्मायुधकोशकैः ।
तद्बभूव बलं राजन्कौरव्यस्य सहस्रशः ॥ १५
विचित्रकवचामुक्तैः सपताकैः स्वलंकृतैः ।
सादिभिश्चोपसंपन्ना आसन्नयुतशो हयाः ॥ १६
सुसंग्राहाः सुसंतोषा हेमभाण्डपरिच्छदाः ।
अनेकशतसाहस्रास्ते च सादिवशे स्थिताः ॥ १७
नानारूपविकाराश्च नानाकवचशस्त्रिणः ।
पदातिनो नरास्तत्र बभूवुर्हेममालिनः ॥ १८
रथस्यासन्दश गजा गजस्य दश वाजिनः ।
नरा दश हयस्यासन्पादरक्षाः समन्ततः ॥ १९
रथस्य नागाः पञ्चाशन्नागस्यासञ्शतं हयाः ।
हयस्य पुरुषाः सप्त भिन्नसंधानकारिणः ॥ २०
सेना पञ्चशतं नागा रथास्तावन्त एव च ।

दशसेना च पृतना पृतना दश वाहिनी ॥ २१
वाहिनी पृतना सेना ध्वजिनी सादिनी चमूः ।
अक्षौहिणीति पर्यायैर्निरुक्ताथ वरूथिनी ।
एवं व्यूढान्यनीकानि कौरवेयेण धीमता ॥ २२
अक्षौहिण्यो दशैका च संख्याताः सप्त चैव ह ।
अक्षौहिण्यस्तु सप्तैव पाण्डवानामभूद्बलम् ।
अक्षौहिण्यो दशैका च कौरवाणामभूद्बलम् ॥ २३
नराणां पञ्चपञ्चाशदेषा पत्तिर्विधीयते ।
सेनामुखं च तिस्रस्ता गुल्म इत्यभिसंज्ञितः ॥ २४
दश गुल्मा गणस्त्वासीद्गणास्त्वयुतशोऽभवन् ।
दुर्योधनस्य सेनासु योत्स्यमानाः प्रहारिणः ॥ २५
तत्र दुर्योधनो राजा शूरान्बुद्धिमतो नरान् ।
प्रसमीक्ष्य महाबाहुश्चक्रे सेनापतींस्तदा ॥ २६
पृथगक्षौहिणीनां च प्रणेतॄन्नरसत्तमान् ।
विधिपूर्वं समानीय पार्थिवानभ्यषेचयत् ॥ २७
कृपं द्रोणं च शल्यं च सैन्धवं च महारथम् ।
सुदक्षिणं च काम्बोजं कृतवर्माणमेव च ॥ २८
द्रोणपुत्रं च कर्णं च भूरिश्रवसमेव च ।
शकुनिं सौबलं चैव बाह्लीकं च महारथम् ॥ २९
दिवसे दिवसे तेषां प्रतिवेलं स भारत ।
चक्रे स विविधाः संज्ञाः प्रत्यक्षं च पुनः पुनः ॥ ३०
तथा विनियताः सर्वे ये च तेषां पदानुगाः ।
बभूवुः सैनिका राजन्राज्ञः प्रियचिकीर्षवः ॥ ३१

इति श्रीमहाभारते उद्योगपर्वणि
द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥

॥ समाप्तमभिनिर्याणपर्व ॥

१५३

वैशंपायन उवाच ।

ततः शांतनवं भीष्मं प्राञ्जलिर्धृतराष्ट्रजः ।
सह सर्वैर्महीपालैरिदं वचनमब्रवीत् ॥ १
ऋते सेनाप्रणेतारं पृतना सुमहत्यपि ।
दीर्यते युद्धमासाद्य पिपीलिकपुटं यथा ॥ २
न हि जातु द्वयोर्बुद्धिः समा भवति कर्हिचित् ।
शौर्यं च नाम नेतॄणां स्पर्धते च परस्परम् ॥ ३
श्रूयते च महाप्राज्ञ हैहयानमितौजसः ।
अभ्ययुर्ब्राह्मणाः सर्वे समुच्छ्रितकुशध्वजाः ॥ ४
तानन्वयुस्तदा वैश्याः शूद्राश्चैव पितामह ।
एकतस्तु त्रयो वर्णा एकतः क्षत्रियर्षभाः ॥ ५
ते स्म युद्धेष्वभज्यन्त त्रयो वर्णाः पुनः पुनः ।
क्षत्रियास्तु जयन्त्येव बहुलं चैकतो बलम् ॥ ६
ततस्ते क्षत्रियानेव पप्रच्छुर्द्विजसत्तमाः ।
तेभ्यः शशंसुर्धर्मज्ञा याथातथ्यं पितामह ॥ ७
वयमेकस्य शृणुमो महाबुद्धिमतो रणे ।
भवन्तस्तु पृथक्सर्वे स्वबुद्धिवशवर्तिनः ॥ ८
ततस्ते ब्राह्मणाश्चक्रुरेकं सेनापतिं द्विजम् ।
नयेषु कुशलं शूरमजयन्क्षत्रियांस्ततः ॥ ९
एवं ये कुशलं शूरं हिते स्थितमकल्मषम् ।
सेनापतिं प्रकुर्वन्ति ते जयन्ति रणे रिपून् ॥ १०
भवानुशनसा तुल्यो हितैषी च सदा मम ।
असंहार्यः स्थितो धर्मे स नः सेनापतिर्भव ॥ ११
रश्मीवतामिवादित्यो वीरुधामिव चन्द्रमाः ।
कुबेर इव यक्षाणां मरुतामिव वासवः ॥ १२
पर्वतानां यथा मेरुः सुपर्णः पततामिव ।
कुमार इव भूतानां वसूनामिव हव्यवाट् ॥ १३
भवता हि वयं गुप्ताः शक्रेणेव दिवौकसः ।
अनाधृष्या भविष्यामस्त्रिदशानामपि ध्रुवम् ॥ १४
प्रयातु नो भवानग्रे देवानामिव पावकिः ।
वयं त्वामनुयास्यामः सौरभेया इवर्षभम् ॥ १५

भीष्म उवाच ।

एवमेतन्महाबाहो यथा वदसि भारत ।

यथैव हि भवन्तो मे तथैव मम पाण्डवाः ॥ १६
अपि चैव मया श्रेयो वाच्यं तेषां नराधिप ।
योद्धव्यं तु तवार्थाय यथा स समयः कृतः ॥१७
न तु पश्यामि योद्धारमात्मनः सदृशं भुवि ।
ऋते तस्मान्नरव्याघ्रात्कुन्तीपुत्राद्धनंजयात् ॥ १८
स हि वेद महाबाहुर्दिव्यान्यस्त्राणि सर्वशः ।
न तु मां विवृतो युद्धे जातु युध्येत पाण्डवः ॥ १९
अहं स च क्षणेनैव निर्मनुष्यमिदं जगत् ।
कुर्यां शस्त्रबलेनैव ससुरासुरराक्षसम् ॥ २०
न त्वेवोत्सादनीया मे पाण्डोः पुत्रा नराधिप ।
तस्माद्योधान्हनिष्यामि प्रयोगेणायुतं सदा ॥ २१
एवमेषां करिष्यामि निधनं कुरुनन्दन ।
न चेत्ते मां हनिष्यन्ति पूर्वमेव समागमे ॥ २२
सेनापतिस्त्वहं राजन्समयेनापरेण ते ।
भविष्यामि यथाकामं तन्मे श्रोतुमिहार्हसि ॥ २३
कर्णो वा युध्यतां पूर्वमहं वा पृथिवीपते ।
स्पर्धते हि सदात्यर्थं सूतपुत्रो मया रणे ॥ २४

कर्ण उवाच ।

नाहं जीवति गाङ्गेये योत्स्ये राजन्कथंचन ।
हते भीष्मे तु योत्स्यामि सह गाण्डीवधन्वना ॥ २५

वैशंपायन उवाच ।

ततः सेनापतिं चक्रे विधिवद्भूरिदक्षिणम् ।
धृतराष्ट्रात्मजो भीष्मं सोऽभिषिक्तो व्यरोचत ॥ २६
ततो भेरीश्च शङ्खांश्च शतशश्चैव पुष्करान् ।
वादयामासुरव्यग्राः पुरुषा राजशासनात् ॥ २७
सिंहनादाश्च विविधा वाहनानां च निस्वनाः ।
प्रादुरासन्ननभ्रे च वर्षं रुधिरकर्दमम् ॥ २८
निर्घाताः पृथिवीकम्पा गजबृंहितनिस्वनाः ।
आसंश्च सर्वयोधानां पातयन्तो मनांस्युत ॥ २९
वाचश्चाप्यशरीरिण्यो दिवश्चोल्काः प्रपेदिरे ।
शिवाश्च भयवेदिन्यो नेदुर्दीप्तस्वरा भृशम् ॥ ३०
सेनापत्ये यदा राजा गाङ्गेयमभिषिक्तवान् ।
तदैतान्युग्ररूपाणि अभवञ्शतशो नृप ॥ ३१
ततः सेनापतिं कृत्वा भीष्मं परबलार्दनम् ।
वाचयित्वा द्विजश्रेष्ठान्निष्कैर्गोभिश्च भूरिशः ॥ ३२
वर्धमानो जयाशीर्भिर्निर्ययौ सैनिकैर्वृतः ।
आपगेयं पुरस्कृत्य भ्रातृभिः सहितस्तदा ।
स्कन्धावारेण महता कुरुक्षेत्रं जगाम ह ॥ ३३
परिक्रम्य कुरुक्षेत्रं कर्णेन सह कौरवः ।
शिबिरं मापयामास समे देशे नराधिपः ॥ ३४
मधुरानूषरे देशे प्रभूतयवसेन्धने ।
यथैव हास्तिनपुरं तद्वच्छिबिरमाबभौ ॥ ३५

इति श्रीमहाभारते उद्योगपर्वणि
त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३ ॥

१५४

जनमेजय उवाच ।

आपगेयं महात्मानं भीष्मं शस्त्रभृतां वरम् ।
पितामहं भारतानां ध्वजं सर्वमहीक्षिताम् ॥ १
बृहस्पतिसमं बुद्ध्या क्षमया पृथिवीसमम् ।
समुद्रमिव गाम्भीर्ये हिमवन्तमिव स्थिरम् ॥ २
प्रजापतिमिवौदार्ये तेजसा भास्करोपमम् ।
महेन्द्रमिव शत्रूणां ध्वंसनं शरवृष्टिभिः ॥ ३
रणयज्ञे प्रतिभये स्वाभीले लोमहर्षणे ।
दीक्षितं चिररात्राय श्रुत्वा राजा युधिष्ठिरः ॥ ४
किमब्रवीन्महाबाहुः सर्वधर्मविशारदः ।
भीमसेनार्जुनौ वापि कृष्णो वा प्रत्यपद्यत ॥ ५

वैशंपायन उवाच ।

आपद्धर्मार्थकुशलो महाबुद्धिर्युधिष्ठिरः ।
सर्वान्भ्रातॄन्समानीय वासुदेवं च सात्वतम् ।
उवाच वदतां श्रेष्ठः सान्त्वपूर्वमिदं वचः ॥ ६

पर्याक्रामत सैन्यानि यत्तास्तिष्ठत दंशिताः ।
पितामहेन वो युद्धं पूर्वमेव भविष्यति ।
तस्मात्सप्तसु सेनासु प्रणेतॄन्मम पश्यत ॥ ७

वासुदेव उवाच ।

यथार्हति भवान्वक्तुमस्मिन्काल उपस्थिते ।
तथेदमर्थवद्वाक्यमुक्तं ते भरतर्षभ ॥ ८
रोचते मे महाबाहो क्रियतां यदनन्तरम् ।
नायकास्तव सेनायामभिषिच्यन्तु सप्त वै ॥ ९

वैशंपायन उवाच ।

ततो द्रुपदमानाय्य विराटं शिनिपुंगवम् ।
धृष्टद्युम्नं च पाञ्चाल्यं धृष्टकेतुं च पार्थिवम् ।
शिखण्डिनं च पाञ्चाल्यं सहदेवं च मागधम् ॥
एतान्सप्त महेष्वासान्वीरान्युद्धाभिनन्दिनः ।
सेनाप्रणेतॄन्विधिवदभ्यषिञ्चद्युधिष्ठिरः ॥ ११
सर्वसेनापतिं चात्र धृष्टद्युम्नमुपादिशत् ।
द्रोणान्तहेतोरुत्पन्नो य इद्धाज्जातवेदसः ॥ १२
सर्वेषामेव तेषां तु समस्तानां महात्मनाम् ।
सेनापतिपतिं चक्रे गुडाकेशं धनंजयम् ॥ १३
अर्जुनस्यापि नेता च संयन्ता चैव वाजिनाम् ।
संकर्षणानुजः श्रीमान्महाबुद्धिर्जनार्दनः ॥ १४
तद्दृष्ट्वोपस्थितं युद्धं समासन्नं महात्ययम् ।
प्राविशद्भवनं राज्ञः पाण्डवस्य हलायुधः ॥ १५
सहाक्रूरप्रभृतिभिर्गदसाम्बोल्मुकादिभिः ।
रौक्मिणेयाहुकसुतैश्चारुदेष्णपुरोगमैः ॥ १६
वृष्णिमुख्यैरभिगतैर्व्याघ्रैरिव बलोत्कटैः ।
अभिगुप्तो महाबाहुर्मरुद्भिरिव वासवः ॥ १७
नीलकौशेयवसनः कैलासशिखरोपमः ।
सिंहखेलगतिः श्रीमान्मदरक्तान्तलोचनः ॥ १८
तं दृष्ट्वा धर्मराजश्च केशवश्च महाद्युतिः ।
उदतिष्ठत्तदा पार्थो भीमकर्मा वृकोदरः ॥ १९
गाण्डीवधन्वा ये चान्ये राजानस्तत्र केचन ।
पूजयांचक्रुरभ्येत्य ते स्म सर्वे हलायुधम् ॥ २०
ततस्तं पाण्डवो राजा करे पस्पर्श पाणिना ।
वासुदेवपुरोगास्तु सर्व एवाभ्यवादयन् ॥ २१
विराटद्रुपदौ वृद्धावभिवाद्य हलायुधः ।
युधिष्ठिरेण सहित उपाविशदरिंदमः ॥ २२
ततस्तेषूपविष्टेषु पार्थिवेषु समन्ततः ।
वासुदेवमभिप्रेक्ष्य रौहिणेयोऽभ्यभाषत ॥ २३
भवितायं महारौद्रो दारुणः पुरुषक्षयः ।
दिष्टमेतद्ध्रुवं मन्ये न शक्यमतिवर्तितुम् ॥ २४
अस्माद्युद्धात्समुत्तीर्णानपि वः ससुहृज्जनान् ।
अरोगानक्षतैर्देहैः पश्येयमिति मे मतिः ॥ २५
समेतं पार्थिवं क्षत्रं कालपक्वमसंशयम् ।
विमर्दः सुमहान्भावी मांसशोणितकर्दमः ॥ २६
उक्तो मया वासुदेवः पुनः पुनरुपह्वरे ।
संबन्धिषु समां वृत्तिं वर्तस्व मधुसूदन ॥ २७
पाण्डवा हि यथास्माकं तथा दुर्योधनो नृपः ।
तस्यापि क्रियतां युक्त्या सपर्येति पुनः पुनः ॥ २८
तच्च मे नाकरोद्वाक्यं त्वदर्थे मधुसूदनः ।
निविष्टः सर्वभावेन धनंजयमवेक्ष्य च ॥ २९
ध्रुवो जयः पाण्डवानामिति मे निश्चिता मतिः ।
तथा ह्यभिनिवेशोऽयं वासुदेवस्य भारत ॥ ३०
न चाहमुत्सहे कृष्णमृते लोकमुदीक्षितुम् ।
ततोऽहमनुवर्तामि केशवस्य चिकीर्षितम् ॥ ३१
उभौ शिष्यौ हि मे वीरौ गदायुद्धविशारदौ ।
तुल्यस्नेहोऽस्म्यतो भीमे तथा दुर्योधने नृपे ॥३२
तस्माद्यास्यामि तीर्थानि सरस्वत्या निषेवितुम् ।
न हि शक्ष्यामि कौरव्यान्नश्यमानानुपेक्षितुम् ॥३३
एवमुक्त्वा महाबाहुरनुज्ञातश्च पाण्डवैः ।

तीर्थयात्रां ययौ रामो निवर्त्य मधुसूदनम् ॥ ३४

इति श्रीमहाभारते उद्योगपर्वणि
चतुःपञ्चाशदधिकशततमोऽध्यायः ॥ १५४ ॥

१५५

वैशंपायन उवाच ।

एतस्मिन्नेव काले तु भीष्मकस्य महात्मनः ।
हिरण्यलोम्नो नृपतेः साक्षादिन्द्रसखस्य वै ॥ १
आहृतीनामधिपतेर्भोजस्यातियशस्विनः ।
दाक्षिणात्यपतेः पुत्रो दिक्षु रुक्मीति विश्रुतः ॥ २
यः किंपुरुषसिंहस्य गन्धमादनवासिनः ।
शिष्यः कृत्स्नं धनुर्वेदं चतुष्पादमवाप्तवान् ॥ ३
यो माहेन्द्रं धनुर्लेभे तुल्यं गाण्डीवतेजसा ।
शार्ङ्गेण च महाबाहुः संमितं दिव्यमक्षयम् ॥ ४
त्रीण्येवैतानि दिव्यानि धनूंषि दिविचारिणाम् ।
वारुणं गाण्डिवं तत्र माहेन्द्रं विजयं धनुः ॥ ५
शार्ङ्गं तु वैष्णवं प्राहुर्दिव्यं तेजोमयं धनुः ।
धारयामास यत्कृष्णः परसेनाभयावहम् ॥ ६
गाण्डीवं पावकाल्लेभे खाण्डवे पाकशासनिः ।
द्रुमाद्रुक्मी महातेजा विजयं प्रत्यपद्यत ॥ ७
संछिद्य मौरवान्पाशान्निहत्य मुरमोजसा ।
निर्जित्य नरकं भौममाहृत्य मणिकुण्डले ॥ ८
षोडश स्त्रीसहस्राणि रत्नानि विविधानि च ।
प्रतिपेदे हृषीकेशः शार्ङ्गं च धनुरुत्तमम् ॥ ९
रुक्मी तु विजयं लब्ध्वा धनुर्मेघसमस्वनम् ।
विभीषयन्निव जगत्पाण्डवानभ्यवर्तत ॥ १०
नामृष्यत पुरा योऽसौ स्वबाहुबलदर्पितः ।
रुक्मिण्या हरणं वीरो वासुदेवेन धीमता ॥ ११
कृत्वा प्रतिज्ञां नाहत्वा निवर्तिष्यामि केशवम् ।
ततोऽन्वधावद्वार्ष्णेयं सर्वशस्त्रभृतां वरम् ॥ १२
सेनया चतुरङ्गिण्या महत्या दूरपातया ।
विचित्रायुधवर्मिण्या गङ्गयेव प्रवृद्धया ॥ १३
स समासाद्य वार्ष्णेयं योगानामीश्वरं प्रभुम् ।
व्यंसितो व्रीडितो राजन्नाजगाम स कुण्डिनम् ॥१४
यत्रैव कृष्णेन रणे निर्जितः परवीरहा ।
तत्र भोजकटं नाम चक्रे नगरमुत्तमम् ॥ १५
सैन्येन महता तेन प्रभूतगजवाजिना ।
पुरं तद्भुवि विख्यातं नाम्ना भोजकटं नृप ॥ १६
स भोजराजः सैन्येन महता परिवारितः ।
अक्षौहिण्या महावीर्यः पाण्डवान्समुपागमत् ॥ १७
ततः स कवची खड्गी शरी धन्वी तली रथी ।
ध्वजेनादित्यवर्णेन प्रविवेश महाचमूम् ॥ १८
विदितः पाण्डवेयानां वासुदेवप्रियेप्सया ।
युधिष्ठिरस्तु तं राजा प्रत्युद्गम्याभ्यपूजयत् ॥ १९
स पूजितः पाण्डुसुतैर्यथान्यायं सुसत्कृतः ।
प्रतिपूज्य च तान्सर्वान्विश्रान्तः सहसैनिकः ।
उवाच मध्ये वीराणां कुन्तीपुत्रं धनंजयम् ॥ २०
सहायोऽस्मि स्थितो युद्धे यदि भीतोऽसि पाण्डव ।
करिष्यामि रणे साह्यमसह्यं तव शत्रुभिः ॥ २१
न हि मे विक्रमे तुल्यः पुमानस्तीह कश्चन ।
निहत्य समरे शत्रूंस्तव दास्यामि फल्गुन ॥ २२
इत्युक्तो धर्मराजस्य केशवस्य च संनिधौ ।
शृण्वतां पार्थिवेन्द्राणामन्येषां चैव सर्वशः ॥ २३
वासुदेवमभिप्रेक्ष्य धर्मराजं च पाण्डवम् ।
उवाच धीमान्कौन्तेयः प्रहस्य सखिपूर्वकम् ॥ २४
युध्यमानस्य मे वीर गन्धर्वैः सुमहाबलैः ।
सहायो घोषयात्रायां कस्तदासीत्सखा मम ॥ २५
तथा प्रतिभये तस्मिन्देवदानवसंकुले ।
खाण्डवे युध्यमानस्य कः सहायस्तदाभवत् ॥ २६
निवातकवचैर्युद्धे कालकेयैश्च दानवैः ।

तत्र मे युध्यमानस्य कः सहायस्तदाभवत् ॥ २७
तथा विराटनगरे कुरुभिः सह संगरे ।
युध्यतो बहुभिस्तात कः सहायोऽभवन्मम ॥ २८
उपजीव्य रणे रुद्रं शक्रं वैश्रवणं यमम् ।
वरुणं पावकं चैव कृपं द्रोणं च माधवम् ॥ २९
धारयन्गाण्डिवं दिव्यं धनुस्तेजोमयं दृढम् ।
अक्षय्यशरसंयुक्तो दिव्यास्त्रपरिबृंहितः ॥ ३०
कौरवाणां कुले जातः पाण्डोः पुत्रो विशेषतः ।
द्रोणं व्यपदिशञ्शिष्यो वासुदेवसहायवान् ॥ ३१
कथमस्मद्विधो ब्रूयाद्भीतोऽस्मीत्ययशस्करम् ।
वचनं नरशार्दूल वज्रायुधमपि स्वयम् ॥ ३२
नास्मि भीतो महाबाहो सहायार्थश्च नास्ति मे ।
यथाकामं यथायोगं गच्छ वान्यत्र तिष्ठ वा ॥ ३३
विनिवर्त्य ततो रुक्मी सेनां सागरसंनिभाम् ।
दुर्योधनमुपागच्छत्तथैव भरतर्षभ ॥ ३४
तथैव चाभिगम्यैनमुवाच स नराधिपः ।
प्रत्याख्यातश्च तेनापि स तदा शूरमानिना ॥ ३५
द्वावेव तु महाराज तस्माद्युद्धाद्व्यपेयतुः ।
रौहिणेयश्च वार्ष्णेयो रुक्मी च वसुधाधिपः ॥ ३६
गते रामे तीर्थयात्रां भीष्मकस्य सुते तथा ।
उपाविशन्पाण्डवेया मन्त्राय पुनरेव हि ॥ ३७
समितिर्धर्मराजस्य सा पार्थिवसमाकुला ।
शुशुभे तारकाचित्रा द्यौश्चन्द्रेणेव भारत ॥ ३८

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥ १५५ ॥

१५६

जनमेजय उवाच ।

तथा व्यूढेष्वनीकेषु कुरुक्षेत्रे द्विजर्षभ ।
किमकुर्वन्त कुरवः कालेनाभिप्रचोदिताः ॥ १

वैशंपायन उवाच ।

तथा व्यूढेष्वनीकेषु यत्तेषु भरतर्षभ ।
धृतराष्ट्रो महाराज संजयं वाक्यमब्रवीत् ॥ २
एहि संजय मे सर्वमाचक्ष्वानवशेषतः ।
सेनानिवेशे यद्वृत्तं कुरुपाण्डवसेनयोः ॥ ३
दिष्टमेव परं मन्ये पौरुषं चाप्यनर्थकम् ।
यदहं जानमानोऽपि युद्धदोषान्क्षयोदयान् ॥ ४
तथापि निकृतिप्रज्ञं पुत्रं दुर्द्यूतदेविनम् ।
न शक्नोमि नियन्तुं वा कर्तुं वा हितमात्मनः ॥ ५
भवत्येव हि मे सूत बुद्धिर्दोषानुदर्शिनी ।
दुर्योधनं समासाद्य पुनः सा परिवर्तते ॥ ६
एवं गते वै यद्भावि तद्भविष्यति संजय ।
क्षत्रधर्मः किल रणे तनुत्यागोऽभिपूजितः ॥ ७

संजय उवाच ।

त्वद्युक्तोऽयमनुप्रश्नो महाराज यथार्हसि ।
न तु दुर्योधने दोषमिममासक्तुमर्हसि ।
शृणुष्वानवशेषेण वदतो मम पार्थिव ॥ ८
य आत्मनो दुश्चरितादशुभं प्राप्नुयान्नरः ।
एनसा न स दैवं वा कालं वा गन्तुमर्हति ॥ ९
महाराज मनुष्येषु निन्द्यं यः सर्वमाचरेत् ।
स वध्यः सर्वलोकस्य निन्दितानि समाचरन् ॥ १०
निकारा मनुजश्रेष्ठ पाण्डवैस्त्वत्प्रतीक्षया ।
अनुभूताः सहामात्यैर्निकृतैरधिदेवने ॥ ११
हयानां च गजानां च राज्ञां चामिततेजसाम् ।
वैशसं समरे वृत्तं यत्तन्मे शृणु सर्वशः ॥ १२
स्थिरो भूत्वा महाराज सर्वलोकक्षयोदयम् ।
यथाभूतं महायुद्धे श्रुत्वा मा विमना भव ॥ १३
न ह्येव कर्ता पुरुषः कर्मणोः शुभपापयोः ।
अस्वतन्त्रो हि पुरुषः कार्यते दारुयन्त्रवत् ॥ १४
केचिदीश्वरनिर्दिष्टाः केचिदेव यदृच्छया ।

पूर्वकर्मभिरप्यन्ये त्रैधमेतद्विकृष्यते ॥ १५

इति श्रीमहाभारते उद्योगपर्वणि
षट्पञ्चाशदधिकशततमोऽध्यायः ॥ १५६ ॥

॥ समाप्तं भीष्माभिषेचनपर्व ॥

१५७

संजय उवाच ।

हिरण्वत्यां निविष्टेषु पाण्डवेषु महात्मसु ।
दुर्योधनो महाराज कर्णेन सह भारत ॥ १
सौबलेन च राजेन्द्र तथा दुःशासनेन च ।
आहूयोपह्वरे राजन्नुलूकमिदमब्रवीत् ॥ २
उलूक गच्छ कैतव्य पाण्डवान्सहसोमकान् ।
गत्वा मम वचो ब्रूहि वासुदेवस्य शृण्वतः ॥ ३
इदं तत्समनुप्राप्तं वर्षपूगाभिचिन्तितम् ।
पाण्डवानां कुरूणां च युद्धं लोकभयंकरम् ॥ ४
यदेतत्कत्थनावाक्यं संजयो महदब्रवीत् ।
मध्ये कुरूणां कौन्तेय तस्य कालोऽयमागतः ।
यथा वः संप्रतिज्ञातं तत्सर्वं क्रियतामिति ॥ ५
अमर्षं राज्यहरणं वनवासं च पाण्डव ।
द्रौपद्याश्च परिक्लेशं संस्मरन्पुरुषो भव ॥ ६
यदर्थं क्षत्रिया सूते गर्भं तदिदमागतम् ।
बलं वीर्यं च शौर्यं च परं चाप्यस्त्रलाघवम् ।
पौरुषं दर्शयन्युद्धे कोपस्य कुरु निष्कृतिम् ॥ ७
परिक्लिष्टस्य दीनस्य दीर्घकालोषितस्य च ।
न स्फुटेद्धृदयं कस्य ऐश्वर्याद्भ्रंशितस्य च ॥ ८
कुले जातस्य शूरस्य परवित्तेषु गृध्यतः ।
आच्छिन्नं राज्यमाक्रम्य कोपं कस्य न दीपयेत् ॥ ९
यत्तदुक्तं महद्वाक्यं कर्मणा तद्विभाव्यताम् ।
अकर्मणा कत्थितेन सन्तः कुपुरुषं विदुः ॥ १०
अमित्राणां वशे स्थानं राज्यस्य च पुनर्भवः ।
द्वावर्थौ युध्यमानस्य तस्मात्कुरुत पौरुषम् ॥ ११
अस्मान्वा त्वं पराजित्य प्रशाधि पृथिवीमिमाम् ।
अथ वा निहतोऽस्माभिर्वीरलोकं गमिष्यसि ॥ १२
राष्ट्रात्प्रव्राजनं क्लेशं वनवासं च पाण्डव ।
कृष्णायाश्च परिक्लेशं संस्मरन्पुरुषो भव ॥ १३
अप्रियाणां च वचने प्रव्रजत्सु पुनः पुनः ।
अमर्षं दर्शयाद्य त्वममर्षो ह्येव पौरुषम् ॥ १४
क्रोधो बलं तथा वीर्यं ज्ञानयोगोऽस्त्रलाघवम् ।
इह ते पार्थ दृश्यन्तां संग्रामे पुरुषो भव ॥ १५
तं च तूबरकं मूढं बह्वाशिनमविद्यकम् ।
उलूक मद्वचो ब्रूया असकृद्भीमसेनकम् ॥ १६
अशक्तेनैव यच्छप्तं सभामध्ये वृकोदर ।
दुःशासनस्य रुधिरं पीयतां यदि शक्यते ॥ १७
लोहाभिहारो निर्वृत्तः कुरुक्षेत्रमकर्दमम् ।
पुष्टास्तेऽश्वा भृता योधाः श्वो युध्यस्व सकेशवः ॥

इति श्रीमहाभारते उद्योगपर्वणि
सप्तपञ्चाशदधिकशततमोऽध्यायः ॥ १५७ ॥

१५८

संजय उवाच ।

सेनानिवेशं संप्राप्य कैतव्यः पाण्डवस्य ह ।
समागतः पाण्डवेयैर्युधिष्ठिरमभाषत ॥ १
अभिज्ञो दूतवाक्यानां यथोक्तं ब्रुवतो मम ।
दुर्योधनसमादेशं श्रुत्वा न क्रोद्धुमर्हसि ॥ २

युधिष्ठिर उवाच ।

उलूक न भयं तेऽस्ति ब्रूहि त्वं विगतज्वरः ।
यन्मतं धार्तराष्ट्रस्य लुब्धस्यादीर्घदर्शिनः ॥ ३

संजय उवाच ।

ततो द्युतिमतां मध्ये पाण्डवानां महात्मनाम् ।
सृञ्जयानां च सर्वेषां कृष्णस्य च यशस्विनः ॥ ४
द्रुपदस्य सपुत्रस्य विराटस्य च संनिधौ ।
भूमिपानां च सर्वेषां मध्ये वाक्यं जगाद ह ॥ ५

इदं त्वामब्रवीद्राजा धार्तराष्ट्रो महामनाः ।
शृण्वतां कुरुवीराणां तन्निबोध नराधिप ॥ ६
पराजितोऽसि द्यूतेन कृष्णा चानायिता सभाम् ।
शक्योऽमर्षो मनुष्येण कर्तुं पुरुषमानिना ॥ ७
द्वादशैव तु वर्षाणि वने धिष्ण्याद्विवासिताः ।
संवत्सरं विराटस्य दास्यमास्थाय चोषिताः ॥ ८
अमर्षं राज्यहरणं वनवासं च पाण्डव ।
द्रौपद्याश्च परिक्लेशं संस्मरन्पुरुषो भव ॥ ९
अशक्तेन च यच्छप्तं भीमसेनेन पाण्डव ।
दुःशासनस्य रुधिरं पीयतां यदि शक्यते ॥ १०
लोहाभिहारो निर्वृत्तः कुरुक्षेत्रमकर्दमम् ।
समः पन्था भृता योधाः श्वो युध्यस्व सकेशवः ॥
असमागम्य भीष्मेण संयुगे किं विकत्थसे ।
आरुरुक्षुर्यथा मन्दः पर्वतं गन्धमादनम् ॥ १२
द्रोणं च युध्यतां श्रेष्ठं शचीपतिसमं युधि ।
अजित्वा संयुगे पार्थ राज्यं कथमिहेच्छसि ॥ १३
ब्राह्मे धनुषि चाचार्यं वेदयोरन्तरं द्वयोः ।
युधि धुर्यमविक्षोभ्यमनीकधरमच्युतम् ॥ १४
द्रोणं मोहाद्युधा पार्थ यज्जिगीषसि तन्मृषा ।
न हि शुश्रुम वातेन मेरुमुन्मथितं गिरिम् ॥ १५
अनिलो वा वहेन्मेरुं द्यौर्वापि निपतेन्महीम् ।
युगं वा परिवर्तेत यद्येवं स्याद्यथात्थ माम् ॥ १६
को ह्याभ्यां जीविताकाङ्क्षी प्राप्यास्त्रमरिमर्दनम् ।
गजो वाजी नरो वापि पुनः स्वस्ति गृहान्व्रजेत् ॥
कथमाभ्यामभिध्यातः संसृष्टो दारुणेन वा ।
रणे जीवन्विमुच्येत पदा भूमिमुपस्पृशन् ॥ १८

किं दर्दुरः कूपशयो यथेमां
न बुध्यसे राजचमूं समेताम् ।
दुराधर्षां देवचमूप्रकाशां
गुप्तां नरेन्द्रैस्त्रिदशैरिव द्याम् ॥ १९
प्राच्यैः प्रतीच्यैरथ दाक्षिणात्यै-
रुदीच्यकाम्बोजशकैः खशैश्च ।
शाल्वैः समत्स्यैः कुरुमध्यदेशै-
र्म्लेच्छैः पुलिन्दैर्द्रविडान्ध्रकाञ्च्यैः ॥ २०
नानाजनौघं युधि संप्रवृद्धं
गाङ्गं यथा वेगमवारणीयम् ।
मां च स्थितं नागबलस्य मध्ये
युयुत्ससे मन्द किमल्पबुद्धे ॥ २१

इत्येवमुक्त्वा राजानं धर्मपुत्रं युधिष्ठिरम् ।
अभ्यावृत्य पुनर्जिष्णुमुलूकः प्रत्यभाषत ॥ २२
अकत्थमानो युध्यस्व कत्थसेऽर्जुन किं बहु ।
पर्यायात्सिद्धिरेतस्य नैतत्सिध्यति कत्थनात् ॥ २३
यदीदं कत्थनात्सिध्येत्कर्म लोके धनंजय ।
सर्वे भवेयुः सिद्धार्था बहु कत्थेत दुर्गतः ॥ २४

जानामि ते वासुदेवं सहायं
जानामि ते गाण्डिवं तालमात्रम् ।
जानाम्येतत्त्वादृशो नास्ति योद्धा
राज्यं च ते जानमानो हरामि ॥ २५

न तु पर्यायधर्मेण सिद्धिं प्राप्नोति भूयसीम् ।
मनसैव हि भूतानि धाता प्रकुरुते वशे ॥ २६
त्रयोदश समा भुक्तं राज्यं विलपतस्तव ।
भूयश्चैव प्रशासिष्ये निहत्य त्वां सबान्धवम् ॥ २७
क तदा गाण्डिवं तेऽभूद्यत्त्वं दासपणे जितः ।
क तदा भीमसेनस्य बलमासीच्च फल्गुन ॥ २८
सगदाद्भीमसेनाच्च पार्थाच्चैव सगाण्डिवात् ।
न वै मोक्षस्तदा वोऽभूद्विना कृष्णामनिन्दिताम् ॥
सा वो दास्यं समापन्नान्मोक्षयामास भामिनी ।
अमानुष्यसमायुक्तान्दास्यकर्मण्यवस्थितान् ॥ ३०
अवोचं यत्षण्ढतिलानहं वस्तथ्यमेव तत् ।

धृता हि वेणी पार्थेन विराटनगरे तदा ॥ ३१
सूदकर्मणि च श्रान्तं विराटस्य महानसे ।
भीमसेनेन कौन्तेय यच्च तन्मम पौरुषम् ॥ ३२
एवमेव सदा दण्डं क्षत्रियाः क्षत्रिये दधुः ।
श्रेण्यां कक्ष्यां च वेण्यां च संयुगे यः पलायते ॥
न भयाद्वासुदेवस्य न चापि तव फल्गुन ।
राज्यं प्रतिप्रदास्यामि युध्यस्व सहकेशवः ॥ ३४
न माया हीन्द्रजालं वा कुहका वा विभीषणी ।
आत्तशस्त्रस्य मे युद्धे वहन्ति प्रतिगर्जनाः ॥ ३५
वासुदेवसहस्रं वा फल्गुनानां शतानि वा ।
आसाद्य माममोघेषुं द्रविष्यन्ति दिशो दश ॥ ३६
संयुगं गच्छ भीष्मेण भिन्धि त्वं शिरसा गिरिम् ।
प्रतरेमं महागाधं बाहुभ्यां पुरुषोदधिम् ॥ ३७
शारद्वतमहामीनं विविंशतिझषाकुलम् ।
बृहद्बलसमुत्तालं सौमदत्तितिमिंगिलम् ॥ ३८
दुःशासनौघं शलशल्यमत्स्यं
सुषेणचित्रायुधनागनक्रम् ।
जयद्रथाद्रिं पुरुमित्रगाधं
दुर्मर्षणोदं शकुनिप्रपातम् ॥ ३९
शस्त्रौघमक्षय्यमतिप्रवृद्धं
यदावगाह्य श्रमनष्टचेताः ।
भविष्यसि त्वं हतसर्वबान्धव-
स्तदा मनस्ते परितापमेष्यति ॥ ४०
तदा मनस्ते त्रिदिवादिवाशुचे-
र्निवर्ततां पार्थ महीप्रशासनात् ।
राज्यं प्रशास्तुं हि सुदुर्लभं त्वया
बुभूषता स्वर्ग इवातपस्विना ॥ ४१

इति श्रीमहाभारते उद्योगपर्वणि
अष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥

१५९

संजय उवाच ।

उलूकस्त्वर्जुनं भूयो यथोक्तं वाक्यमब्रवीत् ।
आशीविषमिव क्रुद्धं तुदन्वाक्यशलाकया ॥ १
तस्य तद्वचनं श्रुत्वा रुषिताः पाण्डवा भृशम् ।
प्रागेव भृशसंक्रुद्धाः कैतव्येन प्रधर्षिताः ॥ २
नासनेष्ववतिष्ठन्त बाहूंश्चैव विचिक्षिपुः ।
आशीविषा इव क्रुद्धा वीक्षांचक्रुः परस्परम् ॥ ३
अवाक्शिरा भीमसेनः समुदैक्षत केशवम् ।
नेत्राभ्यां लोहितान्ताभ्यामाशीविष इव श्वसन् ॥ ४
आर्तं वातात्मजं दृष्ट्वा क्रोधेनाभिहतं भृशम् ।
उत्स्मयन्निव दाशार्हः कैतव्यं प्रत्यभाषत ॥ ५
प्रयाहि शीघ्रं कैतव्य ब्रूयाश्चैव सुयोधनम् ।
श्रुतं वाक्यं गृहीतोऽर्थो मतं यत्ते तथास्तु तत् ॥ ६
मद्वचश्चापि भूयस्ते वक्तव्यः स सुयोधनः ।
श्व इदानीं प्रदृश्येथाः पुरुषो भव दुर्मते ॥ ७
मन्यसे यच्च मूढ त्वं न योत्स्यति जनार्दनः ।
सारथ्येन वृतः पार्थैरिति त्वं न बिभेषि च ॥ ८
जघन्यकालमप्येतद्भवेद्यत्सर्वपार्थिवान् ।
निर्दहेयमहं क्रोधात्तृणानीव हुताशनः ॥ ९
युधिष्ठिरनियोगात्तु फल्गुनस्य महात्मनः ।
करिष्ये युध्यमानस्य सारथ्यं विदितात्मनः ॥ १०
यद्युत्पतसि लोकांस्त्रीन्यद्याविशसि भूतलम् ।
तत्र तत्रार्जुनरथं प्रभाते द्रक्ष्यसेऽग्रतः ॥ ११
यच्चापि भीमसेनस्य मन्यसे मोघगर्जितम् ।
दुःशासनस्य रुधिरं पीतमित्यवधार्यताम् ॥ १२
न त्वां समीक्षते पार्थो नापि राजा युधिष्ठिरः ।
न भीमसेनो न यमौ प्रतिकूलप्रभाषिणम् ॥ १३

इति श्रीमहाभारते उद्योगपर्वणि
एकोनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥

१६०

संजय उवाच ।

दुर्योधनस्य तद्वाक्यं निशम्य भरतर्षभः ।
नेत्राभ्यामतिताम्राभ्यां कैतव्यं समुदैक्षत ॥ १
स केशवमभिप्रेक्ष्य गुडाकेशो महायशाः ।
अभ्यभाषत कैतव्यं प्रगृह्य विपुलं भुजम् ॥ २
स्ववीर्यं यः समाश्रित्य समाह्वयति वै परान् ।
अभीतः पूरयञ्शक्तिं स वै पुरुष उच्यते ॥ ३
परवीर्यं समाश्रित्य यः समाह्वयते परान् ।
क्षत्रबन्धुरशक्तत्वाल्लोके स पुरुषाधमः ॥ ४
स त्वं परेषां वीर्येण मन्यसे वीर्यमात्मनः ।
स्वयं कापुरुषो मूढः परांश्च क्षेप्तुमिच्छसि ॥ ५
यस्त्वं वृद्धं सर्वराज्ञां हितबुद्धिं जितेन्द्रियम् ।
मरणाय महाबुद्धिं दीक्षयित्वा विकत्थसे ॥ ६
भावस्ते विदितोऽस्माभिर्दुर्बुद्धे कुलपांसन ।
न हनिष्यन्ति गाङ्गेयं पाण्डवा घृणयेति च ॥ ७
यस्य वीर्यं समाश्रित्य धार्तराष्ट्र विकत्थसे ।
हन्तास्मि प्रथमं भीष्मं मिषतां सर्वधन्विनाम् ॥ ८
कैतव्य गत्वा भरतान्समेत्य
सुयोधनं धार्तराष्ट्रं ब्रवीहि ।
तथेत्याह अर्जुनः सव्यसाची
निशाव्यपाये भविता विमर्दः ॥९
यद्वोऽब्रवीद्वाक्यमदीनसत्त्वो
मध्ये कुरूणां हर्षयन्सत्यसंधः ।
अहं हन्ता पाण्डवानामनीकं
शाल्वेयकांश्चेति ममैष भारः ॥ १०
हन्यामहं द्रोणमृते हि लोकं
न ते भयं विद्यते पाण्डवेभ्यः ।
ततो हि ते लब्धतमं च राज्यं
क्षयं गताः पाण्डवाश्चेति भावः ॥ ११
स दर्पपूर्णो न समीक्षसे त्व-
मनर्थमात्मन्यपि वर्तमानम् ।
तस्मादहं ते प्रथमं समूहे
हन्ता समक्षं कुरुवृद्धमेव ॥ १२
सूर्योदये युक्तसेनः प्रतीक्ष्य
ध्वजी रथी रक्ष च सत्यसंधम् ।
अहं हि वः पश्यतां द्वीपमेनं
रथाद्भीष्मं पातयितास्मि बाणैः ॥ १३
श्वोभूते कत्थनावाक्यं विज्ञास्यति सुयोधनः ।
अर्दितं शरजालेन मया दृष्ट्वा पितामहम् ॥ १४
यदुक्तश्च सभामध्ये पुरुषो ह्रस्वदर्शनः ।
क्रुद्धेन भीमसेनेन भ्राता दुःशासनस्तव ॥ १५
अधर्मज्ञो नित्यवैरी पापबुद्धिर्नृशंसकृत् ।
सत्यां प्रतिज्ञां नचिराद्द्रक्ष्यसे तां सुयोधन ॥ १६
अभिमानस्य दर्पस्य क्रोधपारुष्ययोस्तथा ।
नैष्ठुर्यस्यावलेपस्य आत्मसंभावनस्य च ॥ १७
नृशंसतायास्तैक्ष्ण्यस्य धर्मविद्वेषणस्य च ।
अधर्मस्यातिवादस्य वृद्धातिक्रमणस्य च ॥ १८
दर्शनस्य च वक्रस्य कृत्स्नस्यापनयस्य च ।
द्रक्ष्यसि त्वं फलं तीव्रमचिरेण सुयोधन ॥ १९
वासुदेवद्वितीये हि मयि क्रुद्धे नराधिप ।
आशा ते जीविते मूढ राज्ये वा केन हेतुना ॥२०
शान्ते भीष्मे तथा द्रोणे सूतपुत्रे च पातिते ।
निराशो जीविते राज्ये पुत्रेषु च भविष्यसि ॥ २१
भ्रातॄणां निधनं दृष्ट्वा पुत्राणां च सुयोधन ।
भीमसेनेन निहतो दुष्कृतानि स्मरिष्यसि ॥ २२
न द्वितीयां प्रतिज्ञां हि प्रतिज्ञास्यति केशवः ।
सत्यं ब्रवीम्यहं ह्येतत्सर्वं सत्यं भविष्यति ॥ २३
इत्युक्तः कैतव्यो राजंस्तद्वाक्यमुपधार्य च ।
अनुज्ञातो निववृते पुनरेव यथागतम् ॥ २४

उपावृत्य तु पाण्डुभ्यः कैतव्यो धृतराष्ट्रजम् ।
गत्वा यथोक्तं तत्सर्वमुवाच कुरुसंसदि ॥ २५
केशवार्जुनयोर्वाक्यं निशम्य भरतर्षभः ।
दुःशासनं च कर्णं च शकुनिं चाभ्यभाषत ॥ २६
आज्ञापयत राज्ञश्च बलं मित्रबलं तथा ।
यथा प्रागुदयात्सर्वा युक्ता तिष्ठत्यनीकिनी ॥ २७
ततः कर्णसमादिष्टा दूताः प्रत्वरिता रथैः ।
उष्ट्रवामीभिरप्यन्ये सदश्वैश्च महाजवैः ॥ २८
तूर्णं परिययुः सेनां कृत्स्नां कर्णस्य शासनात् ।
आज्ञापयन्तो राज्ञस्तान्योगः प्रागुदयादिति ॥ २९

इति श्रीमहाभारते उद्योगपर्वणि
षष्ट्यधिकशततमोऽध्यायः ॥ १६० ॥

॥ समाप्तमुलूकयानपर्व ॥

१६१

संजय उवाच ।

उलूकस्य वचः श्रुत्वा कुन्तीपुत्रो युधिष्ठिरः ।
सेनां निर्यापयामास धृष्टद्युम्नपुरोगमाम् ॥ १
पदातिनीं नागवतीं रथिनीमश्ववृन्दिनीम् ।
चतुर्विधबलां भीमामकम्प्यां पृथिवीमिव ॥ २
भीमसेनादिभिर्गुप्तां सार्जुनैश्च महारथैः ।
धृष्टद्युम्नवशां दुर्गां सागरस्तिमितोपमाम् ॥ ३
तस्यास्त्वग्रे महेष्वासः पाञ्चाल्यो युद्धदुर्मदः ।
द्रोणप्रेप्सुरनीकानि धृष्टद्युम्नः प्रकर्षति ॥ ४
यथाबलं यथोत्साहं रथिनः समुपादिशत् ।
अर्जुनं सूतपुत्राय भीमं दुर्योधनाय च ॥ ५
अश्वत्थाम्ने च नकुलं शैब्यं च कृतवर्मणे ।
सैन्धवाय च वार्ष्णेयं युयुधानमुपादिशत् ॥ ६
शिखण्डिनं च भीष्माय प्रमुखे समकल्पयत् ।
सहदेवं शकुनये चेकितानं शलाय च ॥ ७
धृष्टकेतुं च शल्याय गौतमायोत्तमौजसम् ।
द्रौपदेयांश्च पञ्चभ्यस्त्रिगर्तेभ्यः समादिशत् ॥ ८
वृषसेनाय सौभद्रं शेषाणां च महीक्षिताम् ।
समर्थं तं हि मेने वै पार्थादभ्यधिकं रणे ॥ ९
एवं विभज्य योधांस्तान्पृथक्च सह चैव ह ।
ज्वालवर्णो महेष्वासो द्रोणमंशमकल्पयत् ॥ १०
धृष्टद्युम्नो महेष्वासः सेनापतिपतिस्ततः ।
विधिवद्व्यूह्य मेधावी युद्धाय धृतमानसः ॥ ११
यथादिष्टान्यनीकानि पाण्डवानामयोजयत् ।
जयाय पाण्डुपुत्राणां यत्तस्तस्थौ रणाजिरे ॥ १२

इति श्रीमहाभारते उद्योगपर्वणि
एकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥

१६२

धृतराष्ट्र उवाच ।

प्रतिज्ञाते फल्गुनेन वधे भीष्मस्य संजय ।
किमकुर्वन्त मे मन्दाः पुत्रा दुर्योधनादयः ॥ १
हतमेव हि पश्यामि गाङ्गेयं पितरं रणे ।
वासुदेवसहायेन पार्थेन दृढधन्वना ॥ २
स चापरिमितप्रज्ञस्तच्छ्रुत्वा पार्थभाषितम् ।
किमुक्तवान्महेष्वासो भीष्मः प्रहरतां वरः ॥ ३
सेनापत्यं च संप्राप्य कौरवाणां धुरंधरः ।
किमचेष्टत गाङ्गेयो महाबुद्धिपराक्रमः ॥ ४

वैशंपायन उवाच ।

ततस्तत्संजयस्तस्मै सर्वमेव न्यवेदयत् ।
यथोक्तं कुरुवृद्धेन भीष्मेणामिततेजसा ॥ ५

संजय उवाच ।

सेनापत्यमनुप्राप्य भीष्मः शांतनवो नृप ।
दुर्योधनमुवाचेदं वचनं हर्षयन्निव ॥ ६
नमस्कृत्वा कुमाराय सेनान्ये शक्तिपाणये ।
अहं सेनापतिस्तेऽद्य भविष्यामि न संशयः ॥ ७
सेनाकर्मण्यभिज्ञोऽस्मि व्यूहेषु विविधेषु च ।

कर्म कारयितुं चैव भृतानप्यभृतांस्तथा ॥ ८
यात्रायानेषु युद्धेषु लब्धप्रशमनेषु च ।
भृशं वेद महाराज यथा वेद बृहस्पतिः ॥ ९
व्यूहानपि महारम्भान्दैवगान्धर्वमानुषान् ।
तैरहं मोहयिष्यामि पाण्डवान्व्येतु ते ज्वरः ॥ १०
सोऽहं योत्स्यामि तत्त्वेन पालयंस्तव वाहिनीम् ।
यथावच्छास्त्रतो राजन्व्येतु ते मानसो ज्वरः ॥ ११

दुर्योधन उवाच ।

न विद्यते मे गाङ्गेय भयं देवासुरेष्वपि ।
समस्तेषु महाबाहो सत्यमेतद्ब्रवीमि ते ॥ १२
किं पुनस्त्वयि दुर्धर्षे सेनापत्ये व्यवस्थिते ।
द्रोणे च पुरुषव्याघ्रे स्थिते युद्धाभिनन्दिनि ॥ १३
भवद्भ्यां पुरुषाग्र्याभ्यां स्थिताभ्यां विजयो मम ।
न दुर्लभं कुरुश्रेष्ठ देवराज्यमपि ध्रुवम् ॥ १४
रथसंख्यां तु कार्त्स्न्येन परेषामात्मनस्तथा ।
तथैवातिरथानां च वेत्तुमिच्छामि कौरव ॥ १५
पितामहो हि कुशलः परेषामात्मनस्तथा ।
श्रोतुमिच्छाम्यहं सर्वैः सहैभिर्वसुधाधिपैः ॥ १६

भीष्म उवाच ।

गान्धारे शृणु राजेन्द्र रथसंख्यां स्वके बले ।
ये रथाः पृथिवीपाल तथैवातिरथाश्च ये ॥ १७
बहूनीह सहस्राणि प्रयुतान्यर्बुदानि च ।
रथानां तव सेनायां यथामुख्यं तु मे शृणु ॥ १८
भवानग्रे रथोदारः सह सर्वैः सहोदरैः ।
दुःशासनप्रभृतिभिर्भ्रातृभिः शतसंमितैः ॥ १९
सर्वे कृतप्रहरणाश्छेद्यभेद्यविशारदाः ।
रथोपस्थे गजस्कन्धे गदायुद्धेऽसिचर्मणि ॥ २०
संयन्तारः प्रहर्तारः कृतास्त्रा भारसाधनाः ।
इष्वस्त्रे द्रोणशिष्याश्च कृपस्य च शरद्वतः ॥ २१
एते हनिष्यन्ति रणे पाञ्चालान्युद्धदुर्मदान् ।
कृतकिल्बिषाः पाण्डवेयैर्धार्तराष्ट्रा मनस्विनः ॥ २२
ततोऽहं भरतश्रेष्ठ सर्वसेनापतिस्तव ।
शत्रून्विध्वंसयिष्यामि कदर्थीकृत्य पाण्डवान् ।
न त्वात्मनो गुणान्वक्तुमर्हामि विदितोऽस्मि ते ॥
कृतवर्मा त्वतिरथो भोजः प्रहरतां वरः ।
अर्थसिद्धिं तव रणे करिष्यति न संशयः ॥ २४
अस्त्रविद्भिरनाधृष्यो दूरपाती दृढायुधः ।
हनिष्यति रिपूंस्तुभ्यं महेन्द्रो दानवानिव ॥ २५
मद्रराजो महेष्वासः शल्यो मेऽतिरथो मतः ।
स्पर्धते वासुदेवेन यो वै नित्यं रणे रणे ॥ २६
भागिनेयान्निजांस्त्यक्त्वा शल्यस्ते रथसत्तमः ।
एष योत्स्यति संग्रामे कृष्णं चक्रगदाधरम् ॥ २७
सागरोर्मिसमैर्वेगैः प्लावयन्निव शात्रवान् ।
भूरिश्रवाः कृतास्त्रश्च तव चापि हितः सुहृत् ॥ २८
सौमदत्तिर्महेष्वासो रथयूथपयूथपः ।
बलक्षयममित्राणां सुमहान्तं करिष्यति ॥ २९
सिन्धुराजो महाराज मतो मे द्विगुणो रथः ।
योत्स्यते समरे राजन्विक्रान्तो रथसत्तमः ॥ ३०
द्रौपदीहरणे पूर्वं परिक्लिष्टः स पाण्डवैः ।
संस्मरंस्तं परिक्लेशं योत्स्यते परवीरहा ॥ ३१
एतेन हि तदा राजंस्तप आस्थाय दारुणम् ।
सुदुर्लभो वरो लब्धः पाण्डवान्योद्धुमाहवे ॥ ३२
स एष रथशार्दूलस्तद्वैरं संस्मरन्रणे ।
योत्स्यते पांडवांस्तात प्राणांस्त्यक्त्वा सुदुस्त्यजान् ३३

इति श्रीमहाभारते उद्योगपर्वणि
द्विषष्ट्यधिकशततमोऽध्यायः ॥ १६२ ॥

१६३

भीष्म उवाच ।

सुदक्षिणस्तु काम्बोजो रथ एकगुणो मतः ।
तवार्थसिद्धिमाकाङ्क्षन्योत्स्यते समरे परैः ॥ १

एतस्य रथसिंहस्य तवार्थे राजसत्तम ।
पराक्रमं यथेन्द्रस्य द्रक्ष्यन्ति कुरवो युधि ॥ २
एतस्य रथवंशो हि तिग्मवेगप्रहारिणाम् ।
काम्बोजानां महाराज शलभानामिवायतिः ॥ ३
नीलो माहिष्मतीवासी नीलवर्मधरस्तव ।
रथवंशेन शत्रूणां कदनं वै करिष्यति ॥ ४
कृतवैरः पुरा चैव सहदेवेन पार्थिवः ।
योत्स्यते सततं राजंस्तवार्थे कुरुसत्तम ॥ ५
विन्दानुविन्दावावन्त्यौ समेतौ रथसत्तमौ ।
कृतिनौ समरे तात दृढवीर्यपराक्रमौ ॥ ६
एतौ तौ पुरुषव्याघ्रौ रिपुसैन्यं प्रधक्ष्यतः ।
गदाप्रासासिनाराचैस्तोमरैश्च भुजच्युतैः ॥ ७
युद्धाभिकामौ समरे क्रीडन्ताविव यूथपौ ।
यूथमध्ये महाराज विचरन्तौ कृतान्तवत् ॥ ८
त्रिगर्ता भ्रातरः पञ्च रथोदारा मता मम ।
कृतवैराश्च पार्थेन विराटनगरे तदा ॥ ९
मकरा इव राजेन्द्र समुद्धततरङ्गिणीम् ।
गङ्गां विक्षोभयिष्यन्ति पार्थानां युधि वाहिनीम् ॥
ते रथाः पञ्च राजेन्द्र येषां सत्यरथो मुखम् ।
एते योत्स्यन्ति समरे संस्मरन्तः पुरा कृतम् ॥ ११
व्यलीकं पाण्डवेयेन भीमसेनानुजेन ह ।
दिशो विजयता राजञ्श्वेतवाहेन भारत ॥ १२
ते हनिष्यन्ति पार्थानां समासाद्य महारथान् ।
वरान्वरान्महेष्वासान्क्षत्रियाणां धुरंधराः ॥ १३
लक्ष्मणस्तव पुत्रस्तु तथा दुःशासनस्य च ।
उभौ तौ पुरुषव्याघ्रौ संग्रामेष्वनिवर्तिनौ ॥ १४
तरुणौ सुकुमारौ च राजपुत्रौ तरस्विनौ ।
युद्धानां च विशेषज्ञौ प्रणेतारौ च सर्वशः ॥ १५
रथौ तौ रथशार्दूल मतौ मे रथसत्तमौ ।
क्षत्रधर्मरतौ वीरौ महत्कर्म करिष्यतः ॥ १६
दण्डधारो महाराज रथ एको नरर्षभः ।
योत्स्यते समरं प्राप्य स्वेन सैन्येन पालितः ॥ १७
बृहद्बलस्तथा राजा कौसल्यो रथसत्तमः ।
रथो मम मतस्तात दृढवेगपराक्रमः ॥ १८
एष योत्स्यति संग्रामे स्वां चमूं संप्रहर्षयन् ।
उग्रायुधो महेष्वासो धार्तराष्ट्रहिते रतः ॥ १९
कृपः शारद्वतो राजन्रथयूथपयूथपः ।
प्रियान्प्राणान्परित्यज्य प्रधक्ष्यति रिपूंस्तव ॥ २०
गौतमस्य महर्षेर्य आचार्यस्य शरद्वतः ।
कार्त्तिकेय इवाजेयः शरस्तम्बात्सुतोऽभवत् ॥ २१
एष सेनां बहुविधां विविधायुधकार्मुकाम् ।
अग्निवत्समरे तात चरिष्यति विमर्दयन् ॥ २२

इति श्रीमहाभारते उद्योगपर्वणि
त्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥

१६४

भीष्म उवाच ।

शकुनिर्मातुलस्तेऽसौ रथ एको नराधिप ।
प्रसज्य पाण्डवैर्वैरं योत्स्यते नात्र संशयः ॥ १
एतस्य सैन्या दुर्धर्षाः समरेऽप्रतियायिनः ।
विकृतायुधभूयिष्ठा वायुवेगसमा जवे ॥ २
द्रोणपुत्रो महेष्वासः सर्वेषामति धन्विनाम् ।
समरे चित्रयोधी च दृढास्त्रश्च महारथः ॥ ३
एतस्य हि महाराज यथा गाण्डीवधन्वनः ।
शरासनाद्विनिर्मुक्ताः संसक्ता यान्ति सायकाः ॥ ४
नैष शक्यो मया वीरः संख्यातुं रथसत्तमः ।
निर्दहेदपि लोकांस्त्रीनिच्छन्नेष महायशाः ॥ ५
क्रोधस्तेजश्च तपसा संभृतोऽऽश्रमवासिना ।
द्रोणेनानुगृहीतश्च दिव्यैरस्त्रैरुदारधीः ॥ ६
दोषस्त्वस्य महानेको येनैष भरतर्षभ ।
न मे रथो नातिरथो मतः पार्थिवसत्तम ॥ ७

जीवितं प्रियमत्यर्थमायुष्कामः सदा द्विजः ।
न ह्यस्य सदृशः कश्चिदुभयोः सेनयोरपि ॥ ८
हन्यादेकरथेनैव देवानामपि वाहिनीम् ।
वपुष्मांस्तलघोषेण स्फोटयेदपि पर्वतान् ॥ ९
असंख्येयगुणो वीरः प्रहर्ता दारुणद्युतिः ।
दण्डपाणिरिवासह्यः कालवत्प्रचरिष्यति ॥ १०
युगान्ताग्निसमः क्रोधे सिंहग्रीवो महामतिः ।
एष भारत युद्धस्य पृष्ठं संशमयिष्यति ॥ ११
पिता त्वस्य महातेजा वृद्धोऽपि युवभिर्वरः ।
रणे कर्म महत्कर्ता तत्र मे नास्ति संशयः ॥ १२
अस्त्रवेगानिलोद्धूतः सेनाकक्षेन्धनोत्थितः ।
पाण्डुपुत्रस्य सैन्यानि प्रधक्ष्यति जये धृतः ॥ १३
रथयूथपयूथानां यूथपः स नरर्षभः ।
भारद्वाजात्मजः कर्ता कर्म तीव्रं हिताय वः ॥ १४
सर्वमूर्धाभिषिक्तानामाचार्यः स्थविरो गुरुः ।
गच्छेदन्तं सृञ्जयानां प्रियस्त्वस्य धनंजयः ॥ १५
नैष जातु महेष्वासः पार्थमक्लिष्टकारिणम् ।
हन्यादाचार्यकं दीप्तं संस्मृत्य गुणनिर्जितम् ॥ १६
श्लाघत्येष सदा वीरः पार्थस्य गुणविस्तरैः ।
पुत्रादभ्यधिकं चैव भारद्वाजोऽनुपश्यति ॥ १७
हन्यादेकरथेनैव देवगन्धर्वदानवान् ।
एकीभूतानपि रणे दिव्यैरस्त्रैः प्रतापवान् ॥ १८
पौरवो राजशार्दूलस्तव राजन्महारथः ।
मतो मम रथो वीर परवीररथारुजः ॥ १९
स्वेन सैन्येन सहितः प्रतपञ्शत्रुवाहिनीम् ।
प्रधक्ष्यति स पाञ्चालान्कक्षं कृष्णगतिर्यथा ॥ २०
सत्यव्रतो रथवरो राजपुत्रो महारथः ।
तव राजन्रिपुबले कालवत्प्रचरिष्यति ॥ २१
एतस्य योधा राजेन्द्र विचित्रकवचायुधाः ।
विचरिष्यन्ति संग्रामे निघ्नन्तः शात्रवांस्तव ॥ २२

वृषसेनो रथाग्र्यस्ते कर्णपुत्रो महारथः ।
प्रधक्ष्यति रिपूणां ते बलानि बलिनां वरः ॥ २३
जलसंधो महातेजा राजन्रथवरस्तव ।
त्यक्ष्यते समरे प्राणान्मागधः परवीरहा ॥ २४
एष योत्स्यति संग्रामे गजस्कन्धविशारदः ।
रथेन वा महाबाहुः क्षपयञ्शत्रुवाहिनीम् ॥ २५
रथ एष महाराज मतो मम नरर्षभः ।
त्वदर्थे त्यक्ष्यति प्राणान्सहसैन्यो महारणे ॥ २६
एष विक्रान्तयोधी च चित्रयोधी च संगरे ।
वीतभीश्चापि ते राजञ्शात्रवैः सह योत्स्यते ॥ २७
बाह्लीकोऽतिरथश्चैव समरे चानिवर्तिता ।
मम राजन्मतो युद्धे शूरो वैवस्वतोपमः ॥ २८
न ह्येष समरं प्राप्य निवर्तेत कथंचन ।
यथा सततगो राजन्नाभिहत्य परान्रणे ॥ २९
सेनापतिर्महाराज सत्यवांस्ते महारथः ।
रणेष्वद्भुतकर्मा च रथः पररथारुजः ॥ ३०
एतस्य समरं दृष्ट्वा न व्यथास्ति कथंचन ।
उत्स्मयन्नभ्युपैत्येष परान्रथपथे स्थितान् ॥ ३१
एष चारिषु विक्रान्तः कर्म सत्पुरुषोचितम् ।
कर्ता विमर्दे सुमहत्त्वदर्थे पुरुषोत्तमः ॥ ३२
अलायुधो राक्षसेन्द्रः क्रूरकर्मा महाबलः ।
हनिष्यति परान्राजन्पूर्ववैरमनुस्मरन् ॥ ३३
एष राक्षससैन्यानां सर्वेषां रथसत्तमः ।
मायावी दृढवैरश्च समरे विचरिष्यति ॥ ३४
प्राग्ज्योतिषाधिपो वीरो भगदत्तः प्रतापवान् ।
गजाङ्कुशधरश्रेष्ठो रथे चैव विशारदः ॥ ३५
एतेन युद्धमभवत्पुरा गाण्डीवधन्वनः ।
दिवसान्सुबहून्राजन्नुभयोर्जयगृद्धिनोः ॥ ३६
ततः सखायं गान्धारे मानयन्पाकशासनम् ।
अकरोत्संविदं तेन पाण्डवेन महात्मना ॥ ३७

एष योत्स्यति संग्रामे गजस्कन्धविशारदः ।
ऐरावतगतो राजा देवानामिव वासवः ॥ ३८

इति श्रीमहाभारते उद्योगपर्वणि
चतुःषष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥

१६५

भीष्म उवाच ।

अचलो वृषकश्चैव भ्रातरौ सहितावुभौ ।
रथौ तव दुराधर्षौ शत्रून्विध्वंसयिष्यतः ॥ १
बलवन्तौ नरव्याघ्रौ दृढक्रोधौ प्रहारिणौ ।
गान्धारमुख्यौ तरुणौ दर्शनीयौ महाबलौ ॥ २
सखा ते दयितो नित्यं य एष रणकर्कशः ।
प्रोत्साहयति राजंस्त्वां विग्रहे पाण्डवैः सह ॥ ३
परुषः कत्थनो नीचः कर्णो वैकर्तनस्तव ।
मन्त्री नेता च बन्धुश्च मानी चात्यन्तमुच्छ्रितः ॥ ४
एष नैव रथः पूर्णो नाप्येवातिरथो नृप ।
वियुक्तः कवचेनैष सहजेन विचेतनः ।
कुण्डलाभ्यां च दिव्याभ्यां वियुक्तः सततं घृणी ॥ ५
अभिशापाच्च रामस्य ब्राह्मणस्य च भाषणात् ।
करणानां वियोगाच्च तेन मेऽर्धरथो मतः ।
नैष फल्गुनमासाद्य पुनर्जीवन्विमोक्ष्यते ॥ ६

संजय उवाच ।

ततोऽब्रवीन्महाबाहुर्द्रोणः शस्त्रभृतां वरः ।
एवमेतद्यथात्थ त्वं न मिथ्यास्तीति किंचन ॥ ७
रणे रणेऽतिमानी च विमुखश्चैव दृश्यते ।
घृणी कर्णः प्रमादी च तेन मेऽर्धरथो मतः ॥ ८
एतच्छ्रुत्वा तु राधेयः क्रोधादुत्फुल्ललोचनः ।
उवाच भीष्मं राजेन्द्र तुदन्वाग्भिः प्रतोदवत् ॥ ९
पितामह यथेष्टं मां वाक्शरैरुपकृन्तसि ।
अनागसं सदा द्वेषादेवमेव पदे पदे ।
मर्षयामि च तत्सर्वं दुर्योधनकृतेन वै ॥ १०
त्वं तु मां मन्यसेऽशक्तं यथा कापुरुषं तथा ।
भवानर्धरथो मह्यं मतो नास्त्यत्र संशयः ॥ ११
सर्वस्य जगतश्चैव गाङ्गेय न मृषा वदे ।
कुरूणामहितो नित्यं न च राजावबुध्यते ॥ १२
को हि नाम समानेषु राजसूदात्तकर्मसु ।
तेजोवधमिमं कुर्याद्विभेदयिषुराहवे ।
यथा त्वं गुणनिर्देशादपराधं चिकीर्षसि ॥ १३
न हायनैर्न पलितैर्न वित्तैर्न च बन्धुभिः ।
महारथत्वं संख्यातुं शक्यं क्षत्रस्य कौरव ॥ १४
बलज्येष्ठं स्मृतं क्षत्रं मन्त्रज्येष्ठा द्विजातयः ।
धनज्येष्ठाः स्मृता वैश्याः शूद्रास्तु वयसाधिकाः ॥
यथेच्छकं स्वयंग्राहाद्रथानतिरथांस्तथा ।
कामद्वेषसमायुक्तो मोहात्प्रकुरुते भवान् ॥ १६
दुर्योधन महाबाहो साधु सम्यगवेक्ष्यताम् ।
त्यज्यतां दुष्टभावोऽयं भीष्मः किल्बिषकृत्तव ॥ १७
भिन्ना हि सेना नृपते दुःसंधेया भवत्युत ।
मौलापि पुरुषव्याघ्र किमु नाना समुत्थिता ॥ १८
एषां द्वैधं समुत्पन्नं योधानां युधि भारत ।
तेजोवधो नः क्रियते प्रत्यक्षेण विशेषतः ॥ १९
रथानां क्व च विज्ञानं क्व च भीष्मोऽल्पचेतनः ।
अहमावारयिष्यामि पाण्डवानामनीकिनीम् ॥ २०
आसाद्य माममोघेषुं गमिष्यन्ति दिशो दश ।
पाण्डवाः सहपञ्चालाः शार्दूलं वृषभा इव ॥ २१
क्व च युद्धविमर्दो वा मन्त्राः सुव्याहृतानि वा ।
क्व च भीष्मो गतवया मन्दात्मा कालमोहितः ॥
स्पर्धते हि सदा नित्यं सर्वेण जगता सह ।
न चान्यं पुरुषं कंचिन्मन्यते मोघदर्शनः ॥ २३
श्रोतव्यं खलु वृद्धानामिति शास्त्रनिदर्शनम् ।
न त्वेवाप्यतिवृद्धानां पुनर्बाला हि ते मताः ॥ २४
अहमेको हनिष्यामि पाण्डवान्नात्र संशयः ।

सुयुद्धे राजशार्दूल यशो भीष्मं गमिष्यति ॥ २५
कृतः सेनापतिस्त्वेष त्वया भीष्मो नराधिप ।
सेनापतिं गुणो गन्ता न तु योधान्कथंचन ॥ २६
नाहं जीवति गाङ्गेये योत्स्ये राजन्कथंचन ।
हते तु भीष्मे योद्धास्मि सर्वैरेव महारथैः ॥ २७

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥

१६६

भीष्म उवाच ।

समुद्यतोऽयं भारो मे सुमहान्सागरोपमः ।
धार्तराष्ट्रस्य संग्रामे वर्षपूगाभिचिन्तितः ॥ १
तस्मिन्नभ्यागते काले प्रतप्ते लोमहर्षणे ।
मिथोभेदो न मे कार्यस्तेन जीवसि सूतज ॥ २
न ह्यहं नाद्य विक्रम्य स्थविरोऽपि शिशोस्तव ।
युद्धश्रद्धां रणे छिन्द्यां जीवितस्य च सूतज ॥ ३
जामदग्न्येन रामेण महास्त्राणि प्रमुञ्चता ।
न मे व्यथाभवत्काचित्त्वं तु मे किं करिष्यसि ॥
कामं नैतत्प्रशंसन्ति सन्तोऽऽत्मबलसंस्तवम् ।
वक्ष्यामि तु त्वां संतप्तो निहीन कुलपांसन ॥ ५
समेतं पार्थिवं क्षत्रं काशिराज्ञः स्वयंवरे ।
निर्जित्यैकरथेनैव यत्कन्यास्तरसा हृताः ॥ ६
ईदृशानां सहस्राणि विशिष्टानामथो पुनः ।
मयैकेन निरस्तानि ससैन्यानि रणाजिरे ॥ ७
त्वां प्राप्य वैरपुरुषं कुरूणामनयो महान् ।
उपस्थितो विनाशाय यतस्व पुरुषो भव ॥ ८
युध्यस्व पार्थं समरे येन विस्पर्धसे सह ।
द्रक्ष्यामि त्वां विनिर्मुक्तमस्माद्युद्धात्सुदुर्मते ॥ ९

संजय उवाच ।

तमुवाच ततो राजा धार्तराष्ट्रो महामनाः ।
मामवेक्षस्व गाङ्गेय कार्यं हि महदुद्यतम् ॥ १०
चिन्त्यतामिदमेवाग्रे मम निःश्रेयसं परम् ।
उभावपि भवन्तौ मे महत्कर्म करिष्यतः ॥ ११
भूयश्च श्रोतुमिच्छामि परेषां रथसत्तमान् ।
ये चैवातिरथास्तत्र तथैव रथयूथपाः ॥ १२
बलाबलममित्राणां श्रोतुमिच्छामि कौरव ।
प्रभातायां रजन्यां वै इदं युद्धं भविष्यति ॥ १३

भीष्म उवाच ।

एते रथास्ते संख्यातास्तथैवातिरथा नृप ।
ये चाप्यर्धरथा राजन्पाण्डवानामतः शृणु ॥ १४
यदि कौतूहलं तेऽद्य पाण्डवानां बले नृप ।
रथसंख्यां महाबाहो सहैभिर्वसुधाधिपैः ॥ १५
स्वयं राजा रथोदारः पाण्डवः कुन्तिनन्दनः ।
अग्निवत्समरे तात चरिष्यति न संशयः ॥ १६
भीमसेनस्तु राजेन्द्र रथोऽष्टगुणसंमितः ।
नागायुतबलो मानी तेजसा न स मानुषः ॥ १७
माद्रीपुत्रौ तु रथिनौ द्वावेव पुरुषर्षभौ ।
अश्विनाविव रूपेण तेजसा च समन्वितौ ॥ १८
एते चमूमुखगताः स्मरन्तः क्लेशमात्मनः ।
रुद्रवत्प्रचरिष्यन्ति तत्र मे नास्ति संशयः ॥ १९
सर्व एव महात्मानः शालस्कन्धा इवोद्गताः ।
प्रादेशेनाधिकाः पुम्भिरन्यैस्ते च प्रमाणतः ॥ २०
सिंहसंहननाः सर्वे पाण्डुपुत्रा महाबलाः ।
चरितब्रह्मचर्याश्च सर्वे चातितपस्विनः ॥ २१
ह्रीमन्तः पुरुषव्याघ्रा व्याघ्रा इव बलोत्कटाः ।
जवे प्रहारे संमर्दे सर्व एवातिमानुषाः ।
सर्वे जितमहीपाला दिग्जये भरतर्षभ ॥ २२
न चैषां पुरुषाः केचिदायुधानि गदाः शरान् ।
विषहन्ति सदा कर्तुमधिज्यान्यपि कौरव ।
उद्यन्तुं वा गदां गुर्वीं शरान्वापि प्रकर्षितुम् ॥ २३
जवे लक्ष्यस्य हरणे भोज्ये पांसुविकर्षणे ।

बालैरपि भवन्तस्तैः सर्व एव विशेषिताः ॥ २४
ते ते सैन्यं समासाद्य व्याघ्रा इव बलोत्कटाः ।
विध्वंसयिष्यन्ति रणे मा स्म तैः सह संगमः ॥
एकैकशस्ते संग्रामे हन्युः सर्वान्महीक्षितः ।
प्रत्यक्षं तव राजेन्द्र राजसूये यथाभवत् ॥ २६
द्रौपद्याश्च परिक्लेशं द्यूते च परुषा गिरः ।
ते संस्मरन्तः संग्रामे विचरिष्यन्ति कालवत् ॥ २७
लोहिताक्षो गुडाकेशो नारायणसहायवान् ।
उभयोः सेनयोर्वीर रथो नास्तीह तादृशः ॥ २८
न हि देवेषु वा पूर्वं दानवेषूरगेषु वा ।
राक्षसेष्वथ यक्षेषु नरेषु कुत एव तु ॥ २९
भूतोऽथ वा भविष्यो वा रथः कश्चिन्मया श्रुतः ।
समायुक्तो महाराज यथा पार्थस्य धीमतः ॥ ३०
वासुदेवश्च संयन्ता योद्धा चैव धनंजयः ।
गाण्डीवं च धनुर्दिव्यं ते चाश्वा वातरंहसः ॥ ३१
अभेद्यं कवचं दिव्यमक्षय्यौ च महेषुधी ।
अस्त्रग्रामश्च माहेन्द्रो रौद्रः कौबेर एव च ॥ ३२
याम्यश्च वारुणश्चैव गदाश्चोग्रप्रदर्शनाः ।
वज्रादीनि च मुख्यानि नानाप्रहरणानि वै ॥ ३३
दानवानां सहस्राणि हिरण्यपुरवासिनाम् ।
हतान्येकरथेनाजौ कस्तस्य सदृशो रथः ॥ ३४
एष हन्याद्धि संरम्भी बलवान्सत्यविक्रमः ।
तव सेनां महाबाहुः स्वां चैव परिपालयन् ॥ ३५
अहं चैनं प्रत्युदियामाचार्यो वा धनंजयम् ।
न तृतीयोऽस्ति राजेन्द्र सेनयोरुभयोरपि ।
य एनं शरवर्षाणि वर्षन्तमुदियाद्रथी ॥ ३६
जीमूत इव घर्मान्ते महावातसमीरितः ।
समायुक्तस्तु कौन्तेयो वासुदेवसहायवान् ।
तरुणश्च कृती चैव जीर्णावावामुभावपि ॥ ३७

संजय उवाच ।

एतच्छ्रुत्वा तु भीष्मस्य राज्ञां दध्वंसिरे तदा ।
काञ्चनाङ्गदिनः पीना भुजाश्चन्दनरूषिताः ॥ ३८
मनोभिः सह सावेगैः संस्मृत्य च पुरातनम् ।
सामर्थ्यं पाण्डवेयानां यथाप्रत्यक्षदर्शनात् ॥ ३९

इति श्रीमहाभारते उद्योगपर्वणि
षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥

१६७

भीष्म उवाच ।

द्रौपदेया महाराज सर्वे पञ्च महारथाः ।
वैराटिरुत्तरश्चैव रथो मम महान्मतः ॥ १
अभिमन्युर्महाराज रथयूथपयूथपः ।
समः पार्थेन समरे वासुदेवेन वा भवेत् ॥ २
लघ्वस्त्रश्चित्रयोधी च मनस्वी दृढविक्रमः ।
संस्मरन्वै परिक्लेशं स्वपितुर्विक्रमिष्यति ॥ ३
सात्यकिर्माधवः शूरो रथयूथपयूथपः ।
एष वृष्णिप्रवीराणाममर्षी जितसाध्वसः ॥ ४
उत्तमौजास्तथा राजन्रथो मम महान्मतः ।
युधामन्युश्च विक्रान्तो रथोदारो नरर्षभः ॥ ५
एतेषां बहुसाहस्रा रथा नागा हयास्तथा ।
योत्स्यन्ते ते तनुं त्यक्त्वा कुन्तीपुत्रप्रियेप्सया ॥ ६
पाण्डवैः सह राजेन्द्र तव सेनासु भारत ।
अग्निमारुतवद्राजन्नाह्वयन्तः परस्परम् ॥ ७
अजेयौ समरे वृद्धौ विराटद्रुपदावुभौ ।
महारथौ महावीर्यौ मतौ मे पुरुषर्षभौ ॥ ८
वयोवृद्धावपि तु तौ क्षत्रधर्मपरायणौ ।
यतिष्येते परं शक्त्या स्थितौ वीरगते पथि ॥ ९
संबन्धकेन राजेन्द्र तौ तु वीर्यबलान्वयात् ।
आर्यवृत्तौ महेष्वासौ स्नेहपाशसितावुभौ ॥ १०
कारणं प्राप्य तु नराः सर्व एव महाभुजाः ।

शूरा वा कातरा वापि भवन्ति नरपुंगव ॥ ११
एकायनगतावेतौ पार्थेन दृढभक्तिकौ ।
त्यक्त्वा प्राणान्परं शक्त्या घटितारौ नराधिप ॥१२
पृथगक्षौहिणीभ्यां तावुभौ संयति दारुणौ ।
संबन्धिभावं रक्षन्तौ महत्कर्म करिष्यतः ॥ १३
लोकवीरौ महेष्वासौ त्यक्तात्मानौ च भारत ।
प्रत्ययं परिरक्षन्तौ महत्कर्म करिष्यतः ॥ १४

इति श्रीमहाभारते उद्योगपर्वणि
सप्तषष्ट्यधिकशततमोऽध्यायः ॥ १६७ ॥

१६८

भीष्म उवाच ।

पाञ्चालराजस्य सुतो राजन्परपुरंजयः ।
शिखण्डी रथमुख्यो मे मतः पार्थस्य भारत ॥ १
एष योत्स्यति संग्रामे नाशयन्पूर्वसंस्थितिम् ।
परं यशो विप्रथयंस्तव सेनासु भारत ॥ २
एतस्य बहुलाः सेनाः पाञ्चालाश्च प्रभद्रकाः ।
तेनासौ रथवंशेन महत्कर्म करिष्यति ॥ ३
धृष्टद्युम्नश्च सेनानीः सर्वसेनासु भारत ।
मतो मेऽतिरथो राजन्द्रोणशिष्यो महारथः ॥ ४
एष योत्स्यति संग्रामे सूदयन्वै परान्रणे ।
भगवानिव संक्रुद्धः पिनाकी युगसंक्षये ॥ ५
एतस्य तद्रथानीकं कथयन्ति रणप्रियाः ।
बहुत्वात्सागरप्रख्यं देवानामिव संयुगे ॥ ६
क्षत्रधर्मा तु राजेन्द्र मतो मेऽर्धरथो नृप ।
धृष्टद्युम्नस्य तनयो बाल्यान्नातिकृतश्रमः ॥ ७
शिशुपालसुतो वीरश्चेदिराजो महारथः ।
धृष्टकेतुर्महेष्वासः संबन्धी पाण्डवस्य ह ॥ ८
एष चेदिपतिः शूरः सह पुत्रेण भारत ।
महारथेनासुकरं महत्कर्म करिष्यति ॥ ९
क्षत्रधर्मरतो मह्यं मतः परपुरंजयः ।
क्षत्रदेवस्तु राजेन्द्र पाण्डवेषु रथोत्तमः ।
जयन्तश्चामितौजाश्च सत्यजिच्च महारथः ॥ १०
महारथा महात्मानः सर्वे पाञ्चालसत्तमाः ।
योत्स्यन्ते समरे तात संरब्धा इव कुञ्जराः ॥ ११
अजो भोजश्च विक्रान्तौ पाण्डवेषु महारथौ ।
पाण्डवानां सहायार्थे परं शक्त्या यतिष्यतः ।
शीघ्रास्त्रौ चित्रयोद्धारौ कृतिनौ दृढविक्रमौ ॥ १२
केकयाः पञ्च राजेन्द्र भ्रातरो युद्धदुर्मदाः ।
सर्व एते रथोदाराः सर्वे लोहितकध्वजाः ॥ १३
काशिकः सुकुमारश्च नीलो यश्चापरो नृपः ।
सूर्यदत्तश्च शङ्खश्च मदिराश्वश्च नामतः ॥ १४
सर्व एते रथोदाराः सर्वे चाहवलक्षणाः ।
सर्वास्त्रविदुषः सर्वे महात्मानो मता मम ॥ १५
वार्धक्षेमिर्महाराज रथो मम महान्मतः ।
चित्रायुधश्च नृपतिर्मतो मे रथसत्तमः ।
स हि संग्रामशोभी च भक्तश्चापि किरीटिनः ॥१६
चेकितानः सत्यधृतिः पाण्डवानां महारथौ ।
द्वाविमौ पुरुषव्याघ्रौ रथोदारौ मतौ मम ॥ १७
व्याघ्रदत्तश्च राजेन्द्र चन्द्रसेनश्च भारत ।
मतौ मम रथोदारौ पाण्डवानां न संशयः ॥ १८
सेनाबिन्दुश्च राजेन्द्र क्रोधहन्ता च नामतः ।
यः समो वासुदेवेन भीमसेनेन चाभिभूः ।
स योत्स्यतीह विक्रम्य समरे तव सैनिकैः ॥ १९
मां द्रोणं च कृपं चैव यथा संमन्यते भवान् ।
तथा स समरश्लाघी मन्तव्यो रथसत्तमः ॥ २०
काश्यः परमशीघ्रास्त्रः श्लाघनीयो रथोत्तमः ।
रथ एकगुणो मह्यं मतः परपुरंजयः ॥ २१
अयं च युधि विक्रान्तो मन्तव्योऽष्टगुणो रथः ।
सत्यजित्समरश्लाघी द्रुपदस्यात्मजो युवा ॥ २२
गतः सोऽतिरथत्वं हि धृष्टद्युम्नेन संमितः ।

पाण्डवानां यशस्कामः परं कर्म करिष्यति ॥ २३
अनुरक्तश्च शूरश्च रथोऽयमपरो महान् ।
पाण्ड्यराजो महावीर्यः पाण्डवानां धुरंधरः ॥ २४
दृढधन्वा महेष्वासः पाण्डवानां रथोत्तमः ।
श्रेणिमान्कौरवश्रेष्ठ वसुदानश्च पार्थिवः ।
उभावेतावतिरथौ मतौ मम परंतप ॥ २५

इति श्रीमहाभारते उद्योगपर्वणि
अष्टषष्ट्यधिकशततमोऽध्यायः ॥ १६८ ॥

१६९

भीष्म उवाच ।

रोचमानो महाराज पाण्डवानां महारथः ।
योत्स्यतेऽमरवत्संख्ये परसैन्येषु भारत ॥ १
पुरुजित्कुन्तिभोजश्च महेष्वासो महाबलः ।
मातुलो भीमसेनस्य स च मेऽतिरथो मतः ॥ २
एष वीरो महेष्वासः कृती च निपुणश्च ह ।
चित्रयोधी च शक्तश्च मतो मे रथपुंगवः ॥ ३
स योत्स्यति हि विक्रम्य मघवानिव दानवैः ।
योधाश्चास्य परिख्याताः सर्वे युद्धविशारदाः ॥ ४
भागिनेयकृते वीरः स करिष्यति संगरे ।
सुमहत्कर्म पाण्डूनां स्थितः प्रियहिते नृपः ॥ ५
भैमसेनिर्महाराज हैडिम्बो राक्षसेश्वरः ।
मतो मे बहुमायावी रथयूथपयूथपः ॥ ६
योत्स्यते समरे तात मायाभिः समरप्रियः ।
ये चास्य राक्षसाः शूराः सचिवा वशवर्तिनः ॥ ७
एते चान्ये च बहवो नानाजनपदेश्वराः ।
समेताः पाण्डवस्यार्थे वासुदेवपुरोगमाः ॥ ८
एते प्राधान्यतो राजन्पाण्डवस्य महात्मनः ।
रथाश्चातिरथाश्चैव ये चाप्यर्धरथा मताः ॥ ९
नेष्यन्ति समरे सेनां भीमां यौधिष्ठिरीं नृप ।
महेन्द्रेणेव वीरेण पाल्यमानां किरीटिना ॥ १०
तैरहं समरे वीर त्वामायद्भिर्जयैषिभिः ।
योत्स्यामि जयमाकाङ्क्षन्नथ वा निधनं रणे ॥ ११
पार्थं च वासुदेवं च चक्रगाण्डीवधारिणौ ।
संध्यागताविवार्केन्दू समेष्ये पुरुषोत्तमौ ॥ १२
ये चैव ते रथोदाराः पाण्डुपुत्रस्य सैनिकाः ।
सहसैन्यानहं तांश्च प्रतीयां रणमूर्धनि ॥ १३
एते रथाश्चातिरथाश्च तुभ्यं
यथाप्रधानं नृप कीर्तिता मया ।
तथा राजन्नर्धरथाश्च केचि-
त्तथैव तेषामपि कौरवेन्द्र ॥ १४
अर्जुनं वासुदेवं च ये चान्ये तत्र पार्थिवाः ।
सर्वानावारयिष्यामि यावद्द्रक्ष्यामि भारत ॥ १५
पाञ्चाल्यं तु महाबाहो नाहं हन्यां शिखण्डिनम् ।
उद्यतेषुमभिप्रेक्ष्य प्रतियुध्यन्तमाहवे ॥ १६
लोकस्तद्वेद यदहं पितुः प्रियचिकीर्षया ।
प्राप्तं राज्यं परित्यज्य ब्रह्मचर्ये धृतव्रतः ॥ १७
चित्राङ्गदं कौरवाणामहं राज्येऽभ्यषेचयम् ।
विचित्रवीर्यं च शिशुं यौवराज्येऽभ्यषेचयम् ॥ १८
देवव्रतत्वं विख्याप्य पृथिव्यां सर्वराजसु ।
नैव हन्यां स्त्रियं जातु न स्त्रीपूर्वं कथंचन ॥ १९
स हि स्त्रीपूर्वको राजञ्शिखण्डी यदि ते श्रुतः ।
कन्या भूत्वा पुमाञ्जातो न योत्स्ये तेन भारत ॥
सर्वांस्त्वन्यान्हनिष्यामि पार्थिवान्भरतर्षभ ।
यान्समेष्यामि समरे न तु कुन्तीसुतान्नृप ॥ २१

इति श्रीमहाभारते उद्योगपर्वणि
एकोनसप्तत्यधिकशततमोऽध्यायः ॥ १६९ ॥
॥ समाप्तं रथातिरथसंख्यापर्व ॥

१७०

दुर्योधन उवाच ।

किमर्थं भरतश्रेष्ठ न हन्यास्त्वं शिखण्डिनम् ।

उद्यतेषुमथो दृष्ट्वा समरेष्वाततायिनम् ॥ १
पूर्वमुक्त्वा महाबाहो पाण्डवान्सह सोमकैः ।
वधिष्यामीति गाङ्गेय तन्मे ब्रूहि पितामह ॥ २

भीष्म उवाच ।

शृणु दुर्योधन कथां सहैभिर्वसुधाधिपैः ।
यदर्थं युधि संप्रेक्ष्य नाहं हन्यां शिखण्डिनम् ॥ ३
महाराजो मम पिता शंतनुर्भरतर्षभः ।
दिष्टान्तं प्राप धर्मात्मा समये पुरुषर्षभ ॥ ४
ततोऽहं भरतश्रेष्ठ प्रतिज्ञां परिपालयन् ।
चित्राङ्गदं भ्रातरं वै महाराज्येऽभ्यषेचयम् ॥ ५
तस्मिंश्च निधनं प्राप्ते सत्यवत्या मते स्थितः ।
विचित्रवीर्यं राजानमभ्यषिञ्चं यथाविधि ॥ ६
मयाभिषिक्तो राजेन्द्र यवीयानपि धर्मतः ।
वैचित्रवीर्यो धर्मात्मा मामेव समुदैक्षत ॥ ७
तस्य दारक्रियां तात चिकीर्षुरहमप्युत ।
अनुरूपादिव कुलादिति चिन्त्य मनो दधे ॥ ८
तथाश्रौषं महाबाहो तिस्रः कन्याः स्वयंवरे ।
रूपेणाप्रतिमाः सर्वाः काशिराजसुतास्तदा ।
अम्बा चैवाम्बिका चैव तथैवाम्बालिकापरा ॥ ९
राजानश्च समाहूताः पृथिव्यां भरतर्षभ ।
अम्बा ज्येष्ठाभवत्तासामम्बिका त्वथ मध्यमा ।
अम्बालिका च राजेन्द्र राजकन्या यवीयसी ॥ १०
सोऽहमेकरथेनैव गतः काशिपतेः पुरीम् ।
अपश्यं ता महाबाहो तिस्रः कन्याः स्वलंकृताः ।
राज्ञश्चैव समावृत्तान्पार्थिवान्पृथिवीपते ॥ ११
ततोऽहं तान्नृपान्सर्वानाहूय समरे स्थितान् ।
रथमारोपयांचक्रे कन्यास्ता भरतर्षभ ॥ १२
वीर्यशुल्काश्च ता ज्ञात्वा समारोप्य रथं तदा ।
अवोचं पार्थिवान्सर्वानहं तत्र समागतान् ।
भीष्मः शांतनवः कन्या हरतीति पुनः पुनः ॥ १३
ते यतध्वं परं शक्त्या सर्वे मोक्षाय पार्थिवाः ।
प्रसह्य हि नयाम्येष मिषतां वो नराधिपाः ॥ १४
ततस्ते पृथिवीपालाः समुत्पेतुरुदायुधाः ।
योगो योग इति क्रुद्धाः सारथींश्चाप्यचोदयन् ॥
ते रथैर्मेघसंकाशैर्गजैश्च गजयोधिनः ।
पृष्ठ्यैश्चाश्वैर्महीपालाः समुत्पेतुरुदायुधाः ॥ १६
ततस्ते मां महीपालाः सर्व एव विशां पते ।
रथव्रातेन महता सर्वतः पर्यवारयन् ॥ १७
तानहं शरवर्षेण महता प्रत्यवारयम् ।
सर्वान्नृपांश्चाप्यजयं देवराडिव दानवान् ॥ १८
तेषामापततां चित्रान्ध्वजान्हेमपरिष्कृतान् ।
एकैकेन हि बाणेन भूमौ पातितवानहम् ॥ १९
हयांश्चैषां गजांश्चैव सारथींश्चाप्यहं रणे ।
अपातयं शरैर्दीप्तैः प्रहसन्पुरुषर्षभ ॥ २०
ते निवृत्ताश्च भग्नाश्च दृष्ट्वा तल्लाघवं मम ।
अथाहं हास्तिनपुरमायां जित्वा महीक्षितः ॥ २१
ततोऽहं ताश्च कन्या वै भ्रातुरर्थाय भारत ।
तच्च कर्म महाबाहो सत्यवत्यै न्यवेदयम् ॥ २२

इति श्रीमहाभारते उद्योगपर्वणि
सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥

१७१

भीष्म उवाच ।

ततोऽहं भरतश्रेष्ठ मातरं वीरमातरम् ।
अभिगम्योपसंगृह्य दाशेयीमिदमब्रुवम् ॥ १
इमाः काशिपतेः कन्या मया निर्जित्य पार्थिवान् ।
विचित्रवीर्यस्य कृते वीर्यशुल्का उपार्जिताः ॥ २
ततो मूर्धन्युपाघ्राय पर्यश्रुनयना नृप ।
आह सत्यवती हृष्टा दिष्ट्या पुत्र जितं त्वया ॥ ३
सत्यवत्यास्त्वनुमते विवाहे समुपस्थिते ।
उवाच वाक्यं सव्रीडा ज्येष्ठा काशिपतेः सुता ॥ ४

भीष्म त्वमसि धर्मज्ञः सर्वशास्त्रविशारदः ।
श्रुत्वा च धर्म्यं वचनं मह्यं कर्तुमिहार्हसि ॥ ५
मया शाल्वपतिः पूर्वं मनसाभिवृतो वरः ।
तेन चास्मि वृता पूर्वं रहस्यविदिते पितुः ॥ ६
कथं मामन्यकामां त्वं राजञ्शास्त्रमधीत्य वै ।
वासयेथा गृहे भीष्म कौरवः सन्विशेषतः ॥ ७
एतद्बुद्ध्या विनिश्चित्य मनसा भरतर्षभ ।
यत्क्षमं ते महाबाहो तदिहारब्धुमर्हसि ॥ ८
स मां प्रतीक्षते व्यक्तं शाल्वराजो विशां पते ।
कृपां कुरु महाबाहो मयि धर्मभृतां वर ।
त्वं हि सत्यव्रतो वीर पृथिव्यामिति नः श्रुतम् ॥ ९

इति श्रीमहाभारते उद्योगपर्वणि
एकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥

१७२

भीष्म उवाच ।

ततोऽहं समनुज्ञाप्य कालीं सत्यवतीं तदा ।
मन्त्रिणश्च द्विजांश्चैव तथैव च पुरोहितान् ।
समनुज्ञासिषं कन्यां ज्येष्ठामम्बां नराधिप ॥ १
अनुज्ञाता ययौ सा तु कन्या शाल्वपतेः पुरम् ।
वृद्धैर्द्विजातिभिर्गुप्ता धात्र्या चानुगता तदा ।
अतीत्य च तमध्वानमाससाद नराधिपम् ॥ २
सा तमासाद्य राजानं शाल्वं वचनमब्रवीत् ।
आगताहं महाबाहो त्वामुद्दिश्य महाद्युते ॥ ३
तामब्रवीच्छाल्वपतिः स्मयन्निव विशां पते ।
त्वयान्यपूर्वया नाहं भार्यार्थी वरवर्णिनि ॥ ४
गच्छ भद्रे पुनस्तत्र सकाशं भारतस्य वै ।
नाहमिच्छामि भीष्मेण गृहीतां त्वां प्रसह्य वै ॥ ५
त्वं हि निर्जित्य भीष्मेण नीता प्रीतिमती तदा ।
परामृश्य महायुद्धे निर्जित्य पृथिवीपतीन् ।
नाहं त्वय्यन्यपूर्वायां भार्यार्थी वरवर्णिनि ॥ ६
कथमस्मद्विधो राजा परपूर्वां प्रवेशयेत् ।
नारीं विदितविज्ञानः परेषां धर्ममादिशन् ।
यथेष्टं गम्यतां भद्रे मा ते कालोऽत्यगादयम् ॥ ७
अम्बा तमब्रवीद्राजन्ननङ्गशरपीडिता ।
मैवं वद महीपाल नैतदेवं कथंचन ॥ ८
नास्मि प्रीतिमती नीता भीष्मेणामित्रकर्शन ।
बलान्नीतास्मि रुदती विद्राव्य पृथिवीपतीन् ॥ ९
भजस्व मां शाल्वपते भक्तां बालामनागसम् ।
भक्तानां हि परित्यागो न धर्मेषु प्रशस्यते ॥ १०
साहमामन्त्र्य गाङ्गेयं समरेष्वनिवर्तिनम् ।
अनुज्ञाता च तेनैव तथैव गृहमागता ॥ ११
न स भीष्मो महाबाहुर्मामिच्छति विशां पते ।
भ्रातृहेतोः समारम्भो भीष्मस्येति श्रुतं मया ॥१२
भगिन्यौ मम ये नीते अम्बिकाम्बालिके नृप ।
प्रादाद्विचित्रवीर्याय गाङ्गेयो हि यवीयसे ॥ १३
यथा शाल्वपते नान्यं नरं ध्यामि कथंचन ।
त्वामृते पुरुषव्याघ्र तथा मूर्धानमालभे ॥ १४
न चान्यपूर्वा राजेन्द्र त्वामहं समुपस्थिता ।
सत्यं ब्रवीमि शाल्वैतत्सत्येनात्मानमालभे ॥ १५
भजस्व मां विशालाक्ष स्वयं कन्यामुपस्थिताम् ।
अनन्यपूर्वां राजेन्द्र त्वत्प्रसादाभिकाङ्क्षिणीम् ॥ १६
तामेवं भाषमाणां तु शाल्वः काशिपतेः सुताम् ।
अत्यजद्भरतश्रेष्ठ त्वचं जीर्णामिवोरगः ॥ १७
एवं बहुविधैर्वाक्यैर्याच्यमानस्तयानघ ।
नाश्रद्दधच्छाल्वपतिः कन्याया भरतर्षभ ॥ १८
ततः सा मन्युनाविष्टा ज्येष्ठा काशिपतेः सुता ।
अब्रवीत्साश्रुनयना बाष्पविह्वलया गिरा ॥ १९
त्वया त्यक्ता गमिष्यामि यत्र यत्र विशां पते ।
तत्र मे सन्तु गतयः सन्तः सत्यं यथाब्रुवम् ॥ २०
एवं संभाषमाणां तु नृशंसः शाल्वराट् तदा ।

पर्यत्यजत कौरव्य करुणं परिदेवतीम् ॥ २१
गच्छ गच्छेति तां शाल्वः पुनः पुनरभाषत ।
बिभेमि भीष्मात्सुश्रोणि त्वं च भीष्मपरिग्रहः ॥ २२
एवमुक्ता तु सा तेन शाल्वेनादीर्घदर्शिना ।
निश्चक्राम पुराद्दीना रुदती कुररी यथा ॥ २३

इति श्रीमहाभारते उद्योगपर्वणि
द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥

१७३

भीष्म उवाच ।

सा निष्क्रमन्ती नगराच्चिन्तयामास भारत ।
पृथिव्यां नास्ति युवतिर्विषमस्थतरा मया ।
बान्धवैर्विप्रहीनास्मि शाल्वेन च निराकृता ॥ १
न च शक्यं पुनर्गन्तुं मया वारणसाह्वयम् ।
अनुज्ञातास्मि भीष्मेण शाल्वमुद्दिश्य कारणम् ॥ २
किं नु गर्हाम्यथात्मानमथ भीष्मं दुरासदम् ।
आहोस्वित्पितरं मूढं यो मेऽकार्षीत्स्वयंवरम् ॥ ३
ममायं स्वकृतो दोषो याहं भीष्मरथात्तदा ।
प्रवृत्ते वैशसे युद्धे शाल्वार्थं नापतं पुरा ।
तस्येयं फलनिर्वृत्तिर्यदापन्नास्मि मूढवत् ॥ ४
धिग्भीष्मं धिक्च मे मन्दं पितरं मूढचेतसम् ।
येनाहं वीर्यशुल्केन पण्यस्त्रीवत्प्रवेरिता ॥ ५
धिङ्मां धिक्शाल्वराजानं धिग्धातारमथापि च ।
येषां दुर्नीतभावेन प्राप्तास्म्यापदमुत्तमाम् ॥ ६
सर्वथा भागधेयानि स्वानि प्राप्नोति मानवः ।
अनयस्यास्य तु मुखं भीष्मः शांतनवो मम ॥ ७
सा भीष्मे प्रतिकर्तव्यमहं पश्यामि सांप्रतम् ।
तपसा वा युधा वापि दुःखहेतुः स मे मतः ।
को नु भीष्मं युधा जेतुमुत्सहेत महीपतिः ॥ ८
एवं सा परिनिश्चित्य जगाम नगराद्बहिः ।
आश्रमं पुण्यशीलानां तापसानां महात्मनाम् ।
ततस्तामवसद्रात्रिं तापसैः परिवारिता ॥ ९
आचख्यौ च यथा वृत्तं सर्वमात्मनि भारत ।
विस्तरेण महाबाहो निखिलेन शुचिस्मिता ।
हरणं च विसर्गं च शाल्वेन च विसर्जनम् ॥ १०
ततस्तत्र महानासीद्ब्राह्मणः संशितव्रतः ।
शैखावत्यस्तपोवृद्धः शास्त्रे चारण्यके गुरुः ॥ ११
आर्तां तामाह स मुनिः शैखावत्यो महातपाः ।
निःश्वसन्तीं सतीं बालां दुःखशोकपरायणाम् ॥ १२
एवं गते किं नु भद्रे शक्यं कर्तुं तपस्विभिः ।
आश्रमस्थैर्महाभागैस्तपोनित्यैर्महात्मभिः ॥ १३
सा त्वेनमब्रवीद्राजन्क्रियतां मदनुग्रहः ।
प्रव्राजितुमिहेच्छामि तपस्तप्स्यामि दुश्चरम् ॥ १४
मयैवैतानि कर्माणि पूर्वदेहेषु मूढया ।
कृतानि नूनं पापानि तेषामेतत्फलं ध्रुवम् ॥ १५
नोत्सहेयं पुनर्गन्तुं स्वजनं प्रति तापसाः ।
प्रत्याख्याता निरानन्दा शाल्वेन च निराकृता ॥
उपदिष्टमिहेच्छामि तापस्यं वीतकल्मषाः ।
युष्माभिर्देवसंकाशाः कृपा भवतु वो मयि ॥ १७
स तामाश्वासयत्कन्यां दृष्टान्तागमहेतुभिः ।
सान्त्वयामास कार्यं च प्रतिजज्ञे द्विजैः सह ॥ १८

इति श्रीमहाभारते उद्योगपर्वणि
त्रिसप्तत्यधिकशततमोऽध्यायः ॥ १७३ ॥

१७४

भीष्म उवाच ।

ततस्ते तापसाः सर्वे कार्यवन्तोऽभवंस्तदा ।
तां कन्यां चिन्तयन्तो वै किं कार्यमिति धर्मिणः ॥
केचिदाहुः पितुर्वेश्म नीयतामिति तापसाः ।
केचिदस्मदुपालम्भे मतिं चक्रुर्द्विजोत्तमाः ॥ २
केचिच्छाल्वपतिं गत्वा नियोज्यमिति मेनिरे ।
नेति केचिद्व्यवस्यन्ति प्रत्याख्याता हि तेन सा ॥ ३

एवं गते किं नु शक्यं भद्रे कर्तुं मनीषिभिः ।
पुनरूचुश्च ते सर्वे तापसाः संशितव्रताः ॥ ४
अलं प्रव्रजितेनेह भद्रे शृणु हितं वचः ।
इतो गच्छस्व भद्रं ते पितुरेव निवेशनम् ॥ ५
प्रतिपत्स्यति राजा स पिता ते यदनन्तरम् ।
तत्र वत्स्यसि कल्याणि सुखं सर्वगुणान्विता ।
न च तेऽन्या गतिर्न्याय्या भवेद्भद्रे यथा पिता ॥६
पतिर्वापि गतिर्नार्याः पिता वा वरवर्णिनि ।
गतिः पतिः समस्थाया विषमे तु पिता गतिः ॥ ७
प्रव्रज्या हि सुदुःखेयं सुकुमार्या विशेषतः ।
राजपुत्र्याः प्रकृत्या च कुमार्यास्तव भामिनि ॥ ८
भद्रे दोषा हि विद्यन्ते बहवो वरवर्णिनि ।
आश्रमे वै वसन्त्यास्ते न भवेयुः पितुर्गृहे ॥ ९
ततस्तु तेऽब्रुवन्वाक्यं ब्राह्मणास्तां तपस्विनीम् ।
त्वामिहैकाकिनीं दृष्ट्वा निर्जने गहने वने ।
प्रार्थयिष्यन्ति राजेन्द्रास्तस्मान्मैवं मनः कृथाः ॥१०

अम्बोवाच ।

न शक्यं काशिनगरीं पुनर्गन्तुं पितुर्गृहान् ।
अवज्ञाता भविष्यामि बान्धवानां न संशयः ॥ ११
उषिता ह्यन्यथा बाल्ये पितुर्वेश्मनि तापसाः ।
नाहं गमिष्ये भद्रं वस्तत्र यत्र पिता मम ।
तपस्तप्तुमभीप्सामि तापसैः परिपालिता ॥ १२
यथा परेऽपि मे लोके न स्यादेवं महात्ययः ।
दौर्भाग्यं ब्राह्मणश्रेष्ठास्तस्मात्तप्स्याम्यहं तपः ॥ १३

भीष्म उवाच ।

इत्येवं तेषु विप्रेषु चिन्तयत्सु तथा तथा ।
राजर्षिस्तद्वनं प्राप्तस्तपस्वी होत्रवाहनः ॥ १४
ततस्ते तापसाः सर्वे पूजयन्ति स्म तं नृपम् ।
पूजाभिः स्वागताद्याभिरासनेनोदकेन च ॥ १५
तस्योपविष्टस्य ततो विश्रान्तस्योपशृण्वतः ।
पुनरेव कथां चक्रुः कन्यां प्रति वनौकसः ॥ १६
अम्बायास्तां कथां श्रुत्वा काशिराज्ञश्च भारत ।
स वेपमान उत्थाय मातुरस्याः पिता तदा ।
तां कन्यामङ्कमारोप्य पर्याश्वासयत प्रभो ॥ १७
स तामपृच्छत्कार्त्स्न्येन व्यसनोत्पत्तिमादितः ।
सा च तस्मै यथावृत्तं विस्तरेण न्यवेदयत् ॥ १८
ततः स राजर्षिरभूद्दुःखशोकसमन्वितः ।
कार्यं च प्रतिपेदे तन्मनसा सुमहातपाः ॥ १९
अब्रवीद्वेपमानश्च कन्यामार्तां सुदुःखितः ।
मा गाः पितृगृहं भद्रे मातुस्ते जनको ह्यहम् ॥ २०
दुःखं छेत्स्यामि तेऽहं वै मयि वर्तस्व पुत्रिके ।
पर्याप्तं ते मनः पुत्रि यदेवं परिशुष्यसि ॥ २१
गच्छ मद्वचनाद्रामं जामदग्न्यं तपस्विनम् ।
रामस्तव महद्दुःखं शोकं चापनयिष्यति ।
हनिष्यति रणे भीष्मं न करिष्यति चेद्वचः ॥ २२
तं गच्छ भार्गवश्रेष्ठं कालाग्निसमतेजसम् ।
प्रतिष्ठापयिता स त्वां समे पथि महातपाः ॥ २३
ततस्तु सस्वरं बाष्पमुत्सृजन्ती पुनः पुनः ।
अब्रवीत्पितरं मातुः सा तदा होत्रवाहनम् ॥ २४
अभिवादयित्वा शिरसा गमिष्ये तव शासनात् ।
अपि नामाद्य पश्येयमार्यं तं लोकविश्रुतम् ॥ २५
कथं च तीव्रं दुःखं मे हनिष्यति स भार्गवः ।
एतदिच्छाम्यहं श्रोतुमथ यास्यामि तत्र वै ॥ २६

इति श्रीमहाभारते उद्योगपर्वणि
चतुःसप्तत्यधिकशततमोऽध्यायः ॥ १७४ ॥

१७५

होत्रवाहन उवाच ।

रामं द्रक्ष्यसि वत्से त्वं जामदग्न्यं महावने ।
उग्रे तपसि वर्तन्तं सत्यसंधं महाबलम् ॥ १
महेन्द्रे वै गिरिश्रेष्ठे रामं नित्यमुपासते ।

ऋषयो वेदविदुषो गन्धर्वाप्सरसस्तथा ॥ २
तत्र गच्छस्व भद्रं ते ब्रूयाश्चैनं वचो मम ।
अभिवाद्य पूर्वं शिरसा तपोवृद्धं दृढव्रतम् ॥ ३
ब्रूयाश्चैनं पुनर्भद्रे यत्ते कार्यं मनीषितम् ।
मयि संकीर्तिते रामः सर्वं तत्ते करिष्यति ॥ ४
मम रामः सखा वत्से प्रीतियुक्तः सुहृच्च मे ।
जमदग्निसुतो वीरः सर्वशस्त्रभृतां वरः ॥ ५
एवं ब्रुवति कन्यां तु पार्थिवे होत्रवाहने ।
अकृतव्रणः प्रादुरासीद्रामस्यानुचरः प्रियः ॥ ६
ततस्ते मुनयः सर्वे समुत्तस्थुः सहस्रशः ।
स च राजा वयोवृद्धः सृञ्जयो होत्रवाहनः ॥ ७
ततः पृष्ट्वा यथान्यायमन्योन्यं ते वनौकसः ।
सहिता भरतश्रेष्ठ निषेदुः परिवार्य तम् ॥ ८
ततस्ते कथयामासुः कथास्तास्ता मनोरमाः ।
कान्ता दिव्याश्च राजेन्द्र प्रीतिहर्षमुदा युताः ॥ ९
ततः कथान्ते राजर्षिर्महात्मा होत्रवाहनः ।
रामं श्रेष्ठं महर्षीणामपृच्छदकृतव्रणम् ॥ १०
क्व संप्रति महाबाहो जामदग्न्यः प्रतापवान् ।
अकृतव्रण शक्यो वै द्रष्टुं वेदविदां वरः ॥ ११

अकृतव्रण उवाच ।

भवन्तमेव सततं रामः कीर्तयति प्रभो ।
सृञ्जयो मे प्रियसखो राजर्षिरिति पार्थिव ॥ १२
इह रामः प्रभाते श्वो भवितेति मतिर्मम ।
द्रष्टास्येनमिहायान्तं तव दर्शनकाङ्क्षया ॥ १३
इयं च कन्या राजर्षे किमर्थं वनमागता ।
कस्य चेयं तव च का भवतीच्छामि वेदितुम् ॥

होत्रवाहन उवाच ।

दौहित्रीयं मम विभो काशिराजसुता शुभा ।
ज्येष्ठा स्वयंवरे तस्थौ भगिनीभ्यां सहानघ ॥ १५
इयमम्बेति विख्याता ज्येष्ठा काशिपतेः सुता ।
अम्बिकाम्बालिके त्वन्ये यवीयस्यौ तपोधन ॥ १६
समेतं पार्थिवं क्षत्रं काशिपुर्यां ततोऽभवत् ।
कन्यानिमित्तं ब्रह्मर्षे तत्रासीदुत्सवो महान् ॥ १७
ततः किल महावीर्यो भीष्मः शांतनवो नृपान् ।
अवाक्षिप्य महातेजास्तिस्रः कन्या जहार ताः ॥१८
निर्जित्य पृथिवीपालानथ भीष्मो गजाह्वयम् ।
आजगाम विशुद्धात्मा कन्याभिः सह भारत ॥ १९
सत्यवत्यै निवेद्याथ विवाहार्थमनन्तरम् ।
भ्रातुर्विचित्रवीर्यस्य समाज्ञापयत प्रभुः ॥ २०
ततो वैवाहिकं दृष्ट्वा कन्येयं समुपार्जितम् ।
अब्रवीत्तत्र गाङ्गेयं मन्त्रिमध्ये द्विजर्षभ ॥ २१
मया शाल्वपतिर्वीर मनसाभिवृतः पतिः ।
न मामर्हसि धर्मज्ञ परचित्तां प्रदापितुम् ॥ २२
तच्छ्रुत्वा वचनं भीष्मः संमन्त्र्य सह मन्त्रिभिः ।
निश्चित्य विससर्जेमां सत्यवत्या मते स्थितः ॥ २३
अनुज्ञाता तु भीष्मेण शाल्वं सौभपतिं ततः ।
कन्येयं मुदिता विप्र काले वचनमब्रवीत् ॥ २४
विसर्जितास्मि भीष्मेण धर्मं मां प्रतिपादय ।
मनसाभिवृतः पूर्वं मया त्वं पार्थिवर्षभ ॥ २५
प्रत्याचख्यौ च शाल्वोऽपि चारित्रस्याभिशङ्कितः ।
सेयं तपोवनं प्राप्ता तापस्येऽभिरता भृशम् ॥ २६
मया च प्रत्यभिज्ञाता वंशस्य परिकीर्तनात् ।
अस्य दुःखस्य चोत्पत्तिं भीष्ममेवेह मन्यते ॥२७

अम्बोवाच ।

भगवन्नेवमेवैतद्यथाह पृथिवीपतिः ।
शरीरकर्ता मातुर्मे सृञ्जयो होत्रवाहनः ॥ २८
न ह्युत्सहे स्वनगरं प्रतियातुं तपोधन ।
अवमानभयाच्चैव व्रीडया च महामुने ॥ २९
यत्तु मां भगवान्रामो वक्ष्यति द्विजसत्तम ।

तन्मे कार्यतमं कार्यमिति मे भगवन्मतिः ॥ ३०

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चसप्तत्यधिकशततमोऽध्यायः ॥ १७५ ॥

१७६

अकृतव्रण उवाच ।

दुःखद्वयमिदं भद्रे कतरस्य चिकीर्षसि ।
प्रतिकर्तव्यमबले तत्त्वं वत्से ब्रवीहि मे ॥ १
यदि सौभपतिर्भद्रे नियोक्तव्यो मते तव ।
नियोक्ष्यति महात्मा तं रामस्त्वद्धितकाम्यया ॥ २
अथापगेयं भीष्मं तं रामेणेच्छसि धीमता ।
रणे विनिर्जितं द्रष्टुं कुर्यात्तदपि भार्गवः ॥ ३
सृञ्जयस्य वचः श्रुत्वा तव चैव शुचिस्मिते ।
यदत्रानन्तरं कार्यं तदद्यैव विचिन्त्यताम् ॥ ४

अम्बोवाच ।

अपनीतास्मि भीष्मेण भगवन्नविजानता ।
न हि जानाति मे भीष्मो ब्रह्मञ्शाल्वगतं मनः ॥ ५
एतद्विचार्य मनसा भवानेव विनिश्चयम् ।
विचिनोतु यथान्यायं विधानं क्रियतां तथा ॥ ६
भीष्मे वा कुरुशार्दूले शाल्वराजेऽथ वा पुनः ।
उभयोरेव वा ब्रह्मन्युक्तं तत्समाचर ॥ ७
निवेदितं मया ह्येतद्दुःखमूलं यथातथम् ।
विधानं तत्र भगवन्कर्तुमर्हसि युक्तितः ॥ ८

अकृतव्रण उवाच ।

उपपन्नमिदं भद्रे यदेवं वरवर्णिनि ।
धर्मं प्रति वचो ब्रूयाः शृणु चेदं वचो मम ॥ ९
यदि त्वामापगेयो वै न नयेद्गजसाह्वयम् ।
शाल्वस्त्वां शिरसा भीरु गृह्णीयाद्रामचोदितः ॥ १०
तेन त्वं निर्जिता भद्रे यस्मान्नीतासि भामिनि ।
संशयः शाल्वराजस्य तेन त्वयि सुमध्यमे ॥ ११
भीष्मः पुरुषमानी च जितकाशी तथैव च ।
तस्मात्प्रतिक्रिया युक्ता भीष्मे कारयितुं त्वया ॥ १२

अम्बोवाच ।

ममाप्येष महान्ब्रह्मन्हृदि कामोऽभिवर्तते ।
घातयेयं यदि रणे भीष्ममित्येव नित्यदा ॥ १३
भीष्मं वा शाल्वराजं वा यं वा दोषेण गच्छसि ।
प्रशाधि तं महाबाहो यत्कृतेऽहं सुदुःखिता ॥ १४

भीष्म उवाच ।

एवं कथयतामेव तेषां स दिवसो गतः ।
रात्रिश्च भरतश्रेष्ठ सुखशीतोष्णमारुता ॥ १५
ततो रामः प्रादुरासीत्प्रज्वलन्निव तेजसा ।
शिष्यैः परिवृतो राजञ्जटाचीरधरो मुनिः ॥ १६
धनुष्पाणिरदीनात्मा खड्गं बिभ्रत्परश्वधी ।
विरजा राजशार्दूल सोऽभ्ययात्सृञ्जयं नृपम् ॥ १७
ततस्तं तापसा दृष्ट्वा स च राजा महातपाः ।
तस्थुः प्राञ्जलयः सर्वे सा च कन्या तपस्विनी ॥
पूजयामासुरव्यग्रा मधुपर्केण भार्गवम् ।
अर्चितश्च यथायोगं निषसाद सहैव तैः ॥ १९
ततः पूर्वव्यतीतानि कथयेते स्म तावुभौ ।
सृञ्जयश्च स राजर्षिर्जामदग्न्यश्च भारत ॥ २०
ततः कथान्ते राजर्षिर्भृगुश्रेष्ठं महाबलम् ।
उवाच मधुरं काले रामं वचनमर्थवत् ॥ २१
रामेयं मम दौहित्री काशिराजसुता प्रभो ।
अस्याः शृणु यथातत्त्वं कार्यं कार्यविशारद ॥ २२
परमं कथ्यतां चेति तां रामः प्रत्यभाषत ।
ततः साभ्यगमद्रामं ज्वलन्तमिव पावकम् ॥ २३
सा चाभिवाद्य चरणौ रामस्य शिरसा शुभा ।
स्पृष्ट्वा पद्मदलाभाभ्यां पाणिभ्यामग्रतः स्थिता ॥ २४
रुरोद सा शोकवती बाष्पव्याकुललोचना ।
प्रपेदे शरणं चैव शरण्यं भृगुनन्दनम् ॥ २५

राम उवाच ।

यथासि सृञ्जयस्यास्य तथा मम नृपात्मजे ।
ब्रूहि यत्ते मनोदुःखं करिष्ये वचनं तव ॥ २६

अम्बोवाच ।

भगवञ्शरणं त्वाद्य प्रपन्नास्मि महाव्रत ।
शोकपङ्कार्णवाद्घोरादुद्धरस्व च मां विभो ॥ २७

भीष्म उवाच ।

तस्याश्च दृष्ट्वा रूपं च वयश्चाभिनवं पुनः ।
सौकुमार्यं परं चैव रामश्चिन्तापरोऽभवत् ॥ २८
किमियं वक्ष्यतीत्येवं विमृशन्भृगुसत्तमः ।
इति दध्यौ चिरं रामः कृपयाभिपरिप्लुतः ॥ २९
कथ्यतामिति सा भूयो रामेणोक्ता शुचिस्मिता ।
सर्वमेव यथातत्त्वं कथयामास भार्गवे ॥ ३०
तच्छ्रुत्वा जामदग्न्यस्तु राजपुत्र्या वचस्तदा ।
उवाच तां वरारोहां निश्चित्यार्थविनिश्चयम् ॥ ३१
प्रेषयिष्यामि भीष्माय कुरुश्रेष्ठाय भामिनि ।
करिष्यति वचो धर्म्यं श्रुत्वा मे स नराधिपः ॥ ३२
न चेत्करिष्यति वचो मयोक्तं जाह्नवीसुतः ।
धक्ष्याम्येनं रणे भद्रे सामात्यं शस्त्रतेजसा ॥ ३३
अथ वा ते मतिस्तत्र राजपुत्रि निवर्तते ।
तावच्छाल्वपतिं वीरं योजयाम्यत्र कर्मणि ॥ ३४

अम्बोवाच ।

विसर्जितास्मि भीष्मेण श्रुत्वैव भृगुनन्दन ।
शाल्वराजगतं चेतो मम पूर्वं मनीषितम् ॥ ३५
सौभराजमुपेत्याहमब्रुवं दुर्वचं वचः ।
न च मां प्रत्यगृह्णात्स चारित्रपरिशङ्कितः ॥ ३६
एतत्सर्वं विनिश्चित्य स्वबुद्ध्या भृगुनन्दन ।
यदत्रौपयिकं कार्यं तच्चिन्तयितुमर्हसि ॥ ३७
ममात्र व्यसनस्यास्य भीष्मो मूलं महाव्रतः ।
येनाहं वशमानीता समुत्क्षिप्य बलात्तदा ॥ ३८
भीष्मं जहि महाबाहो यत्कृते दुःखमीदृशम् ।
प्राप्ताहं भृगुशार्दूल चराम्यप्रियमुत्तमम् ॥ ३९
स हि लुब्धश्च मानी च जितकाशी च भार्गव ।
तस्मात्प्रतिक्रिया कर्तुं युक्ता तस्मै त्वयानघ ॥ ४०
एष मे ह्रियमाणाया भारतेन तदा विभो ।
अभवद्धृदि संकल्पो घातयेयं महाव्रतम् ॥ ४१
तस्मात्कामं ममाद्येमं राम संवर्तयानघ ।
जहि भीष्मं महाबाहो यथा वृत्रं पुरंदरः ॥ ४२

इति श्रीमहाभारते उद्योगपर्वणि
षट्सप्तत्यधिकशततमोऽध्यायः ॥ १७६ ॥

१७७

भीष्म उवाच ।

एवमुक्तस्तदा रामो जहि भीष्ममिति प्रभो ।
उवाच रुदतीं कन्यां चोदयन्तीं पुनः पुनः ॥ १
काश्ये कामं न गृह्णामि शस्त्रं वै वरवर्णिनि ।
ऋते ब्रह्मविदां हेतोः किमन्यत्करवाणि ते ॥ २
वाचा भीष्मश्च शाल्वश्च मम राज्ञि वशानुगौ ।
भविष्यतोऽनवद्याङ्गि तत्करिष्यामि मा शुचः ॥ ३
न तु शस्त्रं ग्रहीष्यामि कथंचिदपि भामिनि ।
ऋते नियोगाद्विप्राणामेष मे समयः कृतः ॥ ४

अम्बोवाच ।

मम दुःखं भगवता व्यपनेयं यतस्ततः ।
तत्तु भीष्मप्रसूतं मे तं जहीश्वर माचिरम् ॥ ५

राम उवाच ।

काशिकन्ये पुनर्ब्रूहि भीष्मस्ते चरणावुभौ ।
शिरसा वन्दनार्होऽपि ग्रहीष्यति गिरा मम ॥ ६

अम्बोवाच ।

जहि भीष्मं रणे राम मम चेदिच्छसि प्रियम् ।
प्रतिश्रुतं च यदि तत्सत्यं कर्तुमिहार्हसि ॥ ७

भीष्म उवाच ।
तयोः संवदतोरेवं राजन्रामाम्बयोस्तदा ।
अकृतव्रणो जामदग्न्यमिदं वचनमब्रवीत् ॥ ८
शरणागतां महाबाहो कन्यां न त्यक्तुमर्हसि ।
जहि भीष्मं रणे राम गर्जन्तमसुरं यथा ॥ ९
यदि भीष्मस्त्वयाहूतो रणे राम महामुने ।
निर्जितोऽस्मीति वा ब्रूयात्कुर्याद्वा वचनं तव ॥ १०
कृतमस्या भवेत्कार्यं कन्याया भृगुनन्दन ।
वाक्यं सत्यं च ते वीर भविष्यति कृतं विभो ॥
इयं चापि प्रतिज्ञा ते तदा राम महामुने ।
जित्वा वै क्षत्रियान्सर्वान्ब्राह्मणेषु प्रतिश्रुतम् ॥ १२
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव रणे यदि ।
ब्रह्मद्विड्भविता तं वै हनिष्यामीति भार्गव ॥ १३
शरणं हि प्रपन्नानां भीतानां जीवितार्थिनाम् ।
न शक्ष्यामि परित्यागं कर्तुं जीवन्कथंचन ॥ १४
यश्च क्षत्रं रणे कृत्स्नं विजेष्यति समागतम् ।
दृप्तात्मानमहं तं च हनिष्यामीति भार्गव ॥ १५
स एवं विजयी राम भीष्मः कुरुकुलोद्वहः ।
तेन युध्यस्व संग्रामे समेत्य भृगुनन्दन ॥ १६
राम उवाच ।
स्मराम्यहं पूर्वकृतां प्रतिज्ञामृषिसत्तम ।
तथैव च करिष्यामि यथा साम्नैव लप्स्यते ॥ १७
कार्यमेतन्महद्ब्रह्मन्काशिकन्यामनोगतम् ।
गमिष्यामि स्वयं तत्र कन्यामादाय यत्र सः ॥ १८
यदि भीष्मो रणश्लाघी न करिष्यति मे वचः ।
हनिष्याम्येनमुद्रिक्तमिति मे निश्चिता मतिः ॥ १९
न हि बाणा मयोत्सृष्टाः सज्जन्तीह शरीरिणाम् ।
कायेषु विदितं तुभ्यं पुरा क्षत्रियसंगरे ॥ २०
भीष्म उवाच ।
एवमुक्त्वा ततो रामः सह तैर्ब्रह्मवादिभिः ।
प्रयाणाय मतिं कृत्वा समुत्तस्थौ महामनाः ॥ २१
ततस्ते तामुषित्वा तु रजनीं तत्र तापसाः ।
हुताग्नयो जप्तजप्याः प्रतस्थुर्मज्जिघांसया ॥ २२
अभ्यगच्छत्ततो रामः सह तैर्ब्राह्मणर्षभैः ।
कुरुक्षेत्रं महाराज कन्यया सह भारत ॥ २३
न्यविशन्त ततः सर्वे परिगृह्य सरस्वतीम् ।
तापसास्ते महात्मानो भृगुश्रेष्ठपुरस्कृताः ॥ २४

इति श्रीमहाभारते उद्योगपर्वणि
सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥

१७८

भीष्म उवाच ।
ततस्तृतीये दिवसे समे देशे व्यवस्थितः ।
प्रेषयामास मे राजन्प्राप्तोऽस्मीति महाव्रतः ॥ १
तमागतमहं श्रुत्वा विषयान्तं महाबलम् ।
अभ्यगच्छं जवेनाशु प्रीत्या तेजोनिधिं प्रभुम् ॥ २
गां पुरस्कृत्य राजेन्द्र ब्राह्मणैः परिवारितः ।
ऋत्विग्भिर्देवकल्पैश्च तथैव च पुरोहितैः ॥ ३
स मामभिगतं दृष्ट्वा जामदग्न्यः प्रतापवान् ।
प्रतिजग्राह तां पूजां वचनं चेदमब्रवीत् ॥ ४
भीष्म कां बुद्धिमास्थाय काशिराजसुता त्वया ।
अकामेयमिहानीता पुनश्चैव विसर्जिता ॥ ५
विभ्रंशिता त्वया हीयं धर्मावाप्तेः परावरात् ।
परामृष्टां त्वया हीमां को हि गन्तुमिहार्हति ॥ ६
प्रत्याख्याता हि शाल्वेन त्वया नीतेति भारत ।
तस्मादिमां मन्नियोगात्प्रतिगृह्णीष्व भारत ॥ ७
स्वधर्मं पुरुषव्याघ्र राजपुत्री लभत्वियम् ।
न युक्तमवमानोऽयं कर्तुं राज्ञा त्वयानघ ॥ ८
ततस्तं नातिमनसं समुद्वीक्ष्याहमब्रुवम् ।
नाहमेनां पुनर्दद्यां भ्रात्रे ब्रह्मन्कथंचन ॥ ९
शाल्वस्याहमिति प्राह पुरा मामिह भार्गव ।

मया चैवाभ्यनुज्ञाता गता सौभपुरं प्रति ॥ १०
न भयान्नाप्यनुक्रोशान्न लोभान्नार्थकाम्यया ।
क्षत्रधर्ममहं जह्यामिति मे व्रतमाहितम् ॥ ११
अथ मामब्रवीद्रामः क्रोधपर्याकुलेक्षणः ।
न करिष्यसि चेदेतद्वाक्यं मे कुरुपुंगव ॥ १२
हनिष्यामि सहामात्यं त्वामद्येति पुनः पुनः ।
संरम्भादब्रवीद्रामः क्रोधपर्याकुलेक्षणः ॥ १३
तमहं गीर्भिरिष्टाभिः पुनः पुनररिंदमम् ।
अयाचं भृगुशार्दूलं न चैव प्रशशाम सः ॥ १४
तमहं प्रणम्य शिरसा भूयो ब्राह्मणसत्तमम् ।
अब्रुवं कारणं किं तद्यत्त्वं योद्धुमिहेच्छसि ॥ १५
इष्वस्त्रं मम बालस्य भवतैव चतुर्विधम् ।
उपदिष्टं महाबाहो शिष्योऽस्मि तव भार्गव ॥ १६
ततो मामब्रवीद्रामः क्रोधसंरक्तलोचनः ।
जानीषे मां गुरुं भीष्म न चेमां प्रतिगृह्णसे ।
सुतां काश्यस्य कौरव्य मत्प्रियार्थं महीपते ॥ १७
न हि ते विद्यते शान्तिरन्यथा कुरुनन्दन ।
गृहाणेमां महाबाहो रक्षस्व कुलमात्मनः ।
त्वया विभ्रंशिता हीयं भर्तारं नाधिगच्छति ॥१८
तथा ब्रुवन्तं तमहं रामं परपुरंजयम् ।
नैतदेवं पुनर्भावि ब्रह्मर्षे किं श्रमेण ते ॥ १९
गुरुत्वं त्वयि संप्रेक्ष्य जामदग्न्य पुरातनम् ।
प्रसादये त्वां भगवंस्त्यक्तैषा हि पुरा मया ॥ २०
को जातु परभावां हि नारीं व्यालीमिव स्थिताम् ।
वासयेत गृहे जानन्स्त्रीणां दोषान्महात्ययान् ॥ २१
न भयाद्वासवस्यापि धर्मं जह्यां महाद्युते ।
प्रसीद मा वा यद्वा ते कार्यं तत्कुरु माचिरम् ॥२२
अयं चापि विशुद्धात्मन्पुराणे श्रूयते विभो ।
मरुत्तेन महाबुद्धे गीतः श्लोको महात्मना ॥ २३
गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य कार्यं भवति शासनम् ॥ २४
स त्वं गुरुरिति प्रेम्णा मया संमानितो भृशम् ।
गुरुवृत्तं न जानीषे तस्माद्योत्स्याम्यहं त्वया ॥ २५
गुरुं न हन्यां समरे ब्राह्मणं च विशेषतः ।
विशेषतस्तपोवृद्धमेवं क्षान्तं मया तव ॥ २६
उद्यतेषुमथो दृष्ट्वा ब्राह्मणं क्षत्रबन्धुवत् ।
यो हन्यात्समरे क्रुद्धो युध्यन्तमपलायिनम् ।
ब्रह्महत्या न तस्य स्यादिति धर्मेषु निश्चयः ॥ २७
क्षत्रियाणां स्थितो धर्मे क्षत्रियोऽस्मि तपोधन ।
यो यथा वर्तते यस्मिंस्तथा तस्मिन्प्रवर्तयन् ।
नाधर्मं समवाप्नोति नरः श्रेयश्च विन्दति ॥ २८
अर्थे वा यदि वा धर्मे समर्थो देशकालवित् ।
अनर्थसंशयापन्नः श्रेयान्निःसंशयेन च ॥ २९
यस्मात्संशयितेऽर्थेऽस्मिन्यथान्यायं प्रवर्तसे ।
तस्माद्योत्स्यामि सहितस्त्वया राम महाहवे ।
पश्य मे बाहुवीर्यं च विक्रमं चातिमानुषम् ॥ ३०
एवं गतेऽपि तु मया यच्छक्यं भृगुनन्दन ।
तत्करिष्ये कुरुक्षेत्रे योत्स्ये विप्र त्वया सह ।
द्वंद्वे राम यथेष्टं ते सज्जो भव महामुने ॥ ३१
तत्र त्वं निहतो राम मया शरशताचितः ।
लप्स्यसे निर्जिताँल्लोकाञ्शस्त्रपूतो महारणे ॥ ३२
स गच्छ विनिवर्तस्व कुरुक्षेत्रं रणप्रिय ।
तत्रैष्यामि महाबाहो युद्धाय त्वां तपोधन ॥ ३३
अपि यत्र त्वया राम कृतं शौचं पुरा पितुः ।
तत्राहमपि हत्वा त्वां शौचं कर्तास्मि भार्गव ॥३४
तत्र गच्छस्व राम त्वं त्वरितं युद्धदुर्मद ।
व्यपनेष्यामि ते दर्पं पौराणं ब्राह्मणब्रुव ॥ ३५
यच्चापि कत्थसे राम बहुशः परिषत्सु वै ।
निर्जिताः क्षत्रिया लोके मयैकेनेति तच्छृणु ॥ ३६
न तदा जायते भीष्मो मद्विधः क्षत्रियोऽपि वा ।

यस्ते युद्धमयं दर्पं कामं च व्यपनाशयेत् ॥ ३७
सोऽहं जातो महाबाहो भीष्मः परपुरंजयः ।
व्यपनेष्यामि ते दर्पं युद्धे राम न संशयः ॥ ३८

इति श्रीमहाभारते उद्योगपर्वणि
अष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥

१७९

भीष्म उवाच ।

ततो मामब्रवीद्रामः प्रहसन्निव भारत ।
दिष्ट्या भीष्म मया सार्धं योद्धुमिच्छसि संगरे ॥ १
अयं गच्छामि कौरव्य कुरुक्षेत्रं त्वया सह ।
भाषितं तत्करिष्यामि तत्रागच्छेः परंतप ॥ २
तत्र त्वां निहतं माता मया शरशताचितम् ।
जाह्नवी पश्यतां भीष्म गृध्रकङ्कबडाशनम् ॥ ३
कृपणं त्वामभिप्रेक्ष्य सिद्धचारणसेविता ।
मया विनिहतं देवी रोदतामद्य पार्थिव ॥ ४
अतदर्हा महाभागा भगीरथसुता नदी ।
या त्वामजीजनन्मन्दं युद्धकामुकमातुरम् ॥ ५
एहि गच्छ मया भीष्म युद्धमद्यैव वर्तताम् ।
गृहाण सर्वं कौरव्य रथादि भरतर्षभ ॥ ६
इति ब्रुवाणं तमहं रामं परपुरंजयम् ।
प्रणम्य शिरसा राजन्नेवमस्त्वित्यथाब्रुवम् ॥ ७
एवमुक्त्वा ययौ रामः कुरुक्षेत्रं युयुत्सया ।
प्रविश्य नगरं चाहं सत्यवत्यै न्यवेदयम् ॥ ८
ततः कृतस्वस्त्ययनो मात्रा प्रत्यभिनन्दितः ।
द्विजातीन्वाच्य पुण्याहं स्वस्ति चैव महाद्युते ॥ ९
रथमास्थाय रुचिरं राजतं पाण्डुरैर्हयैः ।
सूपस्करं स्वधिष्ठानं वैयाघ्रपरिवारणम् ॥ १०
उपपन्नं महाशस्त्रैः सर्वोपकरणान्वितम् ।
तत्कुलीनेन वीरेण हयशास्त्रविदा नृप ॥ ११
युक्तं सूतेन शिष्टेन बहुशो दृष्टकर्मणा ।
दंशितः पाण्डुरेणाहं कवचेन वपुष्मता ॥ १२
पाण्डुरं कार्मुकं गृह्य प्रायां भरतसत्तम ।
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ॥ १३
पाण्डुरैश्चामरैश्चापि वीज्यमानो नराधिप ।
शुक्लवासाः सितोष्णीषः सर्वशुक्लविभूषणः ॥ १४
स्तूयमानो जयाशीर्भिर्निष्क्रम्य गजसाह्वयात् ।
कुरुक्षेत्रं रणक्षेत्रमुपायां भरतर्षभ ॥ १५
ते हयाश्चोदितास्तेन सूतेन परमाहवे ।
अवहन्मां भृशं राजन्मनोमारुतरंहसः ॥ १६
गत्वाहं तत्कुरुक्षेत्रं स च रामः प्रतापवान् ।
युद्धाय सहसा राजन्पराक्रान्तौ परस्परम् ॥ १७
ततः संदर्शनेऽतिष्ठं रामस्यातितपस्विनः ।
प्रगृह्य शङ्खप्रवरं ततः प्राधममुत्तमम् ॥ १८
ततस्तत्र द्विजा राजंस्तापसाश्च वनौकसः
अपश्यन्त रणं दिव्यं देवाः सर्षिगणास्तदा ॥ १९
ततो दिव्यानि माल्यानि प्रादुरासन्मुहुर्मुहुः ।
वादित्राणि च दिव्यानि मेघवृन्दानि चैव ह ॥ २०
ततस्ते तापसाः सर्वे भार्गवस्यानुयायिनः ।
प्रेक्षकाः समपद्यन्त परिवार्य रणाजिरम् ॥ २१
ततो मामब्रवीद्देवी सर्वभूतहितैषिणी ।
माता स्वरूपिणी राजन्किमिदं ते चिकीर्षितम् ॥ २२
गत्वाहं जामदग्न्यं तं प्रयाचिष्ये कुरूद्वह ।
भीष्मेण सह मा योत्सीः शिष्येणेति पुनः पुनः ॥ २३
मा मैवं पुत्र निर्बन्धं कुरु विप्रेण पार्थिव ।
जामदग्न्येन समरे योद्धुमित्यवभर्त्सयत् ॥ २४
किं न वै क्षत्रियहरो हरतुल्यपराक्रमः ।
विदितः पुत्र रामस्ते यतस्त्वं योद्धुमिच्छसि ॥ २५
ततोऽहमब्रुवं देवीमभिवाद्य कृताञ्जलिः ।
सर्वं तद्भरतश्रेष्ठ यथावृत्तं स्वयंवरे ॥ २६
यथा च रामो राजेन्द्र मया पूर्वं प्रसादितः ।

काशिराजसुतायाश्च यथा कामः पुरातनः ॥ २७
ततः सा राममभ्येत्य जननी मे महानदी ।
मदर्थं तमृषिं देवी क्षमयामास भार्गवम् ।
भीष्मेण सह मा योत्सीः शिष्येणेति वचोऽब्रवीत् ॥
स च तामाह याचन्तीं भीष्ममेव निवर्तय ।
न हि मे कुरुते काममित्यहं तमुपागमम् ॥ २९

संजय उवाच ।

ततो गङ्गा सुतस्नेहाद्भीष्मं पुनरुपागमत् ।
न चास्याः सोऽकरोद्वाक्यं क्रोधपर्याकुलेक्षणः ॥३०
अथादृश्यत धर्मात्मा भृगुश्रेष्ठो महातपाः ।
आह्वयामास च पुनर्युद्धाय द्विजसत्तमः ॥ ३१

इति श्रीमहाभारते उद्योगपर्वणि
एकोनाशीत्यधिकशततमोऽध्यायः ॥ १७९ ॥

१८०

भीष्म उवाच ।

तमहं स्मयन्निव रणे प्रत्यभाषं व्यवस्थितम् ।
भूमिष्ठं नोत्सहे योद्धुं भवन्तं रथमास्थितः ॥ १
आरोह स्यन्दनं वीर कवचं च महाभुज ।
बधान समरे राम यदि योद्धुं मयेच्छसि ॥ २
ततो मामब्रवीद्रामः स्मयमानो रणाजिरे ।
रथो मे मेदिनी भीष्म वाहा वेदाः सदश्ववत् ॥३
सूतो मे मातरिश्वा वै कवचं वेदमातरः ।
सुसंवीतो रणे ताभिर्योत्स्येऽहं कुरुनन्दन ॥ ४
एवं ब्रुवाणो गान्धारे रामो मां सत्यविक्रमः ।
शरव्रातेन महता सर्वतः पर्यवारयत् ॥ ५
ततोऽपश्यं जामदग्न्यं रथे दिव्ये व्यवस्थितम् ।
सर्वायुधधरे श्रीमत्यद्भुतोपमदर्शने ॥ ६
मनसा विहिते पुण्ये विस्तीर्णे नगरोपमे ।
दिव्याश्वयुजि संनद्धे काञ्चनेन विभूषिते ॥ ७
ध्वजेन च महाबाहो सोमालंकृतलक्ष्मणा ।
धनुर्धरो बद्धतूणो बद्धगोधाङ्गुलित्रवान् ॥ ८
सारथ्यं कृतवांस्तत्र युयुत्सोरकृतव्रणः ।
सखा वेदविदत्यन्तं दयितो भार्गवस्य ह ॥ ९
आह्वयानः स मां युद्धे मनो हर्षयतीव मे ।
पुनः पुनरभिक्रोशन्नभियाहीति भार्गवः ॥१०
तमादित्यमिवोद्यन्तमनाधृष्यं महाबलम् ।
क्षत्रियान्तकरं राममेकमेकः समासदम् ॥ ११
ततोऽहं बाणपातेषु त्रिषु वाहान्निगृह्य वै ।
अवतीर्य धनुर्न्यस्य पदातिरृषिसत्तमम् ॥ १२
अभ्यगच्छं तदा राममर्चिष्यन्द्विजसत्तमम् ।
अभिवाद्य चैनं विधिवदब्रुवं वाक्यमुत्तमम् ॥ १३
योत्स्ये त्वया रणे राम विशिष्टेनाधिकेन च ।
गुरुणा धर्मशीलेन जयमाशास्स्व मे विभो ॥ १४

राम उवाच ।

एवमेतत्कुरुश्रेष्ठ कर्तव्यं भूतिमिच्छता ।
धर्मो ह्येष महाबाहो विशिष्टैः सह युध्यताम् ॥ १५
शपेयं त्वां न चेदेवमागच्छेथा विशां पते ।
युध्यस्व त्वं रणे यत्तो धैर्यमालम्ब्य कौरव ॥ १६
न तु ते जयमाशासे त्वां हि जेतुमहं स्थितः ।
गच्छ युध्यस्व धर्मेण प्रीतोऽस्मि चरितेन ते ॥ १७

भीष्म उवाच ।

ततोऽहं तं नमस्कृत्य रथमारुह्य सत्वरः ।
प्राध्मापयं रणे शङ्खं पुनर्हेमविभूषितम् ॥ १८
ततो युद्धं समभवन्मम तस्य च भारत ।
दिवसान्सुबहून्राजन्परस्परजिगीषया ॥ १९
स मे तस्मिन्रणे पूर्वं प्राहरत्कङ्कपत्रिभिः ।
षष्ट्या शतैश्च नवभिः शराणामग्निवर्चसाम् ॥ २०
चत्वारस्तेन मे वाहाः सूतश्चैव विशां पते ।
प्रतिरुद्धास्तथैवाहं समरे दंशितः स्थितः ॥ २१
नमस्कृत्य च देवेभ्यो ब्राह्मणेभ्यश्च भारत ।

तमहं स्मयन्निव रणे प्रत्यभाषं व्यवस्थितम् ।। २२
आचार्यता मानिता मे निर्मर्यादे ह्यपि त्वयि ।
भूयस्तु शृणु मे ब्रह्मन्संपदं धर्मसंग्रहे ।। २३
ये ते वेदाः शरीरस्था ब्राह्मण्यं यच्च ते महत् ।
तपश्च सुमहत्तप्तं न तेभ्यः प्रहराम्यहम् ।। २४
प्रहरे क्षत्रधर्मस्य यं त्वं राम समास्थितः ।
ब्राह्मणः क्षत्रियत्वं हि याति शस्त्रसमुद्यमात् ।। २५
पश्य मे धनुषो वीर्यं पश्य बाह्वोर्बलं च मे ।
एष ते कार्मुकं वीर द्विधा कुर्मि ससायकम् ।। २६
तस्याहं निशितं भल्लं प्राहिण्वं भरतर्षभ ।
तेनास्य धनुषः कोटिश्छिन्ना भूमिमथागमत् ।। २७
नव चापि पृषत्कानां शतानि नतपर्वणाम् ।
प्राहिण्वं कङ्कपत्राणां जामदग्न्यरथं प्रति ।। २८
काये विषक्तास्तु तदा वायुनाभिसमीरिताः ।
चेलुः क्षरन्तो रुधिरं नागा इव च ते शराः ।। २९
क्षतजोक्षितसर्वाङ्गः क्षरन्स रुधिरं व्रणैः ।
बभौ रामस्तदा राजन्मेरुर्धातूनिवोत्सृजन् ।। ३०
हेमन्तान्तेऽशोक इव रक्तस्तबकमण्डितः ।
बभौ रामस्तदा राजन्क्वचित्किंशुकसंनिभः ।। ३१
ततोऽन्यद्धनुरादाय रामः क्रोधसमन्वितः ।
हेमपुङ्खान्सुनिशिताञ्शरांस्तान्हि ववर्ष सः ।। ३२
ते समासाद्य मां रौद्रा बहुधा मर्मभेदिनः ।
अकम्पयन्महावेगाः सर्पानलविषोपमाः ।। ३३
ततोऽहं समवष्टभ्य पुनरात्मानमाहवे ।
शतसंख्यैः शरैः क्रुद्धस्तदा राममवाकिरम् ।। ३४
स तैरग्न्यर्कसंकाशैः शरैराशीविषोपमैः ।
शितैरभ्यर्दितो रामो मन्दचेता इवाभवत् ।। ३५
ततोऽहं कृपयाविष्टो विनिन्द्यात्मानमात्मना ।
धिग्धिगित्यब्रुवं युद्धं क्षत्रं च भरतर्षभ ।। ३६
असकृच्चाब्रुवं राजञ्शोकवेगपरिप्लुतः ।
अहो बत कृतं पापं मयेदं क्षत्रकर्मणा ।। ३७
गुरुर्द्विजातिर्धर्मात्मा यदेवं पीडितः शरैः ।
ततो न प्राहरं भूयो जामदग्न्याय भारत ।। ३८
अथावताप्य पृथिवीं पूषा दिवससंक्षये ।
जगामास्तं सहस्रांशुस्ततो युद्धमुपारमत् ।। ३९

इति श्रीमहाभारते उद्योगपर्वणि
अशीत्यधिकशततमोऽध्यायः ॥ १८० ॥

१८१

भीष्म उवाच ।

आत्मनस्तु ततः सूतो हयानां च विशां पते ।
मम चापनयामास शल्यान्कुशलसंमतः ।। १
स्नातोपवृत्तैस्तुरगैर्लब्धतोयैरविह्वलैः ।
प्रभात उदिते सूर्ये ततो युद्धमवर्तत ।। २
दृष्ट्वा मां तूर्णमायान्तं दंशितं स्यन्दने स्थितम् ।
अकरोद्रथमत्यर्थं रामः सज्जं प्रतापवान् ।। ३
ततोऽहं राममायान्तं दृष्ट्वा समरकाङ्क्षिणम् ।
धनुःश्रेष्ठं समुत्सृज्य सहसावतरं रथात् ।। ४
अभिवाद्य तथैवाहं रथमारुह्य भारत ।
युयुत्सुर्जामदग्न्यस्य प्रमुखे वीतभीः स्थितः ।। ५
ततो मां शरवर्षेण महता समवाकिरत् ।
अहं च शरवर्षेण वर्षन्तं समवाकिरम् ।। ६
संक्रुद्धो जामदग्न्यस्तु पुनरेव पतत्रिणः ।
प्रेषयामास मे राजन्दीप्तास्यानुरगानिव ।। ७
तानहं निशितैर्भल्लैः शतशोऽथ सहस्रशः ।
अच्छिदं सहसा राजन्नन्तरिक्षे पुनः पुनः ।। ८
ततस्त्वस्त्राणि दिव्यानि जामदग्न्यः प्रतापवान् ।
मयि प्रचोदयामास तान्यहं प्रत्यषेधयम् ।। ९
अस्त्रैरेव महाबाहो चिकीर्षन्नधिकां क्रियाम् ।
ततो दिवि महान्नादः प्रादुरासीत्समन्ततः ।। १०
ततोऽहमस्त्रं वायव्यं जामदग्न्ये प्रयुक्तवान् ।

प्रत्याजघ्ने च तद्रामो गुह्यकास्त्रेण भारत ।। ११
ततोऽस्त्रमहमाग्नेयमनुमन्त्र्य प्रयुक्तवान् ।
वारुणेनैव रामस्तद्वारयामास मे विभुः ।। १२
एवमस्त्राणि दिव्यानि रामस्याहमवारयम् ।
रामश्च मम तेजस्वी दिव्यास्त्रविदरिंदमः ।। १३
ततो मां सव्यतो राजन्रामः कुर्वन्द्विजोत्तमः ।
उरस्यविध्यत्संक्रुद्धो जामदग्न्यो महाबलः ।। १४
ततोऽहं भरतश्रेष्ठ संन्यषीदं रथोत्तमे ।
अथ मां कश्मलाविष्टं सूतस्तूर्णमपावहत् ।
गोरुतं भरतश्रेष्ठ रामबाणप्रपीडितम् ।। १५
ततो मामपयातं वै भृशं विद्धमचेतसम् ।
रामस्यानुचरा हृष्टाः सर्वे दृष्ट्वा प्रचुक्रुशुः ।
अकृतव्रणप्रभृतयः काशिकन्या च भारत ।। १६
ततस्तु लब्धसंज्ञोऽहं ज्ञात्वा सूतमथाब्रुवम् ।
याहि सूत यतो रामः सज्जोऽहं गतवेदनः ।। १७
ततो मामवहत्सूतो हयैः परमशोभितैः ।
नृत्यद्भिरिव कौरव्य मारुतप्रतिमैर्गतौ ।। १८
ततोऽहं राममासाद्य बाणजालेन कौरव ।
अवाकिरं सुसंरब्धः संरब्धं विजिगीषया ।। १९
तानापतत एवासौ रामो बाणानजिह्मगान् ।
बाणैरेवाच्छिनत्तूर्णमेकैकं त्रिभिराहवे ।। २०
ततस्ते मृदिताः सर्वे मम बाणाः सुसंशिताः ।
रामबाणैर्द्विधा छिन्नाः शतशोऽथ महाहवे ।। २१
ततः पुनः शरं दीप्तं सुप्रभं कालसंमितम् ।
असृजं जामदग्न्याय रामायाहं जिघांसया ।। २२
तेन त्वभिहतो गाढं बाणच्छेदवशं गतः ।
मुमोह सहसा रामो भूमौ च निपपात ह ।। २३
ततो हाहाकृतं सर्वं रामे भूतलमाश्रिते ।
जगद्भारत संविग्नं यथार्कपतनेऽभवत् ।। २४
तत एनं सुसंविग्नाः सर्व एवाभिदुद्रुवुः ।
तपोधनास्ते सहसा काश्या च भृगुनन्दनम् ।। २५
त एनं संपरिष्वज्य शनैराश्वासयंस्तदा ।
पाणिभिर्जलशीतैश्च जयाशीभिश्च कौरव ।। २६
ततः स विह्वलो वाक्यं राम उत्थाय माब्रवीत् ।
तिष्ठ भीष्म हतोऽसीति बाणं संधाय कार्मुके ।।२७
स मुक्तो न्यपतत्तूर्णं पार्श्वे सव्ये महाहवे ।
येनाहं भृशसंविग्नो व्याघूर्णित इव द्रुमः ।। २८
हत्वा हयांस्ततो राजञ्शीघ्रास्त्रेण महाहवे ।
अवाकिरन्मां विश्रब्धो बाणैस्तैर्लोमवाहिभिः ।। २९
ततोऽहमपि शीघ्रास्त्रं समरेऽप्रतिवारणम् ।
अवासृजं महाबाहो तेऽन्तराधिष्ठिताः शराः ।
रामस्य मम चैवाशु व्योमावृत्य समन्ततः ।। ३०
न स्म सूर्यः प्रतपति शरजालसमावृतः ।
मातरिश्वान्तरे तस्मिन्मेघरुद्ध इवानदत् ।। ३१
ततो वायोः प्रकम्पाच्च सूर्यस्य च मरीचिभिः ।
अभितापात्स्वभावाच्च पावकः समजायत ।। ३२
ते शराः स्वसमुत्थेन प्रदीप्ताश्चित्रभानुना ।
भूमौ सर्वे तदा राजन्भस्मभूताः प्रपेदिरे ।। ३३
तदा शतसहस्राणि प्रयुतान्यर्बुदानि च ।
अयुतान्यथ खर्वाणि निखर्वाणि च कौरव ।
रामः शराणां संक्रुद्धो मयि तूर्णमपातयत् ।। ३४
ततोऽहं तानपि रणे शरैराशीविषोपमैः ।
संछिद्य भूमौ नृपतेऽपातयं पन्नगानिव ।। ३५
एवं तदभवद्युद्धं तदा भरतसत्तम ।
संध्याकाले व्यतीते तु व्यपायात्स च मे गुरुः ।।३६

इति श्रीमहाभारते उद्योगपर्वणि
एकाशीत्यधिकशततमोऽध्यायः ।। १८१ ।।

१८२

भीष्म उवाच ।

समागतस्य रामेण पुनरेवातिदारुणम् ।

अन्येद्युस्तुमुलं युद्धं तदा भरतसत्तम ॥ १
ततो दिव्यास्त्रविच्छूरो दिव्यान्यस्त्राण्यनेकशः ।
अयोजयत धर्मात्मा दिवसे दिवसे विभुः ॥ २
तान्यहं तत्प्रतीघातैरस्त्रैरस्त्राणि भारत ।
व्यधमं तुमुले युद्धे प्राणांस्त्यक्त्वा सुदुस्त्यजान् ॥ ३
अस्त्रैरस्त्रेषु बहुधा हतेष्वथ च भार्गवः ।
अक्रुध्यत महातेजास्त्यक्तप्राणः स संयुगे ॥ ४
ततः शक्तिं प्राहिणोद्घोररूपा-
मस्त्रै रुद्धो जामदग्न्यो महात्मा ।
कालोत्सृष्टां प्रज्वलितामिवोल्कां
संदीप्ताग्रां तेजसावृत्य लोकान् ॥ ५
ततोऽहं तामिषुभिर्दीप्यमानैः
समायान्तीमन्तकालार्कदीप्ताम् ।
छित्त्वा त्रिधा पातयामास भूमौ
ततो ववौ पवनः पुण्यगन्धिः ॥ ६
तस्यां छिन्नायां क्रोधदीप्तोऽथ रामः
शक्तीर्घोराः प्राहिणोद्द्वादशान्याः ।
तासां रूपं भारत नोत शक्यं
तेजस्वित्वाल्लाघवाच्चैव वक्तुम् ॥ ७
किं त्वेवाहं विह्वलः संप्रदृश्य
दिग्भ्यः सर्वास्ता महोल्का इवाग्नेः ।
नानारूपास्तेजसोग्रेण दीप्ता
यथादित्या द्वादश लोकसंक्षये ॥ ८
ततो जालं बाणमयं विवृत्य
संदृश्य भित्त्वा शरजालेन राजन् ।
द्वादशेषून्प्राहिणवं रणेऽहं
ततः शक्तीर्व्यधमं घोररूपाः ॥ ९
ततोऽपरा जामदग्न्यो महात्मा
शक्तीर्घोराः प्राक्षिपद्धेमदण्डाः ।
विचित्रिताः काञ्चनपट्टनद्धा
यथा महोल्का ज्वलितास्तथा ताः ॥ १०
ताश्चाप्युग्राश्चर्मणा वारयित्वा
खड्गेनाजौ पातिता मे नरेन्द्र ।
बाणैर्दिव्यैर्जामदग्न्यस्य संख्ये
दिव्यांश्चाश्वानभ्यवर्षं ससूतान् ॥ ११
निर्मुक्तानां पन्नगानां सरूपा
दृष्ट्वा शक्तीर्हेमचित्रा निकृत्ताः ।
प्रादुश्चक्रे दिव्यमस्त्रं महात्मा
क्रोधाविष्टो हैहयेशप्रमाथी ॥ १२
ततः श्रेण्यः शलभानामिवोग्राः
समापेतुर्विशिखानां प्रदीप्ताः ।
समाचिनोच्चापि भृशं शरीरं
हयान्सूतं सरथं चैव मह्यम् ॥ १३
रथः शरैर्मे निचितः सर्वतोऽभू-
त्तथा हयाः सारथिश्चैव राजन् ।
युगं रथेषा च तथैव चक्रे
तथैवाक्षः शरकृत्तोऽथ भग्नः ॥ १४
ततस्तस्मिन्बाणवर्षे व्यतीते
शरौघेण प्रत्यवर्षं गुरुं तम् ।
स विक्षतो मार्गणैर्ब्रह्मराशि-
र्देहादजस्रं मुमुचे भूरि रक्तम् ॥ १५
यथा रामो बाणजालाभितप्त-
स्तथैवाहं सुभृशं गाढविद्धः ।
ततो युद्धं व्यरमच्चापराह्णे
भानावस्तं प्रार्थयाने महीध्रम् ॥ १६

इति श्रीमहाभारते उद्योगपर्वणि
द्व्यशीत्यधिकशततमोऽध्यायः ॥ १८२ ॥

१८३

भीष्म उवाच ।

ततः प्रभाते राजेन्द्र सूर्ये विमल उद्गते ।

भार्गवस्य मया सार्धं पुनर्युद्धमवर्तत ॥ १
ततो भ्रान्ते रथे तिष्ठन्रामः प्रहरतां वरः ।
ववर्ष शरवर्षाणि मयि शक्र इवाचले ॥ २
तेन सूतो मम सुहृच्छरवर्षेण ताडितः ।
निपपात रथोपस्थे मनो मम विषादयन् ॥ ३
ततः सूतः स मेऽत्यर्थं कश्मलं प्राविशन्महत् ।
पृथिव्यां च शराघातान्निपपात मुमोह च ॥ ४
ततः सूतोऽजहात्प्राणान्रामबाणप्रपीडितः ।
मुहूर्तादिव राजेन्द्र मां च भीराविशत्तदा ॥ ५
ततः सूते हते राजन्क्षिपतस्तस्य मे शरान् ।
प्रमत्तमनसो रामः प्राहिणोन्मृत्युसंमितान् ॥ ६
ततः सूतव्यसनिनं विप्लुतं मां स भार्गवः ।
शरेणाभ्यहनद्गाढं विकृष्य बलवद्धनुः ॥ ७
स मे जत्र्वन्तरे राजन्निपत्य रुधिराशनः ।
मयैव सह राजेन्द्र जगाम वसुधातलम् ॥ ८
मत्वा तु निहतं रामस्ततो मां भरतर्षभ ।
मेघवद्व्यनदच्चोच्चैर्जहृषे च पुनः पुनः ॥ ९
तथा तु पतिते राजन्मयि रामो मुदा युतः ।
उदक्रोशन्महानादं सह तैरनुयायिभिः ॥ १०
मम तत्राभवन्ये तु कौरवाः पार्श्वतः स्थिताः ।
आगता ये च युद्धं तज्जनास्तत्र दिदृक्षवः ।
आर्तिं परमिकां जग्मुस्ते तदा मयि पातिते ॥ ११

ततोऽपश्यं पतितो राजसिंह
द्विजानष्टौ सूर्यहुताशनाभान् ।
ते मां समन्तात्परिवार्य तस्थुः
स्वबाहुभिः परिगृह्याजिमध्ये ॥ १२

रक्ष्यमाणश्च तैर्विप्रैर्नाहं भूमिमुपास्पृशम् ।
अन्तरिक्षे स्थितो ह्यस्मि तैर्विप्रैर्बान्धवैरिव ।
स्वपन्निवान्तरिक्षे च जलबिन्दुभिरुक्षितः ॥ १३
ततस्ते ब्राह्मणा राजन्नब्रुवन्परिगृह्य माम् ।
मा भैरिति समं सर्वे स्वस्ति तेऽस्त्विति चासकृत् ॥
ततस्तेषामहं वाग्भिस्तर्पितः सहसोत्थितः ।
मातरं सरितां श्रेष्ठामपश्यं रथमास्थिताम् ॥ १५

हयाश्च मे संगृहीतास्तया वै
महानद्या संयति कौरवेन्द्र ।
पादौ जनन्याः प्रतिपूज्य चाहं
तथार्ष्टिषेणं रथमभ्यरोहम् ॥ १६

ररक्ष सा मम रथं हयांश्चोपस्कराणि च ।
तामहं प्राञ्जलिर्भूत्वा पुनरेव व्यसर्जयम् ॥ १७
ततोऽहं स्वयमुद्यम्य हयांस्तान्वातरंहसः ।
अयुध्यं जामदग्न्येन निवृत्तेऽहनि भारत ॥ १८
ततोऽहं भरतश्रेष्ठ वेगवन्तं महाबलम् ।
अमुञ्चं समरे बाणं रामाय हृदयच्छिदम् ॥ १९
ततो जगाम वसुधां बाणवेगप्रपीडितः ।
जानुभ्यां धनुरुत्सृज्य रामो मोहवशं गतः ॥ २०
ततस्तस्मिन्निपतिते रामे भूरिसहस्रदे ।
आवव्रुर्जलदा व्योम क्षरन्तो रुधिरं बहु ॥ २१
उल्काश्च शतशः पेतुः सनिर्घाताः सकम्पनाः ।
अर्कं च सहसा दीप्तं स्वर्भानुरभिसंवृणोत् ॥ २२
ववुश्च वाताः परुषाश्चलिता च वसुंधरा ।
गृध्रा बडाश्च कङ्काश्च परिपेतुर्मुदा युताः ॥ २३
दीप्तायां दिशि गोमायुर्दारुणं मुहुरुन्नदत् ।
अनाहता दुन्दुभयो विनेदुर्भृशनिस्वनाः ॥ २४
एतदौत्पातिकं घोरमासीद्भरतसत्तम ।
विसंज्ञकल्पे धरणीं गते रामे महात्मनि ॥ २५

ततो रविर्मन्दमरीचिमण्डलो
जगामास्तं पांसुपुञ्जावगाढः ।
निशा व्यगाहत्सुखशीतमारुता
ततो युद्धं प्रत्यवहारयावः ॥ २६
एवं राजन्नवहारो बभूव

ततः पुनर्विमलेऽभूत्सुघोरम् ।
काल्यं काल्यं विंशतिं वै दिनानि
तथैव चान्यानि दिनानि त्रीणि ॥ २७

इति श्रीमहाभारते उद्योगपर्वणि
त्र्यशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥

१८४

भीष्म उवाच ।

ततोऽहं निशि राजेन्द्र प्रणम्य शिरसा तदा ।
ब्राह्मणानां पितॄणां च देवतानां च सर्वशः ॥ १
नक्तंचराणां भूतानां रजन्याश्च विशां पते ।
शयनं प्राप्य रहिते मनसा समचिन्तयम् ॥ २
जामदग्न्येन मे युद्धमिदं परमदारुणम् ।
अहानि सुबहून्यद्य वर्तते सुमहात्ययम् ॥ ३
न च रामं महावीर्यं शक्नोमि रणमूर्धनि ।
विजेतुं समरे विप्रं जामदग्न्यं महाबलम् ॥ ४
यदि शक्यो मया जेतुं जामदग्न्यः प्रतापवान् ।
दैवतानि प्रसन्नानि दर्शयन्तु निशां मम ॥ ५
ततोऽहं निशि राजेन्द्र प्रसुप्तः शरविक्षतः ।
दक्षिणेनैव पार्श्वेन प्रभातसमये इव ॥ ६
ततोऽहं विप्रमुख्यैस्तैर्यैरस्मि पतितो रथात् ।
उत्थापितो धृतश्चैव मा भैरिति च सान्त्वितः ॥ ७
त एव मां महाराज स्वप्नदर्शनमेत्य वै ।
परिवार्याब्रुवन्वाक्यं तन्निबोध कुरूद्वह ॥ ८
उत्तिष्ठ मा भैर्गाङ्गेय भयं ते नास्ति किंचन ।
रक्षामहे नरव्याघ्र स्वशरीरं हि नो भवान् ॥ ९
न त्वां रामो रणे जेता जामदग्न्यः कथंचन ।
त्वमेव समरे रामं विजेता भरतर्षभ ॥ १०
इदमस्त्रं सुदयितं प्रत्यभिज्ञास्यते भवान् ।
विदितं हि तवाप्येतत्पूर्वस्मिन्देहधारणे ॥ ११
प्राजापत्यं विश्वकृतं प्रस्वापं नाम भारत ।
न हीदं वेद रामोऽपि पृथिव्यां वा पुमान्कचित् ॥ १२
तत्स्मरस्व महाबाहो भृशं संयोजयस्व च ।
न च रामः क्षयं गन्ता तेनास्त्रेण नराधिप ॥ १३
एनसा च न योगं त्वं प्राप्स्यसे जातु मानद ।
स्वप्स्यते जामदग्न्योऽसौ त्वद्बाणबलपीडितः ॥ १४
ततो जित्वा त्वमेवैनं पुनरुत्थापयिष्यसि ।
अस्त्रेण दयितेनाजौ भीष्म संबोधनेन वै ॥ १५
एवं कुरुष्व कौरव्य प्रभाते रथमास्थितः ।
प्रसुप्तं वा मृतं वापि तुल्यं मन्यामहे वयम् ॥ १६
न च रामेण मर्तव्यं कदाचिदपि पार्थिव ।
ततः समुत्पन्नमिदं प्रस्वापं युज्यतामिति ॥ १७
इत्युक्त्वान्तर्हिता राजन्सर्व एव द्विजोत्तमाः ।
अष्टौ सदृशरूपास्ते सर्वे भास्वरमूर्तयः ॥ १८

इति श्रीमहाभारते उद्योगपर्वणि
चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥

१८५

भीष्म उवाच ।

ततो रात्र्यां व्यतीतायां प्रतिबुद्धोऽस्मि भारत ।
तं च संचिन्त्य वै स्वप्नमवापं हर्षमुत्तमम् ॥ १
ततः समभवद्युद्धं मम तस्य च भारत ।
तुमुलं सर्वभूतानां लोमहर्षणमद्भुतम् ॥ २
ततो बाणमयं वर्षं ववर्ष मयि भार्गवः ।
न्यवारयमहं तं च शरजालेन भारत ॥ ३
ततः परमसंक्रुद्धः पुनरेव महातपाः ।
ह्यस्तनेनैव कोपेन शक्तिं वै प्राहिणोन्मयि ॥ ४
इन्द्राशनिसमस्पर्शां यमदण्डोपमप्रभाम् ।
ज्वलन्तीमग्निवत्संख्ये लेलिहानां समन्ततः ॥ ५
ततो भरतशार्दूल धिष्ण्यमाकाशगं यथा ।
सा मामभ्यहनत्तूर्णमंसदेशे च भारत ॥ ६
अथासृङ्मेऽस्रवद्घोरं गिरेर्गैरिकधातुवत् ।

रामेण सुमहाबाहो क्षतस्य क्षतजेक्षण ॥ ७
ततोऽहं जामदग्न्याय भृशं क्रोधसमन्वितः ।
प्रेषयं मृत्युसंकाशं बाणं सर्पविषोपमम् ॥ ८
स तेनाभिहतो वीरो ललाटे द्विजसत्तमः ।
अशोभत महाराज सशृङ्ग इव पर्वतः ॥ ९
स संरब्धः समावृत्य बाणं कालान्तकोपमम् ।
संदधे बलवत्कृष्य घोरं शत्रुनिबर्हणम् ॥ १०
स वक्षसि पपातोग्रः शरो व्याल इव श्वसन् ।
महीं राजंस्ततश्चाहमगच्छं रुधिराविलः ॥ ११
अवाप्य तु पुनः संज्ञां जामदग्न्याय धीमते ।
प्राहिण्वं विमलां शक्तिं ज्वलन्तीमशनीमिव ॥ १२
सा तस्य द्विजमुख्यस्य निपपात भुजान्तरे ।
विह्वलश्चाभवद्राजन्वेपथुश्चैनमाविशत् ॥ १३
तत एनं परिष्वज्य सखा विप्रो महातपाः ।
अकृतव्रणः शुभैर्वाक्यैराश्वासयदनेकधा ॥ १४
समाश्वस्तस्तदा रामः क्रोधामर्षसमन्वितः ।
प्रादुश्चक्रे तदा ब्राह्मं परमास्त्रं महाव्रतः ॥ १५
ततस्तत्प्रतिघातार्थं ब्राह्ममेवास्त्रमुत्तमम् ।
मया प्रयुक्तं जज्वाल युगान्तमिव दर्शयत् ॥ १६
तयोर्ब्रह्मास्त्रयोरासीदन्तरा वै समागमः ।
असंप्राप्यैव रामं च मां च भारतसत्तम ॥ १७
ततो व्योम्नि प्रादुरभूत्तेज एव हि केवलम् ।
भूतानि चैव सर्वाणि जग्मुरार्तिं विशां पते ॥ १८
ऋषयश्च सगन्धर्वा देवताश्चैव भारत ।
संतापं परमं जग्मुरस्त्रतेजोभिपीडिताः ॥ १९
ततश्चचाल पृथिवी सपर्वतवनद्रुमा ।
संतप्तानि च भूतानि विषादं जग्मुरुत्तमम् ॥ २०
प्रजज्वाल नभो राजन्धूमायन्ते दिशो दश ।
न स्थातुमन्तरिक्षे च शेकुराकाशगास्तदा ॥ २१
ततो हाहाकृते लोके सदेवासुरराक्षसे ।
इदमन्तरमित्येव योक्तुकामोऽस्मि भारत ॥ २२
प्रस्वापमस्त्रं दयितं वचनाद्ब्रह्मवादिनाम् ।
चिन्तितं च तदस्त्रं मे मनसि प्रत्यभात्तदा ॥ २३

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चाशीत्यधिकशततमोऽध्यायः ॥ १८५ ॥

१८६

भीष्म उवाच ।

ततो हलहलाशब्दो दिवि राजन्महानभूत् ।
प्रस्वापं भीष्म मा स्राक्षीरिति कौरवनन्दन ॥ १
अयुञ्जमेव चैवाहं तदस्त्रं भृगुनन्दने ।
प्रस्वापं मां प्रयुञ्जानं नारदो वाक्यमब्रवीत् ॥ २
एते वियति कौरव्य दिवि देवगणाः स्थिताः ।
ते त्वां निवारयन्त्यद्य प्रस्वापं मा प्रयोजय ॥ ३
रामस्तपस्वी ब्रह्मण्यो ब्राह्मणश्च गुरुश्च ते ।
तस्यावमानं कौरव्य मा स्म कार्षीः कथंचन ॥ ४
ततोऽपश्यं दिविष्ठान्वै तानष्टौ ब्रह्मवादिनः ।
ते मां स्मयन्तो राजेन्द्र शनकैरिदमब्रुवन् ॥ ५
यथाह भरतश्रेष्ठ नारदस्तत्तथा कुरु ।
एतद्धि परमं श्रेयो लोकानां भरतर्षभ ॥ ६
ततश्च प्रतिसंहृत्य तदस्त्रं स्वापनं मृधे ।
ब्रह्मास्त्रं दीपयांचक्रे तस्मिन्युधि यथाविधि ॥ ७
ततो रामो रुषितो राजपुत्र
दृष्ट्वा तदस्त्रं विनिवर्तितं वै ।
जितोऽस्मि भीष्मेण सुमन्दबुद्धि-
रित्येव वाक्यं सहसा व्यमुञ्चत् ॥ ८
ततोऽपश्यत्पितरं जामदग्न्यः
पितुस्तथा पितरं तस्य चान्यम् ।
त एवैनं संपरिवार्य तस्थु-
रूचुश्चैनं सान्त्वपूर्वं तदानीम् ॥ ९
मा स्मैवं साहसं वत्स पुनः कार्षीः कथंचन ।

भीष्मेण संयुगं गन्तुं क्षत्रियेण विशेषतः ॥ १०
क्षत्रियस्य तु धर्मोऽयं यद्युद्धं भृगुनन्दन ।
स्वाध्यायो व्रतचर्या च ब्राह्मणानां परं धनम् ॥ ११
इदं निमित्ते कस्मिंश्चिदस्माभिरुपमश्रितम् ।
शस्त्रधारणमत्युग्रं तच्च कार्यं कृतं त्वया ॥ १२
वत्स पर्याप्तमेतावद्भीष्मेण सह संयुगे ।
विमर्दस्ते महाबाहो व्यपयाहि रणादितः ॥ १३
पर्याप्तमेतद्भद्रं ते तव कार्मुकधारणम् ।
विसर्जयैतद्दुर्धर्ष तपस्तप्यस्व भार्गव ॥ १४
एष भीष्मः शांतनवो देवैः सर्वैर्निवारितः ।
निवर्तस्व रणादस्मादिति चैव प्रचोदितः ॥ १५
रामेण सह मा योत्सीर्गुरुणेति पुनः पुनः ।
न हि रामो रणे जेतुं त्वया न्याय्यः कुरूद्वह ।
मानं कुरुष्व गाङ्गेय ब्राह्मणस्य रणाजिरे ॥ १६
वयं तु गुरवस्तुभ्यं ततस्त्वां वारयामहे ।
भीष्मो वसूनामन्यतमो दिष्ट्या जीवसि पुत्रक ॥
गाङ्गेयः शंतनोः पुत्रो वसुरेष महायशाः ।
कथं त्वया रणे जेतुं राम शक्यो निवर्त वै ॥ १८
अर्जुनः पाण्डवश्रेष्ठः पुरंदरसुतो बली ।
नरः प्रजापतिर्वीरः पूर्वदेवः सनातनः ॥ १९
सव्यसाचीति विख्यातस्त्रिषु लोकेषु वीर्यवान् ।
भीष्ममृत्युर्यथाकालं विहितो वै स्वयंभुवा ॥ २०
एवमुक्तः स पितृभिः पितॄन्रामोऽब्रवीदिदम् ।
नाहं युधि निवर्तेयमिति मे व्रतमाहितम् ॥ २१
न निवर्तितपूर्वं च कदाचिद्रणमूर्धनि ।
निवर्त्यतामापगेयः कामं युद्धात्पितामहाः ।
न त्वहं विनिवर्तिष्ये युद्धादस्मात्कथंचन ॥ २२
ततस्ते मुनयो राजन्नृचीकप्रमुखास्तदा ।
नारदेनैव सहिताः समागम्येदमब्रुवन् ॥ २३
निवर्तस्व रणात्तात मानयस्व द्विजोत्तमान् ।
नेत्यवोचमहं तांश्च क्षत्रधर्मव्यपेक्षया ॥ २४
मम व्रतमिदं लोके नाहं युद्धात्कथंचन ।
विमुखो विनिवर्तेयं पृष्ठतोऽभ्याहतः शरैः ॥ २५
नाहं लोभान्न कार्पण्यान्न भयान्नार्थकारणात् ।
त्यजेयं शाश्वतं धर्ममिति मे निश्चिता मतिः ॥ २६
ततस्ते मुनयः सर्वे नारदप्रमुखा नृप ।
भागीरथी च मे माता रणमध्यं प्रपेदिरे ॥ २७
तथैवात्तशरो धन्वी तथैव दृढनिश्चयः ।
स्थितोऽहमाहवे योद्धुं ततस्ते राममब्रुवन् ।
समेत्य सहिता भूयः समरे भृगुनन्दनम् ॥ २८
नावनीतं हि हृदयं विप्राणां शाम्य भार्गव ।
राम राम निवर्तस्व युद्धादस्माद्द्विजोत्तम ।
अवध्यो हि त्वया भीष्मस्त्वं च भीष्मस्य भार्गव ॥
एवं ब्रुवन्तस्ते सर्वे प्रतिरुध्य रणाजिरम् ।
न्यासयांचक्रिरे शस्त्रं पितरो भृगुनन्दनम् ॥ ३०
ततोऽहं पुनरेवाथ तानष्टौ ब्रह्मवादिनः ।
अद्राक्षं दीप्यमानान्वै ग्रहानष्टाविवोदितान् ॥ ३१
ते मां सप्रणयं वाक्यमब्रुवन्समरे स्थितम् ।
प्रैहि रामं महाबाहो गुरुं लोकहितं कुरु ॥ ३२
दृष्ट्वा निवर्तितं रामं सुहृद्वाक्येन तेन वै ।
लोकानां च हितं कुर्वन्नहमप्याददे वचः ॥ ३३
ततोऽहं राममासाद्य ववन्दे भृशविक्षतः ।
रामश्चाभ्युत्स्मयन्प्रेम्णा मामुवाच महातपाः ॥ ३४
त्वत्समो नास्ति लोकेऽस्मिन्क्षत्रियः पृथिवीचरः ।
गम्यतां भीष्म युद्धेऽस्मिंस्तोषितोऽहं भृशं त्वया ॥ ३५
मम चैव समक्षं तां कन्यामाहूय भार्गवः ।
उवाच दीनया वाचा मध्ये तेषां तपस्विनाम् ॥ ३६

इति श्रीमहाभारते उद्योगपर्वणि
षडशीत्यधिकशततमोऽध्यायः ॥ १८६ ॥

१८७

राम उवाच ।

प्रत्यक्षमेतल्लोकानां सर्वेषामेव भामिनि ।
यथा मया परं शक्त्या कृतं वै पौरुषं महत् ॥ १
न चैव युधि शक्नोमि भीष्मं शस्त्रभृतां वरम् ।
विशेषयितुमत्यर्थमुत्तमास्त्राणि दर्शयन् ॥ २
एषा मे परमा शक्तिरेतन्मे परमं बलम् ।
यथेष्टं गम्यतां भद्रे किमन्यद्वा करोमि ते ॥ ३
भीष्ममेव प्रपद्यस्व न तेऽन्या विद्यते गतिः ।
निर्जितो ह्यस्मि भीष्मेण महास्त्राणि प्रमुञ्चता ॥ ४

भीष्म उवाच ।

एवमुक्त्वा ततो रामो विनिःश्वस्य महामनाः ।
तूष्णीमासीत्तदा कन्या प्रोवाच भृगुनन्दनम् ॥ ५
भगवन्नेवमेवैतद्यथाह भगवांस्तथा ।
अजेयो युधि भीष्मोऽयमपि देवैरुदारधीः ॥ ६
यथाशक्ति यथोत्साहं मम कार्यं कृतं त्वया ।
अनिधाय रणे वीर्यमस्त्राणि विविधानि च ॥ ७
न चैष शक्यते युद्धे विशेषयितुमन्ततः ।
न चाहमेनं यास्यामि पुनर्भीष्मं कथंचन ॥ ८
गमिष्यामि तु तत्राहं यत्र भीष्मं तपोधन ।
समरे पातयिष्यामि स्वयमेव भृगूद्वह ॥ ९
एवमुक्त्वा ययौ कन्या रोषव्याकुललोचना ।
तपसे धृतसंकल्पा मम चिन्तयती वधम् ॥ १०
ततो महेन्द्रं सह तैर्मुनिभिर्भृगुसत्तमः ।
यथागतं ययौ रामो मामुपामन्त्र्य भारत ॥ ११
ततोऽहं रथमारुह्य स्तूयमानो द्विजातिभिः ।
प्रविश्य नगरं मात्रे सत्यवत्यै न्यवेदयम् ।
यथावृत्तं महाराज सा च मां प्रत्यनन्दत ॥ १२
पुरुषांश्चादिशं प्राज्ञान्कन्यावृत्तान्तकर्मणि ।
दिवसे दिवसे ह्यस्या गतजल्पितचेष्टितम् ।
प्रत्याहरंश्च मे युक्ताः स्थिताः प्रियहिते मम ॥ १३
यदैव हि वनं प्रायात्कन्या सा तपसे धृता ।
तदैव व्यथितो दीनो गतचेता इवाभवम् ॥ १४
न हि मां क्षत्रियः कश्चिद्वीर्येण विजयेद्युधि ।
ऋते ब्रह्मविदस्तात तपसा संशितव्रतात् ॥ १५
अपि चैतन्मया राजन्नारदेऽपि निवेदितम् ।
व्यासे चैव भयात्कार्यं तौ चोभौ मामवोचताम् ॥ १६
न विषादस्त्वया कार्यो भीष्म काशिसुतां प्रति ।
दैवं पुरुषकारेण को निवर्तितुमुत्सहेत् ॥ १७
सा तु कन्या महाराज प्रविश्याश्रममण्डलम् ।
यमुनातीरमाश्रित्य तपस्तेपेऽतिमानुषम् ॥ १८
निराहारा कृशा रूक्षा जटिला मलपङ्किनी ।
षण्मासान्वायुभक्षा च स्थाणुभूता तपोधना ॥ १९
यमुनातीरमासाद्य संवत्सरमथापरम् ।
उदवासं निराहारा पारयामास भामिनी ॥ २०
शीर्णपर्णेन चैकेन पारयामास चापरम् ।
संवत्सरं तीव्रकोपा पादाङ्गुष्ठाग्रधिष्ठिता ॥ २१
एवं द्वादश वर्षाणि तापयामास रोदसी ।
निवर्त्यमानापि तु सा ज्ञातिभिर्नैव शक्यते ॥ २२
ततोऽगमद्वत्सभूमिं सिद्धचारणसेविताम् ।
आश्रमं पुण्यशीलानां तापसानां महात्मनाम् ॥ २३
तत्र पुण्येषु देशेषु साप्लुताङ्गी दिवानिशम् ।
व्यचरत्काशिकन्या सा यथाकामविचारिणी ॥ २४
नन्दाश्रमे महाराज ततोलूकाश्रमे शुभे ।
च्यवनस्याश्रमे चैव ब्रह्मणः स्थान एव च ॥ २५
प्रयागे देवयजने देवारण्येषु चैव ह ।
भोगवत्यां तथा राजन्कौशिकस्याश्रमे तथा ॥ २६
माण्डव्यस्याश्रमे राजन्दिलीपस्याश्रमे तथा ।
रामह्रदे च कौरव्य पैलगार्ग्यस्य चाश्रमे ॥ २७

एतेषु तीर्थेषु तदा काशिकन्या विशां पते ।
आप्लावयत गात्राणि तीव्रमास्थाय वै तपः ॥ २८
तामब्रवीत्कौरवेय मम माता जलोत्थिता ।
किमर्थं क्लिश्यसे भद्रे तथ्यमेतद्ब्रवीहि मे ॥ २९
सैनामथाब्रवीद्राजन्कृताञ्जलिरनिन्दिता ।
भीष्मो रामेण समरे न जितश्चारुलोचने ॥ ३०
कोऽन्यस्तमुत्सहेज्जेतुमुद्यतेषुं महीपतिम् ।
साहं भीष्मविनाशाय तपस्तप्स्ये सुदारुणम् ॥ ३१
चरामि पृथिवीं देवि यथा हन्यामहं नृपम् ।
एतद्व्रतफलं देहे परस्मिन्स्याद्यथा हि मे ॥ ३२
ततोऽब्रवीत्सागरगा जिह्मं चरसि भामिनि ।
नैष कामोऽनवद्याङ्गि शक्यः प्राप्तुं त्वयाबले ॥ ३३
यदि भीष्मविनाशाय काश्ये चरसि वै व्रतम् ।
व्रतस्था च शरीरं त्वं यदि नाम विमोक्ष्यसि ।
नदी भविष्यसि शुभे कुटिला वार्षिकोदका ॥ ३४
दुस्तीर्था चानभिज्ञेया वार्षिकी नाष्टमासिकी ।
भीमग्राहवती घोरा सर्वभूतभयंकरी ॥ ३५
एवमुक्त्वा ततो राजन्काशिकन्यां न्यवर्तत ।
माता मम महाभागा स्मयमानेव भामिनी ॥ ३६
कदाचिदष्टमे मासि कदाचिद्दशमे तथा ।
न प्राश्नीतोदकमपि पुनः सा वरवर्णिनी ॥ ३७
सा वत्सभूमिं कौरव्य तीर्थलोभात्ततस्ततः ।
पतिता परिधावन्ती पुनः काशिपतेः सुता ॥ ३८
सा नदी वत्सभूम्यां तु प्रथिताम्बेति भारत ।
वार्षिकी ग्राहबहुला दुस्तीर्था कुटिला तथा ॥ ३९
सा कन्या तपसा तेन भागार्धेन व्यजायत ।
नदी च राजन्वत्सेषु कन्या चैवाभवत्तदा ॥ ४०

इति श्रीमहाभारते उद्योगपर्वणि
सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥

१८८

भीष्म उवाच ।

ततस्ते तापसाः सर्वे तपसे धृतनिश्चयाम् ।
दृष्ट्वा न्यवर्तयंस्तात किं कार्यमिति चाब्रुवन् ॥ १
तानुवाच ततः कन्या तपोवृद्धानृषींस्तदा ।
निराकृतास्मि भीष्मेण भ्रंशिता पतिधर्मतः ॥ २
वधार्थं तस्य दीक्षा मे न लोकार्थं तपोधनाः ।
निहत्य भीष्मं गच्छेयं शान्तिमित्येव निश्चयः ॥ ३
यत्कृते दुःखवसतिमिमां प्राप्तास्मि शाश्वतीम् ।
पतिलोकाद्विहीना च नैव स्त्री न पुमानिह ॥ ४
नाहत्वा युधि गाङ्गेयं निवर्तेयं तपोधनाः ।
एष मे हृदि संकल्पो यदर्थमिदमुद्यतम् ॥ ५
स्त्रीभावे परिनिर्विण्णा पुंस्त्वार्थे कृतनिश्चया ।
भीष्मे प्रतिचिकीर्षामि नास्मि वार्येति वै पुनः ॥ ६
तां देवो दर्शयामास शूलपाणिरुमापतिः ।
मध्ये तेषां महर्षीणां स्वेन रूपेण भामिनीम् ॥ ७
छन्द्यमाना वरेणाथ सा वव्रे मत्पराजयम् ।
वधिष्यसीति तां देवः प्रत्युवाच मनस्विनीम् ॥ ८
ततः सा पुनरेवाथ कन्या रुद्रमुवाच ह ।
उपपद्येत्कथं देव स्त्रियो मम जयो युधि ।
स्त्रीभावेन च मे गाढं मनः शान्तमुमापते ॥ ९
प्रतिश्रुतश्च भूतेश त्वया भीष्मपराजयः ।
यथा स सत्यो भवति तथा कुरु वृषध्वज ।
यथा हन्यां समागम्य भीष्मं शांतनवं युधि ॥ १०
तामुवाच महादेवः कन्यां किल वृषध्वजः ।
न मे वागनृतं भद्रे प्राह सत्यं भविष्यति ॥ ११
वधिष्यसि रणे भीष्मं पुरुषत्वं च लप्स्यसे ।
स्मरिष्यसि च तत्सर्वं देहमन्यं गता सती ॥ १२
द्रुपदस्य कुले जाता भविष्यसि महारथः ।
शीघ्रास्त्रश्चित्रयोधी च भविष्यसि सुसंमतः ॥ १३

यथोक्तमेव कल्याणि सर्वमेतद्भविष्यति ।
भविष्यसि पुमान्पश्चात्कस्माच्चित्कालपर्ययात् ॥ १४
एवमुक्त्वा महातेजाः कपर्दी वृषभध्वजः ।
पश्यतामेव विप्राणां तत्रैवान्तरधीयत ॥ १५
ततः सा पश्यतां तेषां महर्षीणामनिन्दिता ।
समाहृत्य वनात्तस्मात्काष्ठानि वरवर्णिनी ॥ १६
चितां कृत्वा सुमहतीं प्रदाय च हुताशनम् ।
प्रदीप्तेऽग्नौ महाराज रोषदीप्तेन चेतसा ॥ १७
उक्त्वा भीष्मवधायेति प्रविवेश हुताशनम् ।
ज्येष्ठा काशिसुता राजन्यमुनामभितो नदीम् ॥ १८

इति श्रीमहाभारते उद्योगपर्वणि
अष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥

१८९

दुर्योधन उवाच ।

कथं शिखण्डी गाङ्गेय कन्या भूत्वा सती तदा ।
पुरुषोऽभवद्युधि श्रेष्ठ तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

भार्या तु तस्य राजेन्द्र द्रुपदस्य महीपतेः ।
महिषी दयिता ह्यासीदपुत्रा च विशां पते ॥ २
एतस्मिन्नेव काले तु द्रुपदो वै महीपतिः ।
अपत्यार्थं महाराज तोषयामास शंकरम् ॥ ३
अस्मद्वधार्थं निश्चित्य तपो घोरं समास्थितः ।
लेभे कन्यां महादेवात्पुत्रो मे स्यादिति ब्रुवन् ॥ ४
भगवन्पुत्रमिच्छामि भीष्मं प्रतिचिकीर्षया ।
इत्युक्तो देवदेवेन स्त्रीपुमांस्ते भविष्यति ॥ ५
निवर्तस्व महीपाल नैतज्जात्वन्यथा भवेत् ।
स तु गत्वा च नगरं भार्यामिदमुवाच ह ॥ ६
कृतो यत्नो मया देवि पुत्रार्थे तपसा महान् ।
कन्या भूत्वा पुमान्भावी इति चोक्तोऽस्मि शंभुना ॥
पुनः पुनर्याच्यमानो दिष्टमित्यब्रवीच्छिवः ।
न तदन्यद्धि भविता भवितव्यं हि तत्तथा ॥ ८
ततः सा नियता भूत्वा ऋतुकाले मनस्विनी ।
पत्नी द्रुपदराजस्य द्रुपदं संविवेश ह ॥ ९
लेभे गर्भं यथाकालं विधिदृष्टेन हेतुना ।
पार्षतात्सा महीपाल यथा मां नारदोऽब्रवीत् ॥ १०
ततो दधार तं गर्भं देवी राजीवलोचना ।
तां स राजा प्रियां भार्यां द्रुपदः कुरुनन्दन ।
पुत्रस्नेहान्महाबाहुः सुखं पर्यचरत्तदा ॥ ११
अपुत्रस्य ततो राज्ञो द्रुपदस्य महीपतेः ।
कन्यां प्रवररूपां तां प्राजायत नराधिप ॥ १२
अपुत्रस्य तु राज्ञः सा द्रुपदस्य यशस्विनी ।
ख्यापयामास राजेन्द्र पुत्रो जातो ममेति वै ॥ १३
ततः स राजा द्रुपदः प्रच्छन्नाया नराधिप ।
पुत्रवत्पुत्रकार्याणि सर्वाणि समकारयत् ॥ १४
रक्षणं चैव मन्त्रस्य महिषी द्रुपदस्य सा ।
चकार सर्वयत्नेन ब्रुवाणा पुत्र इत्युत ।
न हि तां वेद नगरे कश्चिदन्यत्र पार्षतात् ॥ १५
श्रद्दधानो हि तद्वाक्यं देवस्याद्भुततेजसः ।
छादयामास तां कन्यां पुमानिति च सोऽब्रवीत् ॥
जातकर्माणि सर्वाणि कारयामास पार्थिवः ।
पुंवद्विधानयुक्तानि शिखण्डीति च तां विदुः ॥ १७
अहमेकस्तु चारेण वचनान्नारदस्य च ।
ज्ञातवान्देववाक्येन अम्बायास्तपसा तथा ॥ १८

इति श्रीमहाभारते उद्योगपर्वणि
एकोननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥

१९०

भीष्म उवाच ।

चकार यत्नं द्रुपदः सर्वस्मिन्स्वजने महत् ।
ततो लेख्यादिषु तथा शिल्पेषु च परं गता ।
इष्वस्त्रे चैव राजेन्द्र द्रोणशिष्यो बभूव ह ॥ १

तस्य माता महाराज राजानं वरवर्णिनी ।
चोदयामास भार्यार्थं कन्यायाः पुत्रवत्तदा ॥ २
ततस्तां पार्षतो दृष्ट्वा कन्यां संप्राप्तयौवनाम् ।
स्त्रियं मत्वा तदा चिन्तां प्रपेदे सह भार्यया ॥ ३

द्रुपद उवाच ।

कन्या ममेयं संप्राप्ता यौवनं शोकवर्धिनी ।
मया प्रच्छादिता चेयं वचनाच्छूलपाणिनः ॥ ४
न तन्मिथ्या महाराज्ञि भविष्यति कथंचन ।
त्रैलोक्यकर्ता कस्माद्धि तन्मृषा कर्तुमर्हति ॥ ५

भार्योवाच ।

यदि ते रोचते राजन्वक्ष्यामि शृणु मे वचः ।
श्रुत्वेदानीं प्रपद्येथाः स्वकार्यं पृषतात्मज ॥ ६
क्रियतामस्य नृपते विधिवद्दारसंग्रहः ।
सत्यं भवति तद्वाक्यमिति मे निश्चिता मतिः ॥ ७

भीष्म उवाच ।

ततस्तौ निश्चयं कृत्वा तस्मिन्कार्येऽथ दंपती ।
वरयांचक्रतुः कन्यां दशार्णाधिपतेः सुताम् ॥ ८
ततो राजा द्रुपदो राजसिंहः
सर्वान्राज्ञः कुलतः संनिशाम्य ।
दाशार्णकस्य नृपतेस्तनूजां
शिखण्डिने वरयामास दारान् ॥ ९
हिरण्यवर्मेति नृपो योऽसौ दाशार्णकः स्मृतः ।
स च प्रादान्महीपालः कन्यां तस्मै शिखण्डिने ॥
स च राजा दशार्णेषु महानासीन्महीपतिः ।
हिरण्यवर्मा दुर्धर्षो महासेनो महामनाः ॥ ११
कृते विवाहे तु तदा सा कन्या राजसत्तम ।
यौवनं समनुप्राप्ता सा च कन्या शिखण्डिनी ॥ १२
कृतदारः शिखण्डी तु काम्पिल्यं पुनरागमत् ।
न च सा वेद तां कन्यां कंचित्कालं स्त्रियं किल ॥
हिरण्यवर्मणः कन्या ज्ञात्वा तां तु शिखण्डिनीम् ।
धात्रीणां च सखीनां च व्रीडमाना न्यवेदयत् ।
कन्यां पाञ्चालराजस्य सुतां तां वै शिखण्डिनीम् ॥
ततस्ता राजशार्दूल धात्र्यो दाशार्णिकास्तदा ।
जग्मुरार्तिं परां दुःखात्प्रेषयामासुरेव च ॥ १५
ततो दशार्णाधिपतेः प्रेष्याः सर्वं न्यवेदयन् ।
विप्रलम्भं यथावृत्तं स च चुक्रोध पार्थिवः ॥ १६
शिखण्ड्यपि महाराज पुंवद्राजकुले तदा ।
विजहार मुदा युक्तः स्त्रीत्वं नैवातिरोचयन् ॥ १७
ततः कतिपयाहस्य तच्छ्रुत्वा भरतर्षभ ।
हिरण्यवर्मा राजेन्द्र रोषादार्तिं जगाम ह ॥ १८
ततो दाशार्णको राजा तीव्रकोपसमन्वितः ।
दूतं प्रस्थापयामास द्रुपदस्य निवेशने ॥ १९
ततो द्रुपदमासाद्य दूतः काञ्चनवर्मणः ।
एक एकान्तमुत्सार्य रहो वचनमब्रवीत् ॥ २०
दशार्णराजो राजंस्त्वामिदं वचनमब्रवीत् ।
अभिषङ्गात्प्रकुपितो विप्रलब्धस्त्वयानघ ॥ २१
अवमन्यसे मां नृपते नूनं दुर्मन्त्रितं तव ।
यन्मे कन्यां स्वकन्यार्थे मोहाद्याचितवानसि ॥ २२
तस्याद्य विप्रलम्भस्य फलं प्राप्नुहि दुर्मते ।
एष त्वां सजनामात्यमुद्धरामि स्थिरो भव ॥ २३

इति श्रीमहाभारते उद्योगपर्वणि
नवत्यधिकशततमोऽध्यायः ॥ १९० ॥

१९१

भीष्म उवाच ।

एवमुक्तस्य दूतेन द्रुपदस्य तदा नृप ।
चोरस्येव गृहीतस्य न प्रावर्तत भारती ॥ १
स यत्नमकरोत्तीव्रं संबन्धैरनुसान्त्वनैः ।
दूतैर्मधुरसंभाषैर्नैतदस्तीति संदिशन् ॥ २
स राजा भूय एवाथ कृत्वा तत्त्वत आगमम् ।
कन्येति पाञ्चालसुतां त्वरमाणोऽभिनिर्ययौ ॥ ३

ततः संप्रेषयामास मित्राणाममितौजसाम् ।
दुहितुर्विप्रलम्भं तं धात्रीणां वचनात्तदा ॥ ४
ततः समुदयं कृत्वा बलानां राजसत्तमः ।
अभियाने मतिं चक्रे द्रुपदं प्रति भारत ॥ ५
ततः संमन्त्रयामास मित्रैः सह महीपतिः ।
हिरण्यवर्मा राजेन्द्र पाञ्चाल्यं पार्थिवं प्रति ॥ ६
तत्र वै निश्चितं तेषामभूद्राज्ञां महात्मनाम् ।
तथ्यं चेद्भवति ह्येतत्कन्या राजञ्शिखण्डिनी ।
बद्ध्वा पाञ्चालराजानमानयिष्यामहे गृहान् ॥ ७
अन्यं राजानमाधाय पाञ्चालेषु नरेश्वरम् ।
घातयिष्याम नृपतिं द्रुपदं सशिखण्डिनम् ॥ ८
स तदा दूतमाज्ञाय पुनः क्षत्तारमीश्वरः ।
प्रास्थापयत्पार्षताय हन्मीति त्वां स्थिरो भव ॥ ९
स प्रकृत्या च वै भीरुः किल्बिषी च नराधिपः ।
भयं तीव्रमनुप्राप्तो द्रुपदः पृथिवीपतिः ॥ १०
विसृज्य दूतं दाशार्णं द्रुपदः शोककर्शितः ।
समेत्य भार्यां रहिते वाक्यमाह नराधिपः ॥ ११
भयेन महताविष्टो हृदि शोकेन चाहतः ।
पाञ्चालराजो दयितां मातरं वै शिखण्डिनः ॥ १२
अभियास्यति मां कोपात्संबन्धी सुमहाबलः ।
हिरण्यवर्मा नृपतिः कर्षमाणो वरूथिनीम् ॥ १३
किमिदानीं करिष्यामि मूढः कन्यामिमां प्रति ।
शिखण्डी किल पुत्रस्ते कन्येति परिशङ्कितः ॥१४
इति निश्चित्य तत्त्वेन समित्रः सबलानुगः ।
वञ्चितोऽस्मीति मन्वानो मां किलोद्धर्तुमिच्छति॥
किमत्र तथ्यं सुश्रोणि किं मिथ्या ब्रूहि शोभने ।
श्रुत्वा त्वत्तः शुभे वाक्यं संविधास्याम्यहं तथा॥१६
अहं हि संशयं प्राप्तो बाला चेयं शिखण्डिनी ।
त्वं च राज्ञि महत्कृच्छ्रं संप्राप्ता वरवर्णिनी ॥ १७
सा त्वं सर्वविमोक्षाय तत्त्वमाख्याहि पृच्छतः ।
तथा विदध्यां सुश्रोणि कृत्यस्यास्य शुचिस्मिते ।
शिखण्डिनि च मा भैस्त्वं विधास्ये तत्र तत्त्वतः॥१८
क्रिययाहं वरारोहे वञ्चितः पुत्रधर्मतः ।
मया दाशार्णको राजा वञ्चितश्च महीपतिः ।
तदाचक्ष्व महाभागे विधास्ये तत्र यद्धितम् ॥ १९
जानतापि नरेन्द्रेण ख्यापनार्थं परस्य वै ।
प्रकाशं चोदिता देवी प्रत्युवाच महीपतिम् ॥ २०

इति श्रीमहाभारते उद्योगपर्वणि
एकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥

१९२

भीष्म उवाच ।

ततः शिखण्डिनो माता यथातत्त्वं नराधिप ।
आचचक्षे महाबाहो भर्त्रे कन्यां शिखण्डिनीम् ॥ १
अपुत्रया मया राजन्सपत्नीनां भयादिदम् ।
कन्या शिखण्डिनी जाता पुरुषो वै निवेदितः ॥ २
त्वया चैव नरश्रेष्ठ तन्मे प्रीत्यानुमोदितम् ।
पुत्रकर्म कृतं चैव कन्यायाः पार्थिवर्षभ ।
भार्या चोढा त्वया राजन्दशार्णाधिपतेः सुता ॥ ३
त्वया च प्रागभिहितं देववाक्यार्थदर्शनात् ।
कन्या भूत्वा पुमान्भावीत्येवं चैतदुपेक्षितम् ॥ ४
एतच्छ्रुत्वा द्रुपदो यज्ञसेनः
सर्वं तत्त्वं मन्त्रविद्भ्यो निवेद्य ।
मन्त्रं राजा मन्त्रयामास राज-
न्यद्यद्युक्तं रक्षणे वै प्रजानाम् ॥ ५
संबन्धकं चैव समर्थ्य तस्मि-
न्दाशार्णके वै नृपतौ नरेन्द्र ।
स्वयं कृत्वा विप्रलम्भं यथाव-
न्मन्त्रैकाग्रो निश्चयं वै जगाम ॥ ६
स्वभावगुप्तं नगरमापत्काले तु भारत ।
गोपयामास राजेन्द्र सर्वतः समलंकृतम् ॥ ७

आर्तिं च परमां राजा जगाम सह भार्यया ।
दशार्णपतिना सार्धं विरोधे भरतर्षभ ॥ ८
कथं संबन्धिना सार्धं न मे स्याद्विग्रहो महान् ।
इति संचिन्त्य मनसा दैवतान्यर्चयत्तदा ॥ ९
तं तु दृष्ट्वा तदा राजन्देवी देवपरं तथा ।
अर्चां प्रयुञ्जानमथो भार्या वचनमब्रवीत् ॥ १०
देवानां प्रतिपत्तिश्च सत्या साधुमता सदा ।
सा तु दुःखार्णवं प्राप्य नः स्यादर्चयतां भृशम् ॥ ११
दैवतानि च सर्वाणि पूज्यन्तां भूरिदक्षिणैः ।
अग्नयश्चापि हूयन्तां दाशार्णप्रतिषेधने ॥ १२
अयुद्धेन निवृत्तिं च मनसा चिन्तयाभिभो ।
देवतानां प्रसादेन सर्वमेतद्भविष्यति ॥ १३
मन्त्रिभिर्मन्त्रितं सार्धं त्वया यत्पृथुलोचन ।
पुरस्यास्याविनाशाय तच्च राजंस्तथा कुरु ॥ १४
दैवं हि मानुषोपेतं भृशं सिध्यति पार्थिव ।
परस्परविरोधात्तु नानयोः सिद्धिरस्ति वै ॥ १५
तस्माद्विधाय नगरे विधानं सचिवैः सह ।
अर्चयस्व यथाकामं दैवतानि विशां पते ॥ १६
एवं संभाषमाणौ तौ दृष्ट्वा शोकपरायणौ ।
शिखण्डिनी तदा कन्या व्रीडितेव मनस्विनी ॥१७
ततः सा चिन्तयामास मत्कृते दुःखितावुभौ ।
इमाविति ततश्चक्रे मतिं प्राणविनाशने ॥ १८
एवं सा निश्चयं कृत्वा भृशं शोकपरायणा ।
जगाम भवनं त्यक्त्वा गहनं निर्जनं वनम् ॥ १९
यक्षेणर्द्धिमता राजन्स्थूणाकर्णेन पालितम् ।
तद्भयादेव च जनो विसर्जयति तद्वनम् ॥ २०
तत्र स्थूणस्य भवनं सुधामृत्तिकलेपनम् ।
लाजोल्लापिकधूमाढ्यमुच्चप्राकारतोरणम् ॥ २१
तत्प्रविश्य शिखण्डी सा द्रुपदस्यात्मजा नृप ।
अनश्नती बहुतिथं शरीरमुपशोषयत् ॥ २२
दर्शयामास तां यक्षः स्थूणो मध्वक्षसंयुतः ।
किमर्थोऽयं तवारम्भः करिष्ये ब्रूहि माचिरम् ॥२३
अशक्यमिति सा यक्षं पुनः पुनरुवाच ह ।
करिष्यामीति चैनां स प्रत्युवाचाथ गुह्यकः ॥२४
धनेश्वरस्यानुचरो वरदोऽस्मि नृपात्मजे ।
अदेयमपि दास्यामि ब्रूहि यत्ते विवक्षितम् ॥ २५
ततः शिखण्डी तत्सर्वमखिलेन न्यवेदयत् ।
तस्मै यक्षप्रधानाय स्थूणाकर्णाय भारत ॥ २६
आपन्नो मे पिता यक्ष नचिराद्विनशिष्यति ।
अभियास्यति संक्रुद्धो दशार्णाधिपतिर्हि तम् ॥ २७
महाबलो महोत्साहः स हेमकवचो नृपः ।
तस्माद्रक्षस्व मां यक्ष पितरं मातरं च मे ॥ २८
प्रतिज्ञातो हि भवता दुःखप्रतिनयो मम ।
भवेयं पुरुषो यक्ष त्वत्प्रसादादनिन्दितः ॥ २९
यावदेव स राजा वै नोपयाति पुरं मम ।
तावदेव महायक्ष प्रसादं कुरु गुह्यक ॥ ३०

इति श्रीमहाभारते उद्योगपर्वणि
द्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥

१९३

भीष्म उवाच ।

शिखण्डिवाक्यं श्रुत्वाथ स यक्षो भरतर्षभ ।
प्रोवाच मनसा चिन्त्य दैवेनोपनिपीडितः ।
भवितव्यं तथा तद्धि मम दुःखाय कौरव ॥ १
भद्रे कामं करिष्यामि समयं तु निबोध मे ।
किंचित्कालान्तरं दास्ये पुंलिङ्गं स्वमिदं तव ।
आगन्तव्यं त्वया काले सत्यमेतद्ब्रवीमि ते ॥ २
प्रभुः संकल्पसिद्धोऽस्मि कामरूपी विहंगमः ।
मत्प्रसादात्पुरं चैव त्राहि बन्धूंश्च केवलान् ॥ ३
स्त्रीलिङ्गं धारयिष्यामि त्वदीयं पार्थिवात्मजे ।
सत्यं मे प्रतिजानीहि करिष्यामि प्रियं तव ॥ ४

शिखण्ड्युवाच ।
प्रतिदास्यामि भगवल्लिँङ्गं पुनरिदं तव ।
किंचित्कालान्तरं स्त्रीत्वं धारयस्व निशाचर ॥ ५
प्रतिप्रयाते दाशार्णे पार्थिवे हेमवर्मणि ।
कन्यैवाहं भविष्यामि पुरुषस्त्वं भविष्यसि ॥ ६
भीष्म उवाच ।
इत्युक्त्वा समयं तत्र चक्राते तावुभौ नृप ।
अन्योन्यस्यानभिद्रोहे तौ संक्रामयतां ततः ॥ ७
स्त्रीलिङ्गं धारयामास स्थूणो यक्षो नराधिप ।
यक्षरूपं च तद्दीप्तं शिखण्डी प्रत्यपद्यत ॥ ८
ततः शिखण्डी पाञ्चाल्यः पुंस्त्वमासाद्य पार्थिव ।
विवेश नगरं हृष्टः पितरं च समासदत् ।
यथावृत्तं तु तत्सर्वमाचख्यौ द्रुपदस्य च ॥ ९
द्रुपदस्तस्य तच्छ्रुत्वा हर्षमाहारयत्परम् ।
सभार्यस्तच्च सस्मार महेश्वरवचस्तदा ॥ १०
ततः संप्रेषयामास दशार्णाधिपतेर्नृप ।
पुरुषोऽयं मम सुतः श्रद्धत्तां मे भवानिति ॥ ११
अथ दाशार्णको राजा सहसाभ्यागमत्तदा ।
पाञ्चालराजं द्रुपदं दुःखामर्षसमन्वितः ॥ १२
ततः काम्पिल्यमासाद्य दशार्णाधिपतिस्तदा ।
प्रेषयामास सत्कृत्य दूतं ब्रह्मविदां वरम् ॥ १३
ब्रूहि मद्वचनाद्दूत पाञ्चाल्यं तं नृपाधमम् ।
यद्वै कन्यां स्वकन्यार्थे वृतवानसि दुर्मते ।
फलं तस्यावलेपस्य द्रक्ष्यस्यद्य न संशयः ॥ १४
एवमुक्तस्तु तेनासौ ब्राह्मणो राजसत्तम ।
दूतः प्रयातो नगरं दाशार्णनृपचोदितः ॥ १५
तत आसादयामास पुरोधा द्रुपदं पुरे ।
तस्मै पाञ्चालको राजा गामर्घ्यं च सुसत्कृतम् ।
प्रापयामास राजेन्द्र सह तेन शिखण्डिना ॥ १६
तां पूजां नाभ्यनन्दत्स वाक्यं चेदमुवाच ह ।
यदुक्तं तेन वीरेण राज्ञा काञ्चनवर्मणा ॥ १७
यत्तेऽहमधमाचार दुहित्रर्थेऽस्मि वञ्चितः ।
तस्य पापस्य करणात्फलं प्राप्नुहि दुर्मते ॥ १८
देहि युद्धं नरपते ममाद्य रणमूर्धनि ।
उद्धरिष्यामि ते सद्यः सामात्यसुतबान्धवम् ॥ १९
तदुपालम्भसंयुक्तं श्रावितः किल पार्थिवः ।
दशार्णपतिदूतेन मन्त्रिमध्ये पुरोधसा ॥ २०
अब्रवीद्भरतश्रेष्ठ द्रुपदः प्रणयानतः ।
यदाह मां भवान्ब्रह्मन्संबन्धिवचनाद्वचः ।
तस्योत्तरं प्रतिवचो दूत एव वदिष्यति ॥ २१
ततः संप्रेषयामास द्रुपदोऽपि महात्मने ।
हिरण्यवर्मणे दूतं ब्राह्मणं वेदपारगम् ॥ २२
समागम्य तु राज्ञा स दशार्णपतिना तदा ।
तद्वाक्यमाददे राजन्यदुक्तं द्रुपदेन ह ॥ २३
आगमः क्रियतां व्यक्तं कुमारो वै सुतो मम ।
मिथ्यैतदुक्तं केनापि तन्न श्रद्धेयमित्युत ॥ २४
ततः स राजा द्रुपदस्य श्रुत्वा
विमर्शयुक्तो युवतीर्वरिष्ठाः ।
संप्रेषयामास सुचारुरूपाः
शिखण्डिनं स्त्री पुमान्वेति वेत्तुम् ॥ २५
ताः प्रेषितास्तत्त्वभावं विदित्वा
प्रीत्या राज्ञे तच्छशंसुर्हि सर्वम् ।
शिखण्डिनं पुरुषं कौरवेन्द्र
दशार्णराजाय महानुभावम् ॥ २६
ततः कृत्वा तु राजा स आगमं प्रीतिमानथ ।
संबन्धिना समागम्य हृष्टो वासमुवास ह ॥ २७
शिखण्डिने च मुदितः प्रादाद्वित्तं जनेश्वरः ।
हस्तिनोऽश्वांश्च गाश्चैव दास्यो बहुशतास्तथा ।
पूजितश्च प्रतिययौ निवर्त्य तनयां किल ॥ २८
विनीतकिल्बिषे प्रीते हेमवर्मणि पार्थिवे ।

प्रतियाते तु दाशार्णे हृष्टरूपा शिखण्डिनी ॥ २९
कस्यचित्त्वथ कालस्य कुबेरो नरवाहनः ।
लोकानुयात्रां कुर्वाणः स्थूणस्यागान्निवेशनम् ॥ ३०
स तद्गृहस्योपरि वर्तमान
आलोकयामास धनाधिगोप्ता ।
स्थूणस्य यक्षस्य निशाम्य वेश्म
स्वलंकृतं माल्यगुणैर्विचित्रम् ॥ ३१
लाजैश्च गन्धैश्च तथा वितानै-
रभ्यर्चितं धूपनधूपितं च ।
ध्वजैः पताकाभिरलंकृतं च
भक्ष्यान्नपेयामिषदत्तहोमम् ॥ ३२
तत्स्थानं तस्य दृष्ट्वा तु सर्वतः समलंकृतम् ।
अथाब्रवीद्यक्षपतिस्तान्यक्षाननुगांस्तदा ॥ ३३
स्वलंकृतमिदं वेश्म स्थूणस्यामितविक्रमाः ।
नोपसर्पति मां चापि कस्मादद्य सुमन्दधीः ॥ ३४
यस्माज्जानन्सुमन्दात्मा मामसौ नोपसर्पति ।
तस्मात्तस्मै महादण्डो धार्यः स्यादिति मे मतिः ॥

यक्षा ऊचुः ।

द्रुपदस्य सुता राजन्राज्ञो जाता शिखण्डिनी ।
तस्यै निमित्ते कस्मिंश्चित्प्रादात्पुरुषलक्षणम् ॥ ३६
अग्रहील्लक्षणं स्त्रीणां स्त्रीभूतस्तिष्ठते गृहे ।
नोपसर्पति तेनासौ सव्रीडः स्त्रीस्वरूपवान् ॥ ३७
एतस्मात्कारणाद्राजन्स्थूणो न त्वाद्य पश्यति ।
श्रुत्वा कुरु यथान्यायं विमानमिह तिष्ठताम् ॥ ३८

भीष्म उवाच ।

आनीयतां स्थूण इति ततो यक्षाधिपोऽब्रवीत् ।
कर्तास्मि निग्रहं तस्येत्युवाच स पुनः पुनः ॥ ३९
सोऽभ्यगच्छत यक्षेन्द्रमाहूतः पृथिवीपते ।
स्त्रीस्वरूपो महाराज तस्थौ व्रीडासमन्वितः ॥ ४०
तं शशाप सुसंक्रुद्धो धनदः कुरुनन्दन ।
एवमेव भवत्वस्य स्त्रीत्वं पापस्य गुह्यकाः ॥ ४१
ततोऽब्रवीद्यक्षपतिर्महात्मा
यस्माददास्त्ववमन्येह यक्षान् ।
शिखण्डिने लक्षणं पापबुद्धे
स्त्रीलक्षणं चाग्रहीः पापकर्मन् ॥ ४२
अप्रवृत्तं सुदुर्बुद्धे यस्मादेतत्कृतं त्वया ।
तस्मादद्यप्रभृत्येव त्वं स्त्री स पुरुषस्तथा ॥ ४३
ततः प्रसादयामासुर्यक्षा वैश्रवणं किल ।
स्थूणस्यार्थे कुरुष्वान्तं शापस्येति पुनः पुनः ॥ ४४
ततो महात्मा यक्षेन्द्रः प्रत्युवाचानुगामिनः ।
सर्वान्यक्षगणांस्तात शापस्यान्तचिकीर्षया ॥ ४५
हते शिखण्डिनि रणे स्वरूपं प्रतिपत्स्यते ।
स्थूणो यक्षो निरुद्वेगो भवत्विति महामनाः ॥ ४६
इत्युक्त्वा भगवान्देवो यक्षराक्षसपूजितः ।
प्रययौ सह तैः सर्वैर्निमेषान्तरचारिभिः ॥ ४७
स्थूणस्तु शापं संप्राप्य तत्रैव न्यवसत्तदा ।
समये चागमत्तं वै शिखण्डी स क्षपाचरम् ॥ ४८
सोऽभिगम्याब्रवीद्वाक्यं प्राप्तोऽस्मि भगवन्निति ।
तमब्रवीत्ततः स्थूणः प्रीतोऽस्मीति पुनः पुनः ॥४९
आर्जवेनागतं दृष्ट्वा राजपुत्रं शिखण्डिनम् ।
सर्वमेव यथावृत्तमाचचक्षे शिखण्डिने ॥ ५०

यक्ष उवाच ।

शप्तो वैश्रवणेनास्मि त्वत्कृते पार्थिवात्मज ।
गच्छेदानीं यथाकामं चर लोकान्यथासुखम् ॥ ५१
दिष्टमेतत्पुरा मन्ये न शक्यमतिवर्तितुम् ।
गमनं तव चेतो हि पौलस्त्यस्य च दर्शनम् ॥ ५२

भीष्म उवाच ।

एवमुक्तः शिखण्डी तु स्थूणयक्षेण भारत ।
प्रत्याजगाम नगरं हर्षेण महतान्वितः ॥ ५३

पूजयामास विविधैर्गन्धमाल्यैर्महाधनैः ।
द्विजातीन्देवताश्चापि चैत्यानथ चतुष्पथान् ॥ ५४
द्रुपदः सह पुत्रेण सिद्धार्थेन शिखण्डिना ।
मुदं च परमां लेभे पाञ्चाल्यः सह बान्धवैः ॥ ५५
शिष्यार्थं प्रददौ चापि द्रोणाय कुरुपुंगव ।
शिखण्डिनं महाराज पुत्रं स्त्रीपूर्विणं तथा ॥ ५६
प्रतिपेदे चतुष्पादं धनुर्वेदं नृपात्मजः ।
शिखण्डी सह युष्माभिर्धृष्टद्युम्नश्च पार्षतः ॥ ५७
मम त्वेतच्चरास्तात यथावत्प्रत्यवेदयन् ।
जडान्धबधिराकारा ये युक्ता द्रुपदे मया ॥ ५८
एवमेष महाराज स्त्रीपुमान्द्रुपदात्मजः ।
संभूतः कौरवश्रेष्ठ शिखण्डी रथसत्तमः ॥ ५९
ज्येष्ठा काशिपतेः कन्या अम्बा नामेति विश्रुता ।
द्रुपदस्य कुले जाता शिखण्डी भरतर्षभ ॥ ६०
नाहमेनं धनुष्पाणिं युयुत्सुं समुपस्थितम् ।
मुहूर्तमपि पश्येयं प्रहरेयं न चाप्युत ॥ ६१
व्रतमेतन्मम सदा पृथिव्यामपि विश्रुतम् ।
स्त्रियां स्त्रीपूर्वके चापि स्त्रीनाम्नि स्त्रीस्वरूपिणि ॥ ६२
न मुञ्चेयमहं बाणानिति कौरवनन्दन ।
न हन्यामहमेतेन कारणेन शिखण्डिनम् ॥ ६३
एतत्तत्त्वमहं वेद जन्म तात शिखण्डिनः ।
ततो नैनं हनिष्यामि समरेष्वाततायिनम् ॥ ६४
यदि भीष्मः स्त्रियं हन्याद्धन्यादात्मानमप्युत ।
नैनं तस्माद्धनिष्यामि दृष्ट्वापि समरे स्थितम् ॥ ६५

संजय उवाच ।

एवमुक्त्वा तु कौरव्यो राजा दुर्योधनस्तदा ।
मुहूर्तमिव स ध्यात्वा भीष्मे युक्तममन्यत ॥ ६६

इति श्रीमहाभारते उद्योगपर्वणि
त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥

१९४

संजय उवाच ।

प्रभातायां तु शर्वर्यां पुनरेव सुतस्तव ।
मध्ये सर्वस्य सैन्यस्य पितामहमपृच्छत ॥ १
पाण्डवेयस्य गाङ्गेय यदेतत्सैन्यमुत्तमम् ।
प्रभूतनरनागाश्वं महारथसमाकुलम् ॥ २
भीमार्जुनप्रभृतिभिर्महेष्वासैर्महाबलैः ।
लोकपालोपमैर्गुप्तं धृष्टद्युम्नपुरोगमैः ॥ ३
अप्रधृष्यमनावार्यमुद्वृत्तमिव सागरम् ।
सेनासागरमक्षोभ्यमपि देवैर्महाहवे ॥ ४
केन कालेन गाङ्गेय क्षपयेथा महाद्युते ।
आचार्यो वा महेष्वासः कृपो वा सुमहाबलः ॥ ५
कर्णो वा समरश्लाघी द्रौणिर्वा द्विजसत्तमः ।
दिव्यास्त्रविदुषः सर्वे भवन्तो हि बले मम ॥ ६
एतदिच्छाम्यहं ज्ञातुं परं कौतूहलं हि मे ।
हृदि नित्यं महाबाहो वक्तुमर्हसि तन्मम ॥ ७

भीष्म उवाच ।

अनुरूपं कुरुश्रेष्ठ त्वय्येतत्पृथिवीपते ।
बलाबलममित्राणां स्वेषां च यदि पृच्छसि ॥ ८
शृणु राजन्मम रणे या शक्तिः परमा भवेत् ।
अस्त्रवीर्यं रणे यच्च भुजयोश्च महाभुज ॥ ९
आर्जवेनैव युद्धेन योद्धव्य इतरो जनः ।
मायायुद्धेन मायावी इत्येतद्धर्मनिश्चयः ॥ १०
हन्यामहं महाबाहो पाण्डवानामनीकिनीम् ।
दिवसे दिवसे कृत्वा भागं प्राग्राह्णिकं मम ॥ ११
योधानां दशसाहस्रं कृत्वा भागं महाद्युते ।
सहस्रं रथिनामेकमेष भागो मतो मम ॥ १२
अनेनाहं विधानेन संनद्धः सततोत्थितः ।
क्षपयेयं महत्सैन्यं कालेनानेन भारत ॥ १३
यदि त्वस्त्राणि मुञ्चेयं महान्ति समरे स्थितः ।

शतसाहस्रघातीनि हन्यां मासेन भारत ॥ १४

संजय उवाच ।

श्रुत्वा भीष्मस्य तद्वाक्यं राजा दुर्योधनस्तदा ।
पर्यपृच्छत राजेन्द्र द्रोणमङ्गिरसां वरम् ॥ १५
आचार्य केन कालेन पाण्डुपुत्रस्य सैनिकान् ।
निहन्या इति तं द्रोणः प्रत्युवाच हसन्निव ॥ १६
स्थविरोऽस्मि कुरुश्रेष्ठ मन्दप्राणविचेष्टितः ।
अस्त्राग्निना निर्दहेयं पाण्डवानामनीकिनीम् ॥ १७
यथा भीष्मः शांतनवो मासेनेति मतिर्मम ।
एषा मे परमा शक्तिरेतन्मे परमं बलम् ॥ १८
द्वाभ्यामेव तु मासाभ्यां कृपः शारद्वतोऽब्रवीत् ।
द्रौणिस्तु दशरात्रेण प्रतिजज्ञे बलक्षयम् ।
कर्णस्तु पञ्चरात्रेण प्रतिजज्ञे महास्त्रवित् ॥ १९
तच्छ्रुत्वा सूतपुत्रस्य वाक्यं सागरगासुतः ।
जहास सस्वनं हासं वाक्यं चेदमुवाच ह ॥ २०
न हि तावद्रणे पार्थं बाणखड्गधनुर्धरम् ।
वासुदेवसमायुक्तं रथेनोद्यन्तमच्युतम् ॥ २१
समागच्छसि राधेय तेनैवमभिमन्यसे ।
शक्यमेवं च भूयश्च त्वया वक्तुं यथेष्टतः ॥ २२

इति श्रीमहाभारते उद्योगपर्वणि
चतुर्नवत्यधिकशततमोऽध्यायः ॥ १९४ ॥

१९५

वैशंपायन उवाच ।

एतच्छ्रुत्वा तु कौन्तेयः सर्वान्भ्रातॄनुपह्वरे ।
आहूय भरतश्रेष्ठ इदं वचनमब्रवीत् ॥ १
धार्तराष्ट्रस्य सैन्येषु ये चारपुरुषा मम ।
ते प्रवृत्तिं प्रयच्छन्ति ममेमां व्युषितां निशाम् ॥२
दुर्योधनः किलापृच्छदापगेयं महाव्रतम् ।
केन कालेन पाण्डूनां हन्याः सैन्यमिति प्रभो ॥३
मासेनेति च तेनोक्तो धार्तराष्ट्रः सुदुर्मतिः ।
तावता चापि कालेन द्रोणोऽपि प्रत्यजानत ॥ ४
गौतमो द्विगुणं कालमुक्तवानिति नः श्रुतम् ।
द्रौणिस्तु दशरात्रेण प्रतिजज्ञे महास्त्रवित् ॥ ५
तथा दिव्यास्त्रवित्कर्णः संपृष्टः कुरुसंसदि ।
पञ्चभिर्दिवसैर्हन्तुं स सैन्यं प्रतिजज्ञिवान् ॥ ६
तस्मादहमपीच्छामि श्रोतुमर्जुन ते वचः ।
कालेन कियता शत्रून्क्षपयेरिति संयुगे ॥ ७
एवमुक्तो गुडाकेशः पार्थिवेन धनंजयः ।
वासुदेवमवेक्ष्येदं वचनं प्रत्यभाषत ॥ ८
सर्व एते महात्मानः कृतास्त्राश्चित्रयोधिनः ।
असंशयं महाराज हन्युरेव बलं तव ॥ ९
अपैतु ते मनस्तापो यथा सत्यं ब्रवीम्यहम् ।
हन्यामेकरथेनाहं वासुदेवसहायवान् ॥ १०
सामरानपि लोकांस्त्रीन्सहस्थावरजङ्गमान् ।
भूतं भव्यं भविष्यच्च निमेषादिति मे मतिः ॥११
यत्तद्घोरं पशुपतिः प्रादादस्त्रं महन्मम ।
कैराते द्वन्द्वयुद्धे वै तदिदं मयि वर्तते ॥ १२
यद्युगान्ते पशुपतिः सर्वभूतानि संहरन् ।
प्रयुङ्क्ते पुरुषव्याघ्र तदिदं मयि वर्तते ॥ १३
तन्न जानाति गाङ्गेयो न द्रोणो न च गौतमः ।
न च द्रोणसुतो राजन्कुत एव तु सूतजः ॥ १४
न तु युक्तं रणे हन्तुं दिव्यैरस्त्रैः पृथग्जनम् ।
आर्जवेनैव युद्धेन विजेष्यामो वयं परान् ॥ १५
तथेमे पुरुषव्याघ्राः सहायास्तव पार्थिव ।
सर्वे दिव्यास्त्रविदुषः सर्वे युद्धाभिनन्दिनः ॥ १६
वेदान्तावभृथस्नाताः सर्वे एतेऽपराजिताः ।
निहन्युः समरे सेनां देवानामपि पाण्डव ॥ १७
शिखण्डी युयुधानश्च धृष्टद्युम्नश्च पार्षतः ।
भीमसेनो यमौ चोभौ युधामन्यूत्तमौजसौ ॥ १८
विराटद्रुपदौ चोभौ भीष्मद्रोणसमौ युधि ।

त्वं चापि समर्थोऽसि त्रैलोक्योत्सादने अपि ॥
क्रोधाद्यं पुरुषं पश्येस्त्वं वासवसमद्युते ।
क्षिप्रं न स भवेद्व्यक्तमिति त्वां वेद्मि कौरव ॥२०

इति श्रीमहाभारते उद्योगपर्वणि
पञ्चनवत्यधिकशततमोऽध्यायः ॥ १९५ ॥

१९६

वैशंपायन उवाच ।

ततः प्रभाते विमले धार्तराष्ट्रेण चोदिताः ।
दुर्योधनेन राजानः प्रययुः पाण्डवान्प्रति ॥ १
आप्लाव्य शुचयः सर्वे स्रग्विणः शुक्लवाससः ।
गृहीतशस्त्रा ध्वजिनः स्वस्ति वाच्य हुताग्नयः ॥ २
सर्वे वेदविदः शूराः सर्वे सुचरितव्रताः ।
सर्वे कर्मकृतश्चैव सर्वे चाहवलक्षणाः ॥ ३
आहवेषु पराँल्लोकाञ्जिगीषन्तो महाबलाः ।
एकाग्रमनसः सर्वे श्रद्दधानाः परस्य च ॥ ४
विन्दानुविन्दावावन्त्यौ केकया बाह्लिकैः सह ।
प्रययुः सर्व एवैते भारद्वाजपुरोगमाः ॥ ५
अश्वत्थामा शांतनवः सैन्धवोऽथ जयद्रथः ।
दाक्षिणात्याः प्रतीच्याश्च पार्वतीयाश्च ये रथाः ॥६
गान्धारराजः शकुनिः प्राच्योदीच्याश्च सर्वशः ।
शकाः किराता यवनाः शिबयोऽथ वसातयः ॥ ७
स्वैः स्वैरनीकैः सहिताः परिवार्य महारथम् ।
एते महारथाः सर्वे द्वितीये निर्ययुर्बले ॥ ८
कृतवर्मा सहानीकस्त्रिगर्ताश्च महाबलाः ।
दुर्योधनश्च नृपतिर्भ्रातृभिः परिवारितः ॥ ९
शलो भूरिश्रवाः शल्यः कौसल्योऽथ बृहद्बलः ।
एते पश्चादवर्तन्त धार्तराष्ट्रपुरोगमाः ॥ १०
ते समेन पथा यात्वा योत्स्यमाना महारथाः ।
कुरुक्षेत्रस्य पश्चार्धे व्यवतिष्ठन्त दंशिताः ॥ ११
दुर्योधनस्तु शिबिरं कारयामास भारत ।
यथैव हास्तिनपुरं द्वितीयं समलंकृतम् ॥ १२
न विशेषं विजानन्ति पुरस्य शिबिरस्य वा ।
कुशला अपि राजेन्द्र नरा नगरवासिनः ॥ १३
तादृशान्येव दुर्गाणि राज्ञामपि महीपतिः ।
कारयामास कौरव्यः शतशोऽथ सहस्रशः ॥ १४
पञ्चयोजनमुत्सृज्य मण्डलं तद्रणाजिरम् ।
सेनानिवेशास्ते राजन्नाविशञ्शतसंघशः ॥ १५
तत्र ते पृथिवीपाला यथोत्साहं यथाबलम् ।
विविशुः शिबिराण्याशु द्रव्यवन्ति सहस्रशः ॥१६
तेषां दुर्योधनो राजा ससैन्यानां महात्मनाम् ।
व्यादिदेश सबाह्यानां भक्ष्यभोज्यमनुत्तमम् ॥ १७
सगजाश्वमनुष्याणां ये च शिल्पोपजीविनः ।
ये चान्येऽनुगतास्तत्र सूतमागधबन्दिनः ॥ १८
वणिजो गणिका वारा ये चैव प्रेक्षका जनाः ।
सर्वांस्तान्कौरवो राजा विधिवत्प्रत्यवैक्षत ॥ १९

इति श्रीमहाभारते उद्योगपर्वणि
षण्णवत्यधिकशततमोऽध्यायः ॥ १९६ ॥

१९७

वैशंपायन उवाच ।

तथैव राजा कौन्तेयो धर्मपुत्रो युधिष्ठिरः ।
धृष्टद्युम्नमुखान्वीरांश्चोदयामास भारत ॥ १
चेदिकाशिकरूषाणां नेतारं दृढविक्रमम् ।
सेनापतिममित्रघ्नं धृष्टकेतुमथादिशत् ॥ २
विराटं द्रुपदं चैव युयुधानं शिखण्डिनम् ।
पाञ्चाल्यौ च महेष्वासौ युधामन्यूत्तमौजसौ ॥ ३
ते शूराश्चित्रवर्माणस्तप्तकुण्डलधारिणः ।
आज्यावसिक्ता ज्वलिता धिष्ण्येष्विव हुताशनाः ।
अशोभन्त महेष्वासा ग्रहाः प्रज्वलिता इव ॥ ४
सोऽथ सैन्यं यथायोगं पूजयित्वा नरर्षभः ।
दिदेश तान्यनीकानि प्रयाणाय महीपतिः ॥ ५

अभिमन्युं बृहन्तं च द्रौपदेयांश्च सर्वशः ।
धृष्टद्युम्नमुखानेतान्प्राहिणोत्पाण्डुनन्दनः ॥ ६
भीमं च युयुधानं च पाण्डवं च धनंजयम् ।
द्वितीयं प्रेषयामास बलस्कन्धं युधिष्ठिरः ॥ ७
भाण्डं समारोपयतां चरतां संप्रधावताम् ।
हृष्टानां तत्र योधानां शब्दो दिवमिवास्पृशत् ॥ ८
स्वयमेव ततः पश्चाद्विराटद्रुपदान्वितः ।
तथान्यैः पृथिवीपालैः सह प्रायान्महीपतिः ॥ ९
भीमधन्वायनी सेना धृष्टद्युम्नपुरस्कृता ।
गङ्गेव पूर्णा स्तिमिता स्यन्दमाना व्यदृश्यत ॥ १०
ततः पुनरनीकानि व्ययोजयत बुद्धिमान् ।
मोहयन्धृतराष्ट्रस्य पुत्राणां बुद्धिनिस्रवम् ॥ ११
द्रौपदेयान्महेष्वासानभिमन्युं च पाण्डवः ।
नकुलं सहदेवं च सर्वांश्चैव प्रभद्रकान् ॥ १२
दश चाश्वसहस्राणि द्विसाहस्रं च दन्तिनः ।
अयुतं च पदातीनां रथाः पञ्चशतास्तथा ॥ १३
भीमसेनं च दुर्धर्षं प्रथमं प्रादिशद्बलम् ।
मध्यमे तु विराटं च जयत्सेनं च मागधम् ॥ १४
महारथौ च पाञ्चाल्यौ युधामन्यूत्तमौजसौ ।
वीर्यवन्तौ महात्मानौ गदाकार्मुकधारिणौ ।
अन्वयातां ततो मध्ये वासुदेवधनंजयौ ॥ १५
बभूवुरतिसंरब्धाः कृतप्रहरणा नराः ।
तेषां विंशतिसाहस्रा ध्वजाः शूरैरधिष्ठिताः ॥ १६
पञ्च नागसहस्राणि रथवंशाश्च सर्वशः ।
पदातयश्च ये शूराः कार्मुकासिगदाधराः ।
सहस्रशोऽन्वयुः पश्चादग्रतश्च सहस्रशः ॥ १७
युधिष्ठिरो यत्र सैन्ये स्वयमेव बलार्णवे ।
तत्र ते पृथिवीपाला भूयिष्ठं पर्यवस्थिताः ॥ १८
तत्र नागसहस्राणि हयानामयुतानि च ।
तथा रथसहस्राणि पदातीनां च भारत ।
यदाश्रित्याभियुयुधे धार्तराष्ट्रं सुयोधनम् ॥ १९
ततोऽन्ये शतशः पश्चात्सहस्रायुतशो नराः ।
नदन्तः प्रययुस्तेषामनीकानि सहस्रशः ॥ २०
तत्र भेरीसहस्राणि शङ्खानामयुतानि च ।
वादयन्ति स्म संहृष्टाः सहस्रायुतशो नराः ॥ २१

इति श्रीमहाभारते उद्योगपर्वणि
सप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥

॥ समाप्तमम्बोपाख्यानपर्व ॥

॥ समाप्तमुद्योगपर्व ॥

६

भीष्मपर्व

१

जनमेजय उवाच ।

कथं युयुधिरे वीराः कुरुपाण्डवसोमकाः ।
पार्थिवाश्च महाभागा नानादेशसमागताः ॥ १

वैशंपायन उवाच ।

यथा युयुधिरे वीराः कुरुपाण्डवसोमकाः ।
कुरुक्षेत्रे तपःक्षेत्रे शृणु तत्पृथिवीपते ॥ २
अवतीर्य कुरुक्षेत्रं पाण्डवाः सहसोमकाः ।
कौरवानभ्यवर्तन्त जिगीषन्तो महाबलाः ॥ ३
वेदाध्ययनसंपन्नाः सर्वे युद्धाभिनन्दिनः ।
आशंसन्तो जयं युद्धे वधं वाभिमुखा रणे ॥ ४
अभियाय च दुर्धर्षां धार्तराष्ट्रस्य वाहिनीम् ।
प्राङ्मुखाः पश्चिमे भागे न्यविशन्त ससैनिकाः ॥ ५
समन्तपञ्चकाद्बाह्यं शिबिराणि सहस्रशः ।
कारयामास विधिवत्कुन्तीपुत्रो युधिष्ठिरः ॥ ६
शून्येव पृथिवी सर्वा बालवृद्धावशेषिता ।
निरश्वपुरुषा चासीद्रथकुञ्जरवर्जिता ॥ ७
यावत्तपति सूर्यो हि जम्बूद्वीपस्य मण्डलम् ।
तावदेव समावृत्तं बलं पार्थिवसत्तम ॥ ८
एकस्थाः सर्ववर्णास्ते मण्डलं बहुयोजनम् ।
पर्याक्रामन्त देशांश्च नदीः शैलान्वनानि च ॥ ९
तेषां युधिष्ठिरो राजा सर्वेषां पुरुषर्षभ ।
आदिदेश सवाहानां भक्ष्यभोज्यमनुत्तमम् ॥ १०
संज्ञाश्च विविधास्तास्तास्तेषां चक्रे युधिष्ठिरः ।
एवंवादी वेदितव्यः पाण्डवेयोऽयमित्युत ॥ ११
अभिज्ञानानि सर्वेषां संज्ञाश्चाभरणानि च ।
योजयामास कौरव्यो युद्धकाल उपस्थिते ॥ १२
दृष्ट्वा ध्वजाग्रं पार्थानां धार्तराष्ट्रो महामनाः ।
सह सर्वैर्महीपालैः प्रत्यव्यूहत पाण्डवान् ॥ १३
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
मध्ये नागसहस्रस्य भ्रातृभिः परिवारितम् ॥ १४
दृष्ट्वा दुर्योधनं हृष्टाः सर्वे पाण्डवसैनिकाः ।
दध्मुः सर्वे महाशङ्खान्भेरीर्जघ्नुः सहस्रशः ॥ १५
ततः प्रहृष्टां स्वां सेनामभिवीक्ष्याथ पाण्डवाः ।
बभूवुर्हृष्टमनसो वासुदेवश्च वीर्यवान् ॥ १६
ततो योधान्हर्षयन्तौ वासुदेवधनंजयौ ।
दध्मतुः पुरुषव्याघ्रौ दिव्यौ शङ्खौ रथे स्थितौ ॥
पाञ्चजन्यस्य निर्घोषं देवदत्तस्य चोभयोः ।
श्रुत्वा सवाहना योधाः शकृन्मूत्रं प्रसुस्रुवुः ॥ १८
यथा सिंहस्य नदतः स्वनं श्रुत्वेतरे मृगाः ।
त्रसेयुस्तद्वदेवासीद्धार्तराष्ट्रबलं तदा ॥ १९
उदतिष्ठद्रजो भौमं न प्राज्ञायत किंचन ।
अन्तर्धीयत चादित्यः सैन्येन रजसावृतः ॥ २०
ववर्ष चात्र पर्जन्यो मांसशोणितवृष्टिमान् ।
व्युक्षन्सर्वाण्यनीकानि तदद्भुतमिवाभवत् ॥ २१
वायुस्ततः प्रादुरभून्नीचैः शर्करकर्षणः ।
विनिघ्नंस्तान्यनीकानि विधमंश्चैव तद्रजः ॥ २२
उभे सेने तदा राजन्युद्धाय मुदिते भृशम् ।

कुरुक्षेत्रे स्थिते यत्ते सागरक्षुभितोपमे ॥ २३
तयोस्तु सेनयोरासीदद्भुतः स समागमः ।
युगान्ते समनुप्राप्ते द्वयोः सागरयोरिव ॥ २४
शून्यासीत्पृथिवी सर्वा बालवृद्धावशेषिता ।
तेन सेनासमूहेन समानीतेन कौरवैः ॥ २५
ततस्ते समयं चक्रुः कुरुपाण्डवसोमकाः ।
धर्मांश्च स्थापयामासुर्युद्धानां भरतर्षभ ॥ २६
निवृत्ते चैव नो युद्धे प्रीतिश्च स्यात्परस्परम् ।
यथापुरं यथायोगं न च स्याच्छलनं पुनः ॥ २७
वाचा युद्धे प्रवृत्ते नो वाचैव प्रतियोधनम् ।
निष्क्रान्तः पृतनामध्यान्न हन्तव्यः कथंचन ॥ २८
रथी च रथिना योध्यो गजेन गजधूर्गतः ।
अश्वेनाश्वी पदातिश्च पदातेनैव भारत ॥ २९
यथायोगं यथावीर्यं यथोत्साहं यथावयः ।
समाभाष्य प्रहर्तव्यं न विश्वस्ते न विह्वले ॥ ३०
परेण सह संयुक्तः प्रमत्तो विमुखस्तथा ।
क्षीणशस्त्रो विवर्मा च न हन्तव्यः कथंचन ॥ ३१
न सूतेषु न धुर्येषु न च शस्त्रोपनायिषु ।
न भेरीशङ्खवादेषु प्रहर्तव्यं कथंचन ॥ ३२
एवं ते समयं कृत्वा कुरुपाण्डवसोमकाः ।
विस्मयं परमं जग्मुः प्रेक्षमाणाः परस्परम् ॥ ३३
निविश्य च महात्मानस्ततस्ते पुरुषर्षभाः ।
हृष्टरूपाः सुमनसो बभूवुः सहसैनिकाः ॥ ३४

इति श्रीमहाभारते भीष्मपर्वणि
प्रथमोऽध्यायः ॥ १ ॥

२

वैशंपायन उवाच ।

ततः पूर्वापरे संध्ये समीक्ष्य भगवानृषिः ।
सर्ववेदविदां श्रेष्ठो व्यासः सत्यवतीसुतः ॥ १
भविष्यति रणे घोरे भरतानां पितामहः ।
प्रत्यक्षदर्शी भगवान्भूतभव्यभविष्यवित् ॥ २
वैचित्रवीर्यं राजानं स रहस्यं ब्रवीदिदम् ।
शोचन्तमार्तं ध्यायन्तं पुत्राणामनयं तदा ॥ ३

व्यास उवाच ।

राजन्परीतकालास्ते पुत्राश्चान्ये च भूमिपाः ।
ते हनिष्यन्ति संग्रामे समासाद्येतरेतरम् ॥ ४
तेषु कालपरीतेषु विनश्यत्सु च भारत ।
कालपर्यायमाज्ञाय मा स्म शोके मनः कृथाः ॥ ५
यदि त्विच्छसि संग्रामे द्रष्टुमेनं विशां पते ।
चक्षुर्ददानि ते हन्त युद्धमेतन्निशामय ॥ ६

धृतराष्ट्र उवाच ।

न रोचये ज्ञातिवधं द्रष्टुं ब्रह्मर्षिसत्तम ।
युद्धमेतत्त्वशेषेण शृणुयां तव तेजसा ॥ ७

वैशंपायन उवाच ।

तस्मिन्ननिच्छति द्रष्टुं संग्रामं श्रोतुमिच्छति ।
वराणामीश्वरो दाता संजयाय वरं ददौ ॥ ८

व्यास उवाच ।

एष ते संजयो राजन्युद्धमेतद्वदिष्यति ।
एतस्य सर्वं संग्रामे नपरोक्षं भविष्यति ॥ ९
चक्षुषा संजयो राजन्दिव्येनैष समन्वितः ।
कथयिष्यति ते युद्धं सर्वज्ञश्च भविष्यति ॥ १०
प्रकाशं वा रहस्यं वा रात्रौ वा यदि वा दिवा ।
मनसा चिन्तितमपि सर्वं वेत्स्यति संजयः ॥ ११
नैनं शस्त्राणि भेत्स्यन्ति नैनं बाधिष्यते श्रमः ।
गावल्गणिरयं जीवन्युद्धादस्माद्विमोक्ष्यते ॥ १२
अहं च कीर्तिमेतेषां कुरूणां भरतर्षभ ।
पाण्डवानां च सर्वेषां प्रथयिष्यामि मा शुचः ॥
दिष्टमेतत्पुरा चैव नात्र शोचितुमर्हसि ।
न चैव शक्यं संयन्तुं यतो धर्मस्ततो जयः ॥ १४

वैशंपायन उवाच ।

एवमुक्त्वा स भगवान्कुरूणां प्रपितामहः ।
पुनरेव महाबाहुं धृतराष्ट्रमुवाच ह ॥ १५
इह युद्धे महाराज भविष्यति महान्क्षयः ।
यथेमानि निमित्तानि भयायाद्योपलक्षये ॥ १६
श्येना गृध्राश्च काकाश्च कङ्काश्च सहिता बलैः ।
संपतन्ति वनान्तेषु समवायांश्च कुर्वते ॥ १७
अत्युग्रं च प्रपश्यन्ति युद्धमानन्दिनो द्विजाः ।
क्रव्यादा भक्षयिष्यन्ति मांसानि गजवाजिनाम् ॥
खटाखटेति वाशन्तो भैरवं भयवेदिनः ।
कङ्काः प्रयान्ति मध्येन दक्षिणामभितो दिशम् ॥१९
उभे पूर्वापरे संध्ये नित्यं पश्यामि भारत ।
उदयास्तमने सूर्यं कबन्धैः परिवारितम् ॥ २०
श्वेतलोहितपर्यन्ताः कृष्णग्रीवाः सविद्युतः ।
त्रिवर्णाः परिघाः संधौ भानुमावारयन्त्युत ॥ २१
ज्वलितार्केन्दुनक्षत्रं निर्विशेषदिनक्षपम् ।
अहोरात्रं मया दृष्टं तत्क्षयाय भविष्यति ॥ २२
अलक्ष्यः प्रभया हीनः पौर्णमासीं च कार्त्तिकीम् ।
चन्द्रोऽभूदग्निवर्णश्च समवर्णे नभस्तले ॥ २३
स्वप्स्यन्ति निहता वीरा भूमिमावृत्य पार्थिवाः ।
राजानो राजपुत्राश्च शूराः परिघबाहवः ॥ २४
अन्तरिक्षे वराहस्य वृषदंशस्य चोभयोः ।
प्रणादं युध्यतो रात्रौ रौद्रं नित्यं प्रलक्षये ॥ २५
देवताप्रतिमाश्चापि कम्पन्ति च हसन्ति च ।
वमन्ति रुधिरं चास्यैः स्विद्यन्ति प्रपतन्ति च ॥ २६
अनाहता दुन्दुभयः प्रणदन्ति विशां पते ।
अयुक्ताश्च प्रवर्तन्ते क्षत्रियाणां महारथाः ॥ २७
कोकिलाः शतपत्राश्च चाषा भासाः शुकास्तथा ।
सारसाश्च मयूराश्च वाचो मुञ्चन्ति दारुणाः ॥२८
गृहीतशस्त्राभरणा वर्मिणो वाजिपृष्ठगाः ।
अरुणोदयेषु दृश्यन्ते शतशः शलभव्रजाः ॥ २९
उभे संध्ये प्रकाशेते दिशां दाहसमन्विते ।
आसीद्रुधिरवर्षं च अस्थिवर्षं च भारत ॥ ३०
या चैषा विश्रुता राजंस्त्रैलोक्ये साधुसंमता ।
अरुन्धती तयाप्येष वसिष्ठः पृष्ठतः कृतः ॥ ३१
रोहिणीं पीडयन्नेष स्थितो राजञ्शनैश्चरः ।
व्यावृत्तं लक्ष्म सोमस्य भविष्यति महद्भयम् ॥ ३२
अनभ्रे च महाघोरं स्तनितं श्रूयतेऽनिशम् ।
वाहनानां च रुदतां प्रपतन्त्यश्रुबिन्दवः ॥ ३३

इति श्रीमहाभारते भीष्मपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

३

व्यास उवाच ।

खरा गोषु प्रजायन्ते रमन्ते मातृभिः सुताः ।
अनार्तवं पुष्पफलं दर्शयन्ति वने द्रुमाः ॥ १
गर्भिण्यो राजपुत्र्यश्च जनयन्ति विभीषणान् ।
क्रव्यादान्पक्षिणश्चैव गोमायूनपरान्मृगान् ॥ २
त्रिविषाणाश्चतुर्नेत्राः पञ्चपादा द्विमेहनाः ।
द्विशीर्षाश्च द्विपुच्छाश्च दंष्ट्रिणः पशवोऽशिवाः ॥३
जायन्ते विवृतास्याश्च व्याहरन्तोऽशिवा गिरः ।
त्रिपदाः शिखिनस्तार्क्ष्याश्चतुर्दंष्ट्रा विषाणिनः ॥ ४
तथैवान्याश्च दृश्यन्ते स्त्रियश्च ब्रह्मवादिनाम् ।
वैनतेयान्मयूरांश्च जनयन्त्यः पुरे तव ॥ ५
गोवत्सं वडवा सूते श्वा सृगालं महीपते ।
क्रकराञ्शारिकाश्चैव शुकांश्चाशुभवादिनः ॥ ६
स्त्रियः काश्चित्प्रजायन्ते चतस्रः पञ्च कन्यकाः ।
ता जातमात्रा नृत्यन्ति गायन्ति च हसन्ति च ॥ ७
पृथग्जनस्य कुडकाः स्तनपाः स्तेनवेश्मनि ।
नृत्यन्ति परिगायन्ति वेदयन्तो महद्भयम् ॥ ८
प्रतिमाश्चालिखन्त्यन्ये सशस्त्राः कालचोदिताः ।

अन्योन्यमभिधावन्ति शिशवो दण्डपाणयः ।
उपरुन्धन्ति कृत्वा च नगराणि युयुत्सवः ॥ ९
पद्मोत्पलानि वृक्षेषु जायन्ते कुमुदानि च ।
विष्वग्वाताश्च वान्त्युग्रा रजो न व्युपशाम्यति ॥१०
अभीक्ष्णं कम्पते भूमिरर्कं राहुस्तथाग्रसत् ।
श्वेतो ग्रहस्तथा चित्रां समतिक्रम्य तिष्ठति ॥ ११
अभावं हि विशेषेण कुरूणां प्रतिपश्यति ।
धूमकेतुर्महाघोरः पुष्यमाक्रम्य तिष्ठति ॥ १२
सेनयोरशिवं घोरं करिष्यति महाग्रहः ।
मघास्वङ्गारको वक्रः श्रवणे च बृहस्पतिः ॥ १३
भाग्यं नक्षत्रमाक्रम्य सूर्यपुत्रेण पीड्यते ।
शुक्रः प्रोष्ठपदे पूर्वे समारुह्य विशां पते ।
उत्तरे तु परिक्रम्य सहितः प्रत्युदीक्षते ॥ १४
श्यामो ग्रहः प्रज्वलितः सधूमः सहपावकः ।
ऐन्द्रं तेजस्वि नक्षत्रं ज्येष्ठामाक्रम्य तिष्ठति ॥ १५
ध्रुवः प्रज्वलितो घोरमपसव्यं प्रवर्तते ।
चित्रास्वात्यन्तरे चैव धिष्ठितः परुषो ग्रहः ॥ १६
वक्रानुवक्रं कृत्वा च श्रवणे पावकप्रभः ।
ब्रह्मराशिं समावृत्य लोहिताङ्गो व्यवस्थितः ॥ १७
सर्वसस्यप्रतिच्छन्ना पृथिवी फलमालिनी ।
पञ्चशीर्षा यवाश्चैव शतशीर्षाश्च शालयः ॥ १८
प्रधानाः सर्वलोकस्य यास्वायत्तमिदं जगत् ।
ता गावः प्रस्नुता वत्सैः शोणितं प्रक्षरन्त्युत ॥ १९
निश्चेरुरपिधानेभ्यः खड्गाः प्रज्वलिता भृशम् ।
व्यक्तं पश्यन्ति शस्त्राणि संग्रामं समुपस्थितम् ॥२०
अग्निवर्णा यथा भासः शस्त्राणामुदकस्य च ।
कवचानां ध्वजानां च भविष्यति महान्क्षयः ॥२१
दिक्षु प्रज्वलितास्याश्च व्याहरन्ति मृगद्विजाः ।
अत्याहितं दर्शयन्तो वेदयन्ति महद्भयम् ॥ २२
एकपक्षाक्षिचरणः शकुनिः खचरो निशि ।
रौद्रं वदति संरब्धः शोणितं छर्दयन्मुहुः ॥ २३
ग्रहौ ताम्रारुणशिखौ प्रज्वलन्ताविव स्थितौ ।
सप्तर्षीणामुदाराणां समवच्छाद्य वै प्रभाम् ॥ २४
संवत्सरस्थायिनौ च ग्रहौ प्रज्वलितावुभौ ।
विशाखयोः समीपस्थौ बृहस्पतिशनैश्चरौ ॥ २५
कृत्तिकासु ग्रहस्तीव्रो नक्षत्रे प्रथमे ज्वलन् ।
वपूंष्यपहरन्भासा धूमकेतुरिव स्थितः ॥ २६
त्रिषु पूर्वेषु सर्वेषु नक्षत्रेषु विशां पते ।
बुधः संपततेऽभीक्ष्णं जनयन्सुमहद्भयम् ॥ २७
चतुर्दशीं पञ्चदशीं भूतपूर्वां च षोडशीम् ।
इमां तु नाभिजानामि अमावास्यां त्रयोदशीम् ॥२८
चन्द्रसूर्यावुभौ ग्रस्तावेकमासे त्रयोदशीम् ।
अपर्वणि ग्रहावेतौ प्रजाः संक्षपयिष्यतः ॥ २९
रजोवृता दिशः सर्वाः पांसुवर्षैः समन्ततः ।
उत्पातमेघा रौद्राश्च रात्रौ वर्षन्ति शोणितम् ॥ ३०
मांसवर्षं पुनस्तीव्रमासीत्कृष्णचतुर्दशीम् ।
अर्धरात्रे महाघोरमतृप्यंस्तत्र राक्षसाः ॥ ३१
प्रतिस्रोतोऽवहन्नद्यः सरितः शोणितोदकाः ।
फेनायमानाः कूपाश्च नर्दन्ति वृषभा इव ।
पतन्त्युल्काः सनिर्घाताः शुष्काशनिविमिश्रिताः॥३२
अद्य चैव निशां व्युष्टामुदये भानुराहतः ।
ज्वलन्तीभिर्महोल्काभिश्चतुर्भिः सर्वतोदिशम् ॥३३
आदित्यमुपतिष्ठद्भिस्तत्र चोक्तं महर्षिभिः ।
भूमिपालसहस्राणां भूमिः पास्यति शोणितम् ॥३४
कैलासमन्दराभ्यां तु तथा हिमवतो गिरेः ।
सहस्रशो महाशब्दं शिखराणि पतन्ति च ॥ ३५
महाभूता भूमिकम्पे चतुरः सागरान्पृथक् ।
वेलामुद्वर्तयन्ति स्म क्षोभयन्तः पुनः पुनः ॥ ३६
वृक्षानुन्मथ्य वान्त्युग्रा वाताः शर्करकर्षिणः ।
पतन्ति चैत्यवृक्षाश्च ग्रामेषु नगरेषु च ॥ ३७

पीतलोहितनीलश्च ज्वलत्यग्निर्हुतो द्विजैः ।
वामार्चिः शावगन्धी च धूमप्रायः खरस्वनः ।
स्पर्शा गन्धा रसाश्चैव विपरीता महीपते ॥ ३८
धूमायन्ते ध्वजा राज्ञां कम्पमाना मुहुर्मुहुः ।
मुञ्चन्त्यङ्गारवर्षाणि भेर्योऽथ पटहास्तथा ॥ ३९
प्रासादशिखराग्रेषु पुरद्वारेषु चैव हि ।
गृध्राः परिपतन्त्युग्रा वामं मण्डलमाश्रिताः ॥ ४०
पक्वापक्वेति सुभृशं वावाश्यन्ते वयांसि च ।
निलीयन्ते ध्वजाग्रेषु क्षयाय पृथिवीक्षिताम् ॥ ४१
ध्यायन्तः प्रकिरन्तश्च वालान्वेपथुसंयुताः ।
रुदन्ति दीनास्तुरगा मातङ्गाश्च सहस्रशः ॥ ४२
एतच्छ्रुत्वा भवानत्र प्राप्तकालं व्यवस्यताम् ।
यथा लोकः समुच्छेदं नायं गच्छेत भारत ॥ ४३

वैशंपायन उवाच ।

पितुर्वचो निशम्यैतद्धृतराष्ट्रोऽब्रवीदिदम् ।
दिष्टमेतत्पुरा मन्ये भविष्यति न संशयः ॥ ४४
क्षत्रियाः क्षत्रधर्मेण वध्यन्ते यदि संयुगे ।
वीरलोकं समासाद्य सुखं प्राप्स्यन्ति केवलम् ॥ ४५
इह कीर्तिं परे लोके दीर्घकालं महत्सुखम् ।
प्राप्स्यन्ति पुरुषव्याघ्राः प्राणांस्त्यक्त्वा महाहवे ॥

इति श्रीमहाभारते भीष्मपर्वणि
तृतीयोऽध्यायः ॥ ३ ॥

४

वैशंपायन उवाच ।

एवमुक्तो मुनिस्तत्त्वं कवीन्द्रो राजसत्तम ।
पुत्रेण धृतराष्ट्रेण ध्यानमन्वगमत्परम् ॥ १
पुनरेवाब्रवीद्वाक्यं कालवादी महातपाः ।
असंशयं पार्थिवेन्द्र कालः संक्षिपते जगत् ॥ २
सृजते च पुनर्लोकान्नेह विद्यति शाश्वतम् ।
ज्ञातीनां च कुरूणां च संबन्धिसुहृदां तथा ॥ ३
धर्म्यं देशय पन्थानं समर्थो ह्यसि वारणे ।
क्षुद्रं ज्ञातिवधं प्राहुर्मा कुरुष्व ममाप्रियम् ॥ ४
कालोऽयं पुत्ररूपेण तव जातो विशां पते ।
न वधः पूज्यते वेदे हितं नैतत्कथंचन ॥ ५
हन्यात्स एव यो हन्यात्कुलधर्मं स्वकां तनुम् ।
कालेनोत्पथगन्तासि शक्ये सति यथापथि ॥ ६
कुलस्यास्य विनाशाय तथैव च महीक्षिताम् ।
अनर्थो राज्यरूपेण त्यज्यतामसुखावहः ॥ ७
लुप्तप्रज्ञः परेणासि धर्मं दर्शय वै सुतान् ।
किं ते राज्येन दुर्धर्ष येन प्राप्तोऽसि किल्बिषम् ॥
यशो धर्मं च कीर्तिं च पालयन्स्वर्गमाप्स्यसि ।
लभन्तां पाण्डवा राज्यं शमं गच्छन्तु कौरवाः ॥ ९
एवं ब्रुवति विप्रेन्द्रे धृतराष्ट्रोऽम्बिकासुतः ।
आक्षिप्य वाक्यं वाक्यज्ञो वाक्पथेनाप्ययात्पुनः ॥

धृतराष्ट्र उवाच ।

यथा भवान्वेद तथास्मि वेत्ता
भावाभावौ विदितौ मे यथावत् ।
स्वार्थे हि संमुह्यति तात लोको
मां चापि लोकात्मकमेव विद्धि ॥ ११
प्रसादये त्वामतुलप्रभावं
त्वं नो गतिर्दर्शयिता च धीरः ।
न चापि ते वशगा मे महर्षे
न कल्मषं कर्तुमिहार्हसे माम् ॥ १२
त्वं हि धर्मः पवित्रं च यशः कीर्तिर्धृतिः स्मृतिः ।
कुरूणां पाण्डवानां च मान्यश्चासि पितामहः ॥ १३

व्यास उवाच ।

वैचित्रवीर्ये नृपते यत्ते मनसि वर्तते ।
अभिधत्स्व यथाकामं छेत्तास्मि तव संशयम् ॥ १४

धृतराष्ट्र उवाच ।

यानि लिङ्गानि संग्रामे भवन्ति विजयिष्यताम् ।

तानि सर्वाणि भगवञ्श्रोतुमिच्छामि तत्त्वतः ॥ १५

व्यास उवाच ।

प्रसन्नभाः पावक ऊर्ध्वरश्मिः
प्रदक्षिणावर्तशिखो विधूमः ।
पुण्या गन्धाश्चाहुतीनां प्रवान्ति
जयस्यैतद्भाविनो रूपमाहुः ॥ १६
गम्भीरघोषाश्च महास्वनाश्च
शङ्खा मृदङ्गाश्च नदन्ति यत्र ।
विशुद्धरश्मिस्तपनः शशी च
जयस्यैतद्भाविनो रूपमाहुः ॥ १७
इष्टा वाचः पृष्ठतो वायसानां
संप्रस्थितानां च गमिष्यतां च ।
ये पृष्ठतस्ते त्वरयन्ति राज-
न्ये त्वग्रतस्ते प्रतिषेधयन्ति ॥ १८
कल्याणवाचः शकुना राजहंसाः
शुकाः क्रौञ्चाः शतपत्राश्च यत्र ।
प्रदक्षिणाश्चैव भवन्ति संख्ये
ध्रुवं जयं तत्र वदन्ति विप्राः ॥ १९
अलंकारैः कवचैः केतुभिश्च
मुखप्रसादैर्हेमवर्णैश्च नृणाम् ।
भ्राजिष्मती दुष्प्रतिप्रेक्षणीया
येषां चमूस्ते विजयन्ति शत्रून् ॥ २०

हृष्टा वाचस्तथा सत्त्वं योधानां यत्र भारत ।
न म्लायन्ते स्रजश्चैव ते तरन्ति रणे रिपून् ॥ २१
इष्टो वातः प्रविष्टस्य दक्षिणा प्रविविक्षतः ।
पश्चात्संसाधयत्यर्थं पुरस्तात्प्रतिषेधते ॥ २२
शब्दरूपरसस्पर्शगन्धाश्चाविष्कृताः शुभाः ।
सदा योधाश्च हृष्टाश्च येषां तेषां ध्रुवं जयः ॥ २३
अन्वेव वायवो वान्ति तथाभ्राणि वयांसि च ।
अनुप्लवन्ते मेघाश्च तथैवेन्द्रधनूंषि च ॥ २४
एतानि जयमानानां लक्षणानि विशां पते ।
भवन्ति विपरीतानि मुमूर्षूणां जनाधिप ॥ २५
अल्पायां वा महत्यां वा सेनायामिति निश्चितम् ।
हर्षो योधगणस्यैकं जयलक्षणमुच्यते ॥ २६
एको दीर्णो दारयति सेनां सुमहतीमपि ।
तं दीर्णमनुदीर्यन्ते योधाः शूरतमा अपि ॥ २७
दुर्निवारतमा चैव प्रभग्ना महती चमूः ।
अपामिव महावेगस्त्रस्ता मृगगणा इव ॥ २८
नैव शक्या समाधातुं संनिपाते महाचमूः ।
दीर्णा इत्येव दीर्यन्ते योधाः शूरतमा अपि ।
भीतान्भग्नांश्च संप्रेक्ष्य भयं भूयो विवर्धते ॥ २९
प्रभग्ना सहसा राजन्दिशो विभ्रामिता परैः ।
नैव स्थापयितुं शक्या शूरैरपि महाचमूः ॥ ३०
संभृत्य महतीं सेनां चतुरङ्गां महीपतिः ।
उपायपूर्वं मेधावी यतेत सततोत्थितः ॥ ३१
उपायविजयं श्रेष्ठमाहुर्भेदेन मध्यमम् ।
जघन्य एष विजयो यो युद्धेन विशां पते ।
महादोषः संनिपातस्ततो व्यङ्गः स उच्यते ॥ ३२
परस्परज्ञाः संहृष्टा व्यवधूताः सुनिश्चिताः ।
पञ्चाशदपि ये शूरा मथ्नन्ति महतीं चमूम् ।
अथ वा पञ्च षट् सप्त विजयन्त्यनिवर्तिनः ॥ ३३
न वैनतेयो गरुडः प्रशंसति महाजनम् ।
दृष्ट्वा सुपर्णोपचितिं महतीमपि भारत ॥ ३४
न बाहुल्येन सेनाया जयो भवति भारत ।
अध्रुवो हि जयो नाम दैवं चात्र परायणम् ।
जयन्तो ह्यपि संग्रामे क्षयवन्तो भवन्त्युत ॥ ३५

इति श्रीमहाभारते भीष्मपर्वणि
चतुर्थोऽध्यायः ॥ ४ ॥

५

वैशंपायन उवाच ।

एवमुक्त्वा ययौ व्यासो धृतराष्ट्राय धीमते ।
धृतराष्ट्रोऽपि तच्छ्रुत्वा ध्यानमेवान्वपद्यत ॥ १
स मुहूर्तमिव ध्यात्वा विनिःश्वस्य मुहुर्मुहुः ।
संजयं संशितात्मानमपृच्छद्भरतर्षभ ॥ २
संजयेमे महीपालाः शूरा युद्धाभिनन्दिनः ।
अन्योन्यमभिनिघ्नन्ति शस्त्रैरुच्चावचैरपि ॥ ३
पार्थिवाः पृथिवीहेतोः समभित्यक्तजीविताः ।
न च शाम्यन्ति निघ्नन्तो वर्धयन्तो यमक्षयम् ॥ ४
भौममैश्वर्यमिच्छन्तो न मृष्यन्ते परस्परम् ।
मन्ये बहुगुणा भूमिस्तन्ममाचक्ष्व संजय ॥ ५
बहूनि च सहस्राणि प्रयुतान्यर्बुदानि च ।
कोट्यश्च लोकवीराणां समेताः कुरुजाङ्गले ॥ ६
देशानां च परीमाणं नगराणां च संजय ।
श्रोतुमिच्छामि तत्त्वेन यत एते समागताः ॥ ७
दिव्यबुद्धिप्रदीपेन युक्तस्त्वं ज्ञानचक्षुषा ।
प्रसादात्तस्य विप्रर्षेर्व्यासस्यामिततेजसः ॥ ८

संजय उवाच ।

यथाप्रज्ञं महाप्राज्ञ भौमान्वक्ष्यामि ते गुणान् ।
शास्त्रचक्षुरवेक्षस्व नमस्ते भरतर्षभ ॥ ९
द्विविधानीह भूतानि त्रसानि स्थावराणि च ।
त्रसानां त्रिविधा योनिरण्डस्वेदजरायुजाः ॥ १०
त्रसानां खलु सर्वेषां श्रेष्ठा राजञ्जरायुजाः ।
जरायुजानां प्रवरा मानवाः पशवश्च ये ॥ ११
नानारूपाणि बिभ्राणास्तेषां भेदाश्चतुर्दश ।
अरण्यवासिनः सप्त सप्तैषां ग्रामवासिनः ॥ १२
सिंहव्याघ्रवराहाश्च महिषा वारणास्तथा ।
ऋक्षाश्च वानराश्चैव सप्तारण्याः स्मृता नृप ॥ १३
गौरजो मनुजो मेषो वाज्यश्वतरगर्दभाः ।
एते ग्राम्याः समाख्याताः पशवः सप्त साधुभिः ॥
एते वै पशवो राजन्ग्राम्यारण्याश्चतुर्दश ।
वेदोक्ताः पृथिवीपाल येषु यज्ञाः प्रतिष्ठिताः ॥ १५
ग्राम्याणां पुरुषः श्रेष्ठः सिंहश्चारण्यवासिनाम् ।
सर्वेषामेव भूतानामन्योन्येनाभिजीवनम् ॥ १६
उद्भिज्जाः स्थावराः प्रोक्तास्तेषां पञ्चैव जातयः ।
वृक्षगुल्मलतावल्ल्यस्त्वक्सारास्तृणजातयः ॥ १७
एषां विंशतिरेकोना महाभूतेषु पञ्चसु ।
चतुर्विंशतिरुद्दिष्टा गायत्री लोकसंमता ॥ १८
य एतां वेद गायत्रीं पुण्यां सर्वगुणान्विताम् ।
तत्त्वेन भरतश्रेष्ठ स लोकान्न प्रणश्यति ॥ १९
भूमौ हि जायते सर्वं भूमौ सर्वं प्रणश्यति ।
भूमिः प्रतिष्ठा भूतानां भूमिरेव परायणम् ॥ २०
यस्य भूमिस्तस्य सर्वं जगत्स्थावरजङ्गमम् ।
तत्राभिगृद्धा राजानो विनिघ्नन्तीतरेतरम् ॥ २१

इति श्रीमहाभारते भीष्मपर्वणि
पञ्चमोऽध्यायः ॥ ५ ॥

६

धृतराष्ट्र उवाच

नदीनां पर्वतानां च नामधेयानि संजय ।
तथा जनपदानां च ये चान्ये भूमिमाश्रिताः ॥ १
प्रमाणं च प्रमाणज्ञ पृथिव्या अपि सर्वशः ।
निखिलेन समाचक्ष्व काननानि च संजय ॥ २

संजय उवाच ।

पञ्चेमानि महाराज महाभूतानि संग्रहात् ।
जगत्स्थितानि सर्वाणि समान्याहुर्मनीषिणः ॥ ३
भूमिरापस्तथा वायुरग्निराकाशमेव च ।
गुणोत्तराणि सर्वाणि तेषां भूमिः प्रधानतः ॥ ४
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः ।
भूमेरेते गुणाः प्रोक्ता ऋषिभिस्तत्त्ववेदिभिः ॥ ५

चत्वारोऽप्सु गुणा राजन्गन्धस्तत्र न विद्यते ।
शब्दः स्पर्शश्च रूपं च तेजसोऽथ गुणास्त्रयः ।
शब्दः स्पर्शश्च वायोस्तु आकाशे शब्द एव च ॥ ६
एते पञ्च गुणा राजन्महाभूतेषु पञ्चसु ।
वर्तन्ते सर्वलोकेषु येषु लोकाः प्रतिष्ठिताः ॥ ७
अन्योन्यं नाभिवर्तन्ते साम्यं भवति वै यदा ।
यदा तु विषमीभावमाविशन्ति परस्परम् ।
तदा देहैर्देहवन्तो व्यतिरोहन्ति नान्यथा ॥ ८
आनुपूर्व्याद्विनश्यन्ति जायन्ते चानुपूर्वशः ।
सर्वाण्यपरिमेयानि तदेषां रूपमैश्वरम् ॥ ९
तत्र तत्र हि दृश्यन्ते धातवः पाञ्चभौतिकाः ।
तेषां मनुष्यास्तर्केण प्रमाणानि प्रचक्षते ॥ १०
अचिन्त्याः खलु ये भावा न तांस्तर्केण साधयेत् ।
प्रकृतिभ्यः परं यत्तु तदचिन्त्यस्य लक्षणम् ॥ ११
सुदर्शनं प्रवक्ष्यामि द्वीपं ते कुरुनन्दन ।
परिमण्डलो महाराज द्वीपोऽसौ चक्रसंस्थितः ॥१२
नदीजलप्रतिच्छन्नः पर्वतैश्चाभ्रसंनिभैः ।
पुरैश्च विविधाकारै रम्यैर्जनपदैस्तथा ॥ १३
वृक्षैः पुष्पफलोपेतैः संपन्नधनधान्यवान् ।
लावणेन समुद्रेण समन्तात्परिवारितः ॥ १४
यथा च पुरुषः पश्येदादर्शे मुखमात्मनः ।
एवं सुदर्शनद्वीपो दृश्यते चन्द्रमण्डले ॥ १५
द्विरंशे पिप्पलस्तत्र द्विरंशे च शशो महान् ।
सर्वौषधिसमावापैः सर्वतः परिबृंहितः ।
आपस्ततोऽन्या विज्ञेया एष संक्षेप उच्यते ॥ १६

इति श्रीमहाभारते भीष्मपर्वणि
षष्ठोऽध्यायः ॥ ६ ॥

७

धृतराष्ट्र उवाच ।

उक्तो द्वीपस्य संक्षेपो विस्तरं ब्रूहि संजय ।
यावद्भूम्यवकाशोऽयं दृश्यते शशलक्षणे ।
तस्य प्रमाणं प्रब्रूहि ततो वक्ष्यसि पिप्पलम् ॥ १

वैशंपायन उवाच ।

एवमुक्तः स राज्ञा तु संजयो वाक्यमब्रवीत् ।
प्रागायता महाराज षडेते रत्नपर्वताः ।
अवगाढा ह्युभयतः समुद्रौ पूर्वपश्चिमौ ॥ २
हिमवान्हेमकूटश्च निषधश्च नगोत्तमः ।
नीलश्च वैडूर्यमयः श्वेतश्च रजतप्रभः ।
सर्वधातुविनद्धश्च शृङ्गवान्नाम पर्वतः ॥ ३
एते वै पर्वता राजन्सिद्धचारणसेविताः ।
तेषामन्तरविष्कम्भो योजनानि सहस्रशः ॥ ४
तत्र पुण्या जनपदास्तानि वर्षाणि भारत ।
वसन्ति तेषु सत्त्वानि नानाजातीनि सर्वशः ॥ ५
इदं तु भारतं वर्षं ततो हैमवतं परम् ।
हेमकूटात्परं चैव हरिवर्षं प्रचक्षते ॥ ६
दक्षिणेन तु नीलस्य निषधस्योत्तरेण च ।
प्रागायतो महाराज माल्यवान्नाम पर्वतः ॥ ७
ततः परं माल्यवतः पर्वतो गन्धमादनः ।
परिमण्डलस्तयोर्मध्ये मेरुः कनकपर्वतः ॥ ८
आदित्यतरुणाभासो विधूम इव पावकः ।
योजनानां सहस्राणि षोडशाधः किल स्मृतः ॥ ९
उच्चैश्च चतुराशीतिर्योजनानां महीपते ।
ऊर्ध्वमन्तश्च तिर्यक्च लोकानावृत्य तिष्ठति ॥ १०
तस्य पार्श्वे त्विमे द्वीपाश्चत्वारः संस्थिताः प्रभो ।
भद्राश्वः केतुमालश्च जम्बूद्वीपश्च भारत ।
उत्तराश्चैव कुरवः कृतपुण्यप्रतिश्रयाः ॥ ११
विहगः सुमुखो यत्र सुपर्णस्यात्मजः किल ।
स वै विचिन्तयामास सौवर्णान्प्रेक्ष्य वायसान् ॥१२
मेरुरुत्तममध्यानामधमानां च पक्षिणाम् ।
अविशेषकरो यस्मात्तस्मादेनं त्यजाम्यहम् ॥ १३

तमादित्योऽनुपर्येति सततं ज्योतिषां पतिः ।
चन्द्रमाश्च सनक्षत्रो वायुश्चैव प्रदक्षिणम् ॥ १४
स पर्वतो महाराज दिव्यपुष्पफलान्वितः ।
भवनैरावृतः सर्वैर्जाम्बूनदमयैः शुभैः ॥ १५
तत्र देवगणा राजन्गधर्वासुरराक्षसाः ।
अप्सरोगणसंयुक्ताः शैले क्रीडन्ति नित्यशः ॥ १६
तत्र ब्रह्मा च रुद्रश्च शक्रश्चापि सुरेश्वरः ।
समेत्य विविधैर्यज्ञैर्यजन्तेऽनेकदक्षिणैः ॥ १७
तुम्बुरुर्नारदश्चैव विश्वावसुर्हहा हुहूः ।
अभिगम्यामरश्रेष्ठाः स्तवैः स्तुन्वन्ति चाभिभो॥१८
सप्तर्षयो महात्मानः कश्यपश्च प्रजापतिः ।
तत्र गच्छन्ति भद्रं ते सदा पर्वणि पर्वणि ॥ १९
तस्यैव मूर्धन्युशनाः काव्यो दैत्यैर्महीपते ।
तस्य हीमानि रत्नानि तस्येमे रत्नपर्वताः ॥ २०
तस्मात्कुबेरो भगवांश्चतुर्थं भागमश्नुते ।
ततः कलांशं वित्तस्य मनुष्येभ्यः प्रयच्छति ॥ २१
पार्श्वे तस्योत्तरे दिव्यं सर्वर्तुकुसुमं शिवम् ।
कर्णिकारवनं रम्यं शिलाजालसमुद्गतम् ॥ २२
तत्र साक्षात्पशुपतिर्दिव्यैर्भूतैः समावृतः ।
उमासहायो भगवान्रमते भूतभावनः ॥ २३
कर्णिकारमयीं मालां बिभ्रत्पादावलम्बिनीम् ।
त्रिभिर्नेत्रैः कृतोद्द्योतस्त्रिभिः सूर्यैरिवोदितैः ॥ २४
तमुग्रतपसः सिद्धाः सुव्रताः सत्यवादिनः ।
पश्यन्ति न हि दुर्वृत्तैः शक्यो द्रष्टुं महेश्वरः ॥ २५
तस्य शैलस्य शिखरात्क्षीरधारा नरेश्वर ।
त्रिंशद्बाहुपरिग्राह्या भीमनिर्घातनिस्वना ॥ २६
पुण्या पुण्यतमैर्जुष्टा गङ्गा भागीरथी शुभा ।
पतत्यजस्रवेगेन ह्रदे चान्द्रमसे शुभे ।
तया ह्युत्पादितः पुण्यः स ह्रदः सागरोपमः ॥ २७
तां धारयामास पुरा दुर्धरां पर्वतैरपि ।
शतं वर्षसहस्राणां शिरसा वै महेश्वरः ॥ २८
मेरोस्तु पश्चिमे पार्श्वे केतुमालो महीपते ।
जम्बूषण्डश्च तत्रैव सुमहान्नन्दनोपमः ॥ २९
आयुर्दश सहस्राणि वर्षाणां तत्र भारत ।
सुवर्णवर्णाश्च नराः स्त्रियश्चाप्सरसोपमाः ॥ ३०
अनामया वीतशोका नित्यं मुदितमानसाः ।
जायन्ते मानवास्तत्र निष्टप्तकनकप्रभाः ॥ ३१
गन्धमादनशृङ्गेषु कुबेरः सह राक्षसैः ।
संवृतोऽप्सरसां संघैर्मोदते गुह्यकाधिपः ॥ ३२
गन्धमादनपादेषु परेष्वपरगण्डिकाः ।
एकादश सहस्राणि वर्षाणां परमायुषः ॥ ३३
तत्र कृष्णा नरा राजंस्तेजोयुक्ता महाबलाः ।
स्त्रियश्चोत्पलपत्राभाः सर्वाः सुप्रियदर्शनाः ॥ ३४
नीलात्परतरं श्वेतं श्वेताद्धैरण्यकं परम् ।
वर्षमैरावतं नाम ततः शृङ्गवतः परम् ॥ ३५
धनुःसंस्थे महाराज द्वे वर्षे दक्षिणोत्तरे ।
इलावृतं मध्यमं तु पञ्च वर्षाणि चैव ह ॥ ३६
उत्तरोत्तरमेतेभ्यो वर्षमुद्रिच्यते गुणैः ।
आयुष्प्रमाणमारोग्यं धर्मतः कामतोऽर्थतः ॥ ३७
समन्वितानि भूतानि तेषु वर्षेषु भारत ।
एवमेषा महाराज पर्वतैः पृथिवी चिता ॥ ३८
हेमकूटस्तु सुमहान्कैलासो नाम पर्वतः ।
यत्र वैश्रवणो राजा गुह्यकैः सह मोदते ॥ ३९
अस्त्युत्तरेण कैलासं मैनाकं पर्वतं प्रति ।
हिरण्यशृङ्गः सुमहान्दिव्यो मणिमयो गिरिः ॥ ४०
तस्य पार्श्वे महद्दिव्यं शुभं काञ्चनवालुकम् ।
रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः ।
दृष्ट्वा भागीरथीं गङ्गामुवास बहुलाः समाः ॥ ४१
यूपा मणिमयास्तत्र चित्याश्चापि हिरण्मयाः ।
तत्रेष्ट्वा तु गतः सिद्धिं सहस्राक्षो महायशाः ॥ ४२

स्रष्टा भूतपतिर्यत्र सर्वलोकान्सनातनः ।
उपास्यते तिग्मतेजा वृतो भूतैः समागतैः ।
नरनारायणौ ब्रह्मा मनुः स्थाणुश्च पञ्चमः ॥ ४३
तत्र त्रिपथगा देवी प्रथमं तु प्रतिष्ठिता ।
ब्रह्मलोकादपक्रान्ता सप्तधा प्रतिपद्यते ॥ ४४
वस्त्रोकसारा नलिनी पावना च सरस्वती ।
जम्बूनदी च सीता च गङ्गा सिन्धुश्च सप्तमी ॥
अचिन्त्या दिव्यसंकल्पा प्रभोरेषैव संविधिः ।
उपासते यत्र सत्रं सहस्रयुगपर्यये ॥ ४६
दृश्यादृश्या च भवति तत्र तत्र सरस्वती ।
एता दिव्याः सप्त गङ्गास्त्रिषु लोकेषु विश्रुताः ॥४७
रक्षांसि वै हिमवति हेमकूटे तु गुह्यकाः ।
सर्पा नागाश्च निषधे गोकर्णे च तपोधनाः ॥ ४८
देवासुराणां च गृहं श्वेतः पर्वत उच्यते ।
गन्धर्वा निषधे शैले नीले ब्रह्मर्षयो नृप ।
शृङ्गवांस्तु महाराज पितॄणां प्रतिसंचरः ॥ ४९
इत्येतानि महाराज सप्त वर्षाणि भागशः ।
भूतान्युपनिविष्टानि गतिमन्ति ध्रुवाणि च ॥ ५०
तेषामृद्धिर्बहुविधा दृश्यते दैवमानुषी ।
अशक्या परिसंख्यातुं श्रद्धेया तु बुभूषता ॥ ५१
यां तु पृच्छसि मा राजन्दिव्यामेतां शशाकृतिम् ।
पार्श्वे शशस्य द्वे वर्षे उभये दक्षिणोत्तरे ।
कर्णौ तु नागद्वीपं च कश्यपद्वीपमेव च ॥ ५२
ताम्रवर्णः शिरो राजञ्श्रीमान्मलयपर्वतः ।
एतद्द्वितीयं द्वीपस्य दृश्यते शशसंस्थितम् ॥ ५३

इति श्रीमहाभारते भीष्मपर्वणि
सप्तमोऽध्यायः ॥ ७ ॥

८

धृतराष्ट्र उवाच ।

मेरोरथोत्तरं पार्श्वं पूर्वं चाचक्ष्व संजय ।
निखिलेन महाबुद्धे माल्यवन्तं च पर्वतम् ॥ १

संजय उवाच ।

दक्षिणेन तु नीलस्य मेरोः पार्श्वे तथोत्तरे ।
उत्तराः कुरवो राजन्पुण्याः सिद्धनिषेविताः ॥ २
तत्र वृक्षा मधुफला नित्यपुष्पफलोपगाः ।
पुष्पाणि च सुगन्धीनि रसवन्ति फलानि च ॥ ३
सर्वकामफलास्तत्र केचिद्वृक्षा जनाधिप ।
अपरे क्षीरिणो नाम वृक्षास्तत्र नराधिप ॥ ४
ये क्षरन्ति सदा क्षीरं षड्रसं ह्यमृतोपमम् ।
वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च ॥ ५
सर्वा मणिमयी भूमिः सूक्ष्मकाञ्चनवालुका ।
सर्वत्र सुखसंस्पर्शा निष्पङ्का च जनाधिप ॥ ६
देवलोकच्युताः सर्वे जायन्ते तत्र मानवाः ।
तुल्यरूपगुणोपेताः समेषु विषमेषु च ॥ ७
मिथुनानि च जायन्ते स्त्रियश्चाप्सरसोपमाः ।
तेषां ते क्षीरिणां क्षीरं पिबन्त्यमृतसंनिभम् ॥ ८
मिथुनं जायमानं वै समं तच्च प्रवर्धते ।
तुल्यरूपगुणोपेतं समवेषं तथैव च ।
एकैकमनुरक्तं च चक्रवाकसमं विभो ॥ ९
निरामया वीतशोका नित्यं मुदितमानसाः ।
दश वर्षसहस्राणि दश वर्षशतानि च ।
जीवन्ति ते महाराज न चान्योन्यं जहत्युत ॥ १०
भारुण्डा नाम शकुनास्तीक्ष्णतुण्डा महाबलाः ।
ते निर्हरन्ति हि मृतान्दरीषु प्रक्षिपन्ति च ॥ ११
उत्तराः कुरवो राजन्व्याख्यातास्ते समासतः ।
मेरोः पार्श्वमहं पूर्वं वक्ष्याम्यथ यथातथम् ॥ १२
तस्य पूर्वाभिषेकस्तु भद्राश्वस्य विशां पते ।
भद्रसालवनं यत्र कालाम्रश्च महाद्रुमः ॥ १३
कालाम्रश्च महाराज नित्यपुष्पफलः शुभः ।
द्वीपश्च योजनोत्सेधः सिद्धचारणसेवितः ॥ १४

तत्र ते पुरुषाः श्वेतास्तेजोयुक्ता महाबलाः ।
स्त्रियः कुमुदवर्णाश्च सुन्दर्यः प्रियदर्शनाः ॥ १५
चन्द्रप्रभाश्चन्द्रवर्णाः पूर्णचन्द्रनिभाननाः ।
चन्द्रशीतलगात्र्यश्च नृत्तगीतविशारदाः ॥ १६
दश वर्षसहस्राणि तत्रायुर्भरतर्षभ ।
कालाम्ररसपीतास्ते नित्यं संस्थितयौवनाः ॥ १७
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ।
सुदर्शनो नाम महाञ्जम्बूवृक्षः सनातनः ॥ १८
सर्वकामफलः पुण्यः सिद्धचारणसेवितः ।
तस्य नाम्ना समाख्यातो जम्बूद्वीपः सनातनः ॥
योजनानां सहस्रं च शतं च भरतर्षभ ।
उत्सेधो वृक्षराजस्य दिवस्पृङ्मनुजेश्वर ॥ २०
अरत्नीनां सहस्रं च शतानि दश पञ्च च ।
परिणाहस्तु वृक्षस्य फलानां रसभेदिनाम् ॥ २१
पतमानानि तान्युर्व्यां कुर्वन्ति विपुलं स्वनम् ।
मुञ्चन्ति च रसं राजंस्तस्मिन्रजतसंनिभम् ॥ २२
तस्या जम्ब्वाः फलरसो नदी भूत्वा जनाधिप ।
मेरुं प्रदक्षिणं कृत्वा संप्रयात्युत्तरान्कुरून् ॥ २३
पिबन्ति तद्रसं हृष्टा जना नित्यं जनाधिप ।
तस्मिन्फलरसे पीते न जरा बाधते च तान् ॥ २४
तत्र जाम्बूनदं नाम कनकं देवभूषणम् ।
तरुणादित्यवर्णाश्च जायन्ते तत्र मानवाः ॥ २५
तथा माल्यवतः शृङ्गे दीप्यते तत्र हव्यवाट् ।
नाम्ना संवर्तको नाम कालाग्निर्भरतर्षभ ॥ २६
तथा माल्यवतः शृङ्गे पूर्वे पूर्वान्तगण्डिका ।
योजनानां सहस्राणि पञ्चाशन्माल्यवान्स्थितः ॥ २७
महारजतसंकाशा जायन्ते तत्र मानवाः ।
ब्रह्मलोकाच्च्युताः सर्वे सर्वे च ब्रह्मवादिनः ॥ २८
तपस्तु तप्यमानास्ते भवन्ति ह्यूर्ध्वरेतसः ।
रक्षणार्थं तु भूतानां प्रविशन्ति दिवाकरम् ॥ २९
षष्टिस्तानि सहस्राणि षष्टिरेव शतानि च ।
अरुणस्याग्रतो यान्ति परिवार्य दिवाकरम् ॥ ३०
षष्टिं वर्षसहस्राणि षष्टिमेव शतानि च ।
आदित्यतापतप्तास्ते विशन्ति शशिमण्डलम् ॥ ३१

इति श्रीमहाभारते भीष्मपर्वणि
अष्टमोऽध्यायः ॥ ८ ॥

९

धृतराष्ट्र उवाच ।

वर्षाणां चैव नामानि पर्वतानां च संजय ।
आचक्ष्व मे यथातत्त्वं ये च पर्वतवासिनः ॥ १

संजय उवाच ।

दक्षिणेन तु श्वेतस्य नीलस्यैवोत्तरेण तु ।
वर्षं रमणकं नाम जायन्ते तत्र मानवाः ॥ २
शुक्लाभिजनसंपन्नाः सर्वे सुप्रियदर्शनाः ।
रतिप्रधानाश्च तथा जायन्ते तत्र मानवाः ॥ ३
दश वर्षसहस्राणि शतानि दश पञ्च च ।
जीवन्ति ते महाराज नित्यं मुदितमानसाः ॥ ४
दक्षिणे शृङ्गिणश्चैव श्वेतस्याथोत्तरेण च ।
वर्षं हैरण्वतं नाम यत्र हैरण्वती नदी ॥ ५
यक्षानुगा महाराज धनिनः प्रियदर्शनाः ।
महाबलास्तत्र सदा राजन्मुदितमानसाः ॥ ६
एकादश सहस्राणि वर्षाणां ते जनाधिप ।
आयुष्प्रमाणं जीवन्ति शतानि दश पञ्च च ॥ ७
शृङ्गाणि वै शृङ्गवतस्त्रीण्येव मनुजाधिप ।
एकं मणिमयं तत्र तथैकं रौक्ममद्भुतम् ॥ ८
सर्वरत्नमयं चैकं भवनैरुपशोभितम् ।
तत्र स्वयंप्रभा देवी नित्यं वसति शाण्डिली ॥ ९
उत्तरेण तु शृङ्गस्य समुद्रान्ते जनाधिप ।
वर्षमैरावतं नाम तस्माच्छृङ्गवतः परम् ॥ १०
न तत्र सूर्यस्तपति न ते जीर्यन्ति मानवाः ।

चन्द्रमाश्च सनक्षत्रो ज्योतिर्भूत इवावृतः ॥ ११
पद्मप्रभाः पद्मवर्णाः पद्मपत्रनिभेक्षणाः ।
पद्मपत्रसुगन्धाश्च जायन्ते तत्र मानवाः ॥ १२
अनिष्पन्दाः सुगन्धाश्च निराहारा जितेन्द्रियाः ।
देवलोकच्युताः सर्वे तथा विरजसो नृप ॥ १३
त्रयोदश सहस्राणि वर्षाणां ते जनाधिप ।
आयुष्प्रमाणं जीवन्ति नरा भरतसत्तम ॥ १४
क्षीरोदस्य समुद्रस्य तथैवोत्तरतः प्रभुः ।
हरिर्वसति वैकुण्ठः शकटे कनकात्मके ॥ १५
अष्टचक्रं हि तद्यानं भूतयुक्तं मनोजवम् ।
अग्निवर्णं महावेगं जाम्बूनदपरिष्कृतम् ॥ १६
स प्रभुः सर्वभूतानां विभुश्च भरतर्षभ ।
संक्षेपो विस्तरश्चैव कर्ता कारयिता च सः ॥ १७
पृथिव्यापस्तथाकाशं वायुस्तेजश्च पार्थिव ।
स यज्ञः सर्वभूतानामास्यं तस्य हुताशनः ॥ १८

वैशंपायन उवाच ।

एवमुक्तः संजयेन धृतराष्ट्रो महामनाः ।
ध्यानमन्वगमद्राजा पुत्रान्प्रति जनाधिप ॥ १९
स विचिन्त्य महाराज पुनरेवाब्रवीद्वचः ।
असंशयं सूतपुत्र कालः संक्षिपते जगत् ।
सृजते च पुनः सर्वं नेह विद्यति शाश्वतम् ॥ २०
नरो नारायणश्चैव सर्वज्ञः सर्वभूतभृत् ।
देवा वैकुण्ठ इत्याहुर्वेदा विष्णुरिति प्रभुम् ॥ २१

इति श्रीमहाभारते भीष्मपर्वणि
नवमोऽध्यायः ॥ ९ ॥

१०

धृतराष्ट्र उवाच ।

यदिदं भारतं वर्षं यत्रेदं मूर्छितं बलम् ।
यत्रातिमात्रं लुब्धोऽयं पुत्रो दुर्योधनो मम ॥ १
यत्र गृद्धाः पाण्डुसुता यत्र मे सज्जते मनः ।
एतन्मे तत्त्वमाचक्ष्व कुशलो ह्यसि संजय ॥ २

संजय उवाच ।

न तत्र पाण्डवा गृद्धाः शृणु राजन्वचो मम ।
गृद्धो दुर्योधनस्तत्र शकुनिश्चापि सौबलः ॥ ३
अपरे क्षत्रियाश्चापि नानाजनपदेश्वराः ।
ये गृद्धा भारते वर्षे न मृष्यन्ति परस्परम् ॥ ४
अत्र ते वर्णयिष्यामि वर्षं भारत भारतम् ।
प्रियमिन्द्रस्य देवस्य मनोर्वैवस्वतस्य च ॥ ५
पृथोश्च राजन्वैन्यस्य तथेक्ष्वाकोर्महात्मनः ।
ययातेरम्बरीषस्य मान्धातुर्नहुषस्य च ॥ ६
तथैव मुचुकुन्दस्य शिबेरौशीनरस्य च ।
ऋषभस्य तथैलस्य नृगस्य नृपतेस्तथा ॥ ७
अन्येषां च महाराज क्षत्रियाणां बलीयसाम् ।
सर्वेषामेव राजेन्द्र प्रियं भारत भारतम् ॥ ८
तत्ते वर्षं प्रवक्ष्यामि यथाश्रुतमरिंदम ।
शृणु मे गदतो राजन्यन्मां त्वं परिपृच्छसि ॥ ९
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ।
विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ॥ १०
तेषां सहस्रशो राजन्पर्वतास्तु समीपतः ।
अभिज्ञाताः सारवन्तो विपुलाश्चित्रसानवः ॥ ११
अन्ये ततोऽपरिज्ञाता ह्रस्वा ह्रस्वोपजीविनः ।
आर्या म्लेच्छाश्च कौरव्य तैर्मिश्राः पुरुषा विभो ॥
नदीः पिबन्ति बहुला गङ्गां सिन्धुं सरस्वतीम् ।
गोदावरीं नर्मदां च बाहुदां च महानदीम् ॥ १३
शतद्रुं चन्द्रभागां च यमुनां च महानदीम् ।
दृषद्वतीं विपाशां च विपापां स्थूलवालुकाम् ॥ १४
नदीं वेत्रवतीं चैव कृष्णवेणां च निम्नगाम् ।
इरावतीं वितस्तां च पयोष्णीं देविकामपि ॥ १५
वेदस्मृतिं वेतसिनीं त्रिदिवामिक्षुमालिनीम् ।
करीषिणीं चित्रवहां चित्रसेनां च निम्नगाम् ॥ १६

गोमतीं धूतपापां च वन्दनां च महानदीम् ।
कौशिकीं त्रिदिवां कृत्यां विचित्रां लोहतारिणीम्॥१७
रथस्थां शतकुम्भां च सरयूं च नरेश्वर ।
चर्मण्वतीं वेत्रवतीं हस्तिसोमां दिशं तथा ॥ १८
शतावरीं पयोष्णीं च परां भैमरथीं तथा ।
कावेरीं चुलुकां चापि वापीं शतबलामपि ॥ १९
निचीरां महितां चापि सुप्रयोगां नराधिप ।
पवित्रां कुण्डलां सिन्धुं वाजिनीं पुरमालिनीम् ॥२०
पूर्वाभिरामां वीरां च भीमामोघवतीं तथा ।
पलाशिनीं पापहरां महेन्द्रां पिप्पलावतीम् ॥ २१
पारिषेणामसिक्नीं च सरलां भारमर्दिनीम् ।
पुरुहीं प्रवरां मेनां मोघां घृतवतीं तथा ॥ २२
धूमत्यामतिकृष्णां च सूचीं छावीं च कौरव ।
सदानीरामधृष्यां च कुशधारां महानदीम् ॥ २३
शशिकान्तां शिवां चैव तथा वीरवतीमपि ।
वास्तुं सुवास्तुं गौरीं च कम्पनां सहिरण्वतीम् ॥२४
हिरण्वतीं चित्रवतीं चित्रसेनां च निम्नगाम् ।
रथचित्रां ज्योतिरथां विश्वामित्रां कपिञ्जलाम् ॥२५
उपेन्द्रां बहुलां चैव कुचरामम्बुवाहिनीम् ।
वैनन्दीं पिञ्जलां वेण्णां तुङ्गवेणां महानदीम् ॥२६
विदिशां कृष्णवेण्णां च ताम्रां च कपिलामपि ।
शलुं सुवामां वेदाश्वां हरिस्रावां महापगाम् ॥ २७
शीघ्रां च पिच्छिलां चैव भारद्वाजीं च निम्नगाम् ।
कौशिकीं निम्नगां शोणां बाहुदामथ चन्दनाम् ॥२८
दुर्गामन्तःशिलां चैव ब्रह्ममेध्यां बृहद्वतीम् ।
चरक्षां महिरोहीं च तथा जम्बुनदीमपि ॥ २९
सुनसां तमसां दासीं त्रसामन्यां वराणसीम् ।
लोलोद्धृतकरां चैव पूर्णाशां च महानदीम् ॥ ३०
मानवीं वृषभां चैव महानद्यो जनाधिप ।
सदानिरामयां वृत्यां मन्दगां मन्दवाहिनीम् ॥ ३१
ब्रह्माणीं च महागौरीं दुर्गामपि च भारत ।
चित्रोपलां चित्रबर्हां मञ्जुं मकरवाहिनीम् ॥ ३२
मन्दाकिनीं वैतरणीं कोकां चैव महानदीम् ।
शुक्तिमतीमरण्यां च पुष्पवेण्युत्पलावतीम् ॥ ३३
लोहित्यां करतोयां च तथैव वृषभङ्गिनीम् ।
कुमारीमृषिकुल्यां च ब्रह्मकुल्यां च भारत ॥ ३४
सरस्वतीः सुपुण्याश्च सर्वा गङ्गाश्च मारिष ।
विश्वस्य मातरः सर्वाः सर्वाश्चैव महाबलाः॥ ३५
तथा नद्यस्त्वप्रकाशाः शतशोऽथ सहस्रशः ।
इत्येताः सरितो राजन्समाख्याता यथास्मृति ॥३६
अत उर्ध्वं जनपदान्निबोध गदतो मम ।
तत्रेमे कुरुपाञ्चालाः शाल्वमाद्रेयजाङ्गलाः ॥ ३७
शूरसेनाः कलिङ्गाश्च बोधा मौकास्तथैव च ।
मत्स्याः सुकुट्यः सौबल्याः कुन्तलाः काशिकोशलाः॥
चेदिवत्साः करूषाश्च भोजाः सिन्धुपुलिन्दकाः ।
उत्तमौजा दशार्णाश्च मेकलाश्चोत्कलैः सह ॥ ३९
पाञ्चालाः कौशिजाश्चैव एकपृष्ठा युगंधराः ।
सौधा मद्रा भुजिङ्गाश्च काशयोऽपरकाशयः ॥ ४०
जठराः कुकुशाश्चैव सुदाशार्णाश्च भारत ।
कुन्तयोऽवन्तयश्चैव तथैवापरकुन्तयः ॥ ४१
गोविन्दा मन्दकाः षण्डा विदर्भानूपवासिकाः ।
अश्मकाः पांसुराष्ट्राश्च गोपराष्ट्राः पनीतकाः ॥ ४२
आदिराष्ट्राः सुकुट्टाश्च बलिराष्ट्रं च केवलम् ।
वानरास्याः प्रवाहाश्च वक्रा वक्रभयाः शकाः ॥ ४३
विदेहका मागधाश्च सुह्माश्च विजयास्तथा ।
अङ्गा वङ्गाः कलिङ्गाश्च यकृल्लोमान एव च ॥ ४४
मल्लाः सुदेष्णाः प्राहूतास्तथा माहिषकार्षिकाः ।
वाहीका वाटधानाश्च आभीराः कालतोयकाः ॥४५
अपरन्ध्राश्च शूद्राश्च पह्लवाश्चर्मखण्डिकाः ।
अटवीशबराश्चैव मरुभौमाश्च मारिष ॥ ४६

उपावृश्चानुपावृश्चसुराष्ट्राः केकयास्तथा ।
कुट्टापरान्ता द्वैधेयाः काक्षाः सामुद्रनिष्कुटाः ॥ ४७
अन्धाश्च बहवो राजन्नन्तर्गिर्यास्तथैव च ।
बहिर्गिर्याङ्गमलदा मागधा मानवर्जकाः ॥ ४८
मह्युत्तराः प्रावृषेया भार्गवाश्च जनाधिप ।
पुण्ड्रा भार्गाः किराताश्च सुदोष्णाः प्रमुदास्तथा ॥
शका निषादा निषधास्तथैवानर्तनैर्ऋताः ।
दुगूलाः प्रतिमत्स्याश्च कुशलाः कुनटास्तथा ॥ ५०
तीरग्राहास्तरतोया राजिका रम्यकागणाः ।
तिलकाः पारसीकाश्च मधुमन्तः प्रकुत्सकाः ॥ ५१
काश्मीराः सिन्धुसौवीरा गान्धारा दर्शकास्तथा ।
अभीसाराः कुलूताश्च शैवला बाह्लिकास्तथा ॥ ५२
दर्वीकाः सकचा दर्वा वातजामरथोरगाः ।
बहुवाद्याश्च कौरव्य सुदामानः सुमल्लिकाः ॥ ५३
वध्राः करीषकाश्चापि कुलिन्दोपत्यकास्तथा ।
वानायवो दशापार्श्वा रोमाणः कुशबिन्दवः ॥ ५४
कच्छा गोपालकच्छाश्च लाङ्गलाः परवल्लकाः ।
किराता बर्बराः सिद्धा विदेहास्ताम्रलिङ्गकाः ॥ ५५
ओष्ट्राः पुण्ड्राः ससैरन्ध्राः पार्वतीयाश्च मारिष ।
अथापरे जनपदा दक्षिणा भरतर्षभ ॥ ५६
द्रविडाः केरलाः प्राच्या भूषिका वनवासिनः ।
उन्नत्यका माहिषका विकल्पा मूषकास्तथा ॥ ५७
कर्णिकाः कुन्तिकाश्चैव सौद्भिदा नलकालकाः ।
कौकुट्टकास्तथा चोलाः कोङ्कणा मालवाणकाः ॥ ५८
समङ्गाः कोपनाश्चैव कुकुराङ्गदमारिषाः ।
ध्वजिन्युत्सवसंकेतास्त्रिगर्ताः सर्वसेनयः ॥ ५९
त्र्यङ्गाः केकरकाः प्रोष्ठाः परसंचरकास्तथा ।
तथैव विन्ध्यपुलकाः पुलिन्दाः कल्कलैः सह ॥ ६०
मालका मल्लकाश्चैव तथैवापरवर्तकाः ।
कुलिन्दाः कुलकाश्चैव करण्ठाः कुरकास्तथा ॥ ६१
मूषका स्तनबालाश्च सतियः पत्तिपञ्जकाः ।
आदिदायाः सिरालाश्च स्तूबका स्तनपास्तथा ॥ ६२
हृषीविदर्भाः कान्तीकास्तङ्गणाः परतङ्गणाः ।
उत्तराश्चापरे म्लेच्छा जना भरतसत्तम ॥ ६३
यवनाश्च सकाम्बोजा दारुणा म्लेच्छजातयः ।
सक्षद्द्रुहः कुन्तलाश्च हूणाः पारतकैः सह ॥ ६४
तथैव मरधाश्चीनास्तथैव दशमालिकाः ।
क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च ॥ ६५
शूद्राभीराथ दरदाः काश्मीराः पशुभिः सह ।
खशिकाश्च तुखाराश्च पल्लवा गिरिगह्वराः ॥ ६६
आत्रेयाः सभरद्वाजास्तथैव स्तनयोषिकाः ।
औपकाश्च कलिङ्गाश्च किरातानां च जातयः ॥ ६७
तामरा हंसमार्गाश्च तथैव करभञ्जकाः ।
उद्देशमात्रेण मया देशाः संकीर्तिताः प्रभो ॥ ६८
यथागुणबलं चापि त्रिवर्गस्य महाफलम् ।
दुह्येद्धेनुः कामधुक्च भूमिः सम्यगनुष्ठिता ॥ ६९
तस्यां गृध्यन्ति राजानः शूरा धर्मार्थकोविदाः ।
ते त्यजन्त्याहवे प्राणान्रसागृद्धास्तरस्विनः ॥ ७०
देवमानुषकायानां कामं भूमिः परायणम् ।
अन्योन्यस्यावलुम्पन्ति सारमेया इवामिषम् ॥ ७१
राजानो भरतश्रेष्ठ भोक्तुकामा वसुंधराम् ।
न चापि तृप्तिः कामानां विद्यते चेह कस्यचित् ॥ ७२
तस्मात्परिग्रहे भूमेर्यतन्ते कुरुपाण्डवाः ।
साम्ना दानेन भेदेन दण्डेनैव च पार्थिव ॥ ७३
पिता माता च पुत्रश्च खं द्यौश्च नरपुंगव ।
भूमिर्भवति भूतानां सम्यगच्छिद्रदर्शिनी ॥ ७४

इति श्रीमहाभारते भीष्मपर्वणि

दशमोऽध्यायः ॥ १० ॥

११

धृतराष्ट्र उवाच ।

भारतस्यास्य वर्षस्य तथा हैमवतस्य च ।
प्रमाणमायुषः सूत फलं चापि शुभाशुभम् ॥ १
अनागतमतिक्रान्तं वर्तमानं च संजय ।
आचक्ष्व मे विस्तरेण हरिवर्षं तथैव च ॥ २

संजय उवाच ।

चत्वारि भारते वर्षे युगानि भरतर्षभ ।
कृतं त्रेता द्वापरं च पुष्यं च कुरुवर्धन ॥ ३
पूर्वं कृतयुगं नाम ततस्त्रेतायुगं विभो ।
संक्षेपाद्द्वापरस्याथ ततः पुष्यं प्रवर्तते ॥ ४
चत्वारि च सहस्राणि वर्षाणां कुरुसत्तम ।
आयुःसंख्या कृतयुगे संख्याता राजसत्तम ॥ ५
तथा त्रीणि सहस्राणि त्रेतायां मनुजाधिप ।
द्विसहस्रं द्वापरे तु शते तिष्ठति संप्रति ॥ ६
न प्रमाणस्थितिर्ह्यस्ति पुष्येऽस्मिन्भरतर्षभ ।
गर्भस्थाश्च म्रियन्तेऽत्र तथा जाता म्रियन्ति च ॥ ७
महाबला महासत्त्वाः प्रजागुणसमन्विताः ।
अजायन्त कृते राजन्मुनयः सुतपोधनाः ॥ ८
महोत्साहा महात्मानो धार्मिकाः सत्यवादिनः ।
जाताः कृतयुगे राजन्धनिनः प्रियदर्शनाः ॥ ९
आयुष्मन्तो महावीरा धनुर्धरवरा युधि ।
जायन्ते क्षत्रियाः शूरास्त्रेतायां चक्रवर्तिनः ॥ १०
सर्ववर्णा महाराज जायन्ते द्वापरे सति ।
महोत्साहा महावीर्याः परस्परवधैषिणः ॥ ११
तेजसाल्पेन संयुक्ताः क्रोधनाः पुरुषा नृप ।
लुब्धाश्चानृतकाश्चैव पुष्ये जायन्ति भारत ॥ १२
ईर्ष्या मानस्तथा क्रोधो मायासूया तथैव च ।
पुष्ये भवन्ति मर्त्यानां रागो लोभश्च भारत ॥ १३
संक्षेपो वर्तते राजन्द्वापरेऽस्मिन्नराधिप ।
गुणोत्तरं हैमवतं हरिवर्षं ततः परम् ॥ १४

इति श्रीमहाभारते भीष्मपर्वणि
एकादशोऽध्यायः ॥ ११ ॥

॥ समाप्तं जम्बूखण्डविनिर्माणपर्व ॥

१२

धृतराष्ट्र उवाच ।

जम्बूखण्डस्त्वया प्रोक्तो यथावदिह संजय ।
विष्कम्भमस्य प्रब्रूहि परिमाणं च तत्त्वतः ॥ १
समुद्रस्य प्रमाणं च सम्यगच्छिद्रदर्शन ।
शाकद्वीपं च मे ब्रूहि कुशद्वीपं च संजय ॥ २
शाल्मलं चैव तत्त्वेन क्रौञ्चद्वीपं तथैव च ।
ब्रूहि गावल्गणे सर्वं राहोः सोमार्कयोस्तथा ॥ ३

संजय उवाच ।

राजन्सुबहवो द्वीपा यैरिदं संततं जगत् ।
सप्त त्वहं प्रवक्ष्यामि चन्द्रादित्यौ ग्रहांस्तथा ॥ ४
अष्टादश सहस्राणि योजनानां विशां पते ।
षट्शतानि च पूर्णानि विष्कम्भो जम्बुपर्वतः ॥ ५
लावणस्य समुद्रस्य विष्कम्भो द्विगुणः स्मृतः ।
नानाजनपदाकीर्णो मणिविद्रुमचित्रितः ॥ ६
नैकधातुविचित्रैश्च पर्वतैरुपशोभितः ।
सिद्धचारणसंकीर्णः सागरः परिमण्डलः ॥ ७
शाकद्वीपं च वक्ष्यामि यथावदिह पार्थिव ।
शृणु मे त्वं यथान्यायं ब्रुवतः कुरुनन्दन ॥ ८
जम्बूद्वीपप्रमाणेन द्विगुणः स नराधिप ।
विष्कम्भेण महाराज सागरोऽपि विभागशः ।
क्षीरोदो भरतश्रेष्ठ येन संपरिवारितः ॥ ९
तत्र पुण्या जनपदा न तत्र म्रियते जनः ।
कुत एव हि दुर्भिक्षं क्षमातेजोयुता हि ते ॥ १०
शाकद्वीपस्य संक्षेपो यथावद्भरतर्षभ ।
उक्त एष महाराज किमन्यच्छ्रोतुमिच्छसि ॥ ११

धृतराष्ट्र उवाच ।
शाकद्वीपस्य संक्षेपो यथावदिह संजय ।
उक्तस्त्वया महाभाग विस्तरं ब्रूहि तत्त्वतः ॥ १२
संजय उवाच ।
तथैव पर्वता राजन्सप्तात्र मणिभूषिताः ।
रत्नाकरास्तथा नद्यस्तेषां नामानि मे शृणु ।
अतीवगुणवत्सर्वं तत्र पुण्यं जनाधिप ॥ १३
देवर्षिगन्धर्वयुतः परमो मेरुरुच्यते ।
प्रागायतो महाराज मलयो नाम पर्वतः ।
यतो मेघाः प्रवर्तन्ते प्रभवन्ति च सर्वशः ॥ १४
ततः परेण कौरव्य जलधारो महागिरिः ।
यत्र नित्यमुपादत्ते वासवः परमं जलम् ।
यतो वर्षं प्रभवति वर्षाकाले जनेश्वर ॥ १५
उच्चैर्गिरी रैवतको यत्र नित्यं प्रतिष्ठितः ।
रेवती दिवि नक्षत्रं पितामहकृतो विधिः ॥ १६
उत्तरेण तु राजेन्द्र श्यामो नाम महागिरिः ।
यतः श्यामत्वमापन्नाः प्रजा जनपदेश्वर ॥ १७
धृतराष्ट्र उवाच ।
सुमहान्संशयो मेऽद्य प्रोक्तं संजय यत्त्वया ।
प्रजाः कथं सूतपुत्र संप्राप्ताः श्यामतामिह ॥ १८
संजय उवाच ।
सर्वेष्वेव महाप्राज्ञ द्वीपेषु कुरुनन्दन ।
गौरः कृष्णश्च वर्णौ द्वौ तयोर्वर्णान्तरं नृप ॥ १९
श्यामो यस्मात्प्रवृत्तो वै तत्ते वक्ष्यामि भारत ।
आस्तेऽत्र भगवान्कृष्णस्तत्कान्त्या श्यामतां गतः ॥
ततः परं कौरवेन्द्र दुर्गशैलो महोदयः ।
केसरी केसरयुतो यतो वातः प्रवायति ॥ २१
तेषां योजनविष्कम्भो द्विगुणः प्रविभागशः ।
वर्षाणि तेषु कौरव्य संप्रोक्तानि मनीषिभिः ॥ २२
महामेरुर्महाकाशो जलदः कुमुदोत्तरः ।
जलधारात्परो राजन्सुकुमार इति स्मृतः ॥ २३
रैवतस्य तु कौमारः श्यामस्य तु मणीचकः ।
केसरस्याथ मोदाकी परेण तु महापुमान् ॥ २४
परिवार्य तु कौरव्य दैर्घ्यं ह्रस्वत्वमेव च ।
जम्बूद्वीपेन विख्यातस्तस्य मध्ये महाद्रुमः ॥ २५
शाको नाम महाराज तस्य द्वीपस्य मध्यगः ।
तत्र पुण्या जनपदाः पूज्यते तत्र शंकरः ॥ २६
तत्र गच्छन्ति सिद्धाश्च चारणा दैवतानि च ।
धार्मिकाश्च प्रजा राजंश्चत्वारोऽतीव भारत ॥ २७
वर्णाः स्वकर्मनिरता न च स्तेनोऽत्र दृश्यते ।
दीर्घायुषो महाराज जरामृत्युविवर्जिताः ॥ २८
प्रजास्तत्र विवर्धन्ते वर्षास्विव समुद्रगाः ।
नद्यः पुण्यजलास्तत्र गङ्गा च बहुधागतिः ॥ २९
सुकुमारी कुमारी च सीता कावेरका तथा ।
महानदी च कौरव्य तथा मणिजला नदी ।
इक्षुवर्धनिका चैव तथा भरतसत्तम ॥ ३०
ततः प्रवृत्ताः पुण्योदा नद्यः कुरुकुलोद्वह ।
सहस्राणां शतान्येव यतो वर्षति वासवः ॥ ३१
न तासां नामधेयानि परिमाणं तथैव च ।
शक्यते परिसंख्यातुं पुण्यास्ता हि सरिद्वराः ॥ ३२
तत्र पुण्या जनपदाश्चत्वारो लोकसंमताः ।
मगाश्च मशकाश्चैव मानसा मन्दगास्तथा ॥ ३३
मगा ब्राह्मणभूयिष्ठाः स्वकर्मनिरता नृप ।
मशकेषु तु राजन्या धार्मिकाः सर्वकामदाः ॥ ३४
मानसेषु महाराज वैश्याः कर्मोपजीविनः ।
सर्वकामसमायुक्ताः शूरा धर्मार्थनिश्चिताः ।
शूद्रास्तु मन्दगे नित्यं पुरुषा धर्मशीलिनः ॥ ३५
न तत्र राजा राजेन्द्र न दण्डो न च दण्डिकाः ।
स्वधर्मेणैव धर्मं च ते रक्षन्ति परस्परम् ॥ ३६
एतावदेव शक्यं तु तस्मिन्द्वीपे प्रभाषितुम् ।

एतावदेव श्रोतव्यं शाकद्वीपे महौजसि ॥ ३७

इति श्रीमहाभारते भीष्मपर्वणि
द्वादशोऽध्यायः ॥ १२ ॥

१३

संजय उवाच ।

उत्तरेषु तु कौरव्य द्वीपेषु श्रूयते कथा ।
यथाश्रुतं महाराज ब्रुवतस्तन्निबोध मे ॥ १
घृततोयः समुद्रोऽत्र दधिमण्डोदकोऽपरः ।
सुरोदः सागरश्चैव तथान्यो घर्मसागरः ॥ २
परस्परेण द्विगुणाः सर्वे द्वीपा नराधिप ।
सर्वतश्च महाराज पर्वतैः परिवारिताः ॥ ३
गौरस्तु मध्यमे द्वीपे गिरिर्मानःशिलो महान् ।
पर्वतः पश्चिमः कृष्णो नारायणनिभो नृप ॥ ४
तत्र रत्नानि दिव्यानि स्वयं रक्षति केशवः ।
प्रजापतिमुपासीनः प्रजानां विदधे सुखम् ॥ ५
कुशद्वीपे कुशस्तम्बो मध्ये जनपदस्य ह ।
संपूज्यते शल्मलिश्च द्वीपे शाल्मलिके नृप ॥ ६
क्रौञ्चद्वीपे महाक्रौञ्चो गिरी रत्नचयाकरः ।
संपूज्यते महाराज चातुर्वर्ण्येन नित्यदा ॥ ७
गोमन्दः पर्वतो राजन्सुमहान्सर्वधातुमान् ।
यत्र नित्यं निवसति श्रीमान्कमललोचनः ।
मोक्षिभिः संस्तुतो नित्यं प्रभुर्नारायणो हरिः ॥ ८
कुशद्वीपे तु राजेन्द्र पर्वतो विद्रुमैश्चितः ।
सुधामा नाम दुर्धर्षो द्वितीयो हेमपर्वतः ॥ ९
द्युतिमान्नाम कौरव्य तृतीयः कुमुदो गिरिः ।
चतुर्थः पुष्पवान्नाम पञ्चमस्तु कुशेशयः ॥ १०
षष्ठो हरिगिरिर्नाम षडेते पर्वतोत्तमाः ।
तेषामन्तरविष्कम्भो द्विगुणः प्रविभागशः ॥ ११
औद्भिदं प्रथमं वर्षं द्वितीयं वेणुमण्डलम् ।
तृतीयं वै रथाकारं चतुर्थं पालनं स्मृतम् ॥ १२
धृतिमत्पञ्चमं वर्षं षष्ठं वर्षं प्रभाकरम् ।
सप्तमं कापिलं वर्षं सप्तैते वर्षपुञ्जकाः ॥ १३
एतेषु देवगन्धर्वाः प्रजाश्च जगतीश्वर ।
विहरन्ति रमन्ते च न तेषु म्रियते जनः ॥ १४
न तेषु दस्यवः सन्ति म्लेच्छजात्योऽपि वा नृप ।
गौरप्रायो जनः सर्वः सुकुमारश्च पार्थिव ॥ १५
अवशिष्टेषु वर्षेषु वक्ष्यामि मनुजेश्वर ।
यथाश्रुतं महाराज तदव्यग्रमनाः शृणु ॥ १६
क्रौञ्चद्वीपे महाराज क्रौञ्चो नाम महागिरिः ।
क्रौञ्चात्परो वामनको वामनादन्धकारकः ॥ १७
अन्धकारात्परो राजन्मैनाकः पर्वतोत्तमः ।
मैनाकात्परतो राजन्गोविन्दो गिरिरुत्तमः ॥ १८
गोविन्दात्तु परो राजन्निबिडो नाम पर्वतः ।
परस्तु द्विगुणस्तेषां विष्कम्भो वंशवर्धन ॥ १९
देशांस्तत्र प्रवक्ष्यामि तन्मे निगदतः शृणु ।
क्रौञ्चस्य कुशलो देशो वामनस्य मनोनुगः ॥ २०
मनोनुगात्परश्चोष्णो देशः कुरुकुलोद्वह ।
उष्णात्परः प्रावरकः प्रावरादन्धकारकः ॥ २१
अन्धकारकदेशात्तु मुनिदेशः परः स्मृतः ।
मुनिदेशात्परश्चैव प्रोच्यते दुन्दुभिस्वनः ॥ २२
सिद्धचारणसंकीर्णो गौरप्रायो जनाधिप ।
एते देशा महाराज देवगन्धर्वसेविताः ॥ २३
पुष्करे पुष्करो नाम पर्वतो मणिरत्नमान् ।
तत्र नित्यं निवसति स्वयं देवः प्रजापतिः ॥ २४
तं पर्युपासते नित्यं देवाः सर्वे महर्षिभिः ।
वाग्भिर्मनोनुकूलाभिः पूजयन्तो जनाधिप ॥ २५
जम्बूद्वीपात्प्रवर्तन्ते रत्नानि विविधान्युत ।
द्वीपेषु तेषु सर्वेषु प्रजानां कुरुनन्दन ॥ २६
विप्राणां ब्रह्मचर्येण सत्येन च दमेन च ।
आरोग्यायुःप्रमाणाभ्यां द्विगुणं द्विगुणं ततः ॥ २७

एको जनपदो राजन्द्वीपेष्वेतेषु भारत ।
उक्ता जनपदा येषु धर्मश्चैकः प्रदृश्यते ॥ २८
ईश्वरो दण्डमुद्यम्य स्वयमेव प्रजापतिः ।
द्वीपानेतान्महाराज रक्षंस्तिष्ठति नित्यदा ॥ २९
स राजा स शिवो राजन्स पिता स पितामहः ।
गोपायति नरश्रेष्ठ प्रजाः सजडपण्डिताः ॥ ३०
भोजनं चात्र कौरव्य प्रजाः स्वयमुपस्थितम् ।
सिद्धमेव महाराज भुञ्जते तत्र नित्यदा ॥ ३१
ततः परं समा नाम दृश्यते लोकसंस्थितिः ।
चतुरश्रा महाराज त्रयस्त्रिंशत्तु मण्डलम् ॥ ३२
तत्र तिष्ठन्ति कौरव्य चत्वारो लोकसंमताः ।
दिग्गजा भरतश्रेष्ठ वामनैरावतादयः ।
सुप्रतीकस्तथा राजन्प्रभिन्नकरटामुखः ॥ ३३
तस्याहं परिमाणं तु न संख्यातुमिहोत्सहे ।
असंख्यातः स नित्यं हि तिर्यगूर्ध्वमधस्तथा ॥ ३४
तत्र वै वायवो वान्ति दिग्भ्यः सर्वाभ्य एव च ।
असंबाधा महाराज तान्निगृह्णन्ति ते गजाः ॥ ३५
पुष्करैः पद्मसंकाशैर्वर्ष्मवद्भिर्महाप्रभैः ।
ते शनैः पुनरेवाशु वायून्मुञ्चन्ति नित्यशः ॥ ३६
श्वसद्भिर्मुच्यमानास्तु दिग्गजैरिह मारुताः ।
आगच्छन्ति महाराज ततस्तिष्ठन्ति वै प्रजाः ॥ ३७

धृतराष्ट्र उवाच ।

परो वै विस्तरोऽत्यर्थं त्वया संजय कीर्तितः ।
दर्शितं द्वीपसंस्थानमुत्तरं ब्रूहि संजय ॥ ३८

संजय उवाच ।

उक्ता द्वीपा महाराज ग्रहान्मे शृणु तत्त्वतः ।
स्वर्भानुः कौरवश्रेष्ठ यावदेष प्रभावतः ॥ ३९
परिमण्डलो महाराज स्वर्भानुः श्रूयते ग्रहः ।
योजनानां सहस्राणि विष्कम्भो द्वादशास्य वै ॥ ४०
परिणाहेन षट्त्रिंशद्विपुलत्वेन चानघ ।
षष्टिमाहुः शतान्यस्य बुधाः पौराणिकास्तथा ॥ ४१
चन्द्रमास्तु सहस्राणि राजन्नेकादश स्मृतः ।
विष्कम्भेण कुरुश्रेष्ठ त्रयस्त्रिंशत्तु मण्डलम् ।
एकोनषष्टिर्वैपुल्याच्छीतरश्मेर्महात्मनः ॥ ४२
सूर्यस्त्वष्टौ सहस्राणि द्वे चान्ये कुरुनन्दन ।
विष्कम्भेण ततो राजन्मण्डलं त्रिंशतं समम् ॥ ४३
अष्टपञ्चाशतं राजन्विपुलत्वेन चानघ ।
श्रूयते परमोदारः पतंगोऽसौ विभावसुः ।
एतत्प्रमाणमर्कस्य निर्दिष्टमिह भारत ॥ ४४
स राहुश्छादयत्येतौ यथाकालं महत्तया ।
चन्द्रादित्यौ महाराज संक्षेपोऽयमुदाहृतः ॥ ४५
इत्येतत्ते महाराज पृच्छतः शास्त्रचक्षुषा ।
सर्वमुक्तं यथातत्त्वं तस्माच्छममवाप्नुहि ॥ ४६
यथादृष्टं मया प्रोक्तं सनिर्याणमिदं जगत् ।
तस्मादाश्वस कौरव्य पुत्रं दुर्योधनं प्रति ॥ ४७
श्रुत्वेदं भरतश्रेष्ठ भूमिपर्व मनोनुगम् ।
श्रीमान्भवति राजन्यः सिद्धार्थः साधुसंमतः ।
आयुर्बलं च वीर्यं च तस्य तेजश्च वर्धते ॥ ४८
यः शृणोति महीपाल पर्वणीदं यतव्रतः ।
प्रीयन्ते पितरस्तस्य तथैव च पितामहाः ॥ ४९
इदं तु भारतं वर्षं यत्र वर्तामहे वयम् ।
पूर्वं प्रवर्तते पुण्यं तत्सर्वं श्रुतवानसि ॥ ५०

इति श्रीमहाभारते भीष्मपर्वणि
त्रयोदशोऽध्यायः ॥ १३ ॥

॥ समाप्तं भूमिपर्व ॥

१४

वैशंपायन उवाच ।

अथ गावल्गणिर्धीमान्समरादेत्य संजयः ।
प्रत्यक्षदर्शी सर्वस्य भूतभव्यभविष्यवित् ॥ १
ध्यायते धृतराष्ट्राय सहसोपेत्य दुःखितः ।

आचष्ट निहतं भीष्मं भरतानाममध्यमम् ॥ २
संजयोऽहं महाराज नमस्ते भरतर्षभ ।
हतो भीष्मः शांतनवो भरतानां पितामहः ॥ ३
ककुदं सर्वयोधानां धाम सर्वधनुष्मताम् ।
शरतल्पगतः सोऽद्य शेते कुरुपितामहः ॥ ४
यस्य वीर्यं समाश्रित्य द्यूतं पुत्रस्तवाकरोत् ।
स शेते निहतो राजन्संख्ये भीष्मः शिखण्डिना ॥५
यः सर्वान्पृथिवीपालान्समवेतान्महामृधे ।
जिगायैकरथेनैव काशिपुर्यां महारथः ॥ ६
जामदग्न्यं रणे राममायोध्य वसुसंभवः ।
न हतो जामदग्न्येन स हतोऽद्य शिखण्डिना ॥ ७
महेन्द्रसदृशः शौर्ये स्थैर्ये च हिमवानिव ।
समुद्र इव गाम्भीर्ये सहिष्णुत्वे धरासमः ॥ ८
शरदंष्ट्रो धनुर्वक्त्रः खड्गजिह्वो दुरासदः ।
नरसिंहः पिता तेऽद्य पाञ्चाल्येन निपातितः ॥ ९
पाण्डवानां महत्सैन्यं यं दृष्ट्वोद्यन्तमाहवे ।
प्रवेपत भयोद्विग्नं सिंहं दृष्ट्वेव गोगणः ॥ १०
परिरक्ष्य स सेनां ते दशरात्रमनीकहा ।
जगामास्तमिवादित्यः कृत्वा कर्म सुदुष्करम् ॥ ११
यः स शक्र इवाक्षोभ्यो वर्षन्बाणान्सहस्रशः ।
जघान युधि योधानामर्बुदं दशभिर्दिनैः ॥ १२
स शेते निष्टनन्भूमौ वातरुग्ण इव द्रुमः ।
तव दुर्मन्त्रिते राजन्यथा नार्हः स भारत ॥ १३

इति श्रीमहाभारते भीष्मपर्वणि
चतुर्दशोऽध्यायः ॥ १४ ॥

१५

धृतराष्ट्र उवाच ।

कथं कुरूणामृषभो हतो भीष्मः शिखण्डिना ।
कथं रथात्स न्यपतत्पिता मे वासवोपमः ॥ १
कथमासंश्च मे पुत्रा हीना भीष्मेण संजय ।
बलिना देवकल्पेन गुर्वर्थे ब्रह्मचारिणा ॥ २
तस्मिन्हते महासत्त्वे महेष्वासे महाबले ।
महारथे नरव्याघ्रे किमु आसीन्मनस्तदा ॥ ३
आर्तिः परा माविशति यतः शंससि मे हतम् ।
कुरूणामृषभं वीरमकम्प्यं पुरुषर्षभम् ॥ ४
के तं यान्तमनुप्रेयुः के चास्यासन्पुरोगमाः ।
केऽतिष्ठन्के न्यवर्तन्त केऽभ्यवर्तन्त संजय ॥ ५
के शूरा रथशार्दूलमच्युतं क्षत्रियर्षभम् ।
रथानीकं गाहमानं सहसा पृष्ठतोऽन्वयुः ॥ ६
यस्तमोऽर्क इवापोहन्परसैन्यममित्रहा ।
सहस्ररश्मिप्रतिमः परेषां भयमादधत् ।
अकरोद्दुष्करं कर्म रणे कौरवशासनात् ॥ ७
ग्रसमानमनीकानि य एनं पर्यवारयन् ।
कृतिनं तं दुराधर्षं सम्यग्यास्यन्तमन्तिके ।
कथं शांतनवं युद्धे पाण्डवाः प्रत्यवारयन् ॥ ८
निकृन्तन्तमनीकानि शरदंष्ट्रं तरस्विनम् ।
चापव्यात्ताननं घोरमसिजिह्वं दुरासदम् ॥ ९
अत्यन्यान्पुरुषव्याघ्रान्ह्रीमन्तमपराजितम् ।
पातयामास कौन्तेयः कथं तमजितं युधि ॥ १०
उग्रधन्वानमुग्रेषु वर्तमानं रथोत्तमे ।
परेषामुत्तमाङ्गानि प्रचिन्वन्तं शितेषुभिः ॥ ११
पाण्डवानां महत्सैन्यं यं दृष्ट्वोद्यन्तमाहवे ।
कालाग्निमिव दुर्धर्षं समवेष्टत नित्यशः ॥ १२
परिकृष्य स सेनां मे दशरात्रमनीकहा ।
जगामास्तमिवादित्यः कृत्वा कर्म सुदुष्करम् ॥१३
यः स शक्र इवाक्षय्यं वर्षं शरमयं सृजन् ।
जघान युधि योधानामर्बुदं दशभिर्दिनैः ॥ १४
स शेते निष्टनन्भूमौ वातरुग्ण इव द्रुमः ।
मम दुर्मन्त्रितेनासौ यथा नार्हः स भारतः ॥ १५
कथं शांतनवं दृष्ट्वा पाण्डवानामनीकिनी ।

प्रहर्तुमशकत्तत्र भीष्मं भीमपराक्रमम् ॥ १६
कथं भीष्मेण संग्राममकुर्वन्पाण्डुनन्दनाः ।
कथं च नाजयद्भीष्मो द्रोणे जीवति संजय ॥ १७
कृपे संनिहिते तत्र भरद्वाजात्मजे तथा ।
भीष्मः प्रहरतां श्रेष्ठः कथं स निधनं गतः ॥ १८
कथं चातिरथस्तेन पाञ्चाल्येन शिखण्डिना ।
भीष्मो विनिहतो युद्धे देवैरपि दुरुत्सहः ॥ १९
यः स्पर्धते रणे नित्यं जामदग्न्यं महाबलम् ।
अजितं जामदग्न्येन शक्रतुल्यपराक्रमम् ॥ २०
तं हतं समरे भीष्मं महारथबलोचितम् ।
संजयाचक्ष्व मे वीरं येन शर्म न विद्महे ॥ २१
मामकाः के महेष्वासा नाजहुः संजयाच्युतम् ।
दुर्योधनसमादिष्टाः के वीराः पर्यवारयन् ॥ २२
यच्छिखण्डिमुखाः सर्वे पाण्डवा भीष्ममभ्ययुः ।
कच्चिन्न कुरवो भीतास्तत्यजुः संजयाच्युतम् ॥ २३
मौर्वीघोषस्तनयित्नुः पृषत्कपृषतो महान् ।
धनुर्ह्रादमहाशब्दो महामेघ इवोन्नतः ॥ २४
यदभ्यवर्षत्कौन्तेयान्सपाञ्चालान्ससृञ्जयान् ।
निघ्नन्पररथान्वीरो दानवानिव वज्रभृत् ॥ २५
इष्वस्त्रसागरं घोरं बाणग्राहं दुरासदम् ।
कार्मुकोर्मिणमक्षय्यमद्वीपं समरेऽप्लवम् ।
गदासिमकरावर्तं हयग्राहं गजाकुलम् ॥ २६
हयान्गजान्पदातांश्च रथांश्च तरसा बहून् ।
निमज्जयन्तं समरे परवीरापहारिणम् ॥ २७
विदह्यमानं कोपेन तेजसा च परंतपम् ।
वेलेव मकरावासं के वीराः पर्यवारयन् ॥ २८
भीष्मो यदकरोत्कर्म समरे संजयारिहा ।
दुर्योधनहितार्थाय के तदास्य पुरोऽभवन् ॥ २९
केऽरक्षन्दक्षिणं चक्रं भीष्मस्यामिततेजसः ।
पृष्ठतः के परान्वीरा उपासेधन्यतव्रताः ॥ ३०
के पुरस्तादवर्तन्त रक्षन्तो भीष्ममन्तिके ।
केऽरक्षन्नुत्तरं चक्रं वीरा वीरस्य युध्यतः ॥ ३१
वामे चक्रे वर्तमानाः केऽघ्नन्संजय सृञ्जयान् ।
समेताग्रमनीकेषु केऽभ्यरक्षन्दुरासदम् ॥ ३२
पार्श्वतः केऽभ्यवर्तन्त गच्छन्तो दुर्गमां गतिम् ।
समूहे के परान्वीरान्प्रत्ययुध्यन्त संजय ॥ ३३
रक्ष्यमाणः कथं वीरैर्गोप्यमानाश्च तेन ते ।
दुर्जयानामनीकानि नाजयंस्तरसा युधि ॥ ३४
सर्वलोकेश्वरस्येव परमेष्ठिप्रजापतेः ।
कथं प्रहर्तुमपि ते शेकुः संजय पाण्डवाः ॥ ३५
यस्मिन्द्वीपे समाश्रित्य युध्यन्ति कुरवः परैः ।
तं निमग्नं नरव्याघ्रं भीष्मं शंससि संजय ॥ ३६
यस्य वीर्ये समाश्वस्य मम पुत्रो बृहद्बलः ।
न पाण्डवानगणयत्कथं स निहतः परैः ॥ ३७
यः पुरा विबुधैः सेन्द्रैः साहाय्ये युद्धदुर्मदः ।
काङ्क्षितो दानवान्घ्नद्भिः पिता मम महाव्रतः ॥ ३८
यस्मिञ्जाते महावीर्ये शंतनुर्लोकशंकरे ।
शोकं दुःखं च दैन्यं च प्राजहात्पुत्रलक्ष्मणि ॥३९
प्रज्ञापरायणं तज्ज्ञं सद्धर्मनिरतं शुचिम् ।
वेदवेदाङ्गतत्त्वज्ञं कथं शंससि मे हतम् ॥ ४०
सर्वास्त्रविनयोपेतं दान्तं शान्तं मनस्विनम् ।
हतं शांतनवं श्रुत्वा मन्ये शेषं बलं हतम् ॥ ४१
धर्मादधर्मो बलवान्संप्राप्त इति मे मतिः ।
यत्र वृद्धं गुरुं हत्वा राज्यमिच्छन्ति पाण्डवाः ॥४२
जामदग्न्यः पुरा रामः सर्वास्त्रविदनुत्तमः ।
अम्बार्थमुद्यतः संख्ये भीष्मेण युधि निर्जितः ॥४३
तमिन्द्रसमकर्माणं ककुदं सर्वधन्विनाम् ।
हतं शंससि भीष्मं मे किं नु दुःखमतः परम् ॥ ४४
असकृत्क्षत्रियव्राताः संख्ये येन विनिर्जिताः ।
जामदग्न्यस्तथा रामः परवीरनिघातिना ॥ ४५

तस्मान्नूनं महावीर्याद्भार्गवाद्युद्धदुर्मदात् ।
तेजोवीर्यबलैर्भूयाञ्शिखण्डी द्रुपदात्मजः ॥ ४६
यः शूरं कृतिनं युद्धे सर्वशास्त्रविशारदम् ।
परमास्त्रविदं वीरं जघान भरतर्षभम् ॥ ४७
के वीरास्तममित्रघ्नमन्वयुः शत्रुसंसदि ।
शंस मे तद्यथा वृत्तं युद्धं भीष्मस्य पाण्डवैः ॥ ४८
योषेव हतवीरा मे सेना पुत्रस्य संजय ।
अगोपमिव चोद्भ्रान्तं गोकुलं तद्बलं मम ॥ ४९
पौरुषं सर्वलोकस्य परं यस्य महाहवे ।
परासिक्ते च वस्तस्मिन्कथमासीन्मनस्तदा ॥ ५०
जीवितेऽप्यद्य सामर्थ्यं किमिवास्मासु संजय ।
घातयित्वा महावीर्यं पितरं लोकधार्मिकम् ॥ ५१
अगाधे सलिले मग्नां नावं दृष्ट्वेव पारगाः ।
भीष्मे हते भृशं दुःखान्मन्ये शोचन्ति पुत्रकाः ॥ ५५
अद्रिसारमयं नूनं सुदृढं हृदयं मम ।
यच्छ्रुत्वा पुरुषव्याघ्रं हतं भीष्मं न दीर्यते ॥ ५३
यस्मिन्नस्त्रं च मेधा च नीतिश्च भरतर्षभे ।
अप्रमेयाणि दुर्धर्षे कथं स निहतो युधि ॥ ५४
न चास्त्रेण न शौर्येण तपसा मेधया न च ।
न धृत्या न पुनस्त्यागान्मृत्योः कश्चिद्विमुच्यते ॥
कालो नूनं महावीर्यः सर्वलोकदुरत्ययः ।
यत्र शांतनवं भीष्मं हतं शंससि संजय ॥ ५६
पुत्रशोकाभिसंतप्तो महद्दुःखमचिन्तयन् ।
आशंसेऽहं पुरा त्राणं भीष्माच्छंतनुनन्दनात् ॥ ५७
यदादित्यमिवापश्यत्पतितं भुवि संजय ।
दुर्योधनः शांतनवं किं तदा प्रत्यपद्यत ॥ ५८
नाहं स्वेषां परेषां वा बुद्ध्या संजय चिन्तयन् ।
शेषं किंचित्प्रपश्यामि प्रत्यनीके महीक्षिताम् ॥ ५९
दारुणः क्षत्रधर्मोऽयमृषिभिः संप्रदर्शितः ।
यत्र शांतनवं हत्वा राज्यमिच्छन्ति पाण्डवाः ॥ ६०
वयं वा राज्यमिच्छामो घातयित्वा पितामहम् ।
क्षत्रधर्मे स्थिताः पार्था नापराध्यन्ति पुत्रकाः ॥ ६१
एतदार्येण कर्तव्यं कृच्छ्रास्वापत्सु संजय ।
पराक्रमः परं शक्त्या तच्च तस्मिन्प्रतिष्ठितम् ॥ ६२
अनीकानि विनिघ्नन्तं ह्रीमन्तमपराजितम् ।
कथं शांतनवं तात पाण्डुपुत्रा न्यपातयन् ॥ ६३
कथं युक्तान्यनीकानि कथं युद्धं महात्मभिः ।
कथं वा निहतो भीष्मः पिता संजय मे परैः ॥ ६४
दुर्योधनश्च कर्णश्च शकुनिश्चापि सौबलः ।
दुःशासनश्च कितवो हते भीष्मे किमब्रुवन् ॥ ६५
यच्छरीरैरुपस्तीर्णां नरवारणवाजिनाम् ।
शरशक्तिगदाखड्गतोमराक्षां भयावहाम् ॥ ६६
प्राविशन्कितवा मन्दाः सभां युधि दुरासदाम् ।
प्राणद्यूते प्रतिभये केऽदीव्यन्त नरर्षभाः ॥ ६७
केऽजयन्के जितास्तत्र हृतलक्षा निपातिताः ।
अन्ये भीष्माच्छांतनवात्तन्ममाचक्ष्व संजय ॥ ६८
न हि मे शान्तिरस्तीह युधि देवव्रतं हतम् ।
पितरं भीमकर्माणं श्रुत्वा मे दुःखमाविशत् ॥ ६९
आर्तिं मे हृदये रूढां महतीं पुत्रकारिताम् ।
त्वं सिञ्चन्सर्पिषेवाग्निमुद्दीपयसि संजय ॥ ७०
महान्तं भारमुद्यम्य विश्रुतं सार्वलौकिकम् ।
दृष्ट्वा विनिहतं भीष्मं मन्ये शोचन्ति पुत्रकाः ॥७१
श्रोष्यामि तानि दुःखानि दुर्योधनकृतान्यहम् ।
तस्मान्मे सर्वमाचक्ष्व यद्वृत्तं तत्र संजय ॥ ७२
संग्रामे पृथिवीशानां मन्दस्याबुद्धिसंभवम् ।
अपनीतं सुनीतं वा तन्ममाचक्ष्व संजय ॥ ७३
यत्कृतं तत्र भीष्मेण संग्रामे जयमिच्छता ।
तेजोयुक्तं कृतास्त्रेण शंस तच्चाप्यशेषतः ॥ ७४
यथा तदभवद्युद्धं कुरुपाण्डवसेनयोः ।

क्रमेण येन यस्मिंश्च काले यच्च यथा च तत् ॥ ७५

इति श्रीमहाभारते भीष्मपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥

१६

संजय उवाच ।

त्वद्युक्तोऽयमनुप्रश्नो महाराज यथार्हसि ।
न तु दुर्योधने दोषमिममासक्तुमर्हसि ॥ १
य आत्मनो दुश्चरितादशुभं प्राप्नुयान्नरः ।
एनसा तेन नान्यं स उपाशङ्कितुमर्हति ॥ २
महाराज मनुष्येषु निन्द्यं यः सर्वमाचरेत् ।
स वध्यः सर्वलोकस्य निन्दितानि समाचरन् ॥ ३
निकारो निकृतिप्रज्ञैः पाण्डवैस्त्वत्प्रतीक्षया ।
अनुभूतः सहामात्यैः क्षान्तं च सुचिरं वने ॥ ४
हयानां च गजानां च शूराणां चामितौजसाम् ।
प्रत्यक्षं यन्मया दृष्टं दृष्टं योगबलेन च ॥ ५
शृणु तत्पृथिवीपाल मा च शोके मनः कृथाः ।
दिष्टमेतत्पुरा नूनमेवंभावि नराधिप ॥ ६
नमस्कृत्वा पितुस्तेऽहं पाराशर्याय धीमते ।
यस्य प्रसादाद्दिव्यं मे प्राप्तं ज्ञानमनुत्तमम् ॥ ७
दृष्टिश्चातीन्द्रिया राजन्दूराच्छ्रवणमेव च ।
परचित्तस्य विज्ञानमतीतानागतस्य च ॥ ८
व्युत्थितोत्पत्तिविज्ञानमाकाशे च गतिः सदा ।
शस्त्रैरसङ्गो युद्धेषु वरदानान्महात्मनः ॥ ९
शृणु मे विस्तरेणेदं विचित्रं परमाद्भुतम् ।
भारतानां महद्युद्धं यथाभूल्लोमहर्षणम् ॥ १०
तेष्वनीकेषु यत्तेषु व्यूढेषु च विधानतः ।
दुर्योधनो महाराज दुःशासनमथाब्रवीत् ॥ ११
दुःशासन रथास्तूर्णं युज्यन्तां भीष्मरक्षिणः ।
अनीकानि च सर्वाणि शीघ्रं त्वमनुचोदय ॥ १२
अयं मा समनुप्राप्तो वर्षपूगाभिचिन्तितः ।
पाण्डवानां ससैन्यानां कुरूणां च समागमः ॥ १३
नातः कार्यतमं मन्ये रणे भीष्मस्य रक्षणात् ।
हन्याद्गुप्तो ह्यसौ पार्थान्सोमकांश्च ससृञ्जयान् ॥ १४
अब्रवीच्च विशुद्धात्मा नाहं हन्यां शिखण्डिनम् ।
श्रूयते स्त्री ह्यसौ पूर्वं तस्माद्वर्ज्यो रणे मम ॥ १५
तस्माद्भीष्मो रक्षितव्यो विशेषेणेति मे मतिः ।
शिखण्डिनो वधे यत्ताः सर्वे तिष्ठन्तु मामकाः ॥१६
तथा प्राच्याः प्रतीच्याश्च दाक्षिणात्योत्तरापथाः ।
सर्वशस्त्रास्त्रकुशलास्ते रक्षन्तु पितामहम् ॥ १७
अरक्ष्यमाणं हि वृको हन्यात्सिंहं महाबलम् ।
मा सिंहं जम्बुकेनेव घातयामः शिखण्डिना ॥ १८
वामं चक्रं युधामन्युरुत्तमौजाश्च दक्षिणम् ।
गोप्तारौ फल्गुनस्यैतौ फल्गुनोऽपि शिखण्डिनः ॥
संरक्ष्यमाणः पार्थेन भीष्मेण च विवर्जितः ।
यथा न हन्याद्गाङ्गेयं दुःशासन तथा कुरु ॥ २०
ततो रजन्यां व्युष्टायां शब्दः समभवन्महान् ।
क्रोशतां भूमिपालानां युज्यतां युज्यतामिति ॥ २१
शङ्खदुन्दुभिनिर्घोषैः सिंहनादैश्च भारत ।
हयहेषितशब्दैश्च रथनेमिस्वनैस्तथा ॥ २२
गजानां बृंहतां चैव योधानां चाभिगर्जताम् ।
क्ष्वेडितास्फोटितोत्क्रुष्टैस्तुमुलं सर्वतोऽभवत् ॥ २३
उदतिष्ठन्महाराज सर्वं युक्तमशेषतः ।
सूर्योदये महत्सैन्यं कुरुपाण्डवसेनयोः ।
तव राजेन्द्र पुत्राणां पाण्डवानां तथैव च ॥ २४
तत्र नागा रथाश्चैव जाम्बूनदपरिष्कृताः ।
विभ्राजमाना दृश्यन्ते मेघा इव सविद्युतः ॥ २५
रथानीकान्यदृश्यन्त नगराणीव भूरिशः ।
अतीव शुशुभे तत्र पिता ते पूर्णचन्द्रवत् ॥ २६
धनुर्भिर्ऋष्टिभिः खड्गैर्गदाभिः शक्तितोमरैः ।
योधाः प्रहरणैः शुभ्रैः स्वेष्वनीकेष्ववस्थिताः ॥ २७

गजा रथाः पदाताश्च तुरगाश्च विशां पते ।
व्यतिष्ठन्वागुराकाराः शतशोऽथ सहस्रशः ॥ २८
ध्वजा बहुविधाकारा व्यदृश्यन्त समुच्छ्रिताः ।
स्वेषां चैव परेषां च द्युतिमन्तः सहस्रशः ॥ २९
काञ्चना मणिचित्राङ्गा ज्वलन्त इव पावकाः ।
अर्चिष्मन्तो व्यरोचन्त ध्वजा राज्ञां सहस्रशः ॥
महेन्द्रकेतवः शुभ्रा महेन्द्रसदनेष्विव ।
संनद्धास्तेषु ते वीरा ददृशुर्युद्धकाङ्क्षिणः ॥ ३१
उद्यतैरायुधैश्चित्रास्तलबद्धाः कलापिनः ।
ऋषभाक्षा मनुष्येन्द्राश्चमूमुखगता बभुः ॥ ३२
शकुनिः सौबलः शल्यः सैन्धवोऽथ जयद्रथः ।
विन्दानुविन्दावावन्त्यौ काम्बोजश्च सुदक्षिणः ॥
श्रुतायुधश्च कालिङ्गो जयत्सेनश्च पार्थिवः ।
बृहद्बलश्च कौशल्यः कृतवर्मा च सात्वतः ॥ ३४
दशैते पुरुषव्याघ्राः शूराः परिघबाहवः ।
अक्षौहिणीनां पतयो यज्वानो भूरिदक्षिणाः ॥ ३५
एते चान्ये च बहवो दुर्योधनवशानुगाः ।
राजानो राजपुत्राश्च नीतिमन्तो महाबलाः ॥ ३६
संनद्धाः समदृश्यन्त स्वेष्वनीकेष्ववस्थिताः ।
बद्धकृष्णाजिनाः सर्वे ध्वजिनो मुञ्जमालिनः ॥ ३७
सृष्टा दुर्योधनस्यार्थे ब्रह्मलोकाय दीक्षिताः ।
समृद्धा दश वाहिन्यः परिगृह्य व्यवस्थिताः ॥ ३८
एकादशी धार्तराष्ट्री कौरवाणां महाचमूः ।
अग्रतः सर्वसैन्यानां यत्र शांतनवोऽग्रणीः ॥ ३९
श्वेतोष्णीषं श्वेतहयं श्वेतवर्माणमच्युतम् ।
अपश्याम महाराज भीष्मं चन्द्रमिवोदितम् ॥ ४०
हेमतालध्वजं भीष्मं राजते स्यन्दने स्थितम् ।
श्वेताभ्र इव तीक्ष्णांशुं ददृशुः कुरुपाण्डवाः ॥ ४१
दृष्ट्वा चमूमुखे भीष्मं समकम्पन्त पाण्डवाः ।
सृञ्जयाश्च महेष्वासा धृष्टद्युम्नपुरोगमाः ॥ ४२
जृम्भमाणं महासिंहं दृष्ट्वा क्षुद्रमृगा यथा ।
धृष्टद्युम्नमुखाः सर्वे समुद्विविजिरे मुहुः ॥ ४३
एकादशैताः श्रीजुष्टा वाहिन्यस्तव भारत ।
पाण्डवानां तथा सप्त महापुरुषपालिताः ॥ ४४
उन्मत्तमकरावर्तौ महाग्राहसमाकुलौ ।
युगान्ते समुपेतौ द्वौ दृश्येते सागराविव ॥ ४५
नैव नस्तादृशो राजन्दृष्टपूर्वो न च श्रुतः ।
अनीकानां समेतानां समवायस्तथाविधः ॥ ४६

इति श्रीमहाभारते भीष्मपर्वणि
षोडशोऽध्यायः ॥ १६ ॥

१७

संजय उवाच ।

यथा स भगवान्व्यासः कृष्णद्वैपायनोऽब्रवीत् ।
तथैव सहिताः सर्वे समाजग्मुर्महीक्षितः ॥ १
मघाविषयगः सोमस्तद्दिनं प्रत्यपद्यत ।
दीप्यमानाश्च संपेतुर्दिवि सप्त महाग्रहाः ॥ २
द्विधाभूत इवादित्य उदये प्रत्यदृश्यत ।
ज्वलन्त्या शिखया भूयो भानुमानुदितो दिवि ॥ ३
ववाशिरे च दीप्तायां दिशि गोमायुवायसाः ।
लिप्समानाः शरीराणि मांसशोणितभोजनाः ॥ ४
अहन्यहनि पार्थानां वृद्धः कुरुपितामहः ।
भरद्वाजात्मजश्चैव प्रातरुत्थाय संयतौ ॥ ५
जयोऽस्तु पाण्डुपुत्राणामित्यूचतुररिंदमौ ।
युयुधाते तवार्थाय यथा स समयः कृतः ॥ ६
सर्वधर्मविशेषज्ञः पिता देवव्रतस्तव ।
समानीय महीपालानिदं वचनमब्रवीत् ॥ ७
इदं वः क्षत्रिया द्वारं स्वर्गायापावृतं महत् ।
गच्छध्वं तेन शक्रस्य ब्रह्मणश्च सलोकताम् ॥ ८
एष वः शाश्वतः पन्थाः पूर्वैः पूर्वतरैर्गतः ।
संभावयत चात्मानमव्यग्रमनसो युधि ॥ ९

नाभागो हि ययातिश्च मान्धाता नहुषो नृगः ।
संसिद्धाः परमं स्थानं गताः कर्मभिरीदृशैः ॥ १०
अधर्मः क्षत्रियस्यैष यद्व्याधिमरणं गृहे ।
यदाजौ निधनं याति सोऽस्य धर्मः सनातनः ॥११
एवमुक्ता महीपाला भीष्मेण भरतर्षभ ।
निर्ययुः स्वान्यनीकानि शोभयन्तो रथोत्तमैः ॥ १२
स तु वैकर्तनः कर्णः सामात्यः सह बन्धुभिः ।
न्यासितः समरे शस्त्रं भीष्मेण भरतर्षभ ॥ १३
अपेतकर्णाः पुत्रास्ते राजानश्चैव तावकाः ।
निर्ययुः सिंहनादेन नादयन्तो दिशो दश ॥ १४
श्वेतैश्छत्रैः पताकाभिर्ध्वजवारणवाजिभिः ।
तान्यनीकान्यशोभन्त रथैरथ पदातिभिः ॥ १५
भेरीपणवशब्दैश्च पटहानां च निःस्वनैः ।
रथनेमिनिनादैश्च बभूवाकुलिता मही ॥ १६
काञ्चनाङ्गदकेयूरैः कार्मुकैश्च महारथाः ।
भ्राजमाना व्यदृश्यन्त जङ्गमाः पर्वता इव ॥ १७
तालेन महता भीष्मः पञ्चतारेण केतुना ।
विमलादित्यसंकाशस्तस्थौ कुरुचमूपतिः ॥ १८
ये त्वदीया महेष्वासा राजानो भरतर्षभ ।
अवर्तन्त यथादेशं राजञ्शांतनवस्य ते ॥ १९
स तु गोवासनः शैब्यः सहितः सर्वराजभिः ।
ययौ मातङ्गराजेन राजार्हेण पताकिना ।
पद्मवर्णस्त्वनीकानां सर्वेषामग्रतः स्थितः ॥ २०
अश्वत्थामा ययौ यत्तः सिंहलाङ्गूलकेतनः ।
श्रुतायुश्चित्रसेनश्च पुरुमित्रो विविंशतिः ॥ २१
शल्यो भूरिश्रवाश्चैव विकर्णश्च महारथः ।
एते सप्त महेष्वासा द्रोणपुत्रपुरोगमाः ।
स्यन्दनैर्वरवर्णाभैर्भीष्मस्यासन्पुरःसराः ॥ २२
तेषामपि महोत्सेधाः शोभयन्तो रथोत्तमान् ।
भ्राजमाना व्यदृश्यन्त जाम्बूनदमया ध्वजाः ॥२३
जाम्बूनदमयी वेदिः कमण्डलुविभूषिता ।
केतुराचार्यमुख्यस्य द्रोणस्य धनुषा सह ॥ २४
अनेकशतसाहस्रमनीकमनुकर्षतः ।
महान्दुर्योधनस्यासीन्नागो मणिमयो ध्वजः ॥ २५
तस्य पौरवकालिङ्गौ काम्बोजश्च सुदक्षिणः ।
क्षेमधन्वा सुमित्रश्च तस्थुः प्रमुखतो रथाः ॥ २६
स्यन्दनेन महार्हेण केतुना वृषभेण च ।
प्रकर्षन्निव सेनाग्रं मागधश्च नृपो ययौ ॥ २७
तदङ्गपतिना गुप्तं कृपेण च महात्मना ।
शारदाभ्रचयप्रख्यं प्राच्यानामभवद्बलम् ॥ २८
अनीकप्रमुखे तिष्ठन्वराहेण महायशाः ।
शुशुभे केतुमुख्येन राजतेन जयद्रथः ॥ २९
शतं रथसहस्राणां तस्यासन्वशवर्तिनः ।
अष्टौ नागसहस्राणि सादिनामयुतानि षट् ॥ ३०
तत्सिन्धुपतिना राजन्पालितं ध्वजिनीमुखम् ।
अनन्तरथनागाश्वमशोभत महद्बलम् ॥ ३१
षष्ट्या रथसहस्रैस्तु नागानामयुतेन च ।
पतिः सर्वकलिङ्गानां ययौ केतुमता सह ॥ ३२
तस्य पर्वतसंकाशा व्यरोचन्त महागजाः ।
यन्त्रतोमरतूणीरैः पताकाभिश्च शोभिताः ॥ ३३
शुशुभे केतुमुख्येन पादपेन कलिङ्गपः ।
श्वेतच्छत्रेण निष्केण चामरव्यजनेन च ॥ ३४
केतुमानपि मातङ्गं विचित्रपरमाङ्कुशम् ।
आस्थितः समरे राजन्मेघस्थ इव भानुमान् ॥ ३५
तेजसा दीप्यमानस्तु वारणोत्तममास्थितः ।
भगदत्तो ययौ राजा यथा वज्रधरस्तथा ॥ ३६
गजस्कन्धगतावास्तां भगदत्तेन संमितौ ।
विन्दानुविन्दावावन्त्यौ केतुमन्तमनुव्रतौ ॥ ३७
स रथानीकवान्व्यूहो हस्त्यङ्गोत्तमशीर्षवान् ।
वाजिपक्षः पतन्नुग्रः प्राहरत्सर्वतोमुखः ॥ ३८

द्रोणेन विहितो राजन्राज्ञा शांतनवेन च ।
तथैवाचार्यपुत्रेण बाह्लीकेन कृपेण च ॥ ३९

इति श्रीमहाभारते भीष्मपर्वणि
सप्तदशोऽध्यायः ॥ १७ ॥

१८

संजय उवाच ।

ततो मुहूर्तात्तुमुलः शब्दो हृदयकम्पनः ।
अश्रूयत महाराज योधानां प्रयुयुत्सताम् ॥ १
शङ्खदुन्दुभिनिर्घोषैर्वारणानां च बृंहितैः ।
रथानां नेमिघोषैश्च दीर्यतीव वसुंधरा ॥ २
हयानां हेषमाणानां योधानां तत्र गर्जताम् ।
क्षणेन खं दिशश्चैव शब्देनापूरितं तदा ॥ ३
पुत्राणां तव दुर्धर्ष पाण्डवानां तथैव च ।
समकम्पन्त सैन्यानि परस्परसमागमे ॥ ४
तत्र नागा रथाश्चैव जाम्बूनदविभूषिताः ।
भ्राजमाना व्यदृश्यन्त मेघा इव सविद्युतः ॥ ५
ध्वजा बहुविधाकारास्तावकानां नराधिप ।
काञ्चनाङ्गदिनो रेजुर्ज्वलिता इव पावकाः ॥ ६
स्वेषां चैव परेषां च समदृश्यन्त भारत ।
महेन्द्रकेतवः शुभ्रा महेन्द्रसदनेष्विव ॥ ७
काञ्चनैः कवचैर्वीरा ज्वलनार्कसमप्रभैः ।
संनद्धाः प्रत्यदृश्यन्त ग्रहाः प्रज्वलिता इव ॥ ८
उद्यतैरायुधैश्चित्रैस्तलबद्धाः पताकिनः ।
ऋषभाक्षा महेष्वासाश्चमूमुखगता बभुः ॥ ९
पृष्ठगोपास्तु भीष्मस्य पुत्रास्तव नराधिप ।
दुःशासनो दुर्विषहो दुर्मुखो दुःसहस्तथा ॥ १०
विविंशतिश्चित्रसेनो विकर्णश्च महारथः ।
सत्यव्रतः पुरुमित्रो जयो भूरिश्रवाः शलः ॥ ११
रथा विंशतिसाहस्रास्तथैषामनुयायिनः ।
अभीषाहाः शूरसेनाः शिबयोऽथ वसातयः ॥ १२
शाल्वा मत्स्यास्तथाम्बष्ठास्त्रिगर्ताः केकयास्तथा ।
सौवीराः कितवाः प्राच्याः प्रतीच्योदीच्यमालवाः ॥
द्वादशैते जनपदाः सर्वे शूरास्तनुत्यजः ।
महता रथवंशेन तेऽभ्यरक्षन्पितामहम् ॥ १४
अनीकं दशसाहस्रं कुञ्जराणां तरस्विनाम् ।
मागधो येन नृपतिस्तद्रथानीकमन्वयात् ॥ १५
रथानां चक्ररक्षाश्च पादरक्षाश्च दन्तिनाम् ।
अभूवन्वाहिनीमध्ये शतानामयुतानि षट् ॥ १६
पादाताश्चाग्रतोऽगच्छन्धनुश्चर्मासिपाणयः ।
अनेकशतसाहस्रा नखरप्रासयोधिनः ॥ १७
अक्षौहिण्यो दशैका च तव पुत्रस्य भारत ।
अदृश्यन्त महाराज गङ्गेव यमुनान्तरे ॥ १८

इति श्रीमहाभारते भीष्मपर्वणि
अष्टादशोऽध्यायः ॥ १८ ॥

१९

धृतराष्ट्र उवाच ।

अक्षौहिण्यो दशैकां च व्यूढां दृष्ट्वा युधिष्ठिरः ।
कथमल्पेन सैन्येन प्रत्यव्यूहत पाण्डवः ॥ १
यो वेद मानुषं व्यूहं दैवं गान्धर्वमासुरम् ।
कथं भीष्मं स कौन्तेयः प्रत्यव्यूहत पाण्डवः ॥ २

संजय उवाच ।

धार्तराष्ट्राण्यनीकानि दृष्ट्वा व्यूढानि पाण्डवः ।
अभ्यभाषत धर्मात्मा धर्मराजो धनंजयम् ॥ ३
महर्षेर्वचनात्तात वेदयन्ति बृहस्पतेः ।
संहतान्योधयेदल्पान्कामं विस्तारयेद्बहून् ॥ ४
सूचीमुखमनीकं स्यादल्पानां बहुभिः सह ।
अस्माकं च तथा सैन्यमल्पीयः सुतरां परैः ॥ ५
एतद्वचनमाज्ञाय महर्षेर्व्यूह पाण्डव ।
तच्छ्रुत्वा धर्मराजस्य प्रत्यभाषत फल्गुनः ॥ ६
एष व्यूहामि ते राजन्व्यूहं परमदुर्जयम् ।

अचलं नाम वज्राख्यं विहितं वज्रपाणिना ॥ ७
यः स वात इवोद्धूतः समरे दुःसहः परैः ।
स नः पुरो योत्स्यति वै भीमः प्रहरतां वरः ॥ ८
तेजांसि रिपुसैन्यानां मृद्नन्पुरुषसत्तमः ।
अग्रेऽग्रणीर्यास्यति नो युद्धोपायविचक्षणः ॥ ९
यं दृष्ट्वा पार्थिवाः सर्वे दुर्योधनपुरोगमाः ।
निवर्तिष्यन्ति संभ्रान्ताः सिंहं क्षुद्रमृगा इव ॥ १०
तं सर्वे संश्रयिष्यामः प्राकारमकुतोभयम् ।
भीमं प्रहरतां श्रेष्ठं वज्रपाणिमिवामराः ॥ ११
न हि सोऽस्ति पुमाँल्लोके यः संक्रुद्धं वृकोदरम् ।
द्रष्टुमत्युग्रकर्माणं विषहेत नरर्षभम् ॥ १२
भीमसेनो गदां बिभ्रद्वज्रसारमयीं दृढाम् ।
चरन्वेगेन महता समुद्रमपि शोषयेत् ॥ १३
केकया धृष्टकेतुश्च चेकितानश्च वीर्यवान् ।
एते तिष्ठन्ति सामात्याः प्रेक्षकास्ते नरेश्वर ।
धृतराष्ट्रस्य दायादा इति बीभत्सुरब्रवीत् ॥ १४
ब्रुवाणं तु तथा पार्थं सर्वसैन्यानि मारिष ।
अपूजयंस्तदा वाग्भिरनुकूलाभिराहवे ॥ १५
एवमुक्त्वा महाबाहुस्तथा चक्रे धनंजयः ।
व्यूह्य तानि बलान्याशु प्रययौ फल्गुनस्तदा ॥ १६
संप्रयातान्कुरून्दृष्ट्वा पाण्डवानां महाचमूः ।
गङ्गेव पूर्णा स्तिमिता स्यन्दमाना व्यदृश्यत ॥ १७
भीमसेनोऽग्रणीस्तेषां धृष्टद्युम्नश्च पार्षतः ।
नकुलः सहदेवश्च धृष्टकेतुश्च वीर्यवान् ॥ १८
समुद्योज्य ततः पश्चाद्राजाप्यक्षौहिणीवृतः ।
भ्रातृभिः सह पुत्रैश्च सोऽभ्यरक्षत पृष्ठतः ॥ १९
चक्ररक्षौ तु भीमस्य माद्रीपुत्रौ महाद्युती ।
द्रौपदेयाः ससौभद्राः पृष्ठगोपास्तरस्विनः ॥ २०
धृष्टद्युम्नश्च पाञ्चाल्यस्तेषां गोप्ता महारथः ।
सहितः पृतनाशूरै रथमुख्यैः प्रभद्रकैः ॥ २१
शिखण्डी तु ततः पश्चादर्जुनेनाभिरक्षितः ।
यत्तो भीष्मविनाशाय प्रययौ भरतर्षभ ॥ २२
पृष्ठगोपोऽर्जुनस्यापि युयुधानो महारथः ।
चक्ररक्षौ तु पाञ्चाल्यौ युधामन्यूत्तमौजसौ ॥ २३
राजा तु मध्यमानीके कुन्तीपुत्रो युधिष्ठिरः ।
बृहद्भिः कुञ्जरैर्मत्तैश्चलद्भिरचलैरिव ॥ २४
अक्षौहिण्या च पाञ्चाल्यो यज्ञसेनो महामनाः ।
विराटमन्वयात्पश्चात्पाण्डवार्थे पराक्रमी ॥ २५
तेषामादित्यचन्द्राभाः कनकोत्तमभूषणाः ।
नानाचिह्नधरा राजन्रथेष्वासन्महाध्वजाः ॥ २६
समुत्सर्प्य ततः पश्चाद्धृष्टद्युम्नो महारथः ।
भ्रातृभिः सह पुत्रैश्च सोऽभ्यरक्षद्युधिष्ठिरम् ॥ २७
त्वदीयानां परेषां च रथेषु विविधान्ध्वजान् ।
अभिभूयार्जुनस्यैको ध्वजस्तस्थौ महाकपिः ॥ २८
पादातास्त्वग्रतोऽगच्छन्नसिशक्त्यृष्टिपाणयः ।
अनेकशतसाहस्रा भीमसेनस्य रक्षिणः ॥ २९
वारणा दशसाहस्राः प्रभिन्नकरटामुखाः ।
शूरा हेममयैर्जालैर्दीप्यमाना इवाचलाः ॥ ३०
क्षरन्त इव जीमूता मदार्द्राः पद्मगन्धिनः ।
राजानमन्वयुः पश्चाच्चलन्त इव पर्वताः ॥ ३१
भीमसेनो गदां भीमां प्रकर्षन्परिघोपमाम् ।
प्रचकर्ष महत्सैन्यं दुराधर्षो महामनाः ॥ ३२
तमर्कमिव दुष्प्रेक्ष्यं तपन्तं रश्मिमालिनम् ।
न शेकुः सर्वतो योधाः प्रतिवीक्षितुमन्तिके ॥ ३३
वज्रो नामैष तु व्यूहो दुर्भिदः सर्वतोमुखः ।
चापविद्युद्ध्वजो घोरो गुप्तो गाण्डीवधन्वना ॥ ३४
यं प्रतिव्यूह्य तिष्ठन्ति पाण्डवास्तव वाहिनीम् ।
अजेयो मानुषे लोके पाण्डवैरभिरक्षितः ॥ ३५
संध्यां तिष्ठत्सु सैन्येषु सूर्यस्योदयनं प्रति ।
प्रावात्सपृषतो वायुरनभ्रे स्तनयित्नुमान् ॥ ३६

विष्वग्वाताश्च वान्त्युग्रा नीचैः शर्करकर्षिणः ।
रजश्चोद्धूयमानं तु तमसाच्छादयज्जगत् ॥ ३७
पपात महती चोल्का प्राङ्मुखी भरतर्षभ ।
उद्यन्तं सूर्यमाहत्य व्यशीर्यत महास्वना ॥ ३८
अथ सज्जीयमानेषु सैन्येषु भरतर्षभ ।
निष्प्रभोऽभ्युदियात्सूर्यः सघोषो भूश्चचाल ह ।
व्यशीर्यत सनादा च तदा भरतसत्तम ॥ ३९
निर्घाता बहवो राजन्दिक्षु सर्वासु चाभवन् ।
प्रादुरासीद्रजस्तीव्रं न प्राज्ञायत किंचन ॥ ४०
ध्वजानां धूयमानानां सहसा मातरिश्वना ।
किङ्किणीजालनद्धानां काञ्चनस्रग्वतां रवैः ॥ ४१
महतां सपताकानामादित्यसमतेजसाम् ।
सर्वं झणझणीभूतमासीत्तालवनेष्विव ॥ ४२
एवं ते पुरुषव्याघ्राः पाण्डवा युद्धनन्दिनः ।
व्यवस्थिताः प्रतिव्यूह्य तव पुत्रस्य वाहिनीम् ॥ ४३
स्रंसन्त इव मज्जानो योधानां भरतर्षभ ।
दृष्ट्वाग्रतो भीमसेनं गदापाणिमवस्थितम् ॥ ४४

इति श्रीमहाभारते भीष्मपर्वणि
एकोनविंशोऽध्यायः ॥ १९ ॥

२०

धृतराष्ट्र उवाच ।

सूर्योदये संजय के नु पूर्वं
युयुत्सवो हृष्यमाणा इवासन् ।
मामका वा भीष्मनेत्राः समीके
पाण्डवा वा भीमनेत्रास्तदानीम् ॥ १
केषां जघन्यौ सोमसूर्यौ सवायू
केषां सेनां श्वापदा व्याभषन्त ।
केषां यूनां मुखवर्णाः प्रसन्नाः
सर्वं ह्येतद्ब्रूहि तत्त्वं यथावत् ॥ २

संजय उवाच ।

उभे सेने तुल्यमिवोपयाते
उभे व्यूहे हृष्टरूपे नरेन्द्र ।
उभे चित्रे वनराजिप्रकाशे
तथैवोभे नागरथाश्वपूर्णे ॥ ३
उभे सेने बृहती भीमरूपे
तथैवोभे भारत दुर्विषह्ये ।
तथैवोभे स्वर्गजयाय सृष्टे
तथा ह्युभे सत्पुरुषार्यगुप्ते ॥ ४
पश्चान्मुखाः कुरवो धार्तराष्ट्राः
स्थिताः पार्थाः प्राङ्मुखा योत्स्यमानाः ।
दैत्येन्द्रसेनेव च कौरवाणां
देवेन्द्रसेनेव च पाण्डवानाम् ॥ ५
शुक्रो वायुः पृष्ठतः पाण्डवानां
धार्तराष्ट्राञ्श्वापदा व्याभषन्त ।
गजेन्द्राणां मदगन्धांश्च तीव्रा-
न्न सेहिरे तव पुत्रस्य नागाः ॥ ६
दुर्योधनो हस्तिनं पद्मवर्णं
सुवर्णकक्ष्यं जातिबलं प्रभिन्नम् ।
समास्थितो मध्यगतः कुरूणां
संस्तूयमानो बन्दिभिर्मागधैश्च ॥ ७
चन्द्रप्रभं श्वेतमस्यातपत्रं
सौवर्णी स्रग्भ्राजते चोत्तमाङ्गे ।
तं सर्वतः शकुनिः पार्वतीयैः
सार्धं गान्धारैः पाति गान्धारराजः ॥ ८
भीष्मोऽग्रतः सर्वसैन्यस्य वृद्धः
श्वेतच्छत्रः श्वेतधनुः सशङ्खः ।
श्वेतोष्णीषः पाण्डुरेण ध्वजेन
श्वेतैरश्वैः श्वेतशैलप्रकाशः ॥ ९
तस्य सैन्यं धार्तराष्ट्राश्च सर्वे

बाह्लीकानामेकदेशः शलश्च ।
ये चाम्बष्ठाः क्षत्रिया ये च सिन्धौ
तथा सौवीराः पञ्चनदाश्च शूराः ॥ १०
शोणैर्हयै रुक्मरथो महात्मा
द्रोणो महाबाहुरदीनसत्त्वः ।
आस्ते गुरुः प्रयशाः सर्वराज्ञां
पश्चाच्चमूमिन्द्र इवाभिरक्षन् ॥ ११
वार्द्धक्षत्रिः सर्वसैन्यस्य मध्ये
भूरिश्रवाः पुरुमित्रो जयश्च ।
शाल्वा मत्स्याः केकयाश्चापि सर्वे
गजानीकैर्भ्रातरो योत्स्यमानाः ॥ १२
शारद्वतश्चोत्तरधूर्महात्मा
महेष्वासो गौतमश्चित्रयोधी ।
शकैः किरातैर्यवनैः पह्लवैश्च
सार्धं चमूमुत्तरतोऽभिपाति ॥ १३
महारथैरन्धकवृष्णिभोजैः
सौराष्ट्रकैर्नैर्ऋतैरात्तशस्त्रैः ।
बृहद्बलः कृतवर्माभिगुप्तो
बलं त्वदीयं दक्षिणतोऽभिपाति ॥ १४
संशप्तकानामयुतं रथानां
मृत्युर्जयो वार्जुनस्येति सृष्टाः ।
येनार्जुनस्तेन राजन्कृतास्त्राः
प्रयाता वै ते त्रिगर्ताश्च शूराः ॥ १५
साग्रं शतसहस्रं तु नागानां तव भारत ।
नागे नागे रथशतं शतं चाश्वा रथे रथे ॥ १६
अश्वेऽश्वे दश धानुष्का धानुष्के दश चर्मिणः ।
एवं व्यूढान्यनीकानि भीष्मेण तव भारत ॥ १७
अव्यूहन्मानुषं व्यूहं दैवं गान्धर्वमासुरम् ।
दिवसे दिवसे प्राप्ते भीष्मः शांतनवोऽग्रणीः ॥ १८
महारथौघविपुलः समुद्र इव पर्वणि ।
भीष्मेण धार्तराष्ट्राणां व्यूहः प्रत्यङ्मुखो युधि ॥१९
अनन्तरूपा ध्वजिनी त्वदीया
नरेन्द्र भीमा न तु पाण्डवानाम् ।
तां त्वेव मन्ये बृहतीं दुष्प्रधृष्यां
यस्या नेतारौ केशवश्चार्जुनश्च ॥ २०

इति श्रीमहाभारते भीष्मपर्वणि
विंशोऽध्यायः ॥ २० ॥

२१

संजय उवाच ।

बृहतीं धार्तराष्ट्राणां दृष्ट्वा सेनां समुद्यताम् ।
विषादमगमद्राजा कुन्तीपुत्रो युधिष्ठिरः ॥ १
व्यूहं भीष्मेण चाभेद्यं कल्पितं प्रेक्ष्य पाण्डवः ।
अभेद्यमिव संप्रेक्ष्य विषण्णोऽर्जुनमब्रवीत् ॥ २
धनंजय कथं शक्यमस्माभिर्योद्धुमाहवे ।
धार्तराष्ट्रैर्महाबाहो येषां योद्धा पितामहः ॥ ३
अक्षोभ्योऽयमभेद्यश्च भीष्मेणामित्रकर्शिना ।
कल्पितः शास्त्रदृष्टेन विधिना भूरितेजसा ॥ ४
ते वयं संशयं प्राप्ताः ससैन्याः शत्रुकर्शन ।
कथमस्मान्महाव्यूहादुद्यानं नो भविष्यति ॥ ५
अथार्जुनोऽब्रवीत्पार्थं युधिष्ठिरममित्रहा ।
विषण्णमभिसंप्रेक्ष्य तव राजन्ननीकिनीम् ॥ ६
प्रज्ञयाभ्यधिकाञ्शूरान्गुणयुक्तान्बहूनपि ।
जयन्त्यल्पतरा येन तन्निबोध विशां पते ॥ ७
तत्तु ते कारणं राजन्प्रवक्ष्याम्यनसूयवे ।
नारदस्तमृषिर्वेद भीष्मद्रोणौ च पाण्डव ॥ ८
एतमेवार्थमाश्रित्य युद्धे देवासुरेऽब्रवीत् ।
पितामहः किल पुरा महेन्द्रादीन्दिवौकसः ॥ ९
न तथा बलवीर्याभ्यां विजयन्ते जिगीषवः ।
यथा सत्यानृशंस्याभ्यां धर्मेणैवोद्यमेन च ॥ १०
त्यक्त्वाधर्मं च लोभं च मोहं चोद्यममास्थिताः ।

युध्यध्वमनहंकारा यतो धर्मस्ततो जयः ॥ ११
एवं राजन्विजानीहि ध्रुवोऽस्माकं रणे जयः ।
यथा मे नारदः प्राह यतः कृष्णस्ततो जयः ॥१२
गुणभूतो जयः कृष्णे पृष्ठतोऽन्वेति माधवम् ।
अन्यथा विजयश्चास्य संनतिश्चापरो गुणः ॥ १३
अनन्ततेजा गोविन्दः शत्रुपूगेषु निर्व्यथः ।
पुरुषः सनातनतमो यतः कृष्णस्ततो जयः ॥ १४
पुरा ह्येष हरिर्भूत्वा वैकुण्ठोऽकुण्ठसायकः ।
सुरासुरानवस्फूर्जन्नब्रवीत्के जयन्त्विति ॥ १५
अनु कृष्णं जयेमेति यैरुक्तं तत्र तैर्जितम् ।
तत्प्रसादाद्धि त्रैलोक्यं प्राप्तं शक्रादिभिः सुरैः॥१६
तस्य ते न व्यथां कांचिदिह पश्यामि भारत ।
यस्य ते जयमाशास्ते विश्वभुक्त्रिदशेश्वरः ॥ १७

इति श्रीमहाभारते भीष्मपर्वणि
एकविंशोऽध्यायः ॥ २१ ॥

२२

संजय उवाच ।

ततो युधिष्ठिरो राजा स्वां सेनां समचोदयत् ।
प्रतिव्यूहन्ननीकानि भीष्मस्य भरतर्षभ ॥ १
यथोद्दिष्टान्यनीकानि प्रत्यव्यूहन्त पाण्डवाः ।
स्वर्गं परमभीप्सन्तः सुयुद्धेन कुरूद्वहाः ॥ २
मध्ये शिखण्डिनोऽनीकं रक्षितं सव्यसाचिना ।
धृष्टद्युम्नस्य च स्वयं भीमेन परिपालितम् ॥ ३
अनीकं दक्षिणं राजन्युयुधानेन पालितम् ।
श्रीमता सात्वताग्र्येण शक्रेणेव धनुष्मता ॥ ४
महेन्द्रयानप्रतिमं रथं तु
सोपस्करं हाटकरत्नचित्रम् ।
युधिष्ठिरः काञ्चनभाण्डयोक्त्रं
समास्थितो नागकुलस्य मध्ये ॥ ५
समुच्छ्रितं दान्तशलाकमस्य
सुपाण्डुरं छत्रमतीव भाति ।
प्रदक्षिणं चैनमुपाचरन्ति
महर्षयः संस्तुतिभिर्नरेन्द्रम् ॥ ६
पुरोहिताः शत्रुवधं वदन्तो
महर्षिवृद्धाः श्रुतवन्त एव ।
जप्यैश्च मन्त्रैश्च तथौषधीभिः
समन्ततः स्वस्त्ययनं प्रचक्रुः ॥ ७
ततः स वस्त्राणि तथैव गाश्च
फलानि पुष्पाणि तथैव निष्कान् ।
कुरूत्तमो ब्राह्मणसान्महात्मा
कुर्वन्ययौ शक्र इवामरेभ्यः ॥ ८
सहस्रसूर्यः शतकिङ्किणीकः
परार्ध्यजाम्बूनदहेमचित्रः ।
रथोऽर्जुनस्याग्निरिवार्चिमाली
विभ्राजते श्वेतहयः सुचक्रः ॥ ९
तमास्थितः केशवसंगृहीतं
कपिध्वजं गाण्डिवबाणहस्तः ।
धनुर्धरो यस्य समः पृथिव्यां
न विद्यते नो भविता वा कदाचित् ॥१०
उद्वर्तयिष्यंस्तव पुत्रसेना-
मतीव रौद्रं स बिभर्ति रूपम् ।
अनायुधो यः सुभुजो भुजाभ्यां
नराश्वनागान्युधि भस्म कुर्यात् ॥ ११
स भीमसेनः सहितो यमाभ्यां
वृकोदरो वीररथस्य गोप्ता ।
तं प्रेक्ष्य मत्तर्षभसिंहखेलं
लोके महेन्द्रप्रतिमानकल्पम् ॥ १२
समीक्ष्य सेनाग्रगतं दुरासदं
प्रविव्यथुः पङ्कगता इवोष्ट्राः ।

वृकोदरं वारणराजदर्पं
योधास्त्वदीया भयविग्नसत्त्वाः ॥ १३
अनीकमध्ये तिष्ठन्तं राजपुत्रं दुरासदम् ।
अब्रवीद्भरतश्रेष्ठं गुडाकेशं जनार्दनः ॥ १४

वासुदेव उवाच ।

य एष गोप्ता प्रतपन्बलस्थो
यो नः सेनां सिंह इवेक्षते च ।
स एष भीष्मः कुरुवंशकेतु-
र्येनाहृतास्त्रिंशतो वाजिमेधाः ॥ १५
एतान्यनीकानि महानुभावं
गूहन्ति मेघा इव घर्मरश्मिम् ।
एतानि हत्वा पुरुषप्रवीर
काङ्क्षस्व युद्धं भरतर्षभेण ॥ १६

धृतराष्ट्र उवाच ।

केषां प्रहृष्टास्तत्राग्रे योधा युध्यन्ति संजय ।
उदग्रमनसः केऽत्र के वा दीना विचेतसः ॥ १७
के पूर्वं प्राहरंस्तत्र युद्धे हृदयकम्पने ।
मामकाः पाण्डवानां वा तन्ममाचक्ष्व संजय ॥१८
कस्य सेनासमुदये गन्धमाल्यसमुद्भवः ।
वाचः प्रदक्षिणाश्चैव योधानामभिगर्जताम् ॥ १९

संजय उवाच ।

उभयोः सेनयोस्तत्र योधा जहृषिरे मुदा ।
स्रग्धूपपानगन्धानामुभयत्र समुद्भवः ॥ २०
संहतानामनीकानां व्यूढानां भरतर्षभ ।
संसर्पतामुदीर्णानां विमर्दः सुमहानभूत् ॥ २१
वादित्रशब्दस्तुमुलः शङ्खभेरीविमिश्रितः ।
कुञ्जराणां च नदतां सैन्यानां च प्रहृष्यताम् ॥ २२

इति श्रीमहाभारते भीष्मपर्वणि
द्वाविंशोऽध्यायः ॥ २२ ॥

२३

धृतराष्ट्र उवाच ।

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत संजय ॥ १

संजय उवाच ।

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ २
पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३
अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४
धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुंगवः ॥ ५
युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६
अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥ ७
भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८
अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९
अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १०
अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥ ११
तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥ १२
ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥ १३
ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।

माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४
पाञ्चजन्यं हृषीकेशो देवदत्तं धनंजयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥ १५
अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६
काश्यश्च परमेष्वासः शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७
द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक्पृथक् ॥१८
स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ १९
अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः ।
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः ॥ २०
हृषीकेशं तदा वाक्यमिदमाह महीपते ।
सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१
यावदेतान्निरीक्षेहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥ २२
योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३
एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४
भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥ २५
तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ।
तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ॥२७
कृपया परयाविष्टो विषीदन्निदमब्रवीत् ।
दृष्ट्वेमान्स्वजनान्कृष्ण युयुत्सून्समवस्थितान् ॥ २८
सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २९
गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ ३०
निमित्तानि च पश्यामि विपरीतानि केशव ।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥ ३१
न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ।
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥ ३२
येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥३३
आचार्याः पितरः पुत्रास्तथैव च पितामहाः ।
मातुलाः श्वशुराः पौत्राः स्यालाः संबन्धिनस्तथा ॥
एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥ ३५
निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ ३६
तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्सबान्धवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥ ३७
यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥ ३८
कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९
कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥ ४०
अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ ४१
संकरो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥ ४२
दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३
उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।

नरके नियतं वासो भवतीत्यनुशुश्रुम ॥ ४४
अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ ४५
यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥ ४६
एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ ४७

इति श्रीमहाभारते भीष्मपर्वणि
त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

संजय उवाच ।

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ १

श्रीभगवानुवाच ।

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २
क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥ ३

अर्जुन उवाच ।

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४
गुरूनहत्वा हि महानुभावा-
ञ्श्रेयो भोक्तुं भैक्षमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥ ५
न चैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ६
कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वा धर्मसंमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ ७
न हि प्रपश्यामि ममापनुद्या-
द्यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यम् ॥ ८

संजय उवाच ।

एवमुक्त्वा हृषीकेशं गुडाकेशः परंतप ।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥ ९
तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥ १०

श्रीभगवानुवाच ।

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ११
न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥ १२
देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ १३
मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥ १४
यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ १५
नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥ १६
अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥ १७
अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ १८
य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।

उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥
न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥ २०
वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥ २१
वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥ २२
नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ २३
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ २४
अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५
अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥ २६
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७
अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८
आश्चर्यवत्पश्यति कश्चिदेन-
माश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ २९
देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ ३०
स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥ ३१
यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥ ३२
अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ ३३
अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ ३४
भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥
अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ ३६
हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ ३७
सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८
एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥ ३९
नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४०
व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१
यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ ४२
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३
भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥ ४४
त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥ ४५
यावानर्थ उदपाने सर्वतःसंप्लुतोदके ।

तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥ ४६
कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥ ४७
योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनंजय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥
दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९
बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५०
कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥ ५१
यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२
श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ ५३

अर्जुन उवाच ।

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥

श्रीभगवानुवाच ।

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६
यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७
यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८
विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९
यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६०
तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१
ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥ ६२
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३
रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४
प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ ६६
इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ६७
तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८
या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९
आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ॥ ७०
विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहंकारः स शान्तिमधिगच्छति ॥ ७१
एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ ७२

इति श्रीमहाभारते भीष्मपर्वणि
चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

अर्जुन उवाच ।

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ १
व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥ २

श्रीभगवानुवाच ।

लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥ ३
न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥ ४
न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५
कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥६
यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ ७
नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिध्येदकर्मणः ॥ ८
यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥ ९
सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥ १०
देवान्भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ११
इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥ १२
यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥१३
अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४
कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥ १५
एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥ १६
यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ १७
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८
तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥ १९
कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥ २०
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१
न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२
यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वतः ॥ २३
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥२४
सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥ २५
न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥ २६
प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥ २७
तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ २८
प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु ।

तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥ २९
मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३०
ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ३१
ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥ ३२
सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ३३
इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४
श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५

अर्जुन उवाच ।

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६

श्रीभगवानुवाच ।

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७
धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८
आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९
इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४०
तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१
इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२
एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३

इति श्रीमहाभारते भीष्मपर्वणि
पञ्चविंशोऽध्यायः ॥ २५ ॥

२६

श्रीभगवानुवाच ।

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १
एवं परंपराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परंतप ॥ २
स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३

अर्जुन उवाच ।

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४

श्रीभगवानुवाच ।

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥ ५
अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥ ६
यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ७
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ८
जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९
वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १०
ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ११
काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।

क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥१२
चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३
न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ १४
एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५
किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥
कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ १७
कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८
यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥ १९
त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः ॥ २०
निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ २१
यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥ २२
गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३
ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ २४
दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५
श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥ २६
सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८
अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९
अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३०
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१
एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२
श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३
तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४
यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५
अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६
यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ३८
श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ ३९
अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥४०
योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय ॥ ४१
तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ।

छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२

इति श्रीमहाभारते भीष्मपर्वणि
षड्विंशोऽध्यायः ॥ २६ ॥

२७

अर्जुन उवाच ।

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १

श्रीभगवानुवाच ।

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥ २
ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वंद्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥ ३
सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥ ४
यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥
संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥ ६
योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७
नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ॥ ८
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ९
ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ १०
कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥ ११
युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ १२
सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ १३
न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४
नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ १५
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ १६
तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७
विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ १८
इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥ १९
न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ २०
बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥ २१
ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ २२
शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ २३
योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥ २४
लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥ २५
कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥ २६
स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥२७

यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥२८
भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥२९

इति श्रीमहाभारते भीष्मपर्वणि
सप्तविंशोऽध्यायः ॥ २७ ॥

२८

श्रीभगवानुवाच ।

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥१
यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥ २
आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३
यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४
उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ५
बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६
जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानावमानयोः ॥ ७
ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥ ८
सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९
योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥ १०
शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥ ११
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥ १२
समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ १३
प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४
युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ १५
नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६
युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७
यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ १८
यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥ १९
यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ २०
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ २१
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥ २२
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥ २३
संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥ २४
शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् ॥
यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ २६

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ २७
युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ २८
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९
यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ३०
सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥ ३१
आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२

अर्जुन उवाच ।

योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥ ३३
चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४

श्रीभगवानुवाच ।

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ३५
असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ ३६

अर्जुन उवाच ।

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७
कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८
एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ३९

श्रीभगवानुवाच ।

पार्थ नैवेह नामुत्र विनाशस्तस्य न विद्यते ।
न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ ४०
प्राप्य पुण्यकृताँल्लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ४१
अथ वा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२
तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥ ४३
पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४४
प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥ ४५
तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ ४६
योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥ ४७

इति श्रीमहाभारते भीष्मपर्वणि
अष्टाविंशोऽध्यायः ॥ २८ ॥

२९

श्रीभगवानुवाच ।

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १
ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥ २
मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ ३
भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।

जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५
एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६
मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७
रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८
पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९
बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ १०
बलं बलवतां चाहं कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११
ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ १२
त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३
दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ १४
न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥ १५
चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १६
तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥१७
उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥
बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥ १९
कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥ २०
यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ २१
स तया श्रद्धया युक्तस्तस्या राधनमीहते ।
लभते च ततः कामान्मयैव विहितान्हि तान् ॥ २२
अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ २३
अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ २४
नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥२५
वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६
इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत ।
सर्वभूतानि संमोहं सर्गे यान्ति परंतप ॥ २७
येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वंद्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥ २८
जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ २९
साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥ ३०

इति श्रीमहाभारते भीष्मपर्वणि
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

३०

अर्जुन उवाच ।

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ १
अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥ २

श्रीभगवानुवाच ।
अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥ ३
अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥ ४
अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ ५
यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥ ६
तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥ ७
अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥ ८
कविं पुराणमनुशासितार-
मणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूप-
मादित्यवर्णं तमसः परस्तात् ॥ ९
प्रयाणकाले मनसाचलेन
भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्य-
क्स तं परं पुरुषमुपैति दिव्यम् ॥ १०
यदक्षरं वेदविदो वदन्ति
विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ ११
सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥ १२
ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥ १३
अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४
मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥ १५
आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ १६
सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥ १७
अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥ १८
भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९
परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ २०
अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥ २१
पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥ २२
यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥ २३
अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ २४
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ २५
शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥ २६
नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७
वेदेषु यज्ञेषु तपःसु चैव
दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा

योगी परं स्थानमुपैति चाद्यम् ॥ २८

इति श्रीमहाभारते भीष्मपर्वणि
त्रिंशोऽध्यायः ॥ ३० ॥

३१

श्रीभगवानुवाच ।

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १
राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥ २
अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥ ३
मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ४
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ५
यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥ ६
सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७
प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८
न च मां तानि कर्माणि निबध्नन्ति धनंजय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९
मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥ १०
अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥ ११
मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ १२
महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३
सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४
ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५
अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ १६
पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥ १७
गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥ १८
तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९
त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोक-
मश्नन्ति दिव्यान्दिवि देवभोगान् ॥ २०
ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते ॥ २१
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२
येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ २३
अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ २४
यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।

तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ २६
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ २७
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८
समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥
अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥३०
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥३१
मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥
किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥३३
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ३४

इति श्रीमहाभारते भीष्मपर्वणि
एकत्रिंशोऽध्यायः ॥ ३१ ॥

३२

श्रीभगवानुवाच ।

भूय एव महाबाहो शृणु मे परमं वचः ।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १
न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २
यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३
बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ।
सुखं दुःखं भवोऽभावो भयं चाभयमेव च ॥ ४
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥ ५
महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥ ६
एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सोऽविकम्पेन योगेन युज्यते नात्र संशयः ॥ ७
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ ८
मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ ९
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १०
तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११

अर्जुन उवाच ।

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १२
आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥१३
सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥ १४
स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥ १५
वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥१६
कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् ।
केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥ १७
विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥१८

श्रीभगवानुवाच ।

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।

प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥ १९
अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥ २०
आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥ २१
वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२
रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥ २३
पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् ।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः ॥ २४
महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥ २५
अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥ २६
उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥ २७
आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥ २८
अनन्तश्चास्मि नागानां वरुणो यादसामहम् ।
पितॄणामर्यमा चास्मि यमः संयमतामहम् ॥ २९
प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥ ३०
पवनः पवतामस्मि रामः शस्त्रभृतामहम् ।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१
सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन ।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥ ३२
अक्षराणामकारोऽस्मि द्वंद्वः सामासिकस्य च ।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥ ३३
मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥
बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ ३५
द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥
वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनंजयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७
दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८
यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ ३९
नान्तोऽस्ति मम दिव्यानां विभूतीनां परंतप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४०
यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् ॥ ४१
अथ वा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ ४२

इति श्रीमहाभारते भीष्मपर्वणि
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

३३

अर्जुन उवाच ।

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥ १
भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥ २
एवमेतद्यथात्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३
मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥ ४

श्रीभगवानुवाच ।

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ५
पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६
इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७
न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ८

संजय उवाच ।

एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ९
अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ १०
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥ ११
दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥
तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ १३
ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥ १४

अर्जुन उवाच ।

पश्यामि देवांस्तव देव देहे
सर्वांस्तथा भूतविशेषसंघान् ।
ब्रह्माणमीशं कमलासनस्थ-
मृषींश्च सर्वानुरगांश्च दिव्यान् ॥ १५
अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वा सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं
पश्यामि विश्वेश्वर विश्वरूप ॥ १६
किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ता-
द्दीप्तानलार्कद्युतिमप्रमेयम् ॥ १७
त्वमक्षरं परमं वेदितव्यं
त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे ॥ १८
अनादिमध्यान्तमनन्तवीर्य-
मनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं
स्वतेजसा विश्वमिदं तपन्तम् ॥ १९
द्यावापृथिव्योरिदमन्तरं हि
व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाद्भुतं रूपमिदं तवोग्रं
लोकत्रयं प्रव्यथितं महात्मन् ॥ २०
अमी हि त्वा सुरसंघा विशन्ति
केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥
रुद्रादित्या वसवो ये च साध्या
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसंघा
वीक्षन्ते त्वा विस्मिताश्चैव सर्वे ॥ २२
रूपं महत्ते बहुवक्त्रनेत्रं
महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं
दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥ २३
नभःस्पृशं दीप्तमनेकवर्णं

व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा
धृतिं न विन्दामि शमं च विष्णो ॥ २४
दंष्ट्राकरालानि च ते मुखानि
दृष्ट्वैव कालानलसंनिभानि ।
दिशो न जाने न लभे च शर्म
प्रसीद देवेश जगन्निवास ॥ २५
अमी च त्वां धृतराष्ट्रस्य पुत्राः
सर्वे सहैवावनिपालसंघैः ।
भीष्मो द्रोणः सूतपुत्रस्तथासौ
सहास्मदीयैरपि योधमुख्यैः ॥ २६
वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु
संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥ २७
यथा नदीनां बहवोऽम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा
विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ २८
यथा प्रदीप्तं ज्वलनं पतंगा
विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोका-
स्तवापि वक्त्राणि समृद्धवेगाः ॥ २९
लेलिह्यसे ग्रसमानः समन्ता-
ल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं
भासस्तवोग्राः प्रतपन्ति विष्णो ॥ ३०
आख्याहि मे को भवानुग्ररूपो
नमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यं
न हि प्रजानामि तव प्रवृत्तिम् ॥ ३१

श्रीभगवानुवाच ।

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो
लोकान्समाहर्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वा न भविष्यन्ति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः ॥ ३२
तस्मात्त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ॥ ३३
द्रोणं च भीष्मं च जयद्रथं च
कर्णं तथान्यानपि योधवीरान् ।
मया हतांस्त्वं जहि मा व्यथिष्ठा
युध्यस्व जेतासि रणे सपत्नान् ॥ ३४

संजय उवाच ।

एतच्छ्रुत्वा वचनं केशवस्य
कृताञ्जलिर्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाह कृष्णं
सगद्गदं भीतभीतः प्रणम्य ॥ ३५

अर्जुन उवाच ।

स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसंघाः ॥ ३६
कस्माच्च ते न नमेरन्महात्म-
न्गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास
त्वमक्षरं सदसत्तत्परं यत् ॥ ३७
त्वमादिदेवः पुरुषः पुराण-
स्त्वमस्य विश्वस्य परं निधानम् ।

वेत्तासि वेद्यं च परं च धाम
त्वया ततं विश्वमनन्तरूप ॥ ३८
वायुर्यमोऽग्निर्वरुणः शशाङ्कः
प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः
पुनश्च भूयोऽपि नमो नमस्ते ॥ ३९
नमः पुरस्तादथ पृष्ठतस्ते
नमोऽस्तु ते सर्वत एव सर्व ।
अनन्तवीर्यामितविक्रमस्त्वं
सर्वं समाप्नोषि ततोऽसि सर्वः ॥ ४०
सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं
मया प्रमादात्प्रणयेन वापि ॥ ४१
यच्चावहासार्थमसत्कृतोऽसि
विहारशय्यासनभोजनेषु ।
एकोऽथ वाप्यच्युत तत्समक्षं
तत्क्षामये त्वामहमप्रमेयम् ॥ ४२
पितासि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो
लोकत्रयेऽप्यप्रतिमप्रभाव ॥ ४३
तस्मात्प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः
प्रियः प्रियायार्हसि देव सोढुम् ॥ ४४
अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा
भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं
प्रसीद देवेश जगन्निवास ॥ ४५
किरीटिनं गदिनं चक्रहस्त-
मिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन
सहस्रबाहो भव विश्वमूर्ते ॥ ४६

श्रीभगवानुवाच ।

मया प्रसन्नेन तवार्जुनेदं
रूपं परं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनन्तमाद्यं
यन्मे त्वदन्येन न दृष्टपूर्वम् ॥ ४७
न वेदयज्ञाध्ययनैर्न दानै-
र्न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके
द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ४८
मा ते व्यथा मा च विमूढभावो
दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ॥ ४९

संजय उवाच ।

इत्यर्जुनं वासुदेवस्तथोक्त्वा
स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं
भूत्वा पुनः सौम्यवपुर्महात्मा ॥ ५०

अर्जुन उवाच ।

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥ ५१

श्रीभगवानुवाच ।

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥ ५२
नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ५३

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ ५४
मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥ ५५

इति श्रीमहाभारते भीष्मपर्वणि
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

३४

अर्जुन उवाच ।

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १

श्रीभगवानुवाच ।

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २
ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ ३
संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ ४
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ ६
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ॥ ७
मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ ८
अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥ ९
अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥ १०
अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११
श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥ १२
अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥ १३
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ १४
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६
यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ १७
समः शत्रौ च मित्रे च तथा मानावमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥ १८
तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १९
ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ २०

इति श्रीमहाभारते भीष्मपर्वणि
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

३५

श्रीभगवानुवाच ।

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ १
क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ २
तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३
ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।

ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ ४
महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥ ५
इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ।
एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥ ६
अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ७
इन्द्रियार्थेषु वैराग्यमनहंकार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ ८
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ ९
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ १०
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ ११
ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२
सर्वतःपाणिपादं तत्सर्वतोक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १४
बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥ १५
अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ १६
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ १७
इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८
प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥ १९
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २०
पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् ।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ २१
उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥ २२
य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ २३
ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥ २४
अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते ।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥ २५
यावत्संजायते किंचित्सत्त्वं स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ २६
समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥ २७
समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥ २८
प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथात्मानमकर्तारं स पश्यति ॥ २९
यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ ३०
अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥ ३१
यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ ३२
यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ ३३
क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।

भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥ ३४

इति श्रीमहाभारते भीष्मपर्वणि
पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

३६

श्रीभगवानुवाच ।

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥ १
इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ २
मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् ।
संभवः सर्वभूतानां ततो भवति भारत ॥ ३
सर्वयोनिषु कौन्तेय मूर्तयः संभवन्ति याः ।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ ४
सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ ५
तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥ ६
रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥ ७
तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ ८
सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥ ९
रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥ १०
सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥ ११
लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥ १२
अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥ १३
यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥ १४
रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५
कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ १६
सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ १७
ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः ॥ १८
नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९
गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ २०

अर्जुन उवाच ।

कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो ।
किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥ २१

श्रीभगवानुवाच ।

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति ॥ २२
उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥ २३
समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥ २४
मानावमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥ २५
मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥ २६
ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ।

शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ।। २७

इति श्रीमहाभारते भीष्मपर्वणि
षट्त्रिंशोऽध्यायः ॥ ३६ ॥

३७

श्रीभगवानुवाच ।

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ।। १

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा
गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसंततानि
कर्मानुबन्धीनि मनुष्यलोके ।। २

न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च संप्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूल-
मसङ्गशस्त्रेण दृढेन छित्त्वा ।। ३

ततः पदं तत्परिमार्गितव्यं
यस्मिन्गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी ।। ४

निर्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामाः ।
द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञै-
र्गच्छन्त्यमूढाः पदमव्ययं तत् ।। ५

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ।। ६
ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ।। ७
शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ।। ८
श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ।। ९
उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ।। १०
यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ।। ११
यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ।। १२
गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ।।
अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ।। १४

सर्वस्य चाहं हृदि संनिविष्टो
मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम् ।। १५

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।। १६
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।। १७
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।। १८
यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ।। १९
इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ।। २०

इति श्रीमहाभारते भीष्मपर्वणि
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

३८

श्रीभगवानुवाच ।

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।

दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ २
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति संपदं दैवीमभिजातस्य भारत ॥ ३
दम्भो दर्पोऽतिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥ ४
दैवी संपद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव ॥ ५
द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६
प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७
असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥ ८
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ ९
काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः ॥ १०
चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥ ११
आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसंचयान् ॥ १२
इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥ १३
असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥ १४
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥१५
अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥ १६
आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥ १७
अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥ १८
तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १९
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥२०
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ २१
एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥ २२
यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥२३
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ २४

इति श्रीमहाभारते भीष्मपर्वणि
अष्टात्रिंशोऽध्यायः ॥ ३८ ॥

३९

अर्जुन उवाच ।

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥ १

श्रीभगवानुवाच ।

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥ २
सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥ ३
यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः ।
प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥ ४

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।
दम्भाहंकारसंयुक्ताः कामरागबलान्विताः ॥ ५
कर्शयन्तः शरीरस्थं भूतग्राममचेतसः ।
मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥ ६
आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥ ७
आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः॥
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९
यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥ १०
अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥ ११
अभिसंधाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२
विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३
देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १४
अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ १५
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥ १६
श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥ १७
सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ १८
मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥ १९
दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥
यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥ २१
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ २२
ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ २३
तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥ २४
तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥
सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥ २६
यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ २७
अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ २८

इति श्रीमहाभारते भीष्मपर्वणि
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

४०

अर्जुन उवाच ।

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १

श्रीभगवानुवाच ।

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २
त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ ३
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।

त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥ ४
यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ ५
एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ ६
नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥ ७
दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥ ८
कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥
न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥ १०
न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ ११
अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥
पञ्चैतानि महाबाहो कारणानि निबोध मे ।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥१३
अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥ १४
शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥ १५
तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १६
यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते ॥ १७
ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८
ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९
सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥
पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ २१
यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥ २२
नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥ २३
यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥ २४
अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥ २५
मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥
रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥ २७
अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २८
बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय ॥ २९
प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥
यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ ३१
अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ ३२
धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥
यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन ।

प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥ ३४
यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥ ३५
सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।
अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥ ३६
यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥ ३७
विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८
यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥ ३९
न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥ ४०
ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१
शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ ४२
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षत्रकर्म स्वभावजम् ॥ ४३
कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् ।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभाजम् ॥ ४४
स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥ ४५
यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ ४६
श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ ४७
सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८
असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ ४९
सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥ ५०
बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ५१
विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ५२
अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥ ५३
ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ ५४
भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ ५५
सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ ५६
चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७
मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ।
अथ चेत्त्वमहंकारान्न श्रोष्यसि विनङ्क्ष्यसि ॥ ५८
यदहंकारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९
स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा ।
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥ ६०
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ ६१
तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥
इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ ६३
सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।

इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥६४
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥६५
सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥६६
इदं ते नातपस्काय नाभक्ताय कदाचन ।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥६७
य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८
न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।
भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥६९
अध्येष्यते च य इमं धर्म्यं संवादमावयोः ।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥ ७०
श्रद्धावाननसूयश्च शृणुयादपि यो नरः ।
सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥
कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय ॥ ७२

अर्जुन उवाच ।

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ॥ ७३

संजय उवाच ।

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ।
संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥ ७४
व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम् ।
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥ ७५
राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम् ।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६
तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः ॥७७
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८

इति श्रीमहाभारते भीष्मपर्वणि
चत्वारिंशोऽध्यायः ॥ ४० ॥

॥ समाप्तं भगवद्गीतापर्व ॥

४१

संजय उवाच ।

ततो धनंजयं दृष्ट्वा बाणगाण्डीवधारिणम् ।
पुनरेव महानादं व्यसृजन्त महारथाः ॥ १
पाण्डवाः सोमकाश्चैव ये चैषामनुयायिनः ।
दध्मुश्च मुदिताः शङ्खान्वीराः सागरसंभवान् ॥ २
ततो भेर्यश्च पेश्यश्च क्रकचा गोविषाणिकाः ।
सहसैवाभ्यहन्यन्त ततः शब्दो महानभूत् ॥ ३
अथ देवाः सगन्धर्वाः पितरश्च जनेश्वर ।
सिद्धचारणसंघाश्च समीयुस्ते दिदृक्षया ॥ ४
ऋषयश्च महाभागाः पुरस्कृत्य शतक्रतुम् ।
समीयुस्तत्र सहिता द्रष्टुं तद्वैशसं महत् ॥ ५
ततो युधिष्ठिरो दृष्ट्वा युद्धाय सुसमुद्यते ।
ते सेने सागरप्रख्ये मुहुः प्रचलिते नृप ॥ ६
विमुच्य कवचं वीरो निक्षिप्य च वरायुधम् ।
अवरुह्य रथात्तूर्णं पद्भ्यामेव कृताञ्जलिः ॥ ७
पितामहमभिप्रेक्ष्य धर्मराजो युधिष्ठिरः ।
वाग्यतः प्रययौ येन प्राङ्मुखो रिपुवाहिनीम् ॥ ८
तं प्रयान्तमभिप्रेक्ष्य कुन्तीपुत्रो धनंजयः ।
अवतीर्य रथात्तूर्णं भ्रातृभिः सहितोऽन्वयात् ॥ ९
वासुदेवश्च भगवान्पृष्ठतोऽनुजगाम ह ।
यथामुख्याश्च राजानस्तमन्वाजग्मुरुत्सुकाः ॥ १०

अर्जुन उवाच ।

किं ते व्यवसितं राजन्यदस्मानपहाय वै ।
पद्भ्यामेव प्रयातोऽसि प्राङ्मुखो रिपुवाहिनीम् ॥ ११

भीमसेन उवाच ।

क्व गमिष्यसि राजेन्द्र निक्षिप्तकवचायुधः ।
दंशितेष्वरिसैन्येषु भ्रातॄनुत्सृज्य पार्थिव ॥ १२

नकुल उवाच ।

एवंगते त्वयि ज्येष्ठे मम भ्रातरि भारत ।
भीर्मे दुनोति हृदयं ब्रूहि गन्ता भवान्क नु ॥ १३

सहदेव उवाच ।

अस्मिन्रणसमूहे वै वर्तमाने महाभये ।
योद्धव्ये क्व नु गन्तासि शत्रूनभिमुखो नृप ॥ १४

संजय उवाच ।

एवमाभाष्यमाणोऽपि भ्रातृभिः कुरुनन्दन ।
नोवाच वाग्यतः किंचिद्गच्छत्येव युधिष्ठिरः ॥ १५
तानुवाच महाप्राज्ञो वासुदेवो महामनाः ।
अभिप्रायोऽस्य विज्ञातो मयेति प्रहसन्निव ॥ १६
एष भीष्मं तथा द्रोणं गौतमं शल्यमेव च ।
अनुमान्य गुरून्सर्वान्योत्स्यते पार्थिवोऽरिभिः ॥
श्रूयते हि पुराकल्पे गुरूननुमान्य यः ।
युध्यते स भवेद्व्यक्तमपध्यातो महत्तरैः ॥ १८
अनुमान्य यथाशास्त्रं यस्तु युध्येन्महत्तरैः ।
ध्रुवस्तस्य जयो युद्धे भवेदिति मतिर्मम ॥ १९
एवं ब्रुवति कृष्णे तु धार्तराष्ट्रचमूं प्रति ।
हाहाकारो महानासीन्निःशब्दास्त्वपरेऽभवन् ॥ २०
दृष्ट्वा युधिष्ठिरं दूराद्धार्तराष्ट्रस्य सैनिकाः ।
मिथः संकथयांचक्रुर्नेशोऽस्ति कुलपांसनः ॥ २१
व्यक्तं भीत इवाभ्येति राजासौ भीष्ममन्तिकात् ।
युधिष्ठिरः ससोदर्यः शरणार्थं प्रयाचकः ॥ २२
धनंजये कथं नाथे पाण्डवे च वृकोदरे ।
नकुले सहदेवे च भीतोऽभ्येति च पाण्डवः ॥ २३
न नूनं क्षत्रियकुले जातः संप्रथिते भुवि ।
यथास्य हृदयं भीतमल्पसत्त्वस्य संयुगे ॥ २४
ततस्ते क्षत्रियाः सर्वे प्रशंसन्ति स्म कौरवान् ।
हृष्टाः सुमनसो भूत्वा चैलानि दुधुवुः पृथक् ॥ २५
व्यनिन्दन्त ततः सर्वे योधास्तत्र विशां पते ।
युधिष्ठिरं ससोदर्यं सहितं केशवेन ह ॥ २६
ततस्तत्कौरवं सैन्यं धिक्कृत्वा तु युधिष्ठिरम् ।
निःशब्दमभवत्तूर्णं पुनरेव विशां पते ॥ २७
किं नु वक्ष्यति राजासौ किं भीष्मः प्रतिवक्ष्यति ।
किं भीमः समरश्लाघी किं नु कृष्णार्जुनाविति ॥
विवक्षितं किमस्येति संशयः सुमहानभूत् ।
उभयोः सेनयो राजन्युधिष्ठिरकृते तदा ॥ २९
स विगाह्य चमूं शत्रोः शरशक्तिसमाकुलाम् ।
भीष्ममेवाभ्ययात्तूर्णं भ्रातृभिः परिवारितः ॥ ३०
तमुवाच ततः पादौ कराभ्यां पीड्य पाण्डवः ।
भीष्मं शांतनवं राजा युद्धाय समुपस्थितम् ॥ ३१

युधिष्ठिर उवाच ।

आमन्त्रये त्वां दुर्धर्ष योत्स्ये तात त्वया सह ।
अनुजानीहि मां तात आशिषश्च प्रयोजय ॥ ३२

भीष्म उवाच ।

यद्येवं नाभिगच्छेथा युधि मां पृथिवीपते ।
शपेयं त्वां महाराज पराभावाय भारत ॥ ३३
प्रीतोऽस्मि पुत्र युध्यस्व जयमाप्नुहि पाण्डव ।
यत्तेऽभिलषितं चान्यत्तदवाप्नुहि संयुगे ॥ ३४
व्रियतां च वरः पार्थ किमस्मत्तोऽभिकाङ्क्षसि ।
एवं गते महाराज न तवास्ति पराजयः ॥ ३५
अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ।
इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैः ॥ ३६
अतस्त्वां क्लीबवद्वाक्यं ब्रवीमि कुरुनन्दन ।
हृतोऽस्म्यर्थेन कौरव्य युद्धादन्यत्किमिच्छसि ॥ ३७

युधिष्ठिर उवाच ।

मन्त्रयस्व महाप्राज्ञ हितैषी मम नित्यशः ।

युध्यस्व कौरवस्यार्थे ममैष सततं वरः ॥ ३८

भीष्म उवाच ।

राजन्किमत्र साह्यं ते करोमि कुरुनन्दन ।
कामं योत्स्ये परस्यार्थे ब्रूहि यत्ते विवक्षितम् ॥ ३९

युधिष्ठिर उवाच ।

कथं जयेयं संग्रामे भवन्तमपराजितम् ।
एतन्मे मन्त्रय हितं यदि श्रेयः प्रपश्यसि ॥ ४०

भीष्म उवाच ।

न तं पश्यामि कौन्तेय यो मां युध्यन्तमाहवे ।
विजयेत पुमान्कश्चिदपि साक्षाच्छतक्रतुः ४१

युधिष्ठिर उवाच ।

हन्त पृच्छामि तस्मात्त्वां पितामह नमोऽस्तु ते ।
जयोपायं ब्रवीहि त्वमात्मनः समरे परैः ॥ ४२

भीष्म उवाच ।

न शत्रुं तात पश्यामि समरे यो जयेत माम् ।
न तावन्मृत्युकालो मे पुनरागमनं कुरु ॥ ४३

संजय उवाच ।

ततो युधिष्ठिरो वाक्यं भीष्मस्य कुरुनन्दन ।
शिरसा प्रतिजग्राह भूयस्तमभिवाद्य च ॥ ४४
प्रायात्पुनर्महाबाहुराचार्यस्य रथं प्रति ।
पश्यतां सर्वसैन्यानां मध्येन भ्रातृभिः सह ॥ ४५
स द्रोणमभिवाद्याथ कृत्वा चैव प्रदक्षिणम् ।
उवाच वाचा दुर्धर्षमात्मनिःश्रेयसं वचः ॥ ४६
आमन्त्रये त्वां भगवन्योत्स्ये विगतकल्मषः ।
जयेयं च रिपून्सर्वाननुज्ञातस्त्वया द्विज ॥ ४७

द्रोण उवाच ।

यदि मां नाभिगच्छेथा युद्धाय कृतनिश्चयः ।
शपेयं त्वां महाराज पराभावाय सर्वशः ॥ ४८
तद्युधिष्ठिर तुष्टोऽस्मि पूजितश्च त्वयानघ ।
अनुजानामि युध्यस्व विजयं समवाप्नुहि ॥ ४९
करवाणि च ते कामं ब्रूहि यत्तेऽभिकाङ्क्षितम् ।
एवं गते महाराज युद्धादन्यत्किमिच्छसि ॥ ५०
अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ।
इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैः ॥ ५१
अतस्त्वां क्लीबवद्ब्रूमो युद्धादन्यत्किमिच्छसि ।
योत्स्यामि कौरवस्यार्थे तवाशास्यो जयो मया ॥ ५२

युधिष्ठिर उवाच ।

जयमाशास्व मे ब्रह्मन्मन्त्रयस्व च मद्धितम् ।
युध्यस्व कौरवस्यार्थे वर एष वृतो मया ॥ ५३

द्रोण उवाच ।

ध्रुवस्ते विजयो राजन्यस्य मन्त्री हरिस्तव ।
अहं च त्वाभिजानामि रणे शत्रून्विजेष्यसि ॥ ५४
यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः ।
युध्यस्व गच्छ कौन्तेय पृच्छ मां किं ब्रवीमि ते ॥

युधिष्ठिर उवाच ।

पृच्छामि त्वां द्विजश्रेष्ठ शृणु मे यद्विवक्षितम् ।
कथं जयेयं संग्रामे भवन्तमपराजितम् ॥ ५६

द्रोण उवाच ।

न तेऽस्ति विजयस्तावद्यावद्युध्याम्यहं रणे ।
ममाशु निधने राजन्यतस्व सह सोदरैः ॥ ५७

युधिष्ठिर उवाच ।

हन्त तस्मान्महाबाहो वधोपायं वदात्मनः ।
आचार्य प्रणिपत्यैष पृच्छामि त्वां नमोऽस्तु ते ॥

द्रोण उवाच ।

न शत्रुं तात पश्यामि यो मां हन्याद्रणे स्थितम् ।
युध्यमानं सुसंरब्धं शरवर्षौघवर्षिणम् ॥ ५९
ऋते प्रायगतं राजन्न्यस्तशस्त्रमचेतनम् ।
हन्यान्मां युधि योधानां सत्यमेतद्ब्रवीमि ते ॥ ६०
शस्त्रं चाहं रणे जह्यां श्रुत्वा सुमहदप्रियम् ।
श्रद्धेयवाक्यात्पुरुषादेतत्सत्यं ब्रवीमि ते ॥ ६१

संजय उवाच ।

एतच्छ्रुत्वा महाराज भारद्वाजस्य धीमतः ।
अनुमान्य तमाचार्यं प्रायाच्छारद्वतं प्रति ॥ ६२
सोऽभिवाद्य कृपं राजा कृत्वा चापि प्रदक्षिणम् ।
उवाच दुर्धर्षतमं वाक्यं वाक्यविशारदः ॥ ६३
अनुमानये त्वां योत्स्यामि गुरो विगतकल्मषः ।
जयेयं च रिपून्सर्वाननुज्ञातस्त्वयानघ ॥ ६४

कृप उवाच ।

यदि मां नाभिगच्छेथा युद्धाय कृतनिश्चयः ।
शपेयं त्वां महाराज पराभावाय सर्वशः ॥ ६५
अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ।
इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैः ॥ ६६
तेषामर्थे महाराज योद्धव्यमिति मे मतिः ।
अतस्त्वां क्लीबवद्ब्रूमि युद्धादन्यत्किमिच्छसि ॥ ६७

युधिष्ठिर उवाच ।

हन्त पृच्छामि ते तस्मादाचार्य शृणु मे वचः ॥ ६८

संजय उवाच ।

इत्युक्त्वा व्यथितो राजा नोवाच गतचेतनः ।
तं गौतमः प्रत्युवाच विज्ञायास्य विवक्षितम् ।
अवध्योऽहं महीपाल युध्यस्व जयमाप्नुहि ॥ ६९
प्रीतस्त्वभिगमेनाहं जयं तव नराधिप ।
आशासिष्ये सदोत्थाय सत्यमेतद्ब्रवीमि ते ॥ ७०
एतच्छ्रुत्वा महाराज गौतमस्य वचस्तदा ।
अनुमान्य कृपं राजा प्रययौ येन मद्रराट् ॥ ७१
स शल्यमभिवाद्याथ कृत्वा चाभिप्रदक्षिणम् ।
उवाच राजा दुर्धर्षमात्मनिःश्रेयसं वचः ॥ ७२
अनुमानये त्वां योत्स्यामि गुरो विगतकल्मषः ।
जयेयं च महाराज अनुज्ञातस्त्वया रिपून् ॥ ७३

शल्य उवाच ।

यदि मां नाभिगच्छेथा युद्धाय कृतनिश्चयः ।
शपेयं त्वां महाराज पराभावाय वै रणे ॥ ७४
तुष्टोऽस्मि पूजितश्चास्मि यत्काङ्क्षसि तदस्तु ते ।
अनुजानामि चैव त्वां युध्यस्व जयमाप्नुहि ॥ ७५
ब्रूहि चैव परं वीर केनार्थः किं ददामि ते ।
एवं गते महाराज युद्धादन्यत्किमिच्छसि ॥ ७६
अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ।
इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैः ॥ ७७
करिष्यामि हि ते कामं भागिनेय यथेप्सितम् ।
ब्रवीम्यतः क्लीबवत्त्वां युद्धादन्यत्किमिच्छसि ॥७८

युधिष्ठिर उवाच ।

मन्त्रयस्व महाराज नित्यं मद्धितमुत्तमम् ।
कामं युध्य परस्यार्थे वरमेतद्वृणोम्यहम् ॥ ७९

शल्य उवाच ।

ब्रूहि किमत्र साह्यं ते करोमि नृपसत्तम ।
कामं योत्स्ये परस्यार्थे वृतोऽस्म्यर्थेन कौरवैः ॥ ८०

युधिष्ठिर उवाच ।

स एव मे वरः सत्य उद्योगे यस्त्वया कृतः ।
सूतपुत्रस्य संग्रामे कार्यस्तेजोवधस्त्वया ॥ ८१

शल्य उवाच ।

संपत्स्यत्येष ते कामः कुन्तीपुत्र यथेप्सितः ।
गच्छ युध्यस्व विस्रब्धं प्रतिजाने जयं तव ॥ ८२

संजय उवाच ।

अनुमान्याथ कौन्तेयो मातुलं मद्रकेश्वरम् ।
निर्जगाम महासैन्याद्भ्रातृभिः परिवारितः ॥ ८३
वासुदेवस्तु राधेयमाहवेऽभिजगाम वै ।
तत एनमुवाचेदं पाण्डवार्थे गदाग्रजः ॥ ८४
श्रुतं मे कर्ण भीष्मस्य द्वेषात्किल न योत्स्यसि ।
अस्मान्वरय राधेय यावद्भीष्मो न हन्यते ॥ ८५
हते तु भीष्मे राधेय पुनरेष्यसि संयुगे ।
धार्तराष्ट्रस्य साहाय्यं यदि पश्यसि चेत्समम् ॥ ८६

कर्ण उवाच ।

न विप्रियं करिष्यामि धार्तराष्ट्रस्य केशव ।
त्यक्तप्राणं हि मां विद्धि दुर्योधनहितैषिणम् ॥ ८७

संजय उवाच ।

तच्छ्रुत्वा वचनं कृष्णः संन्यवर्तत भारत ।
युधिष्ठिरपुरोगैश्च पाण्डवैः सह संगतः ॥ ८८
अथ सैन्यस्य मध्ये तु प्राक्रोशत्पाण्डवाग्रजः ।
योऽस्मान्वृणोति तमहं वरये साह्यकारणात् ॥ ८९
अथ तान्समभिप्रेक्ष्य युयुत्सुरिदमब्रवीत् ।
प्रीतात्मा धर्मराजानं कुन्तीपुत्रं युधिष्ठिरम् ॥ ९०
अहं योत्स्यामि मिषतः संयुगे धार्तराष्ट्रजान् ।
युष्मदर्थे महाराज यदि मां वृणुषेऽनघ ॥ ९१

युधिष्ठिर उवाच ।

एह्येहि सर्वे योत्स्यामस्तव भ्रातॄनपण्डितान् ।
युयुत्सो वासुदेवश्च वयं च ब्रूम सर्वशः ॥ ९२
वृणोमि त्वां महाबाहो युध्यस्व मम कारणात् ।
त्वयि पिण्डश्च तन्तुश्च धृतराष्ट्रस्य दृश्यते ॥ ९३
भजस्वास्मान्राजपुत्र भजमानान्महाद्युते ।
न भविष्यति दुर्बुद्धिर्धार्तराष्ट्रोऽत्यमर्षणः ॥ ९४

संजय उवाच ।

ततो युयुत्सुः कौरव्यः परित्यज्य सुतांस्तव ।
जगाम पाण्डुपुत्राणां सेनां विश्राव्य दुन्दुभिम् ॥ ९५
ततो युधिष्ठिरो राजा संप्रहृष्टः सहानुजैः ।
जग्राह कवचं भूयो दीप्तिमत्कनकोज्ज्वलम् ॥ ९६
प्रत्यपद्यन्त ते सर्वे रथान्स्वान्पुरुषर्षभाः ।
ततो व्यूहं यथापूर्वं प्रत्यव्यूहन्त ते पुनः ॥ ९७
अवादयन्दुन्दुभींश्च शतशश्चैव पुष्करान् ।
सिंहनादांश्च विविधान्विनेदुः पुरुषर्षभाः ॥ ९८
रथस्थान्पुरुषव्याघ्रान्पाण्डवान्प्रेक्ष्य पार्थिवाः ।
धृष्टद्युम्नादयः सर्वे पुनर्जहृषिरे मुदा ॥ ९९
गौरवं पाण्डुपुत्राणां मान्यान्मानयतां च तान् ।
दृष्ट्वा महीक्षितस्तत्र पूजयांचक्रिरे भृशम् ॥ १००
सौहृदं च कृपां चैव प्राप्तकालं महात्मनाम् ।
दयां च ज्ञातिषु परां कथयांचक्रिरे नृपाः ॥ १०१
साधु साध्विति सर्वत्र निश्चेरुः स्तुतिसंहिताः ।
वाचः पुण्याः कीर्तिमतां मनोहृदयहर्षिणीः ॥ १०२
म्लेच्छाश्चार्याश्च ये तत्र ददृशुः शुश्रुवुस्तदा ।
वृत्तं तत्पाण्डुपुत्राणां रुरुदुस्ते सगद्गदाः ॥ १०३
ततो जघ्नुर्महाभेरीः शतशश्चैव पुष्करान् ।
शङ्खांश्च गोक्षीरनिभान्दध्मुर्हृष्टा मनस्विनः ॥ १०४

इति श्रीमहाभारते भीष्मपर्वणि
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

४२

धृतराष्ट्र उवाच ।

एवं व्यूढेष्वनीकेषु मामकेष्वितरेषु च ।
के पूर्वं प्राहरंस्तत्र कुरवः पाण्डवास्तथा ॥ १

संजय उवाच ।

भ्रातृभिः सहितो राजन्पुत्रो दुर्योधनस्तव ।
भीष्मं प्रमुखतः कृत्वा प्रययौ सह सेनया ॥ २
तथैव पाण्डवाः सर्वे भीमसेनपुरोगमाः ।
भीष्मेण युद्धमिच्छन्तः प्रययुर्हृष्टमानसाः ॥ ३
क्ष्वेडाः किलकिलाशब्दाः क्रकचा गोविषाणिकाः ।
भेरीमृदङ्गमुरजा हयकुञ्जरनिस्वनाः ॥ ४
उभयोः सेनयो राजंस्ततस्तेऽस्मान्समाद्रवन् ।
वयं प्रतिनदन्तश्च तदासीत्तुमुलं महत् ॥ ५

महान्त्यनीकानि महासमुच्छ्रये
समागमे पाण्डवधार्तराष्ट्रयोः ।
चकम्पिरे शङ्खमृदङ्गनिस्वनैः
प्रकम्पितानीव वनानि वायुना ॥ ६
नरेन्द्रनागाश्वरथाकुलाना-

मभ्यायतीनामशिवे मुहूर्ते ।
बभूव घोषस्तुमुलश्चमूनां
वातोद्धुतानामिव सागराणाम् ॥ ७
तस्मिन्समुत्थिते शब्दे तुमुले लोमहर्षणे ।
भीमसेनो महाबाहुः प्राणदद्गोवृषो यथा ॥ ८
शङ्खदुन्दुभिनिर्घोषं वारणानां च बृंहितम् ।
सिंहनादं च सैन्यानां भीमसेनरवोऽभ्यभूत् ॥ ९
हयानां हेषमाणानामनीकेषु सहस्रशः ।
सर्वानभ्यभवच्छब्दान्भीमसेनस्य निस्वनः ॥ १०
तं श्रुत्वा निनदं तस्य सैन्यास्तव वितत्रसुः ।
जीमूतस्येव नदतः शक्राशनिसमस्वनम् ॥ ११
वाहनानि च सर्वाणि शकृन्मूत्रं प्रसुस्रुवुः ।
शब्देन तस्य वीरस्य सिंहस्येवेतरे मृगाः ॥ १२
दर्शयन्घोरमात्मानं महाभ्रमिव नादयन् ।
विभीषयंस्तव सुतांस्तव सेनां समभ्ययात् ॥ १३
तमायान्तं महेष्वासं सोदर्याः पर्यवारयन् ।
छादयन्तः शरव्रातैर्मेघा इव दिवाकरम् ॥ १४
दुर्योधनश्च पुत्रस्ते दुर्मुखो दुःसहः शलः ।
दुःशासनश्चातिरथस्तथा दुर्मर्षणो नृप ॥ १५
विविंशतिश्चित्रसेनो विकर्णश्च महारथः ।
पुरुमित्रो जयो भोजः सौमदत्तिश्च वीर्यवान् ॥ १६
महाचापानि धुन्वन्तो जलदा इव विद्युतः ।
आददानाश्च नाराचान्निर्मुक्ताशीविषोपमान् ॥ १७
अथ तान्द्रौपदीपुत्राः सौभद्रश्च महारथः ।
नकुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः ॥ १८
धार्तराष्ट्रान्प्रतिययुरर्दयन्तः शितैः शरैः ।
वज्रैरिव महावेगैः शिखराणि धराभृताम् ॥ १९
तस्मिन्प्रथमसंमर्दे भीमज्यातलनिस्वने ।
तावकानां परेषां च नासीत्कश्चित्पराङ्मुखः ॥ २०
लाघवं द्रोणशिष्याणामपश्यं भरतर्षभ ।
निमित्तवेधिनां राजञ्शरानुत्सृजतां भृशम् ॥ २१
नोपशाम्यति निर्घोषो धनुषां कूजतां तथा ।
विनिश्चेरुः शरा दीप्ता ज्योतींषीव नभस्तलात् ॥ २२
सर्वे त्वन्ये महीपालाः प्रेक्षका इव भारत ।
ददृशुर्दर्शनीयं तं भीमं ज्ञातिसमागमम् ॥ २३
ततस्ते जातसंरम्भाः परस्परकृतागसः ।
अन्योन्यस्पर्धया राजन्व्यायच्छन्त महारथाः ॥ २४
कुरुपाण्डवसेने ते हस्त्यश्वरथसंकुले ।
शुशुभाते रणेऽतीव पटे चित्रगते इव ॥ २५
ततस्ते पार्थिवाः सर्वे प्रगृहीतशरासनाः ।
सहसैन्याः समापेतुः पुत्रस्य तव शासनात् ॥ २६
युधिष्ठिरेण चादिष्टाः पार्थिवास्ते सहस्रशः ।
विनदन्तः समापेतुः पुत्रस्य तव वाहिनीम् ॥ २७
उभयोः सेनयोस्तीव्रः सैन्यानां स समागमः ।
अन्तर्धीयत चादित्यः सैन्येन रजसावृतः ॥ २८
प्रयुद्धानां प्रभग्नानां पुनरावर्ततामपि ।
नात्र स्वेषां परेषां वा विशेषः समजायत ॥ २९
तस्मिंस्तु तुमुले युद्धे वर्तमाने महाभये ।
अति सर्वाण्यनीकानि पिता तेऽभिव्यरोचत ॥ ३०

इति श्रीमहाभारते भीष्मपर्वणि
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

४३

संजय उवाच ।

पूर्वाह्णे तस्य रौद्रस्य युद्धमह्नो विशां पते ।
प्रावर्तत महाघोरं राज्ञां देहावकर्तनम् ॥ १
कुरूणां पाण्डवानां च संग्रामे विजिगीषताम् ।
सिंहानामिव संह्रादो दिवमुर्वीं च नादयन् ॥ २
आसीत्किलकिलाशब्दस्तलशङ्खरवैः सह ।
जज्ञिरे सिंहनादाश्च शूराणां प्रतिगर्जताम् ॥ ३
तलत्राभिहताश्चैव ज्याशब्दा भरतर्षभ ।

पत्तीनां पादशब्दाश्च वाजिनां च महास्वनाः ॥ ४
तोत्राङ्कुशनिपाताश्च आयुधानां च निस्वनाः ।
घण्टाशब्दाश्च नागानामन्योन्यमभिधावताम् ॥ ५
तस्मिन्समुदिते शब्दे तुमुले लोमहर्षणे ।
बभूव रथनिर्घोषः पर्जन्यनिनदोपमः ॥ ६
ते मनः क्रूरमाधाय समभित्यक्तजीविताः ।
पाण्डवानभ्यवर्तन्त सर्व एवोच्छ्रितध्वजाः ॥ ७
स्वयं शांतनवो राजन्नभ्यधावद्धनंजयम् ।
प्रगृह्य कार्मुकं घोरं कालदण्डोपमं रणे ॥ ८
अर्जुनोऽपि धनुर्गृह्य गाण्डीवं लोकविश्रुतम् ।
अभ्यधावत तेजस्वी गाङ्गेयं रणमूर्धनि ॥ ९
तावुभौ कुरुशार्दूलौ परस्परवधैषिणौ ।
गाङ्गेयस्तु रणे पार्थं विद्ध्वा नाकम्पयद्बली ।
तथैव पाण्डवो राजन्भीष्मं नाकम्पयद्युधि ॥ १०
सात्यकिश्च महेष्वासः कृतवर्माणमभ्ययात् ।
तयोः समभवद्युद्धं तुमुलं लोमहर्षणम् ॥ ११
सात्यकिः कृतवर्माणं कृतवर्मा च सात्यकिम् ।
आनर्छतुः शरैर्घोरैस्तक्षमाणौ परस्परम् ॥ १२
तौ शराचितसर्वाङ्गौ शुशुभाते महाबलौ ।
वसन्ते पुष्पशबलौ पुष्पिताविव किंशुकौ ॥ १३
अभिमन्युर्महेष्वासो बृहद्बलमयोधयत् ।
ततः कोसलको राजा सौभद्रस्य विशां पते ।
ध्वजं चिच्छेद समरे सारथिं च न्यपातयत् ॥ १४
सौभद्रस्तु ततः क्रुद्धः पातिते रथसारथौ ।
बृहद्बलं महाराज विव्याध नवभिः शरैः ॥ १५
अथापराभ्यां भल्लाभ्यां पीताभ्यामरिमर्दनः ।
ध्वजमेकेन चिच्छेद पार्ष्णिमेकेन सारथिम् ।
अन्योन्यं च शरैस्तीक्ष्णैः क्रुद्धौ राजंस्ततक्षतुः ॥ १६
मानिनं समरे दृप्तं कृतवैरं महारथम् ।
भीमसेनस्तव सुतं दुर्योधनमयोधयत् ॥ १७
तावुभौ नरशार्दूलौ कुरुमुख्यौ महाबलौ ।
अन्योन्यं शरवर्षाभ्यां ववृषाते रणाजिरे ॥ १८
तौ तु वीक्ष्य महात्मानौ कृतिनौ चित्रयोधिनौ ।
विस्मयः सर्वभूतानां समपद्यत भारत ॥ १९
दुःशासनस्तु नकुलं प्रत्युद्याय महारथम् ।
अविध्यन्निशितैर्बाणैर्बहुभिर्मर्मभेदिभिः ॥ २०
तस्य माद्रीसुतः केतुं सशरं च शरासनम् ।
चिच्छेद निशितैर्बाणैः प्रहसन्निव भारत ।
अथैनं पञ्चविंशत्या क्षुद्रकाणां समार्दयत् ॥ २१
पुत्रस्तु तव दुर्धर्षो नकुलस्य महाहवे ।
युगेषां चिच्छिदे बाणैर्ध्वजं चैव न्यपातयत् ॥ २२
दुर्मुखः सहदेवं तु प्रत्युद्याय महाबलम् ।
विव्याध शरवर्षेण यतमानं महाहवे ॥ २३
सहदेवस्ततो वीरो दुर्मुखस्य महाहवे ।
शरेण भृशतीक्ष्णेन पातयामास सारथिम् ॥ २४
तावन्योन्यं समासाद्य समरे युद्धदुर्मदौ ।
त्रासयेतां शरैर्घोरैः कृतप्रतिकृतैषिणौ ॥ २५
युधिष्ठिरः स्वयं राजा मद्रराजानमभ्ययात् ।
तस्य मद्राधिपश्चापं द्विधा चिच्छेद मारिष ॥ २६
तदपास्य धनुश्छिन्नं कुन्तीपुत्रो युधिष्ठिरः ।
अन्यत्कार्मुकमादाय वेगवद्बलवत्तरम् ॥ २७
ततो मद्रेश्वरं राजा शरैः संनतपर्वभिः ।
छादयामास संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ २८
धृष्टद्युम्नस्ततो द्रोणमभ्यद्रवत भारत ।
तस्य द्रोणः सुसंक्रुद्धः परासुकरणं दृढम् ।
त्रिधा चिच्छेद समरे यतमानस्य कार्मुकम् ॥ २९
शरं चैव महाघोरं कालदण्डमिवापरम् ।
प्रेषयामास समरे सोऽस्य काये न्यमज्जत ॥ ३०
अथान्यद्धनुरादाय सायकांश्च चतुर्दश ।
द्रोणं द्रुपदपुत्रस्तु प्रतिविव्याध संयुगे ।

तावन्योन्यं सुसंक्रुद्धौ चक्रतुः सुभृशं रणम् ॥ ३१
सौमदत्तिं रणे शङ्खो रभसं रभसो युधि ।
प्रत्युद्ययौ महाराज तिष्ठ तिष्ठेति चाब्रवीत् ॥ ३२
तस्य वै दक्षिणं वीरो निर्बिभेद रणे भुजम् ।
सौमदत्तिस्तथा शङ्खं जत्रुदेशे समाहनत् ॥ ३३
तयोः समभवद्युद्धं घोररूपं विशां पते ।
दृप्तयोः समरे तूर्णं वृत्रवासवयोरिव ॥ ३४
बाह्लीकं तु रणे क्रुद्धं क्रुद्धरूपो विशां पते ।
अभ्यद्रवदमेयात्मा धृष्टकेतुर्महारथः ॥ ३५
बाह्लीकस्तु ततो राजन्धृष्टकेतुममर्षणम् ।
शरैर्बहुभिरानर्छत्सिंहनादमथानदत् ॥ ३६
चेदिराजस्तु संक्रुद्धो बाह्लीकं नवभिः शरैः ।
विव्याध समरे तूर्णं मत्तो मत्तमिव द्विपम् ॥ ३७
तौ तत्र समरे क्रुद्धौ नर्दन्तौ च मुहुर्मुहुः ।
समीयतुः सुसंक्रुद्धावङ्गारकबुधाविव ॥ ३८
राक्षसं क्रूरकर्माणं क्रूरकर्मा घटोत्कचः ।
अलम्बुसं प्रत्युदियाद्बलं शक्र इवाहवे ॥ ३९
घटोत्कचस्तु संक्रुद्धो राक्षसं तं महाबलम् ।
नवत्या सायकैस्तीक्ष्णैर्दारयामास भारत ॥ ४०
अलम्बुसस्तु समरे भैमसेनिं महाबलम् ।
बहुधा वारयामास शरैः संनतपर्वभिः ॥ ४१
व्यभ्राजेतां ततस्तौ तु संयुगे शरविक्षतौ ।
यथा देवासुरे युद्धे बलशक्रौ महाबलौ ॥ ४२
शिखण्डी समरे राजन्द्रौणिमभ्युद्ययौ बली ।
अश्वत्थामा ततः क्रुद्धः शिखण्डिनमवस्थितम् ॥४३
नाराचेन सुतीक्ष्णेन भृशं विद्ध्वा व्यकम्पयत् ।
शिखण्ड्यपि ततो राजन्द्रोणपुत्रमताडयत् ॥ ४४
सायकेन सुपीतेन तीक्ष्णेन निशितेन च ।
तौ जघ्नतुस्तदान्योन्यं शरैर्बहुविधैर्मृधे ॥ ४५
भगदत्तं रणे शूरं विराटो वाहिनीपतिः ।
अभ्ययात्त्वरितो राजंस्ततो युद्धमवर्तत ॥ ४६
विराटो भगदत्तेन शरवर्षेण ताडितः ।
अभ्यवर्षत्सुसंक्रुद्धो मेघो वृष्ट्या इवाचलम् ॥ ४७
भगदत्तस्ततस्तूर्णं विराटं पृथिवीपतिम् ।
छादयामास समरे मेघः सूर्यमिवोदितम् ॥ ४८
बृहत्क्षत्रं तु कैकेयं कृपः शारद्वतो ययौ ।
तं कृपः शरवर्षेण छादयामास भारत ॥ ४९
गौतमं केकयः क्रुद्धः शरवृष्ट्याभ्यपूरयत् ।
तावन्योन्यं हयान्हत्वा धनुषी विनिकृत्य वै ॥ ५०
विरथावसियुद्धाय समीयतुरमर्षणौ ।
तयोस्तदभवद्युद्धं घोररूपं सुदारुणम् ॥ ५१
द्रुपदस्तु ततो राजा सैन्धवं वै जयद्रथम् ।
अभ्युद्ययौ संप्रहृष्टो हृष्टरूपं परंतप ॥ ५२
ततः सैन्धवको राजा द्रुपदं विशिखैस्त्रिभिः ।
ताडयामास समरे स च तं प्रत्यविध्यत ॥ ५३
तयोः समभवद्युद्धं घोररूपं सुदारुणम् ।
ईक्षितृप्रीतिजननं शुक्राङ्गारकयोरिव ॥ ५४
विकर्णस्तु सुतस्तुभ्यं सुतसोमं महाबलम् ।
अभ्ययाज्जवनैरश्वैस्ततो युद्धमवर्तत ॥ ५५
विकर्णः सुतसोमं तु विद्ध्वा नाकम्पयच्छरैः ।
सुतसोमो विकर्णं च तदद्भुतमिवाभवत् ॥ ५६
सुशर्माणं नरव्याघ्रं चेकितानो महारथः ।
अभ्यद्रवत्सुसंक्रुद्धः पाण्डवार्थे पराक्रमी ॥ ५७
सुशर्मा तु महाराज चेकितानं महारथम् ।
महता शरवर्षेण वारयामास संयुगे ॥ ५८
चेकितानोऽपि संरब्धः सुशर्माणं महाहवे ।
प्राच्छादयत्तमिषुभिर्महामेघ इवाचलम् ॥ ५९
शकुनिः प्रतिविन्ध्यं तु पराक्रान्तं पराक्रमी ।
अभ्यद्रवत राजेन्द्र मत्तो मत्तमिव द्विपम् ॥ ६०
यौधिष्ठिरस्तु संक्रुद्धः सौबलं निशितैः शरैः ।

व्यदारयत संग्रामे मघवानिव दानवम् ।। ६१
शकुनिः प्रतिविन्ध्यं तु प्रतिविध्यन्तमाहवे ।
व्यदारयन्महाप्राज्ञः शरैः संनतपर्वभिः ।। ६२
सुदक्षिणं तु राजेन्द्र काम्बोजानां महारथम् ।
श्रुतकर्मा पराक्रान्तमभ्यद्रवत संयुगे ।। ६३
सुदक्षिणस्तु समरे साहदेविं महारथम् ।
विद्ध्वा नाकम्पयत वै मैनाकमिव पर्वतम् ।। ६४
श्रुतकर्मा ततः क्रुद्धः काम्बोजानां महारथम् ।
शरैर्बहुभिरानर्छद्दारयन्निव सर्वशः ।। ६५
इरावानथ संक्रुद्धः श्रुतायुषममर्षणम् ।
प्रत्युद्ययौ रणे यत्तो यत्तरूपतरं ततः ।। ६६
आर्जुनिस्तस्य समरे हयान्हत्वा महारथः ।
ननाद सुमहन्नादं तत्सैन्यं प्रत्यपूरयत् ।। ६७
श्रुतायुस्त्वथ संक्रुद्धः फाल्गुनेः समरे हयान् ।
निजघान गदाग्रेण ततो युद्धमवर्तत ।। ६८
विन्दानुविन्दावावन्त्यौ कुन्तिभोजं महारथम् ।
ससेनं ससुतं वीरं संससज्जतुराहवे ।। ६९
तत्राद्भुतमपश्याम आवन्त्यानां पराक्रमम् ।
यद्युध्यन्स्थिरा भूत्वा महत्या सेनया सह ।। ७०
अनुविन्दस्तु गदया कुन्तिभोजमताडयत् ।
कुन्तिभोजस्ततस्तूर्णं शरव्रातैरवाकिरत् ।। ७१
कुन्तिभोजसुतश्चापि विन्दं विव्याध सायकैः ।
स च तं प्रतिविव्याध तदद्भुतमिवाभवत् ।। ७२
केकया भ्रातरः पञ्च गान्धारान्पञ्च मारिष ।
ससैन्यास्ते ससैन्यांश्च योधयामासुराहवे ।। ७३
वीरबाहुश्च ते पुत्रो वैराटिं रथसत्तमम् ।
उत्तरं योधयामास विव्याध निशितैः शरैः ।
उत्तरश्चापि तं धीरं विव्याध निशितैः शरैः ।। ७४
चेदिराट् समरे राजन्नुलूकं समभिद्रवत् ।
उलूकश्चापि तं बाणैर्निशितैर्लोमवाहिभिः ।। ७५
तयोर्युद्धं समभवद्घोररूपं विशां पते ।
दारयेतां सुसंक्रुद्धावन्योन्यमपराजितौ ।। ७६
एवं द्वंद्वसहस्राणि रथवारणवाजिनाम् ।
पदातीनां च समरे तव तेषां च संकुलम् ।। ७७
मुहूर्तमिव तद्युद्धमासीन्मधुरदर्शनम् ।
तत उन्मत्तवद्राजन्न प्राज्ञायत किंचन ।। ७८
गजो गजेन समरे रथी च रथिनं ययौ ।
अश्वोऽश्वं समभिप्रेत्य पदातिश्च पदातिनम् ।। ७९
ततो युद्धं सुदुर्धर्षं व्याकुलं समपद्यत ।
शूराणां समरे तत्र समासाद्य परस्परम् ।। ८०
तत्र देवर्षयः सिद्धाश्चारणाश्च समागताः ।
प्रैक्षन्त तद्रणं घोरं देवासुररणोपमम् ।। ८१
ततो दन्तिसहस्राणि रथानां चापि मारिष ।
अश्वौघाः पुरुषौघाश्च विपरीतं समाययुः ।। ८२
तत्र तत्रैव दृश्यन्ते रथवारणपत्तयः ।
सादिनश्च नरव्याघ्र युध्यमाना मुहुर्मुहुः ।। ८३

इति श्रीमहाभारते भीष्मपर्वणि
त्रिचत्वारिंशोऽध्यायः ।। ४३ ।।

४४

संजय उवाच ।

राजञ्शतसहस्राणि तत्र तत्र तदा तदा ।
निर्मर्यादं प्रयुद्धानि तत्ते वक्ष्यामि भारत ।। १
न पुत्रः पितरं जज्ञे न पिता पुत्रमौरसम् ।
न भ्राता भ्रातरं तत्र स्वस्रीयं न च मातुलः ।। २
मातुलं न च स्वस्रीयो न सखायं सखा तथा ।
आविष्टा इव युध्यन्ते पाण्डवाः कुरुभिः सह ।। ३
रथानीकं नरव्याघ्राः केचिदभ्यपतन्रथैः ।
अभज्यन्त युगैरेव युगानि भरतर्षभ ।। ४
रथेषाश्च रथेषाभिः कूबरा रथकूबरैः ।
संहताः संहतैः केचित्परस्परजिघांसवः ।। ५

न शेकुश्चलितुं केचित्संनिपत्य रथा रथैः ।
प्रभिन्नास्तु महाकायाः संनिपत्य गजा गजैः ॥ ६
बहुधादारयन्क्रुद्धा विषाणैरितरेतरम् ।
सतोमरपताकैश्च वारणाः परवारणैः ॥ ७
अभिसृत्य महाराज वेगवद्भिर्महागजैः ।
दन्तैरभिहतास्तत्र चुक्रुशुः परमातुराः ॥ ८
अभिनीताश्च शिक्षाभिस्तोत्राङ्कुशसमाहताः ।
सुप्रभिन्नाः प्रभिन्नानां संमुखाभिमुखा ययुः ॥ ९
प्रभिन्नैरपि संसक्ताः केचित्तत्र महागजाः ।
क्रौञ्चवन्निनदं मुक्त्वा प्राद्रवन्त ततस्ततः ॥ १०
सम्यक्प्रणीता नागाश्च प्रभिन्नकरटामुखाः ।
ऋष्टितोमरनाराचैर्निर्विद्धा वरवारणाः ॥ ११
विनेदुर्भिन्नमर्माणो निपेतुश्च गतासवः ।
प्राद्रवन्त दिशः केचिन्नदन्तो भैरवान्रवान् ॥ १२
गजानां पादरक्षास्तु व्यूढोरस्काः प्रहारिणः ।
ऋष्टिभिश्च धनुर्भिश्च विमलैश्च परश्वधैः ॥ १३
गदाभिर्मुसलैश्चैव भिण्डिपालैः सतोमरैः ।
आयसैः परिघैश्चैव निस्त्रिंशैर्विमलैः शितैः ॥ १४
प्रगृहीतैः सुसंरब्धा धावमानास्ततस्ततः ।
व्यदृश्यन्त महाराज परस्परजिघांसवः ॥ १५
राजमानाश्च निस्त्रिंशाः संसिक्ता नरशोणितैः ।
प्रत्यदृश्यन्त शूराणामन्योन्यमभिधावताम् ॥ १६
अवक्षिप्तावधूतानामसीनां वीरबाहुभिः ।
संजज्ञे तुमुलः शब्दः पततां परमर्मसु ॥ १७
गदामुसलरुग्णानां भिन्नानां च वरासिभिः ।
दन्तिदन्तावभिन्नानां मृदितानां च दन्तिभिः ॥ १८
तत्र तत्र नरौघाणां क्रोशतामितरेतरम् ।
शुश्रुवुर्दारुणा वाचः प्रेतानामिव भारत ॥ १९
हयैरपि हयारोहाश्चामरापीडधारिभिः ।
हंसैरिव महावेगैरन्योन्यमभिदुद्रुवुः ॥ २०
तैर्विमुक्ता महाप्रासा जाम्बूनदविभूषणाः ।
आशुगा विमलास्तीक्ष्णाः संपेतुर्भुजगोपमाः ॥ २१
अश्वैरग्र्यजवैः केचिदाप्लुत्य महतो रथान् ।
शिरांस्याददिरे वीरा रथिनामश्वसादिनः ॥ २२
बहूनपि हयारोहान्भल्लैः संनतपर्वभिः ।
रथी जघान संप्राप्य बाणगोचरमागतान् ॥ २३
नगमेघप्रतीकाशाश्चाक्षिप्य तुरगान्गजाः ।
पादैरेवावमृद्नन्त मत्ताः कनकभूषणाः ॥ २४
पाट्यमानेषु कुम्भेषु पार्श्वेष्वपि च वारणाः ।
प्रासैर्विनिहताः केचिद्विनेदुः परमातुराः ॥ २५
साश्वारोहान्हयान्केचिदुन्मथ्य वरवारणाः ।
सहसा चिक्षिपुस्तत्र संकुले भैरवे सति ॥ २६
साश्वारोहान्विषाणाग्रैरुत्क्षिप्य तुरगान्द्विपाः ।
रथौघानवमृद्नन्तः सध्वजान्परिचक्रमुः ॥ २७
पुंस्त्वादभिमदत्वाच्च केचिदत्र महागजाः ।
साश्वारोहान्हयाञ्जघ्नुः करैः सचरणैस्तथा ॥ २८
केचिदाक्षिप्य करिणः साश्वानपि रथान्करैः ।
विकर्षन्तो दिशः सर्वाः समीयुः सर्वशब्दगाः ॥
आशुगा विमलास्तीक्ष्णाः संपेतुर्भुजगोपमाः ।
नराश्वकायान्निर्भिद्य लौहानि कवचानि च ॥ ३०
निपेतुर्विमलाः शक्त्यो वीरबाहुभिरर्पिताः ।
महोल्काप्रतिमा घोरास्तत्र तत्र विशां पते ॥ ३१
द्वीपिचर्मावनद्धैश्च व्याघ्रचर्मशयैरपि ।
विकोशैर्विमलैः खड्गैरभिजघ्नुः परान्रणे ॥ ३२
अभिप्लुतमभिक्रुद्धमेकपार्श्वावदारितम् ।
विदर्शयन्तः संपेतुः खड्गचर्मपरश्वधैः ॥ ३३
शक्तिभिर्दारिताः केचित्संछिन्नाश्च परश्वधैः ।
हस्तिभिर्मृदिताः केचित्क्षुण्णाश्चान्ये तुरंगमैः ॥ ३४
रथनेमिनिकृत्ताश्च निकृत्ता निशितैः शरैः ।
विक्रोशन्ति नरा राजंस्तत्र तत्र सबान्धवान् ॥३५

पुत्रानन्ये पितॄनन्ये भ्रातॄंश्च सह बान्धवैः ।
मातुलान्भागिनेयांश्च परानपि च संयुगे ॥ ३६
विकीर्णान्त्राः सुबहवो भग्नसक्थाश्च भारत ।
बाहुभिः सुभुजाच्छिन्नैः पार्श्वेषु च विदारिताः ।
क्रन्दन्तः समदृश्यन्त तृषिता जीवितेप्सवः ॥ ३७
तृष्णापरिगताः केचिदल्पसत्त्वा विशां पते ।
भूमौ निपतिताः संख्ये जलमेव ययाचिरे ॥ ३८
रुधिरौघपरिक्लिन्नाः क्लिश्यमानाश्च भारत ।
व्यनिन्दन्भृशमात्मानं तव पुत्रांश्च संगतान् ॥ ३९
अपरे क्षत्रियाः शूराः कृतवैराः परस्परम् ।
नैव शस्त्रं विमुञ्चन्ति नैव क्रन्दन्ति मारिष ।
तर्जयन्ति च संहृष्टास्तत्र तत्र परस्परम् ॥ ४०
निर्दश्य दशनैश्चापि क्रोधात्स्वदशनच्छदान् ।
भ्रुकुटीकुटिलैर्वक्त्रैः प्रेक्षन्ते च परस्परम् ॥ ४१
अपरे क्लिश्यमानास्तु व्रणार्ताः शरपीडिताः ।
निष्कूजाः समपद्यन्त दृढसत्त्वा महाबलाः ॥ ४२
अन्ये तु विरथाः शूरा रथमन्यस्य संयुगे ।
प्रार्थयाना निपतिताः संक्षुण्णा वरवारणैः ।
अशोभन्त महाराज पुष्पिता इव किंशुकाः ॥ ४३
संबभूवुरनीकेषु बहवो भैरवस्वनाः ।
वर्तमाने महाभीमे तस्मिन्वीरवरक्षये ॥ ४४
अहनत्तु पिता पुत्रं पुत्रश्च पितरं रणे ।
स्वस्रीयो मातुलं चापि स्वस्रीयं चापि मातुलः ॥४५
सखायं च सखा राजन्संबन्धी बान्धवं तथा ।
एवं युयुधिरे तत्र कुरवः पाण्डवैः सह ॥ ४६
वर्तमाने भये तस्मिन्निर्मर्यादे महाहवे ।
भीष्ममासाद्य पार्थानां वाहिनी समकम्पत ॥ ४७
केतुना पञ्चतारेण तालेन भरतर्षभ ।
राजतेन महाबाहुरुच्छ्रितेन महारथे ।
बभौ भीष्मस्तदा राजंश्चन्द्रमा इव मेरुणा ॥ ४८

इति श्रीमहाभारते भीष्मपर्वणि
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

४५

संजय उवाच ।

गतपूर्वाह्णभूयिष्ठे तस्मिन्नहनि दारुणे ।
वर्तमाने महारौद्रे महावीरवरक्षये ॥ १
दुर्मुखः कृतवर्मा च कृपः शल्यो विविंशतिः ।
भीष्मं जुगुपुरासाद्य तव पुत्रेण चोदिताः ॥ २
एतैरतिरथैर्गुप्तः पञ्चभिर्भरतर्षभ ।
पाण्डवानामनीकानि विजगाहे महारथः ॥ ३
चेदिकाशिकरूषेषु पाञ्चालेषु च भारत ।
भीष्मस्य बहुधा तालश्चरन्केतुरदृश्यत ॥ ४
शिरांसि च तदा भीष्मो बाहूंश्चापि सहायुधान् ।
निचकर्त महावेगैर्भल्लैः संनतपर्वभिः ॥ ५
नृत्यतो रथमार्गेषु भीष्मस्य भरतर्षभ ।
केचिदार्तस्वरं चक्रुर्नागा मर्मणि ताडिताः ॥ ६
अभिमन्युः सुसंक्रुद्धः पिशङ्गैस्तुरगोत्तमैः ।
संयुक्तं रथमास्थाय प्रायाद्भीष्मरथं प्रति ॥ ७
जाम्बूनदविचित्रेण कर्णिकारेण केतुना ।
अभ्यवर्षत भीष्मं च तांश्चैव रथसत्तमान् ॥ ८
स तालकेतोस्तीक्ष्णेन केतुमाहत्य पत्रिणा ।
भीष्मेण युयुधे वीरस्तस्य चानुचरैः सह ॥ ९
कृतवर्माणमेकेन शल्यं पञ्चभिरायसैः ।
विद्ध्वा नवभिरानर्छच्छिताग्रैः प्रपितामहम् ॥ १०
पूर्णायतविसृष्टेन सम्यक्प्रणिहितेन च ।
ध्वजमेकेन विव्याध जाम्बूनदविभूषितम् ॥ ११
दुर्मुखस्य तु भल्लेन सर्वावरणभेदिना ।
जहार सारथेः कायाच्छिरः संनतपर्वणा ॥ १२
धनुश्चिच्छेद भल्लेन कार्तस्वरविभूषितम् ।

कृपस्य निशिताग्रेण तांश्च तीक्ष्णमुखैः शरैः ॥ १३
जघान परमक्रुद्धो नृत्यन्निव महारथः ।
तस्य लाघवमुद्वीक्ष्य तुतुषुर्देवता अपि ॥ १४
लब्धलक्ष्यतया कार्ष्णेः सर्वे भीष्ममुखा रथाः ।
सत्त्ववन्तममन्यन्त साक्षादिव धनंजयम् ॥ १५
तस्य लाघवमार्गस्थमलातसदृशप्रभम् ।
दिशः पर्यपतच्चापं गाण्डीवमिव घोषवत् ॥ १६
समासाद्य महावेगैर्भीष्मो नवभिराशुगैः ।
विव्याध समरे तूर्णमार्जुनिं परवीरहा ॥ १७
ध्वजं चास्य त्रिभिर्भल्लैश्चिच्छेद परमौजसः ।
सारथिं च त्रिभिर्बाणैराजघान यतव्रतः ॥ १८
तथैव कृतवर्मा च कृपः शल्यश्च मारिष ।
विद्ध्वा नाकम्पयत्कार्ष्णिं मैनाकमिव पर्वतम् ॥ १९
स तैः परिवृतः शूरो धार्तराष्ट्रैर्महारथैः ।
ववर्ष शरवर्षाणि कार्ष्णिः पञ्चरथान्प्रति ॥ २०
ततस्तेषां महास्त्राणि संवार्य शरवृष्टिभिः ।
ननाद बलवान्कार्ष्णिर्भीष्माय विसृजञ्शरान् ॥२१
तत्रास्य सुमहद्राजन्बाह्वोर्बलमदृश्यत ।
यतमानस्य समरे भीष्ममर्दयतः शरैः ॥ २२
पराक्रान्तस्य तस्यैव भीष्मोऽपि प्राहिणोच्छरान् ।
स तांश्चिच्छेद समरे भीष्मचापच्युताञ्शरान् ॥
ततो ध्वजममोघेषुर्भीष्मस्य नवभिः शरैः ।
चिच्छेद समरे वीरस्तत उच्चुक्रुशुर्जनाः ॥ २४
स राजतो महास्कन्धस्तालो हेमविभूषितः ।
सौभद्रविशिखैश्छिन्नः पपात भुवि भारत ॥ २५
ध्वजं सौभद्रविशिखैः पतितं भरतर्षभ ।
दृष्ट्वा भीमोऽनदद्धृष्टः सौभद्रमभिहर्षयन् ॥ २६
अथ भीष्मो महास्त्राणि दिव्यानि च बहूनि च ।
प्रादुश्चक्रे महारौद्रः क्षणे तस्मिन्महाबलः ॥ २७
ततः शतसहस्रेण सौभद्रं प्रपितामहः ।
अवाकिरदमेयात्मा शराणां नतपर्वणाम् ॥ २८
ततो दश महेष्वासाः पाण्डवानां महारथाः ।
रक्षार्थमभ्यधावन्त सौभद्रं त्वरिता रथैः ॥ २९
विराटः सह पुत्रेण धृष्टद्युम्नश्च पार्षतः ।
भीमश्च केकयाश्चैव सात्यकिश्च विशां पते ॥ ३०
जवेनापततां तेषां भीष्मः शांतनवो रणे ।
पाञ्चाल्यं त्रिभिरानर्छत्सात्यकिं निशितैः शरैः ॥ ३१
पूर्णायतविसृष्टेन क्षुरेण निशितेन च ।
ध्वजमेकेन चिच्छेद भीमसेनस्य पत्रिणा ॥ ३२
जाम्बूनदमयः केतुः केसरी नरसत्तम ।
पपात भीमसेनस्य भीष्मेण मथितो रथात् ॥ ३३
भीमसेनस्त्रिभिर्विद्ध्वा भीष्मं शांतनवं रणे ।
कृपमेकेन विव्याध कृतवर्माणमष्टभिः ॥ ३४
प्रगृहीताग्रहस्तेन वैराटिरपि दन्तिना ।
अभ्यद्रवत राजानं मद्राधिपतिमुत्तरः ॥ ३५
तस्य वारणराजस्य जवेनापततो रथी ।
शल्यो निवारयामास वेगमप्रतिमं रणे ॥ ३६
तस्य क्रुद्धः स नागेन्द्रो बृहतः साधुवाहिनः ।
पदा युगमधिष्ठाय जघान चतुरो हयान् ॥ ३७
स हताश्वे रथे तिष्ठन्मद्राधिपतिरायसीम् ।
उत्तरान्तकरीं शक्तिं चिक्षेप भुजगोपमाम् ॥ ३८
तया भिन्नतनुत्राणः प्रविश्य विपुलं तमः ।
स पपात गजस्कन्धात्प्रमुक्ताङ्कुशतोमरः ॥ ३९
समादाय च शल्योऽसिमवप्लुत्य रथोत्तमात् ।
वारणेन्द्रस्य विक्रम्य चिच्छेदाथ महाकरम् ॥ ४०
भिन्नमर्मा शरव्रातैश्छिन्नहस्तः स वारणः ।
भीममार्तस्वरं कृत्वा पपात च ममार च ॥ ४१
एतदीदृशकं कृत्वा मद्रराजो महारथः ।
आरुरोह रथं तूर्णं भास्वरं कृतवर्मणः ॥ ४२
उत्तरं निहतं दृष्ट्वा वैराटिर्भ्रातरं शुभम् ।

कृतवर्मणा च सहितं दृष्ट्वा शल्यमवस्थितम् ।
शङ्खः क्रोधात्प्रजज्वाल हविषा हव्यवाडिव ॥ ४३
स विस्फार्य महच्चापं कार्तस्वरविभूषितम् ।
अभ्यधावज्जिघांसन्वै शल्यं मद्राधिपं बली ॥ ४४
महता रथवंशेन समन्तात्परिवारितः ।
सृजन्बाणमयं वर्षं प्रायाच्छल्यरथं प्रति ॥ ४५
तमापतन्तं संप्रेक्ष्य मत्तवारणविक्रमम् ।
तावकानां रथाः सप्त समन्तात्पर्यवारयन् ।
मद्रराजं परीप्सन्तो मृत्योर्दंष्ट्रान्तरं गतम् ॥ ४६
ततो भीष्मो महाबाहुर्विनद्य जलदो यथा ।
तालमात्रं धनुर्गृह्य शङ्खमभ्यद्रवद्रणे ॥ ४७
तमुद्यतमुदीक्ष्याथ महेष्वासं महाबलम् ।
संत्रस्ता पाण्डवी सेना वातवेगहतेव नौः ॥ ४८
तत्रार्जुनः संत्वरितः शङ्खस्यासीत्पुरःसरः ।
भीष्माद्रक्ष्योऽयमद्येति ततो युद्धमवर्तत ॥ ४९
हाहाकारो महानासीद्योधानां युधि युध्यताम् ।
तेजस्तेजसि संपृक्तमित्येवं विस्मयं ययुः ॥ ५०
अथ शल्यो गदापाणिरवतीर्य महारथात् ।
शङ्खस्य चतुरो वाहानहनद्भरतर्षभ ॥ ५१
स हताश्वाद्रथात्तूर्णं खड्गमादाय विद्रुतः ।
बीभत्सोः स्यन्दनं प्राप्य ततः शान्तिमविन्दत ॥
ततो भीष्मरथात्तूर्णमुत्पतन्ति पतत्रिणः ।
यैरन्तरिक्षं भूमिश्च सर्वतः समवस्तृतम् ॥ ५३
पाञ्चालानथ मत्स्यांश्च केकयांश्च प्रभद्रकान् ।
भीष्मः प्रहरतां श्रेष्ठः पातयामास मार्गणैः ॥ ५४
उत्सृज्य समरे तूर्णं पाण्डवं सव्यसाचिनम् ।
अभ्यद्रवत पाञ्चाल्यं द्रुपदं सेनया वृतम् ।
प्रियं संबन्धिनं राजञ्शरानवकिरन्बहून् ॥ ५५
अग्निनेव प्रदग्धानि वनानि शिशिरात्यये ।
शरदग्धान्यदृश्यन्त सैन्यानि द्रुपदस्य ह ।
अतिष्ठत रणे भीष्मो विधूम इव पावकः ॥ ५६
मध्यंदिने यथादित्यं तपन्तमिव तेजसा ।
न शेकुः पाण्डवेयस्य योधा भीष्मं निरीक्षितुम् ॥
वीक्षांचक्रुः समन्तात्ते पाण्डवा भयपीडिताः ।
त्रातारं नाध्यगच्छन्त गावः शीतार्दिता इव ॥ ५८
हतविप्रद्रुते सैन्ये निरुत्साहे विमर्दिते ।
हाहाकारो महानासीत्पाण्डुसैन्येषु भारत ॥ ५९
ततो भीष्मः शांतनवो नित्यं मण्डलकार्मुकः ।
मुमोच बाणान्दीप्ताग्रानहीनाशीविषानिव ॥ ६०
शरैरेकायनीकुर्वन्दिशः सर्वा यतव्रतः ।
जघान पाण्डवरथानादिश्यादिश्य भारत ॥ ६१
ततः सैन्येषु भग्नेषु मथितेषु च सर्वशः ।
प्राप्ते चास्तं दिनकरे न प्राज्ञायत किंचन ॥ ६२
भीष्मं च समुदीर्यन्तं दृष्ट्वा पार्था महाहवे ।
अवहारमकुर्वन्त सैन्यानां भरतर्षभ ॥ ६३

इति श्रीमहाभारते भीष्मपर्वणि
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

संजय उवाच ।

कृतेऽवहारे सैन्यानां प्रथमे भरतर्षभ ।
भीष्मे च युधि संरब्धे हृष्टे दुर्योधने तथा ॥ १
धर्मराजस्ततस्तूर्णमभिगम्य जनार्दनम् ।
भ्रातृभिः सहितः सर्वैः सर्वैश्चैव जनेश्वरैः ॥ २
शुचा परमया युक्तश्चिन्तयानः पराजयम् ।
वार्ष्णेयमब्रवीद्राजन्दृष्ट्वा भीष्मस्य विक्रमम् ॥ ३
कृष्ण पश्य महेष्वासं भीष्मं भीमपराक्रमम् ।
शरैर्दहन्तं सैन्यं मे ग्रीष्मे कक्षमिवानलम् ॥ ४
कथमेनं महात्मानं शक्ष्यामः प्रतिवीक्षितुम् ।
लेलिह्यमानं सैन्यं मे हविष्मन्तमिवानलम् ॥ ५
एतं हि पुरुषव्याघ्रं धनुष्मन्तं महाबलम् ।

दृष्ट्वा विप्रद्रुतं सैन्यं मदीयं मार्गणाहतम् ॥ ६
शक्यो जेतुं यमः क्रुद्धो वज्रपाणिश्च संयुगे ।
वरुणः पाशभृच्चापि कुबेरो वा गदाधरः ॥ ७
न तु भीष्मो महातेजाः शक्यो जेतुं महाबलः ।
सोऽहमेवं गते मग्नो भीष्मागाधजलेऽप्लवः ॥ ८
आत्मनो बुद्धिदौर्बल्याद्भीष्ममासाद्य केशव ।
वनं यास्यामि गोविन्द श्रेयो मे तत्र जीवितुम् ॥ ९
न त्विमान्पृथिवीपालान्दातुं भीष्माय मृत्यवे ।
क्षपयिष्यति सेनां मे कृष्ण भीष्मो महास्त्रवित् ॥
यथानलं प्रज्वलितं पतंगाः समभिद्रुताः ।
विनाशायैव गच्छन्ति तथा मे सैनिको जनः ॥ ११
क्षयं नीतोऽस्मि वार्ष्णेय राज्यहेतोः पराक्रमी ।
भ्रातरश्चैव मे वीराः कर्शिताः शरपीडिताः ॥ १२
मत्कृते भ्रातृसौहार्दाद्राज्याद्भ्रष्टास्तथा सुखात् ।
जीवितं बहु मन्येऽहं जीवितं ह्यद्य दुर्लभम् ॥ १३
जीवितस्य हि शेषेण तपस्तप्स्यामि दुश्चरम् ।
न घातयिष्यामि रणे मित्राणीमानि केशव ॥ १४
रथान्मे बहुसाहस्रान्दिव्यैरस्त्रैर्महाबलः ।
घातयत्यनिशं भीष्मः प्रवराणां प्रहारिणाम् ॥ १५
किं नु कृत्वा कृतं मे स्याद्ब्रूहि माधव माचिरम् ।
मध्यस्थमिव पश्यामि समरे सव्यसाचिनम् ॥ १६
एको भीमः परं शक्त्या युध्यत्येष महाभुजः ।
केवलं बाहुवीर्येण क्षत्रधर्ममनुस्मरन् ॥ १७
गदया वीरघातिन्या यथोत्साहं महामनाः ।
करोत्यसुकरं कर्म गजाश्वरथपत्तिषु ॥ १८
नालमेष क्षयं कर्तुं परसैन्यस्य मारिष ।
आर्जवेनैव युद्धेन वीर वर्षशतैरपि ॥ १९
एकोऽस्त्रवित्सखा तेऽयं सोऽप्यस्मान्समुपेक्षते ।
निर्दह्यमानान्भीष्मेण द्रोणेन च महात्मना ॥ २०
दिव्यान्यस्त्राणि भीष्मस्य द्रोणस्य च महात्मनः ।
धक्ष्यन्ति क्षत्रियान्सर्वान्प्रयुक्तानि पुनः पुनः ॥ २१
कृष्ण भीष्मः सुसंरब्धः सहितः सर्वपार्थिवैः ।
क्षपयिष्यति नो नूनं यादृशोऽस्य पराक्रमः ॥ २२
स त्वं पश्य महेष्वासं योगीश्वर महारथम् ।
यो भीष्मं शमयेत्संख्ये दावाग्निं जलदो यथा ॥ २३
तव प्रसादाद्गोविन्द पाण्डवा निहतद्विषः ।
स्वराज्यमनुसंप्राप्ता मोदिष्यन्ति सबान्धवाः ॥ २४
एवमुक्त्वा ततः पार्थो ध्यायन्नास्ते महामनाः ।
चिरमन्तर्मना भूत्वा शोकोपहतचेतनः ॥ २५
शोकार्तं पाण्डवं ज्ञात्वा दुःखेन हतचेतसम् ।
अब्रवीत्तत्र गोविन्दो हर्षयन्सर्वपाण्डवान् ॥ २६
मा शुचो भरतश्रेष्ठ न त्वं शोचितुमर्हसि ।
यस्य ते भ्रातरः शूराः सर्वलोकस्य धन्विनः ॥ २७
अहं च प्रियकृद्राजन्सात्यकिश्च महारथः ।
विराटद्रुपदौ वृद्धौ धृष्टद्युम्नश्च पार्षतः ॥ २८
तथैव सबलाः सर्वे राजानो राजसत्तम ।
त्वत्प्रसादं प्रतीक्षन्ते त्वद्भक्ताश्च विशां पते ॥ २९
एष ते पार्षतो नित्यं हितकामः प्रिये रतः ।
सेनापत्यमनुप्राप्तो धृष्टद्युम्नो महाबलः ।
शिखण्डी च महाबाहो भीष्मस्य निधनं किल ॥ ३०
एतच्छ्रुत्वा ततो राजा धृष्टद्युम्नं महारथम् ।
अब्रवीत्समितौ तस्यां वासुदेवस्य शृण्वतः ॥ ३१
धृष्टद्युम्न निबोधेदं यत्त्वा वक्ष्यामि मारिष ।
नातिक्रम्यं भवेत्तच्च वचनं मम भाषितम् ॥ ३२
भवान्सेनापतिर्मह्यं वासुदेवेन संमतः ।
कार्त्तिकेयो यथा नित्यं देवानामभवत्पुरा ।
तथा त्वमपि पाण्डूनां सेनानीः पुरुषर्षभ ॥ ३३
स त्वं पुरुषशार्दूल विक्रम्य जहि कौरवान् ।
अहं च त्वानुयास्यामि भीमः कृष्णश्च मारिष ॥ ३४
माद्रीपुत्रौ च सहितौ द्रौपदेयाश्च दंशिताः ।

ये चान्ये पृथिवीपालाः प्रधानाः पुरुषर्षभ ॥ ३५
तत उद्धर्षयन्सर्वान्धृष्टद्युम्नोऽभ्यभाषत ।
अहं द्रोणान्तकः पार्थ विहितः शंभुना पुरा ॥ ३६
रणे भीष्मं तथा द्रोणं कृपं शल्यं जयद्रथम् ।
सर्वानद्य रणे दृप्तान्प्रतियोत्स्यामि पार्थिव ॥ ३७
अथोत्क्रुष्टं महेष्वासैः पाण्डवैर्युद्धदुर्मदैः ।
समुद्यते पार्थिवेन्द्रे पार्षते शत्रुसूदने ॥ ३८
तमब्रवीत्ततः पार्थः पार्षतं पृतनापतिम् ।
व्यूहः क्रौञ्चारुणो नाम सर्वशत्रुनिबर्हणः ॥ ३९
यं बृहस्पतिरिन्द्राय तदा देवासुरेऽब्रवीत् ।
तं यथावत्प्रतिव्यूह परानीकविनाशनम् ।
अदृष्टपूर्वं राजानः पश्यन्तु कुरुभिः सह ॥ ४०
तथोक्तः स नृदेवेन विष्णुर्वज्रभृता इव ।
प्रभाते सर्वसैन्यानामग्रे चक्रे धनंजयम् ॥ ४१
आदित्यपथगः केतुस्तस्याद्भुतमनोरमः ।
शासनात्पुरुहूतस्य निर्मितो विश्वकर्मणा ॥ ४२
इन्द्रायुधसवर्णाभिः पताकाभिरलंकृतः ।
आकाशग इवाकाशे गन्धर्वनगरोपमः ।
नृत्यमान इवाभाति रथचर्यासु मारिष ॥ ४३
तेन रत्नवता पार्थः स च गाण्डीवधन्वना ।
बभूव परमोपेतः स्वयंभूरिव भानुना ॥ ४४
शिरोऽभूद्द्रुपदो राजा महत्या सेनया वृतः ।
कुन्तिभोजश्च चैद्यश्च चक्षुष्यास्तां जनेश्वर ॥ ४५
दाशार्णकाः प्रयागाश्च दाशेरकगणैः सह ।
अनूपगाः किराताश्च ग्रीवायां भरतर्षभ ॥ ४६
पटच्चरैश्च हुण्डैश्च राजन्पौरवकैस्तथा ।
निषादैः सहितश्चापि पृष्ठमासीद्युधिष्ठिरः ॥ ४७
पक्षौ तु भीमसेनश्च धृष्टद्युम्नश्च पार्षतः ।
द्रौपदेयाभिमन्युश्च सात्यकिश्च महारथः ॥ ४८
पिशाचा दरदाश्चैव पुण्ड्राः कुण्डीविषैः सह ।
मडका लडकाश्चैव तङ्गणाः परतङ्गणाः ।॥ ४९
बाह्लिकास्तित्तिराश्चैव चोलाः पाण्ड्याश्च भारत ।
एते जनपदा राजन्दक्षिणं पक्षमाश्रिताः ॥ ५०
अग्निवेश्या जगत्तुण्डाः पलदाशाश्च भारत ।
शबरास्तुम्बुपाश्चैव वत्साश्च सह नाकुलैः ।
नकुलः सहदेवश्च वामं पार्श्वं समाश्रिताः ॥ ५१
रथानामयुतं पक्षौ शिरश्च नियुतं तथा ।
पृष्ठमर्बुदमेवासीत्सहस्राणि च विंशतिः ।
ग्रीवायां नियुतं चापि सहस्राणि च सप्ततिः ॥ ५२
पक्षकोटिप्रपक्षेषु पक्षान्तेषु च वारणाः ।
जग्मुः परिवृता राजंश्चलन्त इव पर्वताः ॥ ५३
जघनं पालयामास विराटः सह केकयैः ।
काशिराजश्च शैब्यश्च रथानामयुतैस्त्रिभिः ॥ ५४
एवमेतं महाव्यूहं व्यूह्य भारत पाण्डवाः ।
सूर्योदयनमिच्छन्तः स्थिता युद्धाय दंशिताः ॥ ५५
तेषामादित्यवर्णानि विमलानि महान्ति च ।
श्वेतच्छत्राण्यशोभन्त वारणेषु रथेषु च ॥ ५६

इति श्रीमहाभारते भीष्मपर्वणि
षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

४७

संजय उवाच ।

क्रौञ्चं ततो महाव्यूहमभेद्यं तनयस्तव ।
व्यूढं दृष्ट्वा महाघोरं पार्थेनामिततेजसा ॥ १
आचार्यमुपसंगम्य कृपं शल्यं च मारिष ।
सौमदत्तिं विकर्णं च अश्वत्थामानमेव च ॥ २
दुःशासनादीन्भ्रातॄंश्च स सर्वानेव भारत ।
अन्यांश्च सुबहूञ्शूरान्युद्धाय समुपागतान् ॥ ३
प्राहेदं वचनं काले हर्षयंस्तनयस्तव ।
नानाशस्त्रप्रहरणाः सर्वे शस्त्रास्त्रवेदिनः ॥ ४
एकैकशः समर्था हि यूयं सर्वे महारथाः ।

पाण्डुपुत्रान्रणे हन्तुं ससैन्यान्किमु संहताः ।। ५
अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं पार्थिवसत्तमाः ।। ६
संस्थानाः शूरसेनाश्च वेणिकाः कुकुरास्तथा ।
आरेवकास्त्रिगर्ताश्च मद्रका यवनास्तथा ।। ७
शत्रुंजयेन सहितास्तथा दुःशासनेन च ।
विकर्णेन च वीरेण तथा नन्दोपनन्दकैः ।। ८
चित्रसेनेन सहिताः सहिताः पाणिभद्रकैः ।
भीष्ममेवाभिरक्षन्तु सह सैन्यपुरस्कृताः ।। ९
ततो द्रोणश्च भीष्मश्च तव पुत्रश्च मारिष ।
अव्यूहन्त महाव्यूहं पाण्डूनां प्रतिबाधने ।। १०
भीष्मः सैन्येन महता समन्तात्परिवारितः ।
ययौ प्रकर्षन्महतीं वाहिनीं सुरराडिव ।। ११
तमन्वयान्महेष्वासो भारद्वाजः प्रतापवान् ।
कुन्तलैश्च दशार्णैश्च मागधैश्च विशां पते ।। १२
विदर्भैर्मेकलैश्चैव कर्णप्रावरणैरपि ।
सहिताः सर्वसैन्येन भीष्ममाहवशोभिनम् ।। १३
गान्धाराः सिन्धुसौवीराः शिबयोऽथ वसातयः ।
शकुनिश्च स्वसैन्येन भारद्वाजमपालयत् ।। १४
ततो दुर्योधनो राजा सहितः सर्वसोदरैः ।
अश्वातकैर्विकर्णैश्च तथा शर्मिलकोसलैः ।। १५
दरदैश्चूचुपैश्चैव तथा क्षुद्रकमालवैः ।
अभ्यरक्षत संहृष्टः सौबलेयस्य वाहिनीम् ।। १६
भूरिश्रवाः शलः शल्यो भगदत्तश्च मारिष ।
विन्दानुविन्दावावन्त्यौ वामं पार्श्वमपालयन् ।। १७
सौमदत्तिः सुशर्मा च काम्बोजश्च सुदक्षिणः ।
शतायुश्च श्रुतायुश्च दक्षिणं पार्श्वमास्थिताः ।। १८
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ।
महत्या सेनया सार्धं सेनापृष्ठे व्यवस्थिताः ।। १९
पृष्ठगोपास्तु तस्यासन्नानादेश्या जनेश्वराः ।
केतुमान्वसुदानश्च पुत्रः काश्यस्य चाभिभूः ।। २०
ततस्ते तावकाः सर्वे हृष्टा युद्धाय भारत ।
दध्मुः शङ्खान्मुदा युक्ताः सिंहनादांश्च नादयन् ।।
तेषां श्रुत्वा तु हृष्टानां कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ।। २२
ततः शङ्खाश्च भेर्यश्च पेश्यश्च विविधाः परैः ।
आनकाश्चाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ।। २३
ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
प्रदध्मतुः शङ्खवरौ हेमरत्नपरिष्कृतौ ।। २४
पाञ्चजन्यं हृषीकेशो देवदत्तं धनंजयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ।। २५
अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ।। २६
काशिराजश्च शैब्यश्च शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्च महायशाः ।।२७
पाञ्चाल्यश्च महेष्वासो द्रौपद्याः पञ्च चात्मजाः ।
सर्वे दध्मुर्महाशङ्खान्सिंहनादांश्च नेदिरे ।। २८
स घोषः सुमहांस्तत्र वीरैस्तैः समुदीरितः ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयत् ।। २९
एवमेते महाराज प्रहृष्टाः कुरुपाण्डवाः ।
पुनर्युद्धाय संजग्मुस्तापयानाः परस्परम् ।। ३०

इति श्रीमहाभारते भीष्मपर्वणि
सप्तचत्वारिंशोऽध्यायः ।। ४७ ।।

४८

धृतराष्ट्र उवाच ।

एवं व्यूढेष्वनीकेषु मामकेष्वितरेषु च ।
कथं प्रहरतां श्रेष्ठाः संप्रहारं प्रचक्रिरे ।। १

संजय उवाच ।

समं व्यूढेष्वनीकेषु संनद्धा रुचिरध्वजाः ।
अपारमिव संदृश्य सागरप्रतिमं बलम् ।। २

तेषां मध्ये स्थितो राजा पुत्रो दुर्योधनस्तव ।
अब्रवीत्तावकान्सर्वान्युध्यध्वमिति दंशिताः ॥ ३
ते मनः क्रूरमास्थाय समभित्यक्तजीविताः ।
पाण्डवानभ्यवर्तन्त सर्व एवोच्छ्रितध्वजाः ॥ ४
ततो युद्धं समभवत्तुमुलं लोमहर्षणम् ।
तावकानां परेषां च व्यतिषक्तरथद्विपम् ॥ ५
मुक्तास्तु रथिभिर्बाणा रुक्मपुङ्खाः सुतेजनाः ।
संनिपेतुरकुण्ठाग्रा नागेषु च हयेषु च ॥ ६
तथा प्रवृत्ते संग्रामे धनुरुद्यम्य दंशितः ।
अभिपत्य महाबाहुर्भीष्मो भीमपराक्रमः ॥ ७
सौभद्रे भीमसेने च शैनेये च महारथे ।
केकये च विराटे च धृष्टद्युम्ने च पार्षते ॥ ८
एतेषु नरवीरेषु चेदिमत्स्येषु चाभितः ।
ववर्ष शरवर्षाणि वृद्धः कुरुपितामहः ॥ ९
प्राकम्पत महाव्यूहस्तस्मिन्वीरसमागमे ।
सर्वेषामेव सैन्यानामासीद्व्यतिकरो महान् ॥ १०
सादितध्वजनागाश्च हतप्रवरवाजिनः ।
विप्रयातरथानीकाः समपद्यन्त पाण्डवाः ॥ ११
अर्जुनस्तु नरव्याघ्रो दृष्ट्वा भीष्मं महारथम् ।
वार्ष्णेयमब्रवीत्क्रुद्धो याहि यत्र पितामहः ॥ १२
एष भीष्मः सुसंक्रुद्धो वार्ष्णेय मम वाहिनीम् ।
नाशयिष्यति सुव्यक्तं दुर्योधनहिते रतः ॥ १३
एष द्रोणः कृपः शल्यो विकर्णश्च जनार्दन ।
धार्तराष्ट्राश्च सहिता दुर्योधनपुरोगमाः ॥ १४
पाञ्चालान्निहनिष्यन्ति रक्षिता दृढधन्वना ।
सोऽहं भीष्मं गमिष्यामि सैन्यहेतोर्जनार्दन ॥ १५
तमब्रवीद्वासुदेवो यत्तो भव धनंजय ।
एष त्वा प्रापये वीर पितामहरथं प्रति ॥ १६
एवमुक्त्वा ततः शौरी रथं तं लोकविश्रुतम् ।
प्रापयामास भीष्माय रथं प्रति जनेश्वर ॥ १७
चञ्चद्बहुपताकेन बलाकावर्णवाजिना ।
समुच्छ्रितमहाभीमनदद्वानरकेतुना ।
महता मेघनादेन रथेनादित्यवर्चसा ॥ १८
विनिघ्नन्कौरवानीकं शूरसेनांश्च पाण्डवः ।
आयाच्छरान्नुदञ्शीघ्रं सुहृच्छोकविनाशनः ॥ १९
तमापतन्तं वेगेन प्रभिन्नमिव वारणम् ।
त्रासयानं रणे शूरान्पातयन्तं च सायकैः ॥ २०
सैन्धवप्रमुखैर्गुप्तः प्राच्यसौवीरकेकयैः ।
सहसा प्रत्युदीयाय भीष्मः शांतनवोऽर्जुनम् ॥ २१
को हि गाण्डीवधन्वानमन्यः कुरुपितामहात् ।
द्रोणवैकर्तनाभ्यां वा रथः संयातुमर्हति ॥ २२
ततो भीष्मो महाराज कौरवाणां पितामहः ।
अर्जुनं सप्तसप्तत्या नाराचानां समावृणोत् ॥ २३
द्रोणश्च पञ्चविंशत्या कृपः पञ्चाशता शरैः ।
दुर्योधनश्चतुःषष्ट्या शल्यश्च नवभिः शरैः ॥ २४
सैन्धवो नवभिश्चापि शकुनिश्चापि पञ्चभिः ।
विकर्णो दशभिर्भल्लै राजन्विव्याध पाण्डवम् ॥ २५
स तैर्विद्धो महेष्वासः समन्तान्निशितैः शरैः ।
न विव्यथे महाबाहुर्भिद्यमान इवाचलः ॥ २६
स भीष्मं पञ्चविंशत्या कृपं च नवभिः शरैः ।
द्रोणं षष्ट्या नरव्याघ्रो विकर्णं च त्रिभिः शरैः ॥
आर्तायनिं त्रिभिर्बाणै राजानं चापि पञ्चभिः ।
प्रत्यविध्यदमेयात्मा किरीटी भरतर्षभ ॥ २८
तं सात्यकिर्विराटश्च धृष्टद्युम्नश्च पार्षतः ।
द्रौपदेयाभिमन्युश्च परिवव्रुर्धनंजयम् ॥ २९
ततो द्रोणं महेष्वासं गाङ्गेयस्य प्रिये रतम् ।
अभ्यवर्षत पाञ्चाल्यः संयुक्तः सह सोमकैः ॥ ३०
भीष्मस्तु रथिनां श्रेष्ठस्तूर्णं विव्याध पाण्डवम् ।
अशीत्या निशितैर्बाणैस्ततोऽक्रोशन्त तावकाः ॥ ३१
तेषां तु निनदं श्रुत्वा प्रहृष्टानां प्रहृष्टवत् ।

प्रविवेश ततो मध्यं रथसिंहः प्रतापवान् ॥ ३२
तेषां तु रथसिंहानां मध्यं प्राप्य धनंजयः ।
चिक्रीड धनुषा राजँल्लक्ष्यं कृत्वा महारथान् ॥३३
ततो दुर्योधनो राजा भीष्ममाह जनेश्वरः ।
पीड्यमानं स्वकं सैन्यं दृष्ट्वा पार्थेन संयुगे ॥ ३४
एष पाण्डुसुतस्तात कृष्णेन सहितो बली ।
यततां सर्वसैन्यानां मूलं नः परिकृन्तति ।
त्वयि जीवति गाङ्गेये द्रोणे च रथिनां वरे ॥ ३५
त्वत्कृते ह्येष कर्णोऽपि न्यस्तशस्त्रो महारथः ।
न युध्यति रणे पार्थ हितकामः सदा मम ॥ ३६
स तथा कुरु गाङ्गेय यथा हन्येत फल्गुनः ।
एवमुक्तस्ततो राजन्पिता देवव्रतस्तव ।
धिक्क्षत्रधर्ममित्युक्त्वा ययौ पार्थरथं प्रति ॥ ३७
उभौ श्वेतहयौ राजन्संसक्तौ दृश्य पार्थिवाः ।
सिंहनादान्भृशं चक्रुः शङ्खशब्दांश्च भारत ॥ ३८
द्रौणिर्दुर्योधनश्चैव विकर्णश्च तवात्मजः ।
परिवार्य रणे भीष्मं स्थिता युद्धाय मारिष ॥ ३९
तथैव पाण्डवाः सर्वे परिवार्य धनंजयम् ।
स्थिता युद्धाय महते ततो युद्धमवर्तत ॥ ४०
गाङ्गेयस्तु रणे पार्थमानर्छन्नवभिः शरैः ।
तमर्जुनः प्रत्यविध्यद्दशभिर्मर्मवेधिभिः ॥ ४१
ततः शरसहस्रेण सुप्रयुक्तेन पाण्डवः ।
अर्जुनः समरश्लाघी भीष्मस्यावारयद्दिशः ॥ ४२
शरजालं ततस्तत्तु शरजालेन कौरव ।
वारयामास पार्थस्य भीष्मः शांतनवस्तथा ॥ ४३
उभौ परमसंहृष्टावुभौ युद्धाभिनन्दिनौ ।
निर्विशेषमयुध्येतां कृतप्रतिकृतैषिणौ ॥ ४४
भीष्मचापविमुक्तानि शरजालानि संघशः ।
शीर्यमाणान्यदृश्यन्त भिन्नान्यर्जुनसायकैः ॥ ४५
तथैवार्जुनमुक्तानि शरजालानि भागशः ।
गाङ्गेयशरनुन्नानि न्यपतन्त महीतले ॥ ४६
अर्जुनः पञ्चविंशत्या भीष्ममार्छच्छितैः शरैः ।
भीष्मोऽपि समरे पार्थं विव्याध त्रिंशता शरैः ॥४७
अन्योन्यस्य हयान्विद्ध्वा ध्वजौ च सुमहाबलौ ।
रथेषां रथचक्रे च चिक्रीडतुररिंदमौ ॥ ४८
ततः क्रुद्धो महाराज भीष्मः प्रहरतां वरः ।
वासुदेवं त्रिभिर्बाणैराजघान स्तनान्तरे ॥ ४९
भीष्मचापच्युतैर्बाणैर्निर्विद्धो मधुसूदनः ।
विरराज रणे राजन्सपुष्प इव किंशुकः ॥ ५०
ततोऽर्जुनो भृशं क्रुद्धो निर्विद्धं प्रेक्ष्य माधवम् ।
गाङ्गेयसारथिं संख्ये निर्बिभेद त्रिभिः शरैः ॥५१
यतमानौ तु तौ वीरावन्योन्यस्य वधं प्रति ।
नाशक्नुतां तदान्योन्यमभिसंधातुमाहवे ॥ ५२
मण्डलानि विचित्राणि गतप्रत्यागतानि च ।
अदर्शयेतां बहुधा सूतसामर्थ्यलाघवात् ॥ ५३
अन्तरं च प्रहारेषु तर्कयन्तौ महारथौ ।
राजन्नन्तरमार्गस्थौ स्थितावास्तां मुहुर्मुहुः ॥ ५४
उभौ सिंहरवोन्मिश्रं शङ्खशब्दं प्रचक्रतुः ।
तथैव चापनिर्घोषं चक्रतुस्तौ महारथौ ॥ ५५
तयोः शङ्खप्रणादेन रथनेमिस्वनेन च ।
दारिता सहसा भूमिश्चकम्प च ननाद च ॥ ५६
न तयोरन्तरं कश्चिद्ददृशे भरतर्षभ ।
बलिनौ समरे शूरावन्योन्यसदृशावुभौ ॥ ५७
चिह्नमात्रेण भीष्मं तु प्रजज्ञुस्तत्र कौरवाः ।
तथा पाण्डुसुताः पार्थं चिह्नमात्रेण जज्ञिरे ॥ ५८
तयोर्नृवरयो राजन्दृश्य तादृक्पराक्रमम् ।
विस्मयं सर्वभूतानि जग्मुर्भारत संयुगे ॥ ५९
न तयोर्विवरं कश्चिद्रणे पश्यति भारत ।
धर्मे स्थितस्य हि यथा न कश्चिद्वृजिनं क्वचित् ॥६०
उभौ हि शरजालेन तावदृश्यौ बभूवतुः ।

प्रकाशौ च पुनस्तूर्णं बभूवतुरुभौ रणे ॥ ६१
तत्र देवाः सगन्धर्वाश्चारणाश्च सहर्षिभिः ।
अन्योन्यं प्रत्यभाषन्त तयोर्दृष्ट्वा पराक्रमम् ॥ ६२
न शक्यौ युधि संरब्धौ जेतुमेतौ महारथौ ।
सदेवासुरगन्धर्वैर्लोकैरपि कथंचन ॥ ६३
आश्चर्यभूतं लोकेषु युद्धमेतन्महाद्भुतम् ।
नैतादृशानि युद्धानि भविष्यन्ति कथंचन ॥ ६४
नापि शक्यो रणे जेतुं भीष्मः पार्थेन धीमता ।
सधनुश्च रथस्थश्च प्रवपन्सायकान्रणे ॥ ६५
तथैव पाण्डवं युद्धे देवैरपि दुरासदम् ।
न विजेतुं रणे भीष्म उत्सहेत धनुर्धरम् ॥ ६६
इति स्म वाचः श्रूयन्ते प्रोच्चरन्त्यस्ततस्ततः ।
गाङ्गेयार्जुनयोः संख्ये स्तवयुक्ता विशां पते ॥ ६७
त्वदीयास्तु ततो योधाः पाण्डवेयाश्च भारत ।
अन्योन्यं समरे जघ्नुस्तयोस्तत्र पराक्रमे ॥ ६८
शितधारैस्तथा खड्गैर्विमलैश्च परश्वधैः ।
शरैरन्यैश्च बहुभिः शस्त्रैर्नानाविधैर्युधि ।
उभयोः सेनयोर्वीरा न्यकृन्तन्त परस्परम् ॥ ६९
वर्तमाने तथा घोरे तस्मिन्युद्धे सुदारुणे ।
द्रोणपाञ्चाल्ययो राजन्महानासीत्समागमः ॥ ७०

इति श्रीमहाभारते भीष्मपर्वणि
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

४९

धृतराष्ट्र उवाच ।

कथं द्रोणो महेष्वासः पाञ्चाल्यश्चापि पार्षतः ।
रणे समीयतुर्यत्तौ तन्ममाचक्ष्व संजय ॥ १
दिष्टमेव परं मन्ये पौरुषादपि संजय ।
यत्र शांतनवो भीष्मो नातरद्युधि पाण्डवम् ॥ २
भीष्मो हि समरे क्रुद्धो हन्याल्लोकांश्चराचरान् ।
स कथं पाण्डवं युद्धे नातरत्संजयौजसा ॥ ३

संजय उवाच ।

शृणु राजन्स्थिरो भूत्वा युद्धमेतत्सुदारुणम् ।
न शक्यः पाण्डवो जेतुं देवैरपि सवासवैः ॥ ४
द्रोणस्तु निशितैर्बाणैर्धृष्टद्युम्नमयोधयत् ।
सारथिं चास्य भल्लेन रथनीडादपातयत् ॥ ५
तस्याथ चतुरो वाहांश्चतुर्भिः सायकोत्तमैः ।
पीडयामास संक्रुद्धो धृष्टद्युम्नस्य मारिष ॥ ६
धृष्टद्युम्नस्ततो द्रोणं नवत्या निशितैः शरैः ।
विव्याध प्रहसन्वीरस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ ७
ततः पुनरमेयात्मा भारद्वाजः प्रतापवान् ।
शरैः प्रच्छादयामास धृष्टद्युम्नममर्षणम् ॥ ८
आददे च शरं घोरं पार्षतस्य वधं प्रति ।
शक्राशनिसमस्पर्शं मृत्युदण्डमिवापरम् ॥ ९
हाहाकारो महानासीत्सर्वसैन्यस्य भारत ।
तमिषुं संधितं दृष्ट्वा भारद्वाजेन संयुगे ॥ १०
तत्राद्भुतमपश्याम धृष्टद्युम्नस्य पौरुषम् ।
यदेकः समरे वीरस्तस्थौ गिरिरिवाचलः ॥ ११
तं च दीप्तं शरं घोरमायान्तं मृत्युमात्मनः ।
चिच्छेद शरवृष्टिं च भारद्वाजे मुमोच ह ॥ १२
तत उच्चुक्रुशुः सर्वे पाञ्चालाः पाण्डवैः सह ।
धृष्टद्युम्नेन तत्कर्म कृतं दृष्ट्वा सुदुष्करम् ॥ १३
ततः शक्तिं महावेगां स्वर्णवैडूर्यभूषिताम् ।
द्रोणस्य निधनाकाङ्क्षी चिक्षेप स पराक्रमी ॥ १४
तामापतन्तीं सहसा शक्तिं कनकभूषणाम् ।
त्रिधा चिक्षेप समरे भारद्वाजो हसन्निव ॥ १५
शक्तिं विनिहतां दृष्ट्वा धृष्टद्युम्नः प्रतापवान् ।
ववर्ष शरवर्षाणि द्रोणं प्रति जनेश्वर ॥ १६
शरवर्षं ततस्तं तु संनिवार्य महायशाः ।
द्रोणो द्रुपदपुत्रस्य मध्ये चिच्छेद कार्मुकम् ॥ १७
स च्छिन्नधन्वा समरे गदां गुर्वीं महायशाः ।

द्रोणाय प्रेषयामास गिरिसारमयीं बली ॥ १८
सा गदा वेगवन्मुक्ता प्रायाद्द्रोणजिघांसया ।
तत्राद्भुतमपश्याम भारद्वाजस्य विक्रमम् ॥ १९
लाघवाद्व्यंसयामास गदां हेमविभूषिताम् ।
व्यंसयित्वा गदां तां च प्रेषयामास पार्षते ॥ २०
भल्लान्सुनिशितान्पीतान्स्वर्णपुङ्खाञ्शिलाशितान् ।
ते तस्य कवचं भित्त्वा पपुः शोणितमाहवे ॥ २१
अथान्यद्धनुरादाय धृष्टद्युम्नो महामनाः ।
द्रोणं युधि पराक्रम्य शरैर्विव्याध पञ्चभिः ॥ २२
रुधिराक्तौ ततस्तौ तु शुशुभाते नरर्षभौ ।
वसन्तसमये राजन्पुष्पिताविव किंशुकौ ॥ २३
अमर्षितस्ततो राजन्पराक्रम्य चमूमुखे ।
द्रोणो द्रुपदपुत्रस्य पुनश्चिच्छेद कार्मुकम् ॥ २४
अथैनं छिन्नधन्वानं शरैः संनतपर्वभिः ।
अवाकिरदमेयात्मा वृष्ट्या मेघ इवाचलम् ॥ २५
सारथिं चास्य भल्लेन रथनीडादपातयत् ।
अथास्य चतुरो वाहांश्चतुर्भिर्निशितैः शरैः ॥ २६
पातयामास समरे सिंहनादं ननाद च ।
ततोऽपरेण भल्लेन हस्ताच्चापमथाच्छिनत् ॥ २७
स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
गदापाणिरवारोहत्ख्यापयन्पौरुषं महत् ॥ २८
तामस्य विशिखैस्तूर्णं पातयामास भारत ।
रथादनवरूढस्य तदद्भुतमिवाभवत् ॥ २९
ततः स विपुलं चर्म शतचन्द्रं च भानुमत् ।
खड्गं च विपुलं दिव्यं प्रगृह्य सुभुजो बली ॥ ३०
अभिदुद्राव वेगेन द्रोणस्य वधकाङ्क्षया ।
आमिषार्थी यथा सिंहो वने मत्तमिव द्विपम् ॥ ३१
तत्राद्भुतमपश्याम भारद्वाजस्य पौरुषम् ।
लाघवं चास्त्रयोगं च बलं बाह्वोश्च भारत ॥ ३२
यदेनं शरवर्षेण वारयामास पार्षतम् ।
न शशाक ततो गन्तुं बलवानपि संयुगे ॥ ३३
तत्र स्थितमपश्याम धृष्टद्युम्नं महारथम् ।
वारयाणं शरौघांश्च चर्मणा कृतहस्तवत् ॥ ३४
ततो भीमो महाबाहुः सहसाभ्यपतद्बली ।
साहाय्यकारी समरे पार्षतस्य महात्मनः ॥ ३५
स द्रोणं निशितैर्बाणै राजन्विव्याध सप्तभिः ।
पार्षतं च तदा तूर्णमन्यमारोपयद्रथम् ॥ ३६
ततो दुर्योधनो राजा कलिङ्गं समचोदयत् ।
सैन्येन महता युक्तं भारद्वाजस्य रक्षणे ॥ ३७
ततः सा महती सेना कलिङ्गानां जनेश्वर ।
भीममभ्युद्ययौ तूर्णं तव पुत्रस्य शासनात् ॥ ३८
पाञ्चाल्यमभिसंत्यज्य द्रोणोऽपि रथिनां वरः ।
विराटद्रुपदौ वृद्धौ योधयामास संगतौ ।
धृष्टद्युम्नोऽपि समरे धर्मराजं समभ्ययात् ॥ ३९
ततः प्रववृते युद्धं तुमुलं लोमहर्षणम् ।
कलिङ्गानां च समरे भीमस्य च महात्मनः ।
जगतः प्रक्षयकरं घोररूपं भयानकम् ॥ ४०

इति श्रीमहाभारते भीष्मपर्वणि
एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

५०

धृतराष्ट्र उवाच ।

तथा प्रतिसमादिष्टः कलिङ्गो वाहिनीपतिः ।
कथमद्भुतकर्माणं भीमसेनं महाबलम् ॥ १
चरन्तं गदया वीरं दण्डपाणिमिवान्तकम् ।
योधयामास समरे कलिङ्गः सह सेनया ॥ २

संजय उवाच ।

पुत्रेण तव राजेन्द्र स तथोक्तो महाबलः ।
महत्या सेनया गुप्तः प्रायाद्भीमरथं प्रति ॥ ३
तामापतन्तीं सहसा कलिङ्गानां महाचमूम् ।
रथनागाश्वकलिलां प्रगृहीतमहायुधाम् ॥ ४

भीमसेनः कलिङ्गानामार्छद्भारत वाहिनीम् ।
केतुमन्तं च नैषादिमायान्तं सह चेदिभिः ॥ ५
ततः श्रुतायुः संक्रुद्धो राज्ञा केतुमता सह ।
आससाद रणे भीमं व्यूढानीकेषु चेदिषु ॥ ६
रथैरनेकसाहस्रैः कलिङ्गानां जनाधिपः ।
अयुतेन गजानां च निषादैः सह केतुमान् ।
भीमसेनं रणे राजन्समन्तात्पर्यवारयत् ॥ ७
चेदिमत्स्यकरूषाश्च भीमसेनपुरोगमाः ।
अभ्यवर्तन्त सहसा निषादान्सह राजभिः ॥ ८
ततः प्रववृते युद्धं घोररूपं भयानकम् ।
प्रजानन्न च योधान्स्वान्परस्परजिघांसया ॥ ९
घोरमासीत्ततो युद्धं भीमस्य सहसा परैः ।
यथेन्द्रस्य महाराज महत्या दैत्यसेनया ॥ १०
तस्य सैन्यस्य संग्रामे युध्यमानस्य भारत ।
बभूव सुमहाञ्शब्दः सागरस्येव गर्जतः ॥ ११
अन्योन्यस्य तदा योधा निकृन्तन्तो विशां पते ।
महीं चक्रुश्चितां सर्वां शशशोणितसंनिभाम् ॥ १२
योधांश्च स्वान्परान्वापि नाभ्यजानञ्जिघांसया ।
स्वानप्याददते स्वाश्च शूराः समरदुर्जयाः ॥ १३
विमर्दः सुमहानासीदल्पानां बहुभिः सह ।
कलिङ्गैः सह चेदीनां निषादैश्च विशां पते ॥ १४
कृत्वा पुरुषकारं तु यथाशक्ति महाबलाः ।
भीमसेनं परित्यज्य संन्यवर्तन्त चेदयः ॥ १५
सर्वैः कलिङ्गैरासन्नः संनिवृत्तेषु चेदिषु ।
स्वबाहुबलमास्थाय न न्यवर्तत पाण्डवः ॥ १६
न चचाल रथोपस्थाद्भीमसेनो महाबलः ।
शितैरवाकिरन्बाणैः कलिङ्गानां वरूथिनीम् ॥ १७
कलिङ्गस्तु महेष्वासः पुत्रश्चास्य महारथः ।
शक्रदेव इति ख्यातो जघ्नतुः पाण्डवं शरैः ॥ १८
ततो भीमो महाबाहुर्विधुन्वन्रुचिरं धनुः ।
योधयामास कालिङ्गान्स्वबाहुबलमाश्रितः ॥ १९
शक्रदेवस्तु समरे विसृजन्सायकान्बहून् ।
अश्वाञ्जघान समरे भीमसेनस्य सायकैः ।
ववर्ष शरवर्षाणि तपान्ते जलदो यथा ॥ २०
हताश्वे तु रथे तिष्ठन्भीमसेनो महाबलः ।
शक्रदेवाय चिक्षेप सर्वशैक्यायसीं गदाम् ॥ २१
स तया निहतो राजन्कलिङ्गस्य सुतो रथात् ।
सध्वजः सह सूतेन जगाम धरणीतलम् ॥ २२
हतमात्मसुतं दृष्ट्वा कलिङ्गानां जनाधिपः ।
रथैरनेकसाहस्रैर्भीमस्यावारयद्दिशः ॥ २३
ततो भीमो महाबाहुर्गुर्वीं त्यक्त्वा महागदाम् ।
उद्बबर्हाथ निस्त्रिंशं चिकीर्षुः कर्म दारुणम् ॥ २४
चर्म चाप्रतिमं राजन्नार्षभं पुरुषर्षभ ।
नक्षत्रैरर्धचन्द्रैश्च शातकुम्भमयैश्चितम् ॥ २५
कलिङ्गस्तु ततः क्रुद्धो धनुर्ज्यामवमृज्य ह ।
प्रगृह्य च शरं घोरमेकं सर्पविषोपमम् ।
प्राहिणोद्भीमसेनाय वधाकाङ्क्षी जनेश्वरः ॥ २६
तमापतन्तं वेगेन प्रेरितं निशितं शरम् ।
भीमसेनो द्विधा राजंश्चिच्छेद विपुलासिना ।
उदक्रोशच्च संहृष्टस्त्रासयानो वरूथिनीम् ॥ २७
कलिङ्गस्तु ततः क्रुद्धो भीमसेनाय संयुगे ।
तोमरान्प्राहिणोच्छीघ्रं चतुर्दश शिलाशितान् ॥ २८
तानप्राप्तान्महाबाहुः खगतानेव पाण्डवः ।
चिच्छेद सहसा राजन्नसंभ्रान्तो वरासिना ॥ २९
निकृत्य तु रणे भीमस्तोमरान्वै चतुर्दश ।
भानुमन्तमभिप्रेक्ष्य प्राद्रवत्पुरुषर्षभः ॥ ३०
भानुमांस्तु ततो भीमं शरवर्षेण छादयन् ।
ननाद बलवन्नादं नादयानो नभस्तलम् ॥ ३१
न तं स ममृषे भीमः सिंहनादं महारणे ।
ततः स्वरेण महता विननाद महास्वनम् ॥ ३२

तेन शब्देन वित्रस्ता कलिङ्गानां वरूथिनी ।
न भीमं समरे मेने मानुषं भरतर्षभ ॥ ३३
ततो भीमो महाराज नदित्वा विपुलं स्वनम् ।
सासिर्वेगादवप्लुत्य दन्ताभ्यां वारणोत्तमम् ॥ ३४
आरुरोह ततो मध्यं नागराजस्य मारिष ।
खड्गेन पृथुना मध्ये भानुमन्तमथाच्छिनत् ॥ ३५
सोऽन्तरायुधिनं हत्वा राजपुत्रमरिंदमः ।
गुरुभारसहस्कन्धे नागस्यासिमपातयत् ॥ ३६
छिन्नस्कन्धः स विनदन्पपात गजयूथपः ।
आरुग्णः सिन्धुवेगेन सानुमानिव पर्वतः ॥ ३७
ततस्तस्मादवप्लुत्य गजाद्भारत भारतः ।
खड्गपाणिरदीनात्मा अतिष्ठद्भुवि दंशितः ॥ ३८
स चचार बहून्मार्गानभीतः पातयन्गजान् ।
अग्निचक्रमिवाविद्धं सर्वतः प्रत्यदृश्यत ॥ ३९
अश्ववृन्देषु नागेषु रथानीकेषु चाभिभूः ।
पदातीनां च संघेषु विनिघ्नञ्शोणितोक्षितः ।
श्येनवद्व्यचरद्भीमो रणे रिपुबलोत्कटः ॥ ४०
छिन्दंस्तेषां शरीराणि शिरांसि च महाजवः ।
खड्गेन शितधारेण संयुगे गजयोधिनाम् ॥ ४१
पदातिरेकः संक्रुद्धः शत्रूणां भयवर्धनः ।
मोहयामास च तदा कालान्तकयमोपमः ॥ ४२
मूढाश्च ते तमेवाजौ विनदन्तः समाद्रवन् ।
सासिमुत्तमवेगेन विचरन्तं महारणे ॥ ४३
निकृत्य रथिनामाजौ रथेषाश्च युगानि च ।
जघान रथिनश्चापि बलवानरिमर्दनः ॥ ४४
भीमसेनश्चरन्मार्गान्सुबहून्प्रत्यदृश्यत ।
भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं प्रसृतं सृतम् ।
संपातं समुदीर्यं च दर्शयामास पाण्डवः ॥ ४५
केचिदग्रासिना छिन्नाः पाण्डवेन महात्मना ।
विनेदुर्भिन्नमर्माणो निपेतुश्च गतासवः ॥ ४६
छिन्नदन्ताग्रहस्ताश्च भिन्नकुम्भास्तथापरे ।
वियोधाः स्वान्यनीकानि जघ्नुर्भारत वारणाः ।
निपेतुरुर्व्यां च तथा विनदन्तो महारवान् ॥ ४७
छिन्नांश्च तोमरांश्चापान्महामात्रशिरांसि च ।
परिस्तोमानि चित्राणि कक्ष्याश्च कनकोज्ज्वलाः ॥ ४८
ग्रैवेयाण्यथ शक्तीश्च पताकाः कणपांस्तथा ।
तूणीराण्यथ यन्त्राणि विचित्राणि धनूंषि च ॥ ४९
अग्निकुण्डानि शुभ्राणि तोत्रांश्चैवाङ्कुशैः सह ।
घण्टाश्च विविधा राजन्हेमगर्भांस्त्सरूनपि ।
पततः पतितांश्चैव पश्यामः सह सादिभिः ॥ ५०
छिन्नगात्रावरकरैर्निहतैश्चापि वारणैः ।
आसीत्तस्मिन्समास्तीर्णा पतितैर्भूर्नगैरिव ॥ ५१
विमृद्यैवं महानागान्ममर्दाश्वान्नरर्षभः ।
अश्वारोहवरांश्चापि पातयामास भारत ।
तद्घोरमभवद्युद्धं तस्य तेषां च भारत ॥ ५२
खलीनान्यथ योक्त्राणि कशाश्च कनकोज्ज्वलाः ।
परिस्तोमाश्च प्रासाश्च ऋष्टयश्च महाधनाः ॥ ५३
कवचान्यथ चर्माणि चित्राण्यास्तरणानि च ।
तत्र तत्रापविद्धानि व्यदृश्यन्त महाहवे ॥ ५४
प्रोथयन्त्रैर्विचित्रैश्च शस्त्रैश्च विमलैस्तथा ।
स चक्रे वसुधां कीर्णां शबलैः कुसुमैरिव ॥ ५५
आप्लुत्य रथिनः कांश्चित्परामृश्य महाबलः ।
पातयामास खड्गेन सध्वजानपि पाण्डवः ॥ ५६
मुहुरुत्पततो दिक्षु धावतश्च यशस्विनः ।
मार्गांश्च चरतश्चित्रान्व्यस्मयन्त रणे जनाः ॥ ५७
निजघान पदा कांश्चिदाक्षिप्यान्यानपोथयत् ।
खड्गेनान्यांश्च चिच्छेद नादेनान्यांश्च भीषयन् ॥ ५८
ऊरुवेगेन चाप्यन्यान्पातयामास भूतले ।
अपरे चैनमालोक्य भयात्पञ्चत्वमागताः ॥ ५९
एवं सा बहुला सेना कलिङ्गानां तरस्विनाम् ।

परिवार्य रणे भीष्मं भीमसेनमुपाद्रवत् ॥ ६०
ततः कलिङ्गसैन्यानां प्रमुखे भरतर्षभ ।
श्रुतायुषमभिप्रेक्ष्य भीमसेनः समभ्ययात् ॥ ६१
तमायान्तमभिप्रेक्ष्य कलिङ्गो नवभिः शरैः ।
भीमसेनममेयात्मा प्रत्यविध्यत्स्तनान्तरे ॥ ६२
कलिङ्गबाणाभिहतस्तोत्रार्दित इव द्विपः ।
भीमसेनः प्रजज्वाल क्रोधेनाग्निरिवेन्धनैः ॥ ६३
अथाशोकः समादाय रथं हेमपरिष्कृतम् ।
भीमं संपादयामास रथेन रथसारथिः ॥ ६४
तमारुह्य रथं तूर्णं कौन्तेयः शत्रुसूदनः ।
कलिङ्गमभिदुद्राव तिष्ठ तिष्ठेति चाब्रवीत् ॥ ६५
ततः श्रुतायुर्बलवान्भीमाय निशिताञ्शरान् ।
प्रेषयामास संक्रुद्धो दर्शयन्पाणिलाघवम् ॥ ६६
स कार्मुकवरोत्सृष्टैर्नवभिर्निशितैः शरैः ।
समाहतो भृशं राजन्कलिङ्गेन महायशाः ।
संचुक्रुधे भृशं भीमो दण्डाहत इवोरगः ॥ ६७
क्रुद्धश्च चापमायम्य बलवद्बलिनां वरः ।
कलिङ्गमवधीत्पार्थो भीमः सप्तभिरायसैः ॥ ६८
क्षुराभ्यां चक्ररक्षौ च कलिङ्गस्य महाबलौ ।
सत्यदेवं च सत्यं च प्राहिणोद्यमसादनम् ॥ ६९
ततः पुनरमेयात्मा नाराचैर्निशितैस्त्रिभिः ।
केतुमन्तं रणे भीमोऽगमयद्यमसादनम् ॥ ७०
ततः कलिङ्गाः संक्रुद्धा भीमसेनममर्षणम् ।
अनीकैर्बहुसाहस्रैः क्षत्रियाः समवारयन् ॥ ७१
ततः शक्तिगदाखड्गतोमरर्ष्टिपरश्वधैः ।
कलिङ्गाश्च ततो राजन्भीमसेनमवाकिरन् ॥ ७२
संनिवार्य स तां घोरां शरवृष्टिं समुत्थिताम् ।
गदामादाय तरसा परिप्लुत्य महाबलः ।
भीमः सप्तशतान्वीराननयद्यमसादनम् ॥ ७३
पुनश्चैव द्विसाहस्रान्कलिङ्गानरिमर्दनः ।
प्राहिणोन्मृत्युलोकाय तदद्भुतमिवाभवत् ॥ ७४
एवं स तान्यनीकानि कलिङ्गानां पुनः पुनः ।
बिभेद समरे वीरः प्रेक्ष्य भीष्मं महाव्रतम् ॥ ७५
हतारोहाश्च मातङ्गाः पाण्डवेन महात्मना ।
विप्रजग्मुरनीकेषु मेघा वातहता इव ।
मृद्नन्तः स्वान्यनीकानि विनदन्तः शरातुराः ॥ ७६
ततो भीमो महाबाहुः शङ्खं प्राध्मापयद्बली ।
सर्वकालिङ्गसैन्यानां मनांसि समकम्पयत् ॥ ७७
मोहश्चापि कलिङ्गानामाविवेश परंतप ।
प्राकम्पन्त च सैन्यानि वाहनानि च सर्वशः ॥ ७८
भीमेन समरे राजन्गजेन्द्रेणेव सर्वतः ।
मार्गान्बहून्विचरता धावता च ततस्ततः ।
मुहुरुत्पतता चैव संमोहः समजायत ॥ ७९
भीमसेनभयत्रस्तं सैन्यं च समकम्पत ।
क्षोभ्यमाणमसंबाधं ग्राहेणेव महत्सरः ॥ ८०
त्रासितेषु च वीरेषु भीमेनाद्भुतकर्मणा ।
पुनरावर्तमानेषु विद्रवत्सु च संघशः ॥ ८१
सर्वकालिङ्गयोधेषु पाण्डूनां ध्वजिनीपतिः ।
अब्रवीत्स्वान्यनीकानि युध्यध्वमिति पार्षतः ॥ ८२
सेनापतिवचः श्रुत्वा शिखण्डिप्रमुखा गणाः ।
भीममेवाभ्यवर्तन्त रथानीकैः प्रहारिभिः ॥ ८३
धर्मराजश्च तान्सर्वानुपजग्राह पाण्डवः ।
महता मेघवर्णेन नागानीकेन पृष्ठतः ॥ ८४
एवं संचोद्य सर्वाणि स्वान्यनीकानि पार्षतः ।
भीमसेनस्य जग्राह पार्ष्णिं सत्पुरुषोचिताम् ॥ ८५
न हि पाञ्चालराजस्य लोके कश्चन विद्यते ।
भीमसात्यकयोरन्यः प्राणेभ्यः प्रियकृत्तमः ॥ ८६
सोऽपश्यत्तं कलिङ्गेषु चरन्तमरिसूदनम् ।
भीमसेनं महाबाहुं पार्षतः परवीरहा ॥ ८७
ननर्द बहुधा राजन्हृष्टश्चासीत्परंतपः ।

शङ्खं दध्मौ च समरे सिंहनादं ननाद च ॥ ८८
स च पारावताश्वस्य रथे हेमपरिष्कृते ।
कोविदारध्वजं दृष्ट्वा भीमसेनः समाश्वसत् ॥ ८९
धृष्टद्युम्नस्तु तं दृष्ट्वा कलिङ्गैः समभिद्रुतम् ।
भीमसेनममेयात्मा त्राणायाजौ समभ्ययात् ॥ ९०
तौ दूरात्सात्यकिर्दृष्ट्वा धृष्टद्युम्नवृकोदरौ ।
कलिङ्गान्समरे वीरौ योधयन्तौ मनस्विनौ ॥ ९१
स तत्र गत्वा शैनेयो जवेन जयतां वरः ।
पार्थपार्षतयोः पार्ष्णिं जग्राह पुरुषर्षभः ॥ ९२
स कृत्वा कदनं तत्र प्रगृहीतशरासनः ।
आस्थितो रौद्रमात्मानं जघान समरे परान् ॥ ९३
कलिङ्गप्रभवां चैव मांसशोणितकर्दमाम् ।
रुधिरस्यन्दिनीं तत्र भीमः प्रावर्तयन्नदीम् ॥ ९४
अन्तरेण कलिङ्गानां पाण्डवानां च वाहिनीम् ।
संततार सुदुस्तारां भीमसेनो महाबलः ॥ ९५
भीमसेनं तथा दृष्ट्वा प्राक्रोशंस्तावका नृप ।
कालोऽयं भीमरूपेण कलिङ्गैः सह युध्यते ॥ ९६
ततः शांतनवो भीष्मः श्रुत्वा तं निनदं रणे ।
अभ्ययात्त्वरितो भीमं व्यूढानीकः समन्ततः ॥९७
तं सात्यकिर्भीमसेनो धृष्टद्युम्नश्च पार्षतः ।
अभ्यद्रवन्त भीष्मस्य रथं हेमपरिष्कृतम् ॥ ९८
परिवार्य च ते सर्वे गाङ्गेयं रभसं रणे ।
त्रिभिस्त्रिभिः शरैर्घोरैर्भीष्ममानर्छुरञ्जसा ॥ ९९
प्रत्यविध्यत तान्सर्वान्पिता देवव्रतस्तव ।
यतमानान्महेष्वासांस्त्रिभिस्त्रिभिरजिह्मगैः ॥ १००
ततः शरसहस्रेण संनिवार्य महारथान् ।
हयान्काञ्चनसंनाहान्भीमस्य न्यहनच्छरैः ॥ १०१
हताश्वे तु रथे तिष्ठन्भीमसेनः प्रतापवान् ।
शक्तिं चिक्षेप तरसा गाङ्गेयस्य रथं प्रति ॥ १०२
अप्राप्तामेव तां शक्तिं पिता देवव्रतस्तव ।
त्रिधा चिच्छेद समरे सा पृथिव्यामशीर्यत ॥१०३
ततः शैक्यायसीं गुर्वीं प्रगृह्य बलवद्गदाम् ।
भीमसेनो रथात्तूर्णं पुप्लुवे मनुजर्षभ ॥ १०४
सात्यकोऽपि ततस्तूर्णं भीमस्य प्रियकाम्यया ।
सारथिं कुरुवृद्धस्य पातयामास सायकैः ॥ १०५
भीष्मस्तु निहते तस्मिन्सारथौ रथिनां वरः ।
वातायमानैस्तैरश्वैरपनीतो रणाजिरात् ॥ १०६
भीमसेनस्ततो राजन्नपनीते महाव्रते ।
प्रजज्वाल यथा वह्निर्दहन्कक्षमिवैधितः ॥ १०७
स हत्वा सर्वकालिङ्गान्सेनामध्ये व्यतिष्ठत ।
नैनमभ्युत्सहन्केचित्तावका भरतर्षभ ॥ १०८
धृष्टद्युम्नस्तमारोप्य स्वरथे रथिनां वरः ।
पश्यतां सर्वसैन्यानामपोवाह यशस्विनम् ॥ १०९
संपूज्यमानः पाञ्चालैर्मत्स्यैश्च भरतर्षभ ।
धृष्टद्युम्नं परिष्वज्य समेयादथ सात्यकिम् ॥ ११०
अथाब्रवीद्भीमसेनं सात्यकिः सत्यविक्रमः ।
प्रहर्षयन्यदुव्याघ्रो धृष्टद्युम्नस्य पश्यतः ॥ १११
दिष्ट्या कलिङ्गराजश्च राजपुत्रश्च केतुमान् ।
शक्रदेवश्च कालिङ्गः कलिङ्गाश्च मृधे हताः ॥११२
स्वबाहुबलवीर्येण नागाश्वरथसंकुलः ।
महाव्यूहः कलिङ्गानामेकेन मृदितस्त्वया ॥ ११३
एवमुक्त्वा शिनेर्नप्ता दीर्घबाहुररिंदमः ।
रथाद्रथमभिद्रुत्य पर्यष्वजत पाण्डवम् ॥ ११४
ततः स्वरथमारुह्य पुनरेव महारथः ।
तावकानवधीत्क्रुद्धो भीमस्य बलमादधत् ॥ ११५

इति श्रीमहाभारते भीष्मपर्वणि
पञ्चाशोऽध्यायः ॥ ५० ॥

५१

संजय उवाच ।

गतापराह्णभूयिष्ठे तस्मिन्नहनि भारत ।

रथनागाश्वपत्तीनां सादिनां च महाक्षये ॥ १
द्रोणपुत्रेण शल्येन कृपेण च महात्मना ।
समसज्जत पाञ्चाल्यस्त्रिभिरेतैर्महारथैः ॥ २
स लोकविदितानश्वान्निजघान महाबलः ।
द्रौणेः पाञ्चालदायादः शितैर्दशभिराशुगैः ॥ ३
ततः शल्यरथं तूर्णमास्थाय हतवाहनः ।
द्रौणिः पाञ्चालदायादमभ्यवर्षदथेषुभिः ॥ ४
धृष्टद्युम्नं तु संसक्तं द्रौणिना दृश्य भारत ।
सौभद्रोऽभ्यपतत्तूर्णं विकिरन्निशिताञ्शरान् ॥ ५
स शल्यं पञ्चविंशत्या कृपं च नवभिः शरैः ।
अश्वत्थामानमष्टाभिर्विव्याध पुरुषर्षभ ॥ ६
आर्जुनिं तु ततस्तूर्णं द्रौणिर्विव्याध पत्रिणा ।
शल्यो द्वादशभिश्चैव कृपश्च निशितैस्त्रिभिः ॥ ७
लक्ष्मणस्तव पौत्रस्तु तव पौत्रमवस्थितम् ।
अभ्यवर्तत संहृष्टस्ततो युद्धमवर्तत ॥ ८
दौर्योधनिस्तु संक्रुद्धः सौभद्रं नवभिः शरैः ।
विव्याध समरे राजंस्तदद्भुतमिवाभवत् ॥ ९
अभिमन्युस्तु संक्रुद्धो भ्रातरं भरतर्षभ ।
शरैः पञ्चाशता राजन्क्षिप्रहस्तोऽभ्यविध्यत ॥ १०
लक्ष्मणोऽपि ततस्तस्य धनुश्चिच्छेद पत्रिणा ।
मुष्टिदेशे महाराज तत उच्चुक्रुशुर्जनाः ॥ ११
तद्विहाय धनुश्छिन्नं सौभद्रः परवीरहा ।
अन्यदादत्तवांश्चित्रं कार्मुकं वेगवत्तरम् ॥ १२
तौ तत्र समरे हृष्टौ कृतप्रतिकृतैषिणौ ।
अन्योन्यं विशिखैस्तीक्ष्णैर्जघ्नतुः पुरुषर्षभौ ॥ १३
ततो दुर्योधनो राजा दृष्ट्वा पुत्रं महारथम् ।
पीडितं तव पौत्रेण प्रायात्तत्र जनेश्वरः ॥ १४
संनिवृत्ते तव सुते सर्व एव जनाधिपाः ।
आर्जुनिं रथवंशेन समन्तात्पर्यवारयन् ॥ १५
स तैः परिवृतः शूरैः शूरो युधि सुदुर्जयैः ।
न स्म विव्यथते राजन्कृष्णतुल्यपराक्रमः ॥ १६
सौभद्रमथ संसक्तं तत्र दृष्ट्वा धनंजयः ।
अभिदुद्राव संक्रुद्धस्त्रातुकामः स्वमात्मजम् ॥ १७
ततः सरथनागाश्वा भीष्मद्रोणपुरोगमाः ।
अभ्यवर्तन्त राजानः सहिताः सव्यसाचिनम् ॥
उद्धूतं सहसा भौमं नागाश्वरथसादिभिः ।
दिवाकरपथं प्राप्य रजस्तीव्रमदृश्यत ॥ १९
तानि नागसहस्राणि भूमिपालशतानि च ।
तस्य बाणपथं प्राप्य नाभ्यवर्तन्त सर्वशः ॥ २०
प्रणेदुः सर्वभूतानि बभूवुस्तिमिरा दिशः ।
कुरूणामनयस्तीव्रः समदृश्यत दारुणः ॥ २१
नाप्यन्तरिक्षं न दिशो न भूमिर्न च भास्करः ।
प्रजज्ञे भरतश्रेष्ठ शरसंघैः किरीटिनः ॥ २२
सादितध्वजनागास्तु हताश्वा रथिनो भृशम् ।
विप्रद्रुतरथाः केचिद्दृश्यन्ते रथयूथपाः ॥ २३
विरथा रथिनश्चान्ये धावमानाः समन्ततः ।
तत्र तत्रैव दृश्यन्ते सायुधाः साङ्गदैर्भुजैः ॥ २४
हयारोहा हयांस्त्यक्त्वा गजारोहाश्च दन्तिनः ।
अर्जुनस्य भयाद्राजन्समन्ताद्विप्रदुद्रुवुः ॥ २५
रथेभ्यश्च गजेभ्यश्च हयेभ्यश्च नराधिपाः ।
पतिताः पात्यमानाश्च दृश्यन्तेऽर्जुनताडिताः ॥ २६
सगदानुद्यतान्बाहून्सखड्गांश्च विशां पते ।
सप्रासांश्च सतूणीरान्सशरान्सशरासनान् ॥ २७
साङ्कुशान्सपताकांश्च तत्र तत्रार्जुनो नृणाम् ।
निचकर्त शरैरुग्रै रौद्रं बिभ्रद्वपुस्तदा ॥ २८
परिघाणां प्रवृद्धानां मुद्गराणां च मारिष ।
प्रासानां भिण्डिपालानां निस्त्रिंशानां च संयुगे ॥
परश्वधानां तीक्ष्णानां तोमराणां च भारत ।
वर्मणां चापविद्धानां कवचानां च भूतले ॥ ३०
ध्वजानां चर्मणां चैव व्यजनानां च सर्वशः ।

छत्राणां हेमदण्डानां चामराणां च भारत ॥ ३१
प्रतोदानां कशानां च योक्त्राणां चैव मारिष ।
राशयश्चात्र दृश्यन्ते विनिकीर्णा रणक्षितौ ॥ ३२
नासीत्तत्र पुमान्कश्चित्तव सैन्यस्य भारत ।
योऽर्जुनं समरे शूरं प्रत्युद्यायात्कथंचन ॥ ३३
यो यो हि समरे पार्थं प्रत्युद्याति विशां पते ।
स स वै विशिखैस्तीक्ष्णैः परलोकाय नीयते ॥३४
तेषु विद्रवमाणेषु तव योधेषु सर्वशः ।
अर्जुनो वासुदेवश्च दध्मतुर्वारिजोत्तमौ ॥ ३५
तत्प्रभग्नं बलं दृष्ट्वा पिता देवव्रतस्तव ।
अब्रवीत्समरे शूरं भारद्वाजं स्मयन्निव ॥ ३६
एष पाण्डुसुतो वीरः कृष्णेन सहितो बली ।
तथा करोति सैन्यानि यथा कुर्याद्धनंजयः ॥ ३७
न ह्येष समरे शक्यो जेतुमद्य कथंचन ।
यथास्य दृश्यते रूपं कालान्तकयमोपमम् ॥ ३८
न निवर्तयितुं चापि शक्येयं महती चमूः ।
अन्योन्यप्रेक्षया पश्य द्रवतीयं वरूथिनी ॥ ३९
एष चास्तं गिरिश्रेष्ठं भानुमान्प्रतिपद्यते ।
वपूंषि सर्वलोकस्य संहरन्निव सर्वथा ॥ ४०
तत्रावहारं संप्राप्तं मन्येऽहं पुरुषर्षभ ।
श्रान्ता भीताश्च नो योधा न योत्स्यन्ति कथंचन॥
एवमुक्त्वा ततो भीष्मो द्रोणमाचार्यसत्तमम् ।
अवहारमथो चक्रे तावकानां महारथः ॥ ४२
ततोऽवहारः सैन्यानां तव तेषां च भारत ।
अस्तं गच्छति सूर्येऽभूत्संध्याकाले च वर्तति ॥४३

इति श्रीमहाभारते भीष्मपर्वणि
एकपञ्चाशोऽध्यायः ॥ ५१ ॥

५२

संजय उवाच ।

प्रभातायां तु शर्वर्यां भीष्मः शांतनवस्ततः ।
अनीकान्यनुसंयाने व्यादिदेशाथ भारत ॥ १
गारुडं च महाव्यूहं चक्रे शांतनवस्तदा ।
पुत्राणां ते जयाकाङ्क्षी भीष्मः कुरुपितामहः ॥ २
गरुडस्य स्वयं तुण्डे पिता देवव्रतस्तव ।
चक्षुषी च भरद्वाजः कृतवर्मा च सात्वतः ॥ ३
अश्वत्थामा कृपश्चैव शीर्षमास्तां यशस्विनौ ।
त्रिगर्तैर्मत्स्यकैकेयैर्वाटधानैश्च संयुतौ ॥ ४
भूरिश्रवाः शलः शल्यो भगदत्तश्च मारिष ।
मद्रकाः सिन्धुसौवीरास्तथा पञ्चनदाश्च ये ॥ ५
जयद्रथेन सहिता ग्रीवायां संनिवेशिताः ।
पृष्ठे दुर्योधनो राजा सोदरैः सानुगैर्वृतः ॥ ६
विन्दानुविन्दावावन्त्यौ काम्बोजश्च शकैः सह ।
पुच्छमासन्महाराज शूरसेनाश्च सर्वशः ॥ ७
मागधाश्च कलिङ्गाश्च दाशेरकगणैः सह ।
दक्षिणं पक्षमासाद्य स्थिता व्यूहस्य दंशिताः ॥ ८
काननाश्च विकुञ्जाश्च मुक्ताः पुण्ड्राविषस्तथा ।
बृहद्बलेन सहिता वामं पक्षमुपाश्रिताः ॥ ९
व्यूढं दृष्ट्वा तु तत्सैन्यं सव्यसाची परंतपः ।
धृष्टद्युम्नेन सहितः प्रत्यव्यूहत संयुगे ।
अर्धचन्द्रेण व्यूहेन व्यूहं तमतिदारुणम् ॥ १०
दक्षिणं शृङ्गमास्थाय भीमसेनो व्यरोचत ।
नानाशस्त्रौघसंपन्नैर्नानादेश्यैर्नृपैर्वृतः ॥ ११
तदन्वेव विराटश्च द्रुपदश्च महारथः ।
तदनन्तरमेवासीन्नीलो नीलायुधैः सह ॥ १२
नीलादनन्तरं चैव धृष्टकेतुर्महारथः ।
चेदिकाशिकरूषैश्च पौरवैश्चाभिसंवृतः ॥ १३
धृष्टद्युम्नः शिखण्डी च पाञ्चालाश्च प्रभद्रकाः ।
मध्ये सैन्यस्य महतः स्थिता युद्धाय भारत ॥ १४
तथैव धर्मराजोऽपि गजानीकेन संवृतः ।
ततस्तु सात्यकी राजन्द्रौपद्याः पञ्च चात्मजाः ॥ १५

अभिमन्युस्ततस्तूर्णमिरावांश्च ततः परम् ।
भैमसेनिस्ततो राजन्केकयाश्च महारथाः ॥ १६
ततोऽभूद्द्विपदां श्रेष्ठो वामं पार्श्वमुपाश्रितः ।
सर्वस्य जगतो गोप्ता गोप्ता यस्य जनार्दनः ॥ १७
एवमेतन्महाव्यूहं प्रत्यव्यूहन्त पाण्डवाः ।
वधार्थं तव पुत्राणां तत्पक्षं ये च संगताः ॥ १८
ततः प्रववृते युद्धं व्यतिषक्तरथद्विपम् ।
तावकानां परेषां च निघ्नतामितरेतरम् ॥ १९
हयौघाश्च रथौघाश्च तत्र तत्र विशां पते ।
संपतन्तः स्म दृश्यन्ते निघ्नमानाः परस्परम् ॥ २०
धावतां च रथौघानां निघ्नतां च पृथक्पृथक् ।
बभूव तुमुलः शब्दो विमिश्रो दुन्दुभिस्वनैः ॥ २१
दिवस्पृङ्नरवीराणां निघ्नतामितरेतरम् ।
संप्रहारे सुतुमुले तव तेषां च भारत ॥ २२

इति श्रीमहाभारते भीष्मपर्वणि
द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

५३

संजय उवाच ।

ततो व्यूढेष्वनीकेषु तावकेष्वितरेषु च ।
धनंजयो रथानीकमवधीत्तव भारत ।
शरैरतिरथो युद्धे पातयन्रथयूथपान् ॥ १
ते वध्यमानाः पार्थेन कालेनेव युगक्षये ।
धार्तराष्ट्रा रणे यत्ताः पाण्डवान्प्रत्ययोधयन् ।
प्रार्थयाना यशो दीप्तं मृत्युं कृत्वा निवर्तनम् ॥ २
एकाग्रमनसो भूत्वा पाण्डवानां वरूथिनीम् ।
बभञ्जुर्बहुशो राजंस्ते चाभज्यन्त संयुगे ॥ ३
द्रवद्भिरथ भग्नैश्च परिवर्तद्भिरेव च ।
पाण्डवैः कौरवैश्चैव न प्रज्ञायत किंचन ॥ ४
उदतिष्ठद्रजो भौमं छादयानं दिवाकरम् ।
दिशः प्रतिदिशो वापि तत्र जज्ञुः कथंचन ॥ ५
अनुमानेन संज्ञाभिर्नामगोत्रैश्च संयुगे ।
वर्तते स्म तदा युद्धं तत्र तत्र विशां पते ॥ ६
न व्यूहो भिद्यते तत्र कौरवाणां कथंचन ।
रक्षितः सत्यसंधेन भारद्वाजेन धीमता ॥ ७
तथैव पाण्डवेयानां रक्षितः सव्यसाचिना ।
नाभिद्यत महाव्यूहो भीमेन च सुरक्षितः ॥ ८
सेनाग्रादभिनिष्पत्य प्रायुध्यंस्तत्र मानवाः ।
उभयोः सेनयो राजन्व्यतिषक्तरथद्विपाः ॥ ९
हयारोहैर्हयारोहाः पात्यन्ते स्म महाहवे ।
ऋष्टिभिर्विमलाग्राभिः प्रासैरपि च संयुगे ॥ १०
रथी रथिनमासाद्य शरैः कनकभूषणैः ।
पातयामास समरे तस्मिन्नतिभयंकरे ॥ ११
गजारोहा गजारोहान्नाराचशरतोमरैः ।
संसक्ताः पातयामासुस्तव तेषां च संघशः ॥ १२
पत्तिसंघा रणे पत्तीन्भिण्डिपालपरश्वधैः ।
न्यपातयन्त संहृष्टाः परस्परकृतागसः ॥ १३
पदाती रथिनं संख्ये रथी चापि पदातिनम् ।
न्यपातयच्छितैः शस्त्रैः सेनयोरुभयोरपि ॥ १४
गजारोहा हयारोहान्पातयांचक्रिरे तदा ।
हयारोहा गजस्थांश्च तदद्भुतमिवाभवत् ॥ १५
गजारोहवरैश्चापि तत्र तत्र पदातयः ।
पातिताः समदृश्यन्त तैश्चापि गजयोधिनः ॥ १६
पत्तिसंघा हयारोहैः सादिसंघाश्च पत्तिभिः ।
पात्यमाना व्यदृश्यन्त शतशोऽथ सहस्रशः ॥ १७
ध्वजैस्तत्रापविद्धैश्च कार्मुकैस्तोमरैस्तथा ।
प्रासैस्तथा गदाभिश्च परिघैः कम्पनैस्तथा ॥ १८
शक्तिभिः कवचैश्चित्रैः कणपैरङ्कुशैरपि ।
निस्त्रिंशैर्विमलैश्चापि स्वर्णपुङ्खैः शरैस्तथा ॥ १९
परिस्तोमैः कुथाभिश्च कम्बलैश्च महाधनैः ।
भूर्भाति भरतश्रेष्ठ स्रग्दामैरिव चित्रिता ॥ २०

नराश्वकायैः पतितैर्दन्तिभिश्च महाहवे ।
अगम्यरूपा पृथिवी मांसशोणितकर्दमा ॥ २१
प्रशशाम रजो भौमं व्युक्षितं रणशोणितैः ।
दिशश्च विमलाः सर्वाः संबभूवुर्जनेश्वर ॥ २२
उत्थितान्यगणेयानि कबन्धानि समन्ततः ।
चिह्नभूतानि जगतो विनाशार्थाय भारत ॥ २३
तस्मिन्युद्धे महारौद्रे वर्तमाने सुदारुणे ।
प्रत्यदृश्यन्त रथिनो धावमानाः समन्ततः ॥ २४
ततो द्रोणश्च भीष्मश्च सैन्धवश्च जयद्रथः ।
पुरुमित्रो विकर्णश्च शकुनिश्चापि सौबलः ॥ २५
एते समरदुर्धर्षाः सिंहतुल्यपराक्रमाः ।
पाण्डवानामनीकानि बभञ्जुः स्म पुनः पुनः ॥ २६
तथैव भीमसेनोऽपि राक्षसश्च घटोत्कचः ।
सात्यकिश्चेकितानश्च द्रौपदेयाश्च भारत ॥ २७
तावकांस्तव पुत्रांश्च सहितान्सर्वराजभिः ।
द्रावयामासुराजौ ते त्रिदशा दानवानिव ॥ २८
तथा ते समरेऽन्योन्यं निघ्नन्तः क्षत्रियर्षभाः ।
रक्तोक्षिता घोररूपा विरेजुर्दानवा इव ॥ २९
विनिर्जित्य रिपून्वीराः सेनयोरुभयोरपि ।
व्यदृश्यन्त महामात्रा ग्रहा इव नभस्तले ॥ ३०
ततो रथसहस्रेण पुत्रो दुर्योधनस्तव ।
अभ्ययात्पाण्डवान्युद्धे राक्षसं च घटोत्कचम् ॥ ३१
तथैव पाण्डवाः सर्वे महत्या सेनया सह ।
द्रोणभीष्मौ रणे शूरौ प्रत्युद्ययुररिंदमौ ॥ ३२
किरीटी तु ययौ क्रुद्धः समर्थान्पार्थिवोत्तमान् ।
आर्जुनिः सात्यकिश्चैव ययतुः सौबलं बलम् ॥ ३३
ततः प्रववृते भूयः संग्रामो लोमहर्षणः ।
तावकानां परेषां च समरे विजिगीषताम् ॥ ३४

इति श्रीमहाभारते भीष्मपर्वणि
त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

५४

संजय उवाच ।

ततस्ते पार्थिवाः क्रुद्धाः फल्गुनं वीक्ष्य संयुगे ।
रथैरनेकसाहस्रैः समन्तात्पर्यवारयन् ॥ १
अथैनं रथवृन्देन कोष्टकीकृत्य भारत ।
शरैः सुबहुसाहस्रैः समन्तादभ्यवारयन् ॥ २
शक्तीश्च विमलास्तीक्ष्णा गदाश्च परिघैः सह ।
प्रासान्परश्वधांश्चैव मुद्गरान्मुसलानपि ।
चिक्षिपुः समरे क्रुद्धाः फल्गुनस्य रथं प्रति ॥ ३
शस्त्राणामथ तां वृष्टिं शलभानामिवायतिम् ।
रुरोध सर्वतः पार्थः शरैः कनकभूषणैः ॥ ४
तत्र तल्लाघवं दृष्ट्वा बीभत्सोरतिमानुषम् ।
देवदानवगन्धर्वाः पिशाचोरगराक्षसाः ।
साधु साध्विति राजेन्द्र फल्गुनं प्रत्यपूजयन् ॥ ५
सात्यकिं चाभिमन्युं च महत्या सेनया सह ।
गान्धाराः समरे शूरा रुरुधुः सहसौबलाः ॥ ६
तत्र सौबलकाः क्रुद्धा वार्ष्णेयस्य रथोत्तमम् ।
तिलशश्चिच्छिदुः क्रोधाच्छस्त्रैर्नानाविधैर्युधि ॥ ७
सात्यकिस्तु रथं त्यक्त्वा वर्तमाने महाभये ।
अभिमन्यो रथं तूर्णमारुरोह परंतपः ॥ ८
तावेकरथसंयुक्तौ सौबलेयस्य वाहिनीम् ।
व्यधमेतां शितैस्तूर्णं शरैः संनतपर्वभिः ॥ ९
द्रोणभीष्मौ रणे यत्तौ धर्मराजस्य वाहिनीम् ।
नाशयेतां शरैस्तीक्ष्णैः कङ्कपत्रपरिच्छदैः ॥ १०
ततो धर्मसुतो राजा माद्रीपुत्रौ च पाण्डवौ ।
मिषतां सर्वसैन्यानां द्रोणानीकमुपाद्रवन् ॥ ११
तत्रासीत्सुमहद्युद्धं तुमुलं लोमहर्षणम् ।
यथा देवासुरं युद्धं पूर्वमासीत्सुदारुणम् ॥ १२
कुर्वाणौ तु महत्कर्म भीमसेनघटोत्कचौ ।
दुर्योधनस्ततोऽभ्येत्य तावुभावभ्यवारयत् ॥ १३

तत्राद्भुतमपश्याम हैडिम्बस्य पराक्रमम् ।
अतीत्य पितरं युद्धे यदयुध्यत भारत ॥ १४
भीमसेनस्तु संक्रुद्धो दुर्योधनममर्षणम् ।
हृद्यविध्यत्पृषत्केन प्रहसन्निव पाण्डवः ॥ १५
ततो दुर्योधनो राजा प्रहारवरमोहितः ।
निषसाद रथोपस्थे कश्मलं च जगाम ह ॥ १६
तं विसंज्ञमथो ज्ञात्वा त्वरमाणोऽस्य सारथिः ।
अपोवाह रणाद्राजंस्ततः सैन्यमभिद्यत ॥ १७
ततस्तां कौरवीं सेनां द्रवमाणां समन्ततः ।
निघ्नन्भीमः शरैस्तीक्ष्णैरनुवव्राज पृष्ठतः ॥ १८
पार्षतश्च रथश्रेष्ठो धर्मपुत्रश्च पाण्डवः ।
द्रोणस्य पश्यतः सैन्यं गाङ्गेयस्य च पश्यतः ।
जघ्नतुर्विशिखैस्तीक्ष्णैः परानीकविशातनैः ॥ १९
द्रवमाणं तु तत्सैन्यं तव पुत्रस्य संयुगे ।
नाशक्नुतां वारयितुं भीष्मद्रोणौ महारथौ ॥ २०
वार्यमाणं हि भीष्मेण द्रोणेन च विशां पते ।
विद्रवत्येव तत्सैन्यं पश्यतोर्द्रोणभीष्मयोः ॥ २१
ततो रथसहस्रेषु विद्रवत्सु ततस्ततः ।
तावास्थितावेकरथं सौभद्रशिनिपुंगवौ ।
सौबलीं समरे सेनां शातयेतां समन्ततः ॥ २२
शुशुभाते तदा तौ तु शैनेयकुरुपुंगवौ ।
अमावास्यां गतौ यद्वत्सोमसूर्यौ नभस्तले ॥ २३
अर्जुनस्तु ततः क्रुद्धस्तव सैन्यं विशां पते ।
ववर्ष शरवर्षेण धाराभिरिव तोयदः ॥ २४
वध्यमानं ततस्तत्तु शरैः पार्थस्य संयुगे ।
दुद्राव कौरवं सैन्यं विषादभयकम्पितम् ॥ २५
द्रवतस्तान्समालोक्य भीष्मद्रोणौ महारथौ ।
न्यवारयेतां संरब्धौ दुर्योधनहितैषिणौ ॥ २६
ततो दुर्योधनो राजा समाश्वस्य विशां पते ।
न्यवर्तयत तत्सैन्यं द्रवमाणं समन्ततः ॥ २७
यत्र यत्र सुतं तुभ्यं यो यः पश्यति भारत ।
तत्र तत्र न्यवर्तन्त क्षत्रियाणां महारथाः ॥ २८
तान्निवृत्तान्समीक्ष्यैव ततोऽन्येऽपीतरे जनाः ।
अन्योन्यस्पर्धया राजँल्लज्जयान्येऽवतस्थिरे ॥ २९
पुनरावर्ततां तेषां वेग आसीद्विशां पते ।
पूर्यतः सागरस्येव चन्द्रस्योदयनं प्रति ॥ ३०
संनिवृत्तांस्ततस्तांस्तु दृष्ट्वा राजा सुयोधनः ।
अब्रवीत्त्वरितो गत्वा भीष्मं शांतनवं वचः ॥ ३१
पितामह निबोधेदं यत्त्वा वक्ष्यामि भारत ।
नानुरूपमहं मन्ये त्वयि जीवति कौरव ॥ ३२
द्रोणे चास्त्रविदां श्रेष्ठे सपुत्रे ससुहृज्जने ।
कृपे चैव महेष्वासे द्रवतीयं वरूथिनी ॥ ३३
न पाण्डवाः प्रतिबलास्तव राजन्कथंचन ।
तथा द्रोणस्य संग्रामे द्रौणेश्चैव कृपस्य च ॥ ३४
अनुग्राह्याः पाण्डुसुता नूनं तव पितामह ।
यथेमां क्षमसे वीर वध्यमानां वरूथिनीम् ॥ ३५
सोऽस्मि वाच्यस्त्वया राजन्पूर्वमेव समागमे ।
न योत्स्ये पाण्डवान्संख्ये नापि पार्षतसात्यकी ॥
श्रुत्वा तु वचनं तुभ्यमाचार्यस्य कृपस्य च ।
कर्णेन सहितः कृत्यं चिन्तयानस्तदैव हि ॥ ३७
यदि नाहं परित्याज्यो युवाभ्यामिह संयुगे ।
विक्रमेणानुरूपेण युध्येतां पुरुषर्षभौ ॥ ३८
एतच्छ्रुत्वा वचो भीष्मः प्रहसन्वै मुहुर्मुहुः ।
अब्रवीत्तनयं तुभ्यं क्रोधादुद्वृत्य चक्षुषी ॥ ३९
बहुशो हि मया राजंस्तथ्यमुक्तं हितं वचः ।
अजेयाः पाण्डवा युद्धे देवैरपि सवासवैः ॥ ४०
यत्तु शक्यं मया कर्तुं वृद्धेनाद्य नृपोत्तम ।
करिष्यामि यथाशक्ति प्रेक्षेदानीं सबान्धवः ॥ ४१
अद्य पाण्डुसुतान्सर्वान्ससैन्यान्सह बन्धुभिः ।
मिषतो वारयिष्यामि सर्वलोकस्य पश्यतः ॥ ४२

एवमुक्ते तु भीष्मेण पुत्रास्तव जनेश्वर ।
दध्मुः शङ्खान्मुदा युक्ता भेरीश्च जघ्निरे भृशम् ॥
पाण्डवापि ततो राजञ्श्रुत्वा तं निनदं महत् ।
दध्मुः शङ्खांश्च भेरीश्च मुरजांश्च व्यनादयन् ॥ ४४

इति श्रीमहाभारते भीष्मपर्वणि
चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

५५

धृतराष्ट्र उवाच ।

प्रतिज्ञाते तु भीष्मेण तस्मिन्युद्धे सुदारुणे ।
क्रोधितो मम पुत्रेण दुःखितेन विशेषतः ॥ १
भीष्मः किमकरोत्तत्र पाण्डवेयेषु संजय ।
पितामहे वा पाञ्चालास्तन्ममाचक्ष्व संजय ॥ २

संजय उवाच ।

गतपूर्वाह्णभूयिष्ठे तस्मिन्नहनि भारत ।
जयं प्राप्तेषु हृष्टेषु पाण्डवेषु महात्मसु ॥ ३
सर्वधर्मविशेषज्ञः पिता देवव्रतस्तव ।
अभ्ययाज्जवनैरश्वैः पाण्डवानामनीकिनीम् ।
महत्या सेनया गुप्तस्तव पुत्रैश्च सर्वशः ॥ ४
प्रावर्तत ततो युद्धं तुमुलं लोमहर्षणम् ।
अस्माकं पाण्डवैः सार्धमनयात्तव भारत ॥ ५
धनुषां कूजतां तत्र तलानां चाभिहन्यताम् ।
महान्समभवच्छब्दो गिरीणामिव दीर्यताम् ॥ ६
तिष्ठ स्थितोऽस्मि विद्ध्येनं निवर्तस्व स्थिरो भव ।
स्थितोऽस्मि प्रहरस्वेति शब्दाः श्रूयन्त सर्वशः ॥ ७
काञ्चनेषु तनुत्रेषु किरीटेषु ध्वजेषु च ।
शिलानामिव शैलेषु पतितानामभूत्स्वनः ॥ ८
पतितान्युत्तमाङ्गानि बाहवश्च विभूषिताः ।
व्यचेष्टन्त महीं प्राप्य शतशोऽथ सहस्रशः ॥ ९
हृतोत्तमाङ्गाः केचित्तु तथैवोद्यतकार्मुकाः ।
प्रगृहीतायुधाश्चापि तस्थुः पुरुषसत्तमाः ॥ १०
प्रावर्तत महावेगा नदी रुधिरवाहिनी ।
मातङ्गाङ्गशिलारौद्रा मांसशोणितकर्दमा ॥ ११
वराश्वनरनागानां शरीरप्रभवा तदा ।
परलोकार्णवमुखी गृध्रगोमायुमोदिनी ॥ १२
न दृष्टं न श्रुतं चापि युद्धमेतादृशं नृप ।
यथा तव सुतानां च पाण्डवानां च भारत ॥ १३
नासीद्रथपथस्तत्र योधैर्युधि निपातितैः ।
गजैश्च पतितैर्नीलैर्गिरिशृङ्गैरिवावृतम् ॥ १४
विकीर्णैः कवचैश्चित्रैर्ध्वजैश्छत्रैश्च मारिष ।
शुशुभे तद्रणस्थानं शरदीव नभस्तलम् ॥ १५
विनिर्भिन्नाः शरैः केचिद् अन्तपीडाविकर्षिणः ।
अभीताः समरे शत्रूनभ्यधावन्त दंशिताः ॥ १६
तात भ्रातः सखे बन्धो वयस्य मम मातुल ।
मा मां परित्यजेत्यन्ये चुक्रुशुः पतिता रणे ॥ १७
आधावाभ्येहि मा गच्छ किं भीतोऽसि क्व यास्यसि ।
स्थितोऽहं समरे मा भैरिति चान्ये विचुक्रुशुः ॥ १८
तत्र भीष्मः शांतनवो नित्यं मण्डलकार्मुकः ।
मुमोच बाणान्दीप्ताग्रानहीनाशीविषानिव ॥ १९
शरैरेकायनीकुर्वन्दिशः सर्वा यतव्रतः ।
जघान पाण्डवरथानादिश्यादिश्य भारत ॥ २०
स नृत्यन्वै रथोपस्थे दर्शयन्पाणिलाघवम् ।
अलातचक्रवद्राजंस्तत्र तत्र स्म दृश्यते ॥ २१
तमेकं समरे शूरं पाण्डवाः सृञ्जयास्तथा ।
अनेकशतसाहस्रं समपश्यन्त लाघवात् ॥ २२
मायाकृतात्मानमिव भीष्मं तत्र स्म मेनिरे ।
पूर्वस्यां दिशि तं दृष्ट्वा प्रतीच्यां ददृशुर्जनाः ॥ २३
उदीच्यां चैनमालोक्य दक्षिणस्यां पुनः प्रभो ।
एवं स समरे वीरो गाङ्गेयः प्रत्यदृश्यत ॥ २४
न चैनं पाण्डवेयानां कश्चिच्छक्नोति वीक्षितुम् ।
विशिखानेव पश्यन्ति भीष्मचापच्युतान्बहून् ॥ २५

कुर्वाणं समरे कर्म सूदयानं च वाहिनीम् ।
व्याक्रोशन्त रणे तत्र वीरा बहुविधं बहु ।
अमानुषेण रूपेण चरन्तं पितरं तव ॥ २६
शलभा इव राजानः पतन्ति विधिचोदिताः ।
भीष्माग्निमभि संक्रुद्धं विनाशाय सहस्रशः ॥ २७
न हि मोघः शरः कश्चिदासीद्भीष्मस्य संयुगे ।
नरनागाश्वकायेषु बहुत्वाल्लघुवेधिनः ॥ २८
भिनत्त्येकेन बाणेन सुमुक्तेन पतत्रिणा ।
गजकङ्कटसंनाहं वज्रेणेवाचलोत्तमम् ॥ २९
द्वौ त्रीनपि गजारोहान्पिण्डितान्वर्मितानपि ।
नाराचेन सुतीक्ष्णेन निजघान पिता तव ॥ ३०
यो यो भीष्मं नरव्याघ्रमभ्येति युधि कश्चन ।
मुहूर्तदृष्टः स मया पातितो भुवि दृश्यते ॥ ३१
एवं सा धर्मराजस्य वध्यमाना महाचमूः ।
भीष्मेणातुलवीर्येण व्यशीर्यत सहस्रधा ॥ ३२
प्रकीर्यत महासेना शरवर्षाभितापिता ।
पश्यतो वासुदेवस्य पार्थस्य च महात्मनः ॥ ३३
यतमानापि ते वीरा द्रवमाणान्महारथान् ।
नाशक्नुवन्वारयितुं भीष्मबाणप्रपीडिताः ॥ ३४
महेन्द्रसमवीर्येण वध्यमाना महाचमूः ।
अभज्यत महाराज न च द्वौ सह धावतः ॥ ३५
आविद्धनरनागाश्वं पतितध्वजकूबरम् ।
अनीकं पाण्डुपुत्राणां हाहाभूतमचेतनम् ॥ ३६
जघानात्र पिता पुत्रं पुत्रश्च पितरं तथा ।
प्रियं सखायं चाक्रन्दे सखा दैवबलात्कृतः ॥ ३७
विमुच्य कवचानन्ये पाण्डुपुत्रस्य सैनिकाः ।
प्रकीर्य केशान्धावन्तः प्रत्यदृश्यन्त भारत ॥ ३८
तद्गोकुलमिवोद्भ्रान्तमुद्भ्रान्तरथयूथपम् ।
ददृशे पाण्डुपुत्रस्य सैन्यमार्तस्वरं तदा ॥ ३९
प्रभज्यमानं तत्सैन्यं दृष्ट्वा देवकिनन्दनः ।
उवाच पार्थं बीभत्सुं निगृह्य रथमुत्तमम् ॥ ४०
अयं स कालः संप्राप्तः पार्थ यः काङ्क्षितस्त्वया ।
प्रहरास्मै नरव्याघ्र न चेन्मोहाद्विमुह्यसे ॥ ४१
यत्त्वया कथितं वीर पुरा राज्ञां समागमे ।
भीष्मद्रोणमुखान्सर्वान्धार्तराष्ट्रस्य सैनिकान् ॥ ४२
सानुबन्धान्हनिष्यामि ये मां योत्स्यन्ति संयुगे ।
इति तत्कुरु कौन्तेय सत्यं वाक्यमरिंदम ॥ ४३
बीभत्सो पश्य सैन्यं स्वं भज्यमानं समन्ततः ।
द्रवतश्च महीपालान्सर्वान्यौधिष्ठिरे बले ॥ ४४
दृष्ट्वा हि समरे भीष्मं व्यात्ताननमिवान्तकम् ।
भयार्ताः संप्रणश्यन्ति सिंहं क्षुद्रमृगा इव ॥ ४५
एवमुक्तः प्रत्युवाच वासुदेवं धनंजयः ।
चोदयाश्वान्यतो भीष्मो विगाह्यैतद्बलार्णवम् ॥ ४६
ततोऽश्वान्रजतप्रख्यांश्चोदयामास माधवः ।
यतो भीष्मरथो राजन्दुष्प्रेक्ष्यो रश्मिमानिव ॥ ४७
ततस्तत्पुनरावृत्तं युधिष्ठिरबलं महत् ।
दृष्ट्वा पार्थं महाबाहुं भीष्मायोद्यन्तमाहवे ॥ ४८
ततो भीष्मः कुरुश्रेष्ठः सिंहवद्विनदन्मुहुः ।
धनंजयरथं तूर्णं शरवर्षैरवाकिरत् ॥ ४९
क्षणेन स रथस्तस्य सहयः सहसारथिः ।
शरवर्षेण महता संछन्नो न प्रकाशते ॥ ५०
वासुदेवस्त्वसंभ्रान्तो धैर्यमास्थाय सत्त्ववान् ।
चोदयामास तानश्वान्वितुन्नान्भीष्मसायकैः ॥ ५१
ततः पार्थो धनुर्गृह्य दिव्यं जलदनिस्वनम् ।
पातयामास भीष्मस्य धनुश्छित्त्वा त्रिभिः शरैः ॥
स च्छिन्नधन्वा कौरव्यः पुनरन्यन्महद्धनुः ।
निमेषान्तरमात्रेण सज्यं चक्रे पिता तव ॥ ५३
विचकर्ष ततो दोर्भ्यां धनुर्जलदनिस्वनम् ।
अथास्य तदपि क्रुद्धश्चिच्छेद धनुरर्जुनः ॥ ५४
तस्य तत्पूजयामास लाघवं शंतनोः सुतः ।

साधु पार्थ महाबाहो साधु भो पाण्डुनन्दन ॥५५
त्वय्येवैतद्युक्तरूपं महत्कर्म धनंजय ।
प्रीतोऽस्मि सुदृढं पुत्र कुरु युद्धं मया सह ॥ ५६
इति पार्थं प्रशस्याथ प्रगृह्यान्यन्महद्धनुः ।
मुमोच समरे वीरः शरान्पार्थरथं प्रति ॥ ५७
अदर्शयद्वासुदेवो हययाने परं बलम् ।
मोघान्कुर्वञ्शरांस्तस्य मण्डलान्यचरल्लघु ॥ ५८
तथापि भीष्मः सुदृढं वासुदेवधनंजयौ ।
विव्याध निशितैर्बाणैः सर्वगात्रेषु मारिष ॥ ५९
शुशुभाते नरव्याघ्रौ तौ भीष्मशरविक्षतौ ।
गोवृषाविव नर्दन्तौ विषाणोल्लिखिताङ्कितौ ॥ ६०
पुनश्चापि सुसंक्रुद्धः शरैः संनतपर्वभिः ।
कृष्णयोर्युधि संरब्धो भीष्मो व्यावारयद्दिशः ॥६१
वार्ष्णेयं च शरैस्तीक्ष्णैः कम्पयामास रोषितः ।
मुहुरभ्युत्स्मयन्भीष्मः प्रहस्य स्वनवत्तदा ॥ ६२
ततः कृष्णस्तु समरे दृष्ट्वा भीष्मपराक्रमम् ।
संप्रेक्ष्य च महाबाहुः पार्थस्य मृदुयुद्धताम् ॥ ६३
भीष्मं च शरवर्षाणि सृजन्तमनिशं युधि ।
प्रतपन्तमिवादित्यं मध्यमासाद्य सेनयोः ॥ ६४
वरान्वरान्विनिघ्नन्तं पाण्डुपुत्रस्य सैनिकान् ।
युगान्तमिव कुर्वाणं भीष्मं यौधिष्ठिरे बले ॥ ६५
अमृष्यमाणो भगवान्केशवः परवीरहा ।
अचिन्तयदमेयात्मा नास्ति यौधिष्ठिरं बलम् ॥ ६६
एकाह्ना हि रणे भीष्मो नाशयेद्देवदानवान् ।
किमु पाण्डुसुतान्युद्धे सबलान्सपदानुगान् ॥ ६७
द्रवते च महत्सैन्यं पाण्डवस्य महात्मनः ।
एते च कौरवास्तूर्णं प्रभग्नान्दृश्य सोमकान् ।
आद्रवन्ति रणे हृष्टा हर्षयन्तः पितामहम् ॥ ६८
सोऽहं भीष्मं निहन्म्यद्य पाण्डवार्थाय दंशितः ।
भारमेतं विनेष्यामि पाण्डवानां महात्मनाम् ॥६९

अर्जुनोऽपि शरैस्तीक्ष्णैर्वध्यमानो हि संयुगे ।
कर्तव्यं नाभिजानाति रणे भीष्मस्य गौरवात् ॥ ७०
तथा चिन्तयतस्तस्य भूय एव पितामहः ।
प्रेषयामास संक्रुद्धः शरान्पार्थरथं प्रति ॥ ७१
तेषां बहुत्वाद्धि भृशं शराणां
दिशोऽथ सर्वाः पिहिता बभूवुः ।
न चान्तरिक्षं न दिशो न भूमि-
र्न भास्करोऽदृश्यत रश्मिमाली ।
ववुश्च वातास्तुमुलाः सधूमा
दिशश्च सर्वाः क्षुभिता बभूवुः ॥ ७२
द्रोणो विकर्णोऽथ जयद्रथश्च
भूरिश्रवाः कृतवर्मा कृपश्च ।
श्रुतायुरम्बष्ठपतिश्च राजा
विन्दानुविन्दौ च सुदक्षिणश्च ॥ ७३
प्राच्याश्च सौवीरगणाश्च सर्वे
वसातयः क्षुद्रकमालवाश्च ।
किरीटिनं त्वरमाणाभिसस्रु-
र्निदेशगाः शांतनवस्य राज्ञः ॥ ७४
तं वाजिपादातरथौघजालै-
रनेकसाहस्रशतैर्ददर्श ।
किरीटिनं संपरिवार्यमाणं
शिनेर्नप्ता वारणयूथपैश्च ॥ ७५
ततस्तु दृष्ट्वार्जुनवासुदेवौ
पदातिनागाश्वरथैः समन्तात् ।
अभिद्रुतौ शस्त्रभृतां वरिष्ठौ
शिनिप्रवीरोऽभिससार तूर्णम् ॥ ७६
स तान्यनीकानि महाधनुष्मा-
ञ्शिनिप्रवीरः सहसाभिपत्य ।
चकार साहाय्यमथार्जुनस्य
विष्णुर्यथा वृत्रनिषूदनस्य ॥ ७७

विशीर्णनागाश्वरथध्वजौघं
भीष्मेण वित्रासितसर्वयोधम् ।
युधिष्ठिरानीकमभिद्रवन्तं
प्रोवाच संदृश्य शिनिप्रवीरः ॥ ७८
क क्षत्रिया यास्यथ नैष धर्मः
सतां पुरस्तात्कथितः पुराणैः ।
मा स्वां प्रतिज्ञां जहत प्रवीराः
स्वं वीरधर्मं परिपालयध्वम् ॥ ७९
तान्वासवानन्तरजो निशम्य
नरेन्द्रमुख्यान्द्रवतः समन्तात् ।
पार्थस्य दृष्ट्वा मृदुयुद्धतां च
भीष्मं च संख्ये समुदीर्यमाणम् ॥ ८०
अमृष्यमाणः स ततो महात्मा
यशस्विनं सर्वदशार्हभर्ता ।
उवाच शैनेयमभिप्रशंस-
न्दृष्ट्वा कुरूनापततः समन्तात् ॥ ८१
ये यान्ति यान्त्वेव शिनिप्रवीर
येऽपि स्थिताः सात्वत तेऽपि यान्तु ।
भीष्मं रथात्पश्य निपात्यमानं
द्रोणं च संख्ये सगणं मयाद्य ॥ ८२
नासौ रथः सात्वत कौरवाणां
क्रुद्धस्य मुच्येत रणेऽद्य कश्चित् ।
तस्मादहं गृह्य रथाङ्गमुग्रं
प्राणं हरिष्यामि महाव्रतस्य ॥ ८३
निहत्य भीष्मं सगणं तथाजौ
द्रोणं च शैनेय रथप्रवीरम् ।
प्रीतिं करिष्यामि धनंजयस्य
राज्ञश्च भीमस्य तथाश्विनोश्च ॥ ८४
निहत्य सर्वान्धृतराष्ट्रपुत्रां-
स्तत्पक्षिणो ये च नरेन्द्रमुख्याः ।
राज्येन राजानमजातशत्रुं
संपादयिष्याम्यहमद्य हृष्टः ॥ ८५
ततः सुनाभं वसुदेवपुत्रः
सूर्यप्रभं वज्रसमप्रभावम् ।
क्षुरान्तमुद्यम्य भुजेन चक्रं
रथादवप्लुत्य विसृज्य वाहान् ॥ ८६
संकम्पयन्गां चरणैर्महात्मा
वेगेन कृष्णः प्रससार भीष्मम् ।
मदान्धमाजौ समुदीर्णदर्पः
सिंहो जिघांसन्निव वारणेन्द्रम् ॥ ८७
सोऽभ्यद्रवद्भीष्ममनीकमध्ये
क्रुद्धो महेन्द्रावरजः प्रमाथी ।
व्यालम्बिपीतान्तपटश्चकाशे
घनो यथा खेऽचिरभापिनद्धः ॥ ८८
सुदर्शनं चास्य रराज शौरे-
स्तच्चक्रपद्मं सुभुजोरुनालम् ।
यथादिपद्मं तरुणार्कवर्णं
रराज नारायणनाभिजातम् ॥ ८९
तत्कृष्णकोपोदयसूर्यबुद्धं
क्षुरान्ततीक्ष्णाग्रसुजातपत्रम् ।
तस्यैव देहोरुसरःप्ररूढं
रराज नारायणबाहुनालम् ॥ ९०
तमात्तचक्रं प्रणदन्तमुच्चैः
क्रुद्धं महेन्द्रावरजं समीक्ष्य ।
सर्वाणि भूतानि भृशं विनेदुः
क्षयं कुरूणामिति चिन्तयित्वा ॥ ९१
स वासुदेवः प्रगृहीतचक्रः
संवर्तयिष्यन्निव जीवलोकम् ।
अभ्युत्पतँल्लोकगुरुर्बभासे
भूतानि धक्ष्यन्निव कालवह्निः ॥ ९२

तमापतन्तं प्रगृहीतचक्रं
समीक्ष्य देवं द्विपदां वरिष्ठम् ।
असंभ्रमात्कार्मुकबाणपाणी
रथे स्थितः शांतनवोऽभ्युवाच ॥ ९३
एह्येहि देवेश जगन्निवास
नमोऽस्तु ते शार्ङ्गरथाङ्गपाणे ।
प्रसह्य मां पातय लोकनाथ
रथोत्तमाद्भूतशरण्य संख्ये ॥ ९४
त्वया हतस्येह ममाद्य कृष्ण
श्रेयः परस्मिन्निह चैव लोके ।
संभावितोऽस्म्यन्धकवृष्णिनाथ
लोकैस्त्रिभिर्वीर तवाभियानात् ॥ ९५
रथादवप्लुत्य ततस्त्वरावा-
न्पार्थोऽप्यनुद्रुत्य यदुप्रवीरम् ।
जग्राह पीनोत्तमलम्बबाहुं
बाह्वोर्हरिं व्यायतपीनबाहुः ॥ ९६
निगृह्यमाणश्च तदादिदेवो
भृशं सरोषः किल नाम योगी ।
आदाय वेगेन जगाम विष्णु-
र्जिष्णुं महावात इवैकवृक्षम् ॥ ९७
पार्थस्तु विष्टभ्य बलेन पादौ
भीष्मान्तिकं तूर्णमभिद्रवन्तम् ।
बलान्निजग्राह किरीटमाली
पदेऽथ राजन्दशमे कथंचित् ॥ ९८
अवस्थितं च प्रणिपत्य कृष्णं
प्रीतोऽर्जुनः काञ्चनचित्रमाली ।
उवाच कोपं प्रतिसंहरेति
गतिर्भवान्केशव पाण्डवानाम् ॥ ९९
न हास्यते कर्म यथाप्रतिज्ञं
पुत्रैः शपे केशव सोदरैश्च ।
अन्तं करिष्यामि यथा कुरूणां
त्वयाहमिन्द्रानुज संप्रयुक्तः ॥ १००
ततः प्रतिज्ञां समयं च तस्मै
जनार्दनः प्रीतमना निशम्य ।
स्थितः प्रिये कौरवसत्तमस्य
रथं सचक्रः पुनरारुरोह ॥ १०१
स तानभीषूनपुनराददानः
प्रगृह्य शङ्खं द्विषतां निहन्ता ।
विनादयामास ततो दिशश्च
स पाञ्चजन्यस्य रवेण शौरिः ॥ १०२
व्याविद्धनिष्काङ्गदकुण्डलं तं
रजोविकीर्णाञ्चितपक्ष्मनेत्रम् ।
विशुद्धदंष्ट्रं प्रगृहीतशङ्खं
विचुक्रुशुः प्रेक्ष्य कुरुप्रवीराः ॥ १०३
मृदङ्गभेरीपटहप्रणादा
नेमिस्वना दुन्दुभिनिस्वनाश्च ।
ससिंहनादाश्च बभूवुरुग्राः
सर्वेष्वनीकेषु ततः कुरूणाम् ॥ १०४
गाण्डीवघोषः स्तनयित्नुकल्पो
जगाम पार्थस्य नभो दिशश्च ।
जग्मुश्च बाणा विमलाः प्रसन्नाः
सर्वा दिशः पाण्डवचापमुक्ताः ॥ १०५
तं कौरवाणामधिपो बलेन
भीष्मेण भूरिश्रवसा च सार्धम् ।
अभ्युद्ययावुद्यतबाणपाणिः
कक्षं दिधक्षन्निव धूमकेतुः ॥ १०६
अथार्जुनाय प्रजहार भल्ला-
न्भूरिश्रवाः सप्त सुवर्णपुङ्खान् ।
दुर्योधनस्तोमरमुग्रवेगं
शल्यो गदां शांतनवश्च शक्तिम् ॥ १०७

स सप्तभिः सप्त शरप्रवेका-
न्संवार्य भूरिश्रवसा विसृष्टान् ।
शितेन दुर्योधनबाहुमुक्तं
क्षुरेण तत्तोमरमुन्ममाथ ॥ १०८
ततः शुभामापततीं स शक्तिं
विद्युत्प्रभां शांतनवेन मुक्ताम् ।
गदां च मद्राधिपबाहुमुक्तां
द्वाभ्यां शराभ्यां निचकर्त वीरः ॥ १०९
ततो भुजाभ्यां बलवद्विकृष्य
चित्रं धनुर्गाण्डिवमप्रमेयम् ।
माहेन्द्रमस्त्रं विधिवत्सुघोरं
प्रादुश्चकाराद्भुतमन्तरिक्षे ॥ ११०
तेनोत्तमास्त्रेण ततो महात्मा
सर्वाण्यनीकानि महाधनुष्मान् ।
शरौघजालैर्विमलाग्निवर्णै-
र्निवारयामास किरीटमाली ॥ १११
शिलीमुखाः पार्थधनुःप्रमुक्ता
रथान्ध्वजाग्राणि धनूंषि बाहून् ।
निकृत्य देहान्विविशुः परेषां
नरेन्द्रनागेन्द्रतुरंगमाणाम् ॥ ११२
ततो दिशश्चानुदिशश्च पार्थः
शरैः सुधारैर्निशितैर्वितत्य ।
गाण्डीवशब्देन मनांसि तेषां
किरीटमाली व्यथयांचकार ॥ ११३
तस्मिंस्तथा घोरतमे प्रवृत्ते
शङ्खस्वना दुन्दुभिनिस्वनाश्च ।
अन्तर्हिता गाण्डिवनिस्वनेन
बभूवुरुग्राश्च रणप्रणादाः ॥ ११४
गाण्डीवशब्दं तमथो विदित्वा
विराटराजप्रमुखा नृवीराः ।
पाञ्चालराजो द्रुपदश्च वीर-
स्तं देशमाजग्मुरदीनसत्त्वाः ॥ ११५
सर्वाणि सैन्यानि तु तावकानि
यतो यतो गाण्डिवजः प्रणादः ।
ततस्ततः संनतिमेव जग्मु-
र्न तं प्रतीपोऽभिससार कश्चित् ॥ ११६
तस्मिन्सुघोरे नृपसंप्रहारे
हताः प्रवीराः सरथाः ससूताः ।
गजाश्च नाराचनिपाततप्ता
महापताकाः शुभरुक्मकक्ष्याः ॥ ११७
परीतसत्त्वाः सहसा निपेतुः
किरीटिना भिन्नतनुत्रकायाः ।
दृढाहताः पत्रिभिरुग्रवेगैः
पार्थेन भल्लैर्निशितैः शिताग्रैः ॥ ११८
निकृत्तयन्त्रा निहतेन्द्रकीला
ध्वजा महान्तो ध्वजिनीमुखेषु ।
पदातिसंघाश्च रथाश्च संख्ये
हयाश्च नागाश्च धनंजयेन ॥ ११९
बाणाहतास्तूर्णमपेतसत्त्वा
विष्टभ्य गात्राणि निपेतुरुर्व्याम् ।
ऐन्द्रेण तेनास्त्रवरेण राज-
न्महाहवे भिन्नतनुत्रदेहाः ॥ १२०
ततः शरौघैर्निशितैः किरीटिना
नृदेहशस्त्रक्षतलोहितोदा ।
नदी सुघोरा नरदेहफेना
प्रवर्तिता तत्र रणाजिरे वै ॥ १२१
वेगेन सातीव पृथुप्रवाहा
प्रसुस्रुता भैरवारावरूपा ।
परेतनागाश्वशरीररोधा
नरान्त्रमज्जाभृतमांसपङ्का ॥ १२२

प्रभूतरक्षोगणभूतसेविता
शिरःकपालाकुलकेशशाद्वला ।
शरीरसंघातसहस्रवाहिनी
विशीर्णनानाकवचोर्मिसंकुला ॥ १२३
नराश्वनागास्थिनिकृत्तशर्करा
विनाशपातालवती भयावहा ।
तां कङ्कमालावृतगृध्रकह्वैः
क्रव्यादसंघैश्च तरक्षुभिश्च ॥ १२४
उपेतकूलां ददृशुः समन्ता-
त्क्रूरां महावैतरणीप्रकाशाम् ।
प्रवर्तितामर्जुनबाणसंघै-
र्मेदोवसासृक्प्रवहां सुभीमाम् ॥ १२५
ते चेदिपाञ्चालकरूषमत्स्याः
पार्थाश्च सर्वे सहिताः प्रणेदुः ।
वित्रास्य सेनां ध्वजिनीपतीनां
सिंहो मृगाणामिव यूथसंघान् ।
विनेदतुस्तावतिहर्षयुक्तौ
गाण्डीवधन्वा च जनार्दनश्च ॥ १२६
ततो रविं संहृतरश्मिजालं
दृष्ट्वा भृशं शस्त्रपरिक्षताङ्गाः ।
तदैन्द्रमस्त्रं विततं सुघोर-
मसह्यमुद्वीक्ष्य युगान्तकल्पम् ॥ १२७
अथापयानं कुरवः सभीष्माः
सद्रोणदुर्योधनबाह्लिकाश्च ।
चक्रुर्निशां संधिगतां समीक्ष्य
विभावसोर्लोहितराजियुक्ताम् ॥ १२८
अवाप्य कीर्तिं च यशश्च लोके
विजित्य शत्रूंश्च धनंजयोऽपि ।
ययौ नरेन्द्रैः सह सोदरैश्च
समाप्तकर्मा शिबिरं निशायाम् ।
ततः प्रजज्ञे तुमुलः कुरूणां
निशामुखे घोरतरः प्रणादः ॥ १२९
रणे रथानामयुतं निहत्य
हता गजाः सप्तशतार्जुनेन ।
प्राच्याश्च सौवीरगणाश्च सर्वे
निपातिताः क्षुद्रकमालवाश्च ।
महत्कृतं कर्म धनंजयेन
कर्तुं यथा नार्हति कश्चिदन्यः ॥ १३०
श्रुतायुरम्बष्ठपतिश्च राजा
तथैव दुर्मर्षणचित्रसेनौ ।
द्रोणः कृपः सैन्धवबाह्लिकौ च
भूरिश्रवाः शल्यशलौ च राजन् ।
स्वबाहुवीर्येण जिताः सभीष्माः
किरीटिना लोकमहारथेन ॥ १३१
इति ब्रुवन्तः शिबिराणि जग्मुः
सर्वे गणा भारत ये त्वदीयाः ।
उल्कासहस्रैश्च सुसंप्रदीप्तै-
र्विभ्राजमानैश्च तथा प्रदीपैः ।
किरीटिवित्रासितसर्वयोधा
चक्रे निवेशं ध्वजिनी कुरूणाम् ॥ १३२

इति श्रीमहाभारते भीष्मपर्वणि
पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

५६

संजय उवाच ।

व्युष्टां निशां भारत भारताना-
मनीकिनीनां प्रमुखे महात्मा ।
ययौ सपत्नान्प्रति जातकोपो
वृतः समग्रेण बलेन भीष्मः ॥ १
तं द्रोणदुर्योधनबाह्लिकाश्च
तथैव दुर्मर्षणचित्रसेनौ ।

जयद्रथश्चातिबलो बलौघै-
नृपास्तथान्येऽनुययुः समन्तात् ॥ २
स तैर्महद्भिश्च महारथैश्च
तेजस्विभिर्वीर्यवद्भिश्च राजन् ।
रराज राजोत्तम राजमुख्यै-
र्वृतः स देवैरिव वज्रपाणिः ॥ ३
तस्मिन्ननीकप्रमुखे विषक्ता
दोधूयमानाश्च महापताकाः ।
सुरक्तपीतासितपाण्डुराभा
महागजस्कन्धगता विरेजुः ॥ ४
सा वाहिनी शांतनवेन राज्ञा
महारथैर्वारणवाजिभिश्च ।
बभौ सविद्युत्स्तनयित्नुकल्पा
जलागमे द्यौरिव जातमेघा ॥ ५
ततो रणायाभिमुखी प्रयाता
प्रत्यर्जुनं शांतनवाभिगुप्ता ।
सेना महोग्रा सहसा कुरूणां
वेगो यथा भीम इवापगायाः ॥ ६
तं व्यालनानाविधगूढसारं
गजाश्वपादातरथौघपक्षम् ।
व्यूहं महामेघसमं महात्मा
ददर्श दूरात्कपिराजकेतुः ॥ ७
स निर्ययौ केतुमता रथेन
नरर्षभः श्वेतहयेन वीरः ।
वरूथिना सैन्यमुखे महात्मा
वधे धृतः सर्वसपत्नयूनाम् ॥ ८
सूपस्करं सोत्तरबन्धुरेषं
यत्तं यदूनामृषभेण संख्ये ।
कपिध्वजं प्रेक्ष्य विषेदुराजौ
सहैव पुत्रैस्तव कौरवेयाः ॥ ९
प्रकर्षता गुप्तमुदायुधेन
किरीटिना लोकमहारथेन ।
तं व्यूहराजं ददृशुस्त्वदीया-
श्चतुश्चतुर्व्यालसहस्रकीर्णम् ॥ १०
यथा हि पूर्वेऽहनि धर्मराज्ञा
व्यूहः कृतः कौरवनन्दनेन ।
तथा तथोद्देशमुपेत्य तस्थुः
पाञ्चालमुख्यैः सह चेदिमुख्याः ॥ ११
ततो महावेगसमाहतानि
भेरीसहस्राणि विनेदुराजौ ।
शङ्खस्वना दुन्दुभिनिस्वनाश्च
सर्वेष्वनीकेषु ससिंहनादाः ॥ १२
ततः सबाणानि महास्वनानि
विस्फार्यमाणानि धनूंषि वीरैः ।
क्षणेन भेरीपणवप्रणादा-
नन्तर्दधुः शङ्खमहास्वनाश्च ॥ १३
तच्छङ्खशब्दावृतमन्तरिक्ष-
मुद्धूतभौमद्रुतरेणुजालम् ।
महावितानावततप्रकाश-
मालोक्य वीराः सहसाभिपेतुः ॥ १४
रथी रथेनाभिहतः ससूतः
पपात साश्वः सरथः सकेतुः ।
गजो गजेनाभिहतः पपात
पदातिना चाभिहतः पदातिः ॥ १५
आवर्तमानान्यभिवर्तमानै-
र्बाणैः क्षतान्यद्भुतदर्शनानि ।
प्रासैश्च खड्गैश्च समाहतानि
सदश्ववृन्दानि सदश्ववृन्दैः ॥ १६
सुवर्णतारागणभूषितानि
शरावराणि प्रहितानि वीरैः ।

विदार्यमाणानि परश्वधैश्च
प्रासैश्च खड्गैश्च निपेतुरुर्व्याम् ॥ १७
गजैर्विषाणैर्वरहस्तरुग्णाः
केचित्ससूता रथिनः प्रपेतुः ।
गजर्षभाश्चापि रथर्षभेण
निपेतिरे बाणहताः पृथिव्याम् ॥ १८
गजौघवेगोद्धतसादितानां
श्रुत्वा निषेदुर्वसुधां मनुष्याः ।
आर्तस्वरं सादिपदातियूनां
विषाणगात्रावरताडितानाम् ॥ १९
संभ्रान्तनागाश्वरथे प्रसूते
महाभये सादिपदातियूनाम् ।
महारथैः संपरिवार्यमाणं
ददर्श भीष्मः कपिराजकेतुम् ॥ २०
तं पञ्चतालोच्छ्रिततालकेतुः
सदश्ववेगोद्धतवीर्ययातः ।
महास्त्रबाणाशनिदीप्तमार्गं
किरीटिनं शांतनवोऽभ्यधावत् ॥ २१
तथैव शक्रप्रतिमानकल्प-
मिन्द्रात्मजं द्रोणमुखाभिसस्रुः ।
कृपश्च शल्यश्च विविंशतिश्च
दुर्योधनः सौमदत्तिश्च राजन् ॥ २२
ततो रथानीकमुखादुपेत्य
सर्वास्त्रवित्काञ्चनचित्रवर्मा ।
जवेन शूरोऽभिससार सर्वां-
स्तथार्जुनस्यात्र सुतोऽभिमन्युः ॥ २३
तेषां महास्त्राणि महारथाना-
मसक्तकर्मा विनिहत्य कार्ष्णिः ।
बभौ महामन्त्रहुतार्चिमाली
सदोगतः सन्भगवानिवाग्निः ॥ २४
ततः स तूर्णं रुधिरोदफेनां
कृत्वा नदीं वैशसने रिपूणाम् ।
जगाम सौभद्रमतीत्य भीष्मो
महारथं पार्थमदीनसत्त्वः ॥ २५
ततः प्रहस्याद्भुतदर्शनेन
गाण्डीवनिर्ह्रादमहास्वनेन ।
विपाठजालेन महास्त्रजालं
विनाशयामास किरीटमाली ॥ २६
तमुत्तमं सर्वधनुर्धराणा-
मसक्तकर्मा कपिराजकेतुः ।
भीष्मं महात्माभिववर्ष तूर्णं
शरौघजालैर्विमलैश्च भल्लैः ॥ २७
एवंविधं कार्मुकभीमनाद-
मदीनवत्सत्पुरुषोत्तमाभ्याम् ।
ददर्श लोकः कुरुसृञ्जयाश्च
तद्द्वैरथं भीष्मधनंजयाभ्याम् ॥ २८

इति श्रीमहाभारते भीष्मपर्वणि
षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

५७

संजय उवाच ।

द्रौणिर्भूरिश्रवाः शल्यश्चित्रसेनश्च मारिष ।
पुत्रः सांयमनेश्चैव सौभद्रं समयोधयन् ॥ १
संसक्तमतितेजोभिस्तमेकं ददृशुर्जनाः ।
पञ्चभिर्मनुजव्याघ्रैर्गजैः सिंहशिशुं यथा ॥ २
नाभिलक्ष्यतया कश्चिन्न शौर्ये न पराक्रमे ।
बभूव सदृशः कार्ष्णेर्नास्त्रे नापि च लाघवे ॥ ३
तथा तमात्मजं युद्धे विक्रमन्तमरिंदमम् ।
दृष्ट्वा पार्थो रणे यत्तः सिंहनादमथोऽनदत् ॥ ४
पीडयानं च तत्सैन्यं पौत्रं तव विशां पते ।
दृष्ट्वा त्वदीया राजेन्द्र समन्तात्पर्यवारयन् ॥ ५

ध्वजिनीं धार्तराष्ट्राणां दीनशत्रुरदीनवत् ।
प्रत्युद्ययौ स सौभद्रस्तेजसा च बलेन च ॥ ६
तस्य लाघवमार्गस्थमादित्यसदृशप्रभम् ।
व्यदृश्यत महच्चापं समरे युध्यतः परैः ॥ ७
स द्रौणिमिषुणैकेन विद्ध्वा शल्यं च पञ्चभिः ।
ध्वजं सांयमनेश्चापि सोऽष्टाभिरपवर्जयत् ॥ ८
रुक्मदण्डां महाशक्तिं प्रेषितां सौमदत्तिना ।
शितेनोरगसंकाशां पत्रिणा विजहार ताम् ॥ ९
शल्यस्य च महाघोरानस्यतः शतशः शरान् ।
निवार्यार्जुनदायादो जघान समरे हयान् ॥ १०
भूरिश्रवाश्च शल्यश्च द्रौणिः सांयमनिः शलः ।
नाभ्यवर्तन्त संरब्धाः कार्ष्णेर्बाहुबलाश्रयात् ॥ ११
ततस्त्रिगर्ता राजेन्द्र मद्राश्च सह केकयैः ।
पञ्चत्रिंशतिसाहस्रास्तव पुत्रेण चोदिताः ॥ १२
धनुर्वेदविदो मुख्या अजेयाः शत्रुभिर्युधि ।
सहपुत्रं जिघांसन्तं परिवव्रुः किरीटिनम् ॥ १३
तौ तु तत्र पितापुत्रौ परिक्षिप्तौ रथर्षभौ ।
ददर्श राजन्पाञ्चाल्यः सेनापतिरमित्रजित् ॥ १४
स वारणरथौघानां सहस्रैर्बहुभिर्वृतः ।
वाजिभिः पत्तिभिश्चैव वृतः शतसहस्रशः ॥ १५
धनुर्विस्फार्य संक्रुद्धश्चोदयित्वा वरूथिनीम् ।
ययौ तन्मद्रकानीकं केकयांश्च परंतपः ॥ १६
तेन कीर्तिमता गुप्तमनीकं दृढधन्वना ।
प्रयुक्तरथनागाश्वं योत्स्यमानमशोभत ॥ १७
सोऽर्जुनं प्रमुखे यान्तं पाञ्चाल्यः कुरुनन्दन ।
त्रिभिः शारद्वतं बाणैर्जत्रुदेशे समर्पयत् ॥ १८
ततः स मद्रकान्हत्वा दशभिर्दशभिः शरैः ।
हृष्ट एको जघानाश्वं भल्लेन कृतवर्मणः ॥ १९
दमनं चापि दायादं पौरवस्य महात्मनः ।
जघान विपुलाग्रेण नाराचेन परंतपः ॥ २०

ततः सांयमनेः पुत्रः पाञ्चाल्यं युद्धदुर्मदम् ।
अविध्यत्त्रिंशता बाणैर्दशभिश्चास्य सारथिम् ॥ २१
सोऽतिविद्धो महेष्वासः सृक्किणी परिसंलिहन् ।
भल्लेन भृशतीक्ष्णेन निचकर्तास्य कार्मुकम् ॥ २२
अथैनं पञ्चविंशत्या क्षिप्रमेव समर्पयत् ।
अश्वांश्चास्यावधीद्राजन्नुभौ तौ पार्ष्णिसारथी ॥ २३
स हताश्वे रथे तिष्ठन्ददर्श भरतर्षभ ।
पुत्रः सांयमनेः पुत्रं पाञ्चाल्यस्य महात्मनः ॥ २४
स संगृह्य महाघोरं निस्त्रिंशवरमायसम् ।
पदातिस्तूर्णमभ्यर्छद्रथस्थं द्रुपदात्मजम् ॥ २५
तं महौघमिवायान्तं खात्पतन्तमिवोरगम् ।
भ्रान्तावरणनिस्त्रिंशं कालोत्सृष्टमिवान्तकम् ॥ २६
दीप्यन्तमिव शस्त्रार्च्या मत्तवारणविक्रमम् ।
अपश्यन्पाण्डवास्तत्र धृष्टद्युम्नश्च पार्षतः ॥ २७
तस्य पाञ्चालपुत्रस्तु प्रतीपमभिधावतः ।
शितनिस्त्रिंशहस्तस्य शरावरणधारिणः ॥ २८
बाणवेगमतीतस्य रथाभ्याशमुपेयुषः ।
त्वरन्सेनापतिः क्रुद्धो बिभेद गदया शिरः ॥ २९
तस्य राजन्सनिस्त्रिंशं सुप्रभं च शरावरम् ।
हतस्य पततो हस्ताद्वेगेन न्यपतद्भुवि ॥ ३०
तं निहत्य गदाग्रेण लेभे स परमं यशः ।
पुत्रः पाञ्चालराजस्य महात्मा भीमविक्रमः ॥ ३१
तस्मिन्हते महेष्वासे राजपुत्रे महारथे ।
हाहाकारो महानासीत्तव सैन्यस्य मारिष ॥ ३२
ततः सांयमनिः क्रुद्धो दृष्ट्वा निहतमात्मजम् ।
अभिदुद्राव वेगेन पाञ्चाल्यं युद्धदुर्मदम् ॥ ३३
तौ तत्र समरे वीरौ समेतौ रथिनां वरौ ।
ददृशुः सर्वराजानः कुरवः पाण्डवास्तथा ॥ ३४
ततः सांयमनिः क्रुद्धः पार्षतं परवीरहा ।
आजघान त्रिभिर्बाणैस्तोत्रैरिव महाद्विपम् ॥ ३५

तथैव पार्षतं शूरं शल्यः समितिशोभनः ।
आजघानोरसि क्रुद्धस्ततो युद्धमवर्तत ॥ ३६

इति श्रीमहाभारते भीष्मपर्वणि
सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

५८

धृतराष्ट्र उवाच ।

दैवमेव परं मन्ये पौरुषादपि संजय ।
यत्सैन्यं मम पुत्रस्य पाण्डुसैन्येन वध्यते ॥ १
नित्यं हि मामकांस्तात हतानेव हि शंससि ।
अव्यग्रांश्च प्रहृष्टांश्च नित्यं शंससि पाण्डवान् ॥ २
हीनान्पुरुषकारेण मामकानद्य संजय ।
पतितान्पात्यमानांश्च हतानेव च शंससि ॥ ३
युध्यमानान्यथाशक्ति घटमानाञ्जयं प्रति ।
पाण्डवा विजयन्त्येव जीयन्ते चैव मामकाः ॥ ४
सोऽहं तीव्राणि दुःखानि दुर्योधनकृतानि च ।
अश्रौषं सततं तात दुःसहानि बहूनि च ॥ ५
तमुपायं न पश्यामि जीयेरन्येन पाण्डवाः ।
मामका वा जयं युद्धे प्राप्नुयुर्येन संजय ॥ ६

संजय उवाच ।

क्षयं मनुष्यदेहानां गजवाजिरथक्षयम् ।
शृणु राजन्स्थिरो भूत्वा तवैवापनयो महान् ॥ ७
धृष्टद्युम्नस्तु शल्येन पीडितो नवभिः शरैः ।
पीडयामास संक्रुद्धो मद्राधिपतिमायसैः ॥ ८
तत्राद्भुतमपश्याम पार्षतस्य पराक्रमम् ।
न्यवारयत यत्तूर्णं शल्यं समितिशोभनम् ॥ ९
नान्तरं ददृशे कश्चित्तयोः संरब्धयो रणे ।
मुहूर्तमिव तद्युद्धं तयोः सममिवाभवत् ॥ १०
ततः शल्यो महाराज धृष्टद्युम्नस्य संयुगे ।
धनुश्चिच्छेद भल्लेन पीतेन निशितेन च ॥ ११
अथैनं शरवर्षेण छादयामास भारत ।
गिरिं जलागमे यद्वज्जलदा जलधारिणः ॥ १२
अभिमन्युस्तु संक्रुद्धो धृष्टद्युम्ने निपीडिते ।
अभिदुद्राव वेगेन मद्रराजरथं प्रति ॥ १३
ततो मद्राधिपरथं कार्ष्णिः प्राप्यातिकोपनः ।
आर्तायनिममेयात्मा विव्याध विशिखैस्त्रिभिः ॥
ततस्तु तावका राजन्परीप्सन्तोऽऽर्जुनिं रणे ।
मद्रराजरथं तूर्णं परिवार्यावतस्थिरे ॥ १५
दुर्योधनो विकर्णश्च दुःशासनविविंशती ।
दुर्मर्षणो दुःसहश्च चित्रसेनश्च दुर्मुखः ॥ १६
सत्यव्रतश्च भद्रं ते पुरुमित्रश्च भारत ।
एते मद्राधिपरथं पालयन्तः स्थिता रणे ॥ १७
तान्भीमसेनः संक्रुद्धो धृष्टद्युम्नश्च पार्षतः ।
द्रौपदेयाभिमन्युश्च माद्रीपुत्रौ च पाण्डवौ ॥ १८
नानारूपाणि शस्त्राणि विसृजन्तो विशां पते ।
अभ्यवर्तन्त संहृष्टाः परस्परवधैषिणः ।
ते वै समीयुः संग्रामे राजन्दुर्मन्त्रिते तव ॥ १९
तस्मिन्दाशरथे युद्धे वर्तमाने भयावहे ।
तावकानां परेषां च प्रेक्षका रथिनोऽभवन् ॥ २०
शस्त्राण्यनेकरूपाणि विसृजन्तो महारथाः ।
अन्योन्यमभिनर्दन्तः संप्रहारं प्रचक्रिरे ॥ २१
ते यत्ता जातसंरम्भाः सर्वेऽन्योन्यं जिघांसवः ।
महास्त्राणि विमुञ्चन्तः समापेतुरमर्षणाः ॥ २२
दुर्योधनस्तु संक्रुद्धो धृष्टद्युम्नं महारणे ।
विव्याध निशितैर्बाणैश्चतुर्भिस्त्वरितो भृशम् ॥ २३
दुर्मर्षणश्च विंशत्या चित्रसेनश्च पञ्चभिः ।
दुर्मुखो नवभिर्बाणैर्दुःसहश्चापि सप्तभिः ।
विविंशतिः पञ्चभिश्च त्रिभिर्दुःशासनस्तथा ॥ २४
तान्प्रत्यविध्यद्राजेन्द्र पार्षतः शत्रुतापनः ।
एकैकं पञ्चविंशत्या दर्शयन्पाणिलाघवम् ॥ २५
सत्यव्रतं तु समरे पुरुमित्रं च भारत ।

अभिमन्युरविध्यत्तौ दशभिर्दशभिः शरैः ॥ २६
माद्रीपुत्रौ तु समरे मातुलं मातृनन्दनौ ।
छादयेतां शरव्रातैस्तदद्भुतमिवाभवत् ॥ २७
ततः शल्यो महाराज स्वस्रीयौ रथिनां वरौ ।
शरैर्बहुभिरानर्छत्कृतप्रतिकृतैषिणौ ।
छाद्यमानौ ततस्तौ तु माद्रीपुत्रौ न चेलतुः ॥ २८
अथ दुर्योधनं दृष्ट्वा भीमसेनो महाबलः ।
विधित्सुः कलहस्यान्तं गदां जग्राह पाण्डवः ॥ २९
तमुद्यतगदं दृष्ट्वा कैलासमिव शृङ्गिणम् ।
भीमसेनं महाबाहुं पुत्रास्ते प्राद्रवन्भयात् ॥ ३०
दुर्योधनस्तु संक्रुद्धो मागधं समचोदयत् ।
अनीकं दशसाहस्रं कुञ्जराणां तरस्विनाम् ।
मागधं पुरतः कृत्वा भीमसेनं समभ्ययात् ॥ ३१
आपतन्तं च तं दृष्ट्वा गजानीकं वृकोदरः ।
गदापाणिरवारोहद्रथात्सिंह इवोन्नदन् ॥ ३२
अद्रिसारमयीं गुर्वीं प्रगृह्य महतीं गदाम् ।
अभ्यधावद्गजानीकं व्यादितास्य इवान्तकः ॥ ३३
स गजान्गदया निघ्नन्व्यचरत्समरे बली ।
भीमसेनो महाबाहुः सवज्र इव वासवः ॥ ३४
तस्य नादेन महता मनोहृदयकम्पिना ।
व्यत्यचेष्टन्त संहत्य गजा भीमस्य नर्दतः ॥ ३५
ततस्तु द्रौपदीपुत्राः सौभद्रश्च महारथः ।
नकुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः ॥ ३६
पृष्ठं भीमस्य रक्षन्तः शरवर्षेण वारणान् ।
अभ्यधावन्त वर्षन्तो मेघा इव गिरीन्यथा ॥ ३७
क्षुरैः क्षुरप्रैर्भल्लैश्च पीतैरञ्जलिकैरपि ।
पातयन्तोत्तमाङ्गानि पाण्डवा गजयोधिनाम् ॥ ३८
शिरोभिः प्रपतद्भिश्च बाहुभिश्च विभूषितैः ।
अश्मवृष्टिरिवाभाति पाणिभिश्च सहाङ्कुशैः ॥ ३९
हृतोत्तमाङ्गाः स्कन्धेषु गजानां गजयोधिनः ।
अदृश्यन्ताचलाग्रेषु द्रुमा भग्नशिखा इव ॥ ४०
धृष्टद्युम्नहतानन्यानपश्याम महागजान् ।
पतितान्पात्यमानांश्च पार्षतेन महात्मना ॥ ४१
मागधोऽथ महीपालो गजमैरावतोपमम् ।
प्रेषयामास समरे सौभद्रस्य रथं प्रति ॥ ४२
तमापतन्तं संप्रेक्ष्य मागधस्य गजोत्तमम् ।
जघानैकेषुणा वीरः सौभद्रः परवीरहा ॥ ४३
तस्यावर्जितनागस्य कार्ष्णिः परपुरंजयः ।
राज्ञो रजतपुङ्खेन भल्लेनापहरच्छिरः ॥ ४४
विगाह्य तद्गजानीकं भीमसेनोऽपि पाण्डवः ।
व्यचरत्समरे मृद्नन्गजानिन्द्रो गिरीनिव ॥ ४५
एकप्रहाराभिहतान्भीमसेनेन कुञ्जरान् ।
अपश्याम रणे तस्मिन्गिरीन्वज्रहतानिव ॥ ४६
भग्नदन्तान्भग्नकटान्भग्नसक्थांश्च वारणान् ।
भग्नपृष्ठान्भग्नकुम्भान्निहतान्पर्वतोपमान् ॥ ४७
नदतः सीदतश्चान्यान्विमुखान्समरे गजान् ।
विमूत्रान्भग्नसंविग्नांस्तथा विशकृतोऽपरान् ॥ ४८
भीमसेनस्य मार्गेषु गतासून्पर्वतोपमान् ।
अपश्याम हतान्नागान्निष्टनन्तस्तथापरे ॥ ४९
वमन्तो रुधिरं चान्ये भिन्नकुम्भा महागजाः ।
विह्वलन्तो गता भूमिं शैला इव धरातले ॥ ५०
मेदोरुधिरदिग्धाङ्गो वसामज्जासमुक्षितः ।
व्यचरत्समरे भीमो दण्डपाणिरिवान्तकः ॥ ५१
गजानां रुधिराक्तां तां गदां बिभ्रद्वृकोदरः ।
घोरः प्रतिभयश्चासीत्पिनाकीव पिनाकधृक् ॥ ५२
निर्मथ्यमानाः क्रुद्धेन भीमसेनेन दन्तिनः ।
सहसा प्राद्रवञ्शिष्टा मृद्नन्तस्तव वाहिनीम् ॥ ५३
तं हि वीरं महेष्वासाः सौभद्रप्रमुखा रथाः ।
पर्यरक्षन्त युध्यन्तं वज्रायुधमिवामराः ॥ ५४
शोणिताक्तां गदां बिभ्रदुक्षितो गजशोणितैः ।

कृतान्त इव रौद्रात्मा भीमसेनो व्यदृश्यत ॥ ५५
व्यायच्छमानं गदया दिक्षु सर्वासु भारत ।
नृत्यमानमपश्याम नृत्यन्तमिव शंकरम् ॥ ५६
यमदण्डोपमां गुर्वीमिन्द्राशनिसमस्वनाम् ।
अपश्याम महाराज रौद्रां विशसनीं गदाम् ॥ ५७
विमिश्रां केशमज्जाभिः प्रदिग्धां रुधिरेण च ।
पिनाकमिव रुद्रस्य क्रुद्धस्याभिघ्नतः पशून् ॥ ५८
यथा पशूनां संघातं यष्ट्या पालः प्रकालयेत् ।
तथा भीमो गजानीकं गदया पर्यकालयत् ॥ ५९
गदया वध्यमानास्ते मार्गणैश्च समन्ततः ।
स्वान्यनीकानि मृद्नन्तः प्राद्रवन्कुञ्जरास्तव ॥ ६०
महावात इवाभ्राणि विधमित्वा स वारणान् ।
अतिष्ठत्तुमुले भीमः श्मशान इव शूलभृत् ॥ ६१

इति श्रीमहाभारते भीष्मपर्वणि
अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

५९

संजय उवाच ।

तस्मिन्हते गजानीके पुत्रो दुर्योधनस्तव ।
भीमसेनं घ्नतेत्येवं सर्वसैन्यान्यचोदयत् ॥ १
ततः सर्वाण्यनीकानि तव पुत्रस्य शासनात् ।
अभ्यद्रवन्भीमसेनं नदन्तं भैरवान्रवान् ॥ २
तं बलौघमपर्यन्तं देवैरपि दुरुत्सहम् ।
आपतन्तं सुदुष्पारं समुद्रमिव पर्वणि ॥ ३
रथनागाश्वकलिलं शङ्खदुन्दुभिनादितम् ।
अथानन्तमपारं च नरेन्द्रस्तिमितह्रदम् ॥ ४
तं भीमसेनः समरे महोदधिमिवापरम् ।
सेनासागरमक्षोभ्यं वेलेव समवारयत् ॥ ५
तदाश्चर्यमपश्याम श्रद्धेयमपि चाद्भुतम् ।
भीमसेनस्य समरे राजन्कर्मातिमानुषम् ॥ ६
उदीर्णां पृथिवीं सर्वां साश्वां सरथकुञ्जराम् ।
असंभ्रमं भीमसेनो गदया समताडयत् ॥ ७
स संवार्य बलौघांस्तान्गदया रथिनां वरः ।
अतिष्ठत्तुमुले भीमो गिरिर्मेरुरिवाचलः ॥ ८
तस्मिन्सुतुमुले घोरे काले परमदारुणे ।
भ्रातरश्चैव पुत्राश्च धृष्टद्युम्नश्च पार्षतः ॥ ९
द्रौपदेयाभिमन्युश्च शिखण्डी च महारथः ।
न प्राजहन्भीमसेनं भये जाते महाबलम् ॥ १०
ततः शैक्यायसीं गुर्वीं प्रगृह्य महतीं गदाम् ।
अवधीत्तावकान्योधान्दण्डपाणिरिवान्तकः ।
पोथयन्रथवृन्दानि वाजिवृन्दानि चाभिभूः ॥ ११
व्यचरत्समरे भीमो युगान्ते पावको यथा ।
विनिघ्नन्समरे सर्वान्युगान्ते कालवद्विभुः ॥ १२
ऊरुवेगेन संकर्षन्रथजालानि पाण्डवः ।
प्रमर्दयन्गजान्सर्वान्नड्वलानीव कुञ्जरः ॥ १३
मृद्नन्रथेभ्यो रथिनो गजेभ्यो गजयोधिनः ।
सादिनश्चाश्वपृष्ठेभ्यो भूमौ चैव पदातिनः ॥ १४
तत्र तत्र हतैश्चापि मनुष्यगजवाजिभिः ।
रणाङ्गणं तदभवन्मृत्योराघातसंनिभम् ॥ १५
पिनाकमिव रुद्रस्य क्रुद्धस्याभिघ्नतः पशून् ।
यमदण्डोपमामुग्रामिन्द्राशनिसमस्वनाम् ।
ददृशुर्भीमसेनस्य रौद्रां विशसनीं गदाम् ॥ १६
आविध्यतो गदां तस्य कौन्तेयस्य महात्मनः ।
बभौ रूपं महाघोरं कालस्येव युगक्षये ॥ १७
तं तथा महतीं सेनां द्रावयन्तं पुनः पुनः ।
दृष्ट्वा मृत्युमिवायान्तं सर्वे विमनसोऽभवन् ॥ १८
यतो यतः प्रेक्षते स्म गदामुद्यम्य पाण्डवः ।
तेन तेन स्म दीर्यन्ते सर्वसैन्यानि भारत ॥ १९
प्रदारयन्तं सैन्यानि बलौघेनापराजितम् ।
ग्रसमानमनीकानि व्यादितास्यमिवान्तकम् ॥ २०

तं तथा भीमकर्माणं प्रगृहीतमहागदम् ।
दृष्ट्वा वृकोदरं भीष्मः सहसैव समभ्ययात् ॥ २१
महता मेघघोषेण रथेनादित्यवर्चसा ।
छादयञ्शरवर्षेण पर्जन्य इव वृष्टिमान् ॥ २२
तमायान्तं तथा दृष्ट्वा व्यात्ताननमिवान्तकम् ।
भीष्मं भीमो महाबाहुः प्रत्युदीयादमर्षणः ॥ २३

तस्मिन्क्षणे सात्यकिः सत्यसंधः
शिनिप्रवीरोऽभ्यपतत्पितामहम् ।
निघ्नन्नमित्रान्धनुषा दृढेन
स कम्पयंस्तव पुत्रस्य सेनाम् ॥ २४
तं यान्तमश्वै रजतप्रकाशैः
शरान्धमन्तं धनुषा दृढेन ।
नाशक्नुवन्वारयितुं तदानीं
सर्वे गणा भारत ये त्वदीयाः ॥ २५
अविध्यदेनं निशितैः शराग्रै-
रलम्बुसो राजवरार्ष्यशृङ्गिः ।
तं वै चतुर्भिः प्रतिविध्य वीरो
नप्ता शिनेरभ्यपतद्रथेन ॥ २६
अन्वागतं वृष्णिवरं निशम्य
मध्ये रिपूणां परिवर्तमानम् ।
प्रावर्तयन्तं कुरुपुंगवांश्च
पुनः पुनश्च प्रणदन्तमाजौ ॥ २७
नाशक्नुवन्वारयितुं वरिष्ठं
मध्यंदिने सूर्यमिवातपन्तम् ।
न तत्र कश्चिन्नविषण्ण आसी-
दृते राजन्सोमदत्तस्य पुत्रात् ॥ २८
स ह्याददानो धनुरुग्रवेगं
भूरिश्रवा भारत सौमदत्तिः ।
दृष्ट्वा रथान्स्वान्व्यपनीयमाना-
न्प्रत्युद्ययौ सात्यकिं योद्धुमिच्छन् ॥ २९

इति श्रीमहाभारते भीष्मपर्वणि
एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

६०

संजय उवाच ।

ततो भूरिश्रवा राजन्सात्यकिं नवभिः शरैः ।
अविध्यद्भृशसंक्रुद्धस्तोत्रैरिव महाद्विपम् ॥ १
कौरवं सात्यकिश्चैव शरैः संनतपर्वभिः ।
अवाकिरदमेयात्मा सर्वलोकस्य पश्यतः ॥ २
ततो दुर्योधनो राजा सोदर्यैः परिवारितः ।
सौमदत्तिं रणे यत्तः समन्तात्पर्यवारयत् ॥ ३
तथैव पाण्डवाः सर्वे सात्यकिं रभसं रणे ।
परिवार्य स्थिताः संख्ये समन्तात्सुमहौजसः ॥ ४
भीमसेनस्तु संक्रुद्धो गदामुद्यम्य भारत ।
दुर्योधनमुखान्सर्वान्पुत्रांस्ते पर्यवारयत् ॥ ५
रथैरनेकसाहस्रैः क्रोधामर्षसमन्वितः ।
नन्दकस्तव पुत्रस्तु भीमसेनं महाबलम् ।
विव्याध निशितैः षड्भिः कङ्कपत्रैः शिलाशितैः ॥६
दुर्योधनस्तु समरे भीमसेनं महाबलम् ।
आजघानोरसि क्रुद्धो मार्गणैर्निशितैस्त्रिभिः ॥ ७
ततो भीमो महाबाहुः स्वरथं सुमहाबलः ।
आरुरोह रथश्रेष्ठं विशोकं चेदमब्रवीत् ॥ ८
एते महारथाः शूरा धार्तराष्ट्रा महाबलाः ।
मामेव भृशसंक्रुद्धा हन्तुमभ्युद्यता युधि ॥ ९
एतानद्य हनिष्यामि पश्यतस्ते न संशयः ।
तस्मान्ममाश्वान्संग्रामे यत्तः संयच्छ सारथे ॥ १०
एवमुक्त्वा ततः पार्थः पुत्रं दुर्योधनं तव ।
विव्याध दशभिस्तीक्ष्णैः शरैः कनकभूषणैः ।
नन्दकं च त्रिभिर्बाणैः प्रत्यविध्यत्स्तनान्तरे ॥ ११
तं तु दुर्योधनः षष्ट्या विद्ध्वा भीमं महाबलम् ।

त्रिभिरन्यैः सुनिशितैर्विशोकं प्रत्यविध्यत ॥ १२
भीमस्य च रणे राजन्धनुश्चिच्छेद भास्वरम् ।
मुष्टिदेशे शरैस्तीक्ष्णैस्त्रिभी राजा हसन्निव ॥ १३
भीमस्तु प्रेक्ष्य यन्तारं विशोकं संयुगे तदा ।
पीडितं विशिखैस्तीक्ष्णैस्तव पुत्रेण धन्विना ॥ १४
अमृष्यमाणः संक्रुद्धो धनुर्दिव्यं परामृशत् ।
पुत्रस्य ते महाराज वधार्थं भरतर्षभ ॥ १५
समादत्त च संरब्धः क्षुरप्रं लोमवाहिनम् ।
तेन चिच्छेद नृपतेर्भीमः कार्मुकमुत्तमम् ॥ १६
सोऽपविध्य धनुश्छिन्नं क्रोधेन प्रज्वलन्निव ।
अन्यत्कार्मुकमादत्त सत्वरं वेगवत्तरम् ॥ १७
संधत्त विशिखं घोरं कालमृत्युसमप्रभम् ।
तेनाजघान संक्रुद्धो भीमसेनं स्तनान्तरे ॥ १८
स गाढविद्धो व्यथितः स्यन्दनोपस्थ आविशत् ।
स निषण्णो रथोपस्थे मूर्छामभिजगाम ह ॥ १९
तं दृष्ट्वा व्यथितं भीममभिमन्युपुरोगमाः ।
नामृष्यन्त महेष्वासाः पाण्डवानां महारथाः ॥ २०
ततस्तु तुमुलां वृष्टिं शस्त्राणां तिग्मतेजसाम् ।
पातयामासुरव्यग्राः पुत्रस्य तव मूर्धनि ॥ २१
प्रतिलभ्य ततः संज्ञां भीमसेनो महाबलः ।
दुर्योधनं त्रिभिर्विद्ध्वा पुनर्विव्याध पञ्चभिः ॥ २२
शल्यं च पञ्चविंशत्या शरैर्विव्याध पाण्डवः ।
रुक्मपुङ्खैर्महेष्वासः स विद्धो व्यपयाद्रणात् ॥ २३
प्रत्युद्ययुस्ततो भीमं तव पुत्राश्चतुर्दश ।
सेनापतिः सुषेणश्च जलसंधः सुलोचनः ॥ २४
उग्रो भीमरथो भीमो भीमबाहुरलोलुपः ।
दुर्मुखो दुष्प्रधर्षश्च विवित्सुर्विकटः समः ॥ २५
विसृजन्तो बहून्बाणान्क्रोधसंरक्तलोचनाः ।
भीमसेनमभिद्रुत्य विव्यधुः सहिता भृशम् ॥ २६
पुत्रांस्तु तव संप्रेक्ष्य भीमसेनो महाबलः ।
सृक्किणी विलिहन्वीरः पशुमध्ये वृको यथा ।
सेनापतेः क्षुरप्रेण शिरश्चिच्छेद पाण्डवः ॥ २७
जलसंधं विनिर्भिद्य सोऽनयद्यमसादनम् ।
सुषेणं च ततो हत्वा प्रेषयामास मृत्यवे ॥ २८
उग्रस्य सशिरस्त्राणं शिरश्चन्द्रोपमं भुवि ।
पातयामास भल्लेन कुण्डलाभ्यां विभूषितम् ॥ २९
भीमबाहुं च सप्तत्या साश्वकेतुं ससारथिम् ।
निनाय समरे भीमः परलोकाय मारिष ॥ ३०
भीमं भीमरथं चोभौ भीमसेनो हसन्निव ।
भ्रातरौ रभसौ राजन्ननयद्यमसादनम् ॥ ३१
ततः सुलोचनं भीमः क्षुरप्रेण महामृधे ।
मिषतां सर्वसैन्यानामनयद्यमसादनम् ॥ ३२
पुत्रास्तु तव तं दृष्ट्वा भीमसेनपराक्रमम् ।
शेषा येऽन्येऽभवंस्तत्र ते भीमस्य भयार्दिताः ।
विप्रद्रुता दिशो राजन्वध्यमाना महात्मना ॥ ३३
ततोऽब्रवीच्छांतनवः सर्वानेव महारथान् ।
एष भीमो रणे क्रुद्धो धार्तराष्ट्रान्महारथान् ॥ ३४
यथाप्राग्र्यान्यथाज्येष्ठान्यथाशूरांश्च संगतान् ।
निपातयत्युग्रधन्वा तं प्रमथ्नीत पार्थिवाः ॥ ३५
एवमुक्तास्ततः सर्वे धार्तराष्ट्रस्य सैनिकाः ।
अभ्यद्रवन्त संक्रुद्धा भीमसेनं महाबलम् ॥ ३६
भगदत्तः प्रभिन्नेन कुञ्जरेण विशां पते ।
अपतत्सहसा तत्र यत्र भीमो व्यवस्थितः ॥ ३७
आपतन्नेव च रणे भीमसेनं शिलाशितैः ।
अदृश्यं समरे चक्रे जीमूत इव भास्करम् ॥ ३८
अभिमन्युमुखास्तत्र नामृष्यन्त महारथाः ।
भीमस्याच्छादनं संख्ये स्वबाहुबलमाश्रिताः ॥ ३९
त एनं शरवर्षेण समन्तात्पर्यवारयन् ।
गजं च शरवृष्ट्या तं बिभिदुस्ते समन्ततः ॥ ४०
स शस्त्रवृष्ट्याभिहतः प्राद्रवद्द्विगुणं पदम् ।

प्राग्ज्योतिषगजो राजन्नानालिङ्गैः सुतेजनैः ॥ ४१
संजातरुधिरोत्पीडः प्रेक्षणीयोऽभवद्रणे ।
गभस्तिभिरिवार्कस्य संस्यूतो जलदो महान् ॥ ४२
स चोदितो मदस्रावी भगदत्तेन वारणः ।
अभ्यधावत तान्सर्वान्कालोत्सृष्ट इवान्तकः ।
द्विगुणं जवमास्थाय कम्पयंश्चरणैर्महीम् ॥ ४३
तस्य तत्सुमहद्रूपं दृष्ट्वा सर्वे महारथाः ।
असह्यं मन्यमानास्ते नातिप्रमनसोऽभवन् ॥ ४४
ततस्तु नृपतिः क्रुद्धो भीमसेनं स्तनान्तरे ।
आजघान नरव्याघ्र शरेण नतपर्वणा ॥ ४५
सोऽतिविद्धो महेष्वासस्तेन राज्ञा महारथः ।
मूर्छयाभिपरीताङ्गो ध्वजयष्टिमुपाश्रितः ॥ ४६
तांस्तु भीतान्समालक्ष्य भीमसेनं च मूर्छितम् ।
ननाद बलवन्नादं भगदत्तः प्रतापवान् ॥ ४७
ततो घटोत्कचो राजन्प्रेक्ष्य भीमं तथागतम् ।
संक्रुद्धो राक्षसो घोरस्तत्रैवान्तरधीयत ॥ ४८
स कृत्वा दारुणां मायां भीरूणां भयवर्धिनीम् ।
अदृश्यत निमेषार्धाद्घोररूपं समाश्रितः ॥ ४९
ऐरावतं समारुह्य स्वयं मायामयं कृतम् ।
तस्य चान्येऽपि दिङ्नागा बभूवुरनुयायिनः ॥ ५०
अञ्जनो वामनश्चैव महापद्मश्च सुप्रभः ।
त्रय एते महानागा राक्षसैः समधिष्ठिताः ॥ ५१
महाकायास्त्रिधा राजन्प्रस्रवन्तो मदं बहु ।
तेजोवीर्यबलोपेता महाबलपराक्रमाः ॥ ५२
घटोत्कचस्तु स्वं नागं चोदयामास तं ततः ।
सगजं भगदत्तं तु हन्तुकामः परंतपः ॥ ५३
ते चान्ये चोदिता नागा राक्षसैस्तैर्महाबलैः ।
परिपेतुः सुसंरब्धाश्चतुर्दंष्ट्राश्चतुर्दिशम् ।
भगदत्तस्य तं नागं विषाणैस्तेऽभ्यपीडयन् ॥ ५४
संपीड्यमानस्तैर्नागैर्वेदनार्तः शरातुरः ।
सोऽनदत्सुमहानादमिन्द्राशनिसमस्वनम् ॥ ५५
तस्य तं नदतो नादं सुघोरं भीमनिस्वनम् ।
श्रुत्वा भीष्मोऽब्रवीद्द्रोणं राजानं च सुयोधनम् ॥
एष युध्यति संग्रामे हैडिम्बेन दुरात्मना ।
भगदत्तो महेष्वासः कृच्छ्रेण परिवर्तते ॥ ५७
राक्षसश्च महामायः स च राजातिकोपनः ।
तौ समेतौ महावीर्यौ कालमृत्युसमावुभौ ॥ ५८
श्रूयते ह्येष हृष्टानां पाण्डवानां महास्वनः ।
हस्तिनश्चैव सुमहान्भीतस्य रुवतो ध्वनिः ॥ ५९
तत्र गच्छाम भद्रं वो राजानं परिरक्षितुम् ।
अरक्ष्यमाणः समरे क्षिप्रं प्राणान्विमोक्ष्यते ॥ ६०
ते त्वरध्वं महावीर्याः किं चिरेण प्रयामहे ।
महान्हि वर्तते रौद्रः संग्रामो लोमहर्षणः ॥ ६१
भक्तश्च कुलपुत्रश्च शूरश्च पृतनापतिः ।
युक्तं तस्य परित्राणं कर्तुमस्माभिरच्युताः ॥ ६२
भीष्मस्य तद्वचः श्रुत्वा भारद्वाजपुरोगमाः ।
सहिताः सर्वराजानो भगदत्तपरीप्सया ।
उत्तमं जवमास्थाय प्रययुर्यत्र सोऽभवत् ॥ ६३
तान्प्रयातान्समालोक्य युधिष्ठिरपुरोगमाः ।
पाञ्चालाः पाण्डवैः सार्धं पृष्ठतोऽनुययुः परान् ॥
तान्यनीकान्यथालोक्य राक्षसेन्द्रः प्रतापवान् ।
ननाद सुमहानादं विस्फोटमशनेरिव ॥ ६५
तस्य तं निनदं श्रुत्वा दृष्ट्वा नागांश्च युध्यतः ।
भीष्मः शांतनवो भूयो भारद्वाजमभाषत ॥ ६६
न रोचते मे संग्रामो हैडिम्बेन दुरात्मना ।
बलवीर्यसमाविष्टः ससहायश्च सांप्रतम् ॥ ६७
नैष शक्यो युधा जेतुमपि वज्रभृता स्वयम् ।
लब्धलक्ष्यः प्रहारी च वयं च श्रान्तवाहनाः ।
पाञ्चालैः पाण्डवेयैश्च दिवसं क्षतविक्षताः ॥ ६८
तन्न मे रोचते युद्धं पाण्डवैर्जितकाशिभिः ।

घुष्यतामवहारोऽद्य श्वो योत्स्यामः परैः सह ॥ ६९
पितामहवचः श्रुत्वा तथा चक्रुः स्म कौरवाः ।
उपायेनापयानं ते घटोत्कचभयार्दिताः ॥ ७०
कौरवेषु निवृत्तेषु पाण्डवा जितकाशिनः ।
सिंहनादमकुर्वन्त शङ्खवेणुस्वनैः सह ॥ ७१
एवं तदभवद्युद्धं दिवसं भरतर्षभ ।
पाण्डवानां कुरूणां च पुरस्कृत्य घटोत्कचम् ॥ ७२
कौरवास्तु ततो राजन्प्रययुः शिबिरं स्वकम् ।
व्रीडमाना निशाकाले पाण्डवेयैः पराजिताः ॥ ७३
शरविक्षतगात्राश्च पाण्डुपुत्रा महारथाः ।
युद्धे सुमनसो भूत्वा शिबिरायैव जग्मिरे ॥ ७४
पुरस्कृत्य महाराज भीमसेनघटोत्कचौ ।
पूजयन्तस्तदान्योन्यं मुदा परमया युताः ॥ ७५
नदन्तो विविधान्नादांस्तूर्यस्वनविमिश्रितान् ।
सिंहनादांश्च कुर्वाणा विमिश्राञ्शङ्खनिस्वनैः ॥ ७६
विनदन्तो महात्मानः कम्पयन्तश्च मेदिनीम् ।
घट्टयन्तश्च मर्माणि तव पुत्रस्य मारिष ।
प्रयाताः शिबिरायैव निशाकाले परंतपाः ॥ ७७
दुर्योधनस्तु नृपतिर्दीनो भ्रातृवधेन च ।
मुहूर्तं चिन्तयामास बाष्पशोकसमाकुलः ॥ ७८
ततः कृत्वा विधिं सर्वं शिबिरस्य यथाविधि ।
प्रदध्यौ शोकसंतप्तो भ्रातृव्यसनकर्शितः ॥ ७९

इति श्रीमहाभारते भीष्मपर्वणि
षष्टितमोऽध्यायः ॥ ६० ॥

६१

धृतराष्ट्र उवाच ।

भयं मे सुमहज्जातं विस्मयश्चैव संजय ।
श्रुत्वा पाण्डुकुमाराणां कर्म देवैः सुदुष्करम् ॥ १
पुत्राणां च पराभवं श्रुत्वा संजय सर्वशः ।
चिन्ता मे महती सूत भविष्यति कथं त्विति ॥ २
ध्रुवं विदुरवाक्यानि धक्ष्यन्ति हृदयं मम ।
यथा हि दृश्यते सर्वं दैवयोगेन संजय ॥ ३
यत्र भीष्ममुखाञ्शूरानस्त्रज्ञान्योधसत्तमान् ।
पाण्डवानामनीकानि योधयन्ति प्रहारिणः ॥ ४
केनावध्या महात्मानः पाण्डुपुत्रा महाबलाः ।
केन दत्तवरास्तात किं वा ज्ञानं विदन्ति ते ।
येन क्षयं न गच्छन्ति दिवि तारागणा इव ॥ ५
पुनः पुनर्न मृष्यामि हतं सैन्यं स्म पाण्डवैः ।
मय्येव दण्डः पतति दैवात्परमदारुणः ॥ ६
यथावध्याः पाण्डुसुता यथा वध्याश्च मे सुताः ।
एतन्मे सर्वमाचक्ष्व यथातत्त्वेन संजय ॥ ७
न हि पारं प्रपश्यामि दुःखस्यास्य कथंचन ।
समुद्रस्येव महतो भुजाभ्यां प्रतरन्नरः ॥ ८
पुत्राणां व्यसनं मन्ये ध्रुवं प्राप्तं सुदारुणम् ।
घातयिष्यति मे पुत्रान्सर्वान्भीमो न संशयः ॥ ९
न हि पश्यामि तं वीरं यो मे रक्षेत्सुतान्रणे ।
ध्रुवं विनाशः समरे पुत्राणां मम संजय ॥ १०
तस्मान्मे कारणं सूत युक्तिं चैव विशेषतः ।
पृच्छतोऽद्य यथातत्त्वं सर्वमाख्यातुमर्हसि ॥ ११
दुर्योधनोऽपि यच्चक्रे दृष्ट्वा स्वान्विमुखान्रणे ।
भीष्मद्रोणौ कृपश्चैव सौबलेयो जयद्रथः ।
द्रौणिर्वापि महेष्वासो विकर्णो वा महाबलः ॥ १२
निश्चयो वापि कस्तेषां तदा ह्यासीन्महात्मनाम् ।
विमुखेषु महाप्राज्ञ मम पुत्रेषु संजय ॥ १३

संजय उवाच ।

शृणु राजन्नवहितः श्रुत्वा चैवावधारय ।
नैव मन्त्रकृतं किंचिन्नैव मायां तथाविधाम् ।
न वै विभीषिकां कांचिद्राजन्कुर्वन्ति पाण्डवाः ॥ १४
युध्यन्ति ते यथान्यायं शक्तिमन्तश्च संयुगे ।
धर्मेण सर्वकार्याणि कीर्तितानीति भारत ।

आरभन्ते सदा पार्थाः प्रार्थयाना महद्यशः ॥ १५
न ते युद्धान्निवर्तन्ते धर्मोपेता महाबलाः ।
श्रिया परमया युक्ता यतो धर्मस्ततो जयः ।
तेनावध्या रणे पार्था जययुक्ताश्च पार्थिव ॥ १६
तव पुत्रा दुरात्मानः पापेष्वभिरताः सदा ।
निष्ठुरा हीनकर्माणस्तेन हीयन्ति संयुगे ॥ १७
सुबहूनि नृशंसानि पुत्रैस्तव जनेश्वर ।
निकृतानीह पाण्डूनां नीचैरिव यथा नरैः ॥ १८
सर्वं च तदनादृत्य पुत्राणां तव किल्बिषम् ।
सापह्नवाः सदैवासन्पाण्डवाः पाण्डुपूर्वज ।
न चैनान्बहु मन्यन्ते पुत्रास्तव विशां पते ॥ १९
तस्य पापस्य सततं क्रियमाणस्य कर्मणः ।
संप्राप्तं सुमहद्घोरं फलं किंपाकसंनिभम् ।
स तद्भुङ्क्ष्व महाराज सपुत्रः ससुहृज्जनः ॥ २०
नावबुध्यसि यद्राजन्वार्यमाणः सुहृज्जनैः ।
विदुरेणाथ भीष्मेण द्रोणेन च महात्मना ॥ २१
तथा मया चाप्यसकृद्वार्यमाणो न गृह्णसि ।
वाक्यं हितं च पथ्यं च मर्त्यः पथ्यमिवौषधम् ।
पुत्राणां मतमास्थाय जितान्मन्यसि पाण्डवान् ॥ २२
शृणु भूयो यथातत्त्वं यन्मां त्वं परिपृच्छसि ।
कारणं भरतश्रेष्ठ पाण्डवानां जयं प्रति ।
तत्तेऽहं कथयिष्यामि यथाश्रुतमरिंदम ॥ २३
दुर्योधनेन संपृष्ट एतमर्थं पितामहः ।
दृष्ट्वा भ्रातॄन्रणे सर्वान्निर्जितान्सुमहारथान् ॥ २४
शोकसंमूढहृदयो निशाकाले स्म कौरवः ।
पितामहं महाप्राज्ञं विनयेनोपगम्य ह ।
यदब्रवीत्सुतस्तेऽसौ तन्मे शृणु जनेश्वर ॥ २५

दुर्योधन उवाच ।

त्वं च द्रोणश्च शल्यश्च कृपो द्रौणिस्तथैव च ।
कृतवर्मा च हार्दिक्यः काम्बोजश्च सुदक्षिणः ॥
भूरिश्रवा विकर्णश्च भगदत्तश्च वीर्यवान् ।
महारथाः समाख्याताः कुलपुत्रास्तनुत्यजः ॥ २७
त्रयाणामपि लोकानां पर्याप्ता इति मे मतिः ।
पाण्डवानां समस्ताश्च न तिष्ठन्ति पराक्रमे ॥ २८
तत्र मे संशयो जातस्तन्ममाचक्ष्व पृच्छतः ।
यं समाश्रित्य कौन्तेया जयन्त्यस्मान्पदे पदे ॥ २९

भीष्म उवाच ।

शृणु राजन्वचो मह्यं यत्त्वां वक्ष्यामि कौरव ।
बहुशश्च ममोक्तोऽसि न च मे तत्त्वया कृतम् ॥
क्रियतां पाण्डवैः सार्धं शमो भरतसत्तम ।
एतत्क्षममहं मन्ये पृथिव्यास्तव चाभिभो ॥ ३१
भुङ्क्ष्वेमां पृथिवीं राजन्भ्रातृभिः सहितः सुखी ।
दुर्हृदस्तापयन्सर्वान्नन्दयंश्चापि बान्धवान् ॥ ३२
न च मे क्रोशतस्तात श्रुतवानसि वै पुरा ।
तदिदं समनुप्राप्तं यत्पाण्डूनवमन्यसे ॥ ३३
यश्च हेतुरवध्यत्वे तेषामक्लिष्टकर्मणाम् ।
तं शृणुष्व महाराज मम कीर्तयतः प्रभो ॥ ३४
नास्ति लोकेषु तद्भूतं भविता नो भविष्यति ।
यो जयेत्पाण्डवान्संख्ये पालिताञ्शार्ङ्गधन्वना ॥
यत्तु मे कथितं तात मुनिभिर्भावितात्मभिः ।
पुराणगीतं धर्मज्ञ तच्छृणुष्व यथातथम् ॥ ३६
पुरा किल सुराः सर्वे ऋषयश्च समागताः ।
पितामहमुपासेदुः पर्वते गन्धमादने ॥ ३७
मध्ये तेषां समासीनः प्रजापतिरपश्यत ।
विमानं जाज्वलद्भासा स्थितं प्रवरमम्बरे ॥ ३८
ध्यानेनावेद्य तं ब्रह्मा कृत्वा च नियतोऽञ्जलिम् ।
नमश्चकार हृष्टात्मा परमं परमेश्वरम् ॥ ३९
ऋषयस्त्वथ देवाश्च दृष्ट्वा ब्रह्माणमुत्थितम् ।
स्थिताः प्राञ्जलयः सर्वे पश्यन्तो महदद्भुतम् ॥ ४०
यथावच्च तमभ्यर्च्य ब्रह्मा ब्रह्मविदां वरः ।

जगाद जगतः स्रष्टा परं परमधर्मवित् ॥ ४१
विश्वावसुर्विश्वमूर्तिर्विश्वेशो
विष्वक्सेनो विश्वकर्मा वशी च ।
विश्वेश्वरो वासुदेवोऽसि तस्मा-
द्योगात्मानं दैवतं त्वामुपैमि ॥ ४२
जय विश्व महादेव जय लोकहिते रत ।
जय योगीश्वर विभो जय योगपरावर ॥ ४३
पद्मगर्भ विशालाक्ष जय लोकेश्वरेश्वर ।
भूतभव्यभवन्नाथ जय सौम्यात्मजात्मज ॥ ४४
असंख्येयगुणाजेय जय सर्वपरायण ।
नारायण सुदुष्पार जय शार्ङ्गधनुर्धर ॥ ४५
सर्वगुह्यगुणोपेत विश्वमूर्ते निरामय ।
विश्वेश्वर महाबाहो जय लोकार्थतत्पर ॥ ४६
महोरग वराहाद्य हरिकेश विभो जय ।
हरिवास विशामीश विश्वावासामिताव्यय ॥ ४७
व्यक्ताव्यक्तामितस्थान नियतेन्द्रिय सेन्द्रिय ।
असंख्येयात्मभावज्ञ जय गम्भीर कामद ॥ ४८
अनन्त विदितप्रज्ञ नित्यं भूतविभावन ।
कृतकार्य कृतप्रज्ञ धर्मज्ञ विजयाजय ॥ ४९
गुह्यात्मन्सर्वभूतात्मन्स्फुटसंभूतसंभव ।
भूतार्थतत्त्व लोकेश जय भूतविभावन ॥ ५०
आत्मयोने महाभाग कल्पसंक्षेपतत्पर ।
उद्भावन मनोद्भाव जय ब्रह्मजनप्रिय ॥ ५१
निसर्गसर्गाभिरत कामेश परमेश्वर ।
अमृतोद्भव सद्भाव युगाग्ने विजयप्रद ॥ ५२
प्रजापतिपते देव पद्मनाभ महाबल ।
आत्मभूत महाभूत कर्मात्मञ्जय कर्मद ॥ ५३
पादौ तव धरा देवी दिशो बाहुर्दिवं शिरः ।
मूर्तिस्तेऽहं सुराः कायश्चन्द्रादित्यौ च चक्षुषी ॥ ५४
बलं तपश्च सत्यं च धर्मः कामात्मजः प्रभो ।
तेजोऽग्निः पवनः श्वास आपस्ते स्वेदसंभवाः ॥ ५५
अश्विनौ श्रवणौ नित्यं देवी जिह्वा सरस्वती ।
वेदाः संस्कारनिष्ठा हि त्वयीदं जगदाश्रितम् ॥ ५६
न संख्यां न परीमाणं न तेजो न पराक्रमम् ।
न बलं योगयोगीश जानीमस्ते न संभवम् ॥ ५७
त्वद्भक्तिनिरता देव नियमैस्त्वा समाहिताः ।
अर्चयामः सदा विष्णो परमेशं महेश्वरम् ॥ ५८
ऋषयो देवगन्धर्वा यक्षराक्षसपन्नगाः ।
पिशाचा मानुषाश्चैव मृगपक्षिसरीसृपाः ॥ ५९
एवमादि मया सृष्टं पृथिव्यां त्वत्प्रसादजम् ।
पद्मनाभ विशालाक्ष कृष्ण दुःस्वप्ननाशन ॥ ६०
त्वं गतिः सर्वभूतानां त्वं नेता त्वं जगन्मुखम् ।
त्वत्प्रसादेन देवेश सुखिनो विबुधाः सदा ॥ ६१
पृथिवी निर्भया देव त्वत्प्रसादात्सदाभवत् ।
तस्माद्भव विशालाक्ष यदुवंशविवर्धनः ॥ ६२
धर्मसंस्थापनार्थाय दैतेयानां वधाय च ।
जगतो धारणार्थाय विज्ञाप्यं कुरु मे प्रभो ॥ ६३
यदेतत्परमं गुह्यं त्वत्प्रसादमयं विभो ।
वासुदेव तदेतत्ते मयोद्गीतं यथातथम् ॥ ६४
सृष्ट्वा संकर्षणं देवं स्वयमात्मानमात्मना ।
कृष्ण त्वमात्मनास्राक्षीः प्रद्युम्नं चात्मसंभवम् ॥ ६५
प्रद्युम्नाच्चानिरुद्धं त्वं यं विदुर्विष्णुमव्ययम् ।
अनिरुद्धोऽसृजन्मां वै ब्रह्माणं लोकधारिणम् ॥ ६६
वासुदेवमयः सोऽहं त्वयैवास्मि विनिर्मितः ।
विभज्य भागशोऽऽत्मानं व्रज मानुषतां विभो ॥ ६७
तत्रासुरवधं कृत्वा सर्वलोकसुखाय वै ।
धर्मं स्थाप्य यशः प्राप्य योगं प्राप्स्यसि तत्त्वतः ॥
त्वां हि ब्रह्मर्षयो लोके देवाश्चामितविक्रम ।
तैस्तैश्च नामभिर्भक्ता गायन्ति परमात्मकम् ॥ ६९
स्थिताश्च सर्वे त्वयि भूतसंघाः

कृत्वाश्रयं त्वां वरदं सुबाहो ।
अनादिमध्यान्तमपारयोगं
लोकस्य सेतुं प्रवदन्ति विप्राः ॥ ७०

इति श्रीमहाभारते भीष्मपर्वणि
एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

भीष्म उवाच ।

ततः स भगवान्देवो लोकानां परमेश्वरः ।
ब्रह्माणं प्रत्युवाचेदं स्निग्धगम्भीरया गिरा ॥ १
विदितं तात योगान्मे सर्वमेतत्तवेप्सितम् ।
तथा तद्भवितेत्युक्त्वा तत्रैवान्तरधीयत ॥ २
ततो देवर्षिगन्धर्वा विस्मयं परमं गताः ।
कौतूहलपराः सर्वे पितामहमथाब्रुवन् ॥ ३
को न्वयं यो भगवता प्रणम्य विनयाद्विभो ।
वाग्भिः स्तुतो वरिष्ठाभिः श्रोतुमिच्छाम तं वयम् ॥
एवमुक्तस्तु भगवान्प्रत्युवाच पितामहः ।
देवब्रह्मर्षिगन्धर्वान्सर्वान्मधुरया गिरा ॥ ५
यत्तत्परं भविष्यं च भवितव्यं च यत्परम् ।
भूतात्मा यः प्रभुश्चैव ब्रह्म यच्च परं पदम् ॥ ६
तेनास्मि कृतसंवादः प्रसन्नेन सुरर्षभाः ।
जगतोऽनुग्रहार्थाय याचितो मे जगत्पतिः ॥ ७
मानुषं लोकमातिष्ठ वासुदेव इति श्रुतः ।
असुराणां वधार्थाय संभवस्व महीतले ॥ ८
संग्रामे निहता ये ते दैत्यदानवराक्षसाः ।
त इमे नृषु संभूता घोररूपा महाबलाः ॥ ९
तेषां वधार्थं भगवान्नरेण सहितो वशी ।
मानुषीं योनिमास्थाय चरिष्यति महीतले ॥ १०
नरनारायणौ यौ तौ पुराणावृषिसत्तमौ ।
सहितौ मानुषे लोके संभूतावमितद्युती ॥ ११
अजेयौ समरे यत्तौ सहितावमरैरपि ।
मूढास्त्वेतौ न जानन्ति नरनारायणावृषी ॥ १२
तस्याहमात्मजो ब्रह्मा सर्वस्य जगतः पतिः ।
वासुदेवोऽर्चनीयो वः सर्वलोकमहेश्वरः ॥ १३
तथा मनुष्योऽयमिति कदाचित्सुरसत्तमाः ।
नावज्ञेयो महावीर्यः शङ्खचक्रगदाधरः ॥ १४
एतत्परमकं गुह्यमेतत्परमकं पदम् ।
एतत्परमकं ब्रह्म एतत्परमकं यशः ॥ १५
एतदक्षरमव्यक्तमेतत्तच्छाश्वतं महत् ।
एतत्पुरुषसंज्ञं वै गीयते ज्ञायते न च ॥ १६
एतत्परमकं तेज एतत्परमकं सुखम् ।
एतत्परमकं सत्यं कीर्तितं विश्वकर्मणा ॥ १७
तस्मात्सर्वैः सुरैः सेन्द्रैर्लोकैश्चामितविक्रमः ।
नावज्ञेयो वासुदेवो मानुषोऽयमिति प्रभुः ॥ १८
यश्च मानुषमात्रोऽयमिति ब्रूयात्सुमन्दधीः ।
हृषीकेशमवज्ञानात्तमाहुः पुरुषाधमम् ॥ १९
योगिनं तं महात्मानं प्रविष्टं मानुषीं तनुम् ।
अवमन्येद्वासुदेवं तमाहुस्तामसं जनाः ॥ २०
देवं चराचरात्मानं श्रीवत्साङ्कं सुवर्चसम् ।
पद्मनाभं न जानाति तमाहुस्तामसं जनाः ॥ २१
किरीटकौस्तुभधरं मित्राणामभयंकरम् ।
अवजानन्महात्मानं घोरे तमसि मज्जति ॥ २२
एवं विदित्वा तत्त्वार्थं लोकानामीश्वरेश्वरः ।
वासुदेवो नमस्कार्यः सर्वलोकैः सुरोत्तमाः ॥ २३
एवमुक्त्वा स भगवान्सर्वान्देवगणान्पुरा ।
विसृज्य सर्वलोकात्मा जगाम भवनं स्वकम् ॥२४
ततो देवाः सगन्धर्वा मुनयोऽप्सरसोऽपि च ।
कथां तां ब्रह्मणा गीतां श्रुत्वा प्रीता दिवं ययुः॥२५
एतच्छ्रुतं मया तात ऋषीणां भावितात्मनाम् ।
वासुदेवं कथयतां समवाये पुरातनम् ॥ २६
जामदग्न्यस्य रामस्य मार्कण्डेयस्य धीमतः ।

व्यासनारदयोश्चापि श्रुतं श्रुतविशारद ॥ २७
एतमर्थं च विज्ञाय श्रुत्वा च प्रभुमव्ययम् ।
वासुदेवं महात्मानं लोकानामीश्वरेश्वरम् ॥ २८
यस्यासावात्मजो ब्रह्मा सर्वस्य जगतः पिता ।
कथं न वासुदेवोऽयमर्च्यश्चेज्यश्च मानवैः ॥ २९
वारितोऽसि पुरा तात मुनिभिर्वेदपारगैः ।
मा गच्छ संयुगं तेन वासुदेवेन धीमता ।
मा पाण्डवैः सार्धमिति तच्च मोहान्न बुध्यसे ॥ ३०
मन्ये त्वां राक्षसं क्रूरं तथा चासि तमोवृतः ।
यस्माद्द्विषसि गोविन्दं पाण्डवं च धनंजयम् ।
नरनारायणौ देवौ नान्यो द्विष्याद्धि मानवः ॥ ३१
तस्माद्ब्रवीमि ते राजन्नेष वै शाश्वतोऽव्ययः ।
सर्वलोकमयो नित्यः शास्ता धाता धरो ध्रुवः ॥ ३२
लोकान्धारयते यस्त्रींश्चराचरगुरुः प्रभुः ।
योद्धा जयश्च जेता च सर्वप्रकृतिरीश्वरः ॥ ३३
राजन्सत्त्वमयो ह्येष तमोरागविवर्जितः ।
यतः कृष्णस्ततो धर्मो यतो धर्मस्ततो जयः ॥ ३४
तस्य माहात्म्ययोगेन योगेनात्मन एव च ।
धृताः पाण्डुसुता राजञ्जयश्चैषां भविष्यति ॥ ३५
श्रेयोयुक्तां सदा बुद्धिं पाण्डवानां दधाति यः ।
बलं चैव रणे नित्यं भयेभ्यश्चैव रक्षति ॥ ३६
स एष शाश्वतो देवः सर्वगुह्यमयः शिवः ।
वासुदेव इति ज्ञेयो यन्मां पृच्छसि भारत ॥ ३७
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः ।
सेव्यतेऽभ्यर्च्यते चैव नित्ययुक्तैः स्वकर्मभिः ॥ ३८
द्वापरस्य युगस्यान्ते आदौ कलियुगस्य च ।
सात्वतं विधिमास्थाय गीतः संकर्षणेन यः ॥ ३९
स एष सर्वासुरमर्त्यलोकं
समुद्रकक्ष्यान्तरिताः पुरीश्च ।
युगे युगे मानुषं चैव वासं
पुनः पुनः सृजते वासुदेवः ॥ ४०

इति श्रीमहाभारते भीष्मपर्वणि
द्विषष्टितमोऽध्यायः ॥ ६२ ॥

६३

दुर्योधन उवाच ।

वासुदेवो महद्भूतं सर्वलोकेषु कथ्यते ।
तस्यागमं प्रतिष्ठां च ज्ञातुमिच्छे पितामह ॥ १

भीष्म उवाच ।

वासुदेवो महद्भूतं संभूतं सह दैवतैः ।
न परं पुण्डरीकाक्षाद्दृश्यते भरतर्षभ ।
मार्कण्डेयश्च गोविन्दं कथयत्यद्भुतं महत् ॥ २
सर्वभूतानि भूतात्मा महात्मा पुरुषोत्तमः ।
आपो वायुश्च तेजश्च त्रयमेतदकल्पयत् ॥ ३
स सृष्ट्वा पृथिवीं देवः सर्वलोकेश्वरः प्रभुः ।
अप्सु वै शयनं चक्रे महात्मा पुरुषोत्तमः ।
सर्वतोयमयो देवो योगात्सुष्वाप तत्र ह ॥ ४
मुखतः सोऽग्निमसृजत्प्राणाद्वायुमथापि च ।
सरस्वतीं च वेदांश्च मनसः ससृजेऽच्युतः ॥ ५
एष लोकान्ससर्जादौ देवांश्चर्षिगणैः सह ।
निधनं चैव मृत्युं च प्रजानां प्रभवोऽव्ययः ॥ ६
एष धर्मश्च धर्मज्ञो वरदः सर्वकामदः ।
एष कर्ता च कार्यं च पूर्वदेवः स्वयंप्रभुः ॥ ७
भूतं भव्यं भविष्यच्च पूर्वमेतदकल्पयत् ।
उभे संध्ये दिशः खं च नियमं च जनार्दनः ॥ ८
ऋषींश्चैव हि गोविन्दस्तपश्चैवानु कल्पयत् ।
स्रष्टारं जगतश्चापि महात्मा प्रभुरव्ययः ॥ ९
अग्रजं सर्वभूतानां संकर्षणमकल्पयत् ।
शेषं चाकल्पयद्देवमनन्तमिति यं विदुः ॥ १०
यो धारयति भूतानि धरां चेमां सपर्वताम् ।
ध्यानयोगेन विप्राश्च तं वदन्ति महौजसम् ॥ ११

कर्णस्रोतोद्भवं चापि मधुं नाम महासुरम् ।
तमुग्रमुग्रकर्माणमुग्रां बुद्धिं समास्थितम् ।
ब्रह्मणोऽपचितिं कुर्वञ्जघान पुरुषोत्तमः ॥ १२
तस्य तात वधादेव देवदानवमानवाः ।
मधुसूदनमित्याहुर्ऋषयश्च जनार्दनम् ।
वराहश्चैव सिंहश्च त्रिविक्रमगतिः प्रभुः ॥ १३
एष माता पिता चैव सर्वेषां प्राणिनां हरिः ।
परं हि पुण्डरीकाक्षान्न भूतं न भविष्यति ॥ १४
मुखतोऽसृजद्ब्राह्मणान्बाहुभ्यां क्षत्रियांस्तथा ।
वैश्यांश्चाप्यूरुतो राजञ्शूद्रान्पद्भ्यां तथैव च ।
तपसा नियतो देवो निधानं सर्वदेहिनाम् ॥ १५
ब्रह्मभूतममावास्यां पौर्णमास्यां तथैव च ।
योगभूतं परिचरन्केशवं महदाप्नुयात् ॥ १६
केशवः परमं तेजः सर्वलोकपितामहः ।
एवमाहुर्हृषीकेशं मुनयो वै नराधिप ॥ १७
एवमेनं विजानीहि आचार्यं पितरं गुरुम् ।
कृष्णो यस्य प्रसीदेत लोकास्तेनाक्षया जिताः ॥ १८
यश्चैवैनं भयस्थाने केशवं शरणं व्रजेत् ।
सदा नरः पठंश्चेदं स्वस्तिमान्स सुखी भवेत् ॥ १९
ये च कृष्णं प्रपद्यन्ते ते न मुह्यन्ति मानवाः ।
भये महति ये मग्नाः पाति नित्यं जनार्दनः ॥ २०
एतद्युधिष्ठिरो ज्ञात्वा याथातथ्येन भारत ।
सर्वात्मना महात्मानं केशवं जगदीश्वरम् ।
प्रपन्नः शरणं राजन्योगानामीश्वरं प्रभुम् ॥ २१

इति श्रीमहाभारते भीष्मपर्वणि
त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६४

भीष्म उवाच ।

शृणु चेदं महाराज ब्रह्मभूतस्तवं मम ।
ब्रह्मर्षिभिश्च देवैश्च यः पुरा कथितो भुवि ॥ १
साध्यानामपि देवानां देवदेवेश्वरः प्रभुः ।
लोकभावनभावज्ञ इति त्वां नारदोऽब्रवीत् ।
भूतं भव्यं भविष्यं च मार्कण्डेयोऽभ्युवाच ह ॥ २
यज्ञानां चैव यज्ञं त्वां तपश्च तपसामपि ।
देवानामपि देवं च त्वामाह भगवान्भृगुः ।
पुराणे भैरवं रूपं विष्णो भूतपतेति वै ॥ ३
वासुदेवो वसूनां त्वं शक्रं स्थापयिता तथा ।
देवदेवोऽसि देवानामिति द्वैपायनोऽब्रवीत् ॥ ४
पूर्वे प्रजानिसर्गेषु दक्षमाहुः प्रजापतिम् ।
स्रष्टारं सर्वभूतानामङ्गिरास्त्वां ततोऽब्रवीत् ॥ ५
अव्यक्तं ते शरीरोत्थं व्यक्तं ते मनसि स्थितम् ।
देवा वाक्संभवाश्चेति देवलस्त्वसितोऽब्रवीत् ॥ ६
शिरसा ते दिवं व्याप्तं बाहुभ्यां पृथिवी धृता ।
जठरं ते त्रयो लोकाः पुरुषोऽसि सनातनः ॥ ७
एवं त्वामभिजानन्ति तपसा भाविता नराः ।
आत्मदर्शनतृप्तानामृषीणां चापि सत्तमः ॥ ८
राजर्षीणामुदाराणामाहवेष्वनिवर्तिनाम् ।
सर्वधर्मप्रधानानां त्वं गतिर्मधुसूदन ॥ ९
एष ते विस्तरस्तात संक्षेपश्च प्रकीर्तितः ।
केशवस्य यथातत्त्वं सुप्रीतो भव केशवे ॥ १०

संजय उवाच ।

पुण्यं श्रुत्वैतदाख्यानं महाराज सुतस्तव ।
केशवं बहु मेने स पाण्डवांश्च महारथान् ॥ ११
तमब्रवीन्महाराज भीष्मः शांतनवः पुनः ।
माहात्म्यं ते श्रुतं राजन्केशवस्य महात्मनः ॥ १२
नरस्य च यथातत्त्वं यन्मां त्वं परिपृच्छसि ।
यदर्थं नृषु संभूतौ नरनारायणावुभौ ॥ १३
अवध्यौ च यथा वीरौ संयुगेष्वपराजितौ ।
यथा च पाण्डवा राजन्नगम्या युधि कस्यचित् ॥ १४
प्रीतिमान्हि दृढं कृष्णः पाण्डवेषु यशस्विषु ।

तस्माद्ब्रवीमि राजेन्द्र शमो भवतु पाण्डवैः ।। १५
पृथिवीं भुङ्क्ष्व सहितो भ्रातृभिर्बलिभिर्वशी ।
नरनारायणौ देवाववज्ञाय नशिष्यसि ।। १६
एवमुक्त्वा तव पिता तूष्णीमासीद्विशां पते ।
व्यसर्जयच्च राजानं शयनं च विवेश ह ।। १७
राजापि शिबिरं प्रायात्प्रणिपत्य महात्मने ।
शिश्ये च शयने शुभ्रे तां रात्रिं भरतर्षभ ।। १८

इति श्रीमहाभारते भीष्मपर्वणि
चतुःषष्टितमोऽध्यायः ।। ६४ ।।

६५

संजय उवाच ।

व्युषितायां च शर्वर्यामुदिते च दिवाकरे ।
उभे सेने महाराज युद्धायैव समीयतुः ।। १
अभ्यधावंश्च संक्रुद्धाः परस्परजिगीषवः ।
ते सर्वे सहिता युद्धे समालोक्य परस्परम् ।। २
पाण्डवा धार्तराष्ट्राश्च राजन्दुर्मन्त्रिते तव ।
व्यूहौ च व्यूह्य संरब्धाः संप्रयुद्धाः प्रहारिणः ।। ३
अरक्षन्मकरव्यूहं भीष्मो राजन्समन्ततः ।
तथैव पाण्डवा राजन्नरक्षन्व्यूहमात्मनः ।। ४
स निर्ययौ रथानीकं पिता देवव्रतस्तव ।
महता रथवंशेन संवृतो रथिनां वरः ।। ५
इतरेतरमन्वीयुर्यथाभागमवस्थिताः ।
रथिनः पत्तयश्चैव दन्तिनः सादिनस्तथा ।। ६
तान्दृष्ट्वा प्रोद्यतान्संख्ये पाण्डवाश्च यशस्विनः ।
श्येनेन व्यूहराजेन तेनाजय्येन संयुगे ।। ७
अशोभत मुखे तस्य भीमसेनो महाबलः ।
नेत्रे शिखण्डी दुर्धर्षो धृष्टद्युम्नश्च पार्षतः ।। ८
शीर्षं तस्याभवद्वीरः सात्यकिः सत्यविक्रमः ।
विधुन्वन्गाण्डिवं पार्थो ग्रीवायामभवत्तदा ।। ९
अक्षौहिण्या समग्रा या वामपक्षोऽभवत्तदा ।
महात्मा द्रुपदः श्रीमान्सह पुत्रेण संयुगे ।। १०
दक्षिणश्चाभवत्पक्षः कैकेयोऽक्षौहिणीपतिः ।
पृष्ठतो द्रौपदेयाश्च सौभद्रश्चापि वीर्यवान् ।। ११
पृष्ठे समभवच्छ्रीमान्स्वयं राजा युधिष्ठिरः ।
भ्रातृभ्यां सहितो धीमान्यमाभ्यां चारुविक्रमः ।।
प्रविश्य तु रणे भीमो मकरं मुखतस्तदा ।
भीष्ममासाद्य संग्रामे छादयामास सायकैः ।। १३
ततो भीष्मो महास्त्राणि पातयामास भारत ।
मोहयन्पाण्डुपुत्राणां व्यूढं सैन्यं महाहवे ।। १४
संमुह्यति तदा सैन्ये त्वरमाणो धनंजयः ।
भीष्मं शरसहस्रेण विव्याध रणमूर्धनि ।। १५
परिसंवार्य चास्त्राणि भीष्ममुक्तानि संयुगे ।
स्वेनानीकेन हृष्टेन युद्धाय समवस्थितः ।। १६
ततो दुर्योधनो राजा भारद्वाजमभाषत ।
पूर्वं दृष्ट्वा वधं घोरं बलस्य बलिनां वरः ।
भ्रातॄणां च वधं युद्धे स्मरमाणो महारथः ।। १७
आचार्य सततं त्वं हि हितकामो ममानघ ।
वयं हि त्वां समाश्रित्य भीष्मं चैव पितामहम् ।।
देवानपि रणे जेतुं प्रार्थयामो न संशयः ।
किमु पाण्डुसुतान्युद्धे हीनवीर्यपराक्रमान् ।। १९
एवमुक्तस्ततो द्रोणस्तव पुत्रेण मारिष ।
अभिनत्पाण्डवानीकं प्रेक्षमाणस्य सात्यकेः ।। २०
सात्यकिस्तु तदा द्रोणं वारयामास भारत ।
ततः प्रववृते युद्धं तुमुलं लोमहर्षणम् ।। २१
शैनेयं तु रणे क्रुद्धो भारद्वाजः प्रतापवान् ।
अविध्यन्निशितैर्बाणैर्जत्रुदेशे हसन्निव ।। २२
भीमसेनस्ततः क्रुद्धो भारद्वाजमविध्यत ।
संरक्षन्सात्यकिं राजन्द्रोणाच्छस्त्रभृतां वरात् ।। २३
ततो द्रोणश्च भीष्मश्च तथा शल्यश्च मारिष ।
भीमसेनं रणे क्रुद्धाश्छादयांचक्रिरे शरैः ।। २४

तत्राभिमन्युः संक्रुद्धो द्रौपदेयाश्च मारिष ।
विव्यधुर्निशितैर्बाणैः सर्वांस्तानुद्यतायुधान् ॥ २५
भीष्मद्रोणौ च संक्रुद्धावापतन्तौ महाबलौ ।
प्रत्युद्ययौ शिखण्डी तु महेष्वासो महाहवे ॥ २६
प्रगृह्य बलवद्वीरो धनुर्जलदनिस्वनम् ।
अभ्यवर्षच्छरैस्तूर्णं छादयानो दिवाकरम् ॥ २७
शिखण्डिनं समासाद्य भरतानां पितामहः ।
अवर्जयत संग्रामे स्त्रीत्वं तस्यानुसंस्मरन् ॥ २८
ततो द्रोणो महाराज अभ्यद्रवत तं रणे ।
रक्षमाणस्ततो भीष्मं तव पुत्रेण चोदितः ॥ २९
शिखण्डी तु समासाद्य द्रोणं शस्त्रभृतां वरम् ।
अवर्जयत संग्रामे युगान्ताग्निमिवोल्बणम् ॥ ३०
ततो बलेन महता पुत्रस्तव विशां पते ।
जुगोप भीष्ममासाद्य प्रार्थयानो महद्यशः ॥ ३१
तथैव पाण्डवा राजन्पुरस्कृत्य धनंजयम् ।
भीष्ममेवाभ्यवर्तन्त जये कृत्वा दृढां मतिम् ॥ ३२
तद्युद्धमभवद्घोरं देवानां दानवैरिव ।
जयं च काङ्क्षतां नित्यं यशश्च परमाद्भुतम् ॥ ३३

इति श्रीमहाभारते भीष्मपर्वणि
पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

६६

संजय उवाच ।

अकरोत्तुमुलं युद्धं भीष्मः शांतनवस्तदा ।
भीमसेनभयादिच्छन्पुत्रांस्तारयितुं तव ॥ १
पूर्वाह्णे तन्महारौद्रं राज्ञां युद्धमवर्तत ।
कुरूणां पाण्डवानां च मुख्यशूरविनाशनम् ॥ २
तस्मिन्नाकुलसंग्रामे वर्तमाने महाभये ।
अभवत्तुमुलः शब्दः संस्पृशन्गगनं महत् ॥ ३
नदद्भिश्च महानागैर्हेषमाणैश्च वाजिभिः ।
भेरीशङ्खनिनादैश्च तुमुलः समपद्यत ॥ ४
युयुत्सवस्ते विक्रान्ता विजयाय महाबलाः ।
अन्योन्यमभिगर्जन्तो गोष्ठेष्विव महर्षभाः ॥ ५
शिरसां पात्यमानानां समरे निशितैः शरैः ।
अश्मवृष्टिरिवाकाशे बभूव भरतर्षभ ॥ ६
कुण्डलोष्णीषधारीणि जातरूपोज्ज्वलानि च ।
पतितानि स्म दृश्यन्ते शिरांसि भरतर्षभ ॥ ७
विशिखोन्मथितैर्गात्रैर्बाहुभिश्च सकार्मुकैः ।
सहस्ताभरणैश्चान्यैरभवच्छादिता मही ॥ ८
कवचोपहितैर्गात्रैर्हस्तैश्च समलंकृतैः ।
मुखैश्च चन्द्रसंकाशै रक्तान्तनयनैः शुभैः ॥ ९
गजवाजिमनुष्याणां सर्वगात्रैश्च भूपते ।
आसीत्सर्वा समाकीर्णा मुहूर्तेन वसुंधरा ॥ १०
रजोमेघैश्च तुमुलैः शस्त्रविद्युत्प्रकाशितैः ।
आयुधानां च निर्घोषः स्तनयित्नुसमोऽभवत् ॥ ११
स संप्रहारस्तुमुलः कटुकः शोणितोदकः ।
प्रावर्तत कुरूणां च पाण्डवानां च भारत ॥ १२
तस्मिन्महाभये घोरे तुमुले लोमहर्षणे ।
ववर्षुः शरवर्षाणि क्षत्रिया युद्धदुर्मदाः ॥ १३
क्रोशन्ति कुञ्जरास्तत्र शरवर्षप्रतापिताः ।
तावकानां परेषां च संयुगे भरतोत्तम ।
अश्वाश्च पर्यधावन्त हतारोहा दिशो दश ॥ १४
उत्पत्य निपतन्त्यन्ये शरघातप्रपीडिताः ।
तावकानां परेषां च योधानां भरतर्षभ ॥ १५
अश्वानां कुञ्जराणां च रथानां चातिवर्तताम् ।
संघाताः स्म प्रदृश्यन्ते तत्र तत्र विशां पते ॥ १६
गदाभिरसिभिः प्रासैर्बाणैश्च नतपर्वभिः ।
जघ्नुः परस्परं तत्र क्षत्रियाः कालचोदिताः ॥ १७
अपरे बाहुभिर्वीरा नियुद्धकुशला युधि ।
बहुधा समसज्जन्त आयसैः परिघैरिव ॥ १८
मुष्टिभिर्जानुभिश्चैव तलैश्चैव विशां पते ।

अन्योन्यं जघ्निरे वीरास्तावकाः पाण्डवैः सह ॥१९
विरथा रथिनश्चात्र निस्त्रिंशवरधारिणः ।
अन्योन्यमभिधावन्त परस्परवधैषिणः ॥ २०
ततो दुर्योधनो राजा कलिङ्गैर्बहुभिर्वृतः ।
पुरस्कृत्य रणे भीष्मं पाण्डवानभ्यवर्तत ॥ २१
तथैव पाण्डवाः सर्वे परिवार्य वृकोदरम् ।
भीष्ममभ्यद्रवन्क्रुद्धा रणे रभसवाहनाः ॥ २२

इति श्रीमहाभारते भीष्मपर्वणि
षट्षष्टितमोऽध्यायः ॥६६ ॥

६७

संजय उवाच ।

दृष्ट्वा भीष्मेण संसक्तान्भ्रातृनन्यांश्च पार्थिवान् ।
तमभ्यधावद्गाङ्गेयमुद्यतास्त्रो धनंजयः ॥ १
पाञ्चजन्यस्य निर्घोषं धनुषो गाण्डिवस्य च ।
ध्वजं च दृष्ट्वा पार्थस्य सर्वान्नो भयमाविशत् ॥ २
असज्जमानं वृक्षेषु धूमकेतुमिवोत्थितम् ।
बहुवर्णं च चित्रं च दिव्यं वानरलक्षणम् ।
अपश्याम महाराज ध्वजं गाण्डिवधन्वनः ॥ ३
विद्युतं मेघमध्यस्थां भ्राजमानामिवाम्बरे ।
ददृशुर्गाण्डिवं योधा रुक्मपृष्ठं महारथे ॥ ४
अशुश्रुम भृशं चास्य शक्रस्येवाभिगर्जतः ।
सुघोरं तलयोः शब्दं निघ्नतस्तव वाहिनीम् ॥ ५
चण्डवातो यथा मेघः सविद्युत्स्तनयित्नुमान् ।
दिशः संप्लावयन्सर्वाः शरवर्षैः समन्ततः ॥ ६
अभ्यधावत गाङ्गेयं भैरवास्त्रो धनंजयः ।
दिशं प्राचीं प्रतीचीं च न जानीमोऽस्त्रमोहिताः ॥७
कांदिग्भूताः श्रान्तपत्रा हताश्वा हतचेतसः ।
अन्योन्यमभिसंश्लिष्य योधास्ते भरतर्षभ ॥ ८
भीष्ममेवाभिलीयन्त सह सर्वैस्तवात्मजैः ।
तेषामार्तायनमभूद्भीष्मः शांतनवो रणे ॥ ९
समुत्पतन्त वित्रस्ता रथेभ्यो रथिनस्तदा ।
सादिनश्चाश्वपृष्ठेभ्यो भूमौ चापि पदातयः ॥ १०
श्रुत्वा गाण्डीवनिर्घोषं विस्फूर्जितमिवाशनेः ।
सर्वसैन्यानि भीतानि व्यवलीयन्त भारत ॥ ११
अथ काम्बोजमुख्यैस्तु बृहद्भिः शीघ्रगामिभिः ।
गोपानां बहुसाहस्रैर्बलैर्गोवासनो वृतः ॥ १२
मद्रसौवीरगान्धारैस्त्रिगर्तैश्च विशां पते ।
सर्वकालिङ्गमुख्यैश्च कलिङ्गाधिपतिर्वृतः ॥ १३
नागा नरगणौघाश्च दुःशासनपुरःसराः ।
जयद्रथश्च नृपतिः सहितः सर्वराजभिः ॥ १४
हयारोहवराश्चैव तव पुत्रेण चोदिताः ।
चतुर्दश सहस्राणि सौबलं पर्यवारयन् ॥ १५
ततस्ते सहिताः सर्वे विभक्तरथवाहनाः ।
पाण्डवान्समरे जग्मुस्तावका भरतर्षभ ॥ १६
रथिभिर्वारणैरश्वैः पदातैश्च समीरितम् ।
घोरमायोधनं जज्ञे महाभ्रसदृशं रजः ॥ १७
तोमरप्रासनाराचगजाश्वरथयोधिनाम् ।
बलेन महता भीष्मः समसज्जत्किरीटिना ॥ १८
आवन्त्यः काशिराजेन भीमसेनेन सैन्धवः ।
अजातशत्रुर्मद्राणामृषभेण यशस्विना ।
सहपुत्रः सहामात्यः शल्येन समसज्जत ॥ १९
विकर्णः सहदेवेन चित्रसेनः शिखण्डिना ।
मत्स्या दुर्योधनं जग्मुः शकुनिं च विशां पते ॥२०
द्रुपदश्चेकितानश्च सात्यकिश्च महारथः ।
द्रोणेन समसज्जन्त सपुत्रेण महात्मना ।
कृपश्च कृतवर्मा च धृष्टकेतुमभिद्रुतौ ॥ २१
एवं प्रजविताश्वानि भ्रान्तनागरथानि च ।
सैन्यानि समसज्जन्त प्रयुद्धानि समन्ततः ॥ २२
निरभ्रे विद्युतस्तीव्रा दिशश्च रजसावृताः ।
प्रादुरासन्महोल्काश्च सनिर्घाता विशां पते ॥ २३

प्रववौ च महावातः पांसुवर्षं पपात च ।
नभस्यन्तर्दधे सूर्यः सैन्येन रजसावृतः ॥ २४
प्रमोहः सर्वसत्त्वानामतीव समपद्यत ।
रजसा चाभिभूतानामस्त्रजालैश्च तुद्यताम् ॥ २५
वीरबाहुविसृष्टानां सर्वावरणभेदिनाम् ।
संघातः शरजालानां तुमुलः समपद्यत ॥ २६
प्रकाशं चक्रुराकाशमुद्यतानि भुजोत्तमैः ।
नक्षत्रविमलाभानि शस्त्राणि भरतर्षभ ॥ २७
आर्षभाणि विचित्राणि रुक्मजालावृतानि च ।
संपेतुर्दिक्षु सर्वासु चर्माणि भरतर्षभ ॥ २८
सूर्यवर्णैश्च निस्त्रिंशैः पात्यमानानि सर्वशः ।
दिक्षु सर्वास्वदृश्यन्त शरीराणि शिरांसि च ॥ २९
भग्नचक्राक्षनीडाश्च निपातितमहाध्वजाः ।
हताश्वाः पृथिवीं जग्मुस्तत्र तत्र महारथाः ॥ ३०
परिपेतुर्हयाश्चात्र केचिच्छस्त्रकृतव्रणाः ।
रथान्विपरिकर्षन्तो हतेषु रथयोधिषु ॥ ३१
शराहता भिन्नदेहा बद्धयोक्त्रा हयोत्तमाः ।
युगानि पर्यकर्षन्त तत्र तत्र स्म भारत ॥ ३२
अदृश्यन्त ससूताश्च साश्वाः सरथयोधिनः ।
एकेन बलिना राजन्वारणेन हता रथाः ॥ ३३
गन्धहस्तिमदस्रावमाघ्राय बहवो रणे ।
संनिपाते बलौघानां वीतमाददिरे गजाः ॥ ३४
सतोमरमहामात्रैर्निपतद्भिर्गतासुभिः ।
बभूवायोधनं छन्नं नाराचाभिहतैर्गजैः ॥ ३५
संनिपाते बलौघानां प्रेषितैर्वरवारणैः ।
निपेतुर्युधि संभग्नाः सयोधाः सध्वजा रथाः ॥ ३६
नागराजोपमैर्हस्तैर्नागैराक्षिप्य संयुगे ।
व्यदृश्यन्त महाराज संभग्ना रथकूबराः ॥ ३७
विशीर्णरथजालाश्च केशेष्वाक्षिप्य दन्तिभिः ।
द्रुमशाखा इवाविध्य निष्पिष्टा रथिनो रणे ॥ ३८
रथेषु च रथान्युद्धे संसक्तान्वरवारणाः ।
विकर्षन्तो दिशः सर्वाः संपेतुः सर्वशब्दगाः ॥ ३९
तेषां तथा कर्षतां च गजानां रूपमाबभौ ।
सरःसु नलिनीजालं विषक्तमिव कर्षताम् ॥ ४०
एवं संछादितं तत्र बभूवायोधनं महत् ।
सादिभिश्च पदातैश्च सध्वजैश्च महारथैः ॥ ४१

इति श्रीमहाभारते भीष्मपर्वणि
सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

६८

संजय उवाच ।

शिखण्डी सह मत्स्येन विराटेन विशां पते ।
भीष्ममाशु महेष्वासमाससाद सुदुर्जयम् ॥ १
द्रोणं कृपं विकर्णं च महेष्वासान्महाबलान् ।
राज्ञश्चान्यान्रणे शूरान्बहूनार्छद्धनंजयः ॥ २
सैन्धवं च महेष्वासं सामात्यं सह बन्धुभिः ।
प्राच्यांश्च दाक्षिणात्यांश्च भूमिपान्भूमिपर्षभ ॥ ३
पुत्रं च ते महेष्वासं दुर्योधनममर्षणम् ।
दुःसहं चैव समरे भीमसेनोऽभ्यवर्तत ॥ ४
सहदेवस्तु शकुनिमुलूकं च महारथम् ।
पितापुत्रौ महेष्वासावभ्यवर्तत दुर्जयौ ॥ ५
युधिष्ठिरो महाराज गजानीकं महारथः ।
समवर्तत संग्रामे पुत्रेण निकृतस्तव ॥ ६
माद्रीपुत्रस्तु नकुलः शूरः संक्रन्दनो युधि ।
त्रिगर्तानां रथोदारैः समसज्जत पाण्डवः ॥ ७
अभ्यवर्तन्त दुर्धर्षाः समरे शाल्वकेकयान् ।
सात्यकिश्चेकितानश्च सौभद्रश्च महारथः ॥ ८
धृष्टकेतुश्च समरे राक्षसश्च घटोत्कचः ।
पुत्राणां ते रथानीकं प्रत्युद्याताः सुदुर्जयाः ॥ ९
सेनापतिरमेयात्मा धृष्टद्युम्नो महाबलः ।
द्रोणेन समरे राजन्समियायेन्द्रकर्मणा ॥ १०

एवमेते महेष्वासास्तावकाः पाण्डवैः सह ।
समेत्य समरे शूराः संप्रहारं प्रचक्रिरे ॥ ११
मध्यंदिनगते सूर्ये नभस्याकुलतां गते ।
कुरवः पाण्डवेयाश्च निजघ्नुरितरेतरम् ॥ १२
ध्वजिनो हेमचित्राङ्गा विचरन्तो रणाजिरे ।
सपताका रथा रेजुर्वैयाघ्रपरिवारणाः ॥ १३
समेतानां च समरे जिगीषूणां परस्परम् ।
बभूव तुमुलः शब्दः सिंहानामिव नर्दताम् ॥ १४
तत्राद्भुतमपश्याम संप्रहारं सुदारुणम् ।
यमकुर्वन्रणे वीराः सृञ्जयाः कुरुभिः सह ॥ १५
नैव खं न दिशो राजन्न सूर्यं शत्रुतापन ।
विदिशो वाप्यपश्याम शरैर्मुक्तैः समन्ततः ॥ १६
शक्तीनां विमलाग्राणां तोमराणां तथास्यताम् ।
निस्त्रिंशानां च पीतानां नीलोत्पलनिभाः प्रभाः ॥१७
कवचानां विचित्राणां भूषणानां प्रभास्तथा ।
खं दिशः प्रदिशश्चैव भासयामासुरोजसा ।
विरराज तदा राजंस्तत्र तत्र रणाङ्गणम् ॥ १८
रथसिंहासनव्याघ्राः समायान्तश्च संयुगे ।
विरेजुः समरे राजन्ग्रहा इव नभस्तले ॥ १९
भीष्मस्तु रथिनां श्रेष्ठो भीमसेनं महाबलम् ।
अवारयत संक्रुद्धः सर्वसैन्यस्य पश्यतः ॥ २०
ततो भीष्मविनिर्मुक्ता रुक्मपुङ्खाः शिलाशिताः ।
अभ्यघ्नन्समरे भीमं तैलधौताः सुतेजनाः ॥ २१
तस्य शक्तिं महावेगां भीमसेनो महाबलः ।
क्रुद्धाशीविषसंकाशां प्रेषयामास भारत ॥ २२
तामापतन्तीं सहसा रुक्मदण्डां दुरासदाम् ।
चिच्छेद समरे भीष्मः शरैः संनतपर्वभिः ॥ २३
ततोऽपरेण भल्लेन पीतेन निशितेन च ।
कार्मुकं भीमसेनस्य द्विधा चिच्छेद भारत ॥ २४
सात्यकिस्तु ततस्तूर्णं भीष्ममासाद्य संयुगे ।
शरैर्बहुभिरानर्छत्पितरं ते जनेश्वर ॥ २५
ततः संधाय वै तीक्ष्णं शरं परमदारुणम् ।
वार्ष्णेयस्य रथाद्भीष्मः पातयामास सारथिम् ॥२६
तस्याश्वाः प्रद्रुता राजन्निहते रथसारथौ ।
तेन तेनैव धावन्ति मनोमारुतरंहसः ॥ २७
ततः सर्वस्य सैन्यस्य निस्वनस्तुमुलोऽभवत् ।
हाहाकारश्च संजज्ञे पाण्डवानां महात्मनाम् ॥ २८
अभिद्रवत गृह्णीत हयान्यच्छत धावत ।
इत्यासीत्तुमुलः शब्दो युयुधानरथं प्रति ॥ २९
एतस्मिन्नेव काले तु भीष्मः शांतनवः पुनः ।
व्यहनत्पाण्डवीं सेनामासुरीमिव वृत्रहा ॥ ३०
ते वध्यमाना भीष्मेण पाञ्चालाः सोमकैः सह ।
आर्यां युद्धे मतिं कृत्वा भीष्ममेवाभिदुद्रुवुः ॥ ३१
धृष्टद्युम्नमुखाश्चापि पार्थाः शांतनवं रणे ।
अभ्यधावञ्जिगीषन्तस्तव पुत्रस्य वाहिनीम् ॥ ३२
तथैव तावका राजन्भीष्मद्रोणमुखाः परान् ।
अभ्यधावन्त वेगेन ततो युद्धमवर्तत ॥ ३३

इति श्रीमहाभारते भीष्मपर्वणि
अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

६९

संजय उवाच ।

विराटोऽथ त्रिभिर्बाणैर्भीष्ममार्छन्महारथम् ।
विव्याध तुरगांश्चास्य त्रिभिर्बाणैर्महारथः ॥ १
तं प्रत्यविध्यद्दशभिर्भीष्मः शांतनवः शरैः ।
रुक्मपुङ्खैर्महेष्वासः कृतहस्तो महाबलः ॥ २
द्रौणिर्गाण्डीवधन्वानं भीमधन्वा महारथः ।
अविध्यदिषुभिः षड्भिर्दृढहस्तः स्तनान्तरे ॥ ३
कार्मुकं तस्य चिच्छेद फल्गुनः परवीरहा ।
अविध्यच्च भृशं तीक्ष्णैः पत्रिभिः शत्रुकर्शनः ॥ ४
सोऽन्यत्कार्मुकमादाय वेगवत्क्रोधमूर्छितः ।

अमृष्यमाणः पार्थेन कार्मुकच्छेदमाहवे ॥ ५
अविध्यत्फल्गुनं राजन्नवत्या निशितैः शरैः ।
वासुदेवं च सप्तत्या विव्याध परमेषुभिः ॥ ६
ततः क्रोधाभिताम्राक्षः सह कृष्णेन फल्गुनः ।
दीर्घमुष्णं च निःश्वस्य चिन्तयित्वा मुहुर्मुहुः ॥ ७
धनुः प्रपीड्य वामेन करेणामित्रकर्शनः ।
गाण्डीवधन्वा संक्रुद्धः शितान्संनतपर्वणः ।
जीवितान्तकरान्घोरान्समादत्त शिलीमुखान् ॥ ८
तैस्तूर्णं समरेऽविध्यद्द्रौणिं बलवतां वरम् ।
तस्य ते कवचं भित्त्वा पपुः शोणितमाहवे ॥ ९
न विव्यथे च निर्भिन्नो द्रौणिर्गाण्डीवधन्वना ।
तथैव शरवर्षाणि प्रतिमुञ्चन्नविह्वलः ।
तस्थौ स समरे राजंस्त्रातुमिच्छन्महाव्रतम् ॥ १०
तस्य तत्सुमहत्कर्म शशंसुः पुरुषर्षभाः ।
यत्कृष्णाभ्यां समेताभ्यां नापत्रपत संयुगे ॥ ११
स हि नित्यमनीकेषु युध्यतेऽभयमास्थितः ।
अस्त्रग्रामं ससंहारं द्रोणात्प्राप्य सुदुर्लभम् ॥ १२
ममायमाचार्यसुतो द्रोणस्यातिप्रियः सुतः ।
ब्राह्मणश्च विशेषेण माननीयो ममेति च ॥ १३
समास्थाय मतिं वीरो बीभत्सुः शत्रुतापनः ।
कृपां चक्रे रथश्रेष्ठो भारद्वाजसुतं प्रति ॥ १४
द्रौणिं त्यक्त्वा ततो युद्धे कौन्तेयः शत्रुतापनः ।
युयुधे तावकान्निघ्नंस्त्वरमाणः पराक्रमी ॥ १५
दुर्योधनस्तु दशभिर्गार्ध्रपत्रैः शिलाशितैः ।
भीमसेनं महेष्वासं रुक्मपुङ्खैः समर्पयत् ॥ १६
भीमसेनस्तु संक्रुद्धः परासुकरणं दृढम् ।
चित्रं कार्मुकमादत्त शरांश्च निशितान्दश ॥ १७
आकर्णप्रहितैस्तीक्ष्णैर्वेगितैस्तिग्मतेजनैः ।
अविध्यत्तूर्णमव्यग्रः कुरुराजं महोरसि ॥ १८
तस्य काञ्चनसूत्रस्तु शरैः परिवृतो मणिः ।
रराजोरसि वै सूर्यो ग्रहैरिव समावृतः ॥ १९
पुत्रस्तु तव तेजस्वी भीमसेनेन ताडितः ।
नामृष्यत यथा नागस्तलशब्दं समीरितम् ॥ २०
ततः शरैर्महाराज रुक्मपुङ्खैः शिलाशितैः ।
भीमं विव्याध संक्रुद्धस्त्रासयानो वरूथिनीम् ॥ २१
तौ युध्यमानौ समरे भृशमन्योन्यविक्षतौ ।
पुत्रौ ते देवसंकाशौ व्यरोचेतां महाबलौ ॥ २२
चित्रसेनं नरव्याघ्रं सौभद्रः परवीरहा ।
अविध्यद्दशभिर्बाणैः पुरुमित्रं च सप्तभिः ॥ २३
सत्यव्रतं च सप्तत्या विद्ध्वा शक्रसमो युधि ।
नृत्यन्निव रणे वीर आर्तिं नः समजीजनत् ॥ २४
तं प्रत्यविध्यद्दशभिश्चित्रसेनः शिलीमुखैः ।
सत्यव्रतश्च नवभिः पुरुमित्रश्च सप्तभिः ॥ २५
स विद्धो विक्षरन्रक्तं शत्रुसंवारणं महत् ।
चिच्छेद चित्रसेनस्य चित्रं कार्मुकमार्जुनिः ।
भित्त्वा चास्य तनुत्राणं शरेणोरस्यताडयत् ॥ २६
ततस्ते तावका वीरा राजपुत्रा महारथाः ।
समेत्य युधि संरब्धा विव्यधुर्निशितैः शरैः ।
तांश्च सर्वाञ्शरैस्तीक्ष्णैर्जघान परमास्त्रवित् ॥ २७
तस्य दृष्ट्वा तु तत्कर्म परिवव्रुः सुतास्तव ।
दहन्तं समरे सैन्यं तव कक्षं यथोल्बणम् ॥ २८
अपेतशिशिरे काले समिद्धमिव पावकः ।
अत्यरोचत सौभद्रस्तव सैन्यानि शातयन् ॥ २९
तत्तस्य चरितं दृष्ट्वा पौत्रस्तव विशां पते ।
लक्ष्मणोऽभ्यपतत्तूर्णं सात्वतीपुत्रमाहवे ॥ ३०
अभिमन्युस्तु संक्रुद्धो लक्ष्मणं शुभलक्षणम् ।
विव्याध विशिखैः षड्भिः सारथिं च त्रिभिः शरैः ॥
तथैव लक्ष्मणो राजन्सौभद्रं निशितैः शरैः ।
अविध्यत महाराज तदद्भुतमिवाभवत् ॥ ३२
तस्याश्वांश्चतुरो हत्वा सारथिं च महाबलः ।

अभ्यद्रवत सौभद्रो लक्ष्मणं निशितैः शरैः ॥ ३३
हताश्वे तु रथे तिष्ठँल्लक्ष्मणः परवीरहा ।
शक्तिं चिक्षेप संक्रुद्धः सौभद्रस्य रथं प्रति ॥ ३४
तामापतन्तीं सहसा घोररूपां दुरासदाम् ।
अभिमन्युः शरैस्तीक्ष्णैश्चिच्छेद भुजगोपमाम् ॥ ३५
ततः स्वरथमारोप्य लक्ष्मणं गौतमस्तदा ।
अपोवाह रथेनाजौ सर्वसैन्यस्य पश्यतः ॥ ३६
ततः समाकुले तस्मिन्वर्तमाने महाभये ।
अभ्यद्रवञ्जिघांसन्तः परस्परवधैषिणः ॥ ३७
तावकाश्च महेष्वासाः पाण्डवाश्च महारथाः ।
जुह्वन्तः समरे प्राणान्निजघ्नुरितरेतरम् ॥ ३८
मुक्तकेशा विकवचा विरथाश्छिन्नकार्मुकाः ।
बाहुभिः समयुध्यन्त सृञ्जयाः कुरुभिः सह ॥ ३९
ततो भीष्मो महाबाहुः पाण्डवानां महात्मनाम् ।
सेनां जघान संक्रुद्धो दिव्यैरस्त्रैर्महाबलः ॥ ४०
हतेश्वरैर्गजैस्तत्र नरैरश्वैश्च पातितैः ।
रथिभिः सादिभिश्चैव समास्तीर्यत मेदिनी ॥ ४१

इति श्रीमहाभारते भीष्मपर्वणि
एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

७०

संजय उवाच ।

अथ राजन्महाबाहुः सात्यकिर्युद्धदुर्मदः ।
विकृष्य चापं समरे भारसाधनमुत्तमम् ॥ १
प्राङ्खपुङ्खसंयुक्ताञ्शरानाशीविषोपमान् ।
प्रकाशं लघु चित्रं च दर्शयन्नस्त्रलाघवम् ॥ २
तस्य विक्षिपतश्चापं शरानन्यांश्च मुञ्चतः ।
आददानस्य भूयश्च संदधानस्य चापरान् ॥ ३
क्षिपतश्च शरानस्य रणे शत्रून्विनिघ्नतः ।
ददृशे रूपमत्यर्थं मेघस्येव प्रवर्षतः ॥ ४
तमुदीर्यन्तमालोक्य राजा दुर्योधनस्ततः ।
रथानामयुतं तस्य प्रेषयामास भारत ॥ ५
तांस्तु सर्वान्महेष्वासान्सात्यकिः सत्यविक्रमः ।
जघान परमेष्वासो दिव्येनास्त्रेण वीर्यवान् ॥ ६
स कृत्वा दारुणं कर्म प्रगृहीतशरासनः ।
आससाद ततो वीरो भूरिश्रवसमाहवे ॥ ७
स हि संदृश्य सेनां तां युयुधानेन पातिताम् ।
अभ्यधावत संक्रुद्धः कुरूणां कीर्तिवर्धनः ॥ ८
इन्द्रायुधसवर्णं तत्स विस्फार्य महद्धनुः ।
व्यसृजद्वज्रसंकाशाञ्शरानाशीविषोपमान् ।
सहस्रशो महाराज दर्शयन्पाणिलाघवम् ॥ ९
शरांस्तान्मृत्युसंस्पर्शान्सात्यकेस्तु पदानुगाः ।
न विषेहुस्तदा राजन्दुद्रुवुस्ते समन्ततः ।
विहाय समरे राजन्सात्यकिं युद्धदुर्मदम् ॥ १०
तं दृष्ट्वा युयुधानस्य सुता दश महाबलाः ।
महारथाः समाख्याताश्चित्रवर्मायुधध्वजाः ॥ ११
समासाद्य महेष्वासं भूरिश्रवसमाहवे ।
ऊचुः सर्वे सुसंरब्धा यूपकेतुं महारणे ॥ १२
भो भो कौरवदायाद सहास्माभिर्महाबल ।
एहि युध्यस्व संग्रामे समस्तैः पृथगेव वा ॥ १३
अस्मान्वा त्वं पराजित्य यशः प्राप्नुहि संयुगे ।
वयं वा त्वां पराजित्य प्रीतिं दास्यामहे पितुः ॥ १४
एवमुक्तस्तदा शूरैस्तानुवाच महाबलः ।
वीर्यश्लाघी नरश्रेष्ठस्तान्दृष्ट्वा समुपस्थितान् ॥ १५
साध्विदं कथ्यते वीरा यद्येवं मतिरद्य वः ।
युध्यध्वं सहिता यत्ता निहनिष्यामि वो रणे ॥ १६
एवमुक्ता महेष्वासास्ते वीराः क्षिप्रकारिणः ।
महता शरवर्षेण अभ्यवर्षन्नरिंदमम् ॥ १७
अपराह्णे महाराज संग्रामस्तुमुलोऽभवत् ।
एकस्य च बहूनां च समेतानां रणाजिरे ॥ १८
तमेकं रथिनां श्रेष्ठं शरवर्षैरवाकिरन् ।

प्रावृषीव महाशैलं सिषिचुर्जलदा नृप ॥ १९
तैस्तु मुक्ताञ्शरौघांस्तान्यमदण्डाशनिप्रभान् ।
असंप्राप्तानसंप्राप्तांश्चिच्छेदाशु महारथः ॥ २०
तत्राद्भुतमपश्याम सौमदत्तेः पराक्रमम् ।
यदेको बहुभिर्युद्धे समसज्जदभीतवत् ॥ २१
विसृज्य शरवृष्टिं तां दश राजन्महारथाः ।
परिवार्य महाबाहुं निहन्तुमुपचक्रमुः ॥ २२
सौमदत्तिस्ततः क्रुद्धस्तेषां चापानि भारत ।
चिच्छेद दशभिर्बाणैर्निमेषेण महारथः ॥ २३
अथैषां छिन्नधनुषां भल्लैः संनतपर्वभिः ।
चिच्छेद समरे राजञ्शिरांसि निशितैः शरैः ।
ते हता न्यपतन्भूमौ वज्रभग्ना इव द्रुमाः ॥ २४
तान्दृष्ट्वा निहतान्वीरान्रणे पुत्रान्महाबलान् ।
वार्ष्णेयो विनदन्राजन्भूरिश्रवसमभ्ययात् ॥ २५
रथं रथेन समरे पीडयित्वा महाबलौ ।
तावन्योन्यस्य समरे निहत्य रथवाजिनः ।
विरथावभिवल्गन्तौ समेयातां महारथौ ॥ २६
प्रगृहीतमहाखड्गौ तौ चर्मवरधारिणौ ।
शुशुभाते नरव्याघ्रौ युद्धाय समवस्थितौ ॥ २७
ततः सात्यकिमभ्येत्य निस्त्रिंशवरधारिणम् ।
भीमसेनस्त्वरन्राजन्रथमारोपयत्तदा ॥ २८
तवापि तनयो राजन्भूरिश्रवसमाहवे ।
आरोपयद्रथं तूर्णं पश्यतां सर्वधन्विनाम् ॥ २९
तस्मिंस्तथा वर्तमाने रणे भीष्मं महारथम् ।
अयोधयन्त संरब्धाः पाण्डवा भरतर्षभ ॥ ३०
लोहितायति चादित्ये त्वरमाणो धनंजयः ।
पञ्चविंशतिसाहस्रान्निजघान महारथान् ॥ ३१
ते हि दुर्योधनादिष्टास्तदा पार्थनिबर्हणे ।
संप्राप्यैव गता नाशं शलभा इव पावकम् ॥ ३२
ततो मत्स्याः केकयाश्च धनुर्वेदविशारदाः ।
परिवव्रुस्तदा पार्थं सहपुत्रं महारथम् ॥ ३३
एतस्मिन्नेव काले तु सूर्येऽस्तमुपगच्छति ।
सर्वेषामेव सैन्यानां प्रमोहः समजायत ॥ ३४
अवहारं ततश्चक्रे पिता देवव्रतस्तव ।
संध्याकाले महाराज सैन्यानां श्रान्तवाहनः ॥ ३५
पाण्डवानां कुरूणां च परस्परसमागमे ।
ते सेने भृशसंविग्ने ययतुः स्वं निवेशनम् ॥ ३६
ततः स्वशिबिरं गत्वा न्यविशंस्तत्र भारत ।
पाण्डवाः सृञ्जयैः सार्धं कुरवश्च यथाविधि ॥ ३७

इति श्रीमहाभारते भीष्मपर्वणि
सप्ततितमोऽध्यायः ॥ ७० ॥

७१

संजय उवाच ।

विहृत्य च ततो राजन्सहिताः कुरुपाण्डवाः ।
व्यतीतायां तु शर्वर्यां पुनर्युद्धाय निर्ययुः ॥ १
तत्र शब्दो महानासीत्तव तेषां च भारत ।
युज्यतां रथमुख्यानां कल्प्यतां चैव दन्तिनाम् ॥ २
संनह्यतां पदातीनां हयानां चैव भारत ।
शङ्खदुन्दुभिनादश्च तुमुलः सर्वतोऽभवत् ॥ ३
ततो युधिष्ठिरो राजा धृष्टद्युम्नमभाषत ।
व्यूहं व्यूह महाबाहो मकरं शत्रुतापनम् ॥ ४
एवमुक्तस्तु पार्थेन धृष्टद्युम्नो महारथः ।
व्यादिदेश महाराज रथिनो रथिनां वरः ॥ ५
शिरोऽभूद्द्रुपदस्तस्य पाण्डवश्च धनंजयः ।
चक्षुषी सहदेवश्च नकुलश्च महारथः ।
तुण्डमासीन्महाराज भीमसेनो महाबलः ॥ ६
सौभद्रो द्रौपदेयाश्च राक्षसश्च घटोत्कचः ।
सात्यकिर्धर्मराजश्च व्यूहग्रीवां समास्थिताः ॥ ७
पृष्ठमासीन्महाराज विराटो वाहिनीपतिः ।
धृष्टद्युम्नेन सहितो महत्या सेनया वृतः ॥ ८

केकया भ्रातरः पञ्च वामं पार्श्वं समाश्रिताः ।
धृष्टकेतुर्नरव्याघ्रः करकर्षश्च वीर्यवान् ।
दक्षिणं पक्षमाश्रित्य स्थिता व्यूहस्य रक्षणे ॥ ९
पादयोस्तु महाराज स्थितः श्रीमान्महारथः ।
कुन्तिभोजः शतानीको महत्या सेनया वृतः ॥ १०
शिखण्डी तु महेष्वासः सोमकैः संवृतो बली ।
इरावांश्च ततः पुच्छे मकरस्य व्यवस्थितौ ॥ ११
एवमेतन्महाव्यूहं व्यूह्य भारत पाण्डवाः ।
सूर्योदये महाराज पुनर्युद्धाय दंशिताः ॥ १२
कौरवानभ्ययुस्तूर्णं हस्त्यश्वरथपत्तिभिः ।
समुच्छ्रितैर्ध्वजैश्चित्रैः शस्त्रैश्च विमलैः शितैः ॥ १३
व्यूहं दृष्ट्वा तु तत्सैन्यं पिता देवव्रतस्तव ।
क्रौञ्चेन महता राजन्प्रत्यव्यूहत वाहिनीम् ॥ १४
तस्य तुण्डे महेष्वासो भारद्वाजो व्यरोचत ।
अश्वत्थामा कृपश्चैव चक्षुरास्तां नरेश्वर ॥ १५
कृतवर्मा तु सहितः काम्बोजारट्टबाह्लिकैः ।
शिरस्यासीन्नरश्रेष्ठः श्रेष्ठः सर्वधनुष्मताम् ॥ १६
ग्रीवायां शूरसेनस्तु तव पुत्रश्च मारिष ।
दुर्योधनो महाराज राजभिर्बहुभिर्वृतः ॥ १७
प्राग्ज्योतिषस्तु सहितो मद्रसौवीरकेकयैः ।
उरस्यभून्नरश्रेष्ठ महत्या सेनया वृतः ॥ १८
स्वसेनया च सहितः सुशर्मा प्रस्थलाधिपः ।
वामं पक्षं समाश्रित्य दंशितो समवस्थितः ॥ १९
तुषारा यवनाश्चैव शकाश्च सह चूचुपैः ।
दक्षिणं पक्षमाश्रित्य स्थिता व्यूहस्य भारत ॥ २०
श्रुतायुश्च शतायुश्च सौमदत्तिश्च मारिष ।
व्यूहस्य जघने तस्थू रक्षमाणाः परस्परम् ॥ २१
ततो युद्धाय संजग्मुः पाण्डवाः कौरवैः सह ।
सूर्योदये महाराज ततो युद्धमभून्महत् ॥ २२
प्रतीयू रथिनो नागान्नागाश्च रथिनो ययुः ।
हयारोहा हयारोहान्रथिनश्चापि सादिनः ॥ २३
सारथिं च रथी राजन्कुञ्जरांश्च महारणे ।
हस्त्यारोहा रथारोहान्रथिनश्चापि सादिनः ॥ २४
रथिनः पत्तिभिः सार्धं सादिनश्चापि पत्तिभिः ।
अन्योन्यं समरे राजन्प्रत्यधावन्नमर्षिताः ॥ २५
भीमसेनार्जुनयमैर्गुप्ता चान्यैर्महारथैः ।
शुशुभे पाण्डवी सेना नक्षत्रैरिव शर्वरी ॥ २६
तथा भीष्मकृपद्रोणशल्यदुर्योधनादिभिः ।
तवापि विबभौ सेना ग्रहैर्द्यौरिव संवृता ॥ २७
भीमसेनस्तु कौन्तेयो द्रोणं दृष्ट्वा पराक्रमी ।
अभ्ययाज्जवनैरश्वैर्भारद्वाजस्य वाहिनीम् ॥ २८
द्रोणस्तु समरे क्रुद्धो भीमं नवभिरायसैः ।
विव्याध समरे राजन्मर्माण्युद्दिश्य वीर्यवान् ॥ २९
दृढाहतस्ततो भीमो भारद्वाजस्य संयुगे ।
सारथिं प्रेषयामास यमस्य सदनं प्रति ॥ ३०
स संगृह्य स्वयं वाहान्भारद्वाजः प्रतापवान् ।
व्यधमत्पाण्डवीं सेनां तूलराशिमिवानलः ॥ ३१
ते वध्यमाना द्रोणेन भीष्मेण च नरोत्तम ।
सृञ्जयाः केकयैः सार्धं पलायनपराभवन् ॥ ३२
तथैव तावकं सैन्यं भीमार्जुनपरिक्षतम् ।
मुह्यते तत्र तत्रैव समदेव वराङ्गना ॥ ३३
अभिद्येतां ततो व्यूहौ तस्मिन्वीरवरक्षये ।
आसीद्व्यतिकरो घोरस्तव तेषां च भारत ॥ ३४
तदद्भुतमपश्याम तावकानां परैः सह ।
एकायनगताः सर्वे यदयुध्यन्त भारत ॥ ३५
प्रतिसंवार्य चास्त्राणि तेऽन्योन्यस्य विशां पते ।
युयुधुः पाण्डवाश्चैव कौरवाश्च महारथाः ॥ ३६

इति श्रीमहाभारते भीष्मपर्वणि
एकसप्ततितमोऽध्यायः ॥ ७१ ॥

७२

धृतराष्ट्र उवाच ।

एवं बहुगुणं सैन्यमेवं बहुविधं परम् ।
व्यूढमेवं यथाशास्त्रममोघं चैव संजय ॥ १
पुष्टमस्माकमत्यन्तमभिकामं च नः सदा ।
प्रह्वमव्यसनोपेतं पुरस्ताद्दृष्टविक्रमम् ॥ २
नातिवृद्धमबालं च न कृशं न च पीवरम् ।
लघुवृत्तायतप्रायं सारगात्रमनामयम् ॥ ३
आत्तसंनाहशस्त्रं च बहुशस्त्रपरिग्रहम् ।
असियुद्धे नियुद्धे च गदायुद्धे च कोविदम् ॥ ४
प्रासर्ष्टितोमरेष्वाजौ परिघेष्वायसेषु च ।
भिण्डिपालेषु शक्तीषु मुसलेषु च सर्वशः ॥ ५
कम्पनेषु च चापेषु कणपेषु च सर्वशः ।
क्षेपणीषु च चित्रासु मुष्टियुद्धेषु कोविदम् ॥ ६
अपरोक्षं च विद्यासु व्यायामेषु कृतश्रमम् ।
शस्त्रग्रहणविद्यासु सर्वासु परिनिष्ठितम् ॥ ७
आरोहे पर्यवस्कन्दे सरणे सान्तरप्लुते ।
सम्यक्प्रहरणे याने व्यपयाने च कोविदम् ॥ ८
नागाश्वरथयानेषु बहुशः सुपरीक्षितम् ।
परीक्ष्य च यथान्यायं वेतनेनोपपादितम् ॥ ९
न गोष्ठ्या नोपचारेण न च बन्धुनिमित्ततः ।
न सौहृदबलैश्चापि नाकुलीनपरिग्रहैः ॥ १०
समृद्धजनमार्यं च तुष्टसत्कृतबान्धवम् ।
कृतोपकारभूयिष्ठं यशस्वि च मनस्वि च ॥ ११
सजयैश्च नरैर्मुख्यैर्बहुशो मुख्यकर्मभिः ।
लोकपालोपमैस्तात पालितं लोकविश्रुतैः ॥ १२
बहुभिः क्षत्रियैर्गुप्तं पृथिव्यां लोकसंमतैः ।
अस्मानभिगतैः कामात्सबलैः सपदानुगैः ॥ १३
महोदधिमिवापूर्णमापगाभिः समन्ततः ।
अपक्षैः पक्षसंकाशै रथैर्नागैश्च संवृतम् ॥ १४
नानायोधजलं भीमं वाहनोर्मितरङ्गिणम् ।
क्षेपण्यसिगदाशक्तिशरप्राससमाकुलम् ॥ १५
ध्वजभूषणसंबाधं रत्नपट्टेन संचितम् ।
वाहनैः परिसर्पद्भिर्वायुवेगविकम्पितम् ॥ १६
अपारमिव गर्जन्तं सागरप्रतिमं महत् ।
द्रोणभीष्माभिसंगुप्तं गुप्तं च कृतवर्मणा ॥ १७
कृपदुःशासनाभ्यां च जयद्रथमुखैस्तथा ।
भगदत्तविकर्णाभ्यां द्रौणिसौबलबाह्लिकैः ॥ १८
गुप्तं प्रवीरैर्लोकस्य सारवद्भिर्महात्मभिः ।
यदहन्यत संग्रामे दिष्टमेतत्पुरातनम् ॥ १९
नैतादृशं समुद्योगं दृष्टवन्तोऽथ मानुषाः ।
ऋषयो वा महाभागाः पुराणा भुवि संजय ॥ २०
ईदृशो हि बलौघस्तु युक्तः शस्त्रास्त्रसंपदा ।
वध्यते यत्र संग्रामे किमन्यद्भागधेयतः ॥ २१
विपरीतमिदं सर्वं प्रतिभाति स्म संजय ।
यत्रेदृशं बलं घोरं नातरद्युधि पाण्डवान् ॥ २२
अथ वा पाण्डवार्थाय देवास्तत्र समागताः ।
युध्यन्ते मामकं सैन्यं यदवध्यन्त संजय ॥ २३
उक्तो हि विदुरेणेह हितं पथ्यं च संजय ।
न च गृह्णाति तन्मन्दः पुत्रो दुर्योधनो मम ॥ २४
तस्य मन्ये मतिः पूर्वं सर्वज्ञस्य महात्मनः ।
आसीद्यथागतं तात येन दृष्टमिदं पुरा ॥ २५
अथ वा भाव्यमेवं हि संजयैतेन सर्वथा ।
पुरा धात्रा यथा सृष्टं तत्तथा न तदन्यथा ॥ २६

इति श्रीमहाभारते भीष्मपर्वणि
द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

७३

संजय उवाच ।

आत्मदोषात्त्वया राजन्प्राप्तं व्यसनमीदृशम् ।
न हि दुर्योधनस्तानि पश्यते भरतर्षभ ।

यानि त्वं दृष्टवान्राजन्धर्मसंकरकारिते ॥ १
तव दोषात्पुरा वृत्तं द्यूतमेतद्विशां पते ।
तव दोषेण युद्धं च प्रवृत्तं सह पाण्डवैः ।
त्वमेवाद्य फलं भुङ्क्ष्व कृत्वा किल्बिषमात्मना ॥ २
आत्मना हि कृतं कर्म आत्मनैवोपभुज्यते ।
इह वा प्रेत्य वा राजंस्त्वया प्राप्तं यथातथम् ॥ ३
तस्माद्राजन्स्थिरो भूत्वा प्राप्येदं व्यसनं महत् ।
शृणु युद्धं यथावृत्तं शंसतो मम मारिष ॥ ४
भीमसेनस्तु निशितैर्बाणैर्भित्त्वा महाचमूम् ।
आससाद ततो वीरः सर्वान्दुर्योधनानुजान् ॥ ५
दुःशासनं दुर्विषहं दुःसहं दुर्मदं जयम् ।
जयत्सेनं विकर्णं च चित्रसेनं सुदर्शनम् ॥ ६
चारुचित्रं सुवर्माणं दुष्कर्णं कर्णमेव च ।
एतानन्यांश्च सुबहून्समीपस्थान्महारथान् ॥ ७
धार्तराष्ट्रान्सुसंक्रुद्धान्दृष्ट्वा भीमो महाबलः ।
भीष्मेण समरे गुप्तां प्रविवेश महाचमूम् ॥ ८
अथाह्वयन्त तेऽन्योन्यमयं प्राप्तो वृकोदरः ।
जीवग्राहं निगृह्णीमो वयमेनं नराधिपाः ॥ ९
स तैः परिवृतः पार्थो भ्रातृभिः कृतनिश्चयैः ।
प्रजासंहरणे सूर्यः क्रूरैरिव महाग्रहैः ॥ १०
संप्राप्य मध्यं व्यूहस्य न भीः पाण्डवमाविशत् ।
यथा देवासुरे युद्धे महेन्द्रः प्राप्य दानवान् ॥ ११
ततः शतसहस्राणि रथिनां सर्वशः प्रभो ।
छादयानं शरैर्घोरैस्तमेकमनुवव्रिरे ॥ १२
स तेषां प्रवरान्योधान्हस्त्यश्वरथसादिनः ।
जघान समरे शूरो धार्तराष्ट्रानचिन्तयन् ॥ १३
तेषां व्यवसितं ज्ञात्वा भीमसेनो जिघृक्षताम् ।
समस्तानां वधे राजन्मतिं चक्रे महामनाः ॥ १४
ततो रथं समुत्सृज्य गदामादाय पाण्डवः ।
जघान धार्तराष्ट्राणां तं बलौघमहार्णवम् ॥ १५
भीमसेने प्रविष्टे तु धृष्टद्युम्नोऽपि पार्षतः ।
द्रोणमुत्सृज्य तरसा प्रययौ यत्र सौबलः ॥ १६
विदार्य महतीं सेनां तावकानां नरर्षभः ।
आससाद रथं शून्यं भीमसेनस्य संयुगे ॥ १७
दृष्ट्वा विशोकं समरे भीमसेनस्य सारथिम् ।
धृष्टद्युम्नो महाराज दुर्मना गतचेतनः ॥ १८
अपृच्छद्बाष्पसंरुद्धो निस्वनां वाचमीरयन् ।
मम प्राणैः प्रियतमः क भीम इति दुःखितः ॥ १९
विशोकस्तमुवाचेदं धृष्टद्युम्नं कृताञ्जलिः ।
संस्थाप्य मामिह बली पाण्डवेयः प्रतापवान् ॥ २०
प्रविष्टो धार्तराष्ट्राणामेतद्बलमहार्णवम् ।
मामुक्त्वा पुरुषव्याघ्र प्रीतियुक्तमिदं वचः ॥ २१
प्रतिपालय मां सूत नियम्याश्वान्मुहूर्तकम् ।
यावदेतान्निहन्म्याशु य इमे मद्वधोद्यताः ॥ २२
ततो दृष्ट्वा गदाहस्तं प्रधावन्तं महाबलम् ।
सर्वेषामेव सैन्यानां संघर्षः समजायत ॥ २३
तस्मिंस्तु तुमुले युद्धे वर्तमाने भयानके ।
भित्त्वा राजन्महाव्यूहं प्रविवेश सखा तव ॥ २४
विशोकस्य वचः श्रुत्वा धृष्टद्युम्नोऽपि पार्षतः ।
प्रत्युवाच ततः सूतं रणमध्ये महाबलः ॥ २५
न हि मे विद्यते सूत जीवितेऽद्य प्रयोजनम् ।
भीमसेनं रणे हित्वा स्नेहमुत्सृज्य पाण्डवैः ॥ २६
यदि यामि विना भीमं किं मां क्षत्रं वदिष्यति ।
एकायनगते भीमे मयि चावस्थिते युधि ॥ २७
अस्वस्ति तस्य कुर्वन्ति देवाः साग्निपुरोगमाः ।
यः सहायान्परित्यज्य स्वस्तिमानाव्रजेद्गृहान् ॥ २८
मम भीमः सखा चैव संबन्धी च महाबलः ।
भक्तोऽस्मान्भक्तिमांश्चाहं तमप्यरिनिषूदनम् ॥ २९
सोऽहं तत्र गमिष्यामि यत्र यातो वृकोदरः ।
निघ्नन्तं मामरीन्पश्य दानवानिव वासवम् ॥ ३०

एवमुक्त्वा ततो वीरो ययौ मध्येन भारतीम् ।
भीमसेनस्य मार्गेषु गदाप्रमथितैर्गजैः ॥ ३१
स ददर्श ततो भीमं दहन्तं रिपुवाहिनीम् ।
वातं वृक्षानिव बलात्प्रभञ्जन्तं रणे नृपान् ॥ ३२
ते हन्यमानाः समरे रथिनः सादिनस्तथा ।
पादाता दन्तिनश्चैव चक्रुरार्तस्वरं महत् ॥ ३३
हाहाकारश्च संजज्ञे तव सैन्यस्य मारिष ।
वध्यतो भीमसेनेन कृतिना चित्रयोधिना ॥ ३४
ततः कृतास्त्रास्ते सर्वे परिवार्य वृकोदरम् ।
अभीताः समवर्तन्त शस्त्रवृष्ट्या समन्ततः ॥ ३५

अभिद्रुतं शस्त्रभृतां वरिष्ठं
समन्ततः पाण्डवं लोकवीरैः ।
सैन्येन घोरेण सुसंगतेन
दृष्ट्वा बली पार्षतो भीमसेनम् ॥ ३६
अथोपगच्छच्छरविक्षताङ्गं
पदातिनं क्रोधविषं वमन्तम् ।
आश्वासयन्पार्षतो भीमसेनं
गदाहस्तं कालमिवान्तकाले ॥ ३७
निःशल्यमेनं च चकार तूर्ण-
मारोपयच्चात्मरथं महात्मा ।
भृशं परिष्वज्य च भीमसेन-
माश्वासयामास च शत्रुमध्ये ॥ ३८
भ्रातॄनथोपेत्य तवापि पुत्र-
स्तस्मिन्विमर्दे महति प्रवृत्ते ।
अयं दुरात्मा द्रुपदस्य पुत्रः
समागतो भीमसेनेन सार्धम् ।
तं यात सर्वे सहिता निहन्तुं
मा वो रिपुः प्रार्थयतामनीकम् ॥ ३९
श्रुत्वा तु वाक्यं तममृष्यमाणा
ज्येष्ठाज्ञया चोदिता धार्तराष्ट्राः ।
वधाय निष्पेतुरुदायुधास्ते
युगक्षये केतवो यद्वदुग्राः ॥ ४०
प्रगृह्य चित्राणि धनूंषि वीरा
ज्यानेमिघोषैः प्रविकम्पयन्तः ।
शरैरवर्षन्द्रुपदस्य पुत्रं
यथाम्बुदा भूधरं वारिजालैः ।
निहत्य तांश्चापि शरैः सुतीक्ष्णै-
र्न विव्यथे समरे चित्रयोधी ॥ ४१
समभ्युदीर्णांश्च तवात्मजांस्तथा
निशाम्य वीरानभितः स्थितान्रणे ।
जिघांसुरुग्रं द्रुपदात्मजो युवा
प्रमोहनास्त्रं युयुजे महारथः ।
क्रुद्धो भृशं तव पुत्रेषु राज-
न्दैत्येषु यद्वत्समरे महेन्द्रः ॥ ४२
ततो व्यमुह्यन्त रणे नृवीराः
प्रमोहनास्त्राहतबुद्धिसत्त्वाः ।
प्रदुद्रुवुः कुरवश्चैव सर्वे
सवाजिनागाः सरथाः समन्तात् ।
परीतकालानिव नष्टसंज्ञा-
न्मोहोपेतांस्तव पुत्रान्निशम्य ॥ ४३
एतस्मिन्नेव काले तु द्रोणः शस्त्रभृतां वरः ।
द्रुपदं त्रिभिरासाद्य शरैर्विव्याध दारुणैः ॥ ४४
सोऽतिविद्धस्तदा राजन्रणे द्रोणेन पार्थिवः ।
अपायाद्द्रुपदो राजन्पूर्ववैरमनुस्मरन् ॥ ४५
जित्वा तु द्रुपदं द्रोणः शङ्खं दध्मौ प्रतापवान् ।
तस्य शङ्खस्वनं श्रुत्वा वित्रेसुः सर्वसोमकाः ॥ ४६
अथ शुश्राव तेजस्वी द्रोणः शस्त्रभृतां वरः ।
प्रमोहनास्त्रेण रणे मोहितानात्मजांस्तव ॥ ४७
ततो द्रोणो राजगृद्धी त्वरितोऽभिययौ रणात् ।
तत्रापश्यन्महेष्वासो भारद्वाजः प्रतापवान् ।

धृष्टद्युम्नं च भीमं च विचरन्तौ महारणे ॥ ४८
मोहाविष्टांश्च ते पुत्रानपश्यत्स महारथः ।
ततः प्रज्ञास्त्रमादाय मोहनास्त्रं व्यशातयत् ॥ ४९
अथ प्रत्यागतप्राणास्तव पुत्रा महारथाः ।
पुनर्युद्धाय समरे प्रययुर्भीमपार्षतौ ॥ ५०
ततो युधिष्ठिरः प्राह समाहूय स्वसैनिकान् ।
गच्छन्तु पदवीं शक्त्या भीमपार्षतयोर्युधि ॥ ५१
सौभद्रप्रमुखा वीरा रथा द्वादश दंशिताः ।
प्रवृत्तिमधिगच्छन्तु न हि शुध्यति मे मनः ॥ ५२
त एवं समनुज्ञाताः शूरा विक्रान्तयोधिनः ।
बाढमित्येवमुक्त्वा तु सर्वे पुरुषमानिनः ।
मध्यंदिनगते सूर्ये प्रययुः सर्व एव हि ॥ ५३
केकया द्रौपदेयाश्च धृष्टकेतुश्च वीर्यवान् ।
अभिमन्युं पुरस्कृत्य महत्या सेनया वृताः ॥ ५४
ते कृत्वा समरे व्यूहं सूचीमुखमरिंदमाः ।
बिभिदुर्धार्तराष्ट्राणां तद्रथानीकमाहवे ॥ ५५
तान्प्रयातान्महेष्वासानभिमन्युपुरोगमान् ।
भीमसेनभयाविष्टा धृष्टद्युम्नविमोहिता ॥ ५६
न संधारयितुं शक्ता तव सेना जनाधिप ।
मदमूर्छान्वितात्मानं प्रमदेवाध्वनि स्थिता ॥ ५७
तेऽभियाता महेष्वासाः सुवर्णविकृतध्वजाः ।
परीप्सन्तोऽभ्यधावन्त धृष्टद्युम्नवृकोदरौ ॥ ५८
तौ च दृष्ट्वा महेष्वासानभिमन्युपुरोगमान् ।
बभूवतुर्मुदा युक्तौ निघ्नन्तौ तव वाहिनीम् ॥ ५९
दृष्ट्वा च सहसायान्तं पाञ्चाल्यो गुरुमात्मनः ।
नाशंसत वधं वीरः पुत्राणां तव पार्षतः ॥ ६०
ततो रथं समारोप्य केकयस्य वृकोदरम् ।
अभ्यधावत्सुसंक्रुद्धो द्रोणमिष्वस्त्रपारगम् ॥ ६१
तस्याभिपततस्तूर्णं भारद्वाजः प्रतापवान् ।
क्रुद्धश्चिच्छेद भल्लेन धनुः शत्रुनिषूदनः ॥ ६२
अन्यांश्च शतशो बाणान्प्रेषयामास पार्षते ।
दुर्योधनहितार्थाय भर्तृपिण्डमनुस्मरन् ॥ ६३
अथान्यद्धनुरादाय पार्षतः परवीरहा ।
द्रोणं विव्याध सप्तत्या रुक्मपुङ्खैः शिलाशितैः ॥ ६४
तस्य द्रोणः पुनश्चापं चिच्छेदामित्रकर्शनः ।
हयांश्च चतुरस्तूर्णं चतुर्भिः सायकोत्तमैः ॥ ६५
वैवस्वतक्षयं घोरं प्रेषयामास वीर्यवान् ।
सारथिं चास्य भल्लेन प्रेषयामास मृत्यवे ॥ ६६
हताश्वात्स रथात्तूर्णमवप्लुत्य महारथः ।
आरुरोह महाबाहुरभिमन्योर्महारथम् ॥ ६७
ततः सरथनागाश्वा समकम्पत वाहिनी ।
पश्यतो भीमसेनस्य पार्षतस्य च पश्यतः ॥ ६८
तत्प्रभग्नं बलं दृष्ट्वा द्रोणेनामिततेजसा ।
नाशक्नुवन्वारयितुं समस्तास्ते महारथाः ॥ ६९
वध्यमानं तु तत्सैन्यं द्रोणेन निशितैः शरैः ।
व्यभ्रमत्तत्र तत्रैव क्षोभ्यमाण इवार्णवः ॥ ७०
तथा दृष्ट्वा च तत्सैन्यं जहृषे च बलं तव ।
दृष्ट्वाचार्यं च संक्रुद्धं दहन्तं रिपुवाहिनीम् ।
चुक्रुशुः सर्वतो योधाः साधु साध्विति भारत ॥ ७१

इति श्रीमहाभारते भीष्मपर्वणि
त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

७४

संजय उवाच ।

ततो दुर्योधनो राजा मोहात्प्रत्यागतस्तदा ।
शरवर्षैः पुनर्भीमं प्रत्यवारयदच्युतम् ॥ १
एकीभूताः पुनश्चैव तव पुत्रा महारथाः ।
समेत्य समरे भीमं योधयामासुरुद्यताः ॥ २
भीमसेनोऽपि समरे संप्राप्य स्वरथं पुनः ।
समारुह्य महाबाहुर्ययौ येन तवात्मजः ॥ ३
प्रगृह्य च महावेगं परासुकरणं दृढम् ।

चित्रं शरासनं संख्ये शरैर्विव्याध ते सुतान् ॥ ४
ततो दुर्योधनो राजा भीमसेनं महाबलम् ।
नाराचेन सुतीक्ष्णेन भृशं मर्मण्यताडयत् ॥ ५
सोऽतिविद्धो महेष्वासस्तव पुत्रेण धन्विना ।
क्रोधसंरक्तनयनो वेगेनोत्क्षिप्य कार्मुकम् ॥ ६
दुर्योधनं त्रिभिर्बाणैर्बाह्वोरुरसि चार्पयत् ।
स तथाभिहतो राजा नाचलद्गिरिराडिव ॥ ७
तौ दृष्ट्वा समरे क्रुद्धौ विनिघ्नन्तौ परस्परम् ।
दुर्योधनानुजाः सर्वे शूराः संत्यक्तजीविताः ॥ ८
संस्मृत्य मन्त्रितं पूर्वं निग्रहे भीमकर्मणः ।
निश्चयं मनसा कृत्वा निग्रहीतुं प्रचक्रमुः ॥ ९
तानापतत एवाजौ भीमसेनो महाबलः ।
प्रत्युद्ययौ महाराज गजः प्रतिगजानिव ॥ १०
भृशं क्रुद्धश्च तेजस्वी नाराचेन समर्पयत् ।
चित्रसेनं महाराज तव पुत्रं महायशाः ॥ ११
तथेतरांस्तव सुतांस्ताडयामास भारत ।
शरैर्बहुविधैः संख्ये रुक्मपुङ्खैः सुवेगितैः ॥ १२
ततः संस्थाप्य समरे स्वान्यनीकानि सर्वशः ।
अभिमन्युप्रभृतयस्ते द्वादश महारथाः ॥ १३
प्रेषिता धर्मराजेन भीमसेनपदानुगाः ।
प्रत्युद्ययुर्महाराज तव पुत्रान्महाबलान् ॥ १४
दृष्ट्वा रथस्थांस्ताञ्शूरान्सूर्याग्निसमतेजसः ।
सर्वानेव महेष्वासान्भ्राजमानाञ्श्रिया वृतान् ॥ १५
महाहवे दीप्यमानान्सुवर्णकवचोज्ज्वलान् ।
तत्यजुः समरे भीमं तव पुत्रा महाबलाः ॥ १६
तान्नामृष्यत कौन्तेयो जीवमाना गता इति ।
अन्वीय च पुनः सर्वांस्तव पुत्रानपीडयत् ॥ १७
अथाभिमन्युं समरे भीमसेनेन संगतम् ।
पार्षतेन च संप्रेक्ष्य तव सैन्ये महारथाः ॥ १८
दुर्योधनप्रभृतयः प्रगृहीतशरासनाः ।
भृशमश्वैः प्रजवितैः प्रययुर्यत्र ते रथाः ॥ १९
अपराह्णे ततो राजन्प्रावर्तत महान्रणः ।
तावकानां च बलिनां परेषां चैव भारत ॥ २०
अभिमन्युर्विकर्णस्य हयान्हत्वा महाजवान् ।
अथैनं पञ्चविंशत्या क्षुद्रकाणां समाचिनोत् ॥ २१
हताश्वं रथमुत्सृज्य विकर्णस्तु महारथः ।
आरुरोह रथं राजंश्चित्रसेनस्य भास्वरम् ॥ २२
स्थितावेकरथे तौ तु भ्रातरौ कुरुवर्धनौ ।
आर्जुनिः शरजालेन छादयामास भारत ॥ २३
दुर्जयोऽथ विकर्णश्च कार्ष्णिं पञ्चभिरायसैः ।
विव्यधाते न चाकम्पत्कार्ष्णिर्मेरुरिवाचलः ॥ २४
दुःशासनस्तु समरे केकयान्पञ्च मारिष ।
योधयामास राजेन्द्र तदद्भुतमिवाभवत् ॥ २५
द्रौपदेया रणे क्रुद्धा दुर्योधनमवारयन् ।
एकैकस्त्रिभिरानर्छत्पुत्रं तव विशां पते ॥ २६
पुत्रोऽपि तव दुर्धर्षो द्रौपद्यास्तनयान्रणे ।
सायकैर्निशितै राजन्नाजघान पृथक्पृथक् ॥ २७
तैश्चापि विद्धः शुशुभे रुधिरेण समुक्षितः ।
गिरिप्रस्रवणैर्यद्वद्गिरिर्धातुविमिश्रितैः ॥ २८
भीष्मोऽपि समरे राजन्पाण्डवानामनीकिनीम् ।
कालयामास बलवान्पालः पशुगणानिव ॥ २९
ततो गाण्डीवनिर्घोषः प्रादुरासीद्विशां पते ।
दक्षिणेन वरूथिन्याः पार्थस्यारीन्विनिघ्नतः ॥ ३०
उत्तस्थुः समरे तत्र कबन्धानि समन्ततः ।
कुरूणां चापि सैन्येषु पाण्डवानां च भारत ॥ ३१
शोणितोदं रथावर्तं गजद्वीपं हयोर्मिणम् ।
रथनौभिर्नरव्याघ्राः प्रतेरुः सैन्यसागरम् ॥ ३२
छिन्नहस्ता विकवचा विदेहाश्च नरोत्तमाः ।
पतितास्तत्र दृश्यन्ते शतशोऽथ सहस्रशः ॥ ३३
निहतैर्मत्तमातङ्गैः शोणितौघपरिप्लुतैः ।

भूर्भाति भरतश्रेष्ठ पर्वतैराचिता यथा ॥ ३४
तत्राद्भुतमपश्याम तव तेषां च भारत ।
न तत्रासीत्पुमान्कश्चिद्यो योद्धुं नाभिकाङ्क्षति ॥ ३५
एवं युयुधिरे वीराः प्रार्थयाना महद्यशः ।
तावकाः पाण्डवैः सार्धं काङ्क्षमाणा जयं युधि ॥ ३६

इति श्रीमहाभारते भीष्मपर्वणि
चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

७५

संजय उवाच ।

ततो दुर्योधनो राजा लोहितायति भास्करे ।
संग्रामरभसो भीमं हन्तुकामोऽभ्यधावत ॥ १
तमायान्तमभिप्रेक्ष्य नृवीरं दृढवैरिणम् ।
भीमसेनः सुसंक्रुद्ध इदं वचनमब्रवीत् ॥ २
अयं स कालः संप्राप्तो वर्षपूगाभिकाङ्क्षितः ।
अद्य त्वां निहनिष्यामि यदि नोत्सृजसे रणम् ॥ ३
अद्य कुन्त्याः परिक्लेशं वनवासं च कृत्स्नशः ।
द्रौपद्याश्च परिक्लेशं प्रणोत्स्यामि हते त्वयि ॥ ४
यत्त्वं दुरोदरो भूत्वा पाण्डवानवमन्यसे ।
तस्य पापस्य गान्धारे पश्य व्यसनमागतम् ॥ ५
कर्णस्य मतमाज्ञाय सौबलस्य च यत्पुरा ।
अचिन्त्य पाण्डवान्कामाद्यथेष्टं कृतवानसि ॥ ६
याचमानं च यन्मोहाद्दाशार्हमवमन्यसे ।
उलूकस्य समादेशं यद्ददासि च हृष्टवत् ॥ ७
अद्य त्वा निहनिष्यामि सानुबन्धं सबान्धवम् ।
समीकरिष्ये तत्पापं यत्पुरा कृतवानसि ॥ ८
एवमुक्त्वा धनुर्घोरं विकृष्योद्भ्राम्य चासकृत् ।
समादाय शरान्घोरान्महाशनिसमप्रभान् ॥ ९
षड्विंशत्तरसा क्रुद्धो मुमोचाशु सुयोधने ।
ज्वलिताग्निशिखाकारान्वज्रकल्पानजिह्मगान् ॥ १०
ततोऽस्य कार्मुकं द्वाभ्यां सूतं द्वाभ्यां च विव्यधे ।
चतुर्भिरश्वाञ्जवनाननयद्यमसादनम् ॥ ११
द्वाभ्यां च सुविकृष्टाभ्यां शराभ्यामरिमर्दनः ।
छत्रं चिच्छेद समरे राज्ञस्तस्य रथोत्तमात् ॥ १२
त्रिभिश्च तस्य चिच्छेद ज्वलन्तं ध्वजमुत्तमम् ।
छित्त्वा तं च ननादोच्चैस्तव पुत्रस्य पश्यतः ॥ १३
रथाच्च स ध्वजः श्रीमान्नानारत्नविभूषितः ।
पपात सहसा भूमिं विद्युज्जलधरादिव ॥ १४
ज्वलन्तं सूर्यसंकाशं नागं मणिमयं शुभम् ।
ध्वजं कुरुपतेश्छिन्नं ददृशुः सर्वपार्थिवाः ॥ १५
अथैनं दशभिर्बाणैस्तोत्त्रैरिव महागजम् ।
आजघान रणे भीमः स्मयन्निव महारथः ॥ १६
ततस्तु राजा सिन्धूनां रथश्रेष्ठो जयद्रथः ।
दुर्योधनस्य जग्राह पार्ष्णिं सत्पुरुषोचिताम् ॥ १७
कृपश्च रथिनां श्रेष्ठः कौरव्यममितौजसम् ।
आरोपयद्रथं राजन्दुर्योधनममर्षणम् ॥ १८
स गाढविद्धो व्यथितो भीमसेनेन संयुगे ।
निषसाद रथोपस्थे राजा दुर्योधनस्तदा ॥ १९
परिवार्य ततो भीमं हन्तुकामो जयद्रथः ।
रथैरनेकसाहस्रैर्भीमस्यावारयद्दिशः ॥ २०
धृष्टकेतुस्ततो राजन्नभिमन्युश्च वीर्यवान् ।
केकया द्रौपदेयाश्च तव पुत्रानयोधयन् ॥ २१
चित्रसेनः सुचित्रश्च चित्राश्वश्चित्रदर्शनः ।
चारुचित्रः सुचारुश्च तथा नन्दोपनन्दकौ ॥ २२
अष्टावेते महेष्वासाः सुकुमारा यशस्विनः ।
अभिमन्युरथं राजन्समन्तात्पर्यवारयन् ॥ २३
आजघान ततस्तूर्णमभिमन्युर्महामनाः ।
एकैकं पञ्चभिर्विद्ध्वा शरैः संनतपर्वभिः ।
वज्रमृत्युप्रतीकाशैर्विचित्रायुधनिःसृतैः ॥ २४
अमृष्यमाणास्ते सर्वे सौभद्रं रथसत्तमम् ।
ववर्षुर्मार्गणैस्तीक्ष्णैर्गिरिं मेरुमिवाम्बुदाः ॥ २५

स पीड्यमानः समरे कृतास्त्रो युद्धदुर्मदः ।
अभिमन्युर्महाराज तावकान्समकम्पयत् ।
यथा देवासुरे युद्धे वज्रपाणिर्महासुरान् ॥ २६
विकर्णस्य ततो भल्लान्प्रेषयामास भारत ।
चतुर्दश रथश्रेष्ठो घोरानाशीविषोपमान् ।
ध्वजं सूतं हयांश्चास्य छित्त्वा नृत्यन्निवाहवे ॥ २७
पुनश्चान्याञ्शरान्पीतानकुण्ठाग्राञ्शिलाशितान् ।
प्रेषयामास सौभद्रो विकर्णाय महाबलः ॥ २८
ते विकर्णं समासाद्य कङ्कबर्हिणवाससः ।
भित्त्वा देहं गता भूमिं ज्वलन्त इव पन्नगाः ॥ २९
ते शरा हेमपुङ्खाग्रा व्यदृश्यन्त महीतले ।
विकर्णरुधिरक्लिन्ना वमन्त इव शोणितम् ॥ ३०
विकर्णं वीक्ष्य निर्भिन्नं तस्यैवान्ये सहोदराः ।
अभ्यद्रवन्त समरे सौभद्रप्रमुखान्रथान् ॥ ३१
अभियात्वा तथैवाशु रथस्थान्सूर्यवर्चसः ।
अविध्यन्समरेऽन्योन्यं संरब्धा युद्धदुर्मदाः ॥ ३२
दुर्मुखः श्रुतकर्माणं विद्ध्वा सप्तभिराशुगैः ।
ध्वजमेकेन चिच्छेद सारथिं चास्य सप्तभिः ॥ ३३
अश्वाञ्जाम्बूनदैर्जालैः प्रच्छन्नान्वातरंहसः ।
जघान षड्भिरासाद्य सारथिं चाभ्यपातयत् ॥ ३४
स हताश्वे रथे तिष्ठञ्श्रुतकर्मा महारथः ।
शक्तिं चिक्षेप संक्रुद्धो महोल्कां ज्वलितामिव ॥ ३५
सा दुर्मुखस्य विपुलं वर्म भित्त्वा यशस्विनः ।
विदार्य प्राविशद्भूमिं दीप्यमाना सुतेजना ॥ ३६
तं दृष्ट्वा विरथं तत्र सुतसोमो महाबलः ।
पश्यतां सर्वसैन्यानां रथमारोपयत्स्वकम् ॥ ३७
श्रुतकीर्तिस्तथा वीरो जयत्सेनं सुतं तव ।
अभ्ययात्समरे राजन्हन्तुकामो यशस्विनम् ॥ ३८
तस्य विक्षिपतश्चापं श्रुतकीर्तेर्महात्मनः ।
चिच्छेद समरे राजञ्जयत्सेनः सुतस्तव ।
क्षुरप्रेण सुतीक्ष्णेन प्रहसन्निव भारत ॥ ३९
तं दृष्ट्वा छिन्नधन्वानं शतानीकः सहोदरम् ।
अभ्यपद्यत तेजस्वी सिंहवद्विनदन्मुहुः ॥ ४०
शतानीकस्तु समरे दृढं विस्फार्य कार्मुकम् ।
विव्याध दशभिस्तूर्णं जयत्सेनं शिलीमुखैः ॥ ४१
अथान्येन सुतीक्ष्णेन सर्वावरणभेदिना ।
शतानीको जयत्सेनं विव्याध हृदये भृशम् ॥ ४२
तथा तस्मिन्वर्तमाने दुष्कर्णो भ्रातुरन्तिके ।
चिच्छेद समरे चापं नाकुलेः क्रोधमूर्छितः ॥ ४३
अथान्यद्धनुरादाय भारसाधनमुत्तमम् ।
समादत्त शितान्बाणाञ्शतानीको महाबलः ॥ ४४
तिष्ठ तिष्ठेति चामन्त्र्य दुष्कर्णं भ्रातुरग्रतः ।
मुमोच निशितान्बाणाञ्ज्वलितान्पन्नगानिव ॥ ४५
ततोऽस्य धनुरेकेन द्वाभ्यां सूतं च मारिष ।
चिच्छेद समरे तूर्णं तं च विव्याध सप्तभिः ॥ ४६
अश्वान्मनोजवांश्चास्य कल्माषान्वीतकल्मषः ।
जघान निशितैस्तूर्णं सर्वान्द्वादशभिः शरैः ॥ ४७
अथापरेण भल्लेन सुमुक्तेन निपातिना ।
दुष्कर्णं समरे क्रुद्धो विव्याध हृदये भृशम् ॥ ४८
दुष्कर्णं निहतं दृष्ट्वा पञ्च राजन्महारथाः ।
जिघांसन्तः शतानीकं सर्वतः पर्यवारयन् ॥ ४९
छाद्यमानं शरव्रातैः शतानीकं यशस्विनम् ।
अभ्यधावन्त संरब्धाः केकयाः पञ्च सोदराः ॥ ५०
तानभ्यापततः प्रेक्ष्य तव पुत्रा महारथाः ।
प्रत्युद्ययुर्महाराज गजा इव महागजान् ॥ ५१
दुर्मुखो दुर्जयश्चैव तथा दुर्मर्षणो युवा ।
शत्रुंजयः शत्रुसहः सर्वे क्रुद्धा यशस्विनः ।
प्रत्युद्याता महाराज केकयान्भ्रातरः समम् ॥ ५२
रथैर्नगरसंकाशैर्हयैर्युक्तैर्मनोजवैः ।
नानावर्णविचित्राभिः पताकाभिरलंकृतैः ॥ ५३

वरचापधरा वीरा विचित्रकवचध्वजाः ।
विविशुस्ते परं सैन्यं सिंहा इव वनाद्वनम् ॥ ५४
तेषां सुतुमुलं युद्धं व्यतिषक्तरथद्विपम् ।
अवर्तत महारौद्रं निघ्नतामितरेतरम् ।
अन्योन्यागस्कृतां राजन्यमराष्ट्रविवर्धनम् ॥ ५५
मुहूर्तास्तमिते सूर्ये चक्रुर्युद्धं सुदारुणम् ।
रथिनः सादिनश्चैव व्यकीर्यन्त सहस्रशः ॥ ५६
ततः शांतनवः क्रुद्धः शरैः संनतपर्वभिः ।
नाशयामास सेनां वै भीष्मस्तेषां महात्मनाम् ।
पाञ्चालानां च सैन्यानि शरैर्निन्ये यमक्षयम् ॥ ५७
एवं भित्त्वा महेष्वासः पाण्डवानामनीकिनीम् ।
कृत्वावहारं सैन्यानां ययौ स्वशिबिरं नृप ॥ ५८
धर्मराजोऽपि संप्रेक्ष्य धृष्टद्युम्नवृकोदरौ ।
मूर्ध्नि चैतावुपाघ्राय संहृष्टः शिबिरं ययौ ॥ ५९

इति श्रीमहाभारते भीष्मपर्वणि
पञ्चसप्ततिमोऽध्यायः ॥ ७५ ॥

७६

संजय उवाच ।

अथ शूरा महाराज परस्परकृतागसः ।
जग्मुः स्वशिबिराण्येव रुधिरेण समुक्षिताः १
विश्रम्य च यथान्यायं पूजयित्वा परस्परम् ।
संनद्धाः समदृश्यन्त भूयो युद्धचिकीर्षया ॥ २
ततस्तव सुतो राजंश्चिन्तयाभिपरिप्लुतः ।
विस्रवच्छोणिताक्ताङ्गः पप्रच्छेदं पितामहम् ॥ ३
सैन्यानि रौद्राणि भयानकानि
व्यूढानि सम्यग्बहुलध्वजानि ।
विदार्य हत्वा च निपीड्य शूरा-
स्ते पाण्डवानां त्वरिता रथौघाः ॥ ४
संमोह्य सर्वान्युधि कीर्तिमन्तो
व्यूहं च तं मकरं वज्रकल्पम् ।
प्रविश्य भीमेन निबर्हितोऽस्मि
घोरैः शरैर्मृत्युदण्डप्रकाशैः ॥ ५
क्रुद्धं तमुद्वीक्ष्य भयेन राज-
न्संमूर्छितो नालभं शान्तिमद्य ।
इच्छे प्रसादात्तव सत्यसंध
प्राप्तुं जयं पाण्डवेयांश्च हन्तुम् ॥ ६
तेनैवमुक्तः प्रहसन्महात्मा
दुर्योधनं जातमन्युं विदित्वा ।
तं प्रत्युवाचाविमना मनस्वी
गङ्गासुतः शस्त्रभृतां वरिष्ठः ॥ ७
परेण यत्नेन विगाह्य सेनां
सर्वात्मनाहं तव राजपुत्र ।
इच्छामि दातुं विजयं सुखं च
न चात्मानं छादयेऽहं त्वदर्थे ॥ ८
एते तु रौद्रा बहवो महारथा
यशस्विनः शूरतमाः कृतास्त्राः ।
ये पाण्डवानां समरे सहाया
जितक्लमाः क्रोधविषं वमन्ति ॥ ९
ते नेह शक्याः सहसा विजेतुं
वीर्योन्नद्धाः कृतवैरास्त्वया च ।
अहं ह्येतान्प्रतियोत्स्यामि राज-
न्सर्वात्मना जीवितं त्यज्य वीर ॥ १०
रणे तवार्थाय महानुभाव
न जीवितं रक्ष्यतमं ममाद्य ।
सर्वांस्तवार्थाय सदेवदैत्या-
ँल्लोकान्दहेयं किमु शत्रूंस्तवेह ॥ ११
तत्पाण्डवान्योधयिष्यामि राज-
न्प्रियं च ते सर्वमहं करिष्ये ।
श्रुत्वैव चैतत्परमप्रतीतो
दुर्योधनः प्रीतमना बभूव ॥ १२

सर्वाणि सैन्यानि ततः प्रहृष्टो
निर्गच्छतेत्याह नृपांश्च सर्वान् ।
तदाज्ञया तानि विनिर्ययुर्द्रुतं
रथाश्वपादातगजायुतानि ॥ १३
प्रहर्षयुक्तानि तु तानि राज-
न्महान्ति नानाविधशस्त्रवन्ति ।
स्थितानि नागाश्वपदातिमन्ति
विरेजुराजौ तव राजन्बलानि ॥ १४
वृन्दैः स्थिताश्चापि सुसंप्रयुक्ता-
श्चकाशिरे दन्तिगणाः समन्तात् ।
शस्त्रास्त्रविद्भिर्नरदेव योधै-
रधिष्ठिताः सैन्यगणास्त्वदीयाः ॥ १५
रथैश्च पादातगजाश्वसंघैः
प्रयाद्भिराजौ विधिवत्प्रणुन्नैः ।
समुद्धतं वै तरुणार्कवर्णं
रजो बभौ छादयत्सूर्यरश्मीन् ॥ १६
रेजुः पताका रथदन्तिसंस्था
वातेरिता भ्राम्यमाणाः समन्तात् ।
नानारङ्गाः समरे तत्र राज-
न्मेघैर्युक्ता विद्युतः खे यथैव ॥ १७
धनूंषि विस्फारयतां नृपाणां
बभूव शब्दस्तुमुलोऽतिघोरः ।
विमथ्यतो देवमहासुरौघै-
र्यथार्णवस्यादियुगे तदानीम् ॥ १८
तदुग्रनादं बहुरूपवर्णं
तवात्मजानां समुदीर्णमेवम् ।
बभूव सैन्यं रिपुसैन्यहन्तृ
युगान्तमेघौघनिभं तदानीम् ॥ १९

इति श्रीमहाभारते भीष्मपर्वणि
षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

७७

संजय उवाच ।

अथात्मजं तव पुनर्गाङ्गेयो ध्यानमास्थितम् ।
अब्रवीद्भरतश्रेष्ठः संप्रहर्षकरं वचः ॥ १
अहं द्रोणश्च शल्यश्च कृतवर्मा च सात्वतः ।
अश्वत्थामा विकर्णश्च सोमदत्तोऽथ सैन्धवः ॥ २
विन्दानुविन्दावावन्त्यौ बाह्लिकः सह बाह्लिकैः ।
त्रिगर्तराजश्च बली मागधश्च सुदुर्जयः ॥ ३
बृहद्बलश्च कौसल्यश्चित्रसेनो विविंशतिः ।
रथाश्च बहुसाहस्राः शोभमाना महाध्वजाः ॥ ४
देशजाश्च हया राजन्स्वारूढा हयसादिभिः ।
गजेन्द्राश्च मदोद्वृत्ताः प्रभिन्नकरटामुखाः ॥ ५
पादाताश्च तथा शूरा नानाप्रहरणायुधाः ।
नानादेशसमुत्पन्नास्त्वदर्थे योद्धुमुद्यताः ॥ ६
एते चान्ये च बहवस्त्वदर्थे त्यक्तजीविताः ।
देवानपि रणे जेतुं समर्था इति मे मतिः ॥ ७
अवश्यं तु मया राजंस्तव वाच्यं हितं सदा ।
अशक्याः पाण्डवा जेतुं देवैरपि सवासवैः ।
वासुदेवसहायाश्च महेन्द्रसमविक्रमाः ॥ ८
सर्वथाहं तु राजेन्द्र करिष्ये वचनं तव ।
पाण्डवान्वा रणे जेष्ये मां वा जेष्यन्ति पाण्डवाः॥९
एवमुक्त्वा ददौ चास्मै विशल्यकरणीं शुभाम् ।
ओषधीं वीर्यसंपन्नां विशल्यश्चाभवत्तदा ॥ १०
ततः प्रभाते विमले स्वेनानीकेन वीर्यवान् ।
अव्यूहत स्वयं व्यूहं भीष्मो व्यूहविशारदः ॥ ११
मण्डलं मनुजश्रेष्ठ नानाशस्त्रसमाकुलम् ।
संपूर्णं योधमुख्यैश्च तथा दन्तिपदातिभिः ॥ १२
रथैरनेकसाहस्रैः समन्तात्परिवारितम् ।
अश्ववृन्दैर्महद्भिश्च ऋष्टितोमरधारिभिः ॥ १३
नागे नागे रथाः सप्त सप्त चाश्वा रथे रथे ।

अन्वश्वं दश धानुष्का धानुष्के सप्त चर्मिणः ॥१४
एवंव्यूहं महाराज तव सैन्यं महारथैः ।
स्थितं रणाय महते भीष्मेण युधि पालितम् ॥ १५
दशाश्वानां सहस्राणि दन्तिनां च तथैव च ।
रथानामयुतं चापि पुत्राश्च तव दंशिताः ।
चित्रसेनादयः शूरा अभ्यरक्षन्पितामहम् ॥ १६
रक्ष्यमाणश्च तैः शूरैर्गोप्यमानाश्च तेन ते ।
संनद्धाः समदृश्यन्त राजानश्च महाबलाः ॥ १७
दुर्योधनस्तु समरे दंशितो रथमास्थितः ।
व्यभ्राजत श्रिया जुष्टो यथा शक्रस्त्रिविष्टपे ॥ १८
ततः शब्दो महानासीत्पुत्राणां तव भारत ।
रथघोषश्च तुमुलो वादित्राणां च निस्वनः ॥ १९
भीष्मेण धार्तराष्ट्राणां व्यूढः प्रत्यङ्मुखो युधि ।
मण्डलः सुमहाव्यूहो दुर्भेद्योऽमित्रघातिनाम् ।
सर्वतः शुशुभे राजन्रणेऽरीणां दुरासदः ॥ २०
मण्डलं तु समालोक्य व्यूहं परमदारुणम् ।
स्वयं युधिष्ठिरो राजा व्यूहं वज्रमथाकरोत् ॥ २१
तथा व्यूढेष्वनीकेषु यथास्थानमवस्थिताः ।
रथिनः सादिनश्चैव सिंहनादमथानदन् ॥ २२
बिभित्सवस्ततो व्यूहं निर्ययुर्युद्धकाङ्क्षिणः ।
इतरेतरतः शूराः सहसैन्याः प्रहारिणः ॥ २३
भारद्वाजो ययौ मत्स्यं द्रौणिश्चापि शिखण्डिनम् ।
स्वयं दुर्योधनो राजा पार्षतं समुपाद्रवत् ॥ २४
नकुलः सहदेवश्च राजन्मद्रेशमीयतुः ।
विन्दानुविन्दावावन्त्याविरावन्तमभिद्रुतौ ॥ २५
सर्वे नृपास्तु समरे धनंजयमयोधयन् ।
भीमसेनो रणे यत्तो हार्दिक्यं समवारयत् ॥ २६
चित्रसेनं विकर्णं च तथा दुर्मर्षणं विभो ।
आर्जुनिः समरे राजंस्तव पुत्रानयोधयत् ॥ २७
प्राग्ज्योतिषं महेष्वासं हैडिम्बो राक्षसोत्तमः ।
अभिदुद्राव वेगेन मत्तो मत्तमिव द्विपम् ॥ २८
अलम्बुसस्ततो राजन्सात्यकिं युद्धदुर्मदम् ।
ससैन्यं समरे क्रुद्धो राक्षसः समभिद्रवत् ॥ २९
भूरिश्रवा रणे यत्तो धृष्टकेतुमयोधयत् ।
श्रुतायुषं तु राजानं धर्मपुत्रो युधिष्ठिरः ॥ ३०
चेकितानस्तु समरे कृपमेवान्वयोधयत् ।
शेषाः प्रतिययुर्यत्ता भीममेव महारथम् ॥ ३१
ततो राजसहस्राणि परिवव्रुर्धनंजयम् ।
शक्तितोमरनाराचगदापरिघपाणयः ॥ ३२
अर्जुनोऽथ भृशं क्रुद्धो वार्ष्णेयमिदमब्रवीत् ।
पश्य माधव सैन्यानि धार्तराष्ट्रस्य संयुगे ।
व्यूढानि व्यूहविदुषा गाङ्गेयेन महात्मना ॥ ३३
युद्धाभिकामाञ्शूरांश्च पश्य माधव दंशितान् ।
त्रिगर्तराजं सहितं भ्रातृभिः पश्य केशव ॥ ३४
अद्यैतान्पातयिष्यामि पश्यतस्ते जनार्दन ।
य इमे मां यदुश्रेष्ठ योद्धुकामा रणाजिरे ॥ ३५
एवमुक्त्वा तु कौन्तेयो धनुर्ज्यामवमृज्य च ।
ववर्ष शरवर्षाणि नराधिपगणान्प्रति ॥ ३६
तेऽपि तं परमेष्वासाः शरवर्षैरपूरयन् ।
तडागमिव धाराभिर्यथा प्रावृषि तोयदाः ॥ ३७
हाहाकारो महानासीत्तव सैन्ये विशां पते ।
छाद्यमानौ भृशं कृष्णौ शरैर्दृष्ट्वा महारणे ॥ ३८
देवा देवर्षयश्चैव गन्धर्वाश्च महोरगाः ।
विस्मयं परमं जग्मुर्दृष्ट्वा कृष्णौ तथागतौ ॥ ३९
ततः क्रुद्धोऽर्जुनो राजन्नैन्द्रमस्त्रमुदीरयत् ।
तत्राद्भुतमपश्याम विजयस्य पराक्रमम् ॥ ४०
शस्त्रवृष्टिं परैर्मुक्तां शरौघैर्यदवारयत् ।
न च तत्राप्यनिर्भिन्नः कश्चिदासीद्विशां पते ॥ ४१
तेषां राजसहस्राणां हयानां दन्तिनां तथा ।
द्वाभ्यां त्रिभिः शरैश्चान्यान्पार्थो विव्याध मारिष ॥

ते हन्यमानाः पार्थेन भीष्मं शांतनवं ययुः ।
अगाधे मज्जमानानां भीष्मस्त्राताभवत्तदा ॥ ४३
आपतद्भिस्तु तैस्तत्र प्रभग्नं तावकं बलम् ।
संचुक्षुभे महाराज वातैरिव महार्णवः ॥ ४४

इति श्रीमहाभारते भीष्मपर्वणि
सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

७८

संजय उवाच ।

तथा प्रवृत्ते संग्रामे निवृत्ते च सुशर्मणि ।
प्रभग्नेषु च वीरेषु पाण्डवेन महात्मना ॥ १
क्षुभ्यमाणे बले तूर्णं सागरप्रतिमे तव ।
प्रत्युद्याते च गाङ्गेये त्वरितं विजयं प्रति ॥ २
दृष्ट्वा दुर्योधनो राजन्रणे पार्थस्य विक्रमम् ।
त्वरमाणः समभ्येत्य सर्वांस्तानब्रवीन्नृपान् ॥ ३
तेषां च प्रमुखे शूरं सुशर्माणं महाबलम् ।
मध्ये सर्वस्य सैन्यस्य भृशं संहर्षयन्वचः ॥ ४
एष भीष्मः शांतनवो योद्धुकामो धनंजयम् ।
सर्वात्मना कुरुश्रेष्ठस्त्यक्त्वा जीवितमात्मनः ॥ ५
तं प्रयान्तं परानीकं सर्वसैन्येन भारतम् ।
संयत्ताः समरे सर्वे पालयध्वं पितामहम् ॥ ६
बाढमित्येवमुक्त्वा तु तान्यनीकानि सर्वशः ।
नरेन्द्राणां महाराज समाजग्मुः पितामहम् ॥ ७
ततः प्रयातः सहसा भीष्मः शांतनवोऽर्जुनम् ।
रणे भारतमायान्तमाससाद महाबलम् ॥ ८
महाश्वेताश्वयुक्तेन भीमवानरकेतुना ।
महता मेघनादेन रथेनाति विराजता ॥ ९
समरे सर्वसैन्यानामुपयातं धनंजयम् ।
अभवत्तुमुलो नादो भयाद्दृष्ट्वा किरीटिनम् ॥ १०
अभीशुहस्तं कृष्णं च दृष्ट्वादित्यमिवापरम् ।
मध्यंदिनगतं संख्ये न शेकुः प्रतिवीक्षितुम् ॥ ११
तथा शांतनवं भीष्मं श्वेताश्वं श्वेतकार्मुकम् ।
न शेकुः पाण्डवा द्रष्टुं श्वेतग्रहमिवोदितम् ॥ १२
स सर्वतः परिवृतस्त्रिगर्तैः सुमहात्मभिः ।
भ्रातृभिस्तव पुत्रैश्च तथान्यैश्च महारथैः ॥ १३
भारद्वाजस्तु समरे मत्स्यं विव्याध पत्रिणा ।
ध्वजं चास्य शरेणाजौ धनुश्चैकेन चिच्छिदे ॥ १४
तदपास्य धनुश्छिन्नं विराटो वाहिनीपतिः ।
अन्यदादत्त वेगेन धनुर्भारसहं दृढम् ।
शरांश्चाशीविषाकाराञ्ज्वलितान्पन्नगानिव ॥ १५
द्रोणं त्रिभिः प्रविव्याध चतुर्भिश्चास्य वाजिनः ।
ध्वजमेकेन विव्याध सारथिं चास्य पञ्चभिः ।
धनुरेकेषुणाविध्यत्तत्राक्रुध्यद्द्विजर्षभः ॥ १६
तस्य द्रोणोऽवधीदश्वाञ्शरैः संनतपर्वभिः ।
अष्टाभिर्भरतश्रेष्ठ सूतमेकेन पत्रिणा ॥ १७
स हताश्वादवप्लुत्य स्यन्दनाद्धतसारथिः ।
आरुरोह रथं तूर्णं शङ्खस्य रथिनां वरः ॥ १८
ततस्तु तौ पितापुत्रौ भारद्वाजं रथे स्थितौ ।
महता शरवर्षेण वारयामासतुर्बलात् ॥ १९
भारद्वाजस्ततः क्रुद्धः शरमाशीविषोपमम् ।
चिक्षेप समरे तूर्णं शङ्खं प्रति जनेश्वर ॥ २०
स तस्य हृदयं भित्त्वा पीत्वा शोणितमाहवे ।
जगाम धरणिं बाणो लोहितार्द्रीकृतच्छविः ॥ २१
स पपात रथात्तूर्णं भारद्वाजशराहतः ।
धनुस्त्यक्त्वा शरांश्चैव पितुरेव समीपतः ॥ २२
हतं स्वमात्मजं दृष्ट्वा विराटः प्राद्रवद्भयात् ।
उत्सृज्य समरे द्रोणं व्यात्ताननमिवान्तकम् ॥ २३
भारद्वाजस्ततस्तूर्णं पाण्डवानां महाचमूम् ।
दारयामास समरे शतशोऽथ सहस्रशः ॥ २४
शिखण्ड्यपि महाराज द्रौणिमासाद्य संयुगे ।
आजघान भ्रुवोर्मध्ये नाराचैस्त्रिभिराशुगैः ॥ २५

स बभौ नरशार्दूलो ललाटे संस्थितैस्त्रिभिः ।
शिखरैः काञ्चनमयैर्मेरुस्त्रिभिरिवोच्छ्रितैः ॥ २६
अश्वत्थामा ततः क्रुद्धो निमेषार्धाच्छिखण्डिनः ।
सूतं ध्वजमथो राजंस्तुरगानायुधं तथा ।
शरैर्बहुभिरुद्दिश्य पातयामास संयुगे ॥ २७
स हताश्वादवप्लुत्य रथाद्वै रथिनां वरः ।
खड्गमादाय निशितं विमलं च शरावरम् ।
श्येनवद्व्यचरत्क्रुद्धः शिखण्डी शत्रुतापनः ॥ २८
सखड्गस्य महाराज चरतस्तस्य संयुगे ।
नान्तरं ददृशे द्रौणिस्तदद्भुतमिवाभवत् ॥ २९
ततः शरसहस्राणि बहूनि भरतर्षभ ।
प्रेषयामास समरे द्रौणिः परमकोपनः ॥ ३०
तामापतन्तीं समरे शरवृष्टिं सुदारुणाम् ।
असिना तीक्ष्णधारेण चिच्छेद बलिनां वरः ॥ ३१
ततोऽस्य विमलं द्रौणिः शतचन्द्रं मनोरमम् ।
चर्माच्छिनदसिं चास्य खण्डयामास संयुगे ।
शितैः सुबहुशो राजंस्तं च विव्याध पत्रिभिः ॥ ३२
शिखण्डी तु ततः खड्गं खण्डितं तेन सायकैः ।
आविध्य व्यसृजत्तूर्णं ज्वलन्तमिव पन्नगम् ॥ ३३
तमापतन्तं सहसा कालानलसमप्रभम् ।
चिच्छेद समरे द्रौणिर्दर्शयन्पाणिलाघवम् ।
शिखण्डिनं च विव्याध शरैर्बहुभिरायसैः ॥ ३४
शिखण्डी तु भृशं राजंस्ताड्यमानः शितैः शरैः ।
आरुरोह रथं तूर्णं माधवस्य महात्मनः ॥ ३५
सात्यकिस्तु ततः क्रुद्धो राक्षसं क्रूरमाहवे ।
अलम्बुसं शरैर्घोरैर्विव्याध बलिनं बली ॥ ३६
राक्षसेन्द्रस्ततस्तस्य धनुश्चिच्छेद भारत ।
अर्धचन्द्रेण समरे तं च विव्याध सायकैः ।
मायां च राक्षसीं कृत्वा शरवर्षैरवाकिरत् ॥ ३७
तत्राद्भुतमपश्याम शैनेयस्य पराक्रमम् ।
नासंभ्रमद्यत्समरे वध्यमानः शितैः शरैः ॥ ३८
ऐन्द्रमस्त्रं च वार्ष्णेयो योजयामास भारत ।
विजयाद्यदनुप्राप्तं माधवेन यशस्विना ॥ ३९
तदस्त्रं भस्मसात्कृत्वा मायां तां राक्षसीं तदा ।
अलम्बुसं शरैर्घोरैरभ्याकिरत सर्वशः ।
पर्वतं वारिधाराभिः प्रावृषीव बलाहकः । ४०
तत्तथा पीडितं तेन माधवेन महात्मना ।
प्रदुद्राव भयाद्रक्षो हित्वा सात्यकिमाहवे ॥ ४१
तमजेयं राक्षसेन्द्रं संख्ये मघवता अपि ।
शैनेयः प्राणदज्जित्वा योधानां तव पश्यताम् ॥ ४२
न्यहनत्तावकांश्चापि सात्यकिः सत्यविक्रमः ।
निशितैर्बहुभिर्बाणैस्तेऽद्रवन्त भयार्दिताः ॥ ४३
एतस्मिन्नेव काले तु द्रुपदस्यात्मजो बली ।
धृष्टद्युम्नो महाराज तव पुत्रं जनेश्वरम् ।
छादयामास समरे शरैः संनतपर्वभिः ॥ ४४
संछाद्यमानो विशिखैर्धृष्टद्युम्नेन भारत ।
विव्यथे न च राजेन्द्र तव पुत्रो जनेश्वरः ॥ ४५
धृष्टद्युम्नं च समरे तूर्णं विव्याध सायकैः ।
षष्ट्या च त्रिंशता चैव तदद्भुतमिवाभवत् ॥ ४६
तस्य सेनापतिः क्रुद्धो धनुश्चिच्छेद मारिष ।
हयांश्च चतुरः शीघ्रं निजघान महारथः ।
शरैश्चैनं सुनिशितैः क्षिप्रं विव्याध सप्तभिः ॥ ४७
स हताश्वान्महाबाहुरवप्लुत्य रथाद्बली ।
पदातिरसिमुद्यम्य प्राद्रवत्पार्षतं प्रति ॥ ४८
शकुनिस्तं समभ्येत्य राजगृद्धी महाबलः ।
राजानं सर्वलोकस्य रथमारोपयत्स्वकम् ॥ ४९
ततो नृपं पराजित्य पार्षतः परवीरहा ।
न्यहनत्तावकं सैन्यं वज्रपाणिरिवासुरम् ॥ ५०
कृतवर्मा रणे भीमं शरैरार्छन्महारथम् ।
प्रच्छादयामास च तं महामेघो रविं यथा ॥ ५१

ततः प्रहस्य समरे भीमसेनः परंतपः ।
प्रेषयामास संक्रुद्धः सायकान्कृतवर्मणे ॥ ५२
वैर्यमानोऽतिरथः सात्वतः शस्त्रकोविदः ।
नाकम्पत महाराज भीमं चार्छेच्छितैः शरैः ॥ ५३
तस्याश्वांश्चतुरो हत्वा भीमसेनो महाबलः ।
सारथिं पातयामास ध्वजं च सुपरिष्कृतम् ॥ ५४
शरैर्बहुविधैश्चैनमाचिनोत्परवीरहा ।
शकलीकृतसर्वाङ्गः श्वाविद्वत्समदृश्यत ॥ ५५
हताश्वात्तु रथात्तूर्णं वृषकस्य रथं ययौ ।
स्यालस्य ते महाराज तव पुत्रस्य पश्यतः ॥ ५६
भीमसेनोऽपि संक्रुद्धस्तव सैन्यमुपाद्रवत् ।
निजघान च संक्रुद्धो दण्डपाणिरिवान्तकः ॥ ५७

इति श्रीमहाभारते भीष्मपर्वणि
अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

७९

धृतराष्ट्र उवाच ।

बहूनीह विचित्राणि द्वैरथानि स्म संजय ।
पाण्डूनां मामकैः सार्धमश्रौषं तव जल्पतः ॥ १
न चैव मामकं कंचिद्धृष्टं शंससि संजय ।
नित्यं पाण्डुसुतान्हृष्टानभग्नांश्चैव शंससि ॥ २
जीयमानान्विमनसो मामकान्विगतौजसः ।
वदसे संयुगे सूत दिष्टमेतदसंशयम् ॥ ३

संजय उवाच ।

यथाशक्ति यथोत्साहं युद्धे चेष्टन्ति तावकाः ।
दर्शयानाः परं शक्त्या पौरुषं पुरुषर्षभ ॥ ४
गङ्गायाः सुरनद्या वै स्वादुभूतं यथोदकम् ।
महोदधिगुणाभ्यासाल्लवणत्वं निगच्छति ॥ ५
तथा तत्पौरुषं राजंस्तावकानां महात्मनाम् ।
प्राप्य पाण्डुसुतान्वीरान्व्यर्थं भवति संयुगे ॥ ६
घटमानान्यथाशक्ति कुर्वाणान्कर्म दुष्करम् ।
न दोषेण कुरुश्रेष्ठ कौरवान्गन्तुमर्हसि ॥ ७
तवापराधात्सुमहान्सपुत्रस्य विशां पते ।
पृथिव्याः प्रक्षयो घोरो यमराष्ट्रविवर्धनः ॥ ८
आत्मदोषात्समुत्पन्नं शोचितुं नार्हसे नृप ।
न हि रक्षन्ति राजानः सर्वार्थानपि जीवितम् ॥ ९
युद्धे सुकृतिनां लोकानिच्छन्तो वसुधाधिपाः ।
चमूं विगाह्य युध्यन्ते नित्यं स्वर्गपरायणाः ॥ १०
पूर्वाह्णे तु महाराज प्रावर्तत जनक्षयः ।
तन्ममैकमना भूत्वा शृणु देवासुरोपमम् ॥ ११
आवन्त्यौ तु महेष्वासौ महात्मानौ महाबलौ ।
इरावन्तमभिप्रेक्ष्य समेयातां रणोत्कटौ ।
तेषां प्रववृते युद्धं तुमुलं लोमहर्षणम् ॥ १२
इरावांस्तु सुसंक्रुद्धो भ्रातरौ देवरूपिणौ ।
विव्याध निशितैस्तूर्णं शरैः संनतपर्वभिः ।
तावेनं प्रत्यविध्येतां समरे चित्रयोधिनौ ॥ १३
युध्यतां हि तथा राजन्विशेषो न व्यदृश्यत ।
यततां शत्रुनाशाय कृतप्रतिकृतैषिणाम् ॥ १४
इरावांस्तु ततो राजन्ननुविन्दस्य सायकैः ।
चतुर्भिश्चतुरो वाहाननयद्यमसादनम् ॥ १५
भल्लाभ्यां च सुतीक्ष्णाभ्यां धनुः केतुं च मारिष ।
चिच्छेद समरे राजंस्तदद्भुतमिवाभवत् ॥ १६
त्यक्त्वानुविन्दोऽथ रथं विन्दस्य रथमास्थितः ।
धनुर्गृहीत्वा नवमं भारसाधनमुत्तमम् ॥ १७
तावेकस्थौ रणे वीरावावन्त्यौ रथिनां वरौ ।
शरान्मुमुचतुस्तूर्णमिरावति महात्मनि ॥ १८
ताभ्यां मुक्ता महावेगाः शराः काञ्चनभूषणाः ।
दिवाकरपथं प्राप्य छादयामासुरम्बरम् ॥ १९
इरावांस्तु ततः क्रुद्धो भ्रातरौ तौ महारथौ ।
ववर्ष शरवर्षेण सारथिं चाप्यपातयत् ॥ २०
तस्मिन्निपतिते भूमौ गतसत्त्वेऽथ सारथौ ।

रथः प्रदुद्राव दिशः समुद्भ्रान्तहयस्ततः ॥ २१
तौ स जित्वा महाराज नागराजसुतासुतः ।
पौरुषं ख्यापयंस्तूर्णं व्यधमत्तव वाहिनीम् ॥ २२
सा वध्यमाना समरे धार्तराष्ट्री महाचमूः ।
वेगान्बहुविधांश्चक्रे विषं पीत्वेव मानवः ॥ २३
हैडिम्बो राक्षसेन्द्रस्तु भगदत्तं समाद्रवत् ।
रथेनादित्यवर्णेन सध्वजेन महाबलः ॥ २४
ततः प्राग्ज्योतिषो राजा नागराजं समास्थितः ।
यथा वज्रधरः पूर्वं संग्रामे तारकामये ॥ २५
तत्र देवाः सगन्धर्वा ऋषयश्च समागताः ।
विशेषं न स्म विविदुर्हैडिम्बभगदत्तयोः ॥ २६
यथा सुरपतिः शक्रस्त्रासयामास दानवान् ।
तथैव समरे राजंस्त्रासयामास पाण्डवान् ॥ २७
तेन विद्राव्यमाणास्ते पाण्डवाः सर्वतोदिशम् ।
त्रातारं नाभ्यविन्दन्त स्वेष्वनीकेषु भारत ॥ २८
भैमसेनिं रथस्थं तु तत्रापश्याम भारत ।
शेषा विमनसो भूत्वा प्राद्रवन्त महारथाः ॥ २९
निवृत्तेषु तु पाण्डूनां पुनः सैन्येषु भारत ।
आसीन्निष्टानको घोरस्तव सैन्येषु संयुगे ॥ ३०
घटोत्कचस्ततो राजन्भगदत्तं महारणे ।
शरैः प्रच्छादयामास मेरुं गिरिमिवाम्बुदः ॥ ३१
निहत्य ताञ्शरान्राजा राक्षसस्य धनुश्च्युतान् ।
भैमसेनिं रणे तूर्णं सर्वमर्मस्वताडयत् ॥ ३२
स ताड्यमानो बहुभिः शरैः संनतपर्वभिः ।
न विव्यथे राक्षसेन्द्रो भिद्यमान इवाचलः ॥ ३३
तस्य प्राग्ज्योतिषः क्रुद्धस्तोमरान्स चतुर्दश ।
प्रेषयामास समरे तांश्च चिच्छेद राक्षसः ॥ ३४
स तांश्छित्त्वा महाबाहुस्तोमरान्निशितैः शरैः ।
भगदत्तं च विव्याध सप्तत्या कङ्कपत्रिभिः ॥ ३५
ततः प्राग्ज्योतिषो राजन्प्रहसन्निव भारत ।
तस्याश्वांश्चतुरः संख्ये पातयामास सायकैः ॥ ३६
स हताश्वे रथे तिष्ठन्राक्षसेन्द्रः प्रतापवान् ।
शक्तिं चिक्षेप वेगेन प्राग्ज्योतिषगजं प्रति ॥ ३७
तामापतन्तीं सहसा हेमदण्डां सुवेगिताम् ।
त्रिधा चिच्छेद नृपतिः सा व्यकीर्यत मेदिनीम् ।
शक्तिं विनिहतां दृष्ट्वा हैडिम्बः प्राद्रवद्भयात् ।
यथेन्द्रस्य रणात्पूर्वं नमुचिर्दैत्यसत्तमः ॥ ३९
तं विजित्य रणे शूरं विक्रान्तं ख्यातपौरुषम् ।
अजेयं समरे राजन्यमेन वरुणेन च ॥ ४०
पाण्डवीं समरे सेनां संममर्द सकुञ्जरः ।
यथा वनगजो राजन्मृद्नंश्चरति पद्मिनीम् ॥ ४१
मद्रेश्वरस्तु समरे यमाभ्यां सह संगतः ।
स्वस्रीयौ छादयांचक्रे शरौघैः पाण्डुनन्दनौ ॥ ४२
सहदेवस्तु समरे मातुलं वीक्ष्य संगतम् ।
अवारयच्छरौघेण मेघो यद्वद्दिवाकरम् ॥ ४३
छाद्यमानः शरौघेण हृष्टरूपतरोऽभवत् ।
तयोश्चाप्यभवत्प्रीतिरतुला मातृकारणात् ॥ ४४
ततः प्रहस्य समरे नकुलस्य महारथः ।
अश्वान्वै चतुरो राजंश्चतुर्भिः सायकोत्तमैः ।
प्रेषयामास समरे यमस्य सदनं प्रति ॥ ४५
हताश्वात्तु रथात्तूर्णमवप्लुत्य महारथः ।
आरुरोह ततो यानं भ्रातुरेव यशस्विनः ॥ ४६
एकस्थौ तु रणे शूरौ दृढे विक्षिप्य कार्मुके ।
मद्रराजरथं क्रुद्धौ छादयामासतुः क्षणात् ॥ ४७
स च्छाद्यमानो बहुभिः शरैः संनतपर्वभिः ।
स्वस्रीयाभ्यां नरव्याघ्रो नाकम्पत यथाचलः ।
प्रहसन्निव तां चापि शरवृष्टिं जघान ह ॥ ४८
सहदेवस्ततः क्रुद्धः शरमुद्यम्य वीर्यवान् ।
मद्रराजमभिप्रेक्ष्य प्रेषयामास भारत ॥ ४९
स शरः प्रेषितस्तेन गरुत्मानिव वेगवान् ।

मद्रराजं विनिर्भिद्य निपपात महीतले ॥ ५०
स गाढविद्धो व्यथितो रथोपस्थे महारथः ।
निषसाद महाराज कश्मलं च जगाम ह ॥ ५१
तं विसंज्ञं निपतितं सूतः संप्रेक्ष्य संयुगे ।
अपोवाह रथेनाजौ यमाभ्यामभिपीडितम् ॥ ५२
दृष्ट्वा मद्रेश्वररथं धार्तराष्ट्राः पराङ्मुखम् ।
सर्वे विमनसो भूत्वा नेदमस्तीत्यचिन्तयन् ॥ ५३
निर्जित्य मातुलं संख्ये माद्रीपुत्रौ महारथौ ।
दध्मतुर्मुदितौ शङ्खौ सिंहनादं विनेदतुः ॥ ५४
अभिदुद्रुवतुर्हृष्टौ तव सैन्यं विशां पते ।
यथा दैत्यचमूं राजन्निन्द्रोपेन्द्राविवामरौ ॥ ५५

इति श्रीमहाभारते भीष्मपर्वणि
एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

८०

संजय उवाच ।

ततो युधिष्ठिरो राजा मध्यं प्राप्ते दिवाकरे ।
श्रुतायुषमभिप्रेक्ष्य चोदयामास वाजिनः ॥ १
अभ्यधावत्ततो राजा श्रुतायुषमरिंदमम् ।
विनिघ्नन्सायकैस्तीक्ष्णैर्नवभिर्नतपर्वभिः ॥ २
स संवार्य रणे राजा प्रेषितान्धर्मसूनुना ।
शरान्सप्त महेष्वासः कौन्तेयाय समर्पयत् ॥ ३
ते तस्य कवचं भित्त्वा पपुः शोणितमाहवे ।
असूनिव विचिन्वन्तो देहे तस्य महात्मनः ॥ ४
पाण्डवस्तु भृशं विद्धस्तेन राज्ञा महात्मना ।
रणे वराहकर्णेन राजानं हृदि विव्यधे ॥ ५
अथापरेण भल्लेन केतुं तस्य महात्मनः ।
रथश्रेष्ठो रथात्तूर्णं भूमौ पार्थो न्यपातयत् ॥ ६
केतुं निपतितं दृष्ट्वा श्रुतायुः स तु पार्थिवः ।
पाण्डवं विशिखैस्तीक्ष्णै राजन्विव्याध सप्तभिः ॥ ७
ततः क्रोधात्प्रजज्वाल धर्मपुत्रो युधिष्ठिरः ।
यथा युगान्ते भूतानि धक्ष्यन्निव हुताशनः ॥ ८
क्रुद्धं तु पाण्डवं दृष्ट्वा देवगन्धर्वराक्षसाः ।
प्रविव्यथुर्महाराज व्याकुलं चाप्यभूज्जगत् ॥ ९
सर्वेषां चैव भूतानामिदमासीन्मनोगतम् ।
त्रींल्लोकानद्य संक्रुद्धो नृपोऽयं धक्ष्यतीति वै ॥ १०
ऋषयश्चैव देवाश्च चक्रुः स्वस्त्ययनं महत् ।
लोकानां नृप शान्त्यर्थं क्रोधिते पाण्डवे तदा ॥ ११
स च क्रोधसमाविष्टः सृक्किणी परिलेलिहन् ।
दधारात्मवपुर्घोरं युगान्तादित्यसंनिभम् ॥ १२
ततः सर्वाणि सैन्यानि तावकानि विशां पते ।
निराशान्यभवंस्तत्र जीवितं प्रति भारत ॥ १३
स तु धैर्येण तं कोपं संनिवार्य महायशाः ।
श्रुतायुषः प्रचिच्छेद मुष्टिदेशे महद्धनुः ॥ १४
अथैनं छिन्नधन्वानं नाराचेन स्तनान्तरे ।
निर्बिभेद रणे राजा सर्वसैन्यस्य पश्यतः ॥ १५
सत्वरं चरणे राजंस्तस्य वाहान्महात्मनः ।
निजघान शरैः क्षिप्रं सूतं च सुमहाबलः ॥ १६
हताश्वं तु रथं त्यक्त्वा दृष्ट्वा राज्ञस्तु पौरुषम् ।
विप्रदुद्राव वेगेन श्रुतायुः समरे तदा ॥ १७
तस्मिञ्जिते महेष्वासे धर्मपुत्रेण संयुगे ।
दुर्योधनबलं राजन्सर्वमासीत्पराङ्मुखम् ॥ १८
एतत्कृत्वा महाराज धर्मपुत्रो युधिष्ठिरः ।
व्यात्ताननो यथा कालस्तव सैन्यं जघान ह ॥ १९
चेकितानस्तु वार्ष्णेयो गौतमं रथिनां वरम् ।
प्रेक्षतां सर्वसैन्यानां छादयामास सायकैः ॥ २०
संनिवार्य शरांस्तांस्तु कृपः शारद्वतो युधि ।
चेकितानं रणे यत्तं राजन्विव्याध पत्रिभिः ॥ २१
अथापरेण भल्लेन धनुश्चिच्छेद मारिष ।
सारथिं चास्य समरे क्षिप्रहस्तो न्यपातयत् ।
हयांश्चास्यावधीद्राजन्नुभौ च पार्ष्णिसारथी ॥ २२

सोऽवप्लुत्य रथात्तूर्णं गदां जग्राह सात्वतः ।
स तया वीरघातिन्या गदया गदिनां वरः ।
गौतमस्य हयान्हत्वा सारथिं च न्यपातयत् ।। २३
भूमिष्ठो गौतमस्तस्य शरांश्चिक्षेप षोडश ।
ते शराः सात्वतं भित्त्वा प्राविशन्त धरातलम् ।।२४
चेकितानस्ततः क्रुद्धः पुनश्चिक्षेप तां गदाम् ।
गौतमस्य वधाकाङ्क्षी वृत्रस्येव पुरंदरः ।। २५
तामापतन्तीं विमलामश्मगर्भां महागदाम् ।
शरैरनेकसाहस्रैर्वारयामास गौतमः ।। २६
चेकितानस्ततः खड्गं कोशादुद्धृत्य भारत ।
लाघवं परमास्थाय गौतमं समुपाद्रवत् ।। २७
गौतमोऽपि धनुस्त्यक्त्वा प्रगृह्यासिं सुसंशितम् ।
वेगेन महता राजंश्चेकितानमुपाद्रवत् ।। २८
तावुभौ बलसंपन्नौ निस्त्रिंशवरधारिणौ ।
निस्त्रिंशाभ्यां सुतीक्ष्णाभ्यामन्योन्यं संततक्षतुः ।।२९
निस्त्रिंशवेगाभिहतौ ततस्तौ पुरुषर्षभौ ।
धरणीं समनुप्राप्तौ सर्वभूतनिषेविताम् ।
मूर्छयाभिपरीताङ्गौ व्यायामेन च मोहितौ ।। ३०
ततोऽभ्यधावद्वेगेन करकर्षः सुहृत्तया ।
चेकितानं तथाभूतं दृष्ट्वा समरदुर्मदम् ।
रथमारोपयच्चैनं सर्वसैन्यस्य पश्यतः ।। ३१
तथैव शकुनिः शूरः स्यालस्तव विशां पते ।
आरोपयद्रथं तूर्णं गौतमं रथिनां वरम् ।। ३२
सौमदत्तिं तथा क्रुद्धो धृष्टकेतुर्महाबलः ।
नवत्या सायकैः क्षिप्रं राजन्विव्याध वक्षसि ।। ३३
सौमदत्तिरुरःस्थैस्तैर्भृशं बाणैरशोभत ।
मध्यंदिने महाराज रश्मिभिस्तपनो यथा ।। ३४
भूरिश्रवास्तु समरे धृष्टकेतुं महारथम् ।
हतसूतहयं चक्रे विरथं सायकोत्तमैः ।। ३५
विरथं चैनमालोक्य हताश्वं हतसारथिम् ।
महता शरवर्षेण छादयामास संयुगे ।। ३६
स च तं रथमुत्सृज्य धृष्टकेतुर्महामनाः ।
आरुरोह ततो यानं शतानीकस्य मारिष ।। ३७
चित्रसेनो विकर्णश्च राजन्दुर्मर्षणस्तथा ।
रथिनो हेमसंनाहाः सौभद्रमभिदुद्रुवुः ।। ३८
अभिमन्योस्ततस्तैस्तु घोरं युद्धमवर्तत ।
शरीरस्य यथा राजन्वातपित्तकफैस्त्रिभिः ।। ३९
विरथांस्तव पुत्रांस्तु कृत्वा राजन्महाहवे ।
न जघान नरव्याघ्रः स्मरन्भीमवचस्तदा ।। ४०
ततो राज्ञां बहुशतैर्गजाश्वरथयायिभिः ।
संवृतं समरे भीष्मं देवैरपि दुरासदम् ।। ४१
प्रयान्तं शीघ्रमुद्वीक्ष्य परित्रातुं सुतांस्तव ।
अभिमन्युं समुद्दिश्य बालमेकं महारथम् ।
वासुदेवमुवाचेदं कौन्तेयः श्वेतवाहनः ।। ४२
चोदयाश्वान्हृषीकेश यत्रैते बहुला रथाः ।
एते हि बहवः शूराः कृतास्त्रा युद्धदुर्मदाः ।
यथा न हन्युर्नः सेनां तथा माधव चोदय ।। ४३
एवमुक्तः स वार्ष्णेयः कौन्तेयेनामितौजसा ।
रथं श्वेतहयैर्युक्तं प्रेषयामास संयुगे ।। ४४
निष्टानको महानासीत्तव सैन्यस्य मारिष ।
यदर्जुनो रणे क्रुद्धः संयातस्तावकान्प्रति ।। ४५
समासाद्य तु कौन्तेयो राज्ञस्तान्भीष्मरक्षिणः ।
सुशर्माणमथो राजन्निदं वचनमब्रवीत् ।। ४६
जानामि त्वां युधि श्रेष्ठमत्यन्तं पूर्ववैरिणम् ।
पर्यायस्याद्य संप्राप्तं फलं पश्य सुदारुणम् ।
अद्य ते दर्शयिष्यामि पूर्वप्रेतान्पितामहान् ।। ४७
एवं संजल्पतस्तस्य बीभत्सोः शत्रुघातिनः ।
श्रुत्वापि परुषं वाक्यं सुशर्मा रथयूथपः ।
न चैनमब्रवीत्किंचिच्छुभं वा यदि वाशुभम् ।।४८
अभि गत्वार्जुनं वीरं राजभिर्बहुभिर्वृतः ।

पुरस्तात्पृष्ठतश्चैव पार्श्वतश्चैव सर्वतः ॥ ४९
परिवार्यार्जुनं संख्ये तव पुत्रैः सहानघ ।
शरैः संछादयामास मेघैरिव दिवाकरम् ॥ ५०
ततः प्रवृत्तः सुमहान्संग्रामः शोणितोदकः ।
तावकानां च समरे पाण्डवानां च भारत ॥ ५१

इति श्रीमहाभारते भीष्मपर्वणि
अशीतितमोऽध्यायः ॥ ८० ॥

८१

संजय उवाच ।

स तुद्यमानस्तु शरैर्धनंजयः
पदा हतो नाग इव श्वसन्बली ।
बाणेन बाणेन महारथानां
चिच्छेद चापानि रणे प्रसह्य ॥ १
संछिद्य चापानि च तानि राज्ञां
तेषां रणे वीर्यवतां क्षणेन ।
विव्याध बाणैर्युगपन्महात्मा
निःशेषतां तेष्वथ मन्यमानः ॥ २
निपेतुराजौ रुधिरप्रदिग्धा-
स्ते ताडिताः शक्रसुतेन राजन् ।
विभिन्नगात्राः पतितोत्तमाङ्गा
गतासवश्छिन्नतनुत्रकायाः ॥ ३
महीं गताः पार्थबलाभिभूता
विचित्ररूपा युगपद्विनेशुः ।
दृष्ट्वा हतांस्तान्युधि राजपुत्रां-
स्त्रिगर्तराजः प्रययौ क्षणेन ॥ ४
तेषां रथानामथ पृष्ठगोपा
द्वात्रिंशदन्येऽभ्यपतन्त पार्थम् ।
तथैव ते संपरिवार्य पार्थं
विकृष्य चापानि महारवाणि ।
अवीवृषन्बाणमहौघवृष्ट्या
यथा गिरिं तोयधरा जलौघैः ॥ ५
संपीड्यमानस्तु शरौघवृष्ट्या
धनंजयस्तान्युधि जातरोषः ।
षष्ट्या शरैः संयति तैलधौतै-
र्जघान तानप्यथ पृष्ठगोपान् ॥ ६
षष्टिं रथांस्तानवजित्य संख्ये
धनंजयः प्रीतमना यशस्वी ।
अथात्वरद्भीष्मवधाय जिष्णु-
र्बलानि राज्ञां समरे निहत्य ॥ ७
त्रिगर्तराजो निहतान्समीक्ष्य
महारथांस्तानथ बन्धुवर्गान् ।
रणे पुरस्कृत्य नराधिपांस्ता-
ञ्जगाम पार्थं त्वरितो वधाय ॥ ८
अभिद्रुतं चास्त्रभृतां वरिष्ठं
धनंजयं वीक्ष्य शिखण्डिमुख्याः ।
अभ्युद्ययुस्ते शितशस्त्रहस्ता
रिरक्षिषन्तो रथमर्जुनस्य ॥ ९
पार्थोऽपि तानापततः समीक्ष्य
त्रिगर्तराज्ञा सहितान्नृवीरान् ।
विध्वंसयित्वा समरे धनुष्मा-
न्गाण्डीवमुक्तैर्निशितैः पृषत्कैः ।
भीष्मं यियासुर्युधि संददर्श
दुर्योधनं सैन्धवादींश्च राज्ञः ॥ १०
आवारयिष्णूनभिसंप्रयाय
मुहूर्तमायोध्य बलेन वीरः ।
उत्सृज्य राजानमनन्तवीर्यो
जयद्रथादींश्च नृपान्महौजाः ।
ययौ ततो भीमबलो मनस्वी
गाङ्गेयमाजौ शरचापपाणिः ॥ ११
युधिष्ठिरश्चोग्रबलो महात्मा

समाययौ त्वरितो जातकोपः ।
मद्राधिपं समभित्यज्य संख्ये
स्वभागमाप्तं तमनन्तकीर्तिः ।
सार्धं स माद्रीसुतभीमसेनै-
र्भीष्मं ययौ शांतनवं रणाय ॥ १२
तैः संप्रयुक्तः स महारथाग्र्यै-
र्गङ्गासुतः समरे चित्रयोधी ।
न विव्यथे शांतनवो महात्मा
समागतैः पाण्डुसुतैः समस्तैः ॥ १३
अथैत्य राजा युधि सत्यसंधो
जयद्रथोऽत्युग्रबलो मनस्वी ।
चिच्छेद चापानि महारथानां
प्रसह्य तेषां धनुषा वरेण ॥ १४
युधिष्ठिरं भीमसेनं यमौ च
पार्थं तथा युधि संजातकोपः ।
दुर्योधनः क्रोधविषो महात्मा
जघान बाणैरनलप्रकाशैः ॥ १५
कृपेण शल्येन शलेन चैव
तथा विभो चित्रसेनेन चाजौ ।
विद्धाः शरैस्तेऽतिविवृद्धकोपै-
र्देवा यथा दैत्यगणैः समेतैः ॥ १६
छिन्नायुधं शांतनवेन राजा
शिखण्डिनं प्रेक्ष्य च जातकोपः ।
अजातशत्रुः समरे महात्मा
शिखण्डिनं क्रुद्ध उवाच वाक्यम् ॥ १७
उक्त्वा तथा त्वं पितुरग्रतो मा-
महं हनिष्यामि महाव्रतं तम् ।
भीष्मं शरौघैर्विमलार्कवर्णैः
सत्यं वदामीति कृता प्रतिज्ञा ॥ १८
त्वया न चैनां सफलां करोषि
देवव्रतं यन्न निहंसि युद्धे ।
मिथ्याप्रतिज्ञो भव मा नृवीर
रक्षस्व धर्मं च कुलं यशश्च ॥ १९
प्रेक्षस्व भीष्मं युधि भीमवेगं
सर्वांस्तपन्तं मम सैन्यसंघान् ।
शरौघजालैरतितिग्मतेजैः
कालं यथा मृत्युकृतं क्षणेन ॥ २०
निकृत्तचापः समरानपेक्षः
पराजितः शांतनवेन राज्ञा ।
विहाय बन्धूनथ सोदरांश्च
क यास्यसे नानुरूपं तवेदम् ॥ २१
दृष्ट्वा हि भीष्मं तमनन्तवीर्यं
भग्नं च सैन्यं द्रवमाणमेवम् ।
भीतोऽसि नूनं द्रुपदस्य पुत्र
तथा हि ते मुखवर्णोऽप्रहृष्टः ॥ २२
आज्ञायमानेऽपि धनंजयेन
महाहवे संप्रसक्ते नृवीर ।
कथं हि भीष्मात्प्रथितः पृथिव्यां
भयं त्वमद्य प्रकरोषि वीर ॥ २३
स धर्मराजस्य वचो निशम्य
रूक्षाक्षरं विप्रलापानुबद्धम् ।
प्रत्यादेशं मन्यमानो महात्मा
प्रतत्वरे भीष्मवधाय राजन् ॥ २४
तमापतन्तं महता जवेन
शिखण्डिनं भीष्ममभिद्रवन्तम् ।
आवारयामास हि शल्य एनं
शस्त्रेण घोरेण सुदुर्जयेन ॥ २५
स चापि दृष्ट्वा समुदीर्यमाण-
मस्त्रं युगान्ताग्निसमप्रभावम् ।
नासौ व्यमुह्यद्द्रुपदस्य पुत्रो

राजन्महेन्द्रप्रतिमप्रभावः ॥ २६
तस्थौ च तत्रैव महाधनुष्मा-
ञ्शरैस्तदस्त्रं प्रतिबाधमानः ।
अथाददे वारुणमन्यदस्त्रं
शिखण्ड्यथोग्रं प्रतिघाताय तस्य ।
तदस्त्रमस्त्रेण विदार्यमाणं
खस्थाः सुरा ददृशुः पार्थिवाश्च ॥ २७
भीष्मस्तु राजन्समरे महात्मा
धनुः सुचित्रं ध्वजमेव चापि ।
छित्त्वानदत्पाण्डुसुतस्य वीरो
युधिष्ठिरस्याजमीढस्य राज्ञः ॥ २८
ततः समुत्सृज्य धनुः सबाणं
युधिष्ठिरं वीक्ष्य भयाभिभूतम् ।
गदां प्रगृह्याभिपपात संख्ये
जयद्रथं भीमसेनः पदातिः ॥ २९
तमापतन्तं महता जवेन
जयद्रथः सगदं भीमसेनम् ।
विव्याध घोरैर्यमदण्डकल्पैः
शितैः शरैः पञ्चशतैः समन्तात् ॥ ३०
अचिन्तयित्वा स शरांस्तरस्वी
वृकोदरः क्रोधपरीतचेताः ।
जघान वाहान्समरे समस्ता-
नारट्टजान्सिन्धुराजस्य संख्ये ॥ ३१
ततोऽभिवीक्ष्याप्रतिमप्रभाव-
स्तवात्मजस्त्वरमाणो रथेन ।
अभ्याययौ भीमसेनं निहन्तुं
समुद्यतास्त्रः सुरराजकल्पः ॥ ३२
भीमोऽप्यथैनं सहसा विनद्य
प्रत्युद्ययौ गदया तर्जमानः ।
समुद्यतां तां यमदण्डकल्पां
दृष्ट्वा गदां ते कुरवः समन्तात् ॥ ३३
विहाय सर्वे तव पुत्रमुग्रं
पातं गदायाः परिहर्तुकामाः ।
अपक्रान्तास्तुमुले संविमर्दे
सुदारुणे भारत मोहनीये ॥ ३४
अमूढचेतास्त्वथ चित्रसेनो
महागदामापतन्तीं निरीक्ष्य ।
रथं समुत्सृज्य पदातिराजौ
प्रगृह्य खड्गं विमलं च चर्म ।
अवप्लुतः सिंह इवाचलाग्रा-
ज्जगाम चान्यं भुवि भूमिदेशम् ॥ ३५
गदापि सा प्राप्य रथं सुचित्रं
साश्वं ससूतं विनिहत्य संख्ये ।
जगाम भूमिं ज्वलिता महोल्का
भ्रष्टाम्बराद्गामिव संपतन्ती ॥ ३६
आश्चर्यभूतं सुमहत्त्वदीया
दृष्ट्वैव तद्भारत संप्रहृष्टाः ।
सर्वे विनेदुः सहिताः समन्ता-
त्पुपूजिरे तव पुत्रं ससैन्याः ॥ ३७

इति श्रीमहाभारते भीष्मपर्वणि
एकाशीतितमोऽध्यायः ॥ ८१ ॥

८२

संजय उवाच ।

विरथं तं समासाद्य चित्रसेनं मनस्विनम् ।
रथमारोपयामास विकर्णस्तनयस्तव ॥ १
तस्मिंस्तथा वर्तमाने तुमुले संकुले भृशम् ।
भीष्मः शांतनवस्तूर्णं युधिष्ठिरमुपाद्रवत् ॥ २
ततः सरथनागाश्वाः समकम्पन्त सृञ्जयाः ।
मृत्योरास्यमनुप्राप्तं मेनिरे च युधिष्ठिरम् ॥ ३
युधिष्ठिरोऽपि कौरव्यो यमाभ्यां सहितः प्रभुः ।

महेष्वासं नरव्याघ्रं भीष्मं शांतनवं ययौ ॥ ४
ततः शरसहस्राणि प्रमुञ्चन्पाण्डवो युधि ।
भीष्मं संछादयामास यथा मेघो दिवाकरम् ॥ ५
तेन सम्यक्प्रणीतानि शरजालानि भारत ।
प्रतिजग्राह गाङ्गेयः शतशोऽथ सहस्रशः ॥ ६
तथैव शरजालानि भीष्मेणास्तानि मारिष ।
आकाशे समदृश्यन्त खगमानां व्रजा इव ॥ ७
निमेषार्धाच्च कौन्तेयं भीष्मः शांतनवो युधि ।
अदृश्यं समरे चक्रे शरजालेन भागशः ॥ ८
ततो युधिष्ठिरो राजा कौरव्यस्य महात्मनः ।
नाराचं प्रेषयामास क्रुद्ध आशीविषोपमम् ॥ ९
असंप्राप्तं ततस्तं तु क्षुरप्रेण महारथः ।
चिच्छेद समरे राजन्भीष्मस्तस्य धनुश्च्युतम् ॥ १०
तं तु छित्त्वा रणे भीष्मो नाराचं कालसंमितम् ।
निजघ्ने कौरवेन्द्रस्य हयान्काञ्चनभूषणान् ॥ ११
हताश्वं तु रथं त्यक्त्वा धर्मपुत्रो युधिष्ठिरः ।
आरुरोह रथं तूर्णं नकुलस्य महात्मनः ॥ १२
यमावपि सुसंक्रुद्धः समासाद्य रणे तदा ।
शरैः संछादयामास भीष्मः परपुरंजयः ॥ १३
तौ तु दृष्ट्वा महाराज भीष्मबाणप्रपीडितौ ।
जगामाथ परां चिन्तां भीष्मस्य वधकाङ्क्षया ॥ १४
ततो युधिष्ठिरो वश्यान्राज्ञस्तान्समचोदयत् ।
भीष्मं शांतनवं सर्वे निहतेति सुहृद्गणान् ॥ १५
ततस्ते पार्थिवाः सर्वे श्रुत्वा पार्थस्य भाषितम् ।
महता रथवंशेन परिवव्रुः पितामहम् ॥ १६
स समन्तात्परिवृतः पिता देवव्रतस्तव ।
चिक्रीड धनुषा राजन्पातयानो महारथान् ॥ १७
तं चरन्तं रणे पार्था ददृशुः कौरवं युधि ।
मृगमध्यं प्रविश्येव यथा सिंहशिशुं वने ॥ १८
तर्जयानं रणे शूरांस्त्रासयानं च सायकैः ।
दृष्ट्वा त्रेसुर्महाराज सिंहं मृगगणा इव ॥ १९
रणे भरतसिंहस्य ददृशुः क्षत्रिया गतिम् ।
अग्नेर्वायुसहायस्य यथा कक्षं दिधक्षतः ॥ २०
शिरांसि रथिनां भीष्मः पातयामास संयुगे ।
तालेभ्य इव पक्वानि फलानि कुशलो नरः ॥ २१
पतद्भिश्च महाराज शिरोभिर्धरणीतले ।
बभूव तुमुलः शब्दः पतताम्श्मनामिव ॥ २२
तस्मिंस्तु तुमुले युद्धे वर्तमाने सुदारुणे ।
सर्वेषामेव सैन्यानामासीद्व्यतिकरो महान् ॥ २३
भिन्नेषु तेषु व्यूहेषु क्षत्रिया इतरेतरम् ।
एकमेकं समाहूय युद्धायैवोपतस्थिरे ॥ २४
शिखण्डी तु समासाद्य भरतानां पितामहम् ।
अभिदुद्राव वेगेन तिष्ठ तिष्ठेति चाब्रवीत् ॥ २५
अनादृत्य ततो भीष्मस्तं शिखण्डिनमाहवे ।
प्रययौ सृञ्जयान्क्रुद्धः स्त्रीत्वं चिन्त्य शिखण्डिनः ॥ २६
सृञ्जयास्तु ततो हृष्टा दृष्ट्वा भीष्मं महारथम् ।
सिंहनादान्बहुविधांश्चक्रुः शङ्खविमिश्रितान् ॥ २७
ततः प्रववृते युद्धं व्यतिषक्तरथद्विपम् ।
अपरां दिशमास्थाय स्थिते सवितरि प्रभो ॥ २८
धृष्टद्युम्नोऽथ पाञ्चाल्यः सात्यकिश्च महारथः ।
पीडयन्तौ भृशं सैन्यं शक्तितोमरवृष्टिभिः ।
शस्त्रैश्च बहुभी राजञ्जघ्नतुस्तावकान्रणे ॥ २९
ते हन्यमानाः समरे तावकाः पुरुषर्षभ ।
आर्यां युद्धे मतिं कृत्वा न त्यजन्ति स्म संयुगम् ।
यथोत्साहं च समरे जघ्नुर्लोकं महारथाः ॥ ३०
तत्राक्रन्दो महानासीत्तावकानां महात्मनाम् ।
वध्यतां समरे राजन्पार्षतेन महात्मना ॥ ३१
तं श्रुत्वा निनदं घोरं तावकानां महारथौ ।
विन्दानुविन्दावावन्त्यौ पार्षतं प्रत्युपस्थितौ ॥ ३२
तौ तस्य तुरगान्हत्वा त्वरमाणौ महारथौ ।

छादयामासतुरुभौ शरवर्षेण पार्षतम् ॥ ३३
अवप्लुत्याथ पाञ्चाल्यो रथात्तूर्णं महाबलः ।
आरुरोह रथं तूर्णं सात्यकेः सुमहात्मनः ॥ ३४
ततो युधिष्ठिरो राजा महत्या सेनया वृतः ।
आवन्त्यौ समरे क्रुद्धावभ्ययात्स परंतपौ ॥ ३५
तथैव तव पुत्रोऽपि सर्वोद्योगेन मारिष ।
विन्दानुविन्दावावन्त्यौ परिवार्योपतस्थिवान् ॥ ३६
अर्जुनश्चापि संक्रुद्धः क्षत्रियान्क्षत्रियर्षभ ।
अयोधयत संग्रामे वज्रपाणिरिवासुरान् ॥ ३७
द्रोणश्च समरे क्रुद्धः पुत्रस्य प्रियकृत्तव ।
व्यधमत्सर्वपाञ्चालांस्तूलराशिमिवानलः ॥ ३८
दुर्योधनपुरोगास्तु पुत्रास्तव विशां पते ।
परिवार्य रणे भीष्मं युयुधुः पाण्डवैः सह ॥ ३९
ततो दुर्योधनो राजा लोहितायति भास्करे ।
अब्रवीत्तावकान्सर्वांस्त्वरध्वमिति भारत ॥ ४०
युध्यतां तु तथा तेषां कुर्वतां कर्म दुष्करम् ।
अस्तं गिरिमथारूढे नप्रकाशति भास्करे ॥ ४१
प्रावर्तत नदी घोरा शोणितौघतरङ्गिणी ।
गोमायुगणसंकीर्णा क्षणेन रजनीमुखे ॥ ४२
शिवाभिरशिवाभिश्च रुवद्भिर्भैरवं रवम् ।
घोरमायोधनं जज्ञे भूतसंघसमाकुलम् ॥ ४३
राक्षसाश्च पिशाचाश्च तथान्ये पिशिताशनाः ।
समन्ततो व्यदृश्यन्त शतशोऽथ सहस्रशः ॥ ४४
अर्जुनोऽथ सुशर्मादीन्राज्ञस्तान्सपदानुगान् ।
विजित्य पृतनामध्ये ययौ स्वशिबिरं प्रति ॥ ४५
युधिष्ठिरोऽपि कौरव्यो भ्रातृभ्यां सहितस्तदा ।
ययौ स्वशिबिरं राजा निशायां सेनया वृतः ॥ ४६
भीमसेनोऽपि राजेन्द्र दुर्योधनमुखान्रथान् ।
अवजित्य ततः संख्ये ययौ स्वशिबिरं प्रति ॥ ४७
दुर्योधनोऽपि नृपतिः परिवार्य महारणे ।
भीष्मं शांतनवं तूर्णं प्रयातः शिबिरं प्रति ॥ ४८
द्रोणो द्रौणिः कृपः शल्यः कृतवर्मा च सात्वतः ।
परिवार्य चमूं सर्वां प्रययुः शिबिरं प्रति ॥ ४९
तथैव सात्यकी राजन्धृष्टद्युम्नश्च पार्षतः ।
परिवार्य रणे योधान्ययतुः शिबिरं प्रति ॥ ५०
एवमेते महाराज तावकाः पाण्डवैः सह ।
पर्यवर्तन्त सहिता निशाकाले परंतपाः ॥ ५१
ततः स्वशिबिरं गत्वा पाण्डवाः कुरवस्तथा ।
न्यविशन्त महाराज पूजयन्तः परस्परम् ॥ ५२
रक्षां कृत्वात्मनः शूरा न्यस्य गुल्मान्यथाविधि ।
अपनीय च शल्यांस्ते स्नात्वा च विविधैर्जलैः ॥ ५३
कृतस्वस्त्ययनाः सर्वे संस्तूयन्तश्च बन्दिभिः ।
गीतवादित्रशब्देन व्यक्रीडन्त यशस्विनः ॥ ५४
मुहूर्तमिव तत्सर्वमभवत्स्वर्गसंनिभम् ।
न हि युद्धकथां कांचित्तत्र चक्रुर्महारथाः ॥ ५५
ते प्रसुप्ते बले तत्र परिश्रान्तजने नृप ।
हस्त्यश्वबहुले राजन्प्रेक्षणीये बभूवतुः ॥ ५६

इति श्रीमहाभारते भीष्मपर्वणि
द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

८३

संजय उवाच ।

परिणाम्य निशां तां तु सुखसुप्ता जनेश्वराः ।
कुरवः पाण्डवाश्चैव पुनर्युद्धाय निर्ययुः ॥ १
ततः शब्दो महानासीत्सेनयोरुभयोरपि ।
निर्गच्छमानयोः संख्ये सागरप्रतिमो महान् ॥ २
ततो दुर्योधनो राजा चित्रसेनो विविंशतिः ।
भीष्मश्च रथिनां श्रेष्ठो भारद्वाजश्च वै द्विजः ॥ ३
एकीभूताः सुसंयत्ताः कौरवाणां महाचमूः ।
व्यूहाय विदधू राजन्पाण्डवान्प्रति दंशिताः ॥ ४
भीष्मः कृत्वा महाव्यूहं पिता तव विशां पते ।

सागरप्रतिमं घोरं वाहनोर्मितरङ्गिणम् ॥ ५
अग्रतः सर्वसैन्यानां भीष्मः शांतनवो ययौ ।
मालवैर्दाक्षिणात्यैश्च आवन्त्यैश्च समन्वितः ॥ ६
ततोऽनन्तरमेवासीद्भारद्वाजः प्रतापवान् ।
पुलिन्दैः पारदैश्चैव तथा क्षुद्रकमालवैः ॥ ७
द्रोणादनन्तरं यत्तो भगदत्तः प्रतापवान् ।
मागधैश्च कलिङ्गैश्च पिशाचैश्च विशां पते ॥ ८
प्राग्ज्योतिषादनु नृपः कौसल्योऽथ बृहद्बलः ।
मेकलैस्त्रैपुरैश्चैव चिच्छिलैश्च समन्वितः ॥ ९
बृहद्बलात्ततः शूरस्त्रिगर्तः प्रस्थलाधिपः ।
काम्बोजैर्बहुभिः सार्धं यवनैश्च सहस्रशः ॥ १०
द्रौणिस्तु रभसः शूरस्त्रिगर्तादनु भारत ।
प्रययौ सिंहनादेन नादयानो धरातलम् ॥ ११
तथा सर्वेण सैन्येन राजा दुर्योधनस्तदा ।
द्रौणेरनन्तरं प्रायात्सोदर्यैः परिवारितः ॥ १२
दुर्योधनादनु कृपस्ततः शारद्वतो ययौ ।
एवमेष महाव्यूहः प्रययौ सागरोपमः ॥ १३
रेजुस्तत्र पताकाश्च श्वेतच्छत्राणि चाभिभो ।
अङ्गदान्यथ चित्राणि महार्हाणि धनूंषि च ॥ १४
तं तु दृष्ट्वा महाव्यूहं तावकानां महारथः ।
युधिष्ठिरोऽब्रवीत्तूर्णं पार्षतं पृतनापतिम् ॥ १५
पश्य व्यूहं महेष्वास निर्मितं सागरोपमम् ।
प्रतिव्यूहं त्वमपि हि कुरु पार्षत माचिरम् ॥ १६
ततः स पार्षतः शूरो व्यूहं चक्रे सुदारुणम् ।
शृङ्गाटकं महाराज परव्यूहविनाशनम् ॥ १७
शृङ्गेभ्यो भीमसेनश्च सात्यकिश्च महारथः ।
रथैरनेकसाहस्रैस्तथा हयपदातिभिः ॥ १८
नाभ्यामभून्नरश्रेष्ठः श्वेताश्वो वानरध्वजः ।
मध्ये युधिष्ठिरो राजा माद्रीपुत्रौ च पाण्डवौ ॥१९
अथेतरे महेष्वासाः सहसैन्या नराधिपाः ।
व्यूहं तं पूरयामासुर्व्यूहशास्त्रविशारदाः ॥ २०
अभिमन्युस्ततः पश्चाद्विराटश्च महारथः ।
द्रौपदेयाश्च संहृष्टा राक्षसश्च घटोत्कचः ॥ २१
एवमेतं महाव्यूहं व्यूह्य भारत पाण्डवाः ।
अतिष्ठन्समरे शूरा योद्धुकामा जयैषिणः ॥ २२
भेरीशब्दाश्च तुमुला विमिश्राः शङ्खनिस्वनैः ।
क्ष्वेडितास्फोटितोत्क्रुष्टैः सुभीमाः सर्वतोदिशम् ॥२३
ततः शूराः समासाद्य समरे ते परस्परम् ।
नेत्रैरनिमिषै राजन्नवैक्षन्त प्रकोपिताः ॥ २४
मनोभिस्ते मनुष्येन्द्र पूर्वं योधाः परस्परम् ।
युद्धाय समवर्तन्त समाहूयेतरेतरम् ॥ २५
ततः प्रववृते युद्धं घोररूपं भयावहम् ।
तावकानां परेषां च निघ्नतामितरेतरम् ॥ २६
नाराचा निशिताः संख्ये संपतन्ति स्म भारत ।
व्यात्तानना भयकरा उरगा इव संघशः ॥ २७
निष्पेतुर्विमलाः शक्त्यस्तैलधौताः सुतेजनाः ।
अम्बुदेभ्यो यथा राजन्भ्राजमानाः शतह्रदाः ॥२८
गदाश्च विमलैः पट्टैः पिनद्धाः स्वर्णभूषिताः ।
पतन्त्यस्तत्र दृश्यन्ते गिरिशृङ्गोपमाः शुभाः ।
निस्त्रिंशाश्च व्यराजन्त विमलाम्बरसंनिभाः ॥ २९
आर्षभाणि च चर्माणि शतचन्द्राणि भारत ।
अशोभन्त रणे राजन्पतमानानि सर्वशः ॥ ३०
तेऽन्योन्यं समरे सेने युध्यमाने नराधिप ।
अशोभेतां यथा दैत्यदेवसेने समुद्यते ।
अभ्यद्रवन्त समरे तेऽन्योन्यं वै समन्ततः ॥ ३१
रथास्तु रथिभिस्तूर्णं प्रेषिताः परमाहवे ।
युगैर्युगानि संश्लिष्य युयुधुः पार्थिवर्षभाः ॥ ३२
दन्तिनां युध्यमानानां संघर्षात्पावकोऽभवत् ।
दन्तेषु भरतश्रेष्ठ सधूमः सर्वतोदिशम् ॥ ३३
प्रासैरभिहताः केचिद्गजयोधाः समन्ततः ।

पतमानाः स्म दृश्यन्ते गिरिशृङ्गान्नगा इव ॥ ३४
पादाताश्चाप्यदृश्यन्त निघ्नन्तो हि परस्परम् ।
चित्ररूपधराः शूरा नखरप्रासयोधिनः ॥ ३५
अन्योन्यं ते समासाद्य कुरुपाण्डवसैनिकाः ।
शस्त्रैर्नानाविधैर्घोरै रणे निन्युर्यमक्षयम् ॥ ३६
ततः शांतनवो भीष्मो रथघोषेण नादयन् ।
अभ्यागमद्रणे पाण्डून्धनुःशब्देन मोहयन् ॥ ३७
पाण्डवानां रथाश्चापि नदन्तो भैरवस्वनम् ।
अभ्यद्रवन्त संयत्ता धृष्टद्युम्नपुरोगमाः ॥ ३८
ततः प्रववृते युद्धं तव तेषां च भारत ।
नराश्वरथनागानां व्यतिषक्तं परस्परम् ॥ ३९

इति श्रीमहाभारते भीष्मपर्वणि
त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

८४

संजय उवाच ।

भीष्मं तु समरे क्रुद्धं प्रतपन्तं समन्ततः ।
न शेकुः पाण्डवा द्रष्टुं तपन्तमिव भास्करम् ॥ १
ततः सर्वाणि सैन्यानि धर्मपुत्रस्य शासनात् ।
अभ्यद्रवन्त गाङ्गेयं मर्दयन्तं शितैः शरैः ॥ २
स तु भीष्मो रणश्लाघी सोमकान्सहसृञ्जयान् ।
पाञ्चालांश्च महेष्वासान्पातयामास सायकैः ॥ ३
ते वध्यमाना भीष्मेण पाञ्चालाः सोमकैः सह ।
भीष्ममेवाभ्ययुस्तूर्णं त्यक्त्वा मृत्युकृतं भयम् ॥ ४
स तेषां रथिनां वीरो भीष्मः शांतनवो युधि ।
चिच्छेद सहसा राजन्बाहूनथ शिरांसि च ॥ ५
विरथान्रथिनश्चक्रे पिता देवव्रतस्तव ।
पतितान्युत्तमाङ्गानि हयेभ्यो हयसादिनाम् ॥ ६
निर्मनुष्यांश्च मातङ्गाञ्शयानान्पर्वतोपमान् ।
अपश्याम महाराज भीष्मास्त्रेण प्रमोहितान् ॥ ७
न तत्रासीत्पुमान्कश्चित्पाण्डवानां विशां पते ।
अन्यत्र रथिनां श्रेष्ठाद्भीमसेनान्महाबलात् ॥ ८
स हि भीष्मं समासाद्य ताडयामास संयुगे ।
ततो निष्टानको घोरो भीष्मभीमसमागमे ॥ ९
बभूव सर्वसैन्यानां घोररूपो भयानकः ।
तथैव पाण्डवा हृष्टाः सिंहनादमथानदन् ॥ १०
ततो दुर्योधनो राजा सोदर्यैः परिवारितः ।
भीष्मं जुगोप समरे वर्तमाने जनक्षये ॥ ११
भीमस्तु सारथिं हत्वा भीष्मस्य रथिनां वरः ।
विद्रुताश्वे रथे तस्मिन्द्रवमाणे समन्ततः ।
सुनाभस्य शरेणाशु शिरश्चिच्छेद चारिहा ॥ १२
क्षुरप्रेण सुतीक्ष्णेन न हतो न्यपतद्भुवि ।
हते तस्मिन्महाराज तव पुत्रे महारथे ।
नामृष्यन्त रणे शूराः सोदर्याः सप्त संयुगे ॥ १३
आदित्यकेतुर्बह्वाशी कुण्डधारो महोदरः ।
अपराजितः पण्डितको विशालाक्षः सुदुर्जयः ॥१४
पाण्डवं चित्रसंनाहा विचित्रकवचध्वजाः ।
अभ्यद्रवन्त संग्रामे योद्धुकामारिमर्दनाः ॥ १५
महोदरस्तु समरे भीमं विव्याध पत्रिभिः ।
नवभिर्वज्रसंकाशैर्नमुचिं वृत्रहा यथा ॥ १६
आदित्यकेतुः सप्तत्या बह्वाशी चापि पञ्चभिः ।
नवत्या कुण्डधारस्तु विशालाक्षश्च सप्तभिः ॥ १७
अपराजितो महाराज पराजिष्णुर्महारथः ।
शरैर्बहुभिरानर्छद्भीमसेनं महाबलम् ॥ १८
रणे पण्डितकश्चैनं त्रिभिर्बाणैः समर्दयत् ।
स तन्न ममृषे भीमः शत्रुभिर्वधमाहवे ॥ १९
धनुः प्रपीड्य वामेन करेणामित्रकर्शनः ।
शिरश्चिच्छेद समरे शरेण नतपर्वणा ॥ २०
अपराजितस्य सुनसं तव पुत्रस्य संयुगे ।
पराजितस्य भीमेन निपपात शिरो महीम् ॥ २१
अथापरेण भल्लेन कुण्डधारं महारथम् ।

प्राहिणोन्मृत्युलोकाय सर्वलोकस्य पश्यतः ॥ २२
ततः पुनरमेयात्मा प्रसंधाय शिलीमुखम् ।
प्रेषयामास समरे पण्डितं प्रति भारत ॥ २३
स शरः पण्डितं हत्वा विवेश धरणीतलम् ।
यथा नरं निहत्याशु भुजगः कालचोदितः २४
विशालाक्षशिरश्छित्त्वा पातयामास भूतले ।
त्रिभिः शरैरदीनात्मा स्मरन्क्लेशं पुरातनम् ॥ २५
महोदरं महेष्वासं नाराचेन स्तनान्तरे ।
विव्याध समरे राजन्स हतो न्यपतद्भुवि ॥ २६
आदित्यकेतोः केतुं च छित्त्वा बाणेन संयुगे ।
भल्लेन भृशतीक्ष्णेन शिरश्चिच्छेद चारिहा ॥ २७
बह्वाशिनं ततो भीमः शरेण नतपर्वणा ।
प्रेषयामास संक्रुद्धो यमस्य सदनं प्रति ॥ २८
प्रदुद्रुवुस्ततस्तेऽन्ये पुत्रास्तव विशां पते ।
मन्यमाना हि तत्सत्यं सभायां तस्य भाषितम् ॥२९
ततो दुर्योधनो राजा भ्रातृव्यसनकर्शितः ।
अब्रवीत्तावकान्योधान्भीमोऽयं युधि वध्यताम् ॥३०
एवमेते महेष्वासाः पुत्रास्तव विशां पते ।
भ्रातॄन्संदृश्य निहतान्प्रास्मरंस्ते हि तद्वचः ॥ ३१
यदुक्तवान्महाप्राज्ञः क्षत्ता हितमनामयम् ।
तदिदं समनुप्राप्तं वचनं दिव्यदर्शिनः ॥ ३२
लोभमोहसमाविष्टः पुत्रप्रीत्या जनाधिप ।
न बुध्यसे पुरा यत्तत्तथ्यमुक्तं वचो महत् ॥ ३३
तथैव हि वधार्थाय पुत्राणां पाण्डवो बली ।
नूनं जातो महाबाहुर्यथा हन्ति स्म कौरवान् ॥३४
ततो दुर्योधनो राजा भीष्ममासाद्य मारिष ।
दुःखेन महताविष्टो विललापातिकर्शितः ॥ ३५
निहता भ्रातरः शूरा भीमसेनेन मे युधि ।
यतमानास्तथान्येऽपि हन्यन्ते सर्वसैनिकाः ॥ ३६
भवांश्च मध्यस्थतया नित्यमस्मानुपेक्षते ।
सोऽहं कापथमारूढः पश्य दैवमिदं मम ॥ ३७
एतच्छ्रुत्वा वचः क्रूरं पिता देवव्रतस्तव ।
दुर्योधनमिदं वाक्यमब्रवीत्साश्रुलोचनम् ॥ ३८
उक्तमेतन्मया पूर्वं द्रोणेन विदुरेण च ।
गान्धार्या च यशस्विन्या तत्त्वं तात न बुद्धवान् ॥
समयश्च मया पूर्वं कृतो वः शत्रुकर्शन ।
नाहं युधि विमोक्तव्यो नाप्याचार्यः कथंचन ॥ ४०
यं यं हि धार्तराष्ट्राणां भीमो द्रक्ष्यति संयुगे ।
हनिष्यति रणे तं तं सत्यमेतद्ब्रवीमि ते ॥ ४१
स त्वं राजन्स्थिरो भूत्वा दृढां कृत्वा रणे मतिम् ।
योधयस्व रणे पार्थान्स्वर्गं कृत्वा परायणम् ॥ ४२
न शक्याः पाण्डवा जेतुं सेन्द्रैरपि सुरासुरैः ।
तस्माद्युद्धे मतिं कृत्वा स्थिरां युध्यस्व भारत ॥४३

इति श्रीमहाभारते भीष्मपर्वणि
चतुरशीतितमोऽध्यायः ॥ ८४ ॥

८५

धृतराष्ट्र उवाच ।

दृष्ट्वा मम हतान्पुत्रान्बहूनेकेन संजय ।
भीष्मो द्रोणः कृपश्चैव किमकुर्वत संयुगे ॥ १
अहन्यहनि मे पुत्राः क्षयं गच्छन्ति संजय ।
मन्येऽहं सर्वथा सूत दैवेनोपहता भृशम् ॥ २
यत्र मे तनयाः सर्वे जीयन्ते न जयन्त्युत ।
यत्र भीष्मस्य द्रोणस्य कृपस्य च महात्मनः ॥ ३
सौमदत्तेश्च वीरस्य भगदत्तस्य चोभयोः ।
अश्वत्थाम्नस्तथा तात शूराणां सुमहात्मनाम् ॥ ४
अन्येषां चैव वीराणां मध्यगास्तनया मम ।
यदहन्यन्त संग्रामे किमन्यद्भागधेयतः ॥ ५
न हि दुर्योधनो मन्दः पुरा प्रोक्तमबुध्यत ।
वार्यमाणो मया तात भीष्मेण विदुरेण च ॥ ६
गान्धार्या चैव दुर्मेधाः सततं हितकाम्यया ।

नावबुध्यत्पुरा मोहात्तस्य प्राप्तमिदं फलम् ॥ ७
यद्भीमसेनः समरे पुत्रान्मम विचेतसः ।
अहन्यहनि संक्रुद्धो नयते यमसादनम् ॥ ८

संजय उवाच ।

इदं तत्समनुप्राप्तं क्षत्तुर्वचनमुत्तमम् ।
न बुद्धवानसि विभो प्रोच्यमानं हितं तदा ॥ ९
निवारय सुतान्द्यूतात्पाण्डवान्मा द्रुहेति च ।
सुहृदां हितकामानां ब्रुवतां तत्तदेव च ॥ १०
न शुश्रूषसि यद्वाक्यं मर्त्यः पथ्यमिवौषधम् ।
तदेव त्वामनुप्राप्तं वचनं साधु भाषितम् ॥ ११
विदुरद्रोणभीष्माणां तथान्येषां हितैषिणाम् ।
अकृत्वा वचनं पथ्यं क्षयं गच्छन्ति कौरवाः ॥१२
तदेतत्समतिक्रान्तं पूर्वमेव विशां पते ।
तस्मान्मे शृणु तत्त्वेन यथा युद्धमवर्तत ॥ १३
मध्याह्ने सुमहारौद्रः संग्रामः समपद्यत ।
लोकक्षयकरो राजंस्तन्मे निगदतः शृणु ॥ १४
ततः सर्वाणि सैन्यानि धर्मपुत्रस्य शासनात् ।
संरब्धान्यभ्यधावन्त भीष्ममेव जिघांसया ॥ १५
धृष्टद्युम्नः शिखण्डी च सात्यकिश्च महारथः ।
युक्तानीका महाराज भीष्ममेव समभ्ययुः ॥ १६
अर्जुनो द्रौपदेयाश्च चेकितानश्च संयुगे ।
दुर्योधनसमादिष्टान्राज्ञः सर्वान्समभ्ययुः ॥ १७
अभिमन्युस्तथा वीरो हैडिम्बश्च महारथः ।
भीमसेनश्च संक्रुद्धस्तेऽभ्यधावन्त कौरवान् ॥ १८
त्रिधाभूतैरवध्यन्त पाण्डवैः कौरवा युधि ।
तथैव कौरवै राजन्नवध्यन्त परे रणे ॥ १९
द्रोणस्तु रथिनां श्रेष्ठः सोमकान्सृञ्जयैः सह ।
अभ्यद्रवत संक्रुद्धः प्रेषयिष्यन्यमक्षयम् ॥ २०
तत्राक्रन्दो महानासीत्सृञ्जयानां महात्मनाम् ।
वध्यतां समरे राजन्भारद्वाजेन धन्विना ॥ २१
द्रोणेन निहतास्तत्र क्षत्रिया बहवो रणे ।
विवेष्टन्तः स्म दृश्यन्ते व्याधिक्लिष्टा नरा इव ॥२२
कूजतां क्रन्दतां चैव स्तनतां चैव संयुगे ।
अनिशं श्रूयते शब्दः क्षुत्कृशानां नृणामिव ॥ २३
तथैव कौरवेयाणां भीमसेनो महाबलः ।
चकार कदनं घोरं क्रुद्धः काल इवापरः ॥ २४
वध्यतां तत्र सैन्यानामन्योन्येन महारणे ।
प्रावर्तत नदी घोरा रुधिरौघप्रवाहिनी ॥ २५
स संग्रामो महाराज घोररूपोऽभवन्महान् ।
कुरूणां पाण्डवानां च यमराष्ट्रविवर्धनः ॥ २६
ततो भीमो रणे क्रुद्धो रभसश्च विशेषतः ।
गजानीकं समासाद्य प्रेषयामास मृत्यवे ॥ २७
तत्र भारत भीमेन नाराचाभिहता गजाः ।
पेतुः सेदुश्च नेदुश्च दिशश्च परिबभ्रमुः ॥ २८
छिन्नहस्ता महानागाश्छिन्नपादाश्च मारिष ।
क्रौञ्चवद्व्यनदन्भीताः पृथिवीमधिशिश्रियरे ॥ २९
नकुलः सहदेवश्च हयानीकमभिद्रुतौ ।
ते हयाः काञ्चनापीडा रुक्मभाण्डपरिच्छदाः ।
वध्यमाना व्यदृश्यन्त शतशोऽथ सहस्रशः ॥ ३०
पतद्भिश्च हयै राजन्समास्तीर्यत मेदिनी ।
निर्जिह्वैश्च श्वसद्भिश्च कूजद्भिश्च गतासुभिः ।
हयैर्बभौ नरश्रेष्ठ नानारूपधरैर्धरा ॥ ३१
अर्जुनेन हतैः संख्ये तथा भारत वाजिभिः ।
प्रबभौ वसुधा घोरा तत्र तत्र विशां पते ॥ ३२
रथैर्भग्नैर्ध्वजैश्छिन्नैश्छत्रैश्च सुमहाप्रभैः ।
हारैर्निष्कैः सकेयूरैः शिरोभिश्च सकुण्डलैः ॥ ३३
उष्णीषैरपविद्धैश्च पताकाभिश्च सर्वशः ।
अनुकर्षैः शुभै राजन्योक्त्रैश्चव्यसुरश्मिभिः ।
संछन्ना वसुधा भाति वसन्ते कुसुमैरिव ॥ ३४
एवमेष क्षयो वृत्तः पाण्डूनामपि भारत ।

क्रुद्धे शांतनवे भीष्मे द्रोणे च रथसत्तमे ॥ ३५
अश्वत्थाम्नि कृपे चैव तथैव कृतवर्मणि ।
तथेतरेषु क्रुद्धेषु तावकानामपि क्षयः ॥ ३६

इति श्रीमहाभारते भीष्मपर्वणि
पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

८६

संजय उवाच ।

वर्तमाने तथा रौद्रे राजन्वीरवरक्षये ।
शकुनिः सौबलः श्रीमान्पाण्डवान्समुपाद्रवत् ॥ १
तथैव सात्वतो राजन्हार्दिक्यः परवीरहा ।
अभ्यद्रवत संग्रामे पाण्डवानामनीकिनीम् ॥ २
ततः काम्बोजमुख्यानां नदीजानां च वाजिनाम् ।
आरट्टानां महीजानां सिन्धुजानां च सर्वशः ॥ ३
वनायुजानां शुभ्राणां तथा पर्वतवासिनाम् ।
ये चापरे तित्तिरजा जवना वातरंहसः ॥ ४
सुवर्णालंकृतैरेतैर्वर्मवद्भिः सुकल्पितैः ।
हयैर्वातजवैर्मुख्यैः पाण्डवस्य सुतो बली ।
अभ्यवर्तत तत्सैन्यं हृष्टरूपः परंतपः ॥ ५
अर्जुनस्याथ दायाद इरावान्नाम वीर्यवान् ।
सुतायां नागराजस्य जातः पार्थेन धीमता ॥ ६
ऐरावतेन सा दत्ता अनपत्या महात्मना ।
पत्यौ हते सुपर्णेन कृपणा दीनचेतना ॥ ७
भार्यार्थं तां च जग्राह पार्थः कामवशानुगाम् ।
एवमेष समुत्पन्नः परक्षेत्रेऽर्जुनात्मजः ॥ ८
स नागलोके संवृद्धो मात्रा च परिरक्षितः ।
पितृव्येण परित्यक्तः पार्थद्वेषाद्दुरात्मना ॥ ९
रूपवान्वीर्यसंपन्नो गुणवान्सत्यविक्रमः ।
इन्द्रलोकं जगामाशु श्रुत्वा तत्रार्जुनं गतम् ॥ १०
सोऽभिगम्य महात्मानं पितरं सत्यविक्रमम् ।
अभ्यवादयदव्यग्रो विनयेन कृताञ्जलिः ।
इरावानस्मि भद्रं ते पुत्रश्चाहं तवाभिभो ॥ ११
मातुः समागमो यश्च तत्सर्वं प्रत्यवेदयत् ।
तच्च सर्वं यथावृत्तमनुसस्मार पाण्डवः ॥ १२
परिष्वज्य सुतं चापि सोऽऽत्मनः सदृशं गुणैः ।
प्रीतिमानभवत्पार्थो देवराजनिवेशने ॥ १३
सोऽर्जुनेन समाज्ञप्तो देवलोके तदा नृप ।
प्रीतिपूर्वं महाबाहुः स्वकार्यं प्रति भारत ।
युद्धकाले त्वयास्माकं साह्यं देयमिति प्रभो ॥ १४
बाढमित्येवमुक्त्वा च युद्धकाल उपागतः ।
कामवर्णजवैरश्वैः संवृतो बहुभिर्नृप ॥ १५
ते हयाः काञ्चनापीडा नानावर्णा मनोजवाः ।
उत्पेतुः सहसा राजन्हंसा इव महोदधौ ॥ १६
ते त्वदीयान्समासाद्य हयसंघान्महाजवान् ।
क्रोडैः क्रोडानभिघ्नन्तो घोणाभिश्च परस्परम् ।
निपेतुः सहसा राजन्सुवेगाभिहता भुवि ॥ १७
निपतद्भिस्तथा तैश्च हयसंघैः परस्परम् ।
शुश्रुवे दारुणः शब्दः सुपर्णपतने यथा ॥ १८
तथैव च महाराज समेत्यान्योन्यमाहवे ।
परस्परवधं घोरं चक्रुस्ते हयसादिनः ॥ १९
तस्मिंस्तथा वर्तमाने संकुले तुमुले भृशम् ।
उभयोरपि संशान्ता हयसंघाः समन्ततः ॥ २०
प्रक्षीणसायकाः शूरा निहताश्वाः श्रमातुराः ।
विलयं समनुप्राप्तास्तक्षमाणाः परस्परम् ॥ २१
ततः क्षीणे हयानीके किंचिच्छेषे च भारत ।
सौबलस्यात्मजाः शूरा निर्गता रणमूर्धनि ॥ २२
वायुवेगसमस्पर्शा जवे वायुसमांस्तथा ।
आरुह्य शीलसंपन्नान्वयःस्थांस्तुरगोत्तमान् ॥ २३
गजो गवाक्षो वृषकश्चर्मवानार्जवः शुकः ।
षडेते बलसंपन्ना निर्ययुर्महतो बलात् ॥ २४
वार्यमाणाः शकुनिना स्वैश्च योधैर्महाबलैः ।

संनद्धा युद्धकुशला रौद्ररूपा महाबलाः ॥ २५
तदनीकं महाबाहो भित्त्वा परमदुर्जयम् ।
बलेन महता युक्ताः स्वर्गाय विजयैषिणः ।
विविशुस्ते तदा हृष्टा गान्धारा युद्धदुर्मदाः ॥ २६
तान्प्रविष्टांस्तदा दृष्ट्वा इरावानपि वीर्यवान् ।
अब्रवीत्समरे योधान्विचित्राभरणायुधान् ॥ २७
यथैते धार्तराष्ट्रस्य योधाः सानुगवाहनाः ।
हन्यन्ते समरे सर्वे तथा नीतिर्विधीयताम् ॥ २८
बाढमित्येवमुक्त्वा ते सर्वे योधा इरावतः ।
जघ्नुस्ते वै परानीकं दुर्जयं समरे परैः ॥ २९
तदनीकमनीकेन समरे वीक्ष्य पातितम् ।
अमृष्यमाणास्ते सर्वे सुबलस्यात्मजा रणे ।
इरावन्तमभिद्रुत्य सर्वतः पर्यवारयन् ॥ ३०
ताडयन्तः शितैः प्रासैश्चोदयन्तः परस्परम् ।
ते शूराः पर्यधावन्त कुर्वन्तो महदाकुलम् ॥ ३१
इरावानथ निर्भिन्नः प्रासैस्तीक्ष्णैर्महात्मभिः ।
स्रवता रुधिरेणाक्तस्तोत्रैर्विद्ध इव द्विपः ॥ ३२
उरस्यपि च पृष्ठे च पार्श्वयोश्च भृशाहतः ।
एको बहुभिरत्यर्थं धैर्याद्राजन्न विव्यथे ॥ ३३
इरावानथ संक्रुद्धः सर्वांस्तान्निशितैः शरैः ।
मोहयामास समरे विद्ध्वा परपुरंजयः ॥ ३४
प्रासानुद्धृत्य सर्वांश्च स्वशरीरादरिंदमः ।
तैरेव ताडयामास सुबलस्यात्मजान्रणे ॥ ३५
निकृष्य निशितं खड्गं गृहीत्वा च शरावरम् ।
पदातिस्तूर्णमागच्छज्जिघांसुः सौबलान्युधि ॥ ३६
ततः प्रत्यागतप्राणाः सर्वे ते सुबलात्मजाः ।
भूयः क्रोधसमाविष्टा इरावन्तमथाद्रवन् ॥ ३७
इरावानपि खड्गेन दर्शयन्पाणिलाघवम् ।
अभ्यवर्तत तान्सर्वान्सौबलान्बलदर्पितः ॥ ३८
लाघवेनाथ चरतः सर्वे ते सुबलात्मजाः ।
अन्तरं नाध्यगच्छन्त चरन्तः शीघ्रगामिनः ॥ ३९
भूमिष्ठमथ तं संख्ये संप्रदृश्य ततः पुनः ।
परिवार्य भृशं सर्वे ग्रहीतुमुपचक्रमुः ॥ ४०
अथाभ्याशगतानां स खड्गेनामित्रकर्शनः ।
उपहस्तावहस्ताभ्यां तेषां गात्राण्यकृन्तत ॥ ४१
आयुधानि च सर्वेषां बाहूनपि च भूषितान् ।
अपतन्त निकृत्ताङ्गा गता भूमिं गतासवः ॥ ४२
वृषकस्तु महाराज बहुधा परिविक्षतः ।
अमुच्यत महारौद्रात्तस्माद्वीरावकर्तनात् ॥ ४३
तान्सर्वान्पतितान्दृष्ट्वा भीतो दुर्योधनस्ततः ।
अभ्यभाषत संक्रुद्धो राक्षसं घोरदर्शनम् ॥ ४४
आर्श्यशृङ्गिं महेष्वासं मायाविनमरिंदमम् ।
वैरिणं भीमसेनस्य पूर्वं बकवधेन वै ॥ ४५
पश्य वीर यथा ह्येष फल्गुनस्य सुतो बली ।
मायावी विप्रियं घोरमकार्षीन्मे बलक्षयम् ॥ ४६
त्वं च कामगमस्तात मायास्त्रे च विशारदः ।
कृतवैरश्च पार्थेन तस्मादेनं रणे जहि ॥ ४७
बाढमित्येवमुक्त्वा तु राक्षसो घोरदर्शनः ।
प्रययौ सिंहनादेन यत्रार्जुनसुतो युवा ॥ ४८
स्वारूढैर्युद्धकुशलैर्विमलप्रासयोधिभिः ।
वीरैः प्रहारिभिर्युक्तः स्वैरनीकैः समावृतः ।
निहन्तुकामः समरे इरावन्तं महाबलम् ॥ ४९
इरावानपि संक्रुद्धस्त्वरमाणः पराक्रमी ।
हन्तुकाममित्रघ्नो राक्षसं प्रत्यवारयत् ॥ ५०
समापतन्तं संप्रेक्ष्य राक्षसः सुमहाबलः ।
त्वरमाणस्ततो मायां प्रयोक्तुमुपचक्रमे ॥ ५१
तेन मायामयाः क्लृप्ता हयास्तावन्त एव हि ।
स्वारूढा राक्षसैर्घोरैः शूलपट्टिशपाणिभिः ॥ ५२
ते संरब्धाः समागम्य द्विसाहस्राः प्रहारिणः ।
अचिराद्गमयामासुः प्रेतलोकं परस्परम् ॥ ५३

तस्मिंस्तु निहते सैन्ये तावुभौ युद्धदुर्मदौ ।
संग्रामे व्यवतिष्ठेतां यथा वै वृत्रवासवौ ॥ ५४
आद्रवन्तमभिप्रेक्ष्य राक्षसं युद्धदुर्मदम् ।
इरावान्क्रोधसंरब्धः प्रत्यधावन्महाबलः ॥ ५५
समभ्याशगतस्याजौ तस्य खड्गेन दुर्मतेः ।
चिच्छेद कार्मुकं दीप्तं शरावापं च पञ्चकम् ॥ ५६
स निकृत्तं धनुर्दृष्ट्वा खं जवेन समाविशत् ।
इरावन्तमभिक्रुद्धं मोहयन्निव मायया ॥ ५७
ततोऽन्तरिक्षमुत्पत्य इरावानपि राक्षसम् ।
विमोहयित्वा मायाभिस्तस्य गात्राणि सायकैः ।
चिच्छेद सर्वमर्मज्ञः कामरूपो दुरासदः ॥ ५८
तथा स राक्षसश्रेष्ठः शरैः कृत्तः पुनः पुनः ।
संबभूव महाराज समवाप च यौवनम् ॥ ५९
माया हि सहजा तेषां वयो रूपं च कामजम् ।
एवं तद्राक्षसस्याङ्गं छिन्नं छिन्नं व्यरोहत ॥ ६०
इरावानपि संक्रुद्धो राक्षसं तं महाबलम् ।
परश्वधेन तीक्ष्णेन चिच्छेद च पुनः पुनः ॥ ६१
स तेन बलिना वीरश्छिद्यमान इव द्रुमः ।
राक्षसो व्यनदद्घोरं स शब्दस्तुमुलोऽभवत् ॥ ६२
परश्वधक्षतं रक्षः सुस्राव रुधिरं बहु ।
ततश्चुक्रोध बलवांश्चक्रे वेगं च संयुगे ॥ ६३
आर्श्यशृङ्गिस्ततो दृष्ट्वा समरे शत्रुमूर्जितम् ।
कृत्वा घोरं महद्रूपं ग्रहीतुमुपचक्रमे ।
संग्रामशिरसो मध्ये सर्वेषां तत्र पश्यताम् ॥ ६४
तां दृष्ट्वा तादृशीं मायां राक्षसस्य महात्मनः ।
इरावानपि संक्रुद्धो मायां स्रष्टुं प्रचक्रमे ॥ ६५
तस्य क्रोधाभिभूतस्य संयुगेष्वनिवर्तिनः ।
योऽन्वयो मातृकस्तस्य स एनमभिपेदिवान् ॥ ६६
स नागैर्बहुशो राजन्सर्वतः संवृतो रणे ।
दधार सुमहद्रूपमनन्त इव भोगवान् ।
ततो बहुविधैर्नागैश्छादयामास राक्षसम् ॥ ६७
छाद्यमानस्तु नागैः स ध्यात्वा राक्षसपुंगवः ।
सौपर्णं रूपमास्थाय भक्षयामास पन्नगान् ॥ ६८
मायया भक्षिते तस्मिन्नन्वये तस्य मातृके ।
विमोहितमिरावन्तमसिना राक्षसोऽवधीत् ॥ ६९
सकुण्डलं समुकुटं पद्मेन्दुसदृशप्रभम् ।
इरावतः शिरो रक्षः पातयामास भूतले ॥ ७०
तस्मिंस्तु निहते वीरे राक्षसेनार्जुनात्मजे ।
विशोकाः समपद्यन्त धार्तराष्ट्राः सराजकाः ॥ ७१
तस्मिन्महति संग्रामे तादृशे भैरवे पुनः ।
महान्व्यतिकरो घोरः सेनयोः समपद्यत ॥ ७२
हया गजाः पदाताश्च विमिश्रा दन्तिभिर्हताः ।
रथाश्च दन्तिनश्चैव पत्तिभिस्तत्र सूदिताः ॥ ७३
तथा पत्तिरथौघाश्च हयाश्च बहवो रणे ।
रथिभिर्निहता राजंस्तव तेषां च संकुले ॥ ७४
अजानन्नर्जुनश्चापि निहतं पुत्रमौरसम् ।
जघान समरे शूरान्राज्ञस्तान्भीष्मरक्षिणः ॥ ७५
तथैव तावका राजन्सृञ्जयाश्च महाबलाः ।
जुह्वतः समरे प्राणान्निजघ्नुरितरेतरम् ॥ ७६
मुक्तकेशा विकवचा विरथाश्छिन्नकार्मुकाः ।
बाहुभिः समयुध्यन्त समवेताः परस्परम् ॥ ७७
तथा मर्मातिगैर्भीष्मो निजघान महारथान् ।
कम्पयन्समरे सेनां पाण्डवानां महाबलः ॥ ७८
तेन यौधिष्ठिरे सैन्ये बहवो मानवा हताः ।
दन्तिनः सादिनश्चैव रथिनोऽथ हयास्तथा ॥ ७९
तत्र भारत भीष्मस्य रणे दृष्ट्वा पराक्रमम् ।
अत्यद्भुतमपश्याम शक्रस्येव पराक्रमम् ॥ ८०
तथैव भीमसेनस्य पार्षतस्य च भारत ।
रौद्रमासीत्तदा युद्धं सात्वतस्य च धन्विनः ॥ ८१
दृष्ट्वा द्रोणस्य विक्रान्तं पाण्डवान्भयमाविशत् ।

एक एव रणे शक्तो हन्तुमस्मान्ससैनिकान् ॥ ८२
किं पुनः पृथिवीशूरैर्योधव्रातैः समावृतः ।
इत्यब्रुवन्महाराज रणे द्रोणेन पीडिताः ॥ ८३
वर्तमाने तथा रौद्रे संग्रामे भरतर्षभ ।
उभयोः सेनयोः शूरा नामृष्यन्त परस्परम् ॥ ८४
आविष्टा इव युध्यन्ते रक्षोभूता महाबलाः ।
तावकाः पाण्डवेयाश्च संरब्धास्तात धन्विनः ॥८५
न स्म पश्यामहे कंचिद्यः प्राणान्परिरक्षति ।
संग्रामे दैत्यसंकाशे तस्मिन्योद्धा नराधिप ॥ ८६

इति श्रीमहाभारते भीष्मपर्वणि
षडशीतितमोऽध्यायः ॥ ८६ ॥

८७

धृतराष्ट्र उवाच ।

इरावन्तं तु निहतं दृष्ट्वा पार्था महारथाः ।
संग्रामे किमकुर्वन्त तन्ममाचक्ष्व संजय ॥ १

संजय उवाच ।

इरावन्तं तु निहतं संग्रामे वीक्ष्य राक्षसः ।
व्यनदत्सुमहानादं भैमसेनिर्घटोत्कचः ॥ २
नदतस्तस्य शब्देन पृथिवी सागराम्बरा ।
सपर्वतवना राजंश्चचाल सुभृशं तदा ।
अन्तरिक्षं दिशश्चैव सर्वाश्च प्रदिशस्तथा ॥ ३
तं श्रुत्वा सुमहानादं तव सैन्यस्य भारत ।
ऊरुस्तम्भः समभवद्वेपथुः स्वेद एव च ॥ ४
सर्व एव च राजेन्द्र तावका दीनचेतसः ।
सर्पवत्समवेष्टन्त सिंहभीता गजा इव ॥ ५
निनदत्सुमहानादं निर्घातमिव राक्षसः ।
ज्वलितं शूलमुद्यम्य रूपं कृत्वा विभीषणम् ॥ ६
नानाप्रहरणैर्घोरैर्वृतो राक्षसपुंगवैः ।
आजगाम सुसंक्रुद्धः कालान्तकयमोपमः ॥ ७
तमापतन्तं संप्रेक्ष्य संक्रुद्धं भीमदर्शनम् ।
स्वबलं च भयात्तस्य प्रायशो विमुखीकृतम् ॥ ८
ततो दुर्योधनो राजा घटोत्कचमुपाद्रवत् ।
प्रगृह्य विपुलं चापं सिंहवद्विनदन्मुहुः ॥ ९
पृष्ठतोऽनुययौ चैनं स्रवद्भिः पर्वतोपमैः ।
कुञ्जरैर्दशसाहस्रैर्वङ्गानामधिपः स्वयम् ॥ १०
तमापतन्तं संप्रेक्ष्य गजानीकेन संवृतम् ।
पुत्रं तव महाराज चुकोप स निशाचरः ॥ ११
ततः प्रववृते युद्धं तुमुलं लोमहर्षणम् ।
राक्षसानां च राजेन्द्र दुर्योधनबलस्य च ॥ १२
गजानीकं च संप्रेक्ष्य मेघवृन्दमिवोद्यतम् ।
अभ्यधावन्त संक्रुद्धा राक्षसाः शस्त्रपाणयः ॥ १३
नदन्तो विविधान्नादान्मेघा इव सविद्युतः ।
शरशक्त्यृष्टिनाराचैर्निघ्नन्तो गजयोधिनः ॥ १४
भिण्डिपालैस्तथा शूलैर्मुद्गरैः सपरश्वधैः ।
पर्वताग्रैश्च वृक्षैश्च निजघ्नुस्ते महागजान् ॥ १५
भिन्नकुम्भान्विरुधिरान्भिन्नगात्रांश्च वारणान् ।
अपश्याम महाराज वध्यमानान्निशाचरैः ॥ १६
तेषु प्रक्षीयमाणेषु भग्नेषु गजयोधिषु ।
दुर्योधनो महाराज राक्षसान्समुपाद्रवत् ॥ १७
अमर्षवशमापन्नस्त्यक्त्वा जीवितमात्मनः ।
मुमोच निशितान्बाणान्राक्षसेषु महाबलः ॥ १८
जघान च महेष्वासः प्रधानांस्तत्र राक्षसान् ।
संक्रुद्धो भरतश्रेष्ठ पुत्रो दुर्योधनस्तव ॥ १९
वेगवन्तं महारौद्रं विद्युज्जिह्वं प्रमाथिनम् ।
शरैश्चतुर्भिश्चतुरो निजघान महारथः ॥ २०
ततः पुनरमेयात्मा शरवर्षं दुरासदम् ।
मुमोच भरतश्रेष्ठ निशाचरबलं प्रति ॥ २१
तत्तु दृष्ट्वा महत्कर्म पुत्रस्य तव मारिष ।
क्रोधेनाभिप्रजज्वाल भैमसेनिर्महाबलः ॥ २२
विस्फार्य च महच्चापमिन्द्राशनिसमस्वनम् ।

अभिदुद्राव वेगेन दुर्योधनमरिंदमम् ॥ २३
तमापतन्तमुद्वीक्ष्य कालसृष्टमिवान्तकम् ।
न विव्यथे महाराज पुत्रो दुर्योधनस्तव ॥ २४
अथैनमब्रवीत्क्रुद्धः क्रूरः संरक्तलोचनः ।
ये त्वया सुनृशंसेन दीर्घकालं प्रवासिताः ।
यच्च ते पाण्डवा राजंश्छलद्यूते पराजिताः ॥ २५
यच्चैव द्रौपदी कृष्णा एकवस्त्रा रजस्वला ।
सभामानीय दुर्बुद्धे बहुधा क्लेशिता त्वया ॥ २६
तव च प्रियकामेन आश्रमस्था दुरात्मना ।
सैन्धवेन परिक्लिष्टा परिभूय पितॄन्मम ॥ २७
एतेषामवमानानामन्येषां च कुलाधम ।
अन्तमद्य गमिष्यामि यदि नोत्सृजसे रणम् ॥ २८
एवमुक्त्वा तु हैडिम्बो महद्विस्फार्य कार्मुकम् ।
संदश्य दशनैरोष्ठं सृक्किणी परिसंलिहन् ॥ २९
शरवर्षेण महता दुर्योधनमवाकिरत् ।
पर्वतं वारिधाराभिः प्रावृषीव बलाहकः ॥ ३०

इति श्रीमहाभारते भीष्मपर्वणि
सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

८८

संजय उवाच ।

ततस्तद्बाणवर्षं तु दुःसहं दानवैरपि ।
दधार युधि राजेन्द्रो यथा वर्षं महाद्विपः ॥ १
ततः क्रोधसमाविष्टो निःश्वसन्निव पन्नगः ।
संशयं परमं प्राप्तः पुत्रस्ते भरतर्षभ ॥ २
मुमोच निशितांस्तीक्ष्णान्नाराचान्पञ्चविंशतिम् ।
तेऽपतन्सहसा राजंस्तस्मिन्राक्षसपुंगवे ।
आशीविषा इव क्रुद्धाः पर्वते गन्धमादने ॥ ३
स तैर्विद्धः स्रवन्रक्तं प्रभिन्न इव कुञ्जरः ।
दध्रे मतिं विनाशाय राज्ञः स पिशिताशनः ।
जग्राह च महाशक्तिं गिरीणामपि दारणीम् ॥ ४
संप्रदीप्तां महोल्काभामशनीं मघवानिव ।
समुद्यच्छन्महाबाहुर्जिघांसुस्तनयं तव ॥ ५
तामुद्यतामभिप्रेक्ष्य वङ्गानामधिपस्त्वरन् ।
कुञ्जरं गिरिसंकाशं राक्षसं प्रत्यचोदयत् ॥ ६
स नागप्रवरेणाजौ बलिना शीघ्रगामिना ।
यतो दुर्योधनरथस्तं मार्गं प्रत्यपद्यत ।
रथं च वारयामास कुञ्जरेण सुतस्य ते ॥ ७
मार्गमावारितं दृष्ट्वा राज्ञा वङ्गेन धीमता ।
घटोत्कचो महाराज क्रोधसंरक्तलोचनः ।
उद्यतां तां महाशक्तिं तस्मिंश्चिक्षेप वारणे ॥ ८
स तयाभिहतो राजंस्तेन बाहुविमुक्तया ।
संजातरुधिरोत्पीडः पपात च ममार च ॥ ९
पतत्यथ गजे चापि वङ्गानामीश्वरो बली ।
जवेन समभिद्रुत्य जगाम धरणीतलम् ॥ १०
दुर्योधनोऽपि संप्रेक्ष्य पातितं वरवारणम् ।
प्रभग्नं च बलं दृष्ट्वा जगाम परमां व्यथाम् ॥ ११
क्षत्रधर्मं पुरस्कृत्य आत्मनश्चाभिमानिताम् ।
प्राप्तेऽपक्रमणे राजा तस्थौ गिरिरिवाचलः ॥ १२
संधाय च शितं बाणं कालाग्निसमतेजसम् ।
मुमोच परमक्रुद्धस्तस्मिन्घोरे निशाचरे ॥ १३
तमापतन्तं संप्रेक्ष्य बाणमिन्द्राशनिप्रभम् ।
लाघवाद्वञ्चयामास महाकायो घटोत्कचः ॥ १४
भूय एव ननादोग्रः क्रोधसंरक्तलोचनः ।
त्रासयन्सर्वभूतानि युगान्ते जलदो यथा ॥ १५
तं श्रुत्वा निनदं घोरं तस्य भीमस्य रक्षसः ।
आचार्यमुपसंगम्य भीष्मः शांतनवोऽब्रवीत् ॥ १६
यथैष निनदो घोरः श्रूयते राक्षसेरितः ।
हैडिम्बो युध्यते नूनं राज्ञा दुर्योधनेन ह ॥ १७
नैष शक्यो हि संग्रामे जेतुं भूतेन केनचित् ।
तत्र गच्छत भद्रं वो राजानं परिरक्षत ॥ १८

अभिद्रुतं महाभागं राक्षसेन दुरात्मना ।
एतद्धि परमं कृत्यं सर्वेषां नः परंतपाः ॥ १९
पितामहवचः श्रुत्वा त्वरमाणा महारथाः ।
उत्तमं जवमास्थाय प्रययुर्यत्र कौरवः ॥ २०
द्रोणश्च सोमदत्तश्च बाह्लिकश्च जयद्रथः ।
कृपो भूरिश्रवाः शल्यश्चित्रसेनो विविंशतिः ॥ २१
अश्वत्थामा विकर्णश्च आवन्त्यश्च बृहद्बलः ।
रथाश्चानेकसाहस्रा ये तेषामनुयायिनः ।
अभिद्रुतं परीप्सन्तः पुत्रं दुर्योधनं तव ॥ २२
तदनीकमनाधृष्यं पालितं लोकसत्तमैः ।
आततायिनमायान्तं प्रेक्ष्य राक्षससत्तमः ।
नाकम्पत महाबाहुर्मैनाक इव पर्वतः ॥ २३
प्रगृह्य विपुलं चापं ज्ञातिभिः परिवारितः ।
शूलमुद्गरहस्तैश्च नानाप्रहरणैरपि ॥ २४
ततः समभवद्युद्धं तुमुलं लोमहर्षणम् ।
राक्षसानां च मुख्यस्य दुर्योधनबलस्य च ॥ २५
धनुषां कूजतां शब्दः सर्वतस्तुमुलोऽभवत् ।
अश्रूयत महाराज वंशानां दह्यतामिव ॥ २६
शस्त्राणां पात्यमानानां कवचेषु शरीरिणाम् ।
शब्दः समभवद्राजन्नद्रीणामिव दीर्यताम् ॥ २७
वीरबाहुविसृष्टानां तोमराणां विशां पते ।
रूपमासीद्वियत्स्थानां सर्पाणां सर्पतामिव ॥ २८
ततः परमसंक्रुद्धो विस्फार्य सुमहद्धनुः ।
राक्षसेन्द्रो महाबाहुर्विनदन्भैरवं रवम् ॥ २९
आचार्यस्यार्धचन्द्रेण क्रुद्धश्चिच्छेद कार्मुकम् ।
सोमदत्तस्य भल्लेन ध्वजमुन्मथ्य चानदत् ॥ ३०
बाह्लिकं च त्रिभिर्बाणैरभ्यविध्यत्स्तनान्तरे ।
कृपमेकेन विव्याध चित्रसेनं त्रिभिः शरैः ॥ ३१
पूर्णायतविसृष्टेन सम्यक्प्रणिहितेन च ।
जत्रुदेशे समासाद्य विकर्णं समताडयत् ।
न्यषीदत्स रथोपस्थे शोणितेन परिप्लुतः ॥ ३२
ततः पुनरमेयात्मा नाराचान्दश पञ्च च ।
भूरिश्रवसि संक्रुद्धः प्राहिणोद्भरतर्षभ ।
ते वर्म भित्त्वा तस्याशु प्राविशन्मेदिनीतलम् ॥ ३३
विविंशतेश्च द्रौणेश्च यन्तारौ समताडयत् ।
तौ पेततू रथोपस्थे रश्मीनुत्सृज्य वाजिनाम् ॥ ३४
सिन्धुराज्ञोऽर्धचन्द्रेण वाराहं स्वर्णभूषितम् ।
उन्ममाथ महाराज द्वितीयेनाच्छिनद्धनुः ॥ ३५
चतुर्भिरथ नाराचैरावन्त्यस्य महात्मनः ।
जघान चतुरो वाहान्क्रोधसंरक्तलोचनः ॥ ३६
पूर्णायतविसृष्टेन पीतेन निशितेन च ।
निर्बिभेद महाराज राजपुत्रं बृहद्बलम् ।
स गाढविद्धो व्यथितो रथोपस्थ उपाविशत् ॥ ३७
भृशं क्रोधेन चाविष्टो रथस्थो राक्षसाधिपः ।
चिक्षेप निशितांस्तीक्ष्णाञ्शरानाशीविषोपमान् ।
बिभिदुस्ते महाराज शल्यं युद्धविशारदम् ॥ ३८

इति श्रीमहाभारते भीष्मपर्वणि
अष्टाशीतितमोऽध्यायः ॥ ८८ ॥

८९

संजय उवाच ।

विमुखीकृत्य तान्सर्वांस्तावकान्युधि राक्षसः ।
जिघांसुर्भरतश्रेष्ठ दुर्योधनमुपाद्रवत् ॥ १
तमापतन्तं संप्रेक्ष्य राजानं प्रति वेगितम् ।
अभ्यधावञ्जिघांसन्तस्तावका युद्धदुर्मदाः ॥ २
तालमात्राणि चापानि विकर्षन्तो महाबलाः ।
तमेकमभ्यधावन्त नदन्तः सिंहसंघवत् ॥ ३
अथैनं शरवर्षेण समन्तात्पर्यवारयन् ।
पर्वतं वारिधाराभिः शरदीव बलाहकाः ॥ ४
स गाढविद्धो व्यथितस्तोत्रार्दित इव द्विपः ।
उत्पपात तदाकाशं समन्ताद्वैनतेयवत् ॥ ५

व्यनदत्सुमहानादं जीमूत इव शारदः ।
दिशः खं प्रदिशश्चैव नादयन्भैरवस्वनः ॥ ६
राक्षसस्य तु तं शब्दं श्रुत्वा राजा युधिष्ठिरः ।
उवाच भरतश्रेष्ठो भीमसेनमिदं वचः ॥ ७
युध्यते राक्षसो नूनं धार्तराष्ट्रैर्महारथैः ।
यथास्य श्रूयते शब्दो नदतो भैरवं स्वनम् ।
अतिभारं च पश्यामि तत्र तात समाहितम् ॥ ८
पितामहश्च संक्रुद्धः पाञ्चालान्हन्तुमुद्यतः ।
तेषां च रक्षणार्थाय युध्यते फल्गुनः परैः ॥ ९
एतच्छ्रुत्वा महाबाहो कार्यद्वयमुपस्थितम् ।
गच्छ रक्षस्व हैडिम्बं संशयं परमं गतम् ॥ १०
भ्रातुर्वचनमाज्ञाय त्वरमाणो वृकोदरः ।
प्रययौ सिंहनादेन त्रासयन्सर्वपार्थिवान् ।
वेगेन महता राजन्पर्वकाले यथोदधिः ॥ ११
तमन्वयात्सत्यधृतिः सौचित्तिर्युद्धदुर्मदः ।
श्रेणिमान्वसुदानश्च पुत्रः काश्यस्य चाभिभूः ॥ १२
अभिमन्युमुखाश्चैव द्रौपदेया महारथाः ।
क्षत्रदेवश्च विक्रान्तः क्षत्रधर्मा तथैव च ॥ १३
अनूपाधिपतिश्चैव नीलः स्वबलमास्थितः ।
महता रथवंशेन हैडिम्बं पर्यवारयन् ॥ १४
कुञ्जरैश्च सदा मत्तैः षट्सहस्रैः प्रहारिभिः ।
अभ्यरक्षन्त सहिता राक्षसेन्द्रं घटोत्कचम् ॥ १५
सिंहनादेन महता नेमिघोषेण चैव हि ।
खुरशब्दनिनादैश्च कम्पयन्तो वसुंधराम् ॥ १६
तेषामापततां श्रुत्वा शब्दं तं तावकं बलम् ।
भीमसेनभयोद्विग्नं विवर्णवदनं तथा ।
परिवृत्तं महाराज परित्यज्य घटोत्कचम् ॥ १७
ततः प्रववृते युद्धं तत्र तत्र महात्मनाम् ।
तावकानां परेषां च संग्रामेष्वनिवर्तिनाम् ॥ १८
नानारूपाणि शस्त्राणि विसृजन्तो महारथाः ।
अन्योन्यमभिधावन्तः संप्रहारं प्रचक्रिरे ।
व्यतिषक्तं महारौद्रं युद्धं भीरुभयावहम् ॥ १९
हया गजैः समाजग्मुः पादाता रथिभिः सह ।
अन्योन्यं समरे राजन्प्रार्थयाना महद्यशः ॥ २०
सहसा चाभवत्तीव्रं संनिपातान्महद्रजः ।
रथाश्वगजपत्तीनां पदनेमिसमुद्धतम् ॥ २१
धूम्रारुणं रजस्तीव्रं रणभूमिं समावृणोत् ।
नैव स्वे न परे राजन्समजानन्परस्परम् ॥ २२
पिता पुत्रं न जानीते पुत्रो वा पितरं तथा ।
निर्मर्यादे तथा भूते वैशसे लोमहर्षणे ॥ २३
शस्त्राणां भरतश्रेष्ठ मनुष्याणां च गर्जताम् ।
सुमहानभवच्छब्दो वंशानामिव दह्यताम् ॥ २४
गजवाजिमनुष्याणां शोणितान्त्रतरङ्गिणी ।
प्रावर्तत नदी तत्र केशशैवलशाद्वला ॥ २५
नराणां चैव कायेभ्यः शिरसां पततां रणे ।
शुश्रुवे सुमहाञ्शब्दः पतताश्मनामिव ॥ २६
विशिरस्कैर्मनुष्यैश्च छिन्नगात्रैश्च वारणैः ।
अश्वैः संभिन्नदेहैश्च संकीर्णाभूद्वसुंधरा ॥ २७
नानाविधानि शस्त्राणि विसृजन्तो महारथाः ।
अन्योन्यमभिधावन्तः संप्रहारं प्रचक्रिरे ॥ २८
हया हयान्समासाद्य प्रेषिता हयसादिभिः ।
समाहत्य रणेऽन्योन्यं निपेतुर्गतजीविताः ॥ २९
नरा नरान्समासाद्य क्रोधरक्तेक्षणा भृशम् ।
उरांस्युरोभिरन्योन्यं समाश्लिष्य निजघ्निरे ॥ ३०
प्रेषिताश्च महामात्रैर्वारणाः परवारणाः ।
अभिघ्नन्ति विषाणाग्रैर्वारणानेव संयुगे ॥ ३१
ते जातरुधिरापीडाः पताकाभिरलंकृताः ।
संसक्ताः प्रत्यदृश्यन्त मेघा इव सविद्युतः ॥ ३२
केचिद्भिन्ना विषाणाग्रैर्भिन्नकुम्भाश्च तोमरैः ।
विनदन्तोऽभ्यधावन्त गर्जन्तो जलदा इव ॥ ३३

केचिद्दन्तैर्द्विधा छिन्नैश्छिन्नगात्रास्तथापरे ।
निपेतुस्तुमुले तस्मिंश्छिन्नपक्षा इवाद्रयः ॥ ३४
पार्श्वैस्तु दारितैरन्ये वारणैर्वरवारणाः ।
मुमुचुः शोणितं भूरि धातूनिव महीधराः ॥ ३५
नाराचाभिहतास्त्वन्ये तथा विद्धाश्च तोमरैः ।
हतारोहा व्यदृश्यन्त विशृङ्गा इव पर्वताः ॥ ३६
केचित्क्रोधसमाविष्टा मदान्धा निरवग्रहाः ।
रथान्हयान्पदातांश्च ममृदुः शतशो रणे ॥ ३७
तथा हया हयारोहैस्ताडिताः प्रासतोमरैः ।
तेन तेनाभ्यवर्तन्त कुर्वन्तो व्याकुला दिशः ॥ ३८
रथिनो रथिभिः सार्धं कुलपुत्रास्तनुत्यजः ।
परां शक्तिं समास्थाय चक्रुः कर्माण्यभीतवत् ॥ ३९
स्वयंवर इवामर्दे प्रजह्रुरितरेतरम् ।
प्रार्थयाना यशो राजन्स्वर्गं वा युद्धशालिनः ॥ ४०
तस्मिंस्तथा वर्तमाने संग्रामे लोमहर्षणे ।
धार्तराष्ट्रं महत्सैन्यं प्रायशो विमुखीकृतम् ॥ ४१

इति श्रीमहाभारते भीष्मपर्वणि
एकोननवतितमोऽध्यायः ॥ ८९ ॥

९०

संजय उवाच ।

स्वसैन्यं निहतं दृष्ट्वा राजा दुर्योधनः स्वयम् ।
अभ्यधावत संक्रुद्धो भीमसेनमरिंदमम् ॥ १
प्रगृह्य सुमहच्चापमिन्द्राशनिसमस्वनम् ।
महता शरवर्षेण पाण्डवं समवाकिरत् ॥ २
अर्धचन्द्रं च संधाय सुतीक्ष्णं लोमवाहिनम् ।
भीमसेनस्य चिच्छेद चापं क्रोधसमन्वितः ॥ ३
तदन्तरं च संप्रेक्ष्य त्वरमाणो महारथः ।
संदधे निशितं बाणं गिरीणामपि दारणम् ।
तेनोरसि महाबाहुर्भीमसेनमताडयत् ॥ ४
स गाढविद्धो व्यथितः सृक्किणी परिसंलिहन् ।
समाललम्बे तेजस्वी ध्वजं हेमपरिष्कृतम् ॥ ५
तथा विमनसं दृष्ट्वा भीमसेनं घटोत्कचः ।
क्रोधेनाभिप्रजज्वाल दिधक्षन्निव पावकः ॥ ६
अभिमन्युमुखाश्चैव पाण्डवानां महारथाः ।
समभ्यधावन्क्रोशन्तो राजानं जातसंभ्रमाः ॥ ७
संप्रेक्ष्य तानापततः संक्रुद्धाञ्जातसंभ्रमान् ।
भारद्वाजोऽब्रवीद्वाक्यं तावकानां महारथान् ॥ ८
क्षिप्रं गच्छत भद्रं वो राजानं परिरक्षत ।
संशयं परमं प्राप्तं मज्जन्तं व्यसनार्णवे ॥ ९
एते क्रुद्धा महेष्वासाः पाण्डवानां महारथाः ।
भीमसेनं पुरस्कृत्य दुर्योधनमुपद्रुताः ॥ १०
नानाविधानि शस्त्राणि विसृजन्तो जये रताः ।
नदन्तो भैरवान्नादांस्त्रासयन्तश्च भूमिमाम् ॥ ११
तदाचार्यवचः श्रुत्वा सोमदत्तपुरोगमाः ।
तावकाः समवर्तन्त पाण्डवानामनीकिनीम् ॥ १२
कृपो भूरिश्रवाः शल्यो द्रोणपुत्रो विविंशतिः ।
चित्रसेनो विकर्णश्च सैन्धवोऽथ बृहद्बलः ।
आवन्त्यौ च महेष्वासौ कौरवं पर्यवारयन् ॥ १३
ते विंशतिपदं गत्वा संप्रहारं प्रचक्रिरे ।
पाण्डवा धार्तराष्ट्राश्च परस्परजिघांसवः ॥ १४
एवमुक्त्वा महाबाहुर्महद्विस्फार्य कार्मुकम् ।
भारद्वाजस्ततो भीमं षड्विंशत्या समार्पयत् ॥ १५
भूयश्चैनं महाबाहुः शरैः शीघ्रमवाकिरत् ।
पर्वतं वारिधाराभिः शरदीव बलाहकः ॥ १६
तं प्रत्यविध्यद्दशभिर्भीमसेनः शिलीमुखैः ।
त्वरमाणो महेष्वासः सव्ये पार्श्वे महाबलः ॥ १७
स गाढविद्धो व्यथितो वयोवृद्धश्च भारत ।
प्रनष्टसंज्ञः सहसा रथोपस्थ उपाविशत् ॥ १८
गुरुं प्रव्यथितं दृष्ट्वा राजा दुर्योधनः स्वयम् ।
द्रौणायनिश्च संक्रुद्धौ भीमसेनमभिद्रुतौ ॥ १९

तावापतन्तौ संप्रेक्ष्य कालान्तकयमोपमौ ।
भीमसेनो महाबाहुर्गदामादाय सत्वरः ॥ २०
अवप्लुत्य रथात्तूर्णं तस्थौ गिरिरिवाचलः ।
समुद्यम्य गदां गुर्वीं यमदण्डोपमां रणे ॥ २१
तमुद्यतगदं दृष्ट्वा कैलासमिव शृङ्गिणम् ।
कौरवो द्रोणपुत्रश्च सहितावभ्यधावताम् ॥ २२
तावापतन्तौ सहितौ त्वरितौ बलिनां वरौ ।
अभ्यधावत वेगेन त्वरमाणो वृकोदरः ॥ २३
तमापतन्तं संप्रेक्ष्य संक्रुद्धं भीमदर्शनम् ।
समभ्यधावंस्त्वरिताः कौरवाणां महारथाः ॥ २४
भारद्वाजमुखाः सर्वे भीमसेनजिघांसया ।
नानाविधानि शस्त्राणि भीमस्योरस्यपातयन् ।
सहिताः पाण्डवं सर्वे पीडयन्तः समन्ततः ॥ २५
तं दृष्ट्वा संशयं प्राप्तं पीड्यमानं महारथम् ।
अभिमन्युप्रभृतयः पाण्डवानां महारथाः ।
अभ्यधावन्परीप्सन्तः प्राणांस्त्यक्त्वा सुदुस्त्यजान् ॥
अनूपाधिपतिः शूरो भीमस्य दयितः सखा ।
नीलो नीलाम्बुदप्रख्यः संक्रुद्धो द्रौणिमभ्ययात् ।
स्पर्धते हि महेष्वासो नित्यं द्रोणसुतेन यः ॥ २७
स विस्फार्य महच्चापं द्रौणिं विव्याध पत्रिणा ।
यथा शक्रो महाराज पुरा विव्याध दानवम् ॥२८
विप्रचित्तिं दुराधर्षं देवतानां भयंकरम् ।
येन लोकत्रयं क्रोधात्त्रासितं स्वेन तेजसा ॥ २९
तथा नीलेन निर्भिन्नः सुमुखेन पतत्रिणा ।
संजातरुधिरोत्पीडो द्रौणिः क्रोधसमन्वितः ॥ ३०
स विस्फार्य धनुश्चित्रमिन्द्राशनिसमस्वनम् ।
दध्रे नीलविनाशाय मतिं मतिमतां वरः ॥ ३१
ततः संधाय विमलान्भल्लान्कर्मारपायितान् ।
जघान चतुरो वाहान्पातयामास च ध्वजम् ॥ ३२
सप्तमेन च भल्लेन नीलं विव्याध वक्षसि ।
स गाढविद्धो व्यथितो रथोपस्थ उपाविशत् ॥ ३३
मोहितं वीक्ष्य राजानं नीलमभ्रचयोपमम् ।
घटोत्कचोऽपि संक्रुद्धो भ्रातृभिः परिवारितः ॥ ३४
अभिदुद्राव वेगेन द्रौणिमाहवशोभिनम् ।
तथेतरे अभ्यधावन्राक्षसा युद्धदुर्मदाः ॥ ३५
तमापतन्तं संप्रेक्ष्य राक्षसं घोरदर्शनम् ।
अभ्यधावत तेजस्वी भारद्वाजात्मजस्त्वरन् ॥ ३६
निजघान च संक्रुद्धो राक्षसान्भीमदर्शनान् ।
येऽभवन्नग्रतः क्रुद्धा राक्षसस्य पुरःसराः ॥ ३७
विमुखांश्चैव तान्दृष्ट्वा द्रौणिचापच्युतैः शरैः ।
अक्रुध्यत महाकायो भैमसेनिर्घटोत्कचः ॥ ३८
प्रादुश्चक्रे महामायां घोररूपां सुदारुणाम् ।
मोहयन्समरे द्रौणिं मायावी राक्षसाधिपः ॥ ३९
ततस्ते तावकाः सर्वे मायया विमुखीकृताः ।
अन्योन्यं समपश्यन्त निकृत्तान्मेदिनीतले ।
विचेष्टमानान्कृपणाञ्शोणितेन समुक्षितान् ॥ ४०
द्रोणं दुर्योधनं शल्यमश्वत्थामानमेव च ।
प्रायशश्च महेष्वासा ये प्रधानाश्च कौरवाः ॥ ४१
विध्वस्ता रथिनः सर्वे गजाश्च विनिपातिताः ।
हयाश्च सहयारोहा विनिकृत्ताः सहस्रशः ॥ ४२
तद्दृष्ट्वा तावकं सैन्यं विद्रुतं शिबिरं प्रति ।
मम प्राक्रोशतो राजंस्तथा देवव्रतस्य च ॥ ४३
युध्यध्वं मा पलायध्वं मायैषा राक्षसी रणे ।
घटोत्कचप्रयुक्तेति नातिष्ठन्त विमोहिताः ।
नैव ते श्रद्दधुर्भीता वदतोरावयोर्वचः ॥ ४४
तांश्च प्रद्रवतो दृष्ट्वा जयं प्राप्ताश्च पाण्डवाः ।
घटोत्कचेन सहिताः सिंहनादान्प्रचक्रिरे ।
शङ्खदुन्दुभिघोषाश्च समन्तात्सस्वनुर्भृशम् ॥ ४५
एवं तव बलं सर्वं हैडिम्बेन दुरात्मना ।

सूर्यास्तमनवेलायां प्रभग्नं विद्रुतं दिशः ॥ ४६

इति श्रीमहाभारते भीष्मपर्वणि
नवतितमोऽध्यायः ॥ ९० ॥

९१

संजय उवाच ।

तस्मिन्महति संक्रन्दे राजा दुर्योधनस्तदा ।
गाङ्गेयमुपसंगम्य विनयेनाभिवाद्य च ॥ १
तस्य सर्वं यथावृत्तमाख्यातुमुपचक्रमे ।
घटोत्कचस्य विजयमात्मनश्च पराजयम् ॥ २
कथयामास दुर्धर्षो विनिःश्वस्य पुनः पुनः ।
अब्रवीच्च तदा राजन्भीष्मं कुरुपितामहम् ॥ ३
भवन्तं समुपाश्रित्य वासुदेवं यथा परैः ।
पाण्डवैर्विग्रहो घोरः समारब्धो मया प्रभो ॥ ४
एकादश समाख्याता अक्षौहिण्यश्च या मम ।
निदेशे तव तिष्ठन्ति मया सार्धं परंतप ॥ ५
सोऽहं भरतशार्दूल भीमसेनपुरोगमैः ।
घटोत्कचं समाश्रित्य पाण्डवैर्युधि निर्जितः ॥ ६
तन्मे दहति गात्राणि शुष्कवृक्षमिवानलः ।
तदिच्छामि महाभाग त्वत्प्रसादात्परंतप ॥ ७
राक्षसापसदं हन्तुं स्वयमेव पितामह ।
त्वां समाश्रित्य दुर्धर्षं तन्मे कर्तुं त्वमर्हसि ॥ ८
एतच्छ्रुत्वा तु वचनं राज्ञो भरतसत्तम ।
दुर्योधनमिदं वाक्यं भीष्मः शांतनवोऽब्रवीत् ॥ ९
शृणु राजन्मम वचो यत्त्वा वक्ष्यामि कौरव ।
यथा त्वया महाराज वर्तितव्यं परंतप ॥ १०
आत्मा रक्ष्यो रणे तात सर्वावस्थास्वरिंदम ।
धर्मराजेन संग्रामस्त्वया कार्यः सदानघ ॥ ११
अर्जुनेन यमाभ्यां वा भीमसेनेन वा पुनः ।
राजधर्मं पुरस्कृत्य राजा राजानमृच्छति ॥ १२
अहं द्रोणः कृपो द्रौणिः कृतवर्मा च सात्वतः ।
शल्यश्च सौमदत्तिश्च विकर्णश्च महारथः ॥ १३
तव च भ्रातरः शूरा दुःशासनपुरोगमाः ।
त्वदर्थं प्रतियोत्स्यामो राक्षसं तं महाबलम् ॥ १४
तस्मिन्रौद्रे राक्षसेन्द्रे यदि ते हृच्छयो महान् ।
अयं वा गच्छतु रणे तस्य युद्धाय दुर्मतेः ।
भगदत्तो महीपालः पुरंदरसमो युधि ॥ १५
एतावदुक्त्वा राजानं भगदत्तमथाब्रवीत् ।
समक्षं पार्थिवेन्द्रस्य वाक्यं वाक्यविशारदः ॥ १६
गच्छ शीघ्रं महाराज हैडिम्बं युद्धदुर्मदम् ।
वारयस्व रणे यत्तो मिषतां सर्वधन्विनाम् ।
राक्षसं क्रूरकर्माणं यथेन्द्रस्तारकं पुरा ॥ १७
तव दिव्यानि चास्त्राणि विक्रमश्च परंतप ।
समागमश्च बहुभिः पुराभूदसुरैः सह ॥ १८
त्वं तस्य राजशार्दूल प्रतियोद्धा महाहवे ।
स्वबलेन वृतो राजञ्जहि राक्षसपुंगवम् ॥ १९
एतच्छ्रुत्वा तु वचनं भीष्मस्य पृतनापतेः ।
प्रययौ सिंहनादेन परानभिमुखो द्रुतम् ॥ २०
तमाद्रवन्तं संप्रेक्ष्य गर्जन्तमिव तोयदम् ।
अभ्यवर्तन्त संक्रुद्धाः पाण्डवानां महारथाः ॥ २१
भीमसेनोऽभिमन्युश्च राक्षसश्च घटोत्कचः ।
द्रौपदेयाः सत्यधृतिः क्षत्रदेवश्च मारिष ॥ २२
चेदिपो वसुदानश्च दशार्णाधिपतिस्तथा ।
सुप्रतीकेन तांश्चापि भगदत्तोऽप्युपाद्रवत् ॥ २३
ततः समभवद्युद्धं घोररूपं भयानकम् ।
पाण्डूनां भगदत्तेन यमराष्ट्रविवर्धनम् ॥ २४
प्रमुक्ता रथिभिर्बाणा भीमवेगाः सुतेजनाः ।
ते निपेतुर्महाराज नागेषु च रथेषु च ॥ २५
प्रभिन्नाश्च महानागा विनीता हस्तिसादिभिः ।
परस्परं समासाद्य संनिपेतुरभीतवत् ॥ २६
मदान्धा रोषसंरब्धा विषाणाग्रैर्महाहवे ।

बिभिदुर्दन्तमुसलैः समासाद्य परस्परम् ॥ २७
हयाश्च चामरापीडाः प्रासपाणिभिरास्थिताः ।
चोदिताः सादिभिः क्षिप्रं निपेतुरितरेतरम् ॥ २८
पादाताश्च पदात्योघैस्ताडिताः शक्तितोमरैः ।
न्यपतन्त तदा भूमौ शतशोऽथ सहस्रशः ॥ २९
रथिनश्च तथा राजन्कर्णिनालीकसायकैः ।
निहत्य समरे वीरान्सिंहनादान्विनेदिरे ॥ ३०
तस्मिंस्तथा वर्तमाने संग्रामे लोमहर्षणे ।
भगदत्तो महेष्वासो भीमसेनमथाद्रवत् ॥ ३१
कुञ्जरेण प्रभिन्नेन सप्तधा स्रवता मदम् ।
पर्वतेन यथा तोयं स्रवमाणेन सर्वतः ॥ ३२
किरञ्शरसहस्राणि सुप्रतीकशिरोगतः ।
ऐरावतस्थो मघवान्वारिधारा इवानघ ॥ ३३
स भीमं शरधाराभिस्ताडयामास पार्थिवः ।
पर्वतं वारिधाराभिः प्रावृषीव बलाहकः ॥ ३४
भीमसेनस्तु संक्रुद्धः पादरक्षान्परःशतान् ।
निजघान महेष्वासः संक्रुद्धः शरवृष्टिभिः ॥ ३५
तान्दृष्ट्वा निहतान्क्रुद्धो भगदत्तः प्रतापवान् ।
चोदयामास नागेन्द्रं भीमसेनरथं प्रति ॥ ३६
स नागः प्रेषितस्तेन बाणो ज्याचोदितो यथा ।
अभ्यधावत वेगेन भीमसेनमरिंदमम् ॥ ३७
तमापतन्तं संप्रेक्ष्य पाण्डवानां महारथाः ।
अभ्यवर्तन्त वेगेन भीमसेनपुरोगमाः ॥ ३८
केकयाश्चाभिमन्युश्च द्रौपदेयाश्च सर्वशः ।
दशार्णाधिपतिः शूरः क्षत्रदेवश्च मारिष ।
चेदिपश्चित्रकेतुश्च संक्रुद्धाः सर्व एव ते ॥ ३९
उत्तमास्त्राणि दिव्यानि दर्शयन्तो महाबलाः ।
तमेकं कुञ्जरं क्रुद्धाः समन्तात्पर्यवारयन् ॥ ४०
स विद्धो बहुभिर्बाणैर्व्यरोचत महाद्विपः ।
संजातरुधिरोत्पीडो धातुचित्र इवाद्रिराट् ॥ ४१
दशार्णाधिपतिश्चापि गजं भूमिधरोपमम् ।
समास्थितोऽभिदुद्राव भगदत्तस्य वारणम् ॥ ४२
तमापतन्तं समरे गजं गजपतिः स च ।
दधार सुप्रतीकोऽपि वेलेव मकरालयम् ॥ ४३
वारितं प्रेक्ष्य नागेन्द्रं दशार्णस्य महात्मनः ।
साधु साध्विति सैन्यानि पाण्डवेयान्यपूजयन् ॥ ४४
ततः प्राग्ज्योतिषः क्रुद्धस्तोमरान्वै चतुर्दश ।
प्राहिणोत्तस्य नागस्य प्रमुखे नृपसत्तम ॥ ४५
तस्य वर्म मुखत्राणं शातकुम्भपरीष्कृतम् ।
विदार्य प्राविशन्क्षिप्रं वल्मीकमिव पन्नगाः ॥ ४६
स गाढविद्धो व्यथितो नागो भरतसत्तम ।
उपावृत्तमदः क्षिप्रं स न्यवर्तत वेगतः ॥ ४७
प्रदुद्राव च वेगेन प्रणदन्भैरवं स्वनम् ।
स मर्दमानः स्वबलं वायुर्वृक्षानिवौजसा ॥ ४८
तस्मिन्पराजिते नागे पाण्डवानां महारथाः ।
सिंहनादं विनद्योच्चैर्युद्धायैवोपतस्थिरे ॥ ४९
ततो भीमं पुरस्कृत्य भगदत्तमुपाद्रवन् ।
किरन्तो विविधान्बाणाञ्शस्त्राणि विविधानि च ॥५०
तेषामापततां राजन्संक्रुद्धानाममर्षिणाम् ।
श्रुत्वा स निनदं घोरममर्षाद्गतसाध्वसः ।
भगदत्तो महेष्वासः स्वनागं प्रत्यचोदयत् ॥ ५१
अङ्कुशाङ्गुष्ठनुदितः स गजप्रवरो युधि ।
तस्मिन्क्षणे समभवत्संवर्तक इवानलः ॥ ५२
रथसंघांस्तथा नागान्हयांश्च सह सादिभिः ।
पादातांश्च सुसंक्रुद्धः शतशोऽथ सहस्रशः ।
अमृद्नात्समरे राजन्संप्रधावंस्ततस्ततः ॥ ५३
तेन संलोड्यमानं तु पाण्डूनां तद्बलं महत् ।
संचुकोच महाराज चर्मेवाग्नौ समाहितम् ॥ ५४
भग्नं तु स्वबलं दृष्ट्वा भगदत्तेन धीमता ।
घटोत्कचोऽथ संक्रुद्धो भगदत्तमुपाद्रवत् ॥ ५५

विकटः पुरुषो राजन्दीप्तास्यो दीप्तलोचनः ।
रूपं विभीषणं कृत्वा रोषेण प्रज्वलन्निव ॥ ५६
जग्राह विपुलं शूलं गिरीणामपि दारणम् ।
नागं जिघांसुः सहसा चिक्षेप च महाबलः ।
सविष्फुलिङ्गज्वालाभिः समन्तात्परिवेष्टितम् ॥ ५७
तमापतन्तं सहसा दृष्ट्वा ज्वालाकुलं रणे ।
चिक्षेप रुचिरं तीक्ष्णमर्धचन्द्रं स पार्थिवः ।
चिच्छेद सुमहच्छूलं तेन बाणेन वेगवत् ॥ ५८
निपपात द्विधा छिन्नं शूलं हेमपरिष्कृतम् ।
महाशनिर्यथा भ्रष्टा शक्रमुक्ता नभोगता ॥ ५९
शूलं निपतितं दृष्ट्वा द्विधा कृत्तं स पार्थिवः ।
रुक्मदण्डां महाशक्तिं जग्राहाग्निशिखोपमाम् ।
चिक्षेप तां राक्षसस्य तिष्ठ तिष्ठेति चाब्रवीत् ॥६०
तामापतन्तीं संप्रेक्ष्य वियत्स्थामशनीमिव ।
उत्पत्य राक्षसस्तूर्णं जग्राह च ननाद च ॥ ६१
बभञ्ज चैनां त्वरितो जानुन्यारोप्य भारत ।
पश्यतः पार्थिवेन्द्रस्य तदद्भुतमिवाभवत् ॥ ६२
तदवेक्ष्य कृतं कर्म राक्षसेन बलीयसा ।
दिवि देवाः सगन्धर्वा मुनयश्चापि विस्मिताः ॥६३
पाण्डवाश्च महेष्वासा भीमसेनपुरोगमाः ।
साधु साध्विति नादेन पृथिवीमनुनादयन् ॥ ६४
तं तु श्रुत्वा महानादं प्रहृष्टानां महात्मनाम् ।
नामृष्यत महेष्वासो भगदत्तः प्रतापवान् ॥ ६५
स विस्फार्य महच्चापमिन्द्राशनिसमस्वनम् ।
अभिदुद्राव वेगेन पाण्डवानां महारथान् ।
विसृजन्विमलांस्तीक्ष्णान्नाराचाञ्ज्वलनप्रभान् ॥ ६६
भीममेकेन विव्याध राक्षसं नवभिः शरैः ।
अभिमन्युं त्रिभिश्चैव केकयान्पञ्चभिस्तथा ॥ ६७
पूर्णायतविसृष्टेन स्वर्णपुङ्खेन पत्रिणा ।
बिभेद दक्षिणं बाहुं क्षत्रदेवस्य चाहवे ।
पपात सहसा तस्य सशरं धनुरुत्तमम् ॥ ६८
द्रौपदेयांस्ततः पञ्च पञ्चभिः समताडयत् ।
भीमसेनस्य च क्रोधान्निजघान तुरंगमान् ॥ ६९
ध्वजं केसरिणं चास्य चिच्छेद विशिखैस्त्रिभिः ।
निर्बिभेद त्रिभिश्चान्यैः सारथिं चास्य पत्रिभिः ॥
स गाढविद्धो व्यथितो रथोपस्थ उपाविशत् ।
विशोको भरतश्रेष्ठ भगदत्तेन संयुगे ॥ ७१
ततो भीमो महाराज विरथो रथिनां वरः ।
गदां प्रगृह्य वेगेन प्रचस्कन्द महारथात् ॥ ७२
तमुद्यतगदं दृष्ट्वा सशृङ्गमिव पर्वतम् ।
तावकानां भयं घोरं समपद्यत भारत ॥ ७३
एतस्मिन्नेव काले तु पाण्डवः कृष्णसारथिः ।
आजगाम महाराज निघ्नञ्शत्रून्सहस्रशः ॥ ७४
यत्र तौ पुरुषव्याघ्रौ पितापुत्रौ परंतपौ ।
प्राग्ज्योतिषेण संसक्तौ भीमसेनघटोत्कचौ ॥ ७५
दृष्ट्वा तु पाण्डवो राजन्युध्यमानान्महारथान् ।
त्वरितो भरतश्रेष्ठ तत्रायाद्विकिरञ्शरान् ॥ ७६
ततो दुर्योधनो राजा त्वरमाणो महारथः ।
सेनामचोदयत्क्षिप्रं रथनागाश्वसंकुलाम् ॥ ७७
तामापतन्तीं सहसा कौरवाणां महाचमूम् ।
अभिदुद्राव वेगेन पाण्डवः श्वेतवाहनः ॥ ७८
भगदत्तोऽपि समरे तेन नागेन भारत ।
विमृद्नन्पाण्डवबलं युधिष्ठिरमुपाद्रवत् ॥ ७९
तदासीत्तुमुलं युद्धं भगदत्तस्य मारिष ।
पाञ्चालैः सृञ्जयैश्चैव केकयैश्चोद्यतायुधैः ॥ ८०
भीमसेनोऽपि समरे तावुभौ केशवार्जुनौ ।
आश्रावयद्यथावृत्तमिरावद्वधमुत्तमम् ॥ ८१

इति श्रीमहाभारते भीष्मपर्वणि
एकनवतितमोऽध्यायः ॥ ९१ ॥

९२

संजय उवाच ।

पुत्रं तु निहतं श्रुत्वा इरावन्तं धनंजयः ।
दुःखेन महताविष्टो निःश्वसन्पन्नगो यथा ॥ १
अब्रवीत्समरे राजन्वासुदेवमिदं वचः ।
इदं नूनं महाप्राज्ञो विदुरो दृष्टवान्पुरा ॥ २
कुरूणां पाण्डवानां च क्षयं घोरं महामतिः ।
ततो निवारयितवान्धृतराष्ट्रं जनेश्वरम् ॥ ३
अवध्या बहवो वीराः संग्रामे मधुसूदन ।
निहताः कौरवैः संख्ये तथास्माभिश्च ते हताः ॥ ४
अर्थहेतोर्नरश्रेष्ठ क्रियते कर्म कुत्सितम् ।
धिगर्थान्यत्कृते ह्येवं क्रियते ज्ञातिसंक्षयः ॥ ५
अधनस्य मृतं श्रेयो न च ज्ञातिवधाद्धनम् ।
किं नु प्राप्स्यामहे कृष्ण हत्वा ज्ञातीन्समागतान् ॥ ६
दुर्योधनापराधेन शकुनेः सौबलस्य च ।
क्षत्रिया निधनं यान्ति कर्णदुर्मन्त्रितेन च ॥ ७
इदानीं च विजानामि सुकृतं मधुसूदन ।
कृतं राज्ञा महाबाहो याचता स्म सुयोधनम् ।
राज्यार्धं पञ्च वा ग्रामान्नाकार्षीत्स च दुर्मतिः ॥ ८
दृष्ट्वा हि क्षत्रियाञ्शूराञ्शयानान्धरणीतले ।
निन्दामि भृशमात्मानं धिगस्तु क्षत्रजीविकाम् ॥ ९
अशक्तमिति मामेते ज्ञास्यन्ति क्षत्रिया रणे ।
युद्धं ममैभिरुचितं ज्ञातिभिर्मधुसूदन ॥ १०
संचोदय हयान्क्षिप्रं धार्तराष्ट्रचमूं प्रति ।
प्रतरिष्ये महापारं भुजाभ्यां समरोदधिम् ।
नायं क्लीबयितुं कालो विद्यते माधव कश्चित् ॥ ११
एवमुक्तस्तु पार्थेन केशवः परवीरहा ।
चोदयामास तानश्वान्पाण्डुरान्वातरंहसः ॥ १२
अथ शब्दो महानासीत्तव सैन्यस्य भारत ।
मारुतोद्धूतवेगस्य सागरस्येव पर्वणि ॥ १३
अपराह्णे महाराज संग्रामः समपद्यत ।
पर्जन्यसमनिर्घोषो भीष्मस्य सह पाण्डवैः ॥ १४
ततो राजंस्तव सुता भीमसेनमुपाद्रवन् ।
परिवार्य रणे द्रोणं वसवो वासवं यथा ॥ १५
ततः शांतनवो भीष्मः कृपश्च रथिनां वरः ।
भगदत्तः सुशर्मा च धनंजयमुपाद्रवन् ॥ १६
हार्दिक्यो बाह्लिकश्चैव सात्यकिं समभिद्रुतौ ।
अम्बष्ठकस्तु नृपतिरभिमन्युमवारयत् ॥ १७
शेषास्त्वन्ये महाराज शेषानेव महारथान् ।
ततः प्रववृते युद्धं घोररूपं भयावहम् ॥ १८
भीमसेनस्तु संप्रेक्ष्य पुत्रांस्तव जनेश्वर ।
प्रजज्वाल रणे क्रुद्धो हविषा हव्यवाडिव ॥ १९
पुत्रास्तु तव कौन्तेयं छादयांचक्रिरे शरैः ।
प्रावृषीव महाराज जलदाः पर्वतं यथा ॥ २०
स च्छाद्यमानो बहुधा पुत्रैस्तव विशां पते ।
सृक्किणी विलिहन्वीरः शार्दूल इव दर्पितः ॥ २१
व्यूढोरस्कं ततो भीमः पातयामास पार्थिव ।
क्षुरप्रेण सुतीक्ष्णेन सोऽभवद्गतजीवितः ॥ २२
अपरेण तु भल्लेन पीतेन निशितेन च ।
अपातयत्कुण्डलिनं सिंहः क्षुद्रमृगं यथा ॥ २३
ततः सुनिशितान्पीतान्समादत्त शिलीमुखान् ।
स सप्त त्वरया युक्तः पुत्रांस्ते प्राप्य मारिष ॥ २४
प्रेषिता भीमसेनेन शरास्ते दृढधन्वना ।
अपातयन्त पुत्रांस्ते रथेभ्यः सुमहारथान् ॥ २५
अनाधृष्टिं कुण्डभेदं वैराटं दीर्घलोचनम् ।
दीर्घबाहुं सुबाहुं च तथैव कनकध्वजम् ॥ २६
प्रपतन्त स्म ते वीरा विरेजुर्भरतर्षभ ।
वसन्ते पुष्पशबलाश्चूताः प्रपतिता इव ॥ २७
ततः प्रदुद्रुवुः शेषाः पुत्रास्तव विशां पते ।
तं कालमिव मन्यन्तो भीमसेनं महाबलम् ॥ २८

द्रोणस्तु समरे वीरं निर्दहन्तं सुतांस्तव ।
यथाद्रिं वारिधाराभिः समन्ताद्व्यकिरच्छरैः ॥ २९
तत्राद्भुतमपश्याम कुन्तीपुत्रस्य पौरुषम् ।
द्रोणेन वार्यमाणोऽपि निजघ्ने यत्सुतांस्तव ॥ ३०
यथा हि गोवृषो वर्षं संधारयति खात्पतत् ।
भीमस्तथा द्रोणमुक्तं शरवर्षमदीधरत् ॥ ३१
अद्भुतं च महाराज तत्र चक्रे वृकोदरः ।
यत्पुत्रांस्तेऽवधीत्संख्ये द्रोणं चैव न्ययोधयत् ॥ ३२
पुत्रेषु तव वीरेषु चिक्रीडार्जुनपूर्वजः ।
मृगेष्विव महाराज चरन्व्याघ्रो महाबलः ॥ ३३
यथा वा पशुमध्यस्थो द्रावयेत पशून्वृकः ।
वृकोदरस्तव सुतांस्तथा व्यद्रावयद्रणे ॥ ३४
गाङ्गेयो भगदत्तश्च गौतमश्च महारथः ।
पाण्डवं रभसं युद्धे वारयामासुरर्जुनम् ॥ ३५
अस्त्रैरस्त्राणि संवार्य तेषां सोऽतिरथो रणे ।
प्रवीरांस्तव सैन्येषु प्रेषयामास मृत्यवे ॥ ३६
अभिमन्युश्च राजानमम्बष्ठं लोकविश्रुतम् ।
विरथं रथिनां श्रेष्ठं कारयामास सायकैः ॥ ३७
विरथो वध्यमानः स सौभद्रेण यशस्विना ।
अवप्लुत्य रथात्तूर्णं सव्रीडो मनुजाधिपः ॥ ३८
असिं चिक्षेप समरे सौभद्रस्य महात्मनः ।
आरुरोह रथं चैव हार्दिक्यस्य महात्मनः ॥ ३९
आपतन्तं तु निस्त्रिंशं युद्धमार्गविशारदः ।
लाघवाद्व्यंसयामास सौभद्रः परवीरहा ॥ ४०
व्यंसितं वीक्ष्य निस्त्रिंशं सौभद्रेण रणे तदा ।
साधु साध्विति सैन्यानां प्रणादोऽभूद्विशां पते ॥ ४१
धृष्टद्युम्नमुखास्त्वन्ये तव सैन्यमयोधयन् ।
तथैव तावकाः सर्वे पाण्डुसैन्यमयोधयन् ॥ ४२
तत्राक्रन्दो महानासीत्तव तेषां च भारत ।
निघ्नतां भृशमन्योन्यं कुर्वतां कर्म दुष्करम् ॥ ४३
अन्योन्यं हि रणे शूराः केशेष्वाक्षिप्य मारिष ।
नखैर्दन्तैरयुध्यन्त मुष्टिभिर्जानुभिस्तथा ॥ ४४
बाहुभिश्च तलैश्चैव निस्त्रिंशैश्च सुसंशितैः ।
विवरं प्राप्य चान्योन्यमनयन्यमसादनम् ॥ ४५
न्यहनच्च पिता पुत्रं पुत्रश्च पितरं रणे ।
व्याकुलीकृतसंकल्पा युयुधुस्तत्र मानवाः ॥ ४६
रणे चारूणि चापानि हेमपृष्ठानि भारत ।
हतानामपविद्धानि कलापाश्च महाधनाः ॥ ४७
जातरूपमयैः पुङ्खै राजतैश्च शिताः शराः ।
तैलधौता व्यराजन्त निर्मुक्तभुजगोपमाः ॥ ४८
हस्तिदन्तत्सरून्खड्गाञ्जातरूपपरिष्कृतान् ।
चर्माणि चापविद्धानि रुक्मपृष्ठानि धन्विनाम् ॥
सुवर्णविकृतप्रासान्पट्टिशान्हेमभूषितान् ।
जातरूपमयाश्चर्ष्टीः शक्त्यश्च कनकोज्ज्वलाः ॥ ५०
अपकृत्ताश्च पतिता मुसलानि गुरूणि च ।
परिघान्पट्टिशांश्चैव भिण्डिपालांश्च मारिष ॥ ५१
पतितांस्तोमरांश्चापि चित्रा हेमपरिष्कृताः ।
कुथाश्च बहुधाकाराश्चामरव्यजनानि च ॥ ५२
नानाविधानि शस्त्राणि विसृज्य पतिता नराः ।
जीवन्त इव दृश्यन्ते गतसत्त्वा महारथाः ॥ ५३
गदाविमथितैर्गात्रैर्मुसलैर्भिन्नमस्तकाः ।
गजवाजिरथक्षुण्णाः शेरते स्म नराः क्षितौ ॥ ५४
तथैवाश्वनृनागानां शरीरैराबभौ तदा ।
संछन्ना वसुधा राजन्पर्वतैरिव सर्वतः ॥ ५५
समरे पतितैश्चैव शक्त्यृष्टिशरतोमरैः ।
निस्त्रिंशैः पट्टिशैः प्रासैरयस्कुन्तैः परश्वधैः ॥ ५६
परिघैर्भिण्डिपालैश्च शतघ्नीभिस्तथैव च ।
शरीरैः शस्त्रभिन्नैश्च समास्तीर्यत मेदिनी ॥ ५७
निःशब्दैरल्पशब्दैश्च शोणितौघपरिप्लुतैः ।
गतासुभिरमित्रघ्न विबभौ संवृता मही ॥ ५८

सतलत्रैः सकेयूरैर्बाहुभिश्चन्दनोक्षितैः ।
हस्तिहस्तोपमैश्छिन्नैरूरुभिश्च तरस्विनाम् ॥ ५९
बद्धचूडामणिधरैः शिरोभिश्च सकुण्डलैः ।
पतितैर्वृषभाक्षाणां बभौ भारत मेदिनी ॥ ६०
कवचैः शोणितादिग्धैर्विप्रकीर्णैश्च काञ्चनैः ।
रराज सुभृशं भूमिः शान्तार्चिभिरिवानलैः ॥ ६१
विप्रविद्धैः कलापैश्च पतितैश्च शरासनैः ।
विप्रकीर्णैः शरैश्चापि रुक्मपुङ्खैः समन्ततः ॥ ६२
रथैश्च बहुभिर्भग्नैः किङ्किणीजालमालिभिः ।
वाजिभिश्च हतैः कीर्णैः स्रस्तजिह्वैः सशोणितैः ॥
अनुकर्षैः पताकाभिरुपासङ्गैर्ध्वजैरपि ।
प्रवीराणां महाशङ्खैर्विप्रकीर्णैश्च पाण्डुरैः ॥ ६४
स्रस्तहस्तैश्च मातङ्गैः शयानैर्विबभौ मही ।
नानारूपैरलंकारैः प्रमदेवाभ्यलंकृता ॥ ६५
दन्तिभिश्चापरैस्तत्र सप्रासैर्गाढवेदनैः ।
करैः शब्दं विमुञ्चद्भिः शीकरं च मुहुर्मुहुः ।
विबभौ तद्रणस्थानं धम्यमानैरिवाचलैः ॥ ६६
नानारागैः कम्बलैश्च परिस्तोमैश्च दन्तिनाम् ।
वैडूर्यमणिदण्डैश्च पतितैरङ्कुशैः शुभैः ॥ ६७
घण्टाभिश्च गजेन्द्राणां पतिताभिः समन्ततः ।
विपाटितविचित्राभिः कुथाभी राङ्कवैस्तथा ॥ ६८
ग्रैवेयैश्चित्ररूपैश्च रुक्मकक्ष्याभिरेव च ।
यन्त्रैश्च बहुधा छिन्नैस्तोमरैश्च सकम्पनैः ॥ ६९
अश्वानां रेणुकपिलै रुक्मच्छन्नैरुरश्छदैः ।
सादिनां च भुजैश्छिन्नैः पतितैः साङ्गदैस्तथा ॥ ७०
प्रासैश्च विमलैस्तीक्ष्णैर्विमलाभिस्तथर्ष्टिभिः ।
उष्णीषैश्च तथा छिन्नैः प्रविद्धैश्च ततस्ततः ॥ ७१
विचित्रैरर्धचन्द्रैश्च जातरूपपरिष्कृतैः ।
अश्वास्तरपरिस्तोमै राङ्कवैर्मृदितैस्तथा ॥ ७२
नरेन्द्रचूडामणिभिर्विचित्रैश्च महाधनैः ।
छत्रैस्तथापविद्धैश्च चामरव्यजनैरपि ॥ ७३
पद्मेन्दुद्युतिभिश्चैव वदनैश्चारुकुण्डलैः ।
क्लृप्तश्मश्रुभिरत्यर्थं वीराणां समलंकृतैः ॥ ७४
अपविद्धैर्महाराज सुवर्णोज्ज्वलकुण्डलैः ।
ग्रहनक्षत्रशबला द्यौरिवासीद्वसुंधरा ॥ ७५
एवमेते महासेने मृदिते तत्र भारत ।
परस्परं समासाद्य तव तेषां च संयुगे ॥ ७६
तेषु श्रान्तेषु भग्नेषु मृदितेषु च भारत ।
रात्रिः समभवद्घोरा नापश्याम ततो रणम् ॥ ७७
ततोऽवहारं सैन्यानां प्रचक्रुः कुरुपाण्डवाः ।
घोरे निशामुखे रौद्रे वर्तमाने सुदारुणे ॥ ७८
अवहारं ततः कृत्वा सहिताः कुरुपाण्डवाः ।
न्यविशन्त यथाकालं गत्वा स्वशिबिरं तदा ॥ ७९

इति श्रीमहाभारते भीष्मपर्वणि
द्विनवतितमोऽध्यायः ॥ ९२ ॥

९३

संजय उवाच ।

ततो दुर्योधनो राजा शकुनिश्चापि सौबलः ।
दुःशासनश्च पुत्रस्ते सूतपुत्रश्च दुर्जयः ॥ १
समागम्य महाराज मन्त्रं चक्रुर्विवक्षितम् ।
कथं पाण्डुसुता युद्धे जेतव्याः सगणा इति ॥ २
ततो दुर्योधनो राजा सर्वांस्तानाह मन्त्रिणः ।
सूतपुत्रं समाभाष्य सौबलं च महाबलम् ॥ ३
द्रोणो भीष्मः कृपः शल्यः सौमदत्तिश्च संयुगे ।
न पार्थान्प्रतिबाधन्ते न जाने तत्र कारणम् ॥ ४
अवध्यमानास्ते चापि क्षपयन्ति बलं मम ।
सोऽस्मि क्षीणबलः कर्ण क्षीणशस्त्रश्च संयुगे ॥ ५
निकृतः पाण्डवैः शूरैरवध्यैर्दैवतैरपि ।
सोऽहं संशयमापन्नः प्रकरिष्ये कथं रणम् ॥ ६
तमब्रवीन्महाराज सूतपुत्रो नराधिपम् ।

मा शुचो भरतश्रेष्ठ प्रकरिष्ये प्रियं तव ॥ ७
भीष्मः शांतनवस्तूर्णमपयातु महारणात् ।
निवृत्ते युधि गाङ्गेये न्यस्तशस्त्रे च भारत ॥ ८
अहं पार्थान्हनिष्यामि सहितान्सर्वसोमकैः ।
पश्यतो युधि भीष्मस्य शपे सत्येन ते नृप ॥ ९
पाण्डवेषु दयां राजन्सदा भीष्मः करोति वै ।
अशक्तश्च रणे भीष्मो जेतुमेतान्महारथान् ॥ १०
अभिमानी रणे भीष्मो नित्यं चापि रणप्रियः ।
स कथं पाण्डवान्युद्धे जेष्यते तात संगतान् ॥ ११
स त्वं शीघ्रमितो गत्वा भीष्मस्य शिबिरं प्रति ।
अनुमान्य रणे भीष्मं शस्त्रं न्यासय भारत ॥ १२
न्यस्तशस्त्रे ततो भीष्मे निहतान्पश्य पाण्डवान् ।
मयैकेन रणे राजन्ससुहृद्गणबान्धवान् ॥ १३
एवमुक्तस्तु कर्णेन पुत्रो दुर्योधनस्तव ।
अब्रवीद्भ्रातरं तत्र दुःशासनमिदं वचः ॥ १४
अनुयात्रं यथा सज्जं सर्वं भवति सर्वतः ।
दुःशासन तथा क्षिप्रं सर्वमेवोपपादय ॥ १५
एवमुक्त्वा ततो राजन्कर्णमाह जनेश्वरः ।
अनुमान्य रणे भीष्ममितोऽहं द्विपदां वरम् ॥ १६
आगमिष्ये ततः क्षिप्रं त्वत्सकाशमरिंदम ।
ततस्त्वं पुरुषव्याघ्र प्रकरिष्यसि संयुगम् ॥ १७
निष्पपात ततस्तूर्णं पुत्रस्तव विशां पते ।
सहितो भ्रातृभिः सर्वैर्देवैरिव शतक्रतुः ॥ १८
ततस्तं नृपशार्दूलं शार्दूलसमविक्रमम् ।
आरोहयद्धयं तूर्णं भ्राता दुःशासनस्तदा ॥ १९
अङ्गदी बद्धमुकुटो हस्ताभरणवान्नृपः ।
धार्तराष्ट्रो महाराज विबभौ स महेन्द्रवत् ॥ २०
भाण्डीपुष्पनिकाशेन तपनीयनिभेन च ।
अनुलिप्तः परार्घ्येन चन्दनेन सुगन्धिना ॥ २१
अरजोम्बरसंवीतः सिंहखेलगतिर्नृपः ।
शुशुभे विमलार्चिष्माञ्शरदीव दिवाकरः ॥ २२
तं प्रयान्तं नरव्याघ्रं भीष्मस्य शिबिरं प्रति ।
अनुजग्मुर्महेष्वासाः सर्वलोकस्य धन्विनः ।
भ्रातरश्च महेष्वासास्त्रिदशा इव वासवम् ॥ २३
हयानन्ये समारुह्य गजानन्ये च भारत ।
रथैरन्ये नरश्रेष्ठाः परिवव्रुः समन्ततः ॥ २४
आत्तशस्त्राश्च सुहृदो रक्षणार्थं महीपतेः ।
प्रादुर्बभूवुः सहिताः शक्रस्येवामरा दिवि ॥ २५
संपूज्यमानः कुरुभिः कौरवाणां महारथः ।
प्रययौ सदनं राजन्गाङ्गेयस्य यशस्विनः ।
अन्वीयमानः सहितैः सोदर्यैः सर्वतो नृपः ॥ २६
दक्षिणं दक्षिणः काले संभृत्य स्वभुजं तदा ।
हस्तिहस्तोपमं शैक्षं सर्वशत्रुनिबर्हणम् ॥ २७
प्रगृह्णन्नञ्जलीन्नॄणामुद्यतान्सर्वतोदिशम् ।
शुश्राव मधुरा वाचो नानादेशनिवासिनाम् ॥ २८
संस्तूयमानः सूतैश्च मागधैश्च महायशाः ।
पूजयानश्च तान्सर्वान्सर्वलोकेश्वरेश्वरः ॥ २९
प्रदीपैः काञ्चनैस्तत्र गन्धतैलावसेचनैः ।
परिवव्रुर्महात्मानं प्रज्वलद्भिः समन्ततः ॥ ३०
स तैः परिवृतो राजा प्रदीपैः काञ्चनैः शुभैः ।
शुशुभे चन्द्रमा युक्तो दीप्तैरिव महाग्रहैः ॥ ३१
कञ्चुकोष्णीषिणस्तत्र वेत्रझर्झरपाणयः ।
प्रोत्सारयन्तः शनकैस्तं जनं सर्वतोदिशम् ॥ ३२
संप्राप्य तु ततो राजा भीष्मस्य सदनं शुभम् ।
अवतीर्य हयाच्चापि भीष्मं प्राप्य जनेश्वरः ॥ ३३
अभिवाद्य ततो भीष्मं निषण्णः परमासने ।
काञ्चने सर्वतोभद्रे स्पर्ध्यास्तरणसंवृते ।
उवाच प्राञ्जलिर्भीष्मं बाष्पकण्ठोऽश्रुलोचनः ॥ ३४
त्वां वयं समुपाश्रित्य संयुगे शत्रुसूदन ।
उत्सहेम रणे जेतुं सेन्द्रानपि सुरासुरान् ॥ ३५

किमु पाण्डुसुतान्वीरान्ससुहृद्गणबान्धवान् ।
तस्मादर्हसि गाङ्गेय कृपां कर्तुं मयि प्रभो ।
जहि पाण्डुसुतान्वीरान्महेन्द्र इव दानवान् ॥ ३६
पूर्वमुक्तं महाबाहो निहनिष्यामि सोमकान् ।
पाञ्चालान्पाण्डवैः सार्धं करूषांश्चेति भारत ॥ ३७
तद्वचः सत्यमेवास्तु जहि पार्थान्समागतान् ।
सोमकांश्च महेष्वासान्सत्यवाग्भव भारत ॥ ३८
दयया यदि वा राजन्द्वेष्यभावान्मम प्रभो ।
मन्दभाग्यतया वापि मम रक्षसि पाण्डवान् ॥ ३९
अनुजानीहि समरे कर्णमाहवशोभिनम् ।
स जेष्यति रणे पार्थान्ससुहृद्गणबान्धवान् ॥ ४०
एतावदुक्त्वा नृपतिः पुत्रो दुर्योधनस्तव ।
नोवाच वचनं किंचिद्भीष्मं भीमपराक्रमम् ॥ ४१

इति श्रीमहाभारते भीष्मपर्वणि
त्रिनवतितमोऽध्यायः ॥ ९३ ॥

९४

संजय उवाच ।

वाक्शल्यैस्तव पुत्रेण सोऽतिविद्धः पितामहः ।
दुःखेन महताविष्टो नोवाचाप्रियमण्वपि ॥ १
स ध्यात्वा सुचिरं कालं दुःखरोषसमन्वितः ।
श्वसमानो यथा नागः प्रणुन्नो वै शलाकया ॥ २
उद्वृत्य चक्षुषी कोपान्निर्दहन्निव भारत ।
सदेवासुरगन्धर्वं लोकं लोकविदां वरः ।
अब्रवीत्तव पुत्रं तु सामपूर्वमिदं वचः ॥ ३
किं नु दुर्योधनैवं मां वाक्शल्यैरुपविध्यसि ।
घटमानं यथाशक्ति कुर्वाणं च तव प्रियम् ।
जुह्वानं समरे प्राणांस्तवैव हितकाम्यया ॥ ४
यदा तु पाण्डवः शूरः खाण्डवेऽग्निमतर्पयत् ।
पराजित्य रणे शक्रं पर्याप्तं तन्निदर्शनम् ॥ ५
यदा च त्वां महाबाहो गन्धर्वैर्हृतमोजसा ।
अमोचयत्पाण्डुसुतः पर्याप्तं तन्निदर्शनम् ॥ ६
द्रवमाणेषु शूरेषु सोदरेषु तथाभिभो ।
सूतपुत्रे च राधेये पर्याप्तं तन्निदर्शनम् ॥ ७
यच्च नः सहितान्सर्वान्विराटनगरे तदा ।
एक एव समुद्यातः पर्याप्तं तन्निदर्शनम् ॥ ८
द्रोणं च युधि संरब्धं मां च निर्जित्य संयुगे ।
कर्णं च त्वां च द्रौणिं च कृपं च सुमहारथम् ।
वासांसि स समादत्त पर्याप्तं तन्निदर्शनम् ॥ ९
निवातकवचान्युद्धे वासवेनापि दुर्जयान् ।
जितवान्समरे पार्थः पर्याप्तं तन्निदर्शनम् ॥ १०
को हि शक्तो रणे जेतुं पाण्डवं रभसं रणे ।
त्वं तु मोहान्न जानीषे वाच्यावाच्यं सुयोधन ॥ ११
मुमूर्षुर्हि नरः सर्वान्वृक्षान्पश्यति काञ्चनान् ।
तथा त्वमपि गान्धारे विपरीतानि पश्यसि ॥ १२
स्वयं वैरं महत्कृत्वा पाण्डवैः सहसृञ्जयैः ।
युध्यस्व तानद्य रणे पश्यामः पुरुषो भव ॥ १३
अहं तु सोमकान्सर्वान्सपाञ्चालान्समागतान् ।
निहनिष्ये नरव्याघ्र वर्जयित्वा शिखण्डिनम् ॥ १४
तैर्वाहं निहतः संख्ये गमिष्ये यमसादनम् ।
तान्वा निहत्य संग्रामे प्रीतिं दास्यामि वै तव ॥ १५
पूर्वं हि स्त्री समुत्पन्ना शिखण्डी राजवेश्मनि ।
वरदानात्पुमाञ्जातः सैषा वै स्त्री शिखण्डिनी ॥ १६
तामहं न हनिष्यामि प्राणत्यागेऽपि भारत ।
यासौ प्राङ्निर्मिता धात्रा सैषा वै स्त्री शिखण्डिनी ॥
सुखं स्वपिहि गान्धारे श्वोऽस्मि कर्ता महारणम् ।
यज्जनाः कथयिष्यन्ति यावत्स्थास्यति मेदिनी ॥ १८
एवमुक्तस्तव सुतो निर्जगाम जनेश्वर ।
अभिवाद्य गुरुं मूर्ध्ना प्रययौ स्वं निवेशनम् ॥ १९
आगम्य तु ततो राजा विसृज्य च महाजनम् ।
प्रविवेश ततस्तूर्णं क्षयं शत्रुक्षयंकरः ।

प्रविष्टः स निशां तां च गमयामास पार्थिवः ॥ २०

इति श्रीमहाभारते भीष्मपर्वणि
चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

९५

संजय उवाच ।

प्रभातायां तु शर्वर्यां प्रातरुत्थाय वै नृपः ।
राज्ञः समाज्ञापयत सेनां योजयतेति ह ।
अद्य भीष्मो रणे क्रुद्धो निहनिष्यति सोमकान् ॥ १
दुर्योधनस्य तच्छ्रुत्वा रात्रौ विलपितं बहु ।
मन्यमानः स तं राजन्प्रत्यादेशमिवात्मनः ॥ २
निर्वेदं परमं गत्वा विनिन्द्य परवाच्यताम् ।
दीर्घं दध्यौ शांतनवो योद्धुकामोऽर्जुनं रणे ॥ ३
इङ्गितेन तु तज्ज्ञात्वा गाङ्गेयेन विचिन्तितम् ।
दुर्योधनो महाराज दुःशासनमचोदयत् ॥ ४
दुःशासन रथास्तूर्णं युज्यन्तां भीष्मरक्षिणः ।
द्वात्रिंशत्त्वमनीकानि सर्वाण्येवाभिचोदय ॥ ५
इदं हि समनुप्राप्तं वर्षपूगाभिचिन्तितम् ।
पाण्डवानां ससैन्यानां वधो राज्यस्य चागमः ॥ ६
तत्र कार्यमहं मन्ये भीष्मस्यैवाभिरक्षणम् ।
स नो गुप्तः सुखाय स्याद्धन्यात्पार्थांश्च संयुगे ॥ ७
अब्रवीच्च विशुद्धात्मा नाहं हन्यां शिखण्डिनम् ।
स्त्रीपूर्वको ह्यसौ जातस्तस्माद्वर्ज्यो रणे मया ॥ ८
लोकस्तद्वेद यदहं पितुः प्रियचिकीर्षया ।
राज्यं स्फीतं महाबाहो स्त्रियश्च त्यक्तवान्पुरा ॥ ९
नैव चाहं स्त्रियं जातु न स्त्रीपूर्वं कथंचन ।
हन्यां युधि नरश्रेष्ठ सत्यमेतद्ब्रवीमि ते ॥ १०
अयं स्त्रीपूर्वको राजञ्शिखण्डी यदि ते श्रुतः ।
उद्योगे कथितं यत्तत्तथा जाता शिखण्डिनी ॥ ११
कन्या भूत्वा पुमाञ्जातः स च योत्स्यति भारत ।
तस्याहं प्रमुखे बाणान्न मुञ्चेयं कथंचन ॥ १२
युद्धे तु क्षत्रियांस्तात पाण्डवानां जयैषिणः ।
सर्वानन्यान्हनिष्यामि संप्राप्तान्बाणगोचरान् ॥ १३
एवं मां भरतश्रेष्ठो गाङ्गेयः प्राह शास्त्रवित् ।
तत्र सर्वात्मना मन्ये भीष्मस्यैवाभिपालनम् ॥ १४
अरक्ष्यमाणं हि वृको हन्यात्सिंहं महावने ।
मा वृकेणेव शार्दूलं घातयेम शिखण्डिना ॥ १५
मातुलः शकुनिः शल्यः कृपो द्रोणो विविंशतिः ।
यत्ता रक्षन्तु गाङ्गेयं तस्मिन्गुप्ते ध्रुवो जयः ॥ १६
एतच्छ्रुत्वा तु राजानो दुर्योधनवचस्तदा ।
सर्वतो रथवंशेन गाङ्गेयं पर्यवारयन् ॥ १७
पुत्राश्च तव गाङ्गेयं परिवार्य ययुर्मुदा ।
कम्पयन्तो भुवं द्यां च क्षोभयन्तश्च पाण्डवान् ॥
ते रथैश्च सुसंयुक्तैर्दन्तिभिश्च महारथाः ।
परिवार्य रणे भीष्मं दंशिताः समवस्थिताः ॥ १९
यथा देवासुरे युद्धे त्रिदशा वज्रधारिणम् ।
सर्वे ते स्म व्यतिष्ठन्त रक्षन्तस्तं महारथम् ॥ २०
ततो दुर्योधनो राजा पुनर्भ्रातरमब्रवीत् ।
सव्यं चक्रं युधामन्युरुत्तमौजाश्च दक्षिणम् ।
गोप्तारावर्जुनस्यैतावर्जुनोऽपि शिखण्डिनः ॥ २१
स रक्ष्यमाणः पार्थेन तथास्माभिर्विवर्जितः ।
यथा भीष्मं न नो हन्याद्दुःशासन तथा कुरु ॥ २२
भ्रातुस्तद्वचनं श्रुत्वा पुत्रो दुःशासनस्तव ।
भीष्मं प्रमुखतः कृत्वा प्रययौ सेनया सह ॥ २३
भीष्मं तु रथवंशेन दृष्ट्वा तमभिसंवृतम् ।
अर्जुनो रथिनां श्रेष्ठो धृष्टद्युम्नमुवाच ह ॥ २४
शिखण्डिनं नरव्याघ्र भीष्मस्य प्रमुखेऽनघ ।
स्थापयस्वाद्य पाञ्चाल्य तस्य गोप्ताहमप्युत ॥ २५
ततः शांतनवो भीष्मो निर्ययौ सेनया सह ।
व्यूहं चाव्यूहत महत्सर्वतोभद्रमाहवे ॥ २६
कृपश्च कृतवर्मा च शैब्यश्चैव महारथः ।

शकुनिः सैन्धवश्चैव काम्बोजश्च सुदक्षिणः ॥ २७
भीष्मेण सहिताः सर्वे पुत्रैश्च तव भारत ।
अग्रतः सर्वसैन्यानां व्यूहस्य प्रमुखे स्थिताः ॥२८
द्रोणो भूरिश्रवाः शल्यो भगदत्तश्च मारिष ।
दक्षिणं पक्षमाश्रित्य स्थिता व्यूहस्य दंशिताः ॥ २९
अश्वत्थामा सोमदत्त आवन्त्यौ च महारथौ ।
महत्या सेनया युक्ता वामं पक्षमपालयन् ॥ ३०
दुर्योधनो महाराज त्रिगर्तैः सर्वतो वृतः ।
व्यूहमध्ये स्थितो राजन्पाण्डवान्प्रति भारत ॥ ३१
अलम्बुसो रथश्रेष्ठः श्रुतायुश्च महारथः ।
पृष्ठतः सर्वसैन्यानां स्थितौ व्यूहस्य दंशितौ ॥ ३२
एवमेते तदा व्यूहं कृत्वा भारत तावकाः ।
संनद्धाः समदृश्यन्त प्रतपन्त इवाग्नयः ॥ ३३
तथा युधिष्ठिरो राजा भीमसेनश्च पाण्डवः ।
नकुलः सहदेवश्च माद्रीपुत्रावुभावपि ।
अग्रतः सर्वसैन्यानां स्थिता व्यूहस्य दंशिताः ॥ ३४
धृष्टद्युम्नो विराटश्च सात्यकिश्च महारथः ।
स्थिताः सैन्येन महता परानीकविनाशनाः ॥ ३५
शिखण्डी विजयश्चैव राक्षसश्च घटोत्कचः ।
चेकितानो महाबाहुः कुन्तिभोजश्च वीर्यवान् ।
स्थिता रणे महाराज महत्या सेनया वृताः ॥ ३६
अभिमन्युर्महेष्वासो द्रुपदश्च महारथः ।
केकया भ्रातरः पञ्च स्थिता युद्धाय दंशिताः ॥ ३७
एवं तेऽपि महाव्यूहं प्रतिव्यूह्य सुदुर्जयम् ।
पाण्डवाः समरे शूराः स्थिता युद्धाय मारिष ॥ ३८
तावकास्तु रणे यत्ताः सहसेना नराधिपाः ।
अभ्युद्ययू रणे पार्थान्भीष्मं कृत्वाग्रतो नृप ॥ ३९
तथैव पाण्डवा राजन्भीमसेनपुरोगमाः ।
भीष्मं युद्धपरिप्रेप्सुं संग्रामे विजिगीषवः ॥ ४०
क्ष्वेडाः किलिकिलाशब्दान्क्रकचान्गोविषाणिकाः ।
भेरीमृदङ्गपणवान्नादयन्तश्च पुष्करान् ।
पाण्डवा अभ्यधावन्त नदन्तो भैरवान्रवान् ॥ ४१
भेरीमृदङ्गशङ्खानां दुन्दुभीनां च निस्वनैः ।
उत्कृष्टसिंहनादैश्च वल्गितैश्च पृथग्विधैः ॥ ४२
वयं प्रतिनदन्तस्तानभ्यगच्छाम सत्वराः ।
सहसैवाभिसंक्रुद्धास्तदासीत्तुमुलं महत् ॥ ४३
ततोऽन्योन्यं प्रधावन्तः संप्रहारं प्रचक्रिरे ।
ततः शब्देन महता प्रचकम्पे वसुंधरा ॥ ४४
पक्षिणश्च महाघोरं व्याहरन्तो विबभ्रमुः ।
सप्रभश्चोदितः सूर्यो निष्प्रभः समपद्यत ॥ ४५
ववुश्च तुमुला वाताः शंसन्तः सुमहद्भयम् ।
घोराश्च घोरनिर्ह्रादाः शिवास्तत्र ववाशिरे ।
वेदयन्त्यो महाराज महद्वैशसमागतम् ॥ ४६
दिशः प्रज्वलिता राजन्पांसुवर्षं पपात च ।
रुधिरेण समुन्मिश्रमस्थिवर्षं तथैव च ॥ ४७
रुदतां वाहनानां च नेत्रेभ्यः प्रापतज्जलम् ।
सुस्रुवुश्च शकृन्मूत्रं प्रध्यायन्तो विशां पते ॥ ४८
अन्तर्हिता महानादाः श्रूयन्ते भरतर्षभ ।
रक्षसां पुरुषादानां नदतां भैरवान्रवान् ॥ ४९
संपतन्तः स्म दृश्यन्ते गोमायुबकवायसाः ।
श्वानश्च विविधैर्नादैर्भषन्तस्तत्र तस्थिरे ॥ ५०
ज्वलिताश्च महोल्का वै समाहत्य दिवाकरम् ।
निपेतुः सहसा भूमौ वेदयाना महद्भयम् ॥ ५१

महान्त्यनीकानि महासमुच्छ्रये
समागमे पाण्डवधार्तराष्ट्रयोः ।
प्रकाशिरे शङ्खमृदङ्गनिस्वनैः
प्रकम्पितानीव वनानि वायुना ॥ ५२
नरेन्द्रनागाश्वसमाकुलाना-
मभ्यायतीनामशिवे मुहूर्ते ।
बभूव घोषस्तुमुलश्चमूनां

वातोद्धतानामिव सागराणाम् ॥ ५३

इति श्रीमहाभारते भीष्मपर्वणि
पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

९६

संजय उवाच ।

अभिमन्यू रथोदारः पिशङ्गैस्तुरगोत्तमैः ।
अभिदुद्राव तेजस्वी दुर्योधनबलं महत् ।
विकिरञ्शरवर्षाणि वारिधारा इवाम्बुदः ॥ १
न शेकुः समरे क्रुद्धं सौभद्रमरिसूदनम् ।
शस्त्रौघिणं गाहमानं सेनासागरमक्षयम् ।
निवारयितुमप्याजौ त्वदीयाः कुरुपुंगवाः ॥ २
तेन मुक्ता रणे राजञ्शराः शत्रुनिबर्हणाः ।
क्षत्रियाननयञ्शूरान्प्रेतराजनिवेशनम् ॥ ३
यमदण्डोपमान्घोराञ्ज्वलनाशीविषोपमान् ।
सौभद्रः समरे क्रुद्धः प्रेषयामास सायकान् ॥ ४
रथिनं च रथात्तूर्णं हयपृष्ठाच्च सादिनम् ।
गजारोहांश्च सगजान्पातयामास फाल्गुनिः ॥ ५
तस्य तत्कुर्वतः कर्म महत्संख्येऽद्भुतं नृपाः ।
पूजयांचक्रिरे हृष्टाः प्रशशंसुश्च फाल्गुनिम् ॥ ६
तान्यनीकानि सौभद्रो द्रावयन्बह्वशोभत ।
तूलराशिमिवाधूय मारुतः सर्वतोदिशम् ॥ ७
तेन विद्राव्यमाणानि तव सैन्यानि भारत ।
त्रातारं नाध्यगच्छन्त पङ्के मग्ना इव द्विपाः ॥ ८
विद्राव्य सर्वसैन्यानि तावकानि नरोत्तमः ।
अभिमन्युः स्थितो राजन्विधूमोऽग्निरिव ज्वलन् ॥ ९
न चैनं तावकाः सर्वे विषेहुररिघातिनम् ।
प्रदीप्तं पावकं यद्वत्पतंगाः कालचोदिताः ॥ १०
प्रहरन्सर्वशत्रुभ्यः पाण्डवानां महारथः ।
अदृश्यत महेष्वासः सवज्र इव वज्रभृत् ॥ ११
हेमपृष्ठं धनुश्चास्य ददृशे चरतो दिशः ।
तोयदेषु यथा राजन्भ्राजमानाः शतह्रदाः ॥ १२
शराश्च निशिताः पीता निश्चरन्ति स्म संयुगे ।
वनात्फुल्लद्रुमाद्राजन्भ्रमराणामिव व्रजाः ॥ १३
तथैव चरतस्तस्य सौभद्रस्य महात्मनः ।
रथेन मेघघोषेण ददृशुर्नान्तरं जनाः ॥ १४
मोहयित्वा कृपं द्रोणं द्रौणिं च स बृहद्बलम् ।
सैन्धवं च महेष्वासं व्यचरल्लघु सुष्ठु च ॥ १५
मण्डलीकृतमेवास्य धनुः पश्याम मारिष ।
सूर्यमण्डलसंकाशं तपतस्तत्र वाहिनीम् ॥ १६
तं दृष्ट्वा क्षत्रियाः शूराः प्रतपन्तं शरार्चिभिः ।
द्विफल्गुनमिमं लोकं मेनिरे तस्य कर्मभिः ॥ १७
तेनार्दिता महाराज भारती सा महाचमूः ।
बभ्राम तत्र तत्रैव योषिन्मदवशादिव ॥ १८
द्रावयित्वा च तत्सैन्यं कम्पयित्वा महारथान् ।
नन्दयामास सुहृदो मयं जित्वेव वासवः ॥ १९
तेन विद्राव्यमाणानि तव सैन्यानि संयुगे ।
चक्रुरार्तस्वरं घोरं पर्जन्यनिनदोपमम् ॥ २०
तं श्रुत्वा निनदं घोरं तव सैन्यस्य मारिष ।
मारुतोद्धूतवेगस्य समुद्रस्येव पर्वणि ।
दुर्योधनस्तदा राजा आर्श्यशृङ्गिमभाषत ॥ २१
एष कार्ष्णिर्महेष्वासो द्वितीय इव फल्गुनः ।
चमूं द्रावयते क्रोधाद्वृत्रो देवचमूमिव ॥ २२
तस्य नान्यं प्रपश्यामि संयुगे भेषजं महत् ।
ऋते त्वां राक्षसश्रेष्ठ सर्वविद्यासु पारगम् ॥ २३
स गत्वा त्वरितं वीरं जहि सौभद्रमाहवे ।
वयं पार्थान्हनिष्यामो भीष्मद्रोणपुरःसराः ॥ २४
स एवमुक्तो बलवान्राक्षसेन्द्रः प्रतापवान् ।
प्रययौ समरे तूर्णं तव पुत्रस्य शासनात् ।
नर्दमानो महानादं प्रावृषीव बलाहकः ॥ २५
तस्य शब्देन महता पाण्डवानां महद्बलम् ।

प्राचलत्सर्वतो राजन्पूर्यमाण इवार्णवः ॥ २६
बहवश्च नरा राजंस्तस्य नादेन भीषिताः ।
प्रियान्प्राणान्परित्यज्य निपेतुर्धरणीतले ॥ २७
कार्ष्णिश्चापि मुदा युक्तः प्रगृहीतशरासनः ।
नृत्यन्निव रथोपस्थे तद्रक्षः समुपाद्रवत् ॥ २८
ततः स राक्षसः क्रुद्धः संप्राप्यैवार्जुनिं रणे ।
नातिदूरे स्थितस्तस्य द्रावयामास वै चमूम् ॥ २९
सा वध्यमाना समरे पाण्डवानां महाचमूः ।
प्रत्युद्ययौ रणे रक्षो देवसेना यथा बलिम् ॥ ३०
विमर्दः सुमहानासीत्तस्य सैन्यस्य मारिष ।
रक्षसा घोररूपेण वध्यमानस्य संयुगे ॥ ३१
ततः शरसहस्रैस्तां पाण्डवानां महाचमूम् ।
व्यद्रावयद्रणे रक्षो दर्शयद्वै पराक्रमम् ॥ ३२
सा वध्यमाना च तथा पाण्डवानामनीकिनी ।
रक्षसा घोररूपेण प्रदुद्राव रणे भयात् ॥ ३३
तां प्रमृद्य ततः सेनां पद्मिनीं वारणो यथा ।
ततोऽभिदुद्राव रणे द्रौपदेयान्महाबलान् ॥ ३४
ते तु क्रुद्धा महेष्वासा द्रौपदेयाः प्रहारिणः ।
राक्षसं दुद्रुवुः सर्वे ग्रहाः पञ्च यथा रविम् ॥ ३५
वीर्यवद्भिस्ततस्तैस्तु पीडितो राक्षसोत्तमः ।
यथा युगक्षये घोरे चन्द्रमाः पञ्चभिर्ग्रहैः ॥ ३६
प्रतिविन्ध्यस्ततो रक्षो बिभेद निशितैः शरैः ।
सर्वपारशवैस्तूर्णमकुण्ठाग्रैर्महाबलः ॥ ३७
स तैर्भिन्नतनुत्राणः शुशुभे राक्षसोत्तमः ।
मरीचिभिरिवार्कस्य संस्यूतो जलदो महान् ॥ ३८
विषक्तैः स शरैश्चापि तपनीयपरिच्छदैः ।
आर्श्यशृङ्गिर्बभौ राजन्दीप्तशृङ्ग इवाचलः ॥ ३९
ततस्ते भ्रातरः पञ्च राक्षसेन्द्रं महाहवे ।
विव्यधुर्निशितैर्बाणैस्तपनीयविभूषितैः ॥ ४०
स निर्भिन्नः शरैर्घोरैर्भुजगैः कोपितैरिव ।
अलम्बुसो भृशं राजन्नागेन्द्र इव चुक्रुधे ॥ ४१
सोऽतिविद्धो महाराज मुहूर्तमथ मारिष ।
प्रविवेश तमो दीर्घं पीडितस्तैर्महारथैः ॥ ४२
प्रतिलभ्य ततः संज्ञां क्रोधेन द्विगुणीकृतः ।
चिच्छेद सायकैस्तेषां ध्वजांश्चैव धनूंषि च ॥ ४३
एकैकं च त्रिभिर्बाणैराजघान स्मयन्निव ।
अलम्बुसो रथोपस्थे नृत्यन्निव महारथः ॥ ४४
त्वरमाणश्च संक्रुद्धो हयांस्तेषां महात्मनाम् ।
जघान राक्षसः क्रुद्धः सारथींश्च महाबलः ॥ ४५
बिभेद च सुसंहृष्टः पुनश्चैनान्सुसंशितैः ।
शरैर्बहुविधाकारैः शतशोऽथ सहस्रशः ॥ ४६
विरथांश्च महेष्वासान्कृत्वा तत्र स राक्षसः ।
अभिदुद्राव वेगेन हन्तुकामो निशाचरः ॥ ४७
तानर्दितान्रणे तेन राक्षसेन दुरात्मना ।
दृष्ट्वार्जुनसुतः संख्ये राक्षसं समुपाद्रवत् ॥ ४८
तयोः समभवद्युद्धं वृत्रवासवयोरिव ।
ददृशुस्तावकाः सर्वे पाण्डवाश्च महारथाः ॥ ४९
तौ समेतौ महायुद्धे क्रोधदीप्तौ परस्परम् ।
महाबलौ महाराज क्रोधसंरक्तलोचनौ ।
परस्परमवेक्षेतां कालानलसमौ युधि ॥ ५०
तयोः समागमो घोरो बभूव कटुकोदयः ।
यथा देवासुरे युद्धे शक्रशम्बरयोरिव ॥ ५१

इति श्रीमहाभारते भीष्मपर्वणि
षण्णवतितमोऽध्यायः ॥ ९६ ॥

९७

धृतराष्ट्र उवाच ।

आर्जुनिं समरे शूरं विनिघ्नन्तं महारथम् ।
अलम्बुसः कथं युद्धे प्रत्ययुध्यत संजय ॥ १
आर्श्यशृङ्गिं कथं चापि सौभद्रः परवीरहा ।
तन्ममाचक्ष्व तत्त्वेन यथा वृत्तं स्म संयुगे ॥ २

धनंजयश्च किं चक्रे मम सैन्येषु संजय ।
भीमो वा बलिनां श्रेष्ठो राक्षसो वा घटोत्कचः ॥३
नकुलः सहदेवो वा सात्यकिर्वा महारथः ।
एतदाचक्ष्व मे सर्वं कुशलो ह्यसि संजय ॥ ४

संजय उवाच ।

हन्त तेऽहं प्रवक्ष्यामि संग्रामं लोमहर्षणम् ।
यथाभूद्राक्षसेन्द्रस्य सौभद्रस्य च मारिष ॥ ५
अर्जुनश्च यथा संख्ये भीमसेनश्च पाण्डवः ।
नकुलः सहदेवश्च रणे चक्रुः पराक्रमम् ॥ ६
तथैव तावकाः सर्वे भीष्मद्रोणपुरोगमाः ।
अद्भुतानि विचित्राणि चक्रुः कर्माण्यभीतवत् ॥ ७
अलम्बुसस्तु समरे अभिमन्युं महारथम् ।
विनद्य सुमहानादं तर्जयित्वा मुहुर्मुहुः ।
अभिदुद्राव वेगेन तिष्ठ तिष्ठेति चाब्रवीत् ॥ ८
सौभद्रोऽपि रणे राजन्सिंहवद्विनदन्मुहुः ।
आर्श्यशृङ्गिं महेष्वासं पितुरत्यन्तवैरिणम् ॥ ९
ततः समेयतुः संख्ये त्वरितौ नरराक्षसौ ।
रथाभ्यां रथिनां श्रेष्ठौ यथा वै देवदानवौ ।
मायावी राक्षसश्रेष्ठो दिव्यास्त्रज्ञश्च फाल्गुनिः ॥१०
ततः कार्ष्णिर्महाराज निशितैः सायकैस्त्रिभिः ।
आर्श्यशृङ्गिं रणे विद्ध्वा पुनर्विव्याध पञ्चभिः॥११
अलम्बुसोऽपि संक्रुद्धः कार्ष्णिं नवभिराशुगैः ।
हृदि विव्याध वेगेन तोत्त्रैरिव महाद्विपम् ॥ १२
ततः शरसहस्रेण क्षिप्रकारी निशाचरः ।
अर्जुनस्य सुतं संख्ये पीडयामास भारत ॥ १३
अभिमन्युस्ततः क्रुद्धो नवतिं नतपर्वणाम् ।
चिक्षेप निशितान्बाणान्राक्षसस्य महोरसि ॥ १४
ते तस्य विविशुस्तूर्णं कायं निर्भिद्य मर्मणि ।
स तैर्विभिन्नसर्वाङ्गः शुशुभे राक्षसोत्तमः ।
पुष्पितैः किंशुकै राजन्संस्तीर्ण इव पर्वतः ॥ १५
स धारयञ्शरान्हेमपुङ्खानपि महाबलः ।
विबभौ राक्षसश्रेष्ठः सज्वाल इव पर्वतः ॥ १६
ततः क्रुद्धो महाराज आर्श्यशृङ्गिर्महाबलः ।
महेन्द्रप्रतिमं कार्ष्णिं छादयामास पत्रिभिः ॥ १७
तेन ते विशिखा मुक्ता यमदण्डोपमाः शिताः ।
अभिमन्युं विनिर्भिद्य प्राविशन्धरणीतलम् ॥ १८
तथैवार्जुनिनिर्मुक्ताः शराः काञ्चनभूषणाः ।
अलम्बुसं विनिर्भिद्य प्राविशन्त धरातलम् ॥ १९
सौभद्रस्तु रणे रक्षः शरैः संनतपर्वभिः ।
चक्रे विमुखमासाद्य मयं शक्र इवाहवे ॥ २०
विमुखं च ततो रक्षो वध्यमानं रणेऽरिणा ।
प्रादुश्चक्रे महामायां तामसीं परतापनः ॥ २१
ततस्ते तमसा सर्वे हृता ह्यासन्महीतले ।
नाभिमन्युमपश्यन्त नैव स्वान्न परान्रणे ॥ २२
अभिमन्युश्च तद्दृष्ट्वा घोररूपं महत्तमः ।
प्रादुश्चक्रेऽस्त्रमत्युग्रं भास्करं कुरुनन्दनः ॥ २३
ततः प्रकाशमभवज्जगत्सर्वं महीपते ।
तां चापि जघ्निवान्मायां राक्षसस्य दुरात्मनः ॥२४
संक्रुद्धश्च महावीर्यो राक्षसेन्द्रं नरोत्तमः ।
छादयामास समरे शरैः संनतपर्वभिः ॥ २५
बह्वीस्तथान्या मायाश्च प्रयुक्तास्तेन रक्षसा ।
सर्वास्त्रविदमेयात्मा वारयामास फाल्गुनिः ॥२६
हतमायं ततो रक्षो वध्यमानं च सायकैः ।
रथं तत्रैव संत्यज्य प्राद्रवन्महतो भयात् ॥ २७
तस्मिन्विनिर्जिते तूर्णं कूटयोधिनि राक्षसे ।
आर्जुनिः समरे सैन्यं तावकं संममर्द ह ।
मदान्धो वन्यनागेन्द्रः सपद्मां पद्मिनीमिव ॥ २८
ततः शांतनवो भीष्मः सैन्यं दृष्ट्वाभिविद्रुतम् ।
महता रथवंशेन सौभद्रं पर्यवारयत् ॥ २९
कोष्ठकीकृत्य तं वीरं धार्तराष्ट्रा महारथाः ।

एकं सुबहवो युद्धे ततक्षुः सायकैर्दृढम् ॥ ३०
स तेषां रथिनां वीरः पितुस्तुल्यपराक्रमः ।
सदृशो वासुदेवस्य विक्रमेण बलेन च ॥ ३१
उभयोः सदृशं कर्म स पितुर्मातुलस्य च ।
रणे बहुविधं चक्रे सर्वशस्त्रभृतां वरः ॥ ३२
ततो धनंजयो राजन्विनिघ्नंस्तव सैनिकान् ।
आससाद रणे भीष्मं पुत्रप्रेप्सुरमर्षणः ॥ ३३
तथैव समरे राजन्पिता देवव्रतस्तव ।
आससाद रणे पार्थं स्वर्भानुरिव भास्करम् ॥ ३४
ततः सरथनागाश्वाः पुत्रास्तव विशां पते ।
परिवव्रू रणे भीष्मं जुगुपुश्च समन्ततः ॥ ३५
तथैव पाण्डवा राजन्परिवार्य धनंजयम् ।
रणाय महते युक्ता दंशिता भरतर्षभ ॥ ३६
शारद्वतस्ततो राजन्भीष्मस्य प्रमुखे स्थितम् ।
अर्जुनं पञ्चविंशत्या सायकानां समाचिनोत् ॥ ३७
प्रत्युद्गम्याथ विव्याध सात्यकिस्तं शितैः शरैः ।
पाण्डवप्रियकामार्थं शार्दूल इव कुञ्जरम् ॥ ३८
गौतमोऽपि त्वरायुक्तो माधवं नवभिः शरैः ।
हृदि विव्याध संक्रुद्धः कङ्कपत्रपरिच्छदैः ॥ ३९
शैनेयोऽपि ततः क्रुद्धो भृशं विद्धो महारथः ।
गौतमान्तकरं घोरं समादत्त शिलीमुखम् ॥ ४०
तमापतन्तं वेगेन शक्राशनिसमद्युतिम् ।
द्विधा चिच्छेद संक्रुद्धो द्रौणिः परमकोपनः ॥ ४१
समुत्सृज्याथ शैनेयो गौतमं रथिनां वरम् ।
अभ्यद्रवद्रणे द्रौणिं राहुः खे शशिनं यथा ॥ ४२
तस्य द्रोणसुतश्चापं द्विधा चिच्छेद भारत ।
अथैनं छिन्नधन्वानं ताडयामास सायकैः ॥ ४३
सोऽन्यत्कार्मुकमादाय शत्रुघ्नं भारसाधनम् ।
द्रौणिं षष्ट्या महाराज बाह्वोरुरसि चार्पयत् ॥ ४४
स विद्धो व्यथितश्चैव मुहूर्तं कश्मलायुतः ।
निषसाद रथोपस्थे ध्वजयष्टिमुपाश्रितः ॥ ४५
प्रतिलभ्य ततः संज्ञां द्रोणपुत्रः प्रतापवान् ।
वार्ष्णेयं समरे क्रुद्धो नाराचेन समर्दयत् ॥ ४६
शैनेयं स तु निर्भिद्य प्राविशद्धरणीतलम् ।
वसन्तकाले बलवान्बिलं सर्पशिशुर्यथा ॥ ४७
ततोऽपरेण भल्लेन माधवस्य ध्वजोत्तमम् ।
चिच्छेद समरे द्रौणिः सिंहनादं ननाद च ॥ ४८
पुनश्चैनं शरैर्घोरैश्छादयामास भारत ।
निदाघान्ते महाराज यथा मेघो दिवाकरम् ॥ ४९
सात्यकिश्च महाराज शरजालं निहत्य तत् ।
द्रौणिमभ्यपतत्तूर्णं शरजालैरनेकधा ॥ ५०
तापयामास च द्रौणिं शैनेयः परवीरहा ।
विमुक्तो मेघजालेन यथैव तपनस्तथा ॥ ५१
शराणां च सहस्रेण पुनरेनं समुद्यतम् ।
सात्यकिश्छादयामास ननाद च महाबलः ॥ ५२
दृष्ट्वा पुत्रं तथा ग्रस्तं राहुणेव निशाकरम् ।
अभ्यद्रवत शैनेयं भारद्वाजः प्रतापवान् ॥ ५३
विव्याध च पृषत्केन सुतीक्ष्णेन महामृधे ।
परीप्सन्स्वसुतं राजन्वार्ष्णेयेनाभितापितम् ॥ ५४
सात्यकिस्तु रणे जित्वा गुरुपुत्रं महारथम् ।
द्रोणं विव्याध विंशत्या सर्वपारशवैः शरैः ॥ ५५
तदन्तरममेयात्मा कौन्तेयः श्वेतवाहनः ।
अभ्यद्रवद्रणे क्रुद्धो द्रोणं प्रति महारथः ॥ ५६
ततो द्रोणश्च पार्थश्च समेयातां महामृधे ।
यथा बुधश्च शुक्रश्च महाराज नभस्तले ॥ ५७

इति श्रीमहाभारते भीष्मपर्वणि
सप्तनवतितमोऽध्यायः ॥ ९७ ॥

९८

धृतराष्ट्र उवाच ।

कथं द्रोणो महेष्वासः पाण्डवश्च धनंजयः ।

समीयतू रणे शूरौ तन्ममाचक्ष्व संजय ॥ १
प्रियो हि पाण्डवो नित्यं भारद्वाजस्य धीमतः ।
आचार्यश्च रणे नित्यं प्रियः पार्थस्य संजय ॥ २
तावुभौ रथिनौ संख्ये दृप्तौ सिंहाविवोत्कटौ ।
कथं समीयतुर्युद्धे भारद्वाजधनंजयौ ॥ ३

संजय उवाच ।

न द्रोणः समरे पार्थं जानीते प्रियमात्मनः ।
क्षत्रधर्मं पुरस्कृत्य पार्थो वा गुरुमाहवे ॥ ४
न क्षत्रिया रणे राजन्वर्जयन्ति परस्परम् ।
निर्मर्यादं हि युध्यन्ते पितृभिर्भ्रातृभिः सह ॥ ५
रणे भारत पार्थेन द्रोणो विद्धस्त्रिभिः शरैः ।
नाचिन्तयत तान्बाणान्पार्थचापच्युतान्युधि ॥ ६
शरवृष्ट्या पुनः पार्थश्छादयामास तं रणे ।
प्रजज्वाल च रोषेण गहनेऽग्निरिवोत्थितः ॥ ७
ततोऽर्जुनं रणे द्रोणः शरैः संनतपर्वभिः ।
वारयामास राजेन्द्र नचिरादिव भारत ॥ ८
ततो दुर्योधनो राजा सुशर्माणमचोदयत् ।
द्रोणस्य समरे राजन्पार्ष्णिग्रहणकारणात् ॥ ९
त्रिगर्तराडपि क्रुद्धो भृशमायम्य कार्मुकम् ।
छादयामास समरे पार्थं बाणैरयोमुखैः ॥ १०
ताभ्यां मुक्ताः शरा राजन्नन्तरिक्षे विरेजिरे ।
हंसा इव महाराज शरत्काले नभस्तले ॥ ११
ते शराः प्राप्य कौन्तेयं समस्ता विविशुः प्रभो ।
फलभारनतं यद्वत्स्वादुवृक्षं विहंगमाः ॥ १२
अर्जुनस्तु रणे नादं विनद्य रथिनां वरः ।
त्रिगर्तराजं समरे सपुत्रं विव्यधे शरैः ॥ १३
ते वध्यमानाः पार्थेन कालेनेव युगक्षये ।
पार्थमेवाभ्यवर्तन्त मरणे कृतनिश्चयाः ।
मुमुचुः शरवृष्टिं च पाण्डवस्य रथं प्रति ॥ १४
शरवृष्टिं ततस्तां तु शरवर्षेण पाण्डवः ।
प्रतिजग्राह राजेन्द्र तोयवृष्टिमिवाचलः ॥ १५
तत्राद्भुतमपश्याम बीभत्सोर्हस्तलाघवम् ।
विमुक्तां बहुभिः शूरैः शस्त्रवृष्टिं दुरासदाम् ॥ १६
यदेको वारयामास मारुतोऽभ्रगणानिव ।
कर्मणा तेन पार्थस्य तुतुषुर्देवदानवाः ॥ १७
अथ क्रुद्धो रणे पार्थस्त्रिगर्तान्प्रति भारत ।
मुमोचास्त्रं महाराज वायव्यं पृतनामुखे ॥ १८
प्रादुरासीत्ततो वायुः क्षोभयाणो नभस्तलम् ।
पातयन्वै तरुगणान्विनिघ्नंश्चैव सैनिकान् ॥ १९
ततो द्रोणोऽभिवीक्ष्यैव वायव्यास्त्रं सुदारुणम् ।
शैलमन्यन्महाराज घोरमस्त्रं मुमोच ह ॥ २०
द्रोणेन युधि निर्मुक्ते तस्मिन्नस्त्रे महामृधे ।
प्रशशाम ततो वायुः प्रसन्नाश्चाभवन्दिशः ॥ २१
ततः पाण्डुसुतो वीरस्त्रिगर्तस्य रथव्रजान् ।
निरुत्साहान्रणे चक्रे विमुखान्विपराक्रमान् ॥ २२
ततो दुर्योधनो राजा कृपश्च रथिनां वरः ।
अश्वत्थामा ततः शल्यः काम्बोजश्च सुदक्षिणः ॥
विन्दानुविन्दावावन्त्यौ बाह्लिकश्च सबाह्लिकः ।
महता रथवंशेन पार्थस्यावारयन्दिशः ॥ २४
तथैव भगदत्तश्च श्रुतायुश्च महाबलः ।
गजानीकेन भीमस्य ताववारयतां दिशः ॥ २५
भूरिश्रवाः शलश्चैव सौबलश्च विशां पते ।
शरौघैर्विविधैस्तूर्णं माद्रीपुत्राववारयन् ॥ २६
भीष्मस्तु सहितः सर्वैर्धार्तराष्ट्रस्य सैनिकैः ।
युधिष्ठिरं समासाद्य सर्वतः पर्यवारयत् ॥ २७
आपतन्तं गजानीकं दृष्ट्वा पार्थो वृकोदरः ।
लेलिहन्सृक्किणी वीरो मृगराडिव कानने ॥ २८
ततस्तु रथिनां श्रेष्ठो गदां गृह्य महाहवे ।
अवप्लुत्य रथात्तूर्णं तव सैन्यमभीषयत् ॥ २९
तमुद्वीक्ष्य गदाहस्तं ततस्ते गजसादिनः ।

परिवव्रू रणे यत्ता भीमसेनं समन्ततः ॥ ३०
गजमध्यमनुप्राप्तः पाण्डवश्च व्यराजत ।
मेघजालस्य महतो यथा मध्यगतो रविः ॥ ३१
व्यधमत्स गजानीकं गदया पाण्डवर्षभः ।
महाभ्रजालमतुलं मातरिश्वेव संततम् ॥ ३२
ते वध्यमाना बलिना भीमसेनेन दन्तिनः ।
आर्तनादं रणे चक्रुर्गर्जन्तो जलदा इव ॥ ३३
बहुधा दारितश्चैव विषाणैस्तत्र दन्तिभिः ।
फुल्लाशोकनिभः पार्थः शुशुभे रणमूर्धनि ॥ ३४
विषाणे दन्तिनं गृह्य निर्विषाणमथाकरोत् ।
विषाणेन च तेनैव कुम्भेऽभ्याहत्य दन्तिनम् ।
पातयामास समरे दण्डहस्त इवान्तकः ॥ ३५
शोणिताक्तां गदां बिभ्रन्मेदोमज्जाकृतच्छविः ।
कृताङ्गदः शोणितेन रुद्रवत्प्रत्यदृश्यत ॥ ३६
एवं ते वध्यमानास्तु हतशेषा महागजाः ।
प्राद्रवन्त दिशो राजन्विमृद्नन्तः स्वकं बलम् ॥ ३७
द्रवद्भिस्तैर्महानागैः समन्ताद्भरतर्षभ ।
दुर्योधनबलं सर्वं पुनरासीत्पराङ्मुखम् ॥ ३८

इति श्रीमहाभारते भीष्मपर्वणि
अष्टनवतितमोऽध्यायः ॥ ९८ ॥

९९

संजय उवाच ।

मध्याह्ने तु महाराज संग्रामः समपद्यत ।
लोकक्षयकरो रौद्रो भीष्मस्य सह सोमकैः ॥ १
गाङ्गेयो रथिनां श्रेष्ठः पाण्डवानामनीकिनीम् ।
व्यधमन्निशितैर्बाणैः शतशोऽथ सहस्रशः ॥ २
संममर्द च तत्सैन्यं पिता देवव्रतस्तव ।
धान्यानामिव लूनानां प्रकरं गोगणा इव ॥ ३
धृष्टद्युम्नः शिखण्डी च विराटो द्रुपदस्तथा ।
भीष्ममासाद्य समरे शरैर्जघ्नुर्महारथम् ॥ ४
धृष्टद्युम्नं ततो विद्ध्वा विराटं च त्रिभिः शरैः ।
द्रुपदस्य च नाराचं प्रेषयामास भारत ॥ ५
तेन विद्धा महेष्वासा भीष्मेणामित्रकर्शिना ।
चुक्रुधुः समरे राजन्पादस्पृष्टा इवोरगाः ॥ ६
शिखण्डी तं च विव्याध भरतानां पितामहम् ।
स्त्रीमयं मनसा ध्यात्वा नास्मै प्राहरदच्युतः ॥ ७
धृष्टद्युम्नस्तु समरे क्रोधादग्निरिव ज्वलन् ।
पितामहं त्रिभिर्बाणैर्बाह्वोरुरसि चार्पयत् ॥ ८
द्रुपदः पञ्चविंशत्या विराटो दशभिः शरैः ।
शिखण्डी पञ्चविंशत्या भीष्मं विव्याध सायकैः ॥ ९
सोऽतिविद्धो महाराज भीष्मः संख्ये महात्मभिः ।
वसन्ते पुष्पशबलो रक्ताशोक इवाबभौ ॥ १०
तान्प्रत्यविध्यद्गाङ्गेयस्त्रिभिस्त्रिभिरजिह्मगैः ।
द्रुपदस्य च भल्लेन धनुश्चिच्छेद मारिष ॥ ११
सोऽन्यत्कार्मुकमादाय भीष्मं विव्याध पञ्चभिः ।
सारथिं च त्रिभिर्बाणैः सुशितै रणमूर्धनि ॥ १२
ततो भीमो महाराज द्रौपद्याः पञ्च चात्मजाः ।
केकया भ्रातरः पञ्च सात्यकिश्चैव सात्वतः ॥ १३
अभ्यद्रवन्त गाङ्गेयं युधिष्ठिरहितेप्सया ।
रिरक्षिषन्तः पाञ्चाल्यं धृष्टद्युम्नमुखान्रणे ॥ १४
तथैव तावकाः सर्वे भीष्मरक्षार्थमुद्यताः ।
प्रत्युद्ययुः पाण्डुसेनां सहसैन्या नराधिप ॥ १५
तत्रासीत्सुमहद्युद्धं तव तेषां च संकुलम् ।
नराश्वरथनागानां यमराष्ट्रविवर्धनम् ॥ १६
रथी रथिनमासाद्य प्राहिणोद्यमसादनम् ।
तथेतरान्समासाद्य नरनागाश्वसादिनः ॥ १७
अनयन्परलोकाय शरैः संनतपर्वभिः ।
अस्त्रैश्च विविधैर्घोरैस्तत्र तत्र विशां पते ॥ १८
रथाश्च रथिभिर्हीना हतसारथयस्तथा ।
विप्रद्रुताश्वाः समरे दिशो जग्मुः समन्ततः ॥ १९

मर्दमाना नरान्राजन्हयांश्च सुबहून्रणे ।
वातायमाना दृश्यन्ते गन्धर्वनगरोपमाः ॥ २०
रथिनश्च रथैर्हीना वर्मिणस्तेजसा युताः ।
कुण्डलोष्णीषिणः सर्वे निष्काङ्गदविभूषिताः ॥ २१
देवपुत्रसमा रूपे शौर्ये शक्रसमा युधि ।
ऋद्ध्या वैश्रवणं चाति नयेन च बृहस्पतिम् ॥ २२
सर्वलोकेश्वराः शूरास्तत्र तत्र विशां पते ।
विप्रद्रुता व्यदृश्यन्त प्राकृता इव मानवाः ॥ २३
दन्तिनश्च नरश्रेष्ठ विहीना वरसादिभिः ।
मृद्नन्तः स्वान्यनीकानि संपेतुः सर्वशब्दगाः ॥ २४
वर्मभिश्चामरैश्छत्रैः पताकाभिश्च मारिष ।
कक्ष्याभिरथ तोत्रैश्च घण्टाभिस्तोमरैस्तथा ॥ २५
विशीर्णैर्विप्रधावन्तो दृश्यन्ते स्म दिशो दश ।
नगमेघप्रतीकाशैर्जलदोदयनिस्वनैः ॥ २६
तथैव दन्तिभिर्हीनान्गजारोहान्विशां पते ।
प्रधावन्तोऽन्वपश्याम तव तेषां च संकुले ॥ २७
नानादेशसमुत्थांश्च तुरगान्हेमभूषितान् ।
वातायमानानद्राक्षं शतशोऽथ सहस्रशः ॥ २८
अश्वारोहान्हतैरश्वैर्गृहीतासीन्समन्ततः ।
द्रवमाणानपश्याम द्राव्यमाणांश्च संयुगे ॥ २९
गजो गजं समासाद्य द्रवमाणं महारणे ।
ययौ विमृद्नंस्तरसा पदातीन्वाजिनस्तथा ॥ ३०
तथैव च रथान्राजन्संममर्द रणे गजः ।
रथश्चैव समासाद्य पदातिं तुरगं तथा ॥ ३१
व्यमृद्नात्समरे राजंस्तुरगांश्च नरान्रणे ।
एवं ते बहुधा राजन्प्रमृद्नन्तः परस्परम् ॥ ३२
तस्मिन्रौद्रे तथा युद्धे वर्तमाने महाभये ।
प्रावर्तत नदी घोरा शोणितान्त्रतरङ्गिणी ॥ ३३
अस्थिसंचयसंघाटा केशशैवलशाद्वला ।
रथह्रदा शरावर्ता हयमीना दुरासदा ॥ ३४
शीर्षोपलसमाकीर्णा हस्तिग्राहसमाकुला ।
कवचोष्णीषफेनाढ्या धनुर्द्वीपासिकच्छपा ॥ ३५
पताकाध्वजवृक्षाढ्या मर्त्यकूलापहारिणी ।
क्रव्यादसंघसंकीर्णा यमराष्ट्रविवर्धिनी ॥ ३६
तां नदीं क्षत्रियाः शूरा हयनागरथप्लवैः ।
प्रतेरुर्बहवो राजन्भयं त्यक्त्वा महाहवे ॥ ३७
अपोवाह रणे भीरून्कश्मलेनाभिसंवृतान् ।
यथा वैतरणी प्रेतान्प्रेतराजपुरं प्रति ॥ ३८
प्राक्रोशन्क्षत्रियास्तत्र दृष्ट्वा तद्वैशसं महत् ।
दुर्योधनापराधेन क्षयं गच्छन्ति कौरवाः ॥ ३९
गुणवत्सु कथं द्वेषं धार्तराष्ट्रो जनेश्वरः ।
कृतवान्पाण्डुपुत्रेषु पापात्मा लोभमोहितः ॥ ४०
एवं बहुविधा वाचः श्रूयन्ते स्मात्र भारत ।
पाण्डवस्तवसंयुक्ताः पुत्राणां ते सुदारुणाः ॥ ४१
ता निशम्य तदा वाचः सर्वयोधैरुदाहृताः ।
आगस्कृत्सर्वलोकस्य पुत्रो दुर्योधनस्तव ॥ ४२
भीष्मं द्रोणं कृपं चैव शल्यं चोवाच भारत ।
युध्यध्वमनहंकाराः किं चिरं कुरुथेति च ॥ ४३
ततः प्रववृते युद्धं कुरूणां पाण्डवैः सह ।
अक्षद्यूतकृतं राजन्सुघोरं वैशसं तदा ॥ ४४
यत्पुरा न निगृह्णीषे वार्यमाणो महात्मभिः ।
वैचित्रवीर्य तस्येदं फलं पश्य तथाविधम् ॥ ४५
न हि पाण्डुसुता राजन्ससैन्याः सपदानुगाः ।
रक्षन्ति समरे प्राणान्कौरवा वा विशां पते ॥ ४६
एतस्मात्कारणाद्घोरो वर्तते स्म जनक्षयः ।
दैवाद्वा पुरुषव्याघ्र तव चापनयान्नृप ॥ ४७

इति श्रीमहाभारते भीष्मपर्वणि
एकोनशततमोऽध्यायः ॥ ९९ ॥

१००

संजय उवाच ।

अर्जुनस्तु नरव्याघ्र सुशर्मप्रमुखान्नृपान् ।
अनयत्प्रेतराजस्य भवनं सायकैः शितैः ॥ १
सुशर्मापि ततो बाणैः पार्थं विव्याध संयुगे ।
वासुदेवं च सप्तत्या पार्थं च नवभिः पुनः ॥ २
तान्निवार्य शरौघेण शक्रसूनुर्महारथः ।
सुशर्मणो रणे योधान्प्राहिणोद्यमसादनम् ॥ ३
ते वध्यमानाः पार्थेन कालेनेव युगक्षये ।
व्यद्रवन्त रणे राजन्भये जाते महारथाः ॥ ४
उत्सृज्य तुरगान्केचिद्रथान्केचिच्च मारिष ।
गजानन्ये समुत्सृज्य प्राद्रवन्त दिशो दश ॥ ५
अपरे तुद्यमानास्तु वाजिनागरथा रणात् ।
त्वरया परया युक्ताः प्राद्रवन्त विशां पते ॥ ६
पादाताश्चापि शस्त्राणि समुत्सृज्य महारणे ।
निरपेक्षा व्यधावन्त तेन तेन स्म भारत ॥ ७
वार्यमाणाः स्म बहुशस्त्रैगर्तेन सुशर्मणा ।
तथान्यैः पार्थिवश्रेष्ठैर्न व्यतिष्ठन्त संयुगे ॥ ८
तद्बलं प्रद्रुतं दृष्ट्वा पुत्रो दुर्योधनस्तव ।
पुरस्कृत्य रणे भीष्मं सर्वसैन्यपुरस्कृतम् ॥ ९
सर्वोद्योगेन महता धनंजयमुपाद्रवत् ।
त्रिगर्ताधिपतेरर्थे जीवितस्य विशां पते ॥ १०
स एकः समरे तस्थौ किरन्बहुविधाञ्शरान् ।
भ्रातृभिः सहितः सर्वैः शेषा विप्रद्रुता नराः ॥ ११
तथैव पाण्डवा राजन्सर्वोद्योगेन दंशिताः ।
प्रययुः फल्गुनार्थाय यत्र भीष्मो व्यवस्थितः ॥ १२
जानन्तोऽपि रणे शौर्यं घोरं गाण्डीवधन्वनः ।
हाहाकारकृतोत्साहा भीष्मं जग्मुः समन्ततः ॥ १३
ततस्तालध्वजः शूरः पाण्डवानामनीकिनीम् ।
छादयामास समरे शरैः संनतपर्वभिः ॥ १४
एकीभूतास्ततः सर्वे कुरवः पाण्डवैः सह ।
अयुध्यन्त महाराज मध्यं प्राप्ते दिवाकरे ॥ १५
सात्यकिः कृतवर्माणं विद्ध्वा पञ्चभिरायसैः ।
अतिष्ठदाहवे शूरः किरन्बाणान्सहस्रशः ॥ १६
तथैव द्रुपदो राजा द्रोणं विद्ध्वा शितैः शरैः ।
पुनर्विव्याध सप्तत्या सारथिं चास्य सप्तभिः ॥ १७
भीमसेनस्तु राजानं बाह्लिकं प्रपितामहम् ।
विद्ध्वानदन्महानादं शार्दूल इव कानने ॥ १८
आर्जुनिश्चित्रसेनेन विद्धो बहुभिराशुगैः ।
चित्रसेनं त्रिभिर्बाणैर्विव्याध हृदये भृशम् ॥ १९
समागतौ तौ तु रणे महामात्रौ व्यरोचताम् ।
यथा दिवि महाघोरौ राजन्बुधशनैश्चरौ ॥ २०
तस्याश्वांश्चतुरो हत्वा सूतं च नवभिः शरैः ।
ननाद बलवन्नादं सौभद्रः परवीरहा ॥ २१
हताश्वात्तु रथात्तूर्णमवप्लुत्य महारथः ।
आरुरोह रथं तूर्णं दुर्मुखस्य विशां पते ॥ २२
द्रोणश्च द्रुपदं विद्ध्वा शरैः संनतपर्वभिः ।
सारथिं चास्य विव्याध त्वरमाणः पराक्रमी ॥ २३
पीड्यमानस्ततो राजा द्रुपदो वाहिनीमुखे ।
अपायाज्जवनैरश्वैः पूर्ववैरमनुस्मरन् ॥ २४
भीमसेनस्तु राजानं मुहूर्तादिव बाह्लिकम् ।
व्यश्वसूतरथं चक्रे सर्वसैन्यस्य पश्यतः ॥ २५
ससंभ्रमो महाराज संशयं परमं गतः ।
अवप्लुत्य ततो वाहाद्बाह्लिकः पुरुषोत्तमः ।
आरुरोह रथं तूर्णं लक्ष्मणस्य महारथः ॥ २६
सात्यकिः कृतवर्माणं वारयित्वा महारथः ।
शरैर्बहुविधै राजन्नाससाद पितामहम् ॥ २७
स विद्ध्वा भारतं षष्ट्या निशितैर्लोमवाहिभिः ।
ननर्तेव रथोपस्थे विधुन्वानो महद्धनुः ॥ २८
तस्यायसीं महाशक्तिं चिक्षेपाथ पितामहः ।

हेमचित्रां महावेगां नागकन्योपमां शुभाम् ॥ २९
तामापतन्तीं सहसा मृत्युकल्पां सुतेजनाम् ।
ध्वंसयामास वार्ष्णेयो लाघवेन महायशाः ॥ ३०
अनासाद्य तु वार्ष्णेयं शक्तिः परमदारुणा ।
न्यपतद्धरणीपृष्ठे महोल्केव गतप्रभा ॥ ३१
वार्ष्णेयस्तु ततो राजन्स्वां शक्तिं घोरदर्शनाम् ।
वेगवद्गृह्य चिक्षेप पितामहरथं प्रति ॥ ३२
वार्ष्णेयभुजवेगेन प्रणुन्ना सा महाहवे ।
अभिदुद्राव वेगेन कालरात्रिर्यथा नरम् ॥ ३३
तामापतन्तीं सहसा द्विधा चिच्छेद भारत ।
क्षुरप्राभ्यां सुतीक्ष्णाभ्यां सान्वकीर्यत भूतले ॥ ३४
छित्त्वा तु शक्तिं गाङ्गेयः सात्यकिं नवभिः शरैः ।
आजघानोरसि क्रुद्धः प्रहसञ्शत्रुकर्शनः ॥ ३५
ततः सरथनागाश्वाः पाण्डवाः पाण्डुपूर्वज ।
परिवव्रू रणे भीष्मं माधवत्राणकारणात् ॥ ३६
ततः प्रववृते युद्धं तुमुलं लोमहर्षणम् ।
पाण्डवानां कुरूणां च समरे विजयैषिणाम् ॥ ३७

इति श्रीमहाभारते भीष्मपर्वणि
शततमोऽध्यायः ॥ १०० ॥

१०१

संजय उवाच ।

दृष्ट्वा भीष्मं रणे क्रुद्धं पाण्डवैरभिसंवृतम् ।
यथा मेघैर्महाराज तपान्ते दिवि भास्करम् ॥ १
दुर्योधनो महाराज दुःशासनमभाषत ।
एष शूरो महेष्वासो भीष्मः शत्रुनिषूदनः ॥ २
छादितः पाण्डवैः शूरैः समन्ताद्भरतर्षभ ।
तस्य कार्यं त्वया वीर रक्षणं सुमहात्मनः ॥ ३
रक्ष्यमाणो हि समरे भीष्मोऽस्माकं पितामहः ।
निहन्यात्समरे यत्तान्पाञ्चालान्पाण्डवैः सह ॥ ४
तत्र कार्यमहं मन्ये भीष्मस्यैवाभिरक्षणम् ।
गोप्ता ह्येष महेष्वासो भीष्मोऽस्माकं पितामहः ॥५
स भवान्सर्वसैन्येन परिवार्य पितामहम् ।
समरे दुष्करं कर्म कुर्वाणं परिरक्षतु ॥ ६
एवमुक्तस्तु समरे पुत्रो दुःशासनस्तव ।
परिवार्य स्थितो भीष्मं सैन्येन महता वृतः ॥ ७
ततः शतसहस्रेण हयानां सुबलात्मजः ।
विमलप्रासहस्तानामृष्टितोमरधारिणाम् ॥ ८
दर्पितानां सुवेगानां बलस्थानां पताकिनाम् ।
शिक्षितैर्युद्धकुशलैरुपेतानां नरोत्तमैः ॥ ९
नकुलं सहदेवं च धर्मराजं च पाण्डवम् ।
न्यवारयन्नरश्रेष्ठं परिवार्य समन्ततः ॥ १०
ततो दुर्योधनो राजा शूराणां हयसादिनाम् ।
अयुतं प्रेषयामास पाण्डवानां निवारणे ॥ ११
तैः प्रविष्टैर्महावेगैर्गरुत्मद्भिरिवाहवे ।
खुराहता धरा राजंश्चकम्पे च ननाद च ॥ १२
खुरशब्दश्च सुमहान्वाजिनां शुश्रुवे तदा ।
महावंशवनस्येव दह्यमानस्य पर्वते ॥ १३
उत्पतद्भिश्च तैस्तत्र समुद्भूतं महद्रजः ।
दिवाकरपथं प्राप्य छादयामास भास्करम् ॥ १४
वेगवद्भिर्हयैस्तैस्तु क्षोभितं पाण्डवं बलम् ।
निपतद्भिर्महावेगैर्हंसैरिव महत्सरः ।
हेषतां चैव शब्देन न प्राज्ञायत किंचन ॥ १५
ततो युधिष्ठिरो राजा माद्रीपुत्रौ च पाण्डवौ ।
प्रत्यघ्नंस्तरसा वेगं समरे हयसादिनाम् ॥ १६
उद्वृत्तस्य महाराज प्रावृट्कालेन पूर्यतः ।
पौर्णमास्यामम्बुवेगं यथा वेला महोदधेः ॥ १७
ततस्ते रथिनो राजञ्शरैः संनतपर्वभिः ।
न्यकृन्तन्नुत्तमाङ्गानि कायेभ्यो हयसादिनाम् ॥ १८
ते निपेतुर्महाराज निहता दृढधन्विभिः ।
नागैरिव महानागा यथा स्युर्गिरिगह्वरे ॥ १९

तेऽपि प्रासैः सुनिशितैः शरैः संनतपर्वभिः ।
न्यकृन्तन्नुत्तमाङ्गानि विचरन्तो दिशो दश ॥ २०
अत्यासन्ना हयारोहा ऋष्टिभिर्भरतर्षभ ।
अच्छिनन्नुत्तमाङ्गानि फलानीव महाद्रुमात् ॥ २१
ससादिनो हया राजंस्तत्र तत्र निषूदिताः ।
पतिताः पात्यमानाश्च शतशोऽथ सहस्रशः ॥ २२
वध्यमाना हयास्ते तु प्राद्रवन्त भयार्दिताः ।
यथा सिंहान्समासाद्य मृगाः प्राणपरायणाः ॥ २३
पाण्डवास्तु महाराज जित्वा शत्रून्महाहवे ।
दध्मुः शङ्खांश्च भेरीश्च ताडयामासुराहवे ॥ २४
ततो दुर्योधनो दृष्ट्वा दीनं सैन्यमवस्थितम् ।
अब्रवीद्भरतश्रेष्ठ मद्रराजमिदं वचः ॥ २५
एष पाण्डुसुतो ज्येष्ठो जित्वा मातुल मामकान् ।
पश्यतां नो महाबाहो सेनां द्रावयते बली ॥ २६
तं वारय महाबाहो वेलेव मकरालयम् ।
त्वं हि संश्रूयसेऽत्यर्थमसह्यबलविक्रमः ॥ २७
पुत्रस्य तव तद्वाक्यं श्रुत्वा शल्यः प्रतापवान् ।
प्रययौ रथवंशेन यत्र राजा युधिष्ठिरः ॥ २८
तदापतद्वै सहसा शल्यस्य सुमहद्बलम् ।
महौघवेगं समरे वारयामास पाण्डवः ॥ २९
मद्रराजं च समरे धर्मराजो महारथः ।
दशभिः सायकैस्तूर्णमाजघान स्तनान्तरे ।
नकुलः सहदेवश्च त्रिभिस्त्रिभिरजिह्मगैः ॥ ३०
मद्रराजोऽपि तान्सर्वानाजघान त्रिभिस्त्रिभिः ।
युधिष्ठिरं पुनः षष्ट्या विव्याध निशितैः शरैः ।
माद्रीपुत्रौ च संरब्धौ द्वाभ्यां द्वाभ्यामताडयत् ॥ ३१
ततो भीमो महाबाहुर्दृष्ट्वा राजानमाहवे ।
मद्रराजवशं प्राप्तं मृत्योरास्यगतं यथा ।
अभ्यद्रवत संग्रामे युधिष्ठिरममित्रजित् ॥ ३२
ततो युद्धं महाघोरं प्रावर्तत सुदारुणम् ।
अपरां दिशमास्थाय द्योतमाने दिवाकरे ॥ ३३

इति श्रीमहाभारते भीष्मपर्वणि
एकाधिकशततमोऽध्यायः ॥ १०१ ॥

१०२

संजय उवाच ।

ततः पिता तव क्रुद्धो निशितैः सायकोत्तमैः ।
आजघान रणे पार्थान्सहसेनान्समन्ततः ॥ १
भीमं द्वादशभिर्विद्ध्वा सात्यकिं नवभिः शरैः ।
नकुलं च त्रिभिर्बाणैः सहदेवं च सप्तभिः ॥ २
युधिष्ठिरं द्वादशभिर्बाह्वोरुरसि चार्पयत् ।
धृष्टद्युम्नं ततो विद्ध्वा विननाद महाबलः ॥ ३
तं द्वादशार्धैर्नकुलो माधवश्च त्रिभिः शरैः ।
धृष्टद्युम्नश्च सप्तत्या भीमसेनश्च पञ्चभिः ।
युधिष्ठिरो द्वादशभिः प्रत्यविध्यत्पितामहम् ॥ ४
द्रोणस्तु सात्यकिं विद्ध्वा भीमसेनमविध्यत ।
एकैकं पञ्चभिर्बाणैर्यमदण्डोपमैः शितैः ॥ ५
तौ च तं प्रत्यविध्येतां त्रिभिस्त्रिभिरजिह्मगैः ।
तोत्त्रैरिव महानागं द्रोणं ब्राह्मणपुंगवम् ॥ ६
सौवीराः कितवाः प्राच्याः प्रतीच्योदीच्यमालवाः ।
अभीषाहाः शूरसेनाः शिबयोऽथ वसातयः ।
संग्रामे नाजहुर्भीष्मं वध्यमानाः शितैः शरैः ॥ ७
तथैवान्ये वध्यमानाः पाण्डवेयैर्महात्मभिः ।
पाण्डवानभ्यवर्तन्त विविधायुधपाणयः ।
तथैव पाण्डवा राजन्परिवव्रुः पितामहम् ॥ ८
स समन्तात्परिवृतो रथौघैरपराजितः ।
गहनेऽग्निरिवोत्सृष्टः प्रजज्वाल दहन्परान् ॥ ९
रथाग्न्यगारश्चापार्चिरसिशक्तिगदेन्धनः ।
शरस्फुलिङ्गो भीष्माग्निर्ददाह क्षत्रियर्षभान् ॥ १०
सुवर्णपुङ्खैरिषुभिर्गार्ध्रपक्षैः सुतेजनैः ।
कर्णिनालीकनाराचैश्छादयामास तद्बलम् ॥ ११

अपातयद्गजांश्चैव रथिनश्च शितैः शरैः ।
मुण्डतालवनानीव चकार स रथव्रजान् ॥ १२
निर्मनुष्यान्रथान्राजन्गजानश्वांश्च संयुगे ।
अकरोत्स महाबाहुः सर्वशस्त्रभृतां वरः ॥ १३
तस्य ज्यातलनिर्घोषं विस्फूर्जितमिवाशनेः ।
निशम्य सर्वभूतानि समकम्पन्त भारत ॥ १४
अमोघा ह्यपतन्बाणाः पितुस्ते भरतर्षभ ।
नासज्जन्त तनुत्रेषु भीष्मचापच्युताः शराः ॥ १५
हतवीरान्रथान्राजन्संयुक्ताञ्जवनैर्हयैः ।
अपश्याम महाराज ह्रियमाणान्रणाजिरे ॥ १६
चेदिकाशिकरूषाणां सहस्राणि चतुर्दश ।
महारथाः समाख्याताः कुलपुत्रास्तनुत्यजः ।
अपरावर्तिनः सर्वे सुवर्णविकृतध्वजाः ॥ १७
संग्रामे भीष्ममासाद्य व्यादितास्यमिवान्तकम् ।
निमग्नाः परलोकाय सवाजिरथकुञ्जराः ॥ १८
भग्नाक्षोपस्करान्कांश्चिद्भग्नचक्रांश्च सर्वशः ।
अपश्याम रथान्राजञ्शतशोऽथ सहस्रशः ॥ १९
सवरूथै रथैर्भग्नै रथिभिश्च निपातितैः ।
शरैः सुकवचैश्छिन्नैः पट्टिशैश्च विशां पते ॥ २०
गदाभिर्मुसलैश्चैव निस्त्रिंशैश्च शिलीमुखैः ।
अनुकर्षैरुपासङ्गैश्चक्रैर्भग्नैश्च मारिष ॥ २१
बाहुभिः कार्मुकैः खड्गैः शिरोभिश्च सकुण्डलैः ।
तलत्रैरङ्गुलित्रैश्च ध्वजैश्च विनिपातितैः ।
चापैश्च बहुधा छिन्नैः समास्तीर्यत मेदिनी ॥ २२
हतारोहा गजा राजन्हयाश्च हतसादिनः ।
परिपेतुर्द्रुतं तत्र शतशोऽथ सहस्रशः ॥ २३
यतमानाश्च ते वीरा द्रवमाणान्महारथान् ।
नाशक्नुवन्वारयितुं भीष्मबाणप्रपीडितान् ॥ २४
महेन्द्रसमवीर्येण वध्यमाना महाचमूः ।
अभज्यत महाराज न च द्वौ सह धावतः ॥ २५

आविद्धरथनागाश्वं पतितध्वजकूबरम् ।
अनीकं पाण्डुपुत्राणां हाहाभूतमचेतनम् ॥ २६
जघानात्र पिता पुत्रं पुत्रश्च पितरं तथा ।
प्रियं सखायं चाक्रन्दे सखा दैवबलात्कृतः ॥ २७
विमुच्य कवचानन्ये पाण्डुपुत्रस्य सैनिकाः ।
प्रकीर्य केशान्धावन्तः प्रत्यदृश्यन्त भारत ॥ २८
तद्गोकुलमिवोद्भ्रान्तमुद्भ्रान्तरथकुञ्जरम् ।
ददृशे पाण्डुपुत्रस्य सैन्यमार्तस्वरं तदा ॥ २९
प्रभज्यमानं सैन्यं तु दृष्ट्वा यादवनन्दनः ।
उवाच पार्थं बीभत्सुं निगृह्य रथमुत्तमम् ॥ ३०
अयं स कालः संप्राप्तः पार्थ यः काङ्क्षितस्तव ।
प्रहरास्मै नरव्याघ्र न चेन्मोहात्प्रमुह्यसे ॥ ३१
यत्पुरा कथितं वीर त्वया राज्ञां समागमे ।
विराटनगरे पार्थ संजयस्य समीपतः ॥ ३२
भीष्मद्रोणमुखान्सर्वान्धार्तराष्ट्रस्य सैनिकान् ।
सानुबन्धान्हनिष्यामि ये मां योत्स्यन्ति संयुगे ॥
इति तत्कुरु कौन्तेय सत्यं वाक्यमरिंदम ।
क्षत्रधर्ममनुस्मृत्य युध्यस्व भरतर्षभ ॥ ३४
इत्युक्तो वासुदेवेन तिर्यग्दृष्टिरधोमुखः ।
अकाम इव बीभत्सुरिदं वचनमब्रवीत् ॥ ३५
अवध्यानां वधं कृत्वा राज्यं वा नरकोत्तरम् ।
दुःखानि वनवासे वा किं नु मे सुकृतं भवेत् ॥ ३६
चोदयाश्वान्यतो भीष्मः करिष्ये वचनं तव ।
पातयिष्यामि दुर्धर्षं वृद्धं कुरुपितामहम् ॥ ३७
ततोऽश्वान्रजतप्रख्यांश्चोदयामास माधवः ।
यतो भीष्मस्ततो राजन्दुष्प्रेक्ष्यो रश्मिवानिव ॥ ३८
ततस्तत्पुनरावृत्तं युधिष्ठिरबलं महत् ।
दृष्ट्वा पार्थं महाबाहुं भीष्मायोद्यन्तमाहवे ॥ ३९
ततो भीष्मः कुरुश्रेष्ठः सिंहवद्विनदन्मुहुः ।
धनंजयरथं शीघ्रं शरवर्षैरवाकिरत् ॥ ४०

क्षणेन स रथस्तस्य सहयः सहसारथिः ।
शरवर्षेण महता न प्राज्ञायत किंचन ॥ ४१
वासुदेवस्त्वसंभ्रान्तो धैर्यमास्थाय सात्वतः ।
चोदयामास तानश्वान्वितुन्नान्भीष्मसायकैः ॥ ४२
ततः पार्थो धनुर्गृह्य दिव्यं जलदनिस्वनम् ।
पातयामास भीष्मस्य धनुश्छित्त्वा शितैः शरैः ॥
स च्छिन्नधन्वा कौरव्यः पुनरन्यन्महद्धनुः ।
निमेषान्तरमात्रेण सज्यं चक्रे पिता तव ॥ ४४
विचकर्ष ततो दोर्भ्यां धनुर्जलदनिस्वनम् ।
अथास्य तदपि क्रुद्धश्चिच्छेद धनुरर्जुनः ॥ ४५
तस्य तत्पूजयामास लाघवं शंतनोः सुतः ।
साधु पार्थ महाबाहो साधु कुन्तीसुतेति च ॥ ४६
समाभाष्यैनमपरं प्रगृह्य रुचिरं धनुः ।
मुमोच समरे भीष्मः शरान्पार्थरथं प्रति ॥ ४७
अदर्शयद्वासुदेवो हययाने परं बलम् ।
मोघान्कुर्वञ्शरांस्तस्य मण्डलानि विदर्शयन् ॥ ४८
शुशुभाते नरव्याघ्रौ भीष्मपार्थौ शरक्षतौ ।
गोवृषाविव संरब्धौ विषाणोल्लिखिताङ्कितौ ॥ ४९
वासुदेवस्तु संप्रेक्ष्य पार्थस्य मृदुयुद्धताम् ।
भीष्मं च शरवर्षाणि सृजन्तमनिशं युधि ॥ ५०
प्रतपन्तमिवादित्यं मध्यमासाद्य सेनयोः ।
वरान्वरान्विनिघ्नन्तं पाण्डुपुत्रस्य सैनिकान् ॥ ५१
युगान्तमिव कुर्वाणं भीष्मं यौधिष्ठिरे बले ।
नामृष्यत महाबाहुर्माधवः परवीरहा ॥ ५२
उत्सृज्य रजतप्रख्यान्हयान्पार्थस्य मारिष ।
क्रुद्धो नाम महायोगी प्रचस्कन्द महारथात् ।
अभिदुद्राव भीष्मं स भुजप्रहरणो बली ॥ ५३
प्रतोदपाणिस्तेजस्वी सिंहवद्विनदन्मुहुः ।
दारयन्निव पद्भ्यां स जगतीं जगतीश्वरः ॥ ५४
क्रोधताम्रेक्षणः कृष्णो जिघांसुरमितद्युतिः ।
ग्रसन्निव च चेतांसि तावकानां महाहवे ॥ ५५
दृष्ट्वा माधवमाक्रन्दे भीष्मायोद्यन्तमाहवे ।
हतो भीष्मो हतो भीष्म इति तत्र स्म सैनिकाः ।
क्रोशन्तः प्राद्रवन्सर्वे वासुदेवभयान्नराः ॥ ५६
पीतकौशेयसंवीतो मणिश्यामो जनार्दनः ।
शुशुभे विद्रवन्भीष्मं विद्युन्माली यथाम्बुदः ॥ ५७
स सिंह इव मातङ्गं यूथर्षभ इवर्षभम् ।
अभिदुद्राव तेजस्वी विनदन्यादवर्षभः ॥ ५८
तमापतन्तं संप्रेक्ष्य पुण्डरीकाक्षमाहवे ।
असंभ्रमं रणे भीष्मो विचकर्ष महद्धनुः ।
उवाच चैनं गोविन्दमसंभ्रान्तेन चेतसा ॥ ५९
एह्येहि पुण्डरीकाक्ष देवदेव नमोऽस्तु ते ।
मामद्य सात्वतश्रेष्ठ पातयस्व महाहवे ॥ ६०
त्वया हि देव संग्रामे हतस्यापि ममानघ ।
श्रेय एव परं कृष्ण लोकेऽमुष्मिन्निहैव च ।
संभावितोऽस्मि गोविन्द त्रैलोक्येनाद्य संयुगे ॥
अन्वगेव ततः पार्थस्तमनुद्रुत्य केशवम् ।
निजग्राह महाबाहुर्बाहुभ्यां परिगृह्य वै ॥ ६२
निगृह्यमाणः पार्थेन कृष्णो राजीवलोचनः ।
जगाम चैनमादाय वेगेन पुरुषोत्तमः ॥ ६३
पार्थस्तु विष्टभ्य बलाच्चरणौ परवीरहा ।
निजग्राह हृषीकेशं कथंचिद्दशमे पदे ॥ ६४
तत एनमुवाचार्तः क्रोधपर्याकुलेक्षणम् ।
निःश्वसन्तं यथा नागमर्जुनः परवीरहा ॥ ६५
निवर्तस्व महाबाहो नानृतं कर्तुमर्हसि ।
यत्त्वया कथितं पूर्वं न योत्स्यामीति केशव ॥ ६६
मिथ्यावादीति लोकस्त्वां कथयिष्यति माधव ।
ममैष भारः सर्वो हि हनिष्यामि यतव्रतम् ॥ ६७
शपे माधव सख्येन सत्येन सुकृतेन च ।
अन्तं यथा गमिष्यामि शत्रूणां शत्रुकर्शन ॥ ६८

अद्यैव पश्य दुर्धर्षं पात्यमानं महाव्रतम् ।
तारापतिमिवापूर्णमन्तकाले यदृच्छया ॥ ६९
माधवस्तु वचः श्रुत्वा फल्गुनस्य महात्मनः ।
नकिंचिदुक्त्वा सक्रोध आरुरोह रथं पुनः ॥ ७०
तौ रथस्थौ नरव्याघ्रौ भीष्मः शांतनवः पुनः ।
ववर्ष शरवर्षेण मेघो वृष्ट्या यथाचलौ ॥ ७१
प्राणांश्चादत्त योधानां पिता देवव्रतस्तव ।
गभस्तिभिरिवादित्यस्तेजांसि शिशिरात्यये ॥ ७२
यथा कुरूणां सैन्यानि बभञ्ज युधि पाण्डवः ।
तथा पाण्डवसैन्यानि बभञ्ज युधि ते पिता ॥ ७३
हतविद्रुतसैन्यास्तु निरुत्साहा विचेतसः ।
निरीक्षितुं न शेकुस्ते भीष्ममप्रतिमं रणे ।
मध्यं गतमिवादित्यं प्रतपन्तं स्वतेजसा ॥ ७४
ते वध्यमाना भीष्मेण कालेनेव युगक्षये ।
वीक्षांचक्रुर्महाराज पाण्डवा भयपीडिताः ॥ ७५
त्रातारं नाध्यगच्छन्त गावः पङ्कगता इव ।
पिपीलिका इव क्षुण्णा दुर्बला बलिना रणे ॥ ७६
महारथं भारत दुष्प्रधर्षं
शरौघिणं प्रतपन्तं नरेन्द्रान् ।
भीष्मं न शेकुः प्रतिवीक्षितुं ते
शरार्चिषं सूर्यमिवातपन्तम् ॥ ७७
विमृद्नतस्तस्य तु पाण्डुसेना-
मस्तं जगामाथ सहस्ररश्मिः ।
ततो बलानां श्रमकर्शितानां
मनोऽवहारं प्रति संबभूव ॥ ७८

इति श्रीमहाभारते भीष्मपर्वणि
द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

१०३

संजय उवाच ।

युध्यतामेव तेषां तु भास्करेऽस्तमुपागते ।
संध्या समभवद्घोरा नापश्याम ततो रणम् ॥ १
ततो युधिष्ठिरो राजा संध्यां संदृश्य भारत ।
वध्यमानं बलं चापि भीष्मेणामित्रघातिना ॥ २
मुक्तशस्त्रं परावृत्तं पलायनपरायणम् ।
भीष्मं च युधि संरब्धमनुयान्तं महारथान् ॥ ३
सोमकांश्च जितान्दृष्ट्वा निरुत्साहान्महारथान् ।
चिन्तयित्वा चिरं ध्यात्वा अवहारमरोचयत् ॥ ४
ततोऽवहारं सैन्यानां चक्रे राजा युधिष्ठिरः ।
तथैव तव सैन्यानामवहारो ह्यभूत्तदा ॥ ५
ततोऽवहारं सैन्यानां कृत्वा तत्र महारथाः ।
न्यविशन्त कुरुश्रेष्ठ संग्रामे क्षतविक्षताः ॥ ६
भीष्मस्य समरे कर्म चिन्तयानास्तु पाण्डवाः ।
नालभन्त तदा शान्तिं भृशं भीष्मेण पीडिताः ॥ ७
भीष्मोऽपि समरे जित्वा पाण्डवान्सह सृञ्जयैः ।
पूज्यमानस्तव सुतैर्वन्द्यमानश्च भारत ॥ ८
न्यविशत्कुरुभिः सार्धं हृष्टरूपैः समन्ततः ।
ततो रात्रिः समभवत्सर्वभूतप्रमोहिनी ॥ ९
तस्मिन्रात्रिमुखे घोरे पाण्डवा वृष्णिभिः सह ।
सृञ्जयाश्च दुराधर्षा मन्त्राय समुपाविशन् ॥ १०
आत्मनिःश्रेयसं सर्वे प्राप्तकालं महाबलाः ।
मन्त्रयामासुरव्यग्रा मन्त्रनिश्चयकोविदाः ॥ ११
ततो युधिष्ठिरो राजा मन्त्रयित्वा चिरं नृप ।
वासुदेवं समुद्वीक्ष्य वाक्यमेतदुवाच ह ॥ १२
पश्य कृष्ण महात्मानं भीष्मं भीमपराक्रमम् ।
गजं नलवनानीव विमृद्नन्तं बलं मम ॥ १३
न चैवैनं महात्मानमुत्सहामो निरीक्षितुम् ।
लेलिह्यमानं सैन्येषु प्रवृद्धमिव पावकम् ॥ १४
यथा घोरो महानागस्तक्षको वै विषोल्बणः ।
तथा भीष्मो रणे कृष्ण तीक्ष्णशस्त्रः प्रतापवान् ॥ १५
गृहीतचापः समरे विमुञ्चंश्च शिताञ्शरान् ।

शक्यो जेतुं यमः क्रुद्धो वज्रपाणिश्च देवराट् ॥ १६
वरुणः पाशभृद्वापि सगदो वा धनेश्वरः ।
न तु भीष्मः सुसंक्रुद्धः शक्यो जेतुं महाहवे ॥ १७
सोऽहमेवं गते कृष्ण निमग्नः शोकसागरे ।
आत्मनो बुद्धिदौर्बल्याद्भीष्ममासाद्य संयुगे ॥ १८
वनं यास्यामि दुर्धर्ष श्रेयो मे तत्र वै गतम् ।
न युद्धं रोचये कृष्ण हन्ति भीष्मो हि नः सदा ॥ १९
यथा प्रज्वलितं वह्निं पतंगः समभिद्रवन् ।
एकतो मृत्युमभ्येति तथाहं भीष्ममीयिवान् ॥ २०
क्षयं नीतोऽस्मि वार्ष्णेय राज्यहेतोः पराक्रमी ।
भ्रातरश्चैव मे शूराः सायकैर्भृशपीडिताः ॥ २१
मत्कृते भ्रातृसौहार्दाद्राज्यात्प्रभ्रंशनं गताः ।
परिक्लिष्टा तथा कृष्णा मत्कृते मधुसूदन ॥ २२
जीवितं बहु मन्येऽहं जीवितं ह्यद्य दुर्लभम् ।
जीवितस्याद्य शेषेण चरिष्ये धर्ममुत्तमम् ॥ २३
यदि तेऽहमनुग्राह्यो भ्रातृभिः सह केशव ।
स्वधर्मस्याविरोधेन तदुदाहर केशव ॥ २४
एतच्छ्रुत्वा वचस्तस्य कारुण्याद्बहुविस्तरम् ।
प्रत्युवाच ततः कृष्णः सान्त्वयानो युधिष्ठिरम् ॥ २५
धर्मपुत्र विषादं त्वं मा कृथाः सत्यसंगर ।
यस्य ते भ्रातरः शूरा दुर्जयाः शत्रुसूदनाः ॥ २६
अर्जुनो भीमसेनश्च वाय्वग्निसमतेजसौ ।
माद्रीपुत्रौ च विक्रान्तौ त्रिदशानामिवेश्वरौ ॥ २७
मां वा नियुङ्क्ष्व सौहार्दाद्योत्स्ये भीष्मेण पाण्डव ।
त्वत्प्रयुक्तो ह्यहं राजन्किं न कुर्यां महाहवे ॥ २८
हनिष्यामि रणे भीष्ममाहूय पुरुषर्षभम् ।
पश्यतां धार्तराष्ट्राणां यदि नेच्छति फल्गुनः ॥ २९
यदि भीष्मे हते राजञ्जयं पश्यसि पाण्डव ।
हन्तास्म्येकरथेनाद्य कुरुवृद्धं पितामहम् ॥ ३०
पश्य मे विक्रमं राजन्महेन्द्रस्येव संयुगे ।
विमुञ्चन्तं महास्त्राणि पातयिष्यामि तं रथात् ॥ ३१
यः शत्रुः पाण्डुपुत्राणां मच्छत्रुः स न संशयः ।
मदर्था भवदर्था ये ये मदीयास्तवैव ते ॥ ३२
तव भ्राता मम सखा संबन्धी शिष्य एव च ।
मांसान्युत्कृत्य वै दद्यामर्जुनार्थे महीपते ॥ ३३
एष चापि नरव्याघ्रो मत्कृते जीवितं त्यजेत् ।
एष नः समयस्तात तारयेम परस्परम् ।
स मां नियुङ्क्ष्व राजेन्द्र यावद्द्वीपो भवाम्यहम् ॥ ३४
प्रतिज्ञातमुपप्लव्ये यत्तत्पार्थेन पूर्वतः ।
घातयिष्यामि गाङ्गेयमित्युलूकस्य संनिधौ ॥ ३५
परिरक्ष्यं च मम तद्वचः पार्थस्य धीमतः ।
अनुज्ञातं तु पार्थेन मया कार्यं न संशयः ॥ ३६
अथ वा फल्गुनस्यैष भारः परिमितो रणे ।
निहनिष्यति संग्रामे भीष्मं परपुरंजयम् ॥ ३७
अशक्यमपि कुर्याद्धि रणे पार्थः समुद्यतः ।
त्रिदशान्वा समुद्युक्तान्सहितान्दैत्यदानवैः ।
निहन्यादर्जुनः संख्ये किमु भीष्मं नराधिप ॥ ३८
विपरीतो महावीर्यो गतसत्त्वोऽल्पजीवितः ।
भीष्मः शांतनवो नूनं कर्तव्यं नावबुध्यते ॥ ३९

युधिष्ठिर उवाच ।

एवमेतन्महाबाहो यथा वदसि माधव ।
सर्वे ह्येते न पर्याप्तास्तव वेगनिवारणे ॥ ४०
नियतं समवाप्स्यामि सर्वमेव यथेप्सितम् ।
यस्य मे पुरुषव्याघ्र भवान्नाथो महाबलः ॥ ४१
सेन्द्रानपि रणे देवाञ्जयेयं जयतां वर ।
त्वया नाथेन गोविन्द किमु भीष्मं महाहवे ॥ ४२
न तु त्वामनृतं कर्तुमुत्सहे स्वार्थगौरवात् ।
अयुध्यमानः साहाय्यं यथोक्तं कुरु माधव ॥ ४३
समयस्तु कृतः कश्चिद्भीष्मेण मम माधव ।
मन्त्रयिष्ये तवार्थाय न तु योत्स्ये कथंचन ।

दुर्योधनार्थे योत्स्यामि सत्यमेतदिति प्रभो ॥ ४४
स हि राज्यस्य मे दाता मन्त्रस्यैव च माधव ।
तस्माद्देवव्रतं भूयो वधोपायार्थमात्मनः ।
भवता सहिताः सर्वे पृच्छामो मधुसूदन ॥ ४५
तद्वयं सहिता गत्वा भीष्ममाशु नरोत्तमम् ।
रुचिते तव वार्ष्णेय मन्त्रं पृच्छाम कौरवम् ॥ ४६
स वक्ष्यति हितं वाक्यं तथ्यं चैव जनार्दन ।
यथा स वक्ष्यते कृष्ण तथा कर्तास्मि संयुगे ॥ ४७
स नो जयस्य दाता च मन्त्रस्य च धृतव्रतः ।
बालाः पित्रा विहीनाश्च तेन संवर्धिता वयम् ॥४८
तं चेत्पितामहं वृद्धं हन्तुमिच्छामि माधव ।
पितुः पितरमिष्टं वै धिगस्तु क्षत्रजीविकाम् ॥ ४९

संजय उवाच ।

ततोऽब्रवीन्महाराज वार्ष्णेयः कुरुनन्दनम् ।
रोचते मे महाबाहो सततं तव भाषितम् ॥ ५०
देवव्रतः कृती भीष्मः प्रेक्षितेनापि निर्दहेत् ।
गम्यतां स वधोपायं प्रष्टुं सागरगासुतः ।
वक्तुमर्हति सत्यं स त्वया पृष्टो विशेषतः ॥ ५१
ते वयं तत्र गच्छामः प्रष्टुं कुरुपितामहम् ।
प्रणम्य शिरसा चैनं मन्त्रं पृच्छाम माधव ।
स नो दास्यति यं मन्त्रं तेन योत्स्यामहे परान् ॥
एवं संमन्त्र्य वै वीराः पाण्डवाः पाण्डुपूर्वज ।
जग्मुस्ते सहिताः सर्वे वासुदेवश्च वीर्यवान् ।
विमुक्तशस्त्रकवचा भीष्मस्य सदनं प्रति ॥ ५३
प्रविश्य च तदा भीष्मं शिरोभिः प्रतिपेदिरे ।
पूजयन्तो महाराज पाण्डवा भरतर्षभ ।
प्रणम्य शिरसा चैनं भीष्मं शरणमन्वयुः ॥ ५४
तानुवाच महाबाहुर्भीष्मः कुरुपितामहः ।
स्वागतं तव वार्ष्णेय स्वागतं ते धनंजय ।
स्वागतं धर्मपुत्राय भीमाय यमयोस्तथा ॥ ५५
किं कार्यं वः करोम्यद्य युष्मत्प्रीतिविवर्धनम् ।
सर्वात्मना च कर्तास्मि यद्यपि स्यात्सुदुष्करम् ॥५६
तथा ब्रुवाणं गाङ्गेयं प्रीतियुक्तं पुनः पुनः ।
उवाच वाक्यं दीनात्मा धर्मपुत्रो युधिष्ठिरः ॥ ५७
कथं जयेम धर्मज्ञ कथं राज्यं लभेमहि ।
प्रजानां संक्षयो न स्यात्कथं तन्मे वदाभिभो ॥ ५८
भवान्हि नो वधोपायं ब्रवीतु स्वयमात्मनः ।
भवन्तं समरे राजन्विषहेम कथं वयम् ॥ ५९
न हि ते सूक्ष्ममप्यस्ति रन्ध्रं कुरुपितामह ।
मण्डलेनैव धनुषा सदा दृश्योऽसि संयुगे ॥ ६०
नाददानं संदधानं विकर्षन्तं धनुर्न च ।
पश्यामस्त्वा महाबाहो रथे सूर्यमिव स्थितम् ॥ ६१
नराश्वरथनागानां हन्तारं परवीरहन् ।
क इवोत्सहते हन्तुं त्वां पुमान्भरतर्षभ ॥ ६२
वर्षता शरवर्षाणि महान्ति पुरुषोत्तम ।
क्षयं नीता हि पृतना भवता महती मम ॥ ६३
यथा युधि जयेयं त्वां यथा राज्यं भवेन्मम ।
भवेत्सैन्यस्य वा शान्तिस्तन्मे ब्रूहि पितामह ॥ ६४
ततोऽब्रवीच्छांतनवः पाण्डवान्पाण्डुपूर्वज ।
न कथंचन कौन्तेय मयि जीवति संयुगे ।
युष्मासु दृश्यते वृद्धिः सत्यमेतद्ब्रवीमि वः ॥ ६५
निर्जिते मयि युद्धे तु ध्रुवं जेष्यथ कौरवान् ।
क्षिप्रं मयि प्रहरत यदीच्छथ रणे जयम् ।
अनुजानामि वः पार्थाः प्रहरध्वं यथासुखम् ॥ ६६
एवं हि सुकृतं मन्ये भवतां विदितो ह्यहम् ।
हते मयि हतं सर्वं तस्मादेवं विधीयताम् ॥ ६७

युधिष्ठिर उवाच ।

ब्रूहि तस्मादुपायं नो यथा युद्धे जयेमहि ।
भवन्तं समरे क्रुद्धं दण्डपाणिमिवान्तकम् ॥ ६८
शक्यो वज्रधरो जेतुं वरुणोऽथ यमस्तथा ।

न भवान्समरे शक्यः सेन्द्रैरपि सुरासुरैः ॥ ६९

भीष्म उवाच ।

सत्यमेतन्महाबाहो यथा वदसि पाण्डव ।
नाहं शक्यो रणे जेतुं सेन्द्रैरपि सुरासुरैः ॥ ७०
आत्तशस्त्रो रणे यत्तो गृहीतवरकार्मुकः ।
न्यस्तशस्त्रं तु मां राजन्हन्युर्युधि महारथाः ॥ ७१
निक्षिप्तशस्त्रे पतिते विमुक्तकवचध्वजे ।
द्रवमाणे च भीते च तवास्मीति च वादिनि ॥ ७२
स्त्रियां स्त्रीनामधेये च विकले चैकपुत्रके ।
अप्रसूते च दुष्प्रेक्ष्ये न युद्धं रोचते मम ॥ ७३
इमं च शृणु मे पार्थ संकल्पं पूर्वचिन्तितम् ।
अमङ्गल्यध्वजं दृष्ट्वा न युध्येयं कथंचन ॥ ७४
य एष द्रौपदो राजंस्तव सैन्ये महारथः ।
शिखण्डी समराकाङ्क्षी शूरश्च समितिंजयः ॥ ७५
यथाभवच्च स्त्री पूर्वं पश्चात्पुंस्त्वमुपागतः ।
जानन्ति च भवन्तोऽपि सर्वमेतद्यथातथम् ॥ ७६
अर्जुनः समरे शूरः पुरस्कृत्य शिखण्डिनम् ।
मामेव विशिखैस्तूर्णमभिद्रवतु दंशितः ॥ ७७
अमङ्गल्यध्वजे तस्मिन्स्त्रीपूर्वे च विशेषतः ।
न प्रहर्तुमभीप्सामि गृहीतेषुं कथंचन ॥ ७८
तदन्तरं समासाद्य पाण्डवो मां धनंजयः ।
शरैर्घातयतु क्षिप्रं समन्ताद्भरतर्षभ ॥ ७९
न तं पश्यामि लोकेषु यो मां हन्यात्समुद्यतम् ।
ऋते कृष्णान्महाभागात्पाण्डवाद्वा धनंजयात् ॥ ८०
एष तस्मात्पुरोधाय कंचिदन्यं ममाग्रतः ।
मां पातयतु बीभत्सुरेवं ते विजयो भवेत् ॥ ८१
एतत्कुरुष्व कौन्तेय यथोक्तं वचनं मम ।
ततो जेष्यसि संग्रामे धार्तराष्ट्रान्समागतान् ॥ ८२

संजय उवाच ।

तेऽनुज्ञातास्ततः पार्था जग्मुः स्वशिबिरं प्रति ।
अभिवाद्य महात्मानं भीष्मं कुरुपितामहम् ॥ ८३
तथोक्तवति गाङ्गेये परलोकाय दीक्षिते ।
अर्जुनो दुःखसंतप्तः सव्रीडमिदमब्रवीत् ॥ ८४
गुरुणा कुलवृद्धेन कृतप्रज्ञेन धीमता ।
पितामहेन संग्रामे कथं योत्स्यामि माधव ॥ ८५
क्रीडता हि मया बाल्ये वासुदेव महामनाः ।
पांसुरूषितगात्रेण महात्मा परुषीकृतः ॥ ८६
यस्याहमधिरुह्याङ्कं बालः किल गदाग्रज ।
तातेत्यवोचं पितरं पितुः पाण्डोर्महात्मनः ॥ ८७
नाहं तातस्तव पितुस्तातोऽस्मि तव भारत ।
इति मामब्रवीद्बाल्ये यः स वध्यः कथं मया ॥ ८८
कामं वध्यतु मे सैन्यं नाहं योत्स्ये महात्मना ।
जयो वास्तु वधो वा मे कथं वा कृष्ण मन्यसे ॥

श्रीकृष्ण उवाच ।

प्रतिज्ञाय वधं जिष्णो पुरा भीष्मस्य संयुगे ।
क्षत्रधर्मे स्थितः पार्थ कथं नैनं हनिष्यसि ॥ ९०
पातयैनं रथात्पार्थ वज्राहतमिव द्रुमम् ।
नाहत्वा युधि गाङ्गेयं विजयस्ते भविष्यति ॥ ९१
दिष्टमेतत्पुरा देवैर्भविष्यत्यवशस्य ते ।
हन्ता भीष्मस्य पूर्वेन्द्र इति तन्न तदन्यथा ॥ ९२
न हि भीष्मं दुराधर्षं व्यात्ताननमिवान्तकम् ।
त्वदन्यः शक्नुयाद्धन्तुमपि वज्रधरः स्वयम् ॥ ९३
जहि भीष्मं महाबाहो शृणु चेदं वचो मम ।
यथोवाच पुरा शक्रं महाबुद्धिर्बृहस्पतिः ॥ ९४
ज्यायांसमपि चेच्छक्र गुणैरपि समन्वितम् ।
आततायिनमामन्त्र्य हन्याद्घातकमागतम् ॥ ९५
शाश्वतोऽयं स्थितो धर्मः क्षत्रियाणां धनंजय ।
योद्धव्यं रक्षितव्यं च यष्टव्यं चानसूयुभिः ॥ ९६

अर्जुन उवाच ।

शिखण्डी निधनं कृष्ण भीष्मस्य भविता ध्रुवम् ।

दृष्ट्वैव हि सदा भीष्मः पाञ्चाल्यं विनिवर्तते ॥ ९७
ते वयं प्रमुखे तस्य स्थापयित्वा शिखण्डिनम् ।
गाङ्गेयं पातयिष्याम उपायेनेति मे मतिः ॥ ९८
अहमन्यान्महेष्वासान्वारयिष्यामि सायकैः ।
शिखण्ड्यपि युधां श्रेष्ठो भीष्ममेवाभियास्यतु ॥९९
श्रुतं ते कुरुमुख्यस्य नाहं हन्यां शिखण्डिनम् ।
कन्या ह्येषा पुरा जाता पुरुषः समपद्यत ॥ १००

संजय उवाच ।

इत्येवं निश्चयं कृत्वा पाण्डवाः सहमाधवाः ।
शयनानि यथास्वानि भेजिरे पुरुषर्षभाः ॥ १०१

इति श्रीमहाभारते भीष्मपर्वणि
त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

१०४

धृतराष्ट्र उवाच ।

कथं शिखण्डी गाङ्गेयमभ्यवर्तत संयुगे ।
पाण्डवाश्च तथा भीष्मं तन्ममाचक्ष्व संजय ॥ १

संजय उवाच ।

ततः प्रभाते विमले सूर्यस्योदयनं प्रति ।
वाद्यमानासु भेरीषु मृदङ्गेष्वानकेषु च ॥ २
ध्मायत्सु दधिवर्णेषु जलजेषु समन्ततः ।
शिखण्डिनं पुरस्कृत्य निर्याताः पाण्डवा युधि ॥ ३
कृत्वा व्यूहं महाराज सर्वशत्रुनिबर्हणम् ।
शिखण्डी सर्वसैन्यानामग्र आसीद्विशां पते ॥ ४
चक्ररक्षौ ततस्तस्य भीमसेनधनंजयौ ।
पृष्ठतो द्रौपदेयाश्च सौभद्रश्चैव वीर्यवान् ॥ ५
सात्यकिश्चेकितानश्च तेषां गोप्ता महारथः ।
धृष्टद्युम्नस्ततः पश्चात्पाञ्चालैरभिरक्षितः ॥ ६
ततो युधिष्ठिरो राजा यमाभ्यां सहितः प्रभुः ।
प्रययौ सिंहनादेन नादयन्भरतर्षभ ॥ ७
विराटस्तु ततः पश्चात्स्वेन सैन्येन संवृतः ।
द्रुपदश्च महाराज ततः पश्चादुपाद्रवत् ॥ ८
केकया भ्रातरः पञ्च धृष्टकेतुश्च वीर्यवान् ।
जघनं पालयामास पाण्डुसैन्यस्य भारत ॥ ९
एवं व्यूह्य महत्सैन्यं पाण्डवास्तव वाहिनीम् ।
अभ्यद्रवन्त संग्रामे त्यक्त्वा जीवितमात्मनः ॥ १०
तथैव कुरवो राजन्भीष्मं कृत्वा महाबलम् ।
अग्रतः सर्वसैन्यानां प्रययुः पाण्डवान्प्रति ॥ ११
पुत्रैस्तव दुराधर्षै रक्षितः सुमहाबलैः ।
ततो द्रोणो महेष्वासः पुत्रश्चास्य महारथः ॥ १२
भगदत्तस्ततः पश्चाद्गजानीकेन संवृतः ।
कृपश्च कृतवर्मा च भगदत्तमनुव्रतौ ॥ १३
काम्बोजराजो बलवांस्ततः पश्चात्सुदक्षिणः ।
मागधश्च जयत्सेनः सौबलश्च बृहद्बलः ॥ १४
तथेतरे महेष्वासाः सुशर्मप्रमुखा नृपाः ।
जघनं पालयामासुस्तव सैन्यस्य भारत ॥ १५
दिवसे दिवसे प्राप्ते भीष्मः शांतनवो युधि ।
आसुरानकरोद्व्यूहान्पैशाचानथ राक्षसान् ॥ १६
ततः प्रववृते युद्धं तव तेषां च भारत ।
अन्योन्यं निघ्नतां राजन्यमराष्ट्रविवर्धनम् ॥ १७
अर्जुनप्रमुखाः पार्थाः पुरस्कृत्य शिखण्डिनम् ।
भीष्मं युद्धेऽभ्यवर्तन्त किरन्तो विविधाञ्शरान् ॥ १८
तत्र भारत भीमेन पीडितास्तावकाः शरैः ।
रुधिरौघपरिक्लिन्नाः परलोकं ययुस्तदा ॥ १९
नकुलः सहदेवश्च सात्यकिश्च महारथः ।
तव सैन्यं समासाद्य पीडयामासुरोजसा ॥ २०
ते वध्यमानाः समरे तावका भरतर्षभ ।
नाशक्नुवन्वारयितुं पाण्डवानां महद्बलम् ॥ २१
ततस्तु तावकं सैन्यं वध्यमानं समन्ततः ।
संप्राद्रवद्दिशो राजन्काल्यमानं महारथैः ॥ २२
त्रातारं नाध्यगच्छन्त तावका भरतर्षभ ।

वध्यमानाः शितैर्बाणैः पाण्डवैः सहसृञ्जयैः ॥ २३

धृतराष्ट्र उवाच ।

पीड्यमानं बलं पार्थैर्दृष्ट्वा भीष्मः पराक्रमी ।
यदकार्षीद्रणे क्रुद्धस्तन्ममाचक्ष्व संजय ॥ २४
कथं वा पाण्डवान्युद्धे प्रत्युद्यातः परंतपः ।
विनिघ्नन्सोमकान्वीरांस्तन्ममाचक्ष्व संजय ॥ २५

संजय उवाच ।

आचक्षे ते महाराज यदकार्षीत्पितामहः ।
पीडिते तव पुत्रस्य सैन्ये पाण्डवसृञ्जयैः ॥ २६
प्रहृष्टमनसः शूराः पाण्डवाः पाण्डुपूर्वज ।
अभ्यवर्तन्त निघ्नन्तस्तव पुत्रस्य वाहिनीम् ॥ २७
तं विनाशं मनुष्येन्द्र नरवारणवाजिनाम् ।
नामृष्यत तदा भीष्मः सैन्यघातं रणे परैः ॥ २८
स पाण्डवान्महेष्वासः पाञ्चालांश्च ससृञ्जयान् ।
अभ्यद्रवत दुर्धर्षस्त्यक्त्वा जीवितमात्मनः ॥ २९
स पाण्डवानां प्रवरान्पञ्च राजन्महारथान् ।
आत्तशस्त्रान्रणे यत्तान्वारयामास सायकैः ।
नाराचैर्वत्सदन्तैश्च शितैरञ्जलिकैस्तथा ॥ ३०
निजघ्ने समरे क्रुद्धो हस्त्यश्वममितं बहु ।
रथिनोऽपातयद्राजन्रथेभ्यः पुरुषर्षभः ॥ ३१
सादिनश्चाश्वपृष्ठेभ्यः पदातींश्च समागतान् ।
गजारोहान्गजेभ्यश्च परेषां विदधद्भयम् ॥ ३२
तमेकं समरे भीष्मं त्वरमाणं महारथम् ।
पाण्डवाः समवर्तन्त वज्रपाणिमिवासुराः ॥ ३३
शक्राशनिसमस्पर्शान्विमुञ्चन्निशिताञ्शरान् ।
दिक्ष्वदृश्यत सर्वासु घोरं संधारयन्वपुः ॥ ३४
मण्डलीकृतमेवास्य नित्यं धनुरदृश्यत ।
संग्रामे युध्यमानस्य शक्रचापनिभं महत् ॥ ३५
तद्दृष्ट्वा समरे कर्म तव पुत्रा विशां पते ।
विस्मयं परमं प्राप्ताः पितामहमपूजयन् ॥ ३६
पार्था विमनसो भूत्वा प्रैक्षन्त पितरं तव ।
युध्यमानं रणे शूरं विप्रचित्तिमिवामराः ।
न चैनं वारयामासुर्व्यात्ताननमिवान्तकम् ॥ ३७
दशमेऽहनि संप्राप्ते रथानीकं शिखण्डिनः ।
अदहन्निशितैर्बाणैः कृष्णवर्त्मेव काननम् ॥ ३८
तं शिखण्डी त्रिभिर्बाणैरभ्यविध्यत्स्तनान्तरे ।
आशीविषमिव क्रुद्धं कालसृष्टमिवान्तकम् ॥ ३९
स तेनातिभृशं विद्धः प्रेक्ष्य भीष्मः शिखण्डिनम् ।
अनिच्छन्नपि संक्रुद्धः प्रहसन्निदमब्रवीत् ॥ ४०
काममभ्यस वा मा वा न त्वां योत्स्ये कथंचन ।
यैव हि त्वं कृता धात्रा सैव हि त्वं शिखण्डिनी ॥ ४१
तस्य तद्वचनं श्रुत्वा शिखण्डी क्रोधमूर्छितः ।
उवाच भीष्मं समरे सृक्किणी परिलेलिहन् ॥ ४२
जानामि त्वां महाबाहो क्षत्रियाणां क्षयंकरम् ।
मया श्रुतं च ते युद्धं जामदग्न्येन वै सह ॥ ४३
दिव्यश्च ते प्रभावोऽयं स मया बहुशः श्रुतः ।
जानन्नपि प्रभावं ते योत्स्येऽद्याहं त्वया सह ॥ ४४
पाण्डवानां प्रियं कुर्वन्नात्मनश्च नरोत्तम ।
अद्य त्वा योधयिष्यामि रणे पुरुषसत्तम ॥ ४५
ध्रुवं च त्वा हनिष्यामि शपे सत्येन तेऽग्रतः ।
एतच्छ्रुत्वा वचो मह्यं यत्क्षमं तत्समाचर ॥ ४६
काममभ्यस वा मा वा न मे जीवन्विमोक्ष्यसे ।
सुदृष्टः क्रियतां भीष्म लोकोऽयं समितिंजय ॥ ४७
एवमुक्त्वा ततो भीष्मं पञ्चभिर्नतपर्वभिः ।
अविध्यत रणे राजन्प्रणुन्नं वाक्यसायकैः ॥ ४८
तस्य तद्वचनं श्रुत्वा सव्यसाची परंतपः ।
कालोऽयमिति संचिन्त्य शिखण्डिनमचोदयत् ॥ ४९
अहं त्वामनुयास्यामि परान्विद्रावयञ्शरैः ।
अभिद्रव सुसंरब्धो भीष्मं भीमपराक्रमम् ॥ ५०
न हि ते संयुगे पीडां शक्तः कर्तुं महाबलः ।

तस्मादद्य महाबाहो वीर भीष्ममभिद्रव ॥ ५१
अहत्वा समरे भीष्मं यदि यास्यसि मारिष ।
अवहार्योऽस्य लोकस्य भविष्यसि मया सह ॥५२
नावहास्या यथा वीर भवेम परमाहवे ।
तथा कुरु रणे यत्नं साधयस्व पितामहम् ॥ ५३
अहं ते रक्षणं युद्धे करिष्यामि परंतप ।
वारयन्रथिनः सर्वान्साधयस्व पितामहम् ॥ ५४
द्रोणं च द्रोणपुत्रं च कृपं चाथ सुयोधनम् ।
चित्रसेनं विकर्णं च सैन्धवं च जयद्रथम् ॥ ५५
विन्दानुविन्दावावन्त्यौ काम्बोजं च सुदक्षिणम् ।
भगदत्तं तथा शूरं मागधं च महारथम् ॥ ५६
सौमदत्तिं रणे शूरमार्श्यशृङ्गिं च राक्षसम् ।
त्रिगर्तराजं च रणे सह सर्वैर्महारथैः ।
अहमावारयिष्यामि वेलेव मकरालयम् ॥ ५७
कुरूंश्च सहितान्सर्वान्ये चैषां सैनिकाः स्थिताः ।
निवारयिष्यामि रणे साधयस्व पितामहम् ॥ ५८

इति श्रीमहाभारते भीष्मपर्वणि
चतुरधिकशततमोऽध्यायः ॥ १०४ ॥

१०५

धृतराष्ट्र उवाच ।

कथं शिखण्डी गाङ्गेयमभ्यधावत्पितामहम् ।
पाञ्चाल्यः समरे क्रुद्धो धर्मात्मानं यतव्रतम् ॥ १
केऽरक्षन्पाण्डवानीके शिखण्डिनमुदायुधम् ।
त्वरमाणास्त्वराकाले जिगीषन्तो महारथाः ॥ २
कथं शांतनवो भीष्मः स तस्मिन्दशमेऽहनि ।
अयुध्यत महावीर्यः पाण्डवैः सहसृञ्जयैः ॥ ३
न मृष्यामि रणे भीष्मं प्रत्युद्यातं शिखण्डिनम् ।
कच्चिन्न रथभङ्गोऽस्य धनुर्वाशीर्यतास्यतः ॥ ४

संजय उवाच ।

नाशीर्यत धनुस्तस्य रथभङ्गो न चाप्यभूत् ।
युध्यमानस्य संग्रामे भीष्मस्य भरतर्षभ ।
निघ्नतः समरे शत्रूञ्शरैः संनतपर्वभिः ॥ ५
अनेकशतसाहस्रास्तावकानां महारथाः ।
रथदन्तिगणा राजन्हयाश्चैव सुसज्जिताः ।
अभ्यवर्तन्त युद्धाय पुरस्कृत्य पितामहम् ॥ ६
यथाप्रतिज्ञं कौरव्य स चापि समितिंजयः ।
पार्थानामकरोद्भीष्मः सततं समिति क्षयम् ॥ ७
युध्यमानं महेष्वासं विनिघ्नन्तं पराञ्शरैः ।
पाञ्चालाः पाण्डवैः सार्धं सर्व एवाभ्यवारयन् ॥ ८
दशमेऽहनि संप्राप्ते ततापं रिपुवाहिनीम् ।
कीर्यमाणां शितैर्बाणैः शतशोऽथ सहस्रशः ॥ ९
न हि भीष्मं महेष्वासं पाण्डवाः पाण्डुपूर्वज ।
अशक्नुवन्रणे जेतुं पाशहस्तमिवान्तकम् ॥ १०
अथोपायान्महाराज सव्यसाची परंतपः ।
त्रासयन्रथिनः सर्वान्बीभत्सुरपराजितः ॥ ११
सिंहवद्विनदन्नुच्चैर्धनुर्ज्यां विक्षिपन्मुहुः ।
शरौघान्विसृजन्पार्थो व्यचरत्कालवद्रणे ॥ १२
तस्य शब्देन वित्रस्तास्तावका भरतर्षभ ।
सिंहस्येव मृगा राजन्व्यद्रवन्त महाभयात् ॥ १३
जयन्तं पाण्डवं दृष्ट्वा त्वत्सैन्यं चाभिपीडितम् ।
दुर्योधनस्ततो भीष्ममब्रवीद्भृशपीडितः ॥ १४
एष पाण्डुसुतस्तात श्वेताश्वः कृष्णसारथिः ।
दहते मामकान्सर्वान्कृष्णवर्त्मेव काननम् ॥ १५
पश्य सैन्यानि गाङ्गेय द्रवमाणानि सर्वशः ।
पाण्डवेन युधां श्रेष्ठ काल्यमानानि संयुगे ॥ १६
यथा पशुगणान्पालः संकालयति कानने ।
तथेदं मामकं सैन्यं काल्यते शत्रुतापन ॥ १७
धनंजयशरैर्भग्नं द्रवमाणमितस्ततः ।
भीमो ह्येष दुराधर्षो विद्रावयति मे बलम् ॥ १८
सात्यकिश्चेकितानश्च माद्रीपुत्रौ च पाण्डवौ ।

अभिमन्युश्च विक्रान्तो वाहिनीं दहते मम ॥ १९
धृष्टद्युम्नस्तथा शूरो राक्षसश्च घटोत्कचः ।
व्यद्रावयेतां सहसा सैन्यं मम महाबलौ ॥ २०
वध्यमानस्य सैन्यस्य सर्वैरेतैर्महाबलैः ।
नान्यां गतिं प्रपश्यामि स्थाने युद्धे च भारत ॥ २१
ऋते त्वां पुरुषव्याघ्र देवतुल्यपराक्रम ।
पर्याप्तश्च भवान्क्षिप्रं पीडितानां गतिर्भव ॥ २२
एवमुक्तो महाराज पिता देवव्रतस्तव ।
चिन्तयित्वा मुहूर्तं तु कृत्वा निश्चयमात्मनः ।
तव संधारयन्पुत्रमब्रवीच्छंतनोः सुतः ॥ २३
दुर्योधन विजानीहि स्थिरो भव विशां पते ।
पूर्वकालं तव मया प्रतिज्ञातं महाबल ॥ २४
हत्वा दश सहस्राणि क्षत्रियाणां महात्मनाम् ।
संग्रामाद्व्यपयातव्यमेतत्कर्म ममाह्निकम् ।
इति तत्कृतवांश्चाहं यथोक्तं भरतर्षभ ॥ २५
अद्य चापि महत्कर्म प्रकरिष्ये महाहवे ।
अहं वा निहतः शेष्ये हनिष्ये वाद्य पाण्डवान् ॥
अद्य ते पुरुषव्याघ्र प्रतिमोक्ष्ये ऋणं महत् ।
भर्तृपिण्डकृतं राजन्निहतः पृतनामुखे ॥ २७
इत्युक्त्वा भरतश्रेष्ठः क्षत्रियान्प्रतपञ्शरैः ।
आससाद दुराधर्षः पाण्डवानामनीकिनीम् ॥ २८
अनीकमध्ये तिष्ठन्तं गाङ्गेयं भरतर्षभ ।
आशीविषमिव क्रुद्धं पाण्डवाः पर्यवारयन् ॥ २९
दशमेऽहनि तस्मिंस्तु दर्शयञ्शक्तिमात्मनः ।
राजञ्शतसहस्राणि सोऽवधीत्कुरुनन्दन ॥ ३०
पञ्चालानां च ये श्रेष्ठा राजपुत्रा महाबलाः ।
तेषामादत्त तेजांसि जलं सूर्य इवांशुभिः ॥ ३१
हत्वा दश सहस्राणि कुञ्जराणां तरस्विनाम् ।
सारोहाणां महाराज हयानां चायुतं पुनः ॥ ३२
पूर्णे शतसहस्रे द्वे पदातीनां नरोत्तमः ।
प्रजज्वाल रणे भीष्मो विधूम इव पावकः ॥ ३३
न चैनं पाण्डवेयानां केचिच्छेकुर्निरीक्षितुम् ।
उत्तरं मार्गमास्थाय तपन्तमिव भास्करम् ॥ ३४
ते पाण्डवेयाः संरब्धा महेष्वासेन पीडिताः ।
वधायाभ्यद्रवन्भीष्मं सृञ्जयाश्च महारथाः ॥ ३५
स युध्यमानो बहुभिर्भीष्मः शांतनवस्तदा ।
अवकीर्णो महाबाहुः शैलो मेघैरिवासितैः ॥ ३६
पुत्रास्तु तव गाङ्गेयं समन्तात्पर्यवारयन् ।
महत्या सेनया सार्धं ततो युद्धमवर्तत ॥ ३७

इति श्रीमहाभारते भीष्मपर्वणि
पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥

१०६

संजय उवाच ।

अर्जुनस्तु रणे राजन्दृष्ट्वा भीष्मस्य विक्रमम् ।
शिखण्डिनमथोवाच समभ्येहि पितामहम् ॥ १
न चापि भीस्त्वया कार्या भीष्मादद्य कथंचन ।
अहमेनं शरैस्तीक्ष्णैः पातयिष्ये रथोत्तमात् ॥ २
एवमुक्तस्तु पार्थेन शिखण्डी भरतर्षभ ।
अभ्यद्रवत गाङ्गेयं श्रुत्वा पार्थस्य भाषितम् ॥ ३
धृष्टद्युम्नस्तथा राजन्सौभद्रश्च महारथः ।
हृष्टावाद्रवतां भीष्मं श्रुत्वा पार्थस्य भाषितम् ॥ ४
विराटद्रुपदौ वृद्धौ कुन्तिभोजश्च दंशितः ।
अभ्यद्रवत गाङ्गेयं पुत्रस्य तव पश्यतः ॥ ५
नकुलः सहदेवश्च धर्मराजश्च वीर्यवान् ।
तथेतराणि सैन्यानि सर्वाण्येव विशां पते ।
समाद्रवन्त गाङ्गेयं श्रुत्वा पार्थस्य भाषितम् ॥ ६
प्रत्युद्ययुस्तावकाश्च समेतास्तान्महारथान् ।
यथाशक्ति यथोत्साहं तन्मे निगदतः शृणु ॥ ७
चित्रसेनो महाराज चेकितानं समभ्ययात् ।
भीष्मप्रेप्सुं रणे यान्तं वृषं व्याघ्रशिशुर्यथा ॥ ८

धृष्टद्युम्नं महाराज भीष्मान्तिकमुपागतम् ।
त्वरमाणो रणे यत्तं कृतवर्मा न्यवारयत् ॥ ९
भीमसेनं सुसंक्रुद्धं गाङ्गेयस्य वधैषिणम् ।
त्वरमाणो महाराज सौमदत्तिर्न्यवारयत् ॥ १०
तथैव नकुलं वीरं किरन्तं सायकान्बहून् ।
विकर्णो वारयामास इच्छन्भीष्मस्य जीवितम् ॥
सहदेवं तथा यान्तं यत्तं भीष्मरथं प्रति ।
वारयामास संक्रुद्धः कृपः शारद्वतो युधि ॥ १२
राक्षसं क्रूरकर्माणं भैमसेनिं महाबलम् ।
भीष्मस्य निधनं प्रेप्सुं दुर्मुखोऽभ्यद्रवद्बली ॥ १३
सात्यकिं समरे क्रुद्धमार्श्यशृङ्गिरवारयत् ।
अभिमन्युं महाराज यान्तं भीष्मरथं प्रति ।
सुदक्षिणो महाराज काम्बोजः प्रत्यवारयत् ॥ १४
विराटद्रुपदौ वृद्धौ समेतावरिमर्दनौ ।
अश्वत्थामा ततः क्रुद्धो वारयामास भारत ॥ १५
तथा पाण्डुसुतं ज्येष्ठं भीष्मस्य वधकाङ्क्षिणम् ।
भारद्वाजो रणे यत्तो धर्मपुत्रमवारयत् ॥ १६
अर्जुनं रभसं युद्धे पुरस्कृत्य शिखण्डिनम् ।
भीष्मप्रेप्सुं महाराज तापयन्तं दिशो दश ।
दुःशासनो महेष्वासो वारयामास संयुगे ॥ १७
अन्ये च तावका योधाः पाण्डवानां महारथान् ।
भीष्मायाभिमुखं यातान्वारयामासुराहवे ॥ १८
धृष्टद्युम्नस्तु सैन्यानि प्राक्रोशत पुनः पुनः ।
अभिद्रवत संरब्धा भीष्ममेकं महाबलम् ॥ १९
एषोऽर्जुनो रणे भीष्मं प्रयाति कुरुनन्दनः ।
अभिद्रवत मा भैष्ट भीष्मो न प्राप्स्यते हि वः ॥२०
अर्जुनं समरे योद्धुं नोत्सहेतापि वासवः ।
किमु भीष्मो रणे वीरा गतसत्त्वोऽल्पजीवितः ॥
इति सेनापतेः श्रुत्वा पाण्डवानां महारथाः ।
अभ्यद्रवन्त संहृष्टा गाङ्गेयस्य रथं प्रति ॥ २२
आगच्छतस्तान्समरे वार्योघान्प्रबलानिव ।
न्यवारयन्त संहृष्टास्तावकाः पुरुषर्षभाः ॥ २३
दुःशासनो महाराज भयं त्यक्त्वा महारथः ।
भीष्मस्य जीविताकाङ्क्षी धनंजयमुपाद्रवत् ॥ २४
तथैव पाण्डवाः शूरा गाङ्गेयस्य रथं प्रति ।
अभ्यद्रवन्त संग्रामे तव पुत्रान्महारथान् ॥ २५
तत्राद्भुतमपश्याम चित्ररूपं विशां पते ।
दुःशासनरथं प्राप्तो यत्पार्थो नात्यवर्तत ॥ २६
यथा वारयते वेला क्षुभितं वै महार्णवम् ।
तथैव पाण्डवं क्रुद्धं तव पुत्रो न्यवारयत् ॥ २७
उभौ हि रथिनां श्रेष्ठावुभौ भारत दुर्जयौ ।
उभौ चन्द्रार्कसदृशौ कान्त्या दीप्त्या च भारत ॥२८
तौ तथा जातसंरम्भावन्योन्यवधकाङ्क्षिणौ ।
समीयतुर्महासंख्ये मयशक्रौ यथा पुरा ॥ २९
दुःशासनो महाराज पाण्डवं विशिखैस्त्रिभिः ।
वासुदेवं च विंशत्या ताडयामास संयुगे ॥ ३०
ततोऽर्जुनो जातमन्युर्वार्ष्णेयं वीक्ष्य पीडितम् ।
दुःशासनं शतेनाजौ नाराचानां समार्पयत् ।
ते तस्य कवचं भित्त्वा पपुः शोणितमाहवे ॥ ३१
दुःशासनस्ततः क्रुद्धः पार्थं विव्याध पञ्चभिः ।
ललाटे भरतश्रेष्ठ शरैः संनतपर्वभिः ॥ ३२
ललाटस्थैस्तु तैर्बाणैः शुशुभे पाण्डवोत्तमः ।
यथा मेरुर्महाराज शृङ्गैरत्यर्थमुच्छ्रितैः ॥ ३३
सोऽतिविद्धो महेष्वासः पुत्रेण तव धन्विना ।
व्यराजत रणे पार्थः किंशुकः पुष्पवानिव ॥ ३४
दुःशासनं ततः क्रुद्धः पीडयामास पाण्डवः ।
पर्वणीव सुसंक्रुद्धो राहुरुग्रो निशाकरम् ॥ ३५
पीड्यमानो बलवता पुत्रस्तव विशां पते ।
विव्याध समरे पार्थं कङ्कपत्रैः शिलाशितैः ॥ ३६
तस्य पार्थो धनुश्छित्त्वा त्वरमाणः पराक्रमी ।

आजघान ततः पश्चात्पुत्रं ते नवभिः शरैः ॥ ३७
सोऽन्यत्कार्मुकमादाय भीष्मस्य प्रमुखे स्थितः ।
अर्जुनं पञ्चविंशत्या बाह्वोरुरसि चार्पयत् ॥ ३८
तस्य क्रुद्धो महाराज पाण्डवः शत्रुकर्शनः ।
अप्रैषीद्विशिखान्घोरान्यमदण्डोपमान्बहून् ॥ ३९
अप्राप्तानेव तान्बाणांश्चिच्छेद तनयस्तव ।
यतमानस्य पार्थस्य तदद्भुतमिवाभवत् ।
पार्थं च निशितैर्बाणैरविध्यत्तनयस्तव ॥ ४०
ततः क्रुद्धो रणे पार्थः शरान्संधाय कार्मुके ।
प्रेषयामास समरे स्वर्णपुङ्खाञ्शिलाशितान् ॥ ४१
न्यमज्जंस्ते महाराज तस्य काये महात्मनः ।
यथा हंसा महाराज तडागं प्राप्य भारत ॥ ४२
पीडितश्चैव पुत्रस्ते पाण्डवेन महात्मना ।
हित्वा पार्थं रणे तूर्णं भीष्मस्य रथमाश्रयत् ।
अगाधे मज्जतस्तस्य द्वीपो भीष्मोऽभवत्तदा ॥ ४३
प्रतिलभ्य ततः संज्ञां पुत्रस्तव विशां पते ।
अवारयत्ततः शूरो भूय एव पराक्रमी ॥ ४४
शरैः सुनिशितैः पार्थं यथा वृत्रः पुरंदरम् ।
निर्बिभेद महावीर्यो विव्यथे नैव चार्जुनात् ॥ ४५

इति श्रीमहाभारते भीष्मपर्वणि
षडधिकशततमोऽध्यायः ॥ १०६ ॥

१०७

संजय उवाच ।

सात्यकिं दंशितं युद्धे भीष्मायाभ्युद्यतं तदा ।
आर्श्यशृङ्गिर्महेष्वासो वारयामास संयुगे ॥ १
माधवस्तु सुसंक्रुद्धो राक्षसं नवभिः शरैः ।
आजघान रणे राजन्प्रहसन्निव भारत ॥ २
तथैव राक्षसो राजन्माधवं निशितैः शरैः ।
अर्दयामास राजेन्द्र संक्रुद्धः शिनिपुंगवम् ॥ ३
शैनेयः शरसंघं तु प्रेषयामास संयुगे ।
राक्षसाय सुसंक्रुद्धो माधवः परवीरहा ॥ ४
ततो रक्षो महाबाहुं सात्यकिं सत्यविक्रमम् ।
विव्याध विशिखैस्तीक्ष्णैः सिंहनादं ननाद च ॥ ५
माधवस्तु भृशं विद्धो राक्षसेन रणे तदा ।
धैर्यमालम्ब्य तेजस्वी जहास च ननाद च ॥ ६
भगदत्तस्ततः क्रुद्धो माधवं निशितैः शरैः ।
ताडयामास समरे तोत्त्रैरिव महागजम् ॥ ७
विहाय राक्षसं युद्धे शैनेयो रथिनां वरः ।
प्राग्ज्योतिषाय चिक्षेप शरान्संनतपर्वणः ॥ ८
तस्य प्राग्ज्योतिषो राजा माधवस्य महद्धनुः ।
चिच्छेद शितधारेण भल्लेन कृतहस्तवत् ॥ ९
अथान्यद्धनुरादाय वेगवत्परवीरहा ।
भगदत्तं रणे क्रुद्धो विव्याध निशितैः शरैः ॥ १०
सोऽतिविद्धो महेष्वासः सृक्किणी संलिहन्मुहुः ।
शक्तिं कनकवैडूर्यभूषितामायसीं दृढाम् ।
यमदण्डोपमां घोरां प्राहिणोत्सात्यकाय वै ॥ ११
तामापतन्तीं सहसा तस्य बाहोर्बलेरिताम् ।
सात्यकिः समरे राजंस्त्रिधा चिच्छेद सायकैः ।
सा पपात तदा भूमौ महोल्केव हतप्रभा ॥ १२
शक्तिं विनिहतां दृष्ट्वा पुत्रस्तव विशां पते ।
महता रथवंशेन वारयामास माधवम् ॥ १३
तथा परिवृतं दृष्ट्वा वार्ष्णेयानां महारथम् ।
दुर्योधनो भृशं हृष्टो भ्रातॄन्सर्वानुवाच ह ॥ १४
तथा कुरुत कौरव्या यथा वः सात्यको युधि ।
न जीवन्प्रतिनिर्याति महतोऽस्माद्रथव्रजात् ।
अस्मिन्हते हतं मन्ये पाण्डवानां महद्बलम् ॥ १५
तत्तथेति वचस्तस्य परिगृह्य महारथाः ।
शैनेयं योधयामासुर्भीष्मस्य प्रमुखे तदा ॥ १६
अभिमन्युं तदायान्तं भीष्मायाभ्युद्यतं मृधे ।
काम्बोजराजो बलवान्वारयामास संयुगे ॥ १७

आर्जुनिर्नृपतिं विद्धा शरैः संनतपर्वभिः ।
पुनरेव चतुःषष्ट्या राजन्विव्याध तं नृपम ॥ १८
सुदक्षिणस्तु समरे कार्ष्णिं विव्याध पञ्चभिः ।
सारथिं चास्य नवभिरिच्छन्भीष्मस्य जीवितम् ॥
तद्युद्धमासीत्सुमहत्तयोस्तत्र पराक्रमे ।
यदभ्यधावद्गाङ्गेयं शिखण्डी शत्रुतापनः ॥ २०
विराटद्रुपदौ वृद्धौ वारयन्तौ महाचमूम् ।
भीष्मं च युधि संरब्धावाद्रवन्तौ महारथौ ॥ २१
अश्वत्थामा ततः क्रुद्धः समायाद्रथसत्तमः ।
ततः प्रववृते युद्धं तत्र तेषां च भारत ॥ २२
विराटो दशभिर्भल्लैराजघान परंतप ।
यतमानं महेष्वासं द्रौणिमाहवशोभिनम् ॥ २३
द्रुपदश्च त्रिभिर्बाणैर्विव्याध निशितैस्तथा ।
गुरुपुत्रं समासाद्य भीष्मस्य पुरतः स्थितम् ॥ २४
अश्वत्थामा ततस्तौ तु विव्याध दशभिः शरैः ।
विराटद्रुपदौ वृद्धौ भीष्मं प्रति समुद्यतौ ॥ २५
तत्राद्भुतमपश्याम वृद्धयोश्चरितं महत् ।
यद्द्रौणेः सायकान्घोरान्प्रत्यवारयतां युधि ॥ २६
सहदेवं तथा यान्तं कृपः शारद्वतोऽभ्ययात् ।
यथा नागो वने नागं मत्तो मत्तमुपाद्रवत् ॥ २७
कृपश्च समरे राजन्माद्रीपुत्रं महारथम् ।
आजघान शरैस्तूर्णं सप्तत्या रुक्मभूषणैः ॥ २८
तस्य माद्रीसुतश्चापं द्विधा चिच्छेद सायकैः ।
अथैनं छिन्नधन्वानं विव्याध नवभिः शरैः ॥ २९
सोऽन्यत्कार्मुकमादाय समरे भारसाधनम् ।
माद्रीपुत्रं सुसंहृष्टो दशभिर्निशितैः शरैः ।
आजघानोरसि क्रुद्ध इच्छन्भीष्मस्य जीवितम् ॥ ३०
तथैव पाण्डवो राजञ्शारद्वतममर्षणम् ।
आजघानोरसि क्रुद्धो भीष्मस्य वधकाङ्क्षया ।
तयोर्युद्धं समभवद्घोररूपं भयावहम् ॥ ३१

नकुलं तु रणे क्रुद्धं विकर्णः शत्रुतापनः ।
विव्याध सायकैः षष्ट्या रक्षन्भीष्मस्य जीवितम् ॥
नकुलोऽपि भृशं विद्धस्तव पुत्रेण धन्विना ।
विकर्णं सप्तसप्तत्या निर्बिभेद शिलीमुखैः ॥ ३३
तत्र तौ नरशार्दूलौ भीष्महेतोः परंतपौ ।
अन्योन्यं जघ्नतुर्वीरौ गोष्ठे गोवृषभाविव ॥ ३४
घटोत्कचं रणे यत्तं निघ्नन्तं तव वाहिनीम् ।
दुर्मुखः समरे प्रायाद्भीष्महेतोः पराक्रमी ॥ ३५
हैडिम्बस्तु ततो राजन्दुर्मुखं शत्रुतापनम् ।
आजघानोरसि क्रुद्धो नवत्या निशितैः शरैः ॥ ३६
भीमसेनसुतं चापि दुर्मुखः सुमुखैः शरैः ।
षष्ट्या वीरो नदन्हृष्टो विव्याध रणमूर्धनि ॥ ३७
धृष्टद्युम्नं रणे यान्तं भीष्मस्य वधकाङ्क्षिणम् ।
हार्दिक्यो वारयामास रक्षन्भीष्मस्य जीवितम् ॥ ३८
वार्ष्णेयः पार्षतं शूरं विद्धा पञ्चभिरायसैः ।
पुनः पञ्चाशता तूर्णमाजघान स्तनान्तरे ॥ ३९
तथैव पार्षतो राजन्हार्दिक्यं नवभिः शरैः ।
विव्याध निशितैस्तीक्ष्णैः कङ्कपत्रपरिच्छदैः ॥ ४०
तयोः समभवद्युद्धं भीष्महेतोर्महारणे ।
अन्योन्यातिशयैर्युक्तं यथा वृत्रमहेन्द्रयोः ॥ ४१
भीमसेनमथायान्तं भीष्मं प्रति महाबलम् ।
भूरिश्रवाभ्ययात्तूर्णं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ४२
सौमदत्तिरथो भीममाजघान स्तनान्तरे ।
नाराचेन सुतीक्ष्णेन रुक्मपुङ्खेन संयुगे ॥ ४३
उरःस्थेन बभौ तेन भीमसेनः प्रतापवान् ।
स्कन्दशक्त्या यथा क्रौञ्चः पुरा नृपतिसत्तम ॥ ४४
तौ शरान्सूर्यसंकाशान्कर्मारपरिमार्जितान् ।
अन्योन्यस्य रणे क्रुद्धौ चिक्षिपाते मुहुर्मुहुः ॥ ४५
भीमो भीष्मवधाकाङ्क्षी सौमदत्तिं महारथम् ।
तथा भीष्मजये गृध्नुः सौमदत्तिश्च पाण्डवम् ।

कृतप्रतिकृते यत्तौ योधयामासतू रणे ॥ ४६
युधिष्ठिरं महाराज महत्या सेनया वृतम् ।
भीष्मायाभिमुखं यान्तं भारद्वाजो न्यवारयत् ॥४७
द्रोणस्य रथनिर्घोषं पर्जन्यनिनदोपमम् ।
श्रुत्वा प्रभद्रका राजन्समकम्पन्त मारिष ॥ ४८
सा सेना महती राजन्पाण्डुपुत्रस्य संयुगे ।
द्रोणेन वारिता यत्ता न चचाल पदात्पदम् ॥ ४९
चेकितानं रणे क्रुद्धं भीष्मं प्रति जनेश्वर ।
चित्रसेनस्तव सुतः क्रुद्धरूपमवारयत् ॥ ५०
भीष्महेतोः पराक्रान्तश्चित्रसेनो महारथः ।
चेकितानं परं शक्त्या योधयामास भारत ॥ ५१
तथैव चेकितानोऽपि चित्रसेनमयोधयत् ।
तद्युद्धमासीत्सुमहत्तयोस्तत्र पराक्रमे ॥ ५२
अर्जुनो वार्यमाणस्तु बहुशस्तनयेन ते ।
विमुखीकृत्य पुत्रं ते तव सेनां ममर्द ह ॥ ५३
दुःशासनोऽपि परया शक्त्या पार्थमवारयत् ।
कथं भीष्मं परो हन्यादिति निश्चित्य भारत ॥५४
सा वध्यमाना समरे पुत्रस्य तव वाहिनी ।
लोड्यते रथिभिः श्रेष्ठैस्तत्र तत्रैव भारत ॥ ५५

इति श्रीमहाभारते भीष्मपर्वणि
सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

१०८

संजय उवाच ।

अथ वीरो महेष्वासो मत्तवारणविक्रमः ।
समादाय महच्चापं मत्तवारणवारणम् ॥ १
विधुन्वानो धनुः श्रेष्ठं द्रावयाणो महारथान् ।
पृतनां पाण्डवेयानां पातयानो महारथः ॥ २
निमित्तानि निमित्तज्ञः सर्वतो वीक्ष्य वीर्यवान् ।
प्रतपन्तमनीकानि द्रोणः पुत्रमभाषत ॥ ३
अयं स दिवसस्तात यत्र पार्थो महारथः ।
जिघांसुः समरे भीष्मं परं यत्नं करिष्यति ॥ ४
उत्पतन्ति हि मे बाणा धनुः प्रस्फुरतीव मे ।
योगमस्त्राणि गच्छन्ति क्रूरे मे वर्तते मतिः ॥ ५
दिक्षु शान्तासु घोराणि व्याहरन्ति मृगद्विजाः ।
नीचैर्गृध्रा निलीयन्ते भारतानां चमूं प्रति ॥ ६
नष्टप्रभ इवादित्यः सर्वतो लोहिता दिशः ।
रसते व्यथते भूमिरनुष्टनति वाहनम् ॥ ७
कङ्का गृध्रा बलाकाश्च व्याहरन्ति मुहुर्मुहुः ।
शिवाश्चाशिवनिर्घोषा वेदयन्त्यो महद्भयम् ॥ ८
पपात महती चोल्का मध्येनादित्यमण्डलात् ।
सकबन्धश्च परिघो भानुमावृत्य तिष्ठति ॥ ९
परिवेषस्तथा घोरश्चन्द्रभास्करयोरभूत् ।
वेदयानो भयं घोरं राज्ञां देहावकर्तनम् ॥ १०
देवतायतनस्थाश्च कौरवेन्द्रस्य देवताः ।
कम्पन्ते च हसन्ते च नृत्यन्ति च रुदन्ति च ॥
अपसव्यं ग्रहाश्चक्रुरलक्ष्माणं निशाकरम् ।
अवाक्शिराश्च भगवानुदतिष्ठत चन्द्रमाः ॥ १२
वपूंषि च नरेन्द्राणां विगतानीव लक्षये ।
धार्तराष्ट्रस्य सैन्येषु न च भ्राजन्ति दंशिताः ॥ १३
सेनयोरुभयोश्चैव समन्ताच्छ्रूयते महान् ।
पाञ्चजन्यस्य निर्घोषो गाण्डीवस्य च निस्वनः ॥ १४
ध्रुवमास्थाय बीभत्सुरुत्तमास्त्राणि संयुगे ।
अपास्यान्यान्रणे योधानभ्यस्यति पितामहम् ॥ १५
हृष्यन्ति रोमकूपानि सीदतीव च मे मनः ।
चिन्तयित्वा महाबाहो भीष्मार्जुनसमागमम् ॥ १६
तं चैव निकृतिप्रज्ञं पाञ्चाल्यं पापचेतसम् ।
पुरस्कृत्य रणे पार्थो भीष्मस्यायोधनं गतः ॥ १७
अब्रवीच्च पुरा भीष्मो नाहं हन्यां शिखण्डिनम् ।
स्त्री ह्येषा विहिता धात्रा दैवाच्च स पुनः पुमान् ॥१८
अमङ्गल्यध्वजश्चैव याज्ञसेनिर्महारथः ।

न चामङ्गलकेतोः स प्रहरेदापगासुतः ॥ १९
एतद्विचिन्तयानस्य प्रज्ञा सीदति मे भृशम् ।
अथैव तु रणे पार्थः कुरुवृद्धमुपाद्रवत् ॥ २०
युधिष्ठिरस्य च क्रोधो भीष्मार्जुनसमागमः ।
मम चास्त्राभिसंरम्भः प्रजानामशुभं ध्रुवम् ॥ २१
मनस्वी बलवाञ्शूरः कृतास्त्रो दृढविक्रमः ।
दूरपाती दृढेषुश्च निमित्तज्ञश्च पाण्डवः ॥ २२
अजेयः समरे चैव देवैरपि सवासवैः ।
बलवान्बुद्धिमांश्चैव जितक्लेशो युधां वरः ॥ २३
विजयी च रणे नित्यं भैरवास्त्रश्च पाण्डवः ।
तस्य मार्गं परिहरन्द्रुतं गच्छ यतव्रतम् ॥ २४
पश्य चैतन्महाबाहो वैशसं समुपस्थितम् ।
हेमचित्राणि शूराणां महान्ति च शुभानि च ॥ २५
कवचान्यवदीर्यन्ते शरैः संनतपर्वभिः ।
छिद्यन्ते च ध्वजाग्राणि तोमराणि धनूंषि च ॥ २६
प्रासाश्च विमलास्तीक्ष्णाः शक्त्यश्च कनकोज्ज्वलाः ।
वैजयन्त्यश्च नागानां संक्रुद्धेन किरीटिना ॥ २७
नायं संरक्षितुं कालः प्राणान्पुत्रोपजीविभिः ।
याहि स्वर्गं पुरस्कृत्य यशसे विजयाय च ॥ २८
हयनागरथावर्तां महाघोरां सुदुस्तराम् ।
रथेन संग्रामनदीं तरत्येष कपिध्वजः ॥ २९
ब्रह्मण्यता दमो दानं तपश्च चरितं महत् ।
इहैव दृश्यते राज्ञो भ्राता यस्य धनंजयः ॥ ३०
भीमसेनश्च बलवान्माद्रीपुत्रौ च पाण्डवौ ।
वासुदेवश्च वार्ष्णेयो यस्य नाथो व्यवस्थितः ॥ ३१
तस्यैष मन्युप्रभवो धार्तराष्ट्रस्य दुर्मतेः ।
तपोदग्धशरीरस्य कोपो दहति भारतान् ॥ ३२
एष संदृश्यते पार्थो वासुदेवव्यपाश्रयः ।
दारयन्सर्वसैन्यानि धार्तराष्ट्राणि सर्वशः ॥ ३३
एतदालोक्यते सैन्यं क्षोभ्यमाणं किरीटिना ।
महोर्मिनद्धं सुमहत्तिमिनेव नदीमुखम् ॥ ३४
हाहाकिलकिलाशब्दाः श्रूयन्ते च चमूमुखे ।
याहि पाञ्चालदायादमहं यास्ये युधिष्ठिरम् ॥ ३५
दुर्लभं ह्यन्तरं राज्ञो व्यूहस्यामिततेजसः ।
समुद्रकुक्षिप्रतिमं सर्वतोऽतिरथैः स्थितैः ॥ ३६
सात्यकिश्चाभिमन्युश्च धृष्टद्युम्नवृकोदरौ ।
परिरक्षन्ति राजानं यमौ च मनुजेश्वरम् ॥ ३७
उपेन्द्रसदृशः श्यामो महाशाल इवोद्गतः ।
एष गच्छत्यनीकानि द्वितीय इव फल्गुनः ॥ ३८
उत्तमास्त्राणि चादत्स्व गृहीत्वान्यन्महद्धनुः ।
पार्श्वतो याहि राजानं युध्यस्व च वृकोदरम् ॥ ३९
को हि नेच्छेत्प्रियं पुत्रं जीवन्तं शाश्वतीः समाः ।
क्षत्रधर्मं पुरस्कृत्य ततस्त्वा विनियुज्महे ॥ ४०
एष चापि रणे भीष्मो दहते वै महाचमूम् ।
युद्धे सुसदृशस्तात यमस्य वरुणस्य च ॥ ४१

इति श्रीमहाभारते भीष्मपर्वणि
अष्टाधिकशततमोऽध्यायः ॥ १०८ ॥

१०९

संजय उवाच ।

भगदत्तः कृपः शल्यः कृतवर्मा च सात्वतः ।
विन्दानुविन्दावावन्त्यौ सैन्धवश्च जयद्रथः ॥ १
चित्रसेनो विकर्णश्च तथा दुर्मर्षणो युवा ।
दशैते तावका योधा भीमसेनमयोधयन् ॥ २
महत्या सेनया युक्ता नानादेशसमुत्थया ।
भीष्मस्य समरे राजन्प्रार्थयाना महद्यशः ॥ ३
शल्यस्तु नवभिर्बाणैर्भीमसेनमताडयत् ।
कृतवर्मा त्रिभिर्बाणैः कृपश्च नवभिः शरैः ॥ ४
चित्रसेनो विकर्णश्च भगदत्तश्च मारिष ।
दशभिर्दशभिर्भल्लैर्भीमसेनमताडयन् ॥ ५
सैन्धवश्च त्रिभिर्बाणैर्जत्रुदेशेऽभ्यताडयत् ।

विन्दानुविन्दावावन्त्यौ पञ्चभिः पञ्चभिः शरैः ।
दुर्मर्षणश्च विंशत्या पाण्डवं निशितैः शरैः ॥ ६
स तान्सर्वान्महाराज भ्राजमानान्पृथक्पृथक् ।
प्रवीरान्सर्वलोकस्य धार्तराष्ट्रान्महारथान् ।
विव्याध बहुभिर्बाणैर्भीमसेनो महाबलः ॥ ७
शल्यं पञ्चाशता विद्ध्वा कृतवर्माणमष्टभिः ।
कृपस्य सशरं चापं मध्ये चिच्छेद भारत ।
अथैनं छिन्नधन्वानं पुनर्विव्याध पञ्चभिः ॥ ८
विन्दानुविन्दौ च तथा त्रिभिस्त्रिभिरताडयत् ।
दुर्मर्षणं च विंशत्या चित्रसेनं च पञ्चभिः ॥ ९
विकर्णं दशभिर्बाणैः पञ्चभिश्च जयद्रथम् ।
विद्ध्वा भीमोऽनदद्धृष्टः सैन्धवं च पुनस्त्रिभिः ॥ १०
अथान्यद्धनुरादाय गौतमो रथिनां वरः ।
भीमं विव्याध संरब्धो दशभिर्निशितैः शरैः ॥ ११
स विद्धो बहुभिर्बाणैस्तोत्त्रैरिव महाद्विपः ।
ततः क्रुद्धो महाबाहुर्भीमसेनः प्रतापवान् ।
गौतमं ताडयामास शरैर्बहुभिराहवे ॥ १२
सैन्धवस्य तथाश्वांश्च सारथिं च त्रिभिः शरैः ।
प्राहिणोन्मृत्युलोकाय कालान्तकसमद्युतिः ॥ १३
हताश्वात्तु रथात्तूर्णमवप्लुत्य महारथः ।
शरांश्चिक्षेप निशितान्भीमसेनस्य संयुगे ॥ १४
तस्य भीमो धनुर्मध्ये द्वाभ्यां चिच्छेद भारत ।
भल्लाभ्यां भरतश्रेष्ठ सैन्धवस्य महात्मनः ॥ १५
स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
चित्रसेनरथं राजन्नारुरोह त्वरान्वितः ॥ १६
अत्यद्भुतं रणे कर्म कृतवांस्तत्र पाण्डवः ।
महारथाञ्शरैर्विद्ध्वा वारयित्वा महारथः ।
विरथं सैन्धवं चक्रे सर्वलोकस्य पश्यतः ॥ १७
नातीव ममृषे शल्यो भीमसेनस्य विक्रमम् ।
स संधाय शरांस्तीक्ष्णान्कर्मारपरिमार्जितान् ।
भीमं विव्याध सप्तत्या तिष्ठ तिष्ठेति चाब्रवीत् ॥
कृपश्च कृतवर्मा च भगदत्तश्च मारिष ।
विन्दानुविन्दावावन्त्यौ चित्रसेनश्च संयुगे ॥ १९
दुर्मर्षणो विकर्णश्च सिन्धुराजश्च वीर्यवान् ।
भीमं ते विव्यधुस्तूर्णं शल्यहेतोररिंदमाः ॥ २०
स तु तान्प्रतिविव्याध पञ्चभिः पञ्चभिः शरैः ।
शल्यं विव्याध सप्तत्या पुनश्च दशभिः शरैः ॥ २१
तं शल्यो नवभिर्विद्ध्वा पुनर्विव्याध पञ्चभिः ।
सारथिं चास्य भल्लेन गाढं विव्याध मर्मणि ॥ २२
विशोकं वीक्ष्य निर्भिन्नं भीमसेनः प्रतापवान् ।
मद्रराजं त्रिभिर्बाणैर्बाह्वोरुरसि चार्पयत् ॥ २३
तथेतरान्महेष्वासांस्त्रिभिस्त्रिभिरजिह्मगैः ।
ताडयामास समरे सिंहवच्च ननाद च ॥ २४
ते हि यत्ता महेष्वासाः पाण्डवं युद्धदुर्मदम् ।
त्रिभिस्त्रिभिरकुण्ठाग्रैर्भृशं मर्मस्वताडयन् ॥ २५
सोऽतिविद्धो महेष्वासो भीमसेनो न विव्यथे ।
पर्वतो वारिधाराभिर्वर्षमाणैरिवाम्बुदैः ॥ २६
शल्यं च नवभिर्बाणैर्भृशं विद्ध्वा महायशाः ।
प्राग्ज्योतिषं शतेनाजौ राजन्विव्याध वै दृढम् ॥ २७
ततस्तु सशरं चापं सात्वतस्य महात्मनः ।
क्षुरप्रेण सुतीक्ष्णेन चिच्छेद कृतहस्तवत् ॥ २८
अथान्यद्धनुरादाय कृतवर्मा वृकोदरम् ।
आजघान भ्रुवोर्मध्ये नाराचेन परंतप ॥ २९
भीमस्तु समरे विद्ध्वा शल्यं नवभिरायसैः ।
भगदत्तं त्रिभिश्चैव कृतवर्माणमष्टभिः ॥ ३०
द्वाभ्यां द्वाभ्यां च विव्याध गौतमप्रभृतीन्रथान् ।
ते तु तं समरे राजन्विव्यधुर्निशितैः शरैः ॥ ३१
स तथा पीड्यमानोऽपि सर्वतस्तैर्महारथैः ।
मत्वा तृणेन तांस्तुल्यान्विचचार गतव्यथः ॥ ३२
ते चापि रथिनां श्रेष्ठा भीमाय निशिताञ्शरान् ।

प्रेषयामासुरव्यग्राः शतशोऽथ सहस्रशः ॥ ३३
तस्य शक्तिं महावेगां भगदत्तो महारथः ।
चिक्षेप समरे वीरः स्वर्णदण्डां महाधनाम् ॥ ३४
तोमरं सैन्धवो राजा पट्टिशं च महाभुजः ।
शतघ्नीं च कृपो राजञ्शरं शल्यश्च संयुगे ॥ ३५
अथेतरे महेष्वासाः पञ्च पञ्च शिलीमुखान् ।
भीमसेनं समुद्दिश्य प्रेषयामासुरोजसा ॥ ३६
तोमरं स द्विधा चक्रे क्षुरप्रेणानिलात्मजः ।
पट्टिशं च त्रिभिर्बाणैश्चिच्छेद तिलकाण्डवत् ॥ ३७
स बिभेद शतघ्नीं च नवभिः कङ्कपत्रिभिः ।
मद्रराजप्रयुक्तं च शरं छित्त्वा महाबलः ॥ ३८
शक्तिं चिच्छेद सहसा भगदत्तेरितां रणे ।
तथेतराञ्शरान्घोराञ्शरैः संनतपर्वभिः ॥ ३९
भीमसेनो रणश्लाघी त्रिधैकैकं समाच्छिनत् ।
तांश्च सर्वान्महेष्वासांस्त्रिभिस्त्रिभिरताडयत् ॥ ४०
ततो धनंजयस्तत्र वर्तमाने महारणे ।
जगाम स रथेनाजौ भीमं दृष्ट्वा महारथम् ।
निघ्नन्तं समरे शत्रून्योधयानं च सायकैः ॥ ४१
तौ तु तत्र महात्मानौ समेतौ वीक्ष्य पाण्डवौ ।
नाशशंसुर्जयं तत्र तावकाः पुरुषर्षभ ॥ ४२
अथार्जुनो रणे भीष्मं योधयन्वै महारथम् ।
भीष्मस्य निधनाकाङ्क्षी पुरस्कृत्य शिखण्डिनम् ॥ ४३
आससाद रणे योधांस्तावकान्दश भारत ।
ये स्म भीमं रणे राजन्योधयन्तो व्यवस्थिताः ।
बीभत्सुस्तानथाविध्यद्भीमस्य प्रियकाम्यया ॥ ४४
ततो दुर्योधनो राजा सुशर्माणमचोदयत् ।
अर्जुनस्य वधार्थाय भीमसेनस्य चोभयोः ॥ ४५
सुशर्मन्गच्छ शीघ्रं त्वं बलौघैः परिवारितः ।
जहि पाण्डुसुतावेतौ धनंजयवृकोदरौ ॥ ४६
तच्छ्रुत्वा शासनं तस्य त्रिगर्तः प्रस्थलाधिपः ।
अभिद्रुत्य रणे भीममर्जुनं चैव धन्विनौ ॥ ४७
रथैरनेकसाहस्रैः परिवव्रे समन्ततः ।
ततः प्रववृते युद्धमर्जुनस्य परैः सह ॥ ४८

इति श्रीमहाभारते भीष्मपर्वणि
नवाधिकशततमोऽध्यायः ॥ १०९ ॥

११०

संजय उवाच ।

अर्जुनस्तु रणे शल्यं यतमानं महारथम् ।
छादयामास समरे शरैः संनतपर्वभिः ॥ १
सुशर्माणं कृपं चैव त्रिभिस्त्रिभिरविध्यत ।
प्राग्ज्योतिषं च समरे सैन्धवं च जयद्रथम् ॥ २
चित्रसेनं विकर्णं च कृतवर्माणमेव च ।
दुर्मर्षणं च राजेन्द्र आवन्त्यौ च महारथौ ॥ ३
एकैकं त्रिभिरानर्छत्कङ्कबर्हिणवाजितैः ।
शरैरतिरथो युद्धे पीडयन्वाहिनीं तव ॥ ४
जयद्रथो रणे पार्थं भित्त्वा भारत सायकैः ।
भीमं विव्याध तरसा चित्रसेनरथे स्थितः ॥ ५
शल्यश्च समरे जिष्णुं कृपश्च रथिनां वरः ।
विव्यधाते महाबाहुं बहुधा मर्मभेदिभिः ॥ ६
चित्रसेनादयश्चैव पुत्रास्तव विशां पते ।
पञ्चभिः पञ्चभिस्तूर्णं संयुगे निशितैः शरैः ।
आजघ्नुरर्जुनं संख्ये भीमसेनं च मारिष ॥ ७
तौ तत्र रथिनां श्रेष्ठौ कौन्तेयौ भरतर्षभौ ।
अपीडयेतां समरे त्रिगर्तानां महद्बलम् ॥ ८
सुशर्मापि रणे पार्थं विद्ध्वा बहुभिरायसैः ।
ननाद बलवन्नादं नादयन्वै नभस्तलम् ॥ ९
अन्ये च रथिनः शूरा भीमसेनधनंजयौ ।
विव्यधुर्निशितैर्बाणै रुक्मपुङ्खैरजिह्मगैः ॥ १०
तेषां तु रथिनां मध्ये कौन्तेयौ रथिनां वरौ ।
क्रीडमानौ रथोदारौ चित्ररूपौ व्यरोचताम् ।

आमिषेप्सू गवां मध्ये सिंहाविव बलोत्कटौ ॥ ११
छित्त्वा धनूंषि वीराणां शरांश्च बहुधा रणे ।
पातयामासतुर्वीरौ शिरांसि शतशो नृणाम् ॥ १२
रथाश्च बहवो भग्ना हयाश्च शतशो हताः ।
गजाश्च सगजारोहाः पेतुरुर्व्यां महामृधे ॥ १३
रथिनः सादिनश्चैव तत्र तत्र निसूदिताः ।
दृश्यन्ते बहुधा राजन्वेष्टमानाः समन्ततः ॥ १४
हतैर्गजपदात्योघैर्वाजिभिश्च निसूदितैः ।
रथैश्च बहुधा भग्नैः समास्तीर्यत मेदिनी ॥ १५
छत्रैश्च बहुधा छिन्नैर्ध्वजैश्च विनिपातितैः ।
अङ्कुशैरपविद्धैश्च परिस्तोमैश्च भारत ॥ १६
केयूरैरङ्गदैर्हारै राङ्कवैर्मृदितैस्तथा ।
उष्णीषैरपविद्धैश्च चामरव्यजनैरपि ॥ १७
तत्र तत्रापविद्धैश्च बाहुभिश्चन्दनोक्षितैः ।
ऊरुभिश्च नरेन्द्राणां समास्तीर्यत मेदिनी ॥ १८
तत्राद्भुतमपश्याम रणे पार्थस्य विक्रमम् ।
शरैः संवार्य तान्वीरान्निजघान बलं तव ॥ १९
पुत्रस्तु तव तं दृष्ट्वा भीमार्जुनसमागमम् ।
गाङ्गेयस्य रथाभ्याशमुपजग्मे महाभये ॥ २०
कृपश्च कृतवर्मा च सैन्धवश्च जयद्रथः ।
विन्दानुविन्दावावन्त्यावाजग्मुः संयुगं तदा ॥ २१
ततो भीमो महेष्वासः फल्गुनश्च महारथः ।
कौरवाणां चमूं घोरां भृशं दुद्रुवतू रणे ॥ २२
ततो बर्हिणवाजानामयुतान्यर्बुदानि च ।
धनंजयरथे तूर्णं पातयन्ति स्म संयुगे ॥ २३
ततस्ताञ्शरजालेन संनिवार्य महारथान् ।
पार्थः समन्तात्समरे प्रेषयामास मृत्यवे ॥ २४
शल्यस्तु समरे जिष्णुं क्रीडन्निव महारथः ।
आजघानोरसि क्रुद्धो भल्लैः संनतपर्वभिः ॥ २५
तस्य पार्थो धनुश्छित्त्वा हस्तावापं च पञ्चभिः ।
अथैनं सायकैस्तीक्ष्णैर्भृशं विव्याध मर्मणि ॥ २६
अथान्यद्धनुरादाय समरे भारसाधनम् ।
मद्रेश्वरो रणे जिष्णुं ताडयामास रोषितः ॥ २७
त्रिभिः शरैर्महाराज वासुदेवं च पञ्चभिः ।
भीमसेनं च नवभिर्बाह्वोरुरसि चार्पयत् ॥ २८
ततो द्रोणो महाराज मागधश्च महारथः ।
दुर्योधनसमादिष्टौ तं देशमुपजग्मतुः ॥ २९
यत्र पार्थो महाराज भीमसेनश्च पाण्डवः ।
कौरव्यस्य महासेनां जघ्नतुस्तौ महारथौ ॥ ३०
जयत्सेनस्तु समरे भीमं भीमायुधं युवा ।
विव्याध निशितैर्बाणैरष्टभिर्भरतर्षभ ॥ ३१
तं भीमो दशभिर्विद्ध्वा पुनर्विव्याध सप्तभिः ।
सारथिं चास्य भल्लेन रथनीडादपाहरत् ॥ ३२
उद्भ्रान्तैस्तुरगैः सोऽथ द्रवमाणैः समन्ततः ।
मागधोऽपहृतो राजा सर्वसैन्यस्य पश्यतः ॥ ३३
द्रोणस्तु विवरं लब्ध्वा भीमसेनं शिलीमुखैः ।
विव्याध बाणैः सुशितैः पञ्चषष्ट्या तमायसैः ॥ ३४
तं भीमः समरश्लाघी गुरुं पितृसमं रणे ।
विव्याध नवभिर्भल्लैस्तथा षष्ट्या च भारत ॥ ३५
अर्जुनस्तु सुशर्माणं विद्ध्वा बहुभिरायसैः ।
व्यधमत्तस्य तत्सैन्यं महाभ्राणि यथानिलः ॥ ३६
ततो भीष्मश्च राजा च सौबलश्च बृहद्बलः ।
अभ्यद्रवन्त संक्रुद्धा भीमसेनधनंजयौ ॥ ३७
तथैव पाण्डवाः शूरा धृष्टद्युम्नश्च पार्षतः ।
अभ्यद्रवन्रणे भीष्मं व्यादितास्यमिवान्तकम् ॥ ३८
शिखण्डी तु समासाद्य भारतानां पितामहम् ।
अभ्यद्रवत संहृष्टो भयं त्यक्त्वा यतव्रतम् ॥ ३९
युधिष्ठिरमुखाः पार्थाः पुरस्कृत्य शिखण्डिनम् ।
अयोधयन्रणे भीष्मं संहताः सह सृञ्जयैः ॥ ४०
तथैव तावकाः सर्वे पुरस्कृत्य यतव्रतम् ।

शिखण्डिप्रमुखान्पार्थान्योधयन्ति स्म संयुगे ॥ ४१
ततः प्रववृते युद्धं कौरवाणां भयावहम् ।
तत्र पाण्डुसुतैः सार्धं भीष्मस्य विजयं प्रति ॥ ४२
तावकानां रणे भीष्मो ग्लह आसीद्विशां पते ।
तत्र हि द्यूतमायातं विजयायेतराय वा ॥ ४३
धृष्टद्युम्नो महाराज सर्वसैन्यान्यचोदयत् ।
अभिद्रवत गाङ्गेयं मा भैष्ट नरसत्तमाः ॥ ४४
सेनापतिवचः श्रुत्वा पाण्डवानां वरूथिनी ।
भीष्ममेवाभ्ययात्तूर्णं प्राणांस्त्यक्त्वा महाहवे ॥ ४५
भीष्मोऽपि रथिनां श्रेष्ठः प्रतिजग्राह तां चमूम् ।
आपतन्तीं महाराज वेलामिव महोदधिः ॥ ४६

इति श्रीमहाभारते भीष्मपर्वणि
दशाधिकशततमोऽध्यायः ॥ ११० ॥

१११

धृतराष्ट्र उवाच ।

कथं शांतनवो भीष्मो दशमेऽहनि संजय ।
अयुध्यत महावीर्यैः पाण्डवैः सहसृञ्जयैः ॥ १
कुरवश्च कथं युद्धे पाण्डवान्प्रत्यवारयन् ।
आचक्ष्व मे महायुद्धं भीष्मस्याहवशोभिनः ॥ २

संजय उवाच ।

कुरवः पाण्डवैः सार्धं यथायुध्यन्त भारत ।
यथा च तदभूद्युद्धं तत्ते वक्ष्यामि शृण्वतः ॥ ३
प्रेषिताः परलोकाय परमास्त्रैः किरीटिना ।
अहन्यहनि संप्राप्तास्तावकानां रथव्रजाः ॥ ४
यथाप्रतिज्ञं कौरव्यः स चापि समितिंजयः ।
पार्थानामकरोद्भीष्मः सततं समिति क्षयम् ॥ ५
कुरुभिः सहितं भीष्मं युध्यमानं महारथम् ।
अर्जुनं च सपाञ्चाल्यं दृष्ट्वा संशयिता जनाः ॥ ६
दशमेऽहनि तस्मिंस्तु भीष्मार्जुनसमागमे ।
अवर्तत महारौद्रः सततं समिति क्षयः ॥ ७
तस्मिन्नयुतशो राजन्भूयश्च स परंतपः ।
भीष्मः शांतनवो योधाञ्जघान परमास्त्रवित् ॥ ८
येषामज्ञातकल्पानि नामगोत्राणि पार्थिव ।
ते हतास्तत्र भीष्मेण शूराः सर्वेऽनिवर्तिनः ॥ ९
दशाहानि ततस्तप्त्वा भीष्मः पाण्डववाहिनीम् ।
निरविद्यत धर्मात्मा जीवितेन परंतपः ॥ १०
स क्षिप्रं वधमन्विच्छन्नात्मनोऽभिमुखं रणे ।
न हन्यां मानवश्रेष्ठान्संग्रामेऽभिमुखानिति ॥ ११
चिन्तयित्वा महाबाहुः पिता देवव्रतस्तव ।
अभ्याशस्थं महाराज पाण्डवं वाक्यमब्रवीत् ॥ १२
युधिष्ठिर महाप्राज्ञ सर्वशास्त्रविशारद ।
शृणु मे वचनं तात धर्म्यं स्वर्ग्यं च जल्पतः ॥ १३
निर्विण्णोऽस्मि भृशं तात देहेनानेन भारत ।
घ्नतश्च मे गतः कालः सुबहून्प्राणिनो रणे ॥ १४
तस्मात्पार्थं पुरोधाय पाञ्चालान्सृञ्जयांस्तथा ।
मद्वधे क्रियतां यत्नो मम चेदिच्छसि प्रियम् ॥ १५
तस्य तन्मतमाज्ञाय पाण्डवः सत्यदर्शनः ।
भीष्मं प्रतिययौ यत्तः संग्रामे सह सृञ्जयैः ॥ १६
धृष्टद्युम्नस्ततो राजन्पाण्डवश्च युधिष्ठिरः ।
श्रुत्वा भीष्मस्य तां वाचं चोदयामासतुर्बलम् ॥ १७
अभिद्रवत युध्यध्वं भीष्मं जयत संयुगे ।
रक्षिताः सत्यसंधेन जिष्णुना रिपुजिष्णुना ॥ १८
अयं चापि महेष्वासः पार्षतो वाहिनीपतिः ।
भीमसेनश्च समरे पालयिष्यति वो ध्रुवम् ॥ १९
न वै भीष्माद्भयं किंचित्कर्तव्यं युधि सृञ्जयाः ।
ध्रुवं भीष्मं विजेष्यामः पुरस्कृत्य शिखण्डिनम् ॥
तथा तु समयं कृत्वा दशमेऽहनि पाण्डवाः ।
ब्रह्मलोकपरा भूत्वा संजग्मुः क्रोधमूर्छिताः ॥ २१
शिखण्डिनं पुरस्कृत्य पाण्डवं च धनंजयम् ।
भीष्मस्य पातने यत्नं परमं ते समास्थिताः ॥ २२

ततस्तव सुतादिष्टा नानाजनपदेश्वराः ।
द्रोणेन सहपुत्रेण सहसेना महाबलाः ॥ २३
दुःशासनश्च बलवान्सह सर्वैः सहोदरैः ।
भीष्मं समरमध्यस्थं पालयांचक्रिरे तदा ॥ २४
ततस्तु तावकाः शूराः पुरस्कृत्य यतव्रतम् ।
शिखण्डिप्रमुखान्पार्थान्योधयन्ति स्म संयुगे ॥ २५
चेदिभिश्च सपाञ्चालैः सहितो वानरध्वजः ।
ययौ शांतनवं भीष्मं पुरस्कृत्य शिखण्डिनम् ॥ २६
द्रोणपुत्रं शिनेर्नप्ता धृष्टकेतुस्तु पौरवम् ।
युधामन्युः सहामात्यं दुर्योधनमयोधयत् ॥ २७
विराटस्तु सहानीकः सहसेनं जयद्रथम् ।
वृद्धक्षत्रस्य दायादमाससाद परंतपः ॥ २८
मद्रराजं महेष्वासं सहसैन्यं युधिष्ठिरः ।
भीमसेनाभिगुप्तश्च नागानीकमुपाद्रवत् ॥ २९
अप्रधृष्यमनावार्यं सर्वशस्त्रभृतां वरम् ।
द्रोणं प्रति ययौ यत्तः पाञ्चाल्यः सह सोमकैः ॥
कर्णिकारध्वजं चापि सिंहकेतुररिंदमः ।
प्रत्युज्जगाम सौभद्रं राजपुत्रो बृहद्बलः ॥ ३१
शिखण्डिनं च पुत्रास्ते पाण्डवं च धनंजयम् ।
राजभिः समरे सार्धमभिपेतुर्जिघांसवः ॥ ३२
तस्मिन्नतिमहाभीमे सेनयोर्वै पराक्रमे ।
संप्रधावत्स्वनीकेषु मेदिनी समकम्पत ॥ ३३
तान्यनीकान्यनीकेषु समसज्जन्त भारत ।
तावकानां परेषां च दृष्ट्वा शांतनवं रणे ॥ ३४
ततस्तेषां प्रयततामन्योन्यमभिधावताम् ।
प्रादुरासीन्महाञ्शब्दो दिक्षु सर्वासु भारत ॥ ३५
शङ्खदुन्दुभिघोषैश्च वारणानां च बृंहितैः ।
सिंहनादैश्च सैन्यानां दारुणः समपद्यत ॥ ३६
सा च सर्वनरेन्द्राणां चन्द्रार्कसदृशी प्रभा ।
वीराङ्गदकिरीटेषु निष्प्रभा समपद्यत ॥ ३७
रजोमेघाश्च संजज्ञुः शस्त्रविद्युद्भिरावृताः ।
धनुषां चैव निर्घोषो दारुणः समपद्यत ॥ ३८
बाणशङ्खप्रणादाश्च भेरीणां च महास्वनाः ।
रथघोषश्च संजग्मुः सेनयोरुभयोरपि ॥ ३९
प्रासशक्त्यृष्टिसंघैश्च बाणौघैश्च समाकुलम् ।
निष्प्रकाशमिवाकाशं सेनयोः समपद्यत ॥ ४०
अन्योन्यं रथिनः पेतुर्वाजिनश्च महाहवे ।
कुञ्जराः कुञ्जराञ्जघ्नुः पदातींश्च पदातयः ॥ ४१
तदासीत्सुमहद्युद्धं कुरूणां पाण्डवैः सह ।
भीष्महेतोर्नरव्याघ्र श्येनयोरामिषे यथा ॥ ४२
तयोः समागमो घोरो बभूव युधि भारत ।
अन्योन्यस्य वधार्थाय जिगीषूणां रणाजिरे ॥ ४३

इति श्रीमहाभारते भीष्मपर्वणि
एकादशाधिकशततमोऽध्यायः ॥ १११ ॥

११२

संजय उवाच ।

अभिमन्युर्महाराज तव पुत्रमयोधयत् ।
महत्या सेनया युक्तो भीष्महेतोः पराक्रमी ॥ १
दुर्योधनो रणे कार्ष्णिं नवभिर्नतपर्वभिः ।
आजघान रणे क्रुद्धः पुनश्चैनं त्रिभिः शरैः ॥ २
तस्य शक्तिं रणे कार्ष्णिर्मृत्योर्घोरामिव स्वसाम् ।
प्रेषयामास संक्रुद्धो दुर्योधनरथं प्रति ॥ ३
तामापतन्तीं सहसा घोररूपां विशां पते ।
द्विधा चिच्छेद ते पुत्रः क्षुरप्रेण महारथः ॥ ४
तां शक्तिं पतितां दृष्ट्वा कार्ष्णिः परमकोपनः ।
दुर्योधनं त्रिभिर्बाणैर्बाह्वोरुरसि चार्पयत् ॥ ५
पुनश्चैनं शरैर्घोरैराजघान स्तनान्तरे ।
दशभिर्भरतश्रेष्ठ दुर्योधनममर्षणम् ॥ ६
तद्युद्धमभवद्घोरं चित्ररूपं च भारत ।
ईक्षितृप्रीतिजननं सर्वपार्थिवपूजितम् ॥ ७

भीष्मस्य निधनार्थाय पार्थस्य विजयाय च ।
युयुधाते रणे वीरौ सौभद्रकुरुपुंगवौ ॥ ८
सात्यकिं रभसं युद्धे द्रौणिर्ब्राह्मणपुंगवः ।
आजघानोरसि क्रुद्धो नाराचेन परंतपः ॥ ९
शैनेयोऽपि गुरोः पुत्रं सर्वमर्मसु भारत ।
अताडयदमेयात्मा नवभिः कङ्कपत्रिभिः ॥ १०
अश्वत्थामा तु समरे सात्यकिं नवभिः शरैः ।
त्रिंशता च पुनस्तूर्णं बाह्वोरुरसि चार्पयत् ॥ ११
सोऽतिविद्धो महेष्वासो द्रोणपुत्रेण सात्वतः ।
द्रोणपुत्रं त्रिभिर्बाणैराजघान महायशाः ॥ १२
पौरवो धृष्टकेतुं च शरैरासाद्य संयुगे ।
बहुधा दारयांचक्रे महेष्वासं महारथम् ॥ १३
तथैव पौरवं युद्धे धृष्टकेतुर्महारथः ।
त्रिंशता निशितैर्बाणैर्विव्याध सुमहाबलः ॥ १४
पौरवस्तु धनुश्छित्त्वा धृष्टकेतोर्महारथः ।
ननाद बलवन्नादं विव्याध दशभिः शरैः ॥ १५
सोऽन्यत्कार्मुकमादाय पौरवं निशितैः शरैः ।
आजघान महाराज त्रिसप्तत्या शिलीमुखैः ॥ १६
तौ तु तत्र महेष्वासौ महामात्रौ महारथौ ।
महता शरवर्षेण परस्परमवर्षताम् ॥ १७
अन्योन्यस्य धनुश्छित्त्वा हयान्हत्वा च भारत ।
विरथावसियुद्धाय संगतौ तौ महारथौ ॥ १८
आर्षभे चर्मणी चित्रे शतचन्द्रपरिष्कृते ।
तारकाशतचित्रौ च निस्त्रिंशौ सुमहाप्रभौ ॥ १९
प्रगृह्य विमलौ राजंस्तावन्योन्यमभिद्रुतौ ।
वाशितासंगमे यत्तौ सिंहाविव महावने ॥ २०
मण्डलानि विचित्राणि गतप्रत्यागतानि च ।
चेरतुर्दर्शयन्तौ च प्रार्थयन्तौ परस्परम् ॥ २१
पौरवो धृष्टकेतुं तु शङ्खदेशे महासिना ।
ताडयामास संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ २२
चेदिराजोऽपि समरे पौरवं पुरुषर्षभम् ।
आजघान शिताग्रेण जत्रुदेशे महासिना ॥ २३
तावन्योन्यं महाराज समासाद्य महाहवे ।
अन्योन्यवेगाभिहतौ निपेततुररिंदमौ ॥ २४
ततः स्वरथमारोप्य पौरवं तनयस्तव ।
जयत्सेनो रथे राजन्नपोवाह रणाजिरात् ॥ २५
धृष्टकेतुं च समरे माद्रीपुत्रः परंतपः ।
अपोवाह रणे राजन्सहदेवः प्रतापवान् ॥ २६
चित्रसेनः सुशर्माणं विद्ध्वा नवभिराशुगैः ।
पुनर्विव्याध तं षष्ट्या पुनश्च नवभिः शरैः ॥ २७
सुशर्मा तु रणे क्रुद्धस्तव पुत्रं विशां पते ।
दशभिर्दशभिश्चैव विव्याध निशितैः शरैः ॥ २८
चित्रसेनश्च तं राजंस्त्रिंशता नतपर्वणाम् ।
आजघान रणे क्रुद्धः स च तं प्रत्यविध्यत ।
भीष्मस्य समरे राजन्यशो मानं च वर्धयन् ॥ २९
सौभद्रो राजपुत्रं तु बृहद्बलमयोधयत् ।
आर्जुनिं कोसलेन्द्रस्तु विद्ध्वा पञ्चभिरायसैः ।
पुनर्विव्याध विंशत्या शरैः संनतपर्वभिः ॥ ३०
बृहद्बलं च सौभद्रो विद्ध्वा नवभिरायसैः ।
नाकम्पयत संग्रामे विव्याध च पुनः पुनः ॥ ३१
कौसल्यस्य पुनश्चापि धनुश्चिच्छेद फाल्गुनिः ।
आजघान शरैश्चैव त्रिंशता कङ्कपत्रिभिः ॥ ३२
सोऽन्यत्कार्मुकमादाय राजपुत्रो बृहद्बलः ।
फाल्गुनिं समरे क्रुद्धो विव्याध बहुभिः शरैः ॥ ३३
तयोर्युद्धं समभवद्भीष्महेतोः परंतप ।
संरब्धयोर्महाराज समरे चित्रयोधिनोः ।
यथा देवासुरे युद्धे मयवासवयोरभूत् ॥ ३४
भीमसेनो गजानीकं योधयन्बह्वशोभत ।
यथा शक्रो वज्रपाणिर्दारयन्पर्वतोत्तमान् ॥ ३५
ते वध्यमाना भीमेन मातङ्गा गिरिसंनिभाः ।

निपेतुरुर्व्यां सहिता नादयन्तो वसुंधराम् ॥ ३६
गिरिमात्रा हि ते नागा भिन्नाञ्जनचयोपमाः ।
विरेजुर्वसुधां प्राप्य विकीर्णा इव पर्वताः ॥ ३७
युधिष्ठिरो महेष्वासो मद्रराजानमाहवे ।
महत्या सेनया गुप्तं पीडयामास संगतः ॥ ३८
मद्रेश्वरश्च समरे धर्मपुत्रं महारथम् ।
पीडयामास संरब्धो भीष्महेतोः पराक्रमी ॥ ३९
विराटं सैन्धवो राजा विद्ध्वा संनतपर्वभिः ।
नवभिः सायकैस्तीक्ष्णैस्त्रिंशता पुनरर्दयत् ॥ ४०
विराटश्च महाराज सैन्धवं वाहिनीमुखे ।
त्रिंशता निशितैर्बाणैराजघान स्तनान्तरे ॥ ४१
चित्रकार्मुकनिस्त्रिंशौ चित्रवर्मायुधध्वजौ ।
रेजतुश्चित्ररूपौ तौ संग्रामे मत्स्यसैन्धवौ ॥ ४२
द्रोणः पाञ्चालपुत्रेण समागम्य महारणे ।
महासमुदयं चक्रे शरैः संनतपर्वभिः ॥ ४३
ततो द्रोणो महाराज पार्षतस्य महद्धनुः ।
छित्त्वा पञ्चाशतेषूणां पार्षतं समविध्यत ॥ ४४
सोऽन्यत्कार्मुकमादाय पार्षतः परवीरहा ।
द्रोणस्य मिषतो युद्धे प्रेषयामास सायकान् ॥ ४५
ताञ्शराञ्शरसंघैस्तु संनिवार्य महारथः ।
द्रोणो द्रुपदपुत्राय प्राहिणोत्पञ्च सायकान् ॥ ४६
तस्य क्रुद्धो महाराज पार्षतः परवीरहा ।
द्रोणाय चिक्षेप गदां यमदण्डोपमां रणे ॥ ४७
तामापतन्तीं सहसा हेमपट्टविभूषिताम् ।
शरैः पञ्चाशता द्रोणो वारयामास संयुगे ॥ ४८
सा छिन्ना बहुधा राजन्द्रोणचापच्युतैः शरैः ।
चूर्णीकृता विशीर्यन्ती पपात वसुधातले ॥ ४९
गदां विनिहतां दृष्ट्वा पार्षतः शत्रुसूदनः ।
द्रोणाय शक्तिं चिक्षेप सर्वपारशवीं शुभाम् ॥ ५०
तां द्रोणो नवभिर्बाणैश्चिच्छेद युधि भारत ।
पार्षतं च महेष्वासं पीडयामास संयुगे ॥ ५१
एवमेतन्महद्युद्धं द्रोणपार्षतयोरभूत् ।
भीष्मं प्रति महाराज घोररूपं भयानकम् ॥ ५२
अर्जुनः प्राप्य गाङ्गेयं पीडयन्निशितैः शरैः ।
अभ्यद्रवत संयत्तं वने मत्तमिव द्विपम् ॥ ५३
प्रत्युद्ययौ च तं पार्थं भगदत्तः प्रतापवान् ।
त्रिधा भिन्नेन नागेन मदान्धेन महाबलः ॥ ५४
तमापतन्तं सहसा महेन्द्रगजसंनिभम् ।
परं यत्नं समास्थाय बीभत्सुः प्रत्यपद्यत ॥ ५५
ततो गजगतो राजा भगदत्तः प्रतापवान् ।
अर्जुनं शरवर्षेण वारयामास संयुगे ॥ ५६
अर्जुनस्तु रणे नागमायान्तं रजतोपमम् ।
विमलैरायसैस्तीक्ष्णैरविध्यत महारणे ॥ ५७
शिखण्डिनं च कौन्तेयो याहि याहीत्यचोदयत् ।
भीष्मं प्रति महाराज जह्येनमिति चाब्रवीत् ॥ ५८
प्राग्ज्योतिषस्ततो हित्वा पाण्डवं पाण्डुपूर्वज ।
प्रययौ त्वरितो राजन्द्रुपदस्य रथं प्रति ॥ ५९
ततोऽर्जुनो महाराज भीष्ममभ्यद्रवद्द्रुतम् ।
शिखण्डिनं पुरस्कृत्य ततो युद्धमवर्तत ॥ ६०
ततस्ते तावकाः शूराः पाण्डवं रभसं रणे ।
सर्वेऽभ्यधावन्क्रोशन्तस्तदद्भुतमिवाभवत् ॥ ६१
नानाविधान्यनीकानि पुत्राणां ते जनाधिप ।
अर्जुनो व्यधमत्काले दिवीवाभ्राणि मारुतः ॥ ६२
शिखण्डी तु समासाद्य भरतानां पितामहम् ।
इषुभिस्तूर्णमव्यग्रो बहुभिः स समाचिनोत् ॥ ६३
सोमकांश्च रणे भीष्मो जघ्ने पार्थपदानुगान् ।
न्यवारयत सैन्यं च पाण्डवानां महारथः ॥ ६४
रथाग्न्यगारश्चापार्चिरसिशक्तिगदेन्धनः ।
शरसंघमहाज्वालः क्षत्रियान्समरेऽदहत् ॥ ६५
यथा हि सुमहानग्निः कक्षे चरति सानिलः ।

तथा जज्वाल भीष्मोऽपि दिव्यान्यस्त्राण्युदीरयन् ॥
सुवर्णपुङ्खैरिषुभिः शितैः संनतपर्वभिः ।
नादयन्स दिशो भीष्मः प्रदिशश्च महायशाः ॥ ६७
पातयन्रथिनो राजन्गजांश्च सह सादिभिः ।
मुण्डतालवनानीव चकार स रथव्रजान् ॥ ६८
निर्मनुष्यान्रथान्राजन्गजानश्वांश्च संयुगे ।
चकार स तदा भीष्मः सर्वशस्त्रभृतां वरः ॥ ६९
तस्य ज्यातलनिर्घोषं विस्फूर्जितमिवाशनेः ।
निशम्य सर्वतो राजन्समकम्पन्त सैनिकाः ॥ ७०
अमोघा ह्यपतन्बाणाः पितुस्ते मनुजेश्वर ।
नासज्जन्त शरीरेषु भीष्मचापच्युताः शराः ॥ ७१
निर्मनुष्यान्रथान्राजन्सुयुक्ताञ्जवनैर्हयैः ।
वातायमानान्पश्याम ह्रियमाणान्विशां पते ॥ ७२
चेदिकाशिकरूषाणां सहस्राणि चतुर्दश ।
महारथाः समाख्याताः कुलपुत्रास्तनुत्यजः ॥ ७३
अपरावर्तिनः शूराः सुवर्णविकृतध्वजाः ।
संग्रामे भीष्ममासाद्य सवाजिरथकुञ्जराः ।
जग्मुस्ते परलोकाय व्यादितास्यमिवान्तकम् ॥ ७४
न तत्रासीन्महाराज सोमकानां महारथः ।
यः संप्राप्य रणे भीष्मं जीविते स मनो दधे ॥
तांश्च सर्वान्रणे योधान्प्रेतराजपुरं प्रति ।
नीतानमन्यन्त जना दृष्ट्वा भीष्मस्य विक्रमम् ॥७६
न कश्चिदेनं समरे प्रत्युद्याति महारथः ।
ऋते पाण्डुसुतं वीरं श्वेताश्वं कृष्णसारथिम् ।
शिखण्डिनं च समरे पाञ्चाल्यममितौजसम् ॥ ७७
शिखण्डी तु रणे भीष्ममासाद्य भरतर्षभ ।
दशभिर्दशभिर्बाणैराजघान महाहवे ॥ ७८
शिखण्डिनं तु गाङ्गेयः क्रोधदीप्तेन चक्षुषा ।
अवैक्षत कटाक्षेण निर्दहन्निव भारत ॥ ७९
स्त्रीत्वं तत्संस्मरन्राजन्सर्वलोकस्य पश्यतः ।
न जघान रणे भीष्मः स च तं नावबुद्धवान् ॥
अर्जुनस्तु महाराज शिखण्डिनमभाषत ।
अभित्वरस्व त्वरितो जहि चैनं पितामहम् ॥ ८१
किं ते विवक्षया वीर जहि भीष्मं महारथम् ।
न ह्यन्यमनुपश्यामि कंचिद्यौधिष्ठिरे बले ॥ ८२
यः शक्तः समरे भीष्मं योधयेत पितामहम् ।
ऋते त्वां पुरुषव्याघ्र सत्यमेतद्ब्रवीमि ते ॥ ८३
एवमुक्तस्तु पार्थेन शिखण्डी भरतर्षभ ।
शरैर्नानाविधैस्तूर्णं पितामहमुपाद्रवत् ॥ ८४
अचिन्तयित्वा तान्बाणान्पिता देवव्रतस्तव ।
अर्जुनं समरे क्रुद्धं वारयामास सायकैः ॥ ८५
तथैव च चमूं सर्वां पाण्डवानां महारथः ।
अप्रैषीत्समरे तीक्ष्णैः परलोकाय मारिष ॥ ८६
तथैव पाण्डवा राजन्सैन्येन महता वृताः ।
भीष्मं प्रच्छादयामासुर्मेघा इव दिवाकरम् ॥ ८७
स समन्तात्परिवृतो भारतो भरतर्षभ ।
निर्ददाह रणे शूरान्वनं वह्निरिव ज्वलन् ॥ ८८
तत्राद्भुतमपश्याम तव पुत्रस्य पौरुषम् ।
अयोधयत यत्पार्थं जुगोप च यतव्रतम् ॥ ८९
कर्मणा तेन समरे तव पुत्रस्य धन्विनः ।
दुःशासनस्य तुतुषुः सर्वे लोका महात्मनः ॥ ९०
यदेकः समरे पार्थान्सानुगान्समयोधयत् ।
न चैनं पाण्डवा युद्धे वारयामासुरुल्बणम् ॥ ९१
दुःशासनेन समरे रथिनो विरथीकृताः ।
सादिनश्च महाराज दन्तिनश्च महाबलाः ॥ ९२
विनिर्भिन्नाः शरैस्तीक्ष्णैर्निपेतुर्धरणीतले ।
शरातुरास्तथैवान्ये दन्तिनो विद्रुता दिशः ॥ ९३
यथाग्निरिन्धनं प्राप्य ज्वलेद्दीप्तार्चिरुल्बणः ।
तथा जज्वाल पुत्रस्ते पाण्डवान्वै विनिर्दहन् ॥ ९४
तं भारतमहामात्रं पाण्डवानां महारथः ।

जेतुं नोत्सहते कश्चिन्नाप्युद्यातुं कथंचन ।
ऋते महेन्द्रतनयं श्वेताश्वं कृष्णसारथिम् ॥ ९५
स हि तं समरे राजन्विजित्य विजयोऽर्जुनः ।
भीष्ममेवाभिदुद्राव सर्वसैन्यस्य पश्यतः ॥ ९६
विजितस्तव पुत्रोऽपि भीष्मबाहुव्यपाश्रयः ।
पुनः पुनः समाश्वस्य प्रायुध्यत रणोत्कटः ।
अर्जुनं च रणे राजन्योधयन्स व्यराजत ॥ ९७
शिखण्डी तु रणे राजन्विव्याधैव पितामहम् ।
शरैरशनिसंस्पर्शैस्तथा सर्पविषोपमैः ॥ ९८
न च तेऽस्य रुजं चक्रुः पितुस्तव जनेश्वर ।
स्मयमानश्च गाङ्गेयस्तान्बाणाञ्जगृहे तदा ॥ ९९
उष्णार्तो हि नरो यद्वज्जलधाराः प्रतीच्छति ।
तथा जग्राह गाङ्गेयः शरधाराः शिखण्डिनः ॥१००
तं क्षत्रिया महाराज ददृशुर्घोरमाहवे ।
भीष्मं दहन्तं सैन्यानि पाण्डवानां महात्मनाम् ॥
ततोऽब्रवीत्तव सुतः सर्वसैन्यानि मारिष ।
अभिद्रवत संग्रामे फल्गुनं सर्वतो रथैः ॥ १०२
भीष्मो वः समरे सर्वान्पालयिष्यति धर्मवित् ।
ते भयं सुमहत्त्यक्त्वा पाण्डवान्प्रतियुध्यत ॥ १०३
एष तालेन दीप्तेन भीष्मस्तिष्ठति पालयन् ।
सर्वेषां धार्तराष्ट्राणां रणे शर्म च वर्म च ॥ १०४
त्रिदशापि समुद्युक्ता नालं भीष्मं समासितुम् ।
किमु पार्था महात्मानं मर्त्यभूतास्तथाबलाः ।
तस्माद्द्रवत हे योधाः फल्गुनं प्राप्य संयुगे ॥ १०५
अहमद्य रणे यत्तो योधयिष्यामि फल्गुनम् ।
सहितः सर्वतो यत्तैर्भवद्भिर्वसुधाधिपाः ॥ १०६
तच्छ्रुत्वा तु वचो राजंस्तव पुत्रस्य धन्विनः ।
अर्जुनं प्रति संयत्ता बलवन्तो महारथाः ॥ १०७
ते विदेहाः कलिङ्गाश्च दाशेरकगणैः सह ।
अभिपेतुर्निषादाश्च सौवीराश्च महारणे ॥ १०८
बाह्लिका दरदाश्चैव प्राच्योदीच्याश्च मालवाः ।
अभीषाहाः शूरसेनाः शिबयोऽथ वसातयः ॥१०९
शाल्वाश्रयास्त्रिगर्ताश्च अम्बष्ठाः केकयैः सह ।
अभिपेतू रणे पार्थं पतंगा इव पावकम् ॥ ११०
स तान्सर्वान्सहानीकान्महाराज महारथान् ।
दिव्यान्यस्त्राणि संचिन्त्य प्रसंधाय धनंजयः ॥१११
स तैरस्त्रैर्महावेगैर्ददाहाशु महाबलः ।
शरप्रतापैर्बीभत्सुः पतंगानिव पावकः ॥ ११२
तस्य बाणसहस्राणि सृजतो दृढधन्विनः ।
दीप्यमानमिवाकाशे गाण्डीवं समदृश्यत ॥ ११३
ते शरार्ता महाराज विप्रकीर्णरथध्वजाः ।
नाभ्यवर्तन्त राजानः सहिता वानरध्वजम् ॥११४
सध्वजा रथिनः पेतुर्हयारोहा हयैः सह ।
गजाः सह गजारोहैः किरीटिशरताडिताः ॥११५
ततोऽर्जुनभुजोत्सृष्टैरावृतासीद्वसुंधरा ।
विद्रवद्भिश्च बहुधा बलै राज्ञां समन्ततः ॥ ११६
अथ पार्थो महाबाहुर्द्रावयित्वा वरूथिनीम् ।
दुःशासनाय समरे प्रेषयामास सायकान् ॥ ११७
ते तु भित्त्वा तव सुतं दुःशासनमयोमुखाः ।
धरणीं विविशुः सर्वे वल्मीकमिव पन्नगाः ।
हयांश्चास्य ततो जघ्ने सारथिं च न्यपातयत् ॥११८
विविंशतिं च विंशत्या विरथं कृतवान्प्रभो ।
आजघान भृशं चैव पञ्चभिर्नतपर्वभिः ॥ ११९
कृपं शल्यं विकर्णं च विद्ध्वा बहुभिरायसैः ।
चकार विरथांश्चैव कौन्तेयः श्वेतवाहनः ॥ १२०
एवं ते विरथाः पञ्च कृपः शल्यश्च मारिष ।
दुःशासनो विकर्णश्च तथैव च विविंशतिः ।
संप्राद्रवन्त समरे निर्जिताः सव्यसाचिना ॥१२१
पूर्वाह्णे तु तथा राजन्पराजित्य महारथान् ।
प्रजज्वाल रणे पार्थो विधूम इव पावकः ॥ १२२

तथैव शरवर्षेण भास्करो रश्मिवानिव ।
अन्यानपि महाराज पातयामास पार्थिवान् ॥ १२३
पराङ्मुखीकृत्य तदा शरवर्षैर्महारथान् ।
प्रावर्तयत संग्रामे शोणितोदां महानदीम् ।
मध्येन कुरुसैन्यानां पाण्डवानां च भारत ॥ १२४
गजाश्च रथसंघाश्च बहुधा रथिभिर्हताः ।
रथाश्च निहता नागैर्नागा हयपदातिभिः ॥ १२५
अन्तरा छिद्यमानानि शरीराणि शिरांसि च ।
निपेतुर्दिक्षु सर्वासु गजाश्वरथयोधिनाम् ॥ १२६
छन्नमायोधनं रेजे कुण्डलाङ्गदधारिभिः ।
पतितैः पात्यमानैश्च राजपुत्रैर्महारथैः ॥ १२७
रथनेमिनिकृत्ताश्च गजैश्चैवावपोथिताः ।
पादाताश्चाप्यदृश्यन्त साश्वाः सहयसादिनः ॥ १२८
गजाश्वरथसंघाश्च परिपेतुः समन्ततः ।
विशीर्णाश्च रथा भूमौ भग्नचक्रयुगध्वजाः ॥ १२९
तद्गजाश्वरथौघानां रुधिरेण समुक्षितम् ।
छन्नमायोधनं रेजे रक्ताभ्रमिव शारदम् ॥ १३०
श्वानः काकाश्च गृध्राश्च वृका गोमायुभिः सह ।
प्रणेदुर्भक्ष्यमासाद्य विकृताश्च मृगद्विजाः ॥ १३१
ववुर्बहुविधाश्चैव दिक्षु सर्वासु मारुताः ।
दृश्यमानेषु रक्षःसु भूतेषु विनदत्सु च ॥ १३२
काञ्चनानि च दामानि पताकाश्च महाधनाः ।
धूमायमाना दृश्यन्ते सहसा मारुतेरिताः ॥ १३३
श्वेतच्छत्रसहस्राणि सध्वजाश्च महारथाः ।
विनिकीर्णाः स्म दृश्यन्ते शतशोऽथ सहस्रशः ।
सपताकाश्च मातङ्गा दिशो जग्मुः शरातुराः ॥ १३४
क्षत्रियाश्च मनुष्येन्द्र गदाशक्तिधनुर्धराः ।
समन्ततो व्यदृश्यन्त पतिता धरणीतले ॥ १३५
ततो भीष्मो महाराज दिव्यमस्त्रमुदीरयन् ।
अभ्यधावत कौन्तेयं मिषतां सर्वधन्विनाम् ॥ १३६
तं शिखण्डी रणे यत्तमभ्यधावत दंशितः ।
संजहार ततो भीष्मस्तदस्त्रं पावकोपमम् ॥ १३७
एतस्मिन्नेव काले तु कौन्तेयः श्वेतवाहनः ।
निजघ्ने तावकं सैन्यं मोहयित्वा पितामहम् ॥ १३८

इति श्रीमहाभारते भीष्मपर्वणि
द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥

११३

संजय उवाच ।

एवं व्यूढेष्वनीकेषु भूयिष्ठमनुवर्तिषु ।
ब्रह्मलोकपराः सर्वे समपद्यन्त भारत ॥ १
न ह्यनीकमनीकेन समसज्जत संकुले ।
न रथा रथिभिः सार्धं न पदाताः पदातिभिः ॥ २
अश्वा नाश्वैरयुध्यन्त न गजा गजयोधिभिः ।
महान्व्यतिकरो रौद्रः सेनयोः समपद्यत ॥ ३
नरनागरथेष्वेवं व्यवकीर्णेषु सर्वशः ।
क्षये तस्मिन्महारौद्रे निर्विशेषमजायत ॥ ४
ततः शल्यः कृपश्चैव चित्रसेनश्च भारत ।
दुःशासनो विकर्णश्च रथानास्थाय सत्वराः ।
पाण्डवानां रणे शूरा ध्वजिनीं समकम्पयन् ॥ ५
सा वध्यमाना समरे पाण्डुसेना महात्मभिः ।
त्रातारं नाध्यगच्छद्वै मज्जमानेव नौर्जले ॥ ६
यथा हि शैशिरः कालो गवां मर्माणि कृन्तति ।
तथा पाण्डुसुतानां वै भीष्मो मर्माण्यकृन्तत ॥ ७
अतीव तत्र सैन्यस्य पार्थेन च महात्मना ।
नगमेघप्रतीकाशाः पातिता बहुधा गजाः ॥ ८
मृद्यमानाश्च दृश्यन्ते पार्थेन नरयूथपाः ।
इषुभिस्ताड्यमानाश्च नाराचैश्च सहस्रशः ॥ ९
पेतुरार्तस्वरं कृत्वा तत्र तत्र महागजाः ।
आबद्धाभरणैः कायैर्निहतानां महात्मनाम् ॥ १०
छन्नमायोधनं रेजे शिरोभिश्च सकुण्डलैः ।

तस्मिन्नतिमहाभीमे राजन्वीरवरक्षये ।
भीष्मे च युधि विक्रान्ते पाण्डवे च धनंजये ॥ ११
ते पराक्रान्तमालोक्य राजन्युधि पितामहम् ।
न न्यवर्तन्त कौरव्या ब्रह्मलोकपुरस्कृताः ॥ १२
इच्छन्तो निधनं युद्धे स्वर्गं कृत्वा परायणम् ।
पाण्डवानभ्यवर्तन्त तस्मिन्वीरवरक्षये ॥ १३
पाण्डवापि महाराज स्मरन्तो विविधान्बहून् ।
क्लेशान्कृतान्सपुत्रेण त्वया पूर्वं नराधिप ॥ १४
भयं त्यक्त्वा रणे शूरा ब्रह्मलोकपुरस्कृताः ।
तावकांस्तव पुत्रांश्च योधयन्ति स्म हृष्टवत् ॥ १५
सेनापतिस्तु समरे प्राह सेनां महारथः ।
अभिद्रवत गाङ्गेयं सोमकाः सृञ्जयैः सह ॥ १६
सेनापतिवचः श्रुत्वा सोमकाः सह सृञ्जयैः ।
अभ्यद्रवन्त गाङ्गेयं शस्त्रवृष्ट्या समन्ततः ॥ १७
वध्यमानस्ततो राजन्पिता शांतनवस्तव ।
अमर्षवशमापन्नो योधयामास सृञ्जयान् ॥ १८
तस्य कीर्तिमतस्तात पुरा रामेण धीमता ।
संप्रदत्तास्त्रशिक्षा वै परानीकविनाशिनी ॥ १९
स तां शिक्षामधिष्ठाय कृत्वा परबलक्षयम् ।
अहन्यहनि पार्थानां वृद्धः कुरुपितामहः ।
भीष्मो दश सहस्राणि जघान परवीरहा ॥ २०
तस्मिंस्तु दिवसे प्राप्ते दशमे भरतर्षभ ।
भीष्मेणैकेन मत्स्येषु पाञ्चालेषु च संयुगे ।
गजाश्वममितं हत्वा हताः सप्त महारथाः ॥ २१
हत्वा पञ्च सहस्राणि रथिनां प्रपितामहः ।
नराणां च महायुद्धे सहस्राणि चतुर्दश ॥ २२
तथा दन्तिसहस्रं च हयानामयुतं पुनः ।
शिक्षाबलेन निहतं पित्रा तव विशां पते ॥ २३
ततः सर्वमहीपानां क्षोभयित्वा वरूथिनीम् ।
विराटस्य प्रियो भ्राता शतानीको निपातितः ॥ २४
शतानीकं च समरे हत्वा भीष्मः प्रतापवान् ।
सहस्राणि महाराज राज्ञां भल्लैर्न्यपातयत् ॥ २५
ये च केचन पार्थानामभियाता धनंजयम् ।
राजानो भीष्ममासाद्य गतास्ते यमसादनम् ॥ २६
एवं दश दिशो भीष्मः शरजालैः समन्ततः ।
अतीत्य सेनां पार्थानामवतस्थे चमूमुखे ॥ २७
स कृत्वा सुमहत्कर्म तस्मिन्वै दशमेऽहनि ।
सेनयोरन्तरे तिष्ठन्प्रगृहीतशरासनः ॥ २८
न चैनं पार्थिवा राजञ्शेकुः केचिन्निरीक्षितुम् ।
मध्यं प्राप्तं यथा ग्रीष्मे तपन्तं भास्करं दिवि ॥ २९
यथा दैत्यचमूं शक्रस्तापयामास संयुगे ।
तथा भीष्मः पाण्डवेयांस्तापयामास भारत ॥ ३०
तथा च तं पराक्रान्तमालोक्य मधुसूदनः ।
उवाच देवकीपुत्रः प्रीयमाणो धनंजयम् ॥ ३१
एष शांतनवो भीष्मः सेनयोरन्तरे स्थितः ।
नानिहत्य बलादेनं विजयस्ते भविष्यति ॥ ३२
यत्तः संस्तम्भयस्वैनं यत्रैषा भिद्यते चमूः ।
न हि भीष्मशरानन्यः सोढुमुत्सहते विभो ॥ ३३
ततस्तस्मिन्क्षणे राजंश्चोदितो वानरध्वजः ।
सध्वजं सरथं साश्वं भीष्ममन्तर्दधे शरैः ॥ ३४
स चापि कुरुमुख्यानामृषभः पाण्डवेरितान् ।
शरव्रातैः शरव्रातान्बहुधा विदुधाव तान् ॥ ३५
तेन पाञ्चालराजश्च धृष्टकेतुश्च वीर्यवान् ।
पाण्डवो भीमसेनश्च धृष्टद्युम्नश्च पार्षतः ॥ ३६
यमौ च चेकितानश्च केकयाः पञ्च चैव ह ।
सात्यकिश्च महाराज सौभद्रोऽथ घटोत्कचः ॥ ३७
द्रौपदेयाः शिखण्डी च कुन्तिभोजश्च वीर्यवान् ।
सुशर्मा च विराटश्च पाण्डवेया महाबलाः ॥ ३८
एते चान्ये च बहवः पीडिता भीष्मसायकैः ।
समुद्धृताः फल्गुनेन निमग्नाः शोकसागरे ॥ ३९

ततः शिखण्डी वेगेन प्रगृह्य परमायुधम् ।
भीष्ममेवाभिदुद्राव रक्ष्यमाणः किरीटिना ॥ ४०
ततोऽस्यानुचरान्हत्वा सर्वान्रणविभागवित् ।
भीष्ममेवाभिदुद्राव बीभत्सुरपराजितः ॥ ४१
सात्यकिश्चेकितानश्च धृष्टद्युम्नश्च पार्षतः ।
विराटो द्रुपदश्चैव माद्रीपुत्रौ च पाण्डवौ ।
दुद्रुवुर्भीष्ममेवाजौ रक्षिता दृढधन्वना ॥ ४२
अभिमन्युश्च समरे द्रौपद्याः पञ्च चात्मजाः ।
दुद्रुवुः समरे भीष्मं समुद्यतमहायुधाः ॥ ४३
ते सर्वे दृढधन्वानः संयुगेष्वपलायिनः ।
बहुधा भीष्ममानर्छन्मार्गणैः कृतमार्गणाः ॥ ४४
विधूय तान्बाणगणान्ये मुक्ताः पार्थिवोत्तमैः ।
पाण्डवानामदीनात्मा व्यगाहत वरूथिनीम् ।
कृत्वा शरविघातं च क्रीडन्निव पितामहः ॥ ४५
नाभिसंधत्त पाञ्चाल्यं स्मयमानो मुहुर्मुहुः ।
स्त्रीत्वं तस्यानुसंस्मृत्य भीष्मो बाणाञ्शिखण्डिनः ।
जघान द्रुपदानीके रथान्सप्त महारथः ॥ ४६
ततः किलकिलाशब्दः क्षणेन समपद्यत ।
मत्स्यपाञ्चालचेदीनां तमेकमभिधावताम् ॥ ४७
ते वराश्वरथव्रातैर्वारणैः सपदातिभिः ।
तमेकं छादयामासुर्मेघा इव दिवाकरम् ।
भीष्मं भागीरथीपुत्रं प्रतपन्तं रणे रिपून् ॥ ४८
ततस्तस्य च तेषां च युद्धे देवासुरोपमे ।
किरीटी भीष्ममानर्छत्पुरस्कृत्य शिखण्डिनम् ॥ ४९

इति श्रीमहाभारते भीष्मपर्वणि
त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

११४

संजय उवाच ।

एवं ते पाण्डवाः सर्वे पुरस्कृत्य शिखण्डिनम् ।
विव्यधुः समरे भीष्मं परिवार्य समन्ततः ॥ १
शतघ्नीभिः सुघोराभिः पट्टिशैः सपरश्वधैः ।
मुद्गरैर्मुसलैः प्रासैः क्षेपणीभिश्च सर्वशः ॥ २
शरैः कनकपुङ्खैश्च शक्तितोमरकम्पनैः ।
नाराचैर्वत्सदन्तैश्च भुशुण्डीभिश्च भारत ।
अताडयन्रणे भीष्मं सहिताः सर्वसृञ्जयाः ॥ ३
स विशीर्णतनुत्राणः पीडितो बहुभिस्तदा ।
विव्यथे नैव गाङ्गेयो भिद्यमानेषु मर्मसु ॥ ४
स दीप्तशरचापार्चिरस्त्रप्रसृतमारुतः ।
नेमिनिर्ह्रादसंनादो महास्त्रोदयपावकः ॥ ५
चित्रचापमहाज्वालो वीरक्षयमहेन्धनः ।
युगान्ताग्निसमो भीष्मः परेषां समपद्यत ॥ ६
निपत्य रथसंघानामन्तरेण विनिःसृतः ।
दृश्यते स्म नरेन्द्राणां पुनर्मध्यगतश्चरन् ॥ ७
ततः पाञ्चालराजं च धृष्टकेतुमतीत्य च ।
पाण्डवानीकिनीमध्यमाससाद स वेगितः ॥ ८
ततः सात्यकिभीमौ च पाण्डवं च धनंजयम् ।
द्रुपदं च विराटं च धृष्टद्युम्नं च पार्षतम् ॥ ९
भीमघोषैर्महावेगैर्वैरिवारणभेदिभिः ।
षडेतान्षड्भिरानर्छद्भास्करप्रतिमैः शरैः ॥ १०
तस्य ते निशितान्बाणान्संनिवार्य महारथाः ।
दशभिर्दशभिर्भीष्ममर्दयामासुरोजसा ॥ ११
शिखण्डी तु रणे बाणान्यान्मुमोच महाव्रते ।
ते भीष्मं विविशुस्तूर्णं स्वर्णपुङ्खाः शिलाशिताः ॥
ततः किरीटी संरब्धो भीष्ममेवाभ्यवर्तत ।
शिखण्डिनं पुरस्कृत्य धनुश्चास्य समाच्छिनत् ॥ १३
भीष्मस्य धनुषश्छेदं नामृष्यन्त महारथाः ।
द्रोणश्च कृतवर्मा च सैन्धवश्च जयद्रथः ॥ १४
भूरिश्रवाः शलः शल्यो भगदत्तस्तथैव च ।
सप्तैते परमक्रुद्धाः किरीटिनमभिद्रुताः ॥ १५
उत्तमास्त्राणि दिव्यानि दर्शयन्तो महारथाः ।

अभिपेतुर्भृशं क्रुद्धाश्छादयन्त स्म पाण्डवान्॥१६
तेषामापततां शब्दः शुश्रुवे फल्गुनं प्रति ।
उद्वृत्तानां यथा शब्दः समुद्राणां युगक्षये ॥ १७
हतानयत गृह्णीत युध्यतापि च कृन्तत ।
इत्यासीत्तुमुलः शब्दः फल्गुनस्य रथं प्रति ॥ १८
तं शब्दं तुमुलं श्रुत्वा पाण्डवानां महारथाः ।
अभ्यधावन्परीप्सन्तः फल्गुनं भरतर्षभ ॥ १९
सात्यकिर्भीमसेनश्च धृष्टद्युम्नश्च पार्षतः ।
विराटद्रुपदौ चोभौ राक्षसश्च घटोत्कचः ॥ २०
अभिमन्युश्च संक्रुद्धः सप्तैते क्रोधमूर्छिताः ।
समभ्यधावंस्त्वरिताश्चित्रकार्मुकधारिणः ॥ २१
तेषां समभवद्युद्धं तुमुलं लोमहर्षणम् ।
संग्रामे भरतश्रेष्ठ देवानां दानवैरिव ॥ २२
शिखण्डी तु रथश्रेष्ठो रक्ष्यमाणः किरीटिना ।
अविध्यद्दशभिर्भीष्मं छिन्नधन्वानमाहवे ।
सारथिं दशभिश्चास्य ध्वजं चैकेन चिच्छिदे॥ २३
सोऽन्यत्कार्मुकमादाय गाङ्गेयो वेगवत्तरम् ।
तदप्यस्य शितैर्भल्लैस्त्रिभिश्चिच्छेद फल्गुनः ॥ २४
एवं स पाण्डवः क्रुद्ध आत्तमात्तं पुनः पुनः ।
धनुर्भीष्मस्य चिच्छेद सव्यसाची परंतपः ॥ २५
स च्छिन्नधन्वा संक्रुद्धः सृक्किणी परिसंलिहन् ।
शक्तिं जग्राह संक्रुद्धो गिरीणामपि दारणीम् ।
तां च चिक्षेप संक्रुद्धः फल्गुनस्य रथं प्रति ॥ २६
तामापतन्तीं संप्रेक्ष्य ज्वलन्तीमशनीमिव ।
समादत्त शितान्भल्लान्पञ्च पाण्डवनन्दनः ॥ २७
तस्य चिच्छेद तां शक्तिं पञ्चधा पञ्चभिः शरैः ।
संक्रुद्धो भरतश्रेष्ठ भीष्मबाहुबलेरिताम् ॥ २८
सा पपात परिच्छिन्ना संक्रुद्धेन किरीटिना ।
मेघवृन्दपरिभ्रष्टा विच्छिन्नेव शतह्रदा ॥ २९
छिन्नां तां शक्तिमालोक्य भीष्मः क्रोधसमन्वितः ।
अचिन्तयद्रणे वीरो बुद्ध्या परपुरंजयः ॥ ३०
शक्तोऽहं धनुषैकेन निहन्तुं सर्वपाण्डवान् ।
यद्येषां न भवेद्गोप्ता विष्वक्सेनो महाबलः ॥ ३१
कारणद्वयमास्थाय नाहं योत्स्यामि पाण्डवैः ।
अवध्यत्वाच्च पाण्डूनां स्त्रीभावाच्च शिखण्डिनः ॥ ३२
पित्रा तुष्टेन मे पूर्वं यदा कालीमुदावहत् ।
स्वच्छन्दमरणं दत्तमवध्यत्वं रणे तथा ।
तस्मान्मृत्युमहं मन्ये प्राप्तकालमिवात्मनः ॥ ३३
एवं ज्ञात्वा व्यवसितं भीष्मस्यामिततेजसः ।
ऋषयो वसवश्चैव वियत्स्था भीष्ममब्रुवन् ॥ ३४
यत्ते व्यवसितं वीर अस्माकं सुमहत्प्रियम् ।
तत्कुरुष्व महेष्वास युद्धाद्बुद्धिं निवर्तय ॥ ३५
तस्य वाक्यस्य निधने प्रादुरासीच्छिवोऽनिलः ।
अनुलोमः सुगन्धी च पृषतैश्च समन्वितः ॥ ३६
देवदुन्दुभयश्चैव संप्रणेदुर्महास्वनाः ।
पपात पुष्पवृष्टिश्च भीष्मस्योपरि पार्थिव ॥ ३७
न च तच्छुश्रुवे कश्चित्तेषां संवदतां नृप ।
ऋते भीष्मं महाबाहुं मां चापि मुनितेजसा॥ ३८
संभ्रमश्च महानासीत्त्रिदशानां विशां पते ।
पतिष्यति रथाद्भीष्मे सर्वलोकप्रिये तदा ॥ ३९
इति देवगणानां च श्रुत्वा वाक्यं महामनाः ।
ततः शांतनवो भीष्मो बीभत्सुं नाभ्यवर्तत ।
भिद्यमानः शितैर्बाणैः सर्वावरणभेदिभिः ॥ ४०
शिखण्डी तु महाराज भरतानां पितामहम् ।
आजघानोरसि क्रुद्धो नवभिर्निशितैः शरैः ॥ ४१
स तेनाभिहतः संख्ये भीष्मः कुरुपितामहः ।
नाकम्पत महाराज क्षितिकम्पे यथाचलः ॥ ४२
ततः प्रहस्य बीभत्सुर्व्याक्षिपन्गाण्डिवं धनुः ।
गाङ्गेयं पञ्चविंशत्या क्षुद्रकाणां समर्पयत् ॥ ४३
पुनः शरशतेनैनं त्वरमाणो धनंजयः ।

सर्वगात्रेषु संक्रुद्धः सर्वमर्मस्वताडयत् ॥ ४४
एवमन्यैरपि भृशं वध्यमानो महारणे ।
न चक्रुस्ते रुजं तस्य रुक्मपुङ्खाः शिलाशिताः ॥४५
ततः किरीटी संरब्धो भीष्ममेवाभ्यवर्तत ।
शिखण्डिनं पुरस्कृत्य धनुश्चास्य समाच्छिनत् ॥४६
अथैनं दशभिर्विद्ध्वा ध्वजमेकेन चिच्छिदे ।
सारथिं विशिखैश्चास्य दशभिः समकम्पयत् ॥ ४७
सोऽन्यत्कार्मुकमादत्त गाङ्गेयो बलवत्तरम् ।
तदप्यस्य शितैर्भल्लैस्त्रिधा त्रिभिरुपानुदत् ।
निमेषान्तरमात्रेण आत्तमात्तं महारणे ॥ ४८
एवमस्य धनूंष्याजौ चिच्छेद सुबहून्यपि ।
ततः शांतनवो भीष्मो बीभत्सुं नाभ्यवर्तत ॥ ४९
अथैनं पञ्चविंशत्या क्षुद्रकाणां समर्दयत् ।
सोऽतिविद्धो महेष्वासो दुःशासनमभाषत ॥ ५०
एष पार्थो रणे क्रुद्धः पाण्डवानां महारथः ।
शरैरनेकसाहस्रैर्मामेवाभ्यसते रणे ॥ ५१
न चैष शक्यः समरे जेतुं वज्रभृता अपि ।
न चापि सहिता वीरा देवदानवराक्षसाः ।
मां चैव शक्ता निर्जेतुं किमु मर्त्याः सदुर्बलाः ॥५२
एवं तयोः संवदतोः फल्गुनो निशितैः शरैः ।
शिखण्डिनं पुरस्कृत्य भीष्मं विव्याध संयुगे ॥ ५३
ततो दुःशासनं भूयः स्मयमानोऽभ्यभाषत ।
अतिविद्धः शितैर्बाणैर्भृशं गाण्डीवधन्वना ॥ ५४
वज्राशनिसमस्पर्शाः शिताग्राः संप्रवेशिताः ।
विमुक्ता अव्यवच्छिन्ना नेमे बाणाः शिखण्डिनः ॥
निकृन्तमाना मर्माणि दृढावरणभेदिनः ।
मुसलानीव मे घ्नन्ति नेमे बाणाः शिखण्डिनः ॥५६
ब्रह्मदण्डसमस्पर्शा वज्रवेगा दुरासदाः ।
मम प्राणानारुजन्ति नेमे बाणाः शिखण्डिनः ॥५७
भुजगा इव संक्रुद्धा लेलिहाना विषोल्बणाः ।
ममाविशन्ति मर्माणि नेमे बाणाः शिखण्डिनः ॥५८
नाशयन्तीव मे प्राणान्यमदूता इवाहिताः ।
गदापरिघसंस्पर्शा नेमे बाणाः शिखण्डिनः ॥ ५९
कृन्तन्ति मम गात्राणि माघमासे गवामिव ।
अर्जुनस्य इमे बाणा नेमे बाणाः शिखण्डिनः ॥६०
सर्वे ह्यपि न मे दुःखं कुर्युरन्ये नराधिपाः ।
वीरं गाण्डीवधन्वानमृते जिष्णुं कपिध्वजम् ॥ ६१
इति ब्रुवञ्शांतनवो दिधक्षुरिव पाण्डवम् ।
सविष्फुलिङ्गां दीप्ताग्रां शक्तिं चिक्षेप भारत ॥६२
तामस्य विशिखैश्छित्त्वा त्रिधा त्रिभिरपातयत् ।
पश्यतां कुरुवीराणां सर्वेषां तत्र भारत ॥ ६३
चर्माथादत्त गाङ्गेयो जातरूपपरिष्कृतम् ।
खड्गं चान्यतरं प्रेप्सुर्मृत्योरग्रे जयाय वा ॥ ६४
तस्य तच्छतधा चर्म व्यधमद्दंशितात्मनः ।
रथादनवरूढस्य तदद्भुतमिवाभवत् ॥ ६५
विनद्योच्चैः सिंह इव स्वान्यनीकान्यचोदयत् ।
अभिद्रवत गाङ्गेयं मा वोऽस्तु भयमण्वपि ॥ ६६
अथ ते तोमरैः प्रासैर्बाणौघैश्च समन्ततः ।
पट्टिशैश्च सनिस्त्रिंशैर्नानाप्रहरणैस्तथा ॥ ६७
वत्सदन्तैश्च भल्लैश्च तमेकमभिदुद्रुवुः ।
सिंहनादस्ततो घोरः पाण्डवानामजायत ॥ ६८
तथैव तव पुत्राश्च राजन्भीष्मजयैषिणः ।
तमेकमभ्यवर्तन्त सिंहनादांश्च नेदिरे ॥ ६९
तत्रासीत्तुमुलं युद्धं तावकानां परैः सह ।
दशमेऽहनि राजेन्द्र भीष्मार्जुनसमागमे ॥ ७०
आसीद्गाङ्ग इवावर्तो मुहूर्तमुदधेरिव ।
सैन्यानां युध्यमानानां निघ्नतामितरेतरम् ॥ ७१
अगम्यरूपा पृथिवी शोणिताक्ता तदाभवत् ।
समं च विषमं चैव न प्राज्ञायत किंचन ॥ ७२
योधानामयुतं हत्वा तस्मिन्स दशमेऽहनि ।

अतिष्ठदाहवे भीष्मो भिद्यमानेषु मर्मसु ॥ ७३
ततः सेनामुखे तस्मिन्स्थितः पार्थो धनंजयः ।
मध्येन कुरुसैन्यानां द्रावयामास वाहिनीम् ॥ ७४
वयं श्वेतहयाद्भीताः कुन्तीपुत्राद्धनंजयात् ।
पीड्यमानाः शितैः शस्त्रैः प्रद्रवाम महारणात् ॥७५
सौवीराः कितवाः प्राच्याः प्रतीच्योदीच्यमालवाः ।
अभीषाहाः शूरसेनाः शिबयोऽथ वसातयः ॥ ७६
शाल्वाश्रयास्त्रिगर्ताश्च अम्बष्ठाः केकयैः सह ।
द्वादशैते जनपदाः शरार्ता व्रणपीडिताः ।
संग्रामे न जहुर्भीष्मं युध्यमानं किरीटिना ॥ ७७
ततस्तमेकं बहवः परिवार्य समन्ततः ।
परिकाल्य कुरून्सर्वाञ्शरवर्षैरवाकिरन् ॥ ७८
निपातयत गृह्णीत विध्यताथ च कर्षत ।
इत्यासीत्तुमुलः शब्दो राजन्भीष्मरथं प्रति ॥ ७९
अभिहत्य शरौघैस्तं शतशोऽथ सहस्रशः ।
न तस्यासीदनिर्भिन्नं गात्रेष्वङ्गुलमात्रकम् ॥ ८०
एवं विभो तव पिता शरैर्विशकलीकृतः ।
शिताग्रैः फल्गुनेनाजौ प्राक्शिराः प्रापतद्रथात् ।
किंचिच्छेषे दिनकरे पुत्राणां तव पश्यताम् ॥ ८१
हा हेति दिवि देवानां पार्थिवानां च सर्वशः ।
पतमाने रथाद्भीष्मे बभूव सुमहान्स्वनः ॥ ८२
तं पतन्तमभिप्रेक्ष्य महात्मानं पितामहम् ।
सह भीष्मेण सर्वेषां प्रापतन्हृदयानि नः ॥ ८३
स पपात महाबाहुर्वसुधामनुनादयन् ।
इन्द्रध्वज इवोत्सृष्टः केतुः सर्वधनुष्मताम् ।
धरणीं नास्पृशच्चापि शरसंघैः समाचितः ॥ ८४
शरतल्पे महेष्वासं शयानं पुरुषर्षभम् ।
रथात्प्रपतितं चैनं दिव्यो भावः समाविशत् ॥ ८५
अभ्यवर्षत पर्जन्यः प्राकम्पत च मेदिनी ।
पतन्स ददृशे चापि खर्वितं च दिवाकरम् ॥ ८६
संज्ञां चैवालभद्वीरः कालं संचिन्त्य भारत ।
अन्तरिक्षे च शुश्राव दिव्यां वाचं समन्ततः ॥ ८७
कथं महात्मा गाङ्गेयः सर्वशस्त्रभृतां वरः ।
कालं कर्ता नरव्याघ्रः संप्राप्ते दक्षिणायने ॥ ८८
स्थितोऽस्मीति च गाङ्गेयस्तच्छ्रुत्वा वाक्यमब्रवीत् ।
धारयामास च प्राणान्पतितोऽपि हि भूतले ।
उत्तरायणमन्विच्छन्भीष्मः कुरुपितामहः ॥ ८९
तस्य तन्मतमाज्ञाय गङ्गा हिमवतः सुता ।
महर्षीन्हंसरूपेण प्रेषयामास तत्र वै ॥ ९०
ततः संपातिनो हंसास्त्वरिता मानसौकसः ।
आजग्मुः सहिता द्रष्टुं भीष्मं कुरुपितामहम् ।
यत्र शेते नरश्रेष्ठः शरतल्पे पितामहः ॥ ९१
ते तु भीष्मं समासाद्य मुनयो हंसरूपिणः ।
अपश्यञ्शरतल्पस्थं भीष्मं कुरुपितामहम् ॥ ९२
ते तं दृष्ट्वा महात्मानं कृत्वा चापि प्रदक्षिणम् ।
गाङ्गेयं भरतश्रेष्ठं दक्षिणेन च भास्करम् ॥ ९३
इतरेतरमामन्त्र्य प्राहुस्तत्र मनीषिणः ।
भीष्म एव महात्मा सन्संस्थाता दक्षिणायने ॥ ९४
इत्युक्त्वा प्रस्थितान्हंसान्दक्षिणामभितो दिशम् ।
संप्रेक्ष्य वै महाबुद्धिश्चिन्तयित्वा च भारत ॥ ९५
तानब्रवीच्छांतनवो नाहं गन्ता कथंचन ।
दक्षिणावृत्त आदित्ये एतन्मे मनसि स्थितम् ॥९६
गमिष्यामि स्वकं स्थानमासीद्यन्मे पुरातनम् ।
उदगावृत्त आदित्ये हंसाः सत्यं ब्रवीमि वः ॥ ९७
धारयिष्याम्यहं प्राणानुत्तरायणकाङ्क्षया ।
ऐश्वर्यभूतः प्राणानामुत्सर्गे नियतो ह्यहम् ।
तस्मात्प्राणान्धारयिष्ये मुमूर्षुरुदगायने ॥ ९८
यश्च दत्तो वरो मह्यं पित्रा तेन महात्मना ।
छन्दतो मृत्युरित्येवं तस्य चास्तु वरस्तथा ॥ ९९
धारयिष्ये ततः प्राणानुत्सर्गे नियते सति ।

इत्युक्त्वा तांस्तदा हंसानशेत शरतल्पगः ॥ १००
एवं कुरूणां पतिते शृङ्गे भीष्मे महौजसि ।
पाण्डवाः सृञ्जयाश्चैव सिंहनादं प्रचक्रिरे ॥ १०१
तस्मिन्हते महासत्त्वे भरतानाममध्यमे ।
न किंचित्प्रत्यपद्यन्त पुत्रास्ते भरतर्षभ ।
संमोहश्चैव तुमुलः कुरूणामभवत्तदा ॥ १०२
नृपा दुर्योधनमुखा निःश्वस्य रुरुदुस्ततः ।
विषादाच्च चिरं कालमतिष्ठन्विगतेन्द्रियाः ॥ १०३
दध्युश्चैव महाराज न युद्धे दधिरे मनः ।
ऊरुग्राहगृहीताश्च नाभ्यधावन्त पाण्डवान् ॥ १०४
अवध्ये शंतनोः पुत्रे हते भीष्मे महौजसि ।
अभावः सुमहान्राजन्कुरूनागादतन्द्रितः ॥ १०५
हतप्रवीराश्च वयं निकृत्ताश्च शितैः शरैः ।
कर्तव्यं नाभिजानीमो निर्जिताः सव्यसाचिना ॥
पाण्डवास्तु जयं लब्ध्वा परत्र च परां गतिम् ।
सर्वे दध्मुर्महाशङ्खाञ्शूराः परिघबाहवः ।
सोमकाश्च सपञ्चालाः प्राहृष्यन्त जनेश्वर ॥ १०७
ततस्तूर्यसहस्रेषु नदत्सु सुमहाबलः ।
आस्फोटयामास भृशं भीमसेनो ननर्त च ॥१०८
सेनयोरुभयोश्चापि गाङ्गेये विनिपातिते ।
संन्यस्य वीराः शस्त्राणि प्राध्यायन्त समन्ततः ॥१०९
प्राक्रोशन्प्रापतंश्चान्ये जग्मुर्मोहं तथापरे ।
क्षत्रं चान्येऽभ्यनिन्दन्त भीष्मं चैकेऽभ्यपूजयन् ॥
ऋषयः पितरश्चैव प्रशशंसुर्महाव्रतम् ।
भरतानां च ये पूर्वे ते चैनं प्रशशंसिरे ॥ १११
महोपनिषदं चैव योगमास्थाय वीर्यवान् ।
जपञ्शांतनवो धीमान्कालाकाङ्क्षी स्थितोऽभवत् ॥

इति श्रीमहाभारते भीष्मपर्वणि
चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

११५

धृतराष्ट्र उवाच ।

कथमासंस्तदा योधा हीना भीष्मेण संजय ।
बलिना देवकल्पेन गुर्वर्थे ब्रह्मचारिणा ॥ १
तदैव निहतान्मन्ये कुरूनन्यांश्च पार्थिवान् ।
न प्राहरद्यदा भीष्मो घृणित्वाद्द्रुपदात्मजे ॥ २
ततो दुःखतरं मन्ये किमन्यत्प्रभविष्यति ।
यदद्य पितरं श्रुत्वा निहतं मम दुर्मतेः ॥ ३
अश्मसारमयं नूनं हृदयं मम संजय ।
श्रुत्वा विनिहतं भीष्मं शतधा यन्न दीर्यते ॥ ४
पुनः पुनर्न मृष्यामि हतं देवव्रतं रणे ।
न हतो जामदग्न्येन दिव्यैरस्त्रैः स यः पुरा ॥ ५
यदद्य निहतेनाजौ भीष्मेण जयमिच्छता ।
चेष्टितं नरसिंहेन तन्मे कथय संजय ॥ ६

संजय उवाच ।

सायाह्ने न्यपतद्भूमौ धार्तराष्ट्रान्विषादयन् ।
पाञ्चालानां ददद्धर्षं कुरुवृद्धः पितामहः ॥ ७
स शेते शरतल्पस्थो मेदिनीमस्पृशंस्तदा ।
भीष्मो रथात्प्रपतितः प्रच्युतो धरणीतले ॥ ८
हा हेति तुमुलः शब्दो भूतानां समपद्यत ।
सीमावृक्षे निपतिते कुरूणां समितिक्षये ॥ ९
उभयोः सेनयो राजन्क्षत्रियान्भयमाविशत् ।
भीष्मं शांतनवं दृष्ट्वा विशीर्णकवचध्वजम् ।
कुरवः पर्यवर्तन्त पाण्डवाश्च विशां पते ॥ १०
खं तमोवृतमासीच्च नासीद्भानुमतः प्रभा ।
ररास पृथिवी चैव भीष्मे शांतनवे हते ॥ ११
अयं ब्रह्मविदां श्रेष्ठो अयं ब्रह्मविदां गतिः ।
इत्यभाषन्त भूतानि शयानं भरतर्षभम् ॥ १२
अयं पितरमाज्ञाय कामार्तं शांतनुं पुरा ।
ऊर्ध्वरेतसमात्मानं चकार पुरुषर्षभः ॥ १३

इति स्म शरतल्पस्थं भरतानाममध्यमम् ।
ऋषयः पर्यधावन्त सहिताः सिद्धचारणैः ॥ १४
हते शांतनवे भीष्मे भरतानां पितामहे ।
न किंचित्प्रत्यपद्यन्त पुत्रास्तव च भारत ॥ १५
विवर्णवदनाश्चासन्गतश्रीकाश्च भारत ।
अतिष्ठन्व्रीडिताश्चैव ह्रिया युक्ता ह्यधोमुखाः ॥ १६
पाण्डवाश्च जयं लब्ध्वा संग्रामशिरसि स्थिताः ।
सर्वे दध्मुर्महाशङ्खान्हेमजालपरिष्कृतान् ॥ १७
भृशं तूर्यनिनादेषु वाद्यमानेषु चानघ ।
अपश्याम रणे राजन्भीमसेनं महाबलम् ।
आक्रीडमानं कौन्तेयं हर्षेण महता युतम् ॥ १८
निहत्य समरे शत्रून्महाबलसमन्वितान् ।
संमोहश्चापि तुमुलः कुरूणामभवत्तदा ॥ १९
कर्णदुर्योधनौ चापि निःश्वसेतां मुहुर्मुहुः ।
तथा निपतिते भीष्मे कौरवाणां धुरंधरे ।
हाहाकारमभूत्सर्वं निर्मर्यादमवर्तत ॥ २०
दृष्ट्वा च पतितं भीष्मं पुत्रो दुःशासनस्तव ।
उत्तमं जवमास्थाय द्रोणानीकं समाद्रवत् ॥ २१
भ्रात्रा प्रस्थापितो वीरः स्वेनानीकेन दंशितः ।
प्रययौ पुरुषव्याघ्रः स्वसैन्यमभिचोदयन् ॥ २२
तमायान्तमभिप्रेक्ष्य कुरवः पर्यवारयन् ।
दुःशासनं महाराज किमयं वक्ष्यतीति वै ॥ २३
ततो द्रोणाय निहतं भीष्ममाचष्ट कौरवः ।
द्रोणस्तदप्रियं श्रुत्वा सहसा न्यपतद्रथात् ॥ २४
स संज्ञामुपलभ्याथ भारद्वाजः प्रतापवान् ।
निवारयामास तदा स्वान्यनीकानि मारिष ॥ २५
विनिवृत्तान्कुरून्दृष्ट्वा पाण्डवापि स्वसैनिकान् ।
दूतैः शीघ्राश्वसंयुक्तैरवहारमकारयन् ॥ २६
विनिवृत्तेषु सैन्येषु पारंपर्येण सर्वशः ।
विमुक्तकवचाः सर्वे भीष्ममीयुर्नराधिपाः ॥ २७
व्युपारम्य ततो युद्धाद्योधाः शतसहस्रशः ।
उपतस्थुर्महात्मानं प्रजापतिमिवामराः ॥ २८
ते तु भीष्मं समासाद्य शयानं भरतर्षभम् ।
अभिवाद्य व्यतिष्ठन्त पाण्डवाः कुरुभिः सह ॥ २९
अथ पाण्डून्कुरूंश्चैव प्रणिपत्याग्रतः स्थितान् ।
अभ्यभाषत धर्मात्मा भीष्मः शांतनवस्तदा ॥ ३०
स्वागतं वो महाभागाः स्वागतं वो महारथाः ।
तुष्यामि दर्शनाच्चाहं युष्माकममरोपमाः ॥ ३१
अभिनन्द्य स तानेवं शिरसा लम्बताब्रवीत् ।
शिरो मे लम्बतेऽत्यर्थमुपधानं प्रदीयताम् ॥ ३२
ततो नृपाः समाजह्रुस्तनूनि च मृदूनि च ।
उपधानानि मुख्यानि नैच्छत्तानि पितामहः ॥ ३३
अब्रवीच्च नरव्याघ्रः प्रहसन्निव तान्नृपान् ।
नैतानि वीरशय्यासु युक्तरूपाणि पार्थिवाः ॥ ३४
ततो वीक्ष्य नरश्रेष्ठमभ्यभाषत पाण्डवम् ।
धनंजयं दीर्घबाहुं सर्वलोकमहारथम् ॥ ३५
धनंजय महाबाहो शिरसो मेऽस्य लम्बतः ।
दीयतामुपधानं वै यद्युक्तमिह मन्यसे ॥ ३६
स संन्यस्य महच्चापमभिवाद्य पितामहम् ।
नेत्राभ्यामश्रुपूर्णाभ्यामिदं वचनमब्रवीत् ॥ ३७
आज्ञापय कुरुश्रेष्ठ सर्वशस्त्रभृतां वर ।
प्रेष्योऽहं तव दुर्धर्ष क्रियतां किं पितामह ॥ ३८
तमब्रवीच्छांतनवः शिरो मे तात लम्बते ।
उपधानं कुरुश्रेष्ठ फल्गुनोपनयस्व मे ।
शयनस्यानुरूपं हि शीघ्रं वीर प्रयच्छ मे ॥ ३९
त्वं हि पार्थ महाबाहो श्रेष्ठः सर्वधनुष्मताम् ।
क्षत्रधर्मस्य वेत्ता च बुद्धिसत्त्वगुणान्वितः ॥ ४०
फल्गुनस्तु तथेत्युक्त्वा व्यवसायपुरोजवः ।
प्रगृह्यामन्त्र्य गाण्डीवं शरांश्च नतपर्वणः ॥ ४१
अनुमान्य महात्मानं भरतानाममध्यमम् ।

त्रिभिस्तीक्ष्णैर्महावेगैरुदगृह्णाच्छिरः शरैः ॥ ४२
अभिप्राये तु विदिते धर्मात्मा सव्यसाचिना ।
अतुष्यद्भरतश्रेष्ठो भीष्मो धर्मार्थतत्त्ववित् ॥ ४३
उपधानेन दत्तेन प्रत्यनन्दद्धनंजयम् ।
कुन्तीपुत्रं युधां श्रेष्ठं सुहृदां प्रीतिवर्धनम् ॥ ४४
अनुरूपं शयानस्य पाण्डवोपहितं त्वया ।
यद्यन्यथा प्रवर्तेथाः शपेयं त्वामहं रुषा ॥ ४५
एवमेतन्महाबाहो धर्मेषु परिनिष्ठितम् ।
स्वप्तव्यं क्षत्रियेणाजौ शरतल्पगतेन वै ॥ ४६
एवमुक्त्वा तु बीभत्सुं सर्वांस्तानब्रवीद्वचः ।
राज्ञश्च राजपुत्रांश्च पाण्डवेनाभि संस्थितान् ॥ ४७
शयेयमस्यां शय्यायां यावदावर्तनं रवेः ।
ये तदा पारयिष्यन्ति ते मां द्रक्ष्यन्ति वै नृपाः ॥
दिशं वैश्रवणाक्रान्तां यदा गन्ता दिवाकरः ।
अर्चिष्मान्प्रतपँल्लोकान्रथेनोत्तमतेजसा ।
विमोक्ष्येऽहं तदा प्राणान्सुहृदः सुप्रियानपि ॥ ४९
परिखा खन्यतामत्र ममावसदने नृपाः ।
उपासिष्ये विवस्वन्तमेवं शरशताचितः ।
उपारमध्वं संग्रामाद्वैराण्युत्सृज्य पार्थिवाः ॥ ५०
उपातिष्ठन्नथो वैद्याः शल्योद्धरणकोविदाः ।
सर्वोपकरणैर्युक्ताः कुशलास्ते सुशिक्षिताः ॥ ५१
तान्दृष्ट्वा जाह्नवीपुत्रः प्रोवाच वचनं तदा ।
दत्तदेया विसृज्यन्तां पूजयित्वा चिकित्सकाः ॥ ५२
एवंगते न हीदानीं वैद्यैः कार्यमिहास्ति मे ।
क्षत्रधर्मप्रशस्तां हि प्राप्तोऽस्मि परमां गतिम् ॥ ५३
नैष धर्मो महीपालाः शरतल्पगतस्य मे ।
एतैरेव शरैश्चाहं दग्धव्योऽन्ते नराधिपाः ॥ ५४
तच्छ्रुत्वा वचनं तस्य पुत्रो दुर्योधनस्तव ।
वैद्यान्विसर्जयामास पूजयित्वा यथार्हतः ॥ ५५
ततस्ते विस्मयं जग्मुर्नानाजनपदेश्वराः ।
स्थितिं धर्मे परां दृष्ट्वा भीष्मस्यामिततेजसः ॥ ५६
उपधानं ततो दत्त्वा पितुस्तव जनेश्वर ।
सहिताः पाण्डवाः सर्वे कुरवश्च महारथाः ॥ ५७
उपगम्य महात्मानं शयानं शयने शुभे ।
तेऽभिवाद्य ततो भीष्मं कृत्वा चाभिप्रदक्षिणम् ॥
विधाय रक्षां भीष्मस्य सर्व एव समन्ततः ।
वीराः स्वशिबिराण्येव ध्यायन्तः परमातुराः ।
निवेशायाभ्युपागच्छन्सायाह्ने रुधिरोक्षिताः ॥ ५९
निविष्टान्पाण्डवांश्चापि प्रीयमाणान्महारथान् ।
भीष्मस्य पतनाद्धृष्टानुपगम्य महारथान् ।
उवाच यादवः काले धर्मपुत्रं युधिष्ठिरम् ॥ ६०
दिष्ट्या जयसि कौरव्य दिष्ट्या भीष्मो निपातितः ।
अवध्यो मानुषैरेष सत्यसंधो महारथः ॥ ६१
अथ वा दैवतैः पार्थ सर्वशस्त्रास्त्रपारगः ।
त्वां तु चक्षुर्हणं प्राप्य दग्धो घोरेण चक्षुषा ॥ ६२
एवमुक्तो धर्मराजः प्रत्युवाच जनार्दनम् ।
तव प्रसादाद्विजयः क्रोधात्तव पराजयः ।
त्वं हि नः शरणं कृष्ण भक्तानामभयंकरः ॥ ६३
अनाश्चर्यो जयस्तेषां येषां त्वमसि केशव ।
रक्षिता समरे नित्यं नित्यं चापि हिते रतः ।
सर्वथा त्वां समासाद्य नाश्चर्यमिति मे मतिः ॥
एवमुक्तः प्रत्युवाच स्मयमानो जनार्दनः ।
त्वय्येवैतद्युक्तरूपं वचनं पार्थिवोत्तम ॥ ६५

इति श्रीमहाभारते भीष्मपर्वणि
पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

११६

संजय उवाच ।

व्युष्टायां तु महाराज रजन्यां सर्वपार्थिवाः ।
पाण्डवा धार्तराष्ट्राश्च अभिजग्मुः पितामहम् ॥ १
तं वीरशयने वीरं शयानं कुरुसत्तमम् ।

अभिवाद्योपतस्थुर्वै क्षत्रियाः क्षत्रियर्षभम् ॥ २
कन्याश्चन्दनचूर्णैश्च लाजैर्माल्यैश्च सर्वशः ।
स्त्रियो बालास्तथा वृद्धाः प्रेक्षकाश्च पृथग्जनाः ।
समभ्ययुः शांतनवं भूतानीव तमोनुदम् ॥ ३
तूर्याणि गणिका वारास्तथैव नटनर्तकाः ।
उपानृत्यञ्जगुश्चैव वृद्धं कुरुपितामहम् ॥ ४
उपारम्य च युद्धेभ्यः संनाहान्विप्रमुच्य च ।
आयुधानि च निक्षिप्य सहिताः कुरुपाण्डवाः ॥ ५
अन्वासत दुराधर्षं देवव्रतमरिंदमम् ।
अन्योन्यं प्रीतिमन्तस्ते यथापूर्वं यथावयः ॥ ६
सा पार्थिवशताकीर्णा समितिर्भीष्मशोभिता ।
शुशुभे भारती दीप्ता दिवीवादित्यमण्डलम् ॥ ७
विबभौ च नृपाणां सा पितामहमुपासताम् ।
देवानामिव देवेशं पितामहमुपासताम् ॥ ८
भीष्मस्तु वेदनां धैर्यान्निगृह्य भरतर्षभ ।
अभितप्तः शरैश्चैव नातिहृष्टमनाब्रवीत् ॥ ९
शराभितप्तकायोऽहं शरसंतापमूर्छितः ।
पानीयमभिकाङ्क्षेऽहं राज्ञस्तान्प्रत्यभाषत ॥ १०
ततस्ते क्षत्रिया राजन्समाजह्रुः समन्ततः ।
भक्ष्यानुच्चावचांस्तत्र वारिकुम्भांश्च शीतलान् ॥ ११
उपनीतं च तद्दृष्ट्वा भीष्मः शांतनवोऽब्रवीत् ।
नाद्य तात मया शक्यं भोगान्कांश्चन मानुषान् ॥ १२
उपभोक्तुं मनुष्येभ्यः शरशय्यागतो ह्यहम् ।
प्रतीक्षमाणस्तिष्ठामि निवृत्तिं शशिसूर्ययोः ॥ १३
एवमुक्त्वा शांतनवो दीनवाक्सर्वपार्थिवान् ।
धनंजयं महाबाहुमभ्यभाषत भारत ॥ १४
अथोपेत्य महाबाहुरभिवाद्य पितामहम् ।
अतिष्ठत्प्राञ्जलिः प्रह्वः किं करोमीति चाब्रवीत् ॥ १५
तं दृष्ट्वा पाण्डवं राजन्नभिवाद्याग्रतः स्थितम् ।
अभ्यभाषत धर्मात्मा भीष्मः प्रीतो धनंजयम् ॥ १६
दह्यतेऽदः शरीरं मे संस्यूतोऽस्मि महेषुभिः ।
मर्माणि परिदूयन्ते वदनं मम शुष्यति ॥ १७
ह्लादनार्थं शरीरस्य प्रयच्छापो ममार्जुन ।
त्वं हि शक्तो महेष्वास दातुमम्भो यथाविधि ॥
अर्जुनस्तु तथेत्युक्त्वा रथमारुह्य वीर्यवान् ।
अधिज्यं बलवत्कृत्वा गाण्डीवं व्याक्षिपद्धनुः ॥ १९
तस्य ज्यातलनिर्घोषं विस्फूर्जितमिवाशनेः ।
वित्रेसुः सर्वभूतानि श्रुत्वा सर्वे च पार्थिवाः ॥ २०
ततः प्रदक्षिणं कृत्वा रथेन रथिनां वरः ।
शयानं भरतश्रेष्ठं सर्वशस्त्रभृतां वरम् ॥ २१
संधाय च शरं दीप्तमभिमन्त्र्य महायशाः ।
पर्जन्यास्त्रेण संयोज्य सर्वलोकस्य पश्यतः ।
अविध्यत्पृथिवीं पार्थः पार्श्वे भीष्मस्य दक्षिणे ॥ २२
उत्पपात ततो धारा विमला वारिणः शिवा ।
शीतस्यामृतकल्पस्य दिव्यगन्धरसस्य च ॥ २३
अतर्पयत्ततः पार्थः शीतया वारिधारया ।
भीष्मं कुरूणामृषभं दिव्यकर्मपराक्रमः ॥ २४
कर्मणा तेन पार्थस्य शक्रस्येव विकुर्वतः ।
विस्मयं परमं जग्मुस्ततस्ते वसुधाधिपाः ॥ २५
तत्कर्म प्रेक्ष्य बीभत्सोरतिमानुषमद्भुतम् ।
संप्रावेपन्त कुरवो गावः शीतार्दिता इव ॥ २६
विस्मयाच्चोत्तरीयाणि व्याविध्यन्सर्वतो नृपाः ।
शङ्खदुन्दुभिनिर्घोषैस्तुमुलं सर्वतोऽभवत् ॥ २७
तृप्तः शांतनवश्चापि राजन्बीभत्सुमब्रवीत् ।
सर्वपार्थिववीराणां संनिधौ पूजयन्निव ॥ २८
नैतच्चित्रं महाबाहो त्वयि कौरवनन्दन ।
कथितो नारदेनासि पूर्वर्षिरमितद्युतिः ॥ २९
वासुदेवसहायस्त्वं महत्कर्म करिष्यसि ।
यन्नोत्सहति देवेन्द्रः सह देवैरपि ध्रुवम् ॥ ३०
विदुस्त्वां निधनं पार्थ सर्वक्षत्रस्य तद्विदः ।

धनुर्धराणामेकस्त्वं पृथिव्यां प्रवरो नृषु ॥ ३१
मनुष्या जगति श्रेष्ठाः पक्षिणां गरुडो वरः ।
सरसां सागरः श्रेष्ठो गौर्वरिष्ठा चतुष्पदाम् ॥ ३२
आदित्यस्तेजसां श्रेष्ठो गिरीणां हिमवान्वरः ।
जातीनां ब्राह्मणः श्रेष्ठः श्रेष्ठस्त्वमसि धन्विनाम् ॥
न वै श्रुतं धार्तराष्ट्रेण वाक्यं
संबोध्यमानं विदुरेण चैव ।
द्रोणेन रामेण जनार्दनेन
मुहुर्मुहुः संजयेनापि चोक्तम् ॥ ३४
परीतबुद्धिर्हि विसंज्ञकल्पो
दुर्योधनो नाभ्यनन्दद्वचो मे ।
स शेष्यते वै निहतश्चिराय
शास्त्रातिगो भीमबलाभिभूतः ॥ ३५
ततः श्रुत्वा तद्वचः कौरवेन्द्रो
दुर्योधनो दीनमना बभूव ।
तमब्रवीच्छांतनवोऽभिवीक्ष्य
निबोध राजन्भव वीतमन्युः ॥ ३६
दृष्टं दुर्योधनेदं ते यथा पार्थेन धीमता ।
जलस्य धारा जनिता शीतस्यामृतगन्धिनः ।
एतस्य कर्ता लोकेऽस्मिन्नान्यः कश्चन विद्यते॥३७
आग्नेयं वारुणं सौम्यं वायव्यमथ वैष्णवम् ।
ऐन्द्रं पाशुपतं ब्राह्मं पारमेष्ठ्यं प्रजापतेः ।
धातुस्त्वष्टुश्च सवितुर्दिव्यान्यस्त्राणि सर्वशः॥ ३८
सर्वस्मिन्मानुषे लोके वेत्त्येको हि धनंजयः ।
कृष्णो वा देवकीपुत्रो नान्यो वै वेद कश्चन ।
न शक्याः पाण्डवास्तात युद्धे जेतुं कथंचन॥ ३९
अमानुषाणि कर्माणि यस्यैतानि महात्मनः ।
तेन सत्त्ववता संख्ये शूरेणाहवशोभिना ।
कृतिना समरे राजन्संधिस्ते तात युज्यताम् ॥४०
यावत्कृष्णो महाबाहुः स्वाधीनः कुरुसंसदि ।
तावत्पार्थेन शूरेण संधिस्ते तात युज्यताम् ॥ ४१
यावच्चमूं न ते शेषां शरैः संनतपर्वभिः ।
नाशयत्यर्जुनस्तावत्संधिस्ते तात युज्यताम् ॥ ४२
यावत्तिष्ठन्ति समरे हतशेषाः सहोदराः ।
नृपाश्च बहवो राजंस्तावत्संधिः प्रयुज्यताम् ॥ ४३
न निर्दहति ते यावत्क्रोधदीप्तेक्षणश्चमूम् ।
युधिष्ठिरो हि तावद्वै संधिस्ते तात युज्यताम् ॥ ४४
नकुलः सहदेवश्च भीमसेनश्च पाण्डवः ।
यावच्चमूं महाराज नाशयन्ति न सर्वशः ।
तावत्ते पाण्डवैः सार्धं सौभ्रात्रं तात रोचताम्॥४५
युद्धं मदन्तमेवास्तु तात संशाम्य पाण्डवैः ।
एतत्ते रोचतां वाक्यं यदुक्तोऽसि मयानघ ।
एतत्क्षेममहं मन्ये तव चैव कुलस्य च ॥ ४६
त्यक्त्वा मन्युमुपशाम्यस्व पार्थैः
पर्याप्तमेतद्यत्कृतं फल्गुनेन ।
भीष्मस्यान्तादस्तु वः सौहृदं वा
संप्रश्लेषः साधु राजन्प्रसीद ॥ ४७
राज्यस्यार्धं दीयतां पाण्डवाना-
मिन्द्रप्रस्थं धर्मराजोऽनुशास्तु ।
मा मित्रध्रुक्पार्थिवानां जघन्यः
पापां कीर्तिं प्राप्स्यसे कौरवेन्द्र ॥ ४८
ममावसानाच्छान्तिरस्तु प्रजानां
संगच्छन्तां पार्थिवाः प्रीतिमन्तः ।
पिता पुत्रं मातुलं भागिनेयो
भ्राता चैव भ्रातरं प्रैतु राजन् ॥ ४९
न चेदेवं प्राप्तकालं वचो मे
मोहाविष्टः प्रतिपत्स्यस्यबुद्ध्या ।
भीष्मस्यान्तादेतदन्ताः स्थ सर्वे
सत्यामेतां भारतीमीरयामि ॥ ५०
एतद्वाक्यं सौहृदादापगेयो

मध्ये राज्ञां भारतं श्रावयित्वा ।
तूष्णीमासीच्छल्यसंतप्तमर्मा
यत्वात्मानं वेदनां संनिगृह्य ॥ ५१

इति श्रीमहाभारते भीष्मपर्वणि
षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

११७

संजय उवाच ।

ततस्ते पार्थिवाः सर्वे जग्मुः स्वानालयान्पुनः ।
तूष्णींभूते महाराज भीष्मे शंतनुनन्दने ॥ १
श्रुत्वा तु निहतं भीष्मं राधेयः पुरुषर्षभः ।
ईषदागतसंत्रासः त्वरयोपजगाम ह ॥ २
स ददर्श महात्मानं शरतल्पगतं तदा ।
जन्मशय्यागतं देवं कार्त्तिकेयमिव प्रभुम् ॥ ३
निमीलिताक्षं तं वीरं साश्रुकण्ठस्तदा वृषः ।
अभ्येत्य पादयोस्तस्य निपपात महाद्युतिः ॥ ४
राधेयोऽहं कुरुश्रेष्ठ नित्यं चाक्षिगतस्तव ।
द्वेष्योऽत्यन्तमनागाः सन्निति चैनमुवाच ह ॥ ५
तच्छ्रुत्वा कुरुवृद्धः स बलात्संवृत्तलोचनः ।
शनैरुद्वीक्ष्य सस्नेहमिदं वचनमब्रवीत् ॥ ६
रहितं धिष्ण्यमालोक्य समुत्सार्य च रक्षिणः ।
पितेव पुत्रं गाङ्गेयः परिष्वज्यैकबाहुना ॥ ७
एह्येहि मे विप्रतीप स्पर्धसे त्वं मया सह ।
यदि मां नाभिगच्छेथा न ते श्रेयो भवेद्ध्रुवम् ॥ ८
कौन्तेयस्त्वं न राधेयो विदितो नारदान्मम ।
कृष्णद्वैपायनाच्चैव केशवाच्च न संशयः ॥ ९
न च द्वेषोऽस्ति मे तात त्वयि सत्यं ब्रवीमि ते ।
तेजोवधनिमित्तं तु परुषाण्यहमुक्तवान् ॥ १०
अकस्मात्पाण्डवान्हि त्वं द्विषसीति मतिर्मम ।
येनासि बहुशो रूक्षं चोदितः सूर्यनन्दन ॥ ११
जानामि समरे वीर्यं शत्रुभिर्दुःसहं तव ।
ब्रह्मण्यतां च शौर्यं च दाने च परमां गतिम् ॥१२
न त्वया सदृशः कश्चित्पुरुषेष्वमरोपम ।
कुलभेदं च मत्वाहं सदा परुषमुक्तवान् ॥ १३
इष्वस्त्रे भारसंधाने लाघवेऽस्त्रबले तथा ।
सदृशः फल्गुनेनासि कृष्णेन च महात्मना ॥ १४
कर्ण राजपुरं गत्वा त्वयैकेन धनुष्मता ।
तस्यार्थे कुरुराजस्य राजानो मृदिता युधि ॥ १५
तथा च बलवान्राजा जरासंधो दुरासदः ।
समरे समरश्लाघी त्वया न सदृशोऽभवत् ॥ १६
ब्रह्मण्यः सत्यवादी च तेजसार्क इवापरः ।
देवगर्भोऽजितः संख्ये मनुष्यैरधिको भुवि ॥ १७
व्यपनीतोऽद्य मन्युर्मे यस्त्वां प्रति पुरा कृतः ।
दैवं पुरुषकारेण न शक्यमतिवर्तितुम् ॥ १८
सोदर्याः पाण्डवा वीरा भ्रातरस्तेऽरिसूदन ।
संगच्छ तैर्महाबाहो मम चेदिच्छसि प्रियम् ॥१९
मया भवतु निर्वृत्तं वैरमादित्यनन्दन ।
पृथिव्यां सर्वराजानो भवन्त्वद्य निरामयाः ॥ २०

कर्ण उवाच ।

जानाम्यहं महाप्राज्ञ सर्वमेतन्न संशयः ।
यथा वदसि दुर्धर्ष कौन्तेयोऽहं न सूतजः ॥ २१
अवकीर्णस्त्वहं कुन्त्या सूतेन च विवर्धितः ।
भुक्त्वा दुर्योधनैश्वर्यं न मिथ्या कर्तुमुत्सहे ॥ २२
वसु चैव शरीरं च यदुदारं तथा यशः ।
सर्वं दुर्योधनस्यार्थे त्यक्तं मे भूरिदक्षिण ।
कोपिताः पाण्डवा नित्यं मयाश्रित्य सुयोधनम् ॥ २३
अवश्यभावी वै योऽर्थो न स शक्यो निवर्तितुम् ।
दैवं पुरुषकारेण को निवर्तितुमुत्सहेत् ॥ २४
पृथिवीक्षयशंसीनि निमित्तानि पितामह ।
भवद्भिरुपलब्धानि कथितानि च संसदि ॥ २५
पाण्डवा वासुदेवश्च विदिता मम सर्वशः ।

अजेयाः पुरुषैरन्यैरिति तांश्चोत्सहामहे ॥ २६
अनुजानीष्व मां तात युद्धे प्रीतमनाः सदा ।
अनुज्ञातस्त्वया वीर युध्येयमिति मे मतिः ॥ २७
दुरुक्तं विप्रतीपं वा संरम्भाच्चापलात्तथा ।
यन्मयापकृतं किंचित्तदनुक्षन्तुमर्हसि ॥ २८

भीष्म उवाच ।

न चेच्छक्यमथोत्स्रष्टुं वैरमेतत्सुदारुणम् ।
अनुजानामि कर्ण त्वां युध्यस्व स्वर्गकाम्यया ॥ २९
विमन्युर्गतसंरम्भः कुरु कर्म नृपस्य हि ।
यथाशक्ति यथोत्साहं सतां वृत्तेषु वृत्तवान् ॥ ३०
अहं त्वामनुजानामि यदिच्छसि तदाप्नुहि ।
क्षत्रधर्मजिताँल्लोकान्संप्राप्स्यसि न संशयः ॥ ३१
युध्यस्व निरहंकारो बलवीर्यव्यपाश्रयः ।
धर्माद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥ ३२
प्रशमे हि कृतो यत्नः सुचिरात्सुचिरं मया ।
न चैव शकितः कर्तुं यतो धर्मस्ततो जयः ॥ ३३

संजय उवाच ।

एवं ब्रुवन्तं गाङ्गेयमभिवाद्य प्रसाद्य च ।
राधेयो रथमारुह्य प्रायात्तव सुतं प्रति ॥ ३४

इति श्रीमहाभारते भीष्मपर्वणि
सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥

॥ समाप्तं भीष्मवधपर्व ॥

॥ समाप्तं भीष्मपर्व ॥

७

द्रोणपर्व

१

जनमेजय उवाच ।

तमप्रतिमसत्त्वौजोबलवीर्यपराक्रमम् ।
हतं देवव्रतं श्रुत्वा पाञ्चाल्येन शिखण्डिना ॥ १
धृतराष्ट्रस्तदा राजा शोकव्याकुलचेतनः ।
किमचेष्टत विप्रर्षे हते पितरि वीर्यवान् ॥ २
तस्य पुत्रो हि भगवन्भीष्मद्रोणमुखै रथैः ।
पराजित्य महेष्वासान्पाण्डवान्राज्यमिच्छति ॥ ३
तस्मिन्हते तु भगवन्केतौ सर्वधनुष्मताम् ।
यदचेष्टत कौरव्यस्तन्मे ब्रूहि द्विजोत्तम ॥ ४

वैशंपायन उवाच ।

निहतं पितरं श्रुत्वा धृतराष्ट्रो जनाधिपः ।
लेभे न शान्तिं कौरव्यश्चिन्ताशोकपरायणः ॥ ५
तस्य चिन्तयतो दुःखमनिशं पार्थिवस्य तत् ।
आजगाम विशुद्धात्मा पुनर्गावल्गणिस्तदा ॥ ६
शिबिरात्संजयं प्राप्तं निशि नागाह्वयं पुरम् ।
आम्बिकेयो महाराज धृतराष्ट्रोऽन्वपृच्छत ॥ ७
श्रुत्वा भीष्मस्य निधनमप्रहृष्टमना भृशम् ।
पुत्राणां जयमाकाङ्क्षन्विललापातुरो यथा ॥ ८

धृतराष्ट्र उवाच ।

संसाध्य तु महात्मानं भीष्मं भीमपराक्रमम् ।
किमकार्षुः परं तात कुरवः कालचोदिताः ॥ ९
तस्मिन्विनिहते शूरे दुराधर्षे महौजसि ।
किं नु स्वित्कुरवोऽकार्षुर्निमग्नाः शोकसागरे ॥ १०
तदुदीर्णं महत्सैन्यं त्रैलोक्यस्यापि संजय ।
भयमुत्पादयेत्तीव्रं पाण्डवानां महात्मनाम् ॥ ११
देवव्रते तु निहते कुरूणामृषभे तदा ।
यदकार्षुर्नृपतयस्तन्ममाचक्ष्व संजय ॥ १२

संजय उवाच ।

शृणु राजन्नेकमना वचनं ब्रुवतो मम ।
यत्ते पुत्रास्तदाकार्षुर्हते देवव्रते मृधे ॥ १३
निहते तु तदा भीष्मे राजन्सत्यपराक्रमे ।
तावकाः पाण्डवेयाश्च प्राध्यायन्त पृथक्पृथक् ॥ १४
विस्मिताश्च प्रहृष्टाश्च क्षत्रधर्मं निशाम्य ते ।
स्वधर्मं निन्दमानाश्च प्रणिपत्य महात्मने ॥ १५
शयनं कल्पयामासुर्भीष्मायामिततेजसे ।
सोपधानं नरव्याघ्र शरैः संनतपर्वभिः ॥ १६
विधाय रक्षां भीष्माय समाभाष्य परस्परम् ।
अनुमान्य च गाङ्गेयं कृत्वा चापि प्रदक्षिणम् ॥
क्रोधसंरक्तनयनाः समवेक्ष्य परस्परम् ।
पुनर्युद्धाय निर्जग्मुः क्षत्रियाः कालचोदिताः ॥ १८
ततस्तूर्यनिनादैश्च भेरीणां च महास्वनैः ।
तावकानामनीकानि परेषां चापि निर्ययुः ॥ १९
व्यावृत्तेऽहनि राजेन्द्र पतिते जाह्नवीसुते ।
अमर्षवशमापन्नाः कालोपहतचेतसः ॥ २०
अनादृत्य वचः पथ्यं गाङ्गेयस्य महात्मनः ।
निर्ययुर्भरतश्रेष्ठाः शस्त्राण्यादाय सर्वशः ॥ २१
मोहात्तव सपुत्रस्य वधाच्छांतनवस्य च ।

कौरव्या मृत्युसाद्भूताः सहिताः सर्वराजभिः ॥ २२
अजाव्रय इवागोपा वने श्वापदसंकुले ।
भृशमुद्विग्नमनसो हीना देवव्रतेन ते ॥ २३
पतिते भरतश्रेष्ठे बभूव कुरुवाहिनी ।
द्यौरिवापेतनक्षत्रा हीनं खमिव वायुना ॥ २४
विपन्नसस्येव मही वाक्चैवासंस्कृता यथा ।
आसुरीव यथा सेना निगृहीते पुरा बलौ ॥ २५
विधवेव वरारोहा शुष्कतोयेव निम्नगा ।
वृकैरिव वने रुद्धा पृषती हतयूथपा ॥ २६
स्वाधर्षा हतसिंहेव महती गिरिकन्दरा ।
भारती भरतश्रेष्ठ पतिते जाह्नवीसुते ॥ २७
विष्वग्वातहता रुग्णा नौरिवासीन्महार्णवे ।
बलिभिः पाण्डवैर्वीरैर्लब्धलक्षैर्भृशार्दिता ॥ २८
सा तदासीद्भृशं सेना व्याकुलाश्वरथद्विपा ।
विषण्णभूयिष्ठनरा कृपणा ध्वस्तमानसा ॥ २९
तस्यां त्रस्ता नृपतयः सैनिकाश्च पृथग्विधाः ।
पाताल इव मज्जन्तो हीना देवव्रतेन ते ।
कर्णं हि कुरवोऽस्मार्षुः स हि देवव्रतोपमः ॥ ३०
सर्वशस्त्रभृतां श्रेष्ठं रोचमानमिवातिथिम् ।
बन्धुमापद्गतस्येव तमेवोपागमन्मनः ॥ ३१
चुक्रुशुः कर्ण कर्णेति तत्र भारत पार्थिवाः ।
राधेयं हितमस्माकं सूतपुत्रं तनुत्यजम् ॥ ३२
स हि नायुध्यत तदा दशाहानि महायशाः ।
सामात्यबन्धुः कर्णो वै तमाह्वयत माचिरम् ॥ ३३
भीष्मेण हि महाबाहुः सर्वक्षत्रस्य पश्यतः ।
रथेषु गण्यमानेषु बलविक्रमशालिषु ।
संख्यातोऽर्धरथः कर्णो द्विगुणः सन्नरर्षभः ॥ ३४
रथातिरथसंख्यायां योऽग्रणीः शूरसंमतः ।
पितृवित्ताम्बुदेवेशानपि यो योद्धुमुत्सहेत् ॥ ३५
स तु तेनैव कोपेन राजन्गाङ्गेयमुक्तवान् ।
त्वयि जीवति कौरव्य नाहं योत्स्ये कथंचन ॥ ३६
त्वया तु पाण्डवेयेषु निहतेषु महामृधे ।
दुर्योधनमनुज्ञाप्य वनं यास्यामि कौरव ॥ ३७
पाण्डवैर्वा हते भीष्मे त्वयि स्वर्गमुपेयुषि ।
हन्तास्म्येकरथेनैव कृत्स्नान्यान्मन्यसे रथान् ॥ ३८
एवमुक्त्वा महाराज दशाहानि महायशाः ।
नायुध्यत ततः कर्णः पुत्रस्य तव संमते ॥ ३९
भीष्मः समरविक्रान्तः पाण्डवेयस्य पार्थिव ।
जघान समरे योधानसंख्येयपराक्रमः ॥ ४०
तस्मिंस्तु निहते शूरे सत्यसंधे महौजसि ।
त्वत्सुताः कर्णमस्मार्षुस्तर्तुकामा इव प्लवम् ॥ ४१
तावकास्तव पुत्राश्च सहिताः सर्वराजभिः ।
हा कर्ण इति चाक्रन्दन्कालोऽयमिति चाब्रुवन् ॥
जामदग्न्याभ्यनुज्ञातमस्त्रे दुर्वारपौरुषम् ।
अगमन्नो मनः कर्णं बन्धुमात्ययिकेष्विव ॥ ४३
स हि शक्तो रणे राजंस्त्रातुमस्मान्महाभयात् ।
त्रिदशानिव गोविन्दः सततं सुमहाभयात् ॥ ४४

वैशंपायन उवाच ।

तथा कर्णं युधि वरं कीर्तयन्तं पुनः पुनः ।
आशीविषवदुच्छ्वस्य धृतराष्ट्रोऽब्रवीदिदम् ॥ ४५
यत्तद्वैकर्तनं कर्णमगमद्वो मनस्तदा ।
अप्यपश्यत राधेयं सूतपुत्रं तनुत्यजम् ॥ ४६
अपि तन्न मृषाकार्षीद्युधि सत्यपराक्रमः ।
संभ्रान्तानां तदार्तानां त्रस्तानां त्राणमिच्छताम् ॥
अपि तत्पूरयांचक्रे धनुर्धरवरो युधि ।
यत्तद्विनिहते भीष्मे कौरवाणामपावृतम् ॥ ४८
तत्खण्डं पूरयामास परेषामादधद्भयम् ।
कृतवान्मम पुत्राणां जयाशां सफलामपि ॥ ४९

इति श्रीमहाभारते द्रोणपर्वणि
प्रथमोऽध्यायः ॥ १ ॥

२

संजय उवाच ।

हतं भीष्ममाधिरथिर्विदित्वा
भिन्नां नावमिवात्यगाधे कुरूणाम् ।
सोदर्यवद्व्यसनात्सूतपुत्रः
संतारयिष्यंस्तव पुत्रस्य सेनाम् ॥ १
श्रुत्वा तु कर्णः पुरुषेन्द्रमच्युतं
निपातितं शांतनवं महारथम् ।
अथोपायात्तूर्णममित्रकर्शनो
धनुर्धराणां प्रवरस्तदा वृषः ॥ २
हते तु भीष्मे रथसत्तमे परै-
र्निमज्जतीं नावमिवार्णवे कुरून् ।
पितेव पुत्रांस्त्वरितोऽभ्ययात्ततः
संतारयिष्यंस्तव पुत्रस्य सेनाम् ॥ ३

कर्ण उवाच ।

यस्मिन्धृतिर्बुद्धिपराक्रमौजो
दमः सत्यं वीरगुणाश्च सर्वे ।
अस्त्राणि दिव्यान्यथ संनतिर्ह्रीः
प्रिया च वागनपायीनि भीष्मे ॥ ४
ब्रह्मद्विषघ्ने सततं कृतज्ञे
सनातनं चन्द्रमसीव लक्ष्म ।
स चेत्प्रशान्तः परवीरहन्ता
मन्ये हतानेव हि सर्वयोधान् ॥ ५
नेह ध्रुवं किंचन जातु विद्यते
अस्मिँल्लोके कर्मणोऽनित्ययोगात् ।
सूर्योदये को हि विमुक्तसंशयो
भावं कुर्वीताद्य महाव्रते हते ॥ ६
वसुप्रभावे वसुवीर्यसंभवे
गते वसूनेव वसुंधराधिपे ।
वसूनि पुत्रांश्च वसुंधरां तथा
कुरूंश्च शोचध्वमिमां च वाहिनीम् ॥ ७

संजय उवाच ।

महाप्रभावे वरदे निपातिते
लोकश्रेष्ठे शांतनवे महौजसि ।
पराजितेषु भरतेषु दुर्मनाः
कर्णो भृशं न्यश्वसदश्रु वर्तयन् ॥ ८
इदं तु राधेयवचो निशम्य ते
सुताश्च राजंस्तव सैनिकाश्च ह ।
परस्परं चुक्रुशुरार्तिजं भृशं
तदाश्रु नेत्रैर्मुमुचुर्हि शब्दवत् ॥ ९
प्रवर्तमाने तु पुनर्महाहवे
विगाह्यमानासु चमूषु पार्थिवैः ।
अथाब्रवीद्धर्षकरं वचस्तदा
रथर्षभान्सर्वमहारथर्षभः ॥ १०

कर्ण उवाच ।

जगत्यनित्ये सततं प्रधावति
प्रचिन्तयन्नस्थिरमद्य लक्षये ।
भवत्सु तिष्ठत्स्विह पातितो रणे
गिरिप्रकाशः कुरुपुंगवः कथम् ॥ ११
निपातिते शांतनवे महारथे
दिवाकरे भूतलमास्थिते यथा ।
न पार्थिवाः सोढुमलं धनंजयं
गिरिप्रवोढारमिवानिलं द्रुमाः ॥ १२
हतप्रधानं त्विदमार्तरूपं
परैर्हतोत्साहमनाथमद्य वै ।
मया कुरूणां परिपाल्यमाहवे
बलं यथा तेन महात्मना तथा ॥ १३
समाहितं चात्मनि भारमीदृशं
जगत्तथानित्यमिदं च लक्षये ।
निपातितं चाहवशौण्डमाहवे

कथं नु कुर्यामिह्माहवे भयम् ॥ १४
अहं तु तान्कुरुवृषभानजिह्मगैः
प्रवेरयन्यमसदनं रणे चरन् ।
यशः परं जगति विभाव्य वर्तिता
परैर्हतो युधि शयिताथ वा पुनः ॥ १५
युधिष्ठिरो धृतिमतिधर्मतत्त्ववा-
न्वृकोदरो गजशततुल्यविक्रमः ।
तथार्जुनस्त्रिदशवरात्मजो यतो
न तद्बलं सुजयमथामरैरपि ॥ १६
यमौ रणे यत्र यमोपमौ बले
ससात्यकिर्यत्र च देवकीसुतः ।
न तद्बलं कापुरुषोऽभ्युपेयिवा-
न्निवर्तते मृत्युमुखादिवासकृत् ॥ १७
तपोऽभ्युदीर्णं तपसैव गम्यते
बलं बलेनापि तथा मनस्विभिः ।
मनश्च मे शत्रुनिवारणे ध्रुवं
स्वरक्षणे चाचलवद्व्यवस्थितम् ॥ १८
एवं चैषां बुध्यमानः प्रभावं
गत्वैवाहं ताञ्जयाम्यद्य सूत ।
मित्रद्रोहो मर्षणीयो न मेऽयं
भग्ने सैन्ये यः सहायः स मित्रम् ॥ १९
कर्तास्म्येतत्सत्पुरुषार्यकर्म
त्यक्त्वा प्राणाननुयास्यामि भीष्मम् ।
सर्वान्संख्ये शत्रुसंघान्हनिष्ये
हतस्तैर्वा वीरलोकं गमिष्ये ॥ २०
संप्राकुष्टे रुदितस्त्रीकुमारे
पराभूते पौरुषे धार्तराष्ट्रे ।
मया कृत्यमिति जानामि सूत
तस्माच्छत्रून्धार्तराष्ट्रस्य जेष्ये ॥ २१
कुरून्रक्षन्पाण्डुपुत्राञ्जिघांस-
स्त्यक्त्वा प्राणान्घोररूपे रणेऽस्मिन् ।
सर्वान्संख्ये शत्रुसंघान्निहत्य
दास्याम्यहं धार्तराष्ट्राय राज्यम् ॥ २२
निबध्यतां मे कवचं विचित्रं
हैमं शुभ्रं मणिरत्नावभासि ।
शिरस्त्राणं चार्कसमानभासं
धनुः शरांश्चापि विषाहिकल्पान् ॥ २३
उपासङ्गान्षोडश योजयन्तु
धनूंषि दिव्यानि तथाहरन्तु ।
असींश्च शक्तीश्च गदाश्च गुर्वीः
शङ्खं च जाम्बूनदचित्रभासम् ॥ २४
एतां रौक्मीं नागकक्ष्यां च जैत्रीं
जैत्रं च मे ध्वजमिन्दीवराभम् ।
श्लक्ष्णैर्वस्त्रैर्विप्रमृज्यानयस्व
चित्रां मालां चात्र बद्ध्वा सजालाम् ॥ २५
अश्वानग्र्यान्पाण्डुराभ्रप्रकाशा-
न्पुष्टान्स्नातान्मन्त्रपूताभिरद्भिः ।
तप्तैर्भाण्डैः काञ्चनैरभ्युपेता-
ञ्शीघ्राञ्शीघ्रं सूतपुत्रानयस्व ॥ २६
रथं चाग्र्यं हेमजालावनद्धं
रत्नैश्चित्रं चन्द्रसूर्यप्रकाशैः ।
द्रव्यैर्युक्तं संप्रहारोपपन्नै-
र्वाहैर्युक्तं तूर्णमावर्तयस्व ॥ २७
चित्राणि चापानि च वेगवन्ति
ज्याश्चोत्तमाः संहननोपपन्नाः ।
तूणांश्च पूर्णान्महतः शराणा-
मासज्य गात्रावरणानि चैव ॥ २८
प्रायात्रिकं चानयताशु सर्वं
कन्याः पूर्णं वीरकांस्यं च हैमम् ।
आनीय मालामवबध्य चाङ्गे

प्रवादयन्त्वाशु जयाय भेरीः ॥ २९
प्रयाहि सूताशु यतः किरीटी
वृकोदरो धर्मसुतो यमौ च ।
तान्वा हनिष्यामि समेत्य संख्ये
भीष्माय वैष्यामि हतो द्विषद्भिः ॥ ३०
यस्मिन्राजा सत्यधृतिर्युधिष्ठिरः
समास्थितो भीमसेनार्जुनौ च ।
वासुदेवः सात्यकिः सृञ्जयाश्च
मन्ये बलं तदजय्यं महीपैः ॥ ३१
तं चेन्मृत्युः सर्वहरोऽभिरक्षे-
त्सदाप्रमत्तः समरे किरीटिनम् ।
तथापि हन्तास्मि समेत्य संख्ये
यास्यामि वा भीष्मपथा यमाय ॥ ३२
न त्वेवाहं न गमिष्यामि तेषां
मध्ये शूराणां तत्तथाहं ब्रवीमि ।
मित्रद्रुहो दुर्बलभक्तयो ये
पापात्मानो न ममैते सहायाः ॥ ३३

संजय उवाच ।

स सिद्धिमन्तं रथमुत्तमं दृढं
सकूबरं हेमपरिष्कृतं शुभम् ।
पताकिनं वातजवैर्हयोत्तमै-
र्युक्तं समास्थाय ययौ जयाय ॥ ३४
संपूज्यमानः कुरुभिर्महात्मा
रथर्षभः पाण्डुरवाजियाता ।
ययौ तदायोधनमुग्रधन्वा
यत्रावसानं भरतर्षभस्य ॥ ३५
वरूथिना महता सध्वजेन
सुवर्णमुक्तामणिवज्रशालिना ।
सदश्वयुक्तेन रथेन कर्णो
मेघस्वनेनार्क इवामितौजाः ॥ ३६
हुताशनाभः स हुताशनप्रभे
शुभः शुभे वै स्वरथे धनुर्धरः ।
स्थितो रराजाधिरथिर्महारथः
स्वयं विमाने सुरराडिव स्थितः ॥ ३७

इति श्रीमहाभारते द्रोणपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

३

संजय उवाच ।

शरतल्पे महात्मानं शयानममितौजसम् ।
महावातसमूहेन समुद्रमिव शोषितम् ॥ १
दिव्यैरस्त्रैर्महेष्वासं पातितं सव्यसाचिना ।
जयाशां तव पुत्राणां संभग्नां शर्म वर्म च ॥ २
अपाराणामिव द्वीपमगाधे गाधमिच्छताम् ।
स्रोतसा यामुनेनेव शरौघेण परिप्लुतम् ॥ ३
महान्तमिव मैनाकमसह्यं भुवि पातितम् ।
नभश्च्युतमिवादित्यं पतितं धरणीतले ॥ ४
शतक्रतोरिवाचिन्त्यं पुरा वृत्रेण निर्जयम् ।
मोहनं सर्वसैन्यस्य युधि भीष्मस्य पातनम् ॥ ५
ककुदं सर्वसैन्यानां लक्ष्म सर्वधनुष्मताम् ।
धनंजयशरव्याप्तं पितरं ते महाव्रतम् ॥ ६
तं वीरशयने वीरं शयानं पुरुषर्षभम् ।
भीष्ममाधिरथिर्दृष्ट्वा भरतानाममध्यमम् ॥ ७
अवतीर्य रथादार्तो बाष्पव्याकुलिताक्षरम् ।
अभिवाद्याञ्जलिं बद्ध्वा वन्दमानोऽभ्यभाषत ॥ ८
कर्णोऽहमस्मि भद्रं ते अद्य मा वद भारत ।
पुण्यया क्षेमया वाचा चक्षुषा चावलोकय ॥ ९
न नूनं सुकृतस्येह फलं कश्चित्समश्नुते ।
यत्र धर्मपरो वृद्धः शेते भुवि भवानिह ॥ १०
कोशसंजनने मन्त्रे व्यूहप्रहरणेषु च ।

नाथमन्यं न पश्यामि कुरूणां कुरुसत्तम ॥ ११
बुद्ध्या विशुद्धया युक्तो यः कुरूंस्तारयेद्भयात् ।
योधांस्त्वमप्लवे हित्वा पितृलोकं गमिष्यसि ॥ १२
अद्यप्रभृति संक्रुद्धा व्याघ्रा इव मृगक्षयम् ।
पाण्डवा भरतश्रेष्ठ करिष्यन्ति कुरुक्षयम् ॥ १३
अद्य गाण्डीवघोषस्य वीर्यज्ञाः सव्यसाचिनः ।
कुरवः संत्रसिष्यन्ति वज्रपाणेरिवासुराः ॥ १४
अद्य गाण्डीवमुक्तानामशनीनामिव स्वनः ।
त्रासयिष्यति संग्रामे कुरूनन्यांश्च पार्थिवान् ॥ १५
समिद्धोऽग्निर्यथा वीर महाज्वालो द्रुमान्दहेत् ।
धार्तराष्ट्रान्प्रधक्ष्यन्ति तथा बाणाः किरीटिनः ॥ १६
येन येन प्रसरतो वाय्वग्नी सहितौ वने ।
तेन तेन प्रदहतो भगवन्तौ यदिच्छतः ॥ १७
यादृशोऽग्निः समिद्धो हि तादृक्पार्थो न संशयः ।
यथा वायुर्नरव्याघ्र तथा कृष्णो न संशयः ॥ १८
नदतः पाञ्चजन्यस्य रसतो गाण्डिवस्य च ।
श्रुत्वा सर्वाणि सैन्यानि त्रासं यास्यन्ति भारत ॥ १९
कपिध्वजस्य चोत्पाते रथस्यामित्रकर्शिनः ।
शब्दं सोढुं न शक्ष्यन्ति त्वामृते वीर- पार्थिवाः ॥
को ह्यर्जुनं रणे योद्धुं त्वदन्यः पार्थिवोऽर्हति ।
यस्य दिव्यानि कर्माणि प्रवदन्ति मनीषिणः ॥ २१
अमानुषश्च संग्रामस्त्र्यम्बकेन च धीमतः ।
तस्माच्चैव वरः प्राप्तो दुष्प्रापश्चाकृतात्मभिः ॥ २२
तमद्याहं पाण्डवं युद्धशौण्ड-
मभृष्यमाणो भवतानुशिष्टः ।
आशीविषं दृष्टिहरं सुघोर-
मियां पुरस्कृत्य वधं जयं वा ॥ २३

इति श्रीमहाभारते द्रोणपर्वणि
तृतीयोऽध्यायः ॥ ३ ॥

४

संजय उवाच ।

तस्य लालप्यतः श्रुत्वा वृद्धः कुरुपितामहः ।
देशकालोचितं वाक्यमब्रवीत्प्रीतमानसः ॥ १
समुद्र इव सिन्धूनां ज्योतिषामिव भास्करः ।
सत्यस्य च यथा सन्तो बीजानामिव चोर्वरा ॥ २
पर्जन्य इव भूतानां प्रतिष्ठा सुहृदां भव ।
बान्धवास्त्वानुजीवन्तु सहस्राक्षमिवामराः ॥ ३
स्वबाहुबलवीर्येण धार्तराष्ट्रप्रियैषिणा ।
कर्ण राजपुरं गत्वा काम्बोजा निहतास्त्वया ॥ ४
गिरिव्रजगताश्चापि नग्नजित्प्रमुखा नृपाः ।
अम्बष्ठाश्च विदेहाश्च गान्धाराश्च जितास्त्वया ॥ ५
हिमवद्दुर्गनिलयाः किराता रणकर्कशाः ।
दुर्योधनस्य वशगाः कृताः कर्ण त्वया पुरा ॥ ६
तत्र तत्र च संग्रामे दुर्योधनहितैषिणा ।
बहवश्च जिता वीरास्त्वया कर्ण महौजसा ॥ ७
यथा दुर्योधनस्तात सज्ञातिकुलबान्धवः ।
तथा त्वमपि सर्वेषां कौरवाणां गतिर्भव ॥ ८
शिवेनाभिवदामि त्वां गच्छ युध्यस्व शत्रुभिः ।
अनुशाधि कुरून्संख्ये धत्स्व दुर्योधने जयम् ॥ ९
भवान्पौत्रसमोऽस्माकं यथा दुर्योधनस्तथा ।
तवापि धर्मतः सर्वे यथा तस्य वयं तथा ॥ १०
यौनात्संबन्धकाल्लोके विशिष्टं संगतं सताम् ।
सद्भिः सह नरश्रेष्ठ प्रवदन्ति मनीषिणः ॥ ११
स सत्यसंगरो भूत्वा ममेदमिति निश्चितम् ।
कुरूणां पालय बलं यथा दुर्योधनस्तथा ॥ १२
इति श्रुत्वा वचः सोऽथ चरणावभिवाद्य च ।
ययौ वैकर्तनः कर्णस्तूर्णमायोधनं प्रति ॥ १३
सोऽभिवीक्ष्य नरौघाणां स्थानमप्रतिमं महत् ।
व्यूढप्रहरणोरस्कं सैन्यं तत्समबृंहयत् ॥ १४

कर्णं दृष्ट्वा महेष्वासं युद्धाय समवस्थितम् ।
क्ष्वेडितास्फोटितरवैः सिंहनादरवैरपि ।
धनुःशब्दैश्च विविधैः कुरवः समपूजयन् ॥ १५

इति श्रीमहाभारते द्रोणपर्वणि
चतुर्थोऽध्यायः ॥ ४ ॥

५

संजय उवाच ।

रथस्थं पुरुषव्याघ्रं दृष्ट्वा कर्णमवस्थितम् ।
हृष्टो दुर्योधनो राजन्निदं वचनमब्रवीत् ॥ १
सनाथमिदमत्यर्थं भवता पालितं बलम् ।
मन्ये किं तु समर्थं यद्धितं तत्संप्रधार्यताम् ॥ २

कर्ण उवाच ।

ब्रूहि तत्पुरुषव्याघ्र त्वं हि प्राज्ञतमो नृप ।
यथा चार्थपतिः कृत्यं पश्यते न तथेतरः ॥ ३
ते स्म सर्वे तव वचः श्रोतुकामा नरेश्वर ।
नान्याय्यं हि भवान्वाक्यं ब्रूयादिति मतिर्मम ॥ ४

दुर्योधन उवाच ।

भीष्मः सेनाप्रणेतासीद्वयसा विक्रमेण च ।
श्रुतेन च सुसंपन्नः सर्वैर्योधगुणैस्तथा ॥ ५
तेनातियशसा कर्ण घ्नता शत्रुगणान्मम ।
सुयुद्धेन दशाहानि पालिताः स्मो महात्मना ॥ ६
तस्मिन्नसुकरं कर्म कृतवत्याश्रिते दिवम् ।
कं नु सेनाप्रणेतारं मन्यसे तदनन्तरम् ॥ ७
न ऋते नायकं सेना मुहूर्तमपि तिष्ठति ।
आहवेष्वाहवश्रेष्ठ नेतृहीनेव नौर्जले ॥ ८
यथा ह्यकर्णधारा नौ रथश्चासारथिर्यथा ।
द्रवेद्यथेष्टं तद्वत्स्यादृते सेनापतिं बलम् ॥ ९
स भवान्वीक्ष्य सर्वेषु मामकेषु महात्मसु ।
पश्य सेनापतिं युक्तमनु शांतनवादिह ॥ १०
यं हि सेनाप्रणेतारं भवान्वक्ष्यति संयुगे ।
तं वयं सहिताः सर्वे प्रकरिष्याम मारिष ॥ ११

कर्ण उवाच ।

सर्व एव महात्मान इमे पुरुषसत्तमाः ।
सेनापतित्वमर्हन्ति नात्र कार्या विचारणा ॥ १२
कुलसंहननज्ञानैर्बलविक्रमबुद्धिभिः ।
युक्ताः कृतज्ञा ह्रीमन्त आहवेष्वनिवर्तिनः ॥ १३
युगपन्न तु ते शक्याः कर्तुं सर्वे पुरःसराः ।
एक एवात्र कर्तव्यो यस्मिन्वैशेषिका गुणाः ॥ १४
अन्योन्यस्पर्धिनां तेषां यद्येकं सत्करिष्यसि ।
शेषा विमनसो व्यक्तं न योत्स्यन्ते हि भारत ॥ १५
अयं तु सर्वयोधानामाचार्यः स्थविरो गुरुः ।
युक्तः सेनापतिः कर्तुं द्रोणः शस्त्रभृतां वरः ॥ १६
को हि तिष्ठति दुर्धर्षे द्रोणे ब्रह्मविदुत्तमे ।
सेनापतिः स्यादन्योऽस्माच्छुक्राङ्गिरसदर्शनात् ॥ १७
न च स ह्यस्ति ते योधः सर्वराजसु भारत ।
यो द्रोणं समरे यान्तं नानुयास्यति संयुगे ॥ १८
एष सेनाप्रणेतॄणामेष शस्त्रभृतामपि ।
एष बुद्धिमतां चैव श्रेष्ठो राजन्गुरुश्च ते ॥ १९
एवं दुर्योधनाचार्यमाशु सेनापतिं कुरु ।
जिगीषन्तोऽसुरान्संख्ये कार्त्तिकेयमिवामराः ॥ २०

संजय उवाच ।

कर्णस्य वचनं श्रुत्वा राजा दुर्योधनस्तदा ।
सेनामध्यगतं द्रोणमिदं वचनमब्रवीत् ॥ २१
वर्णश्रैष्ठ्यात्कुलोत्पत्त्या श्रुतेन वयसा धिया ।
वीर्याद्दाक्ष्यादधृष्यत्वादर्थज्ञानान्नयाज्जयात् ॥ २२
तपसा च कृतज्ञत्वाद्वृद्धः सर्वगुणैरपि ।
युक्तो भवत्समो गोप्ता राज्ञामन्यो न विद्यते ॥ २३
स भवान्पातु नः सर्वान्विबुधानिव वासवः ।
भवन्नेत्राः पराञ्जेतुमिच्छामो द्विजसत्तम ॥ २४
रुद्राणामिव कापाली वसूनामिव पावकः ।

कुबेर इव यक्षाणां मरुतामिव वासवः ॥ २५
वसिष्ठ इव विप्राणां तेजसामिव भास्करः ।
पितॄणामिव धर्मोऽथ आदित्यानामिवाम्बुराट् ॥२६
नक्षत्राणामिव शशी दितिजानामिवोशनाः ।
श्रेष्ठः सेनाप्रणेतॄणां स नः सेनापतिर्भव ॥ २७
अक्षौहिण्यो दशैका च वशगाः सन्तु तेऽनघ ।
ताभिः शत्रून्प्रतिव्यूह्य जहीन्द्रो दानवानिव ॥ २८
प्रयातु नो भवानग्रे देवानामिव पावकिः ।
अनुयास्यामहे त्वाजौ सौरभेया इवर्षभम् ॥ २९
उग्रधन्वा महेष्वासो दिव्यं विस्फारयन्धनुः ।
अग्रे भवन्तं दृष्ट्वा नो नार्जुनः प्रसहिष्यते ॥ ३०
ध्रुवं युधिष्ठिरं संख्ये सानुबन्धं सबान्धवम् ।
जेष्यामि पुरुषव्याघ्र भवान्सेनापतिर्यदि ॥ ३१
एवमुक्ते ततो द्रोणे जयेत्यूचुर्नराधिपाः ।
सिंहनादेन महता हर्षयन्तस्तवात्मजम् ॥ ३२
सैनिकाश्च मुदा युक्ता वर्धयन्ति द्विजोत्तमम् ।
दुर्योधनं पुरस्कृत्य प्रार्थयन्तो महद्यशः ॥ ३३

द्रोण उवाच ।

वेदं षडङ्गं वेदाहमर्थविद्यां च मानवीम् ।
त्रैयम्बकमथेष्वस्त्रमस्त्राणि विविधानि च ॥ ३४
ये चाप्युक्ता मयि गुणा भवद्भिर्जयकाङ्क्षिभिः ।
चिकीर्षुस्तानहं सत्यान्योधयिष्यामि पाण्डवान् ॥३५

संजय उवाच ।

स एवमभ्यनुज्ञातश्चक्रे सेनापतिं ततः ।
द्रोणं तव सुतो राजन्विधिदृष्टेन कर्मणा ॥ ३६
अथाभिषिषिचुर्द्रोणं दुर्योधनमुखा नृपाः ।
सेनापत्ये यथा स्कन्दं पुरा शक्रमुखाः सुराः ॥३७
ततो वादित्रघोषेण सह पुंसां महास्वनैः ।
प्रादुरासीत्कृते द्रोणे हर्षः सेनापतौ तदा ॥ ३८
ततः पुण्याहघोषेण स्वस्तिवादस्वनेन च ।
संस्तवैर्गीतशब्दैश्च सूतमागधबन्दिनाम् ॥ ३९
जयशब्दैर्द्विजाग्र्याणां सुभगानर्तितैस्तथा ।
सत्कृत्य विधिवद्द्रोणं जितान्मन्यन्त पाण्डवान् ॥४०

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चमोऽध्यायः ॥ ५ ॥

६

संजय उवाच ।

सेनापत्यं तु संप्राप्य भारद्वाजो महारथः ।
युयुत्सुर्व्यूह्य सैन्यानि प्रायात्तव सुतैः सह ॥ १
सैन्धवश्च कलिङ्गश्च विकर्णश्च तवात्मजः ।
दक्षिणं पार्श्वमास्थाय समतिष्ठन्त दंशिताः ॥ २
प्रपक्षः शकुनिस्तेषां प्रवरैर्हयसादिभिः ।
ययौ गान्धारकैः सार्धं विमलप्रासयोधिभिः ॥ ३
कृपश्च कृतवर्मा च चित्रसेनो विविंशतिः ।
दुःशासनमुखा यत्ताः सव्यं पार्श्वमपालयन् ॥ ४
तेषां प्रपक्षाः काम्बोजाः सुदक्षिणपुरःसराः ।
ययुरश्वैर्महावेगैः शकाश्च यवनैः सह ॥ ५
मद्रास्त्रिगर्ताः साम्बष्ठाः प्रतीच्योदीच्यवासिनः ।
शिबयः शूरसेनाश्च शूद्राश्च मलदैः सह ॥ ६
सौवीराः कितवाः प्राच्या दाक्षिणात्याश्च सर्वशः ।
तवात्मजं पुरस्कृत्य सूतपुत्रस्य पृष्ठतः ॥ ७
हर्षयन्सर्वसैन्यानि बलेषु बलमादधत् ।
ययौ वैकर्तनः कर्णः प्रमुखे सर्वधन्विनाम् ॥ ८
तस्य दीप्तो महाकायः स्वान्यनीकानि हर्षयन् ।
हस्तिकक्ष्यामहाकेतुर्बभौ सूर्यसमद्युतिः ॥ ९
न भीष्मव्यसनं कश्चिद्दृष्ट्वा कर्णममन्यत ।
विशोकाश्चाभवन्सर्वे राजानः कुरुभिः सह ॥ १०
हृष्टाश्च बहवो योधास्तत्राजल्पन्त संगताः ।
न हि कर्णं रणे दृष्ट्वा युधि स्थास्यन्ति पाण्डवाः ॥११
कर्णो हि समरे शक्तो जेतुं देवान्सवासवान् ।

किमु पाण्डुसुतान्युद्धे हीनवीर्यपराक्रमान् ॥ १२
भीष्मेण तु रणे पार्थाः पालिता बाहुशालिना ।
तांस्तु कर्णः शरैस्तीक्ष्णैर्नाशयिष्यत्यसंशयम् ॥ १३
एवं ब्रुवन्तस्तेऽन्योन्यं हृष्टरूपा विशां पते ।
राधेयं पूजयन्तश्च प्रशंसन्तश्च निर्ययुः ॥ १४
अस्माकं शकटव्यूहो द्रोणेन विहितोऽभवत् ।
परेषां क्रौञ्च एवासीद्व्यूहो राजन्महात्मनाम् ।
प्रीयमाणेन विहितो धर्मराजेन भारत ॥ १५
व्यूहप्रमुखतस्तेषां तस्थतुः पुरुषर्षभौ ।
वानरध्वजमुच्छ्रित्य विष्वक्सेनधनंजयौ ॥ १६
ककुदं सर्वसैन्यानां लक्ष्म सर्वधनुष्मताम् ।
आदित्यपथगः केतुः पार्थस्यामिततेजसः ॥ १७
दीपयामास तत्सैन्यं पाण्डवस्य महात्मनः ।
यथा प्रज्वलितः सूर्यो युगान्ते वै वसुंधराम् ॥ १८
अस्यतामर्जुनः श्रेष्ठो गाण्डीवं धनुषां वरम् ।
वासुदेवश्च भूतानां चक्राणां च सुदर्शनम् ॥ १९
चत्वार्येतानि तेजांसि वहञ्श्वेतहयो रथः ।
परेषामग्रतस्तस्थौ कालचक्रमिवोद्यतम् ॥ २०
एवमेतौ महात्मानौ बलसेनाग्रगावुभौ ।
तावकानां मुखं कर्णः परेषां च धनंजयः ॥ २१
ततो जाताभिसंरम्भौ परस्परवधैषिणौ ।
अवेक्षेतां तदान्योन्यं समरे कर्णपाण्डवौ ॥ २२
ततः प्रयाते सहसा भारद्वाजे महारथे ।
अन्तर्नादेन घोरेण वसुधा समकम्पत ॥ २३
ततस्तुमुलमाकाशमावृणोत्सदिवाकरम् ।
वातोद्धूतं रजस्तीव्रं कौशेयनिकरोपमम् ॥ २४
अनभ्रे प्रववर्ष द्यौर्मांसास्थिरुधिराण्युत ।
गृध्राः श्येना बडाः कङ्का वायसाश्च सहस्रशः ।
उपर्युपरि सेनां ते तदा पर्यपतन्नृप ॥ २५
गोमायवश्च प्राक्रोशन्भयदान्दारुणान्रवान् ।
अकार्षुरपसव्यं च बहुशः पृतनां तव ।
चिखादिषन्तो मांसानि पिपासन्तश्च शोणितम् ॥
अपतद्दीप्यमाना च सनिर्घाता सकम्पना ।
उल्का ज्वलन्ती संग्रामे पुच्छेनावृत्य सर्वशः ॥२
परिवेषो महांश्चापि सविद्युत्स्तनयित्नुमान् ।
भास्करस्याभवद्राजन्प्रयाते वाहिनीपतौ ॥ २८
एते चान्ये च बहवः प्रादुरासन्सुदारुणाः ।
उत्पाता युधि वीराणां जीवितक्षयकारकाः ॥ २९
ततः प्रववृते युद्धं परस्परवधैषिणाम् ।
कुरुपाण्डवसैन्यानां शब्देनानादयज्जगत् ॥ ३०
ते त्वन्योन्यं सुसंरब्धाः पाण्डवाः कौरवैः सह ।
प्रत्यघ्नन्निशितैर्बाणैर्जयगृद्धाः प्रहारिणः ॥ ३१
स पाण्डवानां महतीं महेष्वासो महाद्युतिः ।
वेगेनाभ्यद्रवत्सेनां किरञ्शरशतैः शितैः ॥ ३२
द्रोणमभ्युद्यतं दृष्ट्वा पाण्डवाः सह सृञ्जयैः ।
प्रत्यगृह्णंस्तदा राजञ्शरवर्षैः पृथक्पृथक् ॥ ३३
संक्षोभ्यमाणा द्रोणेन भिद्यमाना महाचमूः ।
व्यशीर्यत सपाञ्चाला वातेनेव बलाहकाः ॥ ३४
बहूनीह विकुर्वाणो दिव्यान्यस्त्राणि संयुगे ।
अपीडयत्क्षणेनैव द्रोणः पाण्डवसृञ्जयान् ॥ ३५
ते वध्यमाना द्रोणेन वासवेनेव दानवाः ।
पाञ्चालाः समकम्पन्त धृष्टद्युम्नपुरोगमाः ॥ ३६
ततो दिव्यास्त्रविच्छूरो याज्ञसेनिर्महारथः ।
अभिनच्छरवर्षेण द्रोणानीकमनेकधा ॥ ३७
द्रोणस्य शरवर्षैस्तु शरवर्षाणि भागशः ।
संनिवार्य ततः सेनां कुरूनप्यवधीद्बली ॥ ३८
संहृत्य तु ततो द्रोणः समवस्थाप्य चाहवे ।
स्वमनीकं महाबाहुः पार्षतं समुपाद्रवत् ॥ ३९
स बाणवर्षं सुमहदसृजत्पार्षतं प्रति ।
मघवान्समभिक्रुद्धः सहसा दानवेष्विव ॥ ४०

ते कम्प्यमाना द्रोणेन बाणैः पाण्डवसृञ्जयाः ।
पुनः पुनरभज्यन्त सिंहेनेवेतरे मृगाः ॥ ४१
अथ पर्यपतद्द्रोणः पाण्डवानां बलं बली ।
अलातचक्रवद्राजंस्तदद्भुतमिवाभवत् ॥ ४२
खचरनगरकल्पं कल्पितं शास्त्रदृष्ट्या
चलदनिलपताकं ह्लादिनं वल्गिताश्वम् ।
स्फटिकविमलकेतुं तापनं शात्रवाणां
रथवरमधिरूढः संजहारारिसेनाम् ॥ ४३

इति श्रीमहाभारते द्रोणपर्वणि
षष्ठोऽध्यायः ॥ ६ ॥

७

संजय उवाच ।

तथा द्रोणमभिघ्नन्तं साश्वसूतरथद्विपान् ।
व्यथिताः पाण्डवा दृष्ट्वा न चैनं पर्यवारयन् ॥ १
ततो युधिष्ठिरो राजा धृष्टद्युम्नधनंजयौ ।
अब्रवीत्सर्वतो यत्तैः कुम्भयोनिर्निवार्यताम् ॥ २
तत्रैनमर्जुनश्चैव पार्षतश्च सहानुगः ।
पर्यगृह्णंस्ततः सर्वे समायान्तं महारथाः ॥ ३
केकया भीमसेनश्च सौभद्रोऽथ घटोत्कचः ।
युधिष्ठिरो यमौ मत्स्या द्रुपदस्यात्मजास्तथा ॥ ४
द्रौपदेयाश्च संहृष्टा धृष्टकेतुः ससात्यकिः ।
चेकितानश्च संक्रुद्धो युयुत्सुश्च महारथः ॥ ५
ये चान्ये पार्थिवा राजन्पाण्डवस्यानुयायिनः ।
कुलवीर्यानुरूपाणि चक्रुः कर्माण्यनेकशः ॥ ६
संगृह्यमाणां तां दृष्ट्वा पाण्डवैर्वाहिनीं रणे ।
व्यावृत्य चक्षुषी कोपाद्भारद्वाजोऽन्ववैक्षत ॥ ७
स तीव्रं कोपमास्थाय रथे समरदुर्मदः ।
व्यधमत्पाण्डवानीकमभ्राणीव सदागतिः ॥ ८
रथानश्वान्नरान्नागानभिधावंस्ततस्ततः ।
चचारोन्मत्तवद्द्रोणो वृद्धोऽपि तरुणो यथा ॥ ९
तस्य शोणितदिग्धाङ्गाः शोणास्ते वातरंहसः ।
आजानेया हया राजन्नविभ्रान्ताः श्रियं दधुः ॥१०
तमन्तकमिव क्रुद्धमापतन्तं यतव्रतम् ।
दृष्ट्वा संप्राद्रवन्योधाः पाण्डवस्य ततस्ततः ॥ ११
तेषां प्रद्रवतां भीमः पुनरावर्ततामपि ।
वीक्षतां तिष्ठतां चासीच्छब्दः परमदारुणः ॥ १२
शूराणां हर्षजननो भीरूणां भयवर्धनः ।
द्यावापृथिव्योर्विवरं पूरयामास सर्वतः ॥ १३
ततः पुनरपि द्रोणो नाम विश्रावयन्युधि ।
अकरोद्रौद्रमात्मानं किरञ्शरशतैः परान् ॥ १४
स तथा तान्यनीकानि पाण्डवेयस्य धीमतः ।
कालवन्न्यवधीद्द्रोणो युवेव स्थविरो बली ॥ १५
उत्कृत्य च शिरांस्युग्रो बाहूनपि सभूषणान् ।
कृत्वा शून्यान्रथोपस्थानुदक्रोशन्महारथः ॥ १६
तस्य हर्षप्रणादेन बाणवेगेन चाभिभो ।
प्राकम्पन्त रणे योधा गावः शीतार्दिता इव ॥ १७
द्रोणस्य रथघोषेण मौर्वीनिष्पेषणेन च ।
धनुःशब्देन चाकाशे शब्दः समभवन्महान् ॥ १८
अथास्य बहुशो बाणा निश्चरन्तः सहस्रशः ।
व्याप्य सर्वा दिशः पेतुर्गजाश्वरथपत्तिषु ॥ १९
तं कार्मुकमहावेगमस्त्रज्वलितपावकम् ।
द्रोणमासादयांचक्रुः पाञ्चालाः पाण्डवैः सह ॥ २०
तान्वै सरथहस्त्यश्वान्प्राहिणोद्यमसादनम् ।
द्रोणोऽचिरेणाकरोच्च महीं शोणितकर्दमाम् ॥ २१
तन्वता परमास्त्राणि शरान्सततमस्यता ।
द्रोणेन विहितं दिक्षु बाणजालमदृश्यत ॥ २२
पदातिषु रथाश्वेषु वारणेषु च सर्वशः ।
तस्य विद्युदिवाभ्रेषु चरन्केतुरदृश्यत ॥ २३
स केकयानां प्रवरांश्च पञ्च
पाञ्चालराजं च शरैः प्रमृद्य ।

युधिष्ठिरानीकमदीनयोधी
द्रोणोऽभ्ययात्कार्मुकबाणपाणिः ॥ २४
तं भीमसेनश्च धनंजयश्च
शिनेश्च नप्ता द्रुपदात्मजश्च ।
शैब्यात्मजः काशिपतिः शिबिश्च
हृष्टा नदन्तो व्यकिरञ्शरौघैः ॥ २५
तेषामथो द्रोणधनुर्विमुक्ताः
पतत्रिणः काञ्चनचित्रपुङ्खाः ।
भित्त्वा शरीराणि गजाश्वयूनां
जग्मुर्महीं शोणितदिग्धवाजाः ॥ २६
सा योधसंघैश्च रथैश्च भूमिः
शरैर्विभिन्नैर्गजवाजिभिश्च ।
प्रच्छाद्यमाना पतितैर्बभूव
समन्ततो द्यौरिव कालमेघैः ॥ २७
शैनेयभीमार्जुनवाहिनीपा-
ञ्शैब्याभिमन्यू सह काशिराज्ञा ।
अन्यांश्च वीरान्समरे प्रमृद्गा-
द्द्रोणः सुतानां तव भूतिकामः ॥ २८
एतानि चान्यानि च कौरवेन्द्र
कर्माणि कृत्वा समरे महात्मा ।
प्रताप्य लोकानिव कालसूर्यो
द्रोणो गतः स्वर्गमितो हि राजन् ॥ २९
एवं रुक्मरथः शूरो हत्वा शतसहस्रशः ।
पाण्डवानां रणे योधान्पार्षतेन निपातितः ॥ ३०
अक्षौहिणीमभ्यधिकां शूराणामनिवर्तिनाम् ।
निहत्य पश्चाद्धृतिमानगच्छत्परमां गतिम् ॥ ३१
पाण्डवैः सह पाञ्चालैरशिवैः क्रूरकर्मभिः ।
हतो रुक्मरथो राजन्कृत्वा कर्म सुदुष्करम् ॥ ३२
ततो निनादो भूतानामाकाशे समजायत ।
सैन्यानां च ततो राजन्नाचार्ये निहते युधि ॥ ३३
द्यां धरां खं दिशो वारि प्रदिशश्चानुनादयन् ।
अहो धिगिति भूतानां शब्दः समभवन्महान् ॥ ३४
देवताः पितरश्चैव पूर्वे ये चास्य बान्धवाः ।
ददृशुर्निहतं तत्र भारद्वाजं महारथम् ॥ ३५
पाण्डवास्तु जयं लब्ध्वा सिंहनादान्प्रचक्रिरे ।
तेन नादेन महता समकम्पत मेदिनी ॥ ३६

इति श्रीमहाभारते द्रोणपर्वणि
सप्तमोऽध्यायः ॥ ७ ॥

८

धृतराष्ट्र उवाच ।

किं कुर्वाणं रणे द्रोणं जघ्नुः पाण्डवसृञ्जयाः ।
तथा निपुणमस्त्रेषु सर्वशस्त्रभृतामपि ॥ १
रथभङ्गो बभूवास्य धनुर्वाशीर्यतास्यतः ।
प्रमत्तो वाभवद्द्रोणस्ततो मृत्युमुपेयिवान् ॥ २
कथं नु पार्षतस्तात शत्रुभिर्दुष्प्रधर्षणम् ।
किरन्तमिषुसंघातान्रुक्मपुङ्खाननेकशः ॥ ३
क्षिप्रहस्तं द्विजश्रेष्ठं कृतिनं चित्रयोधिनम् ।
दूरेषुपातिनं दान्तमस्त्रयुद्धे च पारगम् ॥ ४
पाञ्चालपुत्रो न्यवधीद्दिष्ट्या स वरमच्युतम् ।
कुर्वाणं दारुणं कर्म रणे यत्तं महारथम् ॥ ५
व्यक्तं दिष्टं हि बलवत्पौरुषादिति मे मतिः ।
यद्द्रोणो निहतः शूरः पार्षतेन महात्मना ॥ ६
अस्त्रं चतुर्विधं वीरे यस्मिन्नासीत्प्रतिष्ठितम् ।
तमिष्वस्त्रवराचार्यं द्रोणं शंससि मे हतम् ॥ ७
श्रुत्वा हतं रुक्मरथं वैयाघ्रपरिवारणम् ।
जातरूपपरिष्कारं नाद्य शोकमपानुदे ॥ ८
न नूनं परदुःखेन कश्चिन्म्रियति संजय ।
यत्र द्रोणमहं श्रुत्वा हतं जीवामि न म्रिये ॥ ९
अश्मसारमयं नूनं हृदयं सुदृढं मम ।
यच्छ्रुत्वा निहतं द्रोणं शतधा न विदीर्यते ॥ १०

ब्राह्मे वेदे तथेष्वस्त्रे यमुपासन्गुणार्थिनः ।
ब्राह्मणा राजपुत्राश्च स कथं मृत्युना हतः ॥ ११
शोषणं सागरस्येव मेरोरिव विसर्पणम् ।
पतनं भास्करस्येव न मृष्ये द्रोणपातनम् ॥ १२
दृप्तानां प्रतिषेद्धासीद्धार्मिकानां च रक्षिता ।
योऽत्याक्षीत्कृपणस्यार्थे प्राणानपि परंतपः ॥ १३
मन्दानां मम पुत्राणां जयाशा यस्य विक्रमे ।
बृहस्पत्युशनस्तुल्यो बुद्ध्या स निहतः कथम् ॥ १४
ते च शोणा बृहन्तोऽश्वाः सैन्धवा हेममालिनः ।
रथे वातजवा युक्ताः सर्वशब्दातिगा रणे ॥ १५
बलिनो घोषिणो दान्ताः सैन्धवाः साधुवाहिनः ।
दृढाः संग्राममध्येषु कच्चिदासन्न विह्वलाः ॥ १६
करिणां बृंहतां युद्धे शङ्खदुन्दुभिनिस्वनम् ।
ज्याक्षेपशरवर्षाणां शस्त्राणां च सहिष्णवः ॥ १७
आशंसन्तः पराञ्जेतुं जितश्वासा जितव्यथाः ।
हयाः प्रजविताः शीघ्रा भारद्वाजरथोद्वहाः ॥ १८
ते स्म रुक्मरथे युक्ता नरवीरसमाहिताः ।
कथं नाभ्यतरंस्तात पाण्डवानामनीकिनीम् ॥ १९
जातरूपपरिष्कारमास्थाय रथमुत्तमम् ।
भारद्वाजः किमकरोच्छूरः संक्रन्दनो युधि ॥ २०
विद्यां यस्योपजीवन्ति सर्वलोकधनुर्भृतः ।
स सत्यसंधो बलवान्द्रोणः किमकरोद्युधि ॥ २१
दिवि शक्रमिव श्रेष्ठं महामात्रं धनुर्भृताम् ।
के नु तं रौद्रकर्माणं युद्धे प्रत्युद्ययू रथाः ॥ २२
ननु रुक्मरथं दृष्ट्वा प्रद्रवन्ति स्म पाण्डवाः ।
दिव्यमस्त्रं विकुर्वाणं सेनां क्षिण्वन्तमव्ययम् ॥ २३
उताहो सर्वसैन्येन धर्मराजः सहानुजः ।
पाञ्चाल्यप्रग्रहो द्रोणं सर्वतः समवारयत् ॥ २४
नूनमावारयत्पार्थो रथिनोऽन्यानजिह्मगैः ।
ततो द्रोणं समारोहत्पार्षतः पापकर्मकृत् ॥ २५
न ह्यन्यं परिपश्यामि वधे कंचन शुष्मिणः ।
धृष्टद्युम्नादृते रौद्रात्पाल्यमानात्किरीटिना ॥ २६
तैर्वृतः सर्वतः शूरैः पाञ्चाल्यापसदस्ततः ।
केकयैश्चेदिकारूषैर्मत्स्यैरन्यैश्च भूमिपैः ॥ २७
व्याकुलीकृतमाचार्यं पिपीलैरुरगं यथा ।
कर्मण्यसुकरे सक्तं जघानेति मतिर्मम ॥ २८
योऽधीत्य चतुरो वेदान्सर्वानाख्यानपञ्चमान् ।
ब्राह्मणानां प्रतिष्ठासीत्स्रोतसामिव सागरः ।
स कथं ब्राह्मणो वृद्धः शस्त्रेण वधमाप्तवान् ॥ २९
अमर्षणो मर्षितवान्क्लिश्यमानः सदा मया ।
अनर्हमाणः कौन्तेयः कर्मणस्तस्य तत्फलम् ॥ ३०
यस्य कर्मानुजीवन्ति लोके सर्वधनुर्भृतः ।
स सत्यसंधः सुकृती श्रीकामैर्निहतः कथम् ॥ ३१
दिवि शक्र इव श्रेष्ठो महासत्त्वो महाबलः ।
स कथं निहतः पार्थैः क्षुद्रमत्स्यैर्यथा तिमिः ॥ ३२
क्षिप्रहस्तश्च बलवान्दृढधन्वारिमर्दनः ।
न यस्य जीविताकाङ्क्षी विषयं प्राप्य जीवति ॥ ३३
यं द्वौ न जहतः शब्दौ जीवमानं कदाचन ।
ब्राह्मश्च वेदकामानां ज्याघोषश्च धनुर्भृताम् ॥ ३४
नाहं मृष्ये हतं द्रोणं सिंहद्विरदविक्रमम् ।
कथं संजय दुर्धर्षमनाधृष्ययशोबलम् ॥ ३५
केऽरक्षन्दक्षिणं चक्रं सव्यं के च महात्मनः ।
पुरस्तात्के च वीरस्य युध्यमानस्य संयुगे ॥ ३६
के च तत्र तनुं त्यक्त्वा प्रतीपं मृत्युमाव्रजन् ।
द्रोणस्य समरे वीराः केऽकुर्वन्त परां धृतिम् ॥ ३७
एतदार्येण कर्तव्यं कृच्छ्रास्वापत्सु संजय ।
पराक्रमेद्यथाशक्त्या तच्च तस्मिन्प्रतिष्ठितम् ॥ ३८
मुह्यते मे मनस्तात कथा तावन्निवर्त्यताम् ।

भूयस्तु लब्धसंज्ञस्त्वा परिप्रक्ष्यामि संजय ॥ ३९

इति श्रीमहाभारते द्रोणपर्वणि
अष्टमोऽध्यायः ॥ ८ ॥

९

वैशंपायन उवाच ।

एवं पृष्ट्वा सूतपुत्रं हृच्छोकेनार्दितो भृशम् ।
जये निराशः पुत्राणां धृतराष्ट्रोऽपतत्क्षितौ ॥ १
तं विसंज्ञं निपतितं सिषिचुः परिचारकाः ।
जलेनात्यर्थशीतेन वीजन्तः पुण्यगन्धिना ॥ २
पतितं चैनमाज्ञाय समन्ताद्भरतस्त्रियः ।
परिवव्रुर्महाराजमस्पृशंश्चैव पाणिभिः ॥ ३
उत्थाप्य चैनं शनकै राजानं पृथिवीतलात् ।
आसनं प्रापयामासुर्बाष्पकण्ठ्यो वराङ्गनाः ॥ ४
आसनं प्राप्य राजा तु मूर्छयाभिपरिप्लुतः ।
निश्चेष्टोऽतिष्ठत तदा वीज्यमानः समन्ततः ॥ ५
स लब्ध्वा शनकैः संज्ञां वेपमानो महीपतिः ।
पुनर्गावल्गणिं सूतं पर्यपृच्छद्यथातथम् ॥ ६
यत्तदुद्यन्निवादित्यो ज्योतिषा प्रणुदंस्तमः ।
आयादजातशत्रुर्वै कस्तं द्रोणादवारयत् ॥ ७
प्रभिन्नमिव मातङ्गं तथा क्रुद्धं तरस्विनम् ।
आसक्तमनसं दीप्तं प्रतिद्विरदघातिनम् ।
वाशितासंगमे यद्वदजय्यं प्रतियूथपैः ॥ ८
अति चान्यान्रणे योधान्वीरः पुरुषसत्तमः ।
यो ह्येको हि महाबाहुर्निर्दहेद्घोरचक्षुषा ।
कृत्स्नं दुर्योधनबलं धृतिमान्सत्यसंगरः ॥ ९
चक्षुर्हणं जये सक्तमिष्वासवररक्षितम् ।
दान्तं बहुमतं लोके के शूराः पर्यवारयन् ॥ १०
के दुष्प्रधर्षं राजानमिष्वासवरमच्युतम् ।
समासेदुर्नरव्याघ्रं कौन्तेयं तत्र मामकाः ॥ ११
तरसैवाभिपत्याथ यो वै द्रोणमुपाद्रवत् ।
तं भीमसेनमायान्तं के शूराः पर्यवारयन् ॥ १२
यदायाज्जलदप्रख्यो रथः परमवीर्यवान् ।
पर्जन्य इव बीभत्सुस्तुमुलामशनिं सृजन् ॥ १३
ववर्ष शरवर्षाणि वर्षाणि मघवानिव ।
इषुसंबाधमाकाशं कुर्वन्कपिवरध्वजः ।
अवस्फूर्जन्दिशः सर्वास्तलनेमिस्वनेन च ॥ १४
चापविद्युत्प्रभो घोरो रथगुल्मबलाहकः ।
रथनेमिघोषस्तनितः शरशब्दातिबन्धुरः ॥ १५
रोषनिर्जितजीमूतो मनोभिप्रायशीघ्रगः ।
मर्मातिगो बाणधारस्तुमुलः शोणितोदकः ॥ १६
संप्लावयन्महीं सर्वां मानवैरास्तरंस्तदा ।
गदानिष्टनितो रौद्रो दुर्योधनकृतोद्यमः ॥ १७
युद्धेऽभ्यषिञ्चद्विजयो गार्ध्रपत्रैः शिलाशितैः ।
गाण्डीवं धारयन्धीमान्कीदृशं वो मनस्तदा ॥ १८
कच्चिद्गाण्डीवशब्देन न प्रणश्यत वै बलम् ।
यद्वः स भैरवं कुर्वन्नर्जुनो भृशमभ्यगात् ॥ १९
कच्चिन्नापानुदद्द्रोणादिषुभिर्वो धनंजयः ।
वातो मेघानिवाविध्यन्प्रवाञ्शरवनानिलः ।
को हि गाण्डीवधन्वानं नरः सोढुं रणेऽर्हति ॥ २०
यत्सेनाः समकम्पन्त यद्वीरानस्पृशद्भयम् ।
के तत्र नाजहुर्द्रोणं के क्षुद्राः प्राद्रवन्भयात् ॥ २१
के वा तत्र तनूस्त्यक्त्वा प्रतीपं मृत्युमाव्रजन् ।
अमानुषाणां जेतारं युद्धेष्वपि धनंजयम् ॥ २२
न च वेगं सिताश्वस्य विशक्ष्यन्तीह मामकाः ।
गाण्डीवस्य च निर्घोषं प्रावृड्जलदनिस्वनम् ॥ २३
विष्वक्सेनो यस्य यन्ता योद्धा चैव धनंजयः ।
अशक्यः स रथो जेतुं मन्ये देवासुरैरपि ॥ २४
सुकुमारो युवा शूरो दर्शनीयश्च पाण्डवः ।
मेधावी निपुणो धीमान्युधि सत्यपराक्रमः ॥ २५
आरावं विपुलं कुर्वन्व्यथयन्सर्वकौरवान् ।

यदायान्नकुलो धीमान्के शूराः पर्यवारयन् ॥ २६
आशीविष इव क्रुद्धः सहदेवो यदाभ्ययात् ।
शत्रूणां कदनं कुर्वञ्जेतासौ दुर्जयो युधि ॥ २७
आर्यव्रतममोघेषुं ह्रीमन्तमपराजितम् ।
द्रोणायाभिमुखं यान्तं के शूराः पर्यवारयन् ॥ २८
यः स सौवीरराजस्य प्रमथ्य महतीं चमूम् ।
आदत्त महिषीं भोज्यां काम्यां सर्वाङ्गशोभनाम् ॥
सत्यं धृतिश्च शौर्यं च ब्रह्मचर्यं च केवलम् ।
सर्वाणि युयुधानेऽस्मिन्नित्यानि पुरुषर्षभे ॥ ३०
बलिनं सत्यकर्माणमदीनमपराजितम् ।
वासुदेवसमं युद्धे वासुदेवादनन्तरम् ॥ ३१
युक्तं धनंजयप्रेष्ये शूरमाचार्यकर्मणि ।
पार्थेन सममस्त्रेषु कस्तं द्रोणादवारयत् ॥ ३२
वृष्णीनां प्रवरं वीरं शूरं सर्वधनुष्मताम् ।
रामेण सममस्त्रेषु यशसा विक्रमेण च ॥ ३३
सत्यं धृतिर्दमः शौर्यं ब्रह्मचर्यमनुत्तमम् ।
सात्वते तानि सर्वाणि त्रैलोक्यमिव केशवे ॥ ३४
तमेवंगुणसंपन्नं दुर्वारमपि दैवतैः ।
समासाद्य महेष्वासं के वीराः पर्यवारयन् ॥ ३५
पाञ्चालेषूत्तमं शूरमुत्तमाभिजनप्रियम् ।
नित्यमुत्तमकर्माणमुत्तमौजसमाहवे ॥ ३६
युक्तं धनंजयहिते ममानर्थाय चोत्तमम् ।
यमवैश्रवणादित्यमहेन्द्रवरुणोपमम् ॥ ३७
महारथसमाख्यातं द्रोणायोद्यन्तमाहवे ।
त्यजन्तं तुमुले प्राणान्के शूराः पर्यवारयन् ॥ ३८
एकोऽपसृत्य चेदिभ्यः पाण्डवान्यः समाश्रितः ।
धृष्टकेतुं तमायान्तं द्रोणात्कः समवारयत् ॥ ३९
योऽवधीत्केतुमाञ्शूरो राजपुत्रं सुदर्शनम् ।
अपरान्तगिरिद्वारे कस्तं द्रोणादवारयत् ॥ ४०
स्त्रीपूर्वो यो नरव्याघ्रो यः स वेद गुणागुणान् ।
शिखण्डिनं याज्ञसेनिमम्लानमनसं युधि ॥ ४१
देवव्रतस्य समरे हेतुं मृत्योर्महात्मनः ।
द्रोणायाभिमुखं यान्तं के वीराः पर्यवारयन् ॥ ४२
यस्मिन्नभ्यधिका वीरे गुणाः सर्वे धनंजयात् ।
यस्मिन्नस्त्राणि सत्यं च ब्रह्मचर्यं च नित्यदा ॥ ४३
वासुदेवसमं वीर्ये धनंजयसमं बले ।
तेजसादित्यसदृशं बृहस्पतिसमं मतौ ॥ ४४
अभिमन्युं महात्मानं व्यात्ताननमिवान्तकम् ।
द्रोणायाभिमुखं यान्तं के वीराः पर्यवारयन् ॥ ४५
तरुणस्त्वरुणप्रख्यः सौभद्रः परवीरहा ।
यदाभ्याद्रवत द्रोणं तदासीद्वो मनः कथम् ॥ ४६
द्रौपदेया नरव्याघ्राः समुद्रमिव सिन्धवः ।
यद्द्रोणमाद्रवन्संख्ये के वीरास्तानवारयन् ॥ ४७
ये ते द्वादशवर्षाणि क्रीडामुत्सृज्य बालकाः ।
अस्त्रार्थमवसन्भीष्मे बिभ्रतो व्रतमुत्तमम् ॥ ४८
क्षत्रंजयः क्षत्रदेवः क्षत्रधर्मा च मानिनः ।
धृष्टद्युम्नात्मजा वीराः के तान्द्रोणादवारयन् ॥ ४९
शताद्विशिष्टं यं युद्धे समपश्यन्त वृष्णयः ।
चेकितानं महेष्वासं कस्तं द्रोणादवारयत् ॥ ५०
वार्धक्षेमिः कलिङ्गानां यः कन्यामाहरद्युधि ।
अनाधृष्टिरदीनात्मा कस्तं द्रोणादवारयत् ॥ ५१
भ्रातरः पञ्च कैकेया धार्मिकाः सत्यविक्रमाः ।
इन्द्रगोपकवर्णाश्च रक्तवर्मायुधध्वजाः ॥ ५२
मातृष्वसुः सुता वीराः पाण्डवानां जयार्थिनः ।
तान्द्रोणं हन्तुमायातान्के वीराः पर्यवारयन् ॥ ५३
यं योधयन्तो राजानो नाजयन्वारणावते ।
षण्मासानभिसंरब्धा जिघांसन्तो युधां पतिम् ॥
धनुष्मतां वरं शूरं सत्यसंधं महाबलम् ।
द्रोणात्कस्तं नरव्याघ्रं युयुत्सुं प्रत्यवारयत् ॥ ५५
यः पुत्रं काशिराजस्य वाराणस्यां महारथम् ।

समरे स्त्रीषु गृध्यन्तं भल्लेनापहरद्रथात् ॥ ५६
धृष्टद्युम्नं महेष्वासं पार्थानां मन्त्रधारिणम् ।
युक्तं दुर्योधनानर्थे सृष्टं द्रोणवधाय च ॥ ५७
निर्दहन्तं रणे योधान्दारयन्तं च सर्वशः ।
द्रोणायाभिमुखं यान्तं के वीराः पर्यवारयन् ॥ ५८
उत्सङ्ग इव संवृद्धं द्रुपदस्यास्त्रवित्तमम् ।
शैखण्डिनं क्षत्रदेवं के तं द्रोणादवारयन् ॥ ५९
य इमां पृथिवीं कृत्स्नां चर्मवत्समवेष्टयत् ।
महता रथवंशेन मुख्यारिघ्नो महारथः ॥ ६०
दशाश्वमेधानाजह्रे स्वन्नपानान्नदक्षिणान् ।
निरर्गलान्सर्वमेधान्पुत्रवत्पालयन्प्रजाः ॥ ६१
पिबन्त्यो दक्षिणां यस्य गङ्गास्रोतः समापिबन् ।
तावतीर्गा ददौ वीर उशीनरसुतोऽध्वरे ॥ ६२
न पूर्वे नापरे चक्रुरिदं केचन मानवाः ।
इति संचुक्रुशुर्देवाः कृते कर्मणि दुष्करे ॥ ६३
पश्यामस्त्रिषु लोकेषु न तं संस्थास्नुचारिषु ।
जातं वापि जनिष्यं वा द्वितीयं वापि संप्रति ॥ ६४
अन्यमौशीनराच्छैब्याद्धुरो वोढारमित्युत ।
गतिं यस्य न यास्यन्ति मानुषा लोकवासिनः ॥ ६५
तस्य नप्तारमायान्तं शैब्यं कः समवारयत् ।
द्रोणायाभिमुखं यान्तं व्यात्ताननमिवान्तकम् ॥ ६६
विराटस्य रथानीकं मत्स्यस्यामित्रघातिनः ।
प्रेप्सन्तं समरे द्रोणं के वीराः पर्यवारयन् ॥ ६७
सद्यो वृकोदराज्जातो महाबलपराक्रमः ।
मायावी राक्षसो घोरो यस्मान्मम महद्भयम् ॥ ६८
पार्थानां जयकामं तं पुत्राणां मम कण्टकम् ।
घटोत्कचं महाबाहुं कस्तं द्रोणादवारयत् ॥ ६९
एते चान्ये च बहवो येषामर्थाय संजय ।
त्यक्तारः संयुगे प्राणान्किं तेषामजितं युधि ॥ ७०
येषां च पुरुषव्याघ्रः शार्ङ्गधन्वा व्यपाश्रयः ।
हितार्थी चापि पार्थानां कथं तेषां पराजयः ॥ ७१
लोकानां गुरुरत्यन्तं लोकनाथः सनातनः ।
नारायणो रणे नाथो दिव्यो दिव्यात्मवान्प्रभुः ॥ ७२
यस्य दिव्यानि कर्माणि प्रवदन्ति मनीषिणः ।
तान्यहं कीर्तयिष्यामि भक्त्या स्थैर्यार्थमात्मनः ॥ ७३

इति श्रीमहाभारते द्रोणपर्वणि
नवमोऽध्यायः ॥ ९ ॥

१०

धृतराष्ट्र उवाच ।

शृणु दिव्यानि कर्माणि वासुदेवस्य संजय ।
कृतवान्यानि गोविन्दो यथा नान्यः पुमान्क्वचित् ॥ १
संवर्धता गोपकुले बालेनैव महात्मना ।
विख्यापितं बलं बाह्वोस्त्रिषु लोकेषु संजय ॥ २
उच्चैःश्रवस्तुल्यबलं वायुवेगसमं जवे ।
जघान हयराजं यो यमुनावनवासिनम् ॥ ३
दानवं घोरकर्माणं गवां मृत्युमिवोत्थितम् ।
वृषरूपधरं बाल्ये भुजाभ्यां निजघान ह ॥ ४
प्रलम्बं नरकं जम्भं पीठं चापि महासुरम् ।
मुरुं चाचलसंकाशमवधीत्पुष्करेक्षणः ॥ ५
तथा कंसो महातेजा जरासंधेन पालितः ।
विक्रमेणैव कृष्णेन सगणः शातितो रणे ॥ ६
सुनामा नाम विक्रान्तः समग्राक्षौहिणीपतिः ।
भोजराजस्य मध्यस्थो भ्राता कंसस्य वीर्यवान् ॥ ७
बलदेवद्वितीयेन कृष्णेनामित्रघातिना ।
तरस्वी समरे दग्धः ससैन्यः शूरसेनराट् ॥ ८
दुर्वासा नाम विप्रर्षिस्तथा परमकोपनः ।
आराधितः सदारेण स चास्मै प्रददौ वरान् ॥ ९
तथा गान्धारराजस्य सुतां वीरः स्वयंवरे ।
निर्जित्य पृथिवीपालानवहत्पुष्करेक्षणः ॥ १०
अमृष्यमाणा राजानो यस्य जात्या हया इव ।

रथे वैवाहिके युक्ताः प्रतोदेन कृतव्रणाः ॥ ११
जरासंधं महाबाहुमुपायेन जनार्दनः ।
परेण घातयामास पृथगक्षौहिणीपतिम् ॥ १२
चेदिराजं च विक्रान्तं राजसेनापतिं बली ।
अर्घे विवदमानं च जघान पशुवत्तदा ॥ १३
सौभं दैत्यपुरं स्वस्थं शाल्वगुप्तं दुरासदम् ।
समुद्रकुक्षौ विक्रम्य पातयामास माधवः ॥ १४
अङ्गान्वङ्गान्कलिङ्गांश्च मागधान्काशिकोसलान् ।
वत्सगर्गकरूषांश्च पुण्ड्रांश्चाप्यजयद्रणे ॥ १५
आवन्त्यान्दाक्षिणात्यांश्च पार्वतीयान्दशेरकान् ।
काश्मीरकानौरसकान्पिशाचांश्च समन्दरान् ॥ १६
काम्बोजान्वाटधानांश्च चोलान्पाण्ड्यांश्च संजय ।
त्रिगर्तान्मालवांश्चैव दरदांश्च सुदुर्जयान् ॥ १७
नानादिग्भ्यश्च संप्राप्तान्व्रातानश्वशकान्प्रति ।
जितवान्पुण्डरीकाक्षो यवनांश्च सहानुगान् ॥ १८
प्रविश्य मकरावासं यादोभिरभिसंवृतम् ।
जिगाय वरुणं युद्धे सलिलान्तर्गतं पुरा ॥ १९
युधि पञ्चजनं हत्वा पातालतलवासिनम् ।
पाञ्चजन्यं हृषीकेशो दिव्यं शङ्खमवाप्तवान् ॥ २०
खाण्डवे पार्थसहितस्तोषयित्वा हुताशनम् ।
आग्नेयमस्त्रं दुर्धर्षं चक्रं लेभे महाबलः ॥ २१
वैनतेयं समारुह्य त्रासयित्वामरावतीम् ।
महेन्द्रभवनाद्वीरः पारिजातमुपानयत् ॥ २२
तच्च मर्षितवाञ्शक्रो जानंस्तस्य पराक्रमम् ।
राज्ञां चाप्यजितं कंचित्कृष्णेनेह न शुश्रुम ॥ २३
यच्च तन्महदाश्चर्यं सभायां मम संजय ।
कृतवान्पुण्डरीकाक्षः कस्तदन्य इहार्हति ॥ २४
यच्च भक्त्या प्रपन्नोऽहमद्राक्षं कृष्णमीश्वरम् ।
तन्मे सुविदितं सर्वं प्रत्यक्षमिव चागमत् ॥ २५
नान्तो विक्रमयुक्तस्य बुद्ध्या युक्तस्य वा पुनः ।
कर्मणः शक्यते गन्तुं हृषीकेशस्य संजय ॥ २६
तथा गदश्च साम्बश्च प्रद्युम्नोऽथ विदूरथः ।
आगावहोऽनिरुद्धश्च चारुदेष्णश्च सारणः ॥ २७
उल्मुको निशठश्चैव झल्ली बभ्रुश्च वीर्यवान् ।
पृथुश्च विपृथुश्चैव समीकोऽथारिमेजयः ॥ २८
एते वै बलवन्तश्च वृष्णिवीराः प्रहारिणः ।
कथंचित्पाण्डवानीकं श्रयेयुः समरे स्थिताः ॥ २९
आहूता वृष्णिवीरेण केशवेन महात्मना ।
ततः संशयितं सर्वं भवेदिति मतिर्मम ॥ ३०
नागायुतबलो वीरः कैलासशिखरोपमः ।
वनमाली हली रामस्तत्र यत्र जनार्दनः ॥ ३१
यमाहुः सर्वपितरं वासुदेवं द्विजातयः ।
अपि वा ह्येष पाण्डूनां योत्स्यतेऽर्थाय संजय ॥ ३२
स यदा तात संनह्येत्पाण्डवार्थाय केशवः ।
न तदा प्रत्यनीकेषु भविता तस्य कश्चन ॥ ३३
यदि स्म कुरवः सर्वे जयेयुः सर्वपाण्डवान् ।
वार्ष्णेयोऽर्थाय तेषां वै गृह्णीयाच्छस्त्रमुत्तमम् ॥ ३४
ततः सर्वान्नरव्याघ्रो हत्वा नरपतीन्रणे ।
कौरवांश्च महाबाहुः कुन्त्यै दद्यात्स मेदिनीम् ॥ ३५
यस्य यन्ता हृषीकेशो योद्धा यस्य धनंजयः ।
रथस्य तस्य कः संख्ये प्रत्यनीको भवेद्रथः ॥ ३६
न केनचिदुपायेन कुरूणां दृश्यते जयः ।
तस्मान्मे सर्वमाचक्ष्व यथा युद्धमवर्तत ॥ ३७
अर्जुनः केशवस्यात्मा कृष्णोऽप्यात्मा किरीटिनः ।
अर्जुने विजयो नित्यं कृष्णे कीर्तिश्च शाश्वती ॥ ३८
प्राधान्येन हि भूयिष्ठममेयाः केशवे गुणाः ।
मोहाद्दुर्योधनः कृष्णं यन्न वेत्तीह माधवम् ॥ ३९
मोहितो दैवयोगेन मृत्युपाशपुरस्कृतः ।
न वेद कृष्णं दाशार्हमर्जुनं चैव पाण्डवम् ॥ ४०
पूर्वदेवौ महात्मानौ नरनारायणावुभौ ।

एकात्मानौ द्विधाभूतौ दृश्येते मानवैर्भुवि ॥ ४१
मनसापि हि दुर्धर्षौ सेनामेतां यशस्विनौ ।
नाशयेतामिहेच्छन्तौ मानुषत्वात्तु नेच्छतः ॥ ४२
युगस्येव विपर्यासो लोकानामिव मोहनम् ।
भीष्मस्य च वधस्तात द्रोणस्य च महात्मनः ॥ ४३
न ह्येव ब्रह्मचर्येण न वेदाध्ययनेन च ।
न क्रियाभिर्न शस्त्रेण मृत्योः कश्चिद्विमुच्यते ॥४४
लोकसंभावितौ वीरौ कृतास्त्रौ युद्धदुर्मदौ ।
भीष्मद्रोणौ हतौ श्रुत्वा किं नु जीवामि संजय ॥
यां तां श्रियमसूयामः पुरा यातां युधिष्ठिरे ।
अद्य तामनुजानीमो भीष्मद्रोणवधेन च ॥ ४६
तथा च मत्कृते प्राप्तः कुरूणामेष संक्षयः ।
पक्वानां हि वधे सूत वज्रायन्ते तृणान्यपि ॥ ४७
अनन्यमिदमैश्वर्यं लोके प्राप्तो युधिष्ठिरः ।
यस्य कोपान्महेष्वासौ भीष्मद्रोणौ निपातितौ ॥४८
प्राप्तः प्रकृतितो धर्मो नाधर्मो मानवान्प्रति ।
क्रूरः सर्वविनाशाय कालः समतिवर्तते ॥ ४९
अन्यथा चिन्तिता ह्यर्था नरैस्तात मनस्विभिः ।
अन्यथैव हि गच्छन्ति दैवादिति मतिर्मम ॥ ५०
तस्मादपरिहार्येऽर्थे संप्राप्ते कृच्छ्र उत्तमे ।
अपारणीये दुश्चिन्त्ये यथाभूतं प्रचक्ष्व मे ॥ ५१

इति श्रीमहाभारते द्रोणपर्वणि
दशमोऽध्यायः ॥ १० ॥

११

संजय उवाच ।

हन्त ते वर्णयिष्यामि सर्वं प्रत्यक्षदर्शिवान् ।
यथा स न्यपतद्द्रोणः सादितः पाण्डुसृञ्जयैः ॥ १
सेनापतित्वं संप्राप्य भारद्वाजो महारथः ।
मध्ये सर्वस्य सैन्यस्य पुत्रं ते वाक्यमब्रवीत् ॥ २
यत्कौरवाणामृषभादापगेयादनन्तरम् ।
सेनापत्येन मां राजन्नद्य सत्कृतवानसि ॥ ३
सदृशं कर्मणस्तस्य फलं प्राप्नुहि पार्थिव ।
करोमि कामं कं तेऽद्य प्रवृणीष्व यमिच्छसि ॥ ४
ततो दुर्योधनश्चिन्त्य कर्णदुःशासनादिभिः ।
तमथोवाच दुर्धर्षमाचार्यं जयतां वरम् ॥ ५
ददासि चेद्वरं मह्यं जीवग्राहं युधिष्ठिरम् ।
गृहीत्वा रथिनां श्रेष्ठं मत्समीपमिहानय ॥ ६
ततः कुरूणामाचार्यः श्रुत्वा पुत्रस्य ते वचः ।
सेनां प्रहर्षयन्सर्वामिदं वचनमब्रवीत् ॥ ७
धन्यः कुन्तीसुतो राजा यस्य ग्रहणमिच्छसि ।
न वधार्थं सुदुर्धर्ष वरमद्य प्रयाचसि ॥ ८
किमर्थं च नरव्याघ्र न वधं तस्य काङ्क्षसि ।
नाशंससि क्रियामेतां मत्तो दुर्योधन ध्रुवम् ॥ ९
आहोस्विद्धर्मपुत्रस्य द्वेष्टा तस्य न विद्यते ।
यदिच्छसि त्वं जीवन्तं कुलं रक्षसि चात्मनि ॥१०
अथ वा भरतश्रेष्ठ निर्जित्य युधि पाण्डवान् ।
राज्यांशं प्रतिदत्त्वा च सौभ्रात्रं कर्तुमिच्छसि ॥ ११
धन्यः कुन्तीसुतो राजा सुजाता चास्य धीमतः ।
अजातशत्रुता सत्या तस्य यत्स्निह्यते भवान् ॥१२
द्रोणेन त्वेवमुक्तस्य तव पुत्रस्य भारत ।
सहसा निःसृतो भावो योऽस्य नित्यं प्रवर्तते ॥ १३
नाकारो गूहितुं शक्यो बृहस्पतिसमैरपि ।
तस्मात्तव सुतो राजन्प्रहृष्टो वाक्यमब्रवीत् ॥ १४
वधे कुन्तीसुतस्याजौ नाचार्य विजयो मम ।
हते युधिष्ठिरे पार्थो हन्यात्सर्वान्हि नो ध्रुवम् ॥१५
न च शक्यो रणे सर्वैर्निहन्तुममरैरपि ।
य एव चैषां शेषः स्यात्स एवास्मान्न शेषयेत् ॥
सत्यप्रतिज्ञे त्वानीते पुनर्द्यूतेन निर्जिते ।
पुनर्यास्यन्त्यरण्याय कौन्तेयास्तमनुव्रताः ॥ १७

सोऽयं मम जयो व्यक्तं दीर्घकालं भविष्यति ।
अतो न वधमिच्छामि धर्मराजस्य कर्हिचित् ॥१८
तस्य जिह्ममभिप्रायं ज्ञात्वा द्रोणोऽर्थतत्त्ववित् ।
तं वरं सान्तरं तस्मै ददौ संचिन्त्य बुद्धिमान् ॥

द्रोण उवाच ।

न चेद्युधिष्ठिरं वीर पालयेदर्जुनो युधि ।
मन्यस्व पाण्डवं ज्येष्ठमानीतं वशमात्मनः ॥ २०
न हि पार्थो रणे शक्यः सेन्द्रैर्देवासुरैरपि ।
प्रत्युद्यातुमतस्तात नैतदामर्षयाम्यहम् ॥ २१
असंशयं स शिष्यो मे मत्पूर्वश्चास्त्रकर्मणि ।
तरुणः कीर्तियुक्तश्च एकायनगतश्च सः ॥ २२
अस्त्राणीन्द्राच्च रुद्राच्च भूयांसि समवाप्तवान् ।
अमर्षितश्च ते राजंस्तेन नामर्षयाम्यहम् ॥ २३
स चापक्रम्यतां युद्धाद्येनोपायेन शक्यते ।
अपनीते ततः पार्थे धर्मराजो जितस्त्वया ॥ २४
ग्रहणं चेज्जयं तस्य मन्यसे पुरुषर्षभ ।
एतेन चाभ्युपायेन ध्रुवं ग्रहणमेष्यति ॥ २५
अहं गृहीत्वा राजानं सत्यधर्मपरायणम् ।
आनयिष्यामि ते राजन्वशमद्य न संशयः ॥ २६
यदि स्थास्यति संग्रामे मुहूर्तमपि मेऽग्रतः ।
अपनीते नरव्याघ्रे कुन्तीपुत्रे धनंजये ॥ २७
फल्गुनस्य समक्षं तु न हि पार्थो युधिष्ठिरः ।
ग्रहीतुं समरे शक्यः सेन्द्रैरपि सुरासुरैः ॥ २८

संजय उवाच ।

सान्तरं तु प्रतिज्ञाते राज्ञो द्रोणेन निग्रहे ।
गृहीतं तममन्यन्त तव पुत्राः सुबालिशाः ॥ २९
पाण्डवेषु हि सापेक्षं द्रोणं जानाति ते सुतः ।
ततः प्रतिज्ञास्थैर्यार्थं स मन्त्रो बहुलीकृतः ॥ ३०
ततो दुर्योधनेनापि ग्रहणं पाण्डवस्य तत् ।
सैन्यस्थानेषु सर्वेषु व्याघोषितमरिंदम ॥ ३१

इति श्रीमहाभारते द्रोणपर्वणि
एकादशोऽध्यायः ॥ ११ ॥

१२

संजय उवाच ।

ततस्ते सैनिकाः श्रुत्वा तं युधिष्ठिरनिग्रहम् ।
सिंहनादरवांश्चक्रुर्बाणशङ्खरवैः सह ॥ १
तत्तु सर्वं यथा वृत्तं धर्मराजेन भारत ।
आप्तैराशु परिज्ञातं भारद्वाजचिकीर्षितम् ॥ २
ततः सर्वान्समानाय्य भ्रातॄन्सैन्यांश्च सर्वशः ।
अब्रवीद्धर्मराजस्तु धनंजयमिदं वचः ॥ ३
श्रुतं ते पुरुषव्याघ्र द्रोणस्याद्य चिकीर्षितम् ।
यथा तन्न भवेत्सत्यं तथा नीतिर्विधीयताम् ॥ ४
सान्तरं हि प्रतिज्ञातं द्रोणेनामित्रकर्शन ।
तच्चान्तरममोघेषौ त्वयि तेन समाहितम् ॥ ५
स त्वमद्य महाबाहो युध्यस्व मदनन्तरम् ।
यथा दुर्योधनः कामं नेमं द्रोणादवाप्नुयात् ॥ ६

अर्जुन उवाच ।

यथा मे न वधः कार्य आचार्यस्य कथंचन ।
तथा तव परित्यागो न मे राजंश्चिकीर्षितः ॥ ७
अप्येवं पाण्डव प्राणानुत्सृजेयमहं युधि ।
प्रतीयां नाहमाचार्यं त्वां न जह्यां कथंचन ॥ ८
त्वां निगृह्याहवे राजन्धार्तराष्ट्रो यमिच्छति ।
न स तं जीवलोकेऽस्मिन्कामं प्राप्तः कथंचन ॥ ९
प्रपतेद्द्यौः सनक्षत्रा पृथिवी शकलीभवेत् ।
न त्वां द्रोणो निगृह्णीयाज्जीवमाने मयि ध्रुवम् ॥१०
यदि तस्य रणे साह्यं कुरुते वज्रभृत्स्वयम् ।
देवैर्वा सहितो दैत्यैर्न त्वां प्राप्स्यत्यसौ मृधे ॥११
मयि जीवति राजेन्द्र न भयं कर्तुमर्हसि ।
द्रोणादस्त्रभृतां श्रेष्ठात्सर्वशस्त्रभृतामपि ॥ १२

न स्मराम्यनृतां वाचं न स्मरामि पराजयम् ।
न स्मरामि प्रतिश्रुत्य किंचिदप्यनपाकृतम् ॥ १३

संजय उवाच ।

ततः शङ्खाश्च भेर्यश्च मृदङ्गाश्चानकैः सह ।
प्रावाद्यन्त महाराज पाण्डवानां निवेशने ॥ १४
सिंहनादश्च संजज्ञे पाण्डवानां महात्मनाम् ।
धनुर्ज्यातलशब्दश्च गगनस्पृक्सुभैरवः ॥ १५
तं श्रुत्वा शङ्खनिर्घोषं पाण्डवस्य महात्मनः ।
त्वदीयेष्वप्यनीकेषु वादित्राण्यभिजघ्निरे ॥ १६
ततो व्यूढान्यनीकानि तव तेषां च भारत ।
शनैरुपेयुरन्योन्यं योत्स्यमानानि संयुगे ॥ १७
ततः प्रववृते युद्धं तुमुलं लोमहर्षणम् ।
पाण्डवानां कुरूणां च द्रोणपाञ्चाल्ययोरपि ॥ १८
यतमानाः प्रयत्नेन द्रोणानीकविशातने ।
न शेकुः सृञ्जया राजंस्तद्धि द्रोणेन पालितम् ॥१९
तथैव तव पुत्रस्य रथोदाराः प्रहारिणः ।
न शेकुः पाण्डवीं सेनां पाल्यमानां किरीटिना ॥२०
आस्तां ते स्तिमिते सेने रक्ष्यमाणे परस्परम् ।
संप्रसुप्ते यथा नक्तं वनराज्यौ सुपुष्पिते ॥ २१
ततो रुक्मरथो राजन्नर्केणेव विराजता ।
वरूथिना विनिष्पत्य व्यचरत्पृतनान्तरे ॥ २२
तमुद्यतं रथेनैकमाशुकारिणमाहवे ।
अनेकमिव संत्रासान्मेनिरे पाण्डुसृञ्जयाः ॥ २३
तेन मुक्ताः शरा घोरा विचेरुः सर्वतोदिशम् ।
त्रासयन्तो महाराज पाण्डवेयस्य वाहिनीम् ॥ २४
मध्यंदिनमनुप्राप्तो गभस्तिशतसंवृतः ।
यथादृश्यत घर्मांशुस्तथा द्रोणोऽप्यदृश्यत ॥ २५
न चैनं पाण्डवेयानां कश्चिच्छक्नोति मारिष ।
वीक्षितुं समरे क्रुद्धं महेन्द्रमिव दानवाः ॥ २६
मोहयित्वा ततः सैन्यं भारद्वाजः प्रतापवान् ।
धृष्टद्युम्नबलं तूर्णं व्यधमन्निशितैः शरैः ॥ २७
स दिशः सर्वतो रुद्ध्वा संवृत्य खमजिह्मगैः ।
पार्षतो यत्र तत्रैव ममृदे पाण्डुवाहिनीम् ॥ २८

इति श्रीमहाभारते द्रोणपर्वणि
द्वादशोऽध्यायः ॥ १२ ॥

१३

संजय उवाच ।

ततः स पाण्डवानीके जनयंस्तुमुलं महत् ।
व्यचरत्पाण्डवान्द्रोणो दहन्कक्षमिवानलः ॥ १
निर्दहन्तमनीकानि साक्षादग्निमिवोत्थितम् ।
दृष्ट्वा रुक्मरथं युद्धे समकम्पन्त सृञ्जयाः ॥ २
प्रततं चास्यमानस्य धनुषोऽस्याशुकारिणः ।
ज्याघोषः श्रूयतेऽत्यर्थं विस्फूर्जितमिवाशनेः ॥ ३
रथिनः सादिनश्चैव नागानश्वान्पदातिनः ।
रौद्रा हस्तवता मुक्ताः प्रमथ्नन्ति स्म सायकाः ॥४
नानद्यमानः पर्जन्यः सानिलः शुचिसंक्षये ।
अश्मवर्षमिवावर्षत्परेषामावहद्भयम् ॥ ५
व्यचरत्स तदा राजन्सेनां विक्षोभयन्प्रभुः ।
वर्धयामास संत्रासं शात्रवाणाममानुषम् ॥ ६
तस्य विद्युदिवाभ्रेषु चापं हेमपरिष्कृतम् ।
भ्रमद्रथाम्बुदे तस्मिन्दृश्यते स्म पुनः पुनः ॥ ७
स वीरः सत्यवान्प्राज्ञो धर्मनित्यः सुदारुणः ।
युगान्तकाले यन्तेव रौद्रां प्रास्कन्दयन्नदीम् ॥ ८
अमर्षवेगप्रभवां क्रव्यादगणसंकुलाम् ।
बलौघैः सर्वतः पूर्णां वीरवृक्षापहारिणीम् ॥ ९
शोणितोदां रथावर्तां हस्त्यश्वकृतरोधसम् ।
कवचोडुपसंयुक्तां मांसपङ्कसमाकुलाम् ॥ १०
मेदोमज्जास्थिसिकतामुष्णीषवरफेनिलाम् ।
संग्रामजलदापूर्णां प्रासमत्स्यसमाकुलाम् ॥ ११
नरनागाश्वसंभूतां शरवेगौघवाहिनीम् ।

शरीरदारुसंघाटां भुजनागसमाकुलाम् ॥ १२
उत्तमाङ्गोपलतलां निस्त्रिंशझषसेविताम् ।
रथनागह्रदोपेतां नानाभरणनीरजाम् ॥ १३
महारथशतावर्तां भूमिरेणूर्मिमालिनीम् ।
महावीर्यवतां संख्ये सुतरां भीरुदुस्तराम् ॥ १४
शूरव्यालसमाकीर्णां प्राणिवाणिजसेविताम् ।
छिन्नच्छत्रमहाहंसां मुकुटाण्डजसंकुलाम् ॥ १५
चक्रकूर्मां गदानक्रां शरक्षुद्रझषाकुलाम् ।
बडगृध्रसृगालानां घोरसंघैर्निषेविताम् ॥ १६
निहतान्प्राणिनः संख्ये द्रोणेन बलिना शरैः ।
वहन्तीं पितृलोकाय शतशो राजसत्तम ॥ १७
शरीरशतसंबाधां केशशैवलशाद्वलाम् ।
नदीं प्रावर्तयद्राजन्भीरूणां भयवर्धिनीम् ॥ १८
तं जयन्तमनीकानि तानि तान्येव भारत ।
सर्वतोऽभ्यद्रवन्द्रोणं युधिष्ठिरपुरोगमाः ॥ १९
तानभिद्रवतः शूरांस्तावका दृढकार्मुकाः ।
सर्वतः प्रत्यगृह्णन्त तदभूल्लोमहर्षणम् ॥ २०
शतमायस्तु शकुनिः सहदेवं समाद्रवत् ।
सनियन्तृध्वजरथं विव्याध निशितैः शरैः ॥ २१
तस्य माद्रीसुतः केतुं धनुः सूतं हयानपि ।
नातिक्रुद्धः शरैश्छित्त्वा षष्ट्या विव्याध मातुलम् ॥
सौबलस्तु गदां गृह्य प्रचस्कन्द रथोत्तमात् ।
स तस्य गदया राजन्रथात्सूतमपातयत् ॥ २३
ततस्तौ विरथौ राजन्गदाहस्तौ महाबलौ ।
चिक्रीडतू रणे शूरौ सशृङ्गाविव पर्वतौ ॥ २४
द्रोणः पाञ्चालराजानं विद्ध्वा दशभिराशुगैः ।
बहुभिस्तेन चाभ्यस्तस्तं विव्याध शताधिकैः ॥ २५
विविंशतिं भीमसेनो विंशत्या निशितैः शरैः ।
विद्ध्वा नाकम्पयद्वीरस्तदद्भुतमिवाभवत् ॥ २६
विविंशतिस्तु सहसा व्यश्वकेतुशरासनम् ।
भीमं चक्रे महाराज ततः सैन्यान्यपूजयन् ॥ २७
स तन्न ममृषे वीरः शत्रोर्विजयमाहवे ।
ततोऽस्य गदया दान्तान्हयान्सर्वानपातयत् ॥ २८
शल्यस्तु नकुलं वीरः स्वस्रीयं प्रियमात्मनः ।
विव्याध प्रहसन्बाणैर्लाडयन्कोपयन्निव ॥ २९
तस्याश्वानातपत्रं च ध्वजं सूतमथो धनुः ।
निपात्य नकुलः संख्ये शङ्खं दध्मौ प्रतापवान् ॥३०
धृष्टकेतुः कृपेनास्ताञ्छित्त्वा बहुविधाञ्शरान् ।
कृपं विव्याध सप्तत्या लक्ष्म चास्याहरत्त्रिभिः ॥ ३१
तं कृपः शरवर्षेण महता समवाकिरत् ।
निवार्य च रणे विप्रो धृष्टकेतुमयोधयत् ॥ ३२
सात्यकिः कृतवर्माणं नाराचेन स्तनान्तरे ।
विद्ध्वा विव्याध सप्तत्या पुनरन्यैः स्मयन्निव ॥ ३३
सप्तसप्ततिभिर्भोजस्तं विद्ध्वा निशितैः शरैः ।
नाकम्पयत शैनेयं शीघ्रो वायुरिवाचलम् ॥ ३४
सेनापतिः सुशर्माणं शीघ्रं मर्मस्वताडयत् ।
स चापि तं तोमरेण जत्रुदेशे अताडयत् ॥ ३५
वैकर्तनं तु समरे विराटः प्रत्यवारयत् ।
सह मत्स्यैर्महावीर्यैस्तदद्भुतमिवाभवत् ॥ ३६
तत्पौरुषमभूत्तत्र सूतपुत्रस्य दारुणम् ।
यत्सैन्यं वारयामास शरैः संनतपर्वभिः ॥ ३७
द्रुपदस्तु स्वयं राजा भगदत्तेन संगतः ।
तयोर्युद्धं महाराज चित्ररूपमिवाभवत् ।
भूतानां त्रासजननं चक्रातेऽस्त्रविशारदौ ॥ ३८
भूरिश्रवा रणे राजन्याज्ञसेनिं महारथम् ।
महता सायकौघेन छादयामास वीर्यवान् ॥ ३९
शिखण्डी तु ततः क्रुद्धः सौमदत्तिं विशां पते ।
नवत्या सायकानां तु कम्पयामास भारत ॥ ४०
राक्षसौ भीमकर्माणौ हैडिम्बालम्बुसावुभौ ।
चक्रातेऽत्यद्भुतं युद्धं परस्परवधैषिणौ ॥ ४१

मायाशतसृजौ दृप्तौ मायाभिरितरेतरम् ।
अन्तर्हितौ चेरतुस्तौ भृशं विस्मयकारिणौ ॥ ४२
चेकितानोऽनुविन्देन युयुधे त्वतिभैरवम् ।
यथा देवासुरे युद्धे बलशक्रौ महाबलौ ॥ ४३
लक्ष्मणः क्षत्रदेवेन विमर्दमकरोद्भृशम् ।
यथा विष्णुः पुरा राजन्हिरण्याक्षेण संयुगे ॥ ४४
ततः प्रजविताश्वेन विधिवत्कल्पितेन च ।
रथेनाभ्यपतद्राजन्सौभद्रं पौरवो नदन् ॥ ४५
ततोऽभियाय त्वरितो युद्धाकाङ्क्षी महाबलः ।
तेन चक्रे महद्युद्धमभिमन्युररिंदमः ॥ ४६
पौरवस्त्वथ सौभद्रं शरव्रातैरवाकिरत् ।
तस्यार्जुनिर्ध्वजं छत्रं धनुश्चोर्व्यामपातयत् ॥ ४७
सौभद्रः पौरवं त्वन्यैर्विद्ध्वा सप्तभिराशुगैः ।
पञ्चभिस्तस्य विव्याध हयान्सूतं च सायकैः ॥ ४८
ततः संहर्षयन्सेनां सिंहवद्विनदन्मुहुः ।
समादत्तार्जुनिस्तूर्णं पौरवान्तकरं शरम् ॥ ४९
द्वाभ्यां शराभ्यां हार्दिक्यश्चकर्त सशरं धनुः ।
तदुत्सृज्य धनुश्छिन्नं सौभद्रः परवीरहा ।
उद्बवर्ह सितं खड्गमाददानः शरावरम् ॥ ५०
स तेनानेकतारेण चर्मणा कृतहस्तवत् ।
भ्रान्तासिरचरन्मार्गान्दर्शयन्वीर्यमात्मनः ॥ ५१
भ्रामितं पुनरुद्भ्रान्तमाधूतं पुनरुच्छ्रितम् ।
चर्मनिस्त्रिंशयो राजन्निर्विशेषमदृश्यत ॥ ५२
स पौरवरथस्येषामाप्लुत्य सहसा नदन् ।
पौरवं रथमास्थाय केशपक्षे परामृशत् ॥ ५३
जघानास्य पदा सूतमसिनापातयद्ध्वजम् ।
विक्षोभ्याम्भोनिधिं तार्क्ष्यस्तं नागमिव चाक्षिपत् ॥
समाकलितकेशान्तं ददृशुः सर्वपार्थिवाः ।
उक्षाणमिव सिंहेन पात्यमानमचेतनम् ॥ ५५
तमार्जुनिवशं प्राप्तं कृष्यमाणमनाथवत् ।
पौरवं पतितं दृष्ट्वा नामृष्यत जयद्रथः ॥ ५६
स बर्हिणमहावाजं किङ्किणीशतजालवत् ।
चर्म चादाय खड्गं च नदन्पर्यपतद्रथात् ॥ ५७
ततः सैन्धवमालोक्य कार्ष्णिरुत्सृज्य पौरवम् ।
उत्पपात रथात्तूर्णं श्येनवन्निपपात च ॥ ५८
प्रासपट्टिशनिस्त्रिंशाञ्शत्रुभिः संप्रवेरितान् ।
चिच्छेदाथासिना कार्ष्णिश्चर्मणा संरुरोध च ॥५९
स दर्शयित्वा सैन्यानां स्वबाहुबलमात्मनः ।
तमुद्यम्य महाखड्गं चर्म चाथ पुनर्बली ॥ ६०
वृद्धक्षत्रस्य दायादं पितुरत्यन्तवैरिणम् ।
ससाराभिमुखः शूरः शार्दूल इव कुञ्जरम् ॥ ६१
तौ परस्परमासाद्य खड्गदन्तनखायुधौ ।
हृष्टवत्संप्रजह्राते व्याघ्रकेसरिणाविव ॥ ६२
संपातेष्वभिपातेषु निपातेष्वसिचर्मणोः ।
न तयोरन्तरं कश्चिद्ददर्श नरसिंहयोः ॥ ६३
अवक्षेपोऽसिनिर्ह्रादः शस्त्रान्तरनिदर्शनम् ।
बाह्यान्तरनिपातश्च निर्विशेषमदृश्यत ॥ ६४
बाह्यमाभ्यन्तरं चैव चरन्तौ मार्गमुत्तमम् ।
ददृशाते महात्मानौ सपक्षाविव पर्वतौ ॥ ६५
ततो विक्षिपतः खड्गं सौभद्रस्य यशस्विनः ।
शरावरणपक्षान्ते प्रजहार जयद्रथः ॥ ६६
रुक्मपक्षान्तरे सक्तस्तस्मिंश्चर्मणि भास्वरे ।
सिन्धुराजबलोद्धूतः सोऽभज्यत महानसिः ॥ ६७
भग्नमाज्ञाय निस्त्रिंशमवप्लुत्य पदानि षट् ।
सोऽदृश्यत निमेषेण स्वरथं पुनराश्रितः ॥ ६८
तं कार्ष्णिं समरान्मुक्तमास्थितं रथमुत्तमम् ।
सहिताः सर्वराजानः परिवव्रुः समन्ततः ॥ ६९
ततश्चर्म च खड्गं च समुत्क्षिप्य महाबलः ।
ननादार्जुनदायादः प्रेक्षमाणो जयद्रथम् ॥ ७०
सिन्धुराजं परित्यज्य सौभद्रः परवीरहा ।

तापयामास तत्सैन्यं भुवनं भास्करो यथा ॥ ७१
तस्य सर्वायसीं शक्तिं शल्यः कनकभूषणाम् ।
चिक्षेप समरे घोरां दीप्तामग्निशिखामिव ॥ ७२
तामवप्लुत्य जग्राह सकोशं चाकरोदसिम् ।
वैनतेयो यथा कार्ष्णिः पतन्तमुरगोत्तमम् ॥ ७३
तस्य लाघवमाज्ञाय सत्त्वं चामिततेजसः ।
सहिताः सर्वराजानः सिंहनादमथानदन् ॥ ७४
ततस्तामेव शल्यस्य सौभद्रः परवीरहा ।
मुमोच भुजवीर्येण वैडूर्यविकृताजिराम् ॥ ७५
सा तस्य रथमासाद्य निर्मुक्तभुजगोपमा ।
जघान सूतं शल्यस्य रथाच्चैनमपातयत् ॥ ७६
ततो विराटद्रुपदौ धृष्टकेतुर्युधिष्ठिरः ।
सात्यकिः केकया भीमो धृष्टद्युम्नशिखण्डिनौ ।
यमौ च द्रौपदेयाश्च साधु साध्विति चुक्रुशुः ॥७७
बाणशब्दाश्च विविधाः सिंहनादाश्च पुष्कलाः ।
प्रादुरासन्हर्षयन्तः सौभद्रमपलायिनम् ।
तन्नामृष्यन्त पुत्रास्ते शत्रोर्विजयलक्षणम् ॥ ७८
अथैनं सहसा सर्वे समन्तान्निशितैः शरैः ।
अभ्याकिरन्महाराज जलदा इव पर्वतम् ॥ ७९
तेषां च प्रियमन्विच्छन्सूतस्य च पराभवात् ।
आर्तायनिरमित्रघ्नः क्रुद्धः सौभद्रमभ्ययात् ॥ ८०

इति श्रीमहाभारते द्रोणपर्वणि
त्रयोदशोऽध्यायः ॥ १३ ॥

१४

धृतराष्ट्र उवाच ।

बहूनि सुविचित्राणि द्वंद्वयुद्धानि संजय ।
त्वयोक्तानि निशम्याहं स्पृहयामि सचक्षुषाम् ॥ १
आश्चर्यभूतं लोकेषु कथयिष्यन्ति मानवाः ।
कुरूणां पाण्डवानां च युद्धं देवासुरोपमम् ॥ २
न हि मे तृप्तिरस्तीह शृण्वतो युद्धमुत्तमम् ।
तस्मादार्तायनेर्युद्धं सौभद्रस्य च शंस मे ॥ ३

संजय उवाच ।

सादितं प्रेक्ष्य यन्तारं शल्यः सर्वायसीं गदाम् ।
समुत्क्षिप्य नदन्क्रुद्धः प्रचस्कन्द रथोत्तमात् ॥४
तं दीप्तमिव कालाग्निं दण्डहस्तमिवान्तकम् ।
जवेनाभ्यपतद्भीमः प्रगृह्य महतीं गदाम् ॥ ५
सौभद्रोऽप्यशनिप्रख्यां प्रगृह्य महतीं गदाम् ।
एह्येहीत्यब्रवीच्छल्यं यत्नाद्भीमेन वारितः ॥ ६
वारयित्वा तु सौभद्रं भीमसेनः प्रतापवान् ।
शल्यमासाद्य समरे तस्थौ गिरिरिवाचलः ॥ ७
तथैव मद्रराजोऽपि भीमं दृष्ट्वा महाबलम् ।
ससाराभिमुखस्तूर्णं शार्दूल इव कुञ्जरम् ॥ ८
ततस्तूर्यनिनादाश्च शङ्खानां च सहस्रशः ।
सिंहनादाश्च संजज्ञुर्भेरीणां च महास्वनाः ॥ ९
पश्यतां शतशो ह्यासीदन्योन्यसमचेतसाम् ।
पाण्डवानां कुरूणां च साधु साध्विति निस्वनः॥१०
न हि मद्राधिपादन्यः सर्वराजसु भारत ।
सोढुमुत्सहते वेगं भीमसेनस्य संयुगे ॥ ११
तथा मद्राधिपस्यापि गदावेगं महात्मनः ।
सोढुमुत्सहते लोके कोऽन्यो युधि वृकोदरात् ॥१२
पट्टैर्जाम्बूनदैर्बद्धा बभूव जनहर्षिणी ।
प्रजज्वाल तथाविद्धा भीमेन महती गदा ॥ १३
तथैव चरतो मार्गान्मण्डलानि च भागशः ।
महाविद्युत्प्रतीकाशा शल्यस्य शुशुभे गदा ॥ १४
तौ वृषाविव नर्दन्तौ मण्डलानि विचेरतुः ।
आवर्जितगदाशृङ्गावुभौ शल्यवृकोदरौ ॥ १५
मण्डलावर्तमार्गेषु गदाविहरणेषु च ।
निर्विशेषमभूद्युद्धं तयोः पुरुषसिंहयोः ॥ १६
ताडिता भीमसेनेन शल्यस्य महती गदा ।
साग्निज्वाला महारौद्रा गदाचूर्णमशीर्यत ॥ १७

तथैव भीमसेनस्य द्विषताभिहता गदा ।
वर्षाप्रदोषे खद्योतैर्वृतो वृक्ष इवाबभौ ॥ १८
गदा क्षिप्ता तु समरे मद्रराजेन भारत ।
व्योम संदीपयाना सा ससृजे पावकं बहु ॥ १९
तथैव भीमसेनेन द्विषते प्रेषिता गदा ।
तापयामास तत्सैन्यं महोल्का पतती यथा ॥ २०
ते चैवोभे गदे श्रेष्ठे समासाद्य परस्परम् ।
श्वसन्त्यौ नागकन्येव ससृजाते विभावसुम् ॥ २१
नखैरिव महाव्याघ्रौ दन्तैरिव महागजौ ।
तौ विचेरतुरासाद्य गदाभ्यां च परस्परम् ॥ २२
ततो गदाग्राभिहतौ क्षणेन रुधिरोक्षितौ ।
ददृशाते महात्मानौ पुष्पिताविव किंशुकौ ॥ २३
शुश्रुवे दिक्षु सर्वासु तयोः पुरुषसिंहयोः ।
गदाभिघातसंह्रादः शक्राशनिरवोपमः ॥ २४
गदया मद्रराजेन सव्यदक्षिणमाहतः ।
नाकम्पत तदा भीमो भिद्यमान इवाचलः ॥ २५
तथा भीमगदावेगैस्ताड्यमानो महाबलः ।
धैर्यान्मद्राधिपस्तस्थौ वज्रैर्गिरिरिवाहतः ॥ २६
आपेततुर्महावेगौ समुच्छ्रितमहागदौ ।
पुनरन्तरमार्गस्थौ मण्डलानि विचेरतुः ॥ २७
अथाप्लुत्य पदान्यष्टौ संनिपत्य गजाविव ।
सहसा लोहदण्डाभ्यामन्योन्यमभिजघ्नतुः ॥ २८
तौ परस्परवेगाच्च गदाभ्यां च भृशाहतौ ।
युगपत्पेततुर्वीरौ क्षिताविन्द्रध्वजाविव ॥ २९
ततो विह्वलमानं तं निःश्वसन्तं पुनः पुनः ।
शल्यमभ्यपतत्तूर्णं कृतवर्मा महारथः ॥ ३०
दृष्ट्वा चैनं महाराज गदयाभिनिपीडितम् ।
विचेष्टन्तं यथा नागं मूर्छयाभिपरिप्लुतम् ॥ ३१
ततः सगदमारोप्य मद्राणामधिपं रथम् ।
अपोवाह रणात्तूर्णं कृतवर्मा महारथः ॥ ३२
क्षीबवद्विह्वलो वीरो निमेषात्पुनरुत्थितः ।
भीमोऽपि सुमहाबाहुर्गदापाणिरदृश्यत ॥ ३३
ततो मद्राधिपं दृष्ट्वा तव पुत्राः पराङ्मुखम् ।
सनागरथपत्त्यश्वाः समकम्पत मारिष ॥ ३४
ते पाण्डवैरर्द्यमानास्तावका जितकाशिभिः ।
भीता दिशोऽन्वपद्यन्त वातनुन्ना घना इव ॥ ३५
निर्जित्य धार्तराष्ट्रांस्तु पाण्डवेया महारथाः ।
व्यरोचन्त रणे राजन्दीप्यमाना यशस्विनः ॥ ३६
सिंहनादान्भृशं चक्रुः शङ्खान्दध्मुश्च हर्षिताः ।
भेरीश्च वादयामासुर्मृदङ्गांश्चानकैः सह ॥ ३७

इति श्रीमहाभारते द्रोणपर्वणि
चतुर्दशोऽध्यायः ॥ १४ ॥

१५

संजय उवाच ।

तद्बलं सुमहद्दीर्णं त्वदीयं प्रेक्ष्य वीर्यवान् ।
दधारैको रणे पाण्डून्वृषसेनोऽस्त्रमायया ॥ १
शरा दश दिशो मुक्ता वृषसेनेन मारिष ।
विचेरुस्ते विनिर्भिद्य नरवाजिरथद्विपान् ॥ २
तस्य दीप्ता महाबाणा विनिश्चेरुः सहस्रशः ।
भानोरिव महाबाहो ग्रीष्मकाले मरीचयः ॥ ३
तेनार्दिता महाराज रथिनः सादिनस्तथा ।
निपेतुरुर्व्यां सहसा वातनुन्ना इव द्रुमाः ॥ ४
हयौघांश्च रथौघांश्च गजौघांश्च समन्ततः ।
अपातयद्रणे राजञ्शतशोऽथ सहस्रशः ॥ ५
दृष्ट्वा तमेवं समरे विचरन्तमभीतवत् ।
सहिताः सर्वराजानः परिवव्रुः समन्ततः ॥ ६
नाकुलिस्तु शतानीको वृषसेनं समभ्ययात् ।
विव्याध चैनं दशभिर्नाराचैर्मर्मभेदिभिः ॥ ७
तस्य कर्णात्मजश्चापं छित्त्वा केतुमपातयत् ।
तं भ्रातरं परीप्सन्तो द्रौपदेयाः समभ्ययुः ॥ ८

कर्णात्मजं शरव्रातैश्चक्रुश्चादृश्यमञ्जसा ।
तान्नदन्तोऽभ्यधावन्त द्रोणपुत्रमुखा रथाः ॥ ९
छादयन्तो महाराज द्रौपदेयान्महारथान् ।
शरैर्नानाविधैस्तूर्णं पर्वताञ्जलदा इव ॥ १०
तान्पाण्डवाः प्रत्यगृह्णंस्त्वरिताः पुत्रगृद्धिनः ।
पाञ्चालाः केकया मत्स्याः सृञ्जयाश्चोद्यतायुधाः ॥
तद्युद्धमभवद्घोरं तुमुलं लोमहर्षणम् ।
त्वदीयैः पाण्डुपुत्राणां देवानामिव दानवैः ॥ १२
एवमुत्तमसंरम्भा युयुधुः कुरुपाण्डवाः ।
परस्परमुदीक्षन्तः परस्परकृतागसः ॥ १३
तेषां ददृशिरे कोपाद्वपूंष्यमिततेजसाम् ।
युयुत्सूनामिवाकाशे पतत्रिवरभोगिनाम् ॥ १४
भीमकर्णकृपद्रोणद्रौणिपार्षतसात्यकैः ।
बभासे स रणोद्देशः कालसूर्यैरिवोदितैः ॥ १५
तदासीत्तुमुलं युद्धं निघ्नतामितरेतरम् ।
महाबलानां बलिभिर्दानवानां यथा सुरैः ॥ १६
ततो युधिष्ठिरानीकमुद्धूतार्णवनिस्वनम् ।
त्वदीयमवधीत्सैन्यं संप्रद्रुतमहारथम् ॥ १७
तत्प्रभग्नं बलं दृष्ट्वा शत्रुभिर्भृशमर्दितम् ।
अलं द्रुतेन वः शूरा इति द्रोणोऽभ्यभाषत ॥ १८
ततः शोणहयः क्रुद्धश्चतुर्दन्त इव द्विपः ।
प्रविश्य पाण्डवानीकं युधिष्ठिरमुपाद्रवत् ॥ १९
तमविध्यच्छितैर्बाणैः कङ्कपत्रैर्युधिष्ठिरः ।
तस्य द्रोणो धनुश्छित्त्वा तं द्रुतं समुपाद्रवत् ॥ २०
चक्ररक्षः कुमारस्तु पाञ्चालानां यशस्करः ।
दधार द्रोणमायान्तं वेलेव सरितां पतिम् ॥ २१
द्रोणं निवारितं दृष्ट्वा कुमारेण द्विजर्षभम् ।
सिंहनादरवो ह्यासीत्साधु साध्विति भाषताम् ॥ २२
कुमारस्तु ततो द्रोणं सायकेन महाहवे ।
विव्याधोरसि संक्रुद्धः सिंहवच्चानदन्मुहुः ॥ २३
संवार्य तु रणे द्रोणः कुमारं वै महाबलः ।
शरैरनेकसाहस्रैः कृतहस्तो जितक्लमः ॥ २४
तं शूरमार्यव्रतिनमस्त्रार्थकृतनिश्रमम् ।
चक्ररक्षमपामृद्नात्कुमारं द्विजसत्तमः ॥ २५
स मध्यं प्राप्य सेनायाः सर्वाः परिचरन्दिशः ।
तव सैन्यस्य गोप्तासीद्भारद्वाजो रथर्षभः ॥ २६
शिखण्डिनं द्वादशभिर्विंशत्या चोत्तमौजसम् ।
नकुलं पञ्चभिर्विद्ध्वा सहदेवं च सप्तभिः ॥ २७
युधिष्ठिरं द्वादशभिर्द्रौपदेयांस्त्रिभिस्त्रिभिः ।
सात्यकिं पञ्चभिर्विद्ध्वा मत्स्यं च दशभिः शरैः ॥
व्यक्षोभयद्रणे योधान्यथामुख्यानभिद्रवन् ।
अभ्यवर्तत संप्रेप्सुः कुन्तीपुत्रं युधिष्ठिरम् ॥ २९
युगंधरस्ततो राजन्भारद्वाजं महारथम् ।
वारयामास संक्रुद्धं वातोद्धूतमिवार्णवम् ॥ ३०
युधिष्ठिरं स विद्ध्वा तु शरैः संनतपर्वभिः ।
युगंधरं च भल्लेन रथनीडादपाहरत् ॥ ३१
ततो विराटद्रुपदौ केकयाः सात्यकिः शिबिः ।
व्याघ्रदत्तश्च पाञ्चाल्यः सिंहसेनश्च वीर्यवान् ॥३२
एते चान्ये च बहवः परीप्सन्तो युधिष्ठिरम् ।
आवव्रुस्तस्य पन्थानं किरन्तः सायकान्बहून् ॥ ३३
व्याघ्रदत्तश्च पाञ्चाल्यो द्रोणं विव्याध मार्गणैः ।
पञ्चाशद्भिः शितै राजंस्तत उच्चुक्रुशुर्जनाः ॥ ३४
त्वरितं सिंहसेनस्तु द्रोणं विद्ध्वा महारथम् ।
प्राहसत्सहसा हृष्टस्त्रासयन्वै यतव्रतम् ॥ ३५
ततो विस्फार्य नयने धनुर्ज्यामवमृज्य च ।
तलशब्दं महत्कृत्वा द्रोणस्तं समुपाद्रवत् ॥ ३६
ततस्तु सिंहसेनस्य शिरः कायात्सकुण्डलम् ।
व्याघ्रदत्तस्य चाक्रम्य भल्लाभ्यामहरद्बली ॥ ३७
तान्प्रमृद्य शरव्रातैः पाण्डवानां महारथान् ।
युधिष्ठिरसमभ्याशे तस्थौ मृत्युरिवान्तकः ॥ ३८

ततोऽभवन्महाशब्दो राजन्यौधिष्ठिरे बले ।
हृतो राजेति योधानां समीपस्थे यतव्रते ॥ ३९
अब्रुवन्सैनिकास्तत्र दृष्ट्वा द्रोणस्य विक्रमम् ।
अद्य राजा धार्तराष्ट्रः कृतार्थो वै भविष्यति ।
आगमिष्यति नो नूनं धार्तराष्ट्रस्य संयुगे ॥ ४०
एवं संजल्पतां तेषां तावकानां महारथः ।
आयाज्जवेन कौन्तेयो रथघोषेण नादयन् ॥ ४१
शोणितोदां रथावर्तां कृत्वा विशसने नदीम् ।
शूरास्थिचयसंकीर्णां प्रेतकूलापहारिणीम् ॥ ४२
तां शरौघमहाफेनां प्रासमत्स्यसमाकुलाम् ।
नदीमुत्तीर्य वेगेन कुरून्विद्राव्य पाण्डवः ॥ ४३
ततः किरीटी सहसा द्रोणानीकमुपाद्रवत् ।
छादयन्निषुजालेन महता मोहयन्निव ॥ ४४
शीघ्रमभ्यस्यतो बाणान्संदधानस्य चानिशम् ।
नान्तरं ददृशे कश्चित्कौन्तेयस्य यशस्विनः ॥ ४५
न दिशो नान्तरिक्षं च न द्यौर्नैव च मेदिनी ।
अदृश्यत महाराज बाणभूतमिवाभवत् ॥ ४६
नादृश्यत तदा राजंस्तत्र किंचन संयुगे ।
बाणान्धकारे महति कृते गाण्डीवधन्वना ॥ ४७
सूर्ये चास्तमनुप्राप्ते रजसा चाभिसंवृते ।
नाज्ञायत तदा शत्रुर्न सुहृन्न च किंचन ॥ ४८
ततोऽवहारं चक्रुस्ते द्रोणदुर्योधनादयः ।
तान्विदित्वा भृशं त्रस्तानयुद्धमनसः परान् ॥ ४९
स्वान्यनीकानि बीभत्सुः शनकैरवहारयत् ।
ततोऽभितुष्टुवुः पार्थं प्रहृष्टाः पाण्डुसृञ्जयाः ।
पाञ्चालाश्च मनोज्ञाभिर्वाग्भिः सूर्यमिवर्षयः ॥ ५०
एवं स्वशिबिरं प्रायाज्जित्वा शत्रून्धनंजयः ।
पृष्ठतः सर्वसैन्यानां मुदितो वै सकेशवः ॥ ५१
मसारगल्वर्कसुवर्णरूप्यै-
वज्रप्रवालस्फटिकैश्च मुख्यैः ।
चित्रे रथे पाण्डुसुतो बभासे
नक्षत्रचित्रे वियतीव चन्द्रः ॥ ५२

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥
॥ समाप्तं द्रोणाभिषेकपर्व ॥

१६

संजय उवाच ।

ते सेने शिबिरं गत्वा न्यविशेतां विशां पते ।
यथाभागं यथान्यायं यथागुल्मं च सर्वशः ॥ १
कृत्वावहारं सैन्यानां द्रोणः परमदुर्मनाः ।
दुर्योधनमभिप्रेक्ष्य सव्रीडमिदमब्रवीत् ॥ २
उक्तमेतन्मया पूर्वं न तिष्ठति धनंजये ।
शक्यो ग्रहीतुं संग्रामे देवैरपि युधिष्ठिरः ॥ ३
इति तद्वः प्रयततां कृतं पार्थेन संयुगे ।
मातिशङ्कीर्वचो मह्यमजेयौ कृष्णपाण्डवौ ॥ ४
अपनीते तु योगेन केनचिच्छ्वेतवाहने ।
तत एष्यति ते राजन्वशमद्य युधिष्ठिरः ॥ ५
कश्चिदाह्वयतां संख्ये देशमन्यं प्रकर्षतु ।
तमजित्वा तु कौन्तेयो न निवर्तेत्कथंचन ॥ ६
एतस्मिन्नन्तरे शून्ये धर्मराजमहं नृप ।
ग्रहीष्यामि चमूं भित्त्वा धृष्टद्युम्नस्य पश्यतः ॥ ७
अर्जुनेन विहीनस्तु यदि नोत्सृजते रणम् ।
मामुपायान्तमालोक्य गृहीतमिति विद्धि तम् ॥ ८
एवं ते सहसा राजन्धर्मपुत्रं युधिष्ठिरम् ।
समानेष्यामि सगणं वशमद्य न संशयः ॥ ९
यदि तिष्ठति संग्रामे मुहूर्तमपि पाण्डवः ।
अथापयाति संग्रामाद्विजयात्तद्विशिष्यते ॥ १०
द्रोणस्य तु वचः श्रुत्वा त्रिगर्ताधिपतिस्ततः ।
भ्रातृभिः सहितो राजन्निदं वचनमब्रवीत् ॥ ११
वयं विनिकृता राजन्सदा गाण्डीवधन्वना ।

अनागःस्वपि चागस्कृदस्मासु भरतर्षभ ॥ १२
ते वयं स्मरमाणास्तान्विनिकारान्पृथग्विधान् ।
क्रोधाग्निना दह्यमाना न शेमहि सदा निशाः ॥१३
स नो दिव्यास्त्रसंपन्नश्चक्षुर्विषयमागतः ।
कर्तारः स्म वयं सर्वं यच्चिकीर्षाम हृद्गतम् ॥ १४
भवतश्च प्रियं यत्स्यादस्माकं च यशस्करम् ।
वयमेनं हनिष्यामो निकृष्यायोधनाद्बहिः ॥ १५
अद्यास्त्वनर्जुना भूमिरत्रिगर्ताथ वा पुनः ।
सत्यं ते प्रतिजानीमो नैतन्मिथ्या भविष्यति ॥१६
एवं सत्यरथश्चोक्त्वा सत्यधर्मा च भारत ।
सत्यवर्मा च सत्येषुः सत्यकर्मा तथैव च ॥ १७
सहिता भ्रातरः पञ्च रथानामयुतेन च ।
न्यवर्तन्त महाराज कृत्वा शपथमाहवे ॥ १८
मालवास्तुण्डिकेराश्च रथानामयुतैस्त्रिभिः ।
सुशर्मा च नरव्याघ्रस्त्रिगर्तः प्रस्थलाधिपः ॥ १९
माचेल्लकैर्ललित्थैश्च सहितो मद्रकैरपि ।
रथानामयुतेनैव सोऽशपद्भ्रातृभिः सह ॥ २०
नानाजनपदेभ्यश्च रथानामयुतं पुनः ।
समुत्थितं विशिष्टानां संशप्तार्थमुपागतम् ॥ २१
ततो ज्वलनमादाय हुत्वा सर्वे पृथक्पृथक् ।
जगृहुः कुशचीराणि चित्राणि कवचानि च ॥ २२
ते च बद्धतनुत्राणा घृताक्ताः कुशचीरिणः ।
मौर्वीमेखलिनो वीराः सहस्रशतदक्षिणाः ॥ २३
यज्वानः पुत्रिणो लोक्याः कृतकृत्यास्तनुत्यजः ।
योक्ष्यमाणास्तदात्मानं यशसा विजयेन च ॥ २४
ब्रह्मचर्यश्रुतिमुखैः क्रतुभिश्चाप्तदक्षिणैः ।
प्राप्य लोकान्सुयुद्धेन क्षिप्रमेव यियासवः ॥ २५
ब्राह्मणांस्तर्पयित्वा च निष्कान्दत्त्वा पृथक्पृथक् ।
गाश्च वासांसि च पुनः समाभाष्य परस्परम् ॥२६
प्रज्वाल्य कृष्णवर्त्मानमुपागम्य रणे व्रतम् ।
तस्मिन्नग्नौ तदा चक्रुः प्रतिज्ञां दृढनिश्चयाः ॥ २७
शृण्वतां सर्वभूतानामुच्चैर्वाचः स्म मेनिरे ।
धृत्वा धनंजयवधे प्रतिज्ञां चापि चक्रिरे ॥ २८
ये वै लोकाश्चानृतानां ये चैव ब्रह्मघातिनाम् ।
पानपस्य च ये लोका गुरुदाररतस्य च ॥ २९
ब्रह्मस्वहारिणश्चैव राजपिण्डापहारिणः ।
शरणागतं च त्यजतो याचमानं तथा घ्नतः ॥ ३०
अगारदाहिनां ये च ये च गां निघ्नतामपि ।
अपचारिणां च ये लोका ये च ब्रह्मद्विषामपि ॥
जायां च ऋतुकाले वै ये मोहादभिगच्छताम् ।
श्राद्धसंगतिकानां च ये चाप्यात्मापहारिणाम् ॥३२
न्यासापहारिणां ये च श्रुतं नाशयतां च ये ।
कोपेन युध्यमानानां ये च नीचानुसारिणाम् ॥३३
नास्तिकानां च ये लोका येऽग्निहोत्रपितृत्यजाम् ।
तानाप्नुयामहे लोकान्ये च पापकृतामपि ॥ ३४
यद्यहत्वा वयं युद्धे निवर्तेम धनंजयम् ।
तेन चाभ्यर्दितास्त्रासाद्भवेम हि पराङ्मुखाः ॥ ३५
यदि त्वसुकरं लोके कर्म कुर्याम संयुगे ।
इष्टान्पुण्यकृतां लोकान्प्राप्नुयाम न संशयः ॥ ३६
एवमुक्त्वा ततो राजंस्तेऽभ्यवर्तन्त संयुगे ।
आह्वयन्तोऽर्जुनं वीराः पितृजुष्टां दिशं प्रति ॥ ३७
आहूतस्तैर्नरव्याघ्रैः पार्थः परपुरंजयः ।
धर्मराजमिदं वाक्यमपदान्तरमब्रवीत् ॥ ३८
आहूतो न निवर्तेयमिति मे व्रतमाहितम् ।
संशप्तकाश्च मां राजन्नाह्वयन्ति पुनः पुनः ॥ ३९
एष च भ्रातृभिः सार्धं सुशर्माह्वयते रणे ।
वधाय सगणस्यास्य मामनुज्ञातुमर्हसि ॥ ४०
नैतच्छक्नोमि संसोढुमाह्वानं पुरुषर्षभ ।
सत्यं ते प्रतिजानामि हतान्विद्धि परान्युधि ॥ ४१

युधिष्ठिर उवाच ।

श्रुतमेतत्त्वया तात यद्द्रोणस्य चिकीर्षितम् ।
यथा तदनृतं तस्य भवेत्तद्वत्समाचर ॥ ४२
द्रोणो हि बलवाञ्शूरः कृतास्त्रश्च जितश्रमः ।
प्रतिज्ञातं च तेनैतद्ग्रहणं मे महारथ ॥ ४३

अर्जुन उवाच ।

अयं वै सत्यजिद्राजन्नद्य ते रक्षिता युधि ।
म्रियमाणे हि पाञ्चाल्ये नाचार्यः काममाप्स्यति ॥
हते तु पुरुषव्याघ्रे रणे सत्यजिति प्रभो ।
सर्वैरपि समेतैर्वा न स्थातव्यं कथंचन ॥ ४५

संजय उवाच ।

अनुज्ञातस्ततो राज्ञा परिष्वक्तश्च फल्गुनः ।
प्रेम्णा दृष्टश्च बहुधा आशिषा च प्रयोजितः ॥ ४६
विहायैनं ततः पार्थस्त्रिगर्तान्प्रत्ययाद्बली ।
क्षुधितः क्षुद्विघातार्थं सिंहो मृगगणानिव ॥ ४७
ततो दौर्योधनं सैन्यं मुदा परमया युतम् ।
गतेऽर्जुने भृशं क्रुद्धं धर्मराजस्य निग्रहे ॥ ४८
ततोऽन्योन्येन ते सेने समाजग्मतुरोजसा ।
गङ्गासरय्वोर्वेगेन प्रावृषीवोल्बणोदके ॥ ४९

इति श्रीमहाभारते द्रोणपर्वणि
षोडशोऽध्यायः ॥ १६ ॥

१७

संजय उवाच ।

ततः संशप्तका राजन्समे देशे व्यवस्थिताः ।
व्यूह्यानीकं रथैरेव चन्द्रार्धाख्यं मुदान्विताः ॥ १
ते किरीटिनमायान्तं दृष्ट्वा हर्षेण मारिष ।
उदक्रोशन्नरव्याघ्राः शब्देन महता तदा ॥ २
स शब्दः प्रदिशः सर्वा दिशः खं च समावृणोत् ।
आवृतत्वाच्च लोकस्य नासीत्तत्र प्रतिस्वनः ॥ ३
अतीव संप्रहृष्टांस्तानुपलभ्य धनंजयः ।
किंचिदभ्युत्स्मयन्कृष्णमिदं वचनमब्रवीत् ॥ ४
पश्यैतान्देवकीमातर्मुमूर्षूनद्य संयुगे ।
भ्रातॄंस्त्रैगर्तकानेवं रोदितव्ये प्रहर्षितान् ॥ ५
अथ वा हर्षकालोऽयं त्रैगर्तानामसंशयम् ।
कुनरैर्दुरवापान्हि लोकान्प्राप्स्यन्त्यनुत्तमान् ॥ ६
एवमुक्त्वा महाबाहुर्हृषीकेशं ततोऽर्जुनः ।
आससाद रणे व्यूढां त्रैगर्तानामनीकिनीम् ॥ ७
स देवदत्तमादाय शङ्खं हेमपरिष्कृतम् ।
दध्मौ वेगेन महता फल्गुनः पूरयन्दिशः ॥ ८
तेन शब्देन वित्रस्ता संशप्तकवरूथिनी ।
निश्चेष्टावस्थिता संख्ये अश्मसारमयी यथा ॥ ९
वाहास्तेषां विवृत्ताक्षाः स्तब्धकर्णशिरोधराः ।
विष्टब्धचरणा मूत्रं रुधिरं च प्रसुस्रुवुः ॥ १०
उपलभ्य च ते संज्ञामवस्थाप्य च वाहिनीम् ।
युगपत्पाण्डुपुत्राय चिक्षिपुः कङ्कपत्रिणः ॥ ११
तान्यर्जुनः सहस्राणि दश पञ्चैव चाशुगैः ।
अनागतान्येव शरैश्चिच्छेदाशुपराक्रमः ॥ १२
ततोऽर्जुनं शितैर्बाणैर्दशभिर्दशभिः पुनः ।
प्रत्यविध्यंस्ततः पार्थस्तानविध्यत्त्रिभिस्त्रिभिः ॥ १३
एकैकस्तु ततः पार्थं राजन्विव्याध पञ्चभिः ।
स च तान्प्रतिविव्याध द्वाभ्यां द्वाभ्यां पराक्रमी ॥
भूय एव तु संरब्धास्तेऽर्जुनं सहकेशवम् ।
आपूरयञ्शरैस्तीक्ष्णैस्तटाकमिव वृष्टिभिः ॥ १५
ततः शरसहस्राणि प्रापतन्नर्जुनं प्रति ।
भ्रमराणामिव व्राताः फुल्लद्रुमगणे वने ॥ १६
ततः सुबाहुस्त्रिंशद्भिरद्रिसारमयैर्दृढैः ।
अविध्यदिषुभिर्गाढं किरीटे सव्यसाचिनम् ॥ १७
तैः किरीटी किरीटस्थैर्हेमपुङ्खैरजिह्मगैः ।
शातकुम्भमयापीडो बभौ यूप इवोच्छ्रितः ॥ १८
हस्तावापं सुबाहोस्तु भल्लेन युधि पाण्डवः ।

चिच्छेद तं चैव पुनः शरवर्षैरवाकिरत् ॥ १९
ततः सुशर्मा दशभिः सुरथश्च किरीटिनम् ।
सुधर्मा सुधनुश्चैव सुबाहुश्च समर्पयन् ॥ २०
तांस्तु सर्वान्पृथग्बाणैर्वानरप्रवरध्वजः ।
प्रत्यविध्यद्ध्वजांश्चैषां भल्लैश्चिच्छेद काञ्चनान् ॥२१
सुधन्वनो धनुश्छित्त्वा हयान्वै न्यवधीच्छरैः ।
अथास्य सशिरस्त्राणं शिरः कायादपाहरत् ॥ २२
तस्मिंस्तु पतिते वीरे त्रस्तास्तस्य पदानुगाः ।
व्यद्रवन्त भयाद्भीता येन दौर्योधनं बलम् ॥ २३
ततो जघान संक्रुद्धो वासविस्तां महाचमूम् ।
शरजालैरविच्छिन्नैस्तमः सूर्य इवांशुभिः ॥ २४
ततो भग्ने बले तस्मिन्विप्रयाते समन्ततः ।
सव्यसाचिनि संक्रुद्धे त्रैगर्तान्भयमाविशत् ॥ २५
ते वध्यमानाः पार्थेन शरैः संनतपर्वभिः ।
अमुह्यंस्तत्र तत्रैव त्रस्ता मृगगणा इव ॥ २६
ततस्त्रिगर्तराट् क्रुद्धस्तानुवाच महारथान् ।
अलं द्रुतेन वः शूरा न भयं कर्तुमर्हथ ॥ २७
शप्त्वा तु शपथान्घोरान्सर्वसैन्यस्य पश्यतः ।
गत्वा दौर्योधनं सैन्यं किं वै वक्ष्यथ मुख्यगाः ॥
नावहास्याः कथं लोके कर्मणानेन संयुगे ।
भवेम सहिताः सर्वे निवर्तध्वं यथाबलम् ॥ २९
एवमुक्तास्तु ते राजन्नुदक्रोशन्मुहुर्मुहुः ।
शङ्खांश्च दध्मिरे वीरा हर्षयन्तः परस्परम् ॥ ३०
ततस्ते संन्यवर्तन्त संशप्तकगणाः पुनः ।
नारायणाश्च गोपालाः कृत्वा मृत्युं निवर्तनम् ॥३१

इति श्रीमहाभारते द्रोणपर्वणि
सप्तदशोऽध्यायः ॥ १७ ॥

१८

संजय उवाच ।

दृष्ट्वा तु संनिवृत्तांस्तान्संशप्तकगणान्पुनः ।
वासुदेवं महात्मानमर्जुनः समभाषत ॥ १
चोदयाश्वान्हृषीकेश संशप्तकगणान्प्रति ।
नैते हास्यन्ति संग्रामं जीवन्त इति मे मतिः ॥ २
पश्य मेऽस्त्रबलं घोरं बाह्वोरिष्वसनस्य च ।
अद्यैतान्पातयिष्यामि क्रुद्धो रुद्रः पशूनिव ॥ ३
ततः कृष्णः स्मितं कृत्वा परिणन्द्य शिवेन तम् ।
प्रावेशयत दुर्धर्षो यत्र यत्रैच्छदर्जुनः ॥ ४
बभ्राजे स रथोऽत्यर्थमुह्यमानो रणे तदा ।
उह्यमानमिवाकाशे विमानं पाण्डुरैर्हयैः ॥ ५
मण्डलानि ततश्चक्रे गतप्रत्यागतानि च ।
यथा शक्ररथो राजन्युद्धे देवासुरे पुरा ॥ ६
अथ नारायणाः क्रुद्धा विविधायुधपाणयः ।
छादयन्तः शरव्रातैः परिवव्रुर्धनंजयम् ॥ ७
अदृश्यं च मुहूर्तेन चक्रुस्ते भरतर्षभ ।
कृष्णेन सहितं युद्धे कुन्तीपुत्रं धनंजयम् ॥ ८
क्रुद्धस्तु फल्गुनः संख्ये द्विगुणीकृतविक्रमः ।
गाण्डीवमुपसंमृज्य तूर्णं जग्राह संयुगे ॥ ९
बद्ध्वा च भ्रुकुटीं वक्त्रे क्रोधस्य प्रतिलक्षणम् ।
देवदत्तं महाशङ्खं पूरयामास पाण्डवः ॥ १०
अथास्त्रमरिसंघघ्नं त्वाष्ट्रमभ्यस्यदर्जुनः ।
ततो रूपसहस्राणि प्रादुरासन्पृथक्पृथक् ॥ ११
आत्मनः प्रतिरूपैस्तैर्नानारूपैर्विमोहिताः ।
अन्योन्यमर्जुनं मत्वा स्वमात्मानं च जघ्निरे ॥ १२
अयमर्जुनोऽयं गोविन्द इमौ यादवपाण्डवौ ।
इति ब्रुवाणाः संमूढा जघ्नुरन्योन्यमाहवे ॥ १३
मोहिताः परमास्त्रेण क्षयं जग्मुः परस्परम् ।
अशोभन्त रणे योधाः पुष्पिता इव किंशुकाः ॥ १४
ततः शरसहस्राणि तैर्विमुक्तानि भस्मसात् ।
कृत्वा तदस्त्रं तान्वीराननयद्यमसादनम् ॥ १५
अथ प्रहस्य बीभत्सुर्ललित्थान्मालवानपि ।

मावेल्लकांस्त्रिगर्तांश्च यौधेयांश्चार्दयच्छरैः ॥ १६
ते वध्यमाना वीरेण क्षत्रियाः कालचोदिताः ।
व्यसृजञ्छरवर्षाणि पार्थे नानाविधानि च ॥ १७
ततो नैवार्जुनस्तत्र न रथो न च केशवः ।
प्रत्यदृश्यत घोरेण शरवर्षेण संवृतः ॥ १८
ततस्ते लब्धलक्ष्यत्वादन्योन्यमभिचुक्रुशुः ।
हतौ कृष्णाविति प्रीता वासांस्यादुधुवुस्तदा ॥ १९
भेरीमृदङ्गशङ्खांश्च दध्मुर्वीराः सहस्रशः ।
सिंहनादरवांश्चोग्रांश्चक्रिरे तत्र मारिष ॥ २०
ततः प्रसिष्विदे कृष्णः खिन्नश्चार्जुनमब्रवीत् ।
क्वासि पार्थ न पश्ये त्वां कच्चिज्जीवसि शत्रुहन् ॥
तस्य तं मानुषं भावं भावज्ञोऽऽज्ञाय पाण्डवः ।
वायव्यास्त्रेण तैरस्तां शरवृष्टिमपाहरत् ॥ २२
ततः संशप्तकव्रातान्साश्वद्विपरथायुधान् ।
उवाह भगवान्वायुः शुष्कपर्णचयानिव ॥ २३
उह्यमानास्तु ते राजन्बह्वशोभन्त वायुना ।
प्रडीनाः पक्षिणः काले वृक्षेभ्य इव मारिष ॥ २४
तांस्तथा व्याकुलीकृत्य त्वरमाणो धनंजयः ।
जघान निशितैर्बाणैः सहस्राणि शतानि च ॥ २५
शिरांसि भल्लैरहरद्बाहूनपि च सायुधान् ।
हस्तिहस्तोपमांश्चोरूञ्शरैरुर्व्यामपातयत् ॥ २६
पृष्ठच्छिन्नान्विचरणान्विमस्तिष्केक्षणाङ्गुलीन् ।
नानाङ्गावयवैर्हीनांश्चकारारीन्धनंजयः ॥ २७
गन्धर्वनगराकारान्विधिवत्कल्पितान्रथान् ।
शरैर्विशकलीकुर्वंश्चक्रे व्यश्वरथद्विपान् ॥ २८
मुण्डतालवनानीव तत्र तत्र चकाशिरे ।
छिन्नध्वजरथव्राताः केचित्केचित्कचित्कचित् ॥ २९
सोत्तरायुधिनो नागाः सपताकाङ्कुशायुधाः ।
पेतुः शक्राशनिहता द्रुमवन्त इवाचलाः ॥ ३०
चामरापीडकवचाः स्रस्तान्त्रनयनासवः ।
सारोहास्तुरगाः पेतुः पार्थबाणहताः क्षितौ ॥ ३१
विप्रविद्धासिनखराश्छिन्नवर्मर्ष्टिशक्तयः ।
पत्तयश्छिन्नवर्माणः कृपणं शेरते हताः ॥ ३२
तैर्हतैर्हन्यमानैश्च पतद्भिः पतितैरपि ।
भ्रमद्भिर्निष्टनद्भिश्च घोरमायोधनं बभौ ॥ ३३
रजश्च महदुद्भूतं शान्तं रुधिरवृष्टिभिः ।
मही चाप्यभवद्दुर्गा कबन्धशतसंकुला ॥ ३४
तद्बभौ रौद्रबीभत्सं बीभत्सोर्यानमाहवे ।
आक्रीड इव रुद्रस्य घ्नतः कालात्यये पशून् ॥ ३५
ते वध्यमानाः पार्थेन व्याकुलाश्वरथद्विपाः ।
तमेवाभिमुखाः क्षीणाः शक्रस्यातिथितां गताः ॥ ३६
सा भूमिर्भरतश्रेष्ठ निहतैस्तैर्महारथैः ।
आस्तीर्णा संबभौ सर्वा प्रेतीभूतैः समन्ततः ॥ ३७
एतस्मिन्नन्तरे चैव प्रमत्ते सव्यसाचिनि ।
व्यूढानीकस्ततो द्रोणो युधिष्ठिरमुपाद्रवत् ॥ ३८
तं प्रत्यगृह्णंस्त्वरिता व्यूढानीकाः प्रहारिणः ।
युधिष्ठिरं परीप्सन्तस्तदासीत्तुमुलं महत् ॥ ३९

इति श्रीमहाभारते द्रोणपर्वणि
अष्टादशोऽध्यायः ॥ १८ ॥

१९

संजय उवाच ।

परिणाम्य निशां तां तु भारद्वाजो महारथः ।
बहूक्त्वा च ततो राजन्राजानं च सुयोधनम् ॥ १
विधाय योगं पार्थेन संशप्तकगणैः सह ।
निष्क्रान्ते च रणात्पार्थे संशप्तकवधं प्रति ॥ २
व्यूढानीकस्ततो द्रोणः पाण्डवानां महाचमूम् ।
अभ्ययाद्भरतश्रेष्ठ धर्मराजजिघृक्षया ॥ ३
व्यूहं दृष्ट्वा सुपर्णं तु भारद्वाजकृतं तदा ।
व्यूहेन मण्डलार्धेन प्रत्यव्यूहद्युधिष्ठिरः ॥ ४
मुखमासीत्सुपर्णस्य भारद्वाजो महारथः ।

शिरो दुर्योधनो राजा सोदर्यैः सानुगैः सह ॥ ५
चक्षुषी कृतवर्मा च गौतमश्चास्यतां वरः ।
भूतवर्मा क्षेमशर्मा करकर्षश्च वीर्यवान् ॥ ६
कलिङ्गाः सिंहलाः प्राच्याः शूराभीरा दशेरकाः ।
शका यवनकाम्बोजास्तथा हंसपदाश्च ये ॥ ७
ग्रीवायां शूरसेनाश्च दरदा मद्रकेकयाः ।
गजाश्वरथपत्त्यौघास्तस्थुः शतसहस्रशः ॥ ८
भूरिश्रवाः शलः शल्यः सोमदत्तश्च बाह्लिकः ।
अक्षौहिण्या वृता वीरा दक्षिणं पक्षमाश्रिताः ॥ ९
विन्दानुविन्दावावन्त्यौ काम्बोजश्च सुदक्षिणः ।
वामं पक्षं समाश्रित्य द्रोणपुत्राग्रगाः स्थिताः ॥ १०
पृष्ठे कलिङ्गाः साम्बष्ठा मागधाः पौण्ड्रमद्रकाः ।
गान्धाराः शकुनिप्राग्याः पार्वतीया वसातयः ॥ ११
पुच्छे वैकर्तनः कर्णः सपुत्रज्ञातिबान्धवः ।
महत्या सेनया तस्थौ नानाध्वजसमुत्थया ॥ १२
जयद्रथो भीमरथः सांयात्रिकसभो जयः ।
भूमिंजयो वृषक्राथो नैषधश्च महाबलः ॥ १३
वृता बलेन महता ब्रह्मलोकपुरस्कृताः ।
व्यूहस्योपरि ते राजन्स्थिता युद्धविशारदाः ॥ १४
द्रोणेन विहितो व्यूहः पदात्यश्वरथद्विपैः ।
वातोद्धूतार्णवाकारः प्रवृत्त इव लक्ष्यते ॥ १५
तस्य पक्षप्रपक्षेभ्यो निष्पतन्ति युयुत्सवः ।
सविद्युत्स्तनिता मेघाः सर्वदिग्भ्य इवोष्णगे ॥ १६
तस्य प्राग्ज्योतिषो मध्ये विधिवत्कल्पितं गजम् ।
आस्थितः शुशुभे राजन्नंशुमानुदये यथा ॥ १७
माल्यदामवता राजा श्वेतच्छत्रेण धार्यता ।
कृत्तिकायोगयुक्तेन पौर्णमास्यामिवेन्दुना ॥ १८
नीलाञ्जनचयप्रख्यो मदान्धो द्विरदो बभौ ।
अभिवृष्टो महामेघैर्यथा स्यात्पर्वतो महान् ॥ १९
नानानृपतिभिर्वीरैर्विविधायुधभूषणैः ।
समन्वितः पार्वतीयैः शक्रो देवगणैरिव ॥ २०
ततो युधिष्ठिरः प्रेक्ष्य व्यूहं तमतिमानुषम् ।
अजय्यमरिभिः संख्ये पार्षतं वाक्यमब्रवीत् ॥ २१
ब्राह्मणस्य वशं नाहमियामद्य यथा प्रभो ।
पारावतसवर्णाश्व तथा नीतिर्विधीयताम् ॥ २२

धृष्टद्युम्न उवाच ।

द्रोणस्य यतमानस्य वशं नैष्यसि सुव्रत ।
अहमावारयिष्यामि द्रोणमद्य सहानुगम् ॥ २३
मयि जीवति कौरव्य नोद्वेगं कर्तुमर्हसि ।
न हि शक्तो रणे द्रोणो विजेतुं मां कथंचन ॥ २४

संजय उवाच ।

एवमुक्त्वा किरन्बाणान्द्रुपदस्य सुतो बली ।
पारावतसवर्णाश्वः स्वयं द्रोणमुपाद्रवत् ॥ २५
अनिष्टदर्शनं दृष्ट्वा धृष्टद्युम्नमवस्थितम् ।
क्षणेनैवाभवद्द्रोणो नातिहृष्टमना इव ॥ २६
तं तु संप्रेक्ष्य पुत्रस्ते दुर्मुखः शत्रुकर्शनः ।
प्रियं चिकीर्षन्द्रोणस्य धृष्टद्युम्नमवारयत् ॥ २७
स संप्रहारस्तुमुलः समरूप इवाभवत् ।
पार्षतस्य च शूरस्य दुर्मुखस्य च भारत ॥ २८
पार्षतः शरजालेन क्षिप्रं प्रच्छाद्य दुर्मुखम् ।
भारद्वाजं शरौघेण महता समवारयत् ॥ २९
द्रोणमावारितं दृष्ट्वा भृशायस्तस्तवात्मजः ।
नानालिङ्गैः शरव्रातैः पार्षतं सममोहयत् ॥ ३०
तयोर्विषक्तयोः संख्ये पाञ्चाल्यकुरुमुख्ययोः ।
द्रोणो यौधिष्ठिरं सैन्यं बहुधा व्यधमच्छरैः ॥ ३१
अनिलेन यथाभ्राणि विच्छिन्नानि समन्ततः ।
तथा पार्थस्य सैन्यानि विच्छिन्नानि कचित्कचित् ॥
मुहूर्तमिव तद्युद्धमासीन्मधुरदर्शनम् ।
तत उन्मत्तवद्राजन्निर्मर्यादमवर्तत ॥ ३३
नैव स्वे न परे राजन्नज्ञायन्त परस्परम् ।

अनुमानेन संज्ञाभिर्युद्धं तत्समवर्तत ॥ ३४
चूडामणिषु निष्केषु भूषणेष्वसिचर्मसु ।
तेषामादित्यवर्णाभा मरीच्यः प्रचकाशिरे ॥ ३५
तत्प्रकीर्णपताकानां रथवारणवाजिनाम् ।
बलाकाशबलाभ्राभं ददृशे रूपमाहवे ॥ ३६
नरानेव नरा जघ्नुरुदग्राश्च हया हयान् ।
रथांश्च रथिनो जघ्नुर्वारणा वरवारणान् ॥ ३७
समुच्छ्रितपताकानां गजानां परमद्विपैः ।
क्षणेन तुमुलो घोरः संग्रामः समवर्तत ॥ ३८
तेषां संसक्तगात्राणां कर्षतामितरेतरम् ।
दन्तसंघातसंघर्षात्सधूमोऽग्निरजायत ॥ ३९
विप्रकीर्णपताकास्ते विषाणजनिताग्नयः ।
बभूवुः खं समासाद्य सविद्युत इवाम्बुदाः ॥ ४०
विक्षरद्भिर्नदद्भिश्च निपतद्भिश्च वारणैः ।
संबभूव मही कीर्णा मेघैर्द्यौरिव शारदी ॥ ४१
तेषामाहन्यमानानां बाणतोमरवृष्टिभिः ।
वारणानां रवो जज्ञे मेघानामिव संप्लवे ॥ ४२
तोमराभिहताः केचिद्बाणैश्च परमद्विपाः ।
वित्रेसुः सर्वभूतानां शब्दमेवापरेऽव्रजन् ॥ ४३
विषाणाभिहताश्चापि केचित्तत्र गजा गजैः ।
चक्रुरार्तस्वरं घोरमुत्पातजलदा इव ॥ ४४
प्रतीपं ह्रियमाणाश्च वारणा वरवारणैः ।
उन्मथ्य पुनराजह्रुः प्रेरिताः परमाङ्कुशैः ॥ ४५
महामात्रा महामात्रैस्ताडिताः शरतोमरैः ।
गजेभ्यः पृथिवीं जग्मुर्मुक्तप्रहरणाङ्कुशाः ॥४६
निर्मनुष्याश्च मातङ्गा विनदन्तस्ततस्ततः ।
छिन्नाभ्राणीव संपेतुः संप्रविश्य परस्परम् ॥ ४७
हतान्परिवहन्तश्च यन्त्रिताः परमायुधैः ।
दिशो जग्मुर्महानागाः केचिदेकचरा इव ॥ ४८
ताडितास्ताड्यमानाश्च तोमरर्ष्टिपरश्वधैः ।
पेतुरार्तस्वरं कृत्वा तदा विशसने गजाः ॥ ४९
तेषां शैलोपमैः कायैर्निपतद्भिः समन्ततः ।
आहता सहसा भूमिश्चकम्पे च ननाद च ॥ ५०
सादितैः सगजारोहैः सपताकैः समन्ततः ।
मातङ्गैः शुशुभे भूमिर्विकीर्णैरिव पर्वतैः ॥ ५१
गजस्थाश्च महामात्रा निर्भिन्नहृदया रणे ।
रथिभिः पातिता भल्लैर्विकीर्णाङ्कुशतोमराः ॥ ५२
क्रौञ्चवद्विनदन्तोऽन्ये नाराचाभिहता गजाः ।
परान्स्वांश्चापि मृद्नन्तः परिपेतुर्दिशोदश ॥ ५३
गजाश्वरथसंघानां शरीरौघसमावृता ।
बभूव पृथिवी राजन्मांसशोणितकर्दमा ॥ ५४
प्रमथ्य च विषाणाग्रैः समुत्क्षिप्य च वारणैः ।
सचक्राश्च विचक्राश्च रथैरेव महारथाः ॥ ५५
रथाश्च रथिभिर्हीना निर्मनुष्याश्च वाजिनः ।
हतारोहाश्च मातङ्गा दिशो जग्मुः शरातुराः ॥ ५६
जघानात्र पिता पुत्रं पुत्रश्च पितरं तथा ।
इत्यासीत्तुमुलं युद्धं न प्रज्ञायत किंचन ॥ ५७
आ गुल्फेभ्योऽवसीदन्त नराः शोणितकर्दमे ।
दीप्यमानैः परिक्षिप्ता दावैरिव महाद्रुमाः ॥ ५८
शोणितैः सिच्यमानानि वस्त्राणि कवचानि च ।
छत्राणि च पताकाश्च सर्वं रक्तमदृश्यत ॥ ५९
हयौघाश्च रथौघाश्च नरौघाश्च निपातिताः ।
संवृताः पुनरावृत्ता बहुधा रथनेमिभिः ॥ ६०
स गजौघमहावेगः परासुनरशैवलः ।
रथौघतुमुलावर्तः प्रबभौ सैन्यसागरः ॥ ६१
तं वाहनमहानौभिर्योधा जयधनैषिणः ।
अवगाह्यावमज्जन्तो नैव मोहं प्रचक्रिरे ॥ ६२
शरवर्षाभिवृष्टेषु योधेष्वजितलक्ष्मसु ।
न हि स्वचित्ततां लेभे कश्चिदाहतलक्षणः ॥ ६३
वर्तमाने तथा युद्धे घोररूपे भयंकरे ।

मोहयित्वा परान्द्रोणो युधिष्ठिरमुपाद्रवत् ॥ ६४

इति श्रीमहाभारते द्रोणपर्वणि
एकोनविंशोऽध्यायः ॥ १९ ॥

२०

संजय उवाच ।

ततो युधिष्ठिरो द्रोणं दृष्ट्वान्तिकमुपागतम् ।
महता शरवर्षेण प्रत्यगृह्णादभीतवत् ॥ १
ततो हलहलाशब्द आसीद्यौधिष्ठिरे बले ।
जिघृक्षति महासिंहे गजानामिव यूथपम् ॥ २
दृष्ट्वा द्रोणं ततः शूरः सत्यजित्सत्यविक्रमः ।
युधिष्ठिरं परिप्रेप्सुमाचार्यं समुपाद्रवत् ॥ ३
तत आचार्यपाञ्चाल्यौ युयुधाते परस्परम् ।
विक्षोभयन्तौ तत्सैन्यमिन्द्रवैरोचनाविव ॥ ४
ततः सत्यजितं तीक्ष्णैर्दशभिर्मर्मभेदिभिः ।
अविध्यच्छीघ्रमाचार्यश्छित्त्वास्य सशरं धनुः ॥ ५
स शीघ्रतरमादाय धनुरन्यत्प्रतापवान् ।
द्रोणं सोऽभिजघानाशु विंशद्भिः कङ्कपत्रिभिः ॥ ६
ज्ञात्वा सत्यजिता द्रोणं ग्रस्यमानमिवाहवे ।
वृकः शरशतैस्तीक्ष्णैः पाञ्चाल्यो द्रोणमर्दयत् ॥ ७
संछाद्यमानं समरे द्रोणं दृष्ट्वा महारथम् ।
चुक्रुशुः पाण्डवा राजन्वस्त्राणि दुधुवुश्च ह ॥ ८
वृकस्तु परमक्रुद्धो द्रोणं षष्ट्या स्तनान्तरे ।
विव्याध बलवान्राजंस्तदद्भुतमिवाभवत् ॥ ९
द्रोणस्तु शरवर्षेण छाद्यमानो महारथः ।
वेगं चक्रे महावेगः क्रोधादुद्वृत्य चक्षुषी ॥ १०
ततः सत्यजितश्चापं छित्त्वा द्रोणो वृकस्य च ।
षड्भिःससूतं सहयं शरैर्द्रोणोऽवधीद्वृकम् ॥ ११
अथान्यद्धनुरादाय सत्यजिद्वेगवत्तरम् ।
साश्वं ससूतं विशिखैर्द्रोणं विव्याध सध्वजम् ॥ १२
स तन्न ममृषे द्रोणः पाञ्चाल्येनार्दनं मृधे ।
ततस्तस्य विनाशाय सत्वरं व्यसृजच्छरान् ॥ १३
हयान्ध्वजं धनुर्मुष्टिमुभौ च पार्ष्णिसारथी ।
अवाकिरत्ततो द्रोणः शरवर्षैः सहस्रशः ॥ १४
तथा संछिद्यमानेषु कार्मुकेषु पुनः पुनः ।
पाञ्चाल्यः परमास्त्रज्ञः शोणाश्वं समयोधयत् ॥ १५
स सत्यजितमालक्ष्य तथोदीर्णं महाहवे ।
अर्धचन्द्रेण चिच्छेद शिरस्तस्य महात्मनः ॥ १६
तस्मिन्हते महामात्रे पाञ्चालानां रथर्षभे ।
अपायाज्जवनैरश्वैर्द्रोणात्त्रस्तो युधिष्ठिरः ॥ १७
पाञ्चालाः केकया मत्स्याश्चेदिकारूषकोसलाः ।
युधिष्ठिरमुदीक्षन्तो हृष्टा द्रोणमुपाद्रवन् ॥ १८
ततो युधिष्ठिरप्रेप्सुराचार्यः शत्रुपूगहा ।
व्यधमत्तान्यनीकानि तूलराशिमिवानिलः ॥ १९
निर्दहन्तमनीकानि तानि तानि पुनः पुनः ।
द्रोणं मत्स्यादवरजः शतानीकोऽभ्यवर्तत ॥ २०
सूर्यरश्मिप्रतीकाशैः कर्मारपरिमार्जितैः ।
षड्भिः ससूतं सहयं द्रोणं विद्ध्वानदद्भृशम् ॥ २१
तस्य नानदतो द्रोणः शिरः कायात्सकुण्डलम् ।
क्षुरेणापाहरत्तूर्णं ततो मत्स्याः प्रदुद्रुवुः ॥ २२
मत्स्याञ्जित्वाजयच्चेदीन्कारूषान्केकयानपि ।
पाञ्चालान्सृञ्जयान्पाण्डून्भारद्वाजः पुनः पुनः ॥ २३
तं दहन्तमनीकानि क्रुद्धमग्निं यथा वनम् ।
दृष्ट्वा रुक्मरथं क्रुद्धं समकम्पन्त सृञ्जयाः ॥ २४
उत्तमं ह्याददानस्य धनुरस्याशुकारिणः ।
ज्याघोषो निघ्नतोऽमित्रान्दिक्षु सर्वासु शुश्रुवे ॥ २५
नागानश्वान्पदातींश्च रथिनो गजसादिनः ।
रौद्रा हस्तवता मुक्ताः प्रमथ्नन्ति स्म सायकाः ॥ २६
नानद्यमानः पर्जन्यो मिश्रवातो हिमात्यये ।
अश्मवर्षमिवावर्षत्परेषां भयमादधत् ॥ २७
सर्वा दिशः समचरत्सैन्यं विक्षोभयन्निव ।

बली शूरो महेष्वासो मित्राणामभयंकरः ॥ २८
तस्य विद्युदिवाभ्रेषु चापं हेमपरिष्कृतम् ।
दिक्षु सर्वास्वपश्याम द्रोणस्यामिततेजसः ॥ २९
द्रोणस्तु पाण्डवानीके चकार कदनं महत् ।
यथा दैत्यगणे विष्णुः सुरासुरनमस्कृतः ॥ ३०
स शूरः सत्यवाक्प्राज्ञो बलवान्सत्यविक्रमः ।
महानुभावः कालान्ते रौद्रीं भीरुविभीषणाम् ॥ ३१
कवचोर्मिध्वजावर्तां मर्त्यकूलापहारिणीम् ।
गजवाजिमहाग्राहामसिमीनां दुरासदाम् ॥ ३२
वीरास्थिशर्करां रौद्रां भेरीमुरजकच्छपाम् ।
चर्मवर्मप्लवां घोरां केशशैवलशाड्वलाम् ॥ ३३
शरौघिणीं धनुःस्रोतां बाहुपन्नगसंकुलाम् ।
रणभूमिवहां घोरां कुरुसृञ्जयवाहिनीम् ।
मनुष्यशीर्षपाषाणां शक्तिमीनां गदोडुपाम् ॥ ३४
उष्णीषफेनवसनां निष्कीर्णान्त्रसरीसृपाम् ।
वीरापहारिणीमुग्रां मांसशोणितकर्दमाम् ॥ ३५
हस्तिग्राहां केतुवृक्षां क्षत्रियाणां निमज्जनीम् ।
क्रूरां शरीरसंघाटां सादिनक्रां दुरत्ययाम् ।
द्रोणः प्रावर्तयत्तत्र नदीमन्तकगामिनीम् ॥ ३६
क्रव्यादगणसंघुष्टां श्वशृगालगणायुताम् ।
निषेवितां महारौद्रैः पिशिताशैः समन्ततः ॥ ३७
तं दहन्तमनीकानि रथोदारं कृतान्तवत् ।
सर्वतोऽभ्यद्रवन्द्रोणं कुन्तीपुत्रपुरोगमाः ॥ ३८
तांस्तु शूरान्महेष्वासांस्तावकाभ्युद्यतायुधाः ।
राजानो राजपुत्राश्च समन्तात्पर्यवारयन् ॥ ३९
ततो द्रोणः सत्यसंधः प्रभिन्न इव कुञ्जरः ।
अभ्यतीत्य रथानीकं दृढसेनमपातयत् ॥ ४०
ततो राजानमासाद्य प्रहरन्तमभीतवत् ।
अविध्यन्नवभिः क्षेमं स हतः प्रापतद्रथात् ॥ ४१
स मध्यं प्राप्य सैन्यानां सर्वाः प्रविचरन्दिशः ।
त्राता ह्यभवदन्येषां न त्रातव्यः कथंचन ॥ ४२
शिखण्डिनं द्वादशभिर्विंशत्या चोत्तमौजसम् ।
वसुदानं च भल्लेन प्रेषयद्यमसादनम् ॥ ४३
अशीत्या क्षत्रवर्माणं षड्विंशत्या सुदक्षिणम् ।
क्षत्रदेवं तु भल्लेन रथनीडादपाहरत् ॥ ४४
युधामन्युं चतुःषष्ट्या त्रिंशता चैव सात्यकिम् ।
विद्ध्वा रुक्मरथस्तूर्णं युधिष्ठिरमुपाद्रवत् ॥ ४५
ततो युधिष्ठिरः क्षिप्रं कितवो राजसत्तमः ।
अपायाज्जवनैरश्वैः पाञ्चाल्यो द्रोणमभ्ययात् ॥ ४६
तं द्रोणः सधनुष्कं तु साश्वयन्तारमक्षिणोत् ।
स हतः प्रापतद्भूमौ रथाज्ज्योतिरिवाम्बरात् ॥ ४७
तस्मिन्हते राजपुत्रे पाञ्चालानां यशस्करे ।
हत द्रोणं हत द्रोणमित्यासीत्तुमुलं महत् ॥ ४८
तांस्तथा भृशसंक्रुद्धान्पाञ्चालान्मत्स्यकेकयान् ।
सृञ्जयान्पाण्डवांश्चैव द्रोणो व्यक्षोभयद्बली ॥ ४९
सात्यकिं चेकितानं च धृष्टद्युम्नशिखण्डिनौ ।
वार्धक्षेमिं चित्रसेनं सेनाबिन्दुं सुवर्चसम् ॥ ५०
एतांश्चान्यांश्च सुबहून्नानाजनपदेश्वरान् ।
सर्वान्द्रोणोऽजयद्युद्धे कुरुभिः परिवारितः ॥ ५१
तावकास्तु महाराज जयं लब्ध्वा महाहवे ।
पाण्डवेयान्रणे जघ्नुर्द्रवमाणान्समन्ततः ॥ ५२
ते दानवा इवेन्द्रेण वध्यमाना महात्मना ।
पाञ्चालाः केकया मत्स्याः समकम्पन्त भारत ॥ ५३

इति श्रीमहाभारते द्रोणपर्वणि
विंशोऽध्यायः ॥ २० ॥

२१

धृतराष्ट्र उवाच ।

भारद्वाजेन भग्नेषु पाण्डवेषु महामृधे ।
पाञ्चालेषु च सर्वेषु कश्चिदन्योऽभ्यवर्तत ॥ १
आर्यां युद्धे मतिं कृत्वा क्षत्रियाणां यशस्करीम् ।

असेवितां कापुरुषैः सेवितां पुरुषर्षभैः ॥ २
स हि वीरो नरः सूत यो भग्नेषु निवर्तते ।
अहो नासीत्पुमान्कश्चिद्दृष्ट्वा द्रोणं व्यवस्थितम् ॥ ३
जृम्भमाणमिव व्याघ्रं प्रभिन्नमिव कुञ्जरम् ।
त्यजन्तमाहवे प्राणान्संनद्धं चित्रयोधिनम् ॥ ४
महेष्वासं नरव्याघ्रं द्विषतामघवर्धनम् ।
कृतज्ञं सत्यनिरतं दुर्योधनहितैषिणम् ॥ ५
भारद्वाजं तथानीके दृष्ट्वा शूरमवस्थितम् ।
के वीराः संन्यवर्तन्त तन्ममाचक्ष्व संजय ॥ ६

संजय उवाच ।

तान्दृष्ट्वा चलितान्संख्ये प्रणुन्नान्द्रोणसायकैः ।
पाञ्चालान्पाण्डवान्मत्स्यान्सृञ्जयांश्चेदिकेकयान् ॥ ७
द्रोणचापविमुक्तेन शरौघेणासुहारिणा ।
सिन्धोरिव महौघेन ह्रियमाणान्यथा प्लवान् ॥ ८
कौरवाः सिंहनादेन नानावाद्यस्वनेन च ।
रथद्विपनराश्वैश्च सर्वतः पर्यवारयन् ॥ ९
तान्पश्यन्सैन्यमध्यस्थो राजा स्वजनसंवृतः ।
दुर्योधनोऽब्रवीत्कर्णं प्रहृष्टः प्रहसन्निव ॥ १०
पश्य राधेय पाञ्चालान्प्रणुन्नान्द्रोणसायकैः ।
सिंहेनेव मृगान्वन्यांस्त्रासितान्दृढधन्वना ॥ ११
नैते जातु पुनर्युद्धमीहेयुरिति मे मतिः ।
यथा तु भग्ना द्रोणेन वातेनेव महाद्रुमाः ॥ १२
अर्द्यमानाः शरैरेते रुक्मपुङ्खैर्महात्मना ।
पथा नैकेन गच्छन्ति घूर्णमानास्ततस्ततः ॥ १३
संनिरुद्धाश्च कौरव्यैर्द्रोणेन च महात्मना ।
एतेऽन्ये मण्डलीभूताः पावकेनेव कुञ्जराः ॥ १४
भ्रमरैरिव चाविष्टा द्रोणस्य निशितैः शरैः ।
अन्योन्यं समलीयन्त पलायनपरायणाः ॥ १५
एष भीमो दृढक्रोधो हीनः पाण्डवसृञ्जयैः ।
मदीयैरावृतो योधैः कर्ण तर्जयतीव माम् ॥ १६
व्यक्तं द्रोणमयं लोकमद्य पश्यति दुर्मतिः ।
निराशो जीवितान्नूनमद्य राज्याच्च पाण्डवः ॥ १७

कर्ण उवाच ।

नैष जातु महाबाहुर्जीवन्नाहवमुत्सृजेत् ।
न चेमान्पुरुषव्याघ्र सिंहनादान्विशक्ष्यते ॥ १८
न चापि पाण्डवा युद्धे भज्येरन्निति मे मतिः ।
शूराश्च बलवन्तश्च कृतास्त्रा युद्धदुर्मदाः ॥ १९
विषाग्निद्यूतसंक्लेशान्वनवासं च पाण्डवाः ।
स्मरमाणा न हास्यन्ति संग्राममिति मे मतिः ॥२०
निकृतो हि महाबाहुरमितौजा वृकोदरः ।
वरान्वरान्हि कौन्तेयो रथोदारान्हनिष्यति ॥ २१
असिना धनुषा शक्त्या हयैर्नागैर्नरै रथैः ।
आयसेन च दण्डेन व्रातान्व्रातान्हनिष्यति ॥ २२
तमेते चानुवर्तन्ते सात्यकिप्रमुखा रथाः ।
पाञ्चालाः केकया मत्स्याः पाण्डवाश्च विशेषतः ॥२३
शूराश्च बलवन्तश्च विक्रान्ताश्च महारथाः ।
विशेषतश्च भीमेन संरब्धेनाभिचोदिताः ॥ २४
ते द्रोणमभिवर्तन्ते सर्वतः कुरुपुंगवाः ।
वृकोदरं परीप्सन्तः सूर्यमभ्रगणा इव ॥ २५
एकायनगता ह्येते पीडयेयुर्यतव्रतम् ।
अरक्ष्यमाणं शलभा यथा दीपं मुमूर्षवः ।
असंशयं कृतास्त्राश्च पर्याप्ताश्चापि वारणे ॥ २६
अतिभारं त्वहं मन्ये भारद्वाजे समाहितम् ।
ते शीघ्रमनुगच्छामो यत्र द्रोणो व्यवस्थितः ।
काका इव महानागं मा वै हन्युर्यतव्रतम् ॥ २७

संजय उवाच ।

राधेयस्य वचः श्रुत्वा राजा दुर्योधनस्तदा ।
भ्रातृभिः सहितो राजन्प्रायाद्द्रोणरथं प्रति ॥ २८
तत्रारावो महानासीदेकं द्रोणं जिघांसताम् ।

पाण्डवानां निवृत्तानां नानावर्णैर्हयोत्तमैः ॥ २९

इति श्रीमहाभारते द्रोणपर्वणि
एकविंशोऽध्यायः ॥ २१ ॥

२२

धृतराष्ट्र उवाच ।

सर्वेषामेव मे ब्रूहि रथचिह्नानि संजय ।
ये द्रोणमभ्यवर्तन्त क्रुद्धा भीमपुरोगमाः ॥ १

संजय उवाच ।

ऋश्यवर्णैर्हयैर्दृष्ट्वा व्यायच्छन्तं वृकोदरम् ।
रजताश्वस्ततः शूरः शैनेयः संन्यवर्तत ॥ २
दर्शनीयास्तु काम्बोजाः शुकपत्रपरिच्छदाः ।
वहन्तो नकुलं शीघ्रं तावकानभिदुद्रुवुः ॥ ३
कृष्णास्तु मेघसंकाशाः सहदेवमुदायुधम् ।
भीमवेगा नरव्याघ्रमवहन्वाततरंहसः ॥ ४
हेमोत्तमप्रतिच्छन्नैर्हयैर्वातसमैर्जवे ।
अभ्यवर्तन्त सैन्यानि सर्वाण्येव युधिष्ठिरम् ॥ ५
राज्ञस्त्वनन्तरं राजा पाञ्चाल्यो द्रुपदोऽभवत् ।
जातरूपमयच्छत्रः सर्वैः स्वैरभिरक्षितः ॥ ६
ललामैर्हरिभिर्युक्तैः सर्वशब्दक्षमैर्युधि ।
राज्ञां मध्ये महेष्वासः शान्तभीरभ्यवर्तत ॥ ७
तं विराटोऽन्वयात्पश्चात्सह शूरैर्महारथैः ।
केकयाश्च शिखण्डी च धृष्टकेतुस्तथैव च ।
स्वैः स्वैः सैन्यैः परिवृता मत्स्यराजानमन्वयुः ॥ ८
ते तु पाटलपुष्पाणां समवर्णा हयोत्तमाः ।
वहमाना व्यराजन्त मत्स्यस्यामित्रघातिनः ॥ ९
हारिद्रसमवर्णास्तु जवना हेममालिनः ।
पुत्रं विराटराजस्य सत्वराः समुदावहन् ॥ १०
इन्द्रगोपकवर्णैस्तु भ्रातरः पञ्च केकयाः ।
जातरूपसमाभासः सर्वे लोहितकध्वजाः ॥ ११
ते हेममालिनः शूराः सर्वे युद्धविशारदाः ।
वर्षन्त इव जीमूताः प्रत्यदृश्यन्त दंशिताः ॥ १२
आमपात्रनिभाकाराः पाञ्चाल्यममितौजसम् ।
दान्तास्ताम्रारुणा युक्ताः शिखण्डिनमुदावहन् ॥१३
तथा द्वादशसाहस्राः पाञ्चालानां महारथाः ।
तेषां तु षट् सहस्राणि ये शिखण्डिनमन्वयुः ॥ १४
पुत्रं तु शिशुपालस्य नरसिंहस्य मारिष ।
आक्रीडन्तो वहन्ति स्म सारङ्गशबला हयाः ॥ १५
धृष्टकेतुश्च चेदीनामृषभोऽतिबलोदितः ।
काम्बोजैः शबलैरश्वैरभ्यवर्तत दुर्जयः ॥ १६
बृहत्क्षत्रं तु कैकेयं सुकुमारं हयोत्तमाः ।
पलालधूमवर्णाभाः सैन्धवाः शीघ्रमावहन् ॥ १७
मल्लिकाक्षाः पद्मवर्णा बाह्लिजाताः स्वलंकृताः ।
शूरं शिखण्डिनः पुत्रं क्षत्रदेवमुदावहन् ॥ १८
युवानमवहन्युद्धे क्रौञ्चवर्णा हयोत्तमाः ।
काश्यस्याभिभुवः पुत्रं सुकुमारं महारथम् ॥ १९
श्वेतास्तु प्रतिविन्ध्यं तं कृष्णग्रीवा मनोजवाः ।
यन्तुः प्रेष्यकरा राजन्राजपुत्रमुदावहन् ॥ २०
सुतसोमं तु यं धौम्यात्पार्थः पुत्रमयाचत ।
माषपुष्पसवर्णास्तमवहन्वाजिनो रणे ॥ २१

सहस्रसोमप्रतिमा बभूवुः
पुरे कुरूणामुदयेन्दुनाम्नि ।
तस्मिञ्जातः सोमसंक्रन्दमध्ये
यस्मात्तस्मात्सुतसोमोऽभवत्सः ॥ २२

नाकुलिं तु शतानीकं शालपुष्पनिभा हयाः ।
आदित्यतरुणप्रख्याः श्लाघनीयमुदावहन् ॥ २३
काञ्चनप्रतिमैर्योक्त्रैर्मयूरग्रीवसंनिभाः ।
द्रौपदेयं नरव्याघ्रं श्रुतकर्माणमावहन् ॥ २४
श्रुतकीर्तिं श्रुतनिधिं द्रौपदेयं हयोत्तमाः ।
ऊहुः पार्थसमं युद्धे चाषपत्रनिभा हयाः ॥ २५
यमाहुरध्यर्धगुणं कृष्णात्पार्थाच्च संयुगे ।

अभिमन्युं पिशङ्गास्तं कुमारमवहन्रणे ॥ २६
एकस्तु धार्तराष्ट्रेभ्यः पाण्डवान्यः समाश्रितः ।
तं बृहन्तो महाकाया युयुत्सुमवहन्रणे ॥ २७
पलालकाण्डवर्णास्तु वार्धक्षेमिं तरस्विनम् ।
ऊहुः सुतुमुले युद्धे हया हृष्टाः स्वलंकृताः ॥ २८
कुमारं शितिपादास्तु रुक्मपत्रैरुरश्छदैः ।
सौचित्तिमवहन्युद्धे यन्तुः प्रेष्यकरा हयाः ॥ २९
रुक्मपृष्ठावकीर्णास्तु कौशेयसदृशा हयाः ।
सुवर्णमालिनः क्षान्ताः श्रेणिमन्तमुदावहन् ॥ ३०
रुक्ममालाधराः शूरा हेमवर्णाः स्वलंकृताः ।
काशिराजं हयश्रेष्ठाः श्लाघनीयमुदावहन् ॥ ३१
अस्त्राणां च धनुर्वेदे ब्राह्मे वेदे च पारगम् ।
तं सत्यधृतिमायान्तमरुणाः समुदावहन् ॥ ३२
यः स पाञ्चालसेनानीर्द्रोणमंशमकल्पयत् ।
पारावतसवर्णाश्वा धृष्टद्युम्नमुदावहन् ॥ ३३
तमन्वयात्सत्यधृतिः सौचित्तिर्युद्धदुर्मदः ।
श्रेणिमान्वसुदानश्च पुत्रः काश्यस्य चाभिभो ॥ ३४
युक्तैः परमकाम्बोजैर्जवनैर्हेममालिभिः ।
भीषयन्तो द्विषत्सैन्यं यमवैश्रवणोपमाः ॥ ३५
प्रभद्रकास्तु पाञ्चालाः षट् सहस्राण्युदायुधाः ।
नानावर्णैर्हयश्रेष्ठैर्हेमचित्ररथध्वजाः ॥ ३६
शरव्रातैर्विधुन्वन्तः शत्रून्विततकार्मुकाः ।
समानमृत्यवो भूत्वा धृष्टद्युम्नं समन्वयुः ॥ ३७
बभ्रुकौशेयवर्णास्तु सुवर्णवरमालिनः ।
ऊहुरग्लानमनसश्चेकितानं हयोत्तमाः ॥ ३८
इन्द्रायुधसवर्णैस्तु कुन्तिभोजो हयोत्तमैः ।
आयात्सुवश्यैः पुरुजिन्मातुलः सव्यसाचिनः ॥ ३९
अन्तरिक्षसवर्णास्तु तारकाचित्रिता इव ।
राजानं रोचमानं ते हयाः संख्ये समावहन् ॥ ४०
कर्बुराः शितिपादास्तु स्वर्णजालपरिच्छदाः ।
जारासंधिं हयश्रेष्ठाः सहदेवमुदावहन् ॥ ४१
ये तु पुष्करनालस्य समवर्णा हयोत्तमाः ।
जवे श्येनसमाश्चित्राः सुदामानमुदावहन् ॥ ४२
शशलोहितवर्णास्तु पाण्डुरोद्गतराजयः ।
पाञ्चाल्यं गोपतेः पुत्रं सिंहसेनमुदावहन् ॥ ४३
पाञ्चालानां नरव्याघ्रो यः ख्यातो जनमेजयः ।
तस्य सर्षपपुष्पाणां तुल्यवर्णा हयोत्तमाः ॥ ४४
माषवर्णास्तु जवना बृहन्तो हेममालिनः ।
दधिपृष्ठाश्चन्द्रमुखाः पाञ्चाल्यमवहन्द्रुतम् ॥ ४५
शूराश्च भद्रकाश्चैव शरकाण्डनिभा हयाः ।
पद्मकिञ्जल्कवर्णाभा दण्डधारमुदावहन् ॥ ४६
बिभ्रतो हेममालाश्च चक्रवाकोदरा हयाः ।
कोसलाधिपतेः पुत्रं सुक्षत्रं वाजिनोऽवहन् ॥ ४७
शबलास्तु बृहन्तोऽश्वा दान्ता जाम्बूनदस्रजः ।
युद्धे सत्यधृतिं क्षैमिमवहन्प्रांशवः शुभाः ॥ ४८
एकवर्णेन सर्वेण ध्वजेन कवचेन च ।
अश्वैश्च धनुषा चैव शुक्लैः शुक्लो न्यवर्तत ॥ ४९
समुद्रसेनपुत्रं तु सामुद्रा रुद्रतेजसम् ।
अश्वाः शशाङ्कसदृशाश्चन्द्रदेवमुदावहन् ॥ ५०
नीलोत्पलसवर्णास्तु तपनीयविभूषिताः ।
शैब्यं चित्ररथं युद्धे चित्रमाल्यावहन्हयाः ॥ ५१
कलायपुष्पवर्णास्तु श्वेतलोहितराजयः ।
रथसेनं हयश्रेष्ठाः समूहुर्युद्धदुर्मदम् ॥ ५२
यं तु सर्वमनुष्येभ्यः प्राहुः शूरतरं नृपम् ।
तं पटच्चरहन्तारं शुकवर्णावहन्हयाः ॥ ५३
चित्रायुधं चित्रमाल्यं चित्रवर्मायुधध्वजम् ।
ऊहुः किंशुकपुष्पाणां तुल्यवर्णा हयोत्तमाः ॥ ५४
एकवर्णेन सर्वेण ध्वजेन कवचेन च ।
धनुषा रथवाहैश्च नीलैर्नीलोऽभ्यवर्तत ॥ ५५
नानारूपै रत्नचित्रैर्वरूथध्वजकार्मुकैः ।

वाजिध्वजपताकाभिश्चित्रैश्चित्रोऽभ्यवर्तत ॥ ५६
ये तु पुष्करपत्रस्य तुल्यवर्णा हयोत्तमाः ।
ते रोचमानस्य सुतं हेमवर्णमुदावहन् ॥ ५७
योधाश्च भद्रकाराश्च शरदण्डानुदण्डजाः ।
श्वेताण्डाः कुक्कुटाण्डाभा दण्डकेतुमुदावहन् ॥ ५८
आटरूषकपुष्पाभा हयाः पाण्ड्यानुयायिनाम् ।
अवहन्रथमुख्यानामयुतानि चतुर्दश ॥ ५९
नानारूपेण वर्णेन नानाकृतिमुखा हयाः ।
रथचक्रध्वजं वीरं घटोत्कचमुदावहन् ॥ ६०
सुवर्णवर्णा धर्मज्ञमनीकस्थं युधिष्ठिरम् ।
राजश्रेष्ठं हयश्रेष्ठाः सर्वतः पृष्ठतोऽन्वयुः ।
वर्णैश्चोच्चावचैर्दिव्यैः सदश्वानां प्रभद्रकाः ॥ ६१
ते यत्ता भीमसेनेन सहिताः काञ्चनध्वजाः ।
प्रत्यदृश्यन्त राजेन्द्र सेन्द्रा इव दिवौकसः ॥ ६२
अत्यरोचत तान्सर्वान्धृष्टद्युम्नः समागतान् ।
सर्वाण्यपि च सैन्यानि भारद्वाजोऽत्यरोचत ॥ ६३

इति श्रीमहाभारते द्रोणपर्वणि
द्वाविंशोऽध्यायः ॥ २२ ॥

२३

धृतराष्ट्र उवाच ।

व्यथयेयुरिमे सेनां देवानामपि संयुगे ।
आहवे ये न्यवर्तन्त वृकोदरमुखा रथाः ॥ १
संप्रयुक्तः किलैवायं दिष्टैर्भवति पूरुषः ।
तस्मिन्नेव तु सर्वार्था दृश्यन्ते वै पृथग्विधाः ॥ २
दीर्घं विप्रोषितः कालमरण्ये जटिलोऽजिनी ।
अज्ञातश्चैव लोकस्य विजहार युधिष्ठिरः ॥ ३
स एव महतीं सेनां समावर्तयदाहवे ।
किमन्यद्दैवसंयोगान्मम पुत्रस्य चाभवत् ॥ ४
युक्त एव हि भाग्येन ध्रुवमुत्पद्यते नरः ।
स तथाकृष्यते तेन न यथा स्वयमिच्छति ॥ ५
द्यूतव्यसनमासाद्य क्लेशितो हि युधिष्ठिरः ।
स पुनर्भागधेयेन सहायानुपलब्धवान् ॥ ६
अर्धं मे केकया लब्धाः काशिकाः कोसलाश्च ये ।
चेदयश्चापरे वङ्गा मामेव समुपाश्रिताः ॥ ७
पृथिवी भूयसी तात मम पार्थस्य नो तथा ।
इति मामब्रवीत्सूत मन्दो दुर्योधनस्तदा ॥ ८
तस्य सेनासमूहस्य मध्ये द्रोणः सुरक्षितः ।
निहतः पार्षतेनाजौ किमन्यद्भागधेयतः ॥ ९
मध्ये राज्ञां महाबाहुं सदा युद्धाभिनन्दिनम् ।
सर्वास्त्रपारगं द्रोणं कथं मृत्युरुपेयिवान् ॥ १०
समनुप्राप्तकृच्छ्रोऽहं संमोहं परमं गतः ।
भीष्मद्रोणौ हतौ श्रुत्वा नाहं जीवितुमुत्सहे ॥ ११
यन्मा क्षत्ताब्रवीत्तात प्रपश्यन्पुत्रगृद्धिनम् ।
दुर्योधनेन तत्सर्वं प्राप्तं सूत मया सह ॥ १२
नृशंसं तु परं तत्स्यात्त्यक्त्वा दुर्योधनं यदि ।
पुत्रशेषं चिकीर्षेयं कृच्छ्रं न मरणं भवेत् ॥ १३
यो हि धर्मं परित्यज्य भवत्यर्थपरो नरः ।
सोऽस्माच्च हीयते लोकात्क्षुद्रभावं च गच्छति ॥ १४
अद्य चाप्यस्य राष्ट्रस्य हतोत्साहस्य संजय ।
अवशेषं न पश्यामि ककुदे मृदिते सति ॥ १५
कथं स्यादवशेषं हि धुर्ययोरभ्यतीतयोः ।
यौ नित्यमनुजीवामः क्षमिणौ पुरुषर्षभौ ॥ १६
व्यक्तमेव च मे शंस यथा युद्धमवर्तत ।
केऽयुध्यन्के व्यपाकर्षन्के क्षुद्राः प्राद्रवन्भयात् ॥ १७
धनंजयं च मे शंस यद्यच्चक्रे रथर्षभः ।
तस्माद्भयं नो भूयिष्ठं भ्रातृव्याच्च विशेषतः ॥ १८
यथासीच्च निवृत्तेषु पाण्डवेषु च संजय ।
मम सैन्यावशेषस्य संनिपातः सुदारुणः ।

मामकानां च ये शूराः कांस्तत्र समवारयन् ॥ १९

इति श्रीमहाभारते द्रोणपर्वणि
त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

संजय उवाच ।

महद्वैरवमासीन्नः संनिवृत्तेषु पाण्डुषु ।
दृष्ट्वा द्रोणं छाद्यमानं तैर्भास्करमिवाम्बुदैः ॥ १
तैश्चोद्धूतं रजस्तीव्रमवचक्रे चमूं तव ।
ततो हतममन्याम द्रोणं दृष्टिपथे हते ॥ २
तांस्तु शूरान्महेष्वासान्क्रूरं कर्म चिकीर्षतः ।
दृष्ट्वा दुर्योधनस्तूर्णं स्वसैन्यं समचूचुदत् ॥ ३
यथाशक्ति यथोत्साहं यथासत्त्वं नराधिपाः ।
वारयध्वं यथायोगं पाण्डवानामनीकिनीम् ॥ ४
ततो दुर्मर्षणो भीममभ्यगच्छत्सुतस्तव ।
आराद्दृष्ट्वा किरन्बाणैरिच्छन्द्रोणस्य जीवितम् ॥ ५
तं बाणैरवतस्तार क्रुद्धो मृत्युमिवाहवे ।
तं च भीमोऽतुदद्बाणैस्तदासीत्तुमुलं महत् ॥ ६
त ईश्वरसमादिष्टाः प्राज्ञाः शूराः प्रहारिणः ।
बाह्यं मृत्युभयं कृत्वा प्रत्यतिष्ठन्परान्युधि ॥ ७
कृतवर्मा शिनेः पुत्रं द्रोणप्रेप्सुं विशां पते ।
पर्यवारयदायान्तं शूरं समितिशोभनम् ॥ ८
तं शैनेयः शरव्रातैः क्रुद्धः क्रुद्धमवारयत् ।
कृतवर्मा च शैनेयं मत्तो मत्तमिव द्विपम् ॥ ९
सैन्धवः क्षत्रधर्माणमापतन्तं शरौघिणम् ।
उग्रधन्वा महेष्वासं यत्तो द्रोणादवारयत् ॥ १०
क्षत्रधर्मा सिन्धुपतेश्छित्त्वा केतनकार्मुके ।
नाराचैर्बहुभिः क्रुद्धः सर्वमर्मस्वताडयत् ॥ ११
अथान्यद्धनुरादाय सैन्धवः कृतहस्तवत् ।
विव्याध क्षत्रधर्माणं रणे सर्वायसैः शरैः ॥ १२
युयुत्सुं पाण्डवार्थाय यतमानं महारथम् ।
सुबाहुर्भ्रातरं शूरं यत्तो द्रोणादवारयत् ॥ १३
सुबाहोः सधनुर्बाणावस्यतः परिघोपमौ ।
युयुत्सुः शितपीताभ्यां क्षुराभ्यामच्छिनद्भुजौ ॥ १४
राजानं पाण्डवश्रेष्ठं धर्मात्मानं युधिष्ठिरम् ।
वेलेव सागरं क्षुब्धं मद्रराट् समवारयत् ॥ १५
तं धर्मराजो बहुभिर्मर्मभिद्भिरवाकिरत् ।
मद्रेशस्तं चतुःषष्ट्या शरैर्विद्ध्वानदद्भृशम् ॥ १६
तस्य नानदतः केतुमुच्चकर्त सकार्मुकम् ।
क्षुराभ्यां पाण्डवश्रेष्ठस्तत उच्चुक्रुशुर्जनाः ॥ १७
तथैव राजा बाह्लीको राजानं द्रुपदं शरैः ।
आद्रवन्तं सहानीकं सहानीको न्यवारयत् ॥ १८
तद्युद्धमभवद्घोरं वृद्धयोः सहसेनयोः ।
यथा महायूथपयोर्द्विपयोः संप्रभिन्नयोः ॥ १९
विन्दानुविन्दावावन्त्यौ विराटं मत्स्यमार्छताम् ।
सहसैन्यौ सहानीकं यथेन्द्राग्नी पुरा बलिम् ॥ २०
तदुत्पिञ्जलकं युद्धमासीद्देवासुरोपमम् ।
मत्स्यानां केकयैः सार्धमभीताश्वरथद्विपम् ॥ २१
नाकुलिं तु शतानीकं भूतकर्मा सभापतिः ।
अस्यन्तमिषुजालानि यान्तं द्रोणादवारयत् ॥ २२
ततो नकुलदायादस्त्रिभिर्भल्लैः सुसंशितैः ।
चक्रे विबाहुशिरसं भूतकर्माणमाहवे ॥ २३
सुतसोमं तु विक्रान्तमापतन्तं शरौघिणम् ।
द्रोणायाभिमुखं वीरं विविंशतिरवारयत् ॥ २४
सुतसोमस्तु संक्रुद्धः स्वपितृव्यमजिह्मगैः ।
विविंशतिं शरैर्विद्ध्वा नाभ्यवर्तत दंशितः ॥ २५
अथ भीमरथः शाल्वमाशुगैरायसैः शितैः ।
षड्भिः साश्वनियन्तारमनयद्यमसादनम् ॥ २६
श्रुतकर्माणमायान्तं मयूरसदृशैर्हयैः ।
चैत्रसेनिर्महाराज तव पौत्रो न्यवारयत् ॥ २७
तौ पौत्रौ तव दुर्धर्षौ परस्परवधैषिणौ ।

पितॄणामर्थसिद्ध्यर्थं चक्रतुर्युद्धमुत्तमम् ॥ २८
तिष्ठन्तमग्रतो दृष्ट्वा प्रतिविन्ध्यं तमाहवे ।
द्रौणिर्मानं पितुः कुर्वन्मार्गणैः समवारयत् ॥ २९
तं क्रुद्धः प्रतिविव्याध प्रतिविन्ध्यः शितैः शरैः ।
सिंहलाङ्गूललक्ष्माणं पितुरर्थे व्यवस्थितम् ॥ ३०
प्रवपन्निव बीजानि बीजकाले नरर्षभ ।
द्रौणायनिर्द्रौपदेयं शरवर्षैरवाकिरत् ॥ ३१
यस्तु शूरतमो राजन्सेनयोरुभयोर्मतः ।
तं पटच्चरहन्तारं लक्ष्मणः समवारयत् ॥ ३२
स लक्ष्मणस्येष्वसनं छित्त्वा लक्ष्म च भारत ।
लक्ष्मणे शरजालानि विसृजन्बह्वशोभत ॥ ३३
विकर्णस्तु महाप्राज्ञो याज्ञसेनिं शिखण्डिनम् ।
पर्यवारयदायान्तं युवानं समरे युवा ॥ ३४
ततस्तमिषुजालेन याज्ञसेनिः समावृणोत् ।
विधूय तद्बाणजालं बभौ तव सुतो बली ॥ ३५
अङ्गदोऽभिमुखः शूरमुत्तमौजसमाहवे ।
द्रोणायाभिमुखं यान्तं वत्सदन्तैरवारयत् ॥ ३६
स संप्रहारस्तुमुलस्तयोः पुरुषसिंहयोः ।
सैनिकानां च सर्वेषां तयोश्च प्रीतिवर्धनः ॥ ३७
दुर्मुखस्तु महेष्वासो वीरं पुरुजितं बली ।
द्रोणायाभिमुखं यान्तं कुन्तिभोजमवारयत् ॥ ३८
स दुर्मुखं भ्रुवोर्मध्ये नाराचेन व्यताडयत् ।
तस्य तद्विबभौ वक्त्रं सनालमिव पङ्कजम् ॥ ३९
कर्णस्तु केकयान्भ्रातॄन्पञ्च लोहितकध्वजान् ।
द्रोणायाभिमुखं यातान्शरवर्षैरवारयत् ॥ ४०
ते चैनं भृशसंक्रुद्धाः शरव्रातैरवाकिरन् ।
स च तांश्छादयामास शरजालैः पुनः पुनः ॥ ४१
नैव कर्णो न ते पञ्च ददृशुर्बाणसंवृताः ।
साश्वसूतध्वजरथाः परस्परशराचिताः ॥ ४२
पुत्रस्ते दुर्जयश्चैव जयश्च विजयश्च ह ।
नीलं काश्यं जयं शूरास्त्रयस्त्रीन्प्रत्यवारयन् ॥ ४३
तद्युद्धमभवद्घोरमीक्षितृप्रीतिवर्धनम् ।
सिंहव्याघ्रतरक्षूणां यथेभमहिषर्षभैः ॥ ४४
क्षेमधूर्तिबृहन्तौ तौ भ्रातरौ सात्वतं युधि ।
द्रोणायाभिमुखं यान्तं शरैस्तीक्ष्णैस्ततक्षतुः ॥ ४५
तयोस्तस्य च तद्युद्धमत्यद्भुतमिवाभवत् ।
सिंहस्य द्विपमुख्याभ्यां प्रभिन्नाभ्यां यथा वने ॥
राजानं तु तथाम्बष्ठमेकं युद्धाभिनन्दिनम् ।
चेदिराजः शरानस्यन्क्रुद्धो द्रोणादवारयत् ॥ ४७
तमम्बष्ठोऽस्थिभेदिन्या निरविध्यच्छलाकया ।
स त्यक्त्वा सशरं चापं रथाद्भूमिमथापतत् ॥ ४८
वार्धक्षेमिं तु वार्ष्णेयं कृपः शारद्वतः शरैः ।
अक्षुद्रः क्षुद्रकैर्द्रोणात्क्रुद्धरूपमवारयत् ॥ ४९
युध्यन्तौ कृपवार्ष्णेयौ येऽपश्यंश्चित्रयोधिनौ ।
ते युद्धसक्तमनसो नान्या बुबुधिरे क्रियाः ॥ ५०
सौमदत्तिस्तु राजानं मणिमन्तमतन्द्रितम् ।
पर्यवारयदायान्तं यशो द्रोणस्य वर्धयन् ॥ ५१
स सौमदत्तेस्त्वरितश्छित्त्वेष्वसनकेतने ।
पुनः पताकां सूतं च छत्रं चापातयद्रथात् ॥ ५२
अथाप्लुत्य रथात्तूर्णं यूपकेतुरमित्रहा ।
साश्वसूतध्वजरथं तं चकर्त वरासिना ॥ ५३
रथं च स्वं समास्थाय धनुरादाय चापरम् ।
स्वयं यच्छन्हयान्राजन्व्यधमत्पाण्डवीं चमूम् ॥ ५४
मुसलैर्मुद्गरैश्चक्रैर्भिण्डिपालैः परश्वधैः ।
पांसुवाताग्निसलिलैर्भस्मलोष्टतृणद्रुमैः ॥ ५५
आरुजन्प्ररुजन्भञ्जन्निघ्नन्निद्रावयन्क्षिपन् ।
सेनां विभीषयन्नायाद्द्रोणप्रेप्सुर्घटोत्कचः ॥ ५६
तं तु नानाप्रहरणैर्नानायुद्धविशेषणैः ।
राक्षसं राक्षसः क्रुद्धः समाजघ्ने ह्यलम्बुसः ॥ ५७
तयोस्तदभवद्युद्धं रक्षोग्रामणिमुख्ययोः ।

तादृग्यादृक्पुरा वृत्तं शम्बरामरराजयोः ॥ ५८
एवं द्वंद्वशतान्यासन्रथवारणवाजिनाम् ।
पदातीनां च भद्रं ते तव तेषां च संकुलम् ॥ ५९
नैतादृशो दृष्टपूर्वः संग्रामो नैव च श्रुतः ।
द्रोणस्याभावभावेषु प्रसक्तानां यथाभवत् ॥ ६०
इदं घोरमिदं चित्रमिदं रौद्रमिति प्रभो ।
तत्र युद्धान्यदृश्यन्त प्रततानि बहूनि च ॥ ६१

इति श्रीमहाभारते द्रोणपर्वणि
चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

धृतराष्ट्र उवाच ।

तेष्वेवं संनिवृत्तेषु प्रत्युद्यातेषु भागशः ।
कथं युयुधिरे पार्थां मामकाश्च तरस्विनः ॥ १
किमर्जुनश्चाप्यकरोत्संशप्तकबलं प्रति ।
संशप्तका वा पार्थस्य किमकुर्वत संजय ॥ २

संजय उवाच ।

तथा तेषु निवृत्तेषु प्रत्युद्यातेषु भागशः ।
स्वयमभ्यद्रवद्भीमं नागानीकेन ते सुतः ॥ ३
स नाग इव नागेन गोवृषेणेव गोवृषः ।
समाहूतः स्वयं राज्ञा नागानीकमुपाद्रवत् ॥ ४
स युद्धकुशलः पार्थो बाहुवीर्येण चान्वितः ।
अभिनत्कुञ्जरानीकमचिरेणैव मारिष ॥ ५
ते गजा गिरिसंकाशाः क्षरन्तः सर्वतो मदम् ।
भीमसेनस्य नाराचैर्विमुखा विमदीकृताः ॥ ६
विधमेदभ्रजालानि यथा वायुः समन्ततः ।
व्यधमत्तान्यनीकानि तथैव पवनात्मजः ॥ ७
स तेषु विसृजन्बाणान्भीमो नागेष्वशोभत ।
भुवनेष्विव सर्वेषु गभस्तीनुदितो रविः ॥ ८
ते भीमबाणैः शतशः संस्यूता विबभुर्गजाः ।
गभस्तिभिरिवार्कस्य व्योम्नि नानाबलाहकाः ॥ ९
तथा गजानां कदनं कुर्वाणमनिलात्मजम् ।
क्रुद्धो दुर्योधनोऽभ्येत्य प्रत्यविध्यच्छितैः शरैः ॥ १०
ततः क्षणेन क्षितिपं क्षतजप्रतिमेक्षणः ।
क्षयं निनीषुर्निशितैर्भीमो विव्याध पत्रिभिः ॥ ११
स शरार्पितसर्वाङ्गः क्रुद्धो विव्याध पाण्डवम् ।
नाराचैरर्करश्म्याभैर्भीमसेनं स्मयन्निव ॥ १२
तस्य नागं मणिमयं रत्नचित्रं ध्वजे स्थितम् ।
भल्लाभ्यां कार्मुकं चैव क्षिप्रं चिच्छेद पाण्डवः ॥ १३
दुर्योधनं पीड्यमानं दृष्ट्वा भीमेन मारिष ।
चुक्षोभयिषुरभ्यागादङ्गो मातङ्गमास्थितः ॥ १४
तमापतन्तं मातङ्गमम्बुदप्रतिमस्वनम् ।
कुम्भान्तरे भीमसेनो नाराचेनार्दयद्भृशम् ॥ १५
तस्य कायं विनिर्भिद्य ममज्ज धरणीतले ।
ततः पपात द्विरदो वज्राहत इवाचलः ॥ १६
तस्यावर्जितनागस्य म्लेच्छस्यावपतिष्यतः ।
शिरश्चिच्छेद भल्लेन क्षिप्रकारी वृकोदरः ॥ १७
तस्मिन्निपतिते वीरे संप्राद्रवत सा चमूः ।
संभ्रान्ताश्वद्विपरथा पदातीनवमृद्नती ॥ १८
तेष्वनीकेषु सर्वेषु विद्रवत्सु समन्ततः ।
प्राग्ज्योतिषस्ततो भीमं कुञ्जरेण समाद्रवत् ॥ १९
येन नागेन मघवानजयद्दैत्यदानवान् ।
स नागप्रवरो भीमं सहसा समुपाद्रवत् ॥ २०
श्रवणाभ्यामथो पद्भ्यां संहतेन करेण च ।
व्यावृत्तनयनः क्रुद्धः प्रदहन्निव पाण्डवम् ॥ २१
ततः सर्वस्य सैन्यस्य नादः समभवन्महान् ।
हा हा विनिहतो भीमः कुञ्जरेणेति मारिष ॥ २२
तेन नादेन वित्रस्ता पाण्डवानामनीकिनी ।
सहसाभ्यद्रवद्राजन्यत्र तस्थौ वृकोदरः ॥ २३
ततो युधिष्ठिरो राजा हतं मत्वा वृकोदरम् ।
भगदत्तं सपाञ्चालः सर्वतः समवारयत् ॥ २४

तं रथै रथिनां श्रेष्ठाः परिवार्य समन्ततः ।
अवाकिरञ्शरैस्तीक्ष्णैः शतशोऽथ सहस्रशः ॥ २५
स विघातं पृषत्कानामङ्कुशेन समाचरन् ।
गजेन पाण्डुपाञ्चालान्व्यधमत्पर्वतेश्वरः ॥ २६
तदद्भुतमपश्याम भगदत्तस्य संयुगे ।
तथा वृद्धस्य चरितं कुञ्जरेण विशां पते ॥ २७
ततो राजा दशार्णानां प्राग्ज्योतिषमुपाद्रवत् ।
तिर्यग्यातेन नागेन समदेनाशुगामिना ॥ २८
तयोर्युद्धं समभवन्नागयोर्भीमरूपयोः ।
सपक्षयोः पर्वतयोर्यथा सद्रुमयोः पुरा ॥ २९
प्राग्ज्योतिषपतेर्नागः संनिपत्यापवृत्य च ।
पार्श्वे दशार्णाधिपतेर्भित्त्वा नागमपातयत् ॥ ३०
तोमरैः सूर्यरश्म्याभैर्भगदत्तोऽथ सप्तभिः ।
जघान द्विरदस्थं तं शत्रुं प्रचलितासनम् ॥ ३१
उपसृत्य तु राजानं भगदत्तं युधिष्ठिरः ।
रथानीकेन महता सर्वतः पर्यवारयत् ॥ ३२
स कुञ्जरस्थो रथिभिः शुशुभे सर्वतो वृतः ।
पर्वते वनमध्यस्थो ज्वलन्निव हुताशनः ॥ ३३
मण्डलं सर्वतः श्लिष्टं रथिनामुग्रधन्विनाम् ।
किरतां शरवर्षाणि स नागः पर्यवर्तत ॥ ३४
ततः प्राग्ज्योतिषो राजा परिगृह्य द्विपर्षभम् ।
प्रेषयामास सहसा युयुधानरथं प्रति ॥ ३५
शिनेः पौत्रस्य तु रथं परिगृह्य महाद्विपः ।
अभिचिक्षेप वेगेन युयुधानस्त्वपाक्रमत् ॥ ३६
बृहतः सैन्धवानश्वान्समुत्थाप्य तु सारथिः ।
तस्थौ सात्यकिमासाद्य संप्लुतस्तं रथं पुनः ॥ ३७
स तु लब्ध्वान्तरं नागस्त्वरितो रथमण्डलात् ।
निश्चक्राम ततः सर्वान्परिचिक्षेप पार्थिवान् ॥ ३८
ते त्वाशुगतिना तेन त्रास्यमाना नरर्षभाः ।
तमेकं द्विरदं संख्ये मेनिरे शतशो नृपाः ॥ ३९
ते गजस्थेन काल्यन्ते भगदत्तेन पाण्डवाः ।
ऐरावतस्थेन यथा देवराजेन दानवाः ॥ ४०
तेषां प्रद्रवतां भीमः पाञ्चालानामितस्ततः ।
गजवाजिकृतः शब्दः सुमहान्समजायत ॥ ४१
भगदत्तेन समरे काल्यमानेषु पाण्डुषु ।
प्राग्ज्योतिषमभिक्रुद्धः पुनर्भीमः समभ्ययात् ॥ ४२
तस्याभिद्रवतो वाहान्हस्तमुक्तेन वारिणा ।
सिक्त्वा व्यत्रासयन्नागस्ते पार्थमहरंस्ततः ॥ ४३
ततस्तमभ्ययात्तूर्णं रुचिपर्वाकृतीसुतः ।
समुक्षञ्शरवर्षेण रथस्थोऽन्तकसंनिभः ॥ ४४
ततो रुचिरपर्वाणं शरेण नतपर्वणा ।
सुपर्वा पर्वतपतिर्निन्ये वैवस्वतक्षयम् ॥ ४५
तस्मिन्निपतिते वीरे सौभद्रो द्रौपदीसुताः ।
चेकितानो धृष्टकेतुर्युयुत्सुश्चार्दयन्द्विपम् ॥ ४६
त एनं शरधाराभिर्धाराभिरिव तोयदाः ।
सिषिचुर्भैरवान्नादान्विनदन्तो जिघांसवः ॥ ४७
ततः पार्ष्ण्यङ्कुशाङ्गुष्ठैः कृतिना चोदितो द्विपः ।
प्रसारितकरः प्रायात्स्तब्धकर्णेक्षणो द्रुतम् ॥ ४८
सोऽधिष्ठाय पदा वाहान्युयुत्सोः सूतमारुजत् ।
पुत्रस्तु तव संभ्रान्तः सौभद्रस्याप्लुतो रथम् ॥ ४९
स कुञ्जरस्थो विसृजन्निषूनरिषु पार्थिवः ।
बभौ रश्मीनिवादित्यो भुवनेषु समुत्सृजन् ॥ ५०
तमार्जुनिर्द्वादशभिर्युयुत्सुर्दशभिः शरैः ।
त्रिभिस्त्रिभिर्द्रौपदेया धृष्टकेतुश्च विव्यधुः ॥ ५१
सोऽरियत्नार्पितैर्बाणैराचितो द्विरदो बभौ ।
संस्यूत इव सूर्यस्य रश्मिभिर्जलदो महान् ॥ ५२
नियन्तुः शिल्पयत्नाभ्यां प्रेषितोऽरिशरार्दितः ।
परिचिक्षेप तान्नागः स रिपून्सव्यदक्षिणम् ॥ ५३
गोपाल इव दण्डेन यथा पशुगणान्वने ।
आवेष्टयत तां सेनां भगदत्तस्तथा मुहुः ॥ ५४

क्षिप्रं श्येनाभिपन्नानां वायसानामिव स्वनः ।
बभूव पाण्डवेयानां भृशं विद्रवतां स्वनः ॥ ५५
स नागराजः प्रवराङ्कुशाहतः
पुरा सपक्षोऽद्रिवरो यथा नृप ।
भयं तथा रिपुषु समादधद्भृशं
वणिग्गणानां क्षुभितो यथार्णवः ॥ ५६
ततो ध्वनिर्द्विरदरथाश्वपार्थिवै-
र्भयाद्द्रवद्भिर्जनितोऽतिभैरवः ।
क्षितिं वियद्द्यां विदिशो दिशस्तथा
समावृणोत्पार्थिव संयुगे तदा ॥ ५७
स तेन नागप्रवरेण पार्थिवो
भृशं जगाहे द्विषतामनीकिनीम् ।
पुरा सुगुप्तां विबुधैरिवाहवे
विरोचनो देववरूथिनीमिव ॥ ५८
भृशं ववौ ज्वलनसखो वियद्रजः
समावृणोन्मुहुरपि चैव सैनिकान् ।
तमेकनागं गणशो यथा गजाः
समन्ततो द्रुतमिव मेनिरे जनाः ॥ ५९

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चविंशोऽध्यायः ॥ २५ ॥

२६

संजय उवाच ।

न्मां पार्थस्य संग्रामे कर्माणि परिपृच्छसि ।
च्छृणुष्व महाराज पार्थो यदकरोन्मृधे ॥ १
जो दृष्ट्वा समुद्भूतं श्रुत्वा च गजनिस्वनम् ।
न्यतां भगदत्तेन कौन्तेयः कृष्णमब्रवीत् ॥ २
था प्राग्ज्योतिषो राजा गजेन मधुसूदन ।
त्वरमाणोऽभ्यतिक्रान्तो ध्रुवं तस्यैष निस्वनः ॥ ३
इन्द्रादनवरः संख्ये गजयानविशारदः ।
प्रथमो वा द्वितीयो वा पृथिव्यामिति मे मतिः ॥ ४
स चापि द्विरदश्रेष्ठः सदाप्रतिगजो युधि ।
सर्वशब्दातिगः संख्ये कृतकर्मा जितक्लमः ॥ ५
सहः शस्त्रनिपातानामग्निस्पर्शस्य चानघ ।
स पाण्डवबलं व्यक्तमद्यैको नाशयिष्यति ॥ ६
न चावाभ्यामृतेऽन्योऽस्ति शक्तस्तं प्रतिबाधितुम् ।
त्वरमाणस्ततो याहि यतः प्राग्ज्योतिषाधिपः ॥ ७
शक्रसख्याद्द्विपबलैर्वयसा चापि विस्मितम् ।
अद्यैनं प्रेषयिष्यामि बलहन्तुः प्रियातिथिम् ॥ ८
वचनादथ कृष्णस्तु प्रययौ सव्यसाचिनः ।
दार्यते भगदत्तेन यत्र पाण्डववाहिनी ॥ ९
तं प्रयान्तं ततः पश्चादाह्वयन्तो महारथाः ।
संशप्तकाः समारोहन्सहस्राणि चतुर्दश ॥ १०
दशैव तु सहस्राणि त्रिगर्तानां नराधिप ।
चत्वारि तु सहस्राणि वासुदेवस्य येऽनुगाः ॥ ११
दार्यमाणां चमूं दृष्ट्वा भगदत्तेन मारिष ।
आहूयमानस्य च तैरभवद्धृदयं द्विधा ॥ १२
किं नु श्रेयस्करं कर्म भवेदिति विचिन्तयन् ।
इतो वा विनिवर्तेयं गच्छेयं वा युधिष्ठिरम् ॥ १३
तस्य बुद्ध्या विचार्यैतदर्जुनस्य कुरूद्वह ।
अभवद्भूयसी बुद्धिः संशप्तकवधे स्थिरा ॥ १४
स संनिवृत्तः सहसा कपिप्रवरकेतनः ।
एको रथसहस्राणि निहन्तुं वासवी रणे ॥ १५
सा हि दुर्योधनस्यासीन्मतिः कर्णस्य चोभयोः ।
अर्जुनस्य वधोपाये तेन द्वैधमकल्पयत् ॥ १६
स तु संवर्तयामास द्वैधीभावेन पाण्डवः ।
रथेन तु रथाग्र्याणामकरोत्तां मृषा तदा ॥ १७
ततः शतसहस्राणि शराणां नतपर्वणाम् ।
व्यसृजन्नर्जुने राजन्संशप्तकमहारथाः ॥ १८
नैव कुन्तीसुतः पार्थो नैव कृष्णो जनार्दनः ।
न हया न रथो राजन्दृश्यन्ते स्म शरैश्चिताः ॥ १९

यदा मोहमनुप्राप्तः सस्वेदश्च जनार्दनः ।
ततस्तान्प्रायशः पार्थो वज्रास्त्रेण निजघ्निवान् ॥ २०
शतशः पाणयश्छिन्नाः सेषुज्यातलकार्मुकाः ।
केतवो वाजिनः सूता रथिनश्चापतन्क्षितौ ॥ २१
द्रुमाचलाग्राम्बुधरैः समरूपाः सुकल्पिताः ।
हतारोहाः क्षितौ पेतुर्द्विपाः पार्थशराहताः ॥ २२
विप्रविद्धकुथावल्गाश्छिन्नभाण्डाः परासवः ।
सारोहास्तुरगाः पेतुर्मथिताः पार्थमार्गणैः ॥ २३
सर्ष्टिचर्मासिनखराः समुद्गरपरश्वधाः ।
संछिन्ना बाहवः पेतुर्नृणां भल्लैः किरीटिना ॥ २४
बालादित्याम्बुजेन्दूनां तुल्यरूपाणि मारिष ।
संछिन्नान्यर्जुनशरैः शिरांस्युर्वीं प्रपेदिरे ॥ २५
जज्वालालंकृतैः सेना पत्रिभिः प्राणभोजनैः ।
नानालिङ्गैस्तदामित्रान्क्रुद्धे निघ्नति फल्गुने ॥ २६
क्षोभयन्तं तदा सेनां द्विरदं नलिनीमिव ।
धनंजयं भूतगणाः साधु साध्वित्यपूजयन् ॥ २७
दृष्ट्वा तत्कर्म पार्थस्य वासवस्येव माधवः ।
विस्मयं परमं गत्वा तलमाहत्य पूजयत् ॥ २८
ततः संशप्तकान्हत्वा भूयिष्ठं ये व्यवस्थिताः ।
भगदत्ताय याहीति पार्थः कृष्णमचोदयत् ॥ २९

इति श्रीमहाभारते द्रोणपर्वणि
षड्विंशोऽध्यायः ॥ २६ ॥

२७

संजय उवाच ।

यियासतस्ततः कृष्णः पार्थस्याश्वान्मनोजवान् ।
अप्रैषीद्धेमसंछन्नान्द्रोणानीकाय पाण्डुरान् ॥ १
तं प्रयान्तं कुरुश्रेष्ठं स्वांस्त्रातुं द्रोणतापितान् ।
सुशर्मा भ्रातृभिः सार्धं युद्धार्थी पृष्ठतोऽन्वयात् ॥ २
ततः श्वेतहयः कृष्णमब्रवीदजितं जयः ।
एष मां भ्रातृभिः सार्धं सुशर्माह्वयतेऽच्युत ॥ ३
दीर्यते चोत्तरेणैतत्सैन्यं नः शत्रुसूदन ।
द्वैधीभूतं मनो मेऽद्य कृतं संशप्तकैरिदम् ॥ ४
किं नु संशप्तकान्हन्मि स्वान्रक्षाम्यहितार्दितान् ।
इति मे त्वं मतं वेत्थ तत्र किं सुकृतं भवेत् ॥
एवमुक्तस्तु दाशार्हः स्यन्दनं प्रत्यवर्तयत् ।
येन त्रिगर्ताधिपतिः पाण्डवं समुपाह्वयत् ॥ ६
ततोऽर्जुनः सुशर्माणं विद्ध्वा सप्तभिराशुगैः ।
ध्वजं धनुश्चास्य तथा क्षुराभ्यां समकृन्तत ॥ ७
त्रिगर्ताधिपतेश्चापि भ्रातरं षड्भिरायसैः ।
साश्वं ससूतं त्वरितः पार्थः प्रैषीद्यमक्षयम् ॥ ८
ततो भुजगसंकाशां सुशर्मा शक्तिमायसीम् ।
चिक्षेपार्जुनमादिश्य वासुदेवाय तोमरम् ॥ ९
शक्तिं त्रिभिः शरैश्छित्त्वा तोमरं त्रिभिरर्जुनः ।
सुशर्माणं शरव्रातैर्मोहयित्वा न्यवर्तत ॥ १०
तं वासवमिवायान्तं भूरिवर्षशरौघिणम् ।
राजंस्तावकसैन्यानां नोग्रं कश्चिदवारयत् ॥ ११
ततो धनंजयो बाणैस्तत एव महारथान् ।
आयाद्विनिघ्नन्कौरव्यान्दहन्कक्षमिवानलः ॥ १२
तस्य वेगमसह्यं तु कुन्तीपुत्रस्य धीमतः ।
नाशक्नुवंस्ते संसोढुं स्पर्शमग्नेरिव प्रजाः ॥ १३
संवेष्टयन्ननीकानि शरवर्षेण पाण्डवः ।
सुपर्णपातवद्राजन्नायात्प्राग्ज्योतिषं प्रति ॥ १४
यत्तदानामयज्जिष्णुर्भरतानामपायिनाम् ।
धनुः क्षेमकरं संख्ये द्विषतामश्रुवर्धनम् ॥ १५
तदेव तव पुत्रस्य राजन्दुर्द्यूतदेविनः ।
कृते क्षत्रविनाशाय धनुरायच्छदर्जुनः ॥ १६
तथा विक्षोभ्यमाणा सा पार्थेन तव वाहिनी ।
व्यदीर्यत महाराज नौरिवासाद्य पर्वतम् ॥ १७
ततो दश सहस्राणि न्यवर्तन्त धनुष्मताम् ।
मतिं कृत्वा रणे क्रुद्धा वीरा जयपराजये ॥ १८

व्यपेतहृदयत्रास आपद्धर्मातिगो रथः ।
आर्छत्पार्थो गुरुं भारं सर्वभारसहो युधि ॥ १९
यथा नडवनं क्रुद्धः प्रभिन्नः षष्टिहायनः ।
मृद्नीयात्तद्वदायस्तः पार्थोऽमृद्नाच्चमूं तव ॥ २०
तस्मिन्प्रमथिते सैन्ये भगदत्तो नराधिपः ।
तेन नागेन सहसा धनंजयमुपाद्रवत् ॥ २१
तं रथेन नरव्याघ्रः प्रत्यगृह्णादभीतवत् ।
स संनिपातस्तुमुलो बभूव रथनागयोः ॥ २२
कल्पिताभ्यां यथाशास्त्रं रथेन च गजेन च ।
संग्रामे चेरतुर्वीरौ भगदत्तधनंजयौ ॥ २३
ततो जीमूतसंकाशान्नागादिन्द्र इवाभिभूः ।
अभ्यवर्षच्छरौघेण भगदत्तो धनंजयम् ॥ २४
स चापि शरवर्षं तच्छरवर्षेण वासविः ।
अप्राप्तमेव चिच्छेद भगदत्तस्य वीर्यवान् ॥ २५
ततः प्राग्ज्योतिषो राजा शरवर्षं निवार्य तत् ।
शरैर्जघ्ने महाबाहुं पार्थं कृष्णं च भारत ॥ २६
ततः स शरजालेन महताभ्यवकीर्य तौ ।
चोदयामास तं नागं वधायाच्युतपार्थयोः ॥ २७
तमापतन्तं द्विरदं दृष्ट्वा क्रुद्धमिवान्तकम् ।
चक्रेऽपसव्यं त्वरितः स्यन्दनेन जनार्दनः ॥ २८
संप्राप्तमपि नेयेष परावृत्तं महाद्विपम् ।
सारोहं मृत्युसात्कर्तुं स्मरन्धर्मं धनंजयः ॥ २९
स तु नागो द्विपरथान्हयांश्चारुज्य मारिष ।
प्राहिणोन्मृत्युलोकाय ततोऽकुध्यद्धनंजयः ॥ ३०

इति श्रीमहाभारते द्रोणपर्वणि
सप्तविंशोऽध्यायः ॥ २७ ॥

२८

धृतराष्ट्र उवाच ।

तथा क्रुद्धः किमकरोद्भगदत्तस्य पाण्डवः ।
प्राग्ज्योतिषो वा पार्थस्य तन्मे शंस यथातथम् ॥१

संजय उवाच ।

प्राग्ज्योतिषेण संसक्तावुभौ दाशार्हपाण्डवौ ।
मृत्योरिवान्तिकं प्राप्तौ सर्वभूतानि मेनिरे ॥ २
तथा हि शरवर्षाणि पातयत्यनिशं प्रभो ।
भगदत्तो गजस्कन्धात्कृष्णयोः स्यन्दनस्थयोः ॥ ३
अथ कार्ष्णायसैर्बाणैः पूर्णकार्मुकनिःसृतैः ।
अविध्यद्देवकीपुत्रं हेमपुङ्खैः शिलाशितैः ॥ ४
अग्निस्पर्शसमास्तीक्ष्णा भगदत्तेन चोदिताः ।
निर्भिद्य देवकीपुत्रं क्षितिं जग्मुः शरास्ततः ॥ ५
तस्य पार्थो धनुश्छित्त्वा शरावापं निहत्य च ।
लाडयन्निव राजानं भगदत्तमयोधयत् ॥ ६
सोऽर्करश्मिनिभांस्तीक्ष्णांस्तोमरान्वै चतुर्दश ।
प्रेरयत्सव्यसाची तांस्त्रिधैकैकमथाच्छिनत् ॥ ७
ततो नागस्य तद्वर्म व्यधमत्पाकशासनिः ।
शरजालेन स बभौ व्यभ्रः पर्वतराडिव ॥ ८
ततः प्राग्ज्योतिषः शक्तिं हेमदण्डामयस्मयीम् ।
व्यसृजद्वासुदेवाय द्विधा तामर्जुनोऽच्छिनत् ॥ ९
ततश्छत्रं ध्वजं चैव छित्त्वा राज्ञोऽर्जुनः शरैः ।
विव्याध दशभिस्तूर्णमुत्स्मयन्पर्वताधिपम् ॥ १०
सोऽतिविद्धोऽर्जुनशरैः सुपुङ्खैः कङ्कपत्रिभिः ।
भगदत्तस्ततः क्रुद्धः पाण्डवस्य महात्मनः ॥ ११
व्यसृजत्तोमरान्मूर्ध्नि श्वेताश्वस्योन्ननाद च ।
तैरर्जुनस्य समरे किरीटं परिवर्तितम् ॥ १२
परिवृत्तं किरीटं तं यमयन्नेव फल्गुनः ।
सुदृष्टः क्रियतां लोक इति राजानमब्रवीत् ॥ १३
एवमुक्तस्तु संक्रुद्धः शरवर्षेण पाण्डवम् ।
अभ्यवर्षत्सगोविन्दं धनुरादाय भास्वरम् ॥ १४
तस्य पार्थो धनुश्छित्त्वा तूणीरान्संनिकृत्य च ।
त्वरमाणो द्विसप्तत्या सर्वमर्मस्वताडयत् ॥ १५
विद्धस्तथाप्यव्यथितो वैष्णवास्त्रमुदीरयन् ।

अभिमन्त्र्याङ्कुशं क्रुद्धो व्यसृजत्पाण्डवोरसि ॥ १६
विसृष्टं भगदत्तेन तदस्त्रं सर्वघातकम् ।
उरसा प्रतिजग्राह पार्थं संछाद्य केशवः ॥ १७
वैजयन्त्यभवन्माला तदस्त्रं केशवोरसि ।
ततोऽर्जुनः क्लान्तमनाः केशवं प्रत्यभाषत ॥ १८
अयुध्यमानस्तुरगान्संयन्तास्मि जनार्दन ।
इत्युक्त्वा पुण्डरीकाक्ष प्रतिज्ञां स्वां न रक्षसि ॥ १९
यद्यहं व्यसनी वा स्यामशक्तो वा निवारणे ।
ततस्त्वयैवं कार्यं स्यान्न तु कार्यं मयि स्थिते ॥ २०
सबाणः सधनुश्चाहं ससुरासुरमानवान् ।
शक्तो लोकानिमाञ्जेतुं तच्चापि विदितं तव ॥ २१
ततोऽर्जुनं वासुदेवः प्रत्युवाचार्थवद्वचः ।
शृणु गुह्यमिदं पार्थ यथा वृत्तं पुरानघ ॥ २२
चतुर्मूर्तिरहं शश्वल्लोकत्राणार्थमुद्यतः ।
आत्मानं प्रविभज्येह लोकानां हितमादधे ॥ २३
एका मूर्तिस्तपश्चर्यां कुरुते मे भुवि स्थिता ।
अपरा पश्यति जगत्कुर्वाणं साध्वसाधुनी ॥ २४
अपरा कुरुते कर्म मानुषं लोकमाश्रिता ।
शेते चतुर्थी त्वपरा निद्रां वर्षसहस्रिकाम् ॥ २५
यासौ वर्षसहस्रान्ते मूर्तिरुत्तिष्ठते मम ।
वरार्हेभ्यो वराञ्श्रेष्ठांस्तस्मिन्काले ददाति सा ॥ २६
तं तु कालमनुप्राप्तं विदित्वा पृथिवी तदा ।
प्रायाचत वरं यं मां नरकार्थाय तं शृणु ॥ २७
देवानामसुराणां च अवध्यस्तनयोऽस्तु मे ।
उपेतो वैष्णवास्त्रेण तन्मे त्वं दातुमर्हसि ॥ २८
एवं वरमहं श्रुत्वा जगत्यास्तनये तदा ।
अमोघमस्त्रमददं वैष्णवं तदहं पुरा ॥ २९
अवोचं चैतदस्त्रं वै ह्यमोघं भवतु क्षमे ।
नरकस्याभिरक्षार्थं नैनं कश्चिद्वधिष्यति ॥ ३०
अनेनास्त्रेण ते गुप्तः सुतः परबलार्दनः ।
भविष्यति दुराधर्षः सर्वलोकेषु सर्वदा ॥ ३१
तथेत्युक्त्वा गता देवी कृतकामा मनस्विनी ।
स चाप्यासीद्दुराधर्षो नरकः शत्रुतापनः ॥ ३२
तस्मात्प्राग्ज्योतिषं प्राप्तं तदस्त्रं पार्थ मामकम् ।
नास्यावध्योऽस्ति लोकेषु सेन्द्ररुद्रेषु मारिष ॥ ३३
तन्मया त्वत्कृतेनैतदन्यथा व्यपनाशितम् ।
वियुक्तं परमास्त्रेण जहि पार्थ महासुरम् ॥ ३४
वैरिणं युधि दुर्धर्षं भगदत्तं सुरद्विषम् ।
यथाहं जघ्निवान्पूर्वं हितार्थं नरकं तथा ॥ ३५
एवमुक्तस्ततः पार्थः केशवेन महात्मना ।
भगदत्तं शितैर्बाणैः सहसा समवाकिरत् ॥ ३६
ततः पार्थो महाबाहुरसंभ्रान्तो महामनाः ।
कुम्भयोरन्तरे नागं नाराचेन समार्पयत् ॥ ३७
समासाद्य तु तं नागं बाणो वज्र इवाचलम् ।
अभ्यगात्सह पुङ्खेन वल्मीकमिव पन्नगः ॥ ३८
स तु विष्टभ्य गात्राणि दन्ताभ्यामवनिं ययौ ।
नदन्नार्तस्वरं प्राणानुत्ससर्ज महाद्विपः ॥ ३९
ततश्चन्द्रार्धबिम्बेन शरेण नतपर्वणा ।
बिभेद हृदयं राज्ञो भगदत्तस्य पाण्डवः ॥ ४०
स भिन्नहृदयो राजा भगदत्तः किरीटिना ।
शरासनं शरांश्चैव गतासुः प्रमुमोच ह ॥ ४१
शिरसस्तस्य विभ्रष्टः पपात च वराङ्कुशः ।
नालताडनविभ्रष्टं पलाशं नलिनादिव ॥ ४२
स हेममाली तपनीयभाण्डा-
त्पपात नागाद्गिरिसंनिकाशात् ।
सुपुष्पितो मारुतवेगरुग्णो
महीधराग्रादिव कर्णिकारः ॥ ४३
निहत्य तं नरपतिमिन्द्रविक्रमं
सखायमिन्द्रस्य तथैन्द्रिराहवे ।
ततोऽपरांस्तव जयकाङ्क्षिणो नरा-

न्बभञ्ज वायुर्बलवान्द्रुमानिव ॥ ४४

इति श्रीमहाभारते द्रोणपर्वणि
अष्टाविंशोऽध्यायः ॥ २८ ॥

२९

संजय उवाच ।

प्रियमिन्द्रस्य सततं सखायममितौजसम् ।
हत्वा प्राग्ज्योतिषं पार्थः प्रदक्षिणमवर्तत ॥ १
ततो गान्धारराजस्य सुतौ परपुरंजयौ ।
आर्छेतामर्जुनं संख्ये भ्रातरौ वृषकाचलौ ॥ २
तौ समेत्यार्जुनं वीरौ पुरः पश्चाच्च धन्विनौ ।
अविध्येतां महावेगैर्निशितैराशुगैर्भृशम् ॥ ३
वृषकस्य हयान्सूतं धनुश्छत्रं रथं ध्वजम् ।
तिलशो व्यधमत्पार्थः सौबलस्य शितैः शरैः ॥ ४
ततोऽर्जुनः शरव्रातैर्नानाप्रहरणैरपि ।
गान्धारान्व्याकुलांश्चक्रे सौबलप्रमुखान्पुनः ॥ ५
ततः पञ्चशतान्वीरान्गान्धारानुद्यतायुधान् ।
प्राहिणोन्मृत्युलोकाय क्रुद्धो बाणैर्धनंजयः ॥ ६
हताश्वात्तु रथात्तूर्णमवतीर्य महाभुजः ।
आरुरोह रथं भ्रातुरन्यच्च धनुराददे ॥ ७
तावेकरथमारूढौ भ्रातरौ वृषकाचलौ ।
शरवर्षेण बीभत्सुमविध्येतां पुनः पुनः ॥ ८
स्यालौ तव महात्मानौ राजानौ वृषकाचलौ ।
भृशं निजघ्नतुः पार्थमिन्द्रं वृत्रबलाविव ॥ ९
लब्धलक्ष्यौ तु गान्धारावहतां पाण्डवं पुनः ।
निदाघवार्षिकौ मासौ लोकं घर्माम्बुभिर्यथा ॥ १०
तौ रथस्थौ नरव्याघ्रौ राजानौ वृषकाचलौ ।
संश्लिष्टाङ्गौ स्थितौ राजञ्जघानैकेषुणार्जुनः ॥ ११
तौ रथात्सिंहसंकाशौ लोहिताक्षौ महाभुजौ ।
गतासू पेततुर्वीरौ सोदर्यावेकलक्षणौ ॥ १२
तयोर्देहौ रथाद्भूमिं गतौ बन्धुजनप्रियौ ।
यशो दश दिशः पुण्यं गमयित्वा व्यवस्थितौ ॥ १३
दृष्ट्वा विनिहतौ संख्ये मातुलावपलायिनौ ।
भृशं मुमुचुरश्रूणि पुत्रास्तव विशां पते ॥ १४
निहतौ भ्रातरौ दृष्ट्वा मायाशतविशारदः ।
कृष्णौ संमोहयन्मायां विदधे शकुनिस्ततः ॥ १५
लगुडायोगुडाश्मानः शतघ्न्यश्च सशक्तयः ।
गदापरिघनिस्त्रिंशशूलमुद्गरपट्टिशाः ॥ १६
सकम्पनर्ष्टिनखरा मुसलानि परश्वधाः ।
क्षुराः क्षुरप्रनालीका वत्सदन्तास्त्रिसंधिनः ॥ १७
चक्राणि विशिखाः प्रासा विविधान्यायुधानि च ।
प्रपेतुः सर्वतो दिग्भ्यः प्रदिग्भ्यश्चार्जुनं प्रति ॥ १८
खरोष्ट्रमहिषाः सिंहा व्याघ्राः सृमरचिल्लिकाः ।
ऋक्षाः सालावृका गृध्राः कपयोऽथ सरीसृपाः ॥
विविधानि च रक्षांसि क्षुधितान्यर्जुनं प्रति ।
संक्रुद्धान्यभ्यधावन्त विविधानि वयांसि च ॥ २०
ततो दिव्यास्त्रविच्छूरः कुन्तीपुत्रो धनंजयः ।
विसृजन्निषुजालानि सहसा तान्यताडयत् ॥ २१
ते हन्यमानाः शूरेण प्रवरैः सायकैर्दृढैः ।
विरुवन्तो महारावान्विनेशुः सर्वतो हताः ॥ २२
ततस्तमः प्रादुरभूदर्जुनस्य रथं प्रति ।
तस्माच्च तमसो वाचः क्रूराः पार्थमभर्त्सयन् ॥ २३
तत्तमोऽस्त्रेण महता ज्योतिषेणार्जुनोऽवधीत् ।
हते तस्मिञ्जलौघास्तु प्रादुरासन्भयानकाः ॥ २४
अम्भसस्तस्य नाशार्थमादित्यास्त्रमथार्जुनः ।
प्रायुङ्क्ताम्भस्ततस्तेन प्रायशोऽस्त्रेण शोषितम् ॥ २५
एवं बहुविधा मायाः सौबलस्य कृताः कृताः ।
जघानास्त्रबलेनाशु प्रहसन्नर्जुनस्तदा ॥ २६
तथा हतासु मायासु त्रस्तोऽर्जुनशराहतः ।
अपायाज्जवनैरश्वैः शकुनिः प्राकृतो यथा ॥ २७
ततोऽर्जुनोऽस्त्रविच्छ्रैष्ठ्यं दर्शयन्नात्मनोऽरिषु ।

अभ्यवर्षच्छरौघेण कौरवाणामनीकिनीम् ॥ २८
सा हन्यमाना पार्थेन पुत्रस्य तव वाहिनी ।
द्वैधीभूता महाराज गङ्गेवासाद्य पर्वतम् ॥ २९
द्रोणमेवान्वपद्यन्त केचित्तत्र महारथाः ।
केचिद्दुर्योधनं राजन्नर्द्यमानाः किरीटिना ॥ ३०
नापश्याम ततस्त्वेतत्सैन्यं वै तमसावृतम् ।
गाण्डीवस्य च निर्घोषः श्रुतो दक्षिणतो मया ॥ ३१
शङ्खदुन्दुभिनिर्घोषं वादित्राणां च निस्वनम् ।
गाण्डीवस्य च निर्घोषो व्यतिक्रम्यास्पृशद्दिवम् ॥ ३२
ततः पुनर्दक्षिणतः संग्रामश्चित्रयोधिनाम् ।
सुयुद्धमर्जुनस्यासीदहं तु द्रोणमन्वगाम् ॥ ३३
नानाविधान्यनीकानि पुत्राणां तव भारत ।
अर्जुनो व्यधमत्काले दिवीवाभ्राणि मारुतः ॥ ३४
तं वासवमिवायान्तं भूरिवर्षशरौघिणम् ।
महेष्वासं नरव्याघ्रं नोग्रं कश्चिदवारयत् ॥ ३५
ते हन्यमानाः पार्थेन त्वदीया व्यथिता भृशम् ।
स्वानेव बहवो जघ्नुर्विद्रवन्तस्ततस्ततः ॥ ३६
तेऽर्जुनेन शरा मुक्ताः कङ्कपत्रास्तनुच्छिदः ।
शलभा इव संपेतुः संवृण्वाना दिशो दश ॥ ३७
तुरगं रथिनं नागं पदातिमपि मारिष ।
विनिर्भिद्य क्षितिं जग्मुर्वल्मीकमिव पन्नगाः ॥ ३८
न च द्वितीयं व्यसृजत्कुञ्जराश्वनरेषु सः ।
पृथगेकशरारुग्णा निपेतुस्ते गतासवः ॥ ३९

हतैर्मनुष्यैस्तुरगैश्च सर्वतः
शराभिवृष्टैर्द्विरदैश्च पातितैः ।
तदा श्वगोमायुबडाभिनादितं
विचित्रमायोधशिरो बभूव ह ॥ ४०
पिता सुतं त्यजति सुहृद्वरं सुहृ-
त्तथैव पुत्रः पितरं शरातुरः ।
स्वरक्षणे कृतमतयस्तदा जना-
स्त्यजन्ति वाहानपि पार्थपीडिताः ॥ ४१

इति श्रीमहाभारते द्रोणपर्वणि
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

३०

धृतराष्ट्र उवाच ।

तेष्वनीकेषु भग्नेषु पाण्डुपुत्रेण संजय ।
चलितानां द्रुतानां च कथमासीन्मनो हि वः ॥ १
अनीकानां प्रभग्नानां व्यवस्थानमपश्यताम् ।
दुष्करं प्रतिसंधानं तन्ममाचक्ष्व संजय ॥ २

संजय उवाच ।

तथापि तव पुत्रस्य प्रियकामा विशां पते ।
यशः प्रवीरा लोकेषु रक्षन्तो द्रोणमन्वयुः ॥ ३
समुद्यतेषु शस्त्रेषु संप्राप्ते च युधिष्ठिरे ।
अकुर्वन्नार्यकर्माणि भैरवे सत्यभीतवत् ॥ ४
अन्तरं भीमसेनस्य प्रापतन्नमितौजसः ।
सात्यकेश्चैव शूरस्य धृष्टद्युम्नस्य चाभिभो ॥ ५
द्रोणं द्रोणमिति क्रूराः पाञ्चालाः समचोदयन् ।
मा द्रोणमिति पुत्रास्ते कुरून्सर्वानचोदयन् ॥ ६
द्रोणं द्रोणमिति ह्येके मा द्रोणमिति चापरे ।
कुरूणां पाण्डवानां च द्रोणद्यूतमवर्तत ॥ ७
यं यं स्म भजते द्रोणः पाञ्चालानां रथव्रजम् ।
तत्र तत्र स्म पाञ्चाल्यो धृष्टद्युम्नोऽथ धीयते ॥ ८
यथाभागविपर्यासे संग्रामे भैरवे सति ।
वीराः समासदन्वीरानगच्छन्भीरवः परान् ॥ ९
अकम्पनीयाः शत्रूणां बभूवुस्तत्र पाण्डवाः ।
अकम्पयंस्त्वनीकानि स्मरन्तः क्लेशमात्मनः ॥ १०
ते त्वमर्षवशं प्राप्ता ह्रीमन्तः सत्त्वचोदिताः ।
त्यक्त्वा प्राणान्न्यवर्तन्त घ्नन्तो द्रोणं महाहवे ॥ ११
अयसामिव संपातः शिलानामिव चाभवत् ।
दीव्यतां तुमुले युद्धे प्राणैरमिततेजसाम् ॥ १२

न तु स्मरन्ति संग्राममपि वृद्धास्तथाविधम् ।
दृष्टपूर्वं महाराज श्रुतपूर्वमथापि वा ॥ १३
प्राकम्पतेव पृथिवी तस्मिन्वीरावसादने ।
प्रवर्तता बलौघेन महता भारपीडिता ॥ १४
घूर्णतो हि बलौघस्य दिवं स्तब्ध्वेव निस्वनः ।
अजातशत्रोः क्रुद्धस्य पुत्रस्य तव चाभवत् ॥ १५
समासाद्य तु पाण्डूनामनीकानि सहस्रशः ।
द्रोणेन चरता संख्ये प्रभग्नानि शितैः शरैः ॥ १६
तेषु प्रमथ्यमानेषु द्रोणेनाद्भुतकर्मणा ।
पर्यवारयदासाद्य द्रोणं सेनापतिः स्वयम् ॥ १७
तदद्भुतमभूद्युद्धं द्रोणपाञ्चाल्ययोस्तदा ।
नैव तस्योपमा काचित्संभवेदिति मे मतिः ॥ १८
ततो नीलोऽनलप्रख्यो ददाह कुरुवाहिनीम् ।
शरस्फुलिङ्गश्चापार्चिर्दहन्कक्षमिवानलः ॥ १९
तं दहन्तमनीकानि द्रोणपुत्रः प्रतापवान् ।
पूर्वाभिभाषी सुश्लक्ष्णं स्मयमानोऽभ्यभाषत ॥ २०
नील किं बहुभिर्दग्धैस्तव योधैः शरार्चिषा ।
मयैकेन हि युध्यस्व क्रुद्धः प्रहर चाशुगैः ॥ २१
तं पद्मनिकराकारं पद्मपत्रनिभेक्षणम् ।
व्याकोशपद्माभमुखं नीलो विव्याध सायकैः ॥ २२
तेनातिविद्धः सहसा द्रौणिर्भल्लैः शितैस्त्रिभिः ।
धनुर्ध्वजं च छत्रं च द्विषतः स न्यकृन्तत ॥ २३
सोत्प्लुत्य स्यन्दनात्तस्मान्नीलश्चर्मवरासिधृक् ।
द्रोणायनेः शिरः कायाद्धर्तुमैच्छत्पतत्रिवत् ॥ २४
तस्योद्यतासेः सुनसं शिरः कायात्सकुण्डलम् ।
भल्लेनापाहरद्द्रौणिः स्मयमान इवानघ ॥ २५
संपूर्णचन्द्राभमुखः पद्मपत्रनिभेक्षणः ।
प्रांशुरुत्पलगर्भाभो निहतो न्यपतत्क्षितौ ॥ २६
ततः प्रविव्यथे सेना पाण्डवी भृशमाकुला ।
आचार्यपुत्रेण हते नीले ज्वलिततेजसि ॥ २७
अचिन्तयंश्च ते सर्वे पाण्डवानां महारथाः ।
कथं नो वासविस्त्रायाच्छत्रुभ्य इति मारिष ॥ २८
दक्षिणेन तु सेनायाः कुरुते कदनं बली ।
संशप्तकावशेषस्य नारायणबलस्य च ॥ २९

इति श्रीमहाभारते द्रोणपर्वणि
त्रिंशोऽध्यायः ॥ ३० ॥

३१

संजय उवाच ।

प्रतिघातं तु सैन्यस्य नामृष्यत वृकोदरः ।
सोऽभिनद्बाह्लिकं षष्ट्या कर्णं च दशभिः शरैः ॥ १
तस्य द्रोणः शितैर्बाणैस्तीक्ष्णधारैरयस्मयैः ।
जीवितान्तमभिप्रेप्सुर्मर्मण्याशु जघान ह ॥ २
कर्णो द्वादशभिर्बाणैरश्वत्थामा च सप्तभिः ।
षड्भिर्दुर्योधनो राजा तत एनमवाकिरत् ॥ ३
भीमसेनोऽपि तान्सर्वान्प्रत्यविध्यन्महाबलः ।
द्रोणं पञ्चाशतेषूणां कर्णं च दशभिः शरैः ॥ ४
दुर्योधनं द्वादशभिर्द्रौणिं चाष्टाभिराशुगैः ।
आरावं तुमुलं कुर्वन्नभ्यवर्तत तान्रणे ॥ ५
तस्मिन्संत्यजति प्राणान्मृत्युसाधारणीकृते ।
अजातशत्रुस्तान्योधान्भीमं त्रातेत्यचोदयत् ॥ ६
ते ययुर्भीमसेनस्य समीपममितौजसः ।
युयुधानप्रभृतयो माद्रीपुत्रौ च पाण्डवौ ॥ ७
ते समेत्य सुसंरब्धाः सहिताः पुरुषर्षभाः ।
महेष्वासवरैर्गुप्तं द्रोणानीकं बिभित्सवः ॥ ८
समापेतुर्महावीर्या भीमप्रभृतयो रथाः ।
तान्प्रत्यगृह्णादव्यग्रो द्रोणोऽपि रथिनां वरः ॥ ९
महाबलानतिरथान्वीरान्समरशोभिनः ।
बाह्यं मृत्युभयं कृत्वा तावकाः पाण्डवान्ययुः ॥ १०
सादिनः सादिनोऽभ्यघ्नंस्तथैव रथिनो रथान् ।
आसीच्छक्त्यसिसंपातो युद्धमासीत्परश्वधैः ॥ ११

निकृष्टमसियुद्धं च बभूव कटुकोदयम् ।
कुञ्जराणां च संघातैर्युद्धमासीत्सुदारुणम् ॥ १२
अपतत्कुञ्जरादन्यो हयादन्यस्त्ववाक्शिराः ।
नरो बाणेन निर्भिन्नो रथादन्यश्च मारिष ॥ १३
तत्रान्यस्य च संमर्दे पतितस्य विवर्मणः ।
शिरः प्रध्वंसयामास वक्षस्याक्रम्य कुञ्जरः ॥ १४
अपरेऽप्यपराञ्जघ्नुर्वारणाः पतितान्नरान् ।
विषाणैश्चावनिं गत्वा व्यभिन्दन्रथिनो बहून् ॥ १५
नरान्त्रैः केचिदपरे विषाणालग्नसंस्रवैः ।
बभ्रमुः शतशो नागा मृद्नन्तः शतशो नरान् ॥ १६
कांस्यायसतनुत्राणान्नराश्वरथकुञ्जरान् ।
पतितान्पोथयांचक्रुर्द्विपाः स्थूलनडानिव ॥ १७
गृध्रपत्राधिवासांसि शयनानि नराधिपाः ।
ह्रीमन्तः कालसंपक्वाः सुदुःखान्यधिशेरते ॥ १८
हन्ति स्मात्र पिता पुत्रं रथेनाभ्यतिवर्तते ।
पुत्रश्च पितरं मोहान्निर्मर्यादमवर्तत ॥ १९
अक्षो भग्नो ध्वजश्छिन्नश्छत्रमुर्व्यां निपातितम् ।
युगार्धं छिन्नमादाय प्रदुद्राव तथा हयः ॥ २०
सासिर्बाहुर्निपतितः शिरश्छिन्नं सकुण्डलम् ।
गजेनाक्षिप्य बलिना रथः संचूर्णितः क्षितौ ॥ २१
रथिना ताडितो नागो नाराचेनापतद्व्यसुः ।
सारोहश्चापतद्वाजी गजेनाताडितो भृशम् ॥ २२
निर्मर्यादं महद्युद्धमवर्तत सुदारुणम् ।
हा तात हा पुत्र सखे क्वासि तिष्ठ क्व धावसि ॥
प्रहराहर जह्येनं स्मितक्ष्वेडितगर्जितैः ।
इत्येवमुच्चरन्त्यः स्म श्रूयन्ते विविधा गिरः ॥ २४
नरस्याश्वस्य नागस्य समसज्जत शोणितम् ।
उपाशाम्यद्रजो भौमं भीरून्कश्मलमाविशत् ॥ २५
आसीत्केशपरामर्शो मुष्टियुद्धं च दारुणम् ।
नखैर्दन्तैश्च शूराणामद्वीपे द्वीपमिच्छताम् ॥ २६
तत्राच्छिद्यत वीरस्य सखड्गो बाहुरुद्यतः ।
सधनुश्चापरस्यापि सशरः साङ्कुशस्तथा ॥ २७
प्राक्रोशदन्यमन्योऽत्र तथान्यो विमुखोऽद्रवत् ।
अन्यः प्राप्तस्य चान्यस्य शिरः कायादपाहरत् ॥ २८
शब्दमभ्यद्रवच्चान्यः शब्दादन्योऽद्रवद्भृशम् ।
स्वानन्योऽथ परानन्यो जघान निशितैः शरैः ॥ २९
गिरिशृङ्गोपमश्चात्र नाराचेन निपातितः ।
मातङ्गो न्यपतद्भूमौ नदीरोध इवोष्णगे ॥ ३०
तथैव रथिनं नागः क्षरन्गिरिरिवारुजत् ।
अध्यतिष्ठत्पदा भूमौ सहाश्वं सहसारथिम् ॥ ३१
शूरान्प्रहरतो दृष्ट्वा कृतास्त्रान्रुधिरोक्षितान् ।
बहूनप्याविशन्मोहो भीरून्हृदयदुर्बलान् ॥ ३२
सर्वमाविग्नमभवन्न प्राज्ञायत किंचन ।
सैन्ये च रजसा ध्वस्ते निर्मर्यादमवर्तत ॥ ३३
ततः सेनापतिः शीघ्रमयं काल इति ब्रुवन् ।
नित्याभित्वरितानेव त्वरयामास पाण्डवान् ॥ ३४
कुर्वन्तः शासनं तस्य पाण्डवेया यशस्विनः ।
सरो हंसा इवापेतुर्घ्नन्तो द्रोणरथं प्रति ॥ ३५
गृह्णीताद्रवतान्योन्यं विभीता विनिकृन्तत ।
इत्यासीत्तुमुलः शब्दो दुर्धर्षस्य रथं प्रति ॥ ३६
ततो द्रोणः कृपः कर्णो द्रौणी राजा जयद्रथः ।
विन्दानुविन्दावावन्त्यौ शल्यश्चैनानवारयन् ॥ ३७
ते त्वार्यधर्मसंरब्धा दुर्निवार्या दुरासदाः ।
शरार्ता न जहुर्द्रोणं पाञ्चालाः पाण्डवैः सह ॥ ३८
ततो द्रोणोऽभिसंक्रुद्धो विसृजञ्शतशः शरान् ।
चेदिपाञ्चालपाण्डूनामकरोत्कदनं महत् ॥ ३९
तस्य ज्यातलनिर्घोषः शुश्रुवे दिक्षु मारिष ।
वज्रसंघातसंकाशस्त्रासयन्पाण्डवान्बहून् ॥ ४०
एतस्मिन्नन्तरे जिष्णुर्हत्वा संशप्तकान्बली ।
अभ्ययात्तत्र यत्र स्म द्रोणः पाण्डून्प्रमर्दति ॥ ४१

तं शरौघमहावर्तं शोणितोदं महाह्रदम् ।
तीर्णः संशप्तकान्हत्वा प्रत्यदृश्यत फल्गुनः ॥ ४२
तस्य कीर्तिमतो लक्ष्म सूर्यप्रतिमतेजसः ।
दीप्यमानमपश्याम तेजसा वानरध्वजम् ॥ ४३
संशप्तकसमुद्रं तमुच्छोष्यास्त्रगभस्तिभिः ।
स पाण्डवयुगान्तार्कः कुरूनप्यभ्यतीतपत् ॥ ४४
प्रददाह कुरून्सर्वानर्जुनः शस्त्रतेजसा ।
युगान्ते सर्वभूतानि धूमकेतुरिवोत्थितः ॥ ४५
तेन बाणसहस्रौघैर्गजाश्वरथयोधिनः ।
ताड्यमानाः क्षितिं जग्मुर्मुक्तशस्त्राः शरार्दिताः ॥
केचिदार्तस्वरं चक्रुर्विनेदुरपरे पुनः ।
पार्थबाणहताः केचिन्निपेतुर्विगतासवः ॥ ४७
तेषामुत्पततां कांश्चित्पतितांश्च पराङ्मुखान् ।
न जघानार्जुनो योधान्योधव्रतमनुस्मरन् ॥ ४८
ते विशीर्णरथाश्वेभाः प्रायशश्च पराङ्मुखाः ।
कुरवः कर्ण कर्णेति हा हेति च विचुक्रुशुः ॥ ४९
तमाधिरथिराक्रन्दं विज्ञाय शरणैषिणाम् ।
मा भैष्टेति प्रतिश्रुत्य ययावभिमुखोऽर्जुनम् ॥ ५०
स भारतरथश्रेष्ठः सर्वभारतहर्षणः ।
प्रादुश्चक्रे तदाग्नेयमस्त्रमस्त्रविदां वरः ॥ ५१
तस्य दीप्तशरौघस्य दीप्तचापधरस्य च ।
शरौघाञ्शरजालेन विदुधाव धनंजयः ।
अस्त्रमस्त्रेण संवार्य प्राणदद्विसृजञ्शरान् ॥ ५२
धृष्टद्युम्नश्च भीमश्च सात्यकिश्च महारथः ।
विव्यधुः कर्णमासाद्य त्रिभिस्त्रिभिरजिह्मगैः ॥ ५३
अर्जुनास्त्रं तु राधेयः संवार्य शरवृष्टिभिः ।
तेषां त्रयाणां चापानि चिच्छेद विशिखैस्त्रिभिः ॥
ते निकृत्तायुधाः शूरा निर्विषा भुजगा इव ।
रथशक्तीः समुत्क्षिप्य भृशं सिंहा इवानदन् ॥ ५५
ता भुजाग्रैर्महावेगा विसृष्टा भुजगोपमाः ।
दीप्यमाना महाशक्त्यो जग्मुराधिरथिं प्रति ॥ ५६
ता निकृत्य शितैर्बाणैस्त्रिभिस्त्रिभिरजिह्मगैः ।
ननाद बलवान्कर्णः पार्थाय विसृजञ्शरान् ॥ ५७
अर्जुनश्चापि राधेयं विद्ध्वा सप्तभिराशुगैः ।
कर्णादवरजं बाणैर्जघान निशितैस्त्रिभिः ॥ ५८
ततः शत्रुंजयं हत्वा पार्थः षड्भिरजिह्मगैः ।
जहार सद्यो भल्लेन विपाटस्य शिरो रथात् ॥ ५९
पश्यतां धार्तराष्ट्राणामेकेनैव किरीटिना ।
प्रमुखे सूतपुत्रस्य सोदर्या निहतास्त्रयः ॥ ६०
ततो भीमः समुत्पत्य स्वरथाद्वैनतेयवत् ।
वरासिना कर्णपक्षाञ्जघान दश पञ्च च ॥ ६१
पुनः स्वरथमास्थाय धनुरादाय चापरम् ।
विव्याध दशभिः कर्णं सूतमश्वांश्च पञ्चभिः ॥ ६२
धृष्टद्युम्नोऽप्यसिवरं चर्म चादाय भास्वरम् ।
जघान चन्द्रवर्माणं बृहत्क्षत्रं च पौरवम् ॥ ६३
ततः स्वरथमास्थाय पाञ्चाल्योऽन्यच्च कार्मुकम् ।
आदाय कर्णं विव्याध त्रिसप्तत्या नदन्रणे ॥ ६४
शैनेयोऽप्यन्यदादाय धनुरिन्द्रायुधद्युति ।
सूतपुत्रं चतुःषष्ट्या विद्ध्वा सिंह इवानदत् ॥ ६५
भल्लाभ्यां साधुमुक्ताभ्यां छित्त्वा कर्णस्य कार्मुकम् ।
पुनः कर्णं त्रिभिर्बाणैर्बाह्वोरुरसि चार्पयत् ॥ ६६
ततो दुर्योधनो द्रोणो राजा चैव जयद्रथः ।
निमज्जमानं राधेयमुज्जह्रुः सात्यकार्णवात् ॥ ६७
धृष्टद्युम्नश्च भीमश्च सौभद्रोऽर्जुन एव च ।
नकुलः सहदेवश्च सात्यकिं जुगुपू रणे ॥ ६८
एवमेष महारौद्रः क्षयार्थं सर्वधन्विनाम् ।
तावकानां परेषां च त्यक्त्वा प्राणानभूद्रणः ॥ ६९
पदातिरथनागाश्वैर्गजाश्वरथपत्तयः ।
रथिनो नागपत्त्यश्वै रथपत्ती रथद्विपैः ॥ ७०
अश्वैरश्वा गजैर्नागा रथिनो रथिभिः सह ।

संसक्ताः समदृश्यन्त पत्तयश्चापि पत्तिभिः ॥ ७१
एवं सुकलिलं युद्धमासीत्क्रव्यादहर्षणम् ।
महद्भिस्तैरभीतानां यमराष्ट्रविवर्धनम् ॥ ७२

ततो हता नररथवाजिकुञ्जरै-
रनेकशो द्विपरथवाजिपत्तयः ।
गजैर्गजा रथिभिरुदायुधा रथा
हयैर्हयाः पत्तिगणैश्च पत्तयः ॥ ७३
रथैर्द्विपा द्विरदवरैर्महाहया
हयैर्नरा वररथिभिश्च वाजिनः ।
निरस्तजिह्वादशनेक्षणाः क्षितौ
क्षयं गताः प्रमथितवर्मभूषणाः ॥ ७४
तथा परैर्बहुकरणैर्वरायुधै-
र्हता गताः प्रतिभयदर्शनाः क्षितिम् ।
विपोथिता हयगजपादताडिता
भृशाकुला रथखुरनेमिभिर्हताः ॥ ७५
प्रमोदने श्वापदपक्षिरक्षसां
जनक्षये वर्तति तत्र दारुणे ।
महाबलास्ते कुपिताः परस्परं
निषूदयन्तः प्रविचेरुरोजसा ॥ ७६
ततो बले भृशलुलिते परस्परं
निरीक्षमाणे रुधिरौघसंप्लुते ।
दिवाकरेऽस्तंगिरिमास्थिते शनै-
रुभे प्रयाते शिबिराय भारत ॥ ७७

इति श्रीमहाभारते द्रोणपर्वणि
एकत्रिंशोऽध्यायः ॥ ३१ ॥

॥ समाप्तं संशप्तकवधपर्व ॥

३२

संजय उवाच ।

पूर्वमस्मासु भग्नेषु फल्गुनेनामितौजसा ।
द्रोणे च मोघसंकल्पे रक्षिते च युधिष्ठिरे ॥ १
सर्वे विध्वस्तकवचास्तावका युधि निर्जिताः ।
रजस्वला भृशोद्विग्ना वीक्षमाणा दिशो दश ॥ २
अवहारं ततः कृत्वा भारद्वाजस्य संमते ।
लब्धलक्ष्यैः परैर्दीना भृशावहसिता रणे ॥ ३
श्लाघमानेषु भूतेषु फल्गुनस्यामितान्गुणान् ।
केशवस्य च सौहार्दे कीर्त्यमानेऽर्जुनं प्रति ।
अभिशस्ता इवाभूवन्ध्यानमूकत्वमास्थिताः ॥ ४
ततः प्रभातसमये द्रोणं दुर्योधनोऽब्रवीत् ।
प्रणयादभिमानाच्च द्विषद्वृद्ध्या च दुर्मनाः ।
शृण्वतां सर्वभूतानां संरब्धो वाक्यकोविदः ॥ ५
नूनं वयं वध्यपक्षे भवतो ब्रह्मवित्तम ।
तथा हि नाग्रहीः प्राप्तं समीपेऽद्य युधिष्ठिरम् ॥ ६
इच्छतस्ते न मुच्येत चक्षुःप्राप्तो रणे रिपुः ।
जिघृक्षतो रक्ष्यमाणः सामरैरपि पाण्डवैः ॥ ७
वरं दत्त्वा मम प्रीतः पश्चाद्विकृतवानसि ।
आशाभङ्गं न कुर्वन्ति भक्तस्यार्याः कथंचन ॥ ८
ततोऽप्रीतस्तथोक्तः स भारद्वाजोऽब्रवीन्नृपम् ।
नार्हसे मान्यथा ज्ञातुं घटमानं तव प्रिये ॥ ९
ससुरासुरगन्धर्वाः सयक्षोरगराक्षसाः ।
नालं लोका रणे जेतुं पाल्यमानं किरीटिना ॥ १०
विश्वसृग्यत्र गोविन्दः पृतनारिस्तथार्जुनः ।
तत्र कस्य बलं क्रामेदन्यत्र त्र्यम्बकात्प्रभोः ॥ ११
सत्यं तु ते ब्रवीम्यद्य नैतज्जात्वन्यथा भवेत् ।
अद्यैषां प्रवरं वीरं पातयिष्ये महारथम् ॥ १२
तं च व्यूहं विधास्यामि योऽभेद्यस्त्रिदशैरपि ।
योगेन केनचिद्राजन्नर्जुनस्त्वपनीयताम् ॥ १३
न ह्यज्ञातमसाध्यं वा तस्य संख्येऽस्ति किंचन ।
तेन ह्युपात्तं बलवत्सर्वज्ञानमितस्ततः ॥ १४
द्रोणेन व्याहृते त्वेवं संशप्तकगणाः पुनः ।
आह्वयन्नर्जुनं संख्ये दक्षिणामभितो दिशम् ॥ १५

तत्रार्जुनस्याथ परैः सार्धं समभवद्रणः ।
तादृशो यादृशो नान्यः श्रुतो दृष्टोऽपि वा क्वचित् ॥
ततो द्रोणेन विहितो राजन्व्यूहो व्यरोचत ।
चरन्मध्यंदिने सूर्यः प्रतपन्निव दुर्दृशः ॥ १७
तं चाभिमन्युर्वचनात्पितुर्ज्येष्ठस्य भारत ।
बिभेद दुर्भिदं संख्ये चक्रव्यूहमनेकधा ॥ १८
स कृत्वा दुष्करं कर्म हत्वा वीरान्सहस्रशः ।
षट्सु वीरेषु संसक्तो दौःशासनिवशं गतः ॥ १९
वयं परमसंहृष्टाः पाण्डवाः शोककर्शिताः ।
सौभद्रे निहते राजन्नवहारमकुर्वत ॥ २०

धृतराष्ट्र उवाच ।

पुत्रं पुरुषसिंहस्य संजयाप्राप्तयौवनम् ।
रणे विनिहतं श्रुत्वा भृशं मे दीर्यते मनः ॥ २१
दारुणः क्षत्रधर्मोऽयं विहितो धर्मकर्तृभिः ।
यत्र राज्येप्सवः शूरा बाले शस्त्रमपातयन् ॥ २२
बालमत्यन्तसुखिनं विचरन्तमभीतवत् ।
कृतास्त्रा बहवो जघ्नुर्ब्रूहि गावल्गणे कथम् ॥ २३
बिभित्सता रथानीकं सौभद्रेणामितौजसा ।
विक्रीडितं यथा संख्ये तन्ममाचक्ष्व संजय ॥ २४

संजय उवाच ।

यन्मां पृच्छसि राजेन्द्र सौभद्रस्य निपातनम् ।
तत्ते कार्त्स्न्येन वक्ष्यामि शृणु राजन्समाहितः ।
विक्रीडितं कुमारेण यथानीकं बिभित्सता ॥ २५
दावाग्न्यभिपरीतानां भूरिगुल्मतृणद्रुमे ।
वनौकसामिवारण्ये त्वदीयानामभूद्भयम् ॥ २६

इति श्रीमहाभारते द्रोणपर्वणि

द्वात्रिंशोऽध्यायः ॥ ३२ ॥

३३

संजय उवाच ।

समरेऽत्युग्रकर्माणः कर्मभिर्व्यञ्जितश्रमाः ।
सकृष्णाः पाण्डवाः पञ्च देवैरपि दुरासदाः ॥ १
सत्त्वकर्मान्वयैर्बुद्ध्या प्रकृत्या यशसा श्रिया ।
नैव भूतो न भविता कृष्णतुल्यगुणः पुमान् ॥ २
सत्यधर्मपरो दाता विप्रपूजादिभिर्गुणैः ।
सदैव त्रिदिवं प्राप्तो राजा किल युधिष्ठिरः ॥ ३
युगान्ते चान्तको राजञ्जामदग्न्यश्च वीर्यवान् ।
रणस्थो भीमसेनश्च कथ्यन्ते सदृशास्त्रयः ॥ ४
प्रतिज्ञाकर्मदक्षस्य रणे गाण्डीवधन्वनः ।
उपमां नाधिगच्छामि पार्थस्य सदृशीं क्षितौ ॥ ५
गुरुवात्सल्यमत्यन्तं नैभृत्यं विनयो दमः ।
नकुलेऽप्रातिरूप्यं च शौर्यं च नियतानि षट् ॥ ६
श्रुतगाम्भीर्यमाधुर्यसत्त्ववीर्यपराक्रमैः ।
सदृशो देवयोर्वीरः सहदेवः किलाश्विनोः ॥ ७
ये च कृष्णे गुणाः स्फीताः पाण्डवेषु च ये गुणाः ।
अभिमन्यौ किलैकस्था दृश्यन्ते गुणसंचयाः ॥ ८
युधिष्ठिरस्य धैर्येण कृष्णस्य चरितेन च ।
कर्मभिर्भीमसेनस्य सदृशो भीमकर्मणः ॥ ९
धनंजयस्य रूपेण विक्रमेण श्रुतेन च ।
विनयात्सहदेवस्य सदृशो नकुलस्य च ॥ १०

धृतराष्ट्र उवाच ।

अभिमन्युमहं सूत सौभद्रमपराजितम् ।
श्रोतुमिच्छामि कार्त्स्न्येन कथमायोधने हतः ॥ ११

संजय उवाच ।

चक्रव्यूहो महाराज आचार्येणाभिकल्पितः ।
तत्र शक्रोपमाः सर्वे राजानो विनिवेशिताः ॥ १२
संघातो राजपुत्राणां सर्वेषामभवत्तदा ।
कृताभिसमयाः सर्वे सुवर्णविकृतध्वजाः ॥ १३
रक्ताम्बरधराः सर्वे सर्वे रक्तविभूषणाः ।
सर्वे रक्तपताकाश्च सर्वे वै हेममालिनः ॥ १४
तेषां दशसहस्राणि बभूवुर्दृढधन्विनाम् ।

पौत्रं तव पुरस्कृत्य लक्ष्मणं प्रियदर्शनम् ॥ १५
अन्योन्यसमदुःखास्ते अन्योन्यसमसाहसाः ।
अन्योन्यं स्पर्धमानाश्च अन्योन्यस्य हिते रताः ॥
कर्णदुःशासनकृपैर्वृतो राजा महारथैः ।
देवराजोपमः श्रीमाञ्श्वेतच्छत्राभिसंवृतः ।
चामरव्यजनाक्षेपैरुदयन्निव भास्करः ॥ १७
प्रमुखे तस्य सैन्यस्य द्रोणोऽवस्थितनायके ।
सिन्धुराजस्तथातिष्ठच्छ्रीमान्मेरुरिवाचलः ॥ १८
सिन्धुराजस्य पार्श्वस्था अश्वत्थामपुरोगमाः ।
सुतास्तव महाराज त्रिंशत्त्रिदशसंनिभाः ॥ १९
गान्धारराजः कितवः शल्यो भूरिश्रवास्तथा ।
पार्श्वतः सिन्धुराजस्य व्यराजन्त महारथाः ॥ २०

इति श्रीमहाभारते द्रोणपर्वणि
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

३४

संजय उवाच ।

तदनीकमनाधृष्यं भारद्वाजेन रक्षितम् ।
पार्थाः समभ्यवर्तन्त भीमसेनपुरोगमाः ॥ १
सात्यकिश्चेकितानश्च धृष्टद्युम्नश्च पार्षतः ।
कुन्तिभोजश्च विक्रान्तो द्रुपदश्च महारथः ॥ २
आर्जुनिः क्षत्रधर्मा च बृहत्क्षत्रश्च वीर्यवान् ।
चेदिपो धृष्टकेतुश्च माद्रीपुत्रौ घटोत्कचः ॥ ३
युधामन्युश्च विक्रान्तः शिखण्डी चापराजितः ।
उत्तमौजाश्च दुर्धर्षो विराटश्च महारथः ॥ ४
द्रौपदेयाश्च संरब्धाः शैशुपालिश्च वीर्यवान् ।
केकयाश्च महावीर्याः सृञ्जयाश्च सहस्रशः ॥ ५
एते चान्ये च सगणाः कृतास्त्रा युद्धदुर्मदाः ।
समभ्यधावन्सहसा भारद्वाजं युयुत्सवः ॥ ६
समवेतांस्तु तान्सर्वान्भारद्वाजोऽपि वीर्यवान् ।
असंभ्रान्तः शरौघेण महता समवारयत् ॥ ७
महौघाः सलिलस्येव गिरिमासाद्य दुर्भिदम् ।
द्रोणं ते नाभ्यवर्तन्त वेलामिव जलाशयाः ॥ ८
पीड्यमानाः शरै राजन्द्रोणचापविनिःसृतैः ।
न शेकुः प्रमुखे स्थातुं भारद्वाजस्य पाण्डवाः ॥ ९
तदद्भुतमपश्याम द्रोणस्य भुजयोर्बलम् ।
यदेनं नाभ्यवर्तन्त पाञ्चालाः सृञ्जयैः सह ॥ १०
तमायान्तमभिक्रुद्धं द्रोणं दृष्ट्वा युधिष्ठिरः ।
बहुधा चिन्तयामास द्रोणस्य प्रतिवारणम् ॥ ११
अशक्यं तु तमन्येन द्रोणं मत्वा युधिष्ठिरः ।
अविषह्यं गुरुं भारं सौभद्रे समवासृजत् ॥ १२
वासुदेवादनवरं फल्गुनाच्चामितौजसम् ।
अब्रवीत्परवीरघ्नमभिमन्युमिदं वचः ॥ १३
एत्य नो नार्जुनो गर्हेद्यथा तात तथा कुरु ।
चक्रव्यूहस्य न वयं विद्म भेदं कथंचन ॥ १४
त्वं वार्जुनो वा कृष्णो वा भिन्द्यात्प्रद्युम्न एव वा ।
चक्रव्यूहं महाबाहो पञ्चमोऽन्यो न विद्यते ॥ १५
अभिमन्यो वरं तात याचतां दातुमर्हसि ।
पितृणां मातुलानां च सैन्यानां चैव सर्वशः ॥ १६
धनंजयो हि नस्तात गर्हयेदेत्य संयुगात् ।
क्षिप्रमस्त्रं समादाय द्रोणानीकं विशातय ॥ १७

अभिमन्युरुवाच ।

द्रोणस्य दृढमत्युग्रमनीकप्रवरं युधि ।
पितृणां जयमाकाङ्क्षन्नवगाहे भिनद्मि च ॥ १८
उपदिष्टो हि मे पित्रा योगोऽनीकस्य भेदने ।
नोत्सहे तु विनिर्गन्तुमहं कस्यांचिदापदि ॥ १९

युधिष्ठिर उवाच ।

भिन्ध्यनीकं युधा श्रेष्ठ द्वारं संजनयस्व नः ।
वयं त्वानुगमिष्यामो येन त्वं तात यास्यसि ॥ २०
धनंजयसमं युद्धे त्वां वयं तात संयुगे ।
प्रणिधायानुयास्यामो रक्षन्तः सर्वतोमुखाः ॥ २१

भीम उवाच ।

अहं त्वानुगमिष्यामि धृष्टद्युम्नोऽथ सात्यकिः ।
पाञ्चालाः केकया मत्स्यास्तथा सर्वे प्रभद्रकाः ॥ २२
सकृद्भिन्नं त्वया व्यूहं तत्र तत्र पुनः पुनः ।
वयं प्रध्वंसयिष्यामो निघ्नमाना वरान्वरान् ॥ २३

अभिमन्युरुवाच ।

अहमेतत्प्रवेक्ष्यामि द्रोणानीकं दुरासदम् ।
पतंग इव संक्रुद्धो ज्वलितं जातवेदसम् ॥ २४
तत्कर्माद्य करिष्यामि हितं यद्वंशयोर्द्वयोः ।
मातुलस्य च या प्रीतिर्भविष्यति पितुश्च मे ॥ २५
शिशुनैकेन संग्रामे काल्यमानानि संघशः ।
अद्य द्रक्ष्यन्ति भूतानि द्विषत्सैन्यानि वै मया ॥ २६

युधिष्ठिर उवाच ।

एवं ते भाषमाणस्य बलं सौभद्र वर्धताम् ।
यस्त्वमुत्सहसे भेत्तुं द्रोणानीकं सुदुर्भिदम् ॥ २७
रक्षितं पुरुषव्याघ्रैर्महेष्वासैः प्रहारिभिः ।
साध्यरुद्रमरुत्कल्पैर्वस्वग्न्यादित्यविक्रमैः ॥ २८

संजय उवाच ।

तस्य तद्वचनं श्रुत्वा स यन्तारमचोदयत् ।
सुमित्राश्वान्रणे क्षिप्रं द्रोणानीकाय चोदय ॥ २९

इति श्रीमहाभारते द्रोणपर्वणि
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

३५

संजय उवाच ।

सौभद्रस्तु वचः श्रुत्वा धर्मराजस्य धीमतः ।
अचोदयत यन्तारं द्रोणानीकाय भारत ॥ १
तेन संचोद्यमानस्तु याहि याहीति सारथिः ।
प्रत्युवाच ततो राजन्नभिमन्युमिदं वचः ॥ २
अतिभारोऽयमायुष्मन्नाहितस्त्वयि पाण्डवैः ।
संप्रधार्य क्षमं बुद्ध्या ततस्त्वं योद्धुमर्हसि ॥ ३
आचार्यो हि कृती द्रोणः परमास्त्रे कृतश्रमः ।
अत्यन्तसुखसंवृद्धस्त्वं च युद्धविशारदः ॥ ४
ततोऽभिमन्युः प्रहसन्सारथिं वाक्यमब्रवीत् ।
सारथे को न्वयं द्रोणः समग्रं क्षत्रमेव वा ॥ ५
ऐरावतगतं शक्रं सहामरगणैरहम् ।
योधयेयं रणमुखे न मे क्षत्रेऽद्य विस्मयः ।
न ममैतद्द्विषत्सैन्यं कलामर्हति षोडशीम् ॥ ६
अपि विश्वजितं विष्णुं मातुलं प्राप्य सूतज ।
पितरं चार्जुनं संख्ये न भीर्मामुपयास्यति ॥ ७
ततोऽभिमन्युस्तां वाचं कदर्थीकृत्य सारथेः ।
याहीत्येवाब्रवीदेनं द्रोणानीकाय माचिरम् ॥ ८
ततः संचोदयामास हयानस्य त्रिहायनान् ।
नातिहृष्टमनाः सूतो हेमभाण्डपरिच्छदान् ॥ ९
ते प्रेषिताः सुमित्रेण द्रोणानीकाय वाजिनः ।
द्रोणमभ्यद्रवन्राजन्महावेगपराक्रमाः ॥ १०
तमुदीक्ष्य तथा यान्तं सर्वे द्रोणपुरोगमाः ।
अभ्यवर्तन्त कौरव्याः पाण्डवाश्च तमन्वयुः ॥ ११
स कर्णिकारप्रवरोच्छ्रितध्वजः
सुवर्णवर्मार्जुनिरर्जुनाद्वरः ।
युयुत्सया द्रोणमुखान्महारथा-
न्समासदत्सिंहशिशुर्यथा गजान् ॥ १२
ते विंशतिपदे यत्ताः संप्रहारं प्रचक्रिरे ।
आसीद्गाङ्ग इवावर्तो मुहूर्तमुदधेरिव ॥ १३
शूराणां युध्यमानानां निघ्नतामितरेतरम् ।
संग्रामस्तुमुलो राजन्प्रावर्तत सुदारुणः ॥ १४
प्रवर्तमाने संग्रामे तस्मिन्नतिभयंकरे ।
द्रोणस्य मिषतो व्यूहं भित्त्वा प्राविशदार्जुनिः ॥ १५
तं प्रविष्टं परान्घ्नन्तं शत्रुमध्ये महाबलम् ।
हस्त्यश्वरथपत्त्यौघाः परिवव्रुरुदायुधाः ॥ १६
नानावादित्रनिनदैः क्ष्वेडितोत्क्रुष्टगर्जितैः ।

हुंकारैः सिंहनादैश्च तिष्ठ तिष्ठेति निस्वनैः ॥ १७
घोरैर्हलहलाशब्दैर्मा गास्तिष्ठेहि मामिति ।
असावहममुत्रेति प्रवदन्तो मुहुर्मुहुः ॥ १८
बृंहितैः शिञ्जितैर्हासैः खुरनेमिस्वनैरपि ।
संनादयन्तो वसुधामभिदुद्रुवुरार्जुनिम् ॥ १९
तेषामापततां वीरः पूर्वं शीघ्रमथो दृढम् ।
क्षिप्रास्त्रो न्यवधीद्व्रातान्मर्मज्ञो मर्मभेदिभिः ॥ २०
ते हन्यमानाश्च तथा नानालिङ्गैः शितैः शरैः ।
अभिपेतुस्तमेवाजौ शलभा इव पावकम् ॥ २१
ततस्तेषां शरीरैश्च शरीरावयवैश्च सः ।
संतस्तार क्षितिं क्षिप्रं कुशैर्वेदिमिवाध्वरे ॥ २२
बद्धगोधाङ्गुलित्राणान्सशरावरकार्मुकान् ।
सासिचर्माङ्कुशाभीशून्सतोमरपरश्वधान् ॥ २३
सगुडायोमुखप्रासान्सर्ष्टितोमरपट्टिशान् ।
सभिण्डिपालपरिघान्सशक्तिवरकम्पनान् ॥ २४
सप्रतोदमहाशङ्खान्सकुन्तान्सकचग्रहान् ।
समुद्गरक्षेपणीयान्सपाशपरिघोपलान् ॥ २५
सकेयूराङ्गदान्बाहून्हृद्यगन्धानुलेपनान् ।
संचिच्छेदार्जुनिर्वृत्तांस्त्वदीयानां सहस्रशः ॥ २६
तैः स्फुरद्भिर्महाराज शुशुभे लोहितोक्षितैः ।
पञ्चास्यैः पन्नगैश्छिन्नैर्गरुडेनेव मारिष ॥ २७
सुनासाननकेशान्तैरव्रणैश्चारुकुण्डलैः ।
संदष्टौष्ठपुटैः क्रोधात्क्षरद्भिः शोणितं बहु ॥ २८
चारुस्रङ्मुकुटोष्णीषैर्मणिरत्नविराजितैः ।
विनालनलिनाकारैर्दिवाकरशशिप्रभैः ॥ २९
हितप्रियंवदैः काले बहुभिः पुण्यगन्धिभिः ।
द्विषच्छिरोभिः पृथिवीमवतस्तार फाल्गुनिः ॥ ३०
गन्धर्वनगराकारान्विधिवत्कल्पितान्रथान् ।
वीषामुखान्वित्रिवेणून्व्यस्तदण्डकबन्धुरान् ॥ ३१
विजङ्घकूबराक्षांश्च विनेमीननरानपि ।
विचक्रोपस्करोपस्थान्भग्नोपकरणानपि ॥ ३२
प्रशातितोपकरणान्हतयोधान्सहस्रशः ।
शरैर्विशकलीकुर्वन्दिक्षु सर्वास्वदृश्यत ॥ ३३
पुनर्द्विपान्द्विपारोहान्वैजयन्त्यङ्कुशध्वजान् ।
तूणान्वर्माण्यथो कक्ष्या ग्रैवेयानथ कम्बलान् ॥ ३४
घण्टाः शुण्डान्विषाणाग्रान्क्षुरपालान्पदानुगान् ।
शरैर्निशितधाराग्रैः शात्रवाणामशातयत् ॥ ३५
वनायुजान्पार्वतीयान्काम्बोजारट्टबाह्लिकान् ।
स्थिरवालधिकर्णाक्षाञ्जवनान्साधुवाहिनः ॥ ३६
स्वारूढाञ्शिक्षितैर्योधैः शक्त्यृष्टिप्रासयोधिभिः ।
विध्वस्तचामरकुथान्विप्रकीर्णप्रकीर्णकान् ॥ ३७
निरस्तजिह्वानयनान्निष्कीर्णान्त्रयकृद्घनान् ।
हतारोहान्भिन्नभाण्डान्क्रव्यादगणमोदनान् ॥ ३८
निकृत्तवर्मकवचाञ्शकृन्मूत्रासृगाप्लुतान् ।
निपातयन्नश्ववरांस्तावकान्सोऽभ्यरोचत ॥ ३९
एको विष्णुरिवाचिन्त्यः कृत्वा प्राक्कर्म दुष्करम् ।
तथा विमथितं तेन त्र्यङ्गं तव बलं महत् ।
व्यहनत्स पदात्योघांस्त्वदीयानेव भारत ॥ ४०
एवमेकेन तां सेनां सौभद्रेण शितैः शरैः ।
भृशं विप्रहृतां दृष्ट्वा स्कन्देनेवासुरीं चमूम् ॥ ४१
त्वदीयास्तव पुत्राश्च वीक्षमाणा दिशो दश ।
संशुष्कास्याश्चलन्नेत्राः प्रस्विन्ना लोमहर्षणाः ॥ ४२
पलायनकृतोत्साहा निरुत्साहा द्विषज्जये ।
गोत्रनामभिरन्योन्यं क्रन्दन्तो जीवितैषिणः ॥ ४३
हतान्पुत्रांस्तथा पितॄन्सुहृत्संबन्धिबान्धवान् ।
प्रातिष्ठन्त समुत्सृज्य त्वरयन्तो हयद्विपान् ॥ ४४

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

३६

संजय उवाच ।

तां प्रभग्नां चमूं दृष्ट्वा सौभद्रेणामितौजसा ।
दुर्योधनो भृशं क्रुद्धः स्वयं सौभद्रमभ्ययात् ॥ १
ततो राजानमावृत्तं सौभद्रं प्रति संयुगे ।
दृष्ट्वा द्रोणोऽब्रवीद्योधान्पर्याप्नुत नराधिपम् ॥ २
पुराभिमन्युर्लक्ष्यं नः पश्यतां हन्ति वीर्यवान् ।
तमाद्रवत मा भैष्ट क्षिप्रं रक्षत कौरवम् ॥ ३
ततः कृतज्ञा बलिनः सुहृदो जितकाशिनः ।
त्रास्यमाना भयाद्वीरं परिवव्रुस्तवात्मजम् ॥ ४
द्रोणो द्रौणिः कृपः कर्णः कृतवर्मा च सौबलः ।
बृहद्बलो मद्रराजो भूरिर्भूरिश्रवाः शलः ॥ ५
पौरवो वृषसेनश्च विसृजन्तः शिताञ्शरान् ।
सौभद्रं शरवर्षेण महता समवाकिरन् ॥ ६
संमोहयित्वा तमथ दुर्योधनममोचयन् ।
आस्याद्ग्रासमिवाक्षिप्तं ममृषे नार्जुनात्मजः ॥ ७
ताञ्शरौघेण महता साश्वसूतान्महारथान् ।
विमुखीकृत्य सौभद्रः सिंहनादमथानदत् ॥ ८
तस्य नादं ततः श्रुत्वा सिंहस्येवामिषैषिणः ।
नामृष्यन्त सुसंरब्धाः पुनर्द्रोणमुखा रथाः ॥ ९
त एनं कोष्ठकीकृत्य रथवंशेन मारिष ।
व्यसृजन्निषुजालानि नानालिङ्गानि संघशः ॥ १०
तान्यन्तरिक्षे चिच्छेद पौत्रस्तव शितैः शरैः ।
तांश्चैव प्रतिविव्याध तदद्भुतमिवाभवत् ॥ ११
ततस्ते कोपितास्तेन शरैराशीविषोपमैः ।
परिवव्रुर्जिघांसन्तः सौभद्रमपलायिनम् ॥ १२
समुद्रमिव पर्यस्तं त्वदीयं तद्बलार्णवम् ।
अभिमन्युर्दधारैको वेलेव मकरालयम् ॥ १३
शूराणां युध्यमानानां निघ्नतामितरेतरम् ।
अभिमन्योः परेषां च नासीत्कश्चित्पराङ्मुखः ॥ १४
तस्मिंस्तु घोरे संग्रामे वर्तमाने भयंकरे ।
दुःसहो नवभिर्बाणैरभिमन्युमविध्यत ॥ १५
दुःशासनो द्वादशभिः कृपः शारद्वतस्त्रिभिः ।
द्रोणस्तु सप्तदशभिः शरैराशीविषोपमैः ॥ १६
विविंशतिस्तु विंशत्या कृतवर्मा च सप्तभिः ।
बृहद्बलस्तथाष्टाभिरश्वत्थामा च सप्तभिः ॥ १७
भूरिश्रवास्त्रिभिर्बाणैर्मद्रेशः षड्भिराशुगैः ।
द्वाभ्यां शराभ्यां शकुनिस्त्रिभिर्दुर्योधनो नृपः ॥ १८
स तु तान्प्रतिविव्याध त्रिभिस्त्रिभिरजिह्मगैः ।
नृत्यन्निव महाराज चापहस्तः प्रतापवान् ॥ १९
ततोऽभिमन्युः संक्रुद्धस्ताप्यमानस्तवात्मजैः ।
विदर्शयन्वै सुमहच्छिक्षौरसकृतं बलम् ॥ २०
गरुडानिलरंहोभिर्यन्तुर्वाक्यकरैर्हयैः ।
दान्तैरश्मकदायादं त्वरमाणोऽभ्यहारयत् ।
विव्याध चैनं दशभिर्बाणैस्तिष्ठेति चाब्रवीत् ॥ २१
तस्याभिमन्युर्दशभिर्बाणैः सूतं हयान्ध्वजम् ।
बाहू धनुः शिरश्चोर्व्यां स्मयमानोऽभ्यपातयत् ॥
ततस्तस्मिन्हते वीरे सौभद्रेणाश्मकेश्वरे ।
संचचाल बलं सर्वं पलायनपरायणम् ॥ २३
ततः कर्णः कृपो द्रोणो द्रौणिर्गान्धारराट् शलः ।
शल्यो भूरिश्रवाः क्राथः सोमदत्तो विविंशतिः ॥२४
वृषसेनः सुषेणश्च कुण्डभेदी प्रतर्दनः ।
वृन्दारको ललित्थश्च प्रबाहुर्दीर्घलोचनः ।
दुर्योधनश्च संक्रुद्धः शरवर्षैरवाकिरन् ॥ २५
सोऽतिक्रुद्धो महेष्वासैरभिमन्युरजिह्मगैः ।
शरमादत्त कर्णाय परकायावभेदनम् ॥ २६
तस्य भित्त्वा तनुत्राणं देहं निर्भिद्य चाशुगः ।
प्राविशद्धरणीं राजन्वल्मीकमिव पन्नगः ॥ २७
स तेनातिप्रहारेण व्यथितो विह्वलन्निव ।
संचचाल रणे कर्णः क्षितिकम्पे यथाचलः ॥ २८

अथान्यैर्निशितैर्बाणैः सुषेणं दीर्घलोचनम् ।
कुण्डभेदिं च संक्रुद्धस्त्रिभिस्त्रीनवधीद्बली ॥ २९
कर्णस्तं पञ्चविंशत्या नाराचानां समर्पयत् ।
अश्वत्थामा च विंशत्या कृतवर्मा च सप्तभिः॥३०
स शरार्दितसर्वाङ्गः क्रुद्धः शक्रात्मजात्मजः ।
विचरन्दृश्यते सैन्ये पाशहस्त इवान्तकः ॥ ३१
शल्यं च बाणवर्षेण समीपस्थमवाकिरत् ।
उदक्रोशन्महाबाहुस्तव सैन्यानि भीषयन् ॥ ३२
ततः स विद्धोऽस्त्रविदा मर्मभिद्भिरजिह्मगैः ।
शल्यो राजन्रथोपस्थे निषसाद मुमोह च ॥ ३३
तं हि विद्धं तथा दृष्ट्वा सौभद्रेण यशस्विना ।
संप्राद्रवच्चमूः सर्वा भारद्वाजस्य पश्यतः ॥ ३४
प्रेक्षन्तस्तं महाबाहुं रुक्मपुङ्खैः समावृतम् ।
त्वदीयाश्च पलायन्ते मृगाः सिंहार्दिता इव ॥ ३५
स तु रणयशसाभिपूज्यमानः
पितृसुरचारणसिद्धयक्षसंघैः ।
अवनितलगतैश्च भूतसंघै-
रतिविबभौ हुतभुग्यथाज्यसिक्तः ॥ ३६

इति श्रीमहाभारते द्रोणपर्वणि
षट्त्रिंशोऽध्यायः ॥ ३६ ॥

३७

धृतराष्ट्र उवाच ।

तथा प्रमथमानं तं महेष्वासमजिह्मगैः ।
आर्जुनिं मामकाः सर्वे के त्वेनं समवाकिरन् ॥ १

संजय उवाच ।

शृणु राजन्कुमारस्य रणे विक्रीडितं महत् ।
बिभित्सतो रथानीकं भारद्वाजेन रक्षितम् ॥ २
मद्रेशं सादितं दृष्ट्वा सौभद्रेणाशुगै रणे ।
शल्यादवरजः क्रुद्धः किरन्बाणान्समभ्ययात् ॥ ३
स विद्ध्वा दशभिर्बाणैः साश्वयन्तारमार्जुनिम् ।
उदक्रोशन्महाशब्दं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ४
तस्यार्जुनिः शिरोग्रीवं पाणिपादं धनुर्हयान् ।
छत्रं ध्वजं नियन्तारं त्रिवेणुं शम्युपस्करम् ॥ ५
चक्रे युगेषां तूणीराननुकर्षं च सायकैः ।
पताकां चक्रगोप्तारौ सर्वोपकरणानि च ।
व्यधमल्लाघवात्तच्च ददृशे नास्य कश्चन ॥ ६
स पपात क्षितौ क्षीणः प्रविद्धाभरणाम्बरः ।
वायुनेव महाचैत्यः संभग्नोऽमिततेजसा ।
अनुगाश्चास्य वित्रस्ताः प्राद्रवन्सर्वतोदिशम् ॥ ७
आर्जुनेः कर्म तद्दृष्ट्वा प्रणेदुश्च समन्ततः ।
नादेन सर्वभूतानि साधु साध्विति भारत ॥ ८
शल्यभ्रातर्यथारुग्णे बहुशस्तस्य सैनिकाः ।
कुलाधिवासनामानि श्रावयन्तोऽर्जुनात्मजम् ॥ ९
अभ्यवर्तन्त संक्रुद्धा विविधायुधपाणयः ।
रथैरश्वैर्गजैश्चान्ये पादातैश्च बलोत्कटाः ॥ १०
बाणशब्देन महता खुरनेमिस्वनेन च ।
हुंकारैः क्ष्वेडितोत्क्रुष्टैः सिंहनादैः सगर्जितैः ॥११
ज्यातलत्रस्वनैरन्ये गर्जन्तोऽर्जुननन्दनम् ।
ब्रुवन्तश्च न नो जीवन्मोक्ष्यसे जीवतामिति ॥१२
तांस्तथा ब्रुवतो दृष्ट्वा सौभद्रः प्रहसन्निव ।
यो यः स्म प्राहरत्पूर्वं तं तं विव्याध पत्रिभिः ॥१३
संदर्शयिष्यन्नस्त्राणि चित्राणि च लघूनि च ।
आर्जुनिः समरे शूरो मृदुपूर्वमयुध्यत ॥ १४
वासुदेवादुपात्तं यद्यदस्त्रं च धनंजयात् ।
अदर्शयत तत्कार्ष्णिः कृष्णाभ्यामविशेषयन् ॥ १५
दूरमस्यन्गुरुं भारं साधयंश्च पुनः पुनः ।
संदधद्विसृजंश्चेषून्निर्विशेषमदृश्यत ॥ १६
चापमण्डलमेवास्य विस्फुरद्दिक्ष्वदृश्यत ।
तमो घ्नतः सुदीप्तस्य सवितुर्मण्डलं यथा ॥ १७
ज्याशब्दः शुश्रुवे तस्य तलशब्दश्च दारुणः ।

महाशनिमुचः काले पयोदस्येव निस्वनः ॥ १८
ह्रीमानमर्षी सौभद्रो मानकृत्प्रियदर्शनः ।
संमिमानयिषुर्वीरानिष्वासांश्चाप्ययुध्यत ॥ १९
मृदुर्भूत्वा महाराज दारुणः समपद्यत ।
वर्षाभ्यतीतो भगवाञ्शरदीव दिवाकरः ॥ २०
शरान्विचित्रान्महतो रुक्मपुङ्खाञ्शिलाशितान् ।
मुमोच शतशः क्रुद्धो गभस्तीनिव भास्करः ॥ २१
क्षुरप्रैर्वत्सदन्तैश्च विपाठैश्च महायशाः ।
नाराचैरर्धनाराचैर्भल्लैरञ्जलिकैरपि ॥ २२
अवाकिरथाद्रनीकं भारद्वाजस्य पश्यतः ।
ततस्तत्सैन्यमभवद्विमुखं शरपीडितम् ॥ २३

इति श्रीमहाभारते द्रोणपर्वणि
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

३८

धृतराष्ट्र उवाच ।

द्वैधीभवति मे चित्तं ह्रिया तुष्ट्या च संजय ।
मम पुत्रस्य यत्सैन्यं सौभद्रः समवारयत् ॥ १
विस्तरेणैव मे शंस सर्वं गावल्गणे पुनः
विक्रीडितं कुमारस्य स्कन्दस्येवासुरैः सह ॥ २

संजय उवाच ।

हन्त ते संप्रवक्ष्यामि विमर्दमतिदारुणम् ।
एकस्य च बहूनां च यथासीत्तुमुलो रणः ॥ ३
अभिमन्युः कृतोत्साहः कृतोत्साहानरिंदमान् ।
रथस्थो रथिनः सर्वांस्तावकानप्यहर्षयत् ॥ ४
द्रोणं कर्णं कृपं शल्यं द्रौणिं भोजं बृहद्बलम् ।
दुर्योधनं सौमदत्तिं शकुनिं च महाबलम् ॥ ५
नानानृपान्नृपसुतान्सैन्यानि विविधानि च ।
अलातचक्रवत्सर्वांश्चरन्बाणैः समभ्ययात् ॥ ६
निघ्नन्नमित्रान्सौभद्रः परमास्त्रः प्रतापवान् ।
अदर्शयत तेजस्वी दिक्षु सर्वासु भारत ॥ ७
तद्दृष्ट्वा चरितं तस्य सौभद्रस्यामितौजसः ।
समकम्पन्त सैन्यानि त्वदीयानि पुनः पुनः ॥ ८
अथाब्रवीन्महाप्राज्ञो भारद्वाजः प्रतापवान् ।
हर्षेणोत्फुल्लनयनः कृपमाभाष्य सत्वरम् ॥ ९
घट्टयन्निव मर्माणि तव पुत्रस्य मारिष ।
अभिमन्युं रणे दृष्ट्वा तदा रणविशारदम् ॥ १०
एष गच्छति सौभद्रः पार्थानामग्रतो युवा ।
नन्दयन्सुहृदः सर्वान्राजानं च युधिष्ठिरम् ॥ ११
नकुलं सहदेवं च भीमसेनं च पाण्डवम् ।
बन्धून्संबन्धिनश्चान्यान्मध्यस्थान्सुहृदस्तथा ॥ १२
नास्य युद्धे समं मन्ये कंचिदन्यं धनुर्धरम् ।
इच्छन्हन्यादिमां सेनां किमर्थमपि नेच्छति ॥ १३
द्रोणस्य प्रीतिसंयुक्तं श्रुत्वा वाक्यं तवात्मजः ।
आर्जुनिं प्रति संक्रुद्धो द्रोणं दृष्ट्वा स्मयन्निव ॥ १४
अथ दुर्योधनः कर्णमब्रवीद्बाह्लिकं कृपम् ।
दुःशासनं मद्रराजं तांस्तांश्चान्यान्महारथान् ॥ १५
सर्वमूर्धावसिक्तानामाचार्यो ब्रह्मवित्तमः ।
अर्जुनस्य सुतं मूढं नाभिहन्तुमिहेच्छति ॥ १६
न ह्यस्य समरे मुच्येदन्तकोऽप्याततायिनः ।
किमङ्ग पुनरेवान्यो मर्त्यः सत्यं ब्रवीमि वः ॥ १७
अर्जुनस्य सुतं त्वेष शिष्यत्वादभिरक्षति ।
पुत्राः शिष्याश्च दयितास्तदपत्यं च धर्मिणाम् ॥
संरक्ष्यमाणो द्रोणेन मन्यते वीर्यमात्मनः ।
आत्मसंभावितो मूढस्तं प्रमथ्नीत माचिरम् ॥ १९
एवमुक्तास्तु ते राज्ञा सात्वतीपुत्रमभ्ययुः ।
संरब्धास्तं जिघांसन्तो भारद्वाजस्य पश्यतः ॥ २०
दुःशासनस्तु तच्छ्रुत्वा दुर्योधनवचस्तदा ।
अब्रवीत्कुरुशार्दूलो दुर्योधनमिदं वचः ॥ २१
अहमेनं हनिष्यामि महाराज ब्रवीमि ते ।
मिषतां पाण्डुपुत्राणां पाञ्चालानां च पश्यताम् ।

प्रसिष्याम्यद्य सौभद्रं यथा राहुर्दिवाकरम् ॥ २२
उत्क्रुश्य चाब्रवीद्वाक्यं कुरुराजमिदं पुनः ।
श्रुत्वा कृष्णौ मया ग्रस्तं सौभद्रमतिमानिनौ ।
गमिष्यतः प्रेतलोकं जीवलोकान्न संशयः ॥ २३
तौ च श्रुत्वा मृतौ व्यक्तं पाण्डोः क्षेत्रोद्भवाः सुताः ।
एकाह्ना ससुहृद्वर्गाः क्लैब्याद्धास्यन्ति जीवितम् ॥२४
तस्मादस्मिन्हते शत्रौ हताः सर्वेऽहितास्तव ।
शिवेन ध्याहि मा राजन्नेष हन्मि रिपुं तव ॥ २५
एवमुक्त्वा ननद्राजन्पुत्रो दुःशासनस्तव ।
सौभद्रमभ्ययात्क्रुद्धः शरवर्षैरवाकिरन् ॥ २६
तमभिक्रुद्धमायान्तं तव पुत्रमरिंदमः ।
अभिमन्युः शरैस्तीक्ष्णैः षड्विंशत्या समर्पयत् ॥ २७
दुःशासनस्तु संक्रुद्धः प्रभिन्न इव कुञ्जरः ।
अयोधयत सौभद्रमभिमन्युश्च तं रणे ॥ २८
तौ मण्डलानि चित्राणि रथाभ्यां सव्यदक्षिणम् ।
चरमाणावयुध्येतां रथशिक्षाविशारदौ ॥ २९
अथ पणवमृदङ्गदुन्दुभीनां
क्रकरमहानकभेरिझर्झराणाम् ।
निनदमतिभृशं नराः प्रचक्रु-
र्लवणजलोद्भवसिंहनादमिश्रम् ॥ ३०

इति श्रीमहाभारते द्रोणपर्वणि
अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

३९

संजय उवाच ।

शरविक्षतगात्रस्तु प्रत्यमित्रमवस्थितम् ।
अभिमन्युः स्मयन्धीमान्दुःशासनमथाब्रवीत् ॥ १
दिष्ट्या पश्यामि संग्रामे मानिनं शत्रुमागतम् ।
निष्ठुरं त्यक्तधर्माणमाक्रोशनपरायणम् ॥ २
यत्सभायां त्वया राज्ञो धृतराष्ट्रस्य शृण्वतः ।
कोपितः परुषैर्वाक्यैर्धर्मराजो युधिष्ठिरः ।
जयोन्मत्तेन भीमश्च बह्वबद्धं प्रभाषता ॥ ३
परवित्तापहारस्य क्रोधस्याप्रशमस्य च ।
लोभस्य ज्ञाननाशस्य द्रोहस्यात्याहितस्य च ॥ ४
पितृणां मम राज्यस्य हरणस्योग्रधन्विनाम् ।
तत्त्वामिदमनुप्राप्तं तत्कोपाद्वै महात्मनाम् ॥ ५
सद्यश्चोग्रमधर्मस्य फलं प्राप्नुहि दुर्मते ।
शासितास्म्यद्य ते बाणैः सर्वसैन्यस्य पश्यतः ॥ ६
अद्याहमनृणस्तस्य कोपस्य भविता रणे ।
अमर्षितायाः कृष्णायाः काङ्क्षितस्य च मे पितुः ॥ ७
अद्य कौरव्य भीमस्य भवितास्म्यनृणो युधि ।
न हि मे मोक्ष्यसे जीवन्यदि नोत्सृजसे रणम् ॥ ८
एवमुक्त्वा महाबाहुर्बाणं दुःशासनान्तकम् ।
संदधे परवीरघ्नः कालाग्न्यनिलवर्चसम् ॥ ९
तस्योरस्तूर्णमासाद्य जत्रुदेशे विभिद्य तम् ।
अथैनं पञ्चविंशत्या पुनश्चैव समर्पयत् ॥ १०
स गाढविद्धो व्यथितो रथोपस्थ उपाविशत् ।
दुःशासनो महाराज कश्मलं चाविशन्महत् ॥ ११
सारथिस्त्वरमाणस्तु दुःशासनमचेतसम् ।
रणमध्यादपोवाह सौभद्रशरपीडितम् ॥ १२
पाण्डवा द्रौपदेयाश्च विराटश्च समीक्ष्य तम् ।
पाञ्चालाः केकयाश्चैव सिंहनादमथानदन् ॥ १३
वादित्राणि च सर्वाणि नानालिङ्गानि सर्वशः ।
प्रावादयन्त संहृष्टाः पाण्डूनां तत्र सैनिकाः ॥ १४
पश्यन्तः स्मयमानाश्च सौभद्रस्य विचेष्टितम् ।
अत्यन्तवैरिणं दृप्तं दृष्ट्वा शत्रुं पराजितम् ॥ १५
धर्ममारुतशक्राणामश्विनोः प्रतिमास्तथा ।
धारयन्तो ध्वजाग्रेषु द्रौपदेया महारथाः ॥ १६
सात्यकिश्चेकितानश्च धृष्टद्युम्नशिखण्डिनौ ।
केकया धृष्टकेतुश्च मत्स्यपाञ्चालसृञ्जयाः ॥ १७
पाण्डवाश्च मुदा युक्ता युधिष्ठिरपुरोगमाः ।

अभ्यवर्तन्त सहिता द्रोणानीकं विभित्सवः ॥ १८
ततोऽभवन्महद्युद्धं त्वदीयानां परैः सह ।
जयमाकाङ्क्षमाणानां शूराणामनिवर्तिनाम् ॥ १९
दुर्योधनो महाराज राधेयमिदमब्रवीत् ।
पश्य दुःशासनं वीरमभिमन्युवशं गतम् ॥ २०
प्रतपन्तमिवादित्यं निघ्नन्तं शात्रवान्रणे ।
सौभद्रमुद्यतास्त्रातुमभिधावन्ति पाण्डवाः ॥ २१
ततः कर्णः शरैस्तीक्ष्णैरभिमन्युं दुरासदम् ।
अभ्यवर्षत संक्रुद्धः पुत्रस्य हितकृत्तव ॥ २२
तस्य चानुचरांस्तीक्ष्णैर्विव्याध परमेषुभिः ।
अवज्ञापूर्वकं वीरः सौभद्रस्य रणाजिरे ॥ २३
अभिमन्युस्तु राधेयं त्रिसप्तत्या शिलीमुखैः ।
अविध्यत्त्वरितो राजन्द्रोणं प्रेप्सुर्महामनाः ॥ २४
तं तदा नाशकत्कश्चिद्द्रोणाद्वारयितुं रणे ।
आरुजन्तं रथश्रेष्ठान्वज्रहस्तमिवासुरान् ॥ २५
ततः कर्णो जयप्रेप्सुर्मानी सर्वधनुर्भृताम् ।
सौभद्रं शतशोऽविध्यदुत्तमास्त्राणि दर्शयन् ॥ २६
सोऽस्त्रैरस्त्रविदां श्रेष्ठो रामशिष्यः प्रतापवान् ।
समरे शत्रुदुर्धर्षमभिमन्युमपीडयत् ॥ २७
स तथा पीड्यमानस्तु राधेयेनास्त्रवृष्टिभिः ।
समरेऽमरसंकाशः सौभद्रो न व्यषीदत ॥ २८
ततः शिलाशितैस्तीक्ष्णैर्भल्लैः संनतपर्वभिः ।
छित्त्वा धनूंषि शूराणामार्जुनिः कर्णमार्दयत् ।
सध्वजं कार्मुकं चास्य छित्त्वा भूमौ न्यपातयत् ॥
ततः कृच्छ्रगतं कर्णं दृष्ट्वा कर्णादनन्तरः ।
सौभद्रमभ्ययात्तूर्णं दृढमुद्यम्य कार्मुकम् ॥ ३०
तत उच्चुक्रुशुः पार्थास्तेषां चानुचरा जनाः ।
वादित्राणि च संजघ्नुः सौभद्रं चापि तुष्टुवुः ॥ ३१

इति श्रीमहाभारते द्रोणपर्वणि
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

४०

संजय उवाच ।

सोऽभिगर्जन्धनुष्पाणिर्ज्यां विकर्षन्पुनः पुनः ।
तयोर्महात्मनोस्तूर्णं रथान्तरमवापतत् ॥ १
सोऽविध्यद्दशभिर्बाणैरभिमन्युं दुरासदम् ।
सच्छत्रध्वजयन्तारं साश्वमाशु स्मयन्निव ॥ २
पितृपैतामहं कर्म कुर्वाणमतिमानुषम् ।
दृष्ट्वार्दितं शरैः कार्ष्णिं त्वदीया हृषिताभवन् ॥ ३
तस्याभिमन्युरायम्य स्मयन्नेकेन पत्त्रिणा ।
शिरः प्रच्यावयामास स रथात्प्रापतद्भुवि ॥ ४
कर्णिकारमिवोद्धूतं वातेन मथितं नगात् ।
भ्रातरं निहतं दृष्ट्वा राजन्कर्णो व्यथां ययौ ॥ ५
विमुखीकृत्य कर्णं तु सौभद्रः कङ्कपत्त्रिभिः ।
अन्यानपि महेष्वासांस्तूर्णमेवाभिदुद्रुवे ॥ ६
ततस्तद्विततं जालं हस्त्यश्वरथपत्तिमत् ।
झषः क्रुद्ध इवाभिन्ददभिमन्युर्महायशाः ॥ ७
कर्णस्तु बहुभिर्बाणैरर्द्यमानोऽभिमन्युना ।
अपायाज्जवनैरश्वैस्ततोऽनीकमभिद्यत ॥ ८
शलभैरिव चाकाशे धाराभिरिव चावृते ।
अभिमन्योः शरै राजन्न प्राज्ञायत किंचन ॥ ९
तावकानां तु योधानां वध्यतां निशितैः शरैः ।
अन्यत्र सैन्धवाद्राजन्न स्म कश्चिदतिष्ठत ॥ १०
सौभद्रस्तु ततः शङ्खं प्रध्माप्य पुरुषर्षभः ।
शीघ्रमभ्यपतत्सेनां भारतीं भरतर्षभ ॥ ११
स कक्षेऽग्निरिवोत्सृष्टो निर्दहंस्तरसा रिपून् ।
मध्ये भारतसैन्यानामार्जुनिः पर्यवर्तत ॥ १२
रथनागाश्वमनुजानर्दयन्निशितैः शरैः ।
स प्रविश्याकरोद्भूमिं कबन्धगणसंकुलाम् ॥ १३
सौभद्रचापप्रभवैर्निकृत्ताः परमेषुभिः ।
स्वानेवाभिमुखान्घ्नन्तः प्राद्रवञ्जीवितार्थिनः ॥ १४

ते घोरा रौद्रकर्माणो विपाठाः पृथवः शिताः ।
निघ्नन्तो रथनागाश्वाञ्जग्मुराशु वसुंधराम् ॥ १५
सायुधाः साङ्गुलित्राणाः सखड्गाः साङ्गदा रणे ।
दृश्यन्ते बाहवश्छिन्ना हेमाभरणभूषिताः ॥ १६
शराश्चापानि खड्गाश्च शरीराणि शिरांसि च ।
सकुण्डलानि स्रग्वीणि भूमावासन्सहस्रशः ॥ १७
अपस्करैरधिष्ठानैरीषादण्डकबन्धुरैः ।
अक्षैर्विमथितैश्चक्रैर्भग्नैश्च बहुधा रथैः ।
शक्तिचापायुधैश्चापि पतितैश्च महाध्वजैः ॥ १८
निहतैः क्षत्रियैरश्वैर्वारणैश्च विशां पते ।
अगम्यकल्पा पृथिवी क्षणेनासीत्सुदारुणा ॥ १९
वध्यतां राजपुत्राणां क्रन्दतामितरेतरम् ।
प्रादुरासीन्महाशब्दो भीरूणां भयवर्धनः ।
स शब्दो भरतश्रेष्ठ दिशः सर्वा व्यनादयत् ॥ २०
सौभद्रश्चाद्रवत्सेनां निघ्नन्नश्वरथद्विपान् ।
व्यचरत्स दिशः सर्वाः प्रदिशश्चाहितान्रुजन् ॥ २१
तं तदा नानुपश्याम सैन्येन रजसावृतम् ।
आददानं गजाश्वानां नृणां चायूंषि भारत ॥ २२
क्षणेन भूयोऽपश्याम सूर्यं मध्यंदिने यथा ।
अभिमन्युं महाराज प्रतपन्तं द्विषद्गणान् ॥ २३
स वासवसमः संख्ये वासवस्यात्मजात्मजः ।
अभिमन्युर्महाराज सैन्यमध्ये व्यरोचत ॥ २४

इति श्रीमहाभारते द्रोणपर्वणि
चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

धृतराष्ट्र उवाच ।

बालमत्यन्तसुखिनमवार्यबलदर्पितम् ।
युद्धेषु कुशलं वीरं कुलपुत्रं तनुत्यजम् ॥ १
गाहमानमनीकानि सदश्वैस्तं त्रिहायनैः ।
अपि यौधिष्ठिरात्सैन्यात्कश्चिदन्वपतद्रथी ॥ २

संजय उवाच ।

युधिष्ठिरो भीमसेनः शिखण्डी सात्यकिर्यमौ ।
धृष्टद्युम्नो विराटश्च द्रुपदश्च सकेकयः ।
धृष्टकेतुश्च संरब्धो मत्स्याश्चान्वपतन्रणे ॥ ३
अभ्यद्रवन्परीप्सन्तो व्यूढानीकाः प्रहारिणः ।
तान्दृष्ट्वा द्रवतः शूरांस्त्वदीया विमुखाभवन् ॥ ४
ततस्तद्विमुखं दृष्ट्वा तव सूनोर्महद्बलम् ।
जामाता तव तेजस्वी विष्टम्भयिषुराद्रवत् ॥ ५
सैन्धवस्य महाराज पुत्रो राजा जयद्रथः ।
स पुत्रगृद्धिनः पार्थान्सहसैन्यानवारयत् ॥ ६
उग्रधन्वा महेष्वासो दिव्यमस्त्रमुदीरयन् ।
वार्धक्षत्रिरुपासेधत्प्रवणादिव कुञ्जरान् ॥ ७

धृतराष्ट्र उवाच ।

अतिभारमहं मन्ये सैन्धवे संजयाहितम् ।
यदेकः पाण्डवान्क्रुद्धान्पुत्रगृद्धीनवारयत् ॥ ८
अत्यद्भुतमिदं मन्ये बलं शौर्यं च सैन्धवे ।
तदस्य ब्रूहि मे वीर्यं कर्म चाग्र्यं महात्मनः ॥ ९
किं दत्तं हुतमिष्टं वा सुतप्तमथ वा तपः ।
सिन्धुराजेन येनैकः क्रुद्धान्पार्थानवारयत् ॥ १०

संजय उवाच ।

द्रौपदीहरणे यत्तद्भीमसेनेन निर्जितः ।
मानात्स तप्तवान्राजा वरार्थी सुमहत्तपः ॥ ११
इन्द्रियाणीन्द्रियार्थेभ्यः प्रियेभ्यः संनिवर्त्य सः ।
क्षुत्पिपासातपसहः कृशो धमनिसंततः ।
देवमाराधयच्छर्वं गृणन्ब्रह्म सनातनम् ॥ १२
भक्तानुकम्पी भगवांस्तस्य चक्रे ततो दयाम् ।
स्वप्नान्तेऽप्यथ चैवाह हरः सिन्धुपतेः सुतम् ।
वरं वृणीष्व प्रीतोऽस्मि जयद्रथ किमिच्छसि ॥ १३
एवमुक्तस्तु शर्वेण सिन्धुराजो जयद्रथः ।
उवाच प्रणतो रुद्रं प्राञ्जलिर्नियतात्मवान् ॥ १४

पाण्डवेयानहं संख्ये भीमवीर्यपराक्रमान् ।
एको रणे धारयेयं समस्तानिति भारत ॥ १५
एवमुक्तस्तु देवेशो जयद्रथमथाब्रवीत् ।
ददामि ते वरं सौम्य विना पार्थं धनंजयम् ॥ १६
धारयिष्यसि संग्रामे चतुरः पाण्डुनन्दनान् ।
एवमस्त्विति देवेशमुक्त्वाबुध्यत पार्थिवः ॥ १७
स तेन वरदानेन दिव्येनास्त्रबलेन च ।
एकः संधारयामास पाण्डवानामनीकिनीम् ॥ १८
तस्य ज्यातलघोषेण क्षत्रियान्भयमाविशत् ।
परांस्तु तव सैन्यस्य हर्षः परमकोऽभवत् ॥ १९
दृष्ट्वा तु क्षत्रिया भारं सैन्धवे सर्वमर्पितम् ।
उत्क्रुश्याभ्यद्रवन्राजन्येन यौधिष्ठिरं बलम् ॥ २०

इति श्रीमहाभारते द्रोणपर्वणि
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

४२

संजय उवाच ।

यन्मा पृच्छसि राजेन्द्र सिन्धुराजस्य विक्रमम् ।
शृणु तत्सर्वमाख्यास्ये यथा पाण्डूनयोधयत् ॥ १
तमूहुः सारथेर्वश्याः सैन्धवाः साधुवाहिनः ।
विकुर्वाणा बृहन्तोऽश्वाः श्वसनोपमरंहसः ॥ २
गन्धर्वनगराकारं विधिवत्कल्पितं रथम् ।
तस्याभ्यशोभयत्केतुर्वाराहो राजतो महान् ॥ ३
श्वेतच्छत्रपताकाभिश्चामरव्यजनेन च ।
स बभौ राजलिङ्गैस्तैस्तारापतिरिवाम्बरे ॥ ४
मुक्तावज्रमणिस्वर्णैर्भूषितं तदयस्मयम् ।
वरूथं विबभौ तस्य ज्योतिर्भिः खमिवावृतम् ॥ ५
स विस्फार्य महच्चापं किरन्निषुगणान्बहून् ।
तत्खण्डं पूरयामास यद्व्यदारयदार्जुनिः ॥ ६
स सात्यकिं त्रिभिर्बाणैरष्टभिश्च वृकोदरम् ।
धृष्टद्युम्नं तथा षष्ट्या विराटं दशभिः शरैः ॥ ७
द्रुपदं पञ्चभिस्तीक्ष्णैर्दशभिश्च शिखण्डिनम् ।
केकयान्पञ्चविंशत्या द्रौपदेयांस्त्रिभिस्त्रिभिः ॥ ८
युधिष्ठिरं च सप्तत्या ततः शेषानपानुदत् ।
इषुजालेन महता तदद्भुतमिवाभवत् ॥ ९
अथास्य शितपीतेन भल्लेनादिश्य कार्मुकम् ।
चिच्छेद प्रहसन्राजा धर्मपुत्रः प्रतापवान् ॥ १०
अक्ष्णोर्निमेषमात्रेण सोऽन्यदादाय कार्मुकम् ।
विव्याध दशभिः पार्थं तांश्चैवान्यांस्त्रिभिस्त्रिभिः ॥
तस्य तल्लाघवं ज्ञात्वा भीमो भल्लैस्त्रिभिः पुनः ।
धनुर्ध्वजं च छत्रं च क्षितौ क्षिप्रमपातयत् ॥ १२
सोऽन्यदादाय बलवान्सज्यं कृत्वा च कार्मुकम् ।
भीमस्यापोथयत्केतुं धनुरश्वांश्च मारिष ॥ १३
स हताश्वादवप्लुत्य छिन्नधन्वा रथोत्तमात् ।
सात्यकेराप्लुतो यानं गिर्यग्रमिव केसरी ॥ १४
ततस्त्वदीयाः संहृष्टाः साधु साध्विति चुक्रुशुः ।
सिन्धुराजस्य तत्कर्म प्रेक्ष्याश्रद्धेयमुत्तमम् ॥ १५
संक्रुद्धान्पाण्डवानेको यद्दधारास्त्रतेजसा ।
तत्तस्य कर्म भूतानि सर्वाण्येवाभ्यपूजयन् ॥ १६
सौभद्रेण हतैः पूर्वं सोत्तरायुधिभिर्द्विपैः ।
पाण्डूनां दर्शितः पन्थाः सैन्धवेन निवारितः ॥ १७
यतमानास्तु ते वीरा मत्स्यपाञ्चालकेकयाः ।
पाण्डवाश्चान्वपद्यन्त प्रत्येकशयेन सैन्धवम् ॥ १८
यो यो हि यतते भेत्तुं द्रोणानीकं तवाहितः ।
तं तं देववरप्राप्त्या सैन्धवः प्रत्यवारयत् ॥ १९

इति श्रीमहाभारते द्रोणपर्वणि
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

४३

संजय उवाच ।

सैन्धवेन निरुद्धेषु जयगृद्धिषु पाण्डुषु ।
सुघोरमभवद्युद्धं त्वदीयानां परैः सह ॥ १

प्रविश्य त्वार्जुनिः सेनां सत्यसंधो दुरासदाम् ।
व्यक्षोभयत तेजस्वी मकरः सागरं यथा ॥ २
तं तथा शरवर्षेण क्षोभयन्तमरिंदमम् ।
यथाप्रधानाः सौभद्रमभ्ययुः कुरुसत्तमाः ॥ ३
तेषां तस्य च संमर्दो दारुणः समपद्यत ।
सृजतां शरवर्षाणि प्रसक्तममितौजसाम् ॥ ४
रथव्रजेन संरुद्धस्तैरमित्रैरथार्जुनिः ।
वृषसेनस्य यन्तारं हत्वा चिच्छेद कार्मुकम् ॥ ५
तस्य विव्याध बलवाञ्शरैरश्वानजिह्मगैः ।
वातायमानैरथ तैरश्वैरपहृतो रणात् ॥ ६
तेनान्तरेणाभिमन्योर्यन्तापासारयद्रथम् ।
रथव्रजास्ततो हृष्टाः साधु साध्विति चुक्रुशुः ॥ ७
तं सिंहमिव संक्रुद्धं प्रमथ्नन्तं शरैररीन् ।
आरादायान्तमभ्येत्य वसातीयोऽभ्ययाद्द्रुतम् ॥ ८
सोऽभिमन्युं शरैः षष्ट्या रुक्मपुङ्खैरवाकिरत् ।
अब्रवीच्च न मे जीवञ्जीवतो युधि मोक्ष्यसे ॥ ९
तमयस्मयवर्माणमिषुणा आशुपातिना ।
विव्याध हृदि सौभद्रः स पपात व्यसुः क्षितौ ॥ १०
वसातयं निहतं दृष्ट्वा क्रुद्धाः क्षत्रियपुंगवाः ।
परिवव्रुस्तदा राजंस्तव पौत्रं जिघांसवः ॥ ११
विस्फारयन्तश्चापानि नानारूपाण्यनेकशः ।
तद्युद्धमभवद्रौद्रं सौभद्रस्यारिभिः सह ॥ १२
तेषां शरान्सेष्वसनाञ्शरीराणि शिरांसि च ।
सकुण्डलानि स्रग्वीणि क्रुद्धश्चिच्छेद फाल्गुनिः ॥
सखड्गाः साङ्गुलित्राणाः सपट्टिशपरश्वधाः ।
अदृश्यन्त भुजाश्छिन्ना हेमाभरणभूषिताः ॥ १४
स्रग्भिराभरणैर्वस्त्रैः पतितैश्च महाध्वजैः ।
वर्मभिश्चर्मभिर्हारैर्मुकुटैश्छत्रचामरैः ॥ १५
अपस्करैरधिष्ठानैरीषादण्डकबन्धुरैः ।
अक्षैर्विमथितैश्चक्रैर्भग्नैश्च बहुधा युगैः ॥ १६
अनुकर्षैः पताकाभिस्तथा सारथिवाजिभिः ।
रथैश्च भग्नैर्नागैश्च हतैः कीर्णाभवन्मही ॥ १७
निहतैः क्षत्रियैः शूरैर्नानाजनपदेश्वरैः ।
जयगृद्धैर्वृता भूमिर्दारुणा समपद्यत ॥ १८
दिशो विचरतस्तस्य सर्वाश्च प्रदिशस्तथा ।
रणेऽभिमन्योः क्रुद्धस्य रूपमन्तरधीयत ॥ १९
काञ्चनं यद्यदस्यासीद्वर्म चाभरणानि च ।
धनुषश्च शराणां च तदपश्याम केवलम् ॥ २०
तं तदा नाशकत्कश्चिच्चक्षुर्भ्यामभिवीक्षितुम् ।
आददानं शरैर्योधान्मध्ये सूर्यमिव स्थितम् ॥ २१

इति श्रीमहाभारते द्रोणपर्वणि
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

४४

संजय उवाच ।

आददानस्तु शूराणामायूंष्यभवदार्जुनिः ।
अन्तकः सर्वभूतानां प्राणान्काल इवागते ॥ १
स शक्र इव विक्रान्तः शक्रसूनोः सुतो बली ।
अभिमन्युस्तदानीकं लोडयन्बह्वशोभत ॥ २
प्रविश्यैव तु राजेन्द्र क्षत्रियेन्द्रान्तकोपमः ।
सत्यश्रवसमादत्त व्याघ्रो मृगमिवोल्बणम् ॥ ३
सत्यश्रवसि चाक्षिप्ते त्वरमाणा महारथाः ।
प्रगृह्य विपुलं शस्त्रमभिमन्युमुपाद्रवन् ॥ ४
अहं पूर्वमहं पूर्वमिति क्षत्रियपुंगवाः ।
स्पर्धमानाः समाजग्मुर्जिघांसन्तोऽर्जुनात्मजम् ॥ ५
क्षत्रियाणामनीकानि प्रद्रुतान्यभिधावताम् ।
जग्रास तिमिरासाद्य क्षुद्रमत्स्यानिवार्णवे ॥ ६
ये केचन गतास्तस्य समीपमपलायिनः ।
न ते प्रतिन्यवर्तन्त समुद्रादिव सिन्धवः ॥ ७
महाग्राहगृहीतेव वातवेगभयार्दिता ।
समकम्पत सा सेना विभ्रष्टा नौरिवार्णवे ॥ ८

अथ रुक्मरथो नाम मद्रेश्वरसुतो बली ।
त्रस्तामाश्वासयन्सेनामत्रस्तो वाक्यमब्रवीत् ॥ ९
अलं त्रासेन वः शूरा नैष कश्चिन्मयि स्थिते ।
अहमेनं ग्रहीष्यामि जीवग्राहं न संशयः ॥ १०
एवमुक्त्वा तु सौभद्रमभिदुद्राव वीर्यवान् ।
सुकल्पितेनोह्यमानः स्यन्दनेन विराजिता ॥ ११
सोऽभिमन्युं त्रिभिर्बाणैर्विद्ध्वा वक्षस्यथानदत् ।
त्रिभिश्च दक्षिणे बाहौ सव्ये च निशितैस्त्रिभिः॥१२
स तस्येष्वसनं छित्त्वा फाल्गुनिः सव्यदक्षिणौ ।
भुजौ शिरश्च स्वक्षिभ्रु क्षितौ क्षिप्रमपातयत् ॥ १३
दृष्ट्वा रुक्मरथं रुग्णं पुत्रं शल्यस्य मानिनम् ।
जीवग्राहं जिघृक्षन्तं सौभद्रेण यशस्विना ॥ १४
संग्रामदुर्मदा राजन्राजपुत्राः प्रहारिणः ।
वयस्याः शल्यपुत्रस्य सुवर्णविकृतध्वजाः ॥ १५
तालमात्राणि चापानि विकर्षन्तो महारथाः ।
आर्जुनिं शरवर्षेण समन्तात्पर्यवारयन् ॥ १६
शूरैः शिक्षाबलोपेतैस्तरुणैरत्यमर्षणैः ।
दृष्ट्वैकं समरे शूरं सौभद्रमपराजितम् ॥ १७
छाद्यमानं शरव्रातैर्हृष्टो दुर्योधनोऽभवत् ।
वैवस्वतस्य भवनं गतमेनममन्यत ॥ १८
सुवर्णपुङ्खैरिषुभिर्नानालिङ्गैस्त्रिभिस्त्रिभिः ।
अदृश्यमार्जुनिं चक्रुर्निमेषात्ते नृपात्मजाः ॥ १९
ससूताश्वध्वजं तस्य स्यन्दनं तं च मारिष ।
आचितं समपश्याम श्वाविधं शललैरिव ॥ २०
स गाढविद्धः क्रुद्धश्च तोत्त्रैर्गज इवार्दितः ।
गान्धर्वमस्त्रमायच्छद्रथमायां च योजयत् ॥ २१
अर्जुनेन तपस्तप्त्वा गन्धर्वेभ्यो यदाहृतम् ।
तुम्बुरुप्रमुखेभ्यो वै तेनामोहयताहितान् ॥ २२
एकः स शतधा राजन्दृश्यते स्म सहस्रधा ।
अलातचक्रवत्संख्ये क्षिप्रमस्त्राणि दर्शयन् ॥ २३
रथचर्यास्त्रमायाभिर्मोहयित्वा परंतपः ।
बिभेद शतधा राजञ्शरीराणि महीक्षिताम् ॥ २४
प्राणाः प्राणभृतां संख्ये प्रेषिता निशितैः शरैः ।
राजन्प्रापुरमुं लोकं शरीराण्यवनिं ययुः ॥ २५
धनूंष्यश्वान्नियन्तॄंश्च ध्वजान्बाहूंश्च साङ्गदान् ।
शिरांसि च शितैर्भल्लैस्तेषां चिच्छेद फाल्गुनिः ॥२६
चूतारामो यथा भग्नः पञ्चवर्षफलोपगः ।
राजपुत्रशतं तद्वत्सौभद्रेणापतद्धतम् ॥ २७
क्रुद्धाशीविषसंकाशान्सुकुमारान्सुखोचितान् ।
एकेन निहतान्दृष्ट्वा भीतो दुर्योधनोऽभवत् ॥ २८
रथिनः कुञ्जरानश्वान्पदातींश्चावमर्दितान् ।
दृष्ट्वा दुर्योधनः क्षिप्रमुपायात्तममर्षितः ॥ २९
तयोः क्षणमिवापूर्णः संग्रामः समपद्यत ।
अथाभवत्ते विमुखः पुत्रः शरशतार्दितः ॥ ३०

इति श्रीमहाभारते द्रोणपर्वणि
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

४५

धृतराष्ट्र उवाच ।

यथा वदसि मे सूत एकस्य बहुभिः सह ।
संग्रामं तुमुलं घोरं जयं चैव महात्मनः ॥ १
अश्रद्धेयमिवाश्चर्यं सौभद्रस्याथ विक्रमम् ।
किं तु नात्यद्भुतं तेषां येषां धर्मो व्यपाश्रयः ॥ २
दुर्योधनेऽथ विमुखे राजपुत्रशते हते ।
सौभद्रे प्रतिपत्तिं कां प्रत्यपद्यन्त मामकाः ॥ ३

संजय उवाच ।

संशुष्कास्याश्चलन्नेत्राः प्रस्विन्ना लोमहर्षिणः ।
पलायनकृतोत्साहा निरुत्साहा द्विषज्जये ॥ ४
हतान्भ्रातॄन्पितॄन्पुत्रान्सुहृत्संबन्धिबान्धवान् ।
उत्सृज्योत्सृज्य समियुस्त्वरयन्तो हयद्विपान् ॥ ५
तान्प्रभग्नांस्तथा दृष्ट्वा द्रोणो द्रौणिर्बृहद्बलः ।

कृपो दुर्योधनः कर्णः कृतवर्माथ सौबलः ॥ ६
अभिद्रुताः सुसंक्रुद्धाः सौभद्रमपराजितम् ।
तेऽपि पौत्रेण ते राजन्प्रायशो विमुखीकृताः ॥ ७
एकस्तु सुखसंवृद्धो बाल्याद्दर्पाच्च निर्भयः ।
इष्वस्त्रविन्महातेजा लक्ष्मणोऽऽर्जुनिमभ्ययात् ॥ ८
तमन्वगेवास्य पिता पुत्रगृद्धी न्यवर्तत ।
अनु दुर्योधनं चान्ये न्यवर्तन्त महारथाः ॥ ९
तं तेऽभिषिषिचुर्बाणैर्मेघा गिरिमिवाम्बुभिः ।
स च तान्प्रममाथैको विष्वग्वातो यथाम्बुदान् ॥
पौत्रं तु तव दुर्धर्षं लक्ष्मणं प्रियदर्शनम् ।
पितुः समीपे तिष्ठन्तं शूरमुद्यतकार्मुकम् ॥ ११
अत्यन्तसुखसंवृद्धं धनेश्वरसुतोपमम् ।
आससाद रणे कार्ष्णिर्मत्तो मत्तमिव द्विपम् ॥ १२
लक्ष्मणेन तु संगम्य सौभद्रः परवीरहा ।
शरैः सुनिशितैस्तीक्ष्णैर्बाह्वोरुरसि चार्पितः ॥ १३
संक्रुद्धो वै महाबाहुर्दण्डाहत इवोरगः ।
पौत्रस्तव महाराज तव पौत्रमभाषत ॥ १४
सुदृष्टः क्रियतां लोको अमुं लोकं गमिष्यसि ।
पश्यतां बान्धवानां त्वां नयामि यमसादनम् ॥ १५
एवमुक्त्वा ततो भल्लं सौभद्रः परवीरहा ।
उद्बबर्ह महाबाहुर्निर्मुक्तोरगसंनिभम् ॥ १६
स तस्य भुजनिर्मुक्तो लक्ष्मणस्य सुदर्शनम् ।
सुनसं सुभ्रु केशान्तं शिरोऽहार्षीत्सकुण्डलम् ।
लक्ष्मणं निहतं दृष्ट्वा हा हेत्युच्चुक्रुशुर्जनाः ॥ १७
ततो दुर्योधनः क्रुद्धः प्रिये पुत्रे निपातिते ।
हतैनमिति चुक्रोश क्षत्रियान्क्षत्रियर्षभः ॥ १८
ततो द्रोणः कृपः कर्णो द्रोणपुत्रो बृहद्बलः ।
कृतवर्मा च हार्दिक्यः षड्रथाः पर्यवारयन् ॥ १९
स तान्विद्ध्वा शितैर्बाणैर्विमुखीकृत्य चार्जुनिः ।
वेगेनाभ्यपतत्क्रुद्धः सैन्धवस्य महद्बलम् ॥ २०
आवव्रुस्तस्य पन्थानं गजानीकेन दंशिताः ।
कलिङ्गाश्च निषादाश्च क्राथपुत्रश्च वीर्यवान् ।
तत्प्रसक्तमिवात्यर्थं युद्धमासीद्विशां पते ॥ २१
ततस्तत्कुञ्जरानीकं व्यधमद्धृष्टमार्जुनिः ।
यथा विवान्नित्यगतिर्जलदाञ्शतशोऽम्बरे ॥ २२
ततः क्राथः शरव्रातैरार्जुनिं समवाकिरत् ।
अथेतरे संनिवृत्ताः पुनर्द्रोणमुखा रथाः ।
परमास्त्राणि धुन्वानाः सौभद्रमभिदुद्रुवुः ॥ २३
तान्निवार्यार्जुनिर्बाणैः क्राथपुत्रमथार्दयत् ।
शरौघेणाप्रमेयेण त्वरमाणो जिघांसया ॥ २४
सधनुर्बाणकेयूरौ बाहू समुकुटं शिरः ।
छत्रं ध्वजं नियन्तारमश्वांश्चास्य न्यपातयत् ॥ २५
कुलशीलश्रुतबलैः कीर्त्या चास्त्रबलेन च ।
युक्ते तस्मिन्हते वीराः प्रायशो विमुखाभवन् ॥२६

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

धृतराष्ट्र उवाच ।

तथा प्रविष्टं तरुणं सौभद्रमपराजितम् ।
कुलानुरूपं कुर्वाणं संग्रामेष्वपलायिनम् ॥ १
आजानेयैः सुबलिभिर्युक्तमश्वैस्त्रिहायनैः ।
प्लवमानमिवाकाशे के शूराः समवारयन् ॥ २

संजय उवाच ।

अभिमन्युः प्रविश्यैव तावकान्निशितैः शरैः ।
अकरोद्विमुखान्सर्वान्पार्थिवान्पाण्डुनन्दनः ॥ ३
तं तु द्रोणः कृपः कर्णो द्रौणिश्च सबृहद्बलः ।
कृतवर्मा च हार्दिक्यः षड्रथाः पर्यवारयन् ॥ ४
दृष्ट्वा तु सैन्धवे भारमतिमात्रं समाहितम् ।
सैन्यं तव महाराज युधिष्ठिरमुपाद्रवत् ॥ ५
सौभद्रमितरे वीरमभ्यवर्षञ्शराम्बुभिः ।

तालमात्राणि चापानि विकर्षन्तो महारथाः ॥ ६
तांस्तु सर्वान्महेष्वासान्सर्वविद्यासु निष्ठितान् ।
व्यष्टम्भयद्रणे बाणैः सौभद्रः परवीरहा ॥ ७
द्रोणं पञ्चाशता विद्ध्वा विंशत्या च बृहद्बलम् ।
अशीत्या कृतवर्माणं कृपं षष्ट्या शिलीमुखैः ॥ ८
रुक्मपुङ्खैर्महावेगैराकर्णसमचोदितैः ।
अविध्यद्दशभिर्बाणैरश्वत्थामानमार्जुनिः ॥ ९
स कर्णं कर्णिना कर्णे पीतेन निशितेन च ।
फाल्गुनिर्द्विषतां मध्ये विव्याध परमेषुणा ॥ १०
पातयित्वा कृपस्याश्वांस्तथोभौ पार्ष्णिसारथी ।
अथैनं दशभिर्बाणैः प्रत्यविध्यत्स्तनान्तरे ॥ ११
ततो वृन्दारकं वीरं कुरूणां कीर्तिवर्धनम् ।
पुत्राणां तव वीराणां पश्यतामवधीद्बली ॥ १२
तं द्रौणिः पञ्चविंशत्या क्षुद्रकाणां समर्पयत् ।
वरं वरममित्राणामारुजन्तमभीतवत् ॥ १३
स तु बाणैः शितैस्तूर्णं प्रत्यविध्यत मारिष ।
पश्यतां धार्तराष्ट्राणामश्वत्थामानमार्जुनिः ॥ १४
षष्ट्या शराणां तं द्रौणिस्तिग्मधारैः सुतेजनैः ।
उग्रैर्नाकम्पयद्विद्ध्वा मैनाकमिव पर्वतम् ॥ १५
स तु द्रोणिं त्रिसप्तत्या हेमपुङ्खैरजिह्मगैः ।
प्रत्यविध्यन्महातेजा बलवानपकारिणम् ॥ १६
तस्मिन्द्रोणो बाणशतं पुत्रगृद्धी न्यपातयत् ।
अश्वत्थामा तथाष्टौ च परीप्सन्पितरं रणे ॥ १७
कर्णो द्वाविंशतिं भल्लान्कृतवर्मा चतुर्दश ।
बृहद्बलस्तु पञ्चाशत्कृपः शारद्वतो दश ॥ १८
तांस्तु प्रत्यवधीत्सर्वान्दशभिर्दशभिः शरैः ।
तैरर्द्यमानः सौभद्रः सर्वतो निशितैः शरैः ॥ १९
तं कोसलानामधिपः कर्णिनाताडयद्धृदि ।
स तस्याश्वान्ध्वजं चापं सूतं चापातयत्क्षितौ ॥ २०
अथ कोसलराजस्तु विरथः खड्गचर्मधृत् ।
इयेष फाल्गुनेः कायाच्छिरो हर्तुं सकुण्डलम् ॥ २१
स कोसलानां भर्तारं राजपुत्रं बृहद्बलम् ।
हृदि विव्याध बाणेन स भिन्नहृदयोऽपतत् ॥ २२
बभञ्ज च सहस्राणि दश राजन्महात्मनाम् ।
सृजतामशिवा वाचः खड्गकार्मुकधारिणाम् ॥ २३
तथा बृहद्बलं हत्वा सौभद्रो व्यचरद्रणे ।
विष्टम्भयन्महेष्वासान्योधांस्तव शराम्बुभिः ॥ २४

इति श्रीमहाभारते द्रोणपर्वणि
षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

४७

संजय उवाच ।

स कर्णं कर्णिना कर्णे पुनर्विव्याध फाल्गुनिः ।
शरैः पञ्चाशता चैनमविध्यत्कोपयन्भृशम् ॥ १
प्रतिविव्याध राधेयस्तावद्भिरथ तं पुनः ।
स तैराचितसर्वाङ्गो बह्वशोभत भारत ॥ २
कर्णं चाप्यकरोत्क्रुद्धो रुधिरोत्पीडवाहिनम् ।
कर्णोऽपि विबभौ शूरः शरैश्चित्रोऽसृगाप्लुतः ॥ ३
तावुभौ शरचित्राङ्गौ रुधिरेण समुक्षितौ ।
बभूवतुर्महात्मानौ पुष्पिताविव किंशुकौ ॥ ४
अथ कर्णस्य सचिवान्षट् शूरांश्चित्रयोधिनः ।
साश्वसूतध्वजरथान्सौभद्रो निजघान ह ॥ ५
अथेतरान्महेष्वासान्दशभिर्दशभिः शरैः ।
प्रत्यविध्यदसंभ्रान्तस्तदद्भुतमिवाभवत् ॥ ६
मागधस्य पुनः पुत्रं हत्वा षड्भिरजिह्मगैः ।
साश्वं ससूतं तरुणमश्वकेतुमपातयत् ॥ ७
मार्तिकावतकं भोजं ततः कुञ्जरकेतनम् ।
क्षुरप्रेण समुन्मथ्य ननाद विसृजञ्शरान् ॥ ८
तस्य दौःशासनिर्विद्ध्वा चतुर्भिश्चतुरो हयान् ।
सूतमेकेन विव्याध दशभिश्चार्जुनात्मजम् ॥ ९
ततो दौःशासनिं कार्ष्णिर्विद्ध्वा सप्तभिराशुगैः ।

संरम्भाद्रक्तनयनो वाक्यमुच्चैरथाब्रवीत् ॥ १०
पिता तवाहवं त्यक्त्वा गतः कापुरुषो यथा ।
दिष्ट्या त्वमपि जानीषे योद्धुं न त्वद्य मोक्ष्यसे ॥
एतावदुक्त्वा वचनं कर्मारपरिमार्जितम् ।
नाराचं विससर्जास्मै तं द्रौणिस्त्रिभिराच्छिनत् ॥ १२
तस्यार्जुनिर्ध्वजं छित्त्वा शल्यं त्रिभिरताडयत् ।
तं शल्यो नवभिर्बाणैर्गार्ध्रपत्रैरताडयत् ॥ १३
तस्यार्जुनिर्ध्वजं छित्त्वा उभौ च पार्ष्णिसारथी ।
तं विव्याधायसैः षड्भिः सोऽपक्रामद्रथान्तरम् ॥ १४
शत्रुंजयं चन्द्रकेतुं मेघवेगं सुवर्चसम् ।
सूर्यभासं च पञ्चैतान्हत्वा विव्याध सौबलम् ॥ १५
तं सौबलस्त्रिभिर्विद्ध्वा दुर्योधनमथाब्रवीत् ।
सर्व एनं प्रमथ्नीमः पुरैकैकं हिनस्ति नः ॥ १६
अथाब्रवीत्तदा द्रोणं कर्णो वैकर्तनो वृषा ।
पुरा सर्वान्प्रमथ्नाति ब्रूह्यस्य वधमाशु नः ॥ १७
ततो द्रोणो महेष्वासः सर्वांस्तान्प्रत्यभाषत ।
अस्ति वोऽस्यान्तरं कश्चित्कुमारस्य प्रपश्यति ॥ १८
अन्वस्य पितरं ह्यद्य चरतः सर्वतोदिशम् ।
शीघ्रतां नरसिंहस्य पाण्डवेयस्य पश्यत ॥ १९
धनुर्मण्डलमेवास्य रथमार्गेषु दृश्यते ।
संदधानस्य विशिखाञ्शीघ्रं चैव विमुञ्चतः ॥ २०
आरुजन्निव मे प्राणान्मोहयन्नपि सायकैः ।
प्रहर्षयति मा भूयः सौभद्रः परवीरहा ॥ २१
अति मा नन्दयत्येष सौभद्रो विचरन्रणे ।
अन्तरं यस्य संरब्धा न पश्यन्ति महारथाः ॥ २२
अस्यतो लघुहस्तस्य दिशः सर्वा महेषुभिः ।
न विशेषं प्रपश्यामि रणे गाण्डीवधन्वनः ॥ २३
अथ कर्णः पुनर्द्रोणमाहार्जुनिशरार्दितः ।
स्थातव्यमिति तिष्ठामि पीड्यमानोऽभिमन्युना ॥ २४
तेजस्विनः कुमारस्य शराः परमदारुणाः ।
क्षिण्वन्ति हृदयं मेऽद्य घोराः पावकतेजसः ॥ २५
तमाचार्योऽब्रवीत्कर्णं शनकैः प्रहसन्निव ।
अभेद्यमस्य कवचं युवा चाशुपराक्रमः ॥ २६
उपदिष्टा मया अस्य पितुः कवचधारणा ।
तामेष निखिलां वेत्ति ध्रुवं परपुरंजयः ॥ २७
शक्यं त्वस्य धनुश्छेत्तुं ज्यां च बाणैः समाहितैः ।
अभीशवो हयाश्चैव तथोभौ पार्ष्णिसारथी ॥ २८
एतत्कुरु महेष्वास राधेय यदि शक्यते ।
अथैनं विमुखीकृत्य पश्चात्प्रहरणं कुरु ॥ २९
सधनुष्को न शक्योऽयमपि जेतुं सुरासुरैः ।
विरथं विधनुष्कं च कुरुष्वैनं यदीच्छसि ॥ ३०
तदाचार्यवचः श्रुत्वा कर्णो वैकर्तनस्त्वरन् ।
अस्यतो लघुहस्तस्य पृषत्कैर्धनुराच्छिनत् ॥ ३१
अश्वानस्यावधीद्भोजो गौतमः पार्ष्णिसारथी ।
शेषास्तु छिन्नधन्वानं शरवर्षैरवाकिरन् ॥ ३२
त्वरमाणास्त्वराकाले विरथं षण्महारथाः ।
शरवर्षैरकरुणा बालमेकमवाकिरन् ॥ ३३
स छिन्नधन्वा विरथः स्वधर्ममनुपालयन् ।
खड्गचर्मधरः श्रीमानुत्पपात विहायसम् ॥ ३४
मार्गैः स कैशिकाद्यैश्च लाघवेन बलेन च ।
आर्जुनिर्व्यचरद्व्योम्नि भृशं वै पक्षिराडिव ॥ ३५
मय्येव निपतत्येष सासिरित्यूर्ध्वदृष्टयः ।
विव्यधुस्तं महेष्वासाः समरे छिद्रदर्शिनः ॥ ३६
तस्य द्रोणोऽच्छिनन्मुष्टौ खड्गं मणिमयत्सरुम् ।
राधेयो निशितैर्बाणैर्व्यधमच्चर्म चोत्तमम् ॥ ३७
व्यसिचर्मेषुपूर्णाङ्गः सोऽन्तरिक्षात्पुनः क्षितिम् ।
आस्थितश्चक्रमुद्यम्य द्रोणं क्रुद्धोऽभ्यधावत ॥ ३८

स चक्ररेणूज्ज्वलशोभिताङ्गो
बभावतीवोन्नतचक्रपाणिः ।
रणेऽभिमन्युः क्षणदासुभद्रः

स वासुभद्रानुकृतिं प्रकुर्वन् ॥ ३९
सुतरुधिरकृतैकरागवक्त्रो
भ्रुकुटिपुटाकुटिलोऽतिसिंहनादः ।
प्रभुरमितबलो रणेऽभिमन्यु-
र्नृपवरमध्यगतो भृशं व्यराजत् ॥ ४०

इति श्रीमहाभारते द्रोणपर्वणि
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

४८

संजय उवाच ।

विष्णोः स्वसानन्दिकरः स विष्ण्वायुधभूषितः ।
रराजातिरथः संख्ये जनार्दन इवापरः ॥ १
मारुतोद्धूतकेशान्तमुद्यतारिवरायुधम् ।
वपुः समीक्ष्य पृथ्वीशा दुःसमीक्ष्यं सुरैरपि ॥ २
तच्चक्रं भृशमुद्विग्नाः संचिच्छिदुरनेकधा ।
महारथस्ततः कार्ष्णिः संजग्राह महागदाम् ॥ ३
विधनुःस्यन्दनासिस्तैर्विचक्रश्चारिभिः कृतः ।
अभिमन्युर्गदापाणिरश्वत्थामानमाद्रवत् ॥ ४
स गदामुद्यतां दृष्ट्वा ज्वलन्तीमशनीमिव ।
अपाक्रामद्रथोपस्थाद्विक्रमांस्त्रीन्नरर्षभः ॥ ५
तस्याश्वान्गदया हत्वा तथोभौ पार्ष्णिसारथी ।
शराचिताङ्गः सौभद्रः श्वाविद्वत्प्रत्यदृश्यत ॥ ६
ततः सुबलदायादं कालकेयमपोथयत् ।
जघान चास्यानुचरान्गान्धारान्सप्तसप्ततिम् ॥ ७
पुनर्ब्रह्मवसातीयाञ्जघान रथिनो दश ।
केकयानां रथान्सप्त हत्वा च दश कुञ्जरान् ।
दौःशासनिरथं साश्वं गदया समपोथयत् ॥ ८
ततो दौःशासनिः क्रुद्धो गदामुद्यम्य मारिष ।
अभिदुद्राव सौभद्रं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ९
तावुद्यतगदौ वीरावन्योन्यवधकाङ्क्षिणौ ।
भ्रातृव्यौ संप्रजह्राते पुरेव त्र्यम्बकान्तकौ ॥ १०
तावन्योन्यं गदाग्राभ्यां संहत्य पतितौ क्षितौ ।
इन्द्रध्वजाविवोत्सृष्टौ रणमध्ये परंतपौ ॥ ११
दौःशासनिरथोत्थाय कुरूणां कीर्तिवर्धनः ।
प्रोत्तिष्ठमानं सौभद्रं गदया मूर्ध्न्यताडयत् ॥ १२
गदावेगेन महता व्यायामेन च मोहितः ।
विचेता न्यपतद्भूमौ सौभद्रः परवीरहा ।
एवं विनिहतो राजन्नेको बहुभिराहवे ॥ १३
क्षोभयित्वा चमूं सर्वां नलिनीमिव कुञ्जरः ।
अशोभत हतो वीरो व्याधैर्वनगजो यथा ॥ १४
तं तथा पतितं शूरं तावकाः पर्यवारयन् ।
दावं दग्ध्वा यथा शान्तं पावकं शिशिरात्यये ॥१५
विमृद्य तरुशृङ्गाणि संनिवृत्तमिवानिलम् ।
अस्तं गतमिवादित्यं तप्त्वा भारतवाहिनीम् ॥ १६
उपप्लुतं यथा सोमं संशुष्कमिव सागरम् ।
पूर्णचन्द्राभवदनं काकपक्षवृताक्षकम् ॥ १७
तं भूमौ पतितं दृष्ट्वा तावकास्ते महारथाः ।
मुदा परमया युक्ताश्चुक्रुशुः सिंहवन्मुहुः ॥ १८
आसीत्परमको हर्षस्तावकानां विशां पते ।
इतरेषां तु वीराणां नेत्रेभ्यः प्रापतज्जलम् ॥ १९
अभिक्रोशन्ति भूतानि अन्तरिक्षे विशां पते ।
दृष्ट्वा निपतितं वीरं च्युतं चन्द्रमिवाम्बरात् ॥ २०
द्रोणकर्णमुखैः षड्भिर्धार्तराष्ट्रैर्महारथैः ।
एकोऽयं निहतः शेते नैष धर्मो मतो हि नः ॥ २१
तस्मिंस्तु निहते वीरे बह्वशोभत मेदिनी ।
द्यौर्यथा पूर्णचन्द्रेण नक्षत्रगणमालिनी ॥ २२
रुक्मपुङ्खैश्च संपूर्णा रुधिरौघपरिप्लुता ।
उत्तमाङ्गैश्च वीराणां भ्राजमानैः सकुण्डलैः ॥ २३
विचित्रैश्च परिस्तोमैः पताकाभिश्च संवृता ।
चामरैश्च कुथाभिश्च प्रविद्धैश्चाम्बरोत्तमैः ॥ २४
रथाश्वनरनागानामलंकारैश्च सुप्रभैः ।

खड्गैश्च निशितैः पीतैर्निर्मुक्तैर्भुजगैरिव ॥ २५
चापैश्च विशिखैश्छिन्नैः शक्त्यृष्टिप्रासकम्पनैः ।
विविधैरायुधैश्चान्यैः संवृता भूरशोभत ॥ २६
वाजिभिश्चापि निर्जीवैः स्वपद्भिः शोणितोक्षितैः ।
सारोहैर्विषमा भूमिः सौभद्रेण निपातितैः ॥ २७
साङ्कुशैः समहामात्रैः सवर्मायुधकेतुभिः ।
पर्वतैरिव विध्वस्तैर्विशिखोन्मथितैर्गजैः ॥ २८
पृथिव्यामनुकीर्णैश्च व्यश्वसारथियोधिभिः ।
ह्रदैरिव प्रक्षुभितैर्हतनागै रथोत्तमैः ॥ २९
पदातिसंघैश्च हतैर्विविधायुधभूषणैः ।
भीरूणां त्रासजननी घोररूपाभवन्मही ॥ ३०
तं दृष्ट्वा पतितं भूमौ चन्द्रार्कसदृशद्युतिम् ।
तावकानां परा प्रीतिः पाण्डूनां चाभवद्व्यथा ॥ ३१
अभिमन्यौ हते राजञ्शिशुकेऽप्राप्तयौवने ।
संप्राद्रवच्चमूः सर्वा धर्मराजस्य पश्यतः ॥ ३२
दीर्यमाणं बलं दृष्ट्वा सौभद्रे विनिपातिते ।
अजातशत्रुः स्वान्वीरानिदं वचनमब्रवीत् ॥ ३३
स्वर्गमेष गतः शूरो यो हतो नपराङ्मुखः ।
संस्तम्भयत मा भैष्ट विजेष्यामो रणे रिपून् ॥ ३४
इत्येवं स महातेजा दुःखितेभ्यो महाद्युतिः ।
धर्मराजो युधां श्रेष्ठो ब्रुवन्दुःखमपानुदत् ॥ ३५
युद्धे ह्याशीविषाकारान्राजपुत्रान्रणे बहून् ।
पूर्वं निहत्य संग्रामे पश्चादार्जुनिरन्वगात् ॥ ३६
हत्वा दशसहस्राणि कौसल्यं च महारथम् ।
कृष्णार्जुनसमः कार्ष्णिः शक्रसद्म गतो ध्रुवम् ॥ ३७
रथाश्वनरमातङ्गान्विनिहत्य सहस्रशः ।
अवितृप्तः स संग्रामादशोच्यः पुण्यकर्मकृत् ॥ ३८
वयं तु प्रवरं हत्वा तेषां तैः शरपीडिताः ।
निवेशायाभ्युपायाम सायाह्ने रुधिरोक्षिताः ॥ ३९
निरीक्षमाणास्तु वयं परे चायोधनं शनैः ।
अपयाता महाराज ग्लानिं प्राप्ता विचेतसः ॥ ४०
ततो निशाया दिवसस्य चाशिवः
शिवारुतः संधिरवर्तताद्भुतः ।
कुशेशयापीडनिभे दिवाकरे
विलम्बमानेऽस्तमुपेत्य पर्वतम् ॥ ४१
वरासिशक्त्यृष्टिवरूथचर्मणां
विभूषणानां च समाक्षिपन्प्रभाम् ।
दिवं च भूमिं च समानयन्निव
प्रियां तनुं भानुरुपैति पावकम् ॥ ४२
महाभ्रकूटाचलशृङ्गसंनिभै-
र्गजैरनेकैरिव वज्रपातितैः ।
सवैजयन्त्यङ्कुशवर्मयन्तृभि-
र्निपातितैर्निष्टनतीव गौश्चिता ॥ ४३
हतेश्वरैश्चूर्णितपत्त्युपस्करै-
र्हताश्वसूतैर्विपताककेतुभिः ।
महारथैर्भूः शुशुभे विचूर्णितैः
पुरैरिवामित्रहतैर्नराधिप ॥ ४४
रथाश्ववृन्दैः सहसादिभिर्हतैः
प्रविद्धभाण्डाभरणैः पृथग्विधैः ।
निरस्तजिह्वादशनान्त्रलोचनै-
र्धरा बभौ घोरविरूपदर्शना ॥ ४५
प्रविद्धवर्माभरणा वरायुधा
विपन्नहस्त्यश्वरथानुगा नराः ।
महार्हशय्यास्तरणोचिताः सदा
क्षितावनाथा इव शेरते हताः ॥ ४६
अतीव हृष्टाः श्वसृगालवायसा
बडाः सुपर्णाश्च वृकास्तरक्षवः ।
वयांस्यसृक्पान्यथ रक्षसां गणाः
पिशाचसंघाश्च सुदारुणा रणे ॥ ४७
त्वचो विनिर्भिद्य पिबन्वसामसृ-

क्तथैव मज्जां पिशितानि चाश्नुवन् ।
वपां विलुम्पन्ति हसन्ति गान्ति च
प्रकर्षमाणाः कुणपान्यनेकशः ॥ ४८
शरीरसंघाटवहा असृग्जला
रथोडुपा कुञ्जरशैलसंकटा ।
मनुष्यशीर्षोपलमांसकर्दमा
प्रविद्धनानाविधशस्त्रमालिनी ॥ ४९
महाभया वैतरणीव दुस्तरा
प्रवर्तिता योधवरैस्तदा नदी ।
उवाह मध्येन रणाजिरं भृशं
भयावहा जीवमृतप्रवाहिनी ॥ ५०
पिबन्ति चाश्नन्ति च यत्र दुर्दृशाः
पिशाचसंघा विविधाः सुभैरवाः ।
सुनन्दिताः प्राणभृतां भयंकराः
समानभक्षाः श्वसृगालपक्षिणः ॥ ५१
तथा तदायोधनमुग्रदर्शनं
निशामुखे पितृपतिराष्ट्रसंनिभम् ।
निरीक्षमाणाः शनकैर्जहुर्नराः
समुत्थितारुण्डकुलोपसंकुलम् ॥ ५२
अपेतविध्वस्तमहार्हभूषणं
निपातितं शक्रसमं महारथम् ।
रणेऽभिमन्युं ददृशुस्तदा जना
व्यपोढहव्यं सदसीव पावकम् ॥ ५३

इति श्रीमहाभारते द्रोणपर्वणि
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

४९

संजय उवाच ।

तस्मिंस्तु निहते वीरे सौभद्रे रथयूथपे ।
विमुक्तरथसंनाहाः सर्वे निक्षिप्तकार्मुकाः ॥ १
उपोपविष्टा राजानं परिवार्य युधिष्ठिरम् ।
तदेव दुःखं ध्यायन्तः सौभद्रगतमानसाः ॥ २
ततो युधिष्ठिरो राजा विललाप सुदुःखितः ।
अभिमन्यौ हते वीरे भ्रातुः पुत्रे महारथे ॥ ३
द्रोणानीकमसंबाधं मम प्रियचिकीर्षया ।
भित्त्वा व्यूहं प्रविष्टोऽसौ गोमध्यमिव केसरी ॥ ४
यस्य शूरा महेष्वासाः प्रत्यनीकगता रणे ।
प्रभग्ना विनिवर्तन्ते कृतास्त्रा युद्धदुर्मदाः ॥ ५
अत्यन्तशत्रुरस्माकं येन दुःशासनः शरैः ।
क्षिप्रं ह्यभिमुखः संख्ये विसंज्ञो विमुखीकृतः ॥ ६
स तीर्त्वा दुस्तरं वीरो द्रोणानीकमहार्णवम् ।
प्राप्य दौःशासनिं कार्ष्णिर्यातो वैवस्वतक्षयम् ॥ ७
कथं द्रक्ष्यामि कौन्तेयं सौभद्रे निहतेऽर्जुनम् ।
सुभद्रां वा महाभागां प्रियं पुत्रमपश्यतीम् ॥ ८
किं स्विद्वयमपेतार्थमश्लिष्टमसमञ्जसम् ।
तावुभौ प्रतिवक्ष्यामो हृषीकेशधनंजयौ ॥ ९
अहमेव सुभद्रायाः केशवार्जुनयोरपि ।
प्रियकामो जयाकाङ्क्षी कृतवानिदमप्रियम् ॥ १०
न लुब्धो बुध्यते दोषान्मोहाल्लोभः प्रवर्तते ।
मधु लिप्सुर्हि नापश्यं प्रपातमिदमीदृशम् ॥ ११
यो हि भोज्ये पुरस्कार्यो यानेषु शयनेषु च ।
भूषणेषु च सोऽस्माभिर्बालो युधि पुरस्कृतः ॥ १२
कथं हि बालस्तरुणो युद्धानामविशारदः ।
सदश्व इव संबाधे विषमे क्षेममर्हति ॥ १३
नो चेद्धि वयमप्येनं महीमनुशयीमहि ।
बीभत्सोः कोपदीप्तस्य दग्धाः कृपणचक्षुषा ॥ १४
अलुब्धो मतिमान्ह्रीमान्क्षमावान्रूपवान्बली ।
वपुष्मान्मानकृद्वीरः प्रियः सत्यपरायणः ॥ १५
यस्य श्लाघन्ति विबुधाः कर्माण्यूर्जितकर्मणः ।
निवातकवचाञ्जघ्ने कालकेयांश्च वीर्यवान् ॥ १६
महेन्द्रशत्रवो येन हिरण्यपुरवासिनः ।

अक्ष्णोर्निमेषमात्रेण पौलोमाः सगणा हताः ॥ १७
परेभ्योऽप्यभयार्थिभ्यो यो ददात्यभयं विभुः ।
तस्यास्माभिर्न शकितस्त्रातुमद्यात्मजो भयात् ॥ १८
भयं तु सुमहत्प्राप्तं धार्तराष्ट्रं महद्बलम् ।
पार्थः पुत्रवधात्क्रुद्धः कौरवाञ्शोषयिष्यति ॥ १९
क्षुद्रः क्षुद्रसहायश्च स्वपक्षक्षयमातुरः ।
व्यक्तं दुर्योधनो दृष्ट्वा शोचन्हास्यति जीवितम् ॥

न मे जयः प्रीतिकरो न राज्यं
न चामरत्वं न सुरैः सलोकता ।
इमं समीक्ष्याप्रतिवीर्यपौरुषं
निपातितं देववरात्मजात्मजम् ॥ २१

इति श्रीमहाभारते द्रोणपर्वणि
एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

५०

संजय उवाच ।

तस्मिन्नहनि निर्वृत्ते घोरे प्राणभृतां क्षये ।
आदित्येऽस्तंगते श्रीमान्संध्याकाल उपस्थिते ॥ १
व्यपयातेषु सैन्येषु वासाय भरतर्षभ ।
हत्वा संशप्तकव्रातान्दिव्यैरस्त्रैः कपिध्वजः ॥ २
प्रायात्स्वशिबिरं जिष्णुर्जैत्रमास्थाय तं रथम् ।
गच्छन्नेव च गोविन्दं सन्नकण्ठोऽभ्यभाषत ॥ ३
किं नु मे हृदयं त्रस्तं वाक्यं सज्जति केशव ।
स्पन्दन्ति चाप्यनिष्टानि गात्रं सीदति चाच्युत ॥४
अनिष्टं चैव मे श्लिष्टं हृदयान्नापसर्पति ।
भुवि यद्दिक्षु चाप्युग्रा उत्पातास्त्रासयन्ति माम् ॥ ५
बहुप्रकारा दृश्यन्ते सर्व एवाघशंसिनः ।
अपि स्वस्ति भवेद्राज्ञः सामात्यस्य गुरोर्मम ॥ ६

वासुदेव उवाच ।

व्यक्तं शिवं तव भ्रातुः सामात्यस्य भविष्यति ।
मा शुचः किंचिदेवान्यत्तत्रानिष्टं भविष्यति ॥ ७

संजय उवाच ।

ततः संध्यामुपास्यैव वीरौ वीरावसादने ।
कथयन्तौ रणे वृत्तं प्रयातौ रथमास्थितौ ॥ ८
ततः स्वशिबिरं प्राप्तौ हतानन्दं हतत्विषम् ।
वासुदेवोऽर्जुनश्चैव कृत्वा कर्म सुदुष्करम् ॥ ९
ध्वस्ताकारं समालक्ष्य शिबिरं परवीरहा ।
बीभत्सुरब्रवीत्कृष्णमस्वस्थहृदयस्ततः ॥ १०
नाद्य नन्दन्ति तूर्याणि मङ्गल्यानि जनार्दन ।
मिश्रा दुन्दुभिनिर्घोषैः शङ्खाश्चाडम्बरैः सह ।
वीणा वा नाद्य वाद्यन्ते शम्यातालस्वनैः सह ॥११
मङ्गल्यानि च गीतानि न गायन्ति पठन्ति च ।
स्तुतियुक्तानि रम्याणि ममानीकेषु बन्दिनः ॥ १२
योधाश्चापि हि मां दृष्ट्वा निवर्तन्ते ह्यधोमुखाः ।
कर्माणि च यथापूर्वं कृत्वा नाभिवदन्ति माम् ॥
अपि स्वस्ति भवेदद्य भ्रातृभ्यो मम माधव ।
न हि शुध्यति मे भावो दृष्ट्वा स्वजनमाकुलम् ॥ १४
अपि पाञ्चालराजस्य विराटस्य च मानद ।
सर्वेषां चैव योधानां सामग्र्यं स्यान्ममाच्युत ॥१५
न च मामद्य सौभद्रः प्रहृष्टो भ्रातृभिः सह ।
रणादायान्तमुचितं प्रत्युद्याति हसन्निव ॥ १६
एवं संकथयन्तौ तौ प्रविष्टौ शिबिरं स्वकम् ।
ददृशाते भृशास्वस्थान्पाण्डवान्नष्टचेतसः ॥ १७
दृष्ट्वा भ्रातॄंश्च पुत्रांश्च विमना वानरध्वजः ।
अपश्यंश्चैव सौभद्रमिदं वचनमब्रवीत् ॥ १८
मुखवर्णोऽप्रसन्नो वः सर्वेषामेव लक्ष्यते ।
न चाभिमन्युं पश्यामि न च मां प्रतिनन्दथ ॥१९
मया श्रुतश्च द्रोणेन चक्रव्यूहो विनिर्मितः ।
न च वस्तस्य भेत्तास्ति ऋते सौभद्रमाहवे ॥ २०
न चोपदिष्टस्तस्यासीन्मयानीकविनिर्गमः ।
कच्चिन्न बालो युष्माभिः परानीकं प्रवेशितः ॥ २१

भित्त्वानीकं महेष्वासः परेषां बहुशो युधि ।
कच्चिन्न निहतः शेते सौभद्रः परवीरहा ॥ २२
लोहिताक्षं महाबाहुं जातं सिंहमिवाद्रिषु ।
उपेन्द्रसदृशं ब्रूत कथमायोधने हतः ॥ २३
सुकुमारं महेष्वासं वासवस्यात्मजात्मजम् ।
सदा मम प्रियं ब्रूत कथमायोधने हतः ॥ २४
वार्ष्णेयीदयितं शूरं मया सततलालितम् ।
अम्बायाश्च प्रियं नित्यं कोऽवधीत्कालचोदितः ॥
सदृशो वृष्णिसिंहस्य केशवस्य महात्मनः ।
विक्रमश्रुतमाहात्म्यैः कथमायोधने हतः ॥ २६
सुभद्रायाः प्रियं नित्यं द्रौपद्याः केशवस्य च ।
यदि पुत्रं न पश्यामि यास्यामि यमसादनम् ॥ २७
मृदुकुञ्चितकेशान्तं बालं बालमृगेक्षणम् ।
मत्तद्विरदविक्रान्तं शालपोतमिवोद्गतम् ॥ २८
स्मिताभिभाषिणं दान्तं गुरुवाक्यकरं सदा ।
बाल्येऽप्यबालकर्माणं प्रियवाक्यममत्सरम् ॥ २९
महोत्साहं महाबाहुं दीर्घराजीवलोचनम् ।
भक्तानुकम्पिनं दान्तं न च नीचानुसारिणम् ॥३०
कृतज्ञं ज्ञानसंपन्नं कृतास्त्रमनिवर्तिनम् ।
युद्धाभिनन्दिनं नित्यं द्विषतामघवर्धनम् ॥ ३१
स्वेषां प्रियहिते युक्तं पितॄणां जयगृद्धिनम् ।
न च पूर्वप्रहर्तारं संग्रामे नष्टसंभ्रमम् ।
यदि पुत्रं न पश्यामि यास्यामि यमसादनम् ॥३२
सुललाटं सुकेशान्तं सुभ्र्वक्षिदशनच्छदम् ।
अपश्यतस्तद्वदनं का शान्तिर्हृदयस्य मे ॥ ३३
तन्त्रीस्वनसुखं रम्यं पुंस्कोकिलसमध्वनिम् ।
अशृण्वतः स्वनं तस्य का शान्तिर्हृदयस्य मे ॥३४
रूपं चाप्रतिरूपं तत्त्रिदशेष्वपि दुर्लभम् ।
अपश्यतोऽद्य वीरस्य का शान्तिर्हृदयस्य मे ॥ ३५
अभिवादनदक्षं तं पितॄणां वचने रतम् ।
नाद्याहं यदि पश्यामि का शान्तिर्हृदयस्य मे ॥३६
सुकुमारः सदा वीरो महार्हशयनोचितः ।
भूमावनाथवच्छेते नूनं नाथवतां वरः ॥ ३७
शयानं समुपासन्ति यं पुरा परमस्त्रियः ।
तमद्य विप्रविद्धाङ्गमुपासन्त्यशिवाः शिवाः ॥ ३८
यः पुरा बोध्यते सुप्तः सूतमागधबन्दिभिः ।
बोधयन्त्यद्य तं नूनं श्वापदा विकृतैः स्वरैः ॥ ३९
छत्रच्छायासमुचितं तस्य तद्वदनं शुभम् ।
नूनमद्य रजोध्वस्तं रणे रेणुः करिष्यति ॥ ४०
हा पुत्रकावितृप्तस्य सततं पुत्रदर्शने ।
भाग्यहीनस्य कालेन यथा मे नीयसे बलात् ॥ ४१
साद्य संयमनी नूनं सदा सुकृतिनां गतिः ।
स्वभाभिर्भासिता रम्या त्वयात्यर्थं विराजते ॥ ४२
नूनं वैवस्वतश्च त्वा वरुणश्च प्रियातिथिः ।
शतक्रतुर्धनेशश्च प्राप्तमर्चन्त्यभीरुकम् ॥ ४३
एवं विलप्य बहुधा भिन्नपोतो वणिग्यथा ।
दुःखेन महताविष्टो युधिष्ठिरमपृच्छत ॥ ४४
कच्चित्स कदनं कृत्वा परेषां पाण्डुनन्दन ।
स्वर्गतोऽभिमुखः संख्ये युध्यमानो नरर्षभः ॥ ४५
स नूनं बहुभिर्यत्तैर्युध्यमानो नरर्षभैः ।
असहायः सहायार्थी मामनुध्यातवान्ध्रुवम् ॥ ४६
पीड्यमानः शरैर्बालस्तात साध्वभिधाव माम् ।
इति विप्रलपन्मन्ये नृशंसैर्बहुभिर्हतः ॥ ४७
अथ वा मत्प्रसूतश्च स्वस्रीयो माधवस्य च ।
सुभद्रायां च संभूतो नैवं वक्तुमिहार्हति ॥ ४८
वज्रसारमयं नूनं हृदयं सुदृढं मम ।
अपश्यतो दीर्घबाहुं रक्ताक्षं यन्न दीर्यते ॥ ४९
कथं बाले महेष्वासे नृशंसा मर्मभेदिनः ।
स्वस्रीये वासुदेवस्य मम पुत्रेऽक्षिपञ्शरान् ॥ ५०
यो मां नित्यमदीनात्मा प्रत्युद्गम्याभिनन्दति ।

उपयान्तं रिपून्हत्वा सोऽद्य मां किं न पश्यति ॥
नूनं स पतितः शेते धरण्यां रुधिरोक्षितः ।
शोभयन्मेदिनीं गात्रैरादित्य इव पातितः ॥ ५२
रणे विनिहतं श्रुत्वा शोकार्ता वै विनंक्ष्यति ।
सुभद्रा वक्ष्यते किं मामभिमन्युमपश्यती ।
द्रौपदी चैव दुःखार्ते ते च वक्ष्यामि किं न्वहम् ॥
वज्रसारमयं नूनं हृदयं यन्न यास्यति ।
सहस्रधा वधूं दृष्ट्वा रुदतीं शोककर्शिताम् ॥ ५४
हृष्टानां धार्तराष्ट्राणां सिंहनादो मया श्रुतः ।
युयुत्सुश्चापि कृष्णेन श्रुतो वीरानुपालभन् ॥ ५५
अशक्नुवन्तो बीभत्सुं बालं हत्वा महारथाः ।
किं नदध्वमधर्मज्ञाः पार्थे वै दृश्यतां बलम् ॥ ५६
किं तयोर्विप्रियं कृत्वा केशवार्जुनयोर्मृधे ।
सिंहवन्नदत प्रीताः शोककाल उपस्थिते ॥ ५७
आगमिष्यति वः क्षिप्रं फलं पापस्य कर्मणः ।
अधर्मो हि कृतस्तीव्रः कथं स्यादफलश्चिरम् ॥ ५८
इति तान्प्रति भाषन्वै वैश्यापुत्रो महामतिः ।
अपायाच्छस्त्रमुत्सृज्य कोपदुःखसमन्वितः ॥ ५९
किमर्थमेतन्नाख्यातं त्वया कृष्ण रणे मम ।
अधक्ष्यं तानहं सर्वांस्तदा क्रूरान्महारथान् ॥ ६०
निगृह्य वासुदेवस्तं पुत्राधिभिरभिप्लुतम् ।
मैवमित्यब्रवीत्कृष्णस्तीव्रशोकसमन्वितम् ॥ ६१
सर्वेषामेष वै पन्थाः शूराणामनिवर्तिनाम् ।
क्षत्रियाणां विशेषेण येषां युद्धेन जीविका ॥ ६२
एषा वै युध्यमानानां शूराणामनिवर्तिनाम् ।
विहिता धर्मशास्त्रज्ञैर्गतिर्गतिमतां वर ॥ ६३
ध्रुवं युद्धे हि मरणं शूराणामनिवर्तिनाम् ।
गतः पुण्यकृतां लोकानभिमन्युर्न संशयः ॥ ६४
एतच्च सर्ववीराणां काङ्क्षितं भरतर्षभ ।
संग्रामेऽभिमुखा मृत्युं प्राप्नुयामेति मानद ॥ ६५
स च वीरान्रणे हत्वा राजपुत्रान्महाबलान् ।
वीरैराकाङ्क्षितं मृत्युं संप्राप्तोऽभिमुखो रणे ॥ ६६
मा शुचः पुरुषव्याघ्र पूर्वैरेष सनातनः ।
धर्मकृद्भिः कृतो धर्मः क्षत्रियाणां रणे क्षयः ॥ ६७
इमे ते भ्रातरः सर्वे दीना भरतसत्तम ।
त्वयि शोकसमाविष्टे नृपाश्च सुहृदस्तव ॥ ६८
एतांस्त्वं वचसा साम्ना समाश्वासय मानद ।
विदितं वेदितव्यं ते न शोकं कर्तुमर्हसि ॥ ६९
एवमाश्वासितः पार्थः कृष्णेनाद्भुतकर्मणा ।
ततोऽब्रवीत्तदा भ्रातॄन्सर्वान्पार्थः सगद्गदान् ॥ ७०
स दीर्घबाहुः पृथ्वंसो दीर्घराजीवलोचनः ।
अभिमन्युर्यथा वृत्तः श्रोतुमिच्छाम्यहं तथा ॥ ७१
सनागस्यन्दनहयान्द्रक्ष्यध्वं निहतान्मया ।
संग्रामे सानुबन्धांस्तान्मम पुत्रस्य वैरिणः ॥ ७२
कथं च वः कृतास्त्राणां सर्वेषां शस्त्रपाणिनाम् ।
सौभद्रो निधनं गच्छेद्वज्रिणापि समागतः ॥ ७३
यद्येवमहमज्ञास्यमशक्तान्रक्षणे मम ।
पुत्रस्य पाण्डुपाञ्चालान्मया गुप्तो भवेत्ततः ॥ ७४
कथं च वो रथस्थानां शरवर्षाणि मुञ्चताम् ।
नीतोऽभिमन्युर्निधनं कदर्थीकृत्य वः परैः ॥ ७५
अहो वः पौरुषं नास्ति न च वोऽस्ति पराक्रमः ।
यत्राभिमन्युः समरे पश्यतां वो निपातितः ॥ ७६
आत्मानमेव गर्हेयं यदहं वः सुदुर्बलान् ।
युष्मानाज्ञाय निर्यातो भीरूनकृतनिश्चमान् ॥ ७७
आहो स्विद्भूषणार्थाय वर्मशस्त्रायुधानि वः ।
वाचश्च वक्तुं संसत्सु मम पुत्रमरक्षताम् ॥ ७८
एवमुक्त्वा ततो वाक्यं तिष्ठंश्चापवरासिमान् ।
न स्माशक्यत बीभत्सुः केनचित्प्रसमीक्षितुम् ॥ ७९
तमन्तकमिव क्रुद्धं निःश्वसन्तं मुहुर्मुहुः ।
पुत्रशोकाभिसंतप्तमश्रुपूर्णमुखं तदा ॥ ८०

नाभिभाष्टुं शक्नुवन्ति द्रष्टुं वा सुहृदोऽर्जुनम् ।
अन्यत्र वासुदेवाद्वा ज्येष्ठाद्वा पाण्डुनन्दनात् ॥ ८१
सर्वास्ववस्थासु हितावर्जुनस्य मनोनुगौ ।
बहुमानात्प्रियत्वाच्च तावेनं वक्तुमर्हतः ॥ ८२
ततस्तं पुत्रशोकेन भृशं पीडितमानसम् ।
राजीवलोचनं क्रुद्धं राजा वचनमब्रवीत् ॥ ८३

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चाशोऽध्यायः ॥ ५० ॥

५१

युधिष्ठिर उवाच ।

त्वयि याते महाबाहो संशप्तकबलं प्रति ।
प्रयत्नमकरोत्तीव्रमाचार्यो ग्रहणे मम ॥ १
व्यूढानीकं वयं द्रोणं वारयामः स्म सर्वशः ।
प्रतिव्यूह्य रथानीकं यतमानं तथा रणे ॥ २
स वार्यमाणो रथिभी रक्षितेन मया तथा ।
अस्मानपि जघानाशु पीडयन्निशितैः शरैः ॥ ३
ते पीड्यमाना द्रोणेन द्रोणानीकं न शक्नुमः ।
प्रतिवीक्षितुमप्याजौ भेत्तुं तत्कुत एव तु ॥ ४
वयं त्वप्रतिमं वीर्ये सर्वे सौभद्रमात्मजम् ।
उक्तवन्तः स्म ते तात भिन्ध्यनीकमिति प्रभो ॥ ५
स तथा चोदितोऽस्माभिः सदश्व इव वीर्यवान् ।
असह्यमपि तं भारं वोढुमेवोपचक्रमे ॥ ६
स तवास्त्रोपदेशेन वीर्येण च समन्वितः ।
प्राविशत्तद्बलं बालः सुपर्ण इव सागरम् ॥ ७
तेऽनुयाता वयं वीरं सात्वतीपुत्रमाहवे ।
प्रवेष्टुकामास्तेनैव येन स प्राविशच्चमूम् ॥ ८
ततः सैन्धवको राजा क्षुद्रस्तात जयद्रथः ।
वरदानेन रुद्रस्य सर्वान्नः समवारयत् ॥ ९
ततो द्रोणः कृपः कर्णो द्रौणिश्च स बृहद्बलः ।
कृतवर्मा च सौभद्रं षड्रथाः पर्यवारयन् ॥ १०
परिवार्य तु तैः सर्वैर्युधि बालो महारथैः ।
यतमानः परं शक्त्या बहुभिर्विरथीकृतः ॥ ११
ततो दौःशासनिः क्षिप्रं तथा तैर्विरथीकृतम् ।
संशयं परमं प्राप्य दिष्टान्तेनाभ्ययोजयत् ॥ १२
स तु हत्वा सहस्राणि द्विपाश्वरथसादिनाम् ।
राजपुत्रशतं चाग्र्यं वीरांश्चालक्षितान्बहून् ॥ १३
बृहद्बलं च राजानं स्वर्गेणाजौ प्रयोज्य ह ।
ततः परमधर्मात्मा दिष्टान्तमुपजग्मिवान् ॥ १४
एतावदेव निर्वृत्तमस्माकं शोकवर्धनम् ।
स चैवं पुरुषव्याघ्रः स्वर्गलोकमवाप्तवान् ॥ १५

संजय उवाच ।

ततोऽर्जुनो वचः श्रुत्वा धर्मराजेन भाषितम् ।
हा पुत्र इति निःश्वस्य व्यथितो न्यपतद्भुवि ॥ १६
विषण्णवदनाः सर्वे परिगृह्य धनंजयम् ।
नेत्रैरनिमिषैर्दीनाः प्रत्यवेक्षन्परस्परम् ॥ १७
प्रतिलभ्य ततः संज्ञां वासविः क्रोधमूर्छितः ।
कम्पमानो ज्वरेणेव निःश्वसंश्च मुहुर्मुहुः ॥ १८
पाणिं पाणौ विनिष्पिष्य श्वसमानोऽश्रुनेत्रवान् ।
उन्मत्त इव विप्रेक्षन्निदं वचनमब्रवीत् ॥ १९
सत्यं वः प्रतिजानामि श्वोऽस्मि हन्ता जयद्रथम् ।
न चेद्वधभयाद्भीतो धार्तराष्ट्रान्प्रहास्यति ॥ २०
न चास्माञ्शरणं गच्छेत्कृष्णं वा पुरुषोत्तमम् ।
भवन्तं वा महाराज श्वोऽस्मि हन्ता जयद्रथम् ॥
धार्तराष्ट्रप्रियकरं मयि विस्मृतसौहृदम् ।
पापं बालवधे हेतुं श्वोऽस्मि हन्ता जयद्रथम् ॥ २२
रक्षमाणाश्च तं संख्ये ये मां योत्स्यन्ति केचन ।
अपि द्रोणकृपौ वीरौ छादयिष्यामि ताञ्शरैः ॥२३
यद्येतदेवं संग्रामे न कुर्यां पुरुषर्षभाः ।
मा स्म पुण्यकृतां लोकान्प्राप्नुयां शूरसंमतान् ॥२४
ये लोका मातृहन्तॄणां ये चापि पितृघातिनाम् ।

गुरुदारगामिनां ये च पिशुनानां च ये तथा ॥२५
साधूनसूयतां ये च ये चापि परिवादिनाम् ।
ये च निक्षेपहर्तॄणां ये च विश्वासघातिनाम् ॥२६
भुक्तपूर्वां स्त्रियं ये च निन्दतामघशंसिनाम् ।
ब्रह्मघ्नानां च ये लोका ये च गोघातिनामपि ॥ २७
पायसं वा यवान्नं वा शाकं कृसरमेव वा ।
संयावापूपमांसानि ये च लोका वृथाश्नताम् ।
तानह्नैवाधिगच्छेयं न चेद्धन्यां जयद्रथम् ॥ २८
वेदाध्यायिनमत्यर्थं संशितं वा द्विजोत्तमम् ।
अवमन्यमानो यान्याति वृद्धान्साधूंस्तथा गुरून् ॥
स्पृशतां ब्राह्मणं गां च पादेनाग्निं च यां लभेत् ।
याप्सु श्लेष्म पुरीषं वा मूत्रं वा मुञ्चतां गतिः ।
तां गच्छेयं गतिं घोरां न चेद्धन्यां जयद्रथम् ॥ ३०
नग्नस्य स्नायमानस्य या च वन्ध्यातिथेर्गतिः ।
उत्कोचिनां मृषोक्तीनां वञ्चकानां च या गतिः ।
आत्मापहारिणां या च या च मिथ्याभिशंसिनाम् ॥
भृत्यैः संदृश्यमानानां पुत्रदाराश्रितैस्तथा ।
असंविभज्य क्षुद्राणां या गतिर्मृष्टमश्नताम् ।
तां गच्छेयं गतिं घोरां न चेद्धन्यां जयद्रथम् ॥३२
संश्रितं वापि यस्त्यक्त्वा साधुं तद्वचने रतम् ।
न बिभर्ति नृशंसात्मा निन्दते चोपकारिणम् ॥ ३३
अर्हते प्रातिवेश्याय श्राद्धं यो न ददाति च ।
अनर्हते च यो दद्याद्वृषलीपत्युरेव च ॥ ३४
मद्यपो भिन्नमर्यादः कृतघ्नो भ्रातृनिन्दकः ।
तेषां गतिमियां क्षिप्रं न चेद्धन्यां जयद्रथम् ॥ ३५
धर्मादपेता ये चान्ये मया नात्रानुकीर्तिताः ।
ये चानुकीर्तिताः क्षिप्रं तेषां गतिमवाप्नुयाम् ।
यदि व्युष्टामिमां रात्रिं श्वो न हन्यां जयद्रथम् ॥
इमां चाप्यपरां भूयः प्रतिज्ञां मे निबोधत ।
यद्यस्मिन्नहते पापे सूर्योऽस्तमुपयास्यति ।
इहैव संप्रवेष्टाहं ज्वलितं जातवेदसम् ॥ ३७
अमुरसुरमनुष्याः पक्षिणो वोरगा वा
पितृरजनिचरा वा ब्रह्मदेवर्षयो वा ।
चरमचरमपीदं यत्परं चापि तस्मा-
त्तदपि मम रिपुं तं रक्षितुं नैव शक्ताः ॥
यदि विशति रसातलं तदग्र्यं
वियदपि देवपुरं दितेः पुरं वा ।
तदपि शरशतैरहं प्रभाते
भृशमभिपत्य रिपोः शिरोऽभिहर्ता ॥ ३९
एवमुक्त्वा विचिक्षेप गाण्डीवं सव्यदक्षिणम् ।
तस्य शब्दमतिक्रम्य धनुःशब्दोऽस्पृशद्दिवम् ॥ ४०
अर्जुनेन प्रतिज्ञाते पाञ्चजन्यं जनार्दनः ।
प्रदध्मौ तत्र संक्रुद्धो देवदत्तं धनंजयः ॥ ४१
स पाञ्चजन्योऽच्युतवक्त्रवायुना
भृशं सुपूर्णोदरनिःसृतध्वनिः ।
जगत्सपातालवियद्दिगीश्वरं
प्रकम्पयामास युगात्यये यथा ॥ ४२
ततो वादित्रघोषाश्च प्रादुरासन्समन्ततः ।
सिंहनादाश्च पाण्डूनां प्रतिज्ञाते महात्मना ॥ ४३

इति श्रीमहाभारते द्रोणपर्वणि
एकपञ्चाशोऽध्यायः ॥ ५१ ॥

॥ समाप्तमभिमन्युवधपर्व ॥

५२

संजय उवाच ।

श्रुत्वा तु तं महाशब्दं पाण्डूनां पुत्रगृद्धिनाम् ।
चारैः प्रवेदिते तत्र समुत्थाय जयद्रथः ॥ १
शोकसंमूढहृदयो दुःखेनाभिहतो भृशम् ।
मज्जमान इवागाधे विपुले शोकसागरे ॥ २
जगाम समितिं राज्ञां सैन्धवो विमृशन्बहु ।
स तेषां नरदेवानां सकाशे परिदेवयन् ॥ ३

अभिमन्योः पितुर्भीतः सव्रीडो वाक्यमब्रवीत् ।
योऽसौ पाण्डोः किल क्षेत्रे जातः शक्रेण कामिना ॥
स निनीषति दुर्बुद्धिर्मां किलैकं यमक्षयम् ।
तत्स्वस्ति वोऽस्तु यास्यामि स्वगृहं जीवितेप्सया ॥ ५
अथ वा स्थ प्रतिबलास्त्रातुं मां क्षत्रियर्षभाः ।
पार्थेन प्रार्थितं वीरास्ते ददन्तु ममाभयम् ॥ ६
द्रोणदुर्योधनकृपाः कर्णमद्रेशबाह्लिकाः ।
दुःशासनादयः शक्तास्त्रातुमप्यन्तकार्दितम् ॥ ७
किमङ्ग पुनरेकेन फल्गुनेन जिघांसता ।
न त्रायेयुर्भवन्तो मां समस्ताः पतयः क्षितेः ॥ ८
प्रहर्षं पाण्डवेयानां श्रुत्वा मम महद्भयम् ।
सीदन्तीव च मेऽङ्गानि मुमूर्षोरिव पार्थिवाः ॥ ९
वधो नूनं प्रतिज्ञातो मम गाण्डीवधन्वना ।
तथा हि हृष्टाः क्रोशन्ति शोककालेऽपि पाण्डवाः ॥
न देवा न च गन्धर्वा नासुरोरगराक्षसाः ।
उत्सहन्तेऽन्यथा कर्तुं कुत एव नराधिपाः ॥ ११
तस्मान्मामनुजानीत भद्रं वोऽस्तु नरर्षभाः ।
अदर्शनं गमिष्यामि न मां द्रक्ष्यन्ति पाण्डवाः ॥ १२
एवं विलपमानं तं भयाद्व्याकुलचेतसम् ।
आत्मकार्यगरीयस्त्वाद्राजा दुर्योधनोऽब्रवीत् ॥ १३
न भेतव्यं नरव्याघ्र को हि त्वा पुरुषर्षभ ।
मध्ये क्षत्रियवीराणां तिष्ठन्तं प्रार्थयेद्युधि ॥ १४
अहं वैकर्तनः कर्णश्चित्रसेनो विविंशतिः ।
भूरिश्रवाः शलः शल्यो वृषसेनो दुरासदः ॥ १५
पुरुमित्रो जयो भोजः काम्बोजश्च सुदक्षिणः ।
सत्यव्रतो महाबाहुर्विकर्णो दुर्मुखः सहः ॥ १६
दुःशासनः सुबाहुश्च कलिङ्गश्चाप्युदायुधः ।
विन्दानुविन्दावावन्त्यौ द्रोणो द्रौणिः ससौबलः ॥
त्वं चापि रथिनां श्रेष्ठः स्वयं शूरोऽमितद्युतिः ।
स कथं पाण्डवेयेभ्यो भयं पश्यसि सैन्धव ॥ १८
अक्षौहिण्यो दशैका च मदीयास्तव रक्षणे ।
यत्ता योत्स्यन्ति मा भैस्त्वं सैन्धव व्येतु ते भयम् ॥
एवमाश्वासितो राजन्पुत्रेण तव सैन्धवः ।
दुर्योधनेन सहितो द्रोणं रात्रावुपागमत् ॥ २०
उपसंग्रहणं कृत्वा द्रोणाय स विशां पते ।
उपोपविश्य प्रणतः पर्यपृच्छदिदं तदा ॥ २१
निमित्ते दूरपातित्वे लघुत्वे दृढवेधने ।
मम ब्रवीतु भगवान्विशेषं फल्गुनस्य च ॥ २२
विद्याविशेषमिच्छामि ज्ञातुमाचार्य तत्त्वतः ।
ममार्जुनस्य च विभो यथातत्त्वं प्रचक्ष्व मे ॥ २३

द्रोण उवाच ।

सममाचार्यकं तात तव चैवार्जुनस्य च ।
योगादुःखोचितत्वाच्च तस्मात्त्वत्तोऽधिकोऽर्जुनः ॥
न तु ते युधि संत्रासः कार्यः पार्थात्कथंचन ।
अहं हि रक्षिता तात भयात्त्वां नात्र संशयः ॥ २५
न हि मद्बाहुगुप्तस्य प्रभवन्त्यमरा अपि ।
व्यूहिष्यामि च तं व्यूहं यं पार्थो न तरिष्यति ॥
तस्माद्युध्यस्व मा भैस्त्वं स्वधर्ममनुपालय ।
पितृपैतामहं मार्गमनुयाहि नराधिप ॥ २७
अधीत्य विधिवद्वेदानग्नयः सुहुतास्त्वया ।
इष्टं च बहुभिर्यज्ञैर्न ते मृत्युभयाद्भयम् ॥ २८
दुर्लभं मानुषैर्मन्दैर्महाभाग्यमवाप्य तु ।
भुजवीर्यार्जिताँल्लोकान्दिव्यान्प्राप्स्यस्यनुत्तमान् ॥
कुरवः पाण्डवाश्चैव वृष्णयोऽन्ये च मानवाः ।
अहं च सह पुत्रेण अध्रुवा इति चिन्त्यताम् ॥ ३०
पर्यायेण वयं सर्वे कालेन बलिना हताः ।
परलोकं गमिष्यामः स्वैः स्वैः कर्मभिरन्विताः ॥ ३१
तपस्तप्त्वा तु याँल्लोकान्प्राप्नुवन्ति तपस्विनः ।
क्षत्रधर्माश्रिताः शूराः क्षत्रियाः प्राप्नुवन्ति तान् ॥

संजय उवाच ।
एवमाश्वासितो राजन्भारद्वाजेन सैन्धवः ।
अपानुदद्भयं पार्थाद्युद्धाय च मनो दधे ॥ ३३

इति श्रीमहाभारते द्रोणपर्वणि
द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

५३

संजय उवाच ।
प्रतिज्ञाते तु पार्थेन सिन्धुराजवधे तदा ।
वासुदेवो महाबाहुर्धनंजयमभाषत ॥ १
भ्रातॄणां मतमाज्ञाय त्वया वाचा प्रतिश्रुतम् ।
सैन्धवं श्वोऽस्मि हन्तेति तत्साहसतमं कृतम् ॥ २
असंमन्त्र्य मया सार्धमतिभारोऽयमुद्यतः ।
कथं नु सर्वलोकस्य नावहास्या भवेमहि ॥ ३
धार्तराष्ट्रस्य शिबिरे मया प्रणिहिताश्चराः ।
त इमे शीघ्रमागम्य प्रवृत्तिं वेदयन्ति नः ॥ ४
त्वया वै संप्रतिज्ञाते सिन्धुराजवधे तदा ।
सिंहनादः सवादित्रः सुमहानिह तैः श्रुतः ॥ ५
तेन शब्देन वित्रस्ता धार्तराष्ट्राः ससैन्धवाः ।
नाकस्मात्सिंहनादोऽयमिति मत्वा व्यवस्थिताः ॥ ६
सुमहाञ्शब्दसंपातः कौरवाणां महाभुज ।
आसीन्नागाश्वपत्तीनां रथघोषश्च भैरवः ॥ ७
अभिमन्युवधं श्रुत्वा ध्रुवमार्तो धनंजयः ।
रात्रौ निर्यास्यति क्रोधादिति मत्वा व्यवस्थिताः ॥
तैर्यतद्भिरियं सत्या श्रुत्वा सत्यवतस्तव ।
प्रतिज्ञा सिन्धुराजस्य वधे राजीवलोचन ॥ ९
ततो विमनसः सर्वे त्रस्ताः क्षुद्रमृगा इव ।
आसन्सुयोधनामात्याः स च राजा जयद्रथः ॥१०
अथोत्थाय सहामात्यैर्दीनः शिबिरमात्मनः ।
आयात्सौवीरसिन्धूनामीश्वरो भृशदुःखितः ॥ ११
स मन्त्रकाले संमन्त्र्य सर्वा नैःश्रेयसीः क्रियाः ।
सुयोधनमिदं वाक्यमब्रवीद्राजसंसदि ॥ १२
मामसौ पुत्रहन्तेति श्वोऽभियाता धनंजयः ।
प्रतिज्ञातो हि सेनाया मध्ये तेन वधो मम ॥ १३
तां न देवा न गन्धर्वा नासुरोरगराक्षसाः ।
उत्सहन्तेऽन्यथाकर्तुं प्रतिज्ञां सव्यसाचिनः ॥ १४
ते मां रक्षत संग्रामे मा वो मूर्ध्नि धनंजयः ।
पदं कृत्वाप्नुयाल्लक्ष्यं तस्मादत्र विधीयताम् ॥ १५
अथ रक्षा न मे संख्ये क्रियते कुरुनन्दन ।
अनुजानीहि मां राजन्गमिष्यामि गृहान्प्रति ॥ १६
एवमुक्तस्त्ववाक्शीर्षो विमनाः स सुयोधनः ।
श्रुत्वाभिशप्तवन्तं त्वां ध्यानमेवान्वपद्यत ॥ १७
तमार्तमभिसंप्रेक्ष्य राजा किल स सैन्धवः ।
मृदु चात्महितं चैव सापेक्षमिदमुक्तवान् ॥ १८
नाहं पश्यामि भवतां तथावीर्यं धनुर्धरम् ।
योऽर्जुनस्यास्त्रमस्त्रेण प्रतिहन्यान्महाहवे ॥ १९
वासुदेवसहायस्य गाण्डीवं धुन्वतो धनुः ।
कोऽर्जुनस्याग्रतस्तिष्ठेत्साक्षादपि शतक्रतुः ॥ २०
महेश्वरोऽपि पार्थेन श्रूयते योधितः पुरा ।
पदातिना महातेजा गिरौ हिमवति प्रभुः ॥ २१
दानवानां सहस्राणि हिरण्यपुरवासिनाम् ।
जघानैकरथेनैव देवराजप्रचोदितः ॥ २२
समायुक्तो हि कौन्तेयो वासुदेवेन धीमता ।
सामरानपि लोकांस्त्रीन्निहन्यादिति मे मतिः ॥ २३
सोऽहमिच्छाम्यनुज्ञातुं रक्षितुं वा महात्मना ।
द्रोणेन सहपुत्रेण वीरेण यदि मन्यसे ॥ २४
स राज्ञा स्वयमाचार्यो भृशमाक्रन्दितोऽर्जुन ।
संविधानं च विहितं रथाश्च किल सज्जिताः ॥२५
कर्णो भूरिश्रवा द्रौणिर्वृषसेनश्च दुर्जयः ।
कृपश्च मद्रराजश्च षडेतेऽस्य पुरोगमाः ॥ २६
शकटः पद्मपश्चार्धो व्यूहो द्रोणेन कल्पितः ।

पद्मकर्णिकमध्यस्थः सूचीपाशे जयद्रथः ।
स्थास्यते रक्षितो वीरैः सिन्धुराडयुद्धदुर्मदैः ॥ २७
धनुष्यस्त्रे च वीर्ये च प्राणे चैव तथोरसि ।
अविषह्यतमा ह्येते निश्चिताः पार्थ षड्रथाः ।
एतानजित्वा सगणान्नैव प्राप्यो जयद्रथः ॥ २८
तेषामेकैकशो वीर्यं षण्णां त्वमनुचिन्तय ।
सहिता हि नरव्याघ्रा न शक्या जेतुमञ्जसा ॥ २९
भूयश्च चिन्तयिष्यामि नीतिमात्महिताय वै ।
मन्त्रज्ञैः सचिवैः सार्धं सुहृद्भिः कार्यसिद्धये ॥ ३०

अर्जुन उवाच ।

षड्रथान्धार्तराष्ट्रस्य मन्यसे यान्बलाधिकान् ।
तेषां वीर्यं ममार्धेन न तुल्यमिति लक्षये ॥ ३१
अस्त्रमस्त्रेण सर्वेषामेतेषां मधुसूदन ।
मया द्रक्ष्यसि निर्भिन्नं जयद्रथवधैषिणा ॥ ३२
द्रोणस्य मिषतः सोऽहं सगणस्य विलप्यतः ।
मूर्धानं सिन्धुराजस्य पातयिष्यामि भूतले ॥ ३३
यदि साध्याश्च रुद्राश्च वसवश्च सहाश्विनः ।
मरुतश्च सहेन्द्रेण विश्वेदेवास्तथासुराः ॥ ३४
पितरः सहगन्धर्वाः सुपर्णाः सागराद्रयः ।
द्यौर्वियत्पृथिवी चेयं दिशश्च सदिगीश्वराः ॥ ३५
ग्राम्यारण्यानि भूतानि स्थावराणि चराणि च ।
त्रातारः सिन्धुराजस्य भवन्ति मधुसूदन ॥ ३६
तथापि बाणैर्निहतं श्वो द्रष्टासि रणे मया ।
सत्येन ते शपे कृष्ण तथैवायुधमालभे ॥ ३७
यश्च गोप्ता महेष्वासस्तस्य पापस्य दुर्मतेः ।
तमेव प्रथमं द्रोणमभियास्यामि केशव ॥ ३८
तस्मिन्द्यूतमिदं बद्धं मन्यते स्म सुयोधनः ।
तस्मात्तस्यैव सेनाग्रं भित्त्वा यास्यामि सैन्धवम् ॥ ३९
द्रष्टासि श्वो महेष्वासान्नाराचैस्तिग्मतेजनैः ।
शृङ्गाणीव गिरेर्वज्रैर्दार्यमाणान्मया युधि ॥ ४०
नरनागाश्वदेहेभ्यो विस्रविष्यति शोणितम् ।
पतद्भ्यः पतितेभ्यश्च विभिन्नेभ्यः शितैः शरैः ॥ ४१
गाण्डीवप्रेषिता बाणा मनोनिलसमा जवे ।
नृनागाश्वान्विदेहासून्कर्तारश्च सहस्रशः ॥ ४२
यमात्कुबेराद्वरुणाद्रुद्रादिन्द्राच्च यन्मया ।
उपात्तमस्त्रं घोरं वै तद्द्रष्टारो नरा युधि ॥ ४३
ब्राह्मेणास्त्रेण चास्त्राणि हन्यमानानि संयुगे ।
मया द्रष्टासि सर्वेषां सैन्धवस्याभिरक्षिणाम् ॥ ४४
शरवेगसमुत्कृत्तै राज्ञां केशव मूर्धभिः ।
आस्तीर्यमाणां पृथिवीं द्रष्टासि श्वो मया युधि ॥ ४५
क्रव्यादांस्तर्पयिष्यामि द्रावयिष्यामि शात्रवान् ।
सुहृदो नन्दयिष्यामि पातयिष्यामि सैन्धवम् ॥ ४६
बह्वागस्कृत्कुसंबन्धी पापदेशसमुद्भवः ।
मया सैन्धवको राजा हतः स्वाञ्शोचयिष्यति ॥ ४७
सर्वक्षीरान्नभोक्तारः पापाचारा रणाजिरे ।
मया सराजका बाणैर्नुन्ना नङ्क्ष्यन्ति सैन्धवाः ॥ ४८
तथा प्रभाते कर्तास्मि यथा कृष्ण सुयोधनः ।
नान्यं धनुर्धरं लोके मंस्यते मत्समं युधि ॥ ४९
गाण्डीवं च धनुर्दिव्यं योद्धा चाहं नरर्षभ ।
त्वं च यन्ता हृषीकेश किं नु स्यादजितं मया ॥ ५०
यथा हि लक्ष्म चन्द्रे वै समुद्रे च यथा जलम् ।
एवमेतां प्रतिज्ञां मे सत्यां विद्धि जनार्दन ॥ ५१
मावमंस्था ममास्त्राणि मावमंस्था धनुर्दृढम् ।
मावमंस्था बलं बाह्वोर्मावमंस्था धनंजयम् ॥ ५२
यथा हि यात्वा संग्रामे न जीये विजयामि च ।
तेन सत्येन संग्रामे हतं विद्धि जयद्रथम् ॥ ५३
ध्रुवं वै ब्राह्मणे सत्यं ध्रुवा साधुषु संनतिः ।
श्रीर्ध्रुवा चापि दक्षेषु ध्रुवो नारायणे जयः ॥ ५४

संजय उवाच ।

एवमुक्त्वा हृषीकेशं स्वयमात्मानमात्मना ।

संदिदेशार्जुनो नर्दन्वासविः केशवं प्रभुम् ॥ ५५
यथा प्रभातां रजनीं कल्पितः स्याद्रथो मम ।
तथा कार्यं त्वया कृष्ण कार्यं हि महदुद्यतम् ॥५६

इति श्रीमहाभारते द्रोणपर्वणि
त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

५४

संजय उवाच ।

तां निशां दुःखशोकार्तौ श्वसन्ताविव चोरगौ ।
निद्रां नैवोपलेभाते वासुदेवधनंजयौ ॥ १
नरनारायणौ क्रुद्धौ ज्ञात्वा देवाः सवासवाः ।
व्यथिताश्चिन्तयामासुः किं स्विदेतद्भविष्यति ॥ २
ववुश्च दारुणा वाता रूक्षा घोराभिशंसिनः ।
सकबन्धस्तथादित्ये परिघः समदृश्यत ॥ ३
शुष्काशन्यश्च निष्पेतुः सनिर्घाताः सविद्युतः ।
चचाल चापि पृथिवी सशैलवनकानना ॥ ४
चुक्षुभुश्च महाराज सागरा मकरालयाः ।
प्रतिस्रोतःप्रवृत्ताश्च तथा गन्तुं समुद्रगाः ॥ ५
रथाश्वनरनागानां प्रवृत्तमधरोत्तरम् ।
क्रव्यादानां प्रमोदार्थं यमराष्ट्रविवृद्धये ॥ ६
वाहनानि शकृन्मूत्रे मुमुचू रुरुदुश्च ह ।
तान्दृष्ट्वा दारुणान्सर्वानुत्पाताँल्लोमहर्षणान् ॥ ७
सर्वे ते व्यथिताः सैन्यास्त्वदीया भरतर्षभ ।
श्रुत्वा महाबलस्योग्रां प्रतिज्ञां सव्यसाचिनः ॥ ८
अथ कृष्णं महाबाहुरब्रवीत्पाकशासनिः ।
आश्वासय सुभद्रां त्वं भगिनीं स्नुषया सह ॥ ९
स्नुषा श्वश्र्वावनघायस्ते विशोके कुरु माधव ।
साम्ना सत्येन युक्तेन वचसाश्वासय प्रभो ॥ १०
ततोऽर्जुनगृहं गत्वा वासुदेवः सुदुर्मनाः ।
भगिनीं पुत्रशोकार्तामाश्वासयत दुःखिताम् ॥ ११
मा शोकं कुरु वार्ष्णेयि कुमारं प्रति सस्नुषा ।
सर्वेषां प्राणिनां भीरु निष्ठैषा कालनिर्मिता ॥ १२
कुले जातस्य वीरस्य क्षत्रियस्य विशेषतः ।
सदृशं मरणं ह्येतत्तव पुत्रस्य मा शुचः ॥ १३
दिष्ट्या महारथो वीरः पितुस्तुल्यपराक्रमः ।
क्षात्रेण विधिना प्राप्तो वीराभिलषितां गतिम् ॥१४
जित्वा सुबहुशः शत्रून्प्रेषयित्वा च मृत्यवे ।
गतः पुण्यकृतां लोकान्सर्वकामदुहोऽक्षयान् ॥ १५
तपसा ब्रह्मचर्येण श्रुतेन प्रज्ञयापि च ।
सन्तो यां गतिमिच्छन्ति प्राप्तस्तां तव पुत्रकः ॥१६
वीरसूर्वीरपत्नी त्वं वीरश्वशुरबान्धवा ।
मा शुचस्तनयं भद्रे गतः स परमां गतिम् ॥ १७
प्राप्स्यते चाप्यसौ क्षुद्रः सैन्धवो बालघातकः ।
अस्यावलेपस्य फलं ससुहृद्गणबान्धवः ॥ १८
व्युष्टायां तु वरारोहे रजन्यां पापकर्मकृत् ।
न हि मोक्ष्यति पार्थात्स प्रविष्टोऽप्यमरावतीम् ॥
श्वः शिरः श्रोष्यसे तस्य सैन्धवस्य रणे हृतम् ।
समन्तपञ्चकाद्बाह्यं विशोका भव मा रुदः ॥ २०
क्षत्रधर्मं पुरस्कृत्य गतः शूरः सतां गतिम् ।
यां वयं प्राप्नुयामेह ये चान्ये शस्त्रजीविनः ॥ २१
व्यूढोरस्को महाबाहुरनिवर्ती वरप्रणुत् ।
गतस्तव वरारोहे पुत्रः स्वर्गं ज्वरं जहि ॥ २२
अनु जातश्च पितरं मातृपक्षं च वीर्यवान् ।
सहस्रशो रिपून्हत्वा हतः शूरो महारथः ॥ २३
आश्वासय स्नुषां राज्ञि मा शुचः क्षत्रिये भृशम् ।
श्वः प्रियं सुमहच्छ्रुत्वा विशोका भव नन्दिनि ॥२४
यत्पार्थेन प्रतिज्ञातं तत्तथा न तदन्यथा ।
चिकीर्षितं हि ते भर्तुर्न भवेज्जातु निष्फलम् ॥ २५

यदि च मनुजपन्नगाः पिशाचा
रजनिचराः पतगाः सुरासुराश्च ।
रणगतमभियान्ति सिन्धुराजं

न स भविता सह तैरपि प्रभाते ॥ २६

इति श्रीमहाभारते द्रोणपर्वणि
चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

५५

संजय उवाच ।

एतच्छ्रुत्वा वचस्तस्य केशवस्य महात्मनः ।
सुभद्रा पुत्रशोकार्ता विललाप सुदुःखिता ॥ १
हा पुत्र मम मन्दायाः कथं संयुगमेत्य ह ।
निधनं प्राप्तवांस्तात पितृतुल्यपराक्रमः ॥ २
कथमिन्दीवरश्यामं सुदंष्ट्रं चारुलोचनम् ।
मुखं ते दृश्यते वत्स गुण्ठितं रणरेणुना ॥ ३
नूनं शूरं निपतितं त्वां पश्यन्त्यनिवर्तिनम् ।
सुशिरोग्रीवबाह्वंसं व्यूढोरस्कं निरूदरम् ॥ ४
चारूपचितसर्वाङ्गं स्वक्षं शस्त्रक्षताचितम् ।
भूतानि त्वा निरीक्षन्ते नूनं चन्द्रमिवोदितम् ॥ ५
शयनीयं पुरा यस्य स्पर्ध्यास्तरणसंवृतम् ।
भूमावद्य कथं शेषे विप्रविद्धः सुखोचितः ॥ ६
योऽन्वास्यत पुरा वीरो वरस्त्रीभिर्महाभुजः ।
कथमन्वास्यते सोऽद्य शिवाभिः पतितो मृधे ॥ ७
योऽस्तूयत पुरा हृष्टैः सूतमागधबन्दिभिः ।
सोऽद्य क्रव्याद्गणैर्घोरैर्विनदद्भिरुपास्यते ॥ ८
पाण्डवेषु च नाथेषु वृष्णिवीरेषु चाभिभो ।
पाञ्चालेषु च वीरेषु हतः केनास्यनाथवत् ॥ ९
अतृप्तदर्शना पुत्र दर्शनस्य तवानघ ।
मन्दभाग्या गमिष्यामि व्यक्तमद्य यमक्षयम् ॥१०
विशालाक्षं सुकेशान्तं चारुवाक्यं सुगन्धि च ।
तव पुत्र कदा भूयो मुखं द्रक्ष्यामि निर्व्रणम् ॥११
धिग्बलं भीमसेनस्य धिक्पार्थस्य धनुष्मताम् ।
धिग्वीर्यं वृष्णिवीराणां पाञ्चालानां च धिग्बलम् ॥
धिक्केकयांस्तथा चेदीन्मत्स्यांश्चैवाथ सृञ्जयान् ।
ये त्वा रणे गतं वीरं न जानन्ति निपातितम् ॥ १३
अद्य पश्यामि पृथिवीं शून्यामिव हतत्विषम् ।
अभिमन्युमपश्यन्ती शोकव्याकुललोचना ॥ १४
स्वस्रीयं वासुदेवस्य पुत्रं गाण्डीवधन्वनः ।
कथं त्वा विरथं वीरं द्रक्ष्याम्यन्यैर्निपातितम् ॥१५
हा वीर दृष्टो नष्टश्च धनं स्वप्न इवासि मे ।
अहो ह्यनित्यं मानुष्यं जलबुद्बुदचञ्चलम् ॥ १६
इमां ते तरुणीं भार्यां त्वदाधिभिरभिप्लुताम् ।
कथं संधारयिष्यामि विवत्सामिव धेनुकाम् ॥ १७
अहो ह्यकाले प्रस्थानं कृतवानसि पुत्रक ।
विहाय फलकाले मां सुगृद्धां तव दर्शने ॥ १८
नूनं गतिः कृतान्तस्य प्राज्ञैरपि सुदुर्विदा ।
यत्र त्वं केशवे नाथे संग्रामेऽनाथवद्धतः ॥ १९
यज्वनां दानशीलानां ब्राह्मणानां कृतात्मनाम् ।
चरितब्रह्मचर्याणां पुण्यतीर्थावगाहिनाम् ॥ २०
कृतज्ञानां वदान्यानां गुरुशुश्रूषिणामपि ।
सहस्रदक्षिणानां च या गतिस्तामवाप्नुहि ॥ २१
या गतिर्युध्यमानानां शूराणामनिवर्तिनाम् ।
हत्वारीन्निहतानां च संग्रामे तां गतिं व्रज ॥ २२
गोसहस्रप्रदातॄणां क्रतुदानां च या गतिः ।
नैवेशिकं चाभिमतं ददतां या गतिः शुभा ॥ २३
ब्रह्मचर्येण यां यान्ति मुनयः संशितव्रताः ।
एकपत्न्यश्च यां यान्ति तां गतिं व्रज पुत्रक ॥ २४
राज्ञां सुचरितैर्या च गतिर्भवति शाश्वती ।
चतुराश्रमिणां पुण्यैः पावितानां सुरक्षितैः ॥ २५
दीनानुकम्पिनां या च सततं संविभागिनाम् ।
पैशुन्याच्च निवृत्तानां तां गतिं व्रज पुत्रक ॥ २६
व्रतिनां धर्मशीलानां गुरुशुश्रूषिणामपि ।
अमोघातिथिनां या च तां गतिं व्रज पुत्रक ॥ २७
ऋतुकाले स्वकां पत्नीं गच्छतां या मनस्विनाम् ।

न चान्यदारसेवीनां तां गतिं व्रज पुत्रक ॥ २८
साम्ना ये सर्वभूतानि गच्छन्ति गतमत्सराः ।
नारुंतुदानां क्षमिणां या गतिस्तामवाप्नुहि ॥ २९
मधुमांसनिवृत्तानां मदाद्दम्भात्तथानृतात् ।
परोपतापत्यक्तानां तां गतिं व्रज पुत्रक ॥ ३०
ह्रीमन्तः सर्वशास्त्रज्ञा ज्ञानतृप्ता जितेन्द्रियाः ।
यां गतिं साधवो यान्ति तां गतिं व्रज पुत्रक ॥ ३१
एवं विलपतीं दीनां सुभद्रां शोककर्शिताम् ।
अभ्यपद्यत पाञ्चाली वैराटीसहिता तदा ॥ ३२
ताः प्रकामं रुदित्वा च विलप्य च सुदुःखिताः ।
उन्मत्तवत्तदा राजन्विसंज्ञा न्यपतन्क्षितौ ॥ ३३
सोपचारस्तु कृष्णस्तां दुःखितां भृशदुःखितः ।
सिक्त्वाम्भसा समाश्वास्य तत्तदुक्त्वा हितं वचः ॥
विसंज्ञकल्पां रुदतीमपविद्धां प्रवेपतीम् ।
भगिनीं पुण्डरीकाक्ष इदं वचनमब्रवीत् ॥ ३५
सुभद्रे मा शुचः पुत्रं पाञ्चाल्याश्वासयोत्तराम् ।
गतोऽभिमन्युः प्रथितां गतिं क्षत्रियपुंगवः ॥ ३६
ये चान्येऽपि कुले सन्ति पुरुषा नो वरानने ।
सर्वे ते वै गतिं यान्तु अभिमन्योर्यशस्विनः ॥ ३७
कुर्याम तद्वयं कर्म क्रियासुः सुहृदश्च नः ।
कृतवान्यादृगद्यैकस्तव पुत्रो महारथः ॥ ३८
एवमाश्वास्य भगिनीं द्रौपदीमपि चोत्तराम् ।
पार्थस्यैव महाबाहुः पार्श्वमागादरिंदमः ॥ ३९
ततोऽभ्यनुज्ञाय नृपान्कृष्णो बन्धूंस्तथाभिभूः ।
विवेशान्तःपुरं राजंस्तेऽन्ये जग्मुर्यथालयम् ॥ ४०

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

५६

संजय उवाच ।

ततोऽर्जुनस्य भवनं प्रविश्याप्रतिमं विभुः ।
स्पृष्ट्वाम्भः पुण्डरीकाक्षः स्थण्डिले शुभलक्षणे ।
संतस्तार शुभां शय्यां दर्भैर्वैडूर्यसंनिभैः ॥ १
ततो माल्येन विधिवल्लाजैर्गन्धैः सुमङ्गलैः ।
अलंचकार तां शय्यां परिवार्यायुधोत्तमैः ॥ २
ततः स्पृष्टोदकं पार्थं विनीताः परिचारकाः ।
दर्शयां नैत्यकं चक्रुर्नैशं त्रैयम्बकं बलिम् ॥ ३
ततः प्रीतमनाः पार्थो गन्धैर्माल्यैश्च माधवम् ।
अलंकृत्योपहारं तं नैशमस्मै न्यवेदयत् ॥ ४
स्मयमानस्तु गोविन्दः फल्गुनं प्रत्यभाषत ।
सुप्यतां पार्थ भद्रं ते कल्याणाय व्रजाम्यहम् ॥ ५
स्थापयित्वा ततो द्वाःस्थान्गोप्तॄंश्चात्तायुधान्नरान् ।
दारुकानुगतः श्रीमान्विवेश शिबिरं स्वकम् ।
शिश्ये च शयने शुभ्रे बहुकृत्यं विचिन्तयन् ॥ ६
न पाण्डवानां शिबिरे कश्चित्सुष्वाप तां निशाम् ।
प्रजागरः सर्वजनमाविवेश विशां पते ॥ ७
पुत्रशोकाभिभूतेन प्रतिज्ञातो महात्मना ।
सहसा सिन्धुराजस्य वधो गाण्डीवधन्वना ॥ ८
तत्कथं नु महाबाहुर्वासविः परवीरहा ।
प्रतिज्ञां सफलां कुर्यादिति ते समचिन्तयन् ॥ ९
कष्टं हीदं व्यवसितं पाण्डवेन महात्मना ।
पुत्रशोकाभितप्तेन प्रतिज्ञा महती कृता ॥ १०
भ्रातरश्चापि विक्रान्ता बहुलानि बलानि च ।
धृतराष्ट्रस्य पुत्रेण सर्वं तस्मै निवेदितम् ॥ ११
स हत्वा सैन्धवं संख्ये पुनरेतु धनंजयः ।
जित्वा रिपुगणांश्चैव पारयत्वर्जुनो व्रतम् ॥ १२
अहत्वा सिन्धुराजं हि धूमकेतुं प्रवेक्ष्यति ।
न ह्येतदनृतं कर्तुमर्हः पार्थो धनंजयः ॥ १३
धर्मपुत्रः कथं राजा भविष्यति मृतेऽर्जुने ।
तस्मिन्हि विजयः कृत्स्नः पाण्डवेन समाहितः ॥ १४
यदि नः सुकृतं किंचिद्यदि दत्तं हुतं यदि ।

फलेन तस्य सर्वस्य सव्यसाची जयत्वरीन् ॥ १५
एवं कथयतां तेषां जयमाशंसतां प्रभो ।
कृच्छ्रेण महता राजन्रजनी व्यत्यवर्तत ॥ १६
तस्यां रजन्यां मध्ये तु प्रतिबुद्धो जनार्दनः ।
स्मृत्वा प्रतिज्ञां पार्थस्य दारुकं प्रत्यभाषत ॥ १७
अर्जुनेन प्रतिज्ञातमार्तेन हतबन्धुना ।
जयद्रथं हनिष्यामि श्वोभूत इति दारुक ॥ १८
तत्तु दुर्योधनः श्रुत्वा मन्त्रिभिर्मन्त्रयिष्यति ।
यथा जयद्रथं पार्थो न हन्यादिति संयुगे ॥ १९
अक्षौहिण्यो हि ताः सर्वा रक्षिष्यन्ति जयद्रथम् ।
द्रोणश्च सह पुत्रेण सर्वास्त्रविधिपारगः ॥ २०
एको वीरः सहस्राक्षो दैत्यदानवमर्दिता ।
सोऽपि तं नोत्सहेताजौ हन्तुं द्रोणेन रक्षितम् ॥
सोऽहं श्वस्तत्करिष्यामि यथा कुन्तीसुतोऽर्जुनः ।
अप्राप्तेऽस्तं दिनकरे हनिष्यति जयद्रथम् ॥ २२
न हि दारा न मित्राणि ज्ञातयो न च बान्धवाः ।
कश्चिन्नान्यः प्रियतरः कुन्तीपुत्रान्ममार्जुनात् ॥ २३
अनर्जुनमिमं लोकं मुहूर्तमपि दारुक ।
उदीक्षितुं न शक्तोऽहं भविता न च तत्तथा ॥ २४
अहं ध्वजिन्यः शत्रूणां सहयाः सरथद्विपाः ।
अर्जुनार्थे हनिष्यामि सकर्णाः ससुयोधनाः ॥ २५
श्वो निरीक्षन्तु मे वीर्यं त्रयो लोका महाहवे ।
धनंजयार्थं समरे पराक्रान्तस्य दारुक ॥ २६
श्वो नरेन्द्रसहस्राणि राजपुत्रशतानि च ।
साश्वद्विपरथान्याजौ विद्रविष्यन्ति दारुक ॥ २७
श्वस्तां चक्रप्रमथितां द्रक्ष्यसे नृपवाहिनीम् ।
मया क्रुद्धेन समरे पाण्डवार्थे निपातिताम् ॥ २८
श्वः सदेवाः सगन्धर्वाः पिशाचोरगराक्षसाः ।
ज्ञास्यन्ति लोकाः सर्वे मां सुहृदं सव्यसाचिनः ॥
यस्तं द्वेष्टि स मां द्वेष्टि यस्तमनु स मामनु ।
इति संकल्प्यतां बुद्ध्या शरीरार्धं ममार्जुनः ॥ ३०
यथा त्वमप्रभातायामस्यां निशि रथोत्तमम् ।
कल्पयित्वा यथाशास्त्रमादाय व्रतसंयतः ॥ ३१
गदां कौमोदकीं दिव्यां शक्तिं चक्रं धनुः शरान् ।
आरोप्य वै रथे सूत सर्वोपकरणानि च ॥ ३२
स्थानं हि कल्पयित्वा च रथोपस्थे ध्वजस्य मे ।
वैनतेयस्य वीरस्य समरे रथशोभिनः ॥ ३३
छत्रं जाम्बूनदैर्जालैरर्कज्वलनसंनिभैः ।
विश्वकर्मकृतैर्दिव्यैरश्वानपि च भूषितान् ॥ ३४
बलाहकं मेघपुष्पं सैन्यं सुग्रीवमेव च ।
युक्त्वा वाजिवरान्यत्तः कवची तिष्ठ दारुक ॥ ३५
पाञ्चजन्यस्य निर्घोषमार्षभेणैव पूरितम् ।
श्रुत्वा तु भैरवं नादमुपयाया जवेन माम् ॥ ३६
एकाह्नाहममर्षं च सर्वदुःखानि चैव ह ।
भ्रातुः पितृष्वसेयस्य व्यपनेष्यामि दारुक ॥ ३७
सर्वोपायैर्यतिष्यामि यथा बीभत्सुराहवे ।
पश्यतां धार्तराष्ट्राणां हनिष्यति जयद्रथम् ॥ ३८
यस्य यस्य च बीभत्सुर्वधे यत्नं करिष्यति ।
आशंसे सारथे तत्र भवितास्य ध्रुवो जयः ॥ ३९

दारुक उवाच ।

जय एव ध्रुवस्तस्य कुत एव पराजयः ।
यस्य त्वं पुरुषव्याघ्र सारथ्यमुपजग्मिवान् ॥ ४०
एवं चैतत्करिष्यामि यथा मामनुशाससि ।
सुप्रभातामिमां रात्रिं जयाय विजयस्य हि ॥ ४१

इति श्रीमहाभारते द्रोणपर्वणि
षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

५७

संजय उवाच ।

कुन्तीपुत्रस्तु तं मन्त्रं स्मरन्नेव धनंजयः ।
प्रतिज्ञामात्मनो रक्षन्मुमोहाचिन्त्यविक्रमः ॥ १

तं तु शोकेन संतप्तं स्वप्ने कपिवरध्वजम् ।
आससाद महातेजा ध्यायन्तं गरुडध्वजः ॥ २
प्रत्युत्थानं तु कृष्णस्य सर्वावस्थं धनंजयः ।
नालोपयत धर्मात्मा भक्त्या प्रेम्णा च सर्वदा॥ ३
प्रत्युत्थाय च गोविन्दं स तस्मायासनं ददौ ।
न चासने स्वयं बुद्धिं बीभत्सुर्व्यदधात्तदा ॥ ४
ततः कृष्णो महातेजा जानन्पार्थस्य निश्चयम् ।
कुन्तीपुत्रमिदं वाक्यमासीनः स्थितमब्रवीत् ॥ ५
मा विषादे मनः पार्थ कृथाः कालो हि दुर्जयः ।
कालः सर्वाणि भूतानि नियच्छति परे विधौ॥ ६
किमर्थं च विषादस्ते तद्ब्रूहि वदतां वर ।
न शोचितव्यं विदुषा शोकः कार्यविनाशनः ॥ ७
शोचन्नन्दयते शत्रून्कर्शयत्यपि बान्धवान् ।
क्षीयते च नरस्तस्मान्न त्वं शोचितुमर्हसि ॥ ८
इत्युक्तो वासुदेवेन बीभत्सुरपराजितः ।
आबभाषे तदा विद्वानिदं वचनमर्थवत् ॥ ९
मया प्रतिज्ञा महती जयद्रथवधे कृता ।
श्वोऽस्मि हन्ता दुरात्मानं पुत्रघ्नमिति केशव॥ १०
मत्प्रतिज्ञाविघातार्थं धार्तराष्ट्रैः किलाच्युत ।
पृष्ठतः सैन्धवः कार्यः सर्वैर्गुप्तो महारथैः ॥ ११
दश चैका च ताः कृष्ण अक्षौहिण्यः सुदुर्जयाः ।
प्रतिज्ञायां च हीनायां कथं जीवेत मद्विधः॥ १२
दुःखोपायस्य मे वीर विकाङ्क्षा परिवर्तते ।
द्रुतं च याति सविता तत एतद्ब्रवीम्यहम् ॥ १३
शोकस्थानं तु तच्छ्रुत्वा पार्थस्य द्विजकेतनः ।
संस्पृश्याम्भस्ततः कृष्णः प्राङ्मुखः समवस्थितः ॥
इदं वाक्यं महातेजा बभाषे पुष्करेक्षणः ।
हितार्थं पाण्डुपुत्रस्य सैन्धवस्य वधे वृतः ॥ १५
पार्थ पाशुपतं नाम परमास्त्रं सनातनम् ।
येन सर्वान्मृधे दैत्याञ्जघ्ने देवो महेश्वरः ॥ १६
यदि तद्विदितं तेऽद्य श्वो हन्तासि जयद्रथम् ।
अथ ज्ञातुं प्रपद्यस्व मनसा वृषभध्वजम् ॥ १७
तं देवं मनसा ध्यायञ्जोषमास्स्व धनंजय ।
ततस्तस्य प्रसादात्त्वं भक्तः प्राप्स्यसि तन्महत् ॥
ततः कृष्णवचः श्रुत्वा संस्पृश्याम्भो धनंजयः ।
भूमावासीन एकाग्रो जगाम मनसा भवम् ॥ १९
ततः प्रणिहिते ब्राह्मे मुहूर्ते शुभलक्षणे ।
आत्मानमर्जुनोऽपश्यद्गगने सहकेशवम् ॥ २०
ज्योतिर्भिश्च समाकीर्णं सिद्धचारणसेवितम् ।
वायुवेगगतिः पार्थः खं भेजे सहकेशवः ॥ २१
केशवेन गृहीतः स दक्षिणे विभुना भुजे ।
प्रेक्षमाणो बहून्भावाञ्जगामाद्भुतदर्शनान् ॥ २२
उदीच्यां दिशि धर्मात्मा सोऽपश्यच्छ्वेतपर्वतम् ।
कुबेरस्य विहारे च नलिनीं पद्मभूषिताम् ॥ २३
सरिच्छ्रेष्ठां च तां गङ्गां वीक्षमाणो बहूदकाम् ।
सदापुष्पफलैर्वृक्षैरुपेतां स्फटिकोपलाम् ॥ २४
सिंहव्याघ्रसमाकीर्णां नानामृगगणाकुलाम् ।
पुण्याश्रमवतीं रम्यां मनोज्ञाण्डजसेविताम् ॥ २५
मन्दरस्य प्रदेशांश्च किंनरोद्गीतनादितान् ।
हेमरूप्यमयैः शृङ्गैर्नानौषधिविदीपितान् ।
तथा मन्दारवृक्षैश्च पुष्पितैरुपशोभितान् ॥ २६
स्निग्धाञ्जनचयाकारं संप्राप्तः कालपर्वतम् ।
पुण्यं हिमवतः पादं मणिमन्तं च पर्वतम् ।
ब्रह्मतुङ्गं नदीश्चान्यास्तथा जनपदानपि ॥ २७
सुशृङ्गं शतशृङ्गं च शर्यातिवनमेव च ।
पुण्यमश्वशिरःस्थानं स्थानमाथर्वणस्य च ॥ २८
वृषदंशं च शैलेन्द्रं महामन्दरमेव च ।
अप्सरोभिः समाकीर्णं किंनरैश्चोपशोभितम् ॥ २९
तांश्च शैलान्व्रजन्पार्थः प्रेक्षते सहकेशवः ।
शुभैः प्रस्रवणैर्जुष्टान्हेमधातुविभूषितान् ॥ ३०

चन्द्ररश्मिप्रकाशाङ्गीं पृथिवीं पुरमालिनीम् ।
समुद्रांश्चाद्भुताकारानपश्यद्बहुलाकरान् ॥ ३१
वियद्द्यां पृथिवीं चैव पश्यन्विष्णुपदे व्रजन् ।
विस्मितः सह कृष्णेन क्षिप्तो बाण इवात्यगात् ॥ ३२
ग्रहनक्षत्रसोमानां सूर्याग्न्योश्च समत्विषम् ।
अपश्यत तदा पार्थो ज्वलन्तमिव पर्वतम् ॥ ३३
समासाद्य तु तं शैलं शैलाग्रे समवस्थितम् ।
तपोनित्यं महात्मानमपश्यद्वृषभध्वजम् ॥ ३४
सहस्रमिव सूर्याणां दीप्यमानं स्वतेजसा ।
शूलिनं जटिलं गौरं वल्कलाजिनवाससम् ॥ ३५
नयनानां सहस्रैश्च विचित्राङ्गं महौजसम् ।
पार्वत्या सहितं देवं भूतसंघैश्च भास्वरैः ॥ ३६
गीतवादित्रसंह्रादैस्ताललास्यसमन्वितम् ।
वल्गितास्फोटितोत्क्रुष्टैः पुण्यगन्धैश्च सेवितम् ॥ ३७
स्तूयमानं स्तवैर्दिव्यैर्मुनिभिर्ब्रह्मवादिभिः ।
गोप्तारं सर्वभूतानामिष्वासधरमच्युतम् ॥ ३८
वासुदेवस्तु तं दृष्ट्वा जगाम शिरसा क्षितिम् ।
पार्थेन सह धर्मात्मा गृणन्ब्रह्म सनातनम् ॥ ३९
लोकादिं विश्वकर्माणमजमीशानमव्ययम् ।
मनसः परमां योनिं खं वायुं ज्योतिषां निधिम् ॥
स्रष्टारं वारिधाराणां भुवश्च प्रकृतिं पराम् ।
देवदानवयक्षाणां मानवानां च साधनम् ॥ ४१
योगिनां परमं ब्रह्म व्यक्तं ब्रह्मविदां निधिम् ।
चराचरस्य स्रष्टारं प्रतिहर्तारमेव च ॥ ४२
कालकोपं महात्मानं शक्रसूर्यगुणोदयम् ।
अवन्दत तदा कृष्णो वाङ्मनोबुद्धिकर्मभिः ॥ ४३
यं प्रपश्यन्ति विद्वांसः सूक्ष्माध्यात्मपदैषिणः ।
तमजं कारणात्मानं जग्मतुः शरणं भवम् ॥ ४४
अर्जुनश्चापि तं देवं भूयो भूयोऽभ्यवन्दत ।
ज्ञात्वैकं भूतभव्यादिं सर्वभूतभवोद्भवम् ॥ ४५

ततस्तावागतौ शर्वः प्रोवाच प्रहसन्निव ।
स्वागतं वां नरश्रेष्ठावुत्तिष्ठेतां गतक्लमौ ।
किं च वामीप्सितं वीरौ मनसः क्षिप्रमुच्यताम् ॥
येन कार्येण संप्राप्तौ युवां तत्साधयामि वाम् ।
व्रियतामात्मनः श्रेयस्तत्सर्वं प्रददानि वाम् ॥ ४७
ततस्तद्वचनं श्रुत्वा प्रत्युत्थाय कृताञ्जली ।
वासुदेवार्जुनौ शर्वं तुष्टुवाते महामती ॥ ४८
नमो भवाय शर्वाय रुद्राय वरदाय च ।
पशूनां पतये नित्यमुग्राय च कपर्दिने ॥ ४९
महादेवाय भीमाय त्र्यम्बकाय च शंभवे ।
ईशानाय भगघ्नाय नमोऽस्त्वन्धकघातिने ॥ ५०
कुमारगुरवे नित्यं नीलग्रीवाय वेधसे ।
विलोहिताय धूम्राय व्याधायानपराजिते ॥ ५१
नित्यं नीलशिखण्डाय शूलिने दिव्यचक्षुषे ।
हन्त्रे गोप्त्रे त्रिनेत्राय व्याधाय वसुरेतसे ॥ ५२
अचिन्त्यायाम्बिकाभर्त्रे सर्वदेवस्तुताय च ।
वृषध्वजाय पिङ्गाय जटिने ब्रह्मचारिणे ॥ ५३
तप्यमानाय सलिले ब्रह्मण्यायाजिताय च ।
विश्वात्मने विश्वसृजे विश्वमावृत्य तिष्ठते ॥ ५४
नमो नमस्ते सेव्याय भूतानां प्रभवे सदा ।
ब्रह्मवक्त्राय शर्वाय शंकराय शिवाय च ॥ ५५
नमोऽस्तु वाचस्पतये प्रजानां पतये नमः ।
नमो विश्वस्य पतये महतां पतये नमः ॥ ५६
नमः सहस्रशिरसे सहस्रभुजमन्यवे ।
सहस्रनेत्रपादाय नमोऽसंख्येयकर्मणे ॥ ५७
नमो हिरण्यवर्णाय हिरण्यकवचाय च ।
भक्तानुकम्पिने नित्यं सिध्यतां नौ वरः प्रभो ॥
एवं स्तुत्वा महादेवं वासुदेवः सहार्जुनः ।
प्रसादयामास भवं तदा ह्यस्त्रोपलब्धये ॥ ५९
ततोऽर्जुनः प्रीतमना ववन्दे वृषभध्वजम् ।

ददर्शोत्फुल्लनयनः समस्तं तेजसां निधिम् ॥ ६०
तं चोपहारं स्वकृतं नैशं नैत्यकमात्मनः ।
ददर्श त्र्यम्बकाभ्याशे वासुदेवनिवेदितम् ॥ ६१
ततोऽभिपूज्य मनसा शर्वं कृष्णं च पाण्डवः ।
इच्छाम्यहं दिव्यमस्त्रमित्यभाषत शंकरम् ॥ ६२
ततः पार्थस्य विज्ञाय वरार्थे वचनं प्रभुः ।
वासुदेवार्जुनौ देवः स्मयमानोऽभ्यभाषत ॥ ६३
सरोऽमृतमयं दिव्यमभ्याशे शत्रुसूदनौ ।
तत्र मे तद्धनुर्दिव्यं शरश्च निहितः पुरा ॥ ६४
येन देवारयः सर्वे मया युधि निपातिताः ।
तत आनीयतां कृष्णौ सशरं धनुरुत्तमम् ॥ ६५
तथेत्युक्त्वा तु तौ वीरौ तं शर्वं पार्षदैः सह ।
प्रस्थितौ तत्सरो दिव्यं दिव्याश्चर्यशतैर्वृतम् ॥ ६६
निर्दिष्टं यद्वृषाङ्केन पुण्यं सर्वार्थसाधकम् ।
तज्जग्मतुरसंभ्रान्तौ नरनारायणावृषी ॥ ६७
ततस्तु तत्सरो गत्वा सूर्यमण्डलसंनिभम् ।
नागमन्तर्जले घोरं ददृशातेऽर्जुनाच्युतौ ॥ ६८
द्वितीयं चापरं नागं सहस्रशिरसं वरम् ।
वमन्तं विपुलां ज्वालां ददृशातेऽग्निवर्चसम् ॥ ६९
ततः कृष्णश्च पार्थश्च संस्पृश्यापः कृताञ्जली ।
तौ नागावुपतस्थाते नमस्यन्तौ वृषध्वजम् ॥ ७०
गृणन्तौ वेदविदुषौ तद्ब्रह्म शतरुद्रियम् ।
अप्रमेयं प्रणमन्तौ गत्वा सर्वात्मना भवम् ॥ ७१
ततस्तौ रुद्रमाहात्म्याद्धित्वा रूपं महोरगौ ।
धनुर्बाणश्च शत्रुघ्नं तद्द्वंद्वं समपद्यत ॥ ७२
ततो जगृहतुः प्रीतौ धनुर्बाणं च सुप्रभम् ।
आजह्रतुर्महात्मानौ ददतुश्च महात्मने ॥ ७३
ततः पार्श्वाद्वृषाङ्कस्य ब्रह्मचारी न्यवर्तत ।
पिङ्गाक्षस्तपसः क्षेत्रं बलवान्नीललोहितः ॥ ७४
स तद्गृह्य धनुःश्रेष्ठं तस्थौ स्थानं समाहितः ।
व्यकर्षच्चापि विधिवत्सशरं धनुरुत्तमम् ॥ ७५
तस्य मौर्वीं च मुष्टिं च स्थानं चालक्ष्य पाण्डवः ।
श्रुत्वा मन्त्रं भवप्रोक्तं जग्राहाचिन्त्यविक्रमः ॥ ७६
सरस्येव च तं बाणं मुमोचातिबलः प्रभुः ।
चकार च पुनर्वीरस्तस्मिन्सरसि तद्धनुः ॥ ७७
ततः प्रीतं भवं ज्ञात्वा स्मृतिमानर्जुनस्तदा ।
वरमारण्यके दत्तं दर्शनं शंकरस्य च ।
मनसा चिन्तयामास तन्मे संपद्यतामिति ॥ ७८
तस्य तन्मतमाज्ञाय प्रीतः प्रादाद्वरं भवः ।
तच्च पाशुपतं घोरं प्रतिज्ञायाश्च पारणम् ॥ ७९
संहृष्टरोमा दुर्धर्षः कृतं कार्यममन्यत ।
ववन्दतुश्च संहृष्टौ शिरोभ्यां तौ महेश्वरम् ॥ ८०
अनुज्ञातौ क्षणे तस्मिन्भवेनार्जुनकेशवौ ।
प्राप्तौ स्वशिबिरं वीरौ मुदा परमया युतौ ।
इन्द्राविष्णू यथा प्रीतौ जम्भस्य वधकाङ्क्षिणौ ॥ ८१

इति श्रीमहाभारते द्रोणपर्वणि
सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

५८

संजय उवाच ।

तयोः संवदतोरेव कृष्णदारुकयोस्तदा ।
सात्यगाद्रजनी राजन्नथ राजान्वबुध्यत ॥ १
पठन्ति पाणिस्वनिका मागधा मधुपर्किकाः ।
वैतालिकाश्च सूताश्च तुष्टुवुः पुरुषर्षभम् ॥ २
नर्तकाश्चाप्यनृत्यन्त जगुर्गीतानि गायकाः ।
कुरुवंशस्तवार्थानि मधुरं रक्तकण्ठिनः ॥ ३
मृदङ्गा झर्झरा भेर्यः पणवानकगोमुखाः ।
आडम्बराश्च शङ्खाश्च दुन्दुभ्यश्च महास्वनाः ॥ ४
एवमेतानि सर्वाणि तथान्यान्यपि भारत ।
वादयन्ति स्म संहृष्टाः कुशलाः साधुशिक्षिताः ॥ ५
स मेघसमनिर्घोषो महाञ्शब्दोऽस्पृशद्दिवम् ।

पार्थिवप्रवरं सुप्तं युधिष्ठिरमबोधयत् ॥ ६
प्रतिबुद्धः सुखं सुप्तो महार्हे शयनोत्तमे ।
उत्थायावश्यकार्यार्थं ययौ स्नानगृहं ततः ॥ ७
ततः शुक्लाम्बराः स्नातास्तरुणाष्टोत्तरं शतम् ।
स्नापकाः काञ्चनैः कुम्भैः पूर्णैः समुपतस्थिरे ॥ ८
भद्रासने सूपविष्टः परिधायाम्बरं लघु ।
सस्नौ चन्दनसंयुक्तैः पानीयैरभिमन्त्रितैः ॥ ९
उत्सादितः कषायेण बलवद्भिः सुशिक्षितैः ।
आप्लुतः साधिवासेन जलेन च सुगन्धिना ॥ १०
हरिणा चन्दनेनाङ्गमनुलिप्य महाभुजः ।
स्रग्वी चाक्लिष्टवसनः प्राङ्मुखः प्राञ्जलिः स्थितः ॥
जजाप जप्यं कौन्तेयः सतां मार्गमनुष्ठितः ।
ततोऽग्निशरणं दीप्तं प्रविवेश विनीतवत् ॥ १२
समिद्धं स पवित्राभिरग्निमाहुतिभिस्तथा ।
मन्त्रपूताभिरर्चित्वा निश्चक्राम गृहात्ततः ॥ १३
द्वितीयां पुरुषव्याघ्रः कक्ष्यां निष्क्रम्य पार्थिवः ।
तत्र वेदविदो विप्रानपश्यद्ब्राह्मणर्षभान् ॥ १४
दान्तान्वेदव्रतस्नातान्स्नातानवभृथेषु च ।
सहस्रानुचरान्सौरानष्टौ दशशतानि च ॥ १५
अक्षतैः सुमनोभिश्च वाचयित्वा महाभुजः ।
तान्द्विजान्मधुसर्पिर्भ्यां फलैः श्रेष्ठैः सुमङ्गलैः ॥१६
प्रादात्काञ्चनमेकैकं निष्कं विप्राय पाण्डवः ।
अलंकृतं चाश्वशतं वासांसीष्टाश्च दक्षिणाः ॥ १७
तथा गाः कपिला दोग्ध्रीः सर्षभाः पाण्डुनन्दनः ।
हेमशृङ्गी रूप्यखुरा दत्त्वा चक्रे प्रदक्षिणम् ॥ १८
स्वस्तिकान्वर्धमानांश्च नन्द्यावर्तांश्च काञ्चनान् ।
माल्यं च जलकुम्भांश्च ज्वलितं च हुताशनम् ॥१९
पूर्णान्यक्षतपात्राणि रुचकान्रोचनांस्तथा ।
स्वलंकृताः शुभाः कन्या दधिसर्पिर्मधूदकम् ॥ २०
मङ्गल्यान्पक्षिणश्चैव यच्चान्यदपि पूजितम् ।
दृष्ट्वा स्पृष्ट्वा च कौन्तेयो बाह्यां कक्ष्यामगात्ततः ॥
ततस्तस्य महाबाहोस्तिष्ठतः परिचारकाः ।
सौवर्णं सर्वतोभद्रं मुक्तावैडूर्यमण्डितम् ॥ २२
परार्ध्यास्तरणास्तीर्णं सोत्तरच्छदमृद्धिमत् ।
विश्वकर्मकृतं दिव्यमुपजह्रुर्वरासनम् ॥ २३
तत्र तस्योपविष्टस्य भूषणानि महात्मनः ।
उपजह्रुर्महार्हाणि प्रेष्याः शुभ्राणि सर्वशः ॥ २४
युक्ताभरणवेषस्य कौन्तेयस्य महात्मनः ।
रूपमासीन्महाराज द्विषतां शोकवर्धनम् ॥ २५
पाण्डरैश्चन्द्ररश्म्याभैर्हेमदण्डैश्च चामरैः ।
दोधूयमानः शुशुभे विद्युद्भिरिव तोयदः ॥ २६
संस्तूयमानः सूतैश्च वन्द्यमानश्च बन्दिभिः ।
उपगीयमानो गन्धर्वैरास्ते स्म कुरुनन्दनः ॥ २७
ततो मुहूर्तादासीत्तु बन्दिनां निस्वनो महान् ।
नेमिघोषश्च रथिनां खुरघोषश्च वाजिनाम् ॥ २८
ह्रादेन गजघण्टानां शङ्खानां निनदेन च ।
नराणां पदशब्दैश्च कम्पतीव स्म मेदिनी ॥ २९
ततः शुद्धान्तमासाद्य जानुभ्यां भूतले स्थितः ।
शिरसा वन्दनीयं तमभिवन्द्य जगत्पतिम् ॥ ३०
कुण्डली बद्धनिस्त्रिंशः संनद्धकवचो युवा ।
अभिप्रणम्य शिरसा द्वाःस्थो धर्मात्मजाय वै ।
न्यवेदयद्धृषीकेशमुपयातं महात्मने ॥ ३१
सोऽब्रवीत्पुरुषव्याघ्रः स्वागतेनैव माधवम् ।
अर्घ्यं चैवासनं चास्मै दीयतां परमार्चितम् ॥ ३२
ततः प्रवेश्य वार्ष्णेयमुपवेश्य वरासने ।
सत्कृत्य सत्कृतस्तेन पर्यपृच्छद्युधिष्ठिरः ॥ ३३

इति श्रीमहाभारते द्रोणपर्वणि
अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

५९

युधिष्ठिर उवाच ।

सुखेन रजनी व्युष्टा कच्चित्ते मधुसूदन ।
कच्चिज्ज्ञानानि सर्वाणि प्रसन्नानि तवाच्युत ॥ १

संजय उवाच ।

वासुदेवोऽपि तद्युक्तं पर्यपृच्छद्युधिष्ठिरम् ।
ततः क्षत्ता प्रकृतयो न्यवेदयदुपस्थिताः ॥ २
अनुज्ञातश्च राज्ञा स प्रावेशयत तं जनम् ।
विराटं भीमसेनं च धृष्टद्युम्नं च सात्यकिम् ॥ ३
शिखण्डिनं यमौ चैव चेकितानं च केकयान् ।
युयुत्सुं चैव कौरव्यं पाञ्चाल्यं चोत्तमौजसम् ॥ ४
एते चान्ये च बहवः क्षत्रियाः क्षत्रियर्षभम् ।
उपतस्थुर्महात्मानं विविशुश्चासनेषु ते ॥ ५
एकस्मिन्नासने वीरावुपविष्टौ महाबलौ ।
कृष्णश्च युयुधानश्च महात्मानौ महाद्युती ॥ ६
ततो युधिष्ठिरस्तेषां शृण्वतां मधुसूदनम् ।
अब्रवीत्पुण्डरीकाक्षमाभाष्य मधुरं वचः ॥ ७
एकं त्वां वयमाश्रित्य सहस्राक्षमिवामराः ।
प्रार्थयामो जयं युद्धे शाश्वतानि सुखानि च ॥ ८
त्वं हि राज्यविनाशं च द्विषद्भिश्च निराक्रियाम् ।
क्लेशांश्च विविधान्कृष्ण सर्वांस्तानपि वेत्थ नः ॥ ९
त्वयि सर्वेश सर्वेषामस्माकं भक्तवत्सल ।
सुखमायत्तमत्यर्थं यात्रा च मधुसूदन ॥ १०
स तथा कुरु वार्ष्णेय यथा त्वयि मनो मम ।
अर्जुनस्य यथा सत्या प्रतिज्ञा स्याच्चिकीर्षिता ॥ ११
स भवांस्तारयत्वस्माद्दुःखामर्षमहार्णवात् ।
पारं तितीर्षतामद्य प्लवो नो भव माधव ॥ १२
न हि तत्कुरुते संख्ये कार्तवीर्यसमस्त्वपि ।
रथी यत्कुरुते कृष्ण सारथिर्यत्नमास्थितः ॥ १३

वासुदेव उवाच ।

सामरेष्वपि लोकेषु सर्वेषु न तथाविधः ।
शरासनधरः कश्चिद्यथा पार्थो धनंजयः ॥ १४
वीर्यवानस्त्रसंपन्नः पराक्रान्तो महाबलः ।
युद्धशौण्डः सदामर्षी तेजसा परमो नृणाम् ॥ १५
स युवा वृषभस्कन्धो दीर्घबाहुर्महाबलः ।
सिंहर्षभगतिः श्रीमान्द्विषतस्ते हनिष्यति ॥ १६
अहं च तत्करिष्यामि यथा कुन्तीसुतोऽर्जुनः ।
धार्तराष्ट्रस्य सैन्यानि धक्ष्यत्यग्निरिवोत्थितः ॥ १७
अद्य तं पापकर्माणं क्षुद्रं सौभद्रघातिनम् ।
अपुनर्दर्शनं मार्गमिषुभिः क्षेप्स्यतेऽर्जुनः ॥ १८
तस्याद्य गृध्राः श्येनाश्च वडगोमायवस्तथा ।
भक्षयिष्यन्ति मांसानि ये चान्ये पुरुषादकाः ॥ १९
यद्यस्य देवा गोप्तारः सेन्द्राः सर्वे तथाप्यसौ ।
राजधानीं यमस्याद्य हतः प्राप्स्यति संकुले ॥ २०
निहत्य सैन्धवं जिष्णुरद्य त्वामुपयास्यति ।
विशोको विज्वरो राजन्भव भूतिपुरस्कृतः ॥ २१

इति श्रीमहाभारते द्रोणपर्वणि
एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

६०

संजय उवाच ।

तथा संभाषतां तेषां प्रादुरासीद्धनंजयः ।
दिदृक्षुर्भरतश्रेष्ठं राजानं ससुहृद्गणम् ॥ १
तं प्रविष्टं शुभां कक्ष्यामभिवाद्याग्रतः स्थितम् ।
समुत्थायार्जुनं प्रेम्णा सस्वजे पाण्डवर्षभः ॥ २
मूर्ध्नि चैनमुपाघ्राय परिष्वज्य च बाहुना ।
आशिषः परमाः प्रोच्य स्मयमानोऽभ्यभाषत ॥ ३
व्यक्तमर्जुन संग्रामे ध्रुवस्ते विजयो महान् ।
यादृग्रूपा हि ते छाया प्रसन्नश्च जनार्दनः ॥ ४
तमब्रवीत्ततो जिष्णुर्महदाश्चर्यमुत्तमम् ।

दृष्टवानस्मि भद्रं ते केशवस्य प्रसादजम् ॥ ५
ततस्तत्कथयामास यथादृष्टं धनंजयः ।
आश्वासनार्थं सुहृदां त्र्यम्बकेन समागमम् ॥ ६
ततः शिरोभिरवनिं स्पृष्ट्वा सर्वे च विस्मिताः ।
नमस्कृत्य वृषाङ्काय साधु साध्वित्यथाब्रुवन् ॥ ७
अनुज्ञातास्ततः सर्वे सुहृदो धर्मसूनुना ।
त्वरमाणाः सुसंनद्धा हृष्टा युद्धाय निर्ययुः ॥ ८
अभिवाद्य तु राजानं युयुधानाच्युतार्जुनाः ।
हृष्टा विनिर्ययुस्ते वै युधिष्ठिरनिवेशनात् ॥ ९
रथेनैकेन दुर्धर्षौ युयुधानजनार्दनौ ।
जग्मतुः सहितौ वीरावर्जुनस्य निवेशनम् ॥ १०
तत्र गत्वा हृषीकेशः कल्पयामास सूतवत् ।
रथं रथवरस्याजौ वानरर्षभलक्षणम् ॥ ११
स मेघसमनिर्घोषस्तप्तकाञ्चनसप्रभः ।
बभौ रथवरः क्लृप्तः शिशुर्दिवसकृद्यथा ॥ १२
ततः पुरुषशार्दूलः सज्जः सज्जं पुरःसरः ।
कृताह्निकाय पार्थाय न्यवेदयत तं रथम् ॥ १३
तं तु लोके वरः पुंसां किरीटी हेमवर्मभृत् ।
चापबाणासनी वाहं प्रदक्षिणमवर्तत ॥ १४
ततो विद्यावयोवृद्धैः क्रियावद्भिर्जितेन्द्रियैः ।
स्तूयमानो जयाशीर्भिरारुरोह महारथम् ॥ १५
जैत्रैः सांग्रामिकैर्मन्त्रैः पूर्वमेव रथोत्तमम् ।
अभिमन्त्रितमर्चिष्मानुदयं भास्करो यथा ॥ १६
स रथे रथिनां श्रेष्ठः काञ्चने काञ्चनावृतः ।
विबभौ विमलोऽर्चिष्मान्मेराविव दिवाकरः ॥ १७
अन्वारुरोहतुः पार्थं युयुधानजनार्दनौ ।
शर्यातेर्यज्ञमायान्तं यथेन्द्रं देवमश्विनौ ॥ १८
अथ जग्राह गोविन्दो रश्मीन्रश्मिवतां वरः ।
मातलिर्वासवस्येव वृत्रं हन्तुं प्रयास्यतः ॥ १९
स ताभ्यां सहितः पार्थो रथप्रवरमास्थितः ।
सहितो बुधशुक्राभ्यां तमो निघ्नन्यथा शशी ॥ २०
सैन्धवस्य वधप्रेप्सुः प्रयातः शत्रुपूगहा ।
सहाम्बुपतिमित्राभ्यां यथेन्द्रस्तारकामये ॥ २१
ततो वादित्रनिर्घोषैर्मङ्गल्यैश्च स्तवैः शुभैः ।
प्रयान्तमर्जुनं सूता मागधाश्चैव तुष्टुवुः ॥ २२
सजयाशीः सपुण्याहः सूतमागधनिस्वनः ।
युक्तो वादित्रघोषेण तेषां रतिकरोऽभवत् ॥ २३
तमनुप्रयतो वायुः पुण्यगन्धवहः शुचिः ।
ववौ संहर्षयन्पार्थं द्विषतश्चापि शोषयन् ॥ २४
प्रादुरासन्निमित्तानि विजयाय बहूनि च ।
पाण्डवानां त्वदीयानां विपरीतानि मारिष ॥ २५
दृष्ट्वार्जुनो निमित्तानि विजयाय प्रदक्षिणम् ।
युयुधानं महेष्वासमिदं वचनमब्रवीत् ॥ २६
युयुधानाद्य युद्धे मे दृश्यते विजयो ध्रुवः ।
यथा हीमानि लिङ्गानि दृश्यन्ते शिनिपुंगव ॥ २७
सोऽहं तत्र गमिष्यामि यत्र सैन्धवको नृपः ।
यियासुर्यमलोकाय मम वीर्यं प्रतीक्षते ॥ २८
यथा परमकं कृत्यं सैन्धवस्य वधे मम ।
तथैव सुमहत्कृत्यं धर्मराजस्य रक्षणे ॥ २९
स त्वमद्य महाबाहो राजानं परिपालय ।
यथैव हि मया गुप्तस्त्वया गुप्तो भवेत्तथा ॥ ३०
त्वयि चाहं पराश्वस्य प्रद्युम्ने वा महारथे ।
शक्नुयां सैन्धवं हन्तुमनपेक्षो नरर्षभ ॥ ३१
मय्यपेक्षा न कर्तव्या कथंचिदपि सात्वत ।
राजन्येव परा गुप्तिः कार्या सर्वात्मना त्वया ॥ ३२
न हि यत्र महाबाहुर्वासुदेवो व्यवस्थितः ।
किंचिद्व्यापद्यते तत्र यत्राहमपि च ध्रुवम् ॥ ३३
एवमुक्तस्तु पार्थेन सात्यकिः परवीरहा ।

तथेत्युक्त्वागमत्तत्र यत्र राजा युधिष्ठिरः ॥ ३४

इति श्रीमहाभारते द्रोणपर्वणि
षष्टितमोऽध्यायः ॥ ६० ॥

॥ समाप्तं प्रतिज्ञापर्व ॥

६१

धृतराष्ट्र उवाच ।

श्वोभूते किमकार्षुस्ते दुःखशोकसमन्विताः ।
अभिमन्यौ हते तत्र के वायुध्यन्त मामकाः ॥ १
जानन्तस्तस्य कर्माणि कुरवः सव्यसाचिनः ।
कथं तत्किल्बिषं कृत्वा निर्भया ब्रूहि मामकाः ॥ २
पुत्रशोकाभिसंतप्तं क्रुद्धं मृत्युमिवान्तकम् ।
आयान्तं पुरुषव्याघ्रं कथं ददृशुराहवे ॥ ३
कपिराजध्वजं संख्ये विधुन्वानं महद्धनुः ।
दृष्ट्वा पुत्रपरिद्यूनं किमकुर्वन्त मामकाः ॥ ४
किं नु संजय संग्रामे वृत्तं दुर्योधनं प्रति ।
परिदेवो महानत्र श्रुतो मे नाभिनन्दनम् ॥ ५
बभूवुर्ये मनोग्राह्याः शब्दाः श्रुतिसुखावहाः ।
न श्रूयन्तेऽद्य ते सर्वे सैन्धवस्य निवेशने ॥ ६
स्तुवतां नाद्य श्रूयन्ते पुत्राणां शिबिरे मम ।
सूतमागधसंघानां नर्तकानां च सर्वशः ॥ ७
शब्देन नादिताभीक्ष्णमभवद्यत्र मे श्रुतिः ।
दीनानामद्य तं शब्दं न शृणोमि समीरितम् ॥ ८
निवेशने सत्यधृतेः सोमदत्तस्य संजय ।
आसीनोऽहं पुरा तात शब्दमश्रौषमुत्तमम् ॥ ९
तदद्य हीनपुण्योऽहमार्तस्वरनिनादितम् ।
निवेशनं हतोत्साहं पुत्राणां मम लक्षये ॥ १०
विविंशतेर्दुर्मुखस्य चित्रसेनविकर्णयोः ।
अन्येषां च सुतानां मे न तथा श्रूयते ध्वनिः ॥ ११
ब्राह्मणाः क्षत्रिया वैश्या यं शिष्याः पर्युपासते ।
द्रोणपुत्रं महेष्वासं पुत्राणां मे परायणम् ॥ १२
वितण्डालापसंलापैर्हुतयाचितवन्दितैः ।
गीतैश्च विविधैरिष्टै रमते यो दिवानिशम् ॥ १३
उपास्यमानो बहुभिः कुरुपाण्डवसात्वतैः ।
सूत तस्य गृहे शब्दो नाद्य द्रौणेर्यथा पुरा ॥ १४
द्रोणपुत्रं महेष्वासं गायना नर्तकाश्च ये ।
अत्यर्थमुपतिष्ठन्ति तेषां न श्रूयते ध्वनिः ॥ १५
विन्दानुविन्दयोः सायं शिबिरे यो महाध्वनिः ।
श्रूयते सोऽद्य न तथा केकयानां च वेश्मसु ॥ १६
नित्यप्रमुदितानां च तालगीतस्वनो महान् ।
नृत्यतां श्रूयते तात गणानां सोऽद्य न ध्वनिः ॥ १७
सप्ततन्तून्वितन्वाना यमुपासन्ति याजकाः ।
सौमदत्तिं श्रुतनिधिं तेषां न श्रूयते ध्वनिः ॥ १८
ज्याघोषो ब्रह्मघोषश्च तोमरासिरथध्वनिः ।
द्रोणस्यासीदविरतो गृहे तत्र शृणोम्यहम् ॥ १९
नानादेशसमुत्थानां गीतानां योऽभवत्स्वनः ।
वादित्रनादितानां च सोऽद्य न श्रूयते महान् ॥
यदाप्रभृत्युपप्लव्याच्छान्तिमिच्छञ्जनार्दनः ।
आगतः सर्वभूतानामनुकम्पार्थमच्युतः ॥ २१
ततोऽहमब्रुवं सूत मन्दं दुर्योधनं तदा ।
वासुदेवेन तीर्थेन पुत्र संशाम्य पाण्डवैः ॥ २२
कालप्राप्तमहं मन्ये मा त्वं दुर्योधनातिगाः ।
शमे चेद्याचमानं त्वं प्रत्याख्यास्यसि केशवम् ।
हितार्थमभिजल्पन्तं न तथास्त्यपराजयः ॥ २३
प्रत्याचष्ट स दाशार्हमृषभं सर्वधन्विनाम् ।
अनुनेयानि जल्पन्तमनयान्नान्वपद्यत ॥ २४
ततो दुःशासनस्यैव कर्णस्य च मतं द्वयोः ।
अन्ववर्तत हित्वा मां कृष्टः कालेन दुर्मतिः ॥ २५
न ह्यहं द्यूतमिच्छामि विदुरो न प्रशंसति ।
सैन्धवो नेच्छते द्यूतं भीष्मो न द्यूतमिच्छति ॥ २६
शल्यो भूरिश्रवाश्चैव पुरुमित्रो जयस्तथा ।

अश्वत्थामा कृपो द्रोणो द्यूतं नेच्छन्ति संजय ।। २७
एतेषां मतमाज्ञाय यदि वर्तेत पुत्रकः ।
सज्ञातिमित्रः ससुहृच्चिरं जीवेदनामयः ।। २८
श्लक्ष्णा मधुरसंभाषा ज्ञातिमध्ये प्रियंवदाः ।
कुलीनाः संमताः प्राज्ञाः सुखं प्राप्स्यन्ति पाण्डवाः ।।
धर्मापेक्षो नरो नित्यं सर्वत्र लभते सुखम् ।
प्रेत्यभावे च कल्याणं प्रसादं प्रतिपद्यते ।। ३०
अर्हन्त्यर्धं पृथिव्यास्ते भोक्तुं सामर्थ्यसाधनाः ।
तेषामपि समुद्रान्ता पितृपैतामही मही ।। ३१
नियुज्यमानाः स्थास्यन्ति पाण्डवा धर्मवर्त्मनि ।
सन्ति नो ज्ञातयस्तात येषां श्रोष्यन्ति पाण्डवाः ।।
शल्यस्य सोमदत्तस्य भीष्मस्य च महात्मनः ।
द्रोणस्याथ विकर्णस्य बाह्लिकस्य कृपस्य च ।। ३३
अन्येषां चैव वृद्धानां भरतानां महात्मनाम् ।
त्वदर्थं ब्रुवतां तात करिष्यन्ति वचो हितम् ।। ३४
कं वा त्वं मन्यसे तेषां यस्त्वा ब्रूयादतोऽन्यथा ।
कृष्णो न धर्मं संजह्यात्सर्वे ते च त्वदन्वयाः ।।३५
मयापि चोक्तास्ते वीरा वचनं धर्मसंहितम् ।
नान्यथा प्रकरिष्यन्ति धर्मात्मानो हि पाण्डवाः ।।
इत्यहं विलपन्सूत बहुशः पुत्रमुक्तवान् ।
न च मे श्रुतवान्मूढो मन्ये कालस्य पर्ययम् ।। ३७
वृकोदरार्जुनौ यत्र वृष्णिवीरश्च सात्यकिः ।
उत्तमौजाश्च पाञ्चाल्यो युधामन्युश्च दुर्जयः ।। ३८
धृष्टद्युम्नश्च दुर्धर्षः शिखण्डी चापराजितः ।
अश्मकाः केकयाश्चैव क्षत्रधर्मा च सौमकिः ।। ३९
चैद्यश्च चेकितानश्च पुत्रः काश्यस्य चाभिभुः ।
द्रौपदेया विराटश्च द्रुपदश्च महारथः ।
यमौ च पुरुषव्याघ्रौ मन्त्री च मधुसूदनः ।। ४०
क एताञ्जातु युध्येत लोकेऽस्मिन्वै जिजीविषुः ।
दिव्यमस्त्रं विकुर्वाणान्संहरेयुररिंदमाः ।। ४१
अन्यो दुर्योधनात्कर्णाच्छकुनेश्चापि सौबलात् ।
दुःशासनचतुर्थानां नान्यं पश्यामि पञ्चमम् ।। ४२
येषामभीशुहस्तः स्याद्विष्वक्सेनो रथे स्थितः ।
संनद्धश्चार्जुनो योद्धा तेषां नास्ति पराजयः ।। ४३
तेषां मम विलापानां न हि दुर्योधनः स्मरेत् ।
हतौ हि पुरुषव्याघ्रौ भीष्मद्रोणौ त्वमात्थ मे ।।४४
तेषां विदुरवाक्यानामुक्तानां दीर्घदर्शिनाम् ।
दृष्ट्वेमां फलनिर्वृत्तिं मन्ये शोचन्ति पुत्रकाः ।। ४५
हिमात्यये यथा कक्षं शुष्कं वातेरितो महान् ।
अग्निर्दहेत्तथा सेनां मामिकां स धनंजयः ।। ४६
आचक्ष्व तद्धि नः सर्वं कुशलो ह्यसि संजय ।
यदुपायात्तु सायाह्ने कृत्वा पार्थस्य किल्बिषम् ।
अभिमन्यौ हते तात कथमासीन्मनो हि वः ।। ४७
न जातु तस्य कर्माणि युधि गाण्डीवधन्वनः ।
अपकृत्वा महत्तात सोढुं शक्ष्यन्ति मामकाः ।। ४८
किं नु दुर्योधनः कृत्यं कर्णः कृत्यं किमब्रवीत् ।
दुःशासनः सौबलश्च तेषामेवं गते अपि ।
सर्वेषां समवेतानां पुत्राणां मम संजय ।। ४९
यद्वृत्तं तात संग्रामे मन्दस्यापनयैर्भृशम् ।
लोभानुगतदुर्बुद्धेः क्रोधेन विकृतात्मनः ।। ५०
राज्यकामस्य मूढस्य रागोपहतचेतसः ।
दुर्नीतं वा सुनीतं वा तन्ममाचक्ष्व संजय ।। ५१

इति श्रीमहाभारते द्रोणपर्वणि
एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

संजय उवाच ।

हन्त ते संप्रवक्ष्यामि सर्वं प्रत्यक्षदर्शिवान् ।
शुश्रूषस्व स्थिरो भूत्वा तव ह्यपनयो महान् ।। १
गतोदके सेतुबन्धो यादृक्तादृगयं तव ।
विलापो निष्फलो राजन्मा शुचो भरतर्षभ ।। २

अनतिक्रमणीयोऽयं कृतान्तस्याद्भुतो विधिः ।
मा शुचो भरतश्रेष्ठ दिष्टमेतत्पुरातनम् ॥ ३
यदि हि त्वं पुरा द्यूतात्कुन्तीपुत्रं युधिष्ठिरम् ।
निवर्तयेथाः पुत्रांश्च न त्वां व्यसनमाव्रजेत् ॥ ४
युद्धकाले पुनः प्राप्ते तदैव भवता यदि ।
निवर्तिताः स्युः संरब्धा न त्वां व्यसनमाव्रजेत् ॥
दुर्योधनं चाविधेयं बध्नीतेति पुरा यदि ।
कुरूनचोदयिष्यस्त्वं न त्वां व्यसनमाव्रजेत् ॥ ६
तत्ते बुद्धिव्यभीचारमुपलप्स्यन्ति पाण्डवाः ।
पाञ्चाला वृष्णयः सर्वे ये चान्येऽपि महाजनाः ॥
स कृत्वा पितृकर्म त्वं पुत्रं संस्थाप्य सत्पथे ।
वर्तेथा यदि धर्मेण न त्वां व्यसनमाव्रजेत् ॥ ८
त्वं तु प्राज्ञतमो लोके हित्वा धर्मं सनातनम् ।
दुर्योधनस्य कर्णस्य शकुनेश्चान्वगा मतम् ॥ ९
तत्ते विलपितं सर्वं मया राजन्निशामितम् ।
अर्थे निविशमानस्य विषमिश्रं यथा मधु ॥ १०
न तथा मन्यते कृष्णो राजानं पाण्डवं पुरा ।
न भीष्मं नैव च द्रोणं यथा त्वां मन्यते नृप ॥ ११
व्यजानत यदा तु त्वां राजधर्मादधश्च्युतम् ।
तदाप्रभृति कृष्णस्त्वां न तथा बहु मन्यते ॥ १२
परुषाण्युच्यमानांश्च यथा पार्थानुपेक्षसे ।
तस्यानुबन्धः प्राप्तस्त्वां पुत्राणां राज्यकामुकम् ॥ १३
पितृपैतामहं राज्यमपवृत्तं तदानघ ।
अथ पार्थैर्जितां कृत्स्नां पृथिवीं प्रत्यपद्यथाः ॥ १४
पाण्डुनावर्जितं राज्यं कौरवाणां यशस्तथा ।
ततश्चाभ्यधिकं भूयः पाण्डवैर्धर्मचारिभिः ॥ १५
तेषां तत्तादृशं कर्म त्वामासाद्य सुनिष्फलम् ।
यत्पित्र्याद्भ्रंशिता राज्यात्त्वयेहामिषगृद्धिना ॥ १६
यत्पुनर्युद्धकाले त्वं पुत्रान्गर्हयसे नृप ।
बहुधा व्याहरन्दोषान्न तदद्योपपद्यते ॥ १७
न हि रक्षन्ति राजानो युध्यन्तो जीवितं रणे ।
चमूं विगाह्य पार्थानां युध्यन्ते क्षत्रियर्षभाः ॥ १८
यां तु कृष्णार्जुनौ सेनां यां सात्यकिवृकोदरौ ।
रक्षेरन्को नु तां युध्येच्चमूमन्यत्र कौरवैः ॥ १९
येषां योद्धा गुडाकेशो येषां मन्त्री जनार्दनः ।
येषां च सात्यकिर्गोप्ता येषां गोप्ता वृकोदरः ॥ २०
को हि तान्विषहेद्योद्धुं मर्त्यधर्मा धनुर्धरः ।
अन्यत्र कौरवेयेभ्यो ये वा तेषां पदानुगाः ॥ २१
यावत्तु शक्यते कर्तुमनुरक्तैर्जनाधिपैः ।
क्षत्रधर्मरतैः शूरैस्तावत्कुर्वन्ति कौरवाः ॥ २२
यथा तु पुरुषव्याघ्रैर्युद्धं परमसङ्कटम् ।
कुरूणां पाण्डवैः सार्धं तत्सर्वं शृणु तत्त्वतः ॥२३

इति श्रीमहाभारते द्रोणपर्वणि
द्विषष्टितमोऽध्यायः ॥ ६२ ॥

६३

संजय उवाच ।

तस्यां निशायां व्युष्टायां द्रोणः शस्त्रभृतां वरः ।
स्वान्यनीकानि सर्वाणि प्राक्रामद्व्यूहितुं ततः ॥ १
शूराणां गर्जतां राजन्संक्रुद्धानाममर्षिणाम् ।
श्रूयन्ते स्म गिरश्चित्राः परस्परवधैषिणाम् ॥ २
विस्फार्य च धनूंष्याजौ ज्याः करैः परिमृज्य च ।
विनिःश्वसन्तः प्राक्रोशन्क्वेदानीं स धनंजयः ॥ ३
विकोशान्सुत्सरूनन्ये कृतधारान्समाहितान् ।
पीतानाकाशसंकाशानसीन्केचिच्च चिक्षिपुः ॥ ४
चरन्तस्त्वसिमार्गांश्च धनुर्मार्गांश्च शिक्षया ।
संग्राममनसः शूरा दृश्यन्ते स्म सहस्रशः ॥ ५
सघण्टाश्चन्दनादिग्धाः स्वर्णवज्रविभूषिताः ।
समुत्क्षिप्य गदाश्चान्ये पर्यपृच्छन्त पाण्डवम् ॥ ६
अन्ये बलमदोन्मत्ताः परिघैर्बाहुशालिनः ।
चक्रुः संबाधमाकाशमुच्छ्रितेन्द्रध्वजोपमैः ॥ ७

नानाप्रहरणैश्चान्ये विचित्रस्रगलंकृताः ।
संग्राममनसः शूरास्तत्र तत्र व्यवस्थिताः ॥ ८
कार्जुनः क च गोविन्दः क च मानी वृकोदरः ।
क च ते सुहृदस्तेषामाह्वयन्तो रणे तदा ॥ ९
ततः शङ्खमुपाध्माय त्वरयन्वाजिनः स्वयम् ।
इतस्ततस्तान्रचयन्द्रोणश्चरति वेगितः ॥ १०
तेष्वनीकेषु सर्वेषु स्थितेष्वाहवनन्दिषु ।
भारद्वाजो महाराज जयद्रथमथाब्रवीत् ॥ ११
त्वं चैव सौमदत्तिश्च कर्णश्चैव महारथः ।
अश्वत्थामा च शल्यश्च वृषसेनः कृपस्तथा ॥ १२
शतं चाश्वसहस्राणां रथानामयुतानि षट् ।
द्विरदानां प्रभिन्नानां सहस्राणि चतुर्दश ॥ १३
पदातीनां सहस्राणि दंशितान्येकविंशतिः ।
गव्यूतिषु त्रिमात्रेषु मामनासाद्य तिष्ठत ॥ १४
तत्रस्थं त्वां न संसोढुं शक्ता देवाः सवासवाः ।
किं पुनः पाण्डवाः सर्वे समाश्वसिहि सैन्धव ॥१५
एवमुक्तः समाश्वस्तः सिन्धुराजो जयद्रथः ।
संप्रायात्सह गान्धारैर्वृतस्तैश्च महारथैः ।
वर्मिभिः सादिभिर्यत्तैः प्रासपाणिभिरास्थितैः ॥१६
चामरापीडिनः सर्वे जाम्बूनदविभूषिताः ।
जयद्रथस्य राजेन्द्र हयाः साधुप्रवाहिनः ।
ते चैव सप्तसाहस्रा द्विसाहस्राश्च सैन्धवाः ॥ १७
मत्तानामधिरूढानां हस्त्यारोहैर्विशारदैः ।
नागानां भीमरूपाणां वर्मिणां रौद्रकर्मिणाम् ॥ १८
अध्यर्धेन सहस्रेण पुत्रो दुर्मर्षणस्तव ।
अग्रतः सर्वसैन्यानां योत्स्यमानो व्यवस्थितः ॥१९
ततो दुःशासनश्चैव विकर्णश्च तवात्मजौ ।
सिन्धुराजार्थसिद्ध्यर्थमग्रानीके व्यवस्थितौ ॥ २०
दीर्घो द्वादशगव्यूतिः पश्चार्धे पञ्च विस्तृतः ।
व्यूहः स चक्रशकटो भारद्वाजेन निर्मितः ॥ २१
नानानृपतिभिर्वीरैस्तत्र तत्र व्यवस्थितैः ।
रथाश्वगजपत्त्योघैर्द्रोणेन विहितः स्वयम् ॥ २२
पश्चार्धे तस्य पद्मस्तु गर्भव्यूहः सुदुर्भिदः ।
सूची पद्मस्य मध्यस्थो गूढो व्यूहः पुनः कृतः ॥
एवमेतं महाव्यूहं व्यूह्य द्रोणो व्यवस्थितः ।
सूचीमुखे महेष्वासः कृतवर्मा व्यवस्थितः ॥ २४
अनन्तरं च काम्बोजो जलसंधश्च मारिष ।
दुर्योधनः सहामात्यस्तदनन्तरमेव च ॥ २५
ततः शतसहस्राणि योधानामनिवर्तिनाम् ।
व्यवस्थितानि सर्वाणि शकटे सूचिरक्षिणः ॥ २६
तेषां च पृष्ठतो राजा बलेन महता वृतः ।
जयद्रथस्ततो राजन्सूचिपाशे व्यवस्थितः ॥ २७
शकटस्य तु राजेन्द्र भारद्वाजो मुखे स्थितः ।
अनु तस्याभवद्भोजो जुगोपैनं ततः स्वयम् ॥ २८
श्वेतवर्माम्बरोष्णीषो व्यूढोरस्को महाभुजः ।
धनुर्विस्फारयन्द्रोणस्तस्थौ क्रुद्ध इवान्तकः ॥ २९
पताकिनं शोणहयं वेदीकृष्णाजिनध्वजम् ।
द्रोणस्य रथमालोक्य प्रहृष्टाः कुरवोऽभवन् ॥ ३०
सिद्धचारणसंघानां विस्मयः सुमहानभूत् ।
द्रोणेन विहितं दृष्ट्वा व्यूहं क्षुब्धार्णवोपमम् ॥ ३१
सशैलसागरवनां नानाजनपदाकुलाम् ।
ग्रसेद्व्यूहः क्षितिं सर्वामिति भूतानि मेनिरे ॥३२

बहुरथमनुजाश्वपत्तिनागं
प्रतिभयनिस्वनमद्भुताभरूपम् ।
अहितहृदयभेदनं महद्वै
शकटमवेक्ष्य कृतं ननन्द राजा ॥ ३३

इति श्रीमहाभारते द्रोणपर्वणि
त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६४

संजय उवाच ।

ततो व्यूढेष्वनीकेषु समुत्क्रुष्टेषु मारिष ।
ताड्यमानासु भेरीषु मृदङ्गेषु नदत्सु च ॥ १
अनीकानां च संह्रादे वादित्राणां च निस्वने ।
प्रध्मापितेषु शङ्खेषु संनादे लोमहर्षणे ॥ २
अभिहारयत्सु शनकैर्भरतेषु युयुत्सुषु ।
रौद्रे मुहूर्ते संप्राप्ते सव्यसाची व्यदृश्यत ॥ ३
वडानां वायसानां च पुरस्तात्सव्यसाचिनः ।
बहुलानि सहस्राणि प्राक्रीडंस्तत्र भारत ॥ ४
मृगाश्च घोरसंनादाः शिवाश्चाशिवदर्शनाः ।
दक्षिणेन प्रयातानामस्माकं प्राणदंस्तथा ॥ ५
सनिर्घाता ज्वलन्त्यश्च पेतुरुल्काः समन्ततः ।
चचाल च मही कृत्स्ना भये घोरे समुत्थिते ॥ ६
विष्वग्वाताः सनिर्घाता रूक्षाः शर्करवर्षिणः ।
ववुरायाति कौन्तेये संग्रामे समुपस्थिते ॥ ७
नाकुलिस्तु शतानीको धृष्टद्युम्नश्च पार्षतः ।
पाण्डवानामनीकानि प्राज्ञौ तौ व्यूहतुस्तदा ॥ ८
ततो रथसहस्रेण द्विरदानां शतेन च ।
त्रिभिरश्वसहस्रैश्च पदातीनां शतैः शतैः ॥ ९
अध्यर्धमात्रे धनुषां सहस्रे तनयस्तव ।
अग्रतः सर्वसैन्यानां स्थित्वा दुर्मर्षणोऽब्रवीत् ॥१०
अद्य गाण्डीवधन्वानं तपन्तं युद्धदुर्मदम् ।
अहमावारयिष्यामि वेलेव मकरालयम् ॥ ११
अद्य पश्यन्तु संग्रामे धनंजयममर्षणम् ।
विषक्तं मयि दुर्धर्षमश्मकूटमिवाश्मनि ॥ १२
एवं ब्रुवन्महाराज महात्मा स महामतिः ।
महेष्वासैर्वृतो राजन्महेष्वासो व्यवस्थितः ॥ १३
ततोऽन्तक इव क्रुद्धः सवज्र इव वासवः ।
दण्डपाणिरिवासह्यो मृत्युः कालेन चोदितः ॥ १४
शूलपाणिरिवाक्षोभ्यो वरुणः पाशवानिव ।
युगान्ताग्निरिवार्चिष्मान्प्रधक्ष्यन्वै पुनः प्रजाः ॥१५
क्रोधामर्षबलोद्भूतो निवातकवचान्तकः ।
जयो जेता स्थितः सत्ये पारयिष्यन्महाव्रतम् ॥१६
आमुक्तकवचः खड्गी जाम्बूनदकिरीटभृत् ।
शुभ्रवर्माम्बरधरः स्वङ्गदी चारुकुण्डली ॥ १७
रथप्रवरमास्थाय नरो नारायणानुगः ।
विधुन्वन्गाण्डिवं संख्ये बभौ सूर्य इवोदितः ॥१८
सोऽग्रानीकस्य महत इषुपाते धनंजयः ।
व्यवस्थाप्य रथं सज्जं शङ्खं दध्मौ प्रतापवान् ॥१९
अथ कृष्णोऽप्यसंभ्रान्तः पार्थेन सह मारिष ।
प्राध्मापयत्पाञ्चजन्यं शङ्खप्रवरमोजसा ॥ २०
तयोः शङ्खप्रणादेन तव सैन्ये विशां पते ।
आसन्संहृष्टरोमाणः कम्पिता गतचेतसः ॥ २१
यथा त्रसन्ति भूतानि सर्वाण्यशनिनिस्वनात् ।
तथा शङ्खप्रणादेन वित्रेसुस्तव सैनिकाः ॥ २२
प्रसुस्रुवुः शकृन्मूत्रं वाहनानि च सर्वशः ।
एवं सवाहनं सर्वमाविग्नमभवद्बलम् ॥ २३
व्यषीदन्त नरा राजञ्शङ्खशब्देन मारिष ।
विसंज्ञाश्चाभवन्केचित्केचिद्राजन्वितत्रसुः ॥ २४
ततः कपिर्महानादं सह भूतैर्ध्वजालयैः ।
अकरोद्व्यादितास्यश्च भीषयंस्तव सैनिकान् ॥ २५
ततः शङ्खाश्च भेर्यश्च मृदङ्गाश्चानकैः सह ।
पुनरेवाभ्यहन्यन्त तव सैन्यप्रहर्षणाः ॥ २६
नानावादित्रसंह्रादैः क्ष्वेडितास्फोटिताकुलैः ।
सिंहनादैः सवादित्रैः समाहूतैर्महारथैः ॥ २७
तस्मिन्सुतुमुले शब्दे भीरूणां भयवर्धने ।
अतीव हृष्टो दाशार्हमब्रवीत्पाकशासनिः ॥ २८
चोदयाश्वान्हृषीकेश यत्र दुर्मर्षणः स्थितः ।
एतद्भित्त्वा गजानीकं प्रवेक्ष्याम्यरिवाहिनीम् ॥ २९

एवमुक्तो महाबाहुः केशवः सव्यसाचिना ।
अचोदयद्धयांस्तत्र यत्र दुर्मर्षणः स्थितः ॥ ३०
स संप्रहारस्तुमुलः संप्रवृत्तः सुदारुणः ।
एकस्य च बहूनां च रथनागनरक्षयः ॥ ३१
ततः सायकवर्षेण पर्जन्य इव वृष्टिमान् ।
परानवाकिरत्पार्थः पर्वतानिव नीरदः ॥ ३२
ते चापि रथिनः सर्वे त्वरिताः कृतहस्तवत् ।
अवाकिरन्बाणजालैस्ततः कृष्णधनंजयौ ॥ ३३
ततः क्रुद्धो महाबाहुर्वार्यमाणः परैर्युधि ।
शिरांसि रथिनां पार्थः कायेभ्योऽपाहरच्छरैः ॥ ३४
उद्भ्रान्तनयनैर्वक्त्रैः संदष्टोष्ठपुटैः शुभैः ।
सकुण्डलशिरस्त्राणैर्वसुधा समकीर्यत ॥ ३५
पुण्डरीकवनानीव विध्वस्तानि समन्ततः ।
विनिकीर्णानि योधानां वदनानि चकाशिरे ॥ ३६
तपनीयविचित्राणि सिक्तानि रुधिरेण च ।
अदृश्यन्त यथा राजन्मेघसंघाः सविद्युतः ॥ ३७
शिरसां पततां राजञ्शब्दोऽभूत्पृथिवीतले ।
कालेन परिपक्वानां तालानां पततामिव ॥ ३८
ततः कबन्धः कश्चित्तु धनुरालम्ब्य तिष्ठति ।
कश्चित्खड्गं विनिष्कृष्य भुजेनोद्यम्य तिष्ठति ॥ ३९
नाजानन्त शिरांस्युर्व्यां पतितानि नरर्षभाः ।
अमृष्यमाणाः कौन्तेयं संग्रामे जयगृद्धिनः ॥ ४०
हयानामुत्तमाङ्गैश्च हस्तिहस्तैश्च मेदिनी ।
बाहुभिश्च शिरोभिश्च वीराणां समकीर्यत ॥ ४१
अयं पार्थः कुतः पार्थ एष पार्थ इति प्रभो ।
तव सैन्येषु योधानां पार्थभूतमिवाभवत् ॥ ४२
अन्योन्यमपि चाजघ्नुरात्मानमपि चापरे ।
पार्थभूतममन्यन्त जगत्कालेन मोहिताः ॥ ४३
निष्टनन्तः सरुधिरा विसंज्ञा गाढवेदनाः ।
शयाना बहवो वीराः कीर्तयन्तः सुहृज्जनम् ॥ ४४
सभिण्डिपालाः सप्रासाः सशक्त्यृष्टिपरश्वधाः ।
सनिर्यूहाः सनिस्त्रिंशाः सशरासनतोमराः ॥ ४५
सबाणवर्माभरणाः सगदाः साङ्गदा रणे ।
महाभुजगसंकाशा बाहवः परिघोपमाः ॥ ४६
उद्वेष्टन्ति विचेष्टन्ति संवेष्टन्ति च सर्वशः ।
वेगं कुर्वन्ति संरब्धा निकृत्ताः परमेषुभिः ॥ ४७
यो यः स्म समरे पार्थं प्रतिसंरभते नरः ।
तस्य तस्यान्तको बाणः शरीरमुपसर्पति ॥ ४८
नृत्यतो रथमार्गेषु धनुर्व्यायच्छतस्तथा ।
न कश्चित्तत्र पार्थस्य ददर्शान्तरमण्वपि ॥ ४९
यत्तस्य घटमानस्य क्षिप्रं विक्षिपतः शरान् ।
लाघवात्पाण्डुपुत्रस्य व्यस्मयन्त परे जनाः ॥ ५०
हस्तिनं हस्तियन्तारमश्वमाश्विकमेव च ।
अभिनत्फल्गुनो बाणै रथिनं च ससारथिम् ॥ ५१
आवर्तमानमावृत्तं युध्यमानं च पाण्डवः ।
प्रमुखे तिष्ठमानं च न कंचिन्न निहन्ति सः ॥ ५२
यथोदयन्वै गगने सूर्यो हन्ति महत्तमः ।
तथार्जुनो गजानीकमवधीत्कङ्कपत्रिभिः ॥ ५३
हस्तिभिः पतितैर्भिन्नैस्तव सैन्यमदृश्यत ।
अन्तकाले यथा भूमिर्विनिकीर्णैर्महीधरैः ॥ ५४
यथा मध्यंदिने सूर्यो दुष्प्रेक्ष्यः प्राणिभिः सदा ।
तथा धनंजयः क्रुद्धो दुष्प्रेक्ष्यो युधि शत्रुभिः ॥ ५५
तत्तथा तव पुत्रस्य सैन्यं युधि परंतप ।
प्रभग्नं द्रुतमाविग्नमतीव शरपीडितम् ॥ ५६
मारुतेनेव महता मेघानीकं विधूयता ।
प्रकाल्यमानं तत्सैन्यं नाशकत्प्रतिवीक्षितुम् ॥ ५७
प्रतोदैश्चापकोटीभिर्हुंकारैः साधुवाहितैः ।
कशापार्ष्ण्यभिघातैश्च वाग्भिरुग्राभिरेव च ॥ ५८
चोदयन्तो हयांस्तूर्णं पलायन्ते स्म तावकाः ।
सादिनो रथिनश्चैव पत्तयश्चार्जुनार्दिताः ॥ ५९

पार्ष्ण्यङ्गुष्ठाङ्कुशैर्नागांश्चोदयन्तस्तथापरे ।
शरैः संमोहिताश्चान्ये तमेवाभिमुखा ययुः ।
तव योधा हतोत्साहा विभ्रान्तमनसस्तदा ॥ ६०

इति श्रीमहाभारते द्रोणपर्वणि
चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

६५

धृतराष्ट्र उवाच ।

तस्मिन्प्रभग्ने सैन्याग्रे वध्यमाने किरीटिना ।
के नु तत्र रणे वीराः प्रत्युदीयुर्धनंजयम् ॥ १
आहो स्विच्छकटव्यूहं प्रविष्टा मोघनिश्चयाः ।
द्रोणमाश्रित्य तिष्ठन्तः प्राकारमकुतोभयाः ॥ २

संजय उवाच ।

तथार्जुनेन संभग्ने तस्मिंस्तव बले तदा ।
हतवीरे हतोत्साहे पलायनकृतक्षणे ॥ ३
पाकशासनिनाभीक्ष्णं वध्यमाने शरोत्तमैः ।
न तत्र कश्चित्संग्रामे शशाकार्जुनमीक्षितुम् ॥ ४
ततस्तव सुतो राजन्दृष्ट्वा सैन्यं तथागतम् ।
दुःशासनो भृशं क्रुद्धो युद्धायार्जुनमभ्ययात् ॥ ५
स काञ्चनविचित्रेण कवचेन समावृतः ।
जाम्बूनदशिरस्त्राणः शूरस्तीव्रपराक्रमः ॥ ६
नागानीकेन महता ग्रसन्निव महीमिमाम् ।
दुःशासनो महाराज सव्यसाचिनमावृणोत् ॥ ७
ह्रादेन गजघण्टानां शङ्खानां निनदेन च ।
ज्याक्षेपनिनदैश्चैव विरावेण च दन्तिनाम् ॥ ८
भूर्दिशश्चान्तरिक्षं च शब्देनासीत्समावृतम् ।
स मुहूर्तं प्रतिभयो दारुणः समपद्यत ॥ ९
तान्दृष्ट्वा पततस्तूर्णमङ्कुशैरभिचोदितान् ।
व्यालम्बहस्तान्संरब्धान्सपक्षानिव पर्वतान् ॥ १०
सिंहनादेन महता नरसिंहो धनंजयः ।
गजानीकममित्राणामभितो व्यधमच्छरैः ॥ ११
महोर्मिणमिवोद्धूतं श्वसनेन महार्णवम् ।
किरीटी तद्गजानीकं प्राविशन्मकरो यथा ॥ १२
काष्ठातीत इवादित्यः प्रतपन्युगसंक्षये ।
ददृशे दिक्षु सर्वासु पार्थः परपुरंजयः ॥ १३
खुरशब्देन चाश्वानां नेमिघोषेण तेन च ।
तेन चोत्क्रुष्टशब्देन ज्यानिनादेन तेन च ।
देवदत्तस्य घोषेण गाण्डीवनिनदेन च ॥ १४
मन्दवेगतरा नागा बभूवुस्ते विचेतसः ।
शरैराशीविषस्पर्शैर्निर्भिन्नाः सव्यसाचिना ॥ १५
ते गजा विशिखैस्तीक्ष्णैर्युधि गाण्डीवचोदितैः ।
अनेकशतसाहस्रैः सर्वाङ्गेषु समर्पिताः ॥ १६
आरावं परमं कृत्वा वध्यमानाः किरीटिना ।
निपेतुरनिशं भूमौ छिन्नपक्षा इवाद्रयः ॥ १७
अपरे दन्तवेष्टेषु कुम्भेषु च कटेषु च ।
शरैः समर्पिता नागाः क्रौञ्चवद्व्यनदन्मुहुः ॥ १८
गजस्कन्धगतानां च पुरुषाणां किरीटिना ।
आच्छिद्यन्तोत्तमाङ्गानि भल्लैः संनतपर्वभिः ॥ १९
सकुण्डलानां पततां शिरसां धरणीतले ।
पद्मानामिव संघातैः पार्थश्चक्रे निवेदनम् ॥ २०
यन्त्रबद्धा विकवचा व्रणार्ता रुधिरोक्षिताः ।
भ्रमत्सु युधि नागेषु मनुष्या विललम्बिरे ॥ २१
केचिदेकेन बाणेन सुमुक्तेन पतत्रिणा ।
द्वौ त्रयश्च विनिर्भिन्ना निपेतुर्धरणीतले ॥ २२
मौर्वीं धनुर्ध्वजं चैव युगानीषास्तथैव च ।
रथिनां कुट्टयामास भल्लैः संनतपर्वभिः ॥ २३
न संदधन्न चाप्यस्यन्न विमुञ्चन्न चोद्धरन् ।
मण्डलेनैव धनुषा नृत्यन्पार्थः स्म दृश्यते ॥ २४
अतिविद्धाश्च नाराचैर्वमन्तो रुधिरं मुखैः ।
मुहूर्तान्निपतन्त्यन्ये वारणा वसुधातले ॥ २५
उत्थितान्यगणेयानि कबन्धानि समन्ततः ।

अदृश्यन्त महाराज तस्मिन्परमसंकुले ॥ २६
सचापाः साङ्गुलित्राणाः सखड्गाः साङ्गदा रणे ।
अदृश्यन्त भुजाश्छिन्ना हेमाभरणभूषिताः ॥ २७
सूपस्करैरधिष्ठानैरीषादण्डकबन्धुरैः ।
चक्रैर्विमथितैरक्षैर्भग्नैश्च बहुधा युगैः ॥ २८
वर्मचापशरैश्चैव व्यवकीर्णैस्ततस्ततः ।
स्रग्भिराभरणैर्वस्त्रैः पतितैश्च महाध्वजैः ॥ २९
निहतैर्वारणैरश्वैः क्षत्रियैश्च निपातितैः ।
अदृश्यत मही तत्र दारुणप्रतिदर्शना ॥ ३०
एवं दुःशासनबलं वध्यमानं किरीटिना ।
संप्राद्रवन्महाराज व्यथितं वै सनायकम् ॥ ३१
ततो दुःशासनस्त्रस्तः सहानीकः शरार्दितः ।
द्रोणं त्रातारमाकाङ्क्षञ्शकटव्यूहमभ्यगात् ॥ ३२

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

६६

संजय उवाच ।

दुःशासनबलं हत्वा सव्यसाची धनंजयः ।
सिन्धुराजं परीप्सन्वै द्रोणानीकमुपाद्रवत् ॥ १
स तु द्रोणं समासाद्य व्यूहस्य प्रमुखे स्थितम् ।
कृताञ्जलिरिदं वाक्यं कृष्णस्यानुमतेऽब्रवीत् ॥ २
शिवेन ध्याहि मां ब्रह्मन्स्वस्ति चैव वदस्व मे ।
भवत्प्रसादादिच्छामि प्रवेष्टुं दुर्भिदां चमूम् ॥ ३
भवान्पितृसमो मह्यं धर्मराजसमोऽपि च ।
तथा कृष्णसमश्चैव सत्यमेतद्ब्रवीमि ते ॥ ४
अश्वत्थामा यथा तात रक्षणीयस्तवानघ ।
तथाहमपि ते रक्ष्यः सदैव द्विजसत्तम ॥ ५
तव प्रसादादिच्छामि सिन्धुराजानमाहवे ।
निहन्तुं द्विपदां श्रेष्ठ प्रतिज्ञां रक्ष मे विभो ॥ ६
एवमुक्तस्तदाचार्यः प्रत्युवाच स्मयन्निव ।
मामजित्वा न बीभत्सो शक्यो जेतुं जयद्रथः ॥ ७
एतावदुक्त्वा तं द्रोणः शरव्रातैरवाकिरत् ।
सरथाश्वध्वजं तीक्ष्णैः प्रहसन्वै ससारथिम् ॥ ८
ततोऽर्जुनः शरव्रातान्द्रोणस्यावार्य सायकैः ।
द्रोणमभ्यर्दयद्बाणैर्घोररूपैर्महत्तरैः ॥ ९
विव्याध च रणे द्रोणमनुमान्य विशां पते ।
क्षत्रधर्मं समास्थाय नवभिः सायकैः पुनः ॥ १०
तस्येषूनिषुभिश्छित्त्वा द्रोणो विव्याध तावुभौ ।
विषाग्निज्वलनप्रख्यैरिषुभिः कृष्णपाण्डवौ ॥ ११
इयेष पाण्डवस्तस्य बाणैश्छेत्तुं शरासनम् ।
तस्य चिन्तयतस्त्वेवं फल्गुनस्य महात्मनः ।
द्रोणः शरैरसंभ्रान्तो ज्यां चिच्छेदाशु वीर्यवान् ॥
विव्याध च हयानस्य ध्वजं सारथिमेव च ।
अर्जुनं च शरैर्वीरं स्मयमानोऽभ्यवाकिरत् ॥ १३
एतस्मिन्नन्तरे पार्थः सज्जं कृत्वा महद्धनुः ।
विशेषयिष्यन्नाचार्यं सर्वास्त्रविदुषां वरम् ।
मुमोच षट्शतान्बाणान्गृहीत्वैकमिव द्रुतम् ॥ १४
पुनः सप्त शतानन्यान्सहस्रं चानिवर्तिनाम् ।
चिक्षेपायुतशश्चान्यांस्तेऽघ्नन्द्रोणस्य तां चमूम् ॥१५
तैः सम्यगस्तैर्बलिना कृतिना चित्रयोधिना ।
मनुष्यवाजिमातङ्गा विद्धाः पेतुर्गतासवः ॥ १६
विद्रुताश्च रणे पेतुः संछिन्नायुधजीविताः ।
रथिनो रथमुख्येभ्यः सहयाः शरपीडिताः ॥ १७
चूर्णिताक्षिप्तदग्धानां वज्रानिलहुताशनैः ।
तुल्यरूपा गजाः पेतुर्गिर्यग्राम्बुदवेश्मनाम् ॥ १८
पेतुरश्वसहस्राणि प्रहतान्यर्जुनेषुभिः ।
हंसा हिमवतः पृष्ठे वारिविप्रहता इव ॥ १९
रथाश्वद्विपपत्त्योघाः सलिलौघा इवाद्भुताः ।
युगान्तादित्यरश्म्याभः पाण्डवास्तशरैर्हताः ॥ २०
तं पाण्डवादित्यशरांशुजालं

कुरुप्रवीरान्युधि निष्टपन्तम् ।
स द्रोणमेघः शरवर्षवेगैः
प्राच्छादयन्मेघ इवार्करश्मीन् ॥ २१
अथात्यर्थविसृष्टेन द्विषतामसुभोजिना ।
आजघ्ने वक्षसि द्रोणो नाराचेन धनंजयम् ॥ २२
स विह्वलितसर्वाङ्गः क्षितिकम्पे यथाचलः ।
धैर्यमालम्ब्य बीभत्सुर्द्रोणं विव्याध पत्रिभिः ॥२३
द्रोणस्तु पञ्चभिर्बाणैर्वासुदेवमताडयत् ।
अर्जुनं च त्रिसप्तत्या ध्वजं चास्य त्रिभिः शरैः॥२४
विशेषयिष्यञ्शिष्यं च द्रोणो राजन्पराक्रमी ।
अदृश्यमर्जुनं चक्रे निमेषाच्छरवृष्टिभिः ॥ २५
प्रसक्तान्पततोऽद्राक्ष्म भारद्वाजस्य सायकान् ।
मण्डलीकृतमेवास्य धनुश्चादृश्यताद्भुतम् ॥ २६
तेऽभ्ययुः समरे राजन्वासुदेवधनंजयौ ।
द्रोणसृष्टाः सुबहवः कङ्कपत्रपरिच्छदाः ॥ २७
तद्दृष्ट्वा तादृशं युद्धं द्रोणपाण्डवयोस्तदा ।
वासुदेवो महाबुद्धिः कार्यवत्तामचिन्तयत् ॥ २८
ततोऽब्रवीद्वासुदेवो धनंजयमिदं वचः ।
पार्थ पार्थ महाबाहो न नः कालात्ययो भवेत् ॥२९
द्रोणमुत्सृज्य गच्छामः कृत्यमेतन्महत्तरम् ।
पार्थश्चाप्यब्रवीत्कृष्णं यथेष्टमिति केशव ॥ ३०
ततः प्रदक्षिणं कृत्वा द्रोणं प्रायान्महाभुजः ।
परिवृत्तश्च बीभत्सुरगच्छद्विसृजञ्शरान् ॥ ३१
ततोऽब्रवीत्स्मयन्द्रोणः क्वेदं पाण्डव गम्यते ।
ननु नाम रणे शत्रुमजित्वा न निवर्तसे ॥ ३२

अर्जुन उवाच ।

गुरुर्भवान्न मे शत्रुः शिष्यः पुत्रसमोऽस्मि ते ।
न चास्ति स पुमाँल्लोके यस्त्वां युधि पराजयेत् ॥

संजय उवाच ।

एवं ब्रुवाणो बीभत्सुर्जयद्रथवधोत्सुकः ।
त्वरायुक्तो महाबाहुस्तत्सैन्यं समुपाद्रवत् ॥ ३४
तं चक्ररक्षौ पाञ्चाल्यौ युधामन्यूत्तमौजसौ ।
अन्वयातां महात्मानौ विशन्तं तावकं बलम् ॥ ३५
ततो जयो महाराज कृतवर्मा च सात्वतः ।
काम्बोजश्च श्रुतायुश्च धनंजयमवारयन् ॥ ३६
तेषां दशसहस्राणि रथानामनुयायिनाम् ।
अभीषाहाः शूरसेनाः शिबयोऽथ वसातयः ॥ ३७
मावेल्लका ललित्थाश्च केकया मद्रकास्तथा ।
नारायणाश्च गोपालाः काम्बोजानां च ये गणाः॥३८
कर्णेन विजिताः पूर्वं संग्रामे शूरसंमताः ।
भारद्वाजं पुरस्कृत्य त्यक्तात्मानोऽर्जुनं प्रति ॥ ३९
पुत्रशोकाभिसंतप्तं क्रुद्धं मृत्युमिवान्तकम् ।
त्यजन्तं तुमुले प्राणान्संनद्धं चित्रयोधिनम् ॥ ४०
गाहमानमनीकानि मातङ्गमिव यूथपम् ।
महेष्वासं पराक्रान्तं नरव्याघ्रमवारयन् ॥ ४१
ततः प्रववृते युद्धं तुमुलं लोमहर्षणम् ।
अन्योन्यं वै प्रार्थयतां योधानामर्जुनस्य च ॥ ४२
जयद्रथवधप्रेप्सुमायान्तं पुरुषर्षभम् ।
न्यवारयन्त सहिताः क्रिया व्याधिमिवोत्थितम् ॥४३

इति श्रीमहाभारते द्रोणपर्वणि
षट्षष्टितमोऽध्यायः ॥ ६६ ॥

६७

संजय उवाच ।

संनिरुद्धस्तु तैः पार्थो महाबलपराक्रमः ।
द्रुतं समनुयातश्च द्रोणेन रथिनां वरः ॥ १
किरन्निषुगणांस्तीक्ष्णान्स्वरश्मीनिव भास्करः ।
तापयामास तत्सैन्यं देहं व्याधिगणो यथा ॥ २
अश्वो विद्धो ध्वजश्छिन्नः सारोहः पतितो गजः ।
छत्राणि चापविद्धानि रथाश्चक्रैर्विना कृताः ॥ ३
विद्रुतानि च सैन्यानि शरार्तानि समन्ततः ।

इत्यासीत्तुमुलं युद्धं न प्राज्ञायत किंचन ॥ ४
तेषामायच्छतां संख्ये परस्परमजिह्मगैः ।
अर्जुनो ध्वजिनीं राजन्नभीक्ष्णं समकम्पयत् ॥ ५
सत्यां चिकीर्षमाणस्तु प्रतिज्ञां सत्यसंगरः ।
अभ्यद्रवद्रथश्रेष्ठं शोणाश्वं श्वेतवाहनः ॥ ६
तं द्रोणः पञ्चविंशत्या मर्मभिद्भिरजिह्मगैः ।
अन्तेवासिनमाचार्यो महेष्वासं समर्दयत् ॥ ७
तं तूर्णमिव बीभत्सुः सर्वशस्त्रभृतां वरः ।
अभ्यधावदिषूनस्यन्निषुवेगविघातकान् ॥ ८
तस्याशु क्षिपतो भल्लान्भल्लैः संनतपर्वभिः ।
प्रत्यविध्यदमेयात्मा ब्रह्मास्त्रं समुदीरयन् ॥ ९
तदद्भुतमपश्याम द्रोणस्याचार्यकं युधि ।
यतमानो युवा नैनं प्रत्यविध्यद्यदर्जुनः ॥ १०
क्षरन्निव महामेघो वारिधाराः सहस्रशः ।
द्रोणमेघः पार्थशैलं ववर्ष शरवृष्टिभिः ॥ ११
अर्जुनः शरवर्षं तद्ब्रह्मास्त्रेणैव मारिष ।
प्रतिजग्राह तेजस्वी बाणैर्बाणान्विशातयन् ॥ १२
द्रोणस्तु पञ्चविंशत्या श्वेतवाहनमार्दयत् ।
वासुदेवं च सप्तत्या बाह्वोरुरसि चाशुगैः ॥ १३
पार्थस्तु प्रहसन्धीमानाचार्यं स शरौघिणम् ।
विसृजन्तं शितान्बाणानवारयत तं युधि ॥ १४
अथ तौ वध्यमानौ तु द्रोणेन रथसत्तमौ ।
आवर्जयेतां दुर्धर्षं युगान्ताग्निमिवोत्थितम् ॥ १५
वर्जयन्निशितान्बाणान्द्रोणचापविनिःसृतान् ।
किरीटमाली कौन्तेयो भोजानीकं न्यपातयत् ॥ १६
सोऽन्तरा कृतवर्माणं काम्बोजं च सुदक्षिणम् ।
अभ्ययाद्वर्जयन्द्रोणं मैनाकमिव पर्वतम् ॥ १७
ततो भोजो नरव्याघ्रं दुःसहः कुरुसत्तम ।
अविध्यत्तूर्णमव्यग्रो दशभिः कङ्कपत्रिभिः ॥ १८
तमर्जुनः शितेनाजौ राजन्विव्याध पत्रिणा ।
पुनश्चान्यैस्त्रिभिर्बाणैर्मोहयन्निव सात्वतम् ॥ १९
भोजस्तु प्रहसन्पार्थं वासुदेवं च माधवम् ।
एकैकं पञ्चविंशत्या सायकानां समार्पयत् ॥ २०
तस्यार्जुनो धनुश्छित्त्वा विव्याधैनं त्रिसप्तभिः ।
शरैरग्निशिखाकारैः क्रुद्धाशीविषसंनिभैः ॥ २१
अथान्यद्धनुरादाय कृतवर्मा महारथः ।
पञ्चभिः सायकैस्तूर्णं विव्याधोरसि भारत ॥ २२
पुनश्च निशितैर्बाणैः पार्थं विव्याध पञ्चभिः ।
तं पार्थो नवभिर्बाणैराजघान स्तनान्तरे ॥ २३
विषक्तं दृश्य कौन्तेयं कृतवर्मरथं प्रति ।
चिन्तयामास वार्ष्णेयो न नः कालात्ययो भवेत् ॥
ततः कृष्णोऽब्रवीत्पार्थं कृतवर्मणि मा दयाम् ।
कुरुसांबन्धिकं कृत्वा प्रमथ्यैनं विशातय ॥ २५
ततः स कृतवर्माणं मोहयित्वार्जुनः शरैः ।
अभ्यगाज्जवनैरश्वैः काम्बोजानामनीकिनीम् ॥ २६
अमर्षितस्तु हार्दिक्यः प्रविष्टे श्वेतवाहने ।
विधुन्वन्सशरं चापं पाञ्चाल्याभ्यां समागतः ॥२७
चक्ररक्षौ तु पाञ्चाल्यावर्जुनस्य पदानुगौ ।
पर्यवारयदायान्तौ कृतवर्मा रथेषुभिः ॥ २८
तावविध्यत्ततो भोजः सर्वपारशवैः शरैः ।
त्रिभिरेव युधामन्युं चतुर्भिश्चोत्तमौजसम् ॥ २९
तावप्येनं विव्यधतुर्दशभिर्दशभिः शरैः ।
संचिच्छिदतुरप्यस्य ध्वजं कार्मुकमेव च ॥ ३०
अथान्यद्धनुरादाय हार्दिक्यः क्रोधमूर्छितः ।
कृत्वा विधनुषौ वीरौ शरवर्षैरवाकिरत् ॥ ३१
तावन्ये धनुषी सज्ये कृत्वा भोजं विजघ्नतुः ।
तेनान्तरेण बीभत्सुर्विवेशामित्रवाहिनीम् ॥ ३२
न लेभाते तु तौ द्वारं वारितौ कृतवर्मणा ।
धार्तराष्ट्रेष्वनीकेषु यतमानौ नरर्षभौ ॥ ३३
अनीकान्यर्दयन्युद्धे त्वरितः श्वेतवाहनः ।

नावधीत्कृतवर्माणं प्राप्तमप्यरिसूदनः ॥ ३४
तं दृष्ट्वा तु तथायान्तं शूरो राजा श्रुतायुधः ।
अभ्यद्रवत्सुसंक्रुद्धो विधुन्वानो महद्धनुः ॥ ३५
स पार्थं त्रिभिरानर्छत्सप्तत्या च जनार्दनम् ।
क्षुरप्रेण सुतीक्ष्णेन पार्थकेतुमताडयत् ॥ ३६
तमर्जुनो नवत्या तु शराणां नतपर्वणाम् ।
आजघान भृशं क्रुद्धस्तोत्त्रैरिव महाद्विपम् ॥ ३७
स तन्न ममृषे राजन्पाण्डवेयस्य विक्रमम् ।
अथैनं सप्तसप्तत्या नाराचानां समार्पयत् ॥ ३८
तस्यार्जुनो धनुश्छित्त्वा शरावापं निकृत्य च ।
आजघानोरसि क्रुद्धः सप्तभिर्नतपर्वभिः ॥ ३९
अथान्यद्धनुरादाय स राजा क्रोधमूर्छितः ।
वासविं नवभिर्बाणैर्बाह्वोरुरसि चार्पयत् ॥ ४०
ततोऽर्जुनः स्मयन्नेव श्रुतायुधमरिंदमः ।
शरैरनेकसाहस्रैः पीडयामास भारत ॥ ४१
अश्वांश्चास्यावधीत्तूर्णं सारथिं च महारथः ।
विव्याध चैनं सप्तत्या नाराचानां महाबलः ॥ ४२
हताश्वं रथमुत्सृज्य स तु राजा श्रुतायुधः ।
अभ्यद्रवद्रणे पार्थं गदामुद्यम्य वीर्यवान् ॥ ४३
वरुणस्यात्मजो वीरः स तु राजा श्रुतायुधः ।
पर्णाशा जननी यस्य शीततोया महानदी ॥ ४४
तस्य माताब्रवीद्वाक्यं वरुणं पुत्रकारणात् ।
अवध्योऽयं भवेल्लोके शत्रूणां तनयो मम ॥ ४५
वरुणस्त्वब्रवीत्प्रीतो ददाम्यस्मै वरं हितम् ।
दिव्यमस्त्रं सुतस्तेऽयं येनावध्यो भविष्यति ॥ ४६
नास्ति चाप्यमरत्वं वै मनुष्यस्य कथंचन ।
सर्वेणावश्यमर्तव्यं जातेन सरितां वरे ॥ ४७
दुर्धर्षस्त्वेष शत्रूणां रणेषु भविता सदा ।
अस्त्रस्यास्य प्रभावाद्वै व्येतु ते मानसो ज्वरः ॥ ४८
इत्युक्त्वा वरुणः प्रादाद्गदां मन्त्रपुरस्कृताम् ।
यामासाद्य दुराधर्षः सर्वलोके श्रुतायुधः ॥ ४९
उवाच चैनं भगवान्पुनरेव जलेश्वरः ।
अयुध्यति न मोक्तव्या सा त्वय्येव पतेदिति ॥५०
स तया वीरघातिन्या जनार्दनमताडयत् ।
प्रतिजग्राह तां कृष्णः पीनेनांसेन वीर्यवान् ॥ ५१
नाकम्पयत शौरिं सा विन्ध्यं गिरिमिवानिलः ।
प्रत्यभ्ययात्तं विप्रोढा कृत्येव दुरधिष्ठिता ॥ ५२
जघान चास्थितं वीरं श्रुतायुधममर्षणम् ।
हत्वा श्रुतायुधं वीरं जगतीमन्वपद्यत ॥ ५३
हाहाकारो महांस्तत्र सैन्यानां समजायत ।
स्वेनास्त्रेण हतं दृष्ट्वा श्रुतायुधमरिंदमम् ॥ ५४
अयुध्यमानाय हि सा केशवाय नराधिप ।
क्षिप्ता श्रुतायुधेनाथ तस्मात्तमवधीद्गदा ॥ ५५
यथोक्तं वरुणेनाजौ तथा स निधनं गतः ।
व्यसुश्चाप्यपतद्भूमौ प्रेक्षतां सर्वधन्विनाम् ॥ ५६
पतमानस्तु स बभौ पर्णाशायाः प्रियः सुतः ।
संभग्न इव वातेन बहुशाखो वनस्पतिः ॥ ५७
ततः सर्वाणि सैन्यानि सेनामुख्याश्च सर्वशः ।
प्राद्रवन्त हतं दृष्ट्वा श्रुतायुधमरिंदमम् ॥ ५८
ततः काम्बोजराजस्य पुत्रः शूरः सुदक्षिणः ।
अभ्ययाज्जवनैरश्वैः फल्गुनं शत्रुसूदनम् ॥ ५९
तस्य पार्थः शरान्सप्त प्रेषयामास भारत ।
ते तं शूरं विनिर्भिद्य प्राविशन्धरणीतलम् ॥ ६०
सोऽतिविद्धः शरैस्तीक्ष्णैर्गाण्डीवप्रेषितैर्मृधे ।
अर्जुनं प्रतिविव्याध दशभिः कङ्कपत्रिभिः ॥ ६१
वासुदेवं त्रिभिर्विद्ध्वा पुनः पार्थं च पञ्चभिः ।
तस्य पार्थो धनुश्छित्त्वा केतुं चिच्छेद मारिष ॥
भल्लाभ्यां भृशतीक्ष्णाभ्यां तं च विव्याध पाण्डवः ।
स तु पार्थं त्रिभिर्विद्ध्वा सिंहनादमथानदत् ॥ ६३
सर्वपारशवीं चैव शक्तिं शूरः सुदक्षिणः ।

सघण्टां प्राहिणोद्घोरां क्रुद्धो गाण्डीवधन्वने ॥ ६४
सा ज्वलन्ती महोल्केव तमासाद्य महारथम् ।
सविस्फुलिङ्गा निर्भिद्य निपपात महीतले ॥ ६५
तं चतुर्दशभिः पार्थो नाराचैः कङ्कपत्रिभिः ।
साश्वध्वजधनुःसूतं विव्याधाचिन्त्यविक्रमः ।
रथं चान्यैः सुबहुभिश्चक्रे विशकलं शरैः ॥ ६६
सुदक्षिणं तु काम्बोजं मोघसंकल्पविक्रमम् ।
बिभेद हृदि बाणेन पृथुधारेण पाण्डवः ॥ ६७
स भिन्नमर्मा स्रस्ताङ्गः प्रभ्रष्टमुकुटाङ्गदः ।
पपाताभिमुखः शूरो यन्त्रमुक्त इव ध्वजः ॥ ६८
गिरेः शिखरजः श्रीमान्सुशाखः सुप्रतिष्ठितः ।
निर्भग्न इव वातेन कर्णिकारो हिमात्यये ॥ ६९
शेते स्म निहतो भूमौ काम्बोजास्तरणोचितः ।
सुदर्शनीयस्ताम्राक्षः कर्णिना स सुदक्षिणः ।
पुत्रः काम्बोजराजस्य पार्थेन विनिपातितः ॥ ७०
ततः सर्वाणि सैन्यानि व्यद्रवन्त सुतस्य ते ।
हतं श्रुतायुधं दृष्ट्वा काम्बोजं च सुदक्षिणम् ॥ ७१

इति श्रीमहाभारते द्रोणपर्वणि
सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

६८

संजय उवाच ।

हते सुदक्षिणे राजन्वीरे चैव श्रुतायुधे ।
जवेनाभ्यद्रवन्पार्थं कुपिताः सैनिकास्तव ॥ १
अभीषाहाः शूरसेनाः शिबयोऽथ वसातयः ।
अभ्यवर्षंस्ततो राजञ्शरवर्षैर्धनंजयम् ॥ २
तेषां षष्टिशतानार्यन्प्रामथ्नात्पाण्डवः शरैः ।
ते स्म भीताः पलायन्त व्याघ्रात्क्षुद्रमृगा इव ॥ ३
ते निवृत्य पुनः पार्थं सर्वतः पर्यवारयन् ।
रणे सपत्नान्निघ्नन्तं जिगीषन्तं परान्युधि ॥ ४
तेषामापततां तूर्णं गाण्डीवप्रेषितैः शरैः ।
शिरांसि पातयामास बाहूंश्चैव धनंजयः ॥ ५
शिरोभिः पतितैस्तत्र भूमिरासीन्निरन्तरा ।
अभ्रच्छायेव चैवासीद्ध्वाङ्क्षगृध्रवडैर्युधि ॥ ६
तेषु तूत्साद्यमानेषु क्रोधामर्षसमन्वितौ ।
श्रुतायुश्चाच्युतायुश्च धनंजयमयुध्यताम् ॥ ७
बलिनौ स्पर्धिनौ वीरौ कुलजौ बाहुशालिनौ ।
तावेनं शरवर्षाणि सव्यदक्षिणमस्यताम् ॥ ८
त्वरायुक्तौ महाराज प्रार्थयानौ महद्यशः ।
अर्जुनस्य वधप्रेप्सू पुत्रार्थे तव धन्विनौ ॥ ९
तावर्जुनं सहस्रेण पत्रिणां नतपर्वणाम् ।
पूरयामासतुः क्रुद्धौ तडागं जलदौ यथा ॥ १०
श्रुतायुश्च ततः क्रुद्धस्तोमरेण धनंजयम् ।
आजघान रथश्रेष्ठः पीतेन निशितेन च ॥ ११
सोऽतिविद्धो बलवता शत्रुणा शत्रुकर्शनः ।
आजगाम परं मोहं मोहयन्केशवं रणे ॥ १२
एतस्मिन्नेव काले तु सोऽच्युतायुर्महारथः ।
शूलेन भृशतीक्ष्णेन ताडयामास पाण्डवम् ॥ १३
क्षते क्षारं स हि ददौ पाण्डवस्य महात्मनः ।
पार्थोऽपि भृशसंविद्धो ध्वजयष्टिं समाश्रितः ॥ १४
ततः सर्वस्य सैन्यस्य तावकस्य विशां पते ।
सिंहनादो महानासीद्धतं मत्वा धनंजयम् ॥ १५
कृष्णश्च भृशसंतप्तो दृष्ट्वा पार्थं विचेतसम् ।
आश्वासयत्सुहृद्याभिर्वाग्भिस्तत्र धनंजयम् ॥ १६
ततस्तौ रथिनां श्रेष्ठौ लब्धलक्षौ धनंजयम् ।
वासुदेवं च वार्ष्णेयं शरवर्षैः समन्ततः ॥ १७
सचक्रकूबररथं साश्वध्वजपताकिनम् ।
अदृश्यं चक्रतुर्युद्धे तदद्भुतमिवाभवत् ॥ १८
प्रत्याश्वस्तस्तु बीभत्सुः शनकैरिव भारत ।
प्रेतराजपुरं प्राप्य पुनः प्रत्यागतो यथा ॥ १९
संछन्नं शरजालेन रथं दृष्ट्वा सकेशवम् ।

शत्रू चाभिमुखौ दृष्ट्वा दीप्यमानाविवानलौ ॥ २०
प्रादुश्चक्रे ततः पार्थः शाक्रमस्त्रं महारथः ।
तस्मादासन्सहस्राणि शराणां नतपर्वणाम् ॥ २१
ते जघ्नुस्तौ महेष्वासौ ताभ्यां सृष्टांश्च सायकान् ।
विचेरुराकाशगताः पार्थबाणविदारिताः ॥ २२
प्रतिहत्य शरांस्तूर्णं शरवेगेन पाण्डवः ।
प्रतस्थे तत्र तत्रैव योधयन्वै महारथान् ॥ २३
तौ च फल्गुनबाणौघैर्विबाहुशिरसौ कृतौ ।
वसुधामन्वपद्येतां वातनुन्नाविव द्रुमौ ॥ २४
श्रुतायुषश्च निधनं वधश्चैवाच्युतायुषः ।
लोकविस्मापनमभूत्समुद्रस्येव शोषणम् ॥ २५
तयोः पदानुगान्हत्वा पुनः पञ्चशतान्रथान् ।
अभ्यगाद्भारतीं सेनां निघ्नन्पार्थो वरान्वरान् ॥ २६
श्रुतायुषं च निहतं प्रेक्ष्य चैवाच्युतायुषम् ।
अयुतायुश्च संक्रुद्धो दीर्घायुश्चैव भारत ॥ २७
पुत्रौ तयोर्नरश्रेष्ठौ कौन्तेयं प्रतिजग्मतुः ।
किरन्तौ विविधान्बाणान्पितृव्यसनकर्शितौ ॥ २८
तावर्जुनो मुहूर्तेन शरैः संनतपर्वभिः ।
प्रेषयत्परमक्रुद्धो यमस्य सदनं प्रति ॥ २९
लोडयन्तमनीकानि द्विपं पद्मसरो यथा ।
नाशक्नुवन्वारयितुं पार्थं क्षत्रियपुंगवाः ॥ ३०
अङ्गास्तु गजवारेण पाण्डवं पर्यवारयन् ।
क्रुद्धाः सहस्रशो राजञ्शिक्षिता हस्तिसादिनः ॥ ३१
दुर्योधनसमादिष्टाः कुञ्जरैः पर्वतोपमैः ।
प्राच्याश्च दाक्षिणात्याश्च कलिङ्गप्रमुखा नृपाः ॥ ३२
तेषामापततां शीघ्रं गाण्डीवप्रेषितैः शरैः ।
निचकर्त शिरांस्युग्रो बाहूनपि सुभूषणान् ॥ ३३
तैः शिरोभिर्मही कीर्णा बाहुभिश्च सहाङ्गदैः ।
बभौ कनकपाषाणा भुजगैरिव संवृता ॥ ३४
बाहवो विशिखैश्छिन्नाः शिरांस्युन्मथितानि च ।
च्यवमानान्यदृश्यन्त द्रुमेभ्य इव पक्षिणः ॥ ३५
शरैः सहस्रशो विद्धा द्विपाः प्रस्रुतशोणिताः ।
व्यदृश्यन्ताद्रयः काले गैरिकाम्बुस्रवा इव ॥ ३६
निहताः शेरते स्मान्ये बीभत्सोर्निशितैः शरैः ।
गजपृष्ठगता म्लेच्छा नानाविकृतदर्शनाः ॥ ३७
नानावेषधरा राजन्नानाशस्त्रौघसंवृताः ।
रुधिरेणानुलिप्ताङ्गा भान्ति चित्रैः शरैर्हताः ॥ ३८
शोणितं निर्वमन्ति स्म द्विपाः पार्थशराहताः ।
सहस्रशश्छिन्नगात्राः सारोहाः सपदानुगाः ॥ ३९
चुक्रुशुश्च निपेतुश्च बभ्रमुश्चापरे दिशः ।
भृशं त्रस्ताश्च बहुधा स्वानेव ममृदुर्गजाः ।
सान्तरायुधिका मत्ता द्विपास्तीक्ष्णविषोपमाः ॥ ४०
विदन्त्यसुरमायां ये सुघोरा घोरचक्षुषः ।
यवनाः पारदाश्चैव शकाश्च सुनिकैः सह ॥ ४१
गोयोनिप्रभवा म्लेच्छाः कालकल्पाः प्रहारिणः ।
दार्वाभिसारा दरदाः पुण्ड्राश्च सह बाह्लिकैः ॥ ४२
न ते स्म शक्याः संख्यातुं व्राताः शतसहस्रशः ।
वृष्टिस्तथाविधा ह्यासीच्छलभानामिवायतिः ॥ ४३
अभ्रच्छायामिव शरैः सैन्ये कृत्वा धनंजयः ।
मुण्डार्धमुण्डजटिलानशुचीञ्जटिलाननान् ।
म्लेच्छानशातयत्सर्वान्समेतानस्त्रमायया ॥ ४४
शरैश्च शतशो विद्धास्ते संघाः संघचारिणः ।
प्राद्रवन्त रणे भीता गिरिगह्वरवासिनः ॥ ४५
गजाश्वसादिम्लेच्छानां पतितानां शतैः शरैः ।
वडाः कङ्का वृका भूमावपिबन्रुधिरं मुदा ॥ ४६
पत्त्यश्वरथनागैश्च प्रच्छन्नकृतसंक्रमाम् ।
शरवर्षप्लवां घोरां केशशैवलशाड्वलाम् ।
प्रावर्तयन्नदीमुग्रां शोणितौघतरङ्गिणीम् ॥ ४७
शिरस्त्राणक्षुद्रमत्स्यां युगान्ते कालसंभृताम् ।
अकरोद्गजसंबाधां नदीमुत्तरशोणिताम् ।

देहेभ्यो राजपुत्राणां नागाश्वरथसादिनाम् ॥ ४८
यथा स्थलं च निम्नं च न स्याद्वर्षति वासवे ।
तथासीत्पृथिवी सर्वा शोणितेन परिप्लुता ॥ ४९
षट्सहस्रान्वरान्वीरान्पुनर्दशशतान्वरान् ।
प्राहिणोन्मृत्युलोकाय क्षत्रियान्क्षत्रियर्षभः ॥ ५०
शरैः सहस्रशो विद्धा विधिवत्कल्पिता द्विपाः ।
शेरते भूमिमासाद्य शैला वज्रहता इव ॥ ५१
स वाजिरथमातङ्गान्निघ्नन्व्यचरदर्जुनः ।
प्रभिन्न इव मातङ्गो मृद्नन्नडवनं यथा ॥ ५२
भूरिद्रुमलतागुल्मं शुष्केन्धनतृणोलपम् ।
निर्दहेदनलोऽरण्यं यथा वायुसमीरितः ॥ ५३
सैन्यारण्यं तव तथा कृष्णानिलसमीरितः ।
शरार्चिरदहत्क्रुद्धः पाण्डवाग्निर्धनंजयः ॥ ५४
शून्यान्कुर्वन्रथोपस्थान्मानवैः संस्तरन्महीम् ।
प्रानृत्यदिव संबाधे चापहस्तो धनंजयः ॥ ५५
वज्रकल्पैः शरैर्भूमिं कुर्वन्नुत्तरशोणिताम् ।
प्राविशद्भारतीं सेनां संक्रुद्धो वै धनंजयः ।
तं श्रुतायुस्तथाम्बष्ठो व्रजमानं न्यवारयत् ॥ ५६
तस्यार्जुनः शरैस्तीक्ष्णैः कङ्कपत्रपरिच्छदैः ।
न्यपातयद्धयाञ्शीघ्रं यतमानस्य मारिष ।
धनुश्चास्यापरैश्छित्त्वा शरैः पार्थो विचक्रमे ॥ ५७
अम्बष्ठस्तु गदां गृह्य क्रोधपर्याकुलेक्षणः ।
आससाद रणे पार्थं केशवं च महारथम् ॥ ५८
ततः स प्रहसन्वीरो गदामुद्यम्य भारत ।
रथमावार्य गदया केशवं समताडयत् ॥ ५९
गदया ताडितं दृष्ट्वा केशवं परवीरहा ।
अर्जुनो भृशसंक्रुद्धः सोऽम्बष्ठं प्रति भारत ॥ ६०
ततः शरैर्हेमपुङ्खैः सगदं रथिनां वरम् ।
छादयामास समरे मेघः सूर्यमिवोदितम् ॥ ६१
ततोऽपरैः शरैश्चापि गदां तस्य महात्मनः ।
अचूर्णयत्तदा पार्थस्तदद्भुतमिवाभवत् ॥ ६२
अथ तां पतितां दृष्ट्वा गृह्यान्यां महतीं गदाम् ।
अर्जुनं वासुदेवं च पुनः पुनरताडयत् ॥ ६३
तस्यार्जुनः क्षुरप्राभ्यां सगदावुद्यतौ भुजौ ।
चिच्छेदेन्द्रध्वजाकारौ शिरश्चान्येन पत्रिणा ॥ ६४
स पपात हतो राजन्वसुधामनुनादयन् ।
इन्द्रध्वज इवोत्सृष्टो यन्त्रनिर्मुक्तबन्धनः ॥ ६५
रथानीकावगाढश्च वारणाश्वशतैर्वृतः ।
सोऽदृश्यत तदा पार्थो घनैः सूर्य इवावृतः ॥ ६६

इति श्रीमहाभारते द्रोणपर्वणि
अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

६९

संजय उवाच ।

ततः प्रविष्टे कौन्तेये सिन्धुराजजिघांसया ।
द्रोणानीकं विनिर्भिद्य भोजानीकं च दुस्तरम् ॥ १
काम्बोजस्य च दायादे हते राजन्सुदक्षिणे ।
श्रुतायुधे च विक्रान्ते निहते सव्यसाचिना ॥ २
विप्रद्रुतेष्वनीकेषु विध्वस्तेषु समन्ततः ।
प्रभग्नं स्वबलं दृष्ट्वा पुत्रस्ते द्रोणमभ्ययात् ॥ ३
त्वरन्नेकरथेनैव समेत्य द्रोणमब्रवीत् ।
गतः स पुरुषव्याघ्रः प्रमथ्येमां महाचमूम् ॥ ४
अत्र बुद्ध्या समीक्षस्व किं नु कार्यमनन्तरम् ।
अर्जुनस्य विघाताय दारुणेऽस्मिञ्जनक्षये ॥ ५
यथा स पुरुषव्याघ्रो न हन्येत जयद्रथः ।
तथा विधत्स्व भद्रं ते त्वं हि नः परमा गतिः ॥ ६
असौ धनंजयाग्निर्हि कोपमारुतचोदितः ।
सेनाकक्षं दहति मे वह्निः कक्षमिवोत्थितः ॥ ७
अतिक्रान्ते हि कौन्तेये भित्त्वा सैन्यं परंतप ।
जयद्रथस्य गोप्तारः संशयं परमं गताः ॥ ८
स्थिरा बुद्धिर्नरेन्द्राणामासीद्ब्रह्मविदां वर ।

नातिक्रमिष्यति द्रोणं जातु जीवन्धनंजयः ॥ ९
सोऽसौ पार्थो व्यतिक्रान्तो मिषतस्ते महाद्युते ।
सर्वं ह्यद्यातुरं मन्ये नैतदस्ति बलं मम ॥ १०
जानामि त्वां महाभाग पाण्डवानां हिते रतम् ।
तथा मुह्यामि च ब्रह्मन्कार्यवत्तां विचिन्तयन् ॥ ११
यथाशक्ति च ते ब्रह्मन्वर्तये वृत्तिमुत्तमाम् ।
प्रीणामि च यथाशक्ति तच्च त्वं नावबुध्यसे ॥ १२
अस्मान्न त्वं सदा भक्तानिच्छस्यमितविक्रम ।
पाण्डवान्सततं प्रीणास्यस्माकं विप्रिये रतान् ॥ १३
अस्मानेवोपजीवंस्त्वमस्माकं विप्रिये रतः ।
न ह्यहं त्वां विजानामि मधुदिग्धमिव क्षुरम् ॥१४
नादास्यच्चेद्वरं मह्यं भवान्पाण्डवनिग्रहे ।
नावारयिष्यं गच्छन्तमहं सिन्धुपतिं गृहान् ॥ १५
मया त्वाशंसमानेन त्वत्तस्त्राणमबुद्धिना ।
आश्वासितः सिन्धुपतिर्मोहाद्दत्तश्च मृत्यवे ॥ १६
यमदंष्ट्रान्तरं प्राप्तो मुच्येतापि हि मानवः ।
नार्जुनस्य वशं प्राप्तो मुच्येताजौ जयद्रथः ॥ १७
स तथा कुरु शोणाश्व यथा रक्ष्येत सैन्धवः ।
मम चार्तप्रलापानां मा क्रुधः पाहि सैन्धवम् ॥

द्रोण उवाच ।

नाभ्यसूयामि ते वाचमश्वत्थाम्नासि मे समः ।
सत्यं तु ते प्रवक्ष्यामि तज्जुषस्व विशां पते ॥ १९
सारथिः प्रवरः कृष्णः शीघ्राश्चास्य हयोत्तमाः ।
अल्पं च विवरं कृत्वा तूर्णं याति धनंजयः ॥ २०
किं नु पश्यसि बाणौघान्क्रोशमात्रे किरीटिनः ।
पश्चाद्रथस्य पतितान्क्षिप्तान्शीघ्रं हि गच्छतः ॥२१
न चाहं शीघ्रयानेऽद्य समर्थो वयसान्वितः ।
सेनामुखे च पार्थानामेतद्बलमुपस्थितम् ॥ २२
युधिष्ठिरश्च मे ग्राह्यो मिषतां सर्वधन्विनाम् ।
एवं मया प्रतिज्ञातं क्षत्रमध्ये महाभुज ॥ २३
धनंजयेन चोत्सृष्टो वर्तते प्रमुखे मम ।
तस्माद्व्यूहमुखं हित्वा नाहं यास्यामि फल्गुनम् ॥२४
तुल्याभिजनकर्माणं शत्रुमेकं सहायवान् ।
गत्वा योधय मा भैस्त्वं त्वं ह्यस्य जगतः पतिः ॥
राजा शूरः कृती दक्षो वैरमुत्पाद्य पाण्डवैः ।
वीर स्वयं प्रयाह्याशु यत्र यातो धनंजयः ॥ २६

दुर्योधन उवाच ।

कथं त्वामप्यतिक्रान्तः सर्वशस्त्रभृतां वरः ।
धनंजयो मया शक्य आचार्य प्रतिबाधितुम् ॥२७
अपि शक्यो रणे जेतुं वज्रहस्तः पुरंदरः ।
नार्जुनः समरे शक्यो जेतुं परपुरंजयः ॥ २८
येन भोजश्च हार्दिक्यो भवांश्च त्रिदशोपमः ।
अस्त्रप्रतापेन जितौ श्रुतायुश्च निबर्हितः ॥ २९
सुदक्षिणश्च निहतः स च राजा श्रुतायुधः ।
श्रुतायुश्चाच्युतायुश्च म्लेच्छाश्च शतशो हताः ॥३०
तं कथं पाण्डवं युद्धे दहन्तमहितान्बहून् ।
प्रतियोत्स्यामि दुर्धर्षं तन्मे शंसास्त्रकोविद ॥ ३१
क्षमं चेन्मन्यसे युद्धं मम तेनाद्य शाधि माम् ।
परवानस्मि भवति प्रेष्यवद्रक्ष मे यशः ॥ ३२

द्रोण उवाच ।

सत्यं वदसि कौरव्य दुराधर्षो धनंजयः ।
अहं तु तत्करिष्यामि यथैनं प्रसहिष्यसि ॥ ३३
अद्भुतं चाद्य पश्यन्तु लोके सर्वधनुर्धराः ।
विषक्तं त्वयि कौन्तेयं वासुदेवस्य पश्यतः ॥ ३४
एष ते कवचं राजंस्तथा बध्नामि काञ्चनम् ।
यथा न बाणा नास्त्राणि विषहिष्यन्ति ते रणे ॥ ३५
यदि त्वां सासुरसुराः सयक्षोरगराक्षसाः ।
योधयन्ति त्रयो लोकाः सनरा नास्ति ते भयम् ॥
न कृष्णो न च कौन्तेयो न चान्यः शस्त्रभृद्रणे ।
शरानर्पयितुं कश्चित्कवचे तव शक्ष्यति ॥ ३७

स त्वं कवचमास्थाय क्रुद्धमद्य रणेऽर्जुनम् ।
त्वरमाणः स्वयं याहि न चासौ त्वां सहिष्यते ॥ ३८

संजय उवाच ।

एवमुक्त्वा त्वरन्द्रोणः स्पृष्ट्वाम्भो वर्म भास्वरम् ।
आबबन्धाद्भुततमं जपन्मन्त्रं यथाविधि ॥ ३९
रणे तस्मिन्सुमहति विजयाय सुतस्य ते ।
विसिस्मापयिषुर्लोकं विद्यया ब्रह्मवित्तमः ॥ ४०

द्रोण उवाच ।

करोतु स्वस्ति ते ब्रह्मा स्वस्ति चापि द्विजातयः ।
सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति भारत ॥ ४१
ययातिर्नहुषश्चैव धुन्धुमारो भगीरथः ।
तुभ्यं राजर्षयः सर्वे स्वस्ति कुर्वन्तु सर्वशः ॥ ४२
स्वस्ति तेऽस्त्वेकपादेभ्यो बहुपादेभ्य एव च ।
स्वस्त्यस्त्वपादकेभ्यश्च नित्यं तव महारणे ॥ ४३
स्वाहा स्वधा शची चैव स्वस्ति कुर्वन्तु ते सदा ।
लक्ष्मीररुन्धती चैव कुरुतां स्वस्ति तेऽनघ ॥ ४४
असितो देवलश्चैव विश्वामित्रस्तथाङ्गिराः ।
वसिष्ठः कश्यपश्चैव स्वस्ति कुर्वन्तु ते नृप ॥ ४५
धाता विधाता लोकेशो दिशश्च सदिगीश्वराः ।
स्वस्ति तेऽद्य प्रयच्छन्तु कार्त्तिकेयश्च षण्मुखः ॥ ४६
विवस्वान्भगवान्स्वस्ति करोतु तव सर्वशः ।
दिग्गजाश्चैव चत्वारः क्षितिः खं गगनं ग्रहाः ॥ ४७
अधस्ताद्धरणीं योऽसौ सदा धारयते नृप ।
स शेषः पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु ॥ ४८
गान्धारे युधि विक्रम्य निर्जिताः सुरसत्तमाः ।
पुरा वृत्रेण दैत्येन भिन्नदेहाः सहस्रशः ॥ ४९
हृततेजोबलाः सर्वे तदा सेन्द्रा दिवौकसः ।
ब्रह्माणं शरणं जग्मुर्वृत्राद्भीता महासुरात् ॥ ५०

देवा ऊचुः ।

प्रमर्दितानां वृत्रेण देवानां देवसत्तम ।
गतिर्भव सुरश्रेष्ठ त्राहि नो महतो भयात् ॥ ५१

द्रोण उवाच ।

अथ पार्श्वे स्थितं विष्णुं शक्रादींश्च सुरोत्तमान् ।
प्राह तथ्यमिदं वाक्यं विषण्णान्सुरसत्तमान् ॥ ५२
रक्ष्या मे सततं देवाः सहेन्द्राः सद्विजातयः ।
त्वष्टुः सुदुर्धरं तेजो येन वृत्रो विनिर्मितः ॥ ५३
त्वष्टा पुरा तपस्तप्त्वा वर्षायुतशतं तदा ।
वृत्रो विनिर्मितो देवाः प्राप्यानुज्ञां महेश्वरात् ॥
स तस्यैव प्रसादाद्वै हन्यादेव रिपुर्बली ।
नागत्वा शंकरस्थानं भगवान्दृश्यते हरः ॥ ५५
दृष्ट्वा हनिष्यथ रिपुं क्षिप्रं गच्छत मन्दरम् ।
यत्रास्ते तपसां योनिर्दक्षयज्ञविनाशनः ।
पिनाकी सर्वभूतेशो भगनेत्रनिपातनः ॥ ५६
ते गत्वा सहिता देवा ब्रह्मणा सह मन्दरम् ।
अपश्यंस्तेजसां राशिं सूर्यकोटिसमप्रभम् ॥ ५७
सोऽब्रवीत्स्वागतं देवा ब्रूत किं करवाण्यहम् ।
अमोघं दर्शनं मह्यं कामप्राप्तिरतोऽस्तु वः ॥ ५८
एवमुक्तास्तु ते सर्वे प्रत्यूचुस्तं दिवौकसः ।
तेजो हृतं नो वृत्रेण गतिर्भव दिवौकसाम् ॥ ५९
मूर्तीरीक्षस्व नो देव प्रहारैर्जर्जरीकृताः ।
शरणं त्वां प्रपन्नाः स्म गतिर्भव महेश्वर ॥ ६०

महेश्वर उवाच ।

विदितं मे यथा देवाः कृत्येयं सुमहाबला ।
त्वष्टुस्तेजोभवा घोरा दुर्निवार्याकृतात्मभिः ॥ ६१
अवश्यं तु मया कार्यं साह्यं सर्वदिवौकसाम् ।
ममेदं गात्रजं शक्र कवचं गृह्य भास्वरम् ।
बधानानेन मन्त्रेण मानसेन सुरेश्वर ॥ ६२

द्रोण उवाच ।

इत्युक्त्वा वरदः प्रादाद्वर्म तन्मन्त्रमेव च ।
स तेन वर्मणा गुप्तः प्रायाद्वृत्रचमूं प्रति ॥ ६३

नानाविधैश्च शस्त्रौघैः पात्यमानैर्महारणे ।
न संधिः शक्यते भेत्तुं वर्मबन्धस्य तस्य तु ॥ ६४
ततो जघान समरे वृत्रं देवपतिः स्वयम् ।
तं च मन्त्रमयं बन्धं वर्म चाङ्गिरसे ददौ ॥ ६५
अङ्गिराः प्राह पुत्रस्य मन्त्रज्ञस्य बृहस्पतेः ।
बृहस्पतिरथोवाच अग्निवेश्याय धीमते ॥ ६६
अग्निवेश्यो मम प्रादात्तेन बध्नामि वर्म ते ।
तवाद्य देहरक्षार्थं मन्त्रेण नृपसत्तम ॥ ६७

संजय उवाच ।

एवमुक्त्वा ततो द्रोणस्तव पुत्रं महाद्युतिः ।
पुनरेव वचः प्राह शनैराचार्यपुंगवः ॥ ६८
ब्रह्मसूत्रेण बध्नामि कवचं तव पार्थिव ।
हिरण्यगर्भेण यथा बद्धं विष्णोः पुरा रणे ॥ ६९
यथा च ब्रह्मणा बद्धं संग्रामे तारकामये ।
शक्रस्य कवचं दिव्यं तथा बध्नाम्यहं तव ॥ ७०
बद्ध्वा तु कवचं तस्य मन्त्रेण विधिपूर्वकम् ।
प्रेषयामास राजानं युद्धाय महते द्विजः ॥ ७१
स संनद्धो महाबाहुराचार्येण महात्मना ।
रथानां च सहस्रेण त्रिगर्तानां प्रहारिणाम् ॥ ७२
तथा दन्तिसहस्रेण मत्तानां वीर्यशालिनाम् ।
अश्वानामयुतेनैव तथान्यैश्च महारथैः ॥ ७३
वृतः प्रायान्महाबाहुरर्जुनस्य रथं प्रति ।
नानावादित्रघोषेण यथा वैरोचनिस्तथा ॥ ७४
ततः शब्दो महानासीत्सैन्यानां तव भारत ।
अगाधं प्रस्थितं दृष्ट्वा समुद्रमिव कौरवम् ॥ ७५

इति श्रीमहाभारते द्रोणपर्वणि
एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

७०

संजय उवाच ।

प्रविष्टयोर्महाराज पार्थवार्ष्णेययोस्तदा ।
दुर्योधने प्रयाते च पृष्ठतः पुरुषर्षभे ॥ १
जवेनाभ्यद्रवन्द्रोणं महता निस्वनेन च ।
पाण्डवाः सोमकैः सार्धं ततो युद्धमवर्तत ॥ २
तद्युद्धमभवद्घोरं तुमुलं लोमहर्षणम् ।
पाञ्चालानां कुरूणां च व्यूहस्य पुरतोऽद्भुतम् ॥ ३
राजन्कदाचिन्नास्माभिर्दृष्टं तादृङ् न च श्रुतम् ।
यादृङ्मध्यगते सूर्ये युद्धमासीद्विशां पते ॥ ४
धृष्टद्युम्नमुखाः पार्था व्यूढानीकाः प्रहारिणः ।
द्रोणस्य सैन्यं ते सर्वे शरवर्षैरवाकिरन् ॥ ५
वयं द्रोणं पुरस्कृत्य सर्वशस्त्रभृतां वरम् ।
पार्षतप्रमुखान्पार्थानभ्यवर्षाम सायकैः ॥ ६
महामेघाविवोदीर्णौ मिश्रवातौ हिमात्यये ।
सेनाग्रे विप्रकाशेते रुचिरे रथभूषिते ॥ ७
समेत्य तु महासेने चक्रतुर्वेगमुत्तमम् ।
जाह्नवीयमुने नद्यौ प्रावृषीवोल्बणोदके ॥ ८
नानाशस्त्रपुरोवातो द्विपाश्वरथसंवृतः ।
गदाविद्युन्महारौद्रः संग्रामजलदो महान् ॥ ९
भारद्वाजानिलोद्धूतः शरधारासहस्रवान् ।
अभ्यवर्षन्महारौद्रः पाण्डुसेनाग्निमुद्धतम् ॥ १०
समुद्रमिव घर्मान्ते विवान्घोरो महानिलः ।
व्यक्षोभयदनीकानि पाण्डवानां द्विजोत्तमः ॥ ११
तेऽपि सर्वप्रयत्नेन द्रोणमेव समाद्रवन् ।
बिभित्सन्तो महासेतुं वार्योघाः प्रबला इव ॥ १२
वारयामास तान्द्रोणो जलौघानचलो यथा ।
पाण्डवान्समरे क्रुद्धान्पाञ्चालांश्च सकेकयान् ॥ १३
अथापरेऽपि राजानः परावृत्य समन्ततः ।
महाबला रणे शूराः पाञ्चालानन्ववारयन् ॥ १४
ततो रणे नरव्याघ्रः पार्षतः पाण्डवैः सह ।
संजघानासकृद्द्रोणं बिभित्सुररिवाहिनीम् ॥ १५
यथैव शरवर्षाणि द्रोणो वर्षति पार्षते ।

तथैव शरवर्षाणि धृष्टद्युम्नोऽभ्यवर्षत ॥ १६
सनिस्त्रिंशपुरोवातः शक्तिप्रासर्ष्टिसंवृतः ।
ज्याविद्युच्चापसंह्रादो धृष्टद्युम्नबलाहकः ॥ १७
शरधाराश्मवर्षाणि व्यसृजत्सर्वतोदिशम् ।
निघ्नन्रथवराश्वौघांश्छादयामास वाहिनीम् ॥ १८
यं यमार्छच्छरैर्द्रोणः पाण्डवानां रथव्रजम् ।
ततस्ततः शरैर्द्रोणमपाकर्षत पार्षतः ॥ १९
तथा तु यतमानस्य द्रोणस्य युधि भारत ।
धृष्टद्युम्नं समासाद्य त्रिधा सैन्यमभिद्यत ॥ २०
भोजमेके न्यवर्तन्त जलसंधमथापरे ।
पाण्डवैर्हन्यमानाश्च द्रोणमेवापरेऽव्रजन् ॥ २१
सैन्यान्यघटयद्यानि द्रोणस्तु रथिनां वरः ।
व्यधमच्चापि तान्यस्य धृष्टद्युम्नो महारथः ॥ २२
धार्तराष्ट्रास्त्रिधाभूता वध्यन्ते पाण्डुसृञ्जयैः ।
अगोपाः पशवोऽरण्ये बहुभिः श्वापदैरिव ॥ २३
कालः संग्रसते योधान्धृष्टद्युम्नेन मोहितान् ।
संग्रामे तुमुले तस्मिन्निति संमेनिरे जनाः ॥ २४
कुनृपस्य यथा राष्ट्रं दुर्भिक्षव्याधितस्करैः ।
द्राव्यते तद्वदापन्ना पाण्डवैस्तव वाहिनी ॥ २५
अर्करश्मिप्रभिन्नेषु शस्त्रेषु कवचेषु च ।
चक्षूंषि प्रतिहन्यन्ते सैन्येन रजसा तथा ॥ २६
त्रिधाभूतेषु सैन्येषु वध्यमानेषु पाण्डवैः ।
अमर्षितस्ततो द्रोणः पाञ्चालान्व्यधमच्छरैः ॥ २७
मृद्नतस्तान्यनीकानि निघ्नतश्चापि सायकैः ।
बभूव रूपं द्रोणस्य कालाग्नेरिव दीप्यतः ॥ २८
रथं नागं हयं चापि पत्तिनश्च विशां पते ।
एकैकेनेषुणा संख्ये निर्बिभेद महारथः ॥ २९
पाण्डवानां तु सैन्येषु नास्ति कश्चित्स भारत ।
दधार यो रणे बाणान्द्रोणचापच्युताञ्शितान् ॥३०
तत्पच्यमानमर्केण द्रोणसायकतापितम् ।
बभ्राम पार्षतं सैन्यं तत्र तत्रैव भारत ॥ ३१
तथैव पार्षतेनापि काल्यमानं बलं तव ।
अभवत्सर्वतो दीप्तं शुष्कं वनमिवाग्निना ॥ ३२
वध्यमानेषु सैन्येषु द्रोणपार्षतसायकैः ।
त्यक्त्वा प्राणान्परं शक्त्या प्रायुध्यन्त स्म सैनिकाः ॥
तावकानां परेषां च युध्यतां भरतर्षभ ।
नासीत्कश्चिन्महाराज योऽत्याक्षीत्संयुगं भयात् ॥३४
भीमसेनं तु कौन्तेयं सोदर्याः पर्यवारयन् ।
विविंशतिश्चित्रसेनो विकर्णश्च महारथः ॥ ३५
विन्दानुविन्दावावन्त्यौ क्षेमधूर्तिश्च वीर्यवान् ।
त्रयाणां तव पुत्राणां त्रय एवानुयायिनः ॥ ३६
बाह्लीकराजस्तेजस्वी कुलपुत्रो महारथः ।
सहसेनः सहामात्यो द्रौपदेयानवारयत् ॥ ३७
शैब्यो गोवासनो राजा योधैर्दशशतावरैः ।
काश्यस्याभिभुवः पुत्रं पराक्रान्तमवारयत् ॥ ३८
अजातशत्रुं कौन्तेयं ज्वलन्तमिव पावकम् ।
मद्राणामीश्वरः शल्यो राजा राजानमावृणोत् ॥ ३९
दुःशासनस्त्ववस्थाप्य स्वमनीकममर्षणः ।
सात्यकिं प्रययौ क्रुद्धः शूरो रथवरं युधि ॥ ४०
स्वकेनाहमनीकेन संनद्धकवचावृतः ।
चतुःशतैर्महेष्वासैश्चेकितानमवारयम् ॥ ४१
शकुनिस्तु सहानीको माद्रीपुत्रमवारयत् ।
गान्धारकैः सप्तशतैश्चापशक्तिशरासिभिः ॥ ४२
विन्दानुविन्दावावन्त्यौ विराटं मत्स्यमार्छताम् ।
प्राणांस्त्यक्त्वा महेष्वासौ मित्रार्थेऽभ्युद्यतौ युधि ॥
शिखण्डिनं याज्ञसेनिं रुन्धानमपराजितम् ।
बाह्लिकः प्रतिसंयत्तः पराक्रान्तमवारयत् ॥ ४४
धृष्टद्युम्नं च पाञ्चाल्यं क्रूरैः सार्धं प्रभद्रकैः ।
आवन्त्यः सह सौवीरैः क्रुद्धरूपमवारयत् ॥ ४५
घटोत्कचं तथा शूरं राक्षसं क्रूरयोधिनम् ।

अलायुधोऽद्रवत्तूर्णं क्रुद्धमायान्तमाहवे ॥ ४६
अलम्बुसं राक्षसेन्द्रं कुन्तिभोजो महारथः ।
सैन्येन महता युक्तः क्रुद्धरूपमवारयत् ॥ ४७
सैन्धवः पृष्ठतस्त्वासीत्सर्वसैन्यस्य भारत ।
रक्षितः परमेष्वासैः कृपप्रभृतिभी रथैः ॥ ४८
तस्यास्तां चक्ररक्षौ द्वौ सैन्धवस्य बृहत्तमौ ।
द्रौणिर्दक्षिणतो राजन्सूतपुत्रश्च वामतः ॥ ४९
पृष्ठगोपास्तु तस्यासन्सौमदत्तिपुरोगमाः ।
कृपश्च वृषसेनश्च शलः शल्यश्च दुर्जयः ॥ ५०
नीतिमन्तो महेष्वासाः सर्वे युद्धविशारदाः ।
सैन्धवस्य विधायैवं रक्षां युयुधिरे तदा ॥ ५१

इति श्रीमहाभारते द्रोणपर्वणि
सप्ततितमोऽध्यायः ॥ ७० ॥

७१

संजय उवाच ।

राजन्संग्राममाश्चर्यं शृणु कीर्तयतो मम ।
कुरूणां पाण्डवानां च यथा युद्धमवर्तत ॥ १
भारद्वाजं समासाद्य व्यूहस्य प्रमुखे स्थितम् ।
अयोधयन्रणे पार्था द्रोणानीकं बिभित्सवः ॥ २
रक्षमाणः स्वकं व्यूहं द्रोणस्यापि च सैनिकाः ।
अयोधयन्रणे पार्थान्प्रार्थयन्तो महद्यशः ॥ ३
विन्दानुविन्दावावन्त्यौ विराटं दशभिः शरैः ।
आजघ्नतुः सुसंक्रुद्धौ तव पुत्रहितैषिणौ ॥ ४
विराटश्च महाराज तावुभौ समरे स्थितौ ।
पराक्रान्तौ पराक्रम्य योधयामास सानुगौ ॥ ५
तेषां युद्धं समभवद्दारुणं शोणितोदकम् ।
सिंहस्य द्विपमुख्याभ्यां प्रभिन्नाभ्यां यथा वने ॥६
बाह्लीकं रभसं युद्धे याज्ञसेनिर्महाबलः ।
आजघ्ने विशिखैस्तीक्ष्णैर्घोरैर्मर्मास्थिभेदिभिः ॥ ७
बाह्लीको याज्ञसेनिं तु हेमपुङ्खैः शिलाशितैः ।
आजघान भृशं क्रुद्धो नवभिर्नतपर्वभिः ॥ ८
तद्युद्धमभवद्घोरं शरशक्तिसमाकुलम् ।
भीरूणां त्रासजननं शूराणां हर्षवर्धनम् ॥ ९
ताभ्यां तत्र शरैर्मुक्तैरन्तरिक्षं दिशस्तथा ।
अभवत्संवृतं सर्वं न प्राज्ञायत किंचन ॥ १०
शैब्यो गोवासनो युद्धे काश्यपुत्रं महारथम् ।
ससैन्यो योधयामास गजः प्रतिगजं यथा ॥ ११
बाह्लीकराजः संरब्धो द्रौपदेयान्महारथान् ।
मनः पञ्चेन्द्रियाणीव शुशुभे योधयन्रणे ॥ १२
अयोधयंस्ते च भृशं तं शरौघैः समन्ततः ।
इन्द्रियार्था यथा देहं शश्वद्देहभृतां वर ॥ १३
वार्ष्णेयं सात्यकिं युद्धे पुत्रो दुःशासनस्तव ।
आजघ्ने सायकैस्तीक्ष्णैर्नवभिर्नतपर्वभिः ॥ १४
सोऽतिविद्धो बलवता महेष्वासेन धन्विना ।
ईषन्मूर्छां जगामाशु सात्यकिः सत्यविक्रमः ॥ १५
समाश्वस्तस्तु वार्ष्णेयस्तव पुत्रं महारथम् ।
विव्याध दशभिस्तूर्णं सायकैः कङ्कपत्रिभिः ॥ १६
तावन्योन्यं दृढं विद्धावन्योन्यशरविक्षतौ ।
रेजतुः समरे राजन्पुष्पिताविव किंशुकौ ॥ १७
अलम्बुसस्तु संक्रुद्धः कुन्तिभोजशरार्दितः ।
अशोभत परं लक्ष्म्या पुष्पाढ्य इव किंशुकः ॥१८
कुन्तिभोजं ततो रक्षो विद्ध्वा बहुभिरायसैः ।
अनदद्भैरवं नादं वाहिन्याः प्रमुखे तव ॥ १९
ततस्तौ समरे शूरौ योधयन्तौ परस्परम् ।
ददृशुः सर्वभूतानि शक्रजम्भौ यथा पुरा ॥ २०
शकुनिं रभसं युद्धे कृतवैरं च भारत ।
माद्रीपुत्रौ च संरब्धौ शरैरर्दयतां मृधे ॥ २१
तन्मूलः स महाराज प्रावर्तत जनक्षयः ।
त्वया संजनितोऽत्यर्थं कर्णेन च विवर्धितः ॥ २२
उद्धुक्षितश्च पुत्रेण तव क्रोधहुताशनः ।

य इमां पृथिवीं राजन्दग्धुं सर्वां समुद्यतः ॥ २३
शकुनिः पाण्डुपुत्राभ्यां कृतः स विमुखः शरैः ।
नाभ्यजानत कर्तव्यं युधि किंचित्पराक्रमम् ॥ २४
विमुखं चैनमालोक्य माद्रीपुत्रौ महारथौ ।
ववर्षतुः पुनर्बाणैर्यथा मेघौ महागिरिम् ॥ २५
स वध्यमानो बहुभिः शरैः संनतपर्वभिः ।
संप्रायाज्जवनैरश्वैर्द्रोणानीकाय सौबलः ॥ २६
घटोत्कचस्तथा शूरं राक्षसं तमलायुधम् ।
अभ्ययाद्भृशं युद्धे वेगमास्थाय मध्यमम् ॥ २७
तयोर्युद्धं महाराज चित्ररूपमिवाभवत् ।
यादृशं हि पुरा वृत्तं रामरावणयोर्मृधे ॥ २८
ततो युधिष्ठिरो राजा मद्रराजानमाहवे ।
विद्ध्वा पञ्चाशता बाणैः पुनर्विव्याध सप्तभिः ॥२९
ततः प्रववृते युद्धं तयोरत्यद्भुतं नृप ।
यथा पूर्वं महद्युद्धं शम्बरामरराजयोः ॥ ३०
विविंशतिश्चित्रसेनो विकर्णश्च तवात्मजः ।
अयोधयन्भीमसेनं महत्या सेनया वृताः ॥ ३१

इति श्रीमहाभारते द्रोणपर्वणि
एकसप्ततितमोऽध्यायः ॥ ७१ ॥

७२

संजय उवाच ।

तथा तस्मिन्प्रवृत्ते तु संग्रामे लोमहर्षणे ।
कौरवेयांस्त्रिधाभूतान्पाण्डवाः समुपाद्रवन् ॥ १
जलसंधं महाबाहुर्भीमसेनो न्यवारयत् ।
युधिष्ठिरः सहानीकः कृतवर्माणमाहवे ॥ २
किरन्तं शरवर्षाणि रोचमान इवांशुमान् ।
धृष्टद्युम्नो महाराज द्रोणमभ्यद्रवद्रणे ॥ ३
ततः प्रववृते युद्धं त्वरतां सर्वधन्विनाम् ।
कुरूणां सोमकानां च संक्रुद्धानां परस्परम् ॥ ४
संक्षये तु तथा भूते वर्तमाने महाभये ।
द्वंद्वीभूतेषु सैन्येषु युध्यमानेष्वभीतवत् ॥ ५
द्रोणः पाञ्चालपुत्रेण बली बलवता सह ।
विचिक्षेप पृषत्कौघांस्तदद्भुतमिवाभवत् ॥ ६
पुण्डरीकवनानीव विध्वस्तानि समन्ततः ।
चक्राते द्रोणपाञ्चाल्यौ नृणां शीर्षाण्यनेकशः ॥ ७
विनिकीर्णानि वीराणामनीकेषु समन्ततः ।
वस्त्राभरणशस्त्राणि ध्वजवर्मायुधानि च ॥ ८
तपनीयविचित्राङ्गाः संसिक्ता रुधिरेण च ।
संसक्ता इव दृश्यन्ते मेघसंघाः सविद्युतः ॥ ९
कुञ्जराश्वनरान्संख्ये पातयन्तः पतत्रिभिः ।
तालमात्राणि चापानि विकर्षन्तो महारथाः ॥ १०
असिचर्माणि चापानि शिरांसि कवचानि च ।
विप्रकीर्यन्त शूराणां संप्रहारे महात्मनाम् ॥ ११
उत्थितान्यगणेयानि कबन्धानि समन्ततः ।
अदृश्यन्त महाराज तस्मिन्परमसंकुले ॥ १२
गृध्राः कङ्का वडाः श्येना वायसा जम्बुकास्तथा ।
बहवः पिशिताशाश्च तत्रादृश्यन्त मारिष ॥ १३
भक्षयन्तः स्म मांसानि पिबन्तश्चापि शोणितम् ।
विलुम्पन्तः स्म केशांश्च मज्जाश्च बहुधा नृप ॥१४
आकर्षन्तः शरीराणि शरीरावयवांस्तथा ।
नराश्वगजसंघानां शिरांसि च ततस्ततः ॥ १५
कृतास्त्रा रणदीक्षाभिर्दीक्षिताः शरधारिणः ।
रणे जयं प्रार्थयन्तो भृशं युयुधिरे तदा ॥ १६
असिमार्गान्बहुविधान्विचेरुस्तावका रणे ।
ऋष्टिभिः शक्तिभिः प्रासैः शूलतोमरपट्टिशैः ॥ १७
गदाभिः परिघैश्चान्ये व्यायुधाश्च भुजैरपि ।
अन्योन्यं जघ्निरे क्रुद्धा युद्धरङ्गगता नराः ॥ १८
रथिनो रथिभिः सार्धमश्वारोहाश्च सादिभिः ।
मातङ्गा वरमातङ्गैः पदाताश्च पदातिभिः ॥ १९
क्षीबा इवान्ये चोन्मत्ता रङ्गेष्विव च चारणाः ।

उच्चक्रुशुस्तथान्योन्यं जघ्नुरन्योन्यमाहवे ॥ २०
वर्तमाने तथा युद्धे निर्मर्यादे विशां पते ।
धृष्टद्युम्नो हयानश्वैर्द्रोणस्य व्यत्यमिश्रयत् ॥ २१
ते हयाः साध्वशोभन्त विमिश्रा वातरंहसः ।
पारावतसवर्णाश्च रक्तशोणाश्च संयुगे ।
हयाः शुशुभिरे राजन्मेघा इव सविद्युतः ॥ २२
धृष्टद्युम्नश्च संप्रेक्ष्य द्रोणमभ्याशमागतम् ।
असिचर्मादिदे वीरो धनुरुत्सृज्य भारत ॥ २३
चिकीर्षुर्दुष्करं कर्म पार्षतः परवीरहा ।
ईषया समतिक्रम्य द्रोणस्य रथमाविशत् ॥ २४
अतिष्ठद्युगमध्ये स युगसंनहनेषु च ।
जघानार्धेषु चाश्वानां तत्सैन्यान्यभ्यपूजयन् ॥ २५
खड्गेन चरतस्तस्य शोणाश्वानधितिष्ठतः ।
न ददर्शान्तरं द्रोणस्तदद्भुतमिवाभवत् ॥ २६
यथा श्येनस्य पतनं वनेष्वामिषगृद्धिनः ।
तथैवासीदभीसारस्तस्य द्रोणं जिघांसतः ॥ २७
ततः शरशतेनास्य शतचन्द्रं समाक्षिपत् ।
द्रोणो द्रुपदपुत्रस्य खड्गं च दशभिः शरैः ॥ २८
हयांश्चैव चतुःषष्ट्या शराणां जघ्निवान्बली ।
ध्वजं छत्रं च भल्लाभ्यां तथोभौ पार्ष्णिसारथी ॥
अथास्मै त्वरितो बाणमपरं जीवितान्तकम् ।
आकर्णपूर्णं चिक्षेप वज्रं वज्रधरो यथा ॥ ३०
तं चतुर्दशभिर्बाणैर्बाणं चिच्छेद सात्यकिः ।
ग्रस्तमाचार्यमुख्येन धृष्टद्युम्नममोचयत् ॥ ३१
सिंहेनेव मृगं ग्रस्तं नरसिंहेन मारिष ।
द्रोणेन मोचयामास पाञ्चाल्यं शिनिपुंगवः ॥ ३२
सात्यकिं प्रेक्ष्य गोप्तारं पाञ्चाल्यस्य महाहवे ।
शराणां त्वरितो द्रोणः षड्विंशत्या समर्पयत् ॥ ३३
ततो द्रोणं शिनेः पौत्रो ग्रसन्तमिव सृञ्जयान् ।
प्रत्यविध्यच्छितैर्बाणैः षड्विंशत्या स्तनान्तरे ॥ ३४
ततः सर्वे रथास्तूर्णं पाञ्चाला जयगृद्धिनः ।
सात्वताभिसृते द्रोणे धृष्टद्युम्नममोचयन् ॥ ३५

इति श्रीमहाभारते द्रोणपर्वणि
द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

७३

धृतराष्ट्र उवाच ।

बाणे तस्मिन्निकृत्ते तु धृष्टद्युम्ने च मोक्षिते ।
तेन वृष्णिप्रवीरेण युयुधानेन संजय ॥ १
अमर्षितो महेष्वासः सर्वशस्त्रभृतां वरः ।
नरव्याघ्रः शिनेः पौत्रे द्रोणः किमकरोद्युधि ॥ २

संजय उवाच ।

संप्रद्रुतः क्रोधविषो व्यादितास्यशरासनः ।
तीक्ष्णधारेषुदशनः शितनाराचदंष्ट्रवान् ॥ ३
संरम्भामर्षताम्राक्षो महाहिरिव निःश्वसन् ।
नरवीरप्रमुदितैः शोणैरश्वैर्महाजवैः ॥ ४
उत्पतद्भिरिवाकाशं क्रमद्भिरिव सर्वतः ।
रुक्मपुङ्खाञ्शरानस्यन्युयुधानमुपाद्रवत् ॥ ५
शरपातमहावर्षं रथघोषबलाहकम् ।
कार्मुकाकर्षविक्षिप्तं नाराचबहुविद्युतम् ॥ ६
शक्तिखड्गाशनिधरं क्रोधवेगसमुत्थितम् ।
द्रोणमेघमनावार्यं हयमारुतचोदितम् ॥ ७
दृष्ट्वैवाभिपतन्तं तं शूरः परपुरंजयः ।
उवाच सूतं शैनेयः प्रहसन्युद्धदुर्मदः ॥ ८
एतं वै ब्राह्मणं क्रूरं स्वकर्मण्यनवस्थितम् ।
आश्रयं धार्तराष्ट्रस्य राज्ञो दुःखभयावहम् ॥ ९
शीघ्रं प्रजवितैरश्वैः प्रत्युद्याहि प्रहृष्टवत् ।
आचार्यं राजपुत्राणां सततं शूरमानिनम् ॥ १०
ततो रजतसंकाशा माधवस्य हयोत्तमाः ।
द्रोणस्याभिमुखाः शीघ्रमगच्छन्वातरंहसः ॥ ११
इषुजालावृतं घोरमन्धकारमनन्तरम् ।

अनाधृष्यमिवान्येषां शूराणामभवत्तदा ॥ १२
ततः शीघ्रास्त्रविदुषोर्द्रोणसात्वतयोस्तदा ।
नान्तरं शरवृष्टीनां दृश्यते नरसिंहयोः ॥ १३
इषूणां संनिपातेन शब्दो धाराभिघातजः ।
शुश्रुवे शक्रमुक्तानामशनीनामिव स्वनः ॥ १४
नाराचैरतिविद्धानां शराणां रूपमाबभौ ।
आशीविषविदष्टानां सर्पाणामिव भारत ॥ १५
तयोर्ज्यातलनिर्घोषो व्यश्रूयत सुदारुणः ।
अजस्रं शैलशृङ्गाणां वज्रेणाहन्यतामिव ॥ १६
उभयोस्तौ रथौ राजंस्ते चाश्वास्तौ च सारथी ।
रुक्मपुङ्खैः शरैश्छन्नाश्चित्ररूपा बभुस्तदा ॥ १७
निर्मलानामजिह्मानां नाराचानां विशां पते ।
निर्मुक्ताशीविषाभानां संपातोऽभूत्सुदारुणः ॥ १८
उभयोः पतिते छत्रे तथैव पतितौ ध्वजौ ।
उभौ रुधिरसिक्ताङ्गावुभौ च विजयैषिणौ ॥ १९
स्रवद्भिः शोणितं गात्रैः प्रस्रुताविव वारणौ ।
अन्योन्यमभिविध्येतां जीवितान्तकरैः शरैः ॥ २०
गर्जितोत्क्रुष्टसंनादाः शङ्खदुन्दुभिनिस्वनाः ।
उपारमन्महाराज व्याजहार न कश्चन ॥ २१
तूष्णींभूतान्यनीकानि योधा युद्धादुपारमन् ।
ददृशे द्वैरथं ताभ्यां जातकौतूहलो जनः ॥ २२
रथिनो हस्तियन्तारो हयारोहाः पदातयः ।
अवैक्षन्ताचलैर्नेत्रैः परिवार्य रथर्षभौ ॥ २३
हस्त्यनीकान्यतिष्ठन्त तथानीकानि वाजिनाम् ।
तथैव रथवाहिन्यः प्रतिव्यूह्य व्यवस्थिताः ॥ २४
मुक्ताविद्रुमचित्रैश्च मणिकाञ्चनभूषितैः ।
ध्वजैराभरणैश्चित्रैः कवचैश्च हिरण्मयैः ॥ २५
वैजयन्तीपताकाभिः परिस्तोमाङ्गकम्बलैः ।
विमलैर्निशितैः शस्त्रैर्हयानां च प्रकीर्णकैः ॥ २६
जातरूपमयीभिश्च राजतीभिश्च मूर्धसु ।
गजानां कुम्भमालाभिर्दन्तवेष्टैश्च भारत ॥ २७
सबलाकाः सखद्योताः सैरावतशतह्रदाः ।
अदृश्यन्तोष्णपर्याये मेघानामिव वागुराः ॥ २८
अपश्यन्नस्मदीयाश्च ते च यौधिष्ठिराः स्थिताः ।
तद्युद्धं युयुधानस्य द्रोणस्य च महात्मनः ॥ २९
विमानाग्रगता देवा ब्रह्मशक्रपुरोगमाः ।
सिद्धचारणसंघाश्च विद्याधरमहोरगाः ॥ ३०
गतप्रत्यागताक्षेपैश्चित्रैः शस्त्रविघातिभिः ।
विविधैर्विस्मयं जग्मुस्तयोः पुरुषसिंहयोः ॥ ३१
हस्तलाघवमस्त्रेषु दर्शयन्तौ महाबलौ ।
अन्योन्यं समविध्येतां शरैस्तौ द्रोणसात्यकी ॥ ३२
ततो द्रोणस्य दाशार्हः शरांश्चिच्छेद संयुगे ।
पत्रिभिः सुदृढैराशु धनुश्चैव महाद्युते ॥ ३३
निमेषान्तरमात्रेण भारद्वाजोऽपरं धनुः ।
सज्यं चकार तच्चाशु चिच्छेदास्य स सात्यकिः ॥ ३४
ततस्त्वरन्पुनर्द्रोणो धनुर्हस्तो व्यतिष्ठत ।
सज्यं सज्यं पुनश्चास्य चिच्छेद निशितैः शरैः ॥
ततोऽस्य संयुगे द्रोणो दृष्ट्वा कर्मातिमानुषम् ।
युयुधानस्य राजेन्द्र मनसेदमचिन्तयत् ॥ ३६
एतदस्त्रबलं रामे कार्तवीर्ये धनंजये ।
भीष्मे च पुरुषव्याघ्रे यदिदं सात्वतां वरे ॥ ३७
तं चास्य मनसा द्रोणः पूजयामास विक्रमम् ।
लाघवं वासवस्येव संप्रेक्ष्य द्विजसत्तमः ॥ ३८
तुतोषास्त्रविदां श्रेष्ठस्तथा देवाः सवासवाः ।
न तामालक्षयामासुर्लघुतां शीघ्रकारिणः ॥ ३९
देवाश्च युयुधानस्य गन्धर्वाश्च विशां पते ।
सिद्धचारणसंघाश्च विदुर्द्रोणस्य कर्म तत् ॥ ४०
ततोऽन्यद्धनुरादाय द्रोणः क्षत्रियमर्दनः ।
अस्त्रैरस्त्रविदां श्रेष्ठो योधयामास भारत ॥ ४१
तस्यास्त्राण्यस्त्रमायाभिः प्रतिहन्य स सात्यकिः ।

जघान निशितैर्बाणैस्तदद्भुतमिवाभवत् ॥ ४२
तस्यातिमानुषं कर्म दृष्ट्वान्यैरसमं रणे ।
युक्तं योगेन योगज्ञास्तावकाः समपूजयन् ॥ ४३
यदस्त्रमस्यति द्रोणस्तदेवास्यति सात्यकिः ।
तमाचार्योऽप्यसंभ्रान्तोऽयोधयच्छत्रुतापनः ॥ ४४
ततः क्रुद्धो महाराज धनुर्वेदस्य पारगः ।
वधाय युयुधानस्य दिव्यमस्त्रमुदैरयत् ॥ ४५
तदाग्नेयं महाघोरं रिपुघ्नमुपलक्ष्य सः ।
अस्त्रं दिव्यं महेष्वासो वारुणं समुदैरयत् ॥ ४६
हाहाकारो महानासीद्दृष्ट्वा दिव्यास्त्रधारिणौ ।
न विचेरुस्तदाकाशे भूतान्याकाशगान्यपि ॥ ४७
अस्त्रे ते वारुणाग्नेये ताभ्यां बाणसमाहिते ।
न तावदभिषज्येते व्यावर्तदथ भास्करः ॥ ४८
ततो युधिष्ठिरो राजा भीमसेनश्च पाण्डवः ।
नकुलः सहदेवश्च पर्यरक्षन्त सात्यकिम् ॥ ४९
धृष्टद्युम्नमुखैः सार्धं विराटश्च सकेकयः ।
मत्स्याः शाल्वेयसेनाश्च द्रोणमाजग्मुरञ्जसा ॥ ५०
दुःशासनं पुरस्कृत्य राजपुत्राः सहस्रशः ।
द्रोणमभ्युपपद्यन्त सपत्नैः परिवारितम् ॥ ५१
ततो युद्धमभूद्राजंस्तव तेषां च धन्विनाम् ।
रजसा संवृते लोके शरजालसमावृते ॥ ५२
सर्वमाविग्नमभवन्न प्राज्ञायत किंचन ।
सैन्येन रजसा ध्वस्ते निर्मर्यादमवर्तत ॥ ५३

इति श्रीमहाभारते द्रोणपर्वणि
त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

७४

संजय उवाच ।

परिवर्तमाने त्वादित्ये तत्र सूर्यस्य रश्मिभिः ।
रजसा कीर्यमाणाश्च मन्दीभूताश्च सैनिकाः ॥ १
तिष्ठतां युध्यमानानां पुनरावर्ततामपि ।
भज्यतां जयतां चैव जगाम तदहः शनैः ॥ २
तथा तेषु विषक्तेषु सैन्येषु जयगृद्धिषु ।
अर्जुनो वासुदेवश्च सैन्धवायैव जग्मतुः ॥ ३
रथमार्गप्रमाणं तु कौन्तेयो निशितैः शरैः ।
चकार तत्र पन्थानं ययौ येन जनार्दनः ॥ ४
यत्र यत्र रथो याति पाण्डवस्य महात्मनः ।
तत्र तत्रैव दीर्यन्ते सेनास्तव विशां पते ॥ ५
रथशिक्षां तु दाशार्हो दर्शयामास वीर्यवान् ।
उत्तमाधममध्यानि मण्डलानि विदर्शयन् ॥ ६
ते तु नामाङ्किताः पीताः कालज्वलनसंनिभाः ।
स्नायुनद्धाः सुपर्वाणः पृथवो दीर्घगामिनः ॥ ७
वैणवायसमयशराः स्वायता विविधाननाः ।
रुधिरं पतगैः सार्धं प्राणिनां पपुराहवे ॥ ८
रथस्थितः क्रोशमात्रे यानस्यत्यर्जुनः शरान् ।
रथे क्रोशमतिक्रान्ते तस्य ते घ्नन्ति शात्रवान् ॥ ९
तार्क्ष्यमारुतरंहोभिर्वाजिभिः साधुवाहिभिः ।
तथागच्छद्धृषीकेशः कृत्स्नं विस्मापयञ्जगत् ॥ १०
न तथा गच्छति रथस्तपनस्य विशां पते ।
नेन्द्रस्य न च रुद्रस्य नापि वैश्रवणस्य च ॥ ११
नान्यस्य समरे राजन्गतपूर्वस्तथा रथः ।
यथा ययावर्जुनस्य मनोभिप्रायशीघ्रगः ॥ १२
प्रविश्य तु रणे राजन्केशवः परवीरहा ।
सेनामध्ये हयांस्तूर्णं चोदयामास भारत ॥ १३
ततस्तस्य रथौघस्य मध्यं प्राप्य हयोत्तमाः ।
कृच्छ्रेण रथमूहुस्तं क्षुत्पिपासाश्रमान्विताः ॥ १४
क्षताश्च बहुभिः शस्त्रैर्युद्धशौण्डैरनेकशः ।
मण्डलानि विचित्राणि विचेरुस्ते मुहुर्मुहुः ॥ १५
हतानां वाजिनागानां रथानां च नरैः सह ।
उपरिष्टादतिक्रान्ताः शैलाभानां सहस्रशः ॥ १६
एतस्मिन्नन्तरे वीरावावन्त्यौ भ्रातरौ नृप ।

सहसेनौ समार्छेतां पाण्डवं क्लान्तवाहनम् ॥ १७
तावर्जुनं चतुःषष्ट्या सप्तत्या च जनार्दनम् ।
शराणां च शतेनाश्वानविध्येतां मुदान्वितौ ॥ १८
तावर्जुनो महाराज नवभिर्नतपर्वभिः ।
आजघान रणे क्रुद्धो मर्मज्ञो मर्मभेदिभिः ॥ १९
ततस्तौ तु शरौघेण बीभत्सुं सहकेशवम् ।
आच्छादयेतां संरब्धौ सिंहनादं च नेदतुः ॥ २०
तयोस्तु धनुषी चित्रे भल्लाभ्यां श्वेतवाहनः ।
चिच्छेद समरे तूर्णं ध्वजौ च कनकोज्ज्वलौ ॥ २१
अथान्ये धनुषी राजन्प्रगृह्य समरे तदा ।
पाण्डवं भृशसंक्रुद्धावर्दयामासतुः शरैः ॥ २२
तयोस्तु भृशसंक्रुद्धः शराभ्यां पाण्डुनन्दनः ।
चिच्छेद धनुषी तूर्णं भूय एव धनंजयः ॥ २३
तथान्यैर्विशिखैस्तूर्णं हेमपुङ्खैः शिलाशितैः ।
जघानाश्वान्सपदातांस्तथोभौ पार्ष्णिसारथी ॥ २४
ज्येष्ठस्य च शिरः कायात्क्षुरप्रेण न्यकृन्तत ।
स पपात हतः पृथ्व्यां वातरुग्ण इव द्रुमः ॥ २५
विन्दं तु निहतं दृष्ट्वा अनुविन्दः प्रतापवान् ।
हताश्वं रथमुत्सृज्य गदां गृह्य महाबलः ॥ २६
अभ्यद्रवत संग्रामे भ्रातुर्वधमनुस्मरन् ।
गदया गदिनां श्रेष्ठो नृत्यन्निव महारथः ॥ २७
अनुविन्दस्तु गदया ललाटे मधुसूदनम् ।
स्पृष्ट्वा नाकम्पयत्क्रुद्धो मैनाकमिव पर्वतम् ॥ २८
तस्यार्जुनः शरैः षड्भिर्ग्रीवां पादौ भुजौ शिरः ।
निचकर्त स संछिन्नः पपाताद्रिचयो यथा ॥ २९
ततस्तौ निहतौ दृष्ट्वा तयो राजन्पदानुगाः ।
अभ्यद्रवन्त संक्रुद्धाः किरन्तः शतशः शरान् ॥ ३०
तानर्जुनः शरैस्तूर्णं निहत्य भरतर्षभ ।
व्यरोचत यथा वह्निर्दावं दग्ध्वा हिमात्यये ॥ ३१
तयोः सेनामतिक्रम्य कृच्छ्रान्निर्याद्धनंजयः ।
विबभौ जलदान्भित्त्वा दिवाकर इवोदितः ॥ ३२
तं दृष्ट्वा कुरवस्त्रस्ताः प्रहृष्टाश्चाभवन्पुनः ।
अभ्यवर्षंस्तदा पार्थं समन्ताद्भरतर्षभ ॥ ३३
श्रान्तं चैनं समालक्ष्य ज्ञात्वा दूरे च सैन्धवम् ।
सिंहनादेन महता सर्वतः पर्यवारयन् ॥ ३४
तांस्तु दृष्ट्वा सुसंरब्धानुत्स्मयन्पुरुषर्षभः ।
शनकैरिव दाशार्हमर्जुनो वाक्यमब्रवीत् ॥ ३५
शरार्दिताश्च ग्लानाश्च हया दूरे च सैन्धवः ।
किमिहानन्तरं कार्यं ज्यायिष्ठं तव रोचते ॥ ३६
ब्रूहि कृष्ण यथातत्त्वं त्वं हि प्राज्ञतमः सदा ।
भवन्नेत्रा रणे शत्रून्विजेष्यन्तीह पाण्डवाः ॥ ३७
मम त्वनन्तरं कृत्यं यद्वै तत्संनिबोध मे ।
हयान्विमुच्य हि सुखं विशल्यान्कुरु माधव ॥ ३८
एवमुक्तस्तु पार्थेन केशवः प्रत्युवाच तम् ।
ममाप्येतन्मतं पार्थ यदिदं ते प्रभाषितम् ॥ ३९

अर्जुन उवाच ।

अहमावारयिष्यामि सर्वसैन्यानि केशव ।
त्वमप्यत्र यथान्यायं कुरु कार्यमनन्तरम् ॥ ४०

संजय उवाच ।

सोऽवतीर्य रथोपस्थादसंभ्रान्तो धनंजयः ।
गाण्डीवं धनुरादाय तस्थौ गिरिरिवाचलः ॥ ४१
तमभ्यधावन्क्रोशन्तः क्षत्रिया जयकाङ्क्षिणः ।
इदं छिद्रमिति ज्ञात्वा धरणीस्थं धनंजयम् ॥ ४२
तमेकं रथवंशेन महता पर्यवारयन् ।
विकर्षन्तश्च चापानि विसृजन्तश्च सायकान् ॥ ४३
अस्त्राणि च विचित्राणि क्रुद्धास्तत्र व्यदर्शयन् ।
छादयन्तः शरैः पार्थं मेघा इव दिवाकरम् ॥ ४४
अभ्यद्रवन्त वेगेन क्षत्रियाः क्षत्रियर्षभम् ।
रथसिंहं रथोदाराः सिंहं मत्ता इव द्विपाः ॥ ४५
तत्र पार्थस्य भुजयोर्महद्बलमदृश्यत ।

यत्क्रुद्धो बहुलाः सेनाः सर्वतः समवारयत् ॥ ४६
अस्त्रैरस्त्राणि संवार्य द्विषतां सर्वतो विभुः ।
इषुभिर्बहुभिस्तूर्णं सर्वानेव समावृणोत् ॥ ४७
तत्रान्तरिक्षे बाणानां प्रगाढानां विशां पते ।
संघर्षेण महार्चिष्मान्पावकः समजायत ॥ ४८
तत्र तत्र महेष्वासैः श्वसद्भिः शोणितोक्षितैः ।
हयैर्नागैश्च संभिन्नैर्नदद्भिश्चारिकर्शनैः ॥ ४९
संरब्धैश्चारिभिर्वीरैः प्रार्थयद्भिर्जयं मृधे ।
एकस्थैर्बहुभिः क्रुद्धैरूष्मेव समजायत ॥ ५०
शरोर्मिणं ध्वजावर्तं नागनक्रं दुरत्ययम् ।
पदातिमत्स्यकलिलं शङ्खदुन्दुभिनिस्वनम् ॥ ५१
असंख्येयमपारं च रजोऽऽभीलमतीव च ।
उष्णीषकमठच्छन्नं पताकाफेनमालिनम् ॥ ५२
रथसागरमक्षोभ्यं मातङ्गाङ्गशिलाचितम् ।
वेलाभूतस्तदा पार्थः पत्रिभिः समवारयत् ॥ ५३
ततो जनार्दनः संख्ये प्रियं पुरुषसत्तमम् ।
असंभ्रान्तो महाबाहुरर्जुनं वाक्यमब्रवीत् ॥ ५४
उदपानमिहाश्वानां नालमस्ति रणेऽर्जुन ।
परीप्सन्ते जलं चेमे पेयं न त्ववगाहनम् ॥ ५५
इदमस्तीत्यसंभ्रान्तो ब्रुवन्नस्त्रेण मेदिनीम् ।
अभिहत्यार्जुनश्चक्रे वाजिपानं सरः शुभम् ॥ ५६
शरवंशं शरस्थूणं शराच्छादनमद्भुतम् ।
शरवेश्माकरोत्पार्थस्त्वष्टेवाद्भुतकर्मकृत् ॥ ५७
ततः प्रहस्य गोविन्दः साधु साध्वित्यथाब्रवीत् ।
शरवेश्मनि पार्थेन कृते तस्मिन्महारणे ॥ ५८

इति श्रीमहाभारते द्रोणपर्वणि
चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

७५

संजय उवाच ।

सलिले जनिते तस्मिन्कौन्तेयेन महात्मना ।
निवारिते द्विषत्सैन्ये कृते च शरवेश्मनि ॥ १
वासुदेवो रथात्तूर्णमवतीर्य महाद्युतिः ।
मोचयामास तुरगान्वितुन्नान्कङ्कपत्रिभिः ॥ २
अदृष्टपूर्वं तद्दृष्ट्वा सिंहनादो महानभूत् ।
सिद्धचारणसंघानां सैनिकानां च सर्वशः ॥ ३
पदातिनं तु कौन्तेयं युध्यमानं नरर्षभाः ।
नाशक्नुवन्वारयितुं तदद्भुतमिवाभवत् ॥ ४
आपतत्सु रथौघेषु प्रभूतगजवाजिषु ।
नासंभ्रमत्तदा पार्थस्तदस्य पुरुषानति ॥ ५
व्यसृजन्त शरौघांस्ते पाण्डवं प्रति पार्थिवाः ।
न चाव्यथत धर्मात्मा वासविः परवीरहा ॥ ६
स तानि शरजालानि गदाः प्रासांश्च वीर्यवान् ।
आगतानग्रसत्पार्थः सरितः सागरो यथा ॥ ७
अस्त्रवेगेन महता पार्थो बाहुबलेन च ।
सर्वेषां पार्थिवेन्द्राणामग्रसत्ताञ्शरोत्तमान् ॥ ८
तत्तु पार्थस्य विक्रान्तं वासुदेवस्य चोभयोः ।
अपूजयन्महाराज कौरवाः परमाद्भुतम् ॥ ९
किमद्भुततरं लोके भविताप्यथ वाप्यभूत् ।
यदश्वान्पार्थगोविन्दौ मोचयामासतू रणे ॥ १०
भयं विपुलमस्मासु तावधत्तां नरोत्तमौ ।
तेजो विदधतुश्चोग्रं विस्रब्धौ रणमूर्धनि ॥ ११
अथोत्स्मयन्हृषीकेशः स्त्रीमध्य इव भारत ।
अर्जुनेन कृते संख्ये शरगर्भगृहे तदा ॥ १२
उपावर्तयदव्यग्रस्तानश्वान्पुष्करेक्षणः ।
मिषतां सर्वसैन्यानां त्वदीयानां विशां पते ॥ १३
तेषां श्रमं च ग्लानिं च वेपथुं वमथुं व्रणान् ।
सर्वं व्यपानुदत्कृष्णः कुशलो ह्यश्वकर्मणि ॥ १४
शल्यानुद्धृत्य पाणिभ्यां परिमृज्य च तान्हयान् ।
उपावृत्य यथान्यायं पाययामास वारि सः ॥ १५
स ताँल्लब्धोदकान्स्नाताञ्जग्धान्नान्विगतक्लमान् ।

योजयामास संहृष्टः पुनरेव रथोत्तमे ॥ १६
स तं रथवरं शौरिः सर्वशस्त्रभृतां वरः ।
समास्थाय महातेजाः सार्जुनः प्रययौ द्रुतम् ॥ १७
रथं रथवरस्याजौ युक्तं लब्धोदकैर्हयैः ।
दृष्ट्वा कुरुबलश्रेष्ठाः पुनर्विमनसोऽभवन् ॥ १८
विनिःश्वसन्तस्ते राजन्भग्नदंष्ट्रा इवोरगाः ।
धिगहो धिग्गतः पार्थः कृष्णश्चेत्यब्रुवन्पृथक् ॥१९
सर्वक्षत्रस्य मिषतो रथेनैकेन दंशितौ ।
बालक्रीडनकेनेव कदर्थीकृत्य नो बलम् ॥ २०
क्रोशतां यतमानानामसंसक्तौ परंतपौ ।
दर्शयित्वात्मनो वीर्यं प्रयातौ सर्वराजसु ॥ २१
तौ प्रयातौ पुनर्दृष्ट्वा तदान्ये सैनिकाब्रुवन् ।
त्वरध्वं कुरवः सर्वे वधे कृष्णकिरीटिनोः ॥ २२
रथं युक्त्वा हि दाशार्हो मिषतां सर्वधन्विनाम् ।
जयद्रथाय यात्येष कदर्थीकृत्य नो रणे ॥ २३
तत्र केचिन्मिथो राजन्समभाषन्त भूमिपाः ।
अदृष्टपूर्वं संग्रामे तद्दृष्ट्वा महदद्भुतम् ॥ २४
सर्वसैन्यानि राजा च धृतराष्ट्रोऽत्ययं गतः ।
दुर्योधनापराधेन क्षत्रं कृत्स्ना च मेदिनी ॥ २५
विलयं समनुप्राप्ता तच्च राजा न बुध्यते ।
इत्येवं क्षत्रियास्तत्र ब्रुवन्त्यन्ये च भारत ॥ २६
सिन्धुराजस्य यत्कृत्यं गतस्य यमसादनम् ।
तत्करोतु वृथादृष्टिर्धार्तराष्ट्रोऽनुपायवित् ॥ २७
ततः शीघ्रतरं प्रायात्पाण्डवः सैन्धवं प्रति ।
निवर्तमाने तिग्मांशौ हृष्टैः पीतोदकैर्हयैः ॥ २८
तं प्रयान्तं महाबाहुं सर्वशस्त्रभृतां वरम् ।
नाशक्नुवन्वारयितुं योधाः क्रुद्धमिवान्तकम् ॥ २९
विद्राव्य तु ततः सैन्यं पाण्डवः शत्रुतापनः ।
यथा मृगगणान्सिंहः सैन्धवार्थे व्यलोडयत् ॥ ३०
गाहमानस्त्वनीकानि तूर्णमश्वानचोदयत् ।
बलाकवर्णान्दाशार्हः पाञ्चजन्यं व्यनादयत् ॥ ३१
कौन्तेयेनाग्रतः सृष्टा न्यपतन्पृष्ठतः शराः ।
तूर्णात्तूर्णतरं ह्यश्वास्तेऽवहन्वातरंहसः ॥ ३२
वातोद्धूतपताकान्तं रथं जलदनिस्वनम् ।
घोरं कपिध्वजं दृष्ट्वा विषण्णा रथिनोऽभवन् ॥ ३३
दिवाकरेऽथ रजसा सर्वतः संवृते भृशम् ।
शरार्ताश्च रणे योधा न कृष्णौ शेकुरीक्षितुम् ॥३४
ततो नृपतयः क्रुद्धाः परिवव्रुर्धनंजयम् ।
क्षत्रिया बहवश्चान्ये जयद्रथवधैषिणम् ॥ ३५
अपनीयत्सु शल्येषु धिष्ठितं पुरुषर्षभम् ।
दुर्योधनस्त्वगात्पार्थं त्वरमाणो महाहवे ॥ ३६

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

७६

संजय उवाच ।

स्रंसन्त इव मज्जानस्तावकानां भयान्नृप ।
तौ दृष्ट्वा समतिक्रान्तौ वासुदेवधनंजयौ ॥ १
सर्वे तु प्रतिसंरब्धा ह्रीमन्तः सत्त्वचोदिताः ।
स्थिरीभूता महात्मानः प्रत्यगच्छन्धनंजयम् ॥ २
ये गताः पाण्डवं युद्धे क्रोधामर्षसमन्विताः ।
तेऽद्यापि न निवर्तन्ते सिन्धवः सागरादिव ॥ ३
असन्तस्तु न्यवर्तन्त वेदेभ्य इव नास्तिकाः ।
नरकं भजमानास्ते प्रत्यपद्यन्त किल्बिषम् ॥ ४
तावतीत्य रथानीकं विमुक्तौ पुरुषर्षभौ ।
ददृशाते यथा राहोरास्यान्मुक्तौ प्रभाकरौ ॥ ५
मत्स्याविव महाजालं विदार्य विगतज्वरौ ।
तथा कृष्णावदृश्येतां सेनाजालं विदार्य तत् ॥ ६
विमुक्तौ शस्त्रसंबाधाद्द्रोणानीकात्सुदुर्भिदात् ।
अदृश्येतां महात्मानौ कालसूर्याविवोदितौ ॥ ७
अस्त्रसंबाधनिर्मुक्तौ विमुक्तौ शस्त्रसंकटात् ।

अदृश्येतां महात्मानौ शत्रुसंबाधकारिणौ ॥ ८
विमुक्तौ ज्वलनस्पर्शान्मकरास्याज्झषाविव ।
व्यक्षोभयेतां सेनां तौ समुद्रं मकराविव ॥ ९
तावकास्तव पुत्राश्च द्रोणानीकस्थयोस्तयोः ।
नैतौ तरिष्यतो द्रोणमिति चक्रुस्तदा मतिम् ॥ १०
तौ तु दृष्ट्वा व्यतिक्रान्तौ द्रोणानीकं महाद्युती ।
नाशशंसुर्महाराज सिन्धुराजस्य जीवितम् ॥ ११
आशा बलवती राजन्पुत्राणामभवत्तव ।
द्रोणहार्दिक्ययोः कृष्णौ न मोक्ष्येते इति प्रभो ॥
तामाशां विफलां कृत्वा निस्तीर्णौ तौ परंतपौ ।
द्रोणानीकं महाराज भोजानीकं च दुस्तरम् ॥ १३
अथ दृष्ट्वा व्यतिक्रान्तौ ज्वलिताविव पावकौ ।
निराशाः सिन्धुराजस्य जीवितं नाशशंसिरे ॥ १४
मिथश्च समभाषेतामभीतौ भयवर्धनौ ।
जयद्रथवधे वाचस्तास्ताः कृष्णधनंजयौ ॥ १५
असौ मध्ये कृतः षड्भिर्धार्तराष्ट्रैर्महारथैः ।
चक्षुर्विषयसंप्राप्तो न नौ मोक्ष्यति सैन्धवः ॥ १६
यद्यस्य समरे गोप्ता शक्रो देवगणैः सह ।
तथाप्येनं हनिष्याव इति कृष्णावभाषताम् ॥ १७
इति कृष्णौ महाबाहू मिथः कथयतां तदा ।
सिन्धुराजमवेक्षन्तौ तत्पुत्रास्तव शुश्रुवुः ॥ १८
अतीत्य मरुधन्वेव प्रयान्तौ तृषितौ गजौ ।
पीत्वा वारि समाश्वस्तौ तथैवास्तामरिंदमौ ॥ १९
व्याघ्रसिंहगजाकीर्णानतिक्रम्येव पर्वतान् ।
अदृश्येतां महाबाहू यथा मृत्युजरातिगौ ॥ २०
तथा हि मुखवर्णोऽयमनयोरिति मेनिरे ।
तावका दृश्य मुक्तौ तौ विक्रोशन्ति स्म सर्वतः ॥
द्रोणादाशीविषाकाराज्ज्वलितादिव पावकात् ।
अन्येभ्यः पार्थिवेभ्यश्च भास्वन्ताविव भास्करौ ॥२२
तौ मुक्तौ सागरप्रख्याद्द्रोणानीकादरिंदमौ ।
अदृश्येतां मुदा युक्तौ समुत्तीर्यार्णवं यथा ॥ २३
शस्त्रौघान्महतो मुक्तौ द्रोणहार्दिक्यरक्षितान् ।
रोचमानावदृश्येतामिन्द्राग्न्योः सदृशौ रणे ॥ २४
उद्भिन्नरुधिरौ कृष्णौ भारद्वाजस्य सायकैः ।
शितैश्चितौ व्यरोचेतां कर्णिकारैरिवाचलौ ॥ २५
द्रोणग्राहह्रदान्मुक्तौ शक्त्याशीविषसंकटात् ।
अयःशरोग्रमकरात्क्षत्रियप्रवराम्भसः ॥ २६
ज्याघोषतलनिर्ह्रादाद्गदानिस्त्रिंशविद्युतः ।
द्रोणास्त्रमेघान्निर्मुक्तौ सूर्येन्दू तिमिरादिव ॥ २७
बाहुभ्यामिव संतीर्णौ सिन्धुषष्ठाः समुद्रगाः ।
तपान्ते सरितः पूर्णा महाग्राहसमाकुलाः ॥ २८
इति कृष्णौ महेष्वासौ यशसा लोकविश्रुतौ ।
सर्वभूतान्यमन्यन्त द्रोणास्त्रबलविस्मयात् ॥ २९
जयद्रथं समीपस्थमवेक्षन्तौ जिघांसया ।
रुरुं निपाने लिप्सन्तौ व्याघ्रवत्तावतिष्ठताम् ॥ ३०
यथा हि मुखवर्णोऽयमनयोरिति मेनिरे ।
तव योधा महाराज हतमेव जयद्रथम् ॥ ३१
लोहिताक्षौ महाबाहू संयत्तौ कृष्णपाण्डवौ ।
सिन्धुराजमभिप्रेक्ष्य हृष्टौ व्यनदतां मुहुः ॥ ३२
शौरेरभीशुहस्तस्य पार्थस्य च धनुष्मतः ।
तयोरासीत्प्रतिभ्राजः सूर्यपावकयोरिव ॥ ३३
हर्ष एव तयोरासीद्द्रोणानीकप्रमुक्तयोः ।
समीपे सैन्धवं दृष्ट्वा श्येनयोरामिषं यथा ॥ ३४
तौ तु सैन्धवमालोक्य वर्तमानमिवान्तिके ।
सहसा पेततुः क्रुद्धौ क्षिप्रं श्येनाविवामिषे ॥ ३५
तौ तु दृष्ट्वा व्यतिक्रान्तौ हृषीकेशधनंजयौ ।
सिन्धुराजस्य रक्षार्थं पराक्रान्तः सुतस्तव ॥ ३६
द्रोणेनाबद्धकवचो राजा दुर्योधनस्तदा ।
ययावेकरथेनाजौ हयसंस्कारवित्प्रभो ॥ ३७
कृष्णपार्थौ महेष्वासौ व्यतिक्रम्याथ ते सुतः ।

अग्रतः पुण्डरीकाक्षं प्रतीयाय नराधिप ॥ ३८
ततः सर्वेषु सैन्येषु वादित्राणि प्रहृष्टवत् ।
प्रावाद्यन्समतिक्रान्ते तव पुत्रे धनंजयम् ॥ ३९
सिंहनादरवाश्चासञ्शङ्खदुन्दुभिमिश्रिताः ।
दृष्ट्वा दुर्योधनं तत्र कृष्णयोः प्रमुखे स्थितम् ॥ ४०
ये च ते सिन्धुराजस्य गोप्तारः पावकोपमाः ।
ते प्रहृष्यन्त समरे दृष्ट्वा पुत्रं तवाभिभो ॥ ४१
दृष्ट्वा दुर्योधनं कृष्णस्त्वतिक्रान्तं सहानुगम् ।
अब्रवीदर्जुनं राजन्प्राप्तकालमिदं वचः ॥ ४२

इति श्रीमहाभारते द्रोणपर्वणि
षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

७७

वासुदेव उवाच ।

सुयोधनमतिक्रान्तमेनं पश्य धनंजय ।
आपद्गतमिमं मन्ये नास्त्यस्य सदृशो रथः ॥ १
दूरपाती महेष्वासः कृतास्त्रो युद्धदुर्मदः ।
दृढास्त्रश्चित्रयोधी च धार्तराष्ट्रो महाबलः ॥ २
अत्यन्तसुखसंवृद्धो मानितश्च महारथैः ।
कृती च सततं पार्थ नित्यं द्वेष्टि च पाण्डवान् ॥ ३
तेन युद्धमहं मन्ये प्राप्तकालं तवानघ ।
अत्र वो द्यूतमायातं विजयायेतराय वा ॥ ४
अत्र क्रोधविषं पार्थ विमुञ्च चिरसंभृतम् ।
एष मूलमनर्थानां पाण्डवानां महारथः ॥ ५
सोऽयं प्राप्तस्तवाक्षेपं पश्य साफल्यमात्मनः ।
कथं हि राजा राज्यार्थी त्वया गच्छेत संयुगम् ॥६
दिष्ट्या त्विदानीं संप्राप्त एष ते बाणगोचरम् ।
स यथा जीवितं जह्यात्तथा कुरु धनंजय ॥ ७
ऐश्वर्यमदसंमूढो नैष दुःखमुपेयिवान् ।
न च ते संयुगे वीर्यं जानाति पुरुषर्षभ ॥ ८
त्वां हि लोकास्त्रयः पार्थ ससुरासुरमानुषाः ।
नोत्सहन्ते रणे जेतुं किमुतैकः सुयोधनः ॥ ९
स दिष्ट्या समनुप्राप्तस्तव पार्थ रथान्तिकम् ।
जह्येनं वै महाबाहो यथा वृत्रं पुरंदरः ॥ १०
एष ह्यनर्थे सततं पराक्रान्तस्तवानघ ।
निकृत्या धर्मराजं च द्यूते वञ्चितवानयम् ॥ ११
बहूनि सुनृशंसानि कृतान्येतेन मानद ।
युष्मासु पापमतिना अपापेष्वेव नित्यदा ॥ १२
तमनार्यं सदा क्षुद्रं पुरुषं कामचारिणम् ।
आर्यां युद्धे मतिं कृत्वा जहि पार्थाविचारयन् ॥
निकृत्या राज्यहरणं वनवासं च पाण्डव ।
परिक्लेशं च कृष्णाया हृदि कृत्वा पराक्रम ॥ १४
दिष्ट्यैष तव बाणानां गोचरे परिवर्तते ।
प्रतिघाताय कार्यस्य दिष्ट्या च यततेऽग्रतः ॥ १५
दिष्ट्या जानाति संग्रामे योद्धव्यं हि त्वया सह ।
दिष्ट्या च सफलाः पार्थ सर्वे कामा हि कामिताः ॥
तस्माज्जहि रणे पार्थ धार्तराष्ट्रं कुलाधमम् ।
यथेन्द्रेण हतः पूर्वं जम्भो देवासुरे मृधे ॥ १७
अस्मिन्हते त्वया सैन्यमनाथं भिद्यतामिदम् ।
वैरस्यास्यास्त्ववभृथो मूलं छिन्धि दुरात्मनाम् ॥१८

संजय उवाच ।

तं तथेत्यब्रवीत्पार्थः कृत्यरूपमिदं मम ।
सर्वमन्यदनादृत्य गच्छ यत्र सुयोधनः ॥ १९
येनैतद्दीर्घकालं नो भुक्तं राज्यमकण्टकम् ।
अप्यस्य युधि विक्रम्य छिन्द्यां मूर्धानमाहवे ॥ २०
अपि तस्या अनर्हायाः परिक्लेशस्य माधव ।
कृष्णायाः शक्नुयां गन्तुं पदं केशप्रधर्षणे ॥ २१
इत्येवंवादिनौ हृष्टौ कृष्णौ श्वेतान्हयोत्तमान् ।
प्रेषयामासतुः संख्ये प्रेप्सन्तौ तं नराधिपम् ॥२२
तयोः समीपं संप्राप्य पुत्रस्ते भरतर्षभ ।
न चकार भयं प्राप्ते भये महति मारिष ॥ २३

तदस्य क्षत्रियास्तत्र सर्व एवाभ्यपूजयन् ।
यदर्जुनहृषीकेशौ प्रत्युद्यातोऽविचारयन् ॥ २४
ततः सर्वस्य सैन्यस्य तावकस्य विशां पते ।
महान्नादो ह्यभूत्तत्र दृष्ट्वा राजानमाहवे ॥ २५
तस्मिञ्जनसमुन्नादे प्रवृत्ते भैरवे सति ।
कदर्थीकृत्य ते पुत्रः प्रत्यमित्रमवारयत् ॥ २६
आवारितस्तु कौन्तेयस्तव पुत्रेण धन्विना ।
संरम्भमगमद्भूयः स च तस्मिन्परंतपः ॥ २७
तौ दृष्ट्वा प्रतिसंरब्धौ दुर्योधनधनंजयौ ।
अभ्यवैक्षन्त राजानो भीमरूपाः समन्ततः ॥ २८
दृष्ट्वा तु पार्थं संरब्धं वासुदेवं च मारिष ।
प्रहसन्निव पुत्रस्ते योद्धुकामः समाह्वयत् ॥ २९
ततः प्रहृष्टो दाशार्हः पाण्डवश्च धनंजयः ।
व्याक्रोशेतां महानादं दध्मतुश्चाम्बुजोत्तमौ ॥ ३०
तौ हृष्टरूपौ संप्रेक्ष्य कौरवेयाश्च सर्वशः ।
निराशाः समपद्यन्त पुत्रस्य तव जीविते ॥ ३१
शोकमीयुः परं चैव कुरवः सर्व एव ते ।
अमन्यन्त च पुत्रं ते वैश्वानरमुखे हुतम् ॥ ३२
तथा तु दृष्ट्वा योधास्ते प्रहृष्टौ कृष्णपाण्डवौ ।
हतो राजा हतो राजेत्यूचुरेवं भयार्दिताः ॥ ३३
जनस्य संनिनादं तु श्रुत्वा दुर्योधनोऽब्रवीत् ।
व्येतु वो भीरहं कृष्णौ प्रेषयिष्यामि मृत्यवे ॥ ३४
इत्युक्त्वा सैनिकान्सर्वाञ्जयापेक्षी नराधिपः ।
पार्थमाभाष्य संरम्भादिदं वचनमब्रवीत् ॥ ३५
पार्थ यच्छिक्षितं तेऽस्त्रं दिव्यं मानुषमेव च ।
तद्दर्शय मयि क्षिप्रं यदि जातोऽसि पाण्डुना ॥ ३६
यद्बलं तव वीर्यं च केशवस्य तथैव च ।
तत्कुरुष्व मयि क्षिप्रं पश्यामस्तव पौरुषम् ॥ ३७
अस्मत्परोक्षं कर्माणि प्रवदन्ति कृतानि ते ।
स्वामिसत्कारयुक्तानि यानि तानीह दर्शय ॥ ३८

इति श्रीमहाभारते द्रोणपर्वणि
सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

७८

संजय उवाच ।

एवमुक्त्वार्जुनं राजा त्रिभिर्मर्मातिगैः शरैः ।
प्रत्यविध्यन्महावेगैश्चतुर्भिश्चतुरो हयान् ॥ १
वासुदेवं च दशभिः प्रत्यविध्यत्स्तनान्तरे ।
प्रतोदं चास्य भल्लेन छित्त्वा भूमावपातयत् ॥ २
तं चतुर्दशभिः पार्थश्चित्रपुङ्खैः शिलाशितैः ।
अविध्यत्तूर्णमव्यग्रस्तेऽस्याभ्रश्यन्त वर्मणः ॥ ३
तेषां वैफल्यमालोक्य पुनर्नव च पञ्च च ।
प्राहिणोन्निशितान्बाणांस्ते चाभ्रश्यन्त वर्मणः ॥ ४
अष्टाविंशत्तु तान्बाणानस्तान्विप्रेक्ष्य निष्फलान् ।
अब्रवीत्परवीरघ्नः कृष्णोऽर्जुनमिदं वचः ॥ ५
अदृष्टपूर्वं पश्यामि शिलानामिव सर्पणम् ।
त्वया संप्रेषिताः पार्थ नार्थं कुर्वन्ति पत्रिणः ॥ ६
कच्चिद्गाण्डीवतः प्राणास्तथैव भरतर्षभ ।
मुष्टिश्च ते यथापूर्वं भुजयोश्च बलं तव ॥ ७
न चेद्विधेरयं कालः प्राप्तः स्यादद्य पश्चिमः ।
तव चैवास्य शत्रोश्च तन्ममाचक्ष्व पृच्छतः ॥ ८
विस्मयो मे महान्पार्थ तव दृष्ट्वा शरानिमान् ।
व्यर्थान्निपततः संख्ये दुर्योधनरथं प्रति ॥ ९
वज्राशनिसमा घोराः परकायावभेदिनः ।
शराः कुर्वन्ति ते नार्थं पार्थ काद्य विडम्बना ॥ १०

अर्जुन उवाच ।

द्रोणेनैषा मतिः कृष्ण धार्तराष्ट्रे निवेशिता ।
अन्ते विहितमस्त्राणामेतत्कवचधारणम् ॥ ११
अस्मिन्नन्तर्हितं कृष्ण त्रैलोक्यमपि वर्मणि ।
एको द्रोणो हि वेदैतदहं तस्माच्च सत्तमात् ॥ १२

न शक्यमेतत्कवचं बाणैर्भेत्तुं कथंचन ।
अपि वज्रेण गोविन्द स्वयं मघवता युधि ॥ १३
जानंस्त्वमपि वै कृष्ण मां विमोहयसे कथम् ।
यद्वृत्तं त्रिषु लोकेषु यच्च केशव वर्तते ॥ १४
तथा भविष्यद्यच्चैव तत्सर्वं विदितं तव ।
न त्वेवं वेद वै कश्चिद्यथा त्वं मधुसूदन ॥ १५
एष दुर्योधनः कृष्ण द्रोणेन विहितामिमाम् ।
तिष्ठत्यभीतवत्संख्ये बिभ्रत्कवचधारणाम् ॥ १६
यत्त्वत्र विहितं कार्यं नैष तद्वेत्ति माधव ।
स्त्रीवदेष बिभर्त्येतां युक्तां कवचधारणाम् ॥ १७
पश्य बाह्वोश्च मे वीर्यं धनुषश्च जनार्दन ।
पराजयिष्ये कौरव्यं कवचेनापि रक्षितम् ॥ १८
इदमङ्गिरसे प्रादाद्देवेशो वर्म भास्वरम् ।
पुनर्ददौ सुरपतिर्मह्यं वर्म ससंग्रहम् ॥ १९
दैवं यद्यस्य वर्मैतद्ब्रह्मणा वा स्वयं कृतम् ।
नैतद्गोप्स्यति दुर्बुद्धिमद्य बाणहतं मया ॥ २०

संजय उवाच ।

एवमुक्त्वार्जुनो बाणानभिमन्त्र्य व्यकर्षयत् ।
विकृष्यमाणांस्तेनैवं धनुर्मध्यगताञ्शरान् ।
तानस्यास्त्रेण चिच्छेद द्रौणिः सर्वास्त्रघातिना ॥२१
तान्निकृत्तानिषून्दृष्ट्वा दूरतो ब्रह्मवादिना ।
न्यवेदयत्केशवाय विस्मितः श्वेतवाहनः ॥ २२
नैतदस्त्रं मया शक्यं द्विः प्रयोक्तुं जनार्दन ।
अस्त्रं मामेव हन्याद्धि पश्य त्वद्य बलं मम ॥ २३
ततो दुर्योधनः कृष्णौ नवभिर्नतपर्वभिः ।
अविध्यत रणे राजञ्शरैराशीविषोपमैः ।
भूय एवाभ्यवर्षच्च समरे कृष्णपाण्डवौ ॥ २४
शरवर्षेण महता ततोऽहृष्यन्त तावकाः ।
चक्रुर्वादित्रनिनदान्सिंहनादरवांस्तथा ॥ २५
ततः क्रुद्धो रणे पार्थः सृक्कणी परिसंलिहन् ।
नापश्यत ततोऽस्याङ्गं यन्न स्याद्वर्मरक्षितम् ॥ २६
ततोऽस्य निशितैर्बाणैः सुमुक्तैरन्तकोपमैः ।
हयांश्चकार निर्देहानुभौ च पार्ष्णिसारथी ॥ २७
धनुरस्याच्छिनच्चित्रं हस्तावापं च वीर्यवान् ।
रथं च शकलीकर्तुं सव्यसाची प्रचक्रमे ॥ २८
दुर्योधनं च बाणाभ्यां तीक्ष्णाभ्यां विरथीकृतम् ।
अविध्यद्धस्ततलयोरुभयोरर्जुनस्तदा ॥ २९
तं कृच्छ्रामापदं प्राप्तं दृष्ट्वा परमधन्विनः ।
समापेतुः परीप्सन्तो धनंजयशरार्दितम् ॥ ३०
ते रथैर्बहुसाहस्रैः कल्पितैः कुञ्जरैर्हयैः ।
पदात्योघैश्च संरब्धैः परिवव्रुर्धनंजयम् ॥ ३१
अथ नार्जुनगोविन्दौ रथो वापि व्यदृश्यत ।
अस्त्रवर्षेण महता जनौघैश्चापि संवृतौ ॥ ३२
ततोऽर्जुनोऽस्त्रवीर्येण निजघ्ने तां वरूथिनीम् ।
तत्र व्यङ्गीकृताः पेतुः शतशोऽथ रथद्विपाः ॥ ३३
ते हता हन्यमानाश्च न्यगृह्णंस्तं रथोत्तमम् ।
स रथस्तम्भितस्तस्थौ क्रोशमात्रं समन्ततः ॥ ३४
ततोऽर्जुनं वृष्णिवीरस्त्वरितो वाक्यमब्रवीत् ।
धनुर्विस्फारयात्यर्थमहं ध्मास्यामि चाम्बुजम् ॥ ३५
ततो विस्फार्य बलवद्गाण्डीवं जघ्निवान्रिपून् ।
महता शरवर्षेण तलशब्देन चार्जुनः ॥ ३६
पाञ्चजन्यं च बलवद्दध्मौ तारेण केशवः ।
रजसा ध्वस्तपक्ष्मान्तः प्रस्विन्नवदनो भृशम् ॥ ३७
तस्य शङ्खस्य नादेन धनुषो निस्वनेन च ।
निःसत्त्वाश्च ससत्त्वाश्च क्षितौ पेतुस्तदा जनाः ॥
तैर्विमुक्तो रथो रेजे वाय्वीरित इवाम्बुदः ।
जयद्रथस्य गोप्तारस्ततः क्षुब्धाः सहानुगाः ॥ ३९
ते दृष्ट्वा सहसा पार्थं गोप्तारः सैन्धवस्य तु ।
चक्रुर्नादान्बहुविधान्कम्पयन्तो वसुंधराम् ॥ ४०
बाणशब्दरवांश्चोग्रान्विमिश्राञ्शङ्खनिस्वनैः ।

प्रादुश्चक्रुर्महात्मानः सिंहनादरवानपि ॥ ४१
तं श्रुत्वा निनदं घोरं तावकानां समुत्थितम् ।
प्रदध्मतुस्तदा शङ्खौ वासुदेवधनंजयौ ॥ ४२
तेन शब्देन महता पूरितेयं वसुंधरा ।
सशैला सार्णवद्वीपा सपाताला विशां पते ॥ ४३
स शब्दो भरतश्रेष्ठ व्याप्य सर्वा दिशो दश ।
प्रतिसस्वान तत्रैव कुरुपाण्डवयोर्बले ॥ ४४
तावका रथिनस्तत्र दृष्ट्वा कृष्णधनंजयौ ।
संरम्भं परमं प्राप्तास्त्वरमाणा महारथाः ॥ ४५
अथ कृष्णौ महाभागौ तावका दृश्य दंशितौ ।
अभ्यद्रवन्त संक्रुद्धास्तदद्भुतमिवाभवत् ॥ ४६

इति श्रीमहाभारते द्रोणपर्वणि
अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

७९

संजय उवाच ।

तावकास्तु समीक्ष्यैव वृष्ण्यन्धककुरूत्तमौ ।
प्रागत्वरञ्जिघांसन्तस्तथैव विजयः परान् ॥ १
सुवर्णचित्रैर्वैयाघ्रैः स्वनवद्भिर्महारथैः ।
दीपयन्तो दिशः सर्वा ज्वलद्भिरिव पावकैः ॥ २
रुक्मपृष्ठैश्च दुष्प्रेक्ष्यैः कार्मुकैः पृथिवीपते ।
कूजद्भिरतुलान्नादान्रोषितैरुरगैरिव ॥ ३
भूरिश्रवाः शलः कर्णो वृषसेनो जयद्रथः ।
कृपश्च मद्रराजश्च द्रौणिश्च रथिनां वरः ॥ ४
ते पिबन्त इवाकाशमश्वैरष्टौ महारथाः ।
व्यराजयन्दश दिशो वैयाघ्रैर्हेमचन्द्रकैः ॥ ५
ते दंशिताः सुसंरब्धा रथैर्मेघौघनिस्वनैः ।
समावृण्वन्दिशः सर्वाः पार्थं च विशिखैः शितैः ॥ ६
कौलूतका हयाश्चित्रा वहन्तस्तान्महारथान् ।
व्यशोभन्त तदा शीघ्रा दीपयन्तो दिशो दश ॥ ७
आजानेयैर्महावेगैर्नानादेशसमुत्थितैः ।
पार्वतीयैर्नदीजैश्च सैन्धवैश्च हयोत्तमैः ॥ ८
कुरुयोधवरा राजंस्तव पुत्रं परीप्सवः ।
धनंजयरथं शीघ्रं सर्वतः समुपाद्रवन् ॥ ९
ते प्रगृह्य महाशङ्खान्दध्मुः पुरुषसत्तमाः ।
पूरयन्तो दिवं राजन्पृथिवीं च ससागराम् ॥ १०
तथैव दध्मतुः शङ्खौ वासुदेवधनंजयौ ।
प्रवरौ सर्वभूतानां सर्वशङ्खवरौ भुवि ।
देवदत्तं च कौन्तेयः पाञ्चजन्यं च केशवः ॥ ११
शब्दस्तु देवदत्तस्य धनंजयसमीरितः ।
पृथिवीं चान्तरिक्षं च दिशश्चैव समावृणोत् ॥ १२
तथैव पाञ्चजन्योऽपि वासुदेवसमीरितः ।
सर्वशब्दानतिक्रम्य पूरयामास रोदसी ॥ १३
तस्मिंस्तथा वर्तमाने दारुणे नादसंकुले ।
भीरूणां त्रासजनने शूराणां हर्षवर्धने ॥ १४
प्रवादितासु भेरीषु झर्झरेष्वानकेषु च ।
मृदङ्गेषु च राजेन्द्र वाद्यमानेष्वनेकशः ॥ १५
महारथसमाख्याता दुर्योधनहितैषिणः ।
अमृष्यमाणास्तं शब्दं क्रुद्धाः परमधन्विनः ।
नानादेश्या महीपालाः स्वसैन्यपरिरक्षिणः ॥ १६
अमर्षिता महाशङ्खान्दध्मुर्वीरा महारथाः ।
कृते प्रतिकरिष्यन्तः केशवस्यार्जुनस्य च ॥ १७
बभूव तव तत्सैन्यं शङ्खशब्दसमीरितम् ।
उद्विग्नरथनागाश्वमस्वस्थमिव चाभिभो ॥ १८
तत्प्रयुक्तमिवाकाशं शूरैः शङ्खनिनादितम् ।
बभूव भृशमुद्विग्नं निर्घातैरिव नादितम् ॥ १९
स शब्दः सुमहान्राजन्दिशः सर्वा व्यनादयत् ।
त्रासयामास तत्सैन्यं युगान्त इव संभृतः ॥ २०
ततो दुर्योधनोऽष्टौ च राजानस्ते महारथाः ।
जयद्रथस्य रक्षार्थं पाण्डवं पर्यवारयन् ॥ २१
ततो द्रौणिस्त्रिसप्तत्या वासुदेवमताडयत् ।

अर्जुनं च त्रिभिर्भल्लैर्ध्वजमश्वांश्च पञ्चभिः ॥ २२
तमर्जुनः पृषत्कानां शतैः षड्भिरताडयत् ।
अत्यर्थमिव संक्रुद्धः प्रतिविद्धे जनार्दने ॥ २३
कर्णं द्वादशभिर्विद्ध्वा वृषसेनं त्रिभिस्तथा ।
शल्यस्य सशरं चापं मुष्टौ चिच्छेद वीर्यवान् ॥२४
गृहीत्वा धनुरन्यत्तु शल्यो विव्याध पाण्डवम् ।
भूरिश्रवास्त्रिभिर्बाणैर्हेमपुङ्खैः शिलाशितैः ॥ २५
कर्णो द्वात्रिंशता चैव वृषसेनश्च पञ्चभिः ।
जयद्रथस्त्रिसप्तत्या कृपश्च दशभिः शरैः ।
मद्रराजश्च दशभिर्विव्यधुः फल्गुनं रणे ॥ २६
ततः शराणां षष्ट्या तु द्रौणिः पार्थमवाकिरत् ।
वासुदेवं च सप्तत्या पुनः पार्थं च पञ्चभिः ॥ २७
प्रहसंस्तु नरव्याघ्रः श्वेताश्वः कृष्णसारथिः ।
प्रत्यविध्यत्स तान्सर्वान्दर्शयन्पाणिलाघवम् ॥ २८
कर्णं द्वादशभिर्विद्ध्वा वृषसेनं त्रिभिः शरैः ।
शल्यस्य समरे चापं मुष्टिदेशे न्यकृन्तत ॥ २९
सौमदत्तिं त्रिभिर्विद्ध्वा शल्यं च दशभिः शरैः ।
शितैरग्निशिखाकारैर्द्रौणिं विव्याध चाष्टभिः ॥ ३०
गौतमं पञ्चविंशत्या सैन्धवं च शतेन ह ।
पुनर्द्रौणिं च सप्तत्या शराणां सोऽभ्यताडयत् ॥३१
भूरिश्रवास्तु संक्रुद्धः प्रतोदं चिच्छिदे हरेः ।
अर्जुनं च त्रिसप्तत्या बाणानामाजघान ह ॥ ३२
ततः शरशतैस्तीक्ष्णैस्तानरीञ्श्वेतवाहनः ।
प्रत्यषेधद्द्रुतं क्रुद्धो महावातो घनानिव ॥ ३३

इति श्रीमहाभारते द्रोणपर्वणि
एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

८०

धृतराष्ट्र उवाच ।

ध्वजान्बहुविधाकारान्भ्राजमानानतिश्रिया ।
पार्थानां मामकानां च तान्ममाचक्ष्व संजय ॥ १

संजय उवाच ।

ध्वजान्बहुविधाकाराञ्शृणु तेषां महात्मनाम् ।
रूपतो वर्णतश्चैव नामतश्च निबोध मे ॥ २
तेषां तु रथमुख्यानां रथेषु विविधा ध्वजाः ।
प्रत्यदृश्यन्त राजेन्द्र ज्वलिता इव पावकाः ॥ ३
काञ्चनाः काञ्चनापीडाः काञ्चनस्रगलंकृताः ।
काञ्चनानीव शृङ्गाणि काञ्चनस्य महागिरेः ॥ ४
ते ध्वजाः संवृतास्तेषां पताकाभिः समन्ततः ।
नानावर्णविरागाभिर्विबभुः सर्वतो वृताः ॥ ५
पताकाश्च ततस्तास्तु श्वसनेन समीरिताः ।
नृत्यमाना व्यदृश्यन्त रङ्गमध्ये विलासिकाः ॥ ६
इन्द्रायुधसवर्णाभाः पताका भरतर्षभ ।
दोधूयमाना रथिनां शोभयन्ति महारथान् ॥ ७
सिंहलाङ्गूलमुग्रास्यं ध्वजं वानरलक्षणम् ।
धनंजयस्य संग्रामे प्रत्यपश्याम भैरवम् ॥ ८
स वानरवरो राजन्पताकाभिरलंकृतः ।
त्रासयामास तत्सैन्यं ध्वजो गाण्डीवधन्वनः ॥ ९
तथैव सिंहलाङ्गूलं द्रोणपुत्रस्य भारत ।
ध्वजाग्रं समपश्याम बालसूर्यसमप्रभम् ॥ १०
काञ्चनं पवनोद्धूतं शक्रध्वजसमप्रभम् ।
नन्दनं कौरवेन्द्राणां द्रौणेर्लक्षणमुच्छ्रितम् ॥ ११
हस्तिकक्ष्या पुनर्हैमी बभूवाधिरथेर्ध्वजे ।
आहवे खं महाराज ददृशे पूरयन्निव ॥ १२
पताकी काञ्चनस्रग्वी ध्वजः कर्णस्य संयुगे ।
नृत्यतीव रथोपस्थे श्वसनेन समीरितः ॥ १३
आचार्यस्य च पाण्डूनां ब्राह्मणस्य यशस्विनः ।
गोवृषो गौतमस्यासीत्कृपस्य सुपरिष्कृतः ॥ १४
स तेन भ्राजते राजन्गोवृषेण महारथः ।
त्रिपुरघ्नरथो यद्वद्गोवृषेण विराजते ॥ १५
मयूरो वृषसेनस्य काञ्चनो मणिरत्नवान् ।

व्याहरिष्यन्निवातिष्ठत्सेनाग्रमपि शोभयन् ॥ १६
तेन तस्य रथो भाति मयूरेण महात्मनः ।
यथा स्कन्दस्य राजेन्द्र मयूरेण विराजता ॥ १७
मद्रराजस्य शल्यस्य ध्वजाग्रेऽग्निशिखामिव ।
सौवर्णी प्रतिपश्याम सीतामप्रतिमां शुभाम् ॥ १८
सा सीता भ्राजते तस्य रथमास्थाय मारिष ।
सर्वबीजविरूढेव यथा सीता श्रिया वृता ॥ १९
वराहः सिन्धुराजस्य राजतोऽभिविराजते ।
ध्वजाग्रेऽलोहितार्काभो हेमजालपरिष्कृतः ॥ २०
शुशुभे केतुना तेन राजतेन जयद्रथः ।
यथा देवासुरे युद्धे पुरा पूषा स्म शोभते ॥ २१
सौमदत्तेः पुनर्यूपो यज्ञशीलस्य धीमतः ।
ध्वजः सूर्य इवाभाति सोमश्चात्र प्रदृश्यते ॥ २२
स यूपः काञ्चनो राजन्सौमदत्तेर्विराजते ।
राजसूये मखश्रेष्ठे यथा यूपः समुच्छ्रितः ॥ २३
शलस्य तु महाराज राजतो द्विरदो महान् ।
केतुः काञ्चनचित्राङ्गैर्मयूरैरुपशोभितः ॥ २४
स केतुः शोभयामास सैन्यं ते भरतर्षभ ।
यथा श्वेतो महानागो देवराजचमूं तथा ॥ २५
नागो मणिमयो राज्ञो ध्वजः कनकसंवृतः ।
किङ्किणीशतसंह्रादो भ्राजंश्चित्रे रथोत्तमे ॥ २६
व्यभ्राजत भृशं राजन्पुत्रस्तव विशां पते ।
ध्वजेन महता संख्ये कुरूणामृषभस्तदा ॥ २७
नवैते तव वाहिन्यामुच्छ्रिताः परमध्वजाः ।
व्यदीपयंस्ते पृतनां युगान्तादित्यसंनिभाः ॥ २८
दशमस्त्वर्जुनस्यासीदेक एव महाकपिः ।
अदीप्यतार्जुनो येन हिमवानिव वह्निना ॥ २९
ततश्चित्राणि शुभ्राणि सुमहान्ति महारथाः ।
कार्मुकाण्याददुस्तूर्णमर्जुनार्थे परंतपाः ॥ ३०
तथैव धनुरायच्छत्पार्थः शत्रुविनाशनः ।
गाण्डीवं दिव्यकर्मा तद्राजन्दुर्मन्त्रिते तव ॥ ३१
तवापराधाद्धि नरा निहता बहुधा युधि ।
नानादिग्भ्यः समाहूताः सहयाः सरथद्विपाः ॥ ३२
तेषामासीद्व्यतिक्षेपो गर्जतामितरेतरम् ।
दुर्योधनमुखानां च पाण्डूनामृषभस्य च ॥ ३३
तत्राद्भुतं परं चक्रे कौन्तेयः कृष्णसारथिः ।
यदेको बहुभिः सार्धं समागच्छदभीतवत् ॥ ३४
अशोभत महाबाहुर्गाण्डीवं विक्षिपन्धनुः ।
जिगीषुस्तान्नरव्याघ्राञ्जिघांसुश्च जयद्रथम् ॥ ३५
तत्रार्जुनो महाराज शरैर्मुक्तैः सहस्रशः ।
अदृश्यानकरोद्योधांस्तावकाञ्शत्रुतापनः ॥ ३६
ततस्तेऽपि नरव्याघ्राः पार्थं सर्वे महारथाः ।
अदृश्यं समरे चक्रुः सायकौघैः समन्ततः ॥ ३७
संवृते नरसिंहैस्तैः कुरूणामृषभेऽर्जुने ।
महानासीत्समुद्धूतस्तस्य सैन्यस्य निस्वनः ॥ ३८

इति श्रीमहाभारते द्रोणपर्वणि
अशीतितमोऽध्यायः ॥ ८० ॥

८१

धृतराष्ट्र उवाच ।

अर्जुने सैन्धवं प्राप्ते भारद्वाजेन संवृताः ।
पाञ्चालाः कुरुभिः सार्धं किमकुर्वत संजय ॥ १

संजय उवाच ।

अपराह्णे महाराज संग्रामे लोमहर्षणे ।
पाञ्चालानां कुरूणां च द्रोणे द्यूतमवर्तत ॥ २
पाञ्चाला हि जिघांसन्तो द्रोणं संहृष्टचेतसः ।
अभ्यवर्षन्त गर्जन्तः शरवर्षाणि मारिष ॥ ३
ततः सुतुमुलस्तेषां संग्रामोऽवर्तताद्भुतः ।
पाञ्चालानां कुरूणां च घोरो देवासुरोपमः ॥ ४
सर्वे द्रोणरथं प्राप्य पाञ्चालाः पाण्डवैः सह ।
तदनीकं बिभित्सन्तो महास्त्राणि व्यदर्शयन् ॥ ५

द्रोणस्य रथपर्यन्तं रथिनो रथमास्थिताः ।
कम्पयन्तोऽभ्यवर्तन्त वेगमास्थाय मध्यमम् ॥ ६
तमभ्यगाद्बृहत्क्षत्रः केकयानां महारथः ।
प्रवपन्निशितान्बाणान्महेन्द्राशनिसंनिभान् ॥ ७
तं तु प्रत्युदियाच्छीघ्रं क्षेमधूर्तिर्महायशाः ।
विमुञ्चन्निशितान्बाणाञ्शतशोऽथ सहस्रशः ॥ ८
धृष्टकेतुश्च चेदीनामृषभोऽतिबलोदितः ।
त्वरितोऽभ्यद्रवद्द्रोणं महेन्द्र इव शम्बरम् ॥ ९
तमापतन्तं सहसा व्यादितास्यमिवान्तकम् ।
वीरधन्वा महेष्वासस्त्वरमाणः समभ्ययात् ॥ १०
युधिष्ठिरं महाराज जिगीषुं समवस्थितम् ।
सहानीकं ततो द्रोणो न्यवारयत वीर्यवान् ॥ ११
नकुलं कुशलं युद्धे पराक्रान्तं पराक्रमी ।
अभ्यगच्छत्समायान्तं विकर्णस्ते सुतः प्रभो ॥ १२
सहदेवं तथायान्तं दुर्मुखः शत्रुकर्शनः ।
शरैरनेकसाहस्रैः समवाकिरदाशुगैः ॥ १३
सात्यकिं तु नरव्याघ्रं व्याघ्रदत्तस्त्ववारयत् ।
शरैः सुनिशितैस्तीक्ष्णैः कम्पयन्वै मुहुर्मुहुः ॥ १४
द्रौपदेयान्नरव्याघ्रान्मुञ्चतः सायकोत्तमान् ।
संरब्धान्रथिनां श्रेष्ठान्सौमदत्तिरवारयत् ॥ १५
भीमसेनं तथा क्रुद्धं भीमरूपो भयानकम् ।
प्रत्यवारयदायान्तमार्ष्यशृङ्गिर्महारथः ॥ १६
तयोः समभवद्युद्धं नरराक्षसयोर्मृधे ।
यादृगेव पुरा वृत्तं रामरावणयोर्नृप ॥ १७
ततो युधिष्ठिरो द्रोणं नवत्या नतपर्वणाम् ।
आजघ्ने भरतश्रेष्ठ सर्वमर्मसु भारत ॥ १८
तं द्रोणः पञ्चविंशत्या निजघान स्तनान्तरे ।
रोषितो भरतश्रेष्ठ कौन्तेयेन यशस्विना ॥ १९
भूय एव तु विंशत्या सायकानां समाचिनोत् ।
साश्वसूतध्वजं द्रोणः पश्यतां सर्वधन्विनाम् ॥ २०

ताञ्शरान्द्रोणमुक्तांस्तु शरवर्षेण पाण्डवः ।
अवारयत धर्मात्मा दर्शयन्पाणिलाघवम् ॥ २१
ततो द्रोणो भृशं क्रुद्धो धर्मराजस्य संयुगे ।
चिच्छेद सहसा धन्वी धनुस्तस्य महात्मनः ॥ २२
अथैनं छिन्नधन्वानं त्वरमाणो महारथः ।
शरैरनेकसाहस्रैः पूरयामास सर्वतः ॥ २३
अदृश्यं दृश्य राजानं भारद्वाजस्य सायकैः ।
सर्वभूतान्यमन्यन्त हतमेव युधिष्ठिरम् ॥ २४
केचिच्चैनममन्यन्त तथा वै विमुखीकृतम् ।
हतो राजेति राजेन्द्र ब्राह्मणेन यशस्विना ॥ २५
स कृच्छ्रं परमं प्राप्तो धर्मराजो युधिष्ठिरः ।
त्यक्त्वा तत्कार्मुकं छिन्नं भारद्वाजेन संयुगे ।
आददेऽन्यद्धनुर्दिव्यं भास्वरं वेगवत्तरम् ॥ २६
ततस्तान्सायकान्सर्वान्द्रोणमुक्तान्सहस्रशः ।
चिच्छेद समरे वीरस्तदद्भुतमिवाभवत् ॥ २७
छित्त्वा च ताञ्शरान्राजा क्रोधसंरक्तलोचनः ।
शक्तिं जग्राह समरे गिरीणामपि दारणीम् ।
स्वर्णदण्डां महाघोरामष्टघण्टां भयावहाम् ॥ २८
समुत्क्षिप्य च तां हृष्टो ननाद बलवद्बली ।
नादेन सर्वभूतानि त्रासयन्निव भारत ॥ २९
शक्तिं समुद्यतां दृष्ट्वा धर्मराजेन संयुगे ।
स्वस्ति द्रोणाय सहसा सर्वभूतान्यथाब्रुवन् ॥ ३०
सा राजभुजनिर्मुक्ता निर्मुक्तोरगसंनिभा ।
प्रज्वालयन्ती गगनं दिशश्च विदिशस्तथा ।
द्रोणान्तिकमनुप्राप्ता दीप्तास्या पन्नगी यथा ॥ ३१
तामापतन्तीं सहसा प्रेक्ष्य द्रोणो विशां पते ।
प्रादुश्चक्रे ततो ब्राह्ममस्त्रमस्त्रविदां वरः ॥ ३२
तदस्त्रं भस्मसात्कृत्वा तां शक्तिं घोरदर्शनाम् ।
जगाम स्यन्दनं तूर्णं पाण्डवस्य यशस्विनः ॥ ३३
ततो युधिष्ठिरो राजा द्रोणास्त्रं तत्समुद्यतम् ।

अशामयन्महाप्राज्ञो ब्रह्मास्त्रेणैव भारत ॥ ३४
विव्याध च रणे द्रोणं पञ्चभिर्नतपर्वभिः ।
क्षुरप्रेण च तीक्ष्णेन चिच्छेदास्य महद्धनुः ॥ ३५
तदपास्य धनुश्छिन्नं द्रोणः क्षत्रियमर्दनः ।
गदां चिक्षेप सहसा धर्मपुत्राय मारिष ॥ ३६
तामापतन्तीं सहसा गदां दृष्ट्वा युधिष्ठिरः ।
गदामेवाग्रहीत्क्रुद्धश्चिक्षेप च परंतपः ॥ ३७
ते गदे सहसा मुक्ते समासाद्य परस्परम् ।
संघर्षात्पावकं मुक्त्वा समेयातां महीतले ॥ ३८
ततो द्रोणो भृशं क्रुद्धो धर्मराजस्य मारिष ।
चतुर्भिर्निशितैस्तीक्ष्णैर्हयाञ्जघ्ने शरोत्तमैः ॥ ३९
धनुश्चैकेन बाणेन चिच्छेदेन्द्रध्वजोपमम् ।
केतुमेकेन चिच्छेद पाण्डवं चार्दयत्त्रिभिः ॥ ४०
हताश्वात्तु रथात्तूर्णमवप्लुत्य युधिष्ठिरः ।
तस्थावूर्ध्वभुजो राजा व्यायुधो भरतर्षभ ॥ ४१
विरथं तं समालोक्य व्यायुधं च विशेषतः ।
द्रोणो व्यमोहयच्छत्रून्सर्वसैन्यानि चाभिभो ॥४२
मुञ्चन्निषुगणांस्तीक्ष्णाँल्लघुहस्तो दृढव्रतः ।
अभिदुद्राव राजानं सिंहो मृगमिवोल्बणः ॥ ४३
तमभिद्रुतमालोक्य द्रोणेनामित्रघातिना ।
हा हेति सहसा शब्दः पाण्डूनां समजायत ॥४४
हतो राजा हतो राजा भारद्वाजेन मारिष ।
इत्यासीत्सुमहाञ्शब्दः पाण्डुसैन्यस्य सर्वतः ॥ ४५
ततस्त्वरितमारुह्य सहदेवरथं नृपः ।
अपायाज्जवनैरश्वैः कुन्तीपुत्रो युधिष्ठिरः ॥ ४६

इति श्रीमहाभारते द्रोणपर्वणि
एकाशीतितमोऽध्यायः ॥ ८१ ॥

८२

संजय उवाच ।

बृहत्क्षत्रमथायान्तं केकयं दृढविक्रमम् ।
क्षेमधूर्तिर्महाराज विव्याधोरसि मार्गणैः ॥ १
बृहत्क्षत्रस्तु तं राजा नवत्या नतपर्वणाम् ।
आजघ्ने त्वरितो युद्धे द्रोणानीकबिभित्सया ॥ २
क्षेमधूर्तिस्तु संक्रुद्धः केकयस्य महात्मनः ।
धनुश्चिच्छेद भल्लेन पीतेन निशितेन च ॥ ३
अथैनं छिन्नधन्वानं शरेण नतपर्वणा ।
विव्याध हृदये तूर्णं प्रवरं सर्वधन्विनाम् ॥ ४
अथान्यद्धनुरादाय बृहत्क्षत्रो हसन्निव ।
व्यश्वसूतध्वजं चक्रे क्षेमधूर्तिं महारथम् ॥ ५
ततोऽपरेण भल्लेन पीतेन निशितेन च ।
जहार नृपतेः कायाच्छिरो ज्वलितकुण्डलम् ॥ ६
तच्छिन्नं सहसा तस्य शिरः कुञ्चितमूर्धजम् ।
सकिरीटं महीं प्राप्य बभौ ज्योतिरिवाम्बरात् ॥ ७
तं निहत्य रणे हृष्टो बृहत्क्षत्रो महारथः ।
सहसाभ्यपतत्सैन्यं तावकं पार्थकारणात् ॥ ८
धृष्टकेतुमथायान्तं द्रोणहेतोः पराक्रमी ।
वीरधन्वा महेष्वासो वारयामास भारत ॥ ९
तौ परस्परमासाद्य शरदंष्ट्रौ तरस्विनौ ।
शरैरनेकसाहस्रैरन्योन्यमभिजघ्नतुः ॥ १०
तावुभौ नरशार्दूलौ युयुधाते परस्परम् ।
महावने तीव्रमदौ वारणाविव यूथपौ ॥ ११
गिरिगह्वरमासाद्य शार्दूलाविव रोषितौ ।
युयुधाते महावीर्यौ परस्परजिघांसया ॥ १२
तद्युद्धमासीत्तुमुलं प्रेक्षणीयं विशां पते ।
सिद्धचारणसंघानां विस्मयाद्भुतदर्शनम् ॥ १३
वीरधन्वा ततः क्रुद्धो धृष्टकेतोः शरासनम् ।
द्विधा चिच्छेद भल्लेन प्रहसन्निव भारत ॥ १४
तदुत्सृज्य धनुश्छिन्नं चेदिराजो महारथः ।
शक्तिं जग्राह विपुलां रुक्मदण्डामयस्मयीम् ॥ १५
तां तु शक्तिं महावीर्यां दोर्भ्यामायम्य भारत ।

चिक्षेप सहसा यत्तो वीरधन्वरथं प्रति ।। १६
स तया वीरघातिन्या शक्त्या त्वभिहतो भृशम् ।
निर्भिन्नहृदयस्तूर्णं निपपात रथान्महीम् ।। १७
तस्मिन्विनिहते शूरे त्रिगर्तानां महारथे ।
बलं तेऽभज्यत विभो पाण्डवेयैः समन्ततः ।। १८
सहदेवे ततः षष्टिं सायकान्दुर्मुखोऽक्षिपत् ।
ननाद च महानादं तर्जयन्पाण्डवं रणे ।। १९
माद्रेयस्तु ततः क्रुद्धो दुर्मुखं दशभिः शरैः ।
भ्राता भ्रातरमायान्तं विव्याध प्रहसन्निव ।। २०
तं रणे रभसं दृष्ट्वा सहदेवं महाबलम् ।
दुर्मुखो नवभिर्बाणैस्ताडयामास भारत ।। २१
दुर्मुखस्य तु भल्लेन छित्त्वा केतुं महाबलः ।
जघान चतुरो वाहांश्चतुर्भिर्निशितैः शरैः ।। २२
अथापरेण भल्लेन पीतेन निशितेन च ।
चिच्छेद सारथेः कायाच्छिरो ज्वलितकुण्डलम् ।।
क्षुरप्रेण च तीक्ष्णेन कौरव्यस्य महद्धनुः ।
सहदेवो रणे छित्त्वा तं च विव्याध पञ्चभिः ।।२४
हताश्वं तु रथं त्यक्त्वा दुर्मुखो विमनास्तदा ।
आरुरोह रथं राजन्निरमित्रस्य भारत ।। २५
सहदेवस्ततः क्रुद्धो निरमित्रं महाहवे ।
जघान पृतनामध्ये भल्लेन परवीरहा ।। २६
स पपात रथोपस्थान्निरमित्रो जनेश्वरः ।
त्रिगर्तराजस्य सुतो व्यथयंस्तव वाहिनीम् ।। २७
तं तु हत्वा महाबाहुः सहदेवो व्यरोचत ।
यथा दाशरथी रामः खरं हत्वा महाबलम् ।। २८
हाहाकारो महानासीत्त्रिगर्तानां जनेश्वर ।
राजपुत्रं हतं दृष्ट्वा निरमित्रं महाबलम् ।। २९
नकुलस्ते सुतं राजन्विकर्णं पृथुलोचनम् ।
मुहूर्ताज्जितवान्संख्ये तदद्भुतमिवाभवत् ।। ३०
सात्यकिं व्याघ्रदत्तस्तु शरैः संनतपर्वभिः ।
चक्रेऽदृश्यं साश्वसूतं सध्वजं पृतनान्तरे ।। ३१
तान्निवार्य शराञ्शूरः शैनेयः कृतहस्तवत् ।
साश्वसूतध्वजं बाणैर्व्याघ्रदत्तमपातयत् ।। ३२
कुमारे निहते तस्मिन्मागधस्य सुते प्रभो ।
मागधाः सर्वतो यत्ता युयुधानमुपाद्रवन् ।। ३३
विसृजन्तः शरांश्चैव तोमरांश्च सहस्रशः ।
भिण्डिपालांस्तथा प्रासान्मुद्गरान्मुसलानपि ।। ३४
अयोधयन्रणे शूराः सात्वतं युद्धदुर्मदम् ।
तांस्तु सर्वान्स बलवान्सात्यकिर्युद्धदुर्मदः ।
नातिकृच्छ्राद्धसन्नेव विजिग्ये पुरुषर्षभ ।। ३५
मागधान्द्रवतो दृष्ट्वा हतशेषान्समन्ततः ।
बलं तेऽभज्यत विभो युयुधानशरार्दितम् ।। ३६
नाशयित्वा रणे सैन्यं त्वदीयं माधवोत्तमः ।
विधुन्वानो धनुःश्रेष्ठं व्यभ्राजत महायशाः ।। ३७
भज्यमानं बलं राजन्सात्वतेन महात्मना ।
नाभ्यवर्तत युद्धाय त्रासितं दीर्घबाहुना ।। ३८
ततो द्रोणो भृशं क्रुद्धः सहसोद्वृत्य चक्षुषी ।
सात्यकिं सत्यकर्माणं स्वयमेवाभिदुद्रुवे ।। ३९

इति श्रीमहाभारते द्रोणपर्वणि
द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

८३

संजय उवाच ।

द्रौपदेयान्महेष्वासान्सौमदत्तिर्महायशाः ।
एकैकं पञ्चभिर्विद्ध्वा पुनर्विव्याध सप्तभिः ।। १
ते पीडिता भृशं तेन रौद्रेण सहसा विभो ।
प्रमूढा नैव विविदुर्मृधे कृत्यं स्म किंचन ।। २
नाकुलिस्तु शतानीकः सौमदत्तिं नरर्षभम् ।
द्वाभ्यां विद्ध्वानदद्धृष्टः शराभ्यां शत्रुतापनः ।। ३
तथेतरे रणे यत्तास्त्रिभिस्त्रिभिरजिह्मगैः ।
विव्यधुः समरे तूर्णं सौमदत्तिममर्षणम् ।। ४

स तान्प्रति महाराज चिक्षिपे पञ्च सायकान् ।
एकैकं हृदि चाजघ्ने एकैकेन महायशाः ॥ ५
ततस्ते भ्रातरः पञ्च शरैर्विद्धा महात्मना ।
परिवार्य रथैर्वीरं विव्यधुः सायकैर्भृशम् ॥ ६
आर्जुनिस्तु हयांस्तस्य चतुर्भिर्निशितैः शरैः ।
प्रेषयामास संक्रुद्धो यमस्य सदनं प्रति ॥ ७
भैमसेनिर्धनुश्छित्त्वा सौमदत्तेर्महात्मनः ।
ननाद बलवन्नादं विव्याध च शितैः शरैः ॥ ८
यौधिष्ठिरो ध्वजं तस्य छित्त्वा भूमावपातयत् ।
नाकुलिश्चाश्वयन्तारं रथनीडादपाहरत् ॥ ९
साहदेविस्तु तं ज्ञात्वा भ्रातृभिर्विमुखीकृतम् ।
क्षुरप्रेण शिरो राजन्निचकर्त महामनाः ॥ १०
तच्छिरो न्यपतद्भूमौ तपनीयविभूषितम् ।
भ्राजयन्तं रणोद्देशं बालसूर्यसमप्रभम् ॥ ११
सौमदत्तेः शिरो दृष्ट्वा निपतत्तन्महात्मनः ।
वित्रस्तास्तावका राजन्प्रदुद्रुवुरनेकधा ॥ १२
अलम्बुसस्तु समरे भीमसेनं महाबलम् ।
योधयामास संक्रुद्धो लक्ष्मणं रावणिर्यथा ॥ १३
संप्रयुद्धौ रणे दृष्ट्वा तावुभौ नरराक्षसौ ।
विस्मयः सर्वभूतानां प्रहर्षश्चाभवत्तदा ॥ १४
आर्श्यशृङ्गिं ततो भीमो नवभिर्निशितैः शरैः ।
विव्याध प्रहसन्राजन्राक्षसेन्द्रममर्षणम् ॥ १५
तद्रक्षः समरे विद्धं कृत्वा नादं भयावहम् ।
अभ्यद्रवत्ततो भीमं ये च तस्य पदानुगाः ॥ १६
स भीमं पञ्चभिर्विद्ध्वा शरैः संनतपर्वभिः ।
भीमानुगाञ्जघानाशु रथांस्त्रिंशदरिंदमः ।
पुनश्चतुःशतान्हत्वा भीमं विव्याध पत्रिणा ॥ १७
सोऽतिविद्धस्तदा भीमो राक्षसेन महाबलः ।
निषसाद रथोपस्थे मूर्छयाभिपरिप्लुतः ॥ १८
प्रतिलभ्य ततः संज्ञां मारुतिः क्रोधमूर्छितः ।
विकृष्य कार्मुकं घोरं भारसाधनमुत्तमम् ।
अलम्बुसं शरैस्तीक्ष्णैरर्दयामास सर्वतः ॥ १९
स विद्धो बहुभिर्बाणैर्नीलाञ्जनचयोपमः ।
शुशुभे सर्वतो राजन्प्रदीप्त इव किंशुकः ॥ २०
स वध्यमानः समरे भीमचापच्युतैः शरैः ।
स्मरन्भ्रातृवधं चैव पाण्डवेन महात्मना ॥ २१
घोरं रूपमथो कृत्वा भीमसेनमभाषत ।
तिष्ठेदानीं रणे पार्थ पश्य मेऽद्य पराक्रमम् ॥ २२
बको नाम सुदुर्बुद्धे राक्षसप्रवरो बली ।
परोक्षं मम तद्वृत्तं यद्भ्राता मे हतस्त्वया ॥ २३
एवमुक्त्वा ततो भीममन्तर्धानगतस्तदा ।
महता शरवर्षेण भृशं तं समवाकिरत् ॥ २४
भीमस्तु समरे राजन्नदृश्ये राक्षसे तदा ।
आकाशं पूरयामास शरैः संनतपर्वभिः ॥ २५
स वध्यमानो भीमेन निमेषाद्रथमास्थितः ।
जगाम धरणीं क्षुद्रः खं चैव सहसागमत् ॥ २६
उच्चावचानि रूपाणि चकार सुबहूनि च ।
उच्चावचास्तथा वाचो व्याजहार समन्ततः ॥ २७
तेन पाण्डवसैन्यानां मृदिता युधि वारणाः ।
हयाश्च बहवो राजन्पत्तयश्च तथा पुनः ।
रथेभ्यो रथिनः पेतुस्तस्य नुन्नाः स्म सायकैः ॥२८
शोणितोदां रथावर्तां हस्तिग्राहसमाकुलाम् ।
छत्रहंसां कर्दमिनीं बाहुपन्नगसंकुलाम् ॥ २९
नदीं प्रवर्तयामास रक्षोगणसमाकुलाम् ।
वहन्तीं बहुधा राजंश्चेदिपाञ्चालसृञ्जयान् ॥ ३०
तं तथा समरे राजन्विचरन्तमभीतवत् ।
पाण्डवा भृशसंविग्नाः प्रापश्यंस्तस्य विक्रमम् ॥३१
तावकानां तु सैन्यानां प्रहर्षः समजायत ।
वादित्रनिनदश्चोग्रः सुमहाँल्लोमहर्षणः ॥ ३२
तं श्रुत्वा निनदं घोरं तव सैन्यस्य पाण्डवः ।

नाशृष्यत यथा नागस्तलशब्दं समीरितम् ॥ ३३
ततः क्रोधाभिताम्राक्षो निर्दहन्निव पावकः ।
संदधे त्वाष्ट्रमस्त्रं स स्वयं त्वष्टेव मारिष ॥ ३४
ततः शरसहस्राणि प्रादुरासन्समन्ततः ।
तैः शरैस्तव सैन्यस्य विद्रावः सुमहानभूत् ॥ ३५
तदस्त्रं प्रेषितं तेन भीमसेनेन संयुगे ।
राक्षसस्य महामायां हत्वा राक्षसमार्दयत् ॥ ३६
स वध्यमानो बहुधा भीमसेनेन राक्षसः ।
संत्यज्य संयुगे भीमं द्रोणानीकमुपाद्रवत् ॥ ३७
तस्मिंस्तु निर्जिते राजन्राक्षसेन्द्रे महात्मना ।
अनादयन्सिंहनादैः पाण्डवाः सर्वतोदिशम् ॥ ३८
अपूजयन्मारुतिं च संहृष्टास्ते महाबलम् ।
प्रह्लादं समरे जित्वा यथा शक्रं मरुद्गणाः ॥ ३९

इति श्रीमहाभारते द्रोणपर्वणि
त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

८४

संजय उवाच ।

अलम्बुसं तथा युद्धे विचरन्तमभीतवत् ।
हैडिम्बः प्रययौ तूर्णं विव्याध च शितैः शरैः ॥१
तयोः प्रतिभयं युद्धमासीद्राक्षससिंहयोः ।
कुर्वतोर्विविधा मायाः शक्रशम्बरयोरिव ॥ २
अलम्बुसो भृशं क्रुद्धो घटोत्कचमताडयत् ।
घटोत्कचस्तु विंशत्या नाराचानां स्तनान्तरे ।
अलम्बुसमथो विद्ध्वा सिंहवद्व्यनदन्मुहुः ॥ ३
तथैवालम्बुसो राजन्हैडिम्बं युद्धदुर्मदम् ।
विद्ध्वा विद्ध्वानदद्धृष्टः पूरयन्खं समन्ततः ॥ ४
तथा तौ भृशसंक्रुद्धौ राक्षसेन्द्रौ महाबलौ ।
निर्विशेषमयुध्येतां मायाभिरितरेतरम् ॥ ५
मायाशतसृजौ दृप्तौ मोहयन्तौ परस्परम् ।
मायायुद्धे सुकुशलौ मायायुद्धमयुध्यताम् ॥ ६
यां यां घटोत्कचो युद्धे मायां दर्शयते नृप ।
तां तामलम्बुसो राजन्माययैव निजघ्निवान् ॥ ७
तं तथा युध्यमानं तु मायायुद्धविशारदम् ।
अलम्बुसं राक्षसेन्द्रं दृष्ट्वाक्रुध्यन्त पाण्डवाः ॥ ८
त एनं भृशसंक्रुद्धाः सर्वतः प्रवरा रथैः ।
अभ्यद्रवन्त संक्रुद्धा भीमसेनादयो नृप ॥ ९
त एनं कोष्ठकीकृत्य रथवंशेन मारिष ।
सर्वतो व्यकिरन्बाणैरुल्काभिरिव कुञ्जरम् ॥ १०
स तेषामस्त्रवेगं तं प्रतिहत्यास्त्रमायया ।
तस्माद्रथव्रजान्मुक्तो वनदाहादिव द्विपः ॥ ११
स विस्फार्य धनुर्घोरमिन्द्राशनिसमस्वनम् ।
मारुतिं पञ्चविंशत्या भैमसेनिं च पञ्चभिः ।
युधिष्ठिरं त्रिभिर्विद्ध्वा सहदेवं च सप्तभिः ॥ १२
नकुलं च त्रिसप्तत्या द्रौपदेयांश्च मारिष ।
पञ्चभिः पञ्चभिर्विद्ध्वा घोरं नादं ननाद ह ॥ १३
तं भीमसेनो नवभिः सहदेवश्च पञ्चभिः ।
युधिष्ठिरः शतेनैव राक्षसं प्रत्यविध्यत ।
नकुलश्च चतुःषष्ट्या द्रौपदेयास्त्रिभिस्त्रिभिः ॥ १४
हैडिम्बो राक्षसं विद्ध्वा युद्धे पञ्चाशता शरैः ।
पुनर्विव्याध सप्तत्या ननाद च महाबलः ॥ १५
सोऽतिविद्धो महेष्वासः सर्वतस्तैर्महारथैः ।
प्रतिविव्याध तान्सर्वान्पञ्चभिः पञ्चभिः शरैः ॥१६
तं क्रुद्धं राक्षसं युद्धे प्रतिक्रुद्धस्तु राक्षसः ।
हैडिम्बो भरतश्रेष्ठ शरैर्विव्याध सप्तभिः ॥ १७
सोऽतिविद्धो बलवता राक्षसेन्द्रो महाबलः ।
व्यसृजत्सायकांस्तूर्णं स्वर्णपुङ्खाञ्शिलाशितान् ॥१८
ते शरा नतपर्वाणो विविशू राक्षसं तदा ।
रुषिताः पन्नगा यद्वद्गिरिमुग्रा महाबलाः ॥ १९
ततस्ते पाण्डवा राजन्समन्तान्निशिताञ्शरान् ।
प्रेषयामासुरुद्विग्ना हैडिम्बश्च घटोत्कचः ॥ २०

स वध्यमानः समरे पाण्डवैर्जितकाशिभिः ।
दग्धाद्रिकूटशृङ्गाभं भिन्नाञ्जनचयोपमम् ॥ २१
समुत्क्षिप्य च बाहुभ्यामाविध्य च पुनः पुनः ।
निष्पिपेष क्षितौ क्षिप्रं पूर्णकुम्भमिवाश्मनि ॥ २२
बललाघवसंपन्नः संपन्नो विक्रमेण च ।
भैमसेनी रणे क्रुद्धः सर्वसैन्यान्यभीषयत् ॥ २३
स विस्फुटितसर्वाङ्गश्चूर्णितास्थिविभूषणः ।
घटोत्कचेन वीरेण हतः सालकटङ्कटः ॥ २४
ततः सुमनसः पार्था हते तस्मिन्निशाचरे ।
चुक्रुशुः सिंहनादांश्च वासांस्यादुधुवुश्च ह ॥ २५
तावकाश्च हतं दृष्ट्वा राक्षसेन्द्रं महाबलम् ।
अलम्बुसं भीमरूपं विशीर्णमिव पर्वतम् ।
हाहाकारमकुर्वन्त सैन्यानि भरतर्षभ ॥ २६
जनाश्च तद्ददृशिरे रक्षः कौतूहलान्विताः ।
यदृच्छया निपतितं भूमावङ्गारकं यथा ॥ २७
घटोत्कचस्तु तद्धत्वा रक्षो बलवतां वरम् ।
मुमोच बलवन्नादं बलं हत्वेव वासवः ॥ २८

स पूज्यमानः पितृभिः सबान्धवै-
  र्घटोत्कचः कर्मणि दुष्करे कृते ।
रिपुं निहत्याभिननन्द वै तदा
  अलम्बुसं पक्वमलम्बुसं यथा ॥ २९
ततो निनादः सुमहान्समुत्थितः
  सशङ्खनानाविधबाणघोषवान् ।
निशम्य तं प्रत्यनदंस्तु कौरवा-
  स्ततो ध्वनिर्भुवनमथास्पृशद्भृशम् ॥ ३०

इति श्रीमहाभारते द्रोणपर्वणि
चतुरशीतितमोऽध्यायः ॥ ८४ ॥

८५

धृतराष्ट्र उवाच ।

भारद्वाजं कथं युद्धे युयुधानोऽभ्यवारयत् ।
संजयाचक्ष्व तत्त्वेन परं कौतूहलं हि मे ॥ १

संजय उवाच ।

शृणु राजन्महाप्राज्ञ संग्रामं लोमहर्षणम् ।
द्रोणस्य पाण्डवैः सार्धं युयुधानपुरोगमैः ॥ २
वध्यमानं बलं दृष्ट्वा युयुधानेन मारिष ।
अभ्यद्रवत्स्वयं द्रोणः सात्यकिं सत्यविक्रमम् ॥
तमापतन्तं सहसा भारद्वाजं महारथम् ।
सात्यकिः पञ्चविंशत्या क्षुद्रकाणां समार्पयत् ॥
द्रोणोऽपि युधि विक्रान्तो युयुधानं समाहितः ।
अविध्यत्पञ्चभिस्तूर्णं हेमपुङ्खैः शिलाशितैः ॥ ५
ते वर्म भित्त्वा सुदृढं द्विषत्पिशितभोजनाः ।
अभ्यगुर्धरणीं राजञ्श्वसन्त इव पन्नगाः ॥ ६
दीर्घबाहुरभिक्रुद्धस्तोत्रार्दित इव द्विपः ।
द्रोणं पञ्चाशताविध्यन्नाराचैरग्निसंनिभैः ॥ ७
भारद्वाजो रणे विद्धो युयुधानेन सत्वरम् ।
सात्यकिं बहुभिर्बाणैर्यतमानमविध्यत ॥ ८
ततः क्रुद्धो महेष्वासो भूय एव महाबलः ।
सात्वतं पीडयामास शतेन नतपर्वणा ॥ ९
स वध्यमानः समरे भारद्वाजेन सात्यकिः ।
नाभ्यपद्यत कर्तव्यं किंचिदेव विशां पते ॥ १०
विषण्णवदनश्चापि युयुधानोऽभवन्नृप ।
भारद्वाजं रणे दृष्ट्वा विसृजन्तं शिताञ्शरान् ॥ ११
तं तु संप्रेक्ष्य ते पुत्राः सैनिकाश्च विशां पते ।
प्रहृष्टमनसो भूत्वा सिंहवद्व्यनदन्मुहुः ॥ १२
तं श्रुत्वा निनदं घोरं पीड्यमानं च माधवम् ।
युधिष्ठिरोऽब्रवीद्राजन्सर्वसैन्यानि भारत ॥ १३
एष वृष्णिवरो वीरः सात्यकिः सत्यकर्मकृत् ।
ग्रस्यते युधि वीरेण भानुमानिव राहुणा ।
अभिद्रवत गच्छध्वं सात्यकिर्यत्र युध्यते ॥ १४
धृष्टद्युम्नं च पाञ्चाल्यमिदमाह जनाधिप ।

अभिद्रव द्रुतं द्रोणं किं नु तिष्ठसि पार्षत ।
न पश्यसि भयं घोरं द्रोणान्नः समुपस्थितम् ॥ १५
असौ द्रोणो महेष्वासो युयुधानेन संयुगे ।
क्रीडते सूत्रबद्धेन पक्षिणा बालको यथा ॥ १६
तत्रैव सर्वे गच्छन्तु भीमसेनमुखा रथाः ।
त्वयैव सहिता यत्ता युयुधानरथं प्रति ॥ १७
पृष्ठतोऽनुगमिष्यामि त्वामहं सहसैनिकः ।
सात्यकिं मोक्षयस्वाद्य यमदंष्ट्रान्तरं गतम् ॥ १८
एवमुक्त्वा ततो राजा सर्वसैन्येन पाण्डवः ।
अभ्यद्रवद्रणे द्रोणं युयुधानस्य कारणात् ॥ १९
तत्रारावो महानासीद्द्रोणमेकं युयुत्सताम् ।
पाण्डवानां च भद्रं ते सृञ्जयानां च सर्वशः ॥२०
ते समेत्य नरव्याघ्रा भारद्वाजं महारथम् ।
अभ्यवर्षञ्शरैस्तीक्ष्णैः कङ्कबर्हिणवाजितैः ॥ २१
स्मयन्नेव तु तान्वीरान्द्रोणः प्रत्यग्रहीत्स्वयम् ।
अतिथीनागतान्यद्वत्सलिलेनासनेन च ॥ २२
तर्पितास्ते शरैस्तस्य भारद्वाजस्य धन्विनः ।
आतिथेयगृहं प्राप्य नृपतेऽतिथयो यथा ॥ २३
भारद्वाजं च ते सर्वे न शेकुः प्रतिवीक्षितुम् ।
मध्यंदिनमनुप्राप्तं सहस्रांशुमिव प्रभो ॥ २४
तांस्तु सर्वान्महेष्वासान्द्रोणः शस्त्रभृतां वरः ।
अतापयच्छरव्रातैर्गभस्तिभिरिवांशुमान् ॥ २५
वध्यमाना रणे राजन्पाण्डवाः सृञ्जयास्तथा ।
त्रातारं नाध्यगच्छन्त पङ्कमग्ना इव द्विपाः ॥ २६
द्रोणस्य च व्यदृश्यन्त विसर्पन्तो महाशराः ।
गभस्तय इवार्कस्य प्रतपन्तः समन्ततः ॥ २७
तस्मिन्द्रोणेन निहताः पाञ्चालाः पञ्चविंशतिः ।
महारथसमाख्याता धृष्टद्युम्नस्य संमताः ॥ २८
पाण्डूनां सर्वसैन्येषु पाञ्चालानां तथैव च ।
द्रोणं स्म ददृशुः शूरं विनिघ्नन्तं वरान्वरान् ॥ २९
केकयानां शतं हत्वा विद्राव्य च समन्ततः ।
द्रोणस्तस्थौ महाराज व्यादितास्य इवान्तकः ॥ ३०
पाञ्चालान्सृञ्जयान्मत्स्यान्केकयान्पाण्डवानपि ।
द्रोणोऽजयन्महाबाहुः शतशोऽथ सहस्रशः ॥ ३१
तेषां समभवच्छब्दो वध्यतां द्रोणसायकैः ।
वनौकसामिवारण्ये दह्यतां धूमकेतुना ॥ ३२
तत्र देवाः सगन्धर्वाः पितरश्चाब्रुवन्नृप ।
एते द्रवन्ति पाञ्चालाः पाण्डवाश्च ससैनिकाः ॥३३
तं तथा समरे द्रोणं निघ्नन्तं सोमकान्रणे ।
न चाप्यभिययुः केचिदपरे नैव विव्यधुः ॥ ३४
वर्तमाने तथा रौद्रे तस्मिन्वीरवरक्षये ।
अशृणोत्सहसा पार्थः पाञ्चजन्यस्य निस्वनम् ॥ ३५
पूरितो वासुदेवेन शङ्खराट् स्वनते भृशम् ।
युध्यमानेषु वीरेषु सैन्धवस्याभिरक्षिषु ॥ ३६
नदत्सु धार्तराष्ट्रेषु विजयस्य रथं प्रति ।
गाण्डीवस्य च निर्घोषे विप्रनष्टे समन्ततः ।
कश्मलाभिहतो राजा चिन्तयामास पाण्डवः ॥ ३७
न नूनं स्वस्ति पार्थस्य यथा नदति शङ्खराट् ।
कौरवाश्च यथा हृष्टा विनदन्ति मुहुर्मुहुः ॥ ३८
एवं संचिन्तयित्वा तु व्याकुलेनान्तरात्मना ।
अजातशत्रुः कौन्तेयः सात्वतं प्रत्यभाषत ॥ ३९
बाष्पगद्गदया वाचा मुह्यमानो मुहुर्मुहुः ।
कृत्यस्यानन्तरापेक्षी शैनेयं शिनिपुंगवम् ॥ ४०
यः स धर्मः पुरा दृष्टः सद्भिः शैनेय शाश्वतः ।
सांपराये सुहृत्कृत्ये तस्य कालोऽयमागतः ॥ ४१
सर्वेष्वपि च योधेषु चिन्तयञ्शिनिपुंगव ।
त्वत्तः सुहृत्तमं कंचिन्नाभिजानामि सात्यके ॥ ४२
यो हि प्रीतमना नित्यं यश्च नित्यमनुव्रतः ।
स कार्ये सांपराये तु नियोज्य इति मे मतिः ॥४३
यथा च केशवो नित्यं पाण्डवानां परायणम् ।

तथा त्वमपि वार्ष्णेय कृष्णतुल्यपराक्रमः ॥ ४४
सोऽहं भारं समाधास्ये त्वयि तं वोढुमर्हसि ।
अभिप्रायं च मे नित्यं न वृथा कर्तुमर्हसि ॥ ४५
स त्वं भ्रातुर्वयस्यस्य गुरोरपि च संयुगे ।
कुरु कृच्छ्रे सहायार्थमर्जुनस्य नरर्षभ ॥ ४६
त्वं हि सत्यव्रतः शूरो मित्राणामभयंकरः ।
लोके विख्यायसे वीर कर्मभिः सत्यवागिति ॥ ४७
यो हि शैनेय मित्रार्थे युध्यमानस्त्यजेत्तनुम् ।
पृथिवीं वा द्विजातिभ्यो यो दद्यात्सममेव तत् ॥ ४८
श्रुताश्च बहवोऽस्माभी राजानो ये दिवं गताः ।
दत्त्वेमां पृथिवीं कृत्स्नां ब्राह्मणेभ्यो यथाविधि ॥
एवं त्वामपि धर्मात्मन्प्रयाचेऽहं कृताञ्जलिः ।
पृथिवीदानतुल्यं स्यादधिकं वा फलं विभो ॥ ५०
एक एव सदा कृष्णो मित्राणामभयंकरः ।
रणे संत्यजति प्राणान्द्वितीयस्त्वं च सात्यके ॥ ५१
विक्रान्तस्य च वीरस्य युद्धे प्रार्थयतो यशः ।
शूर एव सहायः स्यान्नेतरः प्राकृतो जनः ॥ ५२
ईदृशे तु परामर्दे वर्तमानस्य माधव ।
त्वदन्यो हि रणे गोप्ता विजयस्य न विद्यते ॥ ५३
श्लाघन्नेव हि कर्माणि शतशस्तव पाण्डवः ।
मम संजनयन्हर्षं पुनः पुनरकीर्तयत् ॥ ५४
लघ्वस्त्रश्चित्रयोधी च तथा लघुपराक्रमः ।
प्राज्ञः सर्वास्त्रविच्छूरो मुह्यते न च संयुगे ॥ ५५
महास्कन्धो महोरस्को महाबाहुर्महाधनुः ।
महाबलो महावीर्यः स महात्मा महारथः ॥ ५६
शिष्यो मम सखा चैव प्रियोऽस्याहं प्रियश्च मे ।
युयुधानः सहायो मे प्रमथिष्यति कौरवान् ॥ ५७
अस्मदर्थं च राजेन्द्र संनह्येद्यदि केशवः ।
रामो वाप्यनिरुद्धो वा प्रद्युम्नो वा महारथः ॥ ५८
गदो वा सारणो वापि साम्बो वा सह वृष्णिभिः ।
सहायार्थं महाराज संग्रामोत्तममूर्धनि ॥ ५९
तथाप्यहं नरव्याघ्रं शैनेयं सत्यविक्रमम् ।
साहाय्ये विनियोक्ष्यामि नास्ति मेऽन्यो हि तत्समः ॥
इति द्वैतवने तात मामुवाच धनंजयः ।
परोक्षं त्वद्गुणांस्तथ्यान्कथयन्नार्यसंसदि ॥ ६१
तस्य त्वमेवं संकल्पं न वृथा कर्तुमर्हसि ।
धनंजयस्य वार्ष्णेय मम भीमस्य चोभयोः ॥ ६२
यच्चापि तीर्थानि चरन्नगच्छं द्वारकां प्रति ।
तत्राहमपि ते भक्तिमर्जुनं प्रति दृष्टवान् ॥ ६३
न तत्सौहृदमन्येषु मया शैनेय लक्षितम् ।
यथा त्वमस्मान्भजसे वर्तमानानुपप्लवे ॥ ६४
सोऽभिजात्या च भक्त्या च सख्यस्याचार्यकस्य च
सौहृदस्य च वीर्यस्य कुलीनत्वस्य माधव ॥ ६५
सत्यस्य च महाबाहो अनुकम्पार्थमेव च ।
अनुरूपं महेष्वास कर्म त्वं कर्तुमर्हसि ॥ ६६
सुयोधनो हि सहसा गतो द्रोणेन दंशितः ।
पूर्वमेव तु यातास्ते कौरवाणां महारथाः ॥ ६७
सुमहान्निनदश्चैव श्रूयते विजयं प्रति ।
स शैनेय जवेनात्र गन्तुमर्हसि माधव ॥ ६८
भीमसेनो वयं चैव संयत्ताः सहसैनिकाः ।
द्रोणमावारयिष्यामो यदि त्वां प्रति यास्यति ॥ ६९
पश्य शैनेय सैन्यानि द्रवमाणानि संयुगे ।
महान्तं च रणे शब्दं दीर्यमाणां च भारतीम् ॥ ७०
महामारुतवेगेन समुद्रमिव पर्वसु ।
धार्तराष्ट्रबलं तात विक्षिप्तं सव्यसाचिना ॥ ७१
रथैर्विपरिधावद्भिर्मनुष्यैश्च हयैश्च ह ।
सैन्यं रजःसमुद्धूतमेतत्संपरिवर्तते ॥ ७२
संवृतः सिन्धुसौवीरैर्नखरप्रासयोधिभिः ।
अत्यन्तापचितैः शूरैः फल्गुनः परवीरहा ॥ ७३
नैतद्बलमसंवार्य शक्यो हन्तुं जयद्रथः ।

एते हि सैन्धवस्यार्थे सर्वे संत्यक्तजीविताः ।। ७४
शरशक्तिध्वजवनं हयनागसमाकुलम् ।
पश्यैतद्धार्तराष्ट्राणामनीकं सुदुरासदम् ।। ७५
शृणु दुन्दुभिनिर्घोषं शङ्खशब्दांश्च पुष्कलान् ।
सिंहनादरवांश्चैव रथनेमिस्वनांस्तथा ।। ७६
नागानां शृणु शब्दं च पत्तीनां च सहस्रशः ।
सादिनां द्रवतां चैव शृणु कम्पयतां महीम् ।। ७७
पुरस्तात्सैन्धवानीकं द्रोणानीकस्य पृष्ठतः ।
बहुत्वाद्धि नरव्याघ्र देवेन्द्रमपि पीडयेत् ।। ७८
अपर्यन्ते बले मग्नो जह्यादपि च जीवितम् ।
तस्मिंश्च निहते युद्धे कथं जीवेत मादृशः ।
सर्वथाहमनुप्राप्तः सुकृच्छ्रं बत जीवितम् ।। ७९
श्यामो युवा गुडाकेशो दर्शनीयश्च पाण्डवः ।
लघ्वस्त्रश्चित्रयोधी च प्रविष्टस्तात भारतीम् ।। ८०
सूर्योदये महाबाहुर्दिवसश्चातिवर्तते ।
तन्न जानामि वार्ष्णेय यदि जीवति वा न वा ।
कुरूणां चापि तत्सैन्यं सागरप्रतिमं महत् ।। ८१
एक एव च बीभत्सुः प्रविष्टस्तात भारतीम् ।
अविषह्यां महाबाहुः सुरैरपि महामृधे ।। ८२
न च मे वर्तते बुद्धिरद्य युद्धे कथंचन ।
द्रोणोऽपि रभसो युद्धे मम पीडयते बलम् ।
प्रत्यक्षं ते महाबाहो यथासौ चरति द्विजः ।। ८३
युगपच्च समेतानां कार्याणां त्वं विचक्षणः ।
महार्थं लघुसंयुक्तं कर्तुमर्हसि माधव ।। ८४
तस्य मे सर्वकार्येषु कार्यमेतन्मतं सदा ।
अर्जुनस्य परित्राणं कर्तव्यमिति संयुगे ।। ८५
नाहं शोचामि दाशार्हं गोप्तारं जगतः प्रभुम् ।
स हि शक्तो रणे तात त्रीँल्लोकानपि संगताम् ।।
विजेतुं पुरुषव्याघ्र सत्यमेतद्ब्रवीमि ते ।
किं पुनर्धार्तराष्ट्रस्य बलमेतत्सुदुर्बलम् ।। ८७
अर्जुनस्त्वेव वार्ष्णेय पीडितो बहुभिर्युधि ।
प्रजह्यात्समरे प्राणांस्तस्माद्विन्दामि कश्मलम् ।। ८८
तस्य त्वं पदवीं गच्छ गच्छेयुस्त्वादृशा यथा ।
तादृशस्येदृशे काले मादृशेनाभिचोदितः ।। ८९
रणे वृष्णिप्रवीराणां द्वावेवातिरथौ स्मृतौ ।
प्रद्युम्नश्च महाबाहुस्त्वं च सात्वत विश्रुतः ।। ९०
अस्त्रे नारायणसमः संकर्षणसमो बले ।
वीरतायां नरव्याघ्र धनंजयसमो ह्यसि ।। ९१
भीष्मद्रोणावतिक्रम्य सर्वयुद्धविशारदम् ।
त्वामद्य पुरुषव्याघ्रं लोके सन्तः प्रचक्षते ।। ९२
नासाध्यं विद्यते लोके सात्यकेरिति माधव ।
तत्त्वां यदभिवक्ष्यामि तत्कुरुष्व महाबल ।। ९३
संभावना हि लोकस्य तव पार्थस्य चोभयोः ।
नान्यथा तां महाबाहो संप्रकर्तुमिहार्हसि ।। ९४
परित्यज्य प्रियान्प्राणान्रणे विचर वीरवत् ।
न हि शैनेय दाशार्हा रणे रक्षन्ति जीवितम् ।।९५
अयुद्धमनवस्थानं संग्रामे च पलायनम् ।
भीरूणामसतां मार्गो नैष दाशार्हसेवितः ।। ९६
तवार्जुनो गुरुस्तात धर्मात्मा शिनिपुंगव ।
वासुदेवो गुरुश्चापि तव पार्थस्य धीमतः ।। ९७
कारणद्वयमेतद्धि जानानस्त्वाहमब्रुवम् ।
मावमंस्था वचो मह्यं गुरुस्तव गुरोर्ह्यहम् ।। ९८
वासुदेवमतं चैतन्मम चैवार्जुनस्य च ।
सत्यमेतन्मयोक्तं ते याहि यत्र धनंजयः ।। ९९
एतद्वचनमाज्ञाय मम सत्यपराक्रम ।
प्रविशैतद्बलं तात धार्तराष्ट्रस्य दुर्मतेः ।। १००
प्रविश्य च यथान्यायं संगम्य च महारथैः ।
यथार्हमात्मनः कर्म रणे सात्वत दर्शय ।। १०१

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चाशीतितमोऽध्यायः ।। ८५ ।।

८६

संजय उवाच।

प्रीतियुक्तं च हृद्यं च मधुराक्षरमेव च।
कालयुक्तं च चित्रं च स्वतया चाभिभाषितम् ॥ १
धर्मराजस्य तद्वाक्यं निशम्य शिनिपुंगवः।
सात्यकिर्भरतश्रेष्ठ प्रत्युवाच युधिष्ठिरम् ॥ २
श्रुतं ते गदतो वाक्यं सर्वमेतन्मयाच्युत।
न्याययुक्तं च चित्रं च फल्गुनार्थे यशस्करम् ॥ ३
एवंविधे तथा काले मादृशं प्रेक्ष्य संमतम्।
वक्तुमर्हसि राजेन्द्र यथा पार्थं तथैव माम् ॥ ४
न मे धनंजयस्यार्थे प्राणा रक्ष्याः कथंचन।
त्वत्प्रयुक्तः पुनरहं किं न कुर्यां महाहवे ॥ ५
लोकत्रयं योधयेयं सदेवासुरमानुषम्।
त्वत्प्रयुक्तो नरेन्द्रेह किमुतैतत्सुदुर्बलम् ॥ ६
सुयोधनबलं त्वद्य योधयिष्ये समन्ततः।
विजेष्ये च रणे राजन्सत्यमेतद्ब्रवीमि ते ॥ ७
कुशल्यहं कुशलिनं समासाद्य धनंजयम्।
हते जयद्रथे राजन्पुनरेष्यामि तेऽन्तिकम् ॥ ८
अवश्यं तु मया सर्वं विज्ञाप्यस्त्वं नराधिप।
वासुदेवस्य यद्वाक्यं फल्गुनस्य च धीमतः ॥ ९
दृढं त्वभिपरीतोऽहमर्जुनेन पुनः पुनः।
मध्ये सर्वस्य सैन्यस्य वासुदेवस्य शृण्वतः ॥ १०
अद्य माधव राजानमप्रमत्तोऽनुपालय।
आर्यां युद्धे मतिं कृत्वा यावद्धन्मि जयद्रथम् ॥ ११
त्वयि वाहं महाबाहो प्रद्युम्ने वा महारथे।
नृपं निक्षिप्य गच्छेयं निरपेक्षो जयद्रथम् ॥ १२
जानीषे हि रणे द्रोणं रभसं श्रेष्ठसंमतम्।
प्रतिज्ञा चापि ते नित्यं श्रुता द्रोणस्य माधव ॥ १३
ग्रहणं धर्मराजस्य भारद्वाजोऽनुगृध्यति।
शक्तश्चापि रणे द्रोणो निग्रहीतुं युधिष्ठिरम् ॥ १४
एवं त्वयि समाधाय धर्मराजं नरोत्तमम्।
अहमद्य गमिष्यामि सैन्धवस्य वधाय हि ॥ १५
जयद्रथमहं हत्वा ध्रुवमेष्यामि माधव।
धर्मराजं यथा द्रोणो निगृह्णीयाद्रणे बलात् ॥ १६
निगृहीते नरश्रेष्ठे भारद्वाजेन माधव।
सैन्धवस्य वधो न स्यान्ममाप्रीतिस्तथा भवेत् ॥ १७
एवं गते नरश्रेष्ठ पाण्डवे सत्यवादिनि।
अस्माकं गमनं व्यक्तं वनं प्रति भवेत्पुनः ॥ १८
सोऽयं मम जयो व्यक्तं व्यर्थ एव भविष्यति।
यदि द्रोणो रणे क्रुद्धो निगृह्णीयाद्युधिष्ठिरम् ॥ १९
स त्वमद्य महाबाहो प्रियार्थं मम माधव।
जयार्थं च यशोर्थं च रक्ष राजानमाहवे ॥ २०
स भवान्मयि निक्षेपो निक्षिप्तः सव्यसाचिना।
भारद्वाजाद्भयं नित्यं पश्यमानेन ते प्रभो ॥ २१
तस्यापि च महाबाहो नित्यं पश्यति संयुगे।
नान्यं हि प्रतियोद्धारं रौक्मिणेयादृते प्रभो।
मां वापि मन्यते युद्धे भारद्वाजस्य धीमतः ॥ २२
सोऽहं संभावनां चैतामाचार्यवचनं च तत्।
पृष्ठतो नोत्सहे कर्तुं त्वां वा त्यक्तुं महीपते ॥ २३
आचार्यो लघुहस्तत्वादभेद्यकवचावृतः।
उपलभ्य रणे क्रीडेद्यथा शकुनिना शिशुः ॥ २४
यदि कार्ष्णिर्धनुष्पाणिरिह स्यान्मकरध्वजः।
तस्मै त्वां विसृजेयं वै स त्वां रक्षेद्यथार्जुनः ॥२५
कुरु त्वमात्मनो गुप्तिं कस्ते गोप्ता गते मयि।
यः प्रतीयाद्रणे द्रोणं यावद्गच्छामि पाण्डवम् ॥ २६
मा च ते भयमद्यास्तु राजन्नर्जुनसंभवम्।
न स जातु महाबाहुर्भारमुद्यम्य सीदति ॥ २७
ये च सौवीरका योधास्तथा सैन्धवपौरवाः।
उदीच्या दाक्षिणात्याश्च ये चान्येऽपि महारथाः ॥२८
ये च कर्णमुखा राजन्रथोदाराः प्रकीर्तिताः।

एतेऽर्जुनस्य क्रुद्धस्य कलां नार्हन्ति षोडशीम् ।।२९
उद्युक्ता पृथिवी सर्वा ससुरासुरमानुषा ।
सराक्षसगणा राजन्सकिंनरमहोरगा ।। ३०
जङ्गमाः स्थावरैः सार्धं नालं पार्थस्य संयुगे ।
एवं ज्ञात्वा महाराज व्येतु ते भीर्धनंजये ।। ३१
यत्र वीरौ महेष्वासौ कृष्णौ सत्यपराक्रमौ ।
न तत्र कर्मणो व्यापत्कथंचिदपि विद्यते ।। ३२
दैवं कृतास्त्रतां योगममर्षमपि चाहवे ।
कृतज्ञतां दयां चैव भ्रातुस्त्वमनुचिन्तय ।। ३३
मयि चाप्यपयाते वै गच्छमानेऽर्जुनं प्रति ।
द्रोणे चित्रास्त्रतां संख्ये राजंस्त्वमनुचिन्तय ।। ३४
आचार्यो हि भृशं राजन्निग्रहे तव गृध्यति ।
प्रतिज्ञामात्मनो रक्षन्सत्यां कर्तुं च भारत ।। ३५
कुरुष्वाद्यात्मनो गुप्तिं कस्ते गोप्ता गते मयि ।
यस्याहं प्रत्ययात्पार्थं गच्छेयं फल्गुनं प्रति ।। ३६
न ह्यहं त्वा महाराज अनिक्षिप्य महाहवे ।
क्वचिद्यास्यामि कौरव्य सत्यमेतद्ब्रवीमि ते ।। ३७
एतद्विचार्य बहुशो बुद्ध्या बुद्धिमतां वर ।
दृष्ट्वा श्रेयः परं बुद्ध्या ततो राजन्प्रशाधि माम् ।।३८

युधिष्ठिर उवाच ।

एवमेतन्महाबाहो यथा वदसि माधव ।
न तु मे शुध्यते भावः श्वेताश्वं प्रति मारिष ।।३९
करिष्ये परमं यत्नमात्मनो रक्षणं प्रति ।
गच्छ त्वं समनुज्ञातो यत्र यातो धनंजयः ।।४०
आत्मसंरक्षणं संख्ये गमनं चार्जुनं प्रति ।
विचार्यैतद्द्वयं बुद्ध्या गमनं तत्र रोचये ।। ४१
स त्वमातिष्ठ यानाय यत्र यातो धनंजयः ।
ममापि रक्षणं भीमः करिष्यति महाबलः ।। ४२
पार्षतश्च ससोदर्यः पार्थिवाश्च महाबलाः ।
द्रौपदेयाश्च मां तात रक्षिष्यन्ति न संशयः ।। ४३
केकया भ्रातरः पञ्च राक्षसश्च घटोत्कचः ।
विराटो द्रुपदश्चैव शिखण्डी च महारथः ।। ४४
धृष्टकेतुश्च बलवान्कुन्तिभोजश्च मारिष ।
नकुलः सहदेवश्च पाञ्चालाः सृञ्जयास्तथा ।
एते समाहितास्तात रक्षिष्यन्ति न संशयः ।। ४५
न द्रोणः सह सैन्येन कृतवर्मा च संयुगे ।
समासादयितुं शक्तो न च मां धर्षयिष्यति ।। ४६
धृष्टद्युम्नश्च समरे द्रोणं क्रुद्धं परंतपः ।
वारयिष्यति विक्रम्य वेलेव मकरालयम् ।। ४७
यत्र स्थास्यति संग्रामे पार्षतः परवीरहा ।
न द्रोणसैन्यं बलवत्क्रामेत्तत्र कथंचन ।। ४८
एष द्रोणविनाशाय समुत्पन्नो हुताशनात् ।
कवची स शरी खड्गी धन्वी च वरभूषणः ।। ४९
विश्रब्धो गच्छ शैनेय मा कार्षीर्मयि संभ्रमम् ।
धृष्टद्युम्नो रणे क्रुद्धो द्रोणमावारयिष्यति ।। ५०

इति श्रीमहाभारते द्रोणपर्वणि
षडशीतितमोऽध्यायः ॥ ८६ ॥

८७

संजय उवाच ।

धर्मराजस्य तद्वाक्यं निशम्य शिनिपुंगवः ।
पार्थाच्च भयमाशङ्कन्परित्यागान्महीपतेः ।। १
अपवादं ह्यात्मनश्च लोकाद्रक्षन्विशेषतः ।
न मां भीत इति ब्रूयुरायान्तं फल्गुनं प्रति ।। २
निश्चित्य बहुधैवं स सात्यकिर्युद्धदुर्मदः ।
धर्मराजमिदं वाक्यमब्रवीत्पुरुषर्षभ ।। ३
कृतां चेन्मन्यसे रक्षां स्वस्ति तेऽस्तु विशां पते ।
अनुयास्यामि बीभत्सुं करिष्ये वचनं तव ।। ४
न हि मे पाण्डवात्कश्चित्त्रिषु लोकेषु विद्यते ।
यो वै प्रियतरो राजन्सत्यमेतद्ब्रवीमि ते ।। ५
तस्याहं पदवीं यास्ये संदेशात्तव मानद ।

त्वत्कृते न च मे किंचिदकर्तव्यं कथंचन ॥ ६
यथा हि मे गुरोर्वाक्यं विशिष्टं द्विपदां वर ।
तथा तवापि वचनं विशिष्टतरमेव मे ॥ ७
प्रिये हि तव वर्तेते भ्रातरौ कृष्णपाण्डवौ ।
तयोः प्रिये स्थितं चैव विद्धि मां राजपुंगव ॥ ८
तवाज्ञां शिरसा गृह्य पाण्डवार्थमहं प्रभो ।
भित्त्वेदं दुर्भिदं सैन्यं प्रयास्ये नरसत्तम ॥ ९
द्रोणानीकं विशाम्येष क्रुद्धो झष इवार्णवम् ।
तत्र यास्यामि यत्रासौ राजन्राजा जयद्रथः ॥ १०
यत्र सेनां समाश्रित्य भीतस्तिष्ठति पाण्डवात् ।
गुप्तो रथवरश्रेष्ठैर्द्रौणिकर्णकृपादिभिः ॥ ११
इतस्त्रियोजनं मन्ये तमध्वानं विशां पते ।
यत्र तिष्ठति पार्थोऽसौ जयद्रथवधोद्यतः ॥ १२
त्रियोजनगतस्यापि तस्य यास्याम्यहं पदम् ।
आ सैन्धववधाद्राजन्सुदृढेनान्तरात्मना ॥ १३
अनादिष्टस्तु गुरुणा को नु युध्येत मानवः ।
आदिष्टस्तु त्वया राजन्को न युध्येत मादृशः ।
अभिजानामि तं देशं यत्र यास्याम्यहं प्रभो ॥ १४
हुडशक्तिगदाप्रासखड्गचर्मर्ष्टितोमरम् ।
इष्वस्त्रवरसंबाधं क्षोभयिष्ये बलार्णवम् ॥ १५
यदेतत्कुञ्जरानीकं साहस्रमनुपश्यसि ।
कुलमञ्जनकं नाम यत्रैते वीर्यशालिनः ॥ १६
आस्थिता बहुभिर्म्लेच्छैर्युद्धशौण्डैः प्रहारिभिः ।
नागा मेघनिभा राजन्क्षरन्त इव तोयदाः ॥ १७
नैते जातु निवर्तेरन्प्रेषिता हस्तिसादिभिः ।
अन्यत्र हि वधादेषां नास्ति राजन्पराजयः ॥ १८
अथ यान्रथिनो राजन्समन्तादनुपश्यसि ।
एते रुक्मरथा नाम राजपुत्रा महारथाः ॥ १९
रथेष्वस्त्रेषु निपुणा नागेषु च विशां पते ।
धनुर्वेदे गताः पारं मुष्टियुद्धे च कोविदाः ॥ २०
गदायुद्धविशेषज्ञा नियुद्धकुशलास्तथा ।
खड्गप्रहरणे युक्ताः संपाते चासिचर्मणोः ॥ २१
शूराश्च कृतविद्याश्च स्पर्धन्ते च परस्परम् ।
नित्यं च समरे राजन्विजिगीषन्ति मानवान् ॥ २२
कर्णेन विजिता राजन्दुःशासनमनुव्रताः ।
एतांस्तु वासुदेवोऽपि रथोदारान्प्रशंसति ॥ २३
सततं प्रियकामाश्च कर्णस्यैते वशे स्थिताः ।
तस्यैव वचनाद्राजन्निवृत्ताः श्वेतवाहनात् ॥ २४
ते न क्षता न च श्रान्ता दृढावरणकार्मुकाः ।
मदर्थं विष्ठिता नूनं धार्तराष्ट्रस्य शासनात् ॥ २५
एतान्प्रमथ्य संग्रामे प्रियार्थं तव कौरव ।
प्रयास्यामि ततः पश्चात्पदवीं सव्यसाचिनः ॥ २६
यांस्त्वेतानपरान्राजन्नागान्सप्रशतानि च ।
प्रेक्षसे वर्मसंछन्नान्किरातैः समधिष्ठितान् ॥ २७
किरातराजो यान्प्रादाद्गृहीतः सव्यसाचिना ।
स्वलंकृतांस्तथा प्रेष्यानिच्छञ्जीवितमात्मनः ॥ २८
आसन्नेते पुरा राजंस्तव कर्मकरा दृढम् ।
त्वामेवाद्य युयुत्सन्ते पश्य कालस्य पर्ययम् ॥ २९
तेषामेते महामात्राः किराता युद्धदुर्मदाः ।
हस्तिशिक्षाविदश्चैव सर्वे चैवाग्नियोनयः ॥ ३०
एते विनिर्जिताः सर्वे संग्रामे सव्यसाचिना ।
मदर्थमद्य संयत्ता दुर्योधनवशानुगाः ॥ ३१
एतान्भित्त्वा शरै राजन्किरातान्युद्धदुर्मदान् ।
सैन्धवस्य वधे युक्तमनुयास्यामि पाण्डवम् ॥ ३२
ये त्वेते सुमहानागा अञ्जनस्य कुलोद्भवाः ।
कर्कशाश्च विनीताश्च प्रभिन्नकरटामुखाः ॥ ३३
जाम्बूनदमयैः सर्वैर्वर्मभिः सुविभूषिताः ।
लब्धलक्ष्या रणे राजन्नैरावणसमा युधि ॥ ३४
उत्तरात्पर्वतादेते तीक्ष्णैर्दस्युभिरास्थिताः ।
कर्कशैः प्रवरैर्योधैः कार्ष्णायसतनुच्छदैः ॥ ३५

सन्ति गोयोनयश्चात्र सन्ति वानरयोनयः ।
अनेकयोनयश्चान्ये तथा मानुषयोनयः ॥ ३६
अनीकमसतामेतद्धूमवर्णमुदीर्यते ।
म्लेच्छानां पापकर्तृणां हिमवद्दुर्गवासिनाम् ॥ ३७
एतद्दुर्योधनो लब्ध्वा समग्रं नागमण्डलम् ।
कृपं च सौमदत्तिं च द्रोणं च रथिनां वरम् ॥३८
सिन्धुराजं तथा कर्णमवमन्यत पाण्डवान् ।
कृतार्थमथ चात्मानं मन्यते कालचोदितः ॥ ३९
ते च सर्वेऽनुसंप्राप्ता मम नाराचगोचरम् ।
न विमोक्ष्यन्ति कौन्तेय यद्यपि स्युर्मनोजवाः ॥ ४०
तेन संभाविता नित्यं परवीर्योपजीविना ।
विनाशमुपयास्यन्ति मच्छरौघनिपीडिताः ॥ ४१
ये त्वेते रथिनो राजन्दृश्यन्ते काञ्चनध्वजाः ।
एते दुर्वारणा नाम काम्बोजा यदि ते श्रुताः ॥४२
शूराश्च कृतविद्याश्च धनुर्वेदे च निष्ठिताः ।
संहताश्च भृशं ह्येते अन्योन्यस्य हितैषिणः ॥ ४३
अक्षौहिण्यश्च संरब्धा धार्तराष्ट्रस्य भारत ।
यत्ता मदर्थं तिष्ठन्ति कुरुवीराभिरक्षिताः ॥ ४४
अप्रमत्ता महाराज मामेव प्रत्युपस्थिताः ।
तांस्त्वहं प्रमथिष्यामि तृणानीव हुताशनः ॥ ४५
तस्मात्सर्वानुपासङ्गान्सर्वोपकरणानि च ।
रथे कुर्वन्तु मे राजन्यथावद्रथकल्पकाः ॥ ४६
अस्मिंस्तु खलु संग्रामे ग्राह्यं विविधमायुधम् ।
यथोपदिष्टमाचार्यैः कार्यः पञ्चगुणो रथः ॥ ४७
काम्बोजैर्हि समेष्यामि क्रुद्धैराशीविषोपमैः ।
नानाशस्त्रसमावापैर्विविधायुधयोधिभिः ॥ ४८
किरातैश्च समेष्यामि विषकल्पैः प्रहारिभिः ।
लालितैः सततं राज्ञा दुर्योधनहितैषिभिः ॥ ४९
शकैश्चापि समेष्यामि शक्रतुल्यपराक्रमैः ।
अग्निकल्पैर्दुराधर्षैः प्रदीप्तैरिव पावकैः ॥ ५०
तथान्यैर्विविधैर्योधैः कालकल्पैर्दुरासदैः ।
समेष्यामि रणे राजन्बहुभिर्युद्धदुर्मदैः ॥ ५१
तस्माद्वै वाजिनो मुख्या विश्रान्ताः शुभलक्षणाः ।
उपावृत्ताश्च पीताश्च पुनर्युज्यन्तु मे रथे ॥ ५२
तस्य सर्वानुपासङ्गान्सर्वोपकरणानि च ।
रथे प्रास्थापयद्राजा शस्त्राणि विविधानि च ॥ ५३
ततस्तान्सर्वतो मुक्त्वा सदश्वांश्चतुरो जनाः ।
रसवत्पाययामासुः पानं मदसमीरणम् ॥ ५४
पीतोपवृत्तान्स्नातांश्च जग्धान्नान्समलंकृतान् ।
विनीतशल्यांस्तुरगांश्चतुरो हेममालिनः ॥ ५५
तान्युक्तान्रुक्मवर्णाभान्विनीताञ्शीघ्रगामिनः ।
संहृष्टमनसोऽव्यग्रान्विधिवत्कल्पिते रथे ॥ ५६
महाध्वजेन सिंहेन हेमकेसरमालिना ।
संवृते केतनैर्हैमैर्मणिविद्रुमचित्रितैः ।
पाण्डुराभ्रप्रकाशाभिः पताकाभिरलंकृते ॥ ५७
हेमदण्डोच्छ्रितच्छत्रे बहुशस्त्रपरिच्छदे ।
योजयामास विधिवद्धेमभाण्डविभूषितान् ॥ ५८
दारुकस्यानुजो भ्राता सूतस्तस्य प्रियः सखा ।
न्यवेदयद्रथं युक्तं वासवस्येव मातलिः ॥ ५९
ततः स्नातः शुचिर्भूत्वा कृतकौतुकमङ्गलः ।
स्नातकानां सहस्रस्य स्वर्णनिष्कानदापयत् ।
आशीर्वादैः परिष्वक्तः सात्यकिः श्रीमतां वरः ॥
ततः स मधुपर्कार्हः पीत्वा कैलावतं मधु ।
लोहिताक्षो बभौ तत्र मदविह्वललोचनः ॥ ६१
आलभ्य वीरकांस्यं च हर्षेण महतान्वितः ।
द्विगुणीकृततेजा हि प्रज्वलन्निव पावकः ।
उत्सङ्गे धनुरादाय सशरं रथिनां वरः ॥ ६२
कृतस्वस्त्ययनो विप्रैः कवची समलंकृतः ।
लाजैर्गन्धैस्तथा माल्यैः कन्याभिश्चाभिनन्दितः ॥६३
युधिष्ठिरस्य चरणावभिवाद्य कृताञ्जलिः ।

तेन मूर्धन्युपाघ्रात आरुरोह महारथम् ॥ ६४
ततस्ते वाजिनो हृष्टाः सुपुष्टा वातरंहसः ।
अजय्या जैत्रमूहुस्तं विकुर्वन्तः स्म सैन्धवाः ॥६५
अथ हर्षपरीताङ्गः सात्यकिर्भीममब्रवीत् ।
त्वं भीम रक्ष राजानमेतत्कार्यतमं हि ते ॥ ६६
अहं भित्त्वा प्रवेक्ष्यामि कालपक्वमिदं बलम् ।
आयत्यां च तदात्वे च श्रेयो राज्ञोऽभिरक्षणम् ॥६७
जानीषे मम वीर्यं त्वं तव चाहमरिंदम ।
तस्माद्भीम निवर्तस्व मम चेदिच्छसि प्रियम् ॥६८
तथोक्तः सात्यकिं प्राह व्रज त्वं कार्यसिद्धये ।
अहं राज्ञः करिष्यामि रक्षां पुरुषसत्तम ॥ ६९
एवमुक्तः प्रत्युवाच भीमसेनं स माधवः ।
गच्छ गच्छ द्रुतं पार्थ ध्रुवोऽद्य विजयो मम ॥७०
यन्मे स्निग्धोऽनुरक्तश्च त्वमद्य वशगः स्थितः ।
निमित्तानि च धन्यानि यथा भीम वदन्ति मे ॥७१
निहते सैन्धवे पापे पाण्डवेन महात्मना ।
परिष्वजिष्ये राजानं धर्मात्मानं न संशयः ॥ ७२
एतावदुक्त्वा भीमं तु विसृज्य च महामनाः ।
संप्रैक्षत्तावकं सैन्यं व्याघ्रो मृगगणानिव ॥ ७३
तं दृष्ट्वा प्रविविक्षन्तं सैन्यं तव जनाधिप ।
भूय एवाभवन्मूढं सुभृशं चाप्यकम्पत ॥ ७४
ततः प्रयातः सहसा सैन्यं तव स सात्यकिः ।
दिदृक्षुरर्जुनं राजन्धर्मराजस्य शासनात् ॥ ७५

इति श्रीमहाभारते द्रोणपर्वणि
सप्providedाशीतितमोऽध्यायः ॥ ८७ ॥

८८

संजय उवाच ।

प्रयाते तव सैन्यं तु युयुधाने युयुत्सया ।
धर्मराजो महाराज स्वेनानीकेन संवृतः ।
प्रायाद्द्रोणरथप्रेप्सुर्युयुधानस्य पृष्ठतः ॥ १
ततः पाञ्चालराजस्य पुत्रः समरदुर्मदः ।
प्राक्रोशत्पाण्डवानीके वसुदानश्च पार्थिवः ॥ २
आगच्छत प्रहरत द्रुतं विपरिधावत ।
यथा सुखेन गच्छेत सात्यकिर्युद्धदुर्मदः ॥ ३
महारथा हि बहवो यतिष्यन्त्यस्य निर्जये ।
इति ब्रुवन्तो वेगेन समापेतुर्बलं तव ॥ ४
वयं प्रतिजिगीषन्तस्तत्र तान्समभिद्रुताः ।
ततः शब्दो महानासीद्युयुधानरथं प्रति ॥ ५
प्रकम्प्यमाना महती तव पुत्रस्य वाहिनी ।
सात्वतेन महाराज शतधाभिव्यदीर्यत ॥ ६
तस्यां विदीर्यमाणायां शिनेः पौत्रो महारथः ।
सप्त वीरान्महेष्वासानग्रानीके व्यपोथयत् ॥ ७
ते भीता मृद्यमानाश्च प्रमृष्टा दीर्घबाहुना ।
आयोधनं जहुर्वीरा दृष्ट्वा तमतिमानुषम् ॥ ८
रथैर्विमथिताक्षैश्च भग्ननीडैश्च मारिष ।
चक्रैर्विमथितैश्छिन्नैर्ध्वजैश्च विनिपातितैः ॥ ९
अनुकर्षैः पताकाभिः शिरस्त्राणैः सकाञ्चनैः ।
बाहुभिश्चन्दनादिग्धैः साङ्गदैश्च विशां पते ॥ १०
हस्तिहस्तोपमैश्चापि भुजगाभोगसंनिभैः ।
ऊरुभिः पृथिवी छन्ना मनुजानां नरोत्तम ॥ ११
शशाङ्कसंनिकाशैश्च वदनैश्चारुकुण्डलैः ।
पतितैर्वृषभाक्षाणां बभौ भारत मेदिनी ॥ १२
गजैश्च बहुधा छिन्नैः शयानैः पर्वतोपमैः ।
रराजातिभृशं भूमिर्विकीर्णैरिव पर्वतैः ॥ १३
तपनीयमयैर्योक्त्रैर्मुक्ताजालविभूषितैः ।
उरश्छदैर्विचित्रैश्च व्यशोभन्त तुरंगमाः ।
गतसत्त्वा महीं प्राप्य प्रमृष्टा दीर्घबाहुना ॥ १४
नानाविधानि सैन्यानि तव हत्वा तु सात्वतः ।
प्रविष्टस्तावकं सैन्यं द्रावयित्वा चमूं भृशम् ॥ १५
ततस्तेनैव मार्गेण येन यातो धनंजयः ।

इयेष सात्यकिर्गन्तुं ततो द्रोणेन वारितः ॥ १६
भारद्वाजं समासाद्य युयुधानस्तु मारिष ।
नाभ्यवर्तत संक्रुद्धो वेलामिव जलाशयः ॥ १७
निवार्य तु रणे द्रोणो युयुधानं महारथम् ।
विव्याध निशितैर्बाणैः पञ्चभिर्मर्मभेदिभिः ॥ १८
सात्यकिस्तु रणे द्रोणं राजन्विव्याध सप्तभिः ।
हेमपुङ्खैः शिलाधौतैः कङ्कबर्हिणवाजितैः ॥ १९
तं षड्भिः सायकैर्द्रोणः साश्वयन्तारमार्दयत् ।
स तं न ममृषे द्रोणं युयुधानो महारथः ॥ २०
सिंहनादं ततः कृत्वा द्रोणं विव्याध सात्यकिः ।
दशभिः सायकैश्चान्यैः षड्भिरष्टाभिरेव च ॥ २१
युयुधानः पुनर्द्रोणं विव्याध दशभिः शरैः ।
एकेन सारथिं चास्य चतुर्भिश्चतुरो हयान् ।
ध्वजमेकेन बाणेन विव्याध युधि मारिष ॥ २२
तं द्रोणः साश्वयन्तारं सरथध्वजमाशुगैः ।
त्वरन्प्राच्छादयद्बाणैः शलभानामिव व्रजैः ॥ २३
तथैव युयुधानोऽपि द्रोणं बहुभिराशुगैः ।
प्राच्छादयदसंभ्रान्तस्ततो द्रोण उवाच ह ॥ २४
तवाचार्यो रणं हित्वा गतः कापुरुषो यथा ।
युध्यमानं हि मां हित्वा प्रदक्षिणमवर्तत ॥ २५
त्वं हि मे युध्यतो नाद्य जीवन्मोक्ष्यसि माधव ।
यदि मां त्वं रणे हित्वा न यास्याचार्यवद्द्रुतम् ॥२६

सात्यकिरुवाच ।

धनंजयस्य पदवीं धर्मराजस्य शासनात् ।
गच्छामि स्वस्ति ते ब्रह्मन्न मे कालात्ययो भवेत् ॥

संजय उवाच ।

एतावदुक्त्वा शैनेय आचार्यं परिवर्जयन् ।
प्रयातः सहसा राजन्सारथिं चेदमब्रवीत् ॥ २८
द्रोणः करिष्यते यत्नं सर्वथा मम वारणे ।
यत्तो याहि रणे सूत शृणु चेदं वचः परम् ॥ २९
एतदालोक्यते सैन्यमावन्त्यानां महाप्रभम् ।
अस्यानन्तरतस्त्वेतद्दाक्षिणात्यं महाबलम् ॥ ३०
तदनन्तरमेतच्च बाह्लिकानां बलं महत् ।
बाह्लिकाभ्याशतो युक्तं कर्णस्यापि महद्बलम् ॥ ३१
अन्योन्येन हि सैन्यानि भिन्नान्येतानि सारथे ।
अन्योन्यं समुपाश्रित्य न त्यक्ष्यन्ति रणाजिरम् ॥
एतदन्तरमासाद्य चोदयाश्वान्प्रहृष्टवत् ।
मध्यमं जवमास्थाय वह मामत्र सारथे ॥ ३३
बाह्लिका यत्र दृश्यन्ते नानाप्रहरणोद्यताः ।
दाक्षिणात्याश्च बहवः सूतपुत्रपुरोगमाः ॥ ३४
हस्त्यश्वरथसंबाधं यच्चानीकं विलोक्यते ।
नानादेशसमुत्थैश्च पदातिभिरधिष्ठितम् ॥ ३५
एतावदुक्त्वा यन्तारं ब्राह्मणं परिवर्जयन् ।
स व्यतीयाय यत्रोग्रं कर्णस्य सुमहद्बलम् ॥ ३६
तं द्रोणोऽनुययौ क्रुद्धो विकिरन्विशिखान्बहून् ।
युयुधानं महाबाहुं गच्छन्तमनिवर्तिनम् ॥ ३७
कर्णस्य सैन्यं सुमहदभिहत्य शितैः शरैः ।
प्राविशद्भारतीं सेनामपर्यन्तां स सात्यकिः ॥ ३८
प्रविष्टे युयुधाने तु सैनिकेषु द्रुतेषु च ।
अमर्षी कृतवर्मा तु सात्यकिं पर्यवारयत् ॥ ३९
तमापतन्तं विशिखैः षड्भिराहत्य सात्यकिः ।
चतुर्भिश्चतुरोऽस्याश्वानाजघानाशु वीर्यवान् ॥ ४०
ततः पुनः षोडशभिर्नतपर्वभिराशुगैः ।
सात्यकिः कृतवर्माणं प्रत्यविध्यत्स्तनान्तरे ॥ ४१
स तुद्यमानो विशिखैर्बहुभिस्तिग्मतेजनैः ।
सात्वतेन महाराज कृतवर्मा न चक्षमे ॥ ४२
स वत्सदन्तं संधाय जिह्मगानलसंनिभम् ।
आकृष्य राजन्नाकर्णाद्विव्याधोरसि सात्यकिम् ॥
स तस्य देहावरणं भित्त्वा देहं च सायकः ।
सपत्रपुङ्खः पृथिवीं विवेश रुधिरोक्षितः ॥ ४४

अथास्य बहुभिर्बाणैरच्छिनत्परमास्त्रवित् ।
समार्गणगुणं राजन्कृतवर्मा शरासनम् ॥ ४५
विव्याध च रणे राजन्सात्यकिं सत्यविक्रमम् ।
दशभिर्विशिखैस्तीक्ष्णैरभिक्रुद्धः स्तनान्तरे ॥ ४६
ततः प्रशीर्णे धनुषि शक्त्या शक्तिमतां वरः ।
अभ्यहन्दक्षिणं बाहुं सात्यकिः कृतवर्मणः ॥ ४७
ततोऽन्यत्सुदृढं वीरो धनुरादाय सात्यकिः ।
व्यसृजद्विशिखांस्तूर्णं शतशोऽथ सहस्रशः ॥ ४८
सरथं कृतवर्माणं समन्तात्पर्यवाकिरत् ।
छादयित्वा रणेऽत्यर्थं हार्दिक्यं तु स सात्यकिः ॥
अथास्य भल्लेन शिरः सारथेः समकृन्तत ।
स पपात हतः सूतो हार्दिक्यस्य महारथात् ।
ततस्ते यन्तरि हते प्राद्रवंस्तुरगा भृशम् ॥ ५०
अथ भोजस्त्वसंभ्रान्तो निगृह्य तुरगान्स्वयम् ।
तस्थौ शरधनुष्पाणिस्तत्सैन्यान्यभ्यपूजयन् ॥ ५१
स मुहूर्तमिवाश्वस्य सदश्वान्समचोदयत् ।
व्यपेतभीरमित्राणामावहत्सुमहद्भयम् ।
सात्यकिश्चाभ्यगात्तस्मात्स तु भीममुपाद्रवत् ॥ ५२
युयुधानोऽपि राजेन्द्र द्रोणानीकाद्विनिःसृतः ।
प्रययौ त्वरितस्तूर्णं काम्बोजानां महाचमूम् ॥ ५३
स तत्र बहुभिः शूरैः संनिरुद्धो महारथैः ।
न चचाल तदा राजन्सात्यकिः सत्यविक्रमः ॥५४
संधाय च चमूं द्रोणो भोजे भारं निवेश्य च ।
अन्वधावद्रणे यत्तो युयुधानं युयुत्सया ॥ ५५
तथा तमनुधावन्तं युयुधानस्य पृष्ठतः ।
न्यवारयन्त संक्रुद्धाः पाण्डुसैन्ये बृहत्तमाः ॥ ५६
समासाद्य तु हार्दिक्यं रथानां प्रवरं रथम् ।
पाञ्चाला विगतोत्साहा भीमसेनपुरोगमाः ।
विक्रम्य वारिता राजन्वीरेण कृतवर्मणा ॥ ५७
यतमानांस्तु तान्सर्वानीषद्विगतचेतसः ।
अभितस्ताञ्शरौघेण क्लान्तवाहानवारयत् ॥ ५८
निगृहीतास्तु भोजेन भोजानीकेप्सवो रणे ।
अतिष्ठन्नार्यवद्वीराः प्रार्थयन्तो महद्यशः ॥ ५९

इति श्रीमहाभारते द्रोणपर्वणि
अष्टाशीतितमोऽध्यायः ॥ ८८ ॥

८९

धृतराष्ट्र उवाच ।

एवं बहुविधं सैन्यमेवं प्रविचितं वरम् ।
व्यूढमेवं यथान्यायमेवं बहु च संजय ॥ १
नित्यं पूजितमस्माभिरभिकामं च नः सदा ।
प्रौढमत्यद्भुताकारं पुरस्ताद्दृढविक्रमम् ॥ २
नातिवृद्धमबालं च न कृशं नातिपीवरम् ।
लघुवृत्तायतप्राणं सारगात्रमनामयम् ॥ ३
आत्तसंनाहसंपन्नं बहुशस्त्रपरिच्छदम् ।
शस्त्रग्रहणविद्यासु बह्वीषु परिनिष्ठितम् ॥ ४
आरोहे पर्यवस्कन्दे सरणे सान्तरप्लुते ।
सम्यक्प्रहरणे याने व्यपयाने च कोविदम् ॥ ५
नागेष्वश्वेषु बहुशो रथेषु च परीक्षितम् ।
परीक्ष्य च यथान्यायं वेतनेनोपपादितम् ॥ ६
न गोष्ठ्या नोपचारेण न संबन्धनिमित्ततः ।
नानाहूतो न ह्यभृतो मम सैन्ये बभूव ह ॥ ७
कुलीनार्यजनोपेतं तुष्टपुष्टमनुद्धतम् ।
कृतमानोपकारं च यशस्वि च मनस्वि च ॥ ८
सचिवैश्चापरैर्मुख्यैर्बहुभिर्मुख्यकर्मभिः ।
लोकपालोपमैस्तात पालितं नरसत्तमैः ॥ ९
बहुभिः पार्थिवैर्गुप्तमस्मत्प्रियचिकीर्षुभिः ।
अस्मानभिसृतैः कामात्सबलैः सपदानुगैः ॥ १०
महोदधिमिवापूर्णमापगाभिः समन्ततः ।
अपक्षैः पक्षिसंकाशै रथैरश्वैश्च संवृतम् ॥ ११
योधाक्षय्यजलं भीमं वाहनोर्मितरङ्गिणम् ।

क्षेपण्यसिगदाशक्तिशरप्रासझषाकुलम् ॥ १२
ध्वजभूषणसंबाधं रत्नपट्टेन संचितम् ।
वाहनैरपि धावद्भिर्वायुवेगविकम्पितम् ॥ १३
द्रोणगम्भीरपातालं कृतवर्ममहाह्रदम् ।
जलसंधमहाग्राहं कर्णचन्द्रोदयोद्धतम् ॥ १४
गते सैन्यार्णवं भित्त्वा तरसा पाण्डवर्षभे ।
संजयैकरथेनैव युयुधाने च मामकम् ॥ १५
तत्र शेषं न पश्यामि प्रविष्टे सव्यसाचिनि ।
सात्वते च रथोदारे मम सैन्यस्य संजय ॥ १६
तौ तत्र समतिक्रान्तौ दृष्ट्वाभीतौ तरस्विनौ ।
सिन्धुराजं च संप्रेक्ष्य गाण्डीवस्येषुगोचरे ॥ १७
किं तदा कुरवः कृत्यं विदधुः कालचोदिताः ।
दारुणैकायने काले कथं वा प्रतिपेदिरे ॥ १८
ग्रस्तान्हि कौरवान्मन्ये मृत्युना तात संगतान् ।
विक्रमो हि रणे तेषां न तथा दृश्यतेऽद्य वै ॥ १९
अक्षतौ संयुगे तत्र प्रविष्टौ कृष्णपाण्डवौ ।
न च वारयिता कश्चित्तयोरस्तीह संजय ॥ २०
भृताश्च बहवो योधाः परीक्ष्यैव महारथाः ।
वेतनेन यथायोग्यं प्रियवादेन चापरे ॥ २१
अकारणभृतस्तात मम सैन्ये न विद्यते ।
कर्मणा ह्यनुरूपेण लभ्यते भक्तवेतनम् ॥ २२
न च योधोऽभवत्कश्चिन्मम सैन्ये तु संजय ।
अल्पदानभृतस्तात न कुप्यभृतको नरः ॥ २३
पूजिता हि यथाशक्त्या दानमानासनैर्मया ।
तथा पुत्रैश्च मे तात ज्ञातिभिश्च सबान्धवैः ॥ २४
ते च प्राप्यैव संग्रामे निर्जिताः सव्यसाचिना ।
शैनेयेन परामृष्टाः किमन्यद्भागधेयतः ॥ २५
रक्ष्यते यश्च संग्रामे ये च संजय रक्षिणः ।
एकः साधारणः पन्था रक्ष्यस्य सह रक्षिभिः ॥ २६
अर्जुनं समरे दृष्ट्वा सैन्धवस्याग्रतः स्थितम् ।
पुत्रो मम भृशं मूढः किं कार्यं प्रत्यपद्यत ॥ २७
सात्यकिं च रणे दृष्ट्वा प्रविशन्तमभीतवत् ।
किं नु दुर्योधनः कृत्यं प्राप्तकालममन्यत ॥ २८
सर्वशस्त्रातिगौ सेनां प्रविष्टौ रथसत्तमौ ।
दृष्ट्वा कां वै धृतिं युद्धे प्रत्यपद्यन्त मामकाः ॥ २९
दृष्ट्वा कृष्णं तु दाशार्हमर्जुनार्थे व्यवस्थितम् ।
शिनीनामृषभं चैव मन्ये शोचन्ति पुत्रकाः ॥ ३०
दृष्ट्वा सेनां व्यतिक्रान्तां सात्वतेनार्जुनेन च ।
पलायमानांश्च कुरून्मन्ये शोचन्ति पुत्रकाः ॥ ३१
विद्रुतान्रथिनो दृष्ट्वा निरुत्साहान्द्विषज्जये ।
पलायने कृतोत्साहान्मन्ये शोचन्ति पुत्रकाः ॥ ३२
शून्यान्कृतान्रथोपस्थान्सात्वतेनार्जुनेन च ।
हतांश्च योधान्संदृश्य मन्ये शोचन्ति पुत्रकाः ॥ ३३
व्यश्वनागरथान्दृष्ट्वा तत्र वीरान्सहस्रशः ।
धावमानान्रणे व्यग्रान्मन्ये शोचन्ति पुत्रकाः ॥ ३४
विवीरांश्च कृतानश्वान्विरथांश्च कृतान्नरान् ।
तत्र सात्यकिपार्थाभ्यां मन्ये शोचन्ति पुत्रकाः ॥
पत्तिसंघान्रणे दृष्ट्वा धावमानांश्च सर्वशः ।
निराशा विजये सर्वे मन्ये शोचन्ति पुत्रकाः ॥ ३६
द्रोणस्य समतिक्रान्तावनीकमपराजितौ ।
क्षणेन दृष्ट्वा तौ वीरौ मन्ये शोचन्ति पुत्रकाः ॥ ३७
संमूढोऽस्मि भृशं तात श्रुत्वा कृष्णधनंजयौ ।
प्रविष्टौ मामकं सैन्यं सात्वतेन सहाच्युतौ ॥ ३८
तस्मिन्प्रविष्टे पृतनां शिनीनां प्रवरे रथे ।
भोजानीकं व्यतिक्रान्ते कथमासन्हि कौरवाः ॥ ३९
तथा द्रोणेन समरे निगृहीतेषु पाण्डुषु ।
कथं युद्धमभूत्तत्र तन्ममाचक्ष्व संजय ॥ ४०
द्रोणो हि बलवाञ्शूरः कृतास्त्रो दृढविक्रमः ।
पाञ्चालास्तं महेष्वासं प्रत्ययुध्यन्कथं रणे ॥ ४१
बद्धवैरास्तथा द्रोणे धर्मराजजयैषिणः ।

भारद्वाजस्तथा तेषु कृतवैरो महारथः ॥ ४२
अर्जुनश्चापि यच्चक्रे सिन्धुराजवधं प्रति ।
तन्मे सर्वं समाचक्ष्व कुशलो ह्यसि संजय ॥ ४३

इति श्रीमहाभारते द्रोणपर्वणि
एकोननवतितमोऽध्यायः ॥ ८९ ॥

९०

संजय उवाच ।

आत्मापराधात्संभूतं व्यसनं भरतर्षभ ।
प्राप्य प्राकृतवद्वीर न त्वं शोचितुमर्हसि ॥ १
तव निर्गुणतां ज्ञात्वा पक्षपातं सुतेषु च ।
द्वैधीभावं तथा धर्मे पाण्डवेषु च मत्सरम् ।
आर्तप्रलापांश्च बहून्मनुजाधिपसत्तम ॥ २
सर्वलोकस्य तत्त्वज्ञः सर्वलोकगुरुः प्रभुः ।
वासुदेवस्ततो युद्धं कुरूणामकरोन्महत् ॥ ३
आत्मापराधात्सुमहान्प्राप्तस्ते विपुलः क्षयः ।
न हि ते सुकृतं किंचिदादौ मध्ये च भारत ।
दृश्यते पृष्ठतश्चैव त्वन्मूलो हि पराजयः ॥ ४
तस्मादद्य स्थिरो भूत्वा ज्ञात्वा लोकस्य निर्णयम् ।
शृणु युद्धं यथा वृत्तं घोरं देवासुरोपमम् ॥ ५
प्रविष्टे तव सैन्यं तु शैनेये सत्यविक्रमे ।
भीमसेनमुखाः पार्थाः प्रतीयुर्वाहिनीं तव ॥ ६
आगच्छतस्तान्सहसा क्रुद्धरूपान्सहानुगान् ।
दधारैको रणे पाण्डून्कृतवर्मा महारथः ॥ ७
यथोद्वृत्तं धारयते वेला वै सलिलार्णवम् ।
पाण्डुसैन्यं तथा संख्ये हार्दिक्यः समवारयत् ॥ ८
तत्राद्भुतममन्यन्त हार्दिक्यस्य पराक्रमम् ।
यदेनं सहिताः पार्था नातिचक्रमुराहवे ॥ ९
ततो भीमस्त्रिभिर्विद्ध्वा कृतवर्माणमायसैः ।
शङ्खं दध्मौ महाबाहुर्हर्षयन्सर्वपाण्डवान् ॥ १०
सहदेवस्तु विंशत्या धर्मराजश्च पञ्चभिः ।
शतेन नकुलश्चापि हार्दिक्यं समविध्यत ॥ ११
द्रौपदेयास्त्रिसप्तत्या सप्तभिश्च घटोत्कचः ।
धृष्टद्युम्नस्त्रिभिश्चापि कृतवर्माणमार्दयत् ।
विराटो द्रुपदश्चैव याज्ञसेनिश्च पञ्चभिः ॥ १२
शिखण्डी चापि हार्दिक्यं विद्ध्वा पञ्चभिराशुगैः ।
पुनर्विव्याध विंशत्या सायकानां हसन्निव ॥ १३
कृतवर्मा ततो राजन्सर्वतस्तान्महारथान् ।
एकैकं पञ्चभिर्विद्ध्वा भीमं विव्याध सप्तभिः ।
धनुर्ध्वजं च संयत्तो रथाद्भूमावपातयत् ॥ १४
अथैनं छिन्नधन्वानं त्वरमाणो महारथः ।
आजघानोरसि क्रुद्धः सप्तत्या निशितैः शरैः ॥१५
स गाढविद्धो बलवान्हार्दिक्यस्य शरोत्तमैः ।
चचाल रथमध्यस्थः क्षितिकम्पे यथाचलः ॥ १६
भीमसेनं तथा दृष्ट्वा धर्मराजपुरोगमाः ।
विसृजन्तः शरान्घोरान्कृतवर्माणमार्दयन् ॥ १७
तं तथा कोष्ठकीकृत्य रथवंशेन मारिष ।
विव्यधुः सायकैर्हृष्टा रक्षार्थं मारुतेर्मृधे ॥ १८
प्रतिलभ्य ततः संज्ञां भीमसेनो महाबलः ।
शक्तिं जग्राह समरे हेमदण्डामयस्मयीम् ।
चिक्षेप च रथात्तूर्णं कृतवर्मरथं प्रति ॥ १९
सा भीमभुजनिर्मुक्ता निर्मुक्तोरगसंनिभा ।
कृतवर्माणमभितः प्रजज्वाल सुदारुणा ॥ २०
तामापतन्तीं सहसा युगान्ताग्निसमप्रभाम् ।
द्वाभ्यां शराभ्यां हार्दिक्यो निचकर्त द्विधा तदा ।
सा छिन्ना पतिता भूमौ शक्तिः कनकभूषणा ।
द्योतयन्ती दिशो राजन्महोल्केव दिवश्च्युता ।
शक्तिं विनिहतां दृष्ट्वा भीमश्चुक्रोध वै भृशम् ॥२१
ततोऽन्यद्धनुरादाय वेगवत्सुमहास्वनम् ।
भीमसेनो रणे क्रुद्धो हार्दिक्यं समवारयत् ॥ २२
अथैनं पञ्चभिर्बाणैराजघान स्तनान्तरे ।

भीमो भीमबलो राजंस्तव दुर्मन्त्रितेन ह ॥ २४
भोजस्तु क्षतसर्वाङ्गो भीमसेनेन मारिष ।
रक्ताशोक इवोत्फुल्लो व्यभ्राजत रणाजिरे ॥ २५
ततः क्रुद्धस्त्रिभिर्बाणैर्भीमसेनं हसन्निव ।
अभिहत्य दृढं युद्धे तान्सर्वान्प्रत्यविध्यत ॥ २६
त्रिभिस्त्रिभिर्महेष्वासो यतमानान्महारथान् ।
तेऽपि तं प्रत्यविध्यन्त सप्तभिः सप्तभिः शरैः ॥
शिखण्डिनस्ततः क्रुद्धः क्षुरप्रेण महारथः ।
धनुश्चिच्छेद समरे प्रहसन्निव भारत ॥ २८
शिखण्डी तु ततः क्रुद्धश्छिन्ने धनुषि सत्वरम् ।
असिं जग्राह समरे शतचन्द्रं च भास्वरम् ॥ २९
भ्रामयित्वा महाचर्म चामीकरविभूषितम् ।
तमसिं प्रेषयामास कृतवर्मरथं प्रति ॥ ३०
स तस्य सशरं चापं छित्त्वा संख्ये महानसिः ।
अभ्यगाद्धरणीं राजंश्च्युतं ज्योतिरिवाम्बरात् ॥ ३१
एतस्मिन्नेव काले तु त्वरमाणा महारथाः ।
विव्यधुः सायकैर्गाढं कृतवर्माणमाहवे ॥ ३२
अथान्यद्धनुरादाय त्यक्त्वा तच्च महद्धनुः ।
विशीर्णं भरतश्रेष्ठ हार्दिक्यः परवीरहा ॥ ३३
विव्याध पाण्डवान्युद्धे त्रिभिस्त्रिभिरजिह्मगैः ।
शिखण्डिनं च विव्याध त्रिभिः पञ्चभिरेव च ॥
धनुरन्यत्समादाय शिखण्डी तु महायशाः ।
अवारयत्कूर्मनखैराशुगैर्हृदिकात्मजम् ॥ ३५
ततः क्रुद्धो रणे राजन्हृदिकस्यात्मसंभवः ।
अभिदुद्राव वेगेन याज्ञसेनिं महारथम् ॥ ३६
भीष्मस्य समरे राजन्मृत्योर्हेतुं महात्मनः ।
विदर्शयन्बलं शूरः शार्दूल इव कुञ्जरम् ॥ ३७
तौ दिशागजसंकाशौ ज्वलिताविव पावकौ ।
समासेदतुरन्योन्यं शरसंघैररिंदमौ ॥ ३८
विधुन्वानौ धनुःश्रेष्ठे संदधानौ च सायकान् ।
विसृजन्तौ च शतशो गभस्तीनिव भास्करौ ॥ ३९
तापयन्तौ शरैस्तीक्ष्णैरन्योन्यं तौ महारथौ ।
युगान्तप्रतिमौ वीरौ रेजतुर्भास्कराविव ॥ ४०
कृतवर्मा तु रभसं याज्ञसेनिं महारथम् ।
विद्ध्वेषूणां त्रिसप्तत्या पुनर्विव्याध सप्तभिः ॥ ४१
स गाढविद्धो व्यथितो रथोपस्थ उपाविशत् ।
विसृजन्सशरं चापं मूर्छयाभिपरिप्लुतः ॥ ४२
तं विषण्णं रथे दृष्ट्वा तावका भरतर्षभ ।
हार्दिक्यं पूजयामासुर्वासांस्यादुधुवुश्च ह ॥ ४३
शिखण्डिनं तथा ज्ञात्वा हार्दिक्यशरपीडितम् ।
अपोवाह रणाद्यन्ता त्वरमाणो महारथम् ॥ ४४
सादितं तु रथोपस्थे दृष्ट्वा पार्थाः शिखण्डिनम् ।
परिवव्रू रथैस्तूर्णं कृतवर्माणमाहवे ॥ ४५
तत्राद्भुतं परं चक्रे कृतवर्मा महारथः ।
यदेकः समरे पार्थान्वारयामास सानुगान् ॥ ४६
पार्थाञ्जित्वाजयच्चेदीन्पाञ्चालान्सृञ्जयानपि ।
केकयांश्च महावीर्यान्कृतवर्मा महारथः ॥ ४७
ते वध्यमानाः समरे हार्दिक्येन स्म पाण्डवाः ।
इतश्चेतश्च धावन्तो नैव चक्रुर्धृतिं रणे ॥ ४८
जित्वा पाण्डुसुतान्युद्धे भीमसेनपुरोगमान् ।
हार्दिक्यः समरेऽतिष्ठद्विधूम इव पावकः ॥ ४९
ते द्राव्यमाणाः समरे हार्दिक्येन महारथाः ।
विमुखाः समपद्यन्त शरवृष्टिभिरर्दिताः ॥ ५०

इति श्रीमहाभारते द्रोणपर्वणि
नवतितमोऽध्यायः ॥ ९० ॥

९१

संजय उवाच ।

शृणुष्वैकमना राजन्यन्मां त्वं परिपृच्छसि ।
द्राव्यमाणे बले तस्मिन्हार्दिक्येन महात्मना ॥ १
लज्जयावनते चापि प्रहृष्टैश्चैव तावकैः ।

द्वीपो य आसीत्पाण्डूनामगाधे गाधमिच्छताम् ॥२
श्रुत्वा तु निनदं भीमं तावकानां महाहवे ।
शैनेयस्त्वरितो राजन्कृतवर्माणमभ्ययात् ॥ ३
कृतवर्मा तु हार्दिक्यः शैनेयं निशितैः शरैः ।
अवाकिरत्सुसंक्रुद्धस्ततोऽक्रुध्यत सात्यकिः ॥ ४
ततः सुनिशितं भल्लं शैनेयः कृतवर्मणे ।
प्रेषयामास समरे शरांश्च चतुरोऽपरान् ॥ ५
ते तस्य जघ्निरे वाहान्भल्लेनास्याच्छिनद्धनुः ।
पृष्ठरक्षं तथा सूतमविध्यन्निशितैः शरैः ॥ ६
ततस्तं विरथं कृत्वा सात्यकिः सत्यविक्रमः ।
सेनामस्यार्दयामास शरैः संनतपर्वभिः ॥ ७
साभज्यताथ पृतना शैनेयशरपीडिता ।
ततः प्रायाद्वै त्वरितः सात्यकिः सत्यविक्रमः ॥ ८
शृणु राजन्यदकरोत्तव सैन्येषु वीर्यवान् ।
अतीत्य स महाराज द्रोणानीकमहार्णवम् ॥ ९
पराजित्य च संहृष्टः कृतवर्माणमाहवे ।
यन्तारमब्रवीच्छूरः शनैर्याहीत्यसंभ्रमम् ॥ १०
दृष्ट्वा तु तव तत्सैन्यं रथाश्वद्विपसंकुलम् ।
पदातिजनसंपूर्णमब्रवीत्सारथिं पुनः ॥ ११
यदेतन्मेघसंकाशं द्रोणानीकस्य सव्यतः ।
सुमहत्कुञ्जरानीकं यस्य रुक्मरथो मुखम् ॥ १२
एते हि बहवः सूत दुर्निवार्याश्च संयुगे ।
दुर्योधनसमादिष्टा मदर्थे त्यक्तजीविताः ।
राजपुत्रा महेष्वासाः सर्वे विक्रान्तयोधिनः ॥ १३
त्रिगर्तानां रथोदाराः सुवर्णविकृतध्वजाः ।
मामेवाभिमुखा वीरा योत्स्यमाना व्यवस्थिताः ॥
अत्र मां प्रापय क्षिप्रमश्वांश्चोदय सारथे ।
त्रिगर्तैः सह योत्स्यामि भारद्वाजस्य पश्यतः ॥१५
ततः प्रायाच्छनैः सूतः सात्वतस्य मते स्थितः ।
रथेनादित्यवर्णेन भास्वरेण पताकिना ॥ १६
तमूहुः सारथेर्वश्या वल्गमाना हयोत्तमाः ।
वायुवेगसमाः संख्ये कुन्देन्दुरजतप्रभाः ॥ १७
आपतन्तं रथं तं तु शङ्खवर्णैर्हयोत्तमैः ।
परिवव्रुस्ततः शूरा गजानीकेन सर्वतः ।
किरन्तो विविधांस्तीक्ष्णान्सायकाँल्लघुवेधिनः ॥१८
सात्वतोऽपि शितैर्बाणैर्गजानीकमयोधयत् ।
पर्वतानिव वर्षेण तपान्ते जलदो महान् ॥ १९
वज्राशनिसमस्पर्शैर्वध्यमानाः शरैर्गजाः ।
प्राद्रवन्रणमुत्सृज्य शिनिवीर्यसमीरितैः ॥ २०
शीर्णदन्ता विरुधिरा भिन्नमस्तकपिण्डकाः ।
विशीर्णकर्णास्यकरा विनियन्तृपताकिनः ॥ २१
संभिन्नवर्मघण्टाश्च संनिकृत्तमहाध्वजाः ।
हतारोहा दिशो राजन्भेजिरे भ्रष्टकम्बलाः ॥ २२
रुवन्तो विविधान्रावाञ्जलदोपमनिस्वनाः ।
नाराचैर्वत्सदन्तैश्च सात्वतेन विदारिताः ॥ २३
तस्मिन्द्रुते गजानीके जलसंधो महारथः ।
यत्तः संप्रापयन्नागं रजताश्वरथं प्रति ॥ २४
रुक्मवर्णकरः शूरस्तपनीयाङ्गदः शुचिः ।
कुण्डली मुकुटी शङ्खी रक्तचन्दनरूषितः ॥ २५
शिरसा धारयन्दीप्तां तपनीयमयीं स्रजम् ।
उरसा धारयन्निष्कं कण्ठसूत्रं च भास्वरम् ॥ २६
चापं च रुक्मविकृतं विधुन्वन्गजमूर्धनि ।
अशोभत महाराज सविद्युदिव तोयदः ॥ २७
तमापतन्तं सहसा मागधस्य गजोत्तमम् ।
सात्यकिर्वारयामास वेलेवोद्वृत्तमर्णवम् ॥ २८
नागं निवारितं दृष्ट्वा शैनेयस्य शरोत्तमैः ।
अक्रुध्यत रणे राजञ्जलसंधो महाबलः ॥ २९
ततः क्रुद्धो महेष्वासो मार्गणैर्भारसाधनैः ।
अविध्यत शिनेः पौत्रं जलसंधो महोरसि ॥ ३०
ततोऽपरेण भल्लेन पीतेन निशितेन च ।

अस्यतो वृष्णिवीरस्य निचकर्त शरासनम् ॥ ३१
सात्यकिं छिन्नधन्वानं प्रहसन्निव भारत ।
अविध्यन्मागधो वीरः पञ्चभिर्निशितैः शरैः ॥ ३२
स विद्धो बहुभिर्बाणैर्जलसंधेन वीर्यवान् ।
नाकम्पत महाबाहुस्तदद्भुतमिवाभवत् ॥ ३३
अचिन्तयन्वै स शरान्नात्यर्थं संभ्रमाद्बली ।
धनुरन्यत्समादाय तिष्ठ तिष्ठेत्युवाच ह ॥ ३४
एतावदुक्त्वा शैनेयो जलसंधं महोरसि ।
विव्याध षष्ट्या सुभृशं शराणां प्रहसन्निव ॥ ३५
क्षुरप्रेण च पीतेन मुष्टिदेशे महद्धनुः ।
जलसंधस्य चिच्छेद विव्याध च त्रिभिः शरैः ॥
जलसंधस्तु तत्त्यक्त्वा सशरं वै शरासनम् ।
तोमरं व्यसृजत्तूर्णं सात्यकिं प्रति मारिष ॥ ३७
स निर्भिद्य भुजं सव्यं माधवस्य महारणे ।
अभ्यगाद्धरणीं घोरः श्वसन्निव महोरगः ॥ ३८
निर्भिन्ने तु भुजे सव्ये सात्यकिः सत्यविक्रमः ।
त्रिंशद्भिर्विशिखैस्तीक्ष्णैर्जलसंधमताडयत् ॥ ३९
प्रगृह्य तु ततः खड्गं जलसंधो महाबलः ।
आर्षभं चर्म च महच्छतचन्द्रमलंकृतम् ।
तत आविध्य तं खड्गं सात्वतायोत्ससर्ज ह ॥ ४०
शैनेयस्य धनुश्छित्त्वा स खड्गो न्यपतन्महीम् ।
अलातचक्रवच्चैव व्यरोचत महीं गतः ॥ ४१
अथान्यद्धनुरादाय सर्वकायावदारणम् ।
शालस्कन्धप्रतीकाशमिन्द्राशनिसमस्वनम् ।
विस्फार्य विव्यधे क्रुद्धो जलसंधं शरेण ह ॥ ४२
ततः साभरणौ बाहू क्षुराभ्यां माधवोत्तमः ।
साङ्गदौ जलसंधस्य चिच्छेद प्रहसन्निव ॥ ४३
तौ बाहू परिघप्रख्यौ पेततुर्गजसत्तमात् ।
वसुंधराधराद्भ्रष्टौ पञ्चशीर्षाविवोरगौ ॥ ४४
ततः सुदंष्ट्रं सुहनु चारुकुण्डलमुन्नसम् ।
क्षुरेणास्य तृतीयेन शिरश्चिच्छेद सात्यकिः ॥ ४५
तत्पातितशिरोबाहुकबन्धं भीमदर्शनम् ।
द्विरदं जलसंधस्य रुधिरेणाभ्यषिञ्चत ॥ ४६
जलसंधं निहत्याजौ त्वरमाणस्तु सात्वतः ।
नैषादिं पातयामास गजस्कन्धाद्विशां पते ॥ ४७
रुधिरेणावसिक्ताङ्गो जलसंधस्य कुञ्जरः ।
विलम्बमानमवहत्संश्लिष्टं परमासनम् ॥ ४८
शरार्दितः सात्वतेन मर्दमानः स्ववाहिनीम् ।
घोरमार्तस्वरं कृत्वा विदुद्राव महागजः ॥ ४९
हाहाकारो महानासीत्तव सैन्यस्य मारिष ।
जलसंधं हतं दृष्ट्वा वृष्णीनामृषभेण ह ॥ ५०
विमुखाश्चाभ्यधावन्त तव योधाः समन्ततः ।
पलायने कृतोत्साहा निरुत्साहा द्विषज्जये ॥ ५१
एतस्मिन्नन्तरे राजन्द्रोणः शस्त्रभृतां वरः ।
अभ्ययाज्जवनैरश्वैर्युयुधानं महारथम् ॥ ५२
तमुदीर्णं तथा दृष्ट्वा शैनेयं कुरुपुंगवाः ।
द्रोणेनैव सह क्रुद्धाः सात्यकिं पर्यवारयन् ॥ ५३
ततः प्रववृते युद्धं कुरूणां सात्वतस्य च ।
द्रोणस्य च रणे राजन्घोरं देवासुरोपमम् ॥ ५४

इति श्रीमहाभारते द्रोणपर्वणि
एकनवतितमोऽध्यायः ॥ ९१ ॥

९२

संजय उवाच ।

ते किरन्तः शरव्रातान्सर्वे यत्ताः प्रहारिणः ।
त्वरमाणा महाराज युयुधानमयोधयन् ॥ १
तं द्रोणं सप्तसप्तत्या जघान निशितैः शरैः ।
दुर्मर्षणो द्वादशभिर्दुःसहो दशभिः शरैः ॥ २
विकर्णश्चापि निशितैस्त्रिंशद्भिः कङ्कपत्रिभिः ।
विव्याध सव्ये पार्श्वे तु स्तनाभ्यामन्तरे तथा ॥ ३
दुर्मुखो दशभिर्बाणैस्तथा दुःशासनोऽष्टभिः ।

चित्रसेनश्च शैनेयं द्वाभ्यां विव्याध मारिष ॥ ४
दुर्योधनश्च महता शरवर्षेण माधवम् ।
अपीडयद्रणे राजञ्शूराश्चान्ये महारथाः ॥ ५
सर्वतः प्रतिविद्धस्तु तव पुत्रैर्महारथैः ।
तान्प्रत्यविध्यच्छैनेयः पृथक्पृथगजिह्मगैः ॥ ६
भारद्वाजं त्रिभिर्बाणैर्दुःसहं नवभिस्तथा ।
विकर्णं पञ्चविंशत्या चित्रसेनं च सप्तभिः ॥ ७
दुर्मर्षणं द्वादशभिश्चतुर्भिश्च विविंशतिम् ।
सत्यव्रतं च नवभिर्विजयं दशभिः शरैः ॥ ८
ततो रुक्माङ्गदं चापं विधुन्वानो महारथः ।
अभ्ययात्सात्यकिस्तूर्णं पुत्रं तव महारथम् ॥ ९
राजानं सर्वलोकस्य सर्वशस्त्रभृतां वरम् ।
शरैरभ्याहनद्गाढं ततो युद्धमभूत्तयोः ॥ १०
विमुञ्चन्तौ शरांस्तीक्ष्णान्संदधानौ च सायकान् ।
अदृश्यं समरेऽन्योन्यं चक्रतुस्तौ महारथौ ॥ ११
सात्यकिः कुरुराजेन निर्विद्धो बह्वशोभत ।
अस्रवद्रुधिरं भूरि स्वरसं चन्दनो यथा ॥ १२
सात्वतेन च बाणौघैर्निर्विद्धस्तनयस्तव ।
शातकुम्भमयापीडो बभौ यूप इवोच्छ्रितः ॥ १३
माधवस्तु रणे राजन्कुरुराजस्य धन्विनः ।
धनुश्चिच्छेद सहसा क्षुरप्रेण हसन्निव ।
अथैनं छिन्नधन्वानं शरैर्बहुभिराचिनोत् ॥ १४
निर्भिन्नश्च शरैस्तेन द्विषता क्षिप्रकारिणा ।
नामृष्यत रणे राजा शत्रोर्विजयलक्षणम् ॥ १५
अथान्यद्धनुरादाय हेमपृष्ठं दुरासदम् ।
विव्याध सात्यकिं तूर्णं सायकानां शतेन ह ॥ १६
सोऽतिविद्धो बलवता पुत्रेण तव धन्विना ।
अमर्षवशमापन्नस्तव पुत्रमपीडयत् ॥ १७
पीडितं नृपतिं दृष्ट्वा तव पुत्रा महारथाः ।
सात्वतं शरवर्षेण छादयामासुरञ्जसा ॥ १८
स छाद्यमानो बहुभिस्तव पुत्रैर्महारथैः ।
एकैकं पञ्चभिर्विद्ध्वा पुनर्विव्याध सप्तभिः ॥ १९
दुर्योधनं च त्वरितो विव्याधाष्टभिराशुगैः ।
प्रहसंश्चास्य चिच्छेद कार्मुकं रिपुभीषणम् ॥ २०
नागं मणिमयं चैव शरैर्ध्वजमपातयत् ।
हत्वा तु चतुरो वाहांश्चतुर्भिर्निशितैः शरैः ।
सारथिं पातयामास क्षुरप्रेण महायशाः ॥ २१
एतस्मिन्नन्तरे चैव कुरुराजं महारथम् ।
अवाकिरच्छरैर्हृष्टो बहुभिर्मर्मभेदिभिः ॥ २२
स वध्यमानः समरे शैनेयस्य शरोत्तमैः ।
प्राद्रवत्सहसा राजन्पुत्रो दुर्योधनस्तव ।
आप्लुतश्च ततो यानं चित्रसेनस्य धन्विनः ॥ २३
हाहाभूतं जगच्चासीद्दृष्ट्वा राजानमाहवे ।
ग्रस्यमानं सात्यकिना खे सोममिव राहुणा ॥ २४
तं तु शब्दं महच्छ्रुत्वा कृतवर्मा महारथः ।
अभ्ययात्सहसा तत्र यत्रास्ते माधवः प्रभुः ॥ २५
विधुन्वानो धनुःश्रेष्ठं चोदयंश्चैव वाजिनः ।
भर्त्सयन्सारथिं चोग्रं याहि याहीति सत्वरः ॥ २६
तमापतन्तं संप्रेक्ष्य व्यादितास्यमिवान्तकम् ।
युयुधानो महाराज यन्तारमिदमब्रवीत् ॥ २७
कृतवर्मा रथेनैष द्रुतमापतते शरी ।
प्रत्युद्याहि रथेनैनं प्रवरं सर्वधन्विनाम् ॥ २८
ततः प्रजविताश्वेन विधिवत्कल्पितेन च ।
आससाद रणे भोजं प्रतिमानं धनुष्मताम् ॥ २९
ततः परमसंक्रुद्धौ ज्वलन्ताविव पावकौ ।
समेयातां नरव्याघ्रौ व्याघ्राविव तरस्विनौ ॥ ३०
कृतवर्मा तु शैनेयं षड्विंशत्या समार्पयत् ।
निशितैः सायकैस्तीक्ष्णैर्यन्तारं चास्य सप्तभिः ॥
चतुरश्च हयोदारांश्चतुर्भिः परमेषुभिः ।
अविध्यत्साधुदान्तान्वै सैन्धवान्सात्वतस्य ह ॥३१

रुक्मध्वजो रुक्मपृष्ठं महद्विस्फार्य कार्मुकम् ।
रुक्माङ्गदी रुक्मवर्मा रुक्मपुङ्खानवाकिरत् ॥ ३३
ततोऽशीतिं शिनेः पौत्रः सायकान्कृतवर्मणे ।
प्राहिणोत्त्वरया युक्तो द्रष्टुकामो धनंजयम् ॥ ३४
सोऽतिविद्धो बलवता शत्रुणा शत्रुतापनः ।
समकम्पत दुर्धर्षः क्षितिकम्पे यथाचलः ॥ ३५
त्रिषष्ट्या चतुरोऽस्याश्वान्सप्तभिः सारथिं शरैः ।
विव्याध निशितैस्तूर्णं सात्यकिः कृतवर्मणः ॥ ३६
सुवर्णपुङ्खं विशिखं समाधाय स सात्यकिः ।
व्यसृजत्तं महाज्वालं संक्रुद्धमिव पन्नगम् ॥ ३७
सोऽविशत्कृतवर्माणं यमदण्डोपमः शरः ।
जाम्बूनदविचित्रं च वर्म निर्भिद्य भानुमत् ।
अभ्यगाद्धरणीमुग्रो रुधिरेण समुक्षितः ॥ ३८
संजातरुधिरश्चाजौ सात्वतेषुभिरर्दितः ।
प्रचलन्धनुरुत्सृज्य न्यपतत्स्यन्दनोत्तमे ॥ ३९
स सिंहदंष्ट्रो जानुभ्यामापन्नोऽमितविक्रमः ।
शरार्दितः सात्यकिना रथोपस्थे नरर्षभः ॥ ४०
सहस्रबाहोः सदृशमक्षोभ्यमिव सागरम् ।
निवार्य कृतवर्माणं सात्यकिः प्रययौ ततः ॥ ४१
खड्गशक्तिधनुःकीर्णां गजाश्वरथसंकुलाम् ।
प्रवर्तितोग्ररुधिरां शतशः क्षत्रियर्षभैः ॥ ४२
प्रेक्षतां सर्वसैन्यानां मध्येन शिनिपुंगवः ।
अभ्यगाद्वाहिनीं भित्त्वा वृत्रहेवासुरीं चमूम् ॥४३
समाश्वास्य च हार्दिक्यो गृह्य चान्यन्महद्धनुः ।
तस्थौ तत्रैव बलवान्वारयन्युधि पाण्डवान् ॥ ४४

इति श्रीमहाभारते द्रोणपर्वणि
द्विनवतितमोऽध्यायः ॥ ९२ ॥

९३

संजय उवाच ।

काल्यमानेषु सैन्येषु शैनेयेन ततस्ततः ।
भारद्वाजः शरव्रातैर्महद्भिः समवाकिरत् ॥ १
स संप्रहारस्तुमुलो द्रोणसात्वतयोरभूत् ।
पश्यतां सर्वसैन्यानां बलिवासवयोरिव ॥ २
ततो द्रोणः शिनेः पौत्रं चित्रैः सर्वायसैः शरैः ।
त्रिभिराशीविषाकारैर्ललाटे समविध्यत ॥ ३
तैर्ललाटार्पितैर्बाणैर्युयुधानस्त्वजिह्मगैः ।
व्यरोचत महाराज त्रिशृङ्ग इव पर्वतः ॥ ४
ततोऽस्य बाणानपरानिन्द्राशनिसमस्वनान् ।
भारद्वाजोऽन्तरप्रेक्षी प्रेषयामास संयुगे ॥ ५
तान्द्रोणचापनिर्मुक्तान्दाशार्हः पततः शरान् ।
द्वाभ्यां द्वाभ्यां सुपुङ्खाभ्यां चिच्छेद परमास्त्रवित् ॥
तामस्य लघुतां द्रोणः समवेक्ष्य विशां पते ।
प्रहस्य सहसाविध्यद्विंशत्या शिनिपुंगवम् ॥ ७
पुनः पञ्चाशतेषूणां शतेन च समार्पयत् ।
लघुतां युयुधानस्य लाघवेन विशेषयन् ॥ ८
समुत्पतन्ति वल्मीकाद्यथा क्रुद्धा महोरगाः ।
तथा द्रोणरथाद्राजन्नुत्पतन्ति तनुच्छिदः ॥ ९
तथैव युयुधानेन सृष्टाः शतसहस्रशः ।
अवाकिरन्द्रोणरथं शरा रुधिरभोजनाः ॥ १०
लाघवाद्द्विजमुख्यस्य सात्वतस्य च मारिष ।
विशेषं नाध्यगच्छाम समावास्तां नरर्षभौ ॥ ११
सात्यकिस्तु ततो द्रोणं नवभिर्नतपर्वभिः ।
आजघान भृशं क्रुद्धो ध्वजं च निशितैः शरैः ।
सारथिं च शतेनैव भारद्वाजस्य पश्यतः ॥ १२
लाघवं युयुधानस्य दृष्ट्वा द्रोणो महारथः ।
सप्तत्या सात्यकिं विद्ध्वा तुरगांश्च त्रिभिस्त्रिभिः ।
ध्वजमेकेन विव्याध माधवस्य रथे स्थितम् ॥ १३
अथापरेण भल्लेन हेमपुङ्खेन पत्रिणा ।
धनुश्चिच्छेद समरे माधवस्य महात्मनः ॥ १४
सात्यकिस्तु ततः क्रुद्धो धनुस्त्यक्त्वा महारथः ।

गदां जग्राह महतीं भारद्वाजाय चाक्षिपत् ॥ १५
तामापतन्तीं सहसा पट्टबद्धामयस्मयीम् ।
न्यवारयच्छरैर्द्रोणो बहुभिर्बहुरूपिभिः ॥ १६
अथान्यद्धनुरादाय सात्यकिः सत्यविक्रमः ।
विव्याध बहुभिर्वीरं भारद्वाजं शिलाशितैः ॥ १७
स विद्ध्वा समरे द्रोणं सिंहनादममुञ्चत ।
तं वै न ममृषे द्रोणः सर्वशस्त्रभृतां वरः ॥ १८
ततः शक्तिं गृहीत्वा तु रुक्मदण्डामयस्मयीम् ।
तरसा प्रेषयामास माधवस्य रथं प्रति ॥ १९
अनासाद्य तु शैनेयं सा शक्तिः कालसंनिभा ।
भित्त्वा रथं जगामोग्रा धरणीं दारुणस्वना ॥ २०
ततो द्रोणं शिनेः पौत्रो राजन्विव्याध पत्रिणा ।
दक्षिणं भुजमासाद्य पीडयन्भरतर्षभ ॥ २१
द्रोणोऽपि समरे राजन्माधवस्य महद्धनुः ।
अर्धचन्द्रेण चिच्छेद रथशक्त्या च सारथिम् ॥
मुमोह सारथिस्तस्य रथशक्त्या समाहतः ।
स रथोपस्थमासाद्य मुहूर्तं संन्यषीदत ॥ २३
चकार सात्यकी राजंस्तत्र कर्मातिमानुषम् ।
अयोधयच्च यद्द्रोणं रश्मीञ्जग्राह च स्वयम् ॥ २४
ततः शरशतेनैव युयुधानो महारथः ।
अविध्यद्ब्राह्मणं संख्ये हृष्टरूपो विशां पते ॥ २५
तस्य द्रोणः शरान्पञ्च प्रेषयामास भारत ।
ते तस्य कवचं भित्त्वा पपुः शोणितमाहवे ॥ २६
निर्विद्धस्तु शरैर्घोरैरक्रुध्यत्सात्यकिर्भृशम् ।
सायकान्व्यसृजच्चापि वीरो रुक्मरथं प्रति ॥ २७
ततो द्रोणस्य यन्तारं निपात्यैकेषुणा भुवि ।
अश्वान्व्यद्रावयद्बाणैर्हतसूतान्महात्मनः ॥ २८
स रथः प्रद्रुतः संख्ये मण्डलानि सहस्रशः ।
चकार राजतो राजन्भ्राजमान इवांशुमान् ॥ २९
अभिद्रवत गृह्णीत हयान्द्रोणस्य धावत ।
इति स्म चुक्रुशुः सर्वे राजपुत्राः सराजकाः ॥ ३०
ते सात्यकिमपास्याशु राजन्युधि महारथाः ।
यतो द्रोणस्ततः सर्वे सहसा समुपाद्रवन् ॥ ३१
तान्दृष्ट्वा प्रद्रुतान्सर्वान्सात्वतेन शरार्दितान् ।
प्रभग्नं पुनरेवासीत्तव सैन्यं समाकुलम् ॥ ३२
व्यूहस्यैव पुनर्द्वारं गत्वा द्रोणो व्यवस्थितः ।
वातायमानैस्तैरश्वैर्हृतो वृष्णिशरार्दितैः ॥ ३३
पाण्डुपाञ्चालसंभग्नं व्यूहमालोक्य वीर्यवान् ।
शैनेये नाकरोद्यत्नं व्यूहस्यैवाभिरक्षणे ॥ ३४
निवार्य पाण्डुपाञ्चालान्द्रोणाग्निः प्रदहन्निव ।
तस्थौ क्रोधाग्निसंदीप्तः कालसूर्य इवोदितः ॥ ३५

इति श्रीमहाभारते द्रोणपर्वणि
त्रिनवतितमोऽध्यायः ॥ ९३ ॥

९४

संजय उवाच ।

द्रोणं स जित्वा पुरुषप्रवीर-
स्तथैव हार्दिक्यमुखांस्त्वदीयान् ।
प्रहस्य सूतं वचनं बभाषे
शिनिप्रवीरः कुरुपुंगवाग्र्य ॥ १
निमित्तमात्रं वयमत्र सूत
दग्धारयः केशवफल्गुनाभ्याम् ।
हतान्निहन्मेह नरर्षभेण
वयं सुरेशात्मसमुद्भवेन ॥ २
तमेवमुक्त्वा शिनिपुंगवस्तदा
महामृधे सोऽग्र्यधनुर्धरोऽरिहा ।
किरन्समन्तात्सहसा शरान्बली
समापतच्छ्येन इवामिषं यथा ॥ ३
तं यान्तमश्वैः शशिशङ्खवर्णै-
र्विगाह्य सैन्यं पुरुषप्रवीरम् ।
नाशक्नुवन्वारयितुं समन्ता-

दादित्यरश्मिप्रतिमं नराग्र्यम् ॥ ४
असह्यविक्रान्तमदीनसत्त्वं
सर्वे गणा भारत दुर्विषह्यम् ।
सहस्रनेत्रप्रतिमप्रभावं
दिवीव सूर्यं जलदव्यपाये ॥ ५
अमर्षपूर्णस्त्वतिचित्रयोधी
शरासनी काञ्चनवर्मधारी ।
सुदर्शनः सात्यकिमापतन्तं
न्यवारयद्राजवरः प्रसह्य ॥ ६
तयोरभूद्भारत संप्रहारः
सुदारुणस्तं समभिप्रशंसन् ।
योधास्त्वदीयाश्च हि सोमकाश्च
वृत्रेन्द्रयोर्युद्धमिवामरौघाः ॥ ७
शरैः सुतीक्ष्णैः शतशोऽभ्यविध्य-
त्सुदर्शनः सात्वतमुख्यमाजौ ।
अनागतानेव तु तान्पृषत्कां-
श्चिच्छेद बाणैः शिनिपुंगवोऽपि ॥ ८
तथैव शक्रप्रतिमोऽपि सात्यकिः
सुदर्शने यान्क्षिपति स्म सायकान् ।
द्विधा त्रिधा तानकरोत्सुदर्शनः
शरोत्तमैः स्यन्दनवर्यमास्थितः ॥ ९
संप्रेक्ष्य बाणान्निहतांस्तदानीं
सुदर्शनः सात्यकिबाणवेगैः ।
क्रोधाद्दिधक्षन्निव तिग्मतेजाः
शरानमुञ्चत्तपनीयचित्रान् ॥ १०
पुनः स बाणैस्त्रिभिरग्निकल्पै-
राकर्णपूर्णैर्निशितैः सुपुङ्खैः ।
विव्याध देहावरणं विभिद्य
ते सात्यकेराविविशुः शरीरम् ॥ ११
तथैव तस्यावनिपालपुत्रः
संधाय बाणैरपरैर्ज्वलद्भिः ।
आजघ्निवांस्तान्रजतप्रकाशां-
श्चतुर्भिरश्वांश्चतुरः प्रसह्य ॥ १२
तथा तु तेनाभिहतस्तरस्वी
नप्ता शिनेरिन्द्रसमानवीर्यः ।
सुदर्शनस्येषुगणैः सुतीक्ष्णै-
र्हयान्निहत्याशु ननाद नादम् ॥ १३
अथास्य सूतस्य शिरो निकृत्य
भल्लेन वज्राशनिसंनिभेन ।
सुदर्शनस्यापि शिनिप्रवीरः
क्षुरेण चिच्छेद शिरः प्रसह्य ॥ १४
सकुण्डलं पूर्णशशिप्रकाशं
भ्राजिष्णु वक्त्रं निचकर्त देहात् ।
यथा पुरा वज्रधरः प्रसह्य
बलस्य संख्येऽतिबलस्य राजन् ॥ १५
निहत्य तं पार्थिवपुत्रपौत्रं
रणे यदूनामृषभस्तरस्वी ।
मुदा समेतः परया महात्मा
रराज राजन्सुरराजकल्पः ॥ १६
ततो ययावर्जुनमेव येन
निवार्य सैन्यं तव मार्गणौघैः ।
सदश्वयुक्तेन रथेन निर्या-
ल्लोकान्विसिस्मापयिषुर्नृवीरः ॥ १७
तत्तस्य विस्मापयनीयमग्र्य-
मपूजयन्योधवराः समेताः ।
यद्वर्तमानानिषुगोचरेऽरी-
न्ददाह बाणैर्हुतभुग्यथैव ॥ १८

इति श्रीमहाभारते द्रोणपर्वणि
चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

९५

संजय उवाच ।

ततः स सात्यकिर्धीमान्महात्मा वृष्णिपुंगवः ।
सुदर्शनं निहत्याजौ यन्तारमिदमब्रवीत् ॥ १
रथाश्वनागकलिलं शरशक्त्यूर्मिमालिनम् ।
खड्गमत्स्यं गदाग्राहं शूरायुधमहास्वनम् ॥ २
प्राणापहारिणं रौद्रं वादित्रोत्क्रुष्टनादितम् ।
योधानामसुखस्पर्शं दुर्धर्षमजयैषिणाम् ॥ ३
तीर्णाः स्म दुस्तरं तात द्रोणानीकमहार्णवम् ।
जलसंधबलेनाजौ पुरुषादैरिवावृतम् ॥ ४
अतोऽन्यं पृतनाशेषं मन्ये कुनदिकामिव ।
तर्तव्यामल्पसलिलां चोदयाश्वानसंभ्रमम् ॥ ५
हस्तप्राप्तमहं मन्ये सांप्रतं सव्यसाचिनम् ।
निर्जित्य दुर्धरं द्रोणं सपदानुगमाहवे ॥ ६
हार्दिक्यं योधवर्यं च प्राप्तं मन्ये धनंजयम् ।
न हि मे जायते त्रासो दृष्ट्वा सैन्यान्यनेकशः ।
वह्नेरिव प्रदीप्तस्य ग्रीष्मे शुष्कं तृणोलपम् ॥ ७
पश्य पाण्डवमुख्येन यातां भूमिं किरीटिना ।
पत्त्यश्वरथनागौघैः पतितैर्विषमीकृताम् ॥ ८
अभ्याशस्थमहं मन्ये श्वेताश्वं कृष्णसारथिम् ।
स एष श्रूयते शब्दो गाण्डीवस्यामितौजसः ॥ ९
यादृशानि निमित्तानि मम प्रादुर्भवन्ति वै ।
अनस्तंगत आदित्ये हन्ता सैन्धवमर्जुनः ॥ १०
शनैर्विश्रम्भयन्नश्वान्याहि यत्तोऽरिवाहिनीम् ।
यत्रैते सतनुत्राणाः सुयोधनपुरोगमाः ॥ ११
दंशिताः क्रूरकर्माणः काम्बोजा युद्धदुर्मदाः ।
शरबाणासनधरा यवनाश्च प्रहारिणः ॥ १२
शकाः किराता दरदा बर्बरास्ताम्रलिप्तकाः ।
अन्ये च बहवो म्लेच्छा विविधायुधपाणयः ।
मामेवाभिमुखाः सर्वे तिष्ठन्ति समरार्थिनः ॥ १३
एतान्सरथनागाश्वान्निहत्याजौ सपत्तिनः ।
इदं दुर्गं महाघोरं तीर्णमेवोपधारय ॥ १४

सूत उवाच ।

न संभ्रमो मे वार्ष्णेय विद्यते सत्यविक्रम ।
यद्यपि स्यात्सुसंक्रुद्धो जामदग्न्योऽग्रतः स्थितः ॥
द्रोणो वा रथिनां श्रेष्ठः कृपो मद्रेश्वरोऽपि वा ।
तथापि संभ्रमो न स्यात्त्वामाश्रित्य महाभुज ॥१६
त्वया सुबहवो युद्धे निर्जिताः शत्रुसूदन ।
न च मे संभ्रमः कश्चिद्भूतपूर्वः कदाचन ।
किमु चैतत्समासाद्य वीर संयुगगोष्पदम् ॥ १७
आयुष्मन्कतरेण त्वा प्रापयामि धनंजयम् ।
केषां क्रुद्धोऽसि वार्ष्णेय केषां मृत्युरुपस्थितः ।
केषां संयमनीमद्य गन्तुमुत्सहते मनः ॥ १८
के त्वां युधि पराक्रान्तं कालान्तकयमोपमम् ।
दृष्ट्वा विक्रमसंपन्नं विद्रविष्यन्ति संयुगे ।
केषां वैवस्वतो राजा स्मरतेऽद्य महाभुज ॥ १९

सात्यकिरुवाच ।

मुण्डानेतान्हनिष्यामि दानवानिव वासवः ।
प्रतिज्ञां पारयिष्यामि काम्बोजानेव मा वह ।
अद्यैषां कदनं कृत्वा क्षिप्रं यास्यामि पाण्डवम् ॥
अद्य द्रक्ष्यन्ति मे वीर्यं कौरवाः ससुयोधनाः ।
मुण्डानीके हते सूत सर्वसैन्येषु चासकृत् ॥ २१
अद्य कौरवसैन्यस्य दीर्यमाणस्य संयुगे ।
श्रुत्वा विरावं बहुधा संतप्स्यति सुयोधनः ॥ २२
अद्य पाण्डवमुख्यस्य श्वेताश्वस्य महात्मनः ।
आचार्यककृतं मार्गं दर्शयिष्यामि संयुगे ॥ २३
अद्य मद्बाणनिहतान्योधमुख्यान्सहस्रशः ।
दृष्ट्वा दुर्योधनो राजा पश्चात्तापं गमिष्यति ॥ २४
अद्य मे क्षिप्रहस्तस्य क्षिपतः सायकोत्तमान् ।
अलातचक्रप्रतिमं धनुर्द्रक्ष्यन्ति कौरवाः ॥ २५

मत्सायकचिताङ्गानां रुधिरं स्रवतां बहु ।
सैनिकानां वधं दृष्ट्वा संतप्स्यति सुयोधनः ॥ २६
अद्य मे क्रुद्धरूपस्य निघ्नतश्च वरान्वरान् ।
द्विरर्जुनमिमं लोकं मंस्यते स सुयोधनः ॥ २७
अद्य राजसहस्राणि निहतानि मया रणे ।
दृष्ट्वा दुर्योधनो राजा संतप्स्यति महामृधे ॥ २८
अद्य स्नेहं च भक्तिं च पाण्डवेषु महात्मसु ।
हत्वा राजसहस्राणि दर्शयिष्यामि राजसु ॥ २९

संजय उवाच ।

एवमुक्तस्तदा सूतः शिक्षितान्साधुवाहिनः ।
शशाङ्कसंनिकाशान्वै वाजिनोऽचूचुदद्भृशम् ॥ ३०
ते पिबन्त इवाकाशं युयुधानं हयोत्तमाः ।
प्रापयन्यवनाञ्शीघ्रं मनःपवनरंहसः ॥ ३१
सात्यकिं ते समासाद्य पृतनास्वनिवर्तिनम् ।
बहवो लघुहस्ताश्च शरवर्षैरवाकिरन् ॥ ३२
तेषामिषूनथास्त्राणि वेगवन्नतपर्वभिः ।
अच्छिनत्सात्यकी राजन्नैनं ते प्राप्नुवञ्शराः ॥३३
रुक्मपुङ्खैः सुनिशितैर्गार्ध्रपत्रैरजिह्मगैः ।
उच्चकर्त शिरांस्युग्रो यवनानां भुजानपि ॥ ३४
शैक्यायसानि वर्माणि कांस्यानि च समन्ततः ।
भित्त्वा देहांस्तथा तेषां शरा जग्मुर्महीतलम् ॥३५
ते हन्यमाना वीरेण म्लेच्छाः सात्यकिना रणे ।
शतशो न्यपतंस्तत्र व्यसवो वसुधातले ॥ ३६
सुपूर्णायतमुक्तैस्तानव्यवच्छिन्नपिण्डितैः ।
पञ्च षट् सप्त चाष्टौ च बिभेद यवनाञ्शरैः ॥३७
काम्बोजानां सहस्रैस्तु शकानां च विशां पते ।
शबराणां किरातानां बर्बराणां तथैव च ॥ ३८
अगम्यरूपां पृथिवीं मांसशोणितकर्दमाम् ।
कृतवांस्तत्र शैनेयः क्षपयंस्तावकं बलम् ॥ ३९
दस्यूनां सशिरस्त्राणैः शिरोभिर्लूनमूर्धजैः ।
तत्र तत्र मही कीर्णा विबर्हैरण्डजैरिव ॥ ४०
रुधिरोक्षितसर्वाङ्गैस्तैस्तदायोधनं बभौ ।
कबन्धैः संवृतं सर्वं ताम्राभ्रैः खमिवावृतम् ॥ ४१
वज्राशनिसमस्पर्शैः सुपर्वभिरजिह्मगैः ।
ते सास्वयाना निहताः समावव्रुर्वसुंधराम् ॥ ४२
अल्पावशिष्टाः संभग्नाः कृच्छ्रप्राणा विचेतसः ।
जिताः संख्ये महाराज युयुधानेन दंशिताः ॥ ४३
पार्ष्णिभिश्च कशाभिश्च ताडयन्तस्तुरंगमान् ।
जवमुत्तममास्थाय सर्वतः प्राद्रवन्भयात् ॥ ४४
काम्बोजसैन्यं विद्राव्य दुर्जयं युधि भारत ।
यवनानां च तत्सैन्यं शकानां च महद्बलम् ॥ ४५
स ततः पुरुषव्याघ्रः सात्यकिः सत्यविक्रमः ।
प्रहृष्टस्तावकाञ्जित्वा सूतं याहीत्यचोदयत् ॥ ४६
तं यान्तं पृष्ठगोप्तारमर्जुनस्य विशां पते ।
चारणाः प्रेक्ष्य संहृष्टास्त्वदीयाश्चाप्यपूजयन् ॥ ४७

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

९६

संजय उवाच ।

जित्वा यवनकाम्बोजान्युयुधानस्ततोऽर्जुनम् ।
जगाम तव सैन्यस्य मध्येन रथिनां वरः ॥ १
शरदंष्ट्रो नरव्याघ्रो विचित्रकवचच्छविः ।
मृगान्व्याघ्र इवाजिघ्रंस्तव सैन्यमभीषयत् ॥ २
स रथेन चरन्मार्गान्धनुरभ्रामयद्भृशम् ।
रुक्मपृष्ठं महावेगं रुक्मचन्द्रकसंकुलम् ॥ ३
रुक्माङ्गदशिरस्त्राणो रुक्मवर्मसमावृतः ।
रुक्मध्वजवरः शूरो मेरुशृङ्ग इवाबभौ ॥ ४
सधनुर्मण्डलः संख्ये तेजोभास्वररश्मिवान् ।
शरदीवोदितः सूर्यो नृसूर्यो विरराज ह ॥ ५
वृषभस्कन्धविक्रान्तो वृषभाक्षो नरर्षभः ।

तावकानां बभौ मध्ये गवां मध्ये यथा वृषः ॥ ६
मत्तद्विरदसंकाशं मत्तद्विरदगामिनम् ।
प्रभिन्नमिव मातङ्गं यूथमध्ये व्यवस्थितम् ।
व्याघ्रा इव जिघांसन्तस्त्वदीयाभ्यद्रवन्रणे ॥ ७
द्रोणानीकमतिक्रान्तं भोजानीकं च दुस्तरम् ।
जलसंधार्णवं तीर्त्वा काम्बोजानां च वाहिनीम् ॥
हार्दिक्यमकरान्मुक्तं तीर्णं वै सैन्यसागरम् ।
परिवव्रुः सुसंक्रुद्धास्त्वदीयाः सात्यकिं रथाः ॥ ९
दुर्योधनश्चित्रसेनो दुःशासनविविंशती ।
शकुनिर्दुःसहश्चैव युवा दुर्मर्षणः क्रथः ॥ १०
अन्ये च बहवः शूराः शस्त्रवन्तो दुरासदाः ।
पृष्ठतः सात्यकिं यान्तमन्वधावन्नमर्षिताः ॥ ११
अथ शब्दो महानासीत्तव सैन्यस्य मारिष ।
मारुतोद्धूतवेगस्य सागरस्येव पर्वणि ॥ १२
तानभिद्रवतः सर्वान्समीक्ष्य शिनिपुंगवः ।
शनैर्याहीति यन्तारमब्रवीत्प्रहसन्निव ॥ १३
इदमेति समुद्धूतं धार्तराष्ट्रस्य यद्बलम् ।
मामेवाभिमुखं तूर्णं गजाश्वरथपत्तिमत् ॥ १४
नादयन्वै दिशः सर्वा रथघोषेण सारथे ।
पृथिवीं चान्तरिक्षं च कम्पयन्सागरानपि ॥ १५
एतद्बलार्णवं तात वारयिष्ये महारणे ।
पौर्णमास्यामिवोद्धूतं वेलेव सलिलाशयम् ॥ १६
पश्य मे सूत विक्रान्तमिन्द्रस्येव महामृधे ।
एष सैन्यानि शत्रूणां विधमामि शितैः शरैः ॥ १७
निहतानाहवे पश्य पदात्यश्वरथद्विपान् ।
मच्छरैरग्निसंकाशैर्विदेहासून्सहस्रशः ॥ १८
इत्येवं ब्रुवतस्तस्य सात्यकेरमितौजसः ।
समीपं सैनिकास्ते तु शीघ्रमीयुर्युयुत्सवः ।
जह्याद्रवस्व तिष्ठेति पश्य पश्येति वादिनः ॥ १९
तानेवं ब्रुवतो वीरान्सात्यकिर्निशितैः शरैः ।
जघान त्रिशतानश्वान्कुञ्जरांश्च चतुःशतान् ॥ २०
स संप्रहारस्तुमुलस्तस्य तेषां च धन्विनाम् ।
देवासुररणप्रख्यः प्रावर्तत जनक्षयः ॥ २१
मेघजालनिभं सैन्यं तव पुत्रस्य मारिष ।
प्रत्यगृह्णाच्छिनेः पौत्रः शरैराशीविषोपमैः ॥ २२
प्रच्छाद्यमानः समरे शरजालैः स वीर्यवान् ।
असंभ्रमं महाराज तावकानवधीद्बहून् ॥ २३
आश्चर्यं तत्र राजेन्द्र सुमहद्दृष्टवानहम् ।
न मोघः सायकः कश्चित्सात्यकेरभवत्प्रभो ॥ २४
रथनागाश्वकलिलः पदात्यूर्मिसमाकुलः ।
शैनेयवेलामासाद्य स्थितः सैन्यमहार्णवः ॥ २५
संभ्रान्तनरनागाश्वमावर्तत मुहुर्मुहुः ।
तत्सैन्यमिषुभिस्तेन वध्यमानं समन्ततः ।
बभ्राम तत्र तत्रैव गावः शीतार्दिता इव ॥ २६
पदातिनं रथं नागं सादिनं तुरगं तथा ।
अविद्धं तत्र नाद्राक्षं युयुधानस्य सायकैः ॥ २७
न तादृक्कदनं राजन्कृतवांस्तत्र फल्गुनः ।
यादृक्क्षयमनीकानामकरोत्सात्यकिर्नृप ।
अत्यर्जुनं शिनेः पौत्रो युध्यते भरतर्षभ ॥ २८
ततो दुर्योधनो राजा सात्वतस्य त्रिभिः शरैः ।
विव्याध सूतं निशितैश्चतुर्भिश्चतुरो हयान् ॥ २९
सात्यकिं च त्रिभिर्विद्ध्वा पुनर्विव्याध सोऽष्टभिः ।
दुःशासनः षोडशभिर्विव्याध शिनिपुंगवम् ॥ ३०
शकुनिः पञ्चविंशत्या चित्रसेनश्च पञ्चभिः ।
दुःसहः पञ्चदशभिर्विव्याधोरसि सात्यकिम् ॥ ३१
उत्स्मयन्वृष्णिशार्दूलस्तथा बाणैः समाहतः ।
तानविध्यन्महाराज सर्वानेव त्रिभिस्त्रिभिः ॥ ३२
गाढविद्धानरीन्कृत्वा मार्गणैः सोऽतितेजनैः ।
शैनेयः श्येनवत्संख्ये व्यचरल्लघुविक्रमः ॥ ३३
सौबलस्य धनुश्छित्त्वा हस्तावापं निकृत्य च ।

दुर्योधनं त्रिभिर्बाणैरभ्यविध्यत्स्तनान्तरे ॥ ३४
चित्रसेनं शतेनैव दशभिर्दुःसहं तथा ।
दुःशासनं च विंशत्या विव्याध शिनिपुंगवः ॥३५
अथान्यद्धनुरादाय स्यालस्तव विशां पते ।
अष्टभिः सात्यकिं विद्ध्वा पुनर्विव्याध पञ्चभिः ॥
दुःशासनश्च दशभिर्दुःसहश्च त्रिभिः शरैः ।
दुर्मुखश्च द्वादशभी राजन्विव्याध सात्यकिम् ॥३७
दुर्योधनस्त्रिसप्तत्या विद्ध्वा भारत माधवम् ।
ततोऽस्य निशितैर्बाणैस्त्रिभिर्विव्याध सारथिम् ॥
तान्सर्वान्सहितान्शूरान्यतमानान्महारथान् ।
पञ्चभिः पञ्चभिर्बाणैः पुनर्विव्याध सात्यकिः ॥ ३९
ततः स रथिनां श्रेष्ठस्तव पुत्रस्य सारथिम् ।
आजघानाशु भल्लेन स हतो न्यपतद्भुवि ॥ ४०
पातिते सारथौ तस्मिंस्तव पुत्ररथः प्रभो ।
वातायमानैस्तैरश्वैरपानीयत संगरात् ॥ ४१
ततस्तव सुता राजन्सैनिकाश्च विशां पते ।
राज्ञो रथमभिप्रेक्ष्य विद्रुताः शतशोऽभवन् ॥ ४२
विद्रुतं तत्र तत्सैन्यं दृष्ट्वा भारत सात्यकिः ।
अवाकिरच्छरैस्तीक्ष्णै रुक्मपुङ्खैः शिलाशितैः ॥ ४३
विद्राव्य सर्वसैन्यानि तावकानि समन्ततः ।
प्रययौ सात्यकी राजञ्श्वेताश्वस्य रथं प्रति ॥ ४४
तं शरानाददानं च रक्षमाणं च सारथिम् ।
आत्मानं मोचयन्तं च तावकाः समपूजयन् ॥ ४५

इति श्रीमहाभारते द्रोणपर्वणि
षण्णवतितमोऽध्यायः ॥ ९६ ॥

९७

धृतराष्ट्र उवाच ।

संप्रमृद्य महत्सैन्यं यान्तं शैनेयमर्जुनम् ।
निर्ह्रीका मम ते पुत्राः किमकुर्वत संजय ॥ १
कथं चैषां तथा युद्धे धृतिरासीन्मुमूर्षताम् ।
शैनेयचरितं दृष्ट्वा सदृशं सव्यसाचिनः ॥ २
किं नु वक्ष्यन्ति ते क्षात्रं सैन्यमध्ये पराजिताः ।
कथं च सात्यकिर्युद्धे व्यतिक्रान्तो महायशाः ॥ ३
कथं च मम पुत्राणां जीवतां तत्र संजय ।
शैनेयोऽभिययौ युद्धे तन्ममाचक्ष्व तत्त्वतः ॥ ४
अत्यद्भुतमिदं तात त्वत्सकाशाच्छृणोम्यहम् ।
एकस्य बहुभिर्युद्धं शत्रुभिर्वै महारथैः ॥ ५
विपरीतमहं मन्ये मन्दभाग्यान्सुतान्प्रति ।
यत्रावध्यन्त समरे सात्वतेन महात्मना ॥ ६
एकस्य हि न पर्याप्तं मत्सैन्यं तस्य संजय ।
क्रुद्धस्य युयुधानस्य सर्वे तिष्ठन्तु पाण्डवाः ॥ ७
निर्जित्य समरे द्रोणं कृतिनं युद्धदुर्मदम् ।
यथा पशुगणान्सिंहस्तद्वद्धन्ता सुतान्मम ॥ ८
कृतवर्मादिभिः शूरैर्यत्तैर्बहुभिराहवे ।
युयुधानो न शकितो हन्तुं यः पुरुषर्षभः ॥ ९
नैतदीदृशकं युद्धं कृतवांस्तत्र फल्गुनः ।
यादृशं कृतवान्युद्धं शिनेर्नप्ता महायशाः ॥ १०

संजय उवाच ।

तव दुर्मन्त्रिते राजन्दुर्योधनकृतेन च ।
शृणुष्वावहितो भूत्वा यत्ते वक्ष्यामि भारत ॥ ११
ते पुनः संन्यवर्तन्त कृत्वा संशप्तकान्मिथः ।
परां युद्धे मतिं कृत्वा पुत्रस्य तव शासनात् ॥ १२
त्रीणि सादिसहस्राणि दुर्योधनपुरोगमाः ।
शकाः काम्बोजबाह्लीका यवनाः पारदास्तथा ॥ १३
कुणिन्दास्तङ्गणाम्बष्ठाः पैशाचाश्च समन्दराः ।
अभ्यद्रवन्त शैनेयं शलभाः पावकं यथा ॥ १४
युक्ताश्च पार्वतीयानां रथाः पाषाणयोधिनाम् ।
शूराः पञ्चशता राजञ्शैनेयं समुपाद्रवन् ॥ १५
ततो रथसहस्रेण महारथशतेन च ।
द्विरदानां सहस्रेण द्विसाहस्रैश्च वाजिभिः ॥ १६

शरवर्षाणि मुञ्चन्तो विविधानि महारथाः ।
अभ्यद्रवन्त शैनेयमसंख्येयाश्च पत्तयः ॥ १७
तांश्च संचोदयन्सर्वान्घ्नतैनमिति भारत ।
दुःशासनो महाराज सात्यकिं पर्यवारयत् ॥ १८
तत्राद्भुतमपश्याम शैनेयचरितं महत् ।
यदेको बहुभिः सार्धमसंभ्रान्तमयुध्यत ॥ १९
अवधीच्च रथानीकं द्विरदानां च तद्बलम् ।
सादिनश्चैव तान्सर्वान्दस्यूनपि च सर्वशः ॥ २०
तत्र चक्रैर्विमथितैर्भग्नैश्च परमायुधैः ।
अक्षैश्च बहुधा भग्नैरीषादण्डकबन्धुरैः ॥ २१
कूबरैर्मथितैश्चापि ध्वजैश्चापि निपातितैः ।
वर्मभिश्चामरैश्चैव व्यवकीर्णा वसुंधरा ॥ २२
स्रग्भिराभरणैर्वस्त्रैरनुकर्षैश्च मारिष ।
संछन्ना वसुधा तत्र द्यौर्ग्रहैरिव भारत ॥ २३
गिरिरूपधराश्चापि पतिताः कुञ्जरोत्तमाः ।
अञ्जनस्य कुले जाता वामनस्य च भारत ।
सुप्रतीककुले जाता महापद्मकुले तथा ॥ २४
ऐरावणकुले चैव तथान्येषु कुलेषु च ।
जाता दन्तिवरा राजञ्शेरते बहवो हताः ॥ २५
वनायुजान्पार्वतीयान्काम्बोजारट्टबाह्लिकान् ।
तथा हयवरान्राजन्निजघ्ने तत्र सात्यकिः ॥ २६
नानादेशसमुत्थांश्च नानाजात्यांश्च पत्तिनः ।
निजघ्ने तत्र शैनेयः शतशोऽथ सहस्रशः ॥ २७
तेषु प्रकाल्यमानेषु दस्यून्दुःशासनोऽब्रवीत् ।
निवर्तध्वमधर्मज्ञा युध्यध्वं किं सृतेन वः ॥ २८
तांश्चापि सर्वान्संप्रेक्ष्य पुत्रो दुःशासनस्तव ।
पाषाणयोधिनः शूरान्पार्वतीयानचोदयत् ॥ २९
अश्मयुद्धेषु कुशला नैतज्जानाति सात्यकिः ।
अश्मयुद्धमजानन्तं घ्नतैनं युद्धकामुकम् ॥ ३०
तथैव कुरवः सर्वे नाश्मयुद्धविशारदाः ।
अभिद्रवत मा भैष्ट न वः प्राप्स्यति सात्यकिः ॥३१
ततो गजशिशुप्रख्यैरुपलैः शैलवासिनः ।
उद्यतैर्युयुधानस्य स्थिता मरणकाङ्क्षिणः ॥ ३२
क्षेपणीयैस्तथाप्यन्ये सात्वतस्य वधैषिणः ।
चोदितास्तव पुत्रेण रुरुधुः सर्वतोदिशम् ॥ ३३
तेषामापततामेव शिलायुद्धं चिकीर्षताम् ।
सात्यकिः प्रतिसंधाय त्रिंशतं प्राहिणोच्छरान् ॥३४
तामश्मवृष्टिं तुमुलां पार्वतीयैः समीरिताम् ।
बिभेदोरगसंकाशैर्नाराचैः शिनिपुंगवः ॥ ३५
तैरश्मचूर्णैर्दीप्यद्भिः खद्योतानामिव व्रजैः ।
प्रायः सैन्यान्यवध्यन्त हाहाभूतानि मारिष ॥ ३६
ततः पञ्चशताः शूराः समुद्यतमहाशिलाः ।
निकृत्तबाहवो राजन्निपेतुर्धरणीतले ॥ ३७
पाषाणयोधिनः शूरान्यतमानानवस्थितान् ।
अवधीद्बहुसाहस्रांस्तदद्भुतमिवाभवत् ॥ ३८
ततः पुनर्बस्तमुखैरश्मवृष्टिं समन्ततः ।
अयोहस्तैः शूलहस्तैर्दरदैः खशतङ्गणैः ॥ ३९
अम्बष्ठैश्च कुणिन्दैश्च क्षिप्तां क्षिप्तां स सात्यकिः ।
नाराचैः प्रतिविव्याध प्रेक्षमाणो महाबलः ॥ ४०
अद्रीणां भिद्यमानानामन्तरिक्षे शितैः शरैः ।
शब्देन प्राद्रवन्राजन्गजाश्वरथपत्तयः ॥ ४१
अश्मचूर्णैः समाकीर्णा मनुष्याश्च वयांसि च ।
नाशक्नुवन्नवस्थातुं भ्रमरैरिव दंशिताः ॥ ४२
हतशिष्टा विरुधिरा भिन्नमस्तकपिण्डिकाः ।
कुञ्जराः संन्यवर्तन्त युयुधानरथं प्रति ॥ ४३
ततः शब्दः समभवत्तव सैन्यस्य मारिष ।
माधवेनार्द्यमानस्य सागरस्येव दारुणः ॥ ४४
तं शब्दं तुमुलं श्रुत्वा द्रोणो यन्तारमब्रवीत् ।
एष सूत रणे क्रुद्धः सात्वतानां महारथः ॥ ४५
दारयन्बहुधा सैन्यं रणे चरति कालवत् ।

यत्रैष शब्दस्तुमुलस्तत्र सूत रथं नय ॥ ४६
पाषाणयोधिभिर्नूनं युयुधानः समागतः ।
तथा हि रथिनः सर्वे ह्रियन्ते विद्रुतैर्हयैः ॥ ४७
विशस्त्रकवचा रुग्णास्तत्र तत्र पतन्ति च ।
न शक्नुवन्ति यन्तारः संयन्तुं तुमुले हयान् ॥ ४८
इत्येवं ब्रुवतो राजन्भारद्वाजस्य धीमतः ।
प्रत्युवाच ततो यन्ता द्रोणं शस्त्रभृतां वरम् ॥ ४९
आयुष्मन्द्रवते सैन्यं कौरवेयं समन्ततः ।
पश्य योधान्रणे भिन्नान्धावमानांस्ततस्ततः ॥ ५०
एते च सहिताः शूराः पाञ्चालाः पाण्डवैः सह ।
त्वामेव हि जिघांसन्तः प्राद्रवन्ति समन्ततः ॥५१
अत्र कार्यं समाधत्स्व प्राप्तकालमरिंदम ।
स्थाने वा गमने वापि दूरं यातश्च सात्यकिः ॥५२
तथैवं वदतस्तस्य भारद्वाजस्य मारिष ।
प्रत्यदृश्यत शैनेयो निघ्नन्बहुविधान्रथान् ॥ ५३
ते वध्यमानाः समरे युयुधानेन तावकाः ।
युयुधानरथं त्यक्त्वा द्रोणानीकाय दुद्रुवुः ॥ ५४
यैस्तु दुःशासनः सार्धं रथैः पूर्वं न्यवर्तत ।
ते भीतास्त्वभ्यधावन्त सर्वे द्रोणरथं प्रति ॥ ५५

इति श्रीमहाभारते द्रोणपर्वणि
सप्तनवतितमोऽध्यायः ॥ ९७ ॥

९८

संजय उवाच ।

दुःशासनरथं दृष्ट्वा समीपे पर्यवस्थितम् ।
भारद्वाजस्ततो वाक्यं दुःशासनमथाब्रवीत् ॥ १
दुःशासन रथाः सर्वे कस्मादेते प्रविद्रुताः ।
कच्चित्क्षेमं तु नृपतेः कच्चिज्जीवति सैन्धवः ॥ २
राजपुत्रो भवानत्र राजभ्राता महारथः ।
किमर्थं द्रवसे युद्धे यौवराज्यमवाप्य हि ॥ ३
स्वयं वैरं महत्कृत्वा पाञ्चालैः पाण्डवैः सह ।
एकं सात्यकिमासाद्य कथं भीतोऽसि संयुगे ॥ ४
न जानीषे पुरा त्वं तु गृह्णन्नक्षान्दुरोदरे ।
शरा ह्येते भविष्यन्ति दारुणाशीविषोपमाः ॥ ५
अप्रियाणां च वचनं पाण्डवेषु विशेषतः ।
द्रौपद्याश्च परिक्लेशस्त्वन्मूलो ह्यभवत्पुरा ॥ ६
क्व ते मानश्च दर्पश्च क्व च तद्वीर गर्जितम् ।
आशीविषसमान्पार्थान्कोपयित्वा क्व यास्यसि ॥ ७
शोच्येयं भारती सेना राजा चैव सुयोधनः ।
यस्य त्वं कर्कशो भ्राता पलायनपरायणः ॥ ८
ननु नाम त्वया वीर दीर्यमाणा भयार्दिता ।
स्वबाहुबलमास्थाय रक्षितव्या ह्यनीकिनी ।
स त्वमद्य रणं त्यक्त्वा भीतो हर्षयसे परान् ॥ ९
विद्रुते त्वयि सैन्यस्य नायके शत्रुसूदन ।
कोऽन्यः स्थास्यति संग्रामे भीतो भीते व्यपाश्रये ॥
एकेन सात्वतेनाद्य युध्यमानस्य चानघ ।
पलायने तव मतिः संग्रामाद्धि प्रवर्तते ॥ ११
यदा गाण्डीवधन्वानं भीमसेनं च कौरव ।
यमौ च युधि द्रष्टासि तदा त्वं किं करिष्यसि ॥
युधि फल्गुनबाणानां सूर्याग्निसमतेजसाम् ।
न तुल्याः सात्यकिशरा येषां भीतः पलायसे ॥१३
यदि तावत्कृता बुद्धिः पलायनपरायणा ।
पृथिवी धर्मराजस्य शमेनैव प्रदीयताम् ॥ १४
यावत्फल्गुननाराचा निर्मुक्तोरगसंनिभाः ।
नाविशन्ति शरीरं ते तावत्संशाम्य पाण्डवैः ॥ १५
यावत्ते पृथिवीं पार्था हत्वा भ्रातृशतं रणे ।
नाक्षिपन्ति महात्मानस्तावत्संशाम्य पाण्डवैः ॥ १६
यावन्न क्रुध्यते राजा धर्मपुत्रो युधिष्ठिरः ।
कृष्णश्च समरश्लाघी तावत्संशाम्य पाण्डवैः ॥ १७
यावद्भीमो महाबाहुर्विगाह्य महतीं चमूम् ।
सोदरांस्ते न मृद्नाति तावत्संशाम्य पाण्डवैः ॥ १८

पूर्वमुक्तश्च ते भ्राता भीष्मेण स सुयोधनः ।
अजेयाः पाण्डवाः संख्ये सौम्य संशाम्य पाण्डवैः ।
न च तत्कृतवान्मन्दस्तव भ्राता सुयोधनः ॥ १९
स युद्धे धृतिमास्थाय यत्तो युध्यस्व पाण्डवैः ।
गच्छ तूर्णं रथेनैव तत्र तिष्ठति सात्यकिः ॥ २०
त्वया हीनं बलं ह्येतद्विद्रविष्यति भारत ।
आत्मार्थं योधय रणे सात्यकिं सत्यविक्रमम् ॥२१
एवमुक्तस्तव सुतो नाब्रवीत्किंचिदप्यसौ ।
श्रुतं चाश्रुतवत्कृत्वा प्रायाद्येन स सात्यकिः ॥ २२
सैन्येन महता युक्तो म्लेच्छानामनिवर्तिनाम् ।
आसाद्य च रणे यत्तो युयुधानमयोधयत् ॥ २३
द्रोणोऽपि रथिनां श्रेष्ठः पाञ्चालान्पाण्डवांस्तथा ।
अभ्यद्रवत संक्रुद्धो जवमास्थाय मध्यमम् ॥ २४
प्रविश्य च रणे द्रोणः पाञ्चालानां वरूथिनीम् ।
द्रावयामास योधान्वै शतशोऽथ सहस्रशः ॥ २५
ततो द्रोणो महाराज नाम विश्राव्य संयुगे ।
पाण्डुपाञ्चालमत्स्यानां प्रचक्रे कदनं महत् ॥ २६
तं जयन्तमनीकानि भारद्वाजं ततस्ततः ।
पाञ्चालपुत्रो द्युतिमान्वीरकेतुः समभ्ययात् ॥ २७
स द्रोणं पञ्चभिर्विद्ध्वा शरैः संनतपर्वभिः ।
ध्वजमेकेन विव्याध सारथिं चास्य सप्तभिः ॥२८
तत्राद्भुतं महाराज दृष्टवानस्मि संयुगे ।
यद्द्रोणो रभसं युद्धे पाञ्चाल्यं नाभ्यवर्तत ॥ २९
संनिरुद्धं रणे द्रोणं पाञ्चाला वीक्ष्य मारिष ।
आवव्रुः सर्वतो राजन्धर्मपुत्रजयैषिणः ॥ ३०
ते शरैरग्निसंकाशैस्तोमरैश्च महाधनैः ।
शस्त्रैश्च विविधै राजन्द्रोणमेकमवाकिरन् ॥ ३१
निहत्य तान्बाणगणान्द्रोणो राजन्समन्ततः ।
महाजलधरान्व्योम्नि मातरिश्वा विवानिव ॥ ३२
ततः शरं महाघोरं सूर्यपावकसंनिभम् ।
संदधे परवीरघ्नो वीरकेतुरथं प्रति ॥ ३३
स भित्त्वा तु शरो राजन्पाञ्चाल्यं कुलनन्दनम् ।
अभ्यगाद्धरणीं तूर्णं लोहितार्द्रो ज्वलन्निव ॥ ३४
ततोऽपतद्रथात्तूर्णं पाञ्चाल्यः कुलनन्दनः ।
पर्वताग्रादिव महांश्चम्पको वायुपीडितः ॥ ३५
तस्मिन्हते महेष्वासे राजपुत्रे महाबले ।
पाञ्चालास्त्वरिता द्रोणं समन्तात्पर्यवारयन् ॥ ३६
चित्रकेतुः सुधन्वा च चित्रवर्मा च भारत ।
तथा चित्ररथश्चैव भ्रातृव्यसनकर्शिताः ॥ ३७
अभ्यद्रवन्त सहिता भारद्वाजं युयुत्सवः ।
मुञ्चन्तः शरवर्षाणि तपान्ते जलदा इव ॥ ३८
स वध्यमानो बहुधा राजपुत्रैर्महारथैः ।
व्यश्वसूतरथांश्चक्रे कुमारान्कुपितो रणे ॥ ३९
तथापरैः सुनिशितैर्भल्लैस्तेषां महायशाः ।
पुष्पाणीव विचिन्वन्हि सोत्तमाङ्गान्यपातयत् ॥४०
ते रथेभ्यो हताः पेतुः क्षितौ राजन्सुवर्चसः ।
देवासुरे पुरा युद्धे यथा दैतेयदानवाः ॥ ४१
तान्निहत्य रणे राजन्भारद्वाजः प्रतापवान् ।
कार्मुकं भ्रामयामास हेमपृष्ठं दुरासदम् ॥ ४२
पाञ्चालान्निहतान्दृष्ट्वा देवकल्पान्महारथान् ।
धृष्टद्युम्नो भृशं क्रुद्धो नेत्राभ्यां पातयञ्जलम् ।
अभ्यवर्तत संग्रामे क्रुद्धो द्रोणरथं प्रति ॥ ४३
ततो हा हेति सहसा नादः समभवन्नृप ।
पाञ्चाल्येन रणे दृष्ट्वा द्रोणमावारितं शरैः ॥ ४४
संछाद्यमानो बहुधा पार्षतेन महात्मना ।
न विव्यथे ततो द्रोणः स्मयन्नेवान्वयुध्यत ॥ ४५
ततो द्रोणं महाराज पाञ्चाल्यः क्रोधमूर्छितः ।
आजघानोरसि क्रुद्धो नवत्या नतपर्वणाम् ॥ ४६
स गाढविद्धो बलिना भारद्वाजो महायशाः ।

निषसाद रथोपस्थे कश्मलं च जगाम ह ॥ ४७
तं वै तथागतं दृष्ट्वा धृष्टद्युम्नः पराक्रमी ।
समुत्सृज्य धनुस्तूर्णमसिं जग्राह वीर्यवान् ॥ ४८
अवप्लुत्य रथाच्चापि त्वरितः स महारथः ।
आरुरोह रथं तूर्णं भारद्वाजस्य मारिष ।
हर्तुमैच्छच्छिरः कायात्क्रोधसंरक्तलोचनः ॥ ४९
प्रत्याश्वस्तस्ततो द्रोणो धनुर्गृह्य महाबलः ।
शरैर्वैतस्तिकै राजन्नित्यमासन्नयोधिभिः ।
योधयामास समरे धृष्टद्युम्नं महारथम् ॥ ५०
ते हि वैतस्तिका नाम शरा आसन्नयोधिनः ।
द्रोणस्य विदिता राजन्धृष्टद्युम्नमवाक्षिपन् ॥ ५१
स वध्यमानो बहुभिः सायकैस्तैर्महाबलः ।
अवप्लुत्य रथात्तूर्णं भग्नवेगः पराक्रमी ॥ ५२
आरुह्य स्वरथं वीरः प्रगृह्य च महद्धनुः ।
विव्याध समरे द्रोणं धृष्टद्युम्नो महारथः ॥ ५३
तदद्भुतं तयोर्युद्धं भूतसंघा ह्यपूजयन् ।
क्षत्रियाश्च महाराज ये चान्ये तत्र सैनिकाः ॥५४
अवश्यं समरे द्रोणो धृष्टद्युम्नेन संगतः ।
वशमेष्यति नो राज्ञः पाञ्चाला इति चुक्रुशुः ॥५५
द्रोणस्तु त्वरितो युद्धे धृष्टद्युम्नस्य सारथेः ।
शिरः प्रच्यावयामास फलं पक्वं तरोरिव ।
ततस्ते प्रद्रुता वाहा राजंस्तस्य महात्मनः ॥ ५६
तेषु प्रद्रवमाणेषु पाञ्चालान्सृञ्जयांस्तथा ।
व्यद्रावयद्रणे द्रोणस्तत्र तत्र पराक्रमी ॥ ५७
विजित्य पाण्डुपाञ्चालान्भारद्वाजः प्रतापवान् ।
स्वं व्यूहं पुनरास्थाय स्थिरोऽभवदरिंदमः ।
न चैनं पाण्डवा युद्धे जेतुमुत्सहिरे प्रभो ॥ ५८

इति श्रीमहाभारते द्रोणपर्वणि
अष्टनवतितमोऽध्यायः ॥ ९८॥

९९

संजय उवाच ।

ततो दुःशासनो राजञ्शैनेयं समुपाद्रवत् ।
किरञ्शरसहस्राणि पर्जन्य इव वृष्टिमान् ॥ १
स विद्ध्वा सात्यकिं षष्ट्या तथा षोडशभिः शरैः ।
नाकम्पयत्स्थितं युद्धे मैनाकमिव पर्वतम् ॥ २
स तु दुःशासनं वीरः सायकैरावृणोद्भृशम् ।
मशकं समनुप्राप्तमूर्णनाभिरिवोर्णया ॥ ३
दृष्ट्वा दुःशासनं राजा तथा शरशताचितम् ।
त्रिगर्तांश्चोदयामास युयुधानरथं प्रति ॥ ४
तेऽगच्छन्युयुधानस्य समीपं क्रूरकारिणः ।
त्रिगर्तानां त्रिसाहस्रा रथा युद्धविशारदाः ॥ ५
ते तु तं रथवंशेन महता पर्यवारयन् ।
स्थिरां कृत्वा मतिं युद्धे भूत्वा संशप्तका मिथः ॥६
तेषां प्रयततां युद्धे शरवर्षाणि मुञ्चताम् ।
योधान्पञ्चशतान्मुख्यानग्रानीके व्यपोथयत् ॥ ७
तेऽपतन्त हतास्तूर्णं शिनिप्रवरसायकैः ।
महामारुतवेगेन रुग्णा इव महाद्रुमाः ॥ ८
रथैश्च बहुधा छिन्नैर्ध्वजैश्चैव विशां पते ।
हयैश्च कनकापीडैः पतितैस्तत्र मेदिनी ॥ ९
शैनेयशरसंकृत्तैः शोणितौघपरिप्लुतैः ।
अशोभत महाराज किंशुकैरिव पुष्पितैः ॥ १०
ते वध्यमानाः समरे युयुधानेन तावकाः ।
त्रातारं नाध्यगच्छन्त पङ्कमग्ना इव द्विपाः ॥ ११
ततस्ते पर्यवर्तन्त सर्वे द्रोणरथं प्रति ।
भयात्पतगराजस्य गर्तानीव महोरगाः ॥ १२
हत्वा पञ्चशतान्योधाञ्शरैराशीविषोपमैः ।
प्रायात्स शनकैर्वीरो धनंजयरथं प्रति ॥ १३
तं प्रयान्तं नरश्रेष्ठं पुत्रो दुःशासनस्तव ।
विव्याध नवभिस्तूर्णं शरैः संनतपर्वभिः ॥ १४

स तु तं प्रतिविव्याध पञ्चभिर्निशितैः शरैः ।
रुक्मपुङ्खैर्महेष्वासो गार्ध्रपत्रैरजिह्मगैः ॥ १५
सात्यकिं तु महाराज प्रहसन्निव भारत ।
दुःशासनस्त्रिभिर्विद्ध्वा पुनर्विव्याध पञ्चभिः ॥ १६
शैनेयस्तव पुत्रं तु विद्ध्वा पञ्चभिराशुगैः ।
धनुश्चास्य रणे छित्त्वा विस्मयन्नर्जुनं ययौ ॥ १७
ततो दुःशासनः क्रुद्धो वृष्णिवीराय गच्छते ।
सर्वपारशवीं शक्तिं विससर्ज जिघांसया ॥ १८
तां तु शक्तिं तदा घोरां तव पुत्रस्य सात्यकिः ।
चिच्छेद शतधा राजन्निशितैः कङ्कपत्रिभिः ॥ १९
अथान्यद्धनुरादाय पुत्रस्तव जनेश्वर ।
सात्यकिं दशभिर्विद्ध्वा सिंहनादं ननाद ह ॥ २०
सात्यकिस्तु रणे क्रुद्धो मोहयित्वा सुतं तव ।
शरैरग्निशिखाकारैराजघान स्तनान्तरे ।
सर्वायसैस्तीक्ष्णवक्त्रैरष्टाभिर्विव्यधे पुनः ॥ २१
दुःशासनस्तु विंशत्या सात्यकिं प्रत्यविध्यत ।
सात्वतोऽपि महाराज तं विव्याध स्तनान्तरे ।
त्रिभिरेव महावेगैः शरैः संनतपर्वभिः ॥ २२
ततोऽस्य वाहान्निशितैः शरैर्जघ्ने महारथः ।
सारथिं च सुसंक्रुद्धः शरैः संनतपर्वभिः ॥ २३
धनुरेकेन भल्लेन हस्तावापं च पञ्चभिः ।
ध्वजं च रथशक्तिं च भल्लाभ्यां परमास्त्रवित् ।
चिच्छेद विशिखैस्तीक्ष्णैस्तथोभौ पार्ष्णिसारथी ॥
स छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
त्रिगर्तसेनापतिना स्वरथेनापवाहितः ॥ २५
तमभिद्रुत्य शैनेयो मुहूर्तमिव भारत ।
न जघान महाबाहुर्भीमसेनवचः स्मरन् ॥ २६
भीमसेनेन हि वधः सुतानां तव भारत ।
प्रतिज्ञातः सभामध्ये सर्वेषामेव संयुगे ॥ २७
तथा दुःशासनं जित्वा सात्यकिः संयुगे प्रभो ।
जगाम त्वरितो राजन्येन यातो धनंजयः ॥ २८

इति श्रीमहाभारते द्रोणपर्वणि
नवनवतितमोऽध्यायः ॥ ९९ ॥

१००

धृतराष्ट्र उवाच ।

किं तस्यां मम सेनायां नासन्केचिन्महारथाः ।
ये तथा सात्यकिं यान्तं नैवाघ्नन्नाप्यवारयन् ॥ १
एको हि समरे कर्म कृतवान्सत्यविक्रमः ।
शक्रतुल्यबलो युद्धे महेन्द्रो दानवेष्विव ॥ २
अथ वा शून्यमासीत्तद्येन यातः स सात्यकिः ।
एको वै बहुलाः सेनाः प्रमृद्नन्पुरुषर्षभः ॥ ३
कथं च युध्यमानानामपक्रान्तो महात्मनाम् ।
एको बहूनां शैनेयस्तन्ममाचक्ष्व संजय ॥ ४

संजय उवाच ।

राजन्सेनासमुद्योगो रथनागाश्वपत्तिमान् ।
तुमुलस्तव सैन्यानां युगान्तसदृशोऽभवत् ॥ ५
आह्निकेषु समूहेषु तव सैन्यस्य मानद ।
नास्ति लोके समः कश्चित्समूह इति मे मतिः ॥ ६
तत्र देवाः स्म भाषन्ते चारणाश्च समागताः ।
एतदन्ताः समूहा वै भविष्यन्ति महीतले ॥ ७
न चैव तादृशः कश्चिद्व्यूह आसीद्विशां पते ।
यादृग्जयद्रथवधे द्रोणेन विहितोऽभवत् ॥ ८
चण्डवाताभिपन्नानां समुद्राणामिव स्वनः ।
रणेऽभवद्बलौघानामन्योन्यमभिधावताम् ॥ ९
पार्थिवानां समेतानां बहून्यासन्नरोत्तम ।
त्वद्बले पाण्डवानां च सहस्राणि शतानि च ॥ १०
संरब्धानां प्रवीराणां समरे दृढकर्मणाम् ।
तत्रासीत्सुमहाञ्शब्दस्तुमुलो लोमहर्षणः ॥ ११
अथाक्रन्दद्भीमसेनो धृष्टद्युम्नश्च मारिष ।
नकुलः सहदेवश्च धर्मराजश्च पाण्डवः ॥ १२

आगच्छत प्रहरत बलवत्परिधावत ।
प्रविष्टावरिसेनां हि वीरौ माधवपाण्डवौ ॥ १३
यथा सुखेन गच्छेतां जयद्रथवधं प्रति ।
तथा प्रकुरुत क्षिप्रमिति सैन्यान्यचोदयत् ।
तयोरभावे कुरवः कृतार्थाः स्युर्वयं जिताः ॥ १४
ते यूयं सहिता भूत्वा तूर्णमेव बलार्णवम् ।
क्षोभयध्वं महावेगाः पवनाः सागरं यथा ॥ १५
भीमसेनेन ते राजन्पाञ्चाल्येन च चोदिताः ।
आजघ्नुः कौरवान्संख्ये त्यक्त्वासूनात्मनः प्रियान् ॥
इच्छन्तो निधनं युद्धे शस्त्रैरुत्तमतेजसः ।
स्वर्गार्थं मित्रकार्यार्थं नाभ्यरक्षन्त जीवितम् ॥ १७
तथैव तावका राजन्प्रार्थयन्तो महद्यशः ।
आर्यां युद्धे मतिं कृत्वा युद्धायैवोपतस्थिरे ॥ १८
तस्मिंस्तु तुमुले युद्धे वर्तमाने महाभये ।
हत्वा सर्वाणि सैन्यानि प्रायात्सात्यकिरर्जुनम् ॥१९
कवचानां प्रभास्तत्र सूर्यरश्मिविचित्रिताः ।
दृष्टीः संख्ये सैनिकानां प्रतिजघ्नुः समन्ततः ॥२०
तथा प्रयतमानेषु पाण्डवेयेषु निर्भयः ।
दुर्योधनो महाराज व्यगाहत महद्बलम् ॥ २१
स संनिपातस्तुमुलस्तेषां तस्य च भारत ।
अभवत्सर्वसैन्यानामभावकरणो महान् ॥ २२

धृतराष्ट्र उवाच ।

तथा गतेषु सैन्येषु तथा कृच्छ्रगतः स्वयम् ।
कच्चिद्दुर्योधनः सूत नाकार्षीत्पृष्ठतो रणम् ॥ २३
एकस्य च बहूनां च संनिपातो महाहवे ।
विशेषतो नृपतिना विषमः प्रतिभाति मे ॥ २४
सोऽत्यन्तसुखसंवृद्धो लक्ष्म्या लोकस्य चेश्वरः ।
एको बहून्समासाद्य कच्चिन्नासीत्पराङ्मुखः ॥ २५

संजय उवाच ।

राजन्संग्राममाश्चर्यं तव पुत्रस्य भारत ।
एकस्य च बहूनां च शृणुष्व गदतोऽद्भुतम् ॥ २६
दुर्योधनेन सहसा पाण्डवी पृतना रणे ।
नलिनी द्विरदेनेव समन्ताद्विप्रलोडिता ॥ २७
तथा सेनां कृतां दृष्ट्वा तव पुत्रेण कौरव ।
भीमसेनपुरोगास्तं पाञ्चालाः समुपाद्रवन् ॥ २८
स भीमसेनं दशभिर्माद्रीपुत्रौ त्रिभिस्त्रिभिः ।
विराटद्रुपदौ षड्भिः शतेन च शिखण्डिनम् ॥ २९
धृष्टद्युम्नं च विंशत्या धर्मपुत्रं च सप्तभिः ।
केकयान्दशभिर्विद्ध्वा द्रौपदेयांस्त्रिभिस्त्रिभिः ॥ ३०
शतशश्चापरान्योधान्सद्विपांश्च रथान्रणे ।
शरैरवचकर्तोग्रैः क्रुद्धोऽन्तक इव प्रजाः ॥ ३१
न संदधन्विमुञ्चन्वा मण्डलीकृतकार्मुकः ।
अदृश्यत रिपून्निघ्नञ्शिक्षयास्त्रबलेन च ॥ ३२
तस्य तान्निघ्नतः शत्रून्हेमपृष्ठं महद्धनुः ।
भल्लाभ्यां पाण्डवो ज्येष्ठस्त्रिधा चिच्छेद मारिष ॥३३
विव्याध चैनं बहुभिः सम्यगस्तैः शितैः शरैः ।
वर्माण्याशु समासाद्य ते भग्नाः क्षितिमाविशन् ॥ ३४
ततः प्रमुदिताः पार्थाः परिवव्रुर्युधिष्ठिरम् ।
यथा वृत्रवधे देवा मुदा शक्रं महर्षिभिः ॥ ३५
अथ दुर्योधनो राजा दृढमादाय कार्मुकम् ।
तिष्ठ तिष्ठेति राजानं ब्रुवन्पाण्डवमभ्ययात् ॥ ३६
तं तथा वादिनं राजंस्तव पुत्रं महारथम् ।
प्रत्युद्ययुः प्रमुदिताः पाञ्चाला जयगृद्धिनः ॥ ३७
तान्द्रोणः प्रतिजग्राह परीप्सन्युधि पाण्डवम् ।
चण्डवातोद्धुतान्मेघान्सजलानचलो यथा ॥ ३८
तत्र राजन्महानासीत्संग्रामो भूरिवर्धनः ।
रुद्रस्याक्रीडसंकाशः संहारः सर्वदेहिनाम् ॥ ३९

इति श्रीमहाभारते द्रोणपर्वणि
शततमोऽध्यायः ॥ १०० ॥

१०१

संजय उवाच।

अपराह्णे महाराज संग्रामः समपद्यत।
पर्जन्यसमनिर्घोषः पुनर्द्रोणस्य सोमकैः॥ १
शोणाश्वं रथमास्थाय नरवीरः समाहितः।
समरेऽभ्यद्रवत्पाण्डूञ्जवमास्थाय मध्यमम्॥ २
तव प्रियहिते युक्तो महेष्वासो महाबलः।
चित्रपुङ्खैः शितैर्बाणैः कलशोत्तमसंभवः॥ ३
वरान्वरान्हि योधानां विचिन्वन्निव भारत।
अक्रीडत रणे राजन्भारद्वाजः प्रतापवान्॥ ४
तमभ्ययाद्बृहत्क्षत्रः केकयानां महारथः।
भ्रातॄणां वीरपञ्चानां ज्येष्ठः समरकर्कशः॥ ५
विमुञ्चन्विशिखांस्तीक्ष्णानाचार्यं छादयन्भृशम्।
महामेघो यथा वर्षं विमुञ्चन्गन्धमादने॥ ६
तस्य द्रोणो महाराज स्वर्णपुङ्खाञ्शिलाशितान्।
प्रेषयामास संक्रुद्धः सायकान्दश सप्त च॥ ७
तांस्तु द्रोणधनुर्मुक्तान्घोरानाशीविषोपमान्।
एकैकं दशभिर्बाणैर्युधि चिच्छेद हृष्टवत्॥ ८
तस्य तल्लाघवं दृष्ट्वा प्रहसन्द्विजसत्तमः।
प्रेषयामास विशिखानष्टौ संनतपर्वणः॥ ९
तान्दृष्ट्वा पततः शीघ्रं द्रोणचापच्युताञ्शरान्।
अवारयच्छरैरेव तावद्भिर्निशितैर्दृढैः॥ १०
ततोऽभवन्महाराज तव सैन्यस्य विस्मयः।
बृहत्क्षत्रेण तत्कर्म कृतं दृष्ट्वा सुदुष्करम्॥ ११
ततो द्रोणो महाराज केकयं वै विशेषयन्।
प्रादुश्चक्रे रणे दिव्यं ब्राह्ममस्त्रं महातपाः॥ १२
तदस्य राजन्कैकेयः प्रत्यवारयदच्युतः।
ब्राह्मेणैव महाबाहुराहवे समुदीरितम्॥ १३
प्रतिहन्य तदस्त्रं तु भारद्वाजस्य संयुगे।
विव्याध ब्राह्मणं षष्ट्या स्वर्णपुङ्खैः शिलाशितैः॥१४
तं द्रोणो द्विपदां श्रेष्ठो नाराचेन समर्पयत्।
स तस्य कवचं भित्त्वा प्राविशद्धरणीतलम्॥ १५
कृष्णसर्पो यथा मुक्तो वल्मीकं नृपसत्तम।
तथाभ्यगान्महीं बाणो भित्त्वा कैकेयमाहवे॥ १६
सोऽतिविद्धो महाराज द्रोणेनास्त्रविदा भृशम्।
क्रोधेन महताविष्टो व्यावृत्य नयने शुभे॥ १७
द्रोणं विव्याध सप्तत्या स्वर्णपुङ्खैः शिलाशितैः।
सारथिं चास्य भल्लेन बाह्वोरुरसि चार्पयत्॥ १८
द्रोणस्तु बहुधा विद्धो बृहत्क्षत्रेण मारिष।
असृजद्विशिखांस्तीक्ष्णान्केकयस्य रथं प्रति॥ १९
व्याकुलीकृत्य तं द्रोणो बृहत्क्षत्रं महारथम्।
व्यसृजत्सायकं तीक्ष्णं केकयं प्रति भारत॥ २०
स गाढविद्धस्तेनाशु महाराज स्तनान्तरे।
रथात्पुरुषशार्दूलः संभिन्नहृदयोऽपतत्॥ २१
बृहत्क्षत्रे हते राजन्केकयानां महारथे।
शैशुपालिः सुसंक्रुद्धो यन्तारमिदमब्रवीत्॥ २२
सारथे याहि यत्रैष द्रोणस्तिष्ठति दंशितः।
विनिघ्नन्केकयान्सर्वान्पाञ्चालानां च वाहिनीम्॥२३
तस्य तद्वचनं श्रुत्वा सारथी रथिनां वरम्।
द्रोणाय प्रापयामास काम्बोजैर्जवनैर्हयैः॥ २४
धृष्टकेतुश्च चेदीनामृषभोऽतिबलोदितः।
सहसा प्रापतद्द्रोणं पतंग इव पावकम्॥ २५
सोऽभ्यविध्यत्ततो द्रोणं षष्ट्या साश्वरथध्वजम्।
पुनश्चान्यैः शरैस्तीक्ष्णैः सुप्तं व्याघ्रं तुदन्निव॥ २६
तस्य द्रोणो धनुर्मध्ये क्षुरप्रेण शितेन ह।
चिच्छेद राज्ञो बलिनो यतमानस्य संयुगे॥ २७
अथान्यद्धनुरादाय शैशुपालिर्महारथः।
विव्याध सायकैर्द्रोणं पुनः सुनिशितैर्दृढैः॥ २८
तस्य द्रोणो हयान्हत्वा सारथिं च महाबलः।
अथैनं पञ्चविंशत्या सायकानां समार्पयत्॥ २९

विरथो विधनुष्कश्च चेदिराजोऽपि संयुगे ।
गदां चिक्षेप संक्रुद्धो भारद्वाजरथं प्रति ॥ ३०
तामापतन्तीं सहसा घोररूपां भयावहाम् ।
अश्मसारमयीं गुर्वीं तपनीयविभूषिताम् ।
शरैरनेकसाहस्रैर्भारद्वाजो न्यपातयत् ॥ ३१
सा पपात गदा भूमौ भारद्वाजेन सादिता ।
रक्तमाल्याम्बरधरा तारेव नभसस्तलात् ॥ ३२
गदां विनिहतां दृष्ट्वा धृष्टकेतुरमर्षणः ।
तोमरं व्यसृजत्तूर्णं शक्तिं च कनकोज्ज्वलाम् ॥ ३३
तोमरं तु त्रिभिर्बाणैर्द्रोणश्छित्त्वा महामृधे ।
शक्तिं चिच्छेद सहसा कृतहस्तो महाबलः ॥ ३४
ततोऽस्य विशिखं तीक्ष्णं वधार्थं वधकाङ्क्षिणः ।
प्रेषयामास समरे भारद्वाजः प्रतापवान् ॥ ३५
स तस्य कवचं भित्त्वा हृदयं चामितौजसः ।
अभ्यगाद्धरणीं बाणो हंसः पद्मसरो यथा ॥ ३६
पतंगं हि ग्रसेच्चाषो यथा राजन्बुभुक्षितः ।
तथा द्रोणोऽग्रसच्छूरो धृष्टकेतुं महामृधे ॥ ३७
निहते चेदिराजे तु तत्खण्डं पित्र्यमाविशत् ।
अमर्षवशमापन्नः पुत्रोऽस्य परमास्त्रवित् ॥ ३८
तमपि प्रहसन्द्रोणः शरैर्निन्ये यमक्षयम् ।
महाव्याघ्रो महारण्ये मृगशावं यथा बली ॥ ३९
तेषु प्रक्षीयमाणेषु पाण्डवेयेषु भारत ।
जरासंधसुतो वीरः स्वयं द्रोणमुपाद्रवत् ॥ ४०
स तु द्रोणं महाराज छादयन्सायकैः शितैः ।
अदृश्यमकरोत्तूर्णं जलदो भास्करं यथा ॥ ४१
तस्य तल्लाघवं दृष्ट्वा द्रोणः क्षत्रियमर्दनः ।
व्यसृजत्सायकांस्तूर्णं शतशोऽथ सहस्रशः ॥ ४२
छादयित्वा रणे द्रोणो रथस्थं रथिनां वरम् ।
जारासंधिमथो जघ्ने मिषतां सर्वधन्विनाम् ॥ ४३
यो यः स्म लीयते द्रोणं तं तं द्रोणोऽन्तकोपमः ।
आदत्त सर्वभूतानि प्राप्ते काले यथान्तकः ॥ ४४
ततो द्रोणो महेष्वासो नाम विश्राव्य संयुगे ।
शरैरनेकसाहस्रैः पाण्डवेयान्व्यमोहयत् ॥ ४५
ततो द्रोणाङ्किता बाणाः स्वर्णपुङ्खाः शिलाशिताः ।
नरान्नागान्हयांश्चैव निजघ्नुः सर्वतो रणे ॥ ४६
ते वध्यमाना द्रोणेन शक्रेणेव महासुराः ।
समकम्पन्त पाञ्चाला गावः शीतार्दिता इव ॥ ४७
ततो निष्टानको घोरः पाण्डवानामजायत ।
द्रोणेन वध्यमानेषु सैन्येषु भरतर्षभ ॥ ४८
मोहिताः शरवर्षेण भारद्वाजस्य संयुगे ।
ऊरुग्राहगृहीता हि पाञ्चालानां महारथाः ॥ ४९
चेदयश्च महाराज सृञ्जयाः सोमकास्तथा ।
अभ्यद्रवन्त संहृष्टा भारद्वाजं युयुत्सया ॥ ५०
हत द्रोणं हत द्रोणमिति ते द्रोणमभ्ययुः ।
यतन्तः पुरुषव्याघ्राः सर्वशक्त्या महाद्युतिम् ।
निनीषन्तो रणे द्रोणं यमस्य सदनं प्रति ॥ ५१
यतमानांस्तु तान्वीरान्भारद्वाजः शिलीमुखैः ।
यमाय प्रेषयामास चेदिमुख्यान्विशेषतः ॥ ५२
तेषु प्रक्षीयमाणेषु चेदिमुख्येषु भारत ।
पाञ्चालाः समकम्पन्त द्रोणसायकपीडिताः ॥ ५३
प्राक्रोशन्भीमसेनं ते धृष्टद्युम्नरथं प्रति ।
दृष्ट्वा द्रोणस्य कर्माणि तथारूपाणि मारिष ॥ ५४
ब्राह्मणेन तपो नूनं चरितं दुश्चरं महत् ।
तथा हि युधि विक्रान्तो दहति क्षत्रियर्षभान् ॥ ५५
धर्मो युद्धं क्षत्रियस्य ब्राह्मणस्य परं तपः ।
तपस्वी कृतविद्यश्च प्रेक्षितेनापि निर्दहेत् ॥ ५६
द्रोणास्त्रमग्निसंस्पर्शं प्रविष्टाः क्षत्रियर्षभाः ।
बहवो दुस्तरं घोरं यत्रादह्यन्त भारत ॥ ५७
यथाबलं यथोत्साहं यथासत्त्वं महाद्युतिः ।
मोहयन्सर्वभूतानि द्रोणो हन्ति बलानि नः ॥ ५८

तेषां तद्वचनं श्रुत्वा क्षत्रधर्मा व्यवस्थितः ।
अर्धचन्द्रेण चिच्छेद द्रोणस्य सशरं धनुः ॥ ५९
स संरब्धतरो भूत्वा द्रोणः क्षत्रियमर्दनः ।
अन्यत्कार्मुकमादाय भास्वरं वेगवत्तरम् ॥ ६०
तत्राधाय शरं तीक्ष्णं भारघ्नं विमलं दृढम् ।
आकर्णपूर्णमाचार्यो बलवानभ्यवासृजत् ॥ ६१
स हत्वा क्षत्रधर्माणं जगाम धरणीतलम् ।
स भिन्नहृदयो वाहादपतन्मेदिनीतले ॥ ६२
ततः सैन्यान्यकम्पन्त धृष्टद्युम्नसुते हते ।
अथ द्रोणं समारोहच्चेकितानो महारथः ॥ ६३
स द्रोणं दशभिर्बाणैः प्रत्यविध्यत्स्तनान्तरे ।
चतुर्भिः सारथिं चास्य चतुर्भिश्चतुरो हयान्॥ ६४
तस्याचार्यः षोडशभिरविध्यद्दक्षिणं भुजम् ।
ध्वजं षोडशभिर्बाणैर्यन्तारं चास्य सप्तभिः ॥ ६५
तस्य सूते हते तेऽश्वा रथमादाय विद्रुताः ।
समरे शरसंवीता भारद्वाजेन मारिष ॥ ६६
चेकितानरथं दृष्ट्वा विद्रुतं हतसारथिम् ।
पाञ्चालान्पाण्डवांश्चैव महद्भयमथाविशत् ॥ ६७
तान्समेतान्रणे शूरांश्चेदिपाञ्चालसृञ्जयान् ।
समन्ताद्द्रावयन्द्रोणो बह्वशोभत मारिष ॥ ६८
आकर्णपलितः श्यामो वयसाशीतिकात्परः ।
रणे पर्यचरद्द्रोणो वृद्धः षोडशवर्षवत् ॥ ६९
अथ द्रोणं महाराज विचरन्तमभीतवत् ।
वज्रहस्तममन्यन्त शत्रवः शत्रुसूदनम् ॥ ७०
ततोऽब्रवीन्महाराज द्रुपदो बुद्धिमान्नृप ।
लुब्धोऽयं क्षत्रियान्हन्ति व्याघ्रः क्षुद्रमृगानिव ॥
कृच्छ्रान्दुर्योधनो लोकान्पापः प्राप्स्यति दुर्मतिः ।
यस्य लोभाद्विनिहताः समरे क्षत्रियर्षभाः ॥ ७२
शतशः शेरते भूमौ निकृत्ता गोवृषा इव ।
रुधिरेण परीताङ्गाः श्वसृगालादनीकृताः ॥ ७३
एवमुक्त्वा महाराज द्रुपदोऽक्षौहिणीपतिः ।
पुरस्कृत्य रणे पार्थान्द्रोणमभ्यद्रवद्द्रुतम् ॥ ७४

इति श्रीमहाभारते द्रोणपर्वणि
एकाधिकशततमोऽध्यायः ॥ १०१ ॥

१०२

संजय उवाच ।

व्यूहेष्वालोड्यमानेषु पाण्डवानां ततस्ततः ।
सुदूरमन्वयुः पार्थाः पाञ्चालाः सह सोमकैः ॥ १
वर्तमाने तथा रौद्रे संग्रामे लोमहर्षणे ।
प्रक्षये जगतस्तीव्रे युगान्त इव भारत ॥ २
द्रोणे युधि पराक्रान्ते नर्दमाने मुहुर्मुहुः ।
पाञ्चालेषु च क्षीणेषु वध्यमानेषु पाण्डुषु ॥ ३
नापश्यच्छरणं किंचिद्धर्मराजो युधिष्ठिरः ।
चिन्तयामास राजेन्द्र कथमेतद्भविष्यति ॥ ४
तत्रावेक्ष्य दिशः सर्वाः सव्यसाचिदिदृक्षया ।
युधिष्ठिरो ददर्शाथ नैव पार्थं न माधवम् ॥ ५
सोऽपश्यन्नरशार्दूलं वानरर्षभलक्षणम् ।
गाण्डीवस्य च निर्घोषमशृण्वन्व्यथितेन्द्रियः ॥ ६
अपश्यन्सात्यकिं चापि वृष्णीनां प्रवरं रथम् ।
चिन्तयाभिपरीताङ्गो धर्मराजो युधिष्ठिरः ।
नाध्यगच्छत्तदा शान्तिं तावपश्यन्नरर्षभौ ॥ ७
लोकोपक्रोशभीरुत्वाद्धर्मराजो महायशाः ।
अचिन्तयन्महाबाहुः शैनेयस्य रथं प्रति ॥ ८
पदवीं प्रेषितश्चैव फल्गुनस्य मया रणे ।
शैनेयः सात्यकिः सत्यो मित्राणामभयंकरः ॥ ९
तदिदं ह्येकमेवासीद्द्विधा जातं ममाद्य वै ।
सात्यकिश्च हि मे ज्ञेयः पाण्डवश्च धनंजयः ॥१०
सात्यकिं प्रेषयित्वा तु पाण्डवस्य पदानुगम् ।
सात्वतस्यापि कं युद्धे प्रेषयिष्ये पदानुगम् ॥ ११
करिष्यामि प्रयत्नेन भ्रातुरन्वेषणं यदि ।

युयुधानमनन्विष्य लोको मां गर्हयिष्यति ॥ १२
भ्रातुरन्वेषणं कृत्वा धर्मराजो युधिष्ठिरः ।
परित्यजति वार्ष्णेयं सात्यकिं सत्यविक्रमम् ॥ १३
लोकापवादभीरुत्वात्सोऽहं पार्थं वृकोदरम् ।
पदवीं प्रेषयिष्यामि माधवस्य महात्मनः ॥ १४
यथैव च मम प्रीतिरर्जुने शत्रुसूदने ।
तथैव वृष्णिवीरेऽपि सात्वते युद्धदुर्मदे ॥ १५
अतिभारे नियुक्तश्च मया शैनेयनन्दनः ।
स तु मित्रोपरोधेन गौरवाच्च महाबलः ।
प्रविष्टो भारतीं सेनां मकरः सागरं यथा ॥ १६
असौ हि श्रूयते शब्दः शूराणामनिवर्तिनाम् ।
मिथः संयुध्यमानानां वृष्णिवीरेण धीमता ॥ १७
प्राप्तकालं सुबलवन्निश्चित्य बहुधा हि मे ।
तत्रैव पाण्डवेयस्य भीमसेनस्य धन्विनः ।
गमनं रोचते मह्यं यत्र यातौ महारथौ ॥ १८
न चाप्यसह्यं भीमस्य विद्यते भुवि किंचन ।
शक्तो ह्येष रणे यत्तान्पृथिव्यां सर्वधन्विनः ।
स्वबाहुबलमास्थाय प्रतिव्यूहितुमञ्जसा ॥ १९
यस्य बाहुबलं सर्वे समाश्रित्य महात्मनः ।
वनवासान्निवृत्ताः स्म न च युद्धेषु निर्जिताः ॥२०
इतो गते भीमसेने सात्वतं प्रति पाण्डवे ।
सनाथौ भवितारौ हि युधि सात्वतफल्गुनौ ॥ २१
कामं त्वशोचनीयौ तौ रणे सात्वतफल्गुनौ ।
रक्षितौ वासुदेवेन स्वयं चास्त्रविशारदौ ॥ २२
अवश्यं तु मया कार्यमात्मनः शोकनाशनम् ।
तस्माद्भीमं नियोक्ष्यामि सात्वतस्य पदानुगम् ।
ततः प्रतिकृतं मन्ये विधानं सात्यकिं प्रति ॥२३
एवं निश्चित्य मनसा धर्मपुत्रो युधिष्ठिरः ।
यन्तारमब्रवीद्राजन्भीमं प्रति नयस्व माम् ॥ २४
धर्मराजवचः श्रुत्वा सारथिर्हयकोविदः ।
रथं हेमपरिष्कारं भीमान्तिकमुपानयत् ॥ २५
भीमसेनमनुप्राप्य प्राप्तकालमनुस्मरन् ।
कश्मलं प्राविशद्राजा बहु तत्र समादिशन् ॥ २६
यः सदेवान्सगन्धर्वान्दैत्यांश्चैकरथोऽजयत् ।
तस्य लक्ष्म न पश्यामि भीमसेनानुजस्य ते ॥२७
ततोऽब्रवीद्धर्मराजं भीमसेनस्तथागतम् ।
नैवाद्राक्षं न चाश्रौषं तव कश्मलमीदृशम् ॥ २८
पुरा हि दुःखदीर्णानां भवान्गतिरभूद्धि नः ।
उत्तिष्ठोत्तिष्ठ राजेन्द्र शाधि किं करवाणि ते ॥ २९
न ह्यसाध्यमकार्यं वा विद्यते मम मानद ।
आज्ञापय कुरुश्रेष्ठ मा च शोके मनः कृथाः ॥ ३०
तमब्रवीदश्रुपूर्णः कृष्णसर्प इव श्वसन् ।
भीमसेनमिदं वाक्यं प्रम्लानवदनो नृपः ॥ ३१
यथा शङ्खस्य निर्घोषः पाञ्चजन्यस्य श्रूयते ।
प्रेरितो वासुदेवेन संरब्धेन यशस्विना ।
नूनमद्य हतः शेते तव भ्राता धनंजयः ॥ ३२
तस्मिन्विनिहते नूनं युध्यतेऽसौ जनार्दनः ।
यस्य सत्त्ववतो वीर्यमुपजीवन्ति पाण्डवाः ॥ ३३
यं भयेष्वभिगच्छन्ति सहस्राक्षमिवामराः ।
स शूरः सैन्धवप्रेप्सुरन्वयाद्भारतीं चमूम् ॥ ३४
तस्य वै गमनं विद्मो भीम नावर्तनं पुनः ।
श्यामो युवा गुडाकेशो दर्शनीयो महाभुजः ॥ ३५
व्यूढोरस्को महास्कन्धो मत्तद्विरदविक्रमः ।
चकोरनेत्रस्ताम्राक्षो द्विषतामघवर्धनः ॥ ३६
तदिदं मम भद्रं ते शोकस्थानमरिंदम ।
अर्जुनार्थं महाबाहो सात्वतस्य च कारणात् ॥ ३७
वर्धते हविषेवाग्निरिध्यमानः पुनः पुनः ।
तस्य लक्ष्म न पश्यामि तेन विन्दामि कश्मलम् ॥
तं विद्धि पुरुषव्याघ्रं सात्वतं च महारथम् ।
स तं महारथं पश्चादनुयातस्तवानुजम् ।

तमपश्यन्महाबाहुमहं विन्दामि कश्मलम् ॥ ३९
तस्मात्कृष्णो रणे नूनं युध्यते युद्धकोविदः ।
यस्य वीर्यवतो वीर्यमुपजीवन्ति पाण्डवाः ॥ ४०
स तत्र गच्छ कौन्तेय यत्र यातो धनंजयः ।
सात्यकिश्च महावीर्यः कर्तव्यं यदि मन्यसे ।
वचनं मम धर्मज्ञ ज्येष्ठो भ्राता भवामि ते ॥ ४१
न तेऽर्जुनस्तथा ज्ञेयो ज्ञातव्यः सात्यकिर्यथा ।
चिकीर्षुर्मत्प्रियं पार्थ प्रयातः सव्यसाचिनः ।
पदवीं दुर्गमां घोरामगम्यामकृतात्मभिः ॥ ४२

भीमसेन उवाच ।

ब्रह्मेशानेन्द्रवरुणानवहद्यः पुरा रथः ।
तमास्थाय गतौ कृष्णौ न तयोर्विद्यते भयम् ॥ ४३
आज्ञां तु शिरसा बिभ्रदेष गच्छामि मा शुचः ।
समेत्य तान्नरव्याघ्रांस्तव दास्यामि संविदम् ॥ ४४

संजय उवाच ।

एतावदुक्त्वा प्रययौ परिदाय युधिष्ठिरम् ।
धृष्टद्युम्नाय बलवान्सुहृद्भ्यश्च पुनः पुनः ।
धृष्टद्युम्नं चेदमाह भीमसेनो महाबलः ॥ ४५
विदितं ते महाबाहो यथा द्रोणो महारथः ।
ग्रहणे धर्मराजस्य सर्वोपायेन वर्तते ॥ ४६
न च मे गमने कृत्यं तादृक्पार्षत विद्यते ।
यादृशं रक्षणे राज्ञः कार्यमात्ययिकं हि नः ॥ ४७
एवमुक्तोऽस्मि पार्थेन प्रतिवक्तुं स्म नोत्सहे ।
प्रयास्ये तत्र यत्रासौ मुमूर्षुः सैन्धवः स्थितः ।
धर्मराजस्य वचने स्थातव्यमविशङ्कया ॥ ४८
सोऽद्य यत्तो रणे पार्थं परिरक्ष युधिष्ठिरम् ।
एतद्धि सर्वकार्याणां परमं कृत्यमाहवे ॥ ४९
तमब्रवीन्महाराज धृष्टद्युम्नो वृकोदरम् ।
ईप्सितेन महाबाहो गच्छ पार्थाविचारयन् ॥ ५०
नाहत्वा समरे द्रोणो धृष्टद्युम्नं कथंचन ।
निग्रहं धर्मराजस्य प्रकरिष्यति संयुगे ॥ ५१
ततो निक्षिप्य राजानं धृष्टद्युम्नाय पाण्डवः ।
अभिवाद्य गुरुं ज्येष्ठं प्रययौ यत्र फल्गुनः ॥ ५२
परिष्वक्तस्तु कौन्तेयो धर्मराजेन भारत ।
आघ्रातश्च तथा मूर्ध्नि श्रावितश्चाशिषः शुभाः ॥
भीमसेनो महाबाहुः कवची शुभकुण्डली ।
साङ्गदः सतनुत्राणः सशरी रथिनां वरः ॥ ५४
तस्य कार्ष्णायसं वर्म हेमचित्रं महर्द्धिमत् ।
विबभौ पर्वतश्लिष्टः सविद्युदिव तोयदः ॥ ५५
पीतरक्तासितसितैर्वासोभिश्च सुवेष्टितः ।
कण्ठत्राणेन च बभौ सेन्द्रायुध इवाम्बुदः ॥ ५६
प्रयाते भीमसेने तु तव सैन्यं युयुत्सया ।
पाञ्चजन्यरवो घोरः पुनरासीद्विशां पते ॥ ५७
तं श्रुत्वा निनदं घोरं त्रैलोक्यत्रासनं महत् ।
पुनर्भीमं महाबाहुर्धर्मपुत्रोऽभ्यभाषत ॥ ५८
एष वृष्णिप्रवीरेण ध्मातः सलिलजो भृशम् ।
पृथिवीं चान्तरिक्षं च विनादयति शङ्खराट् ॥ ५९
नूनं व्यसनमापन्ने सुमहत्सव्यसाचिनि ।
कुरुभिर्युध्यते सार्धं सर्वैश्चक्रगदाधरः ॥ ६०
नूनमार्या महत्कुन्ती पापमद्य निदर्शनम् ।
द्रौपदी च सुभद्रा च पश्यन्ति सह बन्धुभिः ॥६१
स भीमस्त्वरया युक्तो याहि यत्र धनंजयः ।
मुह्यन्तीव हि मे सर्वा धनंजयदिदृक्षया ।
दिशः सप्रदिशः पार्थ सात्वतस्य च कारणात् ॥ ६२
गच्छ गच्छेति च पुनर्भीमसेनमभाषत ।
भृशं स प्रहितो भ्रात्रा भ्राता भ्रातुः प्रियंकरः ।
आहत्य दुन्दुभिं भीमः शङ्खं प्रध्माय चासकृत् ॥
विनद्य सिंहनादं च ज्यां विकर्षन्पुनः पुनः ।
दर्शयन्घोरमात्मानममित्रान्सहसाभ्ययात् ॥ ६४
तमूहुर्जवना दान्ता विकुर्वाणा हयोत्तमाः ।

विशोकेनाभिसंयत्ता मनोमारुतरंहसः ॥ ६५
आरुजन्विरुजन्पार्थौ ज्यां विकर्षंश्च पाणिना ।
सोऽवकर्षन्विकर्षंश्च सेनाग्रं समलोडयत् ॥ ६६
तं प्रयान्तं महाबाहुं पाञ्चालाः सहसोमकाः ।
पृष्ठतोऽनुययुः शूरा मघवन्तमिवामराः ॥ ६७
तं ससेना महाराज सोदर्याः पर्यवारयन् ।
दुःशलश्चित्रसेनश्च कुण्डभेदी विविंशतिः ॥ ६८
दुर्मुखो दुःसहश्चैव विकर्णश्च शलस्तथा ।
विन्दानुविन्दौ सुमुखो दीर्घबाहुः सुदर्शनः ॥ ६९
वृन्दारकः सुहस्तश्च सुषेणो दीर्घलोचनः ।
अभयो रौद्रकर्मा च सुवर्मा दुर्विमोचनः ॥ ७०
विविधै रथिनां श्रेष्ठाः सह सैन्यैः सहानुगैः ।
संयत्ताः समरे शूरा भीमसेनमुपाद्रवन् ॥ ७१
तान्समीक्ष्य तु कौन्तेयो भीमसेनः पराक्रमी ।
अभ्यवर्तत वेगेन सिंहः क्षुद्रमृगानिव ॥ ७२
ते महास्त्राणि दिव्यानि तत्र वीरा अदर्शयन् ।
वारयन्तः शरैर्भीमं मेघाः सूर्यमिवोदितम् ॥ ७३
स तानतीत्य वेगेन द्रोणानीकमुपाद्रवत् ।
अग्रतश्च गजानीकं शरवर्षैरवाकिरत् ॥ ७४
सोऽचिरेणैव कालेन तद्गजानीकमाशुगैः ।
दिशः सर्वाः समभ्यस्य व्यधमत्पवनात्मजः ॥ ७५
त्रासिताः शरभस्येव गर्जितेन वने मृगाः ।
प्राद्रवन्द्विरदाः सर्वे नदन्तो भैरवान्रवान् ॥ ७६
पुनश्चातीत्य वेगेन द्रोणानीकमुपाद्रवत् ।
तमवारयदाचार्यो वेलेवोद्वृत्तमर्णवम् ॥ ७७
ललाटेऽताडयच्चैनं नाराचेन स्मयन्निव ।
ऊर्ध्वरश्मिरिवादित्यो विबभौ तत्र पाण्डवः ॥ ७८
स मन्यमानस्त्वाचार्यो ममायं फल्गुनो यथा ।
भीमः करिष्यते पूजामित्युवाच वृकोदरम् ॥ ७९
भीमसेन न ते शक्यं प्रवेष्टुमरिवाहिनीम् ।
मामनिर्जित्य समरे शत्रुमध्ये महाबल ॥ ८०
यदि ते सोऽनुजः कृष्णः प्रविष्टोऽनुमते मम ।
अनीकं न तु शक्यं भोः प्रवेष्टुमिह वै त्वया ॥
अथ भीमस्तु तच्छ्रुत्वा गुरोर्वाक्यमपेतभीः ।
क्रुद्धः प्रोवाच वै द्रोणं रक्तताम्रेक्षणः श्वसन् ॥ ८२
तवार्जुनो नानुमते ब्रह्मबन्धो रणाजिरम् ।
प्रविष्टः स हि दुर्धर्षः शक्रस्यापि विशेद्बलम् ॥ ८३
येन वै परमां पूजां कुर्वता मानितो ह्यसि ।
नार्जुनोऽहं घृणी द्रोण भीमसेनोऽस्मि ते रिपुः ॥
पिता नस्त्वं गुरुर्बन्धुस्तथा पुत्रा हि ते वयम् ।
इति मन्यामहे सर्वे भवन्तं प्रणताः स्थिताः ॥ ८५
अद्य तद्विपरीतं ते वदतोऽस्मासु दृश्यते ।
यदि शत्रुं त्वमात्मानं मन्यसे तत्तथास्त्विह ।
एष ते सदृशं शत्रोः कर्म भीमः करोम्यहम् ॥ ८६
अथोद्भ्राम्य गदां भीमः कालदण्डमिवान्तकः ।
द्रोणायावसृजद्राजन्स रथादवपुप्लुवे ॥ ८७
साश्वसूतध्वजं यानं द्रोणस्यापोथयत्तदा ।
प्रामृद्नाच्च बहून्योधान्वायुर्वृक्षानिवौजसा ॥ ८८
तं पुनः परिवव्रुस्ते तव पुत्रा रथोत्तमम् ।
अन्यं च रथमास्थाय द्रोणः प्रहरतां वरः ॥ ८९
ततः क्रुद्धो महाराज भीमसेनः पराक्रमी ।
अग्रतः स्यन्दनानीकं शरवर्षैरवाकिरत् ॥ ९०
ते वध्यमानाः समरे तव पुत्रा महारथाः ।
भीमं भीमबलं युद्धेऽयोधयंस्तु जयैषिणः ॥ ९१
ततो दुःशासनः क्रुद्धो रथशक्तिं समाक्षिपत् ।
सर्वपारशवीं तीक्ष्णां जिघांसुः पाण्डुनन्दनम् ॥९२
आपतन्तीं महाशक्तिं तव पुत्रप्रचोदिताम् ।
द्विधा चिच्छेद तां भीमस्तदद्भुतमिवाभवत् ॥ ९३
अथान्यैर्निशितैर्बाणैः संक्रुद्धः कुण्डभेदिनम् ।
सुषेणं दीर्घनेत्रं च त्रिभिस्त्रीनवधीद्बली ॥ ९४

ततो वृन्दारकं वीरं कुरूणां कीर्तिवर्धनम् ।
पुत्राणां तव वीराणां युध्यतामवधीत्पुनः ॥ ९५
अभयं रौद्रकर्माणं दुर्विमोचनमेव च ।
त्रिभिस्त्रीनवधीद्भीमः पुनरेव सुतांस्तव ॥ ९६
वध्यमाना महाराज पुत्रास्तव बलीयसा ।
भीमं प्रहरतां श्रेष्ठं समन्तात्पर्यवारयन् ॥ ९७
विन्दानुविन्दौ सहितौ सुवर्माणं च ते सुतम् ।
प्रहसन्निव कौन्तेयः शरैर्निन्ये यमक्षयम् ॥ ९८
ततः सुदर्शनं वीरं पुत्रं ते भरतर्षभ ।
विव्याध समरे तूर्णं स पपात ममार च ॥ ९९
सोऽचिरेणैव कालेन तद्रथानीकमाशुगैः ।
दिशः सर्वाः समभ्यस्य व्यधमत्पाण्डुनन्दनः ॥
ततो वै रथघोषेण गर्जितेन मृगा इव ।
वध्यमानाश्च समरे पुत्रास्तव विशां पते ।
प्राद्रवन्सरथाः सर्वे भीमसेनभयार्दिताः ॥ १०१
अनुयाय तु कौन्तेयः पुत्राणां ते महद्बलम् ।
विव्याध समरे राजन्कौरवेयान्समन्ततः ॥ १०२
वध्यमाना महाराज भीमसेनेन तावकाः ।
त्यक्त्वा भीमं रणे यान्ति चोदयन्तो हयोत्तमान् ॥
तांस्तु निर्जित्य समरे भीमसेनो महाबलः ।
सिंहनादरवं चक्रे बाहुशब्दं च पाण्डवः ॥ १०४
तलशब्दं च सुमहत्कृत्वा भीमो महाबलः ।
व्यतीत्य रथिनश्चापि द्रोणानीकमुपाद्रवत् ॥ १०५

इति श्रीमहाभारते द्रोणपर्वणि
द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

१०३

संजय उवाच ।

तमुत्तीर्णं रथानीकात्तमसो भास्करं यथा ।
दिधारयिषुराचार्यः शरवर्षैरवाकिरत् ॥ १
पिबन्निव शरौघांस्तान्द्रोणचापवरातिगान् ।
सोऽभ्यवर्तत सोदर्यान्मायया मोहयन्बलम् ॥ २
तं मृधे वेगमास्थाय परं परमधन्विनः ।
चोदितास्तव पुत्रैश्च सर्वतः पर्यवारयन् ॥ ३
स तथा संवृतो भीमः प्रहसन्निव भारत ।
उदयच्छद्गदां तेभ्यो घोरां तां सिंहवन्नदन् ।
अवासृजच्च वेगेन तेषु तान्प्रमथद्बली ॥ ४
सेन्द्राशनिरिवेन्द्रेण प्रविद्धा संहतात्मना ।
घोषेण महता राजन्पूरयित्वेव मेदिनीम् ।
ज्वलन्ती तेजसा भीमा त्रासयामास ते सुतान् ॥ ५
तां पतन्तीं महावेगां दृष्ट्वा तेजोभिसंवृताम् ।
प्राद्रवंस्तावकाः सर्वे नदन्तो भैरवान्रवान् ॥ ६
तं च शब्दमसंसह्यं तस्याः संलक्ष्य मारिष ।
प्रापतन्मनुजास्तत्र रथेभ्यो रथिनस्तदा ॥ ७
स तान्विद्राव्य कौन्तेयः संख्येऽमित्रान्दुरासदः ।
सुपर्ण इव वेगेन पक्षिराडत्यगाच्चमूम् ॥ ८
तथा तं विप्रकुर्वाणं रथयूथपयूथपम् ।
भारद्वाजो महाराज भीमसेनं समभ्ययात् ॥ ९
द्रोणस्तु समरे भीमं वारयित्वा शरोर्मिभिः ।
अकरोत्सहसा नादं पाण्डूनां भयमादधत् ॥ १०
तद्युद्धमासीत्सुमहद्घोरं देवासुरोपमम् ।
द्रोणस्य च महाराज भीमस्य च महात्मनः ॥ ११
यदा तु विशिखैस्तीक्ष्णैर्द्रोणचापविनिःसृतैः ।
वध्यन्ते समरे वीराः शतशोऽथ सहस्रशः ॥ १२
ततो रथादवप्लुत्य वेगमास्थाय पाण्डवः ।
निमील्य नयने राजन्पदातिर्द्रोणमभ्ययात् ॥ १३
यथा हि गोवृषो वर्षं प्रतिगृह्णाति लीलया ।
तथा भीमो नरव्याघ्रः शरवर्षं समग्रहीत् ॥ १४
स वध्यमानः समरे रथं द्रोणस्य मारिष ।
ईषायां पाणिना गृह्य प्रचिक्षेप महाबलः ॥ १५
द्रोणस्तु सत्वरो राजन्क्षिप्तो भीमेन संयुगे ।

रथमन्यं समास्थाय व्यूहद्वारमुपाययौ ।। १६
तस्मिन्क्षणे तस्य यन्ता तूर्णमश्वानचोदयत् ।
भीमसेनस्य कौरव्य तदद्भुतमिवाभवत् ।। १७
ततः स्वरथमास्थाय भीमसेनो महाबलः ।
अभ्यवर्तत वेगेन तव पुत्रस्य वाहिनीम् ।। १८
स मृद्नन्क्षत्रियानाजौ वातो वृक्षानिवोद्धतः ।
अगच्छद्दारयन्सेनां सिन्धुवेगो नगानिव ।। १९
भोजानीकं समासाद्य हार्दिक्येनाभिरक्षितम् ।
प्रमथ्य बहुधा राजन्भीमसेनः समभ्ययात् ।। २०
संत्रासयन्ननीकानि तलशब्देन मारिष ।
अजयत्सर्वसैन्यानि शार्दूल इव गोवृषान् ।। २१
भोजानीकमतिक्रम्य काम्बोजानां च वाहिनीम् ।
तथा म्लेच्छगणांश्चान्यान्बहून्युद्धविशारदान् ।। २२
सात्यकिं चापि संप्रेक्ष्य युध्यमानं नरर्षभम् ।
रथेन यत्तः कौन्तेयो वेगेन प्रययौ तदा ।। २३
भीमसेनो महाराज द्रष्टुकामो धनंजयम् ।
अतीत्य समरे योधांस्तावकान्पाण्डुनन्दनः ।। २४
सोऽपश्यदर्जुनं तत्र युध्यमानं नरर्षभम् ।
सैन्धवस्य वधार्थं हि पराक्रान्तं पराक्रमी ।। २५
अर्जुनं तत्र दृष्ट्वाथ चुक्रोश महतो रवान् ।
तं तु तस्य महानादं पार्थः शुश्राव नर्दतः ।। २६
ततः पार्थो महानादं मुञ्चन्वै माधवश्च ह ।
अभ्ययातां महाराज नर्दन्तौ गोवृषाविव ।। २७
वासुदेवार्जुनौ श्रुत्वा निनादं तस्य शुष्मिणः ।
पुनः पुनः प्रणदतां दिदृक्षन्तौ वृकोदरम् ।। २८
भीमसेनरवं श्रुत्वा फल्गुनस्य च धन्विनः ।
अप्रीयत महाराज धर्मपुत्रो युधिष्ठिरः ।। २९
विशोकश्चाभवद्राजा श्रुत्वा तं निनदं महत् ।
धनंजयस्य च रणे जयमाशास्तवान्विभुः ।। ३०
तथा तु नर्दमाने वै भीमसेने रणोत्कटे ।
स्मितं कृत्वा महाबाहुर्धर्मपुत्रो युधिष्ठिरः ।। ३१
हृद्गतं मनसा प्राह ध्यात्वा धर्मभृतां वरः ।
दत्ता भीम त्वया संवित्कृतं गुरुवचस्तथा ।। ३२
न हि तेषां जयो युद्धे येषां द्वेष्टासि पाण्डव ।
दिष्ट्या जीवति संग्रामे सव्यसाची धनंजयः ।। ३३
दिष्ट्या च कुशली वीरः सात्यकिः सत्यविक्रमः ।
दिष्ट्या शृणोमि गर्जन्तौ वासुदेवधनंजयौ ।। ३४
येन शक्रं रणे जित्वा तर्पितो हव्यवाहनः ।
स हन्ता द्विषतां संख्ये दिष्ट्या जीवति फल्गुनः ।।
यस्य बाहुबलं सर्वे वयमाश्रित्य जीविताः ।
स हन्ता रिपुसैन्यानां दिष्ट्या जीवति फल्गुनः ।। ३६
निवातकवचा येन देवैरपि सुदुर्जयाः ।
निर्जिता रथिनैकेन दिष्ट्या पार्थः स जीवति ।। ३७
कौरवान्सहितान्सर्वान्गोग्रहार्थे समागतान् ।
योऽजयन्मत्स्यनगरे दिष्ट्या पार्थः स जीवति ।। ३८
कालकेयसहस्राणि चतुर्दश महारणे ।
योऽवधीद्भुजवीर्येण दिष्ट्या पार्थः स जीवति ।। ३९
गन्धर्वराजं बलिनं दुर्योधनकृतेन वै ।
जितवान्योऽस्त्रवीर्येण दिष्ट्या पार्थः स जीवति ।।
किरीटमाली बलवाञ्श्वेताश्वः कृष्णसारथिः ।
मम प्रियश्च सततं दिष्ट्या जीवति फल्गुनः ।। ४१
पुत्रशोकाभिसंतप्तश्चिकीर्षुः कर्म दुष्करम् ।
जयद्रथवधान्वेषी प्रतिज्ञां कृतवान्हि यः ।
कच्चित्स सैन्धवं संख्ये हनिष्यति धनंजयः ।। ४२
कच्चित्तीर्णप्रतिज्ञं हि वासुदेवेन रक्षितम् ।
अनस्तमित आदित्ये समेष्याम्यहमर्जुनम् ।। ४३
कच्चित्सैन्धवको राजा दुर्योधनहिते रतः ।
नन्दयिष्यत्यमित्राणि फल्गुनेन निपातितः ।। ४४
कच्चिद्दुर्योधनो राजा फल्गुनेन निपातितम् ।
दृष्ट्वा सैन्धवकं संख्ये शममस्मासु धास्यति ।। ४५

दृष्ट्वा विनिहतान्भ्रातॄन्भीमसेनेन संयुगे ।
कच्चिद्दुर्योधनो मन्दः शममस्मासु धास्यति ॥ ४६
दृष्ट्वा चान्यान्बहून्योधान्पातितान्धरणीतले ।
कच्चिद्दुर्योधनो मन्दः पश्चात्तापं करिष्यति ॥ ४७
कच्चिद्भीष्मेण नो वैरमेकेनैव प्रशाम्यति ।
शेषस्य रक्षणार्थं च संधास्यति सुयोधनः ॥ ४८
एवं बहुविधं तस्य चिन्तयानस्य पार्थिव ।
कृपयाभिपरीतस्य घोरं युद्धमवर्तत ॥ ४९

इति श्रीमहाभारते द्रोणपर्वणि
त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

१०४

धृतराष्ट्र उवाच ।

तथा तु नर्दमानं तं भीमसेनं महाबलम् ।
मेघस्तनितनिर्घोषं के वीराः पर्यवारयन् ॥ १
न हि पश्याम्यहं तं वै त्रिषु लोकेषु संजय ।
क्रुद्धस्य भीमसेनस्य यस्तिष्ठेदग्रतो रणे ॥ २
गदामुद्यच्छमानस्य कालस्येव महामृधे ।
न हि पश्याम्यहं तात यस्तिष्ठेत रणाजिरे ॥ ३
रथं रथेन यो हन्यात्कुञ्जरं कुञ्जरेण च ।
कस्तस्य समरे स्थाता साक्षादपि शतक्रतुः ॥ ४
क्रुद्धस्य भीमसेनस्य मम पुत्राञ्जिघांसतः ।
दुर्योधनहिते युक्ताः समतिष्ठन्त केऽग्रतः ॥ ५
भीमसेनदवाग्नेऽस्तु मम पुत्रतृणोलपम् ।
प्रधक्ष्यतो रणमुखे के वीराः प्रमुखे स्थिताः ॥ ६
काल्यमानान्हि मे पुत्रान्भीमेनावेक्ष्य संयुगे ।
कालेनेव प्रजाः सर्वाः के भीमं पर्यवारयन् ॥ ७
भीमवह्नेः प्रदीप्तस्य मम पुत्रान्दिधक्षतः ।
के शूराः पर्यवर्तन्त तन्ममाचक्ष्व संजय ॥ ८

संजय उवाच ।

तथा तु नर्दमानं तं भीमसेनं महारथम् ।
तुमुलेनैव शब्देन कर्णोऽप्यभ्यपतद्बली ॥ ९
व्याक्षिपन्बलवच्चापमतिमात्रममर्षणः ।
कर्णस्तु युद्धमाकाङ्क्षन्दर्शयिष्यन्बलं बली ॥ १०
प्रावेपन्निव गात्राणि कर्णभीमसमागमे ।
रथिनां सादिनां चैव तयोः श्रुत्वा तलस्वनम् ॥ ११
भीमसेनस्य निनदं घोरं श्रुत्वा रणाजिरे ।
खं च भूमिं च संबद्धां मेनिरे क्षत्रियर्षभाः ॥ १२
पुनर्घोरेण नादेन पाण्डवस्य महात्मनः ।
समरे सर्वयोधानां धनूंष्यभ्यपतन्क्षितौ ॥ १३
वित्रस्तानि च सर्वाणि शकृन्मूत्रं प्रसुस्रुवुः ।
वाहनानि महाराज बभूवुर्विमनांसि च ॥ १४
प्रादुरासन्निमित्तानि घोराणि च बहूनि च ।
तस्मिंस्तु तुमुले राजन्भीमकर्णसमागमे ॥ १५
ततः कर्णस्तु विंशत्या शराणां भीममार्दयत् ।
विव्याध चास्य त्वरितः सूतं पञ्चभिराशुगैः ॥ १६
प्रहस्य भीमसेनस्तु कर्णं प्रत्यर्पयद्रणे ।
सायकानां चतुःषष्ट्या क्षिप्रकारी महाबलः ॥ १७
तस्य कर्णो महेष्वासः सायकांश्चतुरोऽक्षिपत् ।
असंप्राप्तांस्तु तान्भीमः सायकैर्नतपर्वभिः ।
चिच्छेद बहुधा राजन्दर्शयन्पाणिलाघवम् ॥ १८
तं कर्णश्छादयामास शरव्रातैरनेकशः ।
संछाद्यमानः कर्णेन बहुधा पाण्डुनन्दनः ॥ १९
चिच्छेद चापं कर्णस्य मुष्टिदेशे महारथः ।
विव्याध चैनं बहुभिः सायकैर्नतपर्वभिः ॥ २०
अथान्यद्धनुरादाय सज्यं कृत्वा च सूतजः ।
विव्याध समरे भीमं भीमकर्मा महारथः ॥ २१
तस्य भीमो भृशं क्रुद्धस्त्रीञ्शरान्नतपर्वणः ।
निचखानोरसि तदा सूतपुत्रस्य वेगितः ॥ २२
तैः कर्णोऽभ्राजत शरैरुरोमध्यगतैस्तदा ।
महीधर इवोदग्रस्त्रिशृङ्गो भरतर्षभ ॥ २३

सुस्राव चास्य रुधिरं विद्धस्य परमेषुभिः ।
धातुप्रस्यन्दिनः शैलाद्यथा गैरिकराजयः ॥ २४
किंचिद्विचलितः कर्णः सुप्रहाराभिपीडितः ।
ससायकं धनुः कृत्वा भीमं विव्याध मारिष ।
चिक्षेप च पुनर्बाणाञ्शतशोऽथ सहस्रशः ॥ २५
स छाद्यमानः सहसा कर्णेन दृढधन्विना ।
धनुर्ज्यामच्छिनत्तूर्णमुत्स्मयन्पाण्डुनन्दनः ॥ २६
सारथिं चास्य भल्लेन प्राहिणोद्यमसादनम् ।
वाहांश्च चतुरः संख्ये व्यसूंश्चक्रे महारथः ॥ २७
हताश्वात्तु रथात्कर्णः समाप्लुत्य विशां पते ।
स्यन्दनं वृषसेनस्य समारोहन्महारथः ॥ २८
निर्जित्य तु रणे कर्णं भीमसेनः प्रतापवान् ।
ननाद सुमहानादं पर्जन्यनिनदोपमम् ॥ २९
तस्य तं निनदं श्रुत्वा प्रहृष्टोऽभूद्युधिष्ठिरः ।
कर्णं च निर्जितं मत्वा भीमसेनेन भारत ॥ ३०
समन्ताच्छङ्खनिनदं पाण्डुसेनाकरोत्तदा ।
शत्रुसेनाध्वनिं श्रुत्वा तावका ह्यपि नानदन् ।
गाण्डीवं प्राक्षिपत्पार्थः कृष्णोऽप्यब्जमवादयत् ॥ ३१
तमन्तर्धाय निनदं ध्वनिर्भीमस्य नर्दतः ।
अश्रूयत महाराज सर्वसैन्येषु भारत ॥ ३२
ततो व्यायच्छतामस्त्रैः पृथक्पृथगरिंदमौ ।
मृदुपूर्वं च राधेयो दृढपूर्वं च पाण्डवः ॥ ३३

इति श्रीमहाभारते द्रोणपर्वणि
चतुरधिकशततमोऽध्यायः ॥ १०४ ॥

१०५

संजय उवाच ।

तस्मिन्विलुलिते सैन्ये सैन्धवायार्जुने गते ।
सात्वते भीमसेने च पुत्रस्ते द्रोणमभ्ययात् ।
त्वरन्नेकरथेनैव बहुकृत्यं विचिन्तयन् ॥ १
स रथस्तव पुत्रस्य त्वरया परया युतः ।
तूर्णमभ्यपतद्द्रोणं मनोमारुतवेगवान् ॥ २
उवाच चैनं पुत्रस्ते संरम्भाद्रक्तलोचनः ।
अर्जुनो भीमसेनश्च सात्यकिश्चापराजितः ॥ ३
विजित्य सर्वसैन्यानि सुमहान्ति महारथाः ।
संप्राप्ताः सिन्धुराजस्य समीपमरिकर्शनाः ।
व्यायच्छन्ति च तत्रापि सर्व एवापराजिताः ॥ ४
यदि तावद्रणे पार्थो व्यतिक्रान्तो महारथः ।
कथं सात्यकिभीमाभ्यां व्यतिक्रान्तोऽसि मानद ॥ ५
आश्चर्यभूतं लोकेऽस्मिन्समुद्रस्येव शोषणम् ।
निर्जयं तव विप्राग्र्य सात्वतेनार्जुनेन च ॥ ६
तथैव भीमसेनेन लोकः संवदते भृशम् ।
कथं द्रोणो जितः संख्ये धनुर्वेदस्य पारगः ॥ ७
नाश एव तु मे नूनं मन्दभाग्यस्य संयुगे ।
यत्र त्वां पुरुषव्याघ्रमतिक्रान्तास्त्रयो रथाः ॥ ८
एवं गते तु कृत्येऽस्मिन्ब्रूहि यत्ते विवक्षितम् ।
यद्गतं गतमेवेह शेषं चिन्तय मानद ॥ ९
यत्कृत्यं सिन्धुराजस्य प्राप्तकालमनन्तरम् ।
तद्ब्रवीतु भवान्क्षिप्रं साधु तत्संविधीयताम् ॥ १०

द्रोण उवाच ।

चिन्त्यं बहु महाराज कृत्यं यत्तत्र मे शृणु ।
त्रयो हि समतिक्रान्ताः पाण्डवानां महारथाः ।
यावदेव भयं पश्चात्तावदेषां पुरःसरम् ॥ ११
तद्गरीयस्तरं मन्ये यत्र कृष्णधनंजयौ ।
सा पुरस्ताच्च पश्चाच्च गृहीता भारती चमूः ॥ १२
तत्र कृत्यमहं मन्ये सैन्धवस्याभिरक्षणम् ।
स नो रक्ष्यतमस्तात क्रुद्धाद्भीतो धनंजयात् ॥ १३
गतौ हि सैन्धवं वीरौ युयुधानवृकोदरौ ।
संप्राप्तं तदिदं द्यूतं यत्तच्छकुनिबुद्धिजम् ॥ १४
न सभायां जयो वृत्तो नापि तत्र पराजयः ।
इह नो ग्लहमानानामद्य तात जयाजयौ ॥ १५

यान्स तान्ग्लहते घोराञ्शकुनिः कुरुसंसदि ।
अक्षान्संमन्यमानः स प्राक्शरास्ते दुरासदाः ॥१६
यत्र ते बहवस्तात कुरवः पर्यवस्थिताः ।
सेनां दुरोदरं विद्धि शरानक्षान्विशां पते ॥ १७
ग्लहं च सैन्धवं राजन्नत्र द्यूतस्य निश्चयः ।
सैन्धवे हि महाद्यूतं समासक्तं परैः सह ॥ १८
अत्र सर्वे महाराज त्यक्त्वा जीवितमात्मनः ।
सैन्धवस्य रणे रक्षां विधिवत्कर्तुमर्हथ ।
तत्र नो ग्लहमानानां ध्रुवौ तात जयाजयौ ॥ १९
यत्र ते परमेष्वासा यत्ता रक्षन्ति सैन्धवम् ।
तत्र याहि स्वयं शीघ्रं तांश्च रक्षस्व रक्षिणः ॥ २०
इहैव त्वहमासिष्ये प्रेषयिष्यामि चापरान् ।
निरोत्स्यामि च पाञ्चालान्सहितान्पाण्डुसृञ्जयैः ॥२१
ततो दुर्योधनः प्रायात्तूर्णमाचार्यशासनात् ।
उद्यम्यात्मानमुग्राय कर्मणे सपदानुगः ॥ २२
चक्ररक्षौ तु पाञ्चाल्यौ युधामन्यूत्तमौजसौ ।
बाह्येन सेनामभ्येत्य जग्मतुः सव्यसाचिनम् ॥ २३
तौ हि पूर्वं महाराज वारितौ कृतवर्मणा ।
प्रविष्टे त्वर्जुने राजंस्तव सैन्यं युयुत्सया ॥ २४
ताभ्यां दुर्योधनः सार्धमगच्छद्युद्धमुत्तमम् ।
त्वरितस्त्वरमाणाभ्यां भ्रातृभ्यां भारतो बली ॥२५
तावभिद्रवतामेनमुभावुद्यतकार्मुकौ ।
महारथसमाख्यातौ क्षत्रियप्रवरौ युधि ॥ २६
युधामन्युस्तु संक्रुद्धः शरांस्त्रिंशतमायसान् ।
व्यसृजत्तव पुत्रस्य त्वरमाणः स्तनान्तरे ॥ २७
दुर्योधनोऽपि राजेन्द्र पाञ्चाल्यस्योत्तमौजसः ।
जघान चतुरश्चाश्वानुभौ च पार्ष्णिसारथी ॥ २८
उत्तमौजा हताश्वस्तु हतसूतश्च संयुगे ।
आरुरोह रथं भ्रातुर्युधामन्योरभित्वरन् ॥ २९
स रथं प्राप्य तं भ्रातुर्दुर्योधनहयाञ्शरैः ।
बहुभिस्ताडयामास ते हताः प्रापतन्भुवि ॥ ३०
हयेषु पतितेष्वस्य चिच्छेद परमेषुणा ।
युधामन्युर्धनुः शीघ्रं शरावापं च संयुगे ॥ ३१
हताश्वसूतात्स रथादवप्लुत्य महारथः ।
गदामादाय ते पुत्रः पाञ्चाल्यावभ्यधावत ॥ ३२
तमापतन्तं संप्रेक्ष्य क्रुद्धं परपुरंजयम् ।
अवप्लुतौ रथोपस्थाद्युधामन्यूत्तमौजसौ ॥ ३३
ततः स हेमचित्रं तं स्यन्दनप्रवरं गदी ।
गदया पोथयामास साश्वसूतध्वजं रणे ॥ ३४
हत्वा चैनं स पुत्रस्ते हताश्वो हतसारथिः ।
मद्रराजरथं तूर्णमारुरोह परंतपः ॥ ३५
पाञ्चालानां तु मुख्यौ तौ राजपुत्रौ महाबलौ ।
रथमन्यं समारुह्य धनंजयमभीयतुः ॥ ३६

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥

१०६

धृतराष्ट्र उवाच ।

यौ तौ कर्णश्च भीमश्च संप्रयुद्धौ महाबलौ ।
अर्जुनस्य रथोपान्ते कीदृशः सोऽभवद्रणः ॥ १
पूर्वं हि निर्जितः कर्णो भीमसेनेन संयुगे ।
कथं भूयस्तु राधेयो भीममागान्महारथः ॥ २
भीमो वा सूततनयं प्रत्युद्यातः कथं रणे ।
महारथसमाख्यातं पृथिव्यां प्रवरं रथम् ॥ ३
भीष्मद्रोणावतिक्रम्य धर्मपुत्रो युधिष्ठिरः ।
नान्यतो भयमादत्त विना कर्णं धनुर्धरम् ॥ ४
भयान्न शेते सततं चिन्तयन्वै महारथम् ।
तं कथं सूतपुत्रं हि भीमोऽयुध्यत संयुगे ॥ ५
ब्रह्मण्यं वीर्यसंपन्नं समरेष्वनिवर्तिनम् ।
कथं कर्णं युधां श्रेष्ठं भीमोऽयुध्यत संयुगे ॥ ६
यौ तौ समीयतुर्वीरावर्जुनस्य रथं प्रति ।

कथं नु तावयुध्येतां सूतपुत्रवृकोदरौ ॥ ७
भ्रातृत्वं दर्शितं पूर्वं घृणी चापि स सूतजः ।
कथं भीमेन युयुधे कुन्त्या वाक्यमनुस्मरन् ॥ ८
भीमो वा सूतपुत्रेण स्मरन्वैरं पुरा कृतम् ।
सोऽयुध्यत कथं वीरः कर्णेन सह संयुगे ॥ ९
आशास्ते च सदा सूत पुत्रो दुर्योधनो मम ।
कर्णो जेष्यति संग्रामे सहितान्पाण्डवानिति ॥ १०
जयाशा यत्र मन्दस्य पुत्रस्य मम संयुगे ।
स कथं भीमकर्माणं भीमसेनमयुध्यत ॥ ११
यं समाश्रित्य पुत्रैर्मे कृतं वैरं महारथैः ।
तं सूततनयं तात कथं भीमो ह्ययोधयत् ॥ १२
अनेकान्विप्रकारांश्च सूतपुत्रसमुद्भवान् ।
स्मरमाणः कथं भीमो युयुधे सूतसूनुना ॥ १३
योऽजयत्पृथिवीं सर्वां रथेनैकेन वीर्यवान् ।
तं सूततनयं युद्धे कथं भीमो ह्ययोधयत् ॥ १४
यो जातः कुण्डलाभ्यां च कवचेन सहैव च ।
तं सूतपुत्रं समरे भीमः कथमयोधयत् ॥ १५
यथा तयोर्युद्धमभूद्यश्चासीद्विजयी तयोः ।
तन्ममाचक्ष्व तत्त्वेन कुशलो ह्यसि संजय ॥ १६

संजय उवाच ।

भीमसेनस्तु राधेयमुत्सृज्य रथिनां वरम् ।
इयेष गन्तुं यत्रास्तां वीरौ कृष्णधनंजयौ ॥ १७
तं प्रयान्तमभिद्रुत्य राधेयः कङ्कपत्रिभिः ।
अभ्यवर्षन्महाराज मेघो वृष्ट्येव पर्वतम् ॥ १८
फुल्लता पङ्कजेनेव वक्त्रेणाभ्युत्स्मयन्बली ।
आजुहाव रणे यान्तं भीममाधिरथिस्तदा ॥ १९
भीमसेनस्तदाह्वानं कर्णान्नामर्षयद्युधि ।
अर्धमण्डलमावृत्य सूतपुत्रमयोधयत् ॥ २०
अवक्रगामिभिर्बाणैरभ्यवर्षन्महायसैः ।
द्वैरथे दंशितं यत्तं सर्वशस्त्रभृतां वरम् ॥ २१
विधित्सुः कलहस्यान्तं जिघांसुः कर्णमक्षिणोत् ।
तं च हत्वेतरान्सर्वान्हन्तुकामो महाबलः ॥ २२
तस्मै प्रासृजदुग्राणि विविधानि परंतपः ।
अमर्षी पाण्डवः क्रुद्धः शरवर्षाणि मारिष ॥ २३
तस्य तानीषुवर्षाणि मत्तद्विरदगामिनः ।
सूतपुत्रोऽस्त्रमायाभिरग्रसत्सुमहायशाः ॥ २४
स यथावन्महाराज विद्यया वै सुपूजितः ।
आचार्यवन्महेष्वासः कर्णः पर्यचरद्रणे ॥ २५
संरम्भेण तु युध्यन्तं भीमसेनं स्मयन्निव ।
अभ्यपद्यत राधेयस्तममर्षी वृकोदरम् ॥ २६
तन्नामृष्यत कौन्तेयः कर्णस्य स्मितमाहवे ।
युध्यमानेषु वीरेषु पश्यत्सु च समन्ततः ॥ २७
तं भीमसेनः संप्राप्तं वत्सदन्तैः स्तनान्तरे ।
विव्याध बलवान्क्रुद्धस्तोत्त्रैरिव महाद्विपम् ॥ २८
सूतं तु सूतपुत्रस्य सुपुङ्खैर्निशितैः शरैः ।
सुमुक्तैश्चित्रवर्माणं निर्बिभेद त्रिसप्तभिः ॥ २९
कर्णो जाम्बूनदैर्जालैः संछन्नान्वातरंहसः ।
विव्याध तुरगान्वीरः पञ्चभिः पञ्चभिः शरैः ॥ ३०
ततो बाणमयं जालं भीमसेनरथं प्रति ।
कर्णेन विहितं राजन्निमेषार्धाददृश्यत ॥ ३१
सरथः सध्वजस्तत्र ससूतः पाण्डवस्तदा ।
प्राच्छाद्यत महाराज कर्णचापच्युतैः शरैः ॥ ३२
तस्य कर्णश्चतुःषष्ट्या व्यधमत्कवचं दृढम् ।
क्रुद्धश्चाप्यहनत्पार्श्वे नाराचैर्मर्मभेदिभिः ॥ ३३
ततोऽचिन्त्य महावेगान्कर्णकार्मुकनिःसृतान् ।
समाश्लिष्यदसंभ्रान्तः सूतपुत्रं वृकोदरः ॥ ३४
स कर्णचापप्रभवानिषूनाशीविषोपमान् ।
बिभ्रद्भीमो महाराज न जगाम व्यथां रणे ॥ ३५
ततो द्वात्रिंशता भल्लैर्निशितैस्तिग्मतेजनैः ।
विव्याध समरे कर्णं भीमसेनः प्रतापवान् ॥ ३६

अयत्नेनैव तं कर्णः शरैरुप समाकिरत् ।
भीमसेनं महाबाहुं सैन्धवस्य वधैषिणम् ॥ ३७
मृदुपूर्वं च राधेयो भीममाजावयोधयत् ।
क्रोधपूर्वं तथा भीमः पूर्ववैरमनुस्मरन् ॥ ३८
तं भीमसेनो नामृष्यदवमानममर्षणः ।
स तस्मै व्यसृजत्तूर्णं शरवर्षममित्रजित् ॥ ३९
ते शराः प्रेषिता राजन्भीमसेनेन संयुगे ।
निपेतुः सर्वतो भीमाः कूजन्त इव पक्षिणः ॥ ४०
हेमपुङ्खा महाराज भीमसेनधनुश्च्युताः ।
अभ्यद्रवंस्ते राधेयं वृका: क्षुद्रमृगं यथा ॥ ४१
कर्णस्तु रथिनां श्रेष्ठश्छाद्यमानः समन्ततः ।
राजन्व्यसृजदुग्राणि शरवर्षाणि संयुगे ॥ ४२
तस्य तानशनिप्रख्यानिषून्समरशोभिनः ।
चिच्छेद बहुभिर्भल्लैरसंप्राप्तान्वृकोदरः ॥ ४३
पुनश्च शरवर्षेण छादयामास भारत ।
कर्णो वैकर्तनो युद्धे भीमसेनं महारथम् ॥ ४४
तत्र भारत भीमं तु दृष्टवन्तः स्म सायकैः ।
समाचिततनुं संख्ये श्वाविधं शललैरिव ॥ ४५
हेमपुङ्खाञ्शिलाधौतान्कर्णचापच्युताञ्शरान् ।
दधार समरे वीरः स्वरश्मीनिव भास्करः ॥ ४६
रुधिरोक्षितसर्वाङ्गो भीमसेनो व्यरोचत ।
तपनीयनिभैः पुष्पैः पलाश इव कानने ॥ ४७
तत्तु भीमो महाराज कर्णस्य चरितं रणे ।
नामृष्यत महेष्वासः क्रोधादुद्वृत्य चक्षुषी ॥ ४८
स कर्णं पञ्चविंशत्या नाराचानां समार्पयत् ।
महीधरमिव श्वेतं गूढपादैर्विषोल्बणैः ॥ ४९
तं विव्याध पुनर्भीमः षड्भिरष्टाभिरेव च ।
मर्मस्वमरविक्रान्तः सूतपुत्रं महारणे ॥ ५०
ततः कर्णस्य संक्रुद्धो भीमसेनः प्रतापवान् ।
चिच्छेद कार्मुकं तूर्णं सर्वोपकरणानि च ॥ ५१
जघान चतुरश्चाश्वान्सूतं च त्वरितः शरैः ।
नाराचैरर्करश्म्याभैः कर्णं विव्याध चोरसि ॥ ५२
ते जग्मुर्धरणीं सर्वे कर्णं निर्भिद्य मारिष ।
यथा हि जलदं भित्त्वा राजन्सूर्यस्य रश्मयः ॥ ५३
स वैकल्यं महत्प्राप्य छिन्नधन्वा शरार्दितः ।
तथा पुरुषमानी स प्रत्यपायाद्रथान्तरम् ॥ ५४

इति श्रीमहाभारते द्रोणपर्वणि
षडधिकशततमोऽध्यायः ॥ १०६ ॥

१०७

धृतराष्ट्र उवाच ।

यस्मिञ्जयाशा सततं पुत्राणां मम संजय ।
तं दृष्ट्वा विमुखं संख्ये किं नु दुर्योधनोऽब्रवीत् ।
कर्णो वा समरे तात किमकार्षीदतः परम् ॥ १

संजय उवाच ।

भीमसेनं रणे दृष्ट्वा ज्वलन्तमिव पावकम् ।
रथमन्यं समास्थाय विधिवत्कल्पितं पुनः ।
अभ्ययात्पाण्डवं कर्णो वातोद्धूत इवार्णवः ॥ २
क्रुद्धमाधिरथिं दृष्ट्वा पुत्रास्तव विशां पते ।
भीमसेनममन्यन्त वैवस्वतमुखे हुतम् ॥ ३
चापशब्दं महत्कृत्वा तलशब्दं च भैरवम् ।
अभ्यवर्तत राधेयो भीमसेनरथं प्रति ॥ ४
पुनरेव ततो राजन्महानासीत्सुदारुणः ।
विमर्दः सूतपुत्रस्य भीमस्य च विशां पते ॥ ५
संरब्धौ हि महाबाहू परस्परवधैषिणौ ।
अन्योन्यमीक्षांचक्राते दहन्ताविव लोचनैः ॥ ६
क्रोधरक्तेक्षणौ क्रुद्धौ निःश्वसन्तौ महारथौ ।
युद्धेऽन्योन्यं समासाद्य ततक्षतुररिंदमौ ॥ ७
व्याघ्राविव सुसंरब्धौ श्येनाविव च शीघ्रगौ ।
शरभाविव संक्रुद्धौ युयुधाते परस्परम् ॥ ८
ततो भीमः स्मरन्क्लेशानक्षद्यूते वनेऽपि च ।

विराटनगरे चैव प्राप्तं दुःखमरिंदमः ॥ ९
राष्ट्राणां स्फीतरत्नानां हरणं च तवात्मजैः ।
सततं च परिक्लेशान्सपुत्रेण त्वया कृतान् ॥ १०
दग्धुमैच्छश्च यत्कुन्तीं सपुत्रां त्वमनागसम् ।
कृष्णायाश्च परिक्लेशं सभामध्ये दुरात्मभिः ॥ ११
पतिमन्यं परीप्सस्व न सन्ति पतयस्तव ।
नरकं पतिताः पार्थाः सर्वे षण्ढतिलोपमाः ॥ १२
समक्षं तत्र कौरव्य यदूचुः कुरवस्तदा ।
दासीभोगेन कृष्णां च भोक्तुकामाः सुतास्तव ॥
यच्चापि तान्प्रव्रजतः कृष्णाजिननिवासिनः ।
परुषाण्युक्तवान्कर्णः सभायां संनिधौ तव ॥ १४
तृणीकृत्य च यत्पार्थांस्तव पुत्रो ववल्ग ह ।
विषमस्थान्समस्थो हि संरम्भाद्गतचेतसः ॥ १५
बाल्यात्प्रभृति चारिघ्नस्तानि दुःखानि चिन्तयन् ।
निरविद्यत धर्मात्मा जीवितेन वृकोदरः ॥ १६
ततो विस्फार्य सुमहद्धेमपृष्ठं दुरासदम् ।
चापं भरतशार्दूलस्त्यक्तात्मा कर्णमभ्ययात् ॥ १७
स सायकमयैर्जालैर्भीमः कर्णरथं प्रति ।
भानुमद्भिः शिलाधौतैर्भानोः प्रच्छादयत्प्रभाम् ॥
ततः प्रहस्याधिरथिस्तूर्णमस्यञ्शिताञ्शरान् ।
व्यधमद्भीमसेनस्य शरजालानि पत्रिभिः ॥ १९
महारथो महाबाहुर्महावेगैर्महाबलः ।
विव्याधाधिरथिर्भीमं नवभिर्निशितैः शरैः ॥ २०
स तोत्त्रैरिव मातङ्गो वार्यमाणः पतत्रिभिः ।
अभ्यधावदसंभ्रान्तः सूतपुत्रं वृकोदरः ॥ २१
तमापतन्तं वेगेन रभसं पाण्डवर्षभम् ।
कर्णः प्रत्युद्ययौ योद्धुं मत्तो मत्तमिव द्विपम् ॥२२
ततः प्रध्माप्य जलजं भेरीशतनिनादितम् ।
अक्षुभ्यत बलं हर्षादुद्धूत इव सागरः ॥ २३
तदुद्धूतं बलं दृष्ट्वा रथनागाश्वपत्तिमत् ।
भीमः कर्णं समासाद्य छादयामास सायकैः ॥२४
अश्वानृश्यसवर्णांस्तु हंसवर्णैर्हयोत्तमैः ।
व्यामिश्रयद्रणे कर्णः पाण्डवं छादयञ्शरैः ॥ २५
ऋश्यवर्णान्हयान्कर्कैर्मिश्रान्मारुतरंहसः ।
निरीक्ष्य तव पुत्राणां हाहाकृतमभूद्बलम् ॥ २६
ते हया बह्वशोभन्त मिश्रिता वातरंहसः ।
सितासिता महाराज यथा व्योम्नि बलाहकाः ॥२७
संरब्धौ क्रोधताम्राक्षौ प्रेक्ष्य कर्णवृकोदरौ ।
संत्रस्ताः समकम्पन्त त्वदीयानां महारथाः ॥ २८
यमराष्ट्रोपमं घोरमासीदायोधनं तयोः ।
दुर्दर्शं भरतश्रेष्ठ प्रेतराजपुरं यथा ॥ २९
समाजमिव तच्चित्रं प्रेक्षमाणा महारथाः ।
नालक्षयञ्जयं व्यक्तमेकैकस्य निवारणे ॥ ३०
तयोः प्रैक्षन्त संमर्दं संनिकृष्टमहास्त्रयोः ।
तव दुर्मन्त्रिते राजन्सपुत्रस्य विशां पते ॥ ३१
छादयन्तौ हि शत्रुघ्नावन्योन्यं सायकैः शितैः ।
शरजालावृतं व्योम चक्राते शरवृष्टिभिः ॥ ३२
तावन्योन्यं जिघांसन्तौ शरैस्तीक्ष्णैर्महारथौ ।
प्रेक्षणीयतरावास्तां वृष्टिमन्ताविवाम्बुदौ ॥ ३३
सुवर्णविकृतान्बाणान्प्रमुञ्चन्तावरिंदमौ ।
भास्वरं व्योम चक्राते वह्न्युल्काभिरिव प्रभो ॥
ताभ्यां मुक्ता व्यकाशन्त कङ्कबर्हिणवाससः ।
पङ्क्त्यः शरदि मत्तानां सारसानामिवाम्बरे ॥३५
संसक्तं सूतपुत्रेण दृष्ट्वा भीममरिंदमम् ।
अतिभारममन्येतां भीमे कृष्णधनंजयौ ॥ ३६
तत्राधिरथिभीमाभ्यां शरैर्मुक्तैर्दृढाहताः ।
इषुपातमतिक्रम्य पेतुरश्वनरद्विपाः ॥ ३७
पतद्भिः पतितैश्चान्यैर्गतासुभिरनेकशः ।
कृतो महान्महाराज पुत्राणां ते जनक्षयः ॥ ३८
मनुष्याश्वगजानां च शरीरैर्गतजीवितैः ।

क्षणेन भूमिः संजज्ञे संवृता भरतर्षभ ॥ ३९

इति श्रीमहाभारते द्रोणपर्वणि
सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

१०८

धृतराष्ट्र उवाच ।

अत्यद्भुतमहं मन्ये भीमसेनस्य विक्रमम् ।
यत्कर्णं योधयामास समरे लघुविक्रमम् ॥ १
त्रिदशानपि चोद्युक्तान्सर्वशस्त्रधरान्युधि ।
वारयेद्यो रणे कर्णः सयक्षासुरमानवान् ॥ २
स कथं पाण्डवं युद्धे भ्राजमानमिव श्रिया ।
नातरत्संयुगे तात तन्ममाचक्ष्व संजय ॥ ३
कथं च युद्धं भूयोऽभूत्तयोः प्राणदुरोदरे ।
अत्र मन्ये समायत्तो जयो वाजय एव वा ॥ ४
कर्णं प्राप्य रणे सूत मम पुत्रः सुयोधनः ।
जेतुमुत्सहते पार्थान्सगोविन्दान्ससात्वतान् ॥ ५
श्रुत्वा तु निर्जितं कर्णमसकृद्भीमकर्मणा ।
भीमसेनेन समरे मोह आविशतीव माम् ॥ ६
विनष्टान्कौरवान्मन्ये मम पुत्रस्य दुर्नयैः ।
न हि कर्णो महेष्वासान्पार्थाञ्जेष्यति संजय ॥ ७
कृतवान्यानि युद्धानि कर्णः पाण्डुसुतैः सह ।
सर्वत्र पाण्डवाः कर्णमजयन्त रणाजिरे ॥ ८
अजय्याः पाण्डवास्तात देवैरपि सवासवैः ।
न च तद्बुध्यते मन्दः पुत्रो दुर्योधनो मम ॥ ९
धनं धनेश्वरस्येव हृत्वा पार्थस्य मे सुतः ।
मधुप्रेप्सुरिवाबुद्धिः प्रपातं नावबुध्यते ॥ १०
निकृत्या निकृतिप्रज्ञो राज्यं हृत्वा महात्मनाम् ।
जितानित्येव मन्वानः पाण्डवानवमन्यते ॥ ११
पुत्रस्नेहाभिभूतेन मया चाप्यकृतात्मना ।
धर्मे स्थिता महात्मानो निकृताः पाण्डुनन्दनाः ॥ १२
शमकामः सदा पार्थो दीर्घप्रेक्षी युधिष्ठिरः ।
अशक्त इति मन्वानैः पुत्रैर्मम निराकृतः ॥ १३
तानि दुःखान्यनेकानि विप्रकारांश्च सर्वशः ।
हृदि कृत्वा महाबाहुर्भीमोऽयुध्यत सूतजम् ॥ १४
तस्मान्मे संजय ब्रूहि कर्णभीमौ यथा रणे ।
अयुध्येतां युधि श्रेष्ठौ परस्परवधैषिणौ ॥ १५

संजय उवाच ।

शृणु राजन्यथा वृत्तः संग्रामः कर्णभीमयोः ।
परस्परवधप्रेप्स्वोर्वने कुञ्जरयोरिव ॥ १६
राजन्वैकर्तनो भीमं क्रुद्धः क्रुद्धमरिंदमम् ।
पराक्रान्तं पराक्रम्य विव्याध त्रिंशता शरैः ॥ १७
महावेगैः प्रसन्नाग्रैः शातकुम्भपरिष्कृतैः ।
आहनद्भरतश्रेष्ठ भीमं वैकर्तनः शरैः ॥ १८
तस्यास्यतो धनुर्भीमश्चकर्त निशितैस्त्रिभिः ।
रथनीडाच्च यन्तारं भल्लेनापातयत्क्षितौ ॥ १९
स काङ्क्षन्भीमसेनस्य वधं वैकर्तनो वृषः ।
शक्तिं कनकवैडूर्यचित्रदण्डां परामृशत् ॥ २०
प्रगृह्य च महाशक्तिं कालशक्तिमिवापराम् ।
समुत्क्षिप्य च राधेयः संधाय च महाबलः ।
चिक्षेप भीमसेनाय जीवितान्तकरीमिव ॥ २१
शक्तिं विसृज्य राधेयः पुरंदर इवाशनिम् ।
ननाद सुमहानादं बलवान्सूतनन्दनः ।
तं च नादं ततः श्रुत्वा पुत्रास्ते हृषिताभवन् ॥ २२
तां कर्णभुजनिर्मुक्तामर्कवैश्वानरप्रभाम् ।
शक्तिं वियति चिच्छेद भीमः सप्तभिराशुगैः ॥ २३
छित्त्वा शक्तिं ततो भीमो निर्मुक्तोरगसंनिभाम् ।
मार्गमाण इव प्राणान्सूतपुत्रस्य मारिष ॥ २४
प्राहिणोन्नव संरब्धः शरान्बर्हिणवाससः ।
स्वर्णपुङ्खाञ्शिलाधौतान्यमदण्डोपमान्मृधे ॥ २५
कर्णोऽप्यन्यद्धनुर्गृह्य हेमपृष्ठं दुरासदम् ।
विकृष्य च महातेजा व्यसृजत्सायकान्नव ॥ २६

तान्पाण्डुपुत्रश्चिच्छेद नवभिर्नतपर्वभिः ।
वसुषेणेन निर्मुक्तान्नव राजन्महाशरान् ।
छित्त्वा भीमो महाराज नादं सिंह इवानदत् ॥२७
तौ वृषाविव नर्दन्तौ बलिनौ वाशितान्तरे ।
शार्दूलाविव चान्योन्यमत्यर्थं च ह्यगर्जताम् ॥ २८
अन्योन्यं प्रजिहीर्षन्तावन्योन्यस्यान्तरैषिणौ ।
अन्योन्यमभिवीक्षन्तौ गोष्ठेष्विव महर्षभौ ॥ २९
महागजाविवासाद्य विषाणाग्रैः परस्परम् ।
शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः ॥ ३०
निर्दहन्तौ महाराज शरवृष्ट्या परस्परम् ।
अन्योन्यमभिवीक्षन्तौ कोपाद्विवृतलोचनौ ॥ ३१
प्रहसन्तौ तथान्योन्यं भर्त्सयन्तौ मुहुर्मुहुः ।
शङ्खशब्दं च कुर्वाणौ युयुधाते परस्परम् ॥ ३२
तस्य भीमः पुनश्चापं मुष्टौ चिच्छेद मारिष ।
शङ्खवर्णांश्च तानश्वान्बाणैर्निन्ये यमक्षयम् ॥ ३३
तथा कृच्छ्रगतं दृष्ट्वा कर्णं दुर्योधनो नृपः ।
वेपमान इव क्रोधाद्व्यादिदेशाथ दुर्जयम् ॥ ३४
गच्छ दुर्जय राधेयं पुरा ग्रसति पाण्डवः ।
जहि तूबरकं क्षिप्रं कर्णस्य बलमादधत् ॥ ३५
एवमुक्तस्तथेत्युक्त्वा तव पुत्रस्तवात्मजम् ।
अभ्यद्रवद्भीमसेनं व्यासक्तं विकिरञ्शरान् ॥ ३६
स भीमं नवभिर्बाणैरश्वानष्टभिरर्दयत् ।
षड्भिः सूतं त्रिभिः केतुं पुनस्तं चापि सप्तभिः ॥३७
भीमसेनोऽपि संक्रुद्धः साश्वयन्तारमाशुगैः ।
दुर्जयं भिन्नमर्माणमनयद्यमसादनम् ॥ ३८
स्वलंकृतं क्षितौ क्षुण्णं चेष्टमानं यथोरगम् ।
रुदन्नार्तस्तव सुतं कर्णश्चक्रे प्रदक्षिणम् ॥ ३९
स तु तं विरथं कृत्वा स्मयन्नत्यन्तवैरिणम् ।
समाचिनोद्बाणगणैः शतघ्नीमिव शङ्कुभिः ॥ ४०
तथाप्यतिरथः कर्णो भिद्यमानः स्म सायकैः ।
न जहौ समरे भीमं क्रुद्धरूपं परंतपः ॥ ४१

इति श्रीमहाभारते द्रोणपर्वणि
अष्टाधिकशततमोऽध्यायः ॥ १०८ ॥

१०९

संजय उवाच ।

स तथा विरथः कर्णः पुनर्भीमेन निर्जितः ।
रथमन्यं समास्थाय सद्यो विव्याध पाण्डवम् ॥ १
महागजाविवासाद्य विषाणाग्रैः परस्परम् ।
शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः ॥ २
अथ कर्णः शरव्रातैर्भीमं बलवदर्दयत् ।
ननाद बलवन्नादं पुनर्विव्याध चोरसि ॥ ३
तं भीमो दशभिर्बाणैः प्रत्यविध्यदजिह्मगैः ।
पुनर्विव्याध विंशत्या शराणां नतपर्वणाम् ॥ ४
कर्णस्तु नवभिर्भीमं विद्ध्वा राजन्स्तनान्तरे ।
ध्वजमेकेन विव्याध सायकेन शितेन ह ॥ ५
सायकानां ततः पार्थस्त्रिषष्ट्या प्रत्यविध्यत ।
तोत्रैरिव महानागं कशाभिरिव वाजिनम् ॥ ६
सोऽतिविद्धो महाराज पाण्डवेन यशस्विना ।
सृक्किणी लेलिहन्वीरः क्रोधसंरक्तलोचनः ॥ ७
ततः शरं महाराज सर्वकायावदारणम् ।
प्राहिणोद्भीमसेनाय बलायेन्द्र इवाशनिम् ॥ ८
स निर्भिद्य रणे पार्थं सूतपुत्रधनुश्च्युतः ।
अगच्छद्दारयन्भूमिं चित्रपुङ्खः शिलीमुखः ॥ ९
सर्वशैक्यां चतुष्किष्कुं गुर्वीं रुक्माङ्गदां गदाम् ।
प्राहिणोत्सूतपुत्राय षडस्रामविचारयन् ॥ १०
तया जघानाधिरथेः सदश्वान्साधुवाहिनः ।
गदया भारतः क्रुद्धो वज्रेणेन्द्र इवासुरान् ॥ ११
ततो भीमो महाबाहुः क्षुराभ्यां भरतर्षभ ।
ध्वजमाधिरथेश्छित्त्वा सूतमभ्यहनत्तदा ॥ १२
हताश्वसूतमुत्सृज्य रथं स पतितध्वजम् ।

विस्फारयन्धनुः कर्णस्तस्थौ भारत दुर्मनाः ॥ १३
तत्राद्भुतमपश्याम राधेयस्य पराक्रमम् ।
विरथो रथिनां श्रेष्ठो वारयामास यद्रिपुम् ॥ १४
विरथं तं रथश्रेष्ठं दृष्ट्वाधिरथिमाहवे ।
दुर्योधनस्ततो राजन्नभ्यभाषत दुर्मुखम् ॥ १५
एष दुर्मुख राधेयो भीमेन विरथीकृतः ।
तं रथेन नरश्रेष्ठं संपादय महारथम् ॥ १६
दुर्योधनवचः श्रुत्वा ततो भारत दुर्मुखः ।
त्वरमाणोऽभ्ययात्कर्णं भीमं चावारयच्छरैः ॥ १७
दुर्मुखं प्रेक्ष्य संग्रामे सूतपुत्रपदानुगम् ।
वायुपुत्रः प्रहृष्टोऽभूत्सृक्किणी परिलेलिहन् ॥ १८
ततः कर्णं महाराज वारयित्वा शिलीमुखैः ।
दुर्मुखाय रथं शीघ्रं प्रेषयामास पाण्डवः ॥ १९
तस्मिन्क्षणे महाराज नवभिर्नतपर्वभिः ।
सुपुङ्खैर्दुर्मुखं भीमः शरैर्निन्ये यमक्षयम् ॥ २०
ततस्तमेवाधिरथिः स्यन्दनं दुर्मुखे हते ।
आस्थितः प्रबभौ राजन्दीप्यमान इवांशुमान् ॥२१
शयानं भिन्नमर्माणं दुर्मुखं शोणितोक्षितम् ।
दृष्ट्वा कर्णोऽश्रुपूर्णाक्षो मुहूर्तं नाभ्यवर्तत ॥ २२
तं गतासुमतिक्रम्य कृत्वा कर्णः प्रदक्षिणम् ।
दीर्घमुष्णं श्वसन्वीरो न किंचित्प्रत्यपद्यत ॥ २३
तस्मिंस्तु विवरे राजन्नाराचान्गार्ध्रवाससः ।
प्राहिणोत्सूतपुत्राय भीमसेनश्चतुर्दश ॥ २४
ते तस्य कवचं भित्त्वा स्वर्णपुङ्खा महौजसः ।
हेमचित्रा महाराज द्योतयन्तो दिशो दश ॥ २५
अपिबन्सूतपुत्रस्य शोणितं रक्तभोजनाः ।
क्रुद्धा इव मनुष्येन्द्र भुजगाः कालचोदिताः ॥२६
प्रसर्पमाणा मेदिन्यां ते व्यरोचन्त मार्गणाः ।
अर्धप्रविष्टाः संरब्धा बिलानीव महोरगाः ॥ २७
तं प्रत्यविध्यद्राधेयो जाम्बूनदविभूषितैः ।
चतुर्दशभिरत्युग्रैर्नाराचैरविचारयन् ॥ २८
ते भीमसेनस्य भुजं सव्यं निर्भिद्य पत्रिणः ।
प्राविशन्मेदिनीं भीमाः क्रौञ्चं पत्ररथा इव ॥ २९
ते व्यरोचन्त नाराचाः प्रविशन्तो वसुंधराम् ।
गच्छत्यस्तं दिनकरे दीप्यमाना इवांशवः ॥ ३०
स निर्भिन्नो रणे भीमो नाराचैर्मर्मभेदिभिः ।
सुस्राव रुधिरं भूरि पर्वतः सलिलं यथा ॥ ३१
स भीमस्त्रिभिरायस्तः सूतपुत्रं पतत्रिभिः ।
सुपर्णवेगैर्विव्याध सारथिं चास्य सप्तभिः ॥ ३२
स विह्वलो महाराज कर्णो भीमबलार्दितः ।
प्राद्रवज्जवनैरश्वै रणं हित्वा महायशाः ॥ ३३
भीमसेनस्तु विस्फार्य चापं हेमपरिष्कृतम् ।
आहवेऽतिरथोऽतिष्ठज्ज्वलन्निव हुताशनः ॥ ३४

इति श्रीमहाभारते द्रोणपर्वणि
नवाधिकशततमोऽध्यायः ॥ १०९ ॥

११०

धृतराष्ट्र उवाच ।

दैवमेव परं मन्ये धिक्पौरुषमनर्थकम् ।
यत्राधिरथिरायस्तो नातरत्पाण्डवं रणे ॥ १
कर्णः पार्थान्सगोविन्दाञ्जेतुमुत्सहते रणे ।
न च कर्णसमं योधं लोके पश्यामि कंचन ।
इति दुर्योधनस्याहमश्रौषं जल्पतो मुहुः ॥ २
कर्णो हि बलवाञ्शूरो दृढधन्वा जितक्लमः ।
इति मामब्रवीत्सूत मन्दो दुर्योधनः पुरा ॥ ३
वसुषेणसहायं मां नालं देवापि संयुगे ।
किमु पाण्डुसुता राजन्गतसत्त्वा विचेतसः ॥ ४
तत्र तं निर्जितं दृष्ट्वा भुजंगमिव निर्विषम् ।
युद्धात्कर्णमपक्रान्तं किं स्विद्दुर्योधनोऽब्रवीत् ॥ ५
अहो दुर्मुखमेवैकं युद्धानामविशारदम् ।
प्रावेशयद्धुतवहं पतंगमिव मोहितः ॥ ६

अश्वत्थामा मद्रराजः कृपः कर्णश्च संगताः ।
न शक्ताः प्रमुखे स्थातुं नूनं भीमस्य संजय ॥ ७
तेऽपि चास्य महाघोरं बलं नागायुतोपमम् ।
जानन्तो व्यवसायं च क्रूरं मारुततेजसः ॥ ८
किमर्थं क्रूरकर्माणं यमकालान्तकोपमम् ।
बलसंरम्भवीर्यज्ञाः कोपयिष्यन्ति संयुगे ॥ ९
कर्णस्त्वेको महाबाहुः स्वबाहुबलमाश्रितः ।
भीमसेनमनादृत्य रणेऽयुध्यत सूतजः ॥ १०
योऽजयत्समरे कर्णं पुरंदर इवासुरम् ।
न स पाण्डुसुतो जेतुं शक्यः केनचिदाहवे ॥ ११
द्रोणं यः संप्रमथ्यैकः प्रविष्टो मम वाहिनीम् ।
भीमो धनंजयान्वेषी कस्तमर्छेज्जिजीविषुः ॥ १२
को हि संजय भीमस्य स्थातुमुत्सहतेऽग्रतः ।
उद्यताशनिवज्रस्य महेन्द्रस्येव दानवः ॥ १३
प्रेतराजपुरं प्राप्य निवर्तेतापि मानवः ।
न भीमसेनं संप्राप्य निवर्तेत कदाचन ॥ १४
पतंगा इव वह्निं ते प्राविशन्नल्पचेतसः ।
ये भीमसेनं संक्रुद्धमभ्यधावन्विमोहिताः ॥ १५
यत्तत्सभायां भीमेन मम पुत्रवधाश्रयम् ।
शप्तं संरम्भिणोग्रेण कुरूणां शृण्वतां तदा ॥ १६
तन्नूनमभिसंचिन्त्य दृष्ट्वा कर्णं च निर्जितम् ।
दुःशासनः सह भ्रात्रा भयाद्भीमादुपारमत् ॥ १७
यश्च संजय दुर्बुद्धिरब्रवीत्समितौ मुहुः ।
कर्णो दुःशासनोऽहं च जेष्यामो युधि पाण्डवान् ॥
स नूनं विरथं दृष्ट्वा कर्णं भीमेन निर्जितम् ।
प्रत्याख्यानाच्च कृष्णस्य भृशं तप्यति संजय ॥ १९
दृष्ट्वा भ्रातॄन्हतान्युद्धे भीमसेनेन दंशितान् ।
आत्मापराधात्सुमहन्नूनं तप्यति पुत्रकः ॥ २०
को हि जीवितमन्विच्छन्प्रतीपं पाण्डवं व्रजेत् ।
भीमं भीमायुधं क्रुद्धं साक्षात्कालमिव स्थितम् ॥
बडवामुखमध्यस्थो मुच्येतापि हि मानवः ।
न भीममुखसंप्राप्तो मुच्येतेति मतिर्मम ॥ २२
न पाण्डवा न पाञ्चाला न च केशवसात्यकी ।
जानन्ति युधि संरब्धा जीवितं परिरक्षितुम् ॥ २३

संजय उवाच ।

यत्संशोचसि कौरव्य वर्तमाने जनक्षये ।
त्वमस्य जगतो मूलं विनाशस्य न संशयः ॥ २४
स्वयं वैरं महत्कृत्वा पुत्राणां वचने स्थितः ।
उच्यमानो न गृह्णीषे मर्त्यः पथ्यमिवौषधम् ॥ २५
स्वयं पीत्वा महाराज कालकूटं सुदुर्जरम् ।
तस्येदानीं फलं कृत्स्नमवाप्नुहि नरोत्तम ॥ २६
यत्तु कुत्सयसे योधान्युध्यमानान्यथाबलम् ।
अत्र ते वर्णयिष्यामि यथा युद्धमवर्तत ॥ २७
दृष्ट्वा कर्णं तु पुत्रास्ते भीमसेनपराजितम् ।
नामृष्यन्त महेष्वासाः सोदर्याः पञ्च मारिष ॥ २८
दुर्मर्षणो दुःसहश्च दुर्मदो दुर्धरो जयः ।
पाण्डवं चित्रसंनाहास्तं प्रतीपमुपाद्रवन् ॥ २९
ते समन्तान्महाबाहुं परिवार्य वृकोदरम् ।
दिशः शरैः समावृण्वञ्शलभानामिव व्रजैः ॥ ३०
आगच्छतस्तान्सहसा कुमारान्देवरूपिणः ।
प्रतिजग्राह समरे भीमसेनो हसन्निव ॥ ३१
तव दृष्ट्वा तु तनयान्भीमसेनसमीपगान् ।
अभ्यवर्तत राधेयो भीमसेनं महाबलम् ॥ ३२
विसृजन्विशिखान्राजन्स्वर्णपुङ्खाञ्शिलाशितान् ।
तं तु भीमोऽभ्ययात्तूर्णं वार्यमाणः सुतैस्तव ॥ ३३
कुरवस्तु ततः कर्णं परिवार्य समन्ततः ।
अवाकिरन्भीमसेनं शरैः संनतपर्वभिः ॥ ३४
तान्बाणैः पञ्चविंशत्या साश्वान्राजन्नरर्षभान् ।
ससूतान्भीमधनुषो भीमो निन्ये यमक्षयम् ॥ ३५
प्रापतन्स्यन्दनेभ्यस्ते सार्धं सूतैर्गतासवः ।

चित्रपुष्पधरा भग्ना वातेनेव महाद्रुमाः ॥ ३६
तत्राद्भुतमपश्याम भीमसेनस्य विक्रमम् ।
संवार्याधिरथिं बाणैर्यज्जघान तवात्मजान् ॥ ३७
स वार्यमाणो भीमेन शितैर्बाणैः समन्ततः ।
सूतपुत्रो महाराज भीमसेनमवैक्षत ॥ ३८
तं भीमसेनः संरम्भात्क्रोधसंरक्तलोचनः ।
विस्फार्य सुमहच्चापं मुहुः कर्णमवैक्षत ॥ ३९

इति श्रीमहाभारते द्रोणपर्वणि
दशाधिकशततमोऽध्यायः ॥ ११० ॥

१११

संजय उवाच ।

तवात्मजांस्तु पतितान्दृष्ट्वा कर्णः प्रतापवान् ।
क्रोधेन महताविष्टो निर्विण्णोऽभूत्स जीवितात् ॥१
आगस्कृतमिवात्मानं मेने चाधिरथिस्तदा ।
भीमसेनं ततः क्रुद्धः समाद्रवत संभ्रमात् ॥ २
स भीमं पञ्चभिर्विद्ध्वा राधेयः प्रहसन्निव ।
पुनर्विव्याध सप्तत्या स्वर्णपुङ्खैः शिलाशितैः ॥ ३
अवहासं तु तं पार्थो नामृष्यत वृकोदरः ।
ततो विव्याध राधेयं शतेन नतपर्वणाम् ॥ ४
पुनश्च विशिखैस्तीक्ष्णैर्विद्ध्वा पञ्चभिराशुगैः ।
धनुश्चिच्छेद भल्लेन सूतपुत्रस्य मारिष ॥ ५
अथान्यद्धनुरादाय कर्णो भारत दुर्मनाः ।
इषुभिश्छादयामास भीमसेनं समन्ततः ॥ ६
तस्य भीमो हयान्हत्वा विनिहत्य च सारथिम् ।
प्रजहास महाहासं कृते प्रतिकृतं पुनः ॥ ७
इषुभिः कार्मुकं चास्य चकर्त पुरुषर्षभः ।
तत्पपात महाराज स्वर्णपृष्ठं महास्वनम् ॥ ८
अवारोहद्रथात्तस्मादथ कर्णो महारथः ।
गदां गृहीत्वा समरे भीमसेनाय चाक्षिपत् ॥ ९
तामापतन्तीं सहसा गदां दृष्ट्वा वृकोदरः ।
शरैरवारयद्राजन्सर्वसैन्यस्य पश्यतः ॥ १०
ततो बाणसहस्राणि प्रेषयामास पाण्डवः ।
सूतपुत्रवधाकाङ्क्षी त्वरमाणः पराक्रमी ॥ ११
तानिषूनिषुभिः कर्णो वारयित्वा महामृधे ।
कवचं भीमसेनस्य पातयामास सायकैः ॥ १२
अथैनं पञ्चविंशत्या क्षुद्रकाणां समार्पयत् ।
पश्यतां सर्वभूतानां तदद्भुतमिवाभवत् ॥ १३
ततो भीमो महाराज नवभिर्नतपर्वणाम् ।
रणेऽप्रेषयत क्रुद्धः सूतपुत्रस्य मारिष ॥ १४
ते तस्य कवचं भित्त्वा तथा बाहुं च दक्षिणम् ।
अभ्यगुर्धरणीं तीक्ष्णा वल्मीकमिव पन्नगाः ॥ १५
राधेयं तु रणे दृष्ट्वा पदातिनमवस्थितम् ।
भीमसेनेन संरब्धं राजा दुर्योधनोऽब्रवीत् ।
त्वरध्वं सर्वतो यत्ता राधेयस्य रथं प्रति ॥ १६
ततस्तव सुता राजञ्श्रुत्वा भ्रातुर्वचो द्रुतम् ।
अभ्ययुः पाण्डवं युद्धे विसृजन्तः शिताञ्शरान् ॥
चित्रोपचित्रश्चित्राक्षश्चारुचित्रः शरासनः ।
चित्रायुधश्चित्रवर्मा समरे चित्रयोधिनः ॥ १८
आगच्छतस्तान्सहसा भीमो राजन्महारथः ।
साश्वसूतध्वजान्यत्तान्पातयामास संयुगे ।
ते हता न्यपतन्भूमौ वातनुन्ना इव द्रुमाः ॥ १९
दृष्ट्वा विनिहतान्पुत्रांस्तव राजन्महारथान् ।
अश्रुपूर्णमुखः कर्णः कश्मलं समपद्यत ॥ २०
रथमन्यं समास्थाय विधिवत्कल्पितं पुनः ।
अभ्ययात्पाण्डवं युद्धे त्वरमाणः पराक्रमी ॥ २१
तावन्योन्यं शरैर्विद्ध्वा स्वर्णपुङ्खैः शिलाशितैः ।
व्यभ्राजेतां महाराज पुष्पिताविव किंशुकौ ॥ २२
षट्त्रिंशद्भिस्ततो भल्लैर्निशितैस्तिग्मतेजनैः ।
व्यधमत्कवचं क्रुद्धः सूतपुत्रस्य पाण्डवः ॥ २३
रक्तचन्दनदिग्धाङ्गौ शरैः कृतमहाव्रणौ ।

शोणिताक्तौ व्यराजेतां कालसूर्याविवोदितौ ॥ २४
तौ शोणितोक्षितैर्गात्रैः शरैश्छिन्नतनुच्छदौ ।
विवर्माणौ व्यराजेतां निर्मुक्ताविव पन्नगौ ॥ २५
व्याघ्राविव नरव्याघ्रौ दंष्ट्राभिरितरेतरम् ।
शरदंष्ट्रा विधुन्वानौ ततक्षतुररिंदमौ ॥ २६
वारणाविव संसक्तौ रङ्गमध्ये विरेजतुः ।
तुदन्तौ विशिखैस्तीक्ष्णैर्मत्तवारणविक्रमौ ॥ २७
प्रच्छादयन्तौ समरे शरजालैः परस्परम् ।
रथाभ्यां नादयन्तौ च दिशः सर्वा विचेरतुः ॥ २८
तौ रथाभ्यां महाराज मण्डलावर्तनादिषु ।
व्यरोचेतां महात्मानौ वृत्रवज्रधराविव ॥ २९
सहस्ताभरणाभ्यां तु भुजाभ्यां विक्षिपन्धनुः ।
व्यरोचत रणे भीमः सविद्युदिव तोयदः ॥ ३०
स चापघोषस्तनितः शरधाराम्बुदो महान् ।
भीममेघो महाराज कर्णपर्वतमभ्ययात् ॥ ३१
ततः शरसहस्रेण धनुर्मुक्तेन भारत ।
पाण्डवो व्यकिरत्कर्णं घनोऽद्रिमिव वृष्टिभिः ॥ ३२
तत्रावैक्षन्त पुत्रास्ते भीमसेनस्य विक्रमम् ।
सुपुङ्खैः कङ्कवासोभिर्यत्कर्णं छादयच्छरैः ॥ ३३
स नन्दयन्रणे पार्थं केशवं च यशस्विनम् ।
सात्यकिं चक्ररक्षौ च भीमः कर्णमयोधयत् ॥ ३४
विक्रमं भुजयोर्वीर्यं धैर्यं च विदितात्मनः ।
पुत्रास्तव महाराज ददृशुः पाण्डवस्य ह ॥ ३५

इति श्रीमहाभारते द्रोणपर्वणि
एकादशाधिकशततमोऽध्यायः ॥ १११ ॥

११२

संजय उवाच ।

भीमसेनस्य राधेयः श्रुत्वा ज्यातलनिस्वनम् ।
नामृष्यत यथा मत्तो गजः प्रतिगजस्वनम् ॥ १
अपक्रम्य स भीमस्य मुहूर्तं शरगोचरात् ।
तव चाधिरथिर्दृष्ट्वा स्यन्दनेभ्यश्च्युतान्सुतान् ॥ २
भीमसेनेन निहतान्विमना दुःखितोऽभवत् ।
निःश्वसन्दीर्घमुष्णं च पुनः पाण्डवमभ्ययात् ॥ ३
स ताम्रनयनः क्रोधाच्छ्वसन्निव महोरगः ।
बभौ कर्णः शरानस्यन्रश्मिवानिव भास्करः ॥ ४
रश्मिजालैरिवार्कस्य विततैर्भरतर्षभ ।
कर्णचापच्युतैर्बाणैः प्राच्छाद्यत वृकोदरः ॥ ५
कर्णचापच्युताश्चित्राः शरा बर्हिणवाससः ।
विविशुः सर्वतः पार्थं वासायेवाण्डजा द्रुमम् ॥ ६
कर्णचापच्युता बाणाः संपतन्तस्ततस्ततः ।
रुक्मपुङ्खा व्यराजन्त हंसाः श्रेणीकृता इव ॥ ७
चापध्वजोपस्करेभ्यश्छत्रादीषामुखाद्युगात् ।
प्रभवन्तो व्यदृश्यन्त राजन्नाधिरथेः शराः ॥ ८
खं पूरयन्महावेगान्खगमान्खगवाससः ।
सुवर्णविकृतांश्चित्रान्मुमोचाधिरथिः शरान् ॥ ९
तमन्तकमिवायस्तमापतन्तं वृकोदरः ।
त्यक्त्वा प्राणानभिक्रुध्य विव्याध नवभिः शरैः॥१०
तस्य वेगमसंसह्यं दृष्ट्वा कर्णस्य पाण्डवः ।
महतश्च शरौघांस्तान्नैवाव्यथत वीर्यवान् ॥ ११
ततो विधम्याधिरथेः शरजालानि पाण्डवः ।
विव्याध कर्णं विंशत्या पुनरन्यैः शितैः शरैः ॥१२
यथैव हि शरैः पार्थः सूतपुत्रेण छादितः ।
तथैव कर्णं समरे छादयामास पाण्डवः ॥ १३
दृष्ट्वा तु भीमसेनस्य विक्रमं युधि भारत ।
अभ्यनन्दंस्त्वदीयाश्च संप्रहृष्टाश्च चारणाः ॥ १४
भूरिश्रवाः कृपो द्रौणिर्मद्रराजो जयद्रथः ।
उत्तमौजा युधामन्युः सात्यकिः केशवार्जुनौ ॥ १५
कुरुपाण्डवानां प्रवरा दश राजन्महारथाः ।
साधु साध्विति वेगेन सिंहनादमथानदन् ॥ १६
तस्मिंस्तु तुमुले शब्दे प्रवृत्ते लोमहर्षणे ।

अभ्यभाषत पुत्रांस्ते राजन्दुर्योधनस्त्वरन् ॥ १७

राज्ञश्च राजपुत्रांश्च सोदर्यांश्च विशेषतः ।
कर्णं गच्छत भद्रं वः परीप्सन्तो वृकोदरात् ॥१८

पुरा निघ्नन्ति राधेयं भीमचापच्युताः शराः ।
ते यतध्वं महेष्वासाः सूतपुत्रस्य रक्षणे ॥ १९

दुर्योधनसमादिष्टाः सोदर्याः सप्त मारिष ।
भीमसेनमभिद्रुत्य संरब्धाः पर्यवारयन् ॥ २०

ते समासाद्य कौन्तेयमावृण्वञ्शरवृष्टिभिः ।
पर्वतं वारिधाराभिः प्रावृषीव बलाहकाः ॥ २१

तेऽपीडयन्भीमसेनं क्रुद्धाः सप्त महारथाः ।
प्रजासंहरणे राजन्सोमं सप्त ग्रहा इव ॥ २२

ततो वामेन कौन्तेयः पीडयित्वा शरासनम् ।
मुष्टिना पाण्डवो राजन्दृढेन सुपरिष्कृतम् ॥ २३

मनुष्यसमतां ज्ञात्वा सप्त संधाय सायकान् ।
तेभ्यो व्यसृजदायस्तः सूर्यरश्मिनिभान्प्रभुः ॥ २४

निरस्यन्निव देहेभ्यस्तनयानामसूंस्तव ।
भीमसेनो महाराज पूर्ववैरमनुस्मरन् ॥ २५

ते क्षिप्ता भीमसेनेन शरा भारत भारतान् ।
विदार्य खं समुत्पेतुः स्वर्णपुङ्खाः शिलाशिताः ॥

तेषां विदार्य चेतांसि शरा हेमविभूषिताः ।
व्यराजन्त महाराज सुपर्णा इव खेचराः ॥ २७

शोणितादिग्धवाजाग्राः सप्त हेमपरिष्कृताः ।
पुत्राणां तव राजेन्द्र पीत्वा शोणितमुद्गताः ॥ २८

ते शरैर्भिन्नमर्माणो रथेभ्यः प्रापतन्क्षितौ ।
गिरिसानुरुहा भग्ना द्विपेनेव महाद्रुमाः ॥ २९

शत्रुंजयः शत्रुसहश्चित्रश्चित्रायुधो दृढः ।
चित्रसेनो विकर्णश्च सप्तैते विनिपातिताः ॥ ३०

तान्निहत्य महाबाहू राधेयस्यैव पश्यतः ।
सिंहनादरवं घोरमसृजत्पाण्डुनन्दनः ॥ ३१

स रवस्तस्य शूरस्य धर्मराजस्य भारत ।
आचख्याविव तद्युद्धं विजयं चात्मनो महत् ॥ ३२

तं श्रुत्वा सुमहानादं भीमसेनस्य धन्विनः ।
बभूव परमा प्रीतिर्धर्मराजस्य संयुगे ॥ ३३

ततो हृष्टो महाराज वादित्राणां महास्वनैः ।
भीमसेनरवं पार्थः प्रतिजग्राह सर्वशः ॥ ३४

अभ्ययाच्चैव समरे द्रोणमस्त्रभृतां वरम् ।
हर्षेण महता युक्तः कृतसंज्ञे वृकोदरे ॥ ३५

एकत्रिंशन्महाराज पुत्रांस्तव महारथान् ।
हतान्दुर्योधनो दृष्ट्वा क्षत्तुः सस्मार तद्वचः ॥ ३६

तदिदं समनुप्राप्तं क्षत्तुर्हितकरं वचः ।
इति संचिन्त्य राजासौ नोत्तरं प्रत्यपद्यत ॥ ३७

यद्द्यूतकाले दुर्बुद्धिरब्रवीत्तनयस्तव ।
यच्च कर्णोऽब्रवीत्कृष्णां सभायां परुषं वचः ॥ ३८

प्रमुखे पाण्डुपुत्राणां तव चैव विशां पते ।
कौरवाणां च सर्वेषामाचार्यस्य च संनिधौ ॥ ३९

विनष्टाः पाण्डवाः कृष्णे शाश्वतं नरकं गताः ।
पतिमन्यं वृणीष्वेति तस्येदं फलमागतम् ॥ ४०

यत्स्म तां परुषाण्याहुः सभामानाय्य द्रौपदीम् ।
पाण्डवानुग्रधनुषः क्रोधयन्तस्तवात्मजाः ॥ ४१

तं भीमसेनः क्रोधाग्निं त्रयोदश समाः स्थितम् ।
विसृजंस्तव पुत्राणामन्तं गच्छति कौरव ॥ ४२

विलपंश्च बहु क्षत्ता शमं नालभत त्वयि ।
सपुत्रो भरतश्रेष्ठ तस्य भुङ्क्ष्व फलोदयम् ।
हतो विकर्णो राजेन्द्र चित्रसेनश्च वीर्यवान् ॥ ४३

प्रवरानात्मजानां ते सुतांश्चान्यान्महारथान् ।
यान्यांश्च ददृशे भीमश्चक्षुर्विषयमागतान् ।
पुत्रांस्तव महाबाहो त्वरया ताञ्जघान ह ॥ ४४

त्वत्कृते ह्यहमद्राक्षं दह्यमानां वरूथिनीम् ।

सहस्रशः शरैर्मुक्तैः पाण्डवेन वृषेण च ॥ ४५

इति श्रीमहाभारते द्रोणपर्वणि
द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥

११३

धृतराष्ट्र उवाच ।

महानपनयः सूत ममैवात्र विशेषतः ।
स इदानीमनुप्राप्तो मन्ये संजय शोचतः ॥ १
यद्गतं तद्गतमिति ममासीन्मनसि स्थितम् ।
इदानीमत्र किं कार्यं प्रकरिष्यामि संजय ॥ २
यथा ह्येष क्षयो वृत्तो ममापनयसंभवः ।
वीराणां तन्ममाचक्ष्व स्थिरीभूतोऽस्मि संजय ॥ ३

संजय उवाच ।

कर्णभीमौ महाराज पराक्रान्तौ महाहवे ।
बाणवर्षाण्यवर्षेतां वृष्टिमन्ताविवाम्बुदौ ॥ ४
भीमनामाङ्किता बाणाः स्वर्णपुङ्खाः शिलाशिताः ।
विविशुः कर्णमासाद्य भिन्दन्त इव जीवितम् ॥ ५
तथैव कर्णनिर्मुक्तैः सविषैरिव पन्नगैः ।
आकीर्यत रणे भीमः शतशोऽथ सहस्रशः ॥ ६
तयोः शरैर्महाराज संपतद्भिः समन्ततः ।
बभूव तव सैन्यानां संक्षोभः सागरोपमः ॥ ७
भीमचापच्युतैर्बाणैस्तव सैन्यमरिंदम ।
अवध्यत चमूमध्ये घोरैराशीविषोपमैः ॥ ८
वारणैः पतितै राजन्वाजिभिश्च नरैः सह ।
अदृश्यत मही कीर्णा वातभग्नैर्द्रुमैरिव ॥ ९
ते वध्यमानाः समरे भीमचापच्युतैः शरैः ।
प्राद्रवंस्तावका योधाः किमेतदिति चाब्रुवन् ॥ १०
ततो व्युदस्तं तत्सैन्यं सिन्धुसौवीरकौरवम् ।
प्रोत्सारितं महावेगैः कर्णपाण्डवयोः शरैः ॥ ११
ते शरातुरभूयिष्ठा हताश्वनरवाहनाः ।
उत्सृज्य कर्णं भीमं च प्राद्रवन्सर्वतोदिशम् ॥ १२
नूनं पार्थार्थमेवास्मान्मोहयन्ति दिवौकसः ।
यत्कर्णभीमप्रभवैर्वध्यते नो बलं शरैः ॥ १३
एवं ब्रुवन्तो योधास्ते तावका भयपीडिताः ।
शरपातं समुत्सृज्य स्थिता युद्धदिदृक्षवः ॥ १४
ततः प्रावर्तत नदी घोररूपा महाहवे ।
बभूव च विशेषेण भीरूणां भयवर्धिनी ॥ १५
वारणाश्वमनुष्याणां रुधिरौघसमुद्भवा ।
संवृता गतसत्त्वैश्च मनुष्यगजवाजिभिः ॥ १६
सानुकर्षपताकैश्च द्विपाश्वरथभूषणैः ।
स्यन्दनैरपविद्धैश्च भग्नचक्राक्षकूबरैः ॥ १७
जातरूपपरिष्कारैर्धनुर्भिः सुमहाधनैः ।
सुवर्णपुङ्खैरिषुभिर्नाराचैश्च सहस्रशः ॥ १८
कर्णपाण्डवनिर्मुक्तैर्निर्मुक्तैरिव पन्नगैः ।
प्रासतोमरसंघातैः खड्गैश्च सपरश्वधैः ॥ १९
सुवर्णविकृतैश्चापि गदामुसलपट्टिशैः ।
वज्रैश्च विविधाकारैः शक्तिभिः परिघैरपि ।
शतघ्नीभिश्च चित्राभिर्बभौ भारत मेदिनी ॥ २०
कनकाङ्गदकेयूरैः कुण्डलैर्मणिभिः शुभैः ।
तनुत्रैः सतलत्रैश्च हारैर्निष्कैश्च भारत ॥ २१
वस्त्रैश्छत्रैश्च विध्वस्तैश्चामरव्यजनैरपि ।
गजाश्वमनुजैर्भिन्नैः शस्त्रैः स्यन्दनभूषणैः ॥ २२
तैस्तैश्च विविधैर्भावैस्तत्र तत्र वसुंधरा ।
पतितैरपविद्धैश्च संबभौ द्यौरिव ग्रहैः ॥ २३
अचिन्त्यमद्भुतं चैव तयोः कर्मातिमानुषम् ।
दृष्ट्वा चारणसिद्धानां विस्मयः समपद्यत ॥ २४
अग्नेर्वायुसहायस्य गतिः कक्ष इवाहवे ।
आसीद्भीमसहायस्य रौद्रमाधिरथेर्गतम् ।
निपातितध्वजरथं हतवाजिनरद्विपम् ॥ २५
गजाभ्यां संप्रयुक्ताभ्यामासीन्नडवनं यथा ।
तथाभूतं महत्सैन्यमासीद्भारत संयुगे ।

विमर्दः कर्णभीमाभ्यामासीच्च परमो रणे ॥ २६

इति श्रीमहाभारते द्रोणपर्वणि
त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

११४

संजय उवाच ।

ततः कर्णो महाराज भीमं विद्ध्वा त्रिभिः शरैः ।
मुमोच शरवर्षाणि चित्राणि च बहूनि च ॥ १
वध्यमानो महाराज सूतपुत्रेण पाण्डवः ।
न विव्यथे भीमसेनो भिद्यमान इवाचलः ॥ २
स कर्णं कर्णिना कर्णे पीतेन निशितेन च ।
विव्याध युधि राजेन्द्र भीमसेनः पतत्रिणा ॥ ३
स कुण्डलं महत्कर्णात्कर्णस्यापातयद्भुवि ।
तपनीयं महाराज दीप्तं ज्योतिरिवाम्बरात् ॥ ४
अथापरेण भल्लेन सूतपुत्रं स्तनान्तरे ।
आजघान भृशं भीमः स्मयन्निव महाबलः ॥ ५
पुनरस्य त्वरन्भीमो नाराचान्दश भारत ।
रणे प्रैषीन्महावेगान्यमदण्डोपमांस्तथा ॥ ६
ते ललाटं समासाद्य सूतपुत्रस्य मारिष ।
विविशुश्चोदितास्तेन वल्मीकमिव पन्नगाः ॥ ७
ललाटस्थैस्तु तैर्बाणैः सूतपुत्रो व्यरोचत ।
नीलोत्पलमयीं मालां धारयन्स पुरा यथा ॥ ८
ततः क्रुद्धो रणे कर्णः पीडितो दृढधन्वना ।
वेगं चक्रे महावेगो भीमसेनवधं प्रति ॥ ९
तस्मै कर्णः शतं राजन्निषूणां गार्ध्रवाससाम् ।
अमर्षी बलवान्क्रुद्धः प्रेषयामास भारत ॥ १०
ततः प्रासृजदुग्राणि शरवर्षाणि पाण्डवः ।
समरे तमनादृत्य नास्य वीर्यमचिन्तयत् ॥ ११
ततः कर्णो महाराज पाण्डवं निशितैः शरैः ।
आजघानोरसि क्रुद्धः क्रुद्धरूपं परंतपः ॥ १२
जीमूताविव चान्योन्यं तौ ववर्षतुराहवे ।
तलशब्दरवैश्चैव त्रासयन्तौ परस्परम् ॥ १३
शरजालैश्च विविधैश्छादयामासतुर्मृधे ।
अन्योन्यं समरे क्रुद्धौ कृतप्रतिकृतैषिणौ ॥ १४
ततो भीमो महाबाहू राधेयस्य महात्मनः ।
क्षुरप्रेण धनुश्छित्त्वा कर्णं विव्याध पत्रिणा ॥ १५
तदपास्य धनुश्छिन्नं सूतपुत्रो महामनाः ।
अन्यत्कार्मुकमादत्त वेगघ्नं भारसाधनम् ॥ १६
दृष्ट्वा च कुरुसौवीरसैन्धवानां बलक्षयम् ।
सवर्मध्वजशस्त्रैश्च पतितैः संवृतां महीम् ॥ १७
हस्त्यश्वनरदेहांश्च गतासून्प्रेक्ष्य सर्वतः ।
सूतपुत्रस्य संरम्भाद्दीप्तं वपुरजायत ॥ १८
स विस्फार्य महच्चापं कार्तस्वरविभूषितम् ।
भीमं प्रैक्षत राधेयो राजन्घोरेण चक्षुषा ॥ १९
ततः क्रुद्धः शरानस्यन्सूतपुत्रो व्यरोचत ।
मध्यंदिनगतोऽर्चिष्माञ्शरदीव दिवाकरः ॥ २०
मरीचिविकचस्येव राजन्भानुमतो वपुः ।
आसीदाधिरथेर्घोरं वपुः शरशतार्चिषः ॥ २१
कराभ्यामाददानस्य संदधानस्य चाशुगान् ।
विकर्षतो मुञ्चतो वा नान्तरं ददृशू रणे ॥ २२
अग्निचक्रोपमं घोरं मण्डलीकृतमायुधम् ।
कर्णस्यासीन्महाराज सव्यदक्षिणमस्यतः ॥ २३
स्वर्णपुङ्खाः सुनिशिताः कर्णचापच्युताः शराः ।
प्राच्छादयन्महाराज दिशः सूर्यस्य च प्रभाम् ॥२४
ततः कनकपुङ्खानां शराणां नतपर्वणाम् ।
धनुश्च्युतानां वियति ददृशे बहुधा व्रजः ॥ २५
शरासनादाधिरथेः प्रभवन्तः स्म सायकाः ।
श्रेणीकृता व्यराजन्त राजन्क्रौञ्चा इवाम्बरे ॥ २६
गार्ध्रपत्राञ्शिलाधौतान्कार्तस्वरविभूषितान् ।
महावेगान्प्रदीप्ताग्रान्मुमोचाधिरथिः शरान् ॥ २७
ते तु चापबलोद्धूताः शातकुम्भविभूषिताः ।

अजस्रमन्वकीर्यन्त शराः पार्थरथं प्रति ॥ २८
ते व्योम्नि रत्नविकृता व्यकाशन्त सहस्रशः ।
शलभानामिव व्राताः शराः कर्णसमीरिताः ॥ २९
चापादाधिरथेर्मुक्ताः प्रपतन्तः स्म सायकाः ।
एको दीर्घ इव प्रांशुः प्रभवन्दृश्यते शरः ॥ ३०
पर्वतं वारिधाराभिश्छादयन्निव तोयदः ।
कर्णः प्राच्छादयत्क्रुद्धो भीमं सायकवृष्टिभिः ॥ ३१
तत्र भारत भीमस्य बलवीर्यपराक्रमम् ।
व्यवसायं च पुत्रास्ते प्रैक्षन्त कुरुभिः सह ॥ ३२
तां समुद्रमिवोद्धूतां शरवृष्टिं समुत्थिताम् ।
अचिन्तयित्वा भीमस्तु क्रुद्धः कर्णमुपाद्रवत् ॥ ३३
रुक्मपृष्ठं महच्चापं भीमस्यासीद्विशां पते ।
आकर्षान्मण्डलीभूतं शक्रचापमिवापरम् ।
तस्माच्छराः प्रादुरासन्पूरयन्त इवाम्बरम् ॥ ३४
सुवर्णपुङ्खैर्भीमेन सायकैर्नतपर्वभिः ।
गगने रचिता माला काञ्चनीव व्यराजत ॥ ३५
ततो व्योम्नि विषक्तानि शरजालानि भागशः ।
आहतानि व्यशीर्यन्त भीमसेनस्य पत्रिभिः ॥ ३६
कर्णस्य शरजालौघैर्भीमसेनस्य चोभयोः ।
अग्निस्फुलिङ्गसंस्पर्शैरञ्जोगतिभिराहवे ।
तैस्तैः कनकपुङ्खानां द्यौरासीत्संवृता व्रजैः ॥ ३७
स भीमं छादयन्बाणैः सूतपुत्रः पृथग्विधैः ।
उपारोहदनादृत्य तस्य वीर्यं महात्मनः ॥ ३८
तयोर्विसृजतोस्तत्र शरजालानि मारिष ।
वायुभूतान्यदृश्यन्त संसक्तानीतरेतरम् ॥ ३९
तस्मै कर्णः शितान्बाणान्कर्मारपरिमार्जितान् ।
सुवर्णविकृतान्क्रुद्धः प्राहिणोद्वधकाङ्क्षया ॥ ४०
तानन्तरिक्षे विशिखैस्त्रिधैकैकमशातयत् ।
विशेषयन्सूतपुत्रं भीमस्तिष्ठेति चाब्रवीत् ॥ ४१
पुनश्चासृजदुग्राणि शरवर्षाणि पाण्डवः ।
अमर्षी बलवान्क्रुद्धो दिधक्षन्निव पावकः ॥ ४२
तस्य तान्याददे कर्णः सर्वाण्यस्त्राण्यभीतवत् ।
युध्यतः पाण्डुपुत्रस्य सूतपुत्रोऽस्त्रमायया ॥ ४३
तस्येषुधी धनुर्ज्यां च बाणैः संनतपर्वभिः ।
रश्मीन्योक्त्राणि चाश्वानां कर्णो वैकर्तनोऽच्छिनत् ॥
अथास्याश्वान्पुनर्हत्वा त्रिभिर्विव्याध सारथिम् ।
सोऽवप्लुत्य द्रुतं सूतो युयुधानरथं ययौ ॥ ४५
उत्स्मयन्निव भीमस्य क्रुद्धः कालानलप्रभः ।
ध्वजं चिच्छेद राधेयः पताकाश्च न्यपातयत् ॥ ४६
स विधन्वा महाराज रथशक्तिं परामृशत् ।
तामवासृजदाविध्य क्रुद्धः कर्णरथं प्रति ॥ ४७
तामाधिरथिरायस्तः शक्तिं हेमपरिष्कृताम् ।
आपतन्तीं महोल्काभां चिच्छेद दशभिः शरैः ॥
सापतद्दशधा राजन्निकृत्ता कर्णसायकैः ।
अस्यतः सूतपुत्रस्य मित्रार्थे चित्रयोधिनः ॥ ४९
स चर्मादत्त कौन्तेयो जातरूपपरिष्कृतम् ।
खड्गं चान्यतरप्रेप्सुर्मृत्योरग्रे जयस्य वा ।
तदस्य सहसा कर्णो व्यधमत्प्रहसन्निव ॥ ५०
स विचर्मा महाराज विरथः क्रोधमूर्छितः ।
असिं प्रासृजदाविध्य त्वरन्कर्णरथं प्रति ॥ ५१
स धनुः सूतपुत्रस्य छित्त्वा ज्यां च सुसंशितः ।
अपतद्भुवि निस्त्रिंशश्च्युतः सर्प इवाम्बरात् ॥ ५२
ततः प्रहस्याधिरथिरन्यदादत्त कार्मुकम् ।
शत्रुघ्नं समरे क्रुद्धो दृढज्यं वेगवत्तरम् ॥ ५३
स भीमसेनः कुपितो बलवान्सत्यविक्रमः ।
विहायसं प्राक्रमद्वै कर्णस्य व्यथयन्मनः ॥ ५४
तस्य तच्चरितं दृष्ट्वा संग्रामे विजयैषिणः ।
लयमास्थाय राधेयो भीमसेनमवञ्चयत् ॥ ५५
तमदृष्ट्वा रथोपस्थे निलीनं व्यथितेन्द्रियम् ।
ध्वजमस्य समासाद्य तस्थौ स धरणीतले ॥ ५६

तदस्य कुरवः सर्वे चारणाश्चाभ्यपूजयन् ।
यदियेष रथात्कर्णं हन्तुं तार्क्ष्य इवोरगम् ॥ ५७
स छिन्नधन्वा विरथः स्वधर्ममनुपालयन् ।
स्वरथं पृष्ठतः कृत्वा युद्धायैव व्यवस्थितः ॥ ५८
तद्विहत्यास्य राधेयस्तत एनं समभ्ययात् ।
संरब्धः पाण्डवं संख्ये युद्धाय समुपस्थितम् ॥ ५९
तौ समेतौ महारङ्गे स्पर्धमानौ महाबलौ ।
जीमूताविव घर्मान्ते गर्जमानौ नभस्तले ॥ ६०
तयोरासीत्संप्रहारः क्रुद्धयोर्नरसिंहयोः ।
अमृष्यमाणयोः संख्ये देवदानवयोरिव ॥ ६१
क्षीणशस्त्रस्तु कौन्तेयः कर्णेन समभिद्रुतः ।
दृष्ट्वार्जुनहतान्नागान्पतितान्पर्वतोपमान् ।
रथमार्गविघातार्थं व्यायुधः प्रविवेश ह ॥ ६२
हस्तिनां व्रजमासाद्य रथदुर्गं प्रविश्य च ।
पाण्डवो जीविताकाङ्क्षी राधेयं नाभ्यहारयत् ॥ ६३
व्यवस्थानमथाकाङ्क्षन्धनंजयशरैर्हतम् ।
उद्यम्य कुञ्जरं पार्थस्तस्थौ परपुरंजयः ॥ ६४
तमस्य विशिखैः कर्णो व्यधमत्कुञ्जरं पुनः ।
हस्त्यङ्गान्यथ कर्णाय प्राहिणोत्पाण्डवो नदन् ॥ ६५
चक्राण्यश्वांस्तथा वाहान्यद्यत्पश्यति भूतले ।
तत्तदादाय चिक्षेप क्रुद्धः कर्णाय पाण्डवः ॥ ६६
तदस्य सर्वं चिच्छेद क्षिप्तं क्षिप्तं शितैः शरैः ।
व्यायुधं नावधीच्चैनं कर्णः कुन्त्या वचः स्मरन् ॥
धनुषोऽग्रेण तं कर्णस्त्वभिद्रुत्य परामृशत् ।
उत्स्मयन्निव राधेयो भीमसेनमुवाच ह ॥ ६८
पुनः पुनस्तूबरक मूढ औदरिकेति च ।
अकृतास्त्रक मा योत्सीर्बाल संग्रामकातर ॥ ६९
यत्र भोज्यं बहुविधं भक्ष्यं पेयं च पाण्डव ।
तत्र त्वं दुर्मते योग्यो न युद्धेषु कथंचन ॥ ७०
मुनिर्भूत्वाथ वा भीम फलान्यद्धि सुदुर्मते ।
वनाय व्रज कौन्तेय न त्वं युद्धविशारदः ॥ ७१
फलमूलाशने युक्तस्त्वं तथातिथिभोजने ।
न त्वां शस्त्रसमुद्योगे योग्यं मन्ये वृकोदर ॥ ७२
पुष्पमूलफलाहारो व्रतेषु नियमेषु च ।
उचितस्त्वं वने भीम न त्वं युद्धविशारदः ॥ ७३
क्व युद्धं क्व मुनित्वं च वनं गच्छ वृकोदर ।
न त्वं युद्धोचितस्तात वनवासरतिर्भव ॥ ७४
सूदान्भृत्यजनान्दासांस्त्वं गृहे त्वरयन्भृशम् ।
योग्यस्ताडयितुं क्रोधाद्भोजनार्थं वृकोदर ॥ ७५
कौमारे यानि चाप्यासन्नप्रियाणि विशां पते ।
पूर्ववृत्तानि चाप्येनं रूक्षाण्यश्रावयद्भृशम् ॥ ७६
अथैनं तत्र संलीनमस्पृशद्धनुषा पुनः ।
प्रहसंश्च पुनर्वाक्यं भीममाह वृषस्तदा ॥ ७७
योद्धव्यमाविशान्यत्र न योद्धव्यं तु मादृशैः ।
मादृशैर्युध्यमानानामेतच्चान्यच्च विद्यते ॥ ७८
गच्छ वा यत्र तौ कृष्णौ तौ त्वा रक्षिष्यतो रणे ।
गृहं वा गच्छ कौन्तेय किं ते युद्धेन बालक ॥७९
एवं तं विरथं कृत्वा कर्णो राजन्व्यकत्थत ।
प्रमुखे वृष्णिसिंहस्य पार्थस्य च महात्मनः ॥ ८०
ततो राजञ्शिलाधौताञ्शराञ्शाखामृगध्वजः ।
प्राहिणोत्सूतपुत्राय केशवेन प्रचोदितः ॥ ८१
ततः पार्थभुजोत्सृष्टाः शराः काञ्चनभूषणाः ।
गाण्डीवप्रभवाः कर्णं हंसाः क्रौञ्चमिवाविशन् ॥८२
स भुजंगैरिवायस्तैर्गाण्डीवप्रेषितैः शरैः ।
भीमसेनादपासेधत्सूतपुत्रं धनंजयः ॥ ८३
स छिन्नधन्वा भीमेन धनंजयशराहतः ।
कर्णो भीमादपायासीद्रथेन महता द्रुतम् ॥ ८४
भीमोऽपि सात्यकेर्वाहं समारुह्य नरर्षभः ।
अन्वयाद्भ्रातरं संख्ये पाण्डवं सव्यसाचिनम् ॥८५
ततः कर्णं समुद्दिश्य त्वरमाणो धनंजयः ।

नाराचं क्रोधताम्राक्षः प्रैषीन्मृत्युमिवान्तकः ॥ ८६
स गरुत्मानिवाकाशे प्रार्थयन्भुजगोत्तमम् ।
नाराचोऽभ्यपतत्कर्णं तूर्णं गाण्डीवचोदितः ॥ ८७
तमन्तरिक्षे नाराचं द्रौणिश्चिच्छेद पत्रिणा ।
धनंजयभयात्कर्णमुज्जिहीर्षुर्महारथः ॥ ८८
ततो द्रौणिं चतुःषष्ट्या विव्याध कुपितोऽर्जुनः ।
शिलीमुखैर्महाराज मा गास्तिष्ठेति चाब्रवीत् ॥ ८९
स तु मत्तगजाकीर्णमनीकं रथसंकुलम् ।
तूर्णमभ्याविशद्द्रौणिर्धनंजयशरार्दितः ॥ ९०
ततः सुवर्णपृष्ठानां धनुषां कूजतां रणे ।
शब्दं गाण्डीवघोषेण कौन्तेयोऽभ्यभवद्बली ॥ ९१
धनंजयस्तथा यान्तं पृष्ठतो द्रौणिमभ्ययात् ।
नातिदीर्घमिवाध्वानं शरैः संत्रासयन्बलम् ॥ ९२
विदार्य देहान्नाराचैर्नरवारणवाजिनाम् ।
कङ्कबर्हिणवासोभिर्बलं व्यधमदर्जुनः ॥ ९३
तद्बलं भरतश्रेष्ठ सवाजिद्विपमानवम् ।
पाकशासनिरायस्तः पार्थः संनिजघान ह ॥ ९४

इति श्रीमहाभारते द्रोणपर्वणि
चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

११५

धृतराष्ट्र उवाच ।

अहन्यहनि मे दीप्तं यशः पतति संजय ।
हता मे बहवो योधा मन्ये कालस्य पर्ययम् ॥ १
धनंजयस्तु संक्रुद्धः प्रविष्टो मामकं बलम् ।
रक्षितं द्रोणकर्णाभ्यामप्रवेश्यं सुरैरपि ॥ २
ताभ्यामूर्जितवीर्याभ्यामाप्यायितपराक्रमः ।
सहितः कृष्णभीमाभ्यां शिनीनामृषभेण च ॥ ३
तदाप्रभृति मा शोको दहत्यग्निरिवाशयम् ।
ग्रस्तान्हि प्रतिपश्यामि भूमिपालान्ससैन्धवान् ॥ ४
अप्रियं सुमहत्कृत्वा सिन्धुराजः किरीटिनः ।
चक्षुर्विषयमापन्नः कथं मुच्येत जीवितः ॥ ५
अनुमानाच्च पश्यामि नास्ति संजय सैन्धवः ।
युद्धं तु तद्यथा वृत्तं तन्ममाचक्ष्व पृच्छतः ॥ ६
यश्च विक्षोभ्य महतीं सेनां संलोड्य चासकृत् ।
एकः प्रविष्टः संक्रुद्धो नलिनीमिव कुञ्जरः ॥ ७
तस्य वृष्णिप्रवीरस्य ब्रूहि युद्धं यथातथम् ।
धनंजयार्थे यत्तस्य कुशलो ह्यसि संजय ॥ ८

संजय उवाच ।

तथा तु वैकर्तनपीडितं तं
भीमं प्रयान्तं पुरुषप्रवीरम् ।
समीक्ष्य राजन्नरवीरमध्ये
शिनिप्रवीरोऽनुययौ रथेन ॥ ९
नदन्यथा वज्रधरस्तपान्ते
ज्वलन्यथा जलदान्ते च सूर्यः ।
निघ्नन्नमित्रान्धनुषा दृढेन
संकम्पयंस्तव पुत्रस्य सेनाम् ॥ १०
तं यान्तमश्वै रजतप्रकाशै-
रायोधने नरवीरं चरन्तम् ।
नाशक्नुवन्वारयितुं त्वदीयाः
सर्वे रथा भारत माधवाग्र्यम् ॥ ११
अमर्षपूर्णस्त्वनिवृत्तयोधी
शरासनी काञ्चनवर्मधारी ।
अलम्बुसः सात्यकिं माधवाग्र्य-
मवारयद्राजवरोऽभिपत्य ॥ १२
तयोरभूद्भारत संप्रहार-
स्तथागतो नैव बभूव कश्चित् ।
प्रैक्षन्त एवाहवशोभिनौ तौ
योधास्त्वदीयाश्च परे च सर्वे ॥ १३
अविध्यदेनं दशभिः पृषत्कै-
रलम्बुसो राजवरः प्रसह्य ।

अनागतानेव तु तान्पृषत्कां-
श्छिच्छेद बाणैः शिनिपुंगवोऽपि ॥ १४
पुनः स बाणैस्त्रिभिरग्निकल्पै-
राकर्णपूर्णैर्निशितैः सुपुङ्खैः ।
विव्याध देहावरणं विदार्य
ते सात्यकेराविविशुः शरीरम् ॥ १५
तैः कायमस्याग्र्यनिलप्रभावै-
र्विदार्य बाणैरपरैर्ज्वलद्भिः ।
आजघ्निवांस्तान्रजतप्रकाशा-
नश्वांश्चतुर्भिश्चतुरः प्रसह्य ॥ १६
तथा तु तेनाभिहतस्तरस्वी
नप्ता शिनेश्चक्रधरप्रभावः ।
अलम्बुसस्योत्तमवेगवद्भि-
र्हयांश्चतुर्भिर्निजघान बाणैः ॥ १७
अथास्य सूतस्य शिरो निकृत्य
भल्लेन कालानलसंनिभेन ।
सकुण्डलं पूर्णशशिप्रकाशं
भ्राजिष्णु वक्त्रं निचकर्त देहात् ॥ १८
निहत्य तं पार्थिवपुत्रपौत्रं
संख्ये मधूनामृषभः प्रमाथी ।
ततोऽन्वयादर्जुनमेव वीरः
सैन्यानि राजंस्तव संनिवार्य ॥ १९
अन्वागतं वृष्णिवरं समीक्ष्य
तथारिमध्ये परिवर्तमानम् ।
घ्नन्तं कुरूणामिषुभिर्बलानि
पुनः पुनर्वायुरिवाभ्रपूगान् ॥ २०
ततोऽवहन्सैन्धवाः साधु दान्ता
गोक्षीरकुन्देन्दुहिमप्रकाशाः ।
सुवर्णजालावतताः सदश्वा
यतो यतः कामयते नृसिंहः ॥ २१
अथात्मजास्ते सहिताभिपेतु-
रन्ये च योधास्त्वरितास्त्वदीयाः ।
कृत्वा मुखं भारत योधमुख्यं
दुःशासनं त्वत्सुतमाजमीढ ॥ २२
ते सर्वतः संपरिवार्य संख्ये
शैनेयमाजघ्नुरनीकसाहाः ।
स चापि तान्प्रवरः सात्वतानां
न्यवारयद्बाणजालेन वीरः ॥ २३
निवार्य तांस्तूर्णममित्रघाती
नप्ता शिनेः पत्रिभिरग्निकल्पैः ।
दुःशासनस्यापि जघान वाहा-
नुद्यम्य बाणासनमाजमीढ ॥ २४

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

११६

संजय उवाच ।

तमुद्यतं महाबाहुं दुःशासनरथं प्रति ।
त्वरितं त्वरणीयेषु धनंजयहितैषिणम् ॥ १
त्रिगर्तानां महेष्वासाः सुवर्णविकृतध्वजाः ।
सेनासमुद्रमाविष्टमानर्तं पर्यवारयन् ॥ २
अथैनं रथवंशेन सर्वतः संनिवार्य ते ।
अवाकिरञ्शरव्रातैः क्रुद्धाः परमधन्विनः ॥ ३
अजयद्राजपुत्रांस्तान्यतमानान्महारणे ।
एकः पञ्चाशतं शत्रून्सात्यकिः सत्यविक्रमः ॥ ४
संप्राप्य भारतीमध्यं तलघोषसमाकुलम् ।
असिशक्तिगदापूर्णमप्लवं सलिलं यथा ॥ ५
तत्राद्भुतमपश्याम शैनेयचरितं रणे ।
प्रतीच्यां दिशि तं दृष्ट्वा प्राच्यां पश्याम लाघवात् ॥
उदीचीं दक्षिणां प्राचीं प्रतीचीं प्रसृतस्तथा ।
नृत्यन्निवाचरच्छूरो यथा रथशतं तथा ॥ ७

तद्दृष्ट्वा चरितं तस्य सिंहविक्रान्तगामिनः ।
त्रिगर्ताः संन्यवर्तन्त संतप्ताः स्वजनं प्रति ॥ ८
तमन्ये शूरसेनानां शूराः संख्ये न्यवारयन् ।
नियच्छन्तः शरव्रातैर्मत्तं द्विपमिवाङ्कुशैः ॥ ९
तान्यवारयदायस्तान्मुहूर्तमिव सात्यकिः ।
ततः कलिङ्गैर्युयुधे सोऽचिन्त्यबलविक्रमः ॥ १०
तां च सेनामतिक्रम्य कलिङ्गानां दुरत्ययाम् ।
अथ पार्थं महाबाहुर्धनंजयमुपासदत् ॥ ११
तरन्निव जले श्रान्तो यथा स्थलमुपेयिवान् ।
तं दृष्ट्वा पुरुषव्याघ्रं युयुधानः समाश्वसत् ॥ १२
तमायान्तमभिप्रेक्ष्य केशवोऽर्जुनमब्रवीत् ।
असावायाति शैनेयस्तव पार्थ पदानुगः ॥ १३
एष शिष्यः सखा चैव तव सत्यपराक्रमः ।
सर्वान्योधांस्तृणीकृत्य विजिग्ये पुरुषर्षभः ॥ १४
एष कौरवयोधानां कृत्वा घोरमुपद्रवम् ।
तव प्राणैः प्रियतरः किरीटिन्नेति सात्यकिः ॥ १५
एष द्रोणं तथा भोजं कृतवर्माणमेव च ।
कदर्थीकृत्य विशिखैः फल्गुनाभ्येति सात्यकिः ॥
धर्मराजप्रियान्वेषी हत्वा योधान्वरान्वरान् ।
शूरश्चैव कृतास्त्रश्च फल्गुनाभ्येति सात्यकिः ॥ १७
कृत्वा सुदुष्करं कर्म सैन्यमध्ये महाबलः ।
तव दर्शनमन्विच्छन्पाण्डवाभ्येति सात्यकिः ॥ १८
बहूनेकरथेनाजौ योधयित्वा महारथान् ।
आचार्यप्रमुखान्पार्थ आयात्येष हि सात्यकिः ॥ १९
स्वबाहुबलमाश्रित्य विदार्य च वरूथिनीम् ।
प्रेषितो धर्मपुत्रेण पार्थैषोऽभ्येति सात्यकिः ॥ २०
यस्य नास्ति समो योधः कौरवेषु कथंचन ।
सोऽयमायाति कौन्तेय सात्यकिः सत्यविक्रमः ॥ २१
कुरुसैन्याद्विमुक्तो वै सिंहो मध्याद्गवामिव ।
निहत्य बहुलाः सेनाः पार्थैषोऽभ्येति सात्यकिः ॥
एष राजसहस्राणां वक्त्रैः पङ्कजसंनिभैः ।
आस्तीर्य वसुधां पार्थ क्षिप्रमायाति सात्यकिः ॥ २३
एष दुर्योधनं जित्वा भ्रातृभिः सहितं रणे ।
निहत्य जलसंधं च क्षिप्रमायाति सात्यकिः ॥ २४
रुधिरौघवतीं कृत्वा नदीं शोणितकर्दमाम् ।
तृणवन्न्यस्य कौरव्यानेष आयाति सात्यकिः ॥ २५
ततोऽप्रहृष्टः कौन्तेयः केशवं वाक्यमब्रवीत् ।
न मे प्रियं महाबाहो यन्मामभ्येति सात्यकिः ॥
न हि जानामि वृत्तान्तं धर्मराजस्य केशव ।
सात्वतेन विहीनः स यदि जीवति वा न वा ॥ २७
एतेन हि महाबाहो रक्षितव्यः स पार्थिवः ।
तमेष कथमुत्सृज्य मम कृष्ण पदानुगः ॥ २८
राजा द्रोणाय चोत्सृष्टः सैन्धवश्चानिपातितः ।
प्रत्युद्यातश्च शैनेयमेष भूरिश्रवा रणे ॥ २९
सोऽयं गुरुतरो भारः सैन्धवान्मे समाहितः ।
ज्ञातव्यश्च हि मे राजा रक्षितव्यश्च सात्यकिः ॥
जयद्रथश्च हन्तव्यो लम्बते च दिवाकरः ।
श्रान्तश्चैष महाबाहुरल्पप्राणश्च सांप्रतम् ॥ ३१
परिश्रान्ता हयाश्चास्य हययन्ता च माधव ।
न च भूरिश्रवाः श्रान्तः ससहायश्च केशव ॥ ३२
अपीदानीं भवेदस्य क्षेममस्मिन्समागमे ।
कच्चिन्न सागरं तीर्त्वा सात्यकिः सत्यविक्रमः ।
गोष्पदं प्राप्य सीदेत महौजाः शिनिपुंगवः ॥ ३३
अपि कौरवमुख्येन कृतास्त्रेण महात्मना ।
समेत्य भूरिश्रवसा स्वस्तिमान्सात्यकिर्भवेत् ॥ ३४
व्यतिक्रममिमं मन्ये धर्मराजस्य केशव ।
आचार्याद्भयमुत्सृज्य यः प्रेषयति सात्यकिम् ॥ ३५
ग्रहणं धर्मराजस्य खगः श्येन इवामिषम् ।

सित्यमाशंसते द्रोणः कच्चित्स्यात्कुशली नृपः ॥ ३६

इति श्रीमहाभारते द्रोणपर्वणि
षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

११७

संजय उवाच ।

तमापतन्तं संप्रेक्ष्य सात्वतं युद्धदुर्मदम् ।
क्रोधाद्भूरिश्रवा राजन्सहसा समुपाद्रवत् ॥ १
तमब्रवीन्महाबाहुः कौरव्यः शिनिपुंगवम् ।
अद्य प्राप्तोऽसि दिष्ट्या मे चक्षुर्विषयमित्युत ॥ २
चिराभिलषितं काममद्य प्राप्स्यामि संयुगे ।
न हि मे मोक्ष्यसे जीवन्यदि नोत्सृजसे रणम् ॥३
अद्य त्वां समरे हत्वा नित्यं शूराभिमानिनम् ।
नन्दयिष्यामि दाशार्ह कुरुराजं सुयोधनम् ॥ ४
अद्य मद्बाणनिर्दग्धं पतितं धरणीतले ।
द्रक्ष्यतस्त्वां रणे वीरौ सहितौ केशवार्जुनौ ॥ ५
अद्य धर्मसुतो राजा श्रुत्वा त्वां निहतं मया ।
सव्रीडो भविता सद्यो येनासीह प्रवेशितः ॥ ६
अद्य मे विक्रमं पार्थो विज्ञास्यति धनंजयः ।
त्वयि भूमौ विनिहते शयाने रुधिरोक्षिते ॥ ७
चिराभिलषितो ह्यद्य त्वया सह समागमः ।
पुरा देवासुरे युद्धे शक्रस्य बलिना यथा ॥ ८
अद्य युद्धं महाघोरं तव दास्यामि सात्वत ।
ततो ज्ञास्यसि तत्त्वेन मद्वीर्यबलपौरुषम् ॥ ९
अद्य संयमनीं याता मया त्वं निहतो रणे ।
यथा रामानुजेनाजौ रावणिर्लक्ष्मणेन वै ॥ १०
अद्य कृष्णश्च पार्थश्च धर्मराजश्च माधव ।
हते त्वयि निरुत्साहा रणं त्यक्ष्यन्त्यसंशयम् ॥ ११
अद्य तेऽपचितिं कृत्वा शितैर्माधव सायकैः ।
तत्स्त्रियो नन्दयिष्यामि ये त्वया निहता रणे ॥१२
चक्षुर्विषयसंप्राप्तो न त्वं माधव मोक्ष्यसे ।
सिंहस्य विषयं प्राप्तो यथा क्षुद्रमृगस्तथा ॥ १३
युयुधानस्तु तं राजन्प्रत्युवाच हसन्निव ।
कौरवेय न संत्रासो विद्यते मम संयुगे ॥ १४
स मां निहन्यात्संग्रामे यो मां कुर्यान्निरायुधम् ।
समास्तु शाश्वतीर्हन्याद्यो मां हन्याद्धि संयुगे ॥१५
किं मृषोक्तेन बहुना कर्मणा तु समाचर ।
शारदस्येव मेघस्य गर्जितं निष्फलं हि ते ॥ १६
श्रुत्वैतद्गर्जितं वीर हास्यं हि मम जायते ।
चिरकालेप्सितं लोके युद्धमद्यास्तु कौरव ॥ १७
त्वरते मे मतिस्तात त्वयि युद्धाभिकाङ्क्षिणि ।
नाहत्वा संनिवर्तिष्ये त्वामद्य पुरुषाधम ॥ १८
अन्योन्यं तौ तदा वाग्भिस्तक्षन्तौ नरपुंगवौ ।
जिघांसू परमक्रुद्धावभिजघ्नतुराहवे ॥ १९
समेतौ तौ नरव्याघ्रौ शुष्मिणौ स्पर्धिनौ रणे ।
द्विरदाविव संक्रुद्धौ वाशितार्थे मदोत्कटौ ॥ २०
भूरिश्रवाः सात्यकिश्च ववर्षतुररिंदमौ ।
शरवर्षाणि भीमानि मेघाविव परस्परम् ॥ २१
सौमदत्तिस्तु शैनेयं प्रच्छाद्येषुभिराशुगैः ।
जिघांसुर्भरतश्रेष्ठ विव्याध निशितैः शरैः ॥ २२
दशभिः सात्यकिं विद्ध्वा सौमदत्तिरथापरान् ।
मुमोच निशितान्बाणाञ्जिघांसुः शिनिपुंगवम् ॥२३
तानस्य विशिखांस्तीक्ष्णानन्तरिक्षे विशां पते ।
अप्राप्तानस्त्रमायाभिरग्रसत्सात्यकिः प्रभो ॥ २४
तौ पृथक्शरवर्षाभ्यामवर्षेतां परस्परम् ।
उत्तमाभिजनौ वीरौ कुरुवृष्णियशस्करौ ॥ २५
तौ नखैरिव शार्दूलौ दन्तैरिव महाद्विपौ ।
रथशक्तिभिरन्योन्यं विशिखैश्चाप्यकृन्तताम् ॥ २६
निर्भिदन्तौ हि गात्राणि विक्षरन्तौ च शोणितम् ।
व्यष्टम्भयेतामन्योन्यं प्राणद्यूताभिदेविनौ ॥ २७
एवमुत्तमकर्माणौ कुरुवृष्णियशस्करौ ।

परस्परमयुध्येतां वारणाविव यूथपौ ॥ २८
तावदीर्घेण कालेन ब्रह्मलोकपुरस्कृतौ ।
जिगीषन्तौ परं स्थानमन्योन्यमभिजघ्नतुः ॥ २९
सात्यकिः सौमदत्तिश्च शरवृष्ट्या परस्परम् ।
हृष्टवद्धार्तराष्ट्राणां पश्यतामभ्यवर्षताम् ॥ ३०
संप्रैक्षन्त जनास्तत्र युध्यमानौ युधां पती ।
यूथपौ वाशिताहेतोः प्रयुद्धाविव कुञ्जरौ ॥ ३१
अन्योन्यस्य हयान्हत्वा धनुषी विनिकृत्य च ।
विरथावसियुद्धाय समेयातां महारणे ॥ ३२
आर्षभे चर्मणी चित्रे प्रगृह्य विपुले शुभे ।
विकोशौ चाप्यसी कृत्वा समरे तौ विचेरतुः ॥
चरन्तौ विविधान्मार्गान्मण्डलानि च भागशः ।
मुहुराजघ्नतुः क्रुद्धावन्योन्यमरिमर्दनौ ॥ ३४
सखड्गौ चित्रवर्माणौ सनिष्काङ्गदभूषणौ ।
रणे रणोत्कटौ राजन्नन्योन्यं पर्यकर्षताम् ॥ ३५
मुहूर्तमिव राजेन्द्र परिकृष्य परस्परम् ।
पश्यतां सर्वसैन्यानां वीरावाश्वसतां पुनः ॥ ३६
असिभ्यां चर्मणी शुभ्रे विपुले च शरावरे ।
निकृत्य पुरुषव्याघ्रौ बाहुयुद्धं प्रचक्रतुः ॥ ३७
व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ ।
बाहुभिः समसज्जेतामायसैः परिघैरिव ॥ ३८
तयोरासन्भुजाघाता निग्रहप्रग्रहौ तथा ।
शिक्षाबलसमुद्भूताः सर्वयोधप्रहर्षणाः ॥ ३९
तयोर्नृवरयो राजन्समरे युध्यमानयोः ।
भीमोऽभवन्महाशब्दो वज्रपर्वतयोरिव ॥ ४०
द्विपाविव विषाणाग्रैः शृङ्गैरिव महर्षभौ ।
युयुधाते महात्मानौ कुरुसात्वतपुंगवौ ॥ ४१
क्षीणायुधे सात्वते युध्यमाने
ततोऽब्रवीदर्जुनं वासुदेवः ।
पश्यस्वैनं विरथं युध्यमानं
रणे केतुं सर्वधनुर्धराणाम् ॥ ४२
प्रविष्टो भारतीं सेनां तव पाण्डव पृष्ठतः ।
योधितश्च महावीर्यैः सर्वैर्भारत भारतैः ॥ ४३
परिश्रान्तो युधां श्रेष्ठः संप्राप्तो भूरिदक्षिणम् ।
युद्धकाङ्क्षिणमायान्तं नैतत्सममिवार्जुन ॥ ४४
ततो भूरिश्रवाः क्रुद्धः सात्यकिं युद्धदुर्मदम् ।
उद्यम्य न्यहनद्राजन्मत्तो मत्तमिव द्विपम् ॥ ४५
रथस्थयोर्द्वयोर्युद्धे क्रुद्धयोर्योधमुख्ययोः ।
केशवार्जुनयो राजन्समरे प्रेक्षमाणयोः ॥ ४६
अथ कृष्णो महाबाहुरर्जुनं प्रत्यभाषत ।
पश्य वृष्ण्यन्धकव्याघ्रं सौमदत्तिवशं गतम् ॥ ४७
परिश्रान्तं गतं भूमौ कृत्वा कर्म सुदुष्करम् ।
तवान्तेवासिनं शूरं पालयार्जुन सात्यकिम् ॥ ४८
न वशं यज्ञशीलस्य गच्छेदेष वरारिहन् ।
त्वत्कृते पुरुषव्याघ्र तदाशु क्रियतां विभो ॥ ४९
अथाब्रवीद्धृष्टमना वासुदेवं धनंजयः ।
पश्य वृष्णिप्रवीरेण क्रीडन्तं कुरुपुंगवम् ।
महाद्विपेनेव वने मत्तेन हरियूथपम् ॥ ५०
हाहाकारो महानासीत्सैन्यानां भरतर्षभ ।
यदुद्यम्य महाबाहुः सात्यकिं न्यहनद्भुवि ॥ ५१
स सिंह इव मातङ्गं विकर्षन्भूरिदक्षिणः ।
व्यरोचत कुरुश्रेष्ठः सात्वतप्रवरं युधि ॥ ५२
अथ कोशाद्विनिष्कृष्य खड्गं भूरिश्रवा रणे ।
मूर्धजेषु निजग्राह पदा चोरस्यताडयत् ॥ ५३
तथा तु परिकृष्यन्तं दृष्ट्वा सात्वतमाहवे ।
वासुदेवस्ततो राजन्भूयोऽर्जुनमभाषत ॥ ५४
पश्य वृष्ण्यन्धकव्याघ्रं सौमदत्तिवशं गतम् ।
तव शिष्यं महाबाहो धनुष्यनवरं त्वया ॥ ५५
असत्यो विक्रमः पार्थ यत्र भूरिश्रवा रणे ।
विशेषयति वार्ष्णेयं सात्यकिं सत्यविक्रमम् ॥ ५६

एवमुक्तो महाबाहुर्वासुदेवेन पाण्डवः ।
मनसा पूजयामास भूरिश्रवसमाहवे ॥ ५७
विकर्षन्सात्वतश्रेष्ठं क्रीडमान इवाहवे ।
संहर्षयति मां भूयः कुरूणां कीर्तिवर्धनः ॥ ५८
प्रवरं वृष्णिवीराणां यन्न हन्याद्धि सात्यकिम् ।
महाद्विपमिवारण्ये मृगेन्द्र इव कर्षति ॥ ५९
एवं तु मनसा राजन्पार्थः संपूज्य कौरवम् ।
वासुदेवं महाबाहुरर्जुनः प्रत्यभाषत ॥ ६०
सैन्धवासक्तदृष्टित्वान्नैनं पश्यामि माधव ।
एष त्वसुकरं कर्म यादवार्थे करोम्यहम् ॥ ६१
इत्युक्त्वा वचनं कुर्वन्वासुदेवस्य पाण्डवः ।
सखड्गं यज्ञशीलस्य पत्रिणा बाहुमच्छिनत् ॥ ६२

इति श्रीमहाभारते द्रोणपर्वणि
सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥

११८

संजय उवाच ।

स बाहुरपतद्भूमौ सखड्गः सशुभाङ्गदः ।
आदधज्जीवलोकस्य दुःखमुत्तममुत्तमः ॥ १
प्रहरिष्यन्हृतो बाहुरदृश्येन किरीटिना ।
वेगेनाभ्यपतद्भूमौ पञ्चास्य इव पन्नगः ॥ २
स मोघं कृतमात्मानं दृष्ट्वा पार्थेन कौरवः ।
उत्सृज्य सात्यकिं क्रोधाद्गर्हयामास पाण्डवम् ॥ ३
नृशंसं बत कौन्तेय कर्मेदं कृतवानसि ।
अपश्यतो विषक्तस्य यन्मे बाहुमचिच्छिदः ॥ ४
किं नु वक्ष्यसि राजानं धर्मपुत्रं युधिष्ठिरम् ।
किं कुर्वाणो मया संख्ये हतो भूरिश्रवा इति ॥ ५
इदमिन्द्रेण ते साक्षादुपदिष्टं महात्मना ।
अस्त्रं रुद्रेण वा पार्थ द्रोणेनाथ कृपेण वा ॥ ६
ननु नाम स्वधर्मज्ञस्त्वं लोकेऽभ्यधिकः परैः ।
अयुध्यमानस्य कथं रणे प्रहृतवानसि ॥ ७
न प्रमत्ताय भीताय विरथाय प्रयाचते ।
व्यसने वर्तमानाय प्रहरन्ति मनस्विनः ॥ ८
इदं तु नीचाचरितमसत्पुरुषसेवितम् ।
कथमाचरितं पार्थ त्वया कर्म सुदुष्करम् ॥ ९
आर्येण सुकरं ह्याहुरार्यकर्म धनंजय ।
अनार्यकर्म त्वार्येण सुदुष्करतरं भुवि ॥ १०
येषु येषु नरः पार्थ यत्र यत्र च वर्तते ।
आशु तच्छीलतामेति तदिदं त्वयि दृश्यते ॥ १
कथं हि राजवंश्यस्त्वं कौरवेयो विशेषतः ।
क्षत्रधर्मादपक्रान्तः सुवृत्तश्चरितव्रतः ॥ १२
इदं तु यदतिक्षुद्रं वार्ष्णेयार्थे कृतं त्वया ।
वासुदेवमतं नूनं नैतत्त्वय्युपपद्यते ॥ १३
को हि नाम प्रमत्ताय परेण सह युध्यते ।
ईदृशं व्यसनं दद्याद्यो न कृष्णसखो भवेत् ॥ १
व्रात्याः संश्लिष्टकर्माणः प्रकृत्यैव विगर्हिताः ।
वृष्ण्यन्धकाः कथं पार्थ प्रमाणं भवता कृताः ॥१५
एवमुक्त्वा महाबाहुर्यूपकेतुर्महायशाः ।
युयुधानं परित्यज्य रणे प्रायमुपाविशत् ॥ १६
शरानास्तीर्य सव्येन पाणिना पुण्यलक्षणः ।
यियासुर्ब्रह्मलोकाय प्राणान्प्राणेष्वथाजुहोत् ॥ १७
सूर्ये चक्षुः समाधाय प्रसन्नं सलिले मनः ।
ध्यायन्महोपनिषदं योगयुक्तोऽभवन्मुनिः ॥ १८
ततः स सर्वसेनायां जनः कृष्णधनंजयौ ।
गर्हयामास तं चापि शशंस पुरुषर्षभम् ॥ १९
निन्द्यमानौ तथा कृष्णौ नोचतुः किंचिदप्रियम् ।
प्रशस्यमानश्च तथा नाहृष्यद्यूपकेतनः ॥ २०
तांस्तथा वादिनो राजन्पुत्रांस्तव धनंजयः ।
अमृष्यमाणो मनसा तेषां तस्य च भाषितम् ॥२१
असंक्रुद्धमना वाचा स्मारयन्निव भारत ।
उवाच पाण्डुतनयः साक्षेपमिव फल्गुनः ॥ २२

मम सर्वेऽपि राजानो जानन्त्येतन्महाव्रतम् ।
न शक्यो मामको हन्तुं यो मे स्याद्बाणगोचरे ॥२३
यूपकेतो समीक्ष्य त्वं न मां गर्हितुमर्हसि ।
न हि धर्ममविज्ञाय युक्तं गर्हयितुं परम् ॥ २४
आत्तशस्त्रस्य हि रणे वृष्णिवीरं जिघांसतः ।
यदहं बाहुमच्छेत्सं न स धर्मो विगर्हितः ॥ २५
न्यस्तशस्त्रस्य बालस्य विरथस्य विवर्मणः ।
अभिमन्योर्वधं तात धार्मिकः को न पूजयेत् ॥२६
एवमुक्तस्तु पार्थेन शिरसा भूमिमस्पृशत् ।
पाणिना चैव सव्येन प्राहिणोदस्य दक्षिणम् ॥ २७
एतत्पार्थस्य तु वचस्ततः श्रुत्वा महाद्युतिः ।
यूपकेतुर्महाराज तूष्णीमासीदवाङ्मुखः ॥ २८

अर्जुन उवाच ।

या प्रीतिर्धर्मराजे मे भीमे च वदतां वरे ।
नकुले सहदेवे च सा मे त्वयि शलाग्रज ॥ २९
मया तु समनुज्ञातः कृष्णेन च महात्मना ।
गच्छ पुण्यकृताँल्लोकाञ्शिबिरौशीनरो यथा ॥ ३०

संजय उवाच ।

तत उत्थाय शैनेयो विमुक्तः सौमदत्तिना ।
खड्गमादाय चिच्छित्सुः शिरस्तस्य महात्मनः ॥३१
निहतं पाण्डुपुत्रेण प्रमत्तं भूरिदक्षिणम् ।
इयेष सात्यकिर्हन्तुं शलाग्रजमकल्मषम् ॥ ३२
निकृत्तभुजमासीनं छिन्नहस्तमिव द्विपम् ।
क्रोशतां सर्वसैन्यानां निन्द्यमानः सुदुर्मनाः ॥ ३३
वार्यमाणः स कृष्णेन पार्थेन च महात्मना ।
भीमेन चक्ररक्षाभ्यामश्वत्थाम्ना कृपेण च ॥ ३४
कर्णेन वृषसेनेन सैन्धवेन तथैव च ।
विक्रोशतां च सैन्यानामवधीत्तं यतव्रतम् ॥ ३५
प्रायोपविष्टाय रणे पार्थेन छिन्नबाहवे ।
सात्यकिः कौरवेन्द्राय खड्गेनापाहरच्छिरः ॥ ३६
नाभ्यनन्दन्त तत्सैन्याः सात्यकिं तेन कर्मणा ।
अर्जुनेन हतं पूर्वं यज्जघान कुरूद्वहम् ॥ ३७
सहस्राक्षसमं तत्र सिद्धचारणमानवाः ।
भूरिश्रवसमालोक्य युद्धे प्रायगतं हतम् ॥ ३८
अपूजयन्त तं देवा विस्मितास्तस्य कर्मभिः ।
पक्षवादांश्च बहुशः प्रावदंस्तस्य सैनिकाः ॥ ३९
न वार्ष्णेयस्यापराधो भवितव्यं हि तत्तथा ।
तस्मान्मन्युर्न वः कार्यः क्रोधो दुःखकरो नृणाम् ॥
हन्तव्यश्चैष वीरेण नात्र कार्या विचारणा ।
विहितो ह्यस्य धात्रैव मृत्युः सात्यकिराहवे ॥ ४१

सात्यकिरुवाच ।

न हन्तव्यो न हन्तव्य इति यन्मां प्रभाषथ ।
धर्मवादैरधर्मिष्ठा धर्मकञ्चुकमास्थिताः ॥ ४२
यदा बालः सुभद्रायाः सुतः शस्त्रविनाकृतः ।
युष्माभिर्निहतो युद्धे तदा धर्मः क्व वो गतः ॥४३
मया त्वेतत्प्रतिज्ञातं क्षेपे कस्मिंश्चिदेव हि ।
यो मां निष्पिष्य संग्रामे जीवन्हन्यात्पदा रुषा ।
स मे वध्यो भवेच्छत्रुर्यद्यपि स्यान्मुनिव्रतः ॥ ४४
चेष्टमानं प्रतीघाते सभुजं मां सचक्षुषः ।
मन्यध्वं मृतमित्येवमेतद्वो बुद्धिलाघवम् ।
युक्तो ह्यस्य प्रतीघातः कृतो मे कुरुपुंगवाः ॥ ४५
यत्तु पार्थेन मत्स्नेहात्स्वां प्रतिज्ञां च रक्षता ।
सखड्गोऽस्य हृतो बाहुरेतेनैवास्मि वञ्चितः ॥ ४६
भवितव्यं च यद्भावि दैवं चेष्टयतीव च ।
सोऽयं हतो विमर्देऽस्मिन्किमत्राधर्मचेष्टितम् ॥ ४७
अपि चायं पुरा गीतः श्लोको वाल्मीकिना भुवि ।
पीडाकरममित्राणां यत्स्यात्कर्तव्यमेव तत् ॥ ४८

संजय उवाच ।

एवमुक्ते महाराज सर्वे कौरवपाण्डवाः ।
न स्म किंचिदभाषन्त मनसा समपूजयन् ॥ ४९

मन्त्रैर्हि पूतस्य महाध्वरेषु
यशस्विनो भूरिसहस्रदस्य ।
मुनेरिवारण्यगतस्य तस्य
न तत्र कश्चिद्वधमभ्यनन्दत् ॥ ५०
सुनीलकेशं वरदस्य तस्य
शूरस्य पारावतलोहिताक्षम् ।
अश्वस्य मेध्यस्य शिरो निकृत्तं
न्यस्तं हविर्धानमिवोत्तरेण ॥ ५१
स तेजसा शस्त्रहतेन पूतो
महाहवे देहवरं विसृज्य ।
आक्रामदूर्ध्वं वरदो वरार्हो
व्यावृत्य धर्मेण परेण रोदसी ॥ ५२

इति श्रीमहाभारते द्रोणपर्वणि
अष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥

११९

धृतराष्ट्र उवाच ।

अजितो द्रोणराधेयविकर्णकृतवर्मभिः ।
तीर्णः सैन्यार्णवं वीरः प्रतिश्रुत्य युधिष्ठिरे ॥ १
स कथं कौरवेयेण समरेष्वनिवारितः ।
निगृह्य भूरिश्रवसा बलाद्भुवि निपातितः ॥ २

संजय उवाच ।

शृणु राजन्निहोत्पत्तिं शैनेयस्य यथा पुरा ।
यथा च भूरिश्रवसो यत्र ते संशयो नृप ॥ ३
अत्रेः पुत्रोऽभवत्सोमः सोमस्य तु बुधः स्मृतः ।
बुधस्यासीन्महेन्द्राभः पुत्र एकः पुरूरवाः ॥ ४
पुरूरवस आयुस्तु आयुषो नहुषः स्मृतः ।
नहुषस्य ययातिस्तु राजर्षिर्देवसंमितः ॥ ५
ययातेर्देवयान्यां तु यदुर्ज्येष्ठोऽभवत्सुतः ।
यदोरभूदन्ववाये देवमीढ इति श्रुतः ॥ ६
यादवस्तस्य च सुतः शूरस्त्रैलोक्यसंमतः ।
शूरस्य शौरिर्नृवरो वसुदेवो महायशाः ॥ ७
धनुष्यनवरः शूरः कार्तवीर्यसमो युधि ।
तद्वीर्यश्चापि तत्रैव कुले शिनिरभून्नृपः ॥ ८
एतस्मिन्नेव काले तु देवकस्य महात्मनः ।
दुहितुः स्वयंवरे राजन्सर्वक्षत्रसमागमे ॥ ९
तत्र वै देवकीं देवीं वसुदेवार्थमाप्तवान् ।
निर्जित्य पार्थिवान्सर्वान्रथमारोपयच्छिनिः ॥ १०
तां दृष्ट्वा देवकीं शौरे रथस्थां पुरुषर्षभः ।
नामृष्यत महातेजाः सोमदत्तः शिनेर्नृप ॥ ११
तयोर्युद्धमभूद्राजन्दिनार्धं चित्रमद्भुतम् ।
बाहुयुद्धं सुबलिनोः शक्रप्रह्लादयोरिव ॥ १२
शिनिना सोमदत्तस्तु प्रसह्य भुवि पातितः ।
असिमुद्यम्य केशेषु प्रगृह्य च पदा हतः ॥ १३
मध्ये राजसहस्राणां प्रेक्षकाणां समन्ततः ।
कृपया च पुनस्तेन जीवेति स विसर्जितः ॥ १४
तदवस्थः कृतस्तेन सोमदत्तोऽथ मारिष ।
प्रसादयन्महादेवममर्षवशमास्थितः ॥ १५
तस्य तुष्टो महादेवो वराणां वरदः प्रभुः ।
वरेण छन्दयामास स तु वव्रे वरं नृपः ॥ १६
पुत्रमिच्छामि भगवन्यो निहन्याच्छिनेः सुतम् ।
मध्ये राजसहस्राणां पदा हन्याच्च संयुगे ॥ १७
तस्य तद्वचनं श्रुत्वा सोमदत्तस्य पार्थिव ।
एवमस्त्विति तत्रोक्त्वा स देवोऽन्तरधीयत ॥ १८
स तेन वरदानेन लब्धवान्भूरिदक्षिणम् ।
न्यपातयच्च समरे सौमदत्तिः शिनेः सुतम् ॥ १९
एतत्ते कथितं राजन्यन्मां त्वं परिपृच्छसि ।
न हि शक्या रणे जेतुं सात्वता मनुजर्षभ ॥ २०
लब्धलक्ष्याश्च संग्रामे बहवश्चित्रयोधिनः ।
देवदानवगन्धर्वान्विजेतारो ह्यविस्मिताः ।
स्ववीर्यविजये युक्ता नैते परपरिग्रहाः ॥ २१

न तुल्यं वृष्णिभिरिह दृश्यते किंचन प्रभो ।
भूतं भव्यं भविष्यच्च बलेन भरतर्षभ ॥ २२
ज्ञातिमवमन्यन्ते वृद्धानां शासने रताः ।
न देवासुरगन्धर्वा न यक्षोरगराक्षसाः ।
जेतारो वृष्णिवीराणां न पुनर्मानुषा रणे ॥ २३
ब्रह्मद्रव्ये गुरुद्रव्ये ज्ञातिद्रव्येऽप्यहिंसकाः ।
एतेषां रक्षितारश्च ये स्युः कस्यांचिदापदि ॥ २४
अर्थवन्तो न चोत्सिक्ता ब्रह्मण्याः सत्यवादिनः ।
समर्थान्नावमन्यन्ते दीनानभ्युद्धरन्ति च ॥ २५
नित्यं देवपरा दान्ता दातारश्चाविकत्थनाः ।
तेन वृष्णिप्रवीराणां चक्रं न प्रतिहन्यते ॥ २६
अपि मेरुं वहेत्कश्चित्तरेद्वा मकरालयम् ।
न तु वृष्णिप्रवीराणां समेत्यान्तं व्रजेन्नृप ॥ २७
एतत्ते सर्वमाख्यातं यत्र ते संशयो विभो ।
कुरुराज नरश्रेष्ठ तव ह्यपनयो महान् ॥ २८

इति श्रीमहाभारते द्रोणपर्वणि
एकोनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥

१२०

धृतराष्ट्र उवाच ।

तदवस्थे हते तस्मिन्भूरिश्रवसि कौरवे ।
यथा भूयोऽभवद्युद्धं तन्ममाचक्ष्व संजय ॥ १

संजय उवाच ।

भूरिश्रवसि संक्रान्ते परलोकाय भारत ।
वासुदेवं महाबाहुरर्जुनः समचूचुदत् ॥ २
चोदयाश्वान्भृशं कृष्ण यतो राजा जयद्रथः ।
अस्तमेति महाबाहो त्वरमाणो दिवाकरः ॥ ३
एतद्धि पुरुषव्याघ्र महदभ्युद्यतं मया ।
कार्यं संरक्ष्यते चैष कुरुसेनामहारथैः ॥ ४
नास्तमेति यथा सूर्यो यथा सत्यं भवेद्वचः ।
चोदयाश्वांस्तथा कृष्ण यथा हन्यां जयद्रथम् ॥ ५
ततः कृष्णो महाबाहू रजतप्रतिमान्हयान् ।
हयज्ञश्चोदयामास जयद्रथरथं प्रति ॥ ६
तं प्रयान्तममोघेषुमुत्पतद्भिरिवाशुगैः ।
त्वरमाणा महाराज सेनामुख्याः समाव्रजन् ॥ ७
दुर्योधनश्च कर्णश्च वृषसेनोऽथ मद्रराट् ।
अश्वत्थामा कृपश्चैव स्वयमेव च सैन्धवः ॥ ८
समासाद्य तु बीभत्सुः सैन्धवं प्रमुखे स्थितम् ।
नेत्राभ्यां क्रोधदीप्ताभ्यां संप्रैक्षन्निर्दहन्निव ॥ ९
ततो दुर्योधनो राजा राधेयं त्वरितोऽब्रवीत् ।
अर्जुनं वीक्ष्य संयान्तं जयद्रथरथं प्रति ॥ १०

अयं स वैकर्तन युद्धकालो
विदर्शयस्वात्मबलं महात्मन् ।
यथा न वध्येत रणेऽर्जुनेन
जयद्रथः कर्ण तथा कुरुष्व ॥ ११
अल्पावशिष्टं दिवसं नृवीर
विघातयस्वाद्य रिपुं शरौघैः ।
दिनक्षयं प्राप्य नरप्रवीर
ध्रुवं हि नः कर्ण जयो भविष्यति ॥ १२

सैन्धवे रक्ष्यमाणे तु सूर्यस्यास्तमयं प्रति ।
मिथ्याप्रतिज्ञः कौन्तेयः प्रवेक्ष्यति हुताशनम् ॥ १३
अनर्जुनायां च भुवि मुहूर्तमपि मानद ।
जीवितुं नोत्सहेरन्वै भ्रातरोऽस्य सहानुगाः ॥ १४
विनष्टैः पाण्डवेयैश्च सशैलवनकाननाम् ।
वसुंधरामिमां कर्ण भोक्ष्यामो हतकण्टकाम् ॥ १५
दैवेनोपहतः पार्थो विपरीतश्च मानद ।
कार्याकार्यमजानन्वै प्रतिज्ञां कृतवान्रणे ॥ १६
नूनमात्मविनाशाय पाण्डवेन किरीटिना ।
प्रतिज्ञेयं कृता कर्ण जयद्रथवधं प्रति ॥ १७
कथं जीवति दुर्धर्षे त्वयि राधेय फल्गुनः ।
अनस्तंगत आदित्ये हन्यात्सैन्धवकं नृपम् ॥ १८

रक्षितं मद्रराजेन कृपेण च महात्मना ।
जयद्रथं रणमुखे कथं हन्याद्धनंजयः ॥ १९
द्रौणिना रक्ष्यमाणं च मया दुःशासनेन च ।
कथं प्राप्स्यति बीभत्सुः सैन्धवं कालचोदितः ॥२०
युध्यन्ते बहवः शूरा लम्बते च दिवाकरः ।
शङ्के जयद्रथं पार्थो नैव प्राप्स्यति मानद ॥ २१
स त्वं कर्ण मया सार्धं शूरैश्चान्यैर्महारथैः ।
युध्यस्व यत्नमास्थाय परं पार्थेन संयुगे ॥ २२
एवमुक्तस्तु राधेयस्तव पुत्रेण मारिष ।
दुर्योधनमिदं वाक्यं प्रत्युवाच कुरूत्तमम् ॥ २३
दृढलक्ष्येण शूरेण भीमसेनेन धन्विना ।
भृशमुद्वेजितः संख्ये शरजालैरनेकशः ॥ २४
स्थातव्यमिति तिष्ठामि रणे संप्रति मानद ।
नैवाङ्गमिङ्गति किंचिन्मे संतप्तस्य रणेषुभिः ॥ २५
योत्स्यामि तु तथा राजञ्शक्त्याहं परया रणे ।
यथा पाण्डवमुख्योऽसौ न हनिष्यति सैन्धवम् ॥
न हि मे युध्यमानस्य सायकांश्चास्यतः शितान् ।
सैन्धवं प्राप्स्यते वीरः सव्यसाची धनंजयः ॥ २७
यत्तु शक्तिमता कार्यं सततं हितकारिणा ।
तत्करिष्यामि कौरव्य जयो दैवे प्रतिष्ठितः ॥ २८
अद्य योत्स्येऽर्जुनमहं पौरुषं स्वं व्यपाश्रितः ।
त्वदर्थं पुरुषव्याघ्र जयो दैवे प्रतिष्ठितः ॥ २९
अद्य युद्धं कुरुश्रेष्ठ मम पार्थस्य चोभयोः ।
पश्यन्तु सर्वभूतानि दारुणं लोमहर्षणम् ॥ ३०
कर्णकौरवयोरेवं रणे संभाषमाणयोः ।
अर्जुनो निशितैर्बाणैर्जघान तव वाहिनीम् ॥ ३१
चिच्छेद तीक्ष्णाग्रमुखैः शूराणामनिवर्तिनाम् ।
भुजान्परिघसंकाशान्हस्तिहस्तोपमान्रणे ॥ ३२
शिरांसि च महाबाहुश्चिच्छेद निशितैः शरैः ।
हस्तिहस्तान्हयग्रीवा रथाक्षांश्च समन्ततः ॥ ३३
शोणिताक्तान्हयारोहान्गृहीतप्रासतोमरान् ।
क्षुरैश्चिच्छेद बीभत्सुर्द्विधैकैकं त्रिधैव च ॥ ३४
हयवारणमुख्याश्च प्रापतन्त सहस्रशः ।
ध्वजाश्छत्राणि चापानि चामराणि शिरांसि च ॥
कक्षमग्निरिवोद्भूतः प्रदहंस्तव वाहिनीम् ।
अचिरेण महीं पार्थश्चकार रुधिरोत्तराम् ॥ ३६
हतभूयिष्ठयोधं तत्कृत्वा तव बलं बली ।
आससाद दुराधर्षः सैन्धवं सत्यविक्रमः ॥ ३७
बीभत्सुर्भीमसेनेन सात्वतेन च रक्षितः ।
स बभौ भरतश्रेष्ठ ज्वलन्निव हुताशनः ॥ ३८
तं तथावस्थितं दृष्ट्वा त्वदीया वीर्यसंमताः ।
नामृष्यन्त महेष्वासाः फल्गुनं पुरुषर्षभाः ॥ ३९
दुर्योधनश्च कर्णश्च वृषसेनोऽथ मद्रराट् ।
अश्वत्थामा कृपश्चैव स्वयमेव च सैन्धवः ॥ ४०
संरब्धाः सैन्धवस्यार्थे समावृण्वन्किरीटिनम् ।
नृत्यन्तं रथमार्गेषु धनुर्ज्यातलनिस्वनैः ॥ ४१
संग्रामकोविदं पार्थं सर्वे युद्धविशारदाः ।
अभीताः पर्यवर्तन्त व्यादितास्यमिवान्तकम् ॥ ४२
सैन्धवं पृष्ठतः कृत्वा जिघांसन्तोऽर्जुनाच्युतौ ।
सूर्यास्तमयमिच्छन्तो लोहितायति भास्करे ॥ ४३
ते भुजैर्भोगिभोगाभैर्धनूंष्यायम्य सायकान् ।
मुमुचुः सूर्यरश्म्याभाञ्शतशः फल्गुनं प्रति ॥ ४४
तानस्तानस्यमानांश्च किरीटी युद्धदुर्मदः ।
द्विधा त्रिधाष्टधैकैकं छित्त्वा विव्याध तान्रणे ॥४५
सिंहलाङ्गूलकेतुस्तु दर्शयञ्शक्तिमात्मनः ।
शारद्वतीसुतो राजन्नर्जुनं प्रत्यवारयत् ॥ ४६
स विद्ध्वा दशभिः पार्थं वासुदेवं च सप्तभिः ।
अतिष्ठद्रथमार्गेषु सैन्धवं परिपालयन् ॥ ४७
अथैनं कौरवश्रेष्ठाः सर्व एव महारथाः ।
महता रथवंशेन सर्वतः पर्यवारयन् ॥ ४८

विस्फारयन्तश्चापानि विसृजन्तश्च सायकान् ।
सैन्धवं पर्यरक्षन्त शासनात्तनयस्य ते ॥ ४९
तत्र पार्थस्य शूरस्य बाह्वोर्बलमदृश्यत ।
इषूणामक्षयत्वं च धनुषो गाण्डिवस्य च ॥ ५०
अस्त्रैरस्त्राणि संवार्य द्रौणेः शारद्वतस्य च ।
एकैकं नवभिर्बाणैः सर्वानेव समर्पयत् ॥ ५१
तं द्रौणिः पञ्चविंशत्या वृषसेनश्च सप्तभिः ।
दुर्योधनश्च विंशत्या कर्णशल्यौ त्रिभिस्त्रिभिः ॥५२
त एनमभिगर्जन्तो विध्यन्तश्च पुनः पुनः ।
विधुन्वन्तश्च चापानि सर्वतः पर्यवारयन् ॥ ५३
श्लिष्टं तु सर्वतश्चक्रू रथमण्डलमाशु ते ।
सूर्यास्तमयमिच्छन्तस्त्वरमाणा महारथाः ॥ ५४
त एनमभिनर्दन्तो विधुन्वाना धनूंषि च ।
सिषिचुर्मार्गणैर्घोरैर्गिरिं मेघा इवाम्बुभिः ॥ ५५
ते महास्त्राणि दिव्यानि तत्र राजन्व्यदर्शयन् ।
धनंजयस्य गात्रेषु शूराः परिघबाहवः ॥ ५६
हतभूयिष्ठयोधं तत्कृत्वा तव बलं बली ।
आससाद दुराधर्षः सैन्धवं सत्यविक्रमः ॥ ५७
तं कर्णः संयुगे राजन्प्रत्यवारयदाशुगैः ।
मिषतो भीमसेनस्य सात्वतस्य च भारत ॥ ५८
तं पार्थो दशभिर्बाणैः प्रत्यविध्यद्रणाजिरे ।
सूतपुत्रं महाबाहुः सर्वसैन्यस्य पश्यतः ॥ ५९
सात्वतश्च त्रिभिर्बाणैः कर्णं विव्याध मारिष ।
भीमसेनस्त्रिभिश्चैव पुनः पार्थश्च सप्तभिः ॥ ६०
तान्कर्णः प्रतिविव्याध षष्ट्या षष्ट्या महारथः ।
तद्युद्धमभवद्राजन्कर्णस्य बहुभिः सह ॥ ६१
तत्राद्भुतमपश्याम सूतपुत्रस्य मारिष ।
यदेकः समरे क्रुद्धस्त्रीन्रथान्पर्यवारयत् ॥ ६२
फल्गुनस्तु महाबाहुः कर्णं वैकर्तनं रणे ।
सायकानां शतेनैव सर्वमर्मस्वताडयत् ॥ ६३
रुधिरोक्षितसर्वाङ्गः सूतपुत्रः प्रतापवान् ।
शरैः पञ्चाशता वीरः फल्गुनं प्रत्यविध्यत ।
तस्य तल्लाघवं दृष्ट्वा नामृष्यत रणेऽर्जुनः ॥ ६४
ततः पार्थो धनुश्छित्त्वा विव्याधैनं स्तनान्तरे ।
सायकैर्नवभिर्वीरस्त्वरमाणो धनंजयः ॥ ६५
वधार्थं चास्य समरे सायकं सूर्यवर्चसम् ।
चिक्षेप त्वरया युक्तस्त्वराकाले धनंजयः ॥ ६६
तमापतन्तं वेगेन द्रौणिश्चिच्छेद सायकम् ।
अर्धचन्द्रेण तीक्ष्णेन स छिन्नः प्रापतद्भुवि ॥ ६७
अथान्यद्धनुरादाय सूतपुत्रः प्रतापवान् ।
कर्णोऽपि द्विषतां हन्ता छादयामास फल्गुनम् ।
सायकैर्बहुसाहस्रैः कृतप्रतिकृतेप्सया ॥ ६८
तौ वृषाविव नर्दन्तौ नरसिंहौ महारथौ ।
सायकौघप्रतिच्छन्नं चक्रतुः खमजिह्मगैः ।
अदृश्यौ च शरौघैस्तौ निघ्नतामितरेतरम् ॥ ६९
पार्थोऽहमस्मि तिष्ठ त्वं कर्णोऽहं तिष्ठ फल्गुन ।
इत्येवं तर्जयन्तौ तौ वाक्शल्यैस्तुदतां तथा ॥ ७०
युध्येतां समरे वीरौ चित्रं लघु च सुष्ठु च ।
प्रेक्षणीयौ चाभवतां सर्वयोधसमागमे ॥ ७१
प्रशस्यमानौ समरे सिद्धचारणवातिकैः ।
अयुध्येतां महाराज परस्परवधैषिणौ ॥ ७२
ततो दुर्योधनो राजंस्तावकानभ्यभाषत ।
यत्ता रक्षत राधेयं नाहत्वा समरेऽर्जुनम् ।
निवर्तिष्यति राधेय इति मामुक्तवान्वृषः ॥ ७३
एतस्मिन्नन्तरे राजन्दृष्ट्वा कर्णस्य विक्रमम् ।
आकर्णमुक्तैरिषुभिः कर्णस्य चतुरो हयान् ।
अनयन्मृत्युलोकाय चतुर्भिः सायकोत्तमैः ॥ ७४
सारथिं चास्य भल्लेन रथनीडादपाहरत् ।
छादयामास च शरैस्तव पुत्रस्य पश्यतः ॥ ७५
स छाद्यमानः समरे हताश्वो हतसारथिः ।

मोहितः शरजालेन कर्तव्यं नाभ्यपद्यत ॥ ७६
तं तथा विरथं दृष्ट्वा रथमारोप्य स्वं तदा ।
अश्वत्थामा महाराज भूयोऽर्जुनमयोधयत् ॥ ७७
मद्रराजस्तु कौन्तेयमविध्यत्त्रिंशता शरैः ।
शारद्वतस्तु विंशत्या वासुदेवं समार्पयत् ।
धनंजयं द्वादशभिराजघान शिलीमुखैः ॥ ७८
चतुर्भिः सिन्धुराजश्च वृषसेनश्च सप्तभिः ।
पृथक्पृथङ्महाराज कृष्णपार्थावविध्यताम् ॥ ७९
तथैव तान्प्रत्यविध्यत्कुन्तीपुत्रो धनंजयः ।
द्रोणपुत्रं चतुःषष्ट्या मद्रराजं शतेन च ॥ ८०
सैन्धवं दशभिर्भल्लैर्वृषसेनं त्रिभिः शरैः ।
शारद्वतं च विंशत्या विद्ध्वा पार्थः समुन्नदत् ॥ ८१
ते प्रतिज्ञाप्रतीघातमिच्छन्तः सव्यसाचिनः ।
सहितास्तावकास्तूर्णमभिपेतुर्धनंजयम् ॥ ८२
अथार्जुनः सर्वतोधारमस्त्रं
प्रादुश्चक्रे त्रासयन्धार्तराष्ट्रान् ।
तं प्रत्युदीयुः कुरवः पाण्डुसूनुं
रथैर्महार्हैः शरवर्षाण्यवर्षन् ॥ ८३
ततस्तु तस्मिंस्तुमुले समुत्थिते
सुदारुणे भारत मोहनीये ।
नामुह्यत प्राप्य स राजपुत्रः
किरीटमाली विसृजन्पृषत्कान् ॥ ८४
राज्यप्रेप्सुः सव्यसाची कुरूणां
स्मरन्क्लेशान्द्वादशवर्षवृत्तान् ।
गाण्डीवमुक्तैरिषुभिर्महात्मा
सर्वा दिशो व्यावृणोदप्रमेयैः ॥ ८५
प्रदीप्तोल्कमभवच्चान्तरिक्षं
देहेषु भूरीण्यपतन्वयांसि ।
यत्पिङ्गलज्येन किरीटमाली
क्रुद्धो रिपूनाजगवेन हन्ति ॥ ८६
किरीटमाली महता महायशाः
शरासनेनास्य शराननीकजित् ।
हयप्रवेकोत्तमनागधूर्गता-
न्कुरुप्रवीरानिषुभिर्न्यपातयत् ॥ ८७
गदाश्च गुर्वीः परिघानयस्मया-
नसींश्च शक्तीश्च रणे नराधिपाः ।
महान्ति शस्त्राणि च भीमदर्शना
प्रगृह्य पार्थं सहसाभिदुद्रुवुः ॥ ८८
स तानुदीर्णान्सरथाश्ववारणा-
न्पदातिसंघांश्च महाधनुर्धरः ।
विपन्नसर्वायुधजीवितान्रणे
चकार वीरो यमराष्ट्रवर्धनान् ॥ ८९

इति श्रीमहाभारते द्रोणपर्वणि
विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥

१२१

संजय उवाच ।

स रणे व्यचरत्पार्थः प्रेक्षणीयो धनंजयः ।
युगपद्दिक्षु सर्वासु चित्राण्यस्त्राणि दर्शयन् ॥ १
मध्यंदिनगतं सूर्यं प्रतपन्तमिवाम्बरे ।
न शेकुः सर्वभूतानि पाण्डवं प्रतिवीक्षितुम् ॥ २
प्रसृतांस्तस्य गाण्डीवाच्छरव्रातान्महात्मनः ।
संग्रामे समपश्याम हंसपङ्क्तीरिवाम्बरे ॥ ३
विनिवार्य स वीराणामस्त्रैरस्त्राणि सर्वशः ।
दर्शयन्रौद्रमात्मानमुग्रे कर्मणि धिष्ठितः ॥ ४
स तान्रथवरान्राजन्नभ्यतिक्रामदर्जुनः ।
मोहयन्निव नाराचैर्जयद्रथवधेप्सया ॥ ५
विसृजन्दिक्षु सर्वासु शरानसितसारथिः ।
स रणे व्यचरत्तूर्णं प्रेक्षणीयो धनंजयः ॥ ६
भ्रमन्त इव शूरस्य शरव्राता महात्मनः ।
अदृश्यन्तान्तरिक्षस्थाः शतशोऽथ सहस्रशः ॥ ७

आददानं महेष्वासं संदधानं च पाण्डवम् ।
विसृजन्तं च कौन्तेयं नानुपश्यामहे तदा ॥ ८
तथा सर्वा दिशो राजन्सर्वांश्च रथिनो रणे ।
आकुलीकृत्य कौन्तेयो जयद्रथमुपाद्रवत् ।
विव्याध च चतुःषष्ट्या शराणां नतपर्वणाम् ॥ ९
सैन्धवस्तु तथा विद्धः शरैर्गाण्डीवधन्वना ।
न चक्षमे सुसंक्रुद्धस्तोत्रार्दित इव द्विपः ॥ १०
स वराहध्वजस्तूर्णं गार्ध्रपत्रानजिह्मगान् ।
आशीविषसमप्रख्यान्कर्मारपरिमार्जितान् ।
मुमोच निशितान्संख्ये सायकान्सव्यसाचिनि ॥ ११
त्रिभिस्तु विद्ध्वा गाण्डीवं नाराचैः षड्भिरर्जुनम् ।
अष्टाभिर्वाजिनोऽविध्यद्ध्वजं चैकेन पत्रिणा ॥ १२
स विक्षिप्यार्जुनस्तीक्ष्णान्सैन्धवप्रेषिताञ्शरान् ।
युगपत्तस्य चिच्छेद शराभ्यां सैन्धवस्य ह ।
सारथेश्च शिरः कायाद्ध्वजं च समलंकृतम् ॥ १३
स छिन्नयष्टिः सुमहाञ्शीर्यमाणः शराहतः ।
वराहः सिन्धुराजस्य पपाताग्निशिखोपमः ॥ १४
एतस्मिन्नेव काले तु द्रुतं गच्छति भास्करे ।
अब्रवीत्पाण्डवं तत्र त्वरमाणो जनार्दनः ॥ १५
धनंजय शिरश्छिन्धि सैन्धवस्य दुरात्मनः ।
अस्तं महीधरश्रेष्ठं यियासति दिवाकरः ।
शृणुष्वैव च मे वाक्यं जयद्रथवधं प्रति ॥ १६
वृद्धक्षत्रः सैन्धवस्य पिता जगति विश्रुतः ।
स कालेनेह महता सैन्धवं प्राप्तवान्सुतम् ॥ १७
जयद्रथममित्रघ्नं तं चोवाच ततो नृपम् ।
अन्तर्हिता तदा वाणी मेघदुन्दुभिनिस्वना ॥ १८
तवात्मजोऽयं मर्त्येषु कुलशीलदमादिभिः ।
गुणैर्भविष्यति विभो सदृशो वंशयोर्द्वयोः ।
क्षत्रियप्रवरो लोके नित्यं शूराभिसत्कृतः ॥ १९
शत्रुभिर्युध्यमानस्य संग्रामे त्वस्य धन्विनः ।
शिरश्छेत्स्यति संक्रुद्धः शत्रुर्नालक्षितो भुवि ॥ २०
एतच्छ्रुत्वा सिन्धुराजो ध्यात्वा चिरमरिंदम ।
ज्ञातीन्सर्वानुवाचेदं पुत्रस्नेहाभिपीडितः ॥ २१
संग्रामे युध्यमानस्य वहतो महतीं धुरम् ।
धरण्यां मम पुत्रस्य पातयिष्यति यः शिरः ।
तस्यापि शतधा मूर्धा फलिष्यति न संशयः ॥२२
एवमुक्त्वा ततो राज्ये स्थापयित्वा जयद्रथम् ।
वृद्धक्षत्रो वनं यातस्तपश्चेष्टं समास्थितः ॥ २३
सोऽयं तप्यति तेजस्वी तपो घोरं दुरासदम् ।
समन्तपञ्चकादस्माद्बहिर्वानरकेतन ॥ २४
तस्माज्जयद्रथस्य त्वं शिरश्छित्त्वा महामृधे ।
दिव्येनास्त्रेण रिपुहन्घोरेणाद्भुतकर्मणा ॥ २५
सकुण्डलं सिन्धुपतेः प्रभञ्जनसुतानुज ।
उत्सङ्गे पातयस्वाशु वृद्धक्षत्रस्य भारत ॥ २६
अथ त्वमस्य मूर्धानं पातयिष्यसि भूतले ।
तवापि शतधा मूर्धा फलिष्यति न संशयः ॥ २७
यथा चैतन्न जानीयात्स राजा पृथिवीपतिः ।
तथा कुरु कुरुश्रेष्ठ दिव्यमस्त्रमुपाश्रितः ॥ २८
न ह्यसाध्यमकार्यं वा विद्यते तव किंचन ।
समस्तेष्वपि लोकेषु त्रिषु वासवनन्दन ॥ २९
एतच्छ्रुत्वा तु वचनं सृक्किणी परिसंलिहन् ।
इन्द्राशनिसमस्पर्शं दिव्यमन्त्राभिमन्त्रितम् ॥ ३०
सर्वभारसहं शश्वद्गन्धमाल्यार्चितं शरम् ।
विससर्जार्जुनस्तूर्णं सैन्धवस्य वधे वृतः ॥ ३१
स तु गाण्डीवनिर्मुक्तः शरः श्येन इवाशुगः ।
शकुन्तमिव वृक्षाग्रात्सैन्धवस्य शिरोऽहरत् ॥ ३२
अहरत्तत्पुनश्चैव शरैरूर्ध्वं धनंजयः ।
दुर्हृदामप्रहर्षाय सुहृदां हर्षणाय च ॥ ३३
शरैः कदम्बकीकृत्य काले तस्मिंश्च पाण्डवः ।
समन्तपञ्चकाद्बाह्यं शिरस्तद्व्याहरत्ततः ॥ ३४

एतस्मिन्नेव काले तु वृद्धक्षत्रो महीपतिः ।
संध्यामुपास्ते तेजस्वी संबन्धी तव मारिष ॥ ३५
उपासीनस्य तस्याथ कृष्णकेशं सकुण्डलम् ।
सिन्धुराजस्य मूर्धानमुत्सङ्गे समपातयत् ॥ ३६
तस्योत्सङ्गे निपतितं शिरस्तच्चारुकुण्डलम् ।
वृद्धक्षत्रस्य नृपतेरलक्षितमरिंदम ॥ ३७
कृतजप्यस्य तस्याथ वृद्धक्षत्रस्य धीमतः ।
उत्तिष्ठतस्तत्सहसा शिरोऽगच्छद्धरातलम् ॥ ३८
ततस्तस्य नरेन्द्रस्य पुत्रमूर्धनि भूतलम् ।
गते तस्यापि शतधा मूर्धागच्छदरिंदम ॥ ३९
ततः सर्वाणि भूतानि विस्मयं जग्मुरुत्तमम् ।
वासुदेवश्च बीभत्सुं प्रशशंस महारथम् ॥ ४०
ततो दृष्ट्वा विनिहतं सिन्धुराजं जयद्रथम् ।
पुत्राणां तव नेत्रेभ्यो दुःखाद्बाष्पमपतज्जलम् ॥ ४१
भीमसेनोऽपि संग्रामे बोधयन्निव पाण्डवम् ।
सिंहनादेन महता पूरयामास रोदसी ॥ ४२
तं श्रुत्वा तु महानादं धर्मपुत्रो युधिष्ठिरः ।
सैन्धवं निहतं मेने फल्गुनेन महात्मना ॥ ४३
ततो वादित्रघोषेण स्वान्योधानभिहर्षयन् ।
अभ्यवर्तत संग्रामे भारद्वाजं युयुत्सया ॥ ४४
ततः प्रववृते राजन्नस्तं गच्छति भास्करे ।
द्रोणस्य सोमकैः सार्धं संग्रामो लोमहर्षणः ॥ ४५
ते तु सर्वप्रयत्नेन भारद्वाजं जिघांसवः ।
सैन्धवे निहते राजन्नयुध्यन्त महारथाः ॥ ४६
पाण्डवास्तु जयं लब्ध्वा सैन्धवं विनिहत्य च ।
अयोधयंस्ततो द्रोणं जयोन्मत्तास्ततस्ततः ॥ ४७
अर्जुनोऽपि रणे योधांस्तावकान्रथसत्तमान् ।
अयोधयन्महाराज हत्वा सैन्धवकं नृपम् ॥ ४८
स देवशत्रूनिव देवराजः
किरीटमाली व्यधमत्समन्तात् ।
यथा तमांस्यभ्युदितस्तमोघ्नः
पूर्वां प्रतिज्ञां समवाप्य वीरः ॥ ४९

इति श्रीमहाभारते द्रोणपर्वणि
एकविंशत्यधिकशततमोऽध्यायः ॥ १२१ ॥

॥ समाप्तं जयद्रथवधपर्व ॥

१२२

धृतराष्ट्र उवाच ।

तस्मिन्विनिहते वीरे सैन्धवे सव्यसाचिना ।
मामका यदकुर्वन्त तन्ममाचक्ष्व संजय ॥ १

संजय उवाच ।

सैन्धवं निहतं दृष्ट्वा रणे पार्थेन मारिष ।
अमर्षवशमापन्नः कृपः शारद्वतस्तदा ॥ २
महता शरवर्षेण पाण्डवं समवाकिरत् ।
द्रौणिश्चाभ्यद्रवत्पार्थं रथमास्थाय फल्गुनम् ॥ ३
तावेनं रथिनां श्रेष्ठौ रथाभ्यां रथसत्तमम् ।
उभावुभयतस्तीक्ष्णैर्विशिखैरभ्यवर्षताम् ॥ ४
स तथा शरवर्षाभ्यां सुमहद्भ्यां महाभुजः ।
पीड्यमानः परामार्तिमगमद्रथिनां वरः ॥ ५
सोऽजिघांसुर्गुरुं संख्ये गुरोस्तनयमेव च ।
चकाराचार्यकं तत्र कुन्तीपुत्रो धनंजयः ॥ ६
अस्त्रैरस्त्राणि संवार्य द्रौणेः शारद्वतस्य च ।
मन्दवेगानिषूंस्ताभ्यामजिघांसुरवासृजत् ॥ ७
ते नातिभृशमभ्यघ्नन्विशिखा जयचोदिताः ।
बहुत्वात्तु परामार्तिं शराणां तावगच्छताम् ॥ ८
अथ शारद्वतो राजन्कौन्तेयशरपीडितः ।
अवासीदद्रथोपस्थे मूर्छामभिजगाम ह ॥ ९
विह्वलं तमभिज्ञाय भर्तारं शरपीडितम् ।
हतोऽयमिति च ज्ञात्वा सारथिस्तमपावहत् ॥ १०
तस्मिन्सन्ने महाराज कृपे शारद्वते युधि ।
अश्वत्थामाप्यपायासीत्पाण्डवेयाद्रथान्तरम् ॥ ११

दृष्ट्वा शारद्वतं पार्थो मूर्छितं शरपीडितम् ।
रथ एव महेष्वासः कृपणं पर्यदेवयत् ॥ १२
पश्यन्निदं महाप्राज्ञः क्षत्ता राजानमुक्तवान् ।
कुलान्तकरणे पापे जातमात्रे सुयोधने ॥ १३
नीयतां परलोकाय साध्वयं कुलपांसनः ।
अस्माद्धि कुरुमुख्यानां महदुत्पत्स्यते भयम् ॥ १४
तदिदं समनुप्राप्तं वचनं सत्यवादिनः ।
तत्कृते ह्यद्य पश्यामि शरतल्पगतं कृपम् ॥ १५
धिगस्तु क्षात्रमाचारं धिगस्तु बलपौरुषम् ।
को हि ब्राह्मणमाचार्यमभिद्रुह्येत मादृशः ॥ १६
ऋषिपुत्रो ममाचार्यो द्रोणस्य दयितः सखा ।
एष शेते रथोपस्थे मद्बाणैरभिपीडितः ॥ १७
अकामयानेन मया विशिखैरर्दितो भृशम् ।
अवासीदद्रथोपस्थे प्राणान्पीडयतीव मे ॥ १८
शरार्दितेन हि मया प्रेक्षणीयो महाद्युतिः ।
प्रत्यस्तो बहुभिर्बाणैर्दशधर्मगतेन वै ॥ १९
शोचयत्येष निपतन्भूयः पुत्रवधाद्धि माम् ।
कृपणं स्वरथे सन्नं पश्य कृष्ण यथा गतम् ॥ २०
उपाकृत्य तु वै विद्यामाचार्येभ्यो नरर्षभाः ।
प्रयच्छन्तीह ये कामान्देवत्वमुपयान्ति ते ॥ २१
ये तु विद्यामुपादाय गुरुभ्यः पुरुषाधमाः ।
घ्नन्ति तानेव दुर्वृत्तास्ते वै निरयगामिनः ॥ २२
तदिदं नरकायाद्य कृतं कर्म मया ध्रुवम् ।
आचार्यं शरवर्षेण रथे सादयता कृपम् ॥ २३
यत्तत्पूर्वमुपाकुर्वन्नस्त्रं मामब्रवीत्कृपः ।
न कथंचन कौरव्य प्रहर्तव्यं गुराविति ॥ २४
तदिदं वचनं साधोराचार्यस्य महात्मनः ।
नानुष्ठितं तमेवाजौ विशिखैरभिवर्षता ॥ २५
नमस्तस्मै सुपूज्याय गौतमायापलायिने ।
धिगस्तु मम वार्ष्णेय यो ह्यस्मै प्रहराम्यहम् ॥ २६
तथा विलपमाने तु सव्यसाचिनि तं प्रति ।
सैन्धवं निहतं दृष्ट्वा राधेयः समुपाद्रवत् ॥ २७
उपायान्तं तु राधेयं दृष्ट्वा पार्थो महारथः ।
प्रहसन्देवकीपुत्रमिदं वचनमब्रवीत् ॥ २८
एष प्रयात्याधिरथिः सात्यकेः स्यन्दनं प्रति ।
न मृष्यति हतं नूनं भूरिश्रवसमाहवे ॥ २९
यत्र यात्येष तत्र त्वं चोदयाश्वाञ्जनार्दन ।
मा सोमदत्तेः पदवीं गमयेत्सात्यकिं वृषः ॥ ३०
एवमुक्तो महाबाहुः केशवः सव्यसाचिना ।
प्रत्युवाच महातेजाः कालयुक्तमिदं वचः ॥ ३१
अलमेष महाबाहुः कर्णायैको हि पाण्डव ।
किं पुनर्द्रौपदेयाभ्यां सहितः सात्वतर्षभः ॥ ३२
न च तावत्क्षमः पार्थ कर्णेन तव संगरः ।
प्रज्वलन्ती महोल्केव तिष्ठत्यस्य हि वासवी ।
त्वदर्थं पूज्यमानैषा रक्ष्यते परवीरहन् ॥ ३३
अतः कर्णः प्रयात्वत्र सात्वतस्य यथा तथा ।
अहं ज्ञास्यामि कौरव्य कालमस्य दुरात्मनः ॥ ३४

धृतराष्ट्र उवाच ।

योऽसौ कर्णेन वीरेण वार्ष्णेयस्य समागमः ।
हते तु भूरिश्रवसि सैन्धवे च निपातिते ॥ ३५
सात्यकिश्चापि विरथः कं समारूढवान्रथम् ।
चक्ररक्षौ च पाञ्चाल्यौ तन्ममाचक्ष्व संजय ॥ ३६

संजय उवाच ।

हन्त ते वर्णयिष्यामि यथावृत्तं महारणे ।
शुश्रूषस्व स्थिरो भूत्वा दुराचरितमात्मनः ॥ ३७
पूर्वमेव हि कृष्णस्य मनोगतमिदं प्रभो ।
विजेतव्यो यथा वीरः सात्यकिर्यूपकेतुना ॥ ३८
अतीतानागतं राजन्स हि वेत्ति जनार्दनः ।
अतः सूतं समाहूय दारुकं संदिदेश ह ।
रथो मे युज्यतां काल्यमिति राजन्महाबलः ॥ ३९

न हि देवा न गन्धर्वा न यक्षोरगराक्षसाः ।
मानवा वा विजेतारः कृष्णयोः सन्ति केचन ॥ ४०
पितामहपुरोगाश्च देवाः सिद्धाश्च तं विदुः ।
तयोः प्रभावमतुलं शृणु युद्धं च तद्यथा ॥ ४१
सात्यकिं विरथं दृष्ट्वा कर्णं चाभ्युद्यतायुधम् ।
दध्मौ शङ्खं महावेगमार्षभेणाथ माधवः ॥ ४२
दारुकोऽवेत्य संदेशं श्रुत्वा शङ्खस्य च स्वनम् ।
रथमन्वानयत्तस्मै सुपर्णोच्छ्रितकेतनम् ॥ ४३
स केशवस्यानुमते रथं दारुकसंयुतम् ।
आरुरोह शिनेः पौत्रो ज्वलनादित्यसंनिभम् ॥ ४४
कामगैः सैन्यसुग्रीवमेघपुष्पबलाहकैः ।
हयोदग्रैर्महावेगैर्हेमभाण्डविभूषितैः ॥ ४५
युक्तं समारुह्य च तं विमानप्रतिमं रथम् ।
अभ्यद्रवत राधेयं प्रवपन्सायकान्बहून् ॥ ४६
चक्ररक्षावपि तदा युधामन्यूत्तमौजसौ ।
धनंजयरथं हित्वा राधेयं प्रत्युदीययुः ॥ ४७
राधेयोऽपि महाराज शरवर्षं समुत्सृजन् ।
अभ्यद्रवत्सुसंक्रुद्धो रणे शैनेयमच्युतम् ॥ ४८
नैव दैवं न गान्धर्वं नासुरोरगराक्षसम् ।
तादृशं भुवि वा युद्धं दिवि वा श्रुतमित्युत ॥ ४९
उपारमत तत्सैन्यं सरथाश्वनरद्विपम् ।
तयोर्दृष्ट्वा महाराज कर्म संमूढचेतनम् ॥ ५०
सर्वे च समपश्यन्त तद्युद्धमतिमानुषम् ।
तयोर्नृवरयो राजन्सारथ्यं दारुकस्य च ॥ ५१
गतप्रत्यागतावृत्तैर्मण्डलैः संनिवर्तनैः ।
सारथेस्तु रथस्थस्य काश्यपेयस्य विस्मिताः ॥ ५२
नभस्तलगताश्चैव देवगन्धर्वदानवाः ।
अतीवावहिता द्रष्टुं कर्णशैनेययो रणम् ॥ ५३
मित्रार्थे तौ पराक्रान्तौ स्पर्धिनौ शुष्मिणौ रणे ।
कर्णश्चामरसंकाशो युयुधानश्च सात्यकिः ॥ ५४
अन्योन्यं तौ महाराज शरवर्षैरवर्षताम् ।
प्रममाथ शिनेः पौत्रं कर्णः सायकवृष्टिभिः ॥ ५५
अमृष्यमाणो निधनं कौरव्यजलसंधयोः ।
कर्णः शोकसमाविष्टो महोरग इव श्वसन् ॥ ५६
स शैनेयं रणे क्रुद्धः प्रदहन्निव चक्षुषा ।
अभ्यद्रवत वेगेन पुनः पुनररिंदमः ॥ ५७
तं तु संप्रेक्ष्य संक्रुद्धं सात्यकिः प्रत्यविध्यत ।
महता शरवर्षेण गजः प्रतिगजं यथा ॥ ५८
तौ समेत्य नरव्याघ्रौ व्याघ्राविव तरस्विनौ ।
अन्योन्यं संततक्षाते रणेऽनुपमविक्रमौ ॥ ५९
ततः कर्णं शिनेः पौत्रः सर्वपारशवैः शरैः ।
बिभेद सर्वगात्रेषु पुनः पुनररिंदमः ॥ ६०
सारथिं चास्य भल्लेन रथनीडादपाहरत् ।
अश्वांश्च चतुरः श्वेतान्निजघ्ने निशितैः शरैः ॥ ६१
छित्त्वा ध्वजं शतेनैव शतधा पुरुषर्षभः ।
चकार विरथं कर्णं तव पुत्रस्य पश्यतः ॥ ६२
ततो विमनसो राजंस्तावकाः पुरुषर्षभाः ।
वृषसेनः कर्णसुतः शल्यो मद्राधिपस्तथा ॥ ६३
द्रोणपुत्रश्च शैनेयं सर्वतः पर्यवारयन् ।
ततः पर्याकुलं सर्वं न प्राज्ञायत किंचन ॥ ६४
तथा सात्यकिना वीरे विरथे सूतजे कृते ।
हाहाकारस्ततो राजन्सर्वसैन्येषु चाभवत् ॥ ६५
कर्णोऽपि विह्वलो राजन्सात्वतेनार्दितः शरैः ।
दुर्योधनरथं राजन्नारुरोह विनिःश्वसन् ॥ ६६
मानयंस्तव पुत्रस्य बाल्यात्प्रभृति सौहृदम् ।
कृतां राज्यप्रदानेन प्रतिज्ञां परिपालयन् ॥ ६७
तथा तु विरथे कर्णे पुत्रान्वै तव पार्थिव ।
दुःशासनमुखाञ्शूरान्नावधीत्सात्यकिर्वशी ॥ ६८
रक्षन्प्रतिज्ञां च पुनर्भीमसेनकृतां पुरा ।
विरथान्विह्वलांश्चक्रे न तु प्राणैर्व्ययोजयत् ॥ ६९

भीमसेनेन तु वधः पुत्राणां ते प्रतिश्रुतः ।
पुनर्द्यूते च पार्थेन वधः कर्णस्य संश्रुतः ॥ ७०
वधे त्वकुर्वन्यत्नं ते तस्य कर्णमुखास्तदा ।
नाशक्नुवंश्च तं हन्तुं सात्यकिं प्रवरा रथाः ॥ ७१
द्रौणिश्च कृतवर्मा च तथैवान्ये महारथाः ।
निर्जिता धनुषैकेन शतशः क्षत्रियर्षभाः ।
काङ्क्षता परलोकं च धर्मराजस्य च प्रियम् ॥ ७२
कृष्णयोः सदृशो वीर्ये सात्यकिः शत्रुकर्शनः ।
कृष्णो वापि भवेल्लोके पार्थो वापि धनुर्धरः ।
शैनेयो वा नरव्याघ्रश्चतुर्थो नोपलभ्यते ॥ ७३

धृतराष्ट्र उवाच ।

अजय्यं रथमास्थाय वासुदेवस्य सात्यकिः ।
विरथं कृतवान्कर्णं वासुदेवसमो युवा ॥ ७४
दारुकेण समायुक्तं स्वबाहुबलदर्पितः ।
कच्चिदन्यं समारूढः स रथं सात्यकिः पुनः ॥ ७५
एतदिच्छाम्यहं श्रोतुं कुशलो ह्यसि भाषितुम् ।
असह्यं तमहं मन्ये तन्ममाचक्ष्व संजय ॥ ७६

संजय उवाच ।

शृणु राजन्यथा तस्य रथमन्यं महामतिः ।
दारुकस्यानुजस्तूर्णं कल्पनाविधिकल्पितम् ॥ ७७
आयसैः काञ्चनैश्चापि पट्टैर्नद्धं सकूबरम् ।
तारासहस्रखचितं सिंहध्वजपताकिनम् ॥ ७८
अश्वैर्वातजवैर्युक्तं हेमभाण्डपरिच्छदैः ।
पाण्डुरैरिन्दुसंकाशैः सर्वशब्दातिगैर्दृढैः ॥ ७९
चित्रकाञ्चनसंनाहैर्वाजिमुख्यैर्विशां पते ।
घण्टाजालाकुलरवं शक्तितोमरविद्युतम् ॥ ८०
वृतं सांग्रामिकैर्द्रव्यैर्बहुशस्त्रपरिच्छदम् ।
रथं संपादयामास मेघगम्भीरनिस्वनम् ॥ ८१
तं समारुह्य शैनेयस्तव सैन्यमुपाद्रवत् ।
दारुकोऽपि यथाकामं प्रययौ केशवान्तिकम् ॥ ८२
कर्णस्यापि महाराज शङ्खगोक्षीरपाण्डुरैः ।
चित्रकाञ्चनसंनाहैः सदश्वैर्वेगवत्तरैः ॥ ८३
हेमकक्ष्याध्वजोपेतं क्लृप्तयन्त्रपताकिनम् ।
अग्र्यं रथं सुयन्तारं बहुशस्त्रपरिच्छदम् ॥ ८४
उपाजह्रुस्तमास्थाय कर्णोऽप्यभ्यद्रवद्रिपून् ।
एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ ८५
भूयश्चापि निबोध त्वं तवापनयजं क्षयम् ।
एकत्रिंशत्तव सुता भीमसेनेन पातिताः ॥ ८६
दुर्मुखं प्रमुखे कृत्वा सततं चित्रयोधिनम् ।
शतशो निहताः शूराः सात्वतेनार्जुनेन च ॥ ८७
भीष्मं प्रमुखतः कृत्वा भगदत्तं च मारिष ।
एवमेष क्षयो वृत्तो राजन्दुर्मन्त्रिते तव ॥ ८८

इति श्रीमहाभारते द्रोणपर्वणि
द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥

१२३

धृतराष्ट्र उवाच ।

तथा गतेषु शूरेषु तेषां मम च संजय ।
किं वै भीमस्तदाकार्षीत्तन्ममाचक्ष्व संजय ॥ १

संजय उवाच ।

विरथो भीमसेनो वै कर्णवाक्शल्यपीडितः ।
अमर्षवशमापन्नः फल्गुनं वाक्यमब्रवीत् ॥ २
पुनः पुनस्तूबरक मूढ औदरिकेति च ।
अकृतास्त्रक मा योधीर्बाल संग्रामकातर ॥ ३
इति मामब्रवीत्कर्णः पश्यतस्ते धनंजय ।
एवं वक्ता च मे वध्यस्तेन चोक्तोऽस्मि भारत ॥ ४
एतद्व्रतं महाबाहो त्वया सह कृतं मया ।
यथैतन्मम कौन्तेय तथा तव न संशयः ॥ ५
तद्वधाय नरश्रेष्ठ स्मरैतद्वचनं मम ।
यथा भवति तत्सत्यं तथा कुरु धनंजय ॥ ६
तच्छ्रुत्वा वचनं तस्य भीमस्यामितविक्रमः ।

ततोऽर्जुनोऽब्रवीत्कर्णं किंचिदभ्येत्य संयुगे ॥ ७
कर्ण कर्ण वृथादृष्टे सूतपुत्रात्मसंस्तुत ।
अधर्मबुद्धे शृणु मे यत्त्वा वक्ष्यामि सांप्रतम् ॥ ८
द्विविधं कर्म शूराणां युद्धे जयपराजयौ ।
तौ चाप्यनित्यौ राधेय वासवस्यापि युध्यतः ॥ ९
मुमूर्षुर्युयुधानेन विरथोऽसि विसर्जितः ।
यदृच्छया भीमसेनं विरथं कृतवानसि ॥ १०
अधर्मस्त्वेष राधेय यत्त्वं भीममवोचथाः ।
युद्धधर्मं विजानन्वै युध्यन्तमपलायिनम् ।
पूरयन्तं यथाशक्ति शूरकर्माहवे तथा ॥ ११
पश्यतां सर्वसैन्यानां केशवस्य ममैव च ।
विरथो भीमसेनेन कृतोऽसि बहुशो रणे ।
न च त्वां परुषं किंचिदुक्तवान्पाण्डुनन्दनः ॥ १२
यस्मात्तु बहु रूक्षं च श्रावितस्ते वृकोदरः ।
परोक्षं यच्च सौभद्रो युष्माभिर्निहतो मम ॥ १३
तस्मादस्यावलेपस्य सद्यः फलमवाप्नुहि ।
त्वया तस्य धनुश्छिन्नमात्मनाशाय दुर्मते ॥ १४
तस्माद्वध्योऽसि मे मूढ सभृत्यबलवाहनः ।
कुरु त्वं सर्वकृत्यानि महत्ते भयमागतम् ॥ १५
हन्तास्मि वृषसेनं ते प्रेक्षमाणस्य संयुगे ।
ये चान्येऽप्युपयास्यन्ति बुद्धिमोहेन मां नृपाः ।
तांश्च सर्वान्हनिष्यामि सत्येनायुधमालभे ॥ १६
त्वां च मूढाकृतप्रज्ञमतिमानिनमाहवे ।
दृष्ट्वा दुर्योधनो मन्दो भृशं तप्स्यति पातितम् ॥ १७
अर्जुनेन प्रतिज्ञाते वधे कर्णसुतस्य तु ।
महान्सुतुमुलः शब्दो बभूव रथिनां तदा ॥ १८
तस्मिन्नाकुलसंग्रामे वर्तमाने महाभये ।
मन्दरश्मिः सहस्रांशुरस्तं गिरिमुपागमत् ॥ १९
ततो राजन्हृषीकेशः संग्रामशिरसि स्थितम् ।
तीर्णप्रतिज्ञं बीभत्सुं परिष्वज्येदमब्रवीत् ॥ २०
दिष्ट्या संपादिता जिष्णो प्रतिज्ञा महती त्वया ।
दिष्ट्या च निहतः पापो वृद्धक्षत्रः सहात्मजः ॥
धार्तराष्ट्रबलं प्राप्य देवसेनापि भारत ।
सीदेत समरे जिष्णो नात्र कार्या विचारणा ॥२२
न तं पश्यामि लोकेषु चिन्तयन्पुरुषं क्वचित् ।
त्वदृते पुरुषव्याघ्र य एतद्योधयेद्बलम् ॥ २३
महाप्रभावा बहवस्त्वया तुल्याधिकापि वा ।
समेताः पृथिवीपाला धार्तराष्ट्रस्य कारणात् ।
ते त्वां प्राप्य रणे क्रुद्धं नाभ्यवर्तन्त दंशिताः ॥२४
तव वीर्यं बलं चैव रुद्रशक्रान्तकोपमम् ।
नेदृशं शक्नुयात्कश्चिद्रणे कर्तुं पराक्रमम् ।
यादृशं कृतवानद्य त्वमेकः शत्रुतापनः ॥ २५
एवमेव हते कर्णे सानुबन्धे दुरात्मनि ।
वर्धयिष्यामि भूयस्त्वां विजितारिं हतद्विषम् ॥ २६
तमर्जुनः प्रत्युवाच प्रसादात्तव माधव ।
प्रतिज्ञेयं मयोत्तीर्णा विबुधैरपि दुस्तरा ॥ २७
अनाश्चर्यो जयस्तेषां येषां नाथोऽसि माधव ।
त्वत्प्रसादान्महीं कृत्स्नां संप्राप्स्यति युधिष्ठिरः ॥२८
तवैव भारो वार्ष्णेय तवैव विजयः प्रभो ।
वर्धनीयास्तव वयं प्रेष्याश्च मधुसूदन ॥ २९
एवमुक्तः स्मयन्कृष्णः शनकैर्वाहयन्हयान् ।
दर्शयामास पार्थाय क्रूरमायोधनं महत् ॥ ३०

श्रीकृष्ण उवाच ।

प्रार्थयन्तो जयं युद्धे प्रथितं च महद्यशः ।
पृथिव्यां शेरते शूराः पार्थिवास्त्वच्छरैर्हताः ॥ ३१
विकीर्णशस्त्राभरणा विपन्नाश्वरथद्विपाः ।
संछिन्नभिन्नवर्माणो वैक्लव्यं परमं गताः ॥ ३२
ससत्त्वा गतसत्त्वाश्च प्रभया परया युताः ।
सजीवा इव लक्ष्यन्ते गतसत्त्वा नराधिपाः ॥ ३३
तेषां शरैः स्वर्णपुङ्खैः शस्त्रैश्च विविधैः शितैः ।

वाहनैरायुधैश्चैव संपूर्णां पश्य मेदिनीम् ॥ ३४
वर्मभिश्चर्मभिर्हारैः शिरोभिश्च सकुण्डलैः ।
उष्णीषैर्मुकुटैः स्रग्भिश्चूडामणिभिरम्बरैः ॥ ३५
कण्ठसूत्रैरङ्गदैश्च निष्कैरपि च सुप्रभैः ।
अन्यैश्चाभरणैश्चित्रैर्भाति भारत मेदिनी ॥ ३६
चामरैर्व्यजनैश्चित्रैर्ध्वजैश्चाश्वरथद्विपैः ।
विविधैश्च परिस्तोमैरश्वानां च प्रकीर्णकैः ॥ ३७
कुथाभिश्च विचित्राभिर्वरूथैश्च महाधनैः ।
संस्तीर्णां वसुधां पश्य चित्रपट्टैरिवावृताम् ॥ ३८
नागेभ्यः पतितानन्यान्कल्पितेभ्यो द्विपैः सह ।
सिंहान्वज्रप्रणुन्नेभ्यो गिर्यग्रेभ्य इव च्युतान् ॥३९
संस्यूतान्वाजिभिः सार्धं धरण्यां पश्य चापरान् ।
पदातिसादिसंघांश्च क्षतजौघपरिप्लुतान् ॥ ४०

संजय उवाच ।

एवं संदर्शयन्कृष्णो रणभूमिं किरीटिनः ।
स्वैः समेतः स मुदितः पाञ्चजन्यं व्यनादयत् ॥४१

इति श्रीमहाभारते द्रोणपर्वणि
त्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥

१२४

संजय उवाच ।

ततो युधिष्ठिरो राजा रथादाप्लुत्य भारत ।
पर्यष्वजत्तदा कृष्णावानन्दाश्रुपरिप्लुतः ॥ १
प्रमृज्य वदनं शुभ्रं पुण्डरीकसमप्रभम् ।
अब्रवीद्वासुदेवं च पाण्डवं च धनंजयम् ॥ २
दिष्ट्या पश्यामि संग्रामे तीर्णभारौ महारथौ ।
दिष्ट्या च निहतः पापः सैन्धवः पुरुषाधमः ॥ ३
कृष्ण दिष्ट्या मम प्रीतिर्महती प्रतिपादिता ।
दिष्ट्या शत्रुगणाश्चैव निमग्नाः शोकसागरे ॥ ४
न तेषां दुष्करं किंचित्त्रिषु लोकेषु विद्यते ।
सर्वलोकगुरुर्येषां त्वं नाथो मधुसूदन ॥ ५
तव प्रसादाद्गोविन्द वयं जेष्यामहे रिपून् ।
यथा पूर्वं प्रसादात्ते दानवान्पाकशासनः ॥ ६
पृथिवीविजयो वापि त्रैलोक्यविजयोऽपि वा ।
ध्रुवो हि तेषां वार्ष्णेय येषां तुष्टोऽसि माधव ॥ ७
न तेषां विद्यते पापं संग्रामे वा पराजयः ।
त्रिदशेश्वरनाथस्त्वं येषां तुष्टोऽसि माधव ॥ ८
त्वत्प्रसादाद्धृषीकेश शक्रः सुरगणेश्वरः ।
त्रैलोक्यविजयं श्रीमान्प्राप्तवान्रणमूर्धनि ॥ ९
तव चैव प्रसादेन त्रिदशास्त्रिदशेश्वर ।
अमरत्वं गताः कृष्ण लोकांश्चाश्नुवतेऽक्षयान् ॥ १०
त्वत्प्रसादसमुत्थेन विक्रमेणारिसूदन ।
सुरेशत्वं गतः शक्रो हत्वा दैत्यान्सहस्रशः ॥ ११
त्वत्प्रसादाद्धृषीकेश जगत्स्थावरजङ्गमम् ।
स्ववर्त्मनि स्थितं वीर जपहोमेषु वर्तते ॥ १२
एकार्णवमिदं पूर्वं सर्वमासीत्तमोमयम् ।
त्वत्प्रसादात्प्रकाशत्वं जगत्प्राप्तं नरोत्तम ॥ १३
स्रष्टारं सर्वलोकानां परमात्मानमच्युतम् ।
ये प्रपन्ना हृषीकेशं न ते मुह्यन्ति कर्हिचित् ॥ १४
अनादिनिधनं देवं लोककर्तारमव्ययम् ।
त्वां भक्ता ये हृषीकेश दुर्गाण्यतितरन्ति ते ॥ १५
परं पुराणं पुरुषं पुराणानां परं च यत् ।
प्रपद्यतस्तं परमं परा भूतिर्विधीयते ॥ १६
योऽगात चतुरो वेदान्यश्च वेदेषु गीयते ।
तं प्रपद्य महात्मानं भूतिमाप्नोत्यनुत्तमाम् ॥ १७
धनंजयसखा यश्च धनंजयहितश्च यः ।
तं धनंजयगोप्तारं प्रपद्य सुखमेधते ॥ १८
इत्युक्तौ तौ महात्मानावुभौ केशवपाण्डवौ ।
तावब्रूतां तदा हृष्टौ राजानं पृथिवीपतिम् ॥ १९
तव कोपाग्निना दग्धः पापो राजा जयद्रथः ।

उदीर्णं चापि सुमहद्धार्तराष्ट्रबलं रणे ॥ २०
हन्यते निहतं चैव विनङ्क्ष्यति च भारत ।
तव क्रोधहता ह्येते कौरवाः शत्रुसूदन ॥ २१
त्वां हि चक्षुर्हणं वीरं कोपयित्वा सुयोधनः ।
समित्रबन्धुः समरे प्राणांस्त्यक्ष्यति दुर्मतिः ॥ २२
तव क्रोधहतः पूर्वं देवैरपि सुदुर्जयः ।
शरतल्पगतः शेते भीष्मः कुरुपितामहः ॥ २३
दुर्लभो हि जयस्तेषां संग्रामे रिपुसूदन ।
याता मृत्युवशं ते वै येषां क्रुद्धोऽसि पाण्डव ॥ २४
राज्यं प्राणाः प्रियाः पुत्राः सौख्यानि विविधानि च ।
अचिरात्तस्य नश्यन्ति येषां क्रुद्धोऽसि मानद ॥ २५
विनष्टान्कौरवान्मन्ये सपुत्रपशुबान्धवान् ।
राजधर्मपरे नित्यं त्वयि क्रुद्धे युधिष्ठिर ॥ २६
ततो भीमो महाबाहुः सात्यकिश्च महारथः ।
अभिवाद्य गुरुं ज्येष्ठं मार्गणैः क्षतविक्षतौ ।
स्थितावास्तां महेष्वासौ पाञ्चाल्यैः परिवारितौ ॥ २७
तौ दृष्ट्वा मुदितौ वीरौ प्राञ्जली चाग्रतः स्थितौ ।
अभ्यनन्दत कौन्तेयस्तावुभौ भीमसात्यकी ॥ २८
दिष्ट्या पश्यामि वां वीरौ विमुक्तौ सैन्यसागरात् ।
द्रोणग्राहाद्दुराधर्षाद्धार्दिक्यमकरालयात् ।
दिष्ट्या च निर्जिताः संख्ये पृथिव्यां सर्वपार्थिवाः ॥
युवां विजयिनौ चापि दिष्ट्या पश्यामि संयुगे ।
दिष्ट्या द्रोणो जितः संख्ये हार्दिक्यश्च महाबलः ॥
सैन्यार्णवं समुत्तीर्णौ दिष्ट्या पश्यामि चानघौ ।
समरश्लाघिनौ वीरौ समरेष्वपलायिनौ ।
मम प्राणसमौ चैव दिष्ट्या पश्यामि वामहम् ॥ ३१
इत्युक्त्वा पाण्डवो राजा युयुधानवृकोदरौ ।
सस्वजे पुरुषव्याघ्रौ हर्षाद्बाष्पं मुमोच ह ॥ ३२
ततः प्रमुदितं सर्वं बलमासीद्विशां पते ।
पाण्डवानां जयं दृष्ट्वा युद्धाय च मनो दधे ॥ ३३

इति श्रीमहाभारते द्रोणपर्वणि
चतुर्विंशत्यधिकशततमोऽध्यायः ॥ १२४ ॥

१२५

संजय उवाच ।

सैन्धवे निहते राजन्पुत्रस्तव सुयोधनः ।
अश्रुक्लिन्नमुखो दीनो निरुत्साहो द्विषज्जये ।
अमन्यतार्जुनसमो योधो भुवि न विद्यते ॥ १
न द्रोणो न च राधेयो नाश्वत्थामा कृपो न च ।
क्रुद्धस्य प्रमुखे स्थातुं पर्याप्ता इति मारिष ॥ २
निर्जित्य हि रणे पार्थः सर्वान्मम महारथान् ।
अवधीत्सैन्धवं संख्ये नैनं कश्चिदवारयत् ॥ ३
सर्वथा हतमेवैतत्कौरवाणां महद्बलम् ।
न ह्यस्य विद्यते त्राता साक्षादपि पुरंदरः ॥ ४
यमुपाश्रित्य संग्रामे कृतः शस्त्रसमुद्यमः ।
स कर्णो निर्जितः संख्ये हतश्चैव जयद्रथः ॥ ५
परुषाणि सभामध्ये प्रोक्तवान्यः स्म पाण्डवान् ।
स कर्णो निर्जितः संख्ये सैन्धवश्च निपातितः ॥ ६
यस्य वीर्यं समाश्रित्य शमं याचन्तमच्युतम् ।
तृणवत्तमहं मन्ये स कर्णो निर्जितो युधि ॥ ७
एवं क्लान्तमना राजन्नुपायाद्द्रोणमीक्षितुम् ।
आगस्कृत्सर्वलोकस्य पुत्रस्ते भरतर्षभ ॥ ८
ततस्तत्सर्वमाचख्यौ कुरूणां वैशसं महत् ।
परान्विजयतश्चापि धार्तराष्ट्रान्निमज्जतः ॥ ९

दुर्योधन उवाच ।

पश्य मूर्धावसिक्तानामाचार्य कदनं कृतम् ।
कृत्वा प्रमुखतः शूरं भीष्मं मम पितामहम् ॥ १०
तं निहत्य प्रलुब्धोऽयं शिखण्डी पूर्णमानसः ।
पाञ्चालैः सहितः सर्वैः सेनाग्रमभिकर्षति ॥ ११
अपरश्चापि दुर्धर्षः शिष्यस्ते सव्यसाचिना ।

अक्षौहिणीः सप्त हत्वा हतो राजा जयद्रथः॥ १२
असद्विजयकामानां सुहृदामुपकारिणाम् ।
गन्तास्मि कथमानृण्यं गतानां यमसादनम् ॥ १३
ये मदर्थं परीप्सन्ति वसुधां वसुधाधिपाः ।
ते हित्वा वसुधैश्वर्यं वसुधामधिशेरते ॥ १४
सोऽहं कापुरुषः कृत्वा मित्राणां क्षयमीदृशम् ।
नाश्वमेधसहस्रेण पातुमात्मानमुत्सहे ॥ १५
मम लुब्धस्य पापस्य तथा धर्मापचायिनः ।
व्यायच्छन्तो जिगीषन्तः प्राप्ता वैवस्वतक्षयम् ॥
कथं पतितवृत्तस्य पृथिवी सुहृदां द्रुहः ।
विवरं नाशकद्दातुं मम पार्थिवसंसदि ॥ १७
सोऽहं रुधिरसिक्ताङ्गं राज्ञां मध्ये पितामहम् ।
शयानं नाशकं त्रातुं भीष्ममायोधने हतम् ॥ १८
तं मामनार्यपुरुषं मित्रद्रुहमधार्मिकम् ।
किं स वक्ष्यति दुर्धर्षः समेत्य परलोकजित् ॥ १९
जलसंधं महेष्वासं पश्य सात्यकिना हतम् ।
मदर्थमुद्यतं शूरं प्राणांस्त्यक्त्वा महारथम् ॥ २०
काम्बोजं निहतं दृष्ट्वा तथालम्बुसमेव च ।
अन्यान्बहूंश्च सुहृदो जीवितार्थोऽद्य को मम॥२१
व्यायच्छन्तो हताः शूरा मदर्थे येऽपराङ्मुखाः ।
यतमानाः परं शक्त्या विजेतुमहितान्मम ॥ २२
तेषां गत्वाहमानृण्यमद्य शक्त्या परंतप ।
तर्पयिष्यामि तानेव जलेन यमुनामनु ॥ २३
सत्यं ते प्रतिजानामि सर्वशस्त्रभृतां वर ।
इष्टापूर्तेन च शपे वीर्येण च सुतैरपि ॥ २४
निहत्य तान्रणे सर्वान्पाञ्चालान्पाण्डवैः सह ।
शान्तिं लब्धास्मि तेषां वा रणे गन्ता सलोकताम् ॥
न हीदानीं सहाया मे परीप्सन्त्यनुपस्कृताः ।
श्रेयो हि पाण्डून्मन्यन्ते न तथास्मान्महाभुज ॥२६
स्वयं हि मृत्युर्विहितः सत्यसंधेन संयुगे ।
भवानुपेक्षां कुरुते सुशिष्यत्वाद्धनंजये ॥ २७
अतो विनिहताः सर्वे येऽस्मज्जयचिकीर्षवः ।
कर्णमेव तु पश्यामि संप्रत्यस्मज्जयैषिणम् ॥ २८
यो हि मित्रमविज्ञाय याथातथ्येन मन्दधीः ।
मित्रार्थे योजयत्येनं तस्य सोऽर्थोऽवसीदति॥ २९
तादृग्रूपमिदं कार्यं कृतं मम सुहृद्ब्रुवैः ।
मोहाल्लुब्धस्य पापस्य जिह्माचारैस्ततस्ततः ॥ ३०
हतो जयद्रथश्चैव सौमदत्तिश्च वीर्यवान् ।
अभीषाहाः शूरसेनाः शिबयोऽथ वसातयः ॥ ३१
सोऽहमद्य गमिष्यामि यत्र ते पुरुषर्षभाः ।
हता मदर्थं संग्रामे युध्यमानाः किरीटिना ॥ ३२
न हि मे जीवितेनार्थस्तानृते पुरुषर्षभान् ।
आचार्यः पाण्डुपुत्राणामनुजानातु नो भवान्॥३३

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

१२६

धृतराष्ट्र उवाच ।

सिन्धुराजे हते तात समरे सव्यसाचिना ।
तथैव भूरिश्रवसि किमासीद्वो मनस्तदा ॥ १
दुर्योधनेन च द्रोणस्तथोक्तः कुरुसंसदि ।
किमुक्तवान्परं तस्मात्तन्ममाचक्ष्व संजय ॥ २

संजय उवाच ।

निष्टानको महानासीत्सैन्यानां तव भारत ।
सैन्धवं निहतं दृष्ट्वा भूरिश्रवसमेव च ॥ ३
मन्त्रितं तव पुत्रस्य ते सर्वमवमेनिरे ।
येन मन्त्रेण निहताः शतशः क्षत्रियर्षभाः ॥ ४
द्रोणस्तु तद्वचः श्रुत्वा पुत्रस्य तव दुर्मनाः ।
मुहूर्तमिव तु ध्यात्वा भृशमार्तोऽभ्यभाषत ॥ ५
दुर्योधन किमेवं मां वाक्शरैरभिकृन्तसि ।
अजय्यं समरे नित्यं ब्रुवाणं सव्यसाचिनम् ॥ ६

एतेनैवार्जुनं ज्ञातुमलं कौरव संयुगे ।
अच्छिद्यमण्डव्यवधीद्भीष्मं पाल्यमानः किरीटिना ॥७
अवध्यं निहतं दृष्ट्वा संयुगे देवमानुषैः ।
तदैवाज्ञासिषमहं नेयमस्तीति भारती ॥ ८
यं पुंसां त्रिषु लोकेषु सर्वशूरममंस्महि ।
तस्मिन्विनिहते शूरे किं शेषं पर्युपास्महे ॥ ९
यान्स्म तान्ग्लहते तातः शकुनिः कुरुसंसदि ।
अक्षान्न तेऽक्षा निशिता बाणास्ते शत्रुतापनाः ॥१०
त एते घ्नन्ति नस्तात विशिखा जयचोदिताः ।
यांस्तदा ख्याप्यमानांस्त्वं विदुरेण न बुध्यसे ॥११
तास्ता विलपतश्चापि विदुरस्य महात्मनः ।
धीरस्य वाचो नाश्रौषीः क्षेमाय वदतः शिवाः ॥१२
तदिदं वर्तते घोरमागतं वैशसं महत् ।
तस्यावमानाद्वाक्यस्य दुर्योधन कृते तव ॥ १३
यच्च नः प्रेक्षमाणानां कृष्णामानाययः सभाम् ।
अनर्हतीं कुले जातां सर्वधर्मानुचारिणीम् ॥ १४
तस्याधर्मस्य गान्धारे फलं प्राप्तमिदं त्वया ।
नो चेत्पापं परे लोके त्वमच्छेथास्ततोऽधिकम् ॥
यच्च तान्पाण्डवान्द्यूते विषमेण विजित्य ह ।
प्राव्राजयस्तदारण्ये रौरवाजिनवाससः ॥ १६
पुत्राणामिव चैतेषां धर्ममाचरतां सदा ।
द्रुह्येत्को नु नरो लोके मदन्यो ब्राह्मणब्रुवः ॥ १७
पाण्डवानामयं कोपस्त्वया शकुनिना सह ।
आहृतो धृतराष्ट्रस्य संमते कुरुसंसदि ॥ १८
दुःशासनेन संयुक्तः कर्णेन परिवर्धितः ।
क्षत्तुर्वाक्यमनादृत्य त्वयाभ्यस्तः पुनः पुनः ॥ १९
यत्तत्सर्वे पराभूय पर्यवारयतार्जुनिम् ।
सिन्धुराजानमाश्रित्य स वो मध्ये कथं हतः ॥ २०
कथं त्वयि च कर्णे च कृपे शल्ये च जीवति ।
अश्वत्थाम्नि च कौरव्य निधनं सैन्धवोऽगमत् ॥
यद्वस्तत्सर्वराजानस्तेजस्तिग्ममुपासते ।
सिन्धुराजं परित्रातुं स वो मध्ये कथं हतः ॥ २२
मय्येव हि विशेषेण तथा दुर्योधन त्वयि ।
आशंसत परित्राणमर्जुनात्स महीपतिः ॥ २३
ततस्तस्मिन्परित्राणमलब्धवति फल्गुनात् ।
न किंचिदनुपश्यामि जीवितत्राणमात्मनः ॥ २४
मज्जन्तमिव चात्मानं धृष्टद्युम्नस्य किल्बिषे ।
पश्याम्यहत्वा पाञ्चालान्सह तेन शिखण्डिना ॥२५
तन्मा किमभितप्यन्तं वाक्शरैरभिकृन्तसि ।
अशक्तः सिन्धुराजस्य भूत्वा त्राणाय भारत ॥ २६
सौवर्णं सत्यसंधस्य ध्वजमक्लिष्टकर्मणः ।
अपश्यन्युधि भीष्मस्य कथमाशंससे जयम् ॥ २७
मध्ये महारथानां च यत्राहन्यत सैन्धवः ।
हतो भूरिश्रवाश्चैव किं शेषं तत्र मन्यसे ॥ २८
कृप एव च दुर्धर्षो यदि जीवति पार्थिव ।
यो नागात्सिन्धुराजस्य वर्त्म तं पूजयाम्यहम् ॥२९
यच्चापश्यं हतं भीष्मं पश्यतस्तेऽनुजस्य वै ।
दुःशासनस्य कौरव्य कुर्वाणं कर्म दुष्करम् ।
अवध्यकल्पं संग्रामे देवैरपि सवासवैः ॥ ३०
न ते वसुंधरास्तीति तदहं चिन्तये नृप ।
इमानि पाण्डवानां च सृञ्जयानां च भारत ।
अनीकान्याद्रवन्ते मां सहितान्यद्य मारिष ॥ ३१
नाहत्वा सर्वपाञ्चालान्कवचस्य विमोक्षणम् ।
कर्तास्मि समरे कर्म धार्तराष्ट्र हितं तव ॥ ३२
राजन्ब्रूयाः सुतं मे त्वमश्वत्थामानमाहवे ।
न सोमकाः प्रमोक्तव्या जीवितं परिरक्षता ॥ ३३
यच्च पित्रानुशिष्टोऽसि तद्वचः परिपालय ।
आनृशंस्ये दमे सत्ये आर्जवे च स्थिरो भव ॥३४
धर्मार्थकामकुशलो धर्मार्थावप्यपीडयन् ।
धर्मप्रधानः कार्याणि कुर्याश्चेति पुनः पुनः ॥ ३५

चक्षुर्मनोभ्यां संतोष्या विप्राः सेव्याश्च शक्तितः ।
न चैषां विप्रियं कार्यं ते हि वह्निशिखोपमाः ।।
एष त्वहमनीकानि प्रविशाम्यरिसूदन ।
रणाय महते राजंस्त्वया वाक्शल्यपीडितः ।। ३७
त्वं च दुर्योधन बलं यदि शक्नोषि धारय ।
रात्रावपि हि योत्स्यन्ते संरब्धाः कुरुसृञ्जयाः ।।३८
एवमुक्त्वा ततः प्रायाद्द्रोणः पाण्डवसृञ्जयान् ।
मुष्णन्क्षत्रियतेजांसि नक्षत्राणामिवांशुमान् ।। ३९

इति श्रीमहाभारते द्रोणपर्वणि
षड्विंशत्यधिकशततमोऽध्यायः ।। १२६ ।।

१२७

संजय उवाच ।

ततो दुर्योधनो राजा द्रोणेनैवं प्रचोदितः ।
अमर्षवशमापन्नो युद्धायैव मनो दधे ।। १
अब्रवीच्च तदा कर्णं पुत्रो दुर्योधनस्तव ।
पश्य कृष्णसहायेन पाण्डवेन किरीटिना ।
आचार्यविहितं व्यूहं भिन्नं देवैः सुदुर्भिदम् ।। २
तव व्यायच्छमानस्य द्रोणस्य च महात्मनः ।
मिषतां योधमुख्यानां सैन्धवो विनिपातितः ।। ३
पश्य राधेय राजानः पृथिव्यां प्रवरा युधि ।
पार्थेनैकेन निहताः सिंहेनेवेतरा मृगाः ।। ४
मम व्यायच्छमानस्य समरे शत्रुसूदन ।
अल्पावशेषं सैन्यं मे कृतं शक्रात्मजेन ह ।। ५
कथं ह्यनिच्छमानस्य द्रोणस्य युधि फल्गुनः ।
भिन्द्यात्सुदुर्भिदं व्यूहं यतमानोऽपि संयुगे ।। ६
प्रियो हि फल्गुनो नित्यमाचार्यस्य महात्मनः ।
ततोऽस्य दत्तवान्द्वारं नयुद्धेनारिमर्दन ।। ७
अभयं सैन्धवस्याजौ दत्त्वा द्रोणः परंतपः ।
प्रादात्किरीटिने द्वारं पश्य निर्गुणतां मम ।। ८
यद्यदास्यमनुज्ञां वै पूर्वमेव गृहान्प्रति ।
सिन्धुराजस्य समरे नाभविष्यज्जनक्षयः ।। ९
जयद्रथो जीवितार्थी गच्छमानो गृहान्प्रति ।
मयानार्येण संरुद्धो द्रोणात्प्राप्याभयं रणे ।। १०
अद्य मे भ्रातरः क्षीणाश्चित्रसेनादयो युधि ।
भीमसेनं समासाद्य पश्यतां नो दुरात्मनाम् ।।११

कर्ण उवाच ।

आचार्यं मा विगर्हस्व शक्त्या युध्यत्यसौ द्विजः ।
अजय्यान्पाण्डवान्मन्ये द्रोणेनास्त्रविदा मृधे ।। १२
तथा ह्येनमतिक्रम्य प्रविष्टः श्वेतवाहनः ।
दैवदृष्टोऽन्यथाभावो न मन्ये विद्यते क्वचित् ।।१३
ततो नो युध्यमानानां परं शक्त्या सुयोधन ।
सैन्धवो निहतो राजन्दैवमत्र परं स्मृतम् ।। १४
परं यत्नं कुर्वतां च त्वया सार्धं रणाजिरे ।
हत्वास्माकं पौरुषं हि दैवं पश्चात्करोति नः ।
सततं चेष्टमानानां निकृत्या विक्रमेण च ।। १५
दैवोपसृष्टः पुरुषो यत्कर्म कुरुते क्वचित् ।
कृतं कृतं स्म तत्तस्य दैवेन विनिहन्यते ।। १६
यत्कर्तव्यं मनुष्येण व्यवसायवता सता ।
तत्कार्यमविशङ्केन सिद्धिर्दैवे प्रतिष्ठिता ।। १७
निकृत्या निकृताः पार्था विषयोगैश्च भारत ।
दग्धा जतुगृहे चापि द्यूतेन च पराजिताः ।। १८
राजनीतिं व्यपाश्रित्य प्रहिताश्चैव काननम् ।
यत्नेन च कृतं यत्ते दैवेन विनिपातितम् ।। १९
युध्यस्व यत्नमास्थाय मृत्युं कृत्वा निवर्तनम् ।
यततस्तव तेषां च दैवं मार्गेण यास्यति ।। २०
न तेषां मतिपूर्वं हि सुकृतं दृश्यते क्वचित् ।
दुष्कृतं तव वा वीर बुद्ध्या हीनं कुरूद्वह ।। २१
दैवं प्रमाणं सर्वस्य सुकृतस्येतरस्य वा ।
अनन्यकर्म दैवं हि जागर्ति स्वपतामपि ।। २२
बहूनि तव सैन्यानि योधाश्च बहवस्तथा ।

न तथा पाण्डुपुत्राणामेवं युद्धमवर्तत ॥ २३
तैरल्पैर्बहवो यूयं क्षयं नीताः प्रहारिणः ।
शङ्के दैवस्य तत्कर्म पौरुषं येन नाशितम् ॥ २४

संजय उवाच ।

एवं संभाषमाणानां बहु तत्तज्जनाधिप ।
पाण्डवानामनीकानि समदृश्यन्त संयुगे ॥ २५
ततः प्रववृते युद्धं व्यतिषक्तरथद्विपम् ।
तावकानां परैः सार्धं राजन्दुर्मन्त्रिते तव ॥ २६

इति श्रीमहाभारते द्रोणपर्वणि
सप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥

१२८

संजय उवाच ।

तदुदीर्णगजाश्वौघं बलं तव जनाधिप ।
पाण्डुसेनामभिद्रुत्य योधयामास सर्वतः ॥ १
पाञ्चालाः कुरवश्चैव योधयन्तः परस्परम् ।
यमराष्ट्राय महते परलोकाय दीक्षिताः ॥ २
शूराः शूरैः समागम्य शरतोमरशक्तिभिः ।
विव्यधुः समरे तूर्णं निन्युश्चैव यमक्षयम् ॥ ३
रथिनां रथिभिः सार्धं रुधिरस्रावि दारुणम् ।
प्रावर्तत महद्युद्धं निघ्नतामितरेतरम् ॥ ४
वारणाश्च महाराज समासाद्य परस्परम् ।
विषाणैर्दारयामासुः संक्रुद्धाश्च मदोत्कटाः ॥ ५
हयारोहान्हयारोहाः प्रासशक्तिपरश्वधैः ।
बिभिदुस्तुमुले युद्धे प्रार्थयन्तो महद्यशः ॥ ६
पत्तयश्च महाबाहो शतशः शस्त्रपाणयः ।
अन्योन्यमार्दयन्राजन्नित्ययत्ताः पराक्रमे ॥ ७
गोत्राणां नामधेयानां कुलानां चैव मारिष ।
श्रवणाद्धि विजानीमः पाञ्चालान्कुरुभिः सह ॥ ८
अन्योन्यं समरे योधाः शरशक्तिपरश्वधैः ।
प्रेषयन्परलोकाय विचरन्तो ह्यभीतवत् ॥ ९
शरैर्दश दिशो राजंस्तेषां मुक्तैः सहस्रशः ।
न भ्राजन्त यथापूर्वं भास्करेऽस्तं गतेऽपि च ॥१०
तथा प्रयुध्यमानेषु पाण्डवेयेषु निर्भयः ।
दुर्योधनो महाराज व्यवगाहत तद्बलम् ॥ ११
सैन्धवस्य वधेनैव भृशं दुःखसमन्वितः ।
मर्तव्यमिति संचिन्त्य प्राविशत्तु द्विषद्बलम् ॥ १२
नादयन्रथघोषेण कम्पयन्निव मेदिनीम् ।
अभ्यवर्तत पुत्रस्ते पाण्डवानामनीकिनीम् ॥ १३
स संनिपातस्तुमुलस्तस्य तेषां च भारत ।
अभवत्सर्वसैन्यानामभावकरणो महान् ॥ १४
मध्यंदिनगतं सूर्यं प्रतपन्तं गभस्तिभिः ।
तथा तव सुतं मध्ये प्रतपन्तं शरोर्मिभिः ॥ १५
न शेकुर्भारतं युद्धे पाण्डवाः समवेक्षितुम् ।
पलायने कृतोत्साहा निरुत्साहा द्विषज्जये ॥ १६
पर्यधावन्त पाञ्चाला वध्यमाना महात्मना ।
रुक्मपुङ्खैः प्रसन्नाग्रैस्तव पुत्रेण धन्विना ।
अर्द्यमानाः शरैस्तूर्णं न्यपतन्पाण्डुसैनिकाः ॥ १७
न तादृशं रणे कर्म कृतवन्तस्तु तावकाः ।
यादृशं कृतवान्राजा पुत्रस्तव विशां पते ॥ १८
पुत्रेण तव सा सेना पाण्डवी मथिता रणे ।
नलिनी द्विरदेनेव समन्तात्फुल्लपङ्कजा ॥ १९
क्षीणतोयानिलार्काभ्यां हतत्विडिव पद्मिनी ।
बभूव पाण्डवी सेना तव पुत्रस्य तेजसा ॥ २०
पाण्डुसेनां हतां दृष्ट्वा तव पुत्रेण भारत ।
भीमसेनपुरोगास्तु पाञ्चालाः समुपाद्रवन् ॥ २१
स भीमसेनं दशभिर्माद्रीपुत्रौ त्रिभिस्त्रिभिः ।
विराटद्रुपदौ षड्भिः शतेन च शिखण्डिनम् ॥ २२
धृष्टद्युम्नं च सप्तत्या धर्मपुत्रं च सप्तभिः ।
केकयांश्चैव चेदींश्च बहुभिर्निशितैः शरैः ॥ २३
सात्वतं पञ्चभिर्विद्ध्वा द्रौपदेयांस्त्रिभिस्त्रिभिः ।

घटोत्कचं च समरे विद्ध्वा सिंह इवानदत् ॥ २४
शतशश्चापरान्योधान्सद्विपाश्वरथान्रणे ।
शरैरवचकर्तोग्रैः क्रुद्धोऽन्तक इव प्रजाः ॥ २५
तस्य तान्निघ्नतः शत्रून्रुक्मपृष्ठं महद्धनुः ।
भल्लाभ्यां पाण्डवो ज्येष्ठस्त्रिधा चिच्छेद मारिष ॥२६
विव्याध चैनं दशभिः सम्यगस्तैः शितैः शरैः ।
मर्माणि भित्त्वा ते सर्वे संभग्नाः क्षितिमाविशन् ॥
ततः प्रमुदिता योधाः परिवव्रुर्युधिष्ठिरम् ।
वृत्रहत्यै यथा देवाः परिवव्रुः पुरंदरम् ॥ २८
ततो युधिष्ठिरो राजा तव पुत्रस्य मारिष ।
शरं परमदुर्वारं प्रेषयामास संयुगे ।
स तेन भृशसंविद्धो निषसाद रथोत्तमे ॥ २९
ततः पाञ्चालसैन्यानां भृशमासीद्रवो महान् ।
हतो राजेति राजेन्द्र मुदितानां समन्ततः ॥ ३०
बाणशब्दरवश्चोग्रः शुश्रुवे तत्र मारिष ।
अथ द्रोणो द्रुतं तत्र प्रत्यदृश्यत संयुगे ॥ ३१
हृष्टो दुर्योधनश्चापि दृढमादाय कार्मुकम् ।
तिष्ठ तिष्ठेति राजानं ब्रुवन्पाण्डवमभ्ययात् ॥ ३२
प्रत्युद्ययुस्तं त्वरिताः पाञ्चाला राजगृद्धिनः ।
तान्द्रोणः प्रतिजग्राह परीप्सन्कुरुसत्तमम् ।
चण्डवातोद्धतान्मेघान्निघ्नन्रश्मिमुचो यथा ॥ ३३
ततो राजन्महानासीत्संग्रामो भूरिवर्धनः ।
तावकानां परेषां च समेतानां युयुत्सया ॥ ३४

इति श्रीमहाभारते द्रोणपर्वणि
अष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥

१२९

धृतराष्ट्र उवाच ।

यत्तदा प्राविशत्पाण्डूनाचार्यः कुपितो वशी ।
उक्त्वा दुर्योधनं सम्यङ्मम शास्त्रातिगं सुतम् ॥ १
प्रविश्य विचरन्तं च रणे शूरमवस्थितम् ।
कथं द्रोणं महेष्वासं पाण्डवाः पर्यवारयन् ॥ २
केऽरक्षन्दक्षिणं चक्रमाचार्यस्य महात्मनः ।
के चोत्तरमरक्षन्त निघ्नतः शात्रवान्रणे ॥ ३
नृत्यन्स रथमार्गेषु सर्वशस्त्रभृतां वरः ।
धूमकेतुरिव क्रुद्धः कथं मृत्युमुपेयिवान् ॥ ४

संजय उवाच ।

सायाह्ने सैन्धवं हत्वा राज्ञा पार्थः समेत्य च ।
सात्यकिश्च महेष्वासो द्रोणमेवाभ्यधावताम् ॥ ५
तथा युधिष्ठिरस्तूर्णं भीमसेनश्च पाण्डवः ।
पृथक्चमूभ्यां संसक्तौ द्रोणमेवाभ्यधावताम् ॥ ६
तथैव नकुलो धीमान्सहदेवश्च दुर्जयः ।
धृष्टद्युम्नः शतानीको विराटश्च सकेकयः ।
मत्स्याः शाल्वेयसेनाश्च द्रोणमेव ययुर्युधि ॥ ७
द्रुपदश्च तथा राजा पाञ्चालैरभिरक्षितः ।
धृष्टद्युम्नपिता राजन्द्रोणमेवाभ्यवर्तत ॥ ८
द्रौपदेया महेष्वासा राक्षसश्च घटोत्कचः ।
ससेनास्तेऽभ्यवर्तन्त द्रोणमेव महाद्युतिम् ॥ ९
प्रभद्रकाश्च पाञ्चालाः षट्सहस्राः प्रहारिणः ।
द्रोणमेवाभ्यवर्तन्त पुरस्कृत्य शिखण्डिनम् ॥ १०
तथेतरे नरव्याघ्राः पाण्डवानां महारथाः ।
सहिताः संन्यवर्तन्त द्रोणमेव द्विजर्षभम् ॥ ११
तेषु शूरेषु युद्धाय गतेषु भरतर्षभ ।
बभूव रजनी घोरा भीरूणां भयवर्धिनी ॥ १२
योधानामशिवा रौद्रा राजन्नन्तकगामिनी ।
कुञ्जराश्वमनुष्याणां प्राणान्तकरणी तदा ॥ १३
तस्यां रजन्यां घोरायां नदन्त्यः सर्वतः शिवाः ।
न्यवेदयन्भयं घोरं सज्वालकवलैर्मुखैः ॥ १४
उलूकाश्चाप्यदृश्यन्त शंसन्तो विपुलं भयम् ।
विशेषतः कौरवाणां ध्वजिन्यामतिदारुणम् ॥ १५
ततः सैन्येषु राजेन्द्र शब्दः समभवन्महान् ।

भेरीशब्देन महता मृदङ्गानां स्वनेन च ॥ १६
गजानां गर्जितैश्चापि तुरंगाणां च हेषितैः ।
खुरशब्दनिपातैश्च तुमुलः सर्वतोऽभवत् ॥ १७
ततः समभवद्युद्धं संध्यायामतिदारुणम् ।
द्रोणस्य च महाराज सृञ्जयानां च सर्वशः ॥ १८
तमसा चावृते लोके न प्राज्ञायत किंचन ।
सैन्येन रजसा चैव समन्तादुत्थितेन ह ॥ १९
नरस्याश्वस्य नागस्य समसज्जत शोणितम् ।
नापश्याम रजो भौमं कश्मलेनाभिसंवृताः ॥ २०
रात्रौ वंशवनस्येव दह्यमानस्य पर्वते ।
घोरश्चटचटाशब्दः शस्त्राणां पतताभूत् ॥ २१
नैव स्वे न परे राजन्प्राज्ञायन्त तमोवृते ।
उन्मत्तमिव तत्सर्वं बभूव रजनीमुखे ॥ २२
भौमं रजोऽथ राजेन्द्र शोणितेन प्रशामितम् ।
शातकौम्भैश्च कवचैर्भूषणैश्च तमोऽभ्यगात् ॥ २३
ततः सा भारती सेना मणिहेमविभूषिता ।
द्यौरिवासीत्सनक्षत्रा रजन्यां भरतर्षभ ॥ २४
गोमायुबडसंघुष्टा शक्तिध्वजसमाकुला ।
दारुणाभिरुता घोरा क्ष्वेडितोत्क्रुष्टनादिता ॥ २५
ततोऽभवन्महाशब्दस्तुमुलो लोमहर्षणः ।
समावृण्वन्दिशः सर्वा महेन्द्राशनिनिस्वनः ॥ २६
सा निशीथे महाराज सेनादृश्यत भारती ।
अङ्गदैः कुण्डलैर्निष्कैः शस्त्रैश्चैवावभासिता ॥ २७
तत्र नागा रथाश्चैव जाम्बूनदविभूषिताः ।
निशायां प्रत्यदृश्यन्त मेघा इव सविद्युतः ॥ २८
ऋष्टिशक्तिगदाबाणमुसलप्रासपट्टिशाः ।
संपतन्तो व्यदृश्यन्त भ्राजमाना इवाग्नयः ॥ २९
दुर्योधनपुरोवातां रथनागबलाहकाम् ।
वादित्रघोषस्तनितां चापविद्युद्ध्वजैर्वृताम् ॥ ३०
द्रोणपाण्डवपर्जन्यां खड्गशक्तिगदाशनिम् ।
शरधारास्त्रपवनां भृशं शीतोष्णसंकुलाम् ॥ ३१
घोरां विस्मापनीमुग्रां जीवितच्छिदमप्लवाम् ।
तां प्राविशन्नतिभयां सेनां युद्धचिकीर्षवः ॥ ३२
तस्मिन्रात्रिमुखे घोरे महाशब्दनिनादिते ।
भीरूणां त्रासजनने शूराणां हर्षवर्धने ॥ ३३
रात्रियुद्धे तदा घोरे वर्तमाने सुदारुणे ।
द्रोणमभ्यद्रवन्क्रुद्धाः सहिताः पाण्डुसृञ्जयाः ॥ ३४
ये ये प्रमुखतो राजन्न्यवर्तन्त महात्मनः ।
तान्सर्वान्विमुखांश्चक्रे कांश्चिन्निन्ये यमक्षयम् ॥ ३५

इति श्रीमहाभारते द्रोणपर्वणि
एकोनत्रिंशत्यधिकशततमोऽध्यायः ॥ १२९ ॥

१३०

धृतराष्ट्र उवाच ।

तस्मिन्प्रविष्टे दुर्धर्षे सृञ्जयानमितौजसि ।
अमृष्यमाणे संरब्धे का वोऽभूद्वै मतिस्तदा ॥ १
दुर्योधनं तथा पुत्रमुक्त्वा शास्त्रातिगं मम ।
यत्प्राविशदमेयात्मा किं पार्थः प्रत्यपद्यत ॥ २
निहते सैन्धवे वीरे भूरिश्रवसि चैव हि ।
यदभ्यगान्महातेजाः पाञ्चालानपराजितः ॥ ३
किममन्यत दुर्धर्षः प्रविष्टे शत्रुतापने ।
दुर्योधनश्च किं कृत्यं प्राप्तकालममन्यत ॥ ४
के च तं वरदं वीरमन्वयुर्द्विजसत्तमम् ।
के चास्य पृष्ठतोऽगच्छन्वीराः शूरस्य युध्यतः ।
के पुरस्तादयुध्यन्त निघ्नतः शात्रवान्रणे ॥ ५
मन्येऽहं पाण्डवान्सर्वान्भारद्वाजशरार्दितान् ।
शिशिरे कम्पमाना वै कृशा गाव इवाभिभो ॥ ६
प्रविश्य स महेष्वासः पाञ्चालानरिमर्दनः ।
कथं नु पुरुषव्याघ्रः पञ्चत्वमुपजग्मिवान् ॥ ७
सर्वेषु सैन्येषु च संगतेषु
रात्रौ समेतेषु महारथेषु ।

संलोड्यमानेषु पृथग्विधेषु
के वस्तदानीं मतिमन्त आसन् ॥ ८
हतांश्चैव विषक्तांश्च पराभूतांश्च शंससि ।
रथिनो विरथांश्चैव कृतान्युद्धेषु मामकान् ॥ ९
कथमेषां तदा तत्र पार्थानामपलायिनाम् ।
प्रकाशमभवद्रात्रौ कथं कुरुषु संजय ॥ १०

संजय उवाच ।

रात्रियुद्धे तदा राजन्वर्तमाने सुदारुणे ।
द्रोणमभ्यद्रवन्रात्रौ पाण्डवाः सहसैनिकाः ॥ ११
ततो द्रोणः केकयांश्च धृष्टद्युम्नस्य चात्मजान् ।
प्रेषयन्मृत्युलोकाय सर्वानिषुभिराशुगैः ॥ १२
तस्य प्रमुखतो राजन्येऽवर्तन्त महारथाः ।
तान्सर्वान्प्रेषयामास परलोकाय भारत ॥ १३
प्रमथ्नन्तं तदा वीरं भारद्वाजं महारथम् ।
अभ्यवर्तत संक्रुद्धः शिबी राजन्प्रतापवान् ॥ १४
तमापतन्तं संप्रेक्ष्य पाण्डवानां महारथम् ।
विव्याध दशभिर्द्रोणः सर्वपारशवैः शरैः ॥ १५
तं शिबिः प्रतिविव्याध त्रिंशता निशितैः शरैः ।
सारथिं चास्य भल्लेन स्मयमानो न्यपातयत् ॥ १६
तस्य द्रोणो हयान्हत्वा सारथिं च महात्मनः ।
अथास्य सशिरस्त्राणं शिरः कायादपाहरत् ॥ १७
कलिङ्गानां च सैन्येन कलिङ्गस्य सुतो रणे ।
पूर्वं पितृवधात्क्रुद्धो भीमसेनमुपाद्रवत् ॥ १८
स भीमं पञ्चभिर्विद्ध्वा पुनर्विव्याध सप्तभिः ।
विशोकं त्रिभिराजघ्ने ध्वजमेकेन पत्रिणा ॥ १९
कलिङ्गानां तु तं शूरं क्रुद्धं क्रुद्धो वृकोदरः ।
रथाद्रथमभिद्रुत्य मुष्टिनाभिजघान ह ॥ २०
तस्य मुष्टिहतस्याजौ पाण्डवेन बलीयसा ।
सर्वाण्यस्थीनि सहसा प्रापतन्वै पृथक्पृथक् ॥ २१
तं कर्णो भ्रातरश्चास्य नामृष्यन्त महारथाः ।
ते भीमसेनं नाराचैर्जघ्नुराशीविषोपमैः ॥ २२
ततः शत्रुरथं त्यक्त्वा भीमो ध्रुवरथं गतः ।
ध्रुवं चास्यन्तमनिशं मुष्टिना समपोथयत् ।
स तथा पाण्डुपुत्रेण बलिना निहतोऽपतत् ॥ २३
तं निहत्य महाराज भीमसेनो महाबलः ।
जयरातरथं प्राप्य मुहुः सिंह इवानदत् ॥ २४
जयरातमथाक्षिप्य नदन्सव्येन पाणिना ।
तलेन नाशयामास कर्णस्यैवाग्रतः स्थितम् ॥ २५
कर्णस्तु पाण्डवे शक्तिं काञ्चनीं समवासृजत् ।
ततस्तामेव जग्राह प्रहसन्पाण्डुनन्दनः ॥ २६
कर्णायैव च दुर्धर्षश्चिक्षेपाजौ वृकोदरः ।
तामन्तरिक्षे चिच्छेद शकुनिस्तैलपायिना ॥ २७
ततस्तव सुता राजन्भीमस्य रथमाव्रजन् ।
महता शरवर्षेण छादयन्तो वृकोदरम् ॥ २८
दुर्मदस्य ततो भीमः प्रहसन्निव संयुगे ।
सारथिं च हयांश्चैव शरैर्निन्ये यमक्षयम् ।
दुर्मदस्तु ततो यानं दुष्कर्णस्यावपुप्लुवे ॥ २९
तावेकरथमारूढौ भ्रातरौ परतापनौ ।
संग्रामशिरसो मध्ये भीमं द्वावभ्यधावताम् ।
यथाम्बुपतिमित्रौ हि तारकं दैत्यसत्तमम् ॥ ३०
ततस्तु दुर्मदश्चैव दुष्कर्णश्च तवात्मजौ ।
रथमेकं समारुह्य भीमं बाणैरविध्यताम् ॥ ३१
ततः कर्णस्य मिषतो द्रौणेर्दुर्योधनस्य च ।
कृपस्य सोमदत्तस्य बाह्लीकस्य च पाण्डवः ॥ ३२
दुर्मदस्य च वीरस्य दुष्कर्णस्य च तं रथम् ।
पादप्रहारेण धरां प्रावेशयदरिंदमः ॥ ३३
ततः सुतौ ते बलिनौ शूरौ दुष्कर्णदुर्मदौ ।
मुष्टिनाहत्य संक्रुद्धो ममर्द चरणेन च ॥ ३४
ततो हाहाकृते सैन्ये दृष्ट्वा भीमं नृपाब्रुवन् ।
रुद्रोऽयं भीमरूपेण धार्तराष्ट्रेषु गृध्यति ॥ ३५

एवमुक्त्वा पलायन्त सर्वे भारत पार्थिवाः ।
विसंज्ञावाहयन्वाहान्न च द्वौ सह धावतः ॥ ३६
ततो बले भृशलुलिते निशामुखे
सुपूजितो नृपवृषभैर्वृकोदरः ।
महाबलः कमलविबुद्धलोचनो
युधिष्ठिरं नृपतिमपूजयद्बली ॥ ३७
ततो यमौ द्रुपदविराटकेकया
युधिष्ठिरश्चापि परां मुदं ययुः ।
वृकोदरं भृशमभिपूजयंश्च ते
यथान्धके प्रतिनिहते हरं सुराः ॥ ३८
ततः सुतास्तव वरुणात्मजोपमा
रुषान्विताः सह गुरुणा महात्मना ।
वृकोदरं सरथपदातिकुञ्जरा
युयुत्सवो भृशमभिपर्यवारयन् ॥ ३९
ततोऽभवत्तिमिरघनैरिवावृतं
महाभये भयदमतीव दारुणम् ।
निशामुखे बडवृकगृध्रमोदनं
महात्मनां नृपवरयुद्धमद्भुतम् ॥ ४०

इति श्रीमहाभारते द्रोणपर्वणि
त्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥

१३१

संजय उवाच ।

प्रायोपविष्टे तु हते पुत्रे सात्यकिना ततः ।
सोमदत्तो भृशं क्रुद्धः सात्यकिं वाक्यमब्रवीत् ॥ १
क्षत्रधर्मः पुरा दृष्टो यस्तु देवैर्महात्मभिः ।
तं त्वं सात्वत संत्यज्य दस्युधर्मे कथं रतः ॥ २
पराङ्मुखाय दीनाय न्यस्तशस्त्राय याचते ।
क्षत्रधर्मरतः प्राज्ञः कथं नु प्रहरेद्रणे ॥ ३
द्वावेव किल वृष्णीनां तत्र ख्यातौ महारथौ ।
प्रद्युम्नश्च महाबाहुस्त्वं चैव युधि सात्वत ॥ ४
कथं प्रायोपविष्टाय पार्थेन छिन्नबाहवे ।
नृशंसं पतनीयं च तादृशं कृतवानसि ॥ ५
शपे सात्वत पुत्राभ्यामिष्टेन सुकृतेन च ।
अनतीतामिमां रात्रिं यदि त्वां वीरमानिनम् ॥ ६
अरक्ष्यमाणं पार्थेन जिष्णुना ससुतानुजम् ।
न हन्यां निरये घोरे पतेयं वृष्णिपांसन ॥ ७
एवमुक्त्वा सुसंक्रुद्धः सोमदत्तो महाबलः ।
दध्मौ शङ्खं च तारेण सिंहनादं ननाद च ॥ ८
ततः कमलपत्राक्षः सिंहदंष्ट्रो महाबलः ।
सात्वतो भृशसंक्रुद्धः सोमदत्तमथाब्रवीत् ॥ ९
हतो भूरिश्रवा वीरस्तव पुत्रो महारथः ।
शलश्चैव तथा राजन्भ्रातृव्यसनकर्शितः ॥ १०
त्वां चाप्यद्य वधिष्यामि सपुत्रपशुबान्धवम् ।
तिष्ठेदानीं रणे यत्तः कौरवोऽसि विशेषतः ॥ ११
यस्मिन्दानं दमः शौचमहिंसा ह्रीर्धृतिः क्षमा ।
अनपायीनि सर्वाणि नित्यं राज्ञि युधिष्ठिरे ॥ १२
मृदङ्गकेतोस्तस्य त्वं तेजसा निहतः पुरा ।
सकर्णसौबलः संख्ये विनाशं समुपेष्यसि ॥ १३
शपेऽहं कृष्णचरणैरिष्टापूर्तेन चैव ह ।
यदि त्वां ससुतं पापं न हन्यां युधि रोषितः ।
अपयास्यसि चेत्त्यक्त्वा ततो मुक्तो भविष्यसि ॥
एवमाभाष्य चान्योन्यं क्रोधसंरक्तलोचनौ ।
प्रवृत्तौ शरसंपातं कर्तुं पुरुषसत्तमौ ॥ १५
ततो गजसहस्रेण रथानामयुतेन च ।
दुर्योधनः सोमदत्तं परिवार्य व्यवस्थितः ॥ १६
शकुनिश्च सुसंक्रुद्धः सर्वशस्त्रभृतां वरः ।
पुत्रपौत्रैः परिवृतो भ्रातृभिश्चेन्द्रविक्रमैः ।
स्यालस्तव महाबाहुर्वज्रसंहननो युवा ॥ १७
साग्रं शतसहस्रं तु हयानां तस्य धीमतः ।
सोमदत्तं महेष्वासं समन्तात्पर्यरक्षत ॥ १८

रक्ष्यमाणश्च बलिभिश्छादयामास सात्यकिम् ।
तं छाद्यमानं विशिखैर्दृष्ट्वा संनतपर्वभिः ।
धृष्टद्युम्नोऽभ्ययात्क्रुद्धः प्रगृह्य महतीं चमूम् ॥ १९
चण्डवाताभिसृष्टानामुदधीनामिव स्वनः ।
आसीद्राजन्बलौघानामन्योन्यमभिनिघ्नताम् ॥ २०
विव्याध सोमदत्तस्तु सात्वतं नवभिः शरैः ।
सात्यकिर्दशभिश्चैनमवधीत्कुरुपुंगवम् ॥ २१
सोऽतिविद्धो बलवता समरे दृढधन्वना ।
रथोपस्थं समासाद्य मुमोह गतचेतनः ॥ २२
तं विमूढं समालक्ष्य सारथिस्त्वरयान्वितः ।
अपोवाह रणाद्वीरं सोमदत्तं महारथम् ॥ २३
तं विसंज्ञं समालोक्य युयुधानशरार्दितम् ।
द्रौणिरभ्यद्रवत्क्रुद्धः सात्वतं रणमूर्धनि ॥ २४
तमापतन्तं संप्रेक्ष्य शैनेयस्य रथं प्रति ।
भैमसेनिः सुसंक्रुद्धः प्रत्यमित्रमवारयत् ॥ २५
कार्ष्णायसमयं घोरमृक्षचर्मावृतं महत् ।
युक्तं गजनिभैर्वाहैर्न हयैर्नापि वा गजैः ॥ २६
विक्षिप्तमष्टचक्रेण विवृताक्षेण कूजता ।
ध्वजेनोच्छ्रिततुण्डेन गृध्रराजेन राजता ॥ २७
लोहितार्द्रपताकं तमन्त्रमालाविभूषितम् ।
अष्टचक्रसमायुक्तमास्थाय विपुलं रथम् ॥ २८
शूलमुद्गरधारिण्या शैलपादपहस्तया ।
रक्षसां घोररूपाणामक्षौहिण्या समावृतः ॥ २९
तमुद्यतमहाचापं निशाम्य व्यथिता नृपाः ।
युगान्तकालसमये दण्डहस्तमिवान्तकम् ॥ ३०
भयार्दिता प्रचुक्षोभ पुत्रस्य तव वाहिनी ।
वायुना क्षोभितावर्ता गङ्गेवोर्ध्वतरङ्गिणी ॥ ३१
घटोत्कचप्रयुक्तेन सिंहनादेन भीषिताः ।
प्रसुस्रुवुर्गजा मूत्रं विव्यथुश्च नरा भृशम् ॥ ३२
ततोऽश्मवृष्टिरत्यर्थमासीत्तत्र समन्ततः ।
संध्याकालाधिकबलैः प्रमुक्ता राक्षसैः क्षितौ ॥ ३३
आयसानि च चक्राणि भुशुण्ड्यः प्रासतोमराः ।
पतन्त्यविरलाः शूलाः शतघ्न्यः पट्टिशास्तथा ॥ ३४
तदुग्रमतिरौद्रं च दृष्ट्वा युद्धं नराधिपाः ।
तनयास्तव कर्णश्च व्यथिताः प्राद्रवन्दिशः ॥ ३५
तत्रैकोऽस्त्रबलश्लाघी द्रौणिर्मानी न विव्यथे ।
व्यधमच्च शरैर्मायां घटोत्कचविनिर्मिताम् ॥ ३६
निहतायां तु मायायाममर्षी स घटोत्कचः ।
विससर्ज शरान्घोरांस्तेऽश्वत्थामानमाविशन् ॥ ३७
भुजगा इव वेगेन वल्मीकं क्रोधमूर्छिताः ।
ते शरा रुधिराभ्यक्ता भित्त्वा शारद्वतीसुतम् ।
विविशुर्धरणीं शीघ्रा रुक्मपुङ्खाः शिलाशिताः ॥३८
अश्वत्थामा तु संक्रुद्धो लघुहस्तः प्रतापवान् ।
घटोत्कचमभिक्रुद्धं बिभेद दशभिः शरैः ॥ ३९
घटोत्कचोऽतिविद्धस्तु द्रोणपुत्रेण मर्मसु ।
चक्रं शतसहस्रारमगृह्णाद्व्यथितो भृशम् ॥ ४०
क्षुरान्तं बालसूर्याभं मणिवज्रविभूषितम् ।
अश्वत्थाम्नस्तु चिक्षेप भैमसेनिर्जिघांसया ॥ ४१
वेगेन महता गच्छद्विक्षिप्तं द्रौणिना शरैः ।
अभाग्यस्येव संकल्पस्तन्मोघं न्यपतद्भुवि ॥ ४२
घटोत्कचस्ततस्तूर्णं दृष्ट्वा चक्रं निपातितम् ।
द्रौणिं प्राच्छादयद्बाणैः स्वर्भानुरिव भास्करम् ॥ ४३
घटोत्कचसुतः श्रीमान्भिन्नाञ्जनचयोपमः ।
रुरोध द्रौणिमायान्तं प्रभञ्जनमिवाद्रिराट् ॥ ४४
पौत्रेण भीमसेनस्य शरैः सोऽञ्जनपर्वणा ।
बभौ मेघेन धाराभिर्गिरिर्मेरुरिवार्दितः ॥ ४५
अश्वत्थामा त्वसंभ्रान्तो रुद्रोपेन्द्रेन्द्रविक्रमः ।
ध्वजमेकेन बाणेन चिच्छेदाञ्जनपर्वणः ॥ ४६
द्वाभ्यां तु रथयन्तारं त्रिभिश्चास्य त्रिवेणुकम् ।
धनुरेकेन चिच्छेद चतुर्भिश्चतुरो हयान् ॥ ४७

विरथस्योद्यतं हस्ताद्धेमबिन्दुभिराचितम् ।
विशिखेन सुतीक्ष्णेन खड्गमस्य द्विधाकरोत् ॥ ४८
गदा हेमाङ्गदा राजंस्तूर्णं हैडिम्बसूनुना ।
भ्राम्योत्क्षिप्ता शरैः सापि द्रौणिनाभ्याहतापतत् ॥
ततोऽन्तरिक्षमुत्पत्य कालमेघ इवोन्नदन् ।
ववर्षाञ्जनपर्वा स द्रुमवर्षं नभस्तलात् ॥ ५०
ततो मायाधरं द्रौणिर्घटोत्कचसुतं दिवि ।
मार्गणैरभिविव्याध घनं सूर्य इवांशुभिः ॥ ५१
सोऽवतीर्य पुनस्तस्थौ रथे हेमपरिष्कृते ।
महीधर इवात्युच्चः श्रीमानञ्जनपर्वतः ॥ ५२
तमयस्मयवर्माणं द्रौणिर्भीमात्मजात्मजम् ।
जघानाञ्जनपर्वाणं महेश्वर इवान्धकम् ॥ ५३
अथ दृष्ट्वा हतं पुत्रमश्वत्थाम्ना महाबलम् ।
द्रौणेः सकाशमभ्येत्य रोषात्प्रचलिताङ्गदः ॥ ५४
प्राह वाक्यमसंभ्रान्तो वीरं शारद्वतीसुतम् ।
दहन्तं पाण्डवानीकं वनमग्निमिवोद्धतम् ॥ ५५
तिष्ठ तिष्ठ न मे जीवन्द्रोणपुत्र गमिष्यसि ।
त्वामद्य निहनिष्यामि क्रौञ्चमग्निसुतो यथा ॥ ५६

अश्वत्थामोवाच ।

गच्छ वत्स सहान्यैस्त्वं युध्यस्वामरविक्रम ।
न हि पुत्रेण हैडिम्बे पिता न्याय्यं प्रबाधितुम् ॥
कामं खलु न मे रोषो हैडिम्बे विद्यते त्वयि ।
किं तु रोषान्वितो जन्तुर्हन्यादात्मानमप्युत ॥ ५८

संजय उवाच ।

श्रुत्वैतत्क्रोधताम्राक्षः पुत्रशोकसमन्वितः ।
अश्वत्थामानमायस्तो भैमसेनिरभाषत ॥ ५९
किमहं कातरो द्रौणे पृथग्जन इवाहवे ।
भीमात्खल्वहमुत्पन्नः कुरूणां विपुले कुले ॥ ६०
पाण्डवानामहं पुत्रः समरेष्वनिवर्तिनाम् ।
रक्षसामधिराजोऽहं दशग्रीवसमो बले ॥ ६१
तिष्ठ तिष्ठ न मे जीवन्द्रोणपुत्र गमिष्यसि ।
युद्धश्रद्धामहं तेऽद्य विनेष्यामि रणाजिरे ॥ ६२
इत्युक्त्वा रोषताम्राक्षो राक्षसः सुमहाबलः ।
द्रौणिमभ्यद्रवत्क्रुद्धो गजेन्द्रमिव केसरी ॥ ६३
रथाक्षमात्रैरिषुभिरभ्यवर्षद्घटोत्कचः ।
रथिनामृषभं द्रौणिं धाराभिरिव तोयदः ॥ ६४
शरवृष्टिं शरैर्द्रौणिरप्राप्तां तां व्यशातयत् ।
ततोऽन्तरिक्षे बाणानां संग्रामोऽन्य इवाभवत् ॥६५
अथास्त्रसंघर्षकृतैर्विस्फुलिङ्गैः समाबभौ ।
विभावरीमुखे व्योम खद्योतैरिव चित्रितम् ॥ ६६
निशाम्य निहतां मायां द्रौणिना रणमानिना ।
घटोत्कचस्ततो मायां ससर्जान्तर्हितः पुनः ॥ ६७
सोऽभवद्गिरिरत्युच्चः शिखरैस्तरुसंकटैः ।
शूलप्रासासिमुसलजलप्रस्रवणो महान् ॥ ६८
तमञ्जनचयप्रख्यं द्रौणिर्दृष्ट्वा महीधरम् ।
प्रपतद्भिश्च बहुभिः शस्त्रसंघैर्न चुक्षुभे ॥ ६९
ततः स्मयन्निव द्रौणिर्वज्रमस्त्रमुदीरयत् ।
स तेनास्त्रेण शैलेन्द्रः क्षिप्तः क्षिप्रमनश्यत ॥ ७०
ततः स तोयदो भूत्वा नीलः सेन्द्रायुधो दिवि ।
अश्मवृष्टिभिरत्युग्रो द्रौणिमाच्छादयद्रणे ॥ ७१
अथ संधाय वायव्यमस्त्रमस्त्रविदां वरः ।
व्यधमद्द्रोणतनयो नीलमेघं समुत्थितम् ॥ ७२
स मार्गणगणैर्द्रौणिर्दिशः प्रच्छाद्य सर्वतः ।
शतं रथसहस्राणां जघान द्विपदां वरः ॥ ७३
स दृष्ट्वा पुनरायान्तं रथेनायतकार्मुकम् ।
घटोत्कचमसंभ्रान्तं राक्षसैर्बहुभिर्वृतम् ॥ ७४
सिंहशार्दूलसदृशैर्मत्तद्विरदविक्रमैः ।
गजस्थैश्च रथस्थैश्च वाजिपृष्ठगतैरपि ॥ ७५
विवृतास्यशिरोग्रीवैर्हैडिम्बानुचरैः सह ।
पौलस्त्यैर्यातुधानैश्च तामसैश्चोग्रविक्रमैः ॥ ७६

नानाशस्त्रधरैर्वीरैर्नानाकवचभूषणैः ।
महाबलैर्भीमरवैः संरम्भोद्वृत्तलोचनैः ॥ ७७
उपस्थितैस्ततो युद्धे राक्षसैर्युद्धदुर्मदैः ।
विषण्णमभिसंप्रेक्ष्य पुत्रं ते द्रौणिरब्रवीत् ॥ ७८
तिष्ठ दुर्योधनाद्य त्वं न कार्यः संभ्रमस्त्वया ।
सहैभिर्भ्रातृभिर्वीरैः पार्थिवैश्चेन्द्रविक्रमैः ॥ ७९
निहनिष्याम्यमित्रांस्ते न तवास्ति पराजयः ।
सत्यं ते प्रतिजानामि पर्याश्वासय वाहिनीम् ॥ ८०

दुर्योधन उवाच ।

न त्वेतदद्भुतं मन्ये यत्ते महदिदं मनः ।
अस्मासु च परा भक्तिस्तव गौतमिनन्दन ॥ ८१

संजय उवाच ।

अश्वत्थामानमुक्त्वैवं ततः सौबलमब्रवीत् ।
वृतः शतसहस्रेण रथानां रणशोभिनाम् ॥ ८२
षष्ट्या गजसहस्रैश्च प्रयाहि त्वं धनंजयम् ।
कर्णश्च वृषसेनश्च कृपो नीलस्तथैव च ॥ ८३
उदीच्याः कृतवर्मा च पुरुमित्रः श्रुतार्पणः ।
दुःशासनो निकुम्भश्च कुण्डभेदी उरुक्रमः ॥ ८४
पुरंजयो दृढरथः पताकी हेमपङ्कजः ।
शल्यारुणीन्द्रसेनाश्च संजयो विजयो जयः ॥ ८५
कमलाक्षः पुरुः क्राथी जयवर्मा सुदर्शनः ।
एते त्वामनुयास्यन्ति पत्तीनामयुतानि षट् ॥ ८६
जहि भीमं यमौ चोभौ धर्मराजं च मातुल ।
असुरानिव देवेन्द्रो जयाशा मे त्वयि स्थिता ॥ ८७
दारितान्द्रौणिना बाणैर्भृशं विक्षतविग्रहान् ।
जहि मातुल कौन्तेयानसुरानिव पावकिः ॥ ८८
एवमुक्तो ययौ शीघ्रं पुत्रेण तव सौबलः ।
पिप्रीषुस्ते सुतान्राजन्दिधक्षुश्चैव पाण्डवान् ॥ ८९
अथ प्रववृते युद्धं द्रौणिराक्षसयोर्मृधे ।
विभावर्यां सुतुमुलं शक्रप्रह्लादयोरिव ॥ ९०

ततो घटोत्कचो बाणैर्दशभिर्गौतमीसुतम् ।
जघानोरसि संक्रुद्धो विषाग्निप्रतिमैर्दृढैः ॥ ९१
स तैरभ्याहतो गाढं शरैर्भीमसुतेरितैः ।
चचाल रथमध्यस्थो वातोद्धूत इव द्रुमः ॥ ९२
भूयश्चाञ्जलिकेनास्य मार्गणेन महाप्रभम् ।
द्रौणिहस्तस्थितं चापं चिच्छेदाशु घटोत्कचः ॥ ९३
ततोऽन्यद्द्रौणिरादाय धनुर्भारसहं महत् ।
ववर्ष विशिखांस्तीक्ष्णान्वारिधारा इवाम्बुदः ॥ ९४
ततः शारद्वतीपुत्रः प्रेषयामास भारत ।
सुवर्णपुङ्खाञ्शत्रुघ्नान्खचरान्खचरान्प्रति ॥ ९५
तद्बाणैरर्दितं यूथं रक्षसां पीनवक्षसाम् ।
सिंहैरिव बभौ मत्तं गजानामाकुलं कुलम् ॥ ९६
विधम्य राक्षसान्बाणैः साश्वसूतरथान्विभुः ।
ददाह भगवान्वह्निर्भूतानीव युगक्षये ॥ ९७
स दग्ध्वाक्षौहिणीं बाणैर्नैर्ऋतान्रुरुचे भृशम् ।
पुरेव त्रिपुरं दग्ध्वा दिवि देवो महेश्वरः ॥ ९८
युगान्ते सर्वभूतानि दग्ध्वेव वसुरुल्बणः ।
रराज जयतां श्रेष्ठो द्रोणपुत्रस्तवाहितान् ॥ ९९
तेषु राजसहस्रेषु पाण्डवेयेषु भारत ।
नैनं निरीक्षितुं कश्चिच्छक्नोति द्रौणिमाहवे ।
ऋते घटोत्कचाद्वीराद्राक्षसेन्द्रान्महाबलात् ॥ १००
स पुनर्भरतश्रेष्ठ क्रोधाद्रक्तान्तलोचनः ।
तलं तलेन संहत्य संदश्य दशनच्छदम् ।
स्वसूतमब्रवीत्क्रुद्धो द्रोणपुत्राय मां वह ॥ १०१
स ययौ घोररूपेण तेन जैत्रपताकिना ।
द्वैरथं द्रोणपुत्रेण पुनरप्यरिसूदनः ॥ १०२
स चिक्षेप ततः क्रुद्धो द्रोणपुत्राय राक्षसः ।
अष्टचक्रां महारौद्रामशनीं रुद्रनिर्मिताम् ॥ १०३
तामवप्लुत्य जग्राह द्रौणिर्न्यस्य रथे धनुः ।
चिक्षेप चैनां तस्यैव स्यन्दनात्सोऽवपुप्लुवे ॥ १०४

साश्वसूतध्वजं वाहं भस्म कृत्वा महाप्रभा ।
विवेश वसुधां भित्त्वा साशनिर्भ्रंशदारुणा ॥ १०५
द्रौणेस्तत्कर्म दृष्ट्वा तु सर्वभूतान्यपूजयन् ।
यदवप्लुत्य जग्राह घोरां शंकरनिर्मिताम् ॥ १०६
धृष्टद्युम्नरथं गत्वा भैमसेनिस्ततो नृप ।
मुमोच निशितान्बाणान्पुनर्द्रौणेर्महोरसि ॥ १०७
धृष्टद्युम्नोऽप्यसंभ्रान्तो मुमोचाशीविषोपमान् ।
सुवर्णपुङ्खान्विशिखान्द्रोणपुत्रस्य वक्षसि ॥ १०८
ततो मुमोच नाराचान्द्रौणिस्ताभ्यां सहस्रशः ।
तावप्यग्निशिखाप्रख्यैर्जघ्नतुस्तस्य मार्गणान् ॥ १०९
अतितीव्रमभूद्युद्धं तयोः पुरुषसिंहयोः ।
योधानां प्रीतिजननं द्रौणेश्च भरतर्षभ ॥ ११०
ततो रथसहस्रेण द्विरदानां शतैस्त्रिभिः ।
षड्भिर्वाजिसहस्रैश्च भीमस्तं देशमाव्रजत् ॥ १११
ततो भीमात्मजं रक्षो धृष्टद्युम्नं च सानुगम् ।
अयोधयत धर्मात्मा द्रौणिरक्लिष्टकर्मकृत् ॥ ११२
तत्राद्भुततमं द्रौणिर्दर्शयामास विक्रमम् ।
अशक्यं कर्तुमन्येन सर्वभूतेषु भारत ॥ ११३
निमेषान्तरमात्रेण साश्वसूतरथद्विपाम् ।
अक्षौहिणीं राक्षसानां शितैर्बाणैरशातयत् ॥ ११४
मिषतो भीमसेनस्य हैडिम्बेः पार्षतस्य च ।
यमयोर्धर्मपुत्रस्य विजयस्याच्युतस्य च ॥ ११५
प्रगाढमञ्जोगतिभिर्नाराचैरभिताडिताः ।
निपेतुर्द्विरदा भूमौ द्विशृङ्गा इव पर्वताः ॥ ११६
निकृत्तैर्हस्तिहस्तैश्च विचलद्भिरितस्ततः ।
रराज वसुधा कीर्णा विसर्पद्भिरिवोरगैः ॥ ११७
क्षिप्तैः काञ्चनदण्डैश्च नृपच्छत्रैः क्षितिर्बभौ ।
द्यौरिवोदितचन्द्रार्का ग्रहाकीर्णा युगक्षये ॥ ११८
प्रवृद्धध्वजमण्डूकां भेरीविस्तीर्णकच्छपाम् ।
छत्रहंसावलीजुष्टां फेनचामरमालिनीम् ॥ ११९
कङ्कगृध्रमहाग्राहां नैकायुधझषाकुलाम् ।
रथक्षिप्तमहावप्रां पताकारुचिरद्रुमाम् ॥ १२०
शरमीनां महारौद्रां प्रासशक्त्युग्रडुण्डुभाम् ।
मज्जामांसमहापङ्कां कबन्धावर्जितोडुपाम् ॥ १२१
केशशैवलकल्माषां भीरूणां कश्मलावहाम् ।
नागेन्द्रहययोधानां शरीरव्ययसंभवाम् ॥ १२२
शोणितौघमहावेगां द्रौणिः प्रावर्तयन्नदीम् ।
योधार्तरवनिर्घोषां क्षतजोर्मिसमाकुलाम् ॥ १२३
प्रायादतिमहाघोरं यमक्षयमहोदधिम् ।
निहत्य राक्षसान्बाणैर्द्रौणिर्हैडिम्बमार्दयत् ॥ १२४
पुनरप्यतिसंक्रुद्धः सवृकोदरपार्षतान् ।
स नाराचगणैः पार्थान्द्रौणिर्विद्ध्वा महाबलः ॥१२५
जघान सुरथं नाम द्रुपदस्य सुतं विभुः ।
पुनः श्रुतंजयं नाम सुरथस्यानुजं रणे ॥ १२६
बलानीकं जयानीकं जयाश्वं चाभिजघ्निवान् ।
श्रुताह्वयं च राजेन्द्र द्रौणिर्निन्ये यमक्षयम् ॥१२७
त्रिभिश्चान्यैः शरैस्तीक्ष्णैः सुपुङ्खै रुक्ममालिनम् ।
शत्रुंजयं च बलिनं शक्रलोकं निनाय ह ॥ १२८
जघान स पृषध्रं च चन्द्रदेवं च मानिनम् ।
कुन्तिभोजसुतांश्चाजौ दशभिर्दश जघ्निवान् ॥१२९
अश्वत्थामा सुसंक्रुद्धः संधायोग्रमजिह्मगम् ।
मुमोचाकर्णपूर्णेन धनुषा शरमुत्तमम् ।
यमदण्डोपमं घोरमुद्दिश्याशु घटोत्कचम् ॥ १३०
स भित्त्वा हृदयं तस्य राक्षसस्य महाशरः ।
विवेश वसुधां शीघ्रं सपुङ्खः पृथिवीपते ॥ १३१
तं हतं पतितं ज्ञात्वा धृष्टद्युम्नो महारथः ।
द्रौणेः सकाशाद्राजेन्द्र अपनिन्ये रथान्तरम् ॥१३२
तथा पराङ्मुखरथं सैन्यं यौधिष्ठिरं नृप ।
पराजित्य रणे वीरो द्रोणपुत्रो ननाद ह ।
पूजितः सर्वभूतैश्च तव पुत्रैश्च भारत ॥ १३३

अथ शरशतभिन्नकृत्तदेहै-
ईतपतितैः क्षणदाचरैः समन्तात् ।
निधनमुपगतैर्मही कृताभू-
द्गिरिशिखरैरिव दुर्गमातिरौद्रा ॥ १३४
तं सिद्धगन्धर्वपिशाचसंघा
नागाः सुपर्णाः पितरो वयांसि ।
रक्षोगणा भूतगणाश्च द्रौणि-
मपूजयन्नप्सरसः सुराश्च ॥ १३५

इति श्रीमहाभारते द्रोणपर्वणि
एकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥

१३२

संजय उवाच ।

द्रुपदस्यात्मजान्दृष्ट्वा कुन्तिभोजसुतांस्तथा ।
द्रोणपुत्रेण निहतान्राक्षसांश्च सहस्रशः ॥ १
युधिष्ठिरो भीमसेनो धृष्टद्युम्नश्च पार्षतः ।
युयुधानश्च संयत्ता युद्धायैव मनो दधुः ॥ २
सोमदत्तः पुनः क्रुद्धो दृष्ट्वा सात्यकिमाहवे ।
महता शरवर्षेण छादयामास सर्वतः ॥ ३
ततः समभवद्युद्धमतीव भयवर्धनम् ।
त्वदीयानां परेषां च घोरं विजयकाङ्क्षिणाम् ॥ ४
दशभिः सात्वतस्यार्थे भीमो विव्याध कौरवम् ।
सोमदत्तोऽपि तं वीरं शतेन प्रत्यविध्यत ॥ ५
सात्वतस्त्वभिसंक्रुद्धः पुत्राधिभिरभिप्लुतम् ।
वृद्धमृद्धं गुणैः सर्वैर्ययातिमिव नाहुषम् ॥ ६
विव्याध दशभिस्तीक्ष्णैः शरैर्वज्रनिपातिभिः ।
शक्त्या चैनमथाहत्य पुनर्विव्याध सप्तभिः ॥ ७
ततस्तु सात्यकेरर्थे भीमसेनो नवं दृढम् ।
मुमोच परिघं घोरं सोमदत्तस्य मूर्धनि ॥ ८
सात्यकिश्चाग्निसंकाशं मुमोच शरमुत्तमम् ।
सोमदत्तोरसि क्रुद्धः सुपत्रं निशितं युधि ॥ ९
युगपत्पेततुरथ घोरौ परिघमार्गणौ ।
शरीरे सोमदत्तस्य स पपात महारथः ॥ १०
व्यामोहिते तु तनये बाह्लीकः समुपाद्रवत् ।
विसृजञ्शरवर्षाणि कालवर्षीव तोयदः ॥ ११
भीमोऽथ सात्वतस्यार्थे बाह्लीकं नवभिः शरैः ।
पीडयन्वै महात्मानं विव्याध रणमूर्धनि ॥ १२
प्रातिपीयस्तु संक्रुद्धः शक्तिं भीमस्य वक्षसि ।
निचखान महाबाहुः पुरंदर इवाशनिम् ॥ १३
स तयाभिहतो भीमश्चकम्पे च मुमोह च ।
प्राप्य चेतश्च बलवान्गदामस्मै ससर्ज ह ॥ १४
सा पाण्डवेन प्रहिता बाह्लीकस्य शिरोऽहरत् ।
स पपात हतः पृथ्व्यां वज्राहत इवाद्रिराट् ॥ १५
तस्मिन्विनिहते वीरे बाह्लीके पुरुषर्षभे ।
पुत्रास्तेऽभ्यर्दयन्भीमं दश दाशरथेः समाः ॥ १६
नाराचैर्दशभिर्भीमस्तान्निहत्य तवात्मजान् ।
कर्णस्य दयितं पुत्रं वृषसेनमवाकिरत् ॥ १७
ततो वृषरथो नाम भ्राता कर्णस्य विश्रुतः ।
जघान भीमं नाराचैस्तमप्यभ्यवधीद्बली ॥ १८
ततः सप्त रथान्वीरः स्यालानां तव भारत ।
निहत्य भीमो नाराचैः शतचन्द्रमपोथयत् ॥ १९
अमर्षयन्तो निहतं शतचन्द्रं महारथम् ।
शकुनेर्भ्रातरो वीरा गजाक्षः शरभो विभुः ।
अभिद्रुत्य शरैस्तीक्ष्णैर्भीमसेनमताडयन् ॥ २०
स तुद्यमानो नाराचैर्वृष्टिवेगैरिवर्षभः ।
जघान पञ्चभिर्बाणैः पञ्चैवातिबलो रथान् ।
तान्दृष्ट्वा निहतान्वीरान्विचेलुर्नृपसत्तमाः ॥ २१
ततो युधिष्ठिरः क्रुद्धस्तवानीकमशातयत् ।
मिषतः कुम्भयोनेश्च पुत्राणां च तवानघ ॥ २२
अम्बष्ठान्मालवाञ्शूरांस्त्रिगर्तान्सशिबीनपि ।
प्राहिणोन्मृत्युलोकाय गणान्युद्धे युधिष्ठिरः ॥ २३

अभीषाहाञ्शूरसेनान्बाह्लीकान्सवसातिकान् ।
निकृत्य पृथिवीं राजा चक्रे शोणितकर्दमाम् ॥ २४
यौधेयारट्टराजन्यमद्रकाणां गणान्युधि ।
प्राहिणोन्मृत्युलोकाय शूरान्बाणैर्युधिष्ठिरः ॥ २५
हताहरत गृह्णीत विध्यत व्यवकृन्तत ।
इत्यासीत्तुमुलः शब्दो युधिष्ठिररथं प्रति ॥ २६
सैन्यानि द्रावयन्तं तं द्रोणो दृष्ट्वा युधिष्ठिरम् ।
चोदितस्तव पुत्रेण सायकैरभ्यवाकिरत् ॥ २७
द्रोणस्तु परमक्रुद्धो वायव्यास्त्रेण पार्थिवम् ।
विव्याध सोऽस्य तद्दिव्यमस्त्रमस्त्रेण जघ्निवान् ॥ २८
तस्मिन्विनिहते चास्त्रे भारद्वाजो युधिष्ठिरे ।
वारुणं याम्यमाग्नेयं त्वाष्ट्रं सावित्रमेव च ।
चिक्षेप परमक्रुद्धो जिघांसुः पाण्डुनन्दनम् ॥ २९
क्षिप्तानि क्षिप्यमाणानि तानि चास्त्राणि धर्मजः ।
जघानास्त्रैर्महाबाहुः कुम्भयोनेरवित्रसन् ॥ ३०
सत्यां चिकीर्षमाणस्तु प्रतिज्ञां कुम्भसंभवः ।
प्रादुश्चक्रेऽस्त्रमैन्द्रं वै प्राजापत्यं च भारत ।
जिघांसुर्धर्मतनयं तव पुत्रहिते रतः ॥ ३१
पतिः कुरूणां गजसिंहगामी
विशालवक्षाः पृथुलोहिताक्षः ।
प्रादुश्चकारास्त्रमहीनतेजा
माहेन्द्रमन्यत्स जघान तेऽस्त्रे ॥ ३२
विहन्यमानेष्वस्त्रेषु द्रोणः क्रोधसमन्वितः ।
युधिष्ठिरवधप्रेप्सुर्ब्राह्ममस्त्रमुदैरयत् ॥ ३३
ततो नाज्ञासिषं किंचिद्घोरेण तमसावृते ।
सर्वभूतानि च परं त्रासं जग्मुर्महीपते ॥ ३४
ब्रह्मास्त्रमुद्यतं दृष्ट्वा कुन्तीपुत्रो युधिष्ठिरः ।
ब्रह्मास्त्रेणैव राजेन्द्र तदस्त्रं प्रत्यवारयत् ॥ ३५
ततः सैनिकमुख्यास्ते प्रशशंसुर्नरर्षभौ ।
द्रोणपार्थौ महेष्वासौ सर्वयुद्धविशारदौ ॥ ३६
ततः प्रमुच्य कौन्तेयं द्रोणो द्रुपदवाहिनीम् ।
व्यधमद्रोषताम्राक्षो वायव्यास्त्रेण भारत ॥ ३७
ते हन्यमाना द्रोणेन पाञ्चालाः प्राद्रवन्भयात् ।
पश्यतो भीमसेनस्य पार्थस्य च महात्मनः ॥ ३८
ततः किरीटी भीमश्च सहसा संन्यवर्तताम् ।
महद्भ्यां रथवंशाभ्यां परिगृह्य बलं तव ॥ ३९
बीभत्सुर्दक्षिणं पार्श्वमुत्तरं तु वृकोदरः ।
भारद्वाजं शरौघाभ्यां महद्भ्यामभ्यवर्षताम् ॥ ४०
तौ तदा सृञ्जयाश्चैव पाञ्चालाश्च महौजसः ।
अन्वगच्छन्महाराज मत्स्याश्च सह सात्वतैः ॥ ४१
ततः सा भारती सेना वध्यमाना किरीटिना ।
द्रोणेन वार्यमाणास्ते स्वयं तव सुतेन च ।
नाशक्यन्त महाराज योधा वारयितुं तदा ॥ ४२

इति श्रीमहाभारते द्रोणपर्वणि
द्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥

१३३

संजय उवाच ।

उदीर्यमाणं तद्दृष्ट्वा पाण्डवानां महद्बलम् ।
अविषह्यं च मन्वानः कर्णं दुर्योधनोऽब्रवीत् ॥ १
अयं स कालः संप्राप्तो मित्राणां मित्रवत्सल ।
त्रायस्व समरे कर्ण सर्वान्योधान्महाबल ॥ २
पाञ्चालैर्मत्स्यकैकेयैः पाण्डवैश्च महारथैः ।
वृतान्समन्तात्संक्रुद्धैर्निःश्वसद्भिरिवोरगैः ॥ ३
एते नदन्ति संहृष्टाः पाण्डवा जितकाशिनः ।
शक्रोपमाश्च बहवः पाञ्चालानां रथव्रजाः ॥ ४

कर्ण उवाच ।

परित्रातुमिह प्राप्तो यदि पार्थं पुरंदरः ।
तमप्याशु पराजित्य ततो हन्तास्मि पाण्डवम् ॥ ५
सत्यं ते प्रतिजानामि समाश्वसिहि भारत ।
हन्तास्मि पाण्डुतनयान्पाञ्चालांश्च समागतान् ॥ ६

जयं ते प्रतिजानामि वासवस्येव पावकिः ।
प्रियं तव मया कार्यमिति जीवामि पार्थिव ॥ ७
सर्वेषामेव पार्थानां फल्गुनो बलवत्तरः ।
तस्यामोघां विमोक्ष्यामि शक्तिं शक्रविनिर्मिताम् ॥ ८
तस्मिन्हते महेष्वासे भ्रातरस्तस्य मानद ।
तव वश्या भविष्यन्ति वनं यास्यन्ति वा पुनः ॥ ९
मयि जीवति कौरव्य विषादं मा कृथाः क्वचित् ।
अहं जेष्यामि समरे सहितान्सर्वपाण्डवान् ॥ १०
पाञ्चालान्केकयांश्चैव वृष्णींश्चापि समागतान् ।
बाणौघैः शकलीकृत्य तव दास्यामि मेदिनीम् ॥ ११

संजय उवाच ।

एवं ब्रुवाणं कर्णं तु कृपः शारद्वतोऽब्रवीत् ।
स्मयन्निव महाबाहुः सूतपुत्रमिदं वचः ॥ १२
शोभनं शोभनं कर्ण सनाथः कुरुपुंगवः ।
त्वया नाथेन राधेय वचसा यदि सिध्यति ॥ १३
बहुशः कत्थसे कर्ण कौरव्यस्य समीपतः ।
न तु ते विक्रमः कश्चिद्दृश्यते बलमेव वा ॥ १४
समागमः पाण्डुसुतैर्दृष्टस्ते बहुशो युधि ।
सर्वत्र निर्जितश्चासि पाण्डवैः सूतनन्दन ॥ १५
ह्रियमाणे तदा कर्ण गन्धर्वैर्धृतराष्ट्रजे ।
तदायुध्यन्त सैन्यानि त्वमेकस्तु पलायथाः ॥ १६
विराटनगरे चापि समेताः सर्वकौरवाः ।
पार्थेन निर्जिता युद्धे त्वं च कर्ण सहानुजः ॥ १७
एकस्याप्यसमर्थस्त्वं फल्गुनस्य रणाजिरे ।
कथमुत्सहसे जेतुं सकृष्णान्सर्वपाण्डवान् ॥ १८
अब्रुवन्कर्ण युध्यस्व बहु कत्थसि सूतज ।
अनुक्त्वा विक्रमेद्यस्तु तद्वै सत्पुरुषव्रतम् ॥ १९
गर्जित्वा सूतपुत्र त्वं शारदाभ्रमिवाजलम् ।
निष्फलो दृश्यसे कर्ण तच्च राजा न बुध्यते ॥ २०
तावद्गर्जसि राधेय यावत्पार्थं न पश्यसि ।
पुरा पार्थं हि ते दृष्ट्वा दुर्लभं गर्जितं भवेत् ॥ २१
त्वमनासाद्य तान्बाणान्फल्गुनस्य विगर्जसि ।
पार्थसायकविद्धस्य दुर्लभं गर्जितं भवेत् ॥ २२
बाहुभिः क्षत्रियाः शूरा वाग्भिः शूरा द्विजातयः ।
धनुषा फल्गुनः शूरः कर्णः शूरो मनोरथैः ॥ २३
एवं परुषितस्तेन तदा शारद्वतेन सः ।
कर्णः प्रहरतां श्रेष्ठः कृपं वाक्यमथाब्रवीत् ॥ २४
शूरा गर्जन्ति सततं प्रावृषीव बलाहकाः ।
फलं चाशु प्रयच्छन्ति बीजमुप्तमृताविव ॥ २५
दोषमत्र न पश्यामि शूराणां रणमूर्धनि ।
तत्तद्विकत्थमानानां भारं चोद्वहतां मृधे ॥ २६
यं भारं पुरुषो वोढुं मनसा हि व्यवस्यति ।
दैवमस्य ध्रुवं तत्र साहाय्यायोपपद्यते ॥ २७
व्यवसायद्वितीयोऽहं मनसा भारमुद्वहन् ।
गर्जामि यद्यहं विप्र तव किं तत्र नश्यति ॥ २८
वृथा शूरा न गर्जन्ति सजला इव तोयदाः ।
सामर्थ्यमात्मनो ज्ञात्वा ततो गर्जन्ति पण्डिताः ॥
सोऽहमद्य रणे यत्तः सहितौ कृष्णपाण्डवौ ।
उत्सहे तरसा जेतुं ततो गर्जामि गौतम ॥ ३०
पश्य त्वं गर्जितस्यास्य फलं मे विप्र सानुगः ।
हत्वा पाण्डुसुतानाजौ सहकृष्णान्ससात्वतान् ।
दुर्योधनाय दास्यामि पृथिवीं हतकण्टकाम् ॥ ३१

कृप उवाच ।

मनोरथप्रलापो मे न ग्राह्यस्तव सूतज ।
यदा क्षिपसि वै कृष्णौ धर्मराजं च पाण्डवम् ॥
ध्रुवस्तत्र जयः कर्ण यत्र युद्धविशारदौ ।
देवगन्धर्वयक्षाणां मनुष्योरगरक्षसाम् ।
दंशितानामपि रणे अजेयौ कृष्णपाण्डवौ ॥ ३३
ब्रह्मण्यः सत्यवाग्दान्तो गुरुदैवतपूजकः ।
नित्यं धर्मरतश्चैव कृतास्त्रश्च विशेषतः ।

धृतिमांश्च कृतज्ञश्च धर्मपुत्रो युधिष्ठिरः ॥ ३४
भ्रातरश्चास्य बलिनः सर्वास्त्रेषु कृतश्रमाः ।
गुरुवृत्तिरताः प्राज्ञा धर्मनित्या यशस्विनः ॥ ३५
संबन्धिनश्चेन्द्रवीर्याः स्वनुरक्ताः प्रहारिणः ।
धृष्टद्युम्नः शिखण्डी च दौर्मुखिर्जनमेजयः ॥ ३६
चन्द्रसेनो भद्रसेनः कीर्तिधर्मा ध्रुवो धरः ।
वसुचन्द्रो दामचन्द्रः सिंहचन्द्रः सुवेधनः ॥ ३७
द्रुपदस्य तथा पुत्रा द्रुपदश्च महास्त्रवित् ।
येषामर्थाय संयत्तो मत्स्यराजः सहानुगः ॥ ३८
शतानीकः सुदर्शनः श्रुतानीकः श्रुतध्वजः ।
बलानीको जयानीको जयाश्वो रथवाहनः ॥ ३९
चन्द्रोदयः कामरथो विराटभ्रातरः शुभाः ।
यमौ च द्रौपदेयाश्च राक्षसश्च घटोत्कचः ।
येषामर्थाय युध्यन्ते न तेषां विद्यते क्षयः ॥ ४०
कामं खलु जगत्सर्वं सदेवासुरमानवम् ।
सयक्षराक्षसगणं सभूतभुजगद्विपम् ।
निःशेषमस्त्रवीर्येण कुर्यातां भीमफल्गुनौ ॥ ४१
युधिष्ठिरश्च पृथिवीं निर्दहेद्घोरचक्षुषा ।
अप्रमेयबलः शौरिर्येषामर्थे च दंशितः ।
कथं तान्संयुगे कर्ण जेतुमुत्सहसे परान् ॥ ४२
महानपनयस्त्वेष तव नित्यं हि सूतज ।
यस्त्वमुत्सहसे योद्धुं समरे शौरिणा सह ॥ ४३

संजय उवाच ।

एवमुक्तस्तु राधेयः प्रहसन्भरतर्षभ ।
अब्रवीच्च तदा कर्णो गुरुं शारद्वतं कृपम् ॥ ४४
सत्यमुक्तं त्वया ब्रह्मन्पाण्डवान्प्रति यद्वचः ।
एते चान्ये च बहवो गुणाः पाण्डुसुतेषु वै ॥ ४५
अजय्याश्च रणे पार्था देवैरपि सवासवैः ।
सदैत्ययक्षगन्धर्वपिशाचोरगराक्षसैः ।
तथापि पार्थाञ्जेष्यामि शक्त्या वासवदत्तया ॥ ४६
ममाप्यमोघा दत्तेयं शक्तिः शक्रेण वै द्विज ।
एतया निहनिष्यामि सव्यसाचिनमाहवे ॥ ४७
हते तु पाण्डवे कृष्णो भ्रातरश्चास्य सोदराः ।
अनर्जुना न शक्ष्यन्ति महीं भोक्तुं कथंचन ॥ ४८
तेषु नष्टेषु सर्वेषु पृथिवीयं ससागरा ।
अयत्नात्कौरवेयस्य वशे स्थास्यति गौतम ॥ ४९
सुनीतैरिह सर्वार्थाः सिध्यन्ते नात्र संशयः ।
एतमर्थमहं ज्ञात्वा ततो गर्जामि गौतम ॥ ५०
त्वं तु वृद्धश्च विप्रश्च अशक्तश्चापि संयुगे ।
कृतस्नेहश्च पार्थेषु मोहान्मामवमन्यसे ॥ ५१
यद्येवं वक्ष्यसे भूयो मामप्रियमिह द्विज ।
ततस्ते खड्गमुद्यम्य जिह्वां छेत्स्यामि दुर्मते ॥ ५२
यच्चापि पाण्डवान्विप्र स्तोतुमिच्छसि संयुगे ।
भीषयन्सर्वसैन्यानि कौरवेयाणि दुर्मते ।
अत्रापि शृणु मे वाक्यं यथावद्वदतो द्विज ॥ ५३
दुर्योधनश्च द्रोणश्च शकुनिर्दुर्मुखो जयः ।
दुःशासनो वृषसेनो मद्रराजस्त्वमेव च ।
सोमदत्तश्च भूरिश्च तथा द्रौणिर्विविंशतिः ॥ ५४
तिष्ठेयुर्दंशिता यत्र सर्वे युद्धविशारदाः ।
जयेदेतान्रणे को नु शक्रतुल्यबलोऽप्यरिः ॥ ५५
शूराश्च हि कृतास्त्राश्च बलिनः स्वर्गलिप्सवः ।
धर्मज्ञा युद्धकुशला हन्युर्युद्धे सुरानपि ॥ ५६
एते स्थास्यन्ति संग्रामे पाण्डवानां वधार्थिनः ।
जयमाकाङ्क्षमाणा हि कौरवेयस्य दंशिताः ॥ ५७
दैवायत्तमहं मन्ये जयं सुबलिनामपि ।
यत्र भीष्मो महाबाहुः शेते शरशताचितः ॥ ५८
विकर्णश्चित्रसेनश्च बाह्लीकोऽथ जयद्रथः ।
भूरिश्रवा जयश्चैव जलसंधः सुदक्षिणः ॥ ५९
शैलश्च रथिनां श्रेष्ठो भगदत्तश्च वीर्यवान् ।
एते चान्ये च राजानो देवैरपि सुदुर्जयाः ॥ ६०

निहताः समरे शूराः पाण्डवैर्बलवत्तराः ।
किमन्यद्दैवसंयोगान्मन्यसे पुरुषाधम ॥ ६१
यांश्च तान्स्तौषि सततं दुर्योधनरिपून्द्विज ।
तेषामपि हताः शूराः शतशोऽथ सहस्रशः ॥ ६२
क्षीयन्ते सर्वसैन्यानि कुरूणां पाण्डवैः सह ।
प्रभावं नात्र पश्यामि पाण्डवानां कथंचन ॥ ६३
यांस्तान्बलवतो नित्यं मन्यसे त्वं द्विजाधम ।
यतिष्येऽहं यथाशक्ति योद्धुं तैः सह संयुगे ।
दुर्योधनहितार्थाय जयो दैवे प्रतिष्ठितः ॥ ६४

इति श्रीमहाभारते द्रोणपर्वणि
त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥

१३४

संजय उवाच ।

तथा परुषितं दृष्ट्वा सूतपुत्रेण मातुलम् ।
खड्गमुद्यम्य वेगेन द्रौणिरभ्यपतद्द्रुतम् ॥ १

अश्वत्थामोवाच ।

कर्ण पश्य सुदुर्बुद्धे तिष्ठेदानीं नराधम ।
एष तेऽद्य शिरः कायादुद्धरामि सुदुर्मते ॥ २

संजय उवाच ।

तमुत्पतन्तं वेगेन राजा दुर्योधनः स्वयम् ।
न्यवारयन्महाराज कृपश्च द्विपदां वरः ॥ ३

कर्ण उवाच ।

शूरोऽयं समरश्लाघी दुर्मतिश्च द्विजाधमः ।
आसादयतु मद्वीर्यं मुञ्चेमं कुरुसत्तम ॥ ४

अश्वत्थामोवाच ।

तवैतत्क्षम्यतेऽस्माभिः सूतात्मज सुदुर्मते ।
दर्पमुत्सिक्तमेतत्ते फल्गुनो नाशयिष्यति ॥ ५

दुर्योधन उवाच ।

अश्वत्थामन्प्रसीदस्व क्षन्तुमर्हसि मानद ।
कोपः खलु न कर्तव्यः सूतपुत्रे कथंचन ॥ ६
त्वयि कर्णे कृपे द्रोणे मद्रराजेऽथ सौबले ।
महत्कार्यं समायत्तं प्रसीद द्विजसत्तम ॥ ७
एते ह्यभिमुखाः सर्वे राधेयेन युयुत्सवः ।
आयान्ति पाण्डवा ब्रह्मन्नाह्वयन्तः समन्ततः ॥ ८

संजय उवाच ।

कर्णोऽपि रथिनां श्रेष्ठश्चापमुद्यम्य वीर्यवान् ।
कौरवाग्र्यैः परिवृतः शक्रो देवगणैरिव ।
पर्यतिष्ठत तेजस्वी स्वबाहुबलमाश्रितः ॥ ९
ततः प्रववृते युद्धं कर्णस्य सह पाण्डवैः ।
संरब्धस्य महाराज सिंहनादविनादितम् ॥ १०
ततस्ते पाण्डवा राजन्पाञ्चालाश्च यशस्विनः ।
दृष्ट्वा कर्णं महाबाहुमुच्चैः शब्दमथानदन् ॥ ११
अयं कर्णः कुतः कर्णस्तिष्ठ कर्ण महारणे ।
युध्यस्व सहितोऽस्माभिर्दुरात्मन्पुरुषाधम ॥ १२
अन्ये तु दृष्ट्वा राधेयं क्रोधरक्तेक्षणाब्रुवन् ।
हन्यतामयमुत्सिक्तः सूतपुत्रोऽल्पचेतनः ॥ १३
सर्वैः पार्थिवशार्दूलैर्नानेनार्थोऽस्ति जीवता ।
अत्यन्तवैरी पार्थानां सततं पापपूरुषः ॥ १४
एष मूलं ह्यनर्थानां दुर्योधनमते स्थितः ।
हतैनमिति जल्पन्तः क्षत्रियाः समुपाद्रवन् ॥ १५
महता शरवर्षेण छादयन्तो महारथाः ।
वधार्थं सूतपुत्रस्य पाण्डवेयेन चोदिताः ॥ १६
तांस्तु सर्वांस्तथा दृष्ट्वा धावमानान्महारथान् ।
न विव्यथे सूतपुत्रो न च त्रासमगच्छत ॥ १७
दृष्ट्वा नगरकल्पं तमुद्धूतं सैन्यसागरम् ।
पिप्रीषुस्तव पुत्राणां संग्रामेष्वपराजितः ॥ १८
सायकौघेन बलवान्क्षिप्रकारी महाबलः ।
वारयामास तत्सैन्यं समन्ताद्भरतर्षभ ॥ १९
ततस्तु शरवर्षेण पार्थिवास्तमवारयन् ।
धनूंषि ते विधुन्वानाः शतशोऽथ सहस्रशः ।

अयोधयन्त राधेयं शक्रं दैत्यगणा इव ॥ २०
शरवर्षं तु तत्कर्णः पार्थिवैः समुदीरितम् ।
शरवर्षेण महता समन्ताद्व्यकिरत्प्रभो ॥ २१
तद्युद्धमभवत्तेषां कृतप्रतिकृतैषिणाम् ।
यथा देवासुरे युद्धे शक्रस्य सह दानवैः ॥ २२
तत्राद्भुतमपश्याम सूतपुत्रस्य लाघवम् ।
यदेनं समरे यत्ता नाप्नुवन्त परे युधि ॥ २३
निवार्य च शरौघांस्तान्पार्थिवानां महारथः ।
युगेष्वीषासु छत्रेषु ध्वजेषु च हयेषु च ।
आत्मनामाङ्कितान्बाणान्राधेयः प्राहिणोच्छितान् ॥
ततस्ते व्याकुलीभूता राजानः कर्णपीडिताः ।
बभ्रमुस्तत्र तत्रैव गावः शीतार्दिता इव ॥ २५
हयानां वध्यमानानां गजानां रथिनां तथा ।
तत्र तत्राभ्यवेक्षामः संघान्कर्णेन पातितान् ॥ २६
शिरोभिः पतितै राजन्बाहुभिश्च समन्ततः ।
आस्तीर्णा वसुधा सर्वा शूराणामनिवर्तिनाम् ॥२७
हतैश्च हन्यमानैश्च निष्टनद्भिश्च सर्वशः ।
बभूवायोधनं रौद्रं वैवस्वतपुरोपमम् ॥ २८
ततो दुर्योधनो राजा दृष्ट्वा कर्णस्य विक्रमम् ।
अश्वत्थामानमासाद्य तदा वाक्यमुवाच ह ॥ २९
युध्यतेऽसौ रणे कर्णो दंशितः सर्वपार्थिवैः ।
पश्यैतां द्रवतीं सेनां कर्णसायकपीडिताम् ।
कार्त्तिकेयेन विध्वस्तामासुरीं पृतनामिव ॥ ३०
दृष्ट्वैतां निर्जितां सेनां रणे कर्णेन धीमता ।
अभियात्येष बीभत्सुः सूतपुत्रजिघांसया ॥ ३१
तद्यथा पश्यमानानां सूतपुत्रं महारथम् ।
न हन्यात्पाण्डवः संख्ये तथा नीतिर्विधीयताम् ॥
ततो द्रौणिः कृपः शल्यो हार्दिक्यश्च महारथः ।
प्रत्युद्ययुस्तदा पार्थं सूतपुत्रपरीप्सया ॥ ३३
आयान्तं दृश्य कौन्तेयं वृत्रं देवचमूमिव ।
प्रत्युद्ययौ तदा कर्णो यथा शक्रः प्रतापवान् ॥ ३४

धृतराष्ट्र उवाच ।

संरब्धं फल्गुनं दृष्ट्वा कालान्तकयमोपमम् ।
कर्णो वैकर्तनः सूत प्रत्यपद्यत्किमुत्तरम् ॥ ३५
स ह्यस्पर्धत पार्थेन नित्यमेव महारथः ।
आशंसते च बीभत्सुं युद्धे जेतुं सुदारुणे ॥ ३६
स तु तं सहसा प्राप्तं नित्यमत्यन्तवैरिणम् ।
कर्णो वैकर्तनः सूत किमुत्तरमपद्यत ॥ ३७

संजय उवाच ।

आयान्तं पाण्डवं दृष्ट्वा गजः प्रतिगजं यथा ।
असंभ्रान्ततरः कर्णः प्रत्युदीयाद्धनंजयम् ॥ ३८
तमापतन्तं वेगेन वैकर्तनमजिह्मगैः ।
वारयामास तेजस्वी पाण्डवः शत्रुतापनः ॥ ३९
तं कर्णः शरजालेन छादयामास मारिष ।
विव्याध च सुसंक्रुद्धः शरैस्त्रिभिरजिह्मगैः ॥ ४०
तस्य तल्लाघवं पार्थो नामृष्यत महाबलः ।
तस्मै बाणाञ्शिलाधौतान्प्रसन्नाग्रानजिह्मगान् ॥ ४१
प्राहिणोत्सूतपुत्राय त्रिशतं शत्रुतापनः ।
विव्याध चैनं संरब्धो बाणेनैकेन वीर्यवान् ॥ ४२
सव्ये भुजाग्रे बलवान्नाराचेन हसन्निव ।
तस्य विद्धस्य वेगेन कराच्चापं पपात ह ॥ ४३
पुनरादाय तच्चापं निमेषार्धान्महाबलः ।
छादयामास बाणौघैः फल्गुनं कृतहस्तवत् ॥ ४४
शरवृष्टिं तु तां मुक्तां सूतपुत्रेण भारत ।
व्यधमच्छरवर्षेण स्मयन्निव धनंजयः ॥ ४५
तौ परस्परमासाद्य शरवर्षेण पार्थिव ।
छादयेतां महेष्वासौ कृतप्रतिकृतैषिणौ ॥ ४६
तदद्भुतमभूद्युद्धं कर्णपाण्डवयोर्मृधे ।
क्रुद्धयोर्वाशिताहेतोर्वन्ययोर्गजयोरिव ॥ ४७
ततः पार्थो महेष्वासो दृष्ट्वा कर्णस्य विक्रमम् ।

मुष्टिदेशे धनुस्तस्य चिच्छेद त्वरयान्वितः ॥ ४८
अश्वांश्च चतुरो भल्लैरनयद्यमसादनम् ।
सारथेश्च शिरः कायादहरच्छत्रुतापनः ॥ ४९
अथैनं छिन्नधन्वानं हताश्वं हतसारथिम् ।
विव्याध सायकैः पार्थश्चतुर्भिः पाण्डुनन्दनः ॥५०
हताश्वात्तु रथात्तूर्णमवप्लुत्य नरर्षभः ।
आरुरोह रथं तूर्णं कृपस्य शरपीडितः ॥ ५१
राधेयं निर्जितं दृष्ट्वा तावका भरतर्षभ ।
धनंजयशरैर्नुन्नाः प्राद्रवन्त दिशो दश ॥ ५२
द्रवतस्तान्समालोक्य राजा दुर्योधनो नृप ।
निवर्तयामास तदा वाक्यं चेदमुवाच ह ॥ ५३
अलं द्रुतेन वः शूरास्तिष्ठध्वं क्षत्रियर्षभाः ।
एष पार्थवधायाहं स्वयं गच्छामि संयुगे ।
अहं पार्थान्हनिष्यामि सपाञ्चालान्ससोमकान् ॥
अद्य मे युध्यमानस्य सह गाण्डीवधन्वना ।
द्रक्ष्यन्ति विक्रमं पार्थाः कालस्येव युगक्षये ॥ ५५
अद्य मद्बाणजालानि विमुक्तानि सहस्रशः ।
द्रक्ष्यन्ति समरे योधाः शलभानामिवायतीः ॥ ५६
अद्य बाणमयं वर्षं सृजतो मम धन्विनः ।
जीमूतस्येव घर्मान्ते द्रक्ष्यन्ति युधि सैनिकाः ॥ ५७
जेष्याम्यद्य रणे पार्थं सायकैर्नतपर्वभिः ।
तिष्ठध्वं समरे शूरा भयं त्यजत फल्गुनात् ॥ ५८
न हि मद्वीर्यमासाद्य फल्गुनः प्रसहिष्यति ।
यथा वेलां समासाद्य सागरो मकरालयः ॥ ५९
इत्युक्त्वा प्रययौ राजा सैन्येन महता वृतः ।
फल्गुनं प्रति दुर्धर्षः क्रोधसंरक्तलोचनः ॥ ६०
तं प्रयान्तं महाबाहुं दृष्ट्वा शारद्वतस्तदा ।
अश्वत्थामानमासाद्य वाक्यमेतदुवाच ह ॥ ६१
एष राजा महाबाहुरमर्षी क्रोधमूर्छितः ।
पतंगवृत्तिमास्थाय फल्गुनं योद्धुमिच्छति ॥ ६२
यावन्नः पश्यमानानां प्राणान्पार्थेन संगतः ।
न जह्यात्पुरुषव्याघ्रस्तावद्वारय कौरवम् ॥ ६३
यावत्फल्गुनबाणानां गोचरं नाधिगच्छति ।
कौरवः पार्थिवो वीरस्तावद्वारय तं द्रुतम् ॥ ६४
यावत्पार्थशरैर्घोरैर्निर्मुक्तोरगसंनिभैः ।
न भस्मीक्रियते राजा तावद्युद्धान्निवार्यताम् ॥ ६५
अयुक्तमिव पश्यामि तिष्ठत्स्वस्मासु मानद ।
स्वयं युद्धाय यद्राजा पार्थं यात्यसहायवान् ॥ ६६
दुर्लभं जीवितं मन्ये कौरव्यस्य किरीटिना ।
युध्यमानस्य पार्थेन शार्दूलेनेव हस्तिनः ॥ ६७
मातुलेनैवमुक्तस्तु द्रौणिः शस्त्रभृतां वरः ।
दुर्योधनमिदं वाक्यं त्वरितं समभाषत ॥ ६८
मयि जीवति गान्धारे न युद्धं गन्तुमर्हसि ।
मामनादृत्य कौरव्य तव नित्यं हितैषिणम् ॥ ६९
न हि ते संभ्रमः कार्यः पार्थस्य विजयं प्रति ।
अहमावारयिष्यामि पार्थं तिष्ठ सुयोधन ॥ ७०

दुर्योधन उवाच ।

आचार्यः पाण्डुपुत्रान्वै पुत्रवत्परिरक्षति ।
त्वमप्युपेक्षां कुरुषे तेषु नित्यं द्विजोत्तम ॥ ७१
मम वा मन्दभाग्यत्वान्मन्दस्ते विक्रमो युधि ।
धर्मराजप्रियार्थं वा द्रौपद्या वा न विद्म तत् ॥७२
धिगस्तु मम लुब्धस्य यत्कृते सर्वबान्धवाः ।
सुखार्हाः परमं दुःखं प्राप्नुवन्त्यपराजिताः ॥ ७३
को हि शस्त्रभृतां मुख्यो महेश्वरसमो युधि ।
शत्रून्न क्षपयेच्छक्तो यो न स्याद्गौतमीसुतः ॥ ७४
अश्वत्थामन्प्रसीदस्व नाशयैतान्ममाहितान् ।
तवास्त्रगोचरे शक्ताः स्थातुं देवापि नानघ ॥ ७५
पाञ्चालान्सोमकांश्चैव जहि द्रौणे सहानुगान् ।
वयं शेषान्हनिष्यामस्त्वयैव परिरक्षिताः ॥ ७६
एते हि सोमका विप्र पाञ्चालाश्च यशस्विनः ।

मम सैन्येषु संरब्धा विचरन्ति दवाग्निवत् ॥ ७७
तान्वारय महाबाहो केकयांश्च नरोत्तम ।
पुरा कुर्वन्ति निःशेषं रक्ष्यमाणाः किरीटिना ॥७८
आदौ वा यदि वा पश्चात्तवेदं कर्म मारिष ।
त्वमुत्पन्नो महाबाहो पाञ्चालानां वधं प्रति ॥ ७९
करिष्यसि जगत्सर्वमपाञ्चालं किलाच्युत ।
एवं सिद्धाब्रुवन्वाचो भविष्यति च तत्तथा ॥ ८०
न तेऽस्त्रगोचरे शक्ताः स्थातुं देवाः सवासवाः ।
किमु पार्थाः सपाञ्चालाः सत्यमेतद्वचो मम ॥ ८१

इति श्रीमहाभारते द्रोणपर्वणि
चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥

१३५

संजय उवाच ।

दुर्योधनेनैवमुक्तो द्रौणिराहवदुर्मदः ।
प्रत्युवाच महाबाहो यथा वदसि कौरव ॥ १
प्रिया हि पाण्डवा नित्यं मम चापि पितुश्च मे ।
तथैवावां प्रियौ तेषां न तु युद्धे कुरूद्वह ।
शक्तितस्तात युध्यामस्त्यक्त्वा प्राणानभीतवत् ॥ २
अहं कर्णश्च शल्यश्च कृपो हार्दिक्य एव च ।
निमेषात्पाण्डवीं सेनां क्षपयेम नृपोत्तम ॥ ३
ते चापि कौरवीं सेनां निमेषार्धात्कुरूद्वह ।
क्षपयेयुर्महाबाहो न स्याम यदि संयुगे ॥ ४
युध्यतां पाण्डवाञ्शक्त्या तेषां चास्मान्युयुत्सताम् ।
तेजस्तु तेज आसाद्य प्रशमं याति भारत ॥ ५
अशक्या तरसा जेतुं पाण्डवानामनीकिनी ।
जीवत्सु पाण्डुपुत्रेषु तद्धि सत्यं ब्रवीमि ते ॥ ६
आत्मार्थं युध्यमानास्ते समर्थाः पाण्डुनन्दनाः ।
किमर्थं तव सैन्यानि न हनिष्यन्ति भारत ॥ ७
त्वं हि लुब्धतमो राजन्निकृतिज्ञश्च कौरव ।
सर्वातिशङ्की मानी च ततोऽस्मानतिशङ्कसे ॥ ८
अहं तु यत्नमास्थाय त्वदर्थे त्यक्तजीवितः ।
एष गच्छामि संग्रामं त्वत्कृते कुरुनन्दन ॥ ९
योत्स्येऽहं शत्रुभिः सार्धं जेष्यामि च वरान्वरान् ।
पाञ्चालैः सह योत्स्यामि सोमकैः केकयैस्तथा ।
पाण्डवेयैश्च संग्रामे त्वत्प्रियार्थमरिंदम ॥ १०
अद्य मद्बाणनिर्दग्धाः पाञ्चालाः सोमकास्तथा ।
सिंहेनेवार्दिता गावो विद्रविष्यन्ति सर्वतः ॥ ११
अद्य धर्मसुतो राजा दृष्ट्वा मम पराक्रमम् ।
अश्वत्थाममयं लोकं मंस्यते सह सोमकैः ॥ १२
आगमिष्यति निर्वेदं धर्मपुत्रो युधिष्ठिरः ।
दृष्ट्वा विनिहतान्संख्ये पाञ्चालान्सोमकैः सह ॥१३
ये मां युद्धेऽभियोत्स्यन्ति तान्हनिष्यामि भारत ।
न हि ते वीर मुच्येरन्मद्बाह्वन्तरमागताः ॥ १४
एवमुक्त्वा महाबाहुः पुत्रं दुर्योधनं तव ।
अभ्यवर्तत युद्धाय द्रावयन्सर्वधन्विनः ।
चिकीर्षुस्तव पुत्राणां प्रियं प्राणभृतां वरः ॥ १५
ततोऽब्रवीत्सकैकेयान्पाञ्चालान्गौतमीसुतः ।
प्रहरध्वमितः सर्वे मम गात्रे महारथाः ।
स्थिरीभूताश्च युध्यध्वं दर्शयन्तोऽस्त्रलाघवम् ॥ १६
एवमुक्तास्तु ते सर्वे शस्त्रवृष्टिमपातयन् ।
द्रौणिं प्रति महाराज जलं जलधरा इव ॥ १७
तान्निहत्य शरान्द्रौणिर्दश वीरानपोथयत् ।
प्रमुखे पाण्डुपुत्राणां धृष्टद्युम्नस्य चाभिभो ॥ १८
ते हन्यमानाः समरे पाञ्चालाः सृञ्जयास्तथा ।
परित्यज्य रणे द्रौणिं व्यद्रवन्त दिशो दश ॥ १९
तान्दृष्ट्वा द्रवतः शूरान्पाञ्चालान्सहसोमकान् ।
धृष्टद्युम्नो महाराज द्रौणिमभ्यद्रवद्युधि ॥ २०
ततः काञ्चनचित्राणां सजलाम्बुदनादिनाम् ।
वृतः शतेन शूराणां रथानामनिवर्तिनाम् ॥ २१
पुत्रः पाञ्चालराजस्य धृष्टद्युम्नो महारथः ।

द्रौणिमित्यब्रवीद्वाक्यं दृष्ट्वा योधान्निपातितान् ॥२२
आचार्यपुत्र दुर्बुद्धे किमन्यैर्निहतैस्तव ।
समागच्छ मया सार्धं यदि शूरोऽसि संयुगे ।
अहं त्वा निहनिष्यामि तिष्ठेदानीं ममाग्रतः ॥ २३
ततस्तमाचार्यसुतं धृष्टद्युम्नः प्रतापवान् ।
मर्मभिद्भिः शरैस्तीक्ष्णैर्जघान भरतर्षभ ॥ २४
ते तु पङ्क्तीकृता द्रौणिं शरा विविशुराशुगाः ।
रुक्मपुङ्खाः प्रसन्नाग्राः सर्वकायावदारणाः ।
मध्वर्थिन इवोद्दामा भ्रमराः पुष्पितं द्रुमम् ॥ २५
सोऽतिविद्धो भृशं क्रुद्धः पदाक्रान्त इवोरगः ।
मानी द्रौणिरसंभ्रान्तो बाणपाणिरभाषत ॥ २६
धृष्टद्युम्न स्थिरो भूत्वा मुहूर्तं प्रतिपालय ।
यावत्त्वां निशितैर्बाणैः प्रेषयामि यमक्षयम् ॥ २७
द्रौणिरेवमथाभाष्य पार्षतं परवीरहा ।
छादयामास बाणौघैः समन्ताल्लघुहस्तवत् ॥ २८
स छाद्यमानः समरे द्रौणिना युद्धदुर्मदः ।
द्रौणिं पाञ्चालतनयो वाग्भिरातर्जयत्तदा ॥ २९
न जानीषे प्रतिज्ञां मे विप्रोत्पत्तिं तथैव च ।
द्रोणं हत्वा किल मया हन्तव्यस्त्वं सुदुर्मते ।
ततस्त्वाहं न हन्म्यद्य द्रोणे जीवति संयुगे ॥ ३०
इमां तु रजनीं प्राप्तामप्रभातां सुदुर्मते ।
निहत्य पितरं तेऽद्य ततस्त्वामपि संयुगे ।
नेष्यामि मृत्युलोकायेत्येवं मे मनसि स्थितम् ॥३१
यस्ते पार्थेषु विद्वेषो या भक्तिः कौरवेषु च ।
तां दर्शय स्थिरो भूत्वा न मे जीवन्विमोक्ष्यसे ॥
यो हि ब्राह्मण्यमुत्सृज्य क्षत्रधर्मरतो द्विजः ।
स वध्यः सर्वलोकस्य यथा त्वं पुरुषाधम ॥ ३३
इत्युक्तः परुषं वाक्यं पार्षतेन द्विजोत्तमः ।
क्रोधमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ३४
निर्दहन्निव चक्षुर्भ्यां पार्षतं सोऽभ्यवैक्षत ।
छादयामास च शरैर्निःश्वसन्पन्नगो यथा ॥ ३५
स छाद्यमानः समरे द्रौणिना राजसत्तम ।
सर्वपाञ्चालसेनाभिः संवृतो रथसत्तमः ॥ ३६
नाकम्पत महाबाहुः स्वधैर्यं समुपाश्रितः ।
सायकांश्चैव विविधानश्वत्थाम्नि मुमोच ह ॥ ३७
तौ पुनः संन्यवर्तेतां प्राणद्यूतपरे रणे ।
निवारयन्तौ बाणौघैः परस्परममर्षिणौ ।
उत्सृजन्तौ महेष्वासौ शरवृष्टीः समन्ततः ॥ ३८
द्रौणिपार्षतयोर्युद्धं घोररूपं भयानकम् ।
दृष्ट्वा संपूजयामासुः सिद्धचारणवातिकाः ॥ ३९
शरौघैः पूरयन्तौ तावाकाशं प्रदिशस्तथा ।
अलक्ष्यौ समयुध्येतां महत्कृत्वा शरैस्तमः ॥ ४०
नृत्यमानाविव रणे मण्डलीकृतकार्मुकौ ।
परस्परवधे यत्तौ परस्परजयैषिणौ ॥ ४१
अयुध्येतां महाबाहू चित्रं लघु च सुष्ठु च ।
संपूज्यमानौ समरे योधमुख्यैः सहस्रशः ॥ ४२
तौ प्रयुद्धौ रणे दृष्ट्वा वने वन्यौ गजाविव ।
उभयोः सेनयोर्हर्षस्तुमुलः समपद्यत ॥ ४३
सिंहनादरवाश्चासन्दध्मुः शङ्खांश्च मारिष ।
वादित्राण्यभ्यवाद्यन्त शतशोऽथ सहस्रशः ॥ ४४
तस्मिंस्तु तुमुले युद्धे भीरूणां भयवर्धने ।
मुहूर्तमिव तद्युद्धं समरूपं तदाभवत् ॥ ४५
ततो द्रौणिर्महाराज पार्षतस्य महात्मनः ।
ध्वजं धनुस्तथा छत्रमुभौ च पार्ष्णिसारथी ।
सूतमश्वांश्च चतुरो निहत्याभ्यद्रवद्रणे ॥ ४६
पाञ्चालांश्चैव तान्सर्वान्बाणैः संनतपर्वभिः ।
व्यद्रावयदमेयात्मा शतशोऽथ सहस्रशः ॥ ४७
ततः प्रविव्यथे सेना पाण्डवी भरतर्षभ ।
दृष्ट्वा द्रौणेर्महत्कर्म वासवस्येव संयुगे ॥ ४८
शतेन च शतं हत्वा पाञ्चालानां महारथः ।

त्रिभिश्च निशितैर्बाणैर्हत्वा त्रीन्वै महारथान् ॥ ४९
द्रौणिर्द्रुपदपुत्रस्य फल्गुनस्य च पश्यतः ।
नाशयामास पाञ्चालान्भूयिष्ठं ये व्यवस्थिताः ॥५०
ते वध्यमानाः पाञ्चालाः समरे सह सृञ्जयैः ।
अगच्छन्द्रौणिमुत्सृज्य विप्रकीर्णरथध्वजाः ॥ ५१
स जित्वा समरे शत्रून्द्रोणपुत्रो महारथः ।
ननाद सुमहानादं तपान्ते जलदो यथा ॥ ५२
स निहत्य बहूञ्शूरानश्वत्थामा व्यरोचत ।
युगान्ते सर्वभूतानि भस्म कृत्वेव पावकः ॥ ५३

संपूज्यमानो युधि कौरवेयै-
र्विजित्य संख्येऽरिगणान्सहस्रशः ।
व्यरोचत द्रोणसुतः प्रतापवा-
न्यथा सुरेन्द्रोऽरिगणान्निहत्य ॥ ५४

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

१३६

संजय उवाच ।

ततो युधिष्ठिरश्चैव भीमसेनश्च पाण्डवः ।
द्रोणपुत्रं महाराज समन्तात्पर्यवारयन् ॥ १
ततो दुर्योधनो राजा भारद्वाजेन संवृतः ।
अभ्ययात्पाण्डवान्संख्ये ततो युद्धमवर्तत ।
घोररूपं महाराज भीरूणां भयवर्धनम् ॥ २
अम्बष्ठान्मालवान्वङ्गाञ्शिबींस्त्रैगर्तकानपि ।
प्राहिणोन्मृत्युलोकाय गणान्क्रुद्धो युधिष्ठिरः ॥ ३
अभीषाहाञ्शूरसेनान्क्षत्रियान्युद्धदुर्मदान् ।
निकृत्य पृथिवीं चक्रे भीमः शोणितकर्दमाम् ॥ ४
यौधेयारट्टराजन्यान्मद्रकांश्च गणान्युधि ।
प्राहिणोन्मृत्युलोकाय किरीटी निशितैः शरैः ॥ ५
प्रगाढमञ्जोगतिभिर्नाराचैरभिपीडिताः ।
निपेतुर्द्विरदा भूमौ द्विशृङ्गा इव पर्वताः ॥ ६
निकृत्तैर्हस्तिहस्तैश्च लुठमानैस्ततस्ततः ।
रराज वसुधा कीर्णा विसर्पद्भिरिवोरगैः ॥ ७
क्षिप्तैः कनकचित्रैश्च नृपच्छत्रैः क्षितिर्बभौ ।
द्यौरिवादित्यचन्द्राद्यैर्ग्रहैः कीर्णा युगक्षये ॥ ८
हत प्रहरताभीता विध्यत व्यवकृन्तत ।
इत्यासीत्तुमुलः शब्दः शोणाश्वस्य रथं प्रति ॥ ९
द्रोणस्तु परमक्रुद्धो वायव्यास्त्रेण संयुगे ।
व्यधमत्तान्यथा वायुर्मेघानिव दुरत्ययः ॥ १०
ते हन्यमाना द्रोणेन पाञ्चालाः प्राद्रवन्भयात् ।
पश्यतो भीमसेनस्य पार्थस्य च महात्मनः ॥ ११
ततः किरीटी भीमश्च सहसा संन्यवर्तताम् ।
महता रथवंशेन परिगृह्य बलं तव ॥ १२
बीभत्सुर्दक्षिणं पार्श्वमुत्तरं तु वृकोदरः ।
भारद्वाजं शरौघाभ्यां महद्भ्यामभ्यवर्षताम् ॥ १३
तौ तदा सृञ्जयाश्चैव पाञ्चालाश्च महारथाः ।
अन्वगच्छन्महाराज मत्स्याश्च सह सोमकैः ॥ १४
तथैव तव पुत्रस्य रथोदाराः प्रहारिणः ।
महत्या सेनया सार्धं जग्मुर्द्रोणरथं प्रति ॥ १५
ततः सा भारती सेना वध्यमाना किरीटिना ।
तमसा निद्रया चैव पुनरेव व्यदीर्यत ॥ १६
द्रोणेन वार्यमाणास्ते स्वयं तव सुतेन च ।
न शक्यन्ते महाराज योधा वारयितुं तदा ॥ १७
सा पाण्डुपुत्रस्य शरैर्दार्यमाणा महाचमूः ।
तमसा संवृते लोके व्यद्रवत्सर्वतोमुखी ॥ १८
उत्सृज्य शतशो वाहांस्तत्र केचिन्नराधिपाः ।
प्राद्रवन्त महाराज भयाविष्टाः समन्ततः ॥ १९

इति श्रीमहाभारते द्रोणपर्वणि
षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥

१३७

संजय उवाच ।

सोमदत्तं तु संप्रेक्ष्य विधुन्वानं महद्धनुः ।
सात्यकिः प्राह यन्तारं सोमदत्ताय मां वह ॥ १
न ह्यहत्वा रणे शत्रुं बाह्लीकं कौरवाधमम् ।
निवर्तिष्ये रणात्सूत सत्यमेतद्वचो मम ॥ २
ततः संप्रेषयद्यन्ता सैन्धवांस्तान्महाजवान् ।
तुरंगमाञ्शङ्खवर्णान्सर्वशब्दातिगान्रणे ॥ ३
तेऽवहन्युयुधानं तु मनोमारुतरंहसः ।
यथेन्द्रं हरयो राजन्पुरा दैत्यवधोद्यतम् ॥ ४
तमापतन्तं संप्रेक्ष्य सात्वतं रभसं रणे ।
सोमदत्तो महाबाहुरसंभ्रान्तोऽभ्यवर्तत ॥ ५
विमुञ्चञ्शरवर्षाणि पर्जन्य इव वृष्टिमान् ।
छादयामास शैनेयं जलदो भास्करं यथा ॥ ६
असंभ्रान्तश्च समरे सात्यकिः कुरुपुंगवम् ।
छादयामास बाणौघैः समन्ताद्भरतर्षभ ॥ ७
सोमदत्तस्तु तं षष्ट्या विव्याधोरसि माधवम् ।
सात्यकिश्चापि तं राजन्नविध्यत्सायकैः शितैः ॥ ८
तावन्योन्यं शरैः कृत्तौ व्यराजेतां नरर्षभौ ।
सुपुष्पौ पुष्पसमये पुष्पिताविव किंशुकौ ॥ ९
रुधिरोक्षितसर्वाङ्गौ कुरुवृष्णियशस्करौ ।
परस्परमवेक्षेतां दहन्ताविव लोचनैः ॥ १०
रथमण्डलमार्गेषु चरन्तावरिमर्दनौ ।
घोररूपौ हि तावास्तां वृष्टिमन्ताविवाम्बुदौ ॥ ११
शरसंभिन्नगात्रौ तौ सर्वतः शकलीकृतौ ।
श्वाविधाविव राजेन्द्र व्यदृश्येतां शरक्षतौ ॥ १२
सुवर्णपुङ्खैरिषुभिराचितौ तौ व्यरोचताम् ।
खद्योतैरावृतौ राजन्प्रावृषीव वनस्पती ॥ १३
संप्रदीपितसर्वाङ्गौ सायकैस्तौ महारथौ ।
अदृश्येतां रणे क्रुद्धावुल्काभिरिव कुञ्जरौ ॥ १४
ततो युधि महाराज सोमदत्तो महारथः ।
अर्धचन्द्रेण चिच्छेद माधवस्य महद्धनुः ॥ १५
अथैनं पञ्चविंशत्या सायकानां समार्पयत् ।
त्वरमाणस्त्वराकाले पुनश्च दशभिः शरैः ॥ १६
अथान्यद्धनुरादाय सात्यकिर्वेगवत्तरम् ।
पञ्चभिः सायकैस्तूर्णं सोमदत्तमविध्यत ॥ १७
ततोऽपरेण भल्लेन ध्वजं चिच्छेद काञ्चनम् ।
बाह्लीकस्य रणे राजन्सात्यकिः प्रहसन्निव ॥ १८
सोमदत्तस्त्वसंभ्रान्तो दृष्ट्वा केतुं निपातितम् ।
शैनेयं पञ्चविंशत्या सायकानां समाचिनोत् ॥ १९
सात्वतोऽपि रणे क्रुद्धः सोमदत्तस्य धन्विनः ।
धनुश्चिच्छेद समरे क्षुरप्रेण शितेन ह ॥ २०
अथैनं रुक्मपुङ्खानां शतेन नतपर्वणाम् ।
आचिनोद्बहुधा राजन्भग्नदंष्ट्रमिव द्विपम् ॥ २१
अथान्यद्धनुरादाय सोमदत्तो महारथः ।
सात्यकिं छादयामास शरवृष्ट्या महाबलः ॥ २२
सोमदत्तं तु संक्रुद्धो रणे विव्याध सात्यकिः ।
सात्यकिं चेषुजालेन सोमदत्तो अपीडयत् ॥ २३
दशभिः सात्वतस्यार्थे भीमोऽहन्बाह्लिकात्मजम् ।
सोमदत्तोऽप्यसंभ्रान्तः शैनेयमवधीच्छरैः ॥ २४
ततस्तु सात्वतस्यार्थे भैमसेनिर्नवं दृढम् ।
मुमोच परिघं घोरं सोमदत्तस्य वक्षसि ॥ २५
तमापतन्तं वेगेन परिघं घोरदर्शनम् ।
द्विधा चिच्छेद समरे प्रहसन्निव कौरवः ॥ २६
स पपात द्विधा छिन्न आयसः परिघो महान् ।
महीधरस्येव महच्छिखरं वज्रदारितम् ॥ २७
ततस्तु सात्यकी राजन्सोमदत्तस्य संयुगे ।
धनुश्चिच्छेद भल्लेन हस्तावापं च पञ्चभिः ॥ २८
चतुर्भिस्तु शरैस्तूर्णं चतुरस्तुरगोत्तमान् ।
समीपं प्रेषयामास प्रेतराजस्य भारत ॥ २९

सारथेश्च शिरः कायाद्भल्लेन नतपर्वणा ।
जहार रथशार्दूलः प्रहसञ्शिनिपुंगवः ॥ ३०
ततः शरं महाघोरं ज्वलन्तमिव पावकम् ।
मुमोच सात्वतो राजन्स्वर्णपुङ्खं शिलाशितम् ॥ ३१
स विमुक्तो बलवता शैनेयेन शरोत्तमः ।
घोरस्तस्योरसि विभो निपपाताशु भारत ॥ ३२
सोऽतिविद्धो बलवता सात्वतेन महारथः ।
सोमदत्तो महाबाहुर्निपपात ममार च ॥ ३३
तं दृष्ट्वा निहतं तत्र सोमदत्तं महारथाः ।
महता शरवर्षेण युयुधानमुपाद्रवन् ॥ ३४
छाद्यमानं शरैर्दृष्ट्वा युयुधानं युधिष्ठिरः ।
महत्या सेनया सार्धं द्रोणानीकमुपाद्रवत् ॥ ३५
ततो युधिष्ठिरः क्रुद्धस्तावकानां महाबलम् ।
शरैर्विद्रावयामास भारद्वाजस्य पश्यतः ॥ ३६
सैन्यानि द्रावयन्तं तु द्रोणो दृष्ट्वा युधिष्ठिरम् ।
अभिदुद्राव वेगेन क्रोधसंरक्तलोचनः ॥ ३७
ततः सुनिशितैर्बाणैः पार्थं विव्याध सप्तभिः ।
सोऽतिविद्धो महाबाहुः सृक्किणी परिसंलिहन् ।
युधिष्ठिरस्य चिच्छेद ध्वजं कार्मुकमेव च ॥ ३८
स छिन्नधन्वा त्वरितस्त्वराकाले नृपोत्तमः ।
अन्यदादत्त वेगेन कार्मुकं समरे दृढम् ॥ ३९
ततः शरसहस्रेण द्रोणं विव्याध पार्थिवः ।
साश्वसूतध्वजरथं तदद्भुतमिवाभवत् ॥ ४०
ततो मुहूर्तं व्यथितः शरघातप्रपीडितः ।
निषसाद रथोपस्थे द्रोणो भरतसत्तम ॥ ४१
प्रतिलभ्य ततः संज्ञां मुहूर्ताद्द्विजसत्तमः ।
क्रोधेन महताविष्टो वायव्यास्त्रमवासृजत् ॥ ४२
असंभ्रान्तस्ततः पार्थो धनुराकृष्य वीर्यवान् ।
तदस्त्रमस्त्रेण रणे स्तम्भयामास भारत ॥ ४३
ततोऽब्रवीद्वासुदेवः कुन्तीपुत्रं युधिष्ठिरम् ।
युधिष्ठिर महाबाहो यत्त्वा वक्ष्यामि तच्छृणु ॥४४
उपारमस्व युद्धाय द्रोणाद्भरतसत्तम ।
गृध्यते हि सदा द्रोणो ग्रहणे तव संयुगे ॥ ४५
नानुरूपमहं मन्ये युद्धमस्य त्वया सह ।
योऽस्य सृष्टो विनाशाय स एनं श्वो हनिष्यति ॥
परिवर्ज्य गुरुं याहि यत्र राजा सुयोधनः ।
भीमश्च रथशार्दूलो युध्यते कौरवैः सह ॥ ४७
वासुदेववचः श्रुत्वा धर्मराजो युधिष्ठिरः ।
मुहूर्तं चिन्तयित्वा तु ततो दारुणमाहवम् ॥ ४८
प्रायाद्द्रुतममित्रघ्नो यत्र भीमो व्यवस्थितः ।
विनिघ्नंस्तावकान्योधान्व्यादितास्य इवान्तकः ॥ ४९
रथघोषेण महता नादयन्वसुधातलम् ।
पर्जन्य इव घर्मान्ते नादयन्वै दिशो दश ॥ ५०
भीमस्य निघ्नतः शत्रून्पार्ष्णिं जग्राह पाण्डवः ।
द्रोणोऽपि पाण्डुपाञ्चालान्व्यधमद्रजनीमुखे ॥ ५१

इति श्रीमहाभारते द्रोणपर्वणि
सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥

१३८

संजय उवाच ।

वर्तमाने तथा युद्धे घोररूपे भयावहे ।
तमसा संवृते लोके रजसा च महीपते ।
नापश्यन्त रणे योधाः परस्परमवस्थिताः ॥ १
अनुमानेन संज्ञाभिर्युद्धं तद्ववृते महत् ।
नरनागाश्वमथनं परमं लोमहर्षणम् ॥ २
द्रोणकर्णकृपा वीरा भीमपार्षतसात्यकाः ।
अन्योन्यं क्षोभयामासुः सैन्यानि नृपसत्तम ॥ ३
वध्यमानानि सैन्यानि समन्तात्तैर्महारथैः ।
तमसा रजसा चैव समन्ताद्विप्रदुद्रुवुः ॥ ४
ते सर्वतो विद्रवन्तो योधा वित्रस्तचेतसः ।
अहन्यन्त महाराज धावमानाश्च संयुगे ॥ ५

महारथसहस्राणि जघ्नुरन्योन्यमाहवे ।
अन्धे तमसि मूढानि पुत्रस्य तव मन्त्रिते ॥ ६
ततः सर्वाणि सैन्यानि सेनागोपाश्च भारत ।
व्यमुह्यन्त रणे तत्र तमसा संवृते सति ॥ ७

धृतराष्ट्र उवाच ।

तेषां संलोड्यमानानां पाण्डवैर्निहतौजसाम् ।
अन्धे तमसि मग्नानामासीत्का वो मतिस्तदा ॥ ८
कथं प्रकाशस्तेषां वा मम सैन्येषु वा पुनः ।
बभूव लोके तमसा तथा संजय संवृते ॥ ९

संजय उवाच ।

ततः सर्वाणि सैन्यानि हतशिष्टानि यानि वै ।
सेनागोप्तॄनथादिश्य पुनर्व्यूहमकल्पयत् ॥ १०

द्रोणः पुरस्ताज्जघने तु शल्य-
स्तथा द्रौणिः पार्श्वतः सौबलश्च ।
स्वयं तु सर्वाणि बलानि राज-
न्राजाभ्ययाद्गोपयन्वै निशायाम् ॥ ११
उवाच सर्वांश्च पदातिसंघा-
न्दुर्योधनः पार्थिव सान्त्वपूर्वम् ।
उत्सृज्य सर्वे परमायुधानि
गृह्णीत हस्तैर्ज्वलितान्प्रदीपान् ॥ १२
ते चोदिताः पार्थिवसत्तमेन
ततः प्रहृष्टा जगृहुः प्रदीपान् ।
सा भूय एव ध्वजिनी विभक्ता
व्यरोचताग्निप्रभया निशायाम् ॥ १३
महाधनैराभरणैश्च दिव्यैः
शस्त्रैः प्रदीप्तैरभिसंपतद्भिः ।
क्षणेन सर्वे विहिताः प्रदीपा
व्यदीपयंश्च ध्वजिनीं तदाशु ॥ १४
सर्वास्तु सेना व्यतिसेव्यमानाः
पदातिभिः पावकतैलहस्तैः ।
प्रकाश्यमाना ददृशुर्निशायां
यथान्तरिक्षे जलदास्तडिद्भिः ॥ १५
प्रकाशितायां तु तथा ध्वजिन्यां
द्रोणोऽग्निकल्पः प्रतपन्समन्तात् ।
रराज राजेन्द्र सुवर्णवर्मा
मध्यं गतः सूर्य इवांशुमाली ॥ १६
जाम्बूनदेष्वाभरणेषु चैव
निष्केषु शुद्धेषु शरावरेषु ।
पीतेषु शस्त्रेषु च पावकस्य
प्रतिप्रभास्तत्र ततो बभूवुः ॥ १७
गदाश्च शैक्याः परिघाश्च शुभ्रा
रथेषु शक्त्यश्च विवर्तमानाः ।
प्रतिप्रभा रश्मिभिराजमीढ
पुनः पुनः संजनयन्ति दीप्ताः ॥ १८
छत्राणि बालव्यजनानुषङ्गा
दीप्ता महोल्काश्च तथैव राजन् ।
व्याघूर्णमानाश्च सुवर्णमाला
व्यायच्छतां तत्र तदा विरेजुः ॥ १९
शस्त्रप्रभाभिश्च विराजमानं
दीपप्रभाभिश्च तदा बलं तत् ।
प्रकाशितं चाभरणप्रभाभि-
र्भृशं प्रकाशं नृपते बभूव ॥ २०
पीतानि शस्त्राण्यसृगुक्षितानि
वीरावधूतानि तनुद्रुहाणि ।
दीप्तां प्रभां प्राजनयन्त तत्र
तपात्यये विद्युदिवान्तरिक्षे ॥ २१
प्रकम्पितानामभिघातवेगै-
रभिघ्नतां चापततां जवेन ।
वक्त्राण्यशोभन्त तदा नराणां
वाय्वीरितानीव महाम्बुजानि ॥ २२

महावने दाव इव प्रदीप्ते
यथा प्रभा भास्करस्यापि नश्येत् ।
तथा तवासीद्ध्वजिनी प्रदीप्ता
महाभये भारत भीमरूपा ॥ २३
तत्संप्रदीप्तं बलमस्मदीयं
निशाम्य पार्थास्त्वरितास्तथैव ।
सर्वेषु सैन्येषु पदातिसंघा-
नचोदयंस्तेऽथ चक्रुः प्रदीपान् ॥ २४
गजे गजे सप्त कृताः प्रदीपा
रथे रथे चैव दश प्रदीपाः ।
द्वावश्वपृष्ठे परिपार्श्वतोऽन्ये
ध्वजेषु चान्ये जघनेषु चान्ये ॥ २५
सेनासु सर्वासु च पार्श्वतोऽन्ये
पश्चात्पुरस्ताच्च समन्ततश्च ।
मध्ये तथान्ये ज्वलिताग्निहस्ताः
सेनाद्वयेऽपि स्म नरा विचेरुः ॥ २६
सर्वेषु सैन्येषु पदातिसंघा
व्यामिश्रिता हस्तिरथाश्ववृन्दैः ।
मध्ये तथान्ये ज्वलिताग्निहस्ता
व्यदीपयन्पाण्डुसुतस्य सेनाम् ॥ २७
तेन प्रदीप्तेन तथा प्रदीप्तं
बलं तदासीद्बलवद्बलेन ।
भाः कुर्वता भानुमता ग्रहेण
दिवाकरेणाग्निरिवाभितप्तः ॥ २८
तयोः प्रभाः पृथिवीमन्तरिक्षं-
सर्वा व्यतिक्रम्य दिशश्च वृद्धाः ।
तेन प्रकाशेन भृशं प्रकाशं
बभूव तेषां तव चैव सैन्यम् ॥ २९
तेन प्रकाशेन दिवंगमेन
संबोधिता देवगणाश्च राजन् ।
गन्धर्वयक्षासुरसिद्धसंघाः
समागमन्नप्सरसश्च सर्वाः ॥ ३०
तद्देवगन्धर्वसमाकुलं च
यक्षासुरेन्द्राप्सरसां गणैश्च ।
हतैश्च वीरैर्दिवमारुहद्भि-
रायोधनं दिव्यकल्पं बभूव ॥ ३१
रथाश्वनागाकुलदीपदीप्तं
संरब्धयोधाहतविद्रुताश्वम् ।
महद्बलं व्यूढरथाश्वनागं
सुरासुरव्यूहसमं बभूव ॥ ३२
तच्छक्तिसंघाकुलचण्डवातं
महारथाभ्रं रथवाजिघोषम् ।
शस्त्रौघवर्षं रुधिराम्बुधारं
निशि प्रवृत्तं नरदेवयुद्धम् ॥ ३३
तस्मिन्महाग्निप्रतिमो महात्मा
संतापयन्पाण्डवान्विप्रमुख्यः ।
गभस्तिभिर्मध्यगतो यथार्को
वर्षात्यये तद्वदभून्नरेन्द्र ॥ ३४

इति श्रीमहाभारते द्रोणपर्वणि
अष्टत्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥

१३९

संजय उवाच ।

प्रकाशिते तथा लोके रजसा च तमोवृते ।
समाजग्मुरथो वीराः परस्परवधैषिणः ॥ १
ते समेत्य रणे राजञ्शस्त्रप्रासासिधारिणः ।
परस्परमुदैक्षन्त परस्परकृतागसः ॥ २
प्रदीपानां सहस्रैश्च दीप्यमानैः समन्ततः ।
विरराज तदा भूमिर्द्यौर्ग्रहैरिव भारत ॥ ३
उल्काशतैः प्रज्वलितै रणभूमिर्व्यराजत ।
दह्यमानेव लोकानामभावे वै वसुंधरा ॥ ४

प्रादीप्यन्त दिशः सर्वाः प्रदीपैस्तैः समन्ततः ।
वर्षाप्रदोषे खद्योतैर्वृता वृक्षा इवाबभुः ॥ ५
असज्जन्त ततो वीरा वीरेष्वेव पृथक्पृथक् ।
नागा नागैः समाजग्मुस्तुरगाः सह वाजिभिः ॥ ६
रथा रथवरैरेव समाजग्मुर्मुदान्विताः ।
तस्मिन्रात्रिमुखे घोरे पुत्रस्य तव शासनात् ॥ ७
ततोऽर्जुनो महाराज कौरवाणामनीकिनीम् ।
व्यधमत्त्वरया युक्तः क्षपयन्सर्वपार्थिवान् ॥ ८

धृतराष्ट्र उवाच ।

तस्मिन्प्रविष्टे संरब्धे मम पुत्रस्य वाहिनीम् ।
अमृष्यमाणे दुर्धर्षे किं व आसीन्मनस्तदा ॥ ९
किममन्यन्त सैन्यानि प्रविष्टे शत्रुतापने ।
दुर्योधनश्च किं कृत्यं प्राप्तकालममन्यत ॥ १०
के चैनं समरे वीरं प्रत्युद्ययुररिंदमम् ।
केऽरक्षन्दक्षिणं चक्रं के च द्रोणस्य सव्यतः ॥ ११
के पृष्ठतोऽस्य ह्यभवन्वीरा वीरस्य युध्यतः ।
के पुरस्तादगच्छन्त निघ्नतः शात्रवान्रणे ॥ १२
यत्प्राविशन्महेष्वासः पाञ्चालानपराजितः ।
नृत्यन्निव नरव्याघ्रो रथमार्गेषु वीर्यवान् ॥ १३
ददाह च शरैर्द्रोणः पाञ्चालानां रथव्रजान् ।
धूमकेतुरिव क्रुद्धः स कथं मृत्युमीयिवान् ॥ १४
अव्यग्रानेव हि परान्कथयस्यपराजितान् ।
हतांश्चैव विषण्णांश्च विप्रकीर्णांश्च शंससि ।
रथिनो विरथांश्चैव कृतान्युद्धेषु मामकान् ॥ १५

संजय उवाच ।

द्रोणस्य मतमाज्ञाय योद्धुकामस्य तां निशाम् ।
दुर्योधनो महाराज वश्यान्भ्रातॄनभाषत ॥ १६
विकर्णं चित्रसेनं च महाबाहुं च कौरवम् ।
दुर्धर्षं दीर्घबाहुं च ये च तेषां पदानुगाः ॥ १७
द्रोणं यत्ताः पराक्रान्ताः सर्वे रक्षत पृष्ठतः ।
हार्दिक्यो दक्षिणं चक्रं शल्यश्चैवोत्तरं तथा ॥ १८
त्रिगर्तानां च ये शूरा हतशिष्टा महारथाः ।
तांश्चैव सर्वान्पुत्रस्ते समचोदयदग्रतः ॥ १९
आचार्यो हि सुसंयत्तो भृशं यत्ताश्च पाण्डवाः ।
तं रक्षत सुसंयत्ता निघ्नन्तं शात्रवान्रणे ॥ २०
द्रोणो हि बलवान्युद्धे क्षिप्रहस्तः पराक्रमी ।
निर्जयेत्त्रिदशान्युद्धे किमु पार्थान्ससोमकान् ॥ २१
ते यूयं सहिताः सर्वे भृशं यत्ता महारथाः ।
द्रोणं रक्षत पाञ्चाल्याद्धृष्टद्युम्नान्महारथात् ॥ २२
पाण्डवेयेषु सैन्येषु योधं पश्याम्यहं न तम् ।
यो जयेत रणे द्रोणं धृष्टद्युम्नादृते नृपाः ॥ २३
तस्य सर्वात्मना मन्ये भारद्वाजस्य रक्षणम् ।
स गुप्तः सोमकान्हन्यात्सृञ्जयांश्च सराजकान् ॥२४
सृञ्जयेष्वथ सर्वेषु निहतेषु चमूमुखे ।
धृष्टद्युम्नं रणे द्रौणिर्नाशयिष्यत्यसंशयम् ॥ २५
तथार्जुनं रणे कर्णो विजेष्यति महारथः ।
भीमसेनमहं चापि युद्धे जेष्यामि दंशितः ॥ २६
सोऽयं मम जयो व्यक्तं दीर्घकालं भविष्यति ।
तस्माद्रक्षत संग्रामे द्रोणमेव महारथाः ॥ २७
इत्युक्त्वा भरतश्रेष्ठ पुत्रो दुर्योधनस्तव ।
व्यादिदेश ततः सैन्यं तस्मिंस्तमसि दारुणे ॥ २८
ततः प्रववृते युद्धं रात्रौ तद्भरतर्षभ ।
उभयोः सेनयोर्घोरं विजयं प्रति काङ्क्षिणोः ॥ २९
अर्जुनः कौरवं सैन्यमर्जुनं चापि कौरवाः ।
नानाशस्त्रसमावापैरन्योन्यं पर्यपीडयन् ॥ ३०
द्रौणिः पाञ्चालराजानं भारद्वाजश्च सृञ्जयान् ।
छादयामासतुः संख्ये शरैः संनतपर्वभिः ॥ ३१
पाण्डुपाञ्चालसेनानां कौरवाणां च मारिष ।
आसीन्निष्टानको घोरो निघ्नतामितरेतरम् ॥ ३२
नैवास्माभिर्न पूर्वैर्नो दृष्टं पूर्वं तथाविधम् ।

युद्धं यादृशमेवासीत्तां रात्रिं सुमहाभयम् ॥ ३३

इति श्रीमहाभारते द्रोणपर्वणि
एकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥

१४०

संजय उवाच ।

वर्तमाने तथा रौद्रे रात्रियुद्धे विशां पते ।
सर्वभूतक्षयकरे धर्मपुत्रो युधिष्ठिरः ॥ १
अब्रवीत्पाण्डवांश्चैव पाञ्चालांश्च ससोमकान् ।
अभ्यद्रवत गच्छध्वं द्रोणमेव जिघांसया ॥ २
राज्ञस्ते वचनाद्राजन्पाञ्चालाः सोमकास्तथा ।
द्रोणमेवाभ्यवर्तन्त नदन्तो भैरवान्रवान् ॥ ३
तान्वयं प्रतिगर्जन्तः प्रत्युद्यातास्त्वमर्षिताः ।
यथाशक्ति यथोत्साहं यथासत्त्वं च संयुगे ॥ ४
कृतवर्मा च हार्दिक्यो युधिष्ठिरमुपाद्रवत् ।
द्रोणं प्रति जिघांसन्तं मत्तो मत्तमिव द्विपम् ॥ ५
शैनेयं शरवर्षाणि विकिरन्तं समन्ततः ।
अभ्ययात्कौरवो राजन्भूरिः संग्राममूर्धनि ॥ ६
सहदेवमथायान्तं द्रोणप्रेप्सुं महारथम् ।
कर्णो वैकर्तनो राजन्वारयामास पाण्डवम् ॥ ७
भीमसेनमथायान्तं व्यादितास्यमिवान्तकम् ।
स्वयं दुर्योधनो युद्धे प्रतीपं मृत्युमाव्रजत् ॥ ८
नकुलं च युधां श्रेष्ठं सर्वयुद्धविशारदम् ।
शकुनिः सौबलो राजन्वारयामास सत्वरः ॥ ९
शिखण्डिनमथायान्तं रथेन रथिनां वरम् ।
कृपः शारद्वतो राजन्वारयामास संयुगे ॥ १०
प्रतिविन्ध्यमथायान्तं मयूरसदृशैर्हयैः ।
दुःशासनो महाराज यत्तो यत्तमवारयत् ॥ ११
भैमसेनिमथायान्तं मायाशतविशारदम् ।
अश्वत्थामा पितुर्मानं कुर्वाणः प्रत्यषेधयत् ॥ १२
द्रुपदं वृषसेनस्तु ससैन्यं सपदानुगम् ।
वारयामास समरे द्रोणप्रेप्सुं महारथम् ॥ १३
विराटं द्रुतमायान्तं द्रोणस्य निधनं प्रति ।
मद्रराजः सुसंक्रुद्धो वारयामास भारत ॥ १४
शतानीकमथायान्तं नाकुलिं रभसं रणे ।
चित्रसेनो रुरोधाशु शरैर्द्रोणवधेप्सया ॥ १५
अर्जुनं च युधां श्रेष्ठं प्राद्रवन्तं महारथम् ।
अलम्बुसो महाराज राक्षसेन्द्रो न्यवारयत् ॥ १६
तथा द्रोणं महेष्वासं निघ्नन्तं शात्रवान्रणे ।
धृष्टद्युम्नोऽथ पाञ्चाल्यो हृष्टरूपमवारयत् ॥ १७
तथान्यान्पाण्डुपुत्राणां समायातान्महारथान् ।
तावका रथिनो राजन्वारयामासुरोजसा ॥ १८
गजारोहा गजैस्तूर्णं संनिपत्य महामृधे ।
योधयन्तः स्म दृश्यन्ते शतशोऽथ सहस्रशः ॥ १९
निशीथे तुरगा राजन्नाद्रवन्तः परस्परम् ।
समदृश्यन्त वेगेन पक्षवन्त इवाद्रयः ॥ २०
सादिनः सादिभिः सार्धं प्रासशक्त्यृष्टिपाणयः ।
समागच्छन्महाराज विनदन्तः पृथक्पृथक् ॥ २१
नरास्तु बहवस्तत्र समाजग्मुः परस्परम् ।
गदाभिर्मुसलैश्चैव नानाशस्त्रैश्च संघशः ॥ २२
कृतवर्मा तु हार्दिक्यो धर्मपुत्रं युधिष्ठिरम् ।
वारयामास संक्रुद्धो वेलेवोद्वृत्तमर्णवम् ॥ २३
युधिष्ठिरस्तु हार्दिक्यं विद्ध्वा पञ्चभिराशुगैः ।
पुनर्विव्याध विंशत्या तिष्ठ तिष्ठेति चाब्रवीत् ॥ २४
कृतवर्मा तु संक्रुद्धो धर्मपुत्रस्य मारिष ।
धनुश्चिच्छेद भल्लेन तं च विव्याध सप्तभिः ॥ २५
अथान्यद्धनुरादाय धर्मपुत्रो युधिष्ठिरः ।
हार्दिक्यं दशभिर्बाणैर्बाह्वोरुरसि चार्पयत् ॥ २६
माधवस्तु रणे विद्धो धर्मपुत्रेण मारिष ।
प्राकम्पत च रोषेण सप्तभिश्चार्दयच्छरैः ॥ २७
तस्य पार्थो धनुश्छित्त्वा हस्तावापं निकृत्य च ।

प्राहिणोन्निशितान्बाणान्पञ्च राजञ्शिलाशितान् ॥
ते तस्य कवचं भित्त्वा हेमचित्रं महाधनम् ।
प्राविशन्धरणीमुग्रा वल्मीकमिव पन्नगाः ॥ २९
अक्ष्णोर्निमेषमात्रेण सोऽन्यदादाय कार्मुकम् ।
विव्याध पाण्डवं षष्ट्या सूतं च नवभिः शरैः ॥
तस्य शक्तिममेयात्मा पाण्डवो भुजगोपमाम् ।
चिक्षेप भरतश्रेष्ठ रथे न्यस्य महद्धनुः ॥ ३१
सा हेमचित्रा महती पाण्डवेन प्रवेरिता ।
निर्भिद्य दक्षिणं बाहुं प्राविशद्धरणीतलम् ॥ ३२
एतस्मिन्नेव काले तु गृह्य पार्थः पुनर्धनुः ।
हार्दिक्यं छादयामास शरैः संनतपर्वभिः ॥ ३३
ततस्तु समरे शूरो वृष्णीनां प्रवरो रथी ।
व्यश्वसूतरथं चक्रे निमेषार्धाद्युधिष्ठिरम् ॥ ३४
ततस्तु पाण्डवो ज्येष्ठः खड्गचर्म समाददे ।
तदस्य निशितैर्बाणैर्व्यधमन्माधवो रणे ॥ ३५
तोमरं तु ततो गृह्य स्वर्णदण्डं दुरासदम् ।
प्रेषयत्समरे तूर्णं हार्दिक्यस्य युधिष्ठिरः ॥ ३६
तमापतन्तं सहसा धर्मराजभुजच्युतम् ।
द्विधा चिच्छेद हार्दिक्यः कृतहस्तः स्मयन्निव ॥
ततः शरशतेनाजौ धर्मपुत्रमवाकिरत् ।
कवचं चास्य संक्रुद्धः शरैस्तीक्ष्णैरदारयत् ॥ ३८
हार्दिक्यशरसंछिन्नं कवचं तन्महात्मनः ।
व्यशीर्यत रणे राजंस्ताराजालमिवाम्बरात् ॥ ३९
स छिन्नधन्वा विरथः शीर्णवर्मा शरार्दितः ।
अपायासीद्रणात्तूर्णं धर्मपुत्रो युधिष्ठिरः ॥ ४०
कृतवर्मा तु निर्जित्य धर्मपुत्रं युधिष्ठिरम् ।
पुनर्द्रोणस्य जुगुपे चक्रमेव महाबलः ॥ ४१

इति श्रीमहाभारते द्रोणपर्वणि
चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥

१४१

संजय उवाच ।

भूरिस्तु समरे राजञ्शैनेयं रथिनां वरम् ।
आपतन्तमपासेधत्प्रपानादिव कुञ्जरम् ॥ १
अथैनं सात्यकिः क्रुद्धः पञ्चभिर्निशितैः शरैः ।
विव्याध हृदये तूर्णं प्रास्रवत्तस्य शोणितम् ॥ २
तथैव कौरवो युद्धे शैनेयं युद्धदुर्मदम् ।
दशभिर्विशिखैस्तीक्ष्णैरविध्यत भुजान्तरे ॥ ३
तावन्योन्यं महाराज ततक्षाते शरैर्भृशम् ।
क्रोधसंरक्तनयनौ क्रोधाद्विस्फार्य कार्मुके ॥ ४
तयोरासीन्महाराज शस्त्रवृष्टिः सुदारुणा ।
क्रुद्धयोः सायकमुचोर्यमान्तकनिकाशयोः ॥ ५
तावन्योन्यं शरै राजन्प्रच्छाद्य समरे स्थितौ ।
मुहूर्तं चैव तद्युद्धं समरूपमिवाभवत् ॥ ६
ततः क्रुद्धो महाराज शैनेयः प्रहसन्निव ।
धनुश्चिच्छेद समरे कौरव्यस्य महात्मनः ॥ ७
अथैनं छिन्नधन्वानं नवभिर्निशितैः शरैः ।
विव्याध हृदये तूर्णं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ८
सोऽतिविद्धो बलवता शत्रुणा शत्रुतापनः ।
धनुरन्यत्समादाय सात्वतं प्रत्यविध्यत ॥ ९
स विद्ध्वा सात्वतं बाणैस्त्रिभिरेव विशां पते ।
धनुश्चिच्छेद भल्लेन सुतीक्ष्णेन हसन्निव ॥ १०
छिन्नधन्वा महाराज सात्यकिः क्रोधमूर्छितः ।
प्रजहार महावेगां शक्तिं तस्य महोरसि ॥ ११
स तु शक्त्या विभिन्नाङ्गो निपपात रथोत्तमात् ।
लोहिताङ्ग इवाकाशाद्दीप्तरश्मिर्यदृच्छया ॥ १२
तं तु दृष्ट्वा हतं शूरमश्वत्थामा महारथः ।
अभ्यधावत वेगेन शैनेयं प्रति संयुगे ।
अभ्यवर्षच्छरौघेण मेरुं वृष्ट्या यथाम्बुदः ॥ १३
तमापतन्तं संरब्धं शैनेयस्य रथं प्रति ।

घटोत्कचोऽब्रवीद्राजन्नादं मुक्त्वा महारथः ॥ १४
तिष्ठ तिष्ठ न मे जीवन्द्रोणपुत्र गमिष्यसि ।
एष त्वाद्य हनिष्यामि महिषं स्कन्दराडिव ।
युद्धश्रद्धामहं तेऽद्य विनेष्यामि रणाजिरे ॥ १५
इत्युक्त्वा रोषताम्राक्षो राक्षसः परवीरहा ।
द्रौणिमभ्यद्रवत्क्रुद्धो गजेन्द्रमिव केसरी ॥ १६
रथाक्षमात्रैरिषुभिरभ्यवर्षद्घटोत्कचः ।
रथिनामृषभं द्रौणिं धाराभिरिव तोयदः ॥ १७
शरवृष्टिं तु तां प्राप्तां शरैराशीविषोपमैः ।
शातयामास समरे तरसा द्रौणिरुत्स्मयन् ॥ १८
ततः शरशतैस्तीक्ष्णैर्मर्मभेदिभिराशुगैः ।
समाचिनोद्राक्षसेन्द्रं घटोत्कचमरिंदम ॥ १९
स शरैराचितस्तेन राक्षसो रणमूर्धनि ।
व्यकाशत महाराज श्वाविच्छललितो यथा ॥ २०
ततः क्रोधसमाविष्टो भैमसेनिः प्रतापवान् ।
शरैरवचकर्तोग्रैर्द्रौणिं वज्राशनिस्वनैः ॥ २१
क्षुरप्रैरर्धचन्द्रैश्च नाराचैः सशिलीमुखैः ।
वराहकर्णैर्नालीकैस्तीक्ष्णैश्चापि विकर्णिभिः ॥ २२
तां शस्त्रवृष्टिमतुलां वज्राशनिसमस्वनाम् ।
पतन्तीमुपरि क्रुद्धो द्रौणिरव्यथितेन्द्रियः ॥ २३
सुदुःसहां शरैर्घोरैर्दिव्यास्त्रप्रतिमन्त्रितैः ।
व्यधमत्स महातेजा महाभ्राणीव मारुतः ॥ २४
ततोऽन्तरिक्षे बाणानां संग्रामोऽन्य इवाभवत् ।
घोररूपो महाराज योधानां हर्षवर्धनः ॥ २५
ततोऽस्त्रसंघर्षकृतैर्विस्फुलिङ्गैः समन्ततः ।
बभौ निशामुखे व्योम खद्योतैरिव संवृतम् ॥ २६
स मार्गणगणैर्द्रौणिर्दिशः प्रच्छाद्य सर्वतः ।
प्रियार्थं तव पुत्राणां राक्षसं समवाकिरत् ॥ २७
ततः प्रववृते युद्धं द्रौणिराक्षसयोर्मृधे ।
विगाढे रजनीमध्ये शक्रप्रह्लादयोरिव ॥ २८
ततो घटोत्कचो बाणैर्दशभिर्द्रौणिमाहवे ।
जघानोरसि संक्रुद्धः कालज्वलनसंनिभैः ॥ २९
स तैरभ्यायतैर्विद्धो राक्षसेन महाबलः ।
चचाल समरे द्रौणिर्वातनुन्न इव द्रुमः ।
स मोहमनुसंप्राप्तो ध्वजयष्टिं समाश्रितः ॥ ३०
ततो हाहाकृतं सैन्यं तव सर्वं जनाधिप ।
हतं स्म मेनिरे सर्वे तावकास्तं विशां पते ॥ ३१
तं तु दृष्ट्वा तथावस्थमश्वत्थामानमाहवे ।
पाञ्चालाः सृञ्जयाश्चैव सिंहनादं प्रचक्रिरे ॥ ३२
प्रतिलभ्य ततः संज्ञामश्वत्थामा महाबलः ।
धनुः प्रपीड्य वामेन करेणामित्रकर्शनः ॥ ३३
मुमोचाकर्णपूर्णेन धनुषा शरमुत्तमम् ।
यमदण्डोपमं घोरमुद्दिश्याशु घटोत्कचम् ॥ ३४
स भित्त्वा हृदयं तस्य राक्षसस्य शरोत्तमः ।
विवेश वसुधामुग्रः सुपुङ्खः पृथिवीपते ॥ ३५
सोऽतिविद्धो महाराज रथोपस्थ उपाविशत् ।
राक्षसेन्द्रः सुबलवान्द्रौणिना रणमानिना ॥ ३६
दृष्ट्वा विमूढं हैडिम्बं सारथिस्तं रणाजिरात् ।
द्रौणेः सकाशात्संभ्रान्तस्त्वपनिन्ये त्वरान्वितः ॥ ३७
तथा तु समरे विद्ध्वा राक्षसेन्द्रं घटोत्कचम् ।
ननाद सुमहानादं द्रोणपुत्रो महाबलः ॥ ३८
पूजितस्तव पुत्रैश्च सर्वयोधैश्च भारत ।
वपुषा प्रतिजज्वाल मध्याह्न इव भास्करः ॥ ३९
भीमसेनं तु युध्यन्तं भारद्वाजरथं प्रति ।
स्वयं दुर्योधनो राजा प्रत्यविध्यच्छितैः शरैः ॥ ४०
तं भीमसेनो नवभिः शरैर्विव्याध मारिष ।
दुर्योधनोऽपि विंशत्या शराणां प्रत्यविध्यत ॥ ४१
तौ सायकैरवच्छन्नावदृश्येतां रणाजिरे ।
मेघजालसमाच्छन्नौ नभसीवेन्दुभास्करौ ॥ ४२
अथ दुर्योधनो राजा भीमं विव्याध पत्रिभिः ।

पञ्चभिर्भरतश्रेष्ठ तिष्ठ तिष्ठेति चाब्रवीत् ॥ ४३
तस्य भीमो धनुश्छित्त्वा ध्वजं च नवभिः शरैः ।
विव्याध कौरवश्रेष्ठं नवत्या नतपर्वणाम् ॥ ४४
ततो दुर्योधनः क्रुद्धो भीमसेनस्य मारिष ।
चिक्षेप स शरान्राजन्पश्यतां सर्वधन्विनाम् ॥ ४५
तान्निहत्य शरान्भीमो दुर्योधनधनुश्च्युतान् ।
कौरवं पञ्चविंशत्या क्षुद्रकाणां समार्पयत् ॥ ४६
दुर्योधनस्तु संक्रुद्धो भीमसेनस्य मारिष ।
क्षुरप्रेण धनुश्छित्त्वा दशभिः प्रत्यविध्यत ॥ ४७
अथान्यद्धनुरादाय भीमसेनो महाबलः ।
विव्याध नृपतिं तूर्णं सप्तभिर्निशितैः शरैः ॥ ४८
तदप्यस्य धनुः क्षिप्रं चिच्छेद लघुहस्तवत् ।
द्वितीयं च तृतीयं च चतुर्थं पञ्चमं तथा ॥ ४९
आत्तमात्तं महाराज भीमस्य धनुराच्छिनत् ।
तव पुत्रो महाराज जितकाशी मदोत्कटः ॥ ५०
स तदा छिद्यमानेषु कार्मुकेषु पुनः पुनः ।
शक्तिं चिक्षेप समरे सर्वपारशवीं शुभाम् ॥ ५१
अप्राप्तामेव तां शक्तिं त्रिधा चिच्छेद कौरवः ।
पश्यतः सर्वलोकस्य भीमस्य च महात्मनः ॥ ५२
ततो भीमो महाराज गदां गुर्वीं महाप्रभाम् ।
चिक्षेपाविध्य वेगेन दुर्योधनरथं प्रति ॥ ५३
ततः सा सहसा वाहांस्तव पुत्रस्य संयुगे ।
सारथिं च गदा गुर्वी ममर्द भरतर्षभ ॥ ५४
पुत्रस्तु तव राजेन्द्र रथाद्धेमपरिष्कृतात् ।
आप्लुतः सहसा यानं नन्दकस्य महात्मनः ॥ ५५
ततो भीमो हतं मत्वा तव पुत्रं महारथम् ।
सिंहनादं महच्चक्रे तर्जयन्निव कौरवान् ॥ ५६
तावकाः सैनिकाश्चापि मेनिरे निहतं नृपम् ।
ततो विचुक्रुशुः सर्वे हा हेति च समन्ततः ॥ ५७
तेषां तु निनदं श्रुत्वा त्रस्तानां सर्वयोधिनाम् ।
भीमसेनस्य नादं च श्रुत्वा राजन्महात्मनः ॥ ५८
ततो युधिष्ठिरो राजा हतं मत्वा सुयोधनम् ।
अभ्यवर्तत वेगेन यत्र पार्थो वृकोदरः ॥ ५९
पाञ्चालाः केकया मत्स्याः सृञ्जयाश्च विशां पते ।
सर्वोद्योगेनाभिजग्मुर्द्रोणमेव युयुत्सया ॥ ६०
तत्रासीत्सुमहद्युद्धं द्रोणस्याथ परैः सह ।
घोरे तमसि मग्नानां निघ्नतामितरेतरम् ॥ ६१

इति श्रीमहाभारते द्रोणपर्वणि
एकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

१४२

संजय उवाच ।

सहदेवमथायान्तं द्रोणप्रेप्सुं विशां पते ।
कर्णो वैकर्तनो युद्धे वारयामास भारत ॥ १
सहदेवस्तु राधेयं विद्ध्वा नवभिराशुगैः ।
पुनर्विव्याध दशभिर्निशितैर्नतपर्वभिः ॥ २
तं कर्णः प्रतिविव्याध शतेन नतपर्वणाम् ।
सज्यं चास्य धनुः शीघ्रं चिच्छेद लघुहस्तवत् ॥ ३
ततोऽन्यद्धनुरादाय माद्रीपुत्रः प्रतापवान् ।
कर्णं विव्याध विंशत्या तदद्भुतमिवाभवत् ॥ ४
तस्य कर्णो हयान्हत्वा शरैः संनतपर्वभिः ।
सारथिं चास्य भल्लेन द्रुतं निन्ये यमक्षयम् ॥ ५
विरथः सहदेवस्तु खड्गं चर्म समाददे ।
तदप्यस्य शरैः कर्णो व्यधमत्प्रहसन्निव ॥ ६
ततो गुर्वीं महाघोरां हेमचित्रां महागदाम् ।
प्रेषयामास समरे वैकर्तनरथं प्रति ॥ ७
तामापतन्तीं सहसा सहदेवप्रवेरिताम् ।
व्यष्टम्भयच्छरैः कर्णो भूमौ चैनामपातयत् ॥ ८
गदां विनिहतां दृष्ट्वा सहदेवस्त्वरान्वितः ।
शक्तिं चिक्षेप कर्णाय तामप्यस्याच्छिनच्छरैः ॥ ९
ससंभ्रमस्ततस्तूर्णमवप्लुत्य रथोत्तमात् ।

सहदेवो महाराज दृष्ट्वा कर्णं व्यवस्थितम् ।
रथचक्रं ततो गृह्य मुमोचाधिरथिं प्रति ॥ १०
तमापतन्तं सहसा कालचक्रमिवोद्यतम् ।
शरैरनेकसाहस्रैरच्छिनत्सूतनन्दनः ॥ ११
तस्मिंस्तु वितथे चक्रे कृते तेन महात्मना ।
वार्यमाणश्च विशिखैः सहदेवो रणं जहौ ॥ १२
तमभिद्रुत्य राधेयो मुहूर्ताद्भरतर्षभ ।
अब्रवीत्प्रहसन्वाक्यं सहदेवं विशां पते ॥ १३
मा युध्यस्व रणे वीर विशिष्टै रथिभिः सह ।
सदृशैर्युध्य माद्रेय वचो मे मा विशङ्किथाः ॥ १४
अथैनं धनुषोऽग्रेण तुदन्भूयोऽब्रवीद्वचः ।
एषोऽर्जुनो रणे यत्तो युध्यते कुरुभिः सह ।
तत्र गच्छस्व माद्रेय गृहं वा यदि मन्यसे ॥ १५
एवमुक्त्वा तु तं कर्णो रथेन रथिनां वरः ।
प्रायात्पाञ्चालपाण्डूनां सैन्यानि प्रहसन्निव ॥ १६
वधप्राप्तं तु माद्रेयं नावधीत्समरेऽरिहा ।
कुन्त्याः स्मृत्वा वचो राजन्सत्यसंधो महारथः ॥१७
सहदेवस्ततो राजन्विमनाः शरपीडितः ।
कर्णवाक्शल्यतप्तश्च जीविताच्निरविद्यत ॥ १८
आरुरोह रथं चापि पाञ्चाल्यस्य महात्मनः ।
जनमेजयस्य समरे त्वरायुक्तो महारथः ॥ १९
विराटं सहसेनं तु द्रोणार्थे द्रुतमागतम् ।
मद्रराजः शरौघेण छादयामास धन्विनम् ॥ २०
तयोः समभवद्युद्धं समरे दृढधन्विनोः ।
यादृशं ह्यभवद्राजञ्जम्भवासवयोः पुरा ॥ २१
मद्रराजो महाराज विराटं वाहिनीपतिम् ।
आजघ्ने त्वरितं तीक्ष्णैः शतेन नतपर्वणाम् ॥ २२
प्रतिविव्याध तं राजा नवभिर्निशितैः शरैः ।
पुनश्चैव त्रिसप्तत्या भूयश्चैव शतेन ह ॥ २३
तस्य मद्राधिपो हत्वा चतुरो रथवाजिनः ।
सूतं ध्वजं च समरे रथोपस्थादपातयत् ॥ २४
हताश्वात्तु रथात्तूर्णमवप्लुत्य महारथः ।
तस्थौ विस्फारयंश्चापं विमुञ्चंश्च शिताञ्शरान् ॥२५
शतानीकस्ततो दृष्ट्वा भ्रातरं हतवाहनम् ।
रथेनाभ्यपतत्तूर्णं सर्वलोकस्य पश्यतः ॥ २६
शतानीकमथायान्तं मद्रराजो महामृधे ।
विशिखैर्बहुभिर्विद्ध्वा ततो निन्ये यमक्षयम् ॥ २७
तस्मिंस्तु निहते वीरे विराटो रथसत्तमः ।
आरुरोह रथं तूर्णं तमेव ध्वजमालिनम् ॥ २८
ततो विस्फार्य नयने क्रोधाद्द्विगुणविक्रमः ।
मद्रराजरथं तूर्णं छादयामास पत्रिभिः ॥ २९
ततो मद्राधिपः क्रुद्धः शतेन नतपर्वणाम् ।
आजघानोरसि दृढं विराटं वाहिनीपतिम् ॥ ३०
सोऽतिविद्धो महाराज रथोपस्थ उपाविशत् ।
कश्मलं चाविशत्तीव्रं विराटो भरतर्षभ ।
सारथिस्तमपोवाह समरे शरविक्षतम् ॥ ३१
ततः सा महती सेना प्राद्रवन्निशि भारत ।
वध्यमाना शरशतैः शल्येनाहवशोभिना ॥ ३२
तां दृष्ट्वा विद्रुतां सेनां वासुदेवधनंजयौ ।
प्रायातां तत्र राजेन्द्र यत्र शल्यो व्यवस्थितः ॥३३
तौ तु प्रत्युद्ययौ राजन्राक्षसेन्द्रो ह्यलम्बुसः ।
अष्टचक्रसमायुक्तमास्थाय प्रवरं रथम् ॥ ३४
तुरंगममुखैर्युक्तं पिशाचैर्घोरदर्शनैः ।
लोहितार्द्रपताकं तं रक्तमाल्यविभूषितम् ।
कार्ष्णायसमयं घोरमृक्षचर्मावृतं महत् ॥ ३५
रौद्रेण चित्रपक्षेण विवृताक्षेण कूजता ।
ध्वजेनोच्छ्रिततुण्डेन गृध्रराजेन राजता ॥ ३६
स बभौ राक्षसो राजन्भिन्नाञ्जनचयोपमः ।
रुरोधार्जुनमायान्तं प्रभञ्जनमिवाद्रिराट् ।
किरन्बाणगणान्राजञ्शतशोऽर्जुनमूर्धनि ॥ ३७

अतितीव्रमभूद्युद्धं नरराक्षसयोर्मृधे ।
द्रष्टॄणां प्रीतिजननं सर्वेषां भरतर्षभ ॥ ३८
तमर्जुनः शतेनैव पत्रिणामभ्यताडयत् ।
नवभिश्च शितैर्बाणैश्चिच्छेद ध्वजमुच्छ्रितम् ॥ ३९
सारथिं च त्रिभिर्बाणैस्त्रिभिरेव त्रिवेणुकम् ।
धनुरेकेन चिच्छेद चतुर्भिश्चतुरो हयान् ।
विरथस्योद्यतं खड्गं शरेणास्य द्विधाच्छिनत् ॥ ४०
अथैनं निशितैर्बाणैश्चतुर्भिर्भरतर्षभ ।
पार्थोऽर्दयद्राक्षसेन्द्रं स विद्धः प्राद्रवद्भयात् ॥ ४१
तं विजित्यार्जुनस्तूर्णं द्रोणान्तिकमुपाययौ ।
किरञ्शरगणान्राजन्नरवारणवाजिषु ॥ ४२
वध्यमाना महाराज पाण्डवेन यशस्विना ।
सैनिका न्यपतन्नुर्व्यां वातनुन्ना इव द्रुमाः ॥ ४३
तेषु तूत्साद्यमानेषु फल्गुनेन महात्मना ।
संप्राद्रवद्बलं सर्वं पुत्राणां ते विशां पते ॥ ४४

इति श्रीमहाभारते द्रोणपर्वणि
द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥

१४३

संजय उवाच ।

शतानीकं शरैस्तूर्णं निर्दहन्तं चमूं तव ।
चित्रसेनस्तव सुतो वारयामास भारत ॥ १
नाकुलिश्चित्रसेनं तु नाराचेनार्दयद्भृशम् ।
स च तं प्रतिविव्याध दशभिर्निशितैः शरैः ॥ २
चित्रसेनो महाराज शतानीकं पुनर्युधि ।
नवभिर्निशितैर्बाणैराजघान स्तनान्तरे ॥ ३
नाकुलिस्तस्य विशिखैर्वर्म संनतपर्वभिः ।
गात्रात्संच्यावयामास तदद्भुतमिवाभवत् ॥ ४
सोऽपेतवर्मा पुत्रस्ते विरराज भृशं नृप ।
उत्सृज्य काले राजेन्द्र निर्मोकमिव पन्नगः ॥ ५
ततोऽस्य निशितैर्बाणैर्ध्वजं चिच्छेद नाकुलिः ।
धनुश्चैव महाराज यतमानस्य संयुगे ॥ ६
स छिन्नधन्वा समरे विवर्मा च महारथः ।
धनुरन्यन्महाराज जग्राहारिविदारणम् ॥ ७
ततस्तूर्णं चित्रसेनो नाकुलिं नवभिः शरैः ।
विव्याध समरे क्रुद्धो भरतानां महारथः ॥ ८
शतानीकोऽथ संक्रुद्धश्चित्रसेनस्य मारिष ।
जघान चतुरो वाहान्सारथिं च नरोत्तमः ॥ ९
अवप्लुत्य रथात्तस्माच्चित्रसेनो महारथः ।
नाकुलिं पञ्चविंशत्या शराणामार्दयद्बली ॥ १०
तस्य तत्कुर्वतः कर्म नकुलस्य सुतो रणे ।
अर्धचन्द्रेण चिच्छेद चापं रत्नविभूषितम् ॥ ११
स छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
आरुरोह रथं तूर्णं हार्दिक्यस्य महात्मनः ॥ १२
द्रुपदं तु सहानीकं द्रोणप्रेप्सुं महारथम् ।
वृषसेनोऽभ्ययात्तूर्णं किरञ्शरशतैस्तदा ॥ १३
यज्ञसेनस्तु समरे कर्णपुत्रं महारथम् ।
षष्ट्या शराणां विव्याध बाह्वोरुरसि चानघ ॥ १४
वृषसेनस्तु संक्रुद्धो यज्ञसेनं रथे स्थितम् ।
बहुभिः सायकैस्तीक्ष्णैराजघान स्तनान्तरे ॥ १५
तावुभौ शरनुन्नाङ्गौ शरकण्टकिनौ रणे ।
व्यभ्राजेतां महाराज श्वाविधौ शललैरिव ॥ १६
रुक्मपुङ्खैरजिह्माग्रैः शरैश्छिन्नतनुच्छदौ ।
रुधिरौघपरिक्लिन्नौ व्यभ्राजेतां महामृधे ॥ १७
तपनीयनिभौ चित्रौ कल्पवृक्षाविवाद्भुतौ ।
किंशुकाविव चोत्फुल्लौ व्यकाशेतां रणाजिरे ॥ १८
वृषसेनस्ततो राजन्नवभिर्द्रुपदं शरैः ।
विद्ध्वा विव्याध सप्तत्या पुनश्चान्यैस्त्रिभिः शरैः ॥
ततः शरसहस्राणि विमुञ्चन्विबभौ तदा ।
कर्णपुत्रो महाराज वर्षमाण इवाम्बुदः ॥ २०
ततस्तु द्रुपदानीकं शरैश्छिन्नतनुच्छदम् ।

संप्राद्रवद्रणे राजन्निशीथे भैरवे सति ॥ २१
प्रदीपैर्हि परित्यक्तैर्ज्वलद्भिस्तैः समन्ततः ।
व्यराजत मही राजन्वीताभ्रा द्यौरिव ग्रहैः ॥ २२
तथाङ्गदैर्निपतितैर्व्यराजत वसुंधरा ।
प्रावृट्काले महाराज विद्युद्भिरिव तोयदः ॥ २३
ततः कर्णसुतत्रस्ताः सोमका विप्रदुद्रुवुः ।
यथेन्द्रभयवित्रस्ता दानवास्तारकामये ॥ २४
तेनार्द्यमानाः समरे द्रवमाणाश्च सोमकाः ।
व्यराजन्त महाराज प्रदीपैरवभासिताः ॥ २५
तांस्तु निर्जित्य समरे कर्णपुत्रो व्यरोचत ।
मध्यंदिनमनुप्राप्तो घर्मांशुरिव भारत ॥ २६
तेषु राजसहस्रेषु तावकेषु परेषु च ।
एक एव ज्वलंस्तस्थौ वृषसेनः प्रतापवान् ॥ २७
स विजित्य रणे शूरान्सोमकानां महारथान् ।
जगाम त्वरितस्तत्र यत्र राजा युधिष्ठिरः ॥ २८
प्रतिविन्ध्यमथ क्रुद्धं प्रदहन्तं रणे रिपून् ।
दुःशासनस्तव सुतः प्रत्युद्गच्छन्महारथः ॥ २९
तयोः समागमो राजंश्चित्ररूपो बभूव ह ।
व्यपेतजलदे व्योम्नि बुधभार्गवयोरिव ॥ ३०
प्रतिविन्ध्यं तु समरे कुर्वाणं कर्म दुष्करम् ।
दुःशासनस्त्रिभिर्बाणैर्ललाटे समविध्यत ॥ ३१
सोऽतिविद्धो बलवता पुत्रेण तव धन्विना ।
विरराज महाबाहुः सशृङ्ग इव पर्वतः ॥ ३२
दुःशासनं तु समरे प्रतिविन्ध्यो महारथः ।
नवभिः सायकैर्विद्ध्वा पुनर्विव्याध सप्तभिः ॥ ३३
तत्र भारत पुत्रस्ते कृतवान्कर्म दुष्करम् ।
प्रतिविन्ध्यहयानुग्रैः पातयामास यच्छरैः ॥ ३४
सारथिं चास्य भल्लेन ध्वजं च समपातयत् ।
रथं च शतशो राजन्व्यधमत्तस्य धन्विनः ॥ ३५
पताकाश्च स तूणीरान्रश्मीन्योक्त्राणि चाभिभो ।
चिच्छेद तिलशः क्रुद्धः शरैः संनतपर्वभिः ॥ ३६
विरथः स तु धर्मात्मा धनुष्पाणिरवस्थितः ।
अयोधयत्तव सुतं किरञ्शरशतान्बहून् ॥ ३७
क्षुरप्रेण धनुस्तस्य चिच्छेद कृतहस्तवत् ।
अथैनं दशभिर्भल्लैश्छिन्नधन्वानमार्दयत् ॥ ३८
तं दृष्ट्वा विरथं तत्र भ्रातरोऽस्य महारथाः ।
अन्ववर्तन्त वेगेन महत्या सेनया सह ॥ ३९
आप्लुतः स ततो यानं सुतसोमस्य भास्वरम् ।
धनुर्गृह्य महाराज विव्याध तनयं तव ॥ ४०
ततस्तु तावकाः सर्वे परिवार्य सुतं तव ।
अभ्यवर्तन्त संग्रामे महत्या सेनया वृताः ॥ ४१
ततः प्रववृते युद्धं तव तेषां च भारत ।
निशीथे दारुणे काले यमराष्ट्रविवर्धनम् ॥ ४२

इति श्रीमहाभारते द्रोणपर्वणि
त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥

१४४

संजय उवाच ।

नकुलं रभसं युद्धे निघ्नन्तं वाहिनीं तव ।
अभ्ययात्सौबलः क्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ १
कृतवैरौ तु तौ वीरावन्योन्यवधकाङ्क्षिणौ ।
शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः ॥ २
यथैव सौबलः क्षिप्रं शरवर्षाणि मुञ्चति ।
तथैव नकुलो राजञ्शिक्षां संदर्शयन्युधि ॥ ३
तावुभौ समरे शूरौ शरकण्टकिनौ तदा ।
व्यराजेतां महाराज कण्टकैरिव शाल्मली ॥ ४
सुजिह्मं प्रेक्षमाणौ च राजन्विवृतलोचनौ ।
क्रोधसंरक्तनयनौ निर्दहन्तौ परस्परम् ॥ ५
स्यालस्तु तव संक्रुद्धो माद्रीपुत्रं हसन्निव ।
कर्णिनैकेन विव्याध हृदये निशितेन ह ॥ ६
नकुलस्तु भृशं विद्धः स्यालेन तव धन्विना ।

निषसाद रथोपस्थे कश्मलं चैनमाविशत् ॥ ७
अत्यन्तवैरिणं दृप्तं दृष्ट्वा शत्रुं तथागतम् ।
ननाद शकुनी राजंस्तपान्ते जलदो यथा ॥ ८
प्रतिलभ्य ततः संज्ञां नकुलः पाण्डुनन्दनः ।
अभ्ययात्सौबलं भूयो व्यात्तानन इवान्तकः ॥ ९
संक्रुद्धः शकुनिं षष्ट्या विव्याध भरतर्षभ ।
पुनश्चैव शतेनैव नाराचानां स्तनान्तरे ॥ १०
ततोऽस्य सशरं चापं मुष्टिदेशे स चिच्छिदे ।
ध्वजं च त्वरितं छित्त्वा रथाद्भूमावपातयत् ॥ ११
सोऽतिविद्धो महाराज रथोपस्थ उपाविशत् ।
तं विसंज्ञं निपतितं दृष्ट्वा स्यालं तवानघ ।
अपोवाह रथेनाशु सारथिर्ध्वजिनीमुखात् ॥ १२
ततः संचुक्रुशुः पार्था ये च तेषां पदानुगाः ।
निर्जित्य च रणे शत्रून्नकुलः शत्रुतापनः ।
अब्रवीत्सारथिं क्रुद्धो द्रोणानीकाय मां वह ॥ १३
तस्य तद्वचनं श्रुत्वा माद्रीपुत्रस्य धीमतः ।
प्रायात्तेन रणे राजन्येन द्रोणोऽन्वयुध्यत ॥ १४
शिखण्डिनं तु समरे द्रोणप्रेप्सुं विशां पते ।
कृपः शारद्वतो यत्तः प्रत्युद्गच्छत्सुवेगितः ॥ १५
गौतमं द्रुतमायान्तं द्रोणान्तिकमरिंदमम् ।
विव्याध नवभिर्भल्लैः शिखण्डी प्रहसन्निव ॥ १६
तमाचार्यो महाराज विद्ध्वा पञ्चभिराशुगैः ।
पुनर्विव्याध विंशत्या पुत्राणां प्रियकृत्तव ॥ १७
महद्युद्धं तयोरासीद्घोररूपं विशां पते ।
यथा देवासुरे युद्धे शम्बरामरराजयोः ॥ १८
शरजालावृतं व्योम चक्रतुस्तौ महारथौ ।
प्रकृत्या घोररूपं तदासीद्घोरतरं पुनः ॥ १९
रात्रिश्च भरतश्रेष्ठ योधानां युद्धशालिनाम् ।
कालरात्रिनिभा ह्यासीद्घोररूपा भयावहा ॥ २०
शिखण्डी तु महाराज गौतमस्य महद्धनुः ।
अर्धचन्द्रेण चिच्छेद सज्यं सविशिखं तदा ॥ २१
तस्य क्रुद्धः कृपो राजञ्शक्तिं चिक्षेप दारुणाम् ।
स्वर्णदण्डामकुण्ठाग्रां कर्मारपरिमार्जिताम् ॥ २२
तामापतन्तीं चिच्छेद शिखण्डी बहुभिः शरैः ।
सापतन्मेदिनीं दीप्ता भासयन्ती महाप्रभा ॥ २३
अथान्यद्धनुरादाय गौतमो रथिनां वरः ।
प्राच्छादयच्छितैर्बाणैर्महाराज शिखण्डिनम् ॥ २४
स छाद्यमानः समरे गौतमेन यशस्विना ।
व्यषीदत रथोपस्थे शिखण्डी रथिनां वरः ॥ २५
सीदन्तं चैनमालोक्य कृपः शारद्वतो युधि ।
आजघ्ने बहुभिर्बाणैर्जिघांसन्निव भारत ॥ २६
विमुखं तं रणे दृष्ट्वा याज्ञसेनिं महारथम् ।
पाञ्चालाः सोमकाश्चैव परिवव्रुः समन्ततः ॥ २७
तथैव तव पुत्राश्च परिवव्रुर्द्विजोत्तमम् ।
महत्या सेनया सार्धं ततो युद्धमभूत्पुनः ॥ २८
रथानां च रणे राजन्नन्योन्यमभिधावताम् ।
बभूव तुमुलः शब्दो मेघानां नदतामिव ॥ २९
द्रवतां सादिनां चैव गजानां च विशां पते ।
अन्योन्यमभितो राजन्क्रूरमायोधनं बभौ ॥ ३०
पत्तीनां द्रवतां चैव पदशब्देन मेदिनी ।
अकम्पत महाराज भयत्रस्तेव चाङ्गना ॥ ३१
रथा रथान्समासाद्य प्रद्रुता वेगवत्तरम् ।
न्यगृह्णन्बहवो राजञ्शलभान्वायसा इव ॥ ३२
तथा गजान्प्रभिन्नांश्च सुप्रभिन्ना महागजाः ।
तस्मिन्नेव पदे यत्ता निगृह्णन्ति स्म भारत ॥ ३३
सादी सादिनमासाद्य पदाती च पदातिनम् ।
समासाद्य रणेऽन्योन्यं संरब्धा नातिचक्रमुः ॥ ३४
धावतां द्रवतां चैव पुनरावर्ततामपि ।
बभूव तत्र सैन्यानां शब्दः सुतुमुलो निशि ॥ ३५
दीप्यमानाः प्रदीपाश्च रथवारणवाजिषु ।

अदृश्यन्त महाराज महोल्का इव खाच्च्युताः ॥३६
सा निशा भरतश्रेष्ठ प्रदीपैरवभासिता ।
दिवसप्रतिमा राजन्बभूव रणमूर्धनि ॥ ३७
आदित्येन यथा व्याप्तं तमो लोके प्रणश्यति ।
तथा नष्टं तमो घोरं दीपैर्दीप्तैरलंकृतम् ॥ ३८
शस्त्राणां कवचानां च मणीनां च महात्मनाम् ।
अन्तर्दधुः प्रभाः सर्वा दीपैस्तैरवभासिताः ॥ ३९
तस्मिन्कोलाहले युद्धे वर्तमाने निशामुखे ।
अवधीत्समरे पुत्रं पिता भरतसत्तम ॥ ४०
पुत्रश्च पितरं मोहात्सखायं च सखा तथा ।
संबन्धिनं च संबन्धी स्वस्रीयं चापि मातुलः ॥४१
स्वे स्वान्परे परांश्चापि निजघ्नुरितरेतरम् ।
निर्मर्यादमभूद्युद्धं रात्रौ घोरं भयावहम् ॥ ४२

इति श्रीमहाभारते द्रोणपर्वणि
चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४॥

१४५

संजय उवाच ।

तस्मिन्सुतुमुले युद्धे वर्तमाने भयावहे ।
धृष्टद्युम्नो महाराज द्रोणमेवाभ्यवर्तत ॥ १
संमृजानो धनुः श्रेष्ठं ज्यां विकर्षन्पुनः पुनः ।
अभ्यवर्तत द्रोणस्य रथं रुक्मविभूषितम् ॥ २
धृष्टद्युम्नं तदायान्तं द्रोणस्यान्तचिकीर्षया ।
परिवव्रुर्महाराज पाञ्चालाः पाण्डवैः सह ॥ ३
तथा परिवृतं दृष्ट्वा द्रोणमाचार्यसत्तमम् ।
पुत्रास्ते सर्वतो यत्ता ररक्षुर्द्रोणमाहवे ॥ ४
बलार्णवौ ततस्तौ तु समेयातां निशामुखे ।
वातोद्धूतौ क्षुब्धसत्त्वौ भैरवौ सागराविव ॥ ५
ततो द्रोणं महाराज पाञ्चाल्यः पञ्चभिः शरैः ।
विव्याध हृदये तूर्णं सिंहनादं ननाद च ॥ ६
तं द्रोणः पञ्चविंशत्या विद्ध्वा भारत संयुगे ।
चिच्छेदान्येन भल्लेन धनुरस्य महाप्रभम् ॥ ७
धृष्टद्युम्नस्तु निर्विद्धो द्रोणेन भरतर्षभ ।
उत्ससर्ज धनुस्तूर्णं संदश्य दशनच्छदम् ॥ ८
ततः क्रुद्धो महाराज धृष्टद्युम्नः प्रतापवान् ।
आददेऽन्यद्धनुः श्रेष्ठं द्रोणस्यान्तचिकीर्षया ॥ ९
विकृष्य च धनुश्चित्रमा कर्णात्परवीरहा ।
द्रोणस्यान्तकरं घोरं व्यसृजत्सायकं ततः ॥ १०
स विसृष्टो बलवता शरो घोरो महामृधे ।
भासयामास तत्सैन्यं दिवाकर इवोदितः ॥ ११
तं दृष्ट्वा तु शरं घोरं देवगन्धर्वमानवाः ।
स्वस्त्यस्तु समरे राजन्द्रोणायेत्यब्रुवन्वचः ॥ १२
तं तु सायकमप्राप्तमाचार्यस्य रथं प्रति ।
कर्णो द्वादशधा राजंश्छिच्छेद कृतहस्तवत् ॥ १३
स छिन्नो बहुधा राजन्सूतपुत्रेण मारिष ।
निपपात शरस्तूर्णं निकृत्तः कर्णसायकैः ॥ १४
छित्त्वा तु समरे बाणं शरैः संनतपर्वभिः ।
धृष्टद्युम्नं रणे कर्णो विव्याध दशभिः शरैः ॥ १५
पञ्चभिर्द्रोणपुत्रस्तु स्वयं द्रोणश्च सप्तभिः ।
शल्यश्च नवभिर्बाणैस्त्रिभिर्दुःशासनस्तथा ॥ १६
दुर्योधनश्च विंशत्या शकुनिश्चापि पञ्चभिः ।
पाञ्चाल्यं त्वरिताविध्यन्सर्वे एव महारथाः ॥ १७
स विद्धः सप्तभिर्वीरैर्द्रोणत्राणार्थमाहवे ।
सर्वानसंभ्रमाद्राजन्प्रत्यविध्यत्त्रिभिस्त्रिभिः ।
द्रोणं द्रौणिं च कर्णं च विव्याध तव चात्मजम् ॥१८
ते विद्धा धन्विना तेन धृष्टद्युम्नं पुनर्मृधे ।
विव्यधुः पञ्चभिस्तूर्णमेकैको रथिनां वरः ॥ १९
द्रुमसेनस्तु संक्रुद्धो राजन्विव्याध पत्रिणा ।
त्रिभिश्चान्यैः शरैस्तूर्णं तिष्ठ तिष्ठेति चाब्रवीत् ॥२०
स तु तं प्रतिविव्याध त्रिभिस्तीक्ष्णैरजिह्मगैः ।
स्वर्णपुङ्खैः शिलाधौतैः प्राणान्तकरणैर्युधि ॥ २१

भल्लेनान्येन तु पुनः सुवर्णोज्ज्वलकुण्डलम् ।
उन्ममाथ शिरः कायाद्रुमसेनस्य वीर्यवान् ॥ २२
तच्छिरो न्यपतद्भूमौ संदष्टौष्ठपुटं रणे ।
महावातसमुद्धूतं पक्वं तालफलं यथा ॥ २३
तांश्च विद्ध्वा पुनर्वीरान्वीरः सुनिशितैः शरैः ।
राधेयस्याच्छिनद्भल्लैः कार्मुकं चित्रयोधिनः ॥ २४
न तु तन्ममृषे कर्णो धनुषश्छेदनं तथा ।
निकर्तनमिवात्युग्रो लाङ्गूलस्य यथा हरिः ॥ २५
सोऽन्यद्धनुः समादाय क्रोधरक्तेक्षणः श्वसन् ।
अभ्यवर्षच्छरौघैस्तं धृष्टद्युम्नं महाबलम् ॥ २६
दृष्ट्वा तु कर्णं संरब्धं ते वीराः षड्रथर्षभाः ।
पाञ्चाल्यपुत्रं त्वरिताः परिवव्रुर्जिघांसया ॥ २७
षण्णां योधप्रवीराणां तावकानां पुरस्कृतम् ।
मृत्योरास्यमनुप्राप्तं धृष्टद्युम्नममंस्महि ॥ २८
एतस्मिन्नेव काले तु दाशार्हो विकिरञ्शरान् ।
धृष्टद्युम्नं पराक्रान्तं सात्यकिः प्रत्यपद्यत ॥ २९
तमायान्तं महेष्वासं सात्यकिं युद्धदुर्मदम् ।
राधेयो दशभिर्बाणैः प्रत्यविध्यदजिह्मगैः ॥ ३०
तं सात्यकिर्महाराज विव्याध दशभिः शरैः ।
पश्यतां सर्ववीराणां मा गास्तिष्ठेति चाब्रवीत् ॥ ३१
स सात्यकेस्तु बलिनः कर्णस्य च महात्मनः ।
आसीत्समागमो घोरो बलिवासवयोरिव ॥ ३२
त्रासयंस्तलघोषेण क्षत्रियान्क्षत्रियर्षभः ।
राजीवलोचनं कर्णं सात्यकिः प्रत्यविध्यत ॥ ३३
कम्पयन्निव घोषेण धनुषो वसुधां बली ।
सूतपुत्रो महाराज सात्यकिं प्रत्ययोधयत् ॥ ३४
विपाठकर्णिनाराचैर्वत्सदन्तैः क्षुरैरपि ।
कर्णः शरशतैश्चापि शैनेयं प्रत्यविध्यत ॥ ३५
तथैव युयुधानोऽपि वृष्णीनां प्रवरो रथः ।
अभ्यवर्षच्छरैः कर्णं तद्युद्धमभवत्समम् ॥ ३६
तावकाश्च महाराज कर्णपुत्रश्च दंशितः ।
सात्यकिं विव्यधुस्तूर्णं समन्तान्निशितैः शरैः ॥ ३७
अस्त्रैरस्त्राणि संवार्य तेषां कर्णस्य चाभिभो ।
अविध्यत्सात्यकिः क्रुद्धो वृषसेनं स्तनान्तरे ॥ ३८
तेन बाणेन निर्विद्धो वृषसेनो विशां पते ।
न्यपतत्स रथे मूढो धनुरुत्सृज्य वीर्यवान् ॥ ३९
ततः कर्णो हतं मत्वा वृषसेनं महारथः ।
पुत्रशोकाभिसंतप्तः सात्यकिं प्रत्यपीडयत् ॥ ४०
पीड्यमानस्तु कर्णेन युयुधानो महारथः ।
विव्याध बहुभिः कर्णं त्वरमाणः पुनः पुनः ॥ ४१
स कर्णं दशभिर्विद्ध्वा वृषसेनं च सप्तभिः ।
सहस्तावापधनुषी तयोश्चिच्छेद सात्वतः ॥ ४२
तावन्ये धनुषी सज्ये कृत्वा शत्रुभयंकरे ।
युयुधानमविध्येतां समन्तान्निशितैः शरैः ॥ ४३
वर्तमाने तु संग्रामे तस्मिन्वीरवरक्षये ।
अतीव शुश्रुवे राजन्गाण्डीवस्य महास्वनः ॥ ४४
श्रुत्वा तु रथनिर्घोषं गाण्डीवस्य च निस्वनम् ।
सूतपुत्रोऽब्रवीद्राजन्दुर्योधनमिदं वचः ॥ ४५
एष सर्वाञ्शिबीन्हत्वा मुख्यशश्च नरर्षभान् ।
पौरवांश्च महेष्वासान्गाण्डीवनिनदो महान् ॥ ४६
श्रूयते रथघोषश्च वासवस्येव नर्दतः ।
करोति पाण्डवो व्यक्तं कर्मौपयिकमात्मनः ॥ ४७
एषा विदीर्यते राजन्बहुधा भारती चमूः ।
विप्रकीर्णान्यनीकानि नावतिष्ठन्ति कर्हिचित् ॥ ४८
वातेनेव समुद्धूतमभ्रजालं विदीर्यते ।
सव्यसाचिनमासाद्य भिन्ना नौरिव सागरे ॥ ४९
द्रवतां योधमुख्यानां गाण्डीवप्रेषितैः शरैः ।
विद्धानां शतशो राजञ्श्रूयते निनदो महान् ।
निशीथे राजशार्दूल स्तनयित्नोरिवाम्बरे ॥ ५०
हाहाकाररवांश्चैव सिंहनादांश्च पुष्कलान् ।

शृणु शब्दान्बहुविधानर्जुनस्य रथं प्रति ॥ ५१
अयं मध्ये स्थितोऽस्माकं सात्यकिः सात्वताधमः ।
इह चेल्लभ्यते लक्ष्यं कृत्स्नाञ्जेष्यामहे परान् ॥ ५२
एष पाञ्चालराजस्य पुत्रो द्रोणेन संगतः ।
सर्वतः संवृतो योधै राजन्पुरुषसत्तमैः ॥ ५३
सात्यकिं यदि हन्यामो धृष्टद्युम्नं च पार्षतम् ।
असंशयं महाराज ध्रुवो नो विजयो भवेत् ॥ ५४
सौभद्रवदिमौ वीरौ परिवार्य महारथौ ।
प्रयतामो महाराज निहन्तुं वृष्णिपार्षतौ ॥ ५५
सव्यसाची पुरोऽभ्येति द्रोणानीकाय भारत ।
संसक्तं सात्यकिं ज्ञात्वा बहुभिः कुरुपुंगवैः ॥ ५६
तत्र गच्छन्तु बहवः प्रवरा रथसत्तमाः ।
यावत्पार्थो न जानाति सात्यकिं बहुभिर्वृतम् ॥ ५७
ते त्वरध्वं यथा शूराः शराणां मोक्षणे भृशम् ।
यथा तूर्णं व्रजत्येष परलोकाय माधवः ॥ ५८
कर्णस्य मतमाज्ञाय पुत्रस्ते प्राह सौबलम् ।
यथेन्द्रः समरे राजन्प्राह विष्णुं यशस्विनम् ॥ ५९
वृतः सहस्रैर्दशभिर्गजानामनिवर्तिनाम् ।
रथैश्च दशसाहस्रैर्वृतो याहि धनंजयम् ॥ ६०
दुःशासनो दुर्विषहः सुबाहुर्दुष्प्रधर्षणः ।
एते त्वामनुयास्यन्ति पत्तिभिर्बहुभिर्वृताः ॥ ६१
जहि कृष्णौ महाबाहो धर्मराजं च मातुल ।
नकुलं सहदेवं च भीमसेनं च भारत ॥ ६२
देवानामिव देवेन्द्रे जयाशा मे त्वयि स्थिता ।
जहि मातुल कौन्तेयानसुरानिव पावकिः ॥ ६३
एवमुक्तो ययौ पार्थान्पुत्रेण तव सौबलः ।
महत्या सेनया सार्धं तव पुत्रैस्तथा विभो ॥ ६४
प्रियार्थं तव पुत्राणां दिधक्षुः पाण्डुनन्दनान् ।
ततः प्रववृते युद्धं तावकानां परैः सह ॥ ६५
प्रयाते सौबले राजन्पाण्डवानामनीकिनीम् ।
बलेन महता युक्तः सूतपुत्रस्तु सात्वतम् ॥ ६६
अभ्ययात्त्वरितं युद्धे किरञ्शरशतान्बहून् ।
तथैव पाण्डवाः सर्वे सात्यकिं पर्यवारयन् ॥ ६७
महद्युद्धं तदासीत्तु द्रोणस्य निशि भारत ।
धृष्टद्युम्नेन शूरेण पाञ्चालैश्च महात्मनः ॥ ६८

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥

१४६

संजय उवाच ।

ततस्ते प्राद्रवन्सर्वे त्वरिता युद्धदुर्मदाः ।
अमृष्यमाणाः संरब्धा युयुधानरथं प्रति ॥ १
ते रथैः कल्पितै राजन्हेमरूप्यविभूषितैः ।
सादिभिश्च गजैश्चैव परिवव्रुः स्म सात्वतम् ॥ २
अथैनं कोष्ठकीकृत्य सर्वतस्ते महारथाः ।
सिंहनादांस्तदा चक्रुस्तर्जयन्तः स्म सात्यकिम् ॥ ३
तेऽभ्यवर्षञ्शरैस्तीक्ष्णैः सात्यकिं सत्यविक्रमम् ।
त्वरमाणा महावीर्या माधवस्य वधैषिणः ॥ ४
तान्दृष्ट्वा पततस्तूर्णं शैनेयः परवीरहा ।
प्रत्यगृह्णान्महाबाहुः प्रमुञ्चन्विशिखान्बहून् ॥ ५
तत्र वीरो महेष्वासः सात्यकिर्युद्धदुर्मदः ।
निचकर्त शिरांस्युग्रैः शरैः संनतपर्वभिः ॥ ६
हस्तिहस्तान्हयग्रीवान्बाहूनपि च सायुधान् ।
क्षुरप्रैः पातयामास तावकानां स माधवः ॥ ७
पतितैश्चामरैश्चैव श्वेतच्छत्रैश्च भारत ।
बभूव धरणी पूर्णा नक्षत्रैर्द्यौरिव प्रभो ॥ ८
तेषां तु युयुधानेन युध्यतां युधि भारत ।
बभूव तुमुलः शब्दः प्रेतानामिव क्रन्दताम् ॥ ९
तेन शब्देन महता पूरितासीद्वसुंधरा ।
रात्रिः समभवच्चैव तीव्ररूपा भयावहा ॥ १०
दीर्यमाणं बलं दृष्ट्वा युयुधानशराहतम् ।

श्रुत्वा च विपुलं नादं निशीथे लोमहर्षणम् ॥ ११
सुतस्तवाब्रवीद्राजन्सारथिं रथिनां वरः ।
यत्रैष शब्दस्तत्राश्वांश्चोदयेति पुनः पुनः ॥ १२
तेन संचोद्यमानस्तु ततस्तांस्तुरगोत्तमान् ।
सूतः संचोदयामास युयुधानरथं प्रति ॥ १३
ततो दुर्योधनः क्रुद्धो दृढधन्वा जितक्लमः ।
शीघ्रहस्तश्चित्रयोधी युयुधानमुपाद्रवत् ॥ १४
ततः पूर्णायतोत्सृष्टैर्मांसशोणितभोजनैः ।
दुर्योधनं द्वादशभिर्माधवः प्रत्यविध्यत ॥ १५
दुर्योधनस्तेन तथा पूर्वमेवार्दितः शरैः ।
शैनेयं दशभिर्बाणैः प्रत्यविध्यदमर्षितः ॥ १६
ततः समभवद्युद्धमाकुलं भरतर्षभ ।
पाञ्चालानां च सर्वेषां भारतानां च दारुणम् ॥१७
शैनेयस्तु रणे क्रुद्धस्तव पुत्रं महारथम् ।
सायकानामशीत्या तु विव्याधोरसि भारत ॥ १८
ततोऽस्य वाहान्समरे शरैर्निन्ये यमक्षयम् ।
सारथिं च रथात्तूर्णं पातयामास पत्रिणा ॥ १९
हताश्वे तु रथे तिष्ठन्पुत्रस्तव विशां पते ।
मुमोच निशितान्बाणाञ्शैनेयस्य रथं प्रति ॥ २०
शरान्पञ्चाशतस्तांस्तु शैनेयः कृतहस्तवत् ।
चिच्छेद समरे राजन्प्रेषितांस्तनयेन ते ॥ २१
अथापरेण भल्लेन मुष्टिदेशे महद्धनुः ।
चिच्छेद रभसो युद्धे तव पुत्रस्य मारिष ॥ २२
विरथो विधनुष्कश्च सर्वलोकेश्वरः प्रभुः ।
आरुरोह रथं तूर्णं भास्वरं कृतवर्मणः ॥ २३
दुर्योधने परावृत्ते शैनेयस्तव वाहिनीम् ।
द्रावयामास विशिखैर्निशामध्ये विशां पते ॥ २४
शकुनिश्चार्जुनं राजन्परिवार्य समन्ततः ।
रथैरनेकसाहस्रैर्गजैश्चैव सहस्रशः ।
तथा हयसहस्रैश्च तुमुलं सर्वतोऽकरोत् ॥ २५
ते महास्त्राणि दिव्यानि विकिरन्तोऽर्जुनं प्रति ।
अर्जुनं योधयन्ति स्म क्षत्रियाः कालचोदिताः ॥२६
तान्यर्जुनः सहस्राणि रथवारणवाजिनाम् ।
प्रत्यवारयदायस्तः प्रकुर्वन्विपुलं क्षयम् ॥ २७
ततस्तु समरे शूरः शकुनिः सौबलस्तदा ।
विव्याध निशितैर्बाणैरर्जुनं प्रहसन्निव ॥ २८
पुनश्चैव शतेनास्य संरुरोध महारथम् ।
तमर्जुनस्तु विंशत्या विव्याध युधि भारत ॥ २९
अथेतरान्महेष्वासांस्त्रिभिस्त्रिभिरविध्यत ।
संवार्य तान्बाणगणैर्युधि राजन्धनंजयः ।
अवधीत्तावकान्योधान्वज्रपाणिरिवासुरान् ॥ ३०
भुजैश्छिन्नैर्महाराज शरीरैश्च सहस्रशः ।
समास्तीर्णा धरा तत्र बभौ पुष्पैरिवाचिता ॥ ३१
स विद्ध्वा शकुनिं भूयः पञ्चभिर्नतपर्वभिः ।
उलूकं त्रिभिराजघ्ने त्रिभिरेव महायसैः ॥ ३२
तमुलूकस्तथा विद्ध्वा वासुदेवमताडयत् ।
ननाद च महानादं पूरयन्वसुधातलम् ॥ ३३
अर्जुनस्तु द्रुतं गत्वा शकुनेर्धनुराच्छिनत् ।
निन्ये च चतुरो वाहान्यमस्य सदनं प्रति ॥ ३४
ततो रथादवप्लुत्य सौबलो भरतर्षभ ।
उलूकस्य रथं तूर्णमारुरोह विशां पते ॥ ३५
तावेकरथमारूढौ पितापुत्रौ महारथौ ।
पार्थं सिषिचतुर्बाणैर्गिरिं मेघाविवोत्थितौ ॥ ३६
तौ तु विद्ध्वा महाराज पाण्डवो निशितैः शरैः ।
विद्रावयंस्तव चमूं शतशो व्यधमच्छरैः ॥ ३७
अनिलेन यथाभ्राणि विच्छिन्नानि समन्ततः ।
विच्छिन्नानि तथा राजन्बलान्यासन्विशां पते ॥३८
तद्बलं भरतश्रेष्ठ वध्यमानं तथा निशि ।
प्रदुद्राव दिशः सर्वा वीक्षमाणं भयार्दितम् ॥ ३९
उत्सृज्य वाहान्समरे चोदयन्तस्तथापरे ।

संभ्रान्ताः पर्यधावन्त तस्मिंस्तमसि दारुणे ॥ ४०
विजित्य समरे योधांस्तावकान्भरतर्षभ ।
दध्मतुर्मुदितौ शङ्खौ वासुदेवधनंजयौ ॥ ४१
धृष्टद्युम्नो महाराज द्रोणं विद्ध्वा त्रिभिः शरैः ।
चिच्छेद धनुषस्तूर्णं ज्यां शरेण शितेन ह ॥ ४२
तन्निधाय धनुर्नीडे द्रोणः क्षत्रियमर्दनः ।
आददेऽन्यद्धनुः शूरो वेगवत्सारवत्तरम् ॥ ४३
धृष्टद्युम्नं ततो द्रोणो विद्ध्वा सप्तभिराशुगैः ।
सारथिं पञ्चभिर्बाणै राजन्विव्याध संयुगे ॥ ४४
तं निवार्य शरैस्तूर्णं धृष्टद्युम्नो महारथः ।
व्यधमत्कौरवीं सेनां शतशोऽथ सहस्रशः ॥ ४५
वध्यमाने बले तस्मिंस्तव पुत्रस्य मारिष ।
प्रावर्तत नदी घोरा शोणितौघतरङ्गिणी ॥ ४६
उभयोः सेनयोर्मध्ये नराश्वद्विपवाहिनी ।
यथा वैतरणी राजन्यमराष्ट्रपुरं प्रति ॥ ४७
द्रावयित्वा तु तत्सैन्यं धृष्टद्युम्नः प्रतापवान् ।
अत्यराजत तेजस्वी शक्रो देवगणेष्विव ॥ ४८
अथ दध्मुर्महाशङ्खान्धृष्टद्युम्नशिखण्डिनौ ।
यमौ च युयुधानश्च पाण्डवश्च वृकोदरः ॥ ४९
जित्वा रथसहस्राणि तावकानां महारथाः ।
सिंहनादरवांश्चक्रुः पाण्डवा जितकाशिनः ॥ ५०
पश्यतस्तव पुत्रस्य कर्णस्य च मदोत्कटाः ।
तथा द्रोणस्य शूरस्य द्रौणेश्चैव विशां पते ॥ ५१

इति श्रीमहाभारते द्रोणपर्वणि
षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥

१४७

संजय उवाच ।

विद्रुतं स्वबलं दृष्ट्वा वध्यमानं महात्मभिः ।
क्रोधेन महताविष्टः पुत्रस्तव विशां पते ॥ १
अभ्येत्य सहसा कर्णं द्रोणं च जयतां वरम् ।
अमर्षवशमापन्नो वाक्यज्ञो वाक्यमब्रवीत् ॥ २
भवद्भ्यामिह संग्रामो क्रुद्धाभ्यां संप्रवर्तितः ।
आहवे निहतं दृष्ट्वा सैन्धवं सव्यसाचिना ॥ ३
निहन्यमानां पाण्डूनां बलेन मम वाहिनीम् ।
भूत्वा तद्विजये शक्तावशक्ताविव पश्यतः ॥ ४
यद्यहं भवतोस्त्याज्यो न वाच्योऽस्मि तदैव हि ।
आवां पाण्डुसुतान्संख्ये जेष्याव इति मानदौ ॥ ५
तदैवाहं वचः श्रुत्वा भवद्भ्यामनुसंमतम् ।
कृतवान्पाण्डवैः सार्धं वैरं योधविनाशनम् ॥ ६
यदि नाहं परित्याज्यो भवद्भ्यां पुरुषर्षभौ ।
युध्येतामनुरूपेण विक्रमेण सुविक्रमौ ॥ ७
वाक्प्रतोदेन तौ वीरौ प्रणुन्नौ तनयेन ते ।
प्रावर्तयेतां तौ युद्धं घट्टिताविव पन्नगौ ॥ ८
ततस्तौ रथिनां श्रेष्ठौ सर्वलोकधनुर्धरौ ।
शैनेयप्रमुखान्पार्थानभिदुद्रुवतू रणे ॥ ९
तथैव सहिताः पार्थाः स्वेन सैन्येन संवृताः ।
अभ्यवर्तन्त तौ वीरौ नर्दमानौ मुहुर्मुहुः ॥ १०
अथ द्रोणो महेष्वासो दशभिः शिनिपुंगवम् ।
अविध्यत्त्वरितं क्रुद्धः सर्वशस्त्रभृतां वरः ॥ ११
कर्णश्च दशभिर्बाणैः पुत्रश्च तव सप्तभिः ।
दशभिर्वृषसेनश्च सौबलश्चापि सप्तभिः ।
एते कौरव संक्रन्दे शैनेयं पर्यवारयन् ॥ १२
दृष्ट्वा च समरे द्रोणं निघ्नन्तं पाण्डवीं चमूम् ।
विव्यधुः सोमकास्तूर्णं समन्ताच्छरवृष्टिभिः ॥ १३
ततो द्रोणोऽहरत्प्राणान्क्षत्रियाणां विशां पते ।
रश्मिभिर्भास्करो राजंस्तमसामिव भारत ॥ १४
द्रोणेन वध्यमानानां पाञ्चालानां विशां पते ।
शुश्रुवे तुमुलः शब्दः क्रोशतामितरेतरम् ॥ १५
पुत्रानन्ये पितॄनन्ये भ्रातॄनन्ये च मातुलान् ।
भागिनेयान्वयस्यांश्च तथा संबन्धिबान्धवान् ।

उत्सृज्योत्सृज्य गच्छन्ति त्वरिता जीवितेप्सवः ॥ १६
अपरे मोहिता मोहात्तमेवाभिमुखा ययुः ।
पाण्डवानां रणे योधाः परलोकं तथापरे ॥ १७
सा तथा पाण्डवी सेना वध्यमाना महात्मभिः ।
निशि संप्राद्रवद्राजन्नुत्सृज्योल्काः सहस्रशः ॥ १८
पश्यतो भीमसेनस्य विजयस्याच्युतस्य च ।
यमयोर्धर्मपुत्रस्य पार्षतस्य च पश्यतः ॥ १९
तमसा संवृते लोके न प्राज्ञायत किंचन ।
कौरवाणां प्रकाशेन दृश्यन्ते तु द्रुताः परे ॥ २०
द्रवमाणं तु तत्सैन्यं द्रोणकर्णौ महारथौ ।
जघ्नतुः पृष्ठतो राजन्किरन्तौ सायकान्बहून् ॥ २१
पाञ्चालेषु प्रभग्नेषु दीर्यमाणेषु सर्वशः ।
जनार्दनो दीनमनाः प्रत्यभाषत फल्गुनम् ॥ २२
द्रोणकर्णौ महेष्वासावेतौ पार्षतसात्यकी ।
पाञ्चालांश्चैव सहितौ जघ्नतुः सायकैर्भृशम् ॥ २३
एतयोः शरवर्षेण प्रभग्ना नो महारथाः ।
वार्यमाणापि कौन्तेय पृतना नावतिष्ठते ॥ २४
एतावावां सर्वसैन्यैर्व्यूढैः सम्यगुदायुधैः ।
द्रोणं च सूतपुत्रं च प्रयतावः प्रबाधितुम् ॥ २५
एतौ हि बलिनौ शूरौ कृतास्त्रौ जितकाशिनौ ।
उपेक्षितौ बलं क्रुद्धौ नाशयेतां निशामिमाम् ।
एष भीमोऽभियात्युग्रः पुनरावर्त्य वाहिनीम् ॥ २६
वृकोदरं तथायान्तं दृष्ट्वा तत्र जनार्दनः ।
पुनरेवाब्रवीद्राजन्हर्षयन्निव पाण्डवम् ॥ २७
एष भीमो रणश्लाघी वृतः सोमकपाण्डवैः ।
रुषितोऽभ्येति वेगेन द्रोणकर्णौ महाबलौ ॥ २८
एतेन सहितो युध्य पाञ्चालैश्च महारथैः ।
आश्वासनार्थं सर्वेषां सैन्यानां पाण्डुनन्दन ॥ २९
ततस्तौ पुरुषव्याघ्रावुभौ माधवपाण्डवौ ।
द्रोणकर्णौ समासाद्य धिष्ठितौ रणमूर्धनि ॥ ३०
ततस्तत्पुनरावृत्तं युधिष्ठिरबलं महत् ।
ततो द्रोणश्च कर्णश्च परान्ममृदतुर्युधि ॥ ३१
स संप्रहारस्तुमुलो निशि प्रत्यभवन्महान् ।
यथा सागरयो राजंश्चन्द्रोदयविवृद्धयोः ॥ ३२
तत उत्सृज्य पाणिभ्यः प्रदीपांस्तव वाहिनी ।
युयुधे पाण्डवैः सार्धमुन्मत्तवदहःक्षये ॥ ३३
रजसा तमसा चैव संवृते भृशदारुणे ।
केवलं नामगोत्रेण प्रायुध्यन्त जयैषिणः ॥ ३४
अश्रूयन्त हि नामानि श्राव्यमाणानि पार्थिवैः ।
प्रहरद्भिर्महाराज स्वयंवर इवाहवे ॥ ३५
निःशब्दमासीत्सहसा पुनः शब्दो महानभूत् ।
क्रुद्धानां युध्यमानानां जयतां जीयतामपि ॥ ३६
यत्र यत्र स्म दृश्यन्ते प्रदीपाः कुरुसत्तम ।
तत्र तत्र स्म ते शूरा निपतन्ति पतंगवत् ॥ ३७
तथा संयुध्यमानानां विगाढाभून्महानिशा ।
पाण्डवानां च राजेन्द्र कौरवाणां च सर्वशः ॥ ३८

इति श्रीमहाभारते द्रोणपर्वणि
सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥

१४८

संजय उवाच ।

ततः कर्णो रणे दृष्ट्वा पार्षतं परवीरहा ।
आजघानोरसि शरैर्दशभिर्मर्मभेदिभिः ॥ १
प्रतिविव्याध तं तूर्णं धृष्टद्युम्नोऽपि मारिष ।
पञ्चभिः सायकैर्हृष्टस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ २
तावन्योन्यं शरैः संख्ये संछाद्य सुमहारथौ ।
पुनः पूर्णायतोत्सृष्टैर्विव्यधाते परस्परम् ॥ ३
ततः पाञ्चालमुख्यस्य धृष्टद्युम्नस्य संयुगे ।
सारथिं चतुरश्चाश्वान्कर्णो विव्याध सायकैः ॥ ४
कार्मुकप्रवरं चास्य प्रचिच्छेद शितैः शरैः ।
सारथिं चास्य भल्लेन रथनीडादपातयत् ॥ ५

धृष्टद्युम्नस्तु विरथो हताश्वो हतसारथिः ।
गृहीत्वा परिघं घोरं कर्णस्याश्वानपीपिषत् ॥ ६
विद्धश्च बहुभिस्तेन शरैराशीविषोपमैः ।
ततो युधिष्ठिरानीकं पद्भ्यामेवान्ववर्तत ।
आरुरोह रथं चापि सहदेवस्य मारिष ॥ ७
कर्णस्यापि रथे वाहानन्यान्सूतो न्ययोजयत् ।
शङ्खवर्णान्महावेगान्सैन्धवान्साधुवाहिनः ॥ ८
लब्धलक्ष्यस्तु राधेयः पाञ्चालानां महारथान् ।
अभ्यपीडयदायस्तः शरैर्मेघ इवाचलान् ॥ ९
सा पीड्यमाना कर्णेन पाञ्चालानां महाचमूः ।
संप्राद्रवत्सुसंत्रस्ता सिंहेनेवार्दिता मृगी ॥ १०
पतितास्तुरगेभ्यश्च गजेभ्यश्च महीतले ।
रथेभ्यश्च नरास्तूर्णमदृश्यन्त ततस्ततः ॥ ११
धावमानस्य योधस्य क्षुरप्रैः स महामृधे ।
बाहू चिच्छेद वै कर्णः शिरश्चैव सकुण्डलम् ॥१२
ऊरू चिच्छेद चान्यस्य गजस्थस्य विशां पते ।
वाजिपृष्ठगतस्यापि भूमिष्ठस्य च मारिष ॥ १३
नाज्ञासिषुर्धावमाना बहवश्च महारथाः ।
संछिन्नान्यात्मगात्राणि वाहनानि च संयुगे ॥ १४
ते वध्यमानाः समरे पाञ्चालाः सृञ्जयैः सह ।
तृणप्रस्पन्दनाच्चापि सूतपुत्रं स्म मेनिरे ॥ १५
अपि स्वं समरे योधं धावमानं विचेतसः ।
कर्णमेवाभ्यमन्यन्त ततो भीता द्रवन्ति ते ॥ १६
तान्यनीकानि भग्नानि द्रवमाणानि भारत ।
अभ्यद्रवद्द्रुतं कर्णः पृष्ठतो विकिरञ्शरान् ॥ १७
अवेक्षमाणास्तेऽन्योन्यं सुसंमूढा विचेतसः ।
नाशक्नुवन्नवस्थातुं काल्यमाना महात्मना ॥ १८
कर्णेनाभ्याहता राजन्पाञ्चालाः परमेषुभिः ।
द्रोणेन च दिशः सर्वा वीक्षमाणाः प्रदुद्रुवुः ॥ १९
ततो युधिष्ठिरो राजा स्वसैन्यं प्रेक्ष्य विद्रुतम् ।
अपयाने मतिं कृत्वा फल्गुनं वाक्यमब्रवीत् ॥२०
पश्य कर्णं महेष्वासं धनुष्पाणिमवस्थितम् ।
निशीथे दारुणे काले तपन्तमिव भास्करम् ॥ २१
कर्णसायकनुन्नानां क्रोशतामेष निस्वनः ।
अनिशं श्रूयते पार्थ त्वद्बन्धूनामनाथवत् ॥ २२
यथा विसृजतश्चास्य संदधानस्य चाशुगान् ।
पश्यामि जयविक्रान्तं क्षपयिष्यति नो ध्रुवम् ॥२३
यदत्रानन्तरं कार्यं प्राप्तकालं प्रपश्यसि ।
कर्णस्य वधसंयुक्तं तत्कुरुष्व धनंजय ॥ २४
एवमुक्तो महाबाहुः पार्थः कृष्णमथाब्रवीत् ।
भीतः कुन्तीसुतो राजा राधेयस्यातिविक्रमात् ॥२५
एवं गते प्राप्तकालं कर्णानीके पुनः पुनः ।
भवान्व्यवस्यतां क्षिप्रं द्रवते हि वरूथिनी ॥ २६
द्रोणसायकनुन्नानां भग्नानां मधुसूदन ।
कर्णेन त्रास्यमानानामवस्थानं न विद्यते ॥ २७
पश्यामि च तथा कर्णं विचरन्तमभीतवत् ।
द्रवमाणान्रथोदारान्किरन्तं विशिखैः शितैः ॥ २८
नैतदस्योत्सहे सोढुं चरितं रणमूर्धनि ।
प्रत्यक्षं वृष्णिशार्दूल पादस्पर्शमिवोरगः ॥ २९
स भवानत्र यात्वाशु यत्र कर्णो महारथः ।
अहमेनं वधिष्यामि मां वैष मधुसूदन ॥ ३०

वासुदेव उवाच ।

पश्यामि कर्णं कौन्तेय देवराजमिवाहवे ।
विचरन्तं नरव्याघ्रमतिमानुषविक्रमम् ॥ ३१
नैतस्यान्योऽस्ति समरे प्रत्युद्याता धनंजय ।
ऋते त्वां पुरुषव्याघ्र राक्षसाद्वा घटोत्कचात् ॥३२
न तु तावदहं मन्ये प्राप्तकालं तवानघ ।
समागमं महाबाहो सूतपुत्रेण संयुगे ॥ ३३
दीप्यमाना महोल्केव तिष्ठत्यस्य हि वासवी ।
त्वदर्थं हि महाबाहो रौद्ररूपं बिभर्ति च ॥ ३४

घटोत्कचस्तु राधेयं प्रत्युद्यातु महाबलः ।
स हि भीमेन बलिना जातः सुरपराक्रमः ॥ ३५
तस्मिन्नस्त्राणि दिव्यानि राक्षसान्यसुराणि च ।
सततं चानुरक्तो वो हितैषी च घटोत्कचः ।
विजेष्यति रणे कर्णमिति मे नात्र संशयः ॥ ३६

संजय उवाच ।

एवमुक्त्वा महाबाहुः पार्थं पुष्करलोचनः ।
आजुहावाथ तद्रक्षः तच्चासीत्प्रादुरग्रतः ॥ ३७
कवची स शरी खड्गी सधन्वा च विशां पते ।
अभिवाद्य ततः कृष्णं पाण्डवं च धनंजयम् ।
अब्रवीत्तं तदा हृष्टस्त्वयमस्म्यनुशाधि माम् ॥ ३८
ततस्तं मेघसंकाशं दीप्तास्यं दीप्तकुण्डलम् ।
अभ्यभाषत हैडिम्बं दाशार्हः प्रहसन्निव ॥ ३९
घटोत्कच विजानीहि यत्त्वां वक्ष्यामि पुत्रक ।
प्राप्तो विक्रमकालोऽयं तव नान्यस्य कस्यचित् ॥४०
स भवान्मज्जमानानां बन्धूनां त्वं प्लवो यथा ।
विविधानि तवास्त्राणि सन्ति माया च राक्षसी॥४१
पश्य कर्णेन हैडिम्ब पाण्डवानामनीकिनी ।
काल्यमाना यथा गावः पालेन रणमूर्धनि ॥ ४२
एष कर्णो महेष्वासो मतिमान्दृढविक्रमः ।
पाण्डवानामनीकेषु निहन्ति क्षत्रियर्षभान् ॥ ४३
किरन्तः शरवर्षाणि महान्ति दृढधन्विनः ।
न शक्नुवन्त्यवस्थातुं पीड्यमानाः शरार्चिषा ॥ ४४
निशीथे सूतपुत्रेण शरवर्षेण पीडिताः ।
एते द्रवन्ति पाञ्चालाः सिंहस्येव भयान्मृगाः ॥४५
एतस्यैवं प्रवृद्धस्य सूतपुत्रस्य संयुगे ।
निषेद्धा विद्यते नान्यस्त्वदृते भीमविक्रम ॥ ४६
स त्वं कुरु महाबाहो कर्म युक्तमिहात्मनः ।
मातुलानां पितॄणां च तेजसोऽस्त्रबलस्य च ॥ ४७
एतदर्थं हि हैडिम्ब पुत्रानिच्छन्ति मानवाः ।
कथं नस्तारयेद्दुःखात्स त्वं तारय बान्धवान् ॥ ४८
तव ह्यस्त्रबलं भीमं मायाश्च तव दुस्तराः ।
संग्रामे युध्यमानस्य सततं भीमनन्दन ॥ ४९
पाण्डवानां प्रभग्नानां कर्णेन शितसायकैः ।
मज्जतां धार्तराष्ट्रेषु भव पारं परंतप ॥ ५०
रात्रौ हि राक्षसा भूयो भवन्त्यमितविक्रमाः ।
बलवन्तः सुदुर्धर्षाः शूरा विक्रान्तचारिणः ॥ ५१
जहि कर्णं महेष्वासं निशीथे मायया रणे ।
पार्था द्रोणं वधिष्यन्ति धृष्टद्युम्नपुरोगमाः ॥ ५२
केशवस्य वचः श्रुत्वा बीभत्सुरपि राक्षसम् ।
अभ्यभाषत कौरव्य घटोत्कचमरिंदमम् ॥ ५३
घटोत्कच भवांश्चैव दीर्घबाहुश्च सात्यकिः ।
मतौ मे सर्वसैन्येषु भीमसेनश्च पाण्डवः ॥ ५४
स भवान्यातु कर्णेन द्वैरथं युध्यतां निशि ।
सात्यकिः पृष्ठगोपस्ते भविष्यति महारथः ॥ ५५
जहि कर्णं रणे शूरं सात्वतेन सहायवान् ।
यथेन्द्रस्तारकं पूर्वं स्कन्देन सह जघ्निवान् ॥ ५६

घटोत्कच उवाच ।

अलमेवास्मि कर्णाय द्रोणायालं च सत्तम ।
अन्येषां क्षत्रियाणां च कृतास्त्राणां महात्मनाम् ॥
अद्य दास्यामि संग्रामं सूतपुत्राय तं निशि ।
यं जनाः संप्रवक्ष्यन्ति यावद्भूमिर्धरिष्यति ॥ ५८
न चात्र शूरान्मोक्ष्यामि न भीतान्न कृताञ्जलीन् ।
सर्वानेव वधिष्यामि राक्षसं धर्ममास्थितः ॥ ५९

संजय उवाच ।

एवमुक्त्वा महाबाहुर्हैडिम्बः परवीरहा ।
अभ्ययात्तुमुले कर्णं तव सैन्यं विभीषयन् ॥ ६०
तमापतन्तं संक्रुद्धं दीप्तास्यमिव पन्नगम् ।
अभ्यस्यन्परमेष्वासः प्रतिजग्राह सूतजः ॥ ६१
तयोः समभवद्युद्धं कर्णराक्षसयोर्निशि ।

गर्जतो राजशार्दूल शक्रप्रह्लादयोरिव ॥ ६२

इति श्रीमहाभारते द्रोणपर्वणि
अष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥

१४९

संजय उवाच।

दृष्ट्वा घटोत्कचं राजन्सूतपुत्ररथं प्रति ।
प्रयान्तं त्वरया युक्तं जिघांसुं कर्णमाहवे ॥ १
अब्रवीत्तव पुत्रस्तु दुःशासनमिदं वचः ।
एतद्रक्षो रणे तूर्णं दृष्ट्वा कर्णस्य विक्रमम् ॥ २
अभियाति द्रुतं कर्णं तद्वारय महारथम् ।
वृतः सैन्येन महता याहि यत्र महाबलः ॥ ३
कर्णो वैकर्तनो युद्धे राक्षसेन युयुत्सति ।
रक्ष कर्णं रणे यत्तो वृतः सैन्येन मानद ॥ ४
एतस्मिन्नन्तरे राजञ्जटासुरसुतो बली ।
दुर्योधनमुपागम्य प्राह प्रहरतां वरः ॥ ५
दुर्योधन तवामित्रान्प्रख्यातान्युद्धदुर्मदान् ।
पाण्डवान्हन्तुमिच्छामि त्वयाज्ञप्तः सहानुगान् ॥ ६
जटासुरो मम पिता रक्षसामग्रणीः पुरा ।
प्रयुज्य कर्म रक्षोघ्नं क्षुद्रैः पार्थैर्निपातितः ।
तस्यापचितिमिच्छामि त्वद्दिष्टो गन्तुमीश्वर ॥ ७
तमब्रवीत्ततो राजा प्रीयमाणः पुनः पुनः ।
द्रोणकर्णादिभिः सार्धं पर्याप्तोऽहं द्विषद्वधे ।
त्वं तु गच्छ मयाज्ञप्तो जहि युद्धे घटोत्कचम् ॥ ८
तथेत्युक्त्वा महाकायः समाहूय घटोत्कचम् ।
जटासुरिर्भैमसेनिं नानाशस्त्रैरवाकिरत् ॥ ९
अलंबलं च कर्णं च कुरुसैन्यं च दुस्तरम् ।
हैडिम्बः प्रममाथैको महावातोऽम्बुदानिव ॥ १०
ततो मायामयं दृष्ट्वा रथं तूर्णमलंबलः ।
घटोत्कचं शरव्रातैर्नानालिङ्गैः समार्दयत् ॥ ११
विद्ध्वा च बहुभिर्बाणैर्भैमसेनिमलंबलः ।
व्यद्रावयच्छरव्रातैः पाण्डवानामनीकिनीम् ॥ १२
तेन विद्राव्यमाणानि पाण्डुसैन्यानि मारिष ।
निशीथे विप्रकीर्यन्त वातनुन्ना घना इव ॥ १३
घटोत्कचशरैर्नुन्ना तथैव कुरुवाहिनी ।
निशीथे प्राद्रवद्राजन्नुत्सृज्योल्काः सहस्रशः ॥ १४
अलंबलस्ततः क्रुद्धो भैमसेनिं महामृधे ।
आजघ्ने निशितैर्बाणैस्तोत्त्रैरिव महाद्विपम् ॥ १५
तिलशस्तस्य तद्यानं सूतं सर्वायुधानि च ।
घटोत्कचः प्रचिच्छेद प्राणदच्चातिदारुणम् ॥ १६
ततः कर्णं शरव्रातैः कुरूनन्यान्सहस्रशः ।
अलंबलं चाभ्यवर्षन्मेघो मेरुमिवाचलम् ॥ १७
ततः संचुक्षुभे सैन्यं कुरूणां राक्षसार्दितम् ।
उपर्युपरि चान्योन्यं चतुरङ्गं ममर्द ह ॥ १८
जटासुरिर्महाराज विरथो हतसारथिः ।
घटोत्कचं रणे क्रुद्धो मुष्टिनाभ्यहनद्दृढम् ॥ १९
मुष्टिनाभिहतस्तेन प्रचचाल घटोत्कचः ।
क्षितिकम्पे यथा शैलः सवृक्षगणगुल्मवान् ॥ २०
ततः स परिघाभेन द्विट्संघघ्नेन बाहुना ।
जटासुरिं भैमसेनिरवधीन्मुष्टिना भृशम् ॥ २१
तं प्रमथ्य ततः क्रुद्धस्तूर्णं हैडिम्बिराक्षिपत् ।
दोर्भ्यामिन्द्रध्वजाभाभ्यां निष्पिपेष महीतले ॥ २२
अलंबलोऽपि विक्षिप्य समुत्क्षिप्य च राक्षसम् ।
घटोत्कचं रणे रोषान्निष्पिपेष महीतले ॥ २३
तयोः समभवद्युद्धं गर्जतोरतिकाययोः ।
घटोत्कचालंबलयोस्तुमुलं लोमहर्षणम् ॥ २४
विशेषयन्तावन्योन्यं मायाभिरतिमायिनौ ।
युयुधाते महावीर्याविन्द्रवैरोचनाविव ॥ २५
पावकाम्बुनिधी भूत्वा पुनर्गरुडतक्षकौ ।
पुनर्मेघमहावातौ पुनर्वज्रमहाचलौ ।
पुनः कुञ्जरशार्दूलौ पुनः स्वर्भानुभास्करौ ॥ २६

एवं मायाशतसृजावन्योन्यवधकाङ्क्षिणौ ।
भृशं चित्रमयुध्येतामलंबलघटोत्कचौ ॥ २७
परिघैश्च गदाभिश्च प्रासमुद्गरपट्टिशैः ।
मुसलैः पर्वताग्रैश्च तावन्योन्यं निजघ्नतुः ॥ २८
हयाभ्यां च गजाभ्यां च पदातिरथिनौ पुनः ।
युयुधाते महामायौ राक्षसप्रवरौ युधि ॥ २९
ततो घटोत्कचो राजन्नलंबलवधेप्सया ।
उत्पपात भृशं क्रुद्धः श्येनवन्निपपात ह ॥ ३०
गृहीत्वा च महाकायं राक्षसेन्द्रमलंबलम् ।
उद्यम्य न्यवधीद्भूमौ मयं विष्णुरिवाहवे ॥ ३१
ततो घटोत्कचः खड्गमुद्गृह्याद्भुतदर्शनम् ।
चकर्त कायाद्धि शिरो भीमं विकृतदर्शनम् ॥ ३२
तच्छिरो रुधिराभ्यक्तं गृह्य केशेषु राक्षसः ।
घटोत्कचो ययावाशु दुर्योधनरथं प्रति ॥ ३३
अभ्येत्य च महाबाहुः स्मयमानः स राक्षसः ।
रथेऽस्य निक्षिप्य शिरो विकृताननमूर्धजम् ।
प्राणदद्भैरवं नादं प्रावृषीव बलाहकः ॥ ३४
अब्रवीच्च ततो राजन्दुर्योधनमिदं वचः ।
एष ते निहतो बन्धुस्त्वया दृष्टोऽस्य विक्रमः ।
पुनर्द्रष्टासि कर्णस्य निष्ठामेतां तथात्मनः ॥ ३५
एवमुक्त्वा ततः प्रायात्कर्णं प्रति जनेश्वर ।
किरञ्शरशतांस्तीक्ष्णान्विमुञ्चन्कर्णमूर्धनि ॥ ३६
ततः समभवद्युद्धं घोररूपं भयानकम् ।
विस्मापनं महाराज नरराक्षसयोर्मृधे ॥ ३७

इति श्रीमहाभारते द्रोणपर्वणि
एकोनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥

१५०

धृतराष्ट्र उवाच ।
यत्र वैकर्तनः कर्णो राक्षसश्च घटोत्कचः ।
निशीथे समसज्जेतां तद्युद्धमभवत्कथम् ॥ १
कीदृशं चाभवद्युद्धं तस्य घोरस्य रक्षसः ।
रथश्च कीदृशस्तस्य मायाः सर्वायुधानि च ॥ २
किंप्रमाणा हयास्तस्य रथकेतुर्धनुस्तथा ।
कीदृशं वर्म चैवास्य कण्ठत्राणं च कीदृशम् ।
पृष्टस्त्वमेतदाचक्ष्व कुशलो ह्यसि संजय ॥ ३

संजय उवाच ।
लोहिताक्षो महाकायस्ताम्रास्यो निम्नितोदरः ।
ऊर्ध्वरोमा हरिश्मश्रुः शङ्कुकर्णो महाहनुः ॥ ४
आकर्णादारितास्यश्च तीक्ष्णदंष्ट्रः करालवान् ।
सुदीर्घताम्रजिह्वोष्ठो लम्बभ्रूः स्थूलनासिकः ॥ ५
नीलाङ्गो लोहितग्रीवो गिरिवर्ष्मा भयंकरः ।
महाकायो महाबाहुर्महाशीर्षो महाबलः ॥ ६
विकचः परुषस्पर्शो विकटोद्बद्धपिण्डिकः ।
स्थूलस्फिग्गूढनाभिश्च शिथिलोपचयो महान् ॥ ७
तथैव हस्ताभरणी महामायोऽङ्गदी तथा ।
उरसा धारयन्निष्कमग्निमालां यथाचलः ॥ ८
तस्य हेममयं चित्रं बहुरूपाङ्गशोभितम् ।
तोरणप्रतिमं शुभ्रं किरीटं मूर्ध्न्यशोभत ॥ ९
कुण्डले बालसूर्याभे मालां हेममयीं शुभाम् ।
धारयन्विपुलं कांस्यं कवचं च महाप्रभम् ॥ १०
किङ्किणीशतनिर्घोषं रक्तध्वजपताकिनम् ।
ऋक्षचर्मावनद्धाङ्गं नल्वमात्रं महारथम् ॥ ११
सर्वायुधवरोपेतमास्थितो ध्वजमालिनम् ।
अष्टचक्रसमायुक्तं मेघगम्भीरनिस्वनम् ॥ १२
तत्र मातङ्गसंकाशा लोहिताक्षा विभीषणाः ।
कामवर्णजवा युक्ता बलवन्तोऽवहन्हयाः ॥ १३
राक्षसोऽस्य विरूपाक्षः सूतो दीप्तास्यकुण्डलः ।
रश्मिभिः सूर्यरश्म्याभैः संजग्राह हयान्रणे ।
स तेन सहितस्तस्थावरुणेन यथा रविः ॥ १४
संसक्त इव चाभ्रेण यथाद्रिर्महता महान् ।

दिवस्पृक्सुमहान्केतुः स्यन्दनेऽस्य समुच्छ्रितः ।
रक्तोत्तमाङ्गः क्रव्यादो गृध्रः परमभीषणः ॥ १५
वासवाशनिनिर्घोषं दृढज्यमभिविक्षिपन् ।
व्यक्तं किष्कुपरीणाहं द्वादशारत्नि कार्मुकम् ॥ १६
रथाक्षमात्रैरिषुभिः सर्वाः प्रच्छादयन्दिशः ।
तस्यां वीरापहारिण्यां निशायां कर्णमभ्ययात् ॥१७
तस्य विक्षिपतश्चापं रथे विष्टभ्य तिष्ठतः ।
अश्रूयत धनुर्घोषो विस्फूर्जितमिवाशनेः ॥ १८
तेन वित्रास्यमानानि तव सैन्यानि भारत ।
समकम्पन्त सर्वाणि सिन्धोरिव महोर्मयः ॥ १९
तमापतन्तं संप्रेक्ष्य विरूपाक्षं विभीषणम् ।
उत्स्मयन्निव राधेयस्त्वरमाणोऽभ्यवारयत् ॥ २०
ततः कर्णोऽभ्ययादेनमस्यन्नस्यन्तमन्तिकात् ।
मातङ्ग इव मातङ्गं यूथर्षभ इवर्षभम् ॥ २१
स संनिपातस्तुमुलस्तयोरासीद्विशां पते ।
कर्णराक्षसयो राजन्निन्द्रशम्बरयोरिव ॥ २२
तौ प्रगृह्य महावेगे धनुषी भीमनिस्वने ।
प्राच्छादयेतामन्योन्यं तक्षमाणौ महेषुभिः ॥ २३
ततः पूर्णायतोत्सृष्टैः शरैः संनतपर्वभिः ।
न्यवारयेतामन्योन्यं कांस्ये निर्भिद्य वर्मणी ॥ २४
तौ नखैरिव शार्दूलौ दन्तैरिव महाद्विपौ ।
रथशक्तिभिरन्योन्यं विशिखैश्च ततक्षतुः ॥ २५
संछिन्दन्तौ हि गात्राणि संदधानौ च सायकान् ।
धक्ष्यमाणौ शरव्रातैर्नोदीक्षितुमशक्नुताम् ॥२६
तौ तु विक्षतसर्वाङ्गौ रुधिरौघपरिप्लुतौ ।
व्यभ्राजेतां यथा वारिप्रस्रुतौ गैरिकाचलौ ॥ २७
तौ शराग्रविभिन्नाङ्गौ निर्भिन्दन्तौ परस्परम् ।
नाकम्पयेतामन्योन्यं यतमानौ महाद्युती ॥ २८
तत्प्रवृत्तं निशायुद्धं चिरं सममिवाभवत् ।
प्राणयोर्दीव्यतो राजन्कर्णराक्षसयोर्मृधे ॥ २९

तस्य संदधतस्तीक्ष्णाञ्शरांश्चासक्तमस्यतः ।
धनुर्घोषेण वित्रस्ताः स्वे परे च तदाभवन् ।
घटोत्कचं यदा कर्णो विशेषयति नो नृप ॥ ३०
ततः प्रादुष्करोद्दिव्यमस्त्रमस्त्रविदां वरः ।
कर्णेन विहितं दृष्ट्वा दिव्यमस्त्रं घटोत्कचः ।
प्रादुश्चक्रे महामायां राक्षसः पाण्डुनन्दनः ॥ ३१
शूलमुद्गरधारिण्या शैलपादपहस्तया ।
रक्षसां घोररूपाणां महत्या सेनया वृतः ॥ ३२
तमुद्यतमहाचापं दृष्ट्वा ते व्यथिता नृपाः ।
भूतान्तकमिवायान्तं कालदण्डोग्रधारिणम् ॥ ३३
घटोत्कचप्रमुक्तेन सिंहनादेन भीषिताः ।
प्रसुस्रुवुर्गजा मूत्रं विव्यथुश्च नरा भृशम् ॥ ३४
ततोऽश्मवृष्टिरत्युग्रा महत्यासीत्समन्ततः ।
अर्धरात्रेऽधिकबलैर्विमुक्ता रक्षसां बलैः ॥ ३५
आयसानि च चक्राणि भुशुण्ड्यः शक्तितोमराः ।
पतन्त्यविरलाः शूलाः शतघ्न्यः पट्टिशास्तथा ॥ ३६
तदुग्रमतिरौद्रं च दृष्ट्वा युद्धं नराधिपाः ।
पुत्राश्च तव योधाश्च व्यथिता विप्रदुद्रुवुः ॥ ३७
तत्रैकोऽस्त्रबलश्लाघी कर्णो मानी न विव्यथे ।
व्यधमच्च शरैर्मायां घटोत्कचविनिर्मिताम् ॥ ३८
मायायां तु प्रहीणायाममर्षात्स घटोत्कचः ।
विससर्ज शरान्घोरान्सूतपुत्रं त आविशन् ॥ ३९
ततस्ते रुधिराभ्यक्ता भित्त्वा कर्णं महाहवे ।
विविशुर्धरणीं बाणाः संक्रुद्धा इव पन्नगाः ॥ ४०
सूतपुत्रस्तु संक्रुद्धो लघुहस्तः प्रतापवान् ।
घटोत्कचमतिक्रम्य बिभेद दशभिः शरैः ॥ ४१
घटोत्कचो विनिर्भिन्नः सूतपुत्रेण मर्मसु ।
चक्रं दिव्यं सहस्रारमगृह्णाद्व्यथितो भृशम् ॥ ४२
क्षुरान्तं बालसूर्याभं मणिरत्नविभूषितम् ।
चिक्षेपाधिरथेः क्रुद्धो भैमसेनिर्जिघांसया ॥ ४३

प्रविद्धमतिवेगेन विक्षिप्तं कर्णसायकैः ।
अभाग्यस्येव संकल्पस्तन्मोघमपतद्भुवि ॥ ४४
घटोत्कचस्तु संक्रुद्धो दृष्ट्वा चक्रं निपातितम् ।
कर्णं प्राच्छादयद्बाणैः स्वर्भानुरिव भास्करम् ॥ ४५
सूतपुत्रस्त्वसंभ्रान्तो रुद्रोपेन्द्रेन्द्रविक्रमः ।
घटोत्कचरथं तूर्णं छादयामास पत्रिभिः ॥ ४६
घटोत्कचेन क्रुद्धेन गदा हेमाङ्गदा तदा ।
क्षिप्ता भ्राम्य शरैः सापि कर्णेनाभ्याहतापतत् ॥४७
ततोऽन्तरिक्षमुत्पत्य कालमेघ इवोन्नदन् ।
प्रववर्ष महाकायो द्रुमवर्षं नभस्तलात् ॥ ४८
ततो मायाविनं कर्णो भीमसेनसुतं दिवि ।
मार्गणैरभिविव्याध घनं सूर्य इवांशुभिः ॥ ४९
तस्य सर्वान्हयान्हत्वा संछिद्य शतधा रथम् ।
अभ्यवर्षच्छरैः कर्णः पर्जन्य इव वृष्टिमान् ॥ ५०
न चास्यासीदनिर्भिन्नं गात्रे द्व्यङ्गुलमन्तरम् ।
सोऽदृश्यत मुहूर्तेन श्वाविच्छललितो यथा ॥ ५१
न हयान्न रथं तस्य न ध्वजं न घटोत्कचम् ।
दृष्टवन्तः स्म समरे शरौघैरभिसंवृतम् ॥ ५२
स तु कर्णस्य तद्दिव्यमस्त्रमस्त्रेण शातयन् ।
मायायुद्धेन मायावी सूतपुत्रमयोधयत् ॥ ५३
सोऽयोधयत्तदा कर्णं मायया लाघवेन च ।
अलक्ष्यमाणोऽथ दिवि शरजालेषु संपतन् ॥ ५४
भैमसेनिर्महामायो मायया कुरुसत्तम ।
प्रचकार महामायां मोहयन्निव भारत ॥ ५५
स स्म कृत्वा विरूपाणि वदनान्यशुभाननः ।
अग्रसत्सूतपुत्रस्य दिव्यान्यस्त्राणि मायया ॥ ५६
पुनश्चापि महाकायः संछिन्नः शतधा रणे ।
गतसत्त्वो निरुत्साहः पतितः खाद्व्यदृश्यत ।
हतं तं मन्यमानाः स्म प्राणदन्कुरुपुंगवाः ॥ ५७
अथ देहैर्नवैरन्यैर्दिक्षु सर्वास्वदृश्यत ।
पुनश्चापि महाकायः शतशीर्षः शतोदरः ॥ ५८
व्यदृश्यत महाबाहुर्मैनाक इव पर्वतः ।
अङ्गुष्ठमात्रो भूत्वा च पुनरेव स राक्षसः ।
सागरोर्मिरिवोद्धूतस्तिर्यगूर्ध्वमवर्तत ॥ ५९
वसुधां दारयित्वा च पुनरप्सु न्यमज्जत ।
अदृश्यत तदा तत्र पुनरुन्मज्जितोऽन्यतः ॥ ६०
सोऽवतीर्य पुनस्तस्थौ रथे हेमपरिष्कृते ।
क्षितिं द्यां च दिशश्चैव माययावृत्य दंशितः ॥ ६१
गत्वा कर्णरथाभ्याशं विचलत्कुण्डलाननः ।
प्राह वाक्यमसंभ्रान्तः सूतपुत्रं विशां पते ॥ ६२
तिष्ठेदानीं न मे जीवन्सूतपुत्र गमिष्यसि ।
युद्धश्रद्धामहं तेऽद्य विनेष्यामि रणाजिरे ॥ ६३
इत्युक्त्वा रोषताम्राक्षं रक्षः क्रूरपराक्रमम् ।
उत्पपातान्तरिक्षं च जहास च सुविस्वरम् ।
कर्णमभ्याहनच्चैव गजेन्द्रमिव केसरी ॥ ६४
रथाक्षमात्रैरिषुभिरभ्यवर्षद्घटोत्कचः ।
रथिनामृषभं कर्णं धाराभिरिव तोयदः ।
शरवृष्टिं च तां कर्णो दूरप्राप्तामशातयत् ॥ ६५
दृष्ट्वा च विहतां मायां कर्णेन भरतर्षभ ।
घटोत्कचस्ततो मायां ससर्जान्तर्हितः पुनः ॥ ६६
सोऽभवद्गिरिरत्युच्चः शिखरैस्तरुसंकटैः ।
शूलप्रासासिमुसलजलप्रस्रवणो महान् ॥ ६७
तमञ्जनचयप्रख्यं कर्णो दृष्ट्वा महीधरम् ।
प्रपातैरायुधान्युग्राण्युद्वहन्तं न चुक्षुभे ॥ ६८
स्मयन्निव ततः कर्णो दिव्यमस्त्रमुदीरयत् ।
ततः सोऽस्त्रेण शैलेन्द्रो विक्षिप्तो वै व्यनश्यत ॥
ततः स तोयदो भूत्वा नीलः सेन्द्रायुधो दिवि ।
अश्मवृष्टिभिरत्युग्रः सूतपुत्रमवाकिरत् ॥ ७०
अथ संधाय वायव्यमस्त्रमस्त्रविदां वरः ।
व्यधमत्कालमेघं तं कर्णो वैकर्तनो वृषा ॥ ७१

स मार्गणगणैः कर्णो दिशः प्रच्छाद्य सर्वशः ।
जघानास्त्रं महाराज घटोत्कचसमीरितम् ॥ ७२
ततः प्रहस्य समरे भैमसेनिर्महाबलः ।
प्रादुश्चक्रे महामायां कर्णं प्रति महारथम् ॥ ७३
स दृष्ट्वा पुनरायान्तं रथेन रथिनां वरम् ।
घटोत्कचमसंभ्रान्तं राक्षसैर्बहुभिर्वृतम् ॥ ७४
सिंहशार्दूलसदृशैर्मत्तद्विरदविक्रमैः ।
गजस्थैश्च रथस्थैश्च वाजिपृष्ठगतैस्तथा ॥ ७५
नानाशस्त्रधरैर्घोरैर्नानाकवचभूषणैः ।
वृतं घटोत्कचं क्रूरैर्मरुद्भिरिव वासवम् ।
दृष्ट्वा कर्णो महेष्वासो योधयामास राक्षसम् ॥७६
घटोत्कचस्ततः कर्णं विद्ध्वा पञ्चभिराशुगैः ।
ननाद भैरवं नादं भीषयन्सर्वपार्थिवान् ॥ ७७
भूयश्चाञ्जलिकेनाथ समार्गणगणं महत् ।
कर्णहस्तस्थितं चापं चिच्छेदाशु घटोत्कचः ॥ ७८
अथान्यद्धनुरादाय दृढं भारसहं महत् ।
व्यकर्षत बलात्कर्ण इन्द्रायुधमिवोच्छ्रितम् ॥ ७९
ततः कर्णो महाराज प्रेषयामास सायकान् ।
सुवर्णपुङ्खाञ्शत्रुघ्नान्खचरान्राक्षसान्प्रति ॥ ८०
तद्बाणैरर्दितं यूथं रक्षसां पीनवक्षसाम् ।
सिंहेनेवार्दितं वन्यं गजानामाकुलं कुलम् ॥ ८१
विधम्य राक्षसान्बाणैः साश्वसूतगजान्विभुः ।
ददाह भगवान्वह्निर्भूतानीव युगक्षये ॥ ८२
स हत्वा राक्षसीं सेनां शुशुभे सूतनन्दनः ।
पुरेव त्रिपुरं दग्ध्वा दिवि देवो महेश्वरः ॥ ८३
तेषु राजसहस्रेषु पाण्डवेयेषु मारिष ।
नैनं निरीक्षितुमपि कश्चिच्छक्नोति पार्थिव ॥ ८४
ऋते घटोत्कचाद्राजन्राक्षसेन्द्रान्महाबलात् ।
भीमवीर्यबलोपेतात्क्रुद्धाद्वैवस्वतादिव ॥ ८५
तस्य क्रुद्धस्य नेत्राभ्यां पावकः समजायत ।
महोल्काभ्यां यथा राजन्सार्चिषः स्नेहबिन्दवः ॥
तलं तलेन संहत्य संदश्य दशनच्छदम् ।
रथमास्थाय च पुनर्मायया निर्मितं पुनः ॥ ८७
युक्तं गजनिभैर्वाहैः पिशाचवदनैः खरैः ।
स सूतमब्रवीत्क्रुद्धः सूतपुत्राय मा वह ॥ ८८
स ययौ घोररूपेण रथेन रथिनां वरः ।
द्वैरथं सूतपुत्रेण पुनरेव विशां पते ॥ ८९
स चिक्षेप पुनः क्रुद्धः सूतपुत्राय राक्षसः ।
अष्टचक्रां महाघोरामशनिं रुद्रनिर्मिताम् ॥ ९०
तामवप्लुत्य जग्राह कर्णो न्यस्य रथे धनुः ।
चिक्षेप चैनां तस्यैव स्यन्दनात्सोऽवपुप्लुवे ॥ ९१
साश्वसूतध्वजं यानं भस्म कृत्वा महाप्रभा ।
विवेश वसुधां भित्त्वा सुरास्तत्र विसिस्मियुः ॥९२
कर्णं तु सर्वभूतानि पूजयामासुरञ्जसा ।
यदवप्लुत्य जग्राह देवसृष्टां महाशनिम् ॥ ९३
एवं कृत्वा रणे कर्ण आरुरोह रथं पुनः ।
ततो मुमोच नाराचान्सूतपुत्रः परंतपः ॥ ९४
अशक्यं कर्तुमन्येन सर्वभूतेषु मानद ।
यदकार्षीत्तदा कर्णः संग्रामे भीमदर्शने ॥ ९५
स हन्यमानो नाराचैर्धाराभिरिव पर्वतः ।
गन्धर्वनगराकारः पुनरन्तरधीयत ॥ ९६
एवं स वै महामायो मायया लाघवेन च ।
अस्त्राणि तानि दिव्यानि जघान रिपुसूदनः ॥९७
निहन्यमानेष्वस्त्रेषु मायया तेन रक्षसा ।
असंभ्रान्तस्ततः कर्णस्तद्रक्षः प्रत्ययुध्यत ॥ ९८
ततः क्रुद्धो महाराज भैमसेनिर्महाबलः ।
चकार बहुधात्मानं भीषयाणो नराधिपान् ॥ ९९
ततो दिग्भ्यः समापेतुः सिंहव्याघ्रतरक्षवः ।
अग्निजिह्वाश्च भुजगा विहगाश्चाप्ययोमुखाः ॥१००
स कीर्यमाणो निशितैः कर्णचापच्युतैः शरैः ।

नगराद्रिवनप्रख्यस्तत्रैवान्तरधीयत ॥ १०१
राक्षसाश्च पिशाचाश्च यातुधानाः शलावृकाः ।
ते कर्णं भक्षयिष्यन्तः सर्वतः समुपाद्रवन् ।
अथैनं वाग्भिरुग्राभिस्त्रासयांचक्रिरे तदा ॥ १०२
उद्यतैर्बहुभिर्घोरैरायुधैः शोणितोक्षितैः ।
तेषामनेकैरेकैकं कर्णो विव्याध चाशुगैः ॥ १०३
प्रतिहत्य तु तां मायां दिव्येनास्त्रेण राक्षसीम् ।
आजघान हयानस्य शरैः संनतपर्वभिः ॥ १०४
ते भग्ना विकृताङ्गाश्च छिन्नपृष्ठाश्च सायकैः ।
वसुधामन्वपद्यन्त पश्यतस्तस्य रक्षसः ॥ १०५
स भग्नमायो हैडिम्बः कर्णं वैकर्तनं ततः ।
एष ते विदधे मृत्युमित्युक्त्वान्तरधीयत ॥ १०६

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥

१५१

संजय उवाच ।

तस्मिंस्तथा वर्तमाने कर्णराक्षसयोर्मृधे ।
अलायुधो राक्षसेन्द्रो वीर्यवानभ्यवर्तत ॥ १
महत्या सेनया युक्तः सुयोधनमुपागमत् ।
राक्षसानां विरूपाणां सहस्रैः परिवारितः ।
नानारूपधरैर्वीरैः पूर्ववैरमनुस्मरन् ॥ २
तस्य ज्ञातिर्हि विक्रान्तो ब्राह्मणादो बको हतः ।
किर्मीरश्च महातेजा हिडिम्बश्च सखा तथा ॥ ३
स दीर्घकालाध्युषितं पूर्ववैरमनुस्मरन् ।
विज्ञायैतन्निशायुद्धं जिघांसुर्भीममाहवे ॥ ४
स मत्त इव मातङ्गः संक्रुद्ध इव चोरगः ।
दुर्योधनमिदं वाक्यमब्रवीद्युद्धलालसः ॥ ५
विदितं ते महाराज यथा भीमेन राक्षसाः ।
हिडिम्बबककिर्मीरा निहता मम बान्धवाः ॥ ६
परामर्शश्च कन्याया हिडिम्बायाः कृतः पुरा ।
किमन्यद्राक्षसानन्यानस्मांश्च परिभूय ह ॥ ७
तमहं सगणं राजन्सवाजिरथकुञ्जरम् ।
हैडिम्बं च सहामात्यं हन्तुमभ्यागतः स्वयम् ॥ ८
अद्य कुन्तीसुतान्सर्वान्वासुदेवपुरोगमान् ।
हत्वा संभक्षयिष्यामि सर्वैरनुचरैः सह ।
निवारय बलं सर्वं वयं योत्स्याम पाण्डवान् ॥ ९
तस्य तद्वचनं श्रुत्वा हृष्टो दुर्योधनस्तदा ।
प्रतिपूज्याब्रवीद्वाक्यं भ्रातृभिः परिवारितः ॥ १०
त्वां पुरस्कृत्य सगणं वयं योत्स्यामहे परान् ।
न हि वैरान्तमनसः स्थास्यन्ति मम सैनिकाः ॥ ११
एवमस्त्विति राजानमुक्त्वा राक्षसपुंगवः ।
अभ्ययात्त्वरितो भीमं सहितः पुरुषाशनैः ॥ १२
दीप्यमानेन वपुषा रथेनादित्यवर्चसा ।
तादृशेनैव राजेन्द्र यादृशेन घटोत्कचः ॥ १३
तस्याप्यतुलनिर्घोषो बहुतोरणचित्रितः ।
ऋक्षचर्मावनद्धाङ्गो नल्वमात्रो महारथः ॥ १४
तस्यापि तुरगाः शीघ्रा हस्तिकायाः खरस्वनाः ।
शतं युक्ता महाकाया मांसशोणितभोजनाः ॥ १५
तस्यापि रथनिर्घोषो महामेघरवोपमः ।
तस्यापि सुमहच्चापं दृढज्यं बलवत्तरम् ॥ १६
तस्याप्यक्षसमा बाणा रुक्मपुङ्खाः शिलाशिताः ।
सोऽपि वीरो महाबाहुर्यथैव स घटोत्कचः ॥ १७
तस्यापि गोमायुबडाभिगुप्तो
बभूव केतुर्ज्वलनार्कतुल्यः ।
स चापि रूपेण घटोत्कचस्य
श्रीमत्तमो व्याकुलदीपितास्यः ॥ १८
दीप्ताङ्गदो दीप्तकिरीटमाली
बद्धस्रगुष्णीषनिबद्धखड्गः ।
गदी भुशुण्डी मुसली हली च
शरासनी वारणतुल्यवर्ष्मा ॥ १९

रथेन तेनानलवर्चसा च
विद्रावयन्पाण्डववाहिनीं ताम् ।
रराज संख्ये परिवर्तमानो
विद्युन्माली मेघ इवान्तरिक्षे ॥ २०
ते चापि सर्वे प्रवरा नरेन्द्रा
महाबला वर्मिणश्चर्मिणश्च ।
हर्षान्विता युयुधुस्तत्र राज-
न्समन्ततः पाण्डवयोधवीराः ॥ २१

इति श्रीमहाभारते द्रोणपर्वणि
एकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥

१५२

संजय उवाच ।

तमागतमभिप्रेक्ष्य भीमकर्माणमाहवे ।
हर्षमाहारयांचक्रुः कुरवः सर्व एव ते ॥ १
तथैव तव पुत्रास्ते दुर्योधनपुरोगमाः ।
अप्लवाः प्लवमासाद्य तर्तुकामा इवार्णवम् ॥ २
पुनर्जातमिवात्मानं मन्वानाः पार्थिवास्तदा ।
अलायुधं राक्षसेन्द्रं स्वागतेनाभ्यपूजयन् ॥ ३
तस्मिंस्त्वमानुषे युद्धे वर्तमाने भयावहे ।
कर्णराक्षसयोर्नक्तं दारुणप्रतिदर्शने ॥ ४
उपप्रैक्षन्त पाञ्चालाः स्मयमानाः सराजकाः ।
तथैव तावका राजन्घूर्णमानास्ततस्ततः ॥ ५
चुक्रुशुर्नेदमस्तीति द्रोणद्रौणिकृपादयः ।
तत्कर्म दृष्ट्वा संभ्रान्ता हैडिम्बस्य रणाजिरे ॥ ६
सर्वमाविग्नमभवद्धाहाभूतमचेतनम् ।
तव सैन्यं महाराज निराशं कर्णजीविते ॥ ७
दुर्योधनस्तु संप्रेक्ष्य कर्णमार्तिं परां गतम् ।
अलायुधं राक्षसेन्द्रमाहूयेदमथाब्रवीत् ॥ ८
एष वैकर्तनः कर्णो हैडिम्बेन समागतः ।
कुरुते कर्म सुमहद्यदस्यौपयिकं मृधे ॥ ९
पश्यैतान्पार्थिवाञ्शूरान्निहतान्भैमसेनिना ।
नानाशस्त्रैरभिहतान्पादपानिव दन्तिना ॥ १०
तवैष भागः समरे राजमध्ये मया कृतः ।
तवैवानुमते वीर तं विक्रम्य निबर्हय ॥ ११
पुरा वैकर्तनं कर्णमेष पापो घटोत्कचः ।
मायाबलमुपाश्रित्य कर्शयत्यरिकर्शनः ॥ १२
एवमुक्तः स राज्ञा तु राक्षसस्तीव्रविक्रमः ।
तथेत्युक्त्वा महाबाहुर्घटोत्कचमुपाद्रवत् ॥ १३
ततः कर्णं समुत्सृज्य भैमसेनिरपि प्रभो ।
प्रत्यमित्रमुपायान्तं मर्दयामास मार्गणैः ॥ १४
तयोः समभवद्युद्धं क्रुद्धयो राक्षसेन्द्रयोः ।
मत्तयोर्वाशिताहेतोर्द्विपयोरिव कानने ॥ १५
रक्षसा विप्रमुक्तस्तु कर्णोऽपि रथिनां वरः ।
अभ्यद्रवद्भीमसेनं रथेनादित्यवर्चसा ॥ १६
तमायान्तमनादृत्य दृष्ट्वा ग्रस्तं घटोत्कचम् ।
अलायुधेन समरे सिंहेनेव गवां पतिम् ॥ १७
रथेनादित्यवपुषा भीमः प्रहरतां वरः ।
किरञ्शरौघान्प्रययावलायुधरथं प्रति ॥ १८
तमायान्तमभिप्रेक्ष्य स तदालायुधः प्रभो ।
घटोत्कचं समुत्सृज्य भीमसेनं समाह्वयत् ॥ १९
तं भीमः सहसाभ्येत्य राक्षसान्तकरः प्रभो ।
सगणं राक्षसेन्द्रं तं शरवर्षैरवाकिरत् ॥ २०
तथैवालायुधो राजञ्शिलाधौतैरजिह्मगैः ।
अभ्यवर्षत कौन्तेयं पुनः पुनररिंदमः ॥ २१
तथा ते राक्षसाः सर्वे भीमसेनमुपाद्रवन् ।
नानाप्रहरणा भीमास्त्वत्सुतानां जयैषिणः ॥ २२
स ताड्यमानो बलिभिर्भीमसेनो महाबलः ।
पञ्चभिः पञ्चभिः सर्वांस्तानविध्यच्छितैः शरैः ॥ २३
ते वध्यमाना भीमेन राक्षसाः खरयोनयः ।
विनेदुस्तुमुलान्नादान्दुद्रुवुश्च दिशो दश ॥ २४

तांस्त्रास्यमानान्भीमेन दृष्ट्वा रक्षो महाबलम् ।
अभिदुद्राव वेगेन शरैश्चैनमवाकिरत् ॥ २५
तं भीमसेनः समरे तीक्ष्णाग्रैरक्षिणोच्छरैः ।
अलायुधस्तु तानस्तान्भीमेन विशिखान्रणे ।
चिच्छेद कांश्चित्समरे त्वरया कांश्चिदग्रहीत् ॥ २६
स तं दृष्ट्वा राक्षसेन्द्रं भीमो भीमपराक्रमः ।
गदां चिक्षेप वेगेन वज्रपातोपमां तदा ॥ २७
तामापतन्तीं वेगेन गदां ज्वालाकुलां ततः ।
गदया ताडयामास सा गदा भीममाव्रजत् ॥ २८
स राक्षसेन्द्रं कौन्तेयः शरवर्षैरवाकिरत् ।
तानप्यस्याकरोन्मोघान्राक्षसो निशितैः शरैः ॥ २९
ते चापि राक्षसाः सर्वे सैनिका भीमरूपिणः ।
शासनाद्राक्षसेन्द्रस्य निजघ्नू रथकुञ्जरान् ॥ ३०
पाञ्चालाः सृञ्जयाश्चैव वाजिनः परमद्विपाः ।
न शान्तिं लेभिरे तत्र राक्षसैर्भृशपीडिताः ॥ ३१
तं तु दृष्ट्वा महाघोरं वर्तमानं महाहवे ।
अब्रवीत्पुरुषश्रेष्ठो धनंजयमिदं वचः ॥ ३२
पश्य भीमं महाबाहो राक्षसेन्द्रवशं गतम् ।
पदवीमस्य गच्छ त्वं मा विचारय पाण्डव ॥ ३३
धृष्टद्युम्नः शिखण्डी च युधामन्यूत्तमौजसौ ।
सहिता द्रौपदेयाश्च कर्णं यान्तु महारथाः ॥ ३४
नकुलः सहदेवश्च युयुधानश्च वीर्यवान् ।
इतरान्राक्षसान्घ्नन्तु शासनात्तव पाण्डव ॥ ३५
त्वमपीमां महाबाहो चमूं द्रोणपुरस्कृताम् ।
वारयस्व नरव्याघ्र महद्धि भयमागतम् ॥ ३६
एवमुक्ते तु कृष्णेन यथोद्दिष्टा महारथाः ।
जग्मुर्वैकर्तनं कर्णं राक्षसांश्चेतरान्रणे ॥ ३७
अथ पूर्णायतोत्सृष्टैः शरैराशीविषोपमैः ।
धनुश्चिच्छेद भीमस्य राक्षसेन्द्रः प्रतापवान् ॥ ३८
हयांश्चास्य शितैर्बाणैः सारथिं च महाबलः ।
जघान मिषतः संख्ये भीमसेनस्य भारत ॥ ३९
सोऽवतीर्य रथोपस्थाद्धताश्वो हतसारथिः ।
तस्मै गुर्वीं गदां घोरां स विनद्योत्ससर्ज ह ॥ ४०
ततस्तां भीमनिर्घोषामापतन्तीं महागदाम् ।
गदया राक्षसो घोरो निजघान ननाद च ॥ ४१
तद्दृष्ट्वा राक्षसेन्द्रस्य घोरं कर्म भयावहम् ।
भीमसेनः प्रहृष्टात्मा गदामाशु परामृशत् ॥ ४२
तयोः समभवद्युद्धं तुमुलं नरराक्षसोः ।
गदानिपातसंह्रादैर्भुवं कम्पयतोर्भृशम् ॥ ४३
गदाविमुक्तौ तौ भूयः समासाद्येतरेतरम् ।
मुष्टिभिर्वज्रसंह्रादैरन्योन्यमभिजघ्नतुः ॥ ४४
रथचक्रैर्युगैरक्षैरधिष्ठानैरुपस्करैः ।
यथासन्नमुपादाय निजघ्नतुरमर्षणौ ॥ ४५
तौ विक्षरन्तौ रुधिरं समासाद्येतरेतरम् ।
मत्ताविव महानागावकृष्येतां पुनः पुनः ॥ ४६
तमपश्यद्धृषीकेशः पाण्डवानां हिते रतः ।
स भीमसेनरक्षार्थं हैडिम्बं प्रत्यचोदयत् ॥ ४७

इति श्रीमहाभारते द्रोणपर्वणि
द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥

१५३

संजय उवाच ।

संप्रेक्ष्य समरे भीमं रक्षसा ग्रस्तमन्तिकात् ।
वासुदेवोऽब्रवीद्वाक्यं घटोत्कचमिदं तदा ॥ १
पश्य भीमं महाबाहो रक्षसा ग्रस्तमन्तिकात् ।
पश्यतां सर्वसैन्यानां तव चैव महाद्युते ॥ २
स कर्णं त्वं समुत्सृज्य राक्षसेन्द्रमलायुधम् ।
जहि क्षिप्रं महाबाहो पश्चात्कर्णं वधिष्यसि ॥ ३
स वार्ष्णेयवचः श्रुत्वा कर्णमुत्सृज्य वीर्यवान् ।
युयुधे राक्षसेन्द्रेण बकभ्रात्रा घटोत्कचः ।
तयोः सुतुमुलं युद्धं बभूव निशि रक्षसोः ॥ ४

अलायुधस्य योधांस्तु राक्षसान्भीमदर्शनान् ।
वेगेनापततः शूरान्प्रगृहीतशरासनान् ॥ ५
आत्तायुधः सुसंक्रुद्धो युयुधानो महारथः ।
नकुलः सहदेवश्च चिच्छिदुर्निशितैः शरैः ॥ ६
सर्वांश्च समरे राजन्किरीटी क्षत्रियर्षभान् ।
परिचिक्षेप बीभत्सुः सर्वतः प्रक्षिपञ्शरान् ॥ ७
कर्णश्च समरे राजन्व्यद्रावयत पार्थिवान् ।
धृष्टद्युम्नशिखण्ड्यादीन्पाञ्चालानां महारथान् ॥ ८
तान्वध्यमानान्दृष्ट्वा तु भीमो भीमपराक्रमः ।
अभ्ययात्त्वरितः कर्णं विशिखान्विकिरन्रणे ॥ ९
ततस्तेऽप्याययुर्हत्वा राक्षसान्यत्र सूतजः ।
नकुलः सहदेवश्च सात्यकिश्च महारथः ।
ते कर्णं योधयामासुः पाञ्चाला द्रोणमेव च ॥ १०
अलायुधस्तु संक्रुद्धो घटोत्कचमरिंदमम् ।
परिघेणातिकायेन ताडयामास मूर्धनि ॥ ११
स तु तेन प्रहारेण भैमसेनिर्महाबलः ।
ईषन्मूर्छान्वितोऽऽत्मानं संस्तम्भयत वीर्यवान् ॥
ततो दीप्ताग्निसंकाशां शतघण्टामलंकृताम् ।
चिक्षेप समरे तस्मै गदां काञ्चनभूषणाम् ॥ १३
सा हयान्सारथिं चैव रथं चास्य महास्वना ।
चूर्णयामास वेगेन विसृष्टा भीमकर्मणा ॥ १४
स भग्नहयचक्राक्षो विशीर्णध्वजकूबरः ।
उत्पपात रथात्तूर्णं मायामास्थाय राक्षसीम् ॥ १५
स समास्थाय मायां तु ववर्ष रुधिरं बहु ।
विद्युद्विभ्राजितं चासीत्तिमिराभ्राकुलं नभः ॥ १६
ततो वज्रनिपाताश्च साशनिस्तनयित्नवः ।
महांश्चटचटाशब्दस्तत्रासीद्धि महाहवे ॥ १७
तां प्रेक्ष्य विहितां मायां राक्षसो राक्षसेन तु ।
ऊर्ध्वमुत्पत्य हैडिम्बस्तां मायां माययावधीत् ॥१८
सोऽभिवीक्ष्य हतां मायां मायावी माययैव हि ।
अश्मवर्षं सुतुमुलं विससर्ज घटोत्कचे ॥ १९
अश्मवर्षं स तद्घोरं शरवर्षेण वीर्यवान् ।
दिशो विध्वंसयामास तदद्भुतमिवाभवत् ॥ २०
ततो नानाप्रहरणैरन्योन्यमभिवर्षताम् ।
आयसैः परिघैः शूलैर्गदामुसलमुद्गरैः ॥ २१
पिनाकैः करवालैश्च तोमरप्रासकम्पनैः ।
नाराचैर्निशितैर्भल्लैः शरैश्चक्रैः परश्वधैः ॥ २२
अयोगुडैर्भिण्डिपालैर्गोशीर्षोलूखलैरपि ।
उत्पाट्य च महाशाखैर्विविधैर्जगतीरुहैः ॥ २३
शमीपीलुकरीरैश्च शम्याकैश्चैव भारत ।
इङ्गुदैर्बदरीभिश्च कोविदारैश्च पुष्पितैः ॥ २४
पलाशैररिमेदैश्च प्लक्षन्यग्रोधपिप्पलैः ।
महद्भिः समरे तस्मिन्नन्योन्यमभिजघ्नतुः ॥ २५
विविधैः पर्वताग्रैश्च नानाधातुभिराचितैः ।
तेषां शब्दो महानासीद्वज्राणां भिद्यतामिव ॥ २६
युद्धं तदभवद्घोरं भैम्यलायुधयोर्नृप ।
हरीन्द्रयोर्यथा राजन्वालिसुग्रीवयोः पुरा ॥ २७
तौ युद्ध्वा विविधैर्घोरैरायुधैर्विशिखैस्तथा ।
प्रगृह्य निशितौ खड्गावन्योन्यमभिजघ्नतुः ॥ २८
तावन्योन्यमभिद्रुत्य केशेषु सुमहाबलौ ।
भुजाभ्यां पर्यगृह्णीतां महाकायौ महाबलौ ॥ २९
तौ भिन्नगात्रौ प्रस्वेदं सुस्रुवाते जनाधिप ।
रुधिरं च महाकायावभिवृष्टाविवाचलौ ॥ ३०
अथाभिपत्य वेगेन समुद्भ्राम्य च राक्षसम् ।
बलेनाक्षिप्य हैडिम्बश्चकर्तास्य शिरो महत् ॥ ३१
सोऽपहृत्य शिरस्तस्य कुण्डलाभ्यां विभूषितम् ।
तदा सुतुमुलं नादं ननाद सुमहाबलः ॥ ३२
हतं दृष्ट्वा महाकायं बकज्ञातिमरिंदमम् ।
पाञ्चालाः पाण्डवाश्चैव सिंहनादान्विनेदिरे ॥ ३३
ततो भेरीसहस्राणि शङ्खानामयुतानि च ।

अवादयन्पाण्डवेयास्तस्मिन्रक्षसि पातिते ॥ ३४
अतीव सा निशा तेषां बभूव विजयावहा ।
विद्योतमाना विबभौ समन्ताद्दीपमालिनी ॥ ३५
अलायुधस्य तु शिरो भैमसेनिर्महाबलः ।
दुर्योधनस्य प्रमुखे चिक्षेप गतचेतनम् ॥ ३६
अथ दुर्योधनो राजा दृष्ट्वा हतमलायुधम् ।
बभूव परमोद्विग्नः सह सैन्येन भारत ॥ ३७
तेन ह्यस्य प्रतिज्ञातं भीमसेनमहं युधि ।
हन्तेति स्वयमागम्य स्मरता वैरमुत्तमम् ॥ ३८
ध्रुवं स तेन हन्तव्य इत्यमन्यत पार्थिवः ।
जीवितं चिरकालाय भ्रातृणां चाप्यमन्यत ॥ ३९
स तं दृष्ट्वा विनिहतं भीमसेनात्मजेन वै ।
प्रतिज्ञां भीमसेनस्य पूर्णामेवाभ्यमन्यत ॥ ४०

इति श्रीमहाभारते द्रोणपर्वणि
त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३ ॥

१५४

संजय उवाच ।

निहत्यालायुधं रक्षः प्रहृष्टात्मा घटोत्कचः ।
ननाद विविधान्नादान्वाहिन्याः प्रमुखे स्थितः ॥ १
तस्य तं तुमुलं शब्दं श्रुत्वा कुञ्जरकम्पनम् ।
तावकानां महाराज भयमासीत्सुदारुणम् ॥ २
अलायुधविषक्तं तु भैमसेनिं महाबलम् ।
दृष्ट्वा कर्णो महाबाहुः पाञ्चालान्समुपाद्रवत् ॥ ३
दशभिर्दशभिर्बाणैर्धृष्टद्युम्नशिखण्डिनौ ।
दृढैः पूर्णायतोत्सृष्टैर्बिभेद नतपर्वभिः ॥ ४
ततः परमनाराचैर्युधामन्यूत्तमौजसौ ।
सात्यकिं च रथोदारं कम्पयामास मार्गणैः ॥ ५
तेषामभ्यस्यतां तत्र सर्वेषां सव्यदक्षिणम् ।
मण्डलान्येव चापानि व्यदृश्यन्त जनाधिप ॥ ६
तेषां ज्यातलनिर्घोषो रथनेमिस्वनश्च ह ।
मेघानामिव घर्मान्ते बभूव तुमुलो निशि ॥ ७
ज्यानेमिघोषस्तनयित्नुमान्वै
धनुस्तडिन्मण्डलकेतुशृङ्गः ।
शरौघवर्षाकुलवृष्टिमांश्च
संग्राममेघः स बभूव राजन् ॥ ८
तदुद्धतं शैल इवाप्रकम्प्यो
वर्षं महच्छैलसमानसारः ।
विध्वंसयामास रणे नरेन्द्र
वैकर्तनः शत्रुगणावमर्दी ॥ ९
ततोऽतुलैर्वज्रनिपातकल्पैः
शितैः शरैः काञ्चनचित्रपुङ्खैः ।
शत्रून्व्यपोहत्समरे महात्मा
वैकर्तनः पुत्रहिते रतस्ते ॥ १०
संछिन्नभिन्नध्वजिनश्च केचि-
त्केचिच्छरैरर्दितभिन्नदेहाः ।
केचिद्विसूता विहयाश्च केचि-
द्वैकर्तनेनाशु कृता बभूवुः ॥ ११
अविन्दमानास्त्वथ शर्म संख्ये
यौधिष्ठिरं ते बलमन्वपद्यन् ।
तान्प्रेक्ष्य भग्नान्विमुखीकृतांश्च
घटोत्कचो रोषमतीव चक्रे ॥ १२
आस्थाय तं काञ्चनरत्नचित्रं
रथोत्तमं सिंह इवोन्ननाद ।
वैकर्तनं कर्णमुपेत्य चापि
विव्याध वज्रप्रतिमैः पृषत्कैः ॥ १३
तौ कर्णिनाराचशिलीमुखैश्च
नालीकदण्डैश्च सवत्सदन्तैः ।
वराहकर्णैः सविषाणशृङ्गैः
क्षुरप्रवर्षैश्च विनेदतुः खम् ॥ १४
तद्बाणधारावृतमन्तरिक्षं

तिर्यग्गताभिः समरे रराज ।
सुवर्णपुङ्खज्वलितप्रभाभि-
र्विचित्रपुष्पाभिरिव स्रजाभिः ॥ १५
समं हि तावप्रतिमप्रभावा-
वन्योन्यमाजघ्नतुरुत्तमास्त्रैः ।
तयोर्हि वीरोत्तमयोर्न कश्चि-
द्ददर्श तस्मिन्समरे विशेषम् ॥ १६
अतीव तच्चित्रमतीव रूपं
बभूव युद्धं रविभीमसून्वोः ।
समाकुलं शस्त्रनिपातघोरं
दिवीव राह्वंशुमतोः प्रतप्तम् ॥ १७
घटोत्कचो यदा कर्णं न विशेषयते नृप ।
तदा प्रादुश्चकारोग्रमस्त्रमस्त्रविदां वरः ॥ १८
तेनास्त्रेण हयान्पूर्वं हत्वा कर्णस्य राक्षसः ।
सारथिं चैव हैडिम्बः क्षिप्रमन्तरधीयत ॥ १९

धृतराष्ट्र उवाच ।

तथा ह्यन्तर्हिते तस्मिन्कूटयोधिनि राक्षसे ।
मामकैः प्रतिपन्नं यत्तन्ममाचक्ष्व संजय ॥ २०

संजय उवाच ।

अन्तर्हितं राक्षसं तं विदित्वा
संप्राक्रोशन्कुरवः सर्व एव ।
कथं नायं राक्षसः कूटयोधी
हन्यात्कर्णं समरेऽदृश्यमानः ॥ २१
ततः कर्णो लघुचित्रास्त्रयोधी
सर्वा दिशो व्यावृणोद्बाणजालैः ।
न वै किंचिद्व्यापतत्तत्र भूतं
तमोभूते सायकैरन्तरिक्षे ॥ २२
न चाददानो न च संदधानो
न चेषुधी स्पृशमानः कराग्रैः ।
अदृश्यद्वै लाघवात्सूतपुत्रः
सर्वं बाणैश्छादयानोऽन्तरिक्षम् ॥ २३
ततो मायां विहितामन्तरिक्षे
घोरां भीमां दारुणां राक्षसेन ।
संपश्यामो लोहिताभ्रप्रकाशां
देदीप्यन्तीमग्निशिखामिवोग्राम् ॥ २४
ततस्तस्या विद्युतः प्रादुरास-
न्नुल्काश्चापि ज्वलिताः कौरवेन्द्र ।
घोषश्चान्यः प्रादुरासीत्सुघोरः
सहस्रशो नदतां दुन्दुभीनाम् ॥ २५
ततः शराः प्रापतन्रुक्मपुङ्खाः
शक्त्यः प्रासा मुसलान्यायुधानि ।
परश्वधास्तैलधौताश्च खड्गाः
प्रदीप्ताग्राः पट्टिशास्तोमराश्च ॥ २६
मयूखिनः परिघा लोहबद्धा
गदाश्चित्राः शितधाराश्च शूलाः ।
गुर्व्यो गदा हेमपट्टावनद्धाः
शतघ्न्यश्च प्रादुरासन्समन्तात् ॥ २७
महाशिलाश्चापतंस्तत्र तत्र
सहस्रशः साशनयः सवज्राः ।
चक्राणि चानेकशतक्षुराणि
प्रादुर्बभूवुर्ज्वलनप्रभाणि ॥ २८
तां शक्तिपाषाणपरश्वधानां
प्रासासिवज्राशनिमुद्गराणाम् ।
वृष्टिं विशालां ज्वलितां पतन्तीं
कर्णः शरौघैर्न शशाक हन्तुम् ॥ २९
शराहतानां पततां हयानां
वज्राहतानां पततां गजानाम् ।
शिलाहतानां च महारथानां
महान्निनादः पततां बभूव ॥ ३०
सुभीमनानाविधशस्त्रपातै-

घटोत्कचेनाभिहतं समन्तात् ।
दौर्योधनं तद्बलमार्तरूप-
मावर्तमानं ददृशे भ्रमन्तम् ॥ ३१
हाहाकृतं संपरिवर्तमानं
संलीयमानं च विषण्णरूपम् ।
ते त्वार्यभावात्पुरुषप्रवीराः
पराङ्मुखा न बभूवुस्तदानीम् ॥ ३२
तां राक्षसीं घोरतरां सुभीमां
वृष्टिं महाशस्त्रमयीं पतन्तीम् ।
दृष्ट्वा बलौघांश्च निपात्यमाना-
न्महद्भयं तव पुत्रान्विवेश ॥ ३३
शिवाश्च वैश्वानरदीप्तजिह्वाः
सुभीमनादाः शतशो नदन्त्यः ।
रक्षोगणान्नर्दतश्चाभिवीक्ष्य
नरेन्द्रयोधा व्यथिता बभूवुः ॥ ३४
ते दीप्तजिह्वाननतीक्ष्णदंष्ट्रा
विभीषणाः शैलनिकाशकायाः ।
नभोगताः शक्तिविषक्तहस्ता
मेघा व्यमुञ्चन्निव वृष्टिमार्गम् ॥ ३५
तैराहतास्ते शरशक्तिशूलै-
र्गदाभिरुग्रैः परिघैश्च दीप्तैः ।
वज्रैः पिनाकैरशनिप्रहारै-
श्चक्रैः शतघ्न्युन्मथिताश्च पेतुः ॥ ३६
हुडा भुशुण्ड्योऽश्मगुडाः शतघ्न्यः
स्थूणाश्च कार्ष्णायसपट्टनद्धाः ।
अवाकिरंस्तव पुत्रस्य सैन्यं
तथा रौद्रं कश्मलं प्रादुरासीत् ॥ ३७
निष्कीर्णान्त्रा विहतैरुत्तमाङ्गैः
संभग्नाङ्गाः शेरते तत्र शूराः ।
भिन्ना हयाः कुञ्जराश्चावभग्नाः
संचूर्णिताश्चैव रथाः शिलाभिः ॥ ३८
एवं महच्छस्त्रवर्षं सृजन्त-
स्ते यातुधाना भुवि घोररूपाः ।
मायाः सृष्टास्तत्र घटोत्कचेन
नामुञ्चन्वै याचमानं न भीतम् ॥ ३९
तस्मिन्घोरे कुरुवीरावमर्दे
कालोत्सृष्टे क्षत्रियाणामभावे ।
ते वै भग्नाः सहसा व्यद्रवन्त
प्राक्रोशन्तः कौरवाः सर्व एव ॥ ४०
पलायध्वं कुरवो नैतदस्ति
सेन्द्रा देवा घ्नन्ति नः पाण्डवार्थे ।
तथा तेषां मज्जतां भारतानां
न स्म द्वीपस्तत्र कश्चिद्बभूव ॥ ४१
तस्मिन्संक्रन्दे तुमुले वर्तमाने
सैन्ये भग्ने लीयमाने कुरूणाम् ।
अनीकानां प्रविभागेऽप्रकाशे
न ज्ञायन्ते कुरवो नेतरे वा ॥ ४२
निर्मर्यादे विद्रवे घोररूपे
सर्वा दिशः प्रेक्षमाणाः स्म शून्याः ।
तां शस्त्रवृष्टिमुरसा गाहमानं
कर्णं चैकं तत्र राजन्नपश्यम् ॥ ४३
ततो बाणैरावृणोदन्तरिक्षं
दिव्यां मायां योधयन्राक्षसस्य ।
ह्रीमान्कुर्वन्दुष्करमार्यकर्म
नैवामुह्यत्संयुगे सूतपुत्रः ॥ ४४
ततो भीताः समुदैक्षन्त कर्णं
राजन्सर्वे सैन्धवा बाह्लिकाश्च ।
असंमोहं पूजयन्तोऽस्य संख्ये
संपश्यन्तो विजयं राक्षसस्य ॥ ४५
तेनोत्सृष्टा चक्रयुक्ता शतघ्नी

समं सर्वांश्चतुरोऽश्वाञ्जघान ।
ते जानुभिर्जगतीमन्वपद्य-
न्गतासवो निर्दशनाक्षिजिह्वाः ॥ ४६
ततो हताश्वादवरुह्य वाहा-
दन्तर्मनाः कुरुषु प्राद्रवत्सु ।
दिव्ये चास्त्रे मायया वध्यमाने
नैवामुह्यच्चिन्तयन्प्राप्तकालम् ॥ ४७
ततोऽब्रुवन्कुरवः सर्व एव
कर्णं दृष्ट्वा घोररूपां च मायाम् ।
शक्त्या रक्षो जहि कर्णाद्य तूर्णं
नश्यन्त्येते कुरवो धार्तराष्ट्राः ॥ ४८
करिष्यतः किं च नो भीमपार्थौ
तपन्तमेनं जहि रक्षो निशीथे ।
यो नः संग्रामाद्घोररूपाद्विमुच्ये-
त्स नः पार्थान्समरे योधयेत ॥ ४९
तस्मादेनं राक्षसं घोररूपं
जहि शक्त्या दत्तया वासवेन ।
मा कौरवाः सर्व एवेन्द्रकल्पा
रात्रीमुखे कर्ण नेशुः सयोधाः ॥ ५०
स वध्यमानो रक्षसा वै निशीथे
दृष्ट्वा राजन्नश्यमानं बलं च ।
महच्च श्रुत्वा निनदं कौरवाणां
मतिं दध्रे शक्तिमोक्षाय कर्णः ॥ ५१
स वै क्रुद्धः सिंह इवात्यमर्षी
नामर्षयत्प्रतिघातं रणे तम् ।
शक्तिं श्रेष्ठां वैजयन्तीमसह्यां
समाददे तस्य वधं चिकीर्षन् ॥ ५२
यासौ राजन्निहिता वर्षपूगा-
न्वधायाजौ सत्कृता फल्गुनस्य ।
यां वै प्रादात्सूतपुत्राय शक्रः
शक्तिं श्रेष्ठां कुण्डलाभ्यां निमाय ॥ ५३
तां वै शक्तिं लेलिहानां प्रदीप्तां
पाशैर्युक्तामन्तकस्येव रात्रिम् ।
मृत्योः स्वसारं ज्वलितामिवोल्कां
वैकर्तनः प्राहिणोद्राक्षसाय ॥ ५४
तामुत्तमां परकायापहर्त्रीं
दृष्ट्वा सौतेर्बाहुसंस्थां ज्वलन्तीम् ।
भीतं रक्षो विप्रदुद्राव राज-
न्कृत्वात्मानं विन्ध्यपादप्रमाणम् ॥ ५५
दृष्ट्वा शक्तिं कर्णबाह्वन्तरस्थां
नेदुर्भूतान्यन्तरिक्षे नरेन्द्र ।
ववुर्वातास्तुमुलाश्चापि राज-
न्सनिर्घाता चाशनिर्गां जगाम ॥ ५६
सा तां मायां भस्म कृत्वा ज्वलन्ती
भित्त्वा गाढं हृदयं राक्षसस्य ।
ऊर्ध्वं ययौ दीप्यमाना निशायां
नक्षत्राणामन्तराण्याविशन्ती ॥ ५७
युद्ध्वा चित्रैर्विविधैः शस्त्रपूगै-
र्दिव्यैर्वीरो मानुषै राक्षसैश्च ।
नदन्नादान्विविधान्भैरवांश्च
प्राणानिष्टांस्त्याजितः शक्रशक्त्या ॥ ५८
इदं चान्यच्चित्रमाश्चर्यरूपं
चकारासौ कर्म शत्रुक्षयाय ।
तस्मिन्काले शक्तिनिर्भिन्नमर्मा
बभौ राजन्मेघशैलप्रकाशः ॥ ५९
ततोऽन्तरिक्षादपतद्गतासुः
स राक्षसेन्द्रो भुवि भिन्नदेहः ।
अवाक्शिराः स्तब्धगात्रो विजिह्वो
घटोत्कचो महदास्थाय रूपम् ॥ ६०
स तद्रूपं भैरवं भीमकर्मा-

भीमं कृत्वा भैमसेनिः पपात ।
हतोऽप्येवं तव सैन्यैकदेश-
मपोथयत्कौरवान्भीषयाणः ॥ ६१
ततो मिश्राः प्राणदन्सिंहनादै-
र्भेर्यः शङ्खा मुरजाश्चानकाश्च ।
दग्धां मायां निहतं राक्षसं च
दृष्ट्वा हृष्टाः प्राणदन्कौरवेयाः ॥ ६२
ततः कर्णः कुरुभिः पूज्यमानो
यथा शक्रो वृत्रवधे मरुद्भिः ।
अन्वारूढस्तव पुत्रं रथस्थं
हृष्टश्चापि प्राविशत्स्वं स सैन्यम् ॥ ६३

इति श्रीमहाभारते द्रोणपर्वणि
चतुःपञ्चाशदधिकशततमोऽध्यायः ॥ १५४ ॥
॥ समाप्तं घटोत्कचवधपर्व ॥

१५५

संजय उवाच ।

हैडिम्बं निहतं दृष्ट्वा विकीर्णमिव पर्वतम् ।
पाण्डवा दीनमनसः सर्वे बाष्पाकुलेक्षणाः ॥ १
वासुदेवस्तु हर्षेण महताभिपरिप्लुतः ।
ननाद सिंहवन्नादं व्यथयन्निव भारत ।
विनद्य च महानादं पर्यष्वजत फल्गुनम् ॥ २
स विनद्य महानादमभीशून्संनियम्य च ।
ननर्त हर्षसंवीतो वातोद्धूत इव द्रुमः ॥ ३
ततो विनिर्भ्राम्य पुनः पार्थमास्फोट्य चासकृत् ।
रथोपस्थगतो भीमं प्राणदत्पुनरच्युतः ॥ ४
प्रहृष्टमनसं ज्ञात्वा वासुदेवं महाबलम् ।
अब्रवीदर्जुनो राजन्नातिहृष्टमना इव ॥ ५
अतिहर्षोऽयमस्थाने तवाद्य मधुसूदन ।
शोकस्थाने परे प्राप्ते हैडिम्बस्य वधेन वै ॥ ६
विमुखानि च सैन्यानि हतं दृष्ट्वा घटोत्कचम् ।
वयं च भृशमाविग्ना हैडिम्बस्य निपातनात् ॥ ७
नैतत्कारणमल्पं हि भविष्यति जनार्दन ।
तदद्य शंस मे पृष्टः सत्यं सत्यवतां वर ॥ ८
यद्येतन्न रहस्यं ते वक्तुमर्हस्यरिंदम ।
धैर्यस्य वैकृतं ब्रूहि त्वमद्य मधुसूदन ॥ ९
समुद्रस्येव संक्षोभो मेरोरिव विसर्पणम् ।
तथैतल्लाघवं मन्ये तव कर्म जनार्दन ॥ १०

वासुदेव उवाच ।

अतिहर्षमिमं प्राप्तं शृणु मे त्वं धनंजय ।
अतीव मनसः सद्यः प्रसादकरमुत्तमम् ॥ ११
शक्तिं घटोत्कचेनेमां व्यंसयित्वा महाद्युते ।
कर्णं निहतमेवाजौ विद्धि सद्यो धनंजय ॥ १२
शक्तिहस्तं पुनः कर्णं को लोकेऽस्ति पुमानिह ।
य एनमभितस्तिष्ठेत्कार्त्तिकेयमिवाहवे ॥ १३
दिष्ट्यापनीतकवचो दिष्ट्यापहृतकुण्डलः ।
दिष्ट्या च व्यंसिता शक्तिरमोघास्य घटोत्कचे ॥
यदि हि स्यात्सकवचस्तथैव च सकुण्डलः ।
सामरानपि लोकांस्त्रीनेकः कर्णो जयेद्बली ॥ १५
वासवो वा कुबेरो वा वरुणो वा जलेश्वरः ।
यमो वा नोत्सहेत्कर्णं रणे प्रतिसमासितुम् ॥ १६
गाण्डीवमायम्य भवांश्चक्रं वाहं सुदर्शनम् ।
न शक्तौ स्वो रणे जेतुं तथायुक्तं नरर्षभम् ॥ १७
त्वद्धितार्थं तु शक्रेण मायया हृतकुण्डलः ।
विहीनकवचश्चायं कृतः परपुरंजयः ॥ १८
उत्कृत्य कवचं यस्मात्कुण्डले विमले च ते ।
प्रादाच्छक्राय कर्णो वै तेन वैकर्तनः स्मृतः ॥ १९
आशीविष इव क्रुद्धः स्तम्भितो मन्त्रतेजसा ।
तथाद्य भाति कर्णो मे शान्तज्वाल इवानलः ॥२०
यदाप्रभृति कर्णाय शक्तिर्दत्ता महात्मना ।
वासवेन महाबाहो प्राप्ता यासौ घटोत्कचे ॥ २१

कुण्डलाभ्यां निमायाथ दिव्येन कवचेन च ।
तां प्राप्यामन्यत वृषा सततं त्वां हतं रणे ॥ २२
एवं गतेऽपि शक्योऽयं हन्तुं नान्येन केनचित् ।
ऋते त्वा पुरुषव्याघ्र शपे सत्येन चानघ ॥ २३
ब्रह्मण्यः सत्यवादी च तपस्वी नियतव्रतः ।
रिपुष्वपि दयावांश्च तस्मात्कर्णो वृषा स्मृतः ॥ २४
युद्धशौण्डो महाबाहुर्नित्योद्यतशरासनः ।
केसरीव वने मर्दन्मत्तमातङ्गयूथपान् ।
विमदान्रथशार्दूलान्कुरुते रणमूर्धनि ॥ २५
मध्यंगत इवादित्यो यो न शक्यो निरीक्षितुम् ।
त्वदीयैः पुरुषव्याघ्र योधमुख्यैर्महात्मभिः ।
शरजालसहस्रांशुः शरदीव दिवाकरः ॥ २६
तपान्ते तोयदो यद्वच्छरधाराः क्षरत्यसौ ।
दिव्यास्त्रजलदः कर्णः पर्जन्य इव वृष्टिमान् ।
सोऽद्य मानुषतां प्राप्तो विमुक्तः शक्रदत्तया ॥ २७

एको हि योगोऽस्य भवेद्वधाय
छिद्रे ह्येनं स्वप्रमत्तः प्रमत्तम् ।
कृच्छ्रप्राप्तं रथचक्रे निमग्ने
हन्याः पूर्वं त्वं तु संज्ञां विचार्य ॥ २८
जरासंधश्चेदिराजो महात्मा
महाबलश्चैकलव्यो निषादः ।
एकैकशो निहताः सर्व एव
योगैस्तैस्तैस्त्वद्धितार्थं मयैव ॥ २९
अथापरे निहता राक्षसेन्द्रा
हिडिम्बकिर्मीरबकप्रधानाः ।
अलायुधः परसैन्यावमर्दी
घटोत्कचश्चोग्रकर्मा तरस्वी ॥ ३०

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥ १५५ ॥

१५६

अर्जुन उवाच ।

कथमस्मद्धितार्थं ते कैश्च योगैर्जनार्दन ।
जरासंधप्रभृतयो घातिताः पृथिवीश्वराः ॥ १

वासुदेव उवाच ।

जरासंधश्चेदिराजो नैषादिश्च महाबलः ।
यदि स्युर्न हताः पूर्वमिदानीं स्युर्भयंकराः ॥ २
सुयोधनस्तानवश्यं वृणुयाद्रथसत्तमान् ।
तेऽस्माभिर्नित्यसंदुष्टाः संश्रयेयुश्च कौरवान् ॥ ३
ते हि वीरा महात्मानः कृतास्त्रा दृढयोधिनः ।
धार्तराष्ट्रीं चमूं कृत्स्नां रक्षेयुरमरा इव ॥ ४
सूतपुत्रो जरासंधश्चेदिराजो निषादजः ।
सुयोधनं समाश्रित्य तपेरन्पृथिवीमिमाम् ॥ ५
योगैरपि हता यैस्ते तान्मे शृणु धनंजय ।
अजय्या हि विना योगैर्मृधे ते दैवतैरपि ॥ ६
एकैको हि पृथक्तेषां समस्तां सुरवाहिनीम् ।
योधयेत्समरे पार्थ लोकपालाभिरक्षिताम् ॥ ७
जरासंधो हि रुषितो रौहिणेयप्रधर्षितः ।
अस्मद्वधार्थं चिक्षेप गदां वै लोहितामुखीम् ॥ ८
सीमन्तमिव कुर्वाणां नभसः पावकप्रभाम् ।
व्यदृश्यतापतन्ती सा शक्रमुक्ता यथाशनिः ॥ ९
तामापतन्तीं दृष्ट्वैव गदां रोहिणिनन्दनः ।
प्रतिघातार्थमस्त्रं वै स्थूणाकर्णमवासृजत् ॥ १०
अस्त्रवेगप्रतिहता सा गदा प्रापतद्भुवि ।
दारयन्ती धरां देवीं कम्पयन्तीव पर्वतान् ॥ ११
तत्र स्म राक्षसी घोरा जरा नामाशुविक्रमा ।
संधयामास तं जातं जरासंधमरिंदमम् ॥ १२
द्वाभ्यां जातो हि मातृभ्यामर्धदेहः पृथक्पृथक् ।
तया स संधितो यस्माज्जरासंधस्ततः स्मृतः ॥ १३
सा तु भूमिगता पार्थ हता ससुतबान्धवा ।

गदया तेन चास्त्रेण स्थूणाकर्णेन राक्षसी ॥ १४
विनाभूतः स गदया जरासंधो महामृधे ।
निहतो भीमसेनेन पश्यतस्ते धनंजय ॥ १५
यदि हि स्याद्गदापाणिर्जरासंधः प्रतापवान् ।
सेन्द्रा देवा न तं हन्तुं रणे शक्ता नरोत्तम ॥ १६
त्वद्धितार्थं हि नैषादिरङ्गुष्ठेन वियोजितः ।
द्रोणेनाचार्यकं कृत्वा छद्मना सत्यविक्रमः ॥ १७
स तु बद्धाङ्गुलित्राणो नैषादिर्दृढविक्रमः ।
अस्यन्नेको वनचरो बभौ राम इवापरः ॥ १८
एकलव्यं हि साङ्गुष्ठमशक्ता देवदानवाः ।
सराक्षसोरगाः पार्थ विजेतुं युधि कर्हिचित् ॥ १९
किमु मानुषमात्रेण शक्यः स्यात्प्रतिवीक्षितुम् ।
दृढमुष्टिः कृती नित्यमस्यमानो दिवानिशम् ॥ २०
त्वद्धितार्थं तु स मया हतः संग्राममूर्धनि ।
चेदिराजश्च विक्रान्तः प्रत्यक्षं निहतस्तव ॥ २१
स चाप्यशक्यः संग्रामे जेतुं सर्वैः सुरासुरैः ।
वधार्थं तस्य जातोऽहमन्येषां च सुरद्विषाम् ॥ २२
त्वत्सहायो नरव्याघ्र लोकानां हितकाम्यया ।
हिडिम्बबककिर्मीरा भीमसेनेन पातिताः ।
रावणेन समप्राणा ब्रह्मयज्ञविनाशनाः ॥ २३
हतस्तथैव मायावी हैडिम्बेनाप्यलायुधः ।
हैडिम्बश्चाप्युपायेन शक्त्या कर्णेन घातितः ॥ २४
यदि ह्येनं नाहनिष्यत्कर्णः शक्त्या महामृधे ।
मया वध्योऽभविष्यत्स भैमसेनिर्घटोत्कचः ॥ २५
मया न निहतः पूर्वमेष युष्मत्प्रियेप्सया ।
एष हि ब्राह्मणद्वेषी यज्ञद्वेषी च राक्षसः ॥ २६
धर्मस्य लोप्ता पापात्मा तस्मादेष निपातितः ।
व्यंसिता चाप्युपायेन शक्रदत्ता मयानघ ॥ २७
ये हि धर्मस्य लोप्तारो वध्यास्ते मम पाण्डव ।
धर्मसंस्थापनार्थं हि प्रतिज्ञैषा ममाव्यया ॥ २८
ब्रह्म सत्यं दमः शौचं धर्मो ह्रीः श्रीर्धृतिः क्षमा ।
यत्र तत्र रमे नित्यमहं सत्येन ते शपे ॥ २९
न विषादस्त्वया कार्यः कर्णं वैकर्तनं प्रति ।
उपदेक्ष्याम्युपायं ते येन तं प्रसहिष्यसि ॥ ३०
सुयोधनं चापि रणे हनिष्यति वृकोदरः ।
तस्य चापि वधोपायं वक्ष्यामि तव पाण्डव ॥ ३१
वर्धते तुमुलस्त्वेष शब्दः परचमूं प्रति ।
विद्रवन्ति च सैन्यानि त्वदीयानि दिशो दश ॥ ३२
लब्धलक्ष्या हि कौरव्या विधमन्ति चमूं तव ।
दहत्येष च वः सैन्यं द्रोणः प्रहरतां वरः ॥ ३३

इति श्रीमहाभारते द्रोणपर्वणि
षट्पञ्चाशदधिकशततमोऽध्यायः ॥ १५६ ॥

१५७

धृतराष्ट्र उवाच ।

एकवीरवधे मोघा शक्तिः सूतात्मजे यदा ।
कस्मात्सर्वान्समुत्सृज्य स तां पार्थे न मुक्तवान् ॥ १
तस्मिन्हते हता हि स्युः सर्वे पाण्डवसृञ्जयाः ।
एकवीरवधे कस्मान्न युद्धे जयमादधत् ॥ २
आहूतो न निवर्तेयमिति तस्य महाव्रतम् ।
स्वयमाह्वयितव्यः स सूतपुत्रेण फल्गुनः ॥ ३
ततो द्वैरथमानीय फल्गुनं शक्रदत्तया ।
न जघान वृषा कस्मात्तन्ममाचक्ष्व संजय ॥ ४
नूनं बुद्धिविहीनश्चाप्यसहायश्च मे सुतः ।
शत्रुभिर्व्यंसितोपायः कथं नु स जयेदरीन् ॥ ५
या ह्यस्य परमा शक्तिर्जयस्य च परायणम् ।
सा शक्तिर्वासुदेवेन व्यंसितास्य घटोत्कचे ॥ ६
कुणेर्यथा हस्तगतं ह्रियेद्बिल्वं बलीयसा ।
तथा शक्तिरमोघा सा मोघीभूता घटोत्कचे ॥ ७
यथा वराहस्य शुनश्च युध्यतो-
स्तयोरभावे श्वपचस्य लाभः ।

मन्ये विद्वन्वासुदेवस्य तद्व-
युद्धे लाभः कर्णहैडिम्बयोर्वै ॥ ८
घटोत्कचो यदि हन्याद्धि कर्णं
परो लाभः स भवेत्पाण्डवानाम् ।
वैकर्तनो वा यदि तं निहन्या-
त्तथापि कृत्यं शक्तिनाशात्कृतं स्यात् ॥ ९
इति प्राज्ञः प्रज्ञयैतद्विचार्य
घटोत्कचं सूतपुत्रेण युद्धे ।
अयोधयद्वासुदेवो नृसिंहः
प्रियं कुर्वन्पाण्डवानां हितं च ॥ १०

संजय उवाच ।

एतच्चिकीर्षितं ज्ञात्वा कर्णे मधुनिहा नृप ।
नियोजयामास तदा द्वैरथे राक्षसेश्वरम् ॥ ११
घटोत्कचं महावीर्यं महाबुद्धिर्जनार्दनः ।
अमोघाया विघातार्थं राजन्दुर्मन्त्रिते तव ॥ १२
तदैव कृतकार्या हि वयं स्याम कुरूद्वह ।
न रक्षेद्यदि कृष्णस्तं पार्थं कर्णान्महारथात् ॥ १३
साश्वध्वजरथः संख्ये धृतराष्ट्र पतेद्भुवि ।
विना जनार्दनं पार्थो योगानामीश्वरं प्रभुम् ॥ १४
तैस्तैरुपायैर्बहुभी रक्ष्यमाणः स पार्थिव ।
जयत्यभिमुखः शत्रून्पार्थः कृष्णेन पालितः ॥ १५
सविशेषं त्वमोघायाः कृष्णोऽरक्षत पाण्डवम् ।
हन्यात्क्षिप्ता हि कौन्तेयं शक्तिर्वृक्षमिवाशनिः ॥ १६

धृतराष्ट्र उवाच ।

विरोधी च कुमन्त्री च प्राज्ञमानी ममात्मजः ।
यस्यैष समतिक्रान्तो वधोपायो जयं प्रति ॥ १७
तवापि समतिक्रान्तमेतद्गावल्गणे कथम् ।
एतमर्थं महाबुद्धे यत्त्वया नावबोधितः ॥ १८

संजय उवाच ।

दुर्योधनस्य शकुनेर्मम दुःशासनस्य च ।
रात्रौ रात्रौ भवत्येषा नित्यमेव समर्थना ॥ १९
श्वः सर्वसैन्यानुत्सृज्य जहि कर्ण धनंजयम् ।
प्रेष्यवत्पाण्डुपाञ्चालानुपभोक्ष्यामहे ततः ॥ २०
अथ वा निहते पार्थे पाण्डुष्वन्यतमं ततः ।
स्थापयेद्युधि वार्ष्णेयस्तस्मात्कृष्णो निपात्यताम् ॥ २१
कृष्णो हि मूलं पाण्डूनां पार्थः स्कन्ध इवोद्गतः ।
शाखा इवेतरे पार्थाः पाञ्चालाः पत्रसंज्ञिताः ॥ २२
कृष्णाश्रयाः कृष्णबलाः कृष्णनाथाश्च पाण्डवाः ।
कृष्णः परायणं चैषां ज्योतिषामिव चन्द्रमाः ॥ २३
तस्मात्पर्णानि शाखाश्च स्कन्धं चोत्सृज्य सूतज ।
कृष्णं निकृन्धि पाण्डूनां मूलं सर्वत्र सर्वदा ॥ २४
हन्याद्यदि हि दाशार्हं कर्णो यादवनन्दनम् ।
कृत्स्ना वसुमती राजन्वशे ते स्यान्न संशयः ॥ २५
यदि हि स निहतः शयीत भूमौ
यदुकुलपाण्डवनन्दनो महात्मा ।
ननु तव वसुधा नरेन्द्र सर्वा
सगिरिसमुद्रवना वशं व्रजेत ॥ २६
सा तु बुद्धिः कृताप्येवं जाग्रति त्रिदशेश्वरे ।
अप्रमेये हृषीकेशे युद्धकाले व्यमुह्यत ॥ २७
अर्जुनं चापि कौन्तेयं सदा रक्षति केशवः ।
न ह्येनमैच्छत्प्रमुखे सौतेः स्थापयितुं रणे ॥ २८
अन्यांश्चास्मै रथोदारानुपस्थापयदच्युतः ।
अमोघां तां कथं शक्तिं मोघां कुर्यामिति प्रभो ॥
ततः कृष्णं महाबाहुः सात्यकिः सत्यविक्रमः ।
पप्रच्छ रथशार्दूल कर्णं प्रति महारथम् ॥ ३०
अयं च प्रत्ययः कर्णे शक्त्या चामितविक्रम ।
किमर्थं सूतपुत्रेण न मुक्ता फल्गुने तु सा ॥ ३१

वासुदेव उवाच ।

दुःशासनश्च कर्णश्च शकुनिश्च ससैन्धवः ।
सततं मन्त्रयन्ति स्म दुर्योधनपुरोगमाः ॥ ३२

कर्ण कर्ण महेष्वास रणेऽमितपराक्रम ।
नान्यस्य शक्तिरेषा ते मोक्तव्या जयतां वर ॥ ३३
ऋते महारथात्पार्थात्कुन्तीपुत्राद्धनंजयात् ।
स हि तेषामतियशा देवानामिव वासवः ॥ ३४
तस्मिन्विनिहते सर्वे पाण्डवाः सृञ्जयैः सह ।
भविष्यन्ति गतात्मानः सुरा इव निरग्नयः ॥ ३५
तथेति च प्रतिज्ञातं कर्णेन शिनिपुंगव ।
हृदि नित्यं तु कर्णस्य वधो गाण्डीवधन्वनः ॥ ३६
अहमेव तु राधेयं मोहयामि युधां वर ।
यतो नावसृजच्छक्तिं पाण्डवे श्वेतवाहने ॥ ३७
फल्गुनस्य हि तां मृत्युमवगम्य युयुत्सतः ।
न निद्रा न च मे हर्षो मनसोऽस्ति युधां वर ॥ ३८
घटोत्कचे व्यंसितां तु दृष्ट्वा तां शिनिपुंगव ।
मृत्योरास्यान्तरान्मुक्तं पश्याम्यद्य धनंजयम् ॥ ३९
न पिता न च मे माता न यूयं भ्रातरस्तथा ।
न च प्राणास्तथा रक्ष्या यथा बीभत्सुराहवे ॥ ४०
त्रैलोक्यराज्याद्यत्किंचिद्भवेदन्यत्सुदुर्लभम् ।
नेच्छेयं सात्वताहं तद्विना पार्थं धनंजयम् ॥ ४१
अतः प्रहर्षः सुमहान्युयुधानाद्य मेऽभवत् ।
मृतं प्रत्यागतमिव दृष्ट्वा पार्थं धनंजयम् ॥ ४२
अतश्च प्रहितो युद्धे मया कर्णाय राक्षसः ।
न ह्यन्यः समरे रात्रौ शक्तः कर्णं प्रबाधितुम् ॥ ४३

संजय उवाच ।

इति सात्यकये प्राह तदा देवकिनन्दनः ।
धनंजयहिते युक्तस्तत्प्रिये सततं रतः ॥ ४४

इति श्रीमहाभारते द्रोणपर्वणि
सप्तपञ्चाशदधिकशततमोऽध्यायः ॥ १५७ ॥

१५८

धृतराष्ट्र उवाच ।

कर्णदुर्योधनादीनां शकुनेः सौबलस्य च ।
अपनीतं महत्तात तव चैव विशेषतः ॥ १
यदाजानीत तां शक्तिमेकघ्नीं सततं रणे ।
अनिवार्यामसह्यां च देवैरपि सवासवैः ॥ २
सा किमर्थं न कर्णेन प्रवृत्ते समरे पुरा ।
न देवकीसुते मुक्ता फल्गुने वापि संजय ॥ ३

संजय उवाच ।

संग्रामाद्विनिवृत्तानां सर्वेषां नो विशां पते ।
रात्रौ कुरुकुलश्रेष्ठ मन्त्रोऽयं समजायत ॥ ४
प्रभातमात्रे श्वोभूते केशवायार्जुनाय वा ।
शक्तिरेषा विमोक्तव्या कर्ण कर्णेति नित्यशः ॥ ५
ततः प्रभातसमये राजन्कर्णस्य दैवतैः ।
अन्येषां चैव योधानां सा बुद्धिर्नश्यते पुनः ॥ ६
दैवमेव परं मन्ये यत्कर्णो हस्तसंस्थया ।
न जघान रणे पार्थं कृष्णं वा देवकीसुतम् ॥ ७
तस्य हस्तस्थिता शक्तिः कालरात्रिरिवोद्यता ।
दैवोपहतबुद्धित्वान्न तां कर्णो विमुक्तवान् ॥ ८
कृष्णे वा देवकीपुत्रे मोहितो देवमायया ।
पार्थे वा शक्रकल्पे वै वधार्थं वासवीं प्रभो ॥ ९

धृतराष्ट्र उवाच ।

दैवेनैव हता यूयं स्वबुद्ध्या केशवस्य च ।
गता हि वासवी हत्वा तृणभूतं घटोत्कचम् ॥ १०
कर्णश्च मम पुत्राश्च सर्वे चान्ये च पार्थिवाः ।
अनेन दुष्प्रणीतेन गता वैवस्वतक्षयम् ॥ ११
भूय एव तु मे शंस यथा युद्धमवर्तत ।
कुरूणां पाण्डवानां च हैडिम्बे निहते तदा ॥ १२
ये च तेऽभ्यद्रवन्द्रोणं व्यूढानीकाः प्रहारिणः ।
सृञ्जयाः सह पाञ्चालैस्तेऽप्यकुर्वन्कथं रणम् ॥ १३
सौमदत्तेर्वधाद्द्रोणमायस्तं सैन्धवस्य च ।
अमर्षाज्जीवितं त्यक्त्वा गाहमानं वरूथिनीम् ॥ १४
जृम्भमाणमिव व्याघ्रं व्यात्ताननमिवान्तकम् ।

कथं प्रत्युद्ययुर्द्रोणमस्यन्तं पाण्डुसृञ्जयाः ॥ १५
आचार्यं ये च तेऽरक्षन्दुर्योधनपुरोगमाः ।
द्रौणिकर्णकृपास्तात तेऽप्यकुर्वन्किमाहवे ॥ १६
भारद्वाजं जिघांसन्तौ सव्यसाचिवृकोदरौ ।
समार्छन्मामका युद्धे कथं संजय शंस मे ॥ १७
सिन्धुराजवधेनेमे घटोत्कचवधेन ते ।
अमर्षिताः सुसंक्रुद्धा रणं चक्रुः कथं निशि ॥ १८

संजय उवाच ।

हते घटोत्कचे राजन्कर्णेन निशि राक्षसे ।
प्रणदत्सु च हृष्टेषु तावकेषु युयुत्सुषु ॥ १९
आपतत्सु च वेगेन वध्यमाने बलेऽपि च ।
विगाढायां रजन्यां च राजा दैन्यं परं गतः ॥ २०
अब्रवीच्च महाबाहुर्भीमसेनं परंतपः ।
आवारय महाबाहो धार्तराष्ट्रस्य वाहिनीम् ।
हैडिम्बस्याभिघातेन मोहो मामाविशन्महान् ॥ २१
एवं भीमं समादिश्य स्वरथे समुपाविशत् ।
अश्रुपूर्णमुखो राजा निःश्वसंश्च पुनः पुनः ।
कश्मलं प्राविशद्घोरं दृष्ट्वा कर्णस्य विक्रमम् ॥ २२
तं तथा व्यथितं दृष्ट्वा कृष्णो वचनमब्रवीत् ।
मा व्यथां कुरु कौन्तेय नैतत्त्वय्युपपद्यते ।
वैक्लव्यं भरतश्रेष्ठ यथा प्राकृतपूरुषे ॥ २३
उत्तिष्ठ राजन्युध्यस्व वह गुर्वीं धुरं विभो ।
त्वयि वैक्लव्यमापन्ने संशयो विजये भवेत् ॥ २४
श्रुत्वा कृष्णस्य वचनं धर्मराजो युधिष्ठिरः ।
विमृज्य नेत्रे पाणिभ्यां कृष्णं वचनमब्रवीत् ॥ २५
विदिता ते महाबाहो धर्माणां परमा गतिः ।
ब्रह्महत्याफलं तस्य यः कृतं नावबुध्यते ॥ २६
अस्माकं हि वनस्थानां हैडिम्बेन महात्मना ।
बालेनापि सता तेन कृतं साह्यं जनार्दन ॥ २७
अस्त्रहेतोर्गतं ज्ञात्वा पाण्डवं श्वेतवाहनम् ।
असौ कृष्ण महेष्वासः काम्यके मामुपस्थितः ।
उषितश्च सहास्माभिर्यावन्नासीद्धनंजयः ॥ २८
गन्धमादनयात्रायां दुर्गेभ्यश्च स्म तारिताः ।
पाञ्चाली च परिश्रान्ता पृष्ठेनोढा महात्मना ॥ २९
आरम्भाच्चैव युद्धानां यदेष कृतवान्प्रभो ।
मदर्थं दुष्करं कर्म कृतं तेन महात्मना ॥ ३०
स्वभावाद्या च मे प्रीतिः सहदेवे जनार्दन ।
सैव मे द्विगुणा प्रीती राक्षसेन्द्रे घटोत्कचे ॥ ३१
भक्तश्च मे महाबाहुः प्रियोऽस्याहं प्रियश्च मे ।
येन विन्दामि वार्ष्णेय कश्मलं शोकतापितः ॥ ३२
पश्य सैन्यानि वार्ष्णेय द्राव्यमाणानि कौरवैः ।
द्रोणकर्णौ च संयत्तौ पश्य युद्धे महारथौ ॥ ३३
निशीथे पाण्डवं सैन्यमाभ्यां पश्य प्रमर्दितम् ।
गजाभ्यामिव मत्ताभ्यां यथा नडवनं महत् ॥ ३४
अनादृत्य बलं बाह्वोर्भीमसेनस्य माधव ।
चित्रास्त्रतां च पार्थस्य विक्रमन्ते स्म कौरवाः ॥ ३५
एष द्रोणश्च कर्णश्च राजा चैव सुयोधनः ।
निहत्य राक्षसं युद्धे हृष्टा नर्दन्ति संयुगे ॥ ३६
कथमस्मासु जीवत्सु त्वयि चैव जनार्दन ।
हैडिम्बः प्राप्तवान्मृत्युं सूतपुत्रेण संगतः ॥ ३७
कदर्थीकृत्य नः सर्वान्पश्यतः सव्यसाचिनः ।
निहतो राक्षसः कृष्ण भैमसेनिर्महाबलः ॥ ३८
यदाभिमन्युर्निहतो धार्तराष्ट्रैर्दुरात्मभिः ।
नासीत्तत्र रणे कृष्ण सव्यसाची महारथः ॥ ३९
निरुद्धाश्च वयं सर्वे सैन्धवेन दुरात्मना ।
निमित्तमभवद्द्रोणः सपुत्रस्तत्र कर्मणि ॥ ४०
उपदिष्टो वधोपायः कर्णस्य गुरुणा स्वयम् ।
व्यायच्छतश्च खड्गेन द्विधा खड्गं चकार ह ॥ ४१
व्यसने वर्तमानस्य कृतवर्मा नृशंसवत् ।
अश्वाञ्जघान सहसा तथोभौ पार्ष्णिसारथी ।

तथेतरे महेष्वासाः सौभद्रं युध्यपातयन् ॥ ४२
अल्पे च कारणे कृष्ण हतो गाण्डीवधन्वना ।
सैन्धवो यादवश्रेष्ठ तच्च नातिप्रियं मम ॥ ४३
यदि शत्रुवधे न्याय्यो भवेत्कर्तुं च पाण्डवैः ।
द्रोणकर्णौ रणे पूर्वं हन्तव्याविति मे मतिः ॥ ४४
एतौ मूलं हि दुःखानामस्माकं पुरुषर्षभ ।
एतौ रणे समासाद्य पराश्वस्तः सुयोधनः ॥ ४५
यत्र वध्यो भवेद्द्रोणः सूतपुत्रश्च सानुगः ।
तत्रावधीन्महाबाहुः सैन्धवं दूरवासिनम् ॥ ४६
अवश्यं तु मया कार्यः सूतपुत्रस्य निग्रहः ।
ततो यास्याम्यहं वीर स्वयं कर्णजिघांसया ।
भीमसेनो महाबाहुर्द्रोणानीकेन संगतः ॥ ४७
एवमुक्त्वा ययौ तूर्णं त्वरमाणो युधिष्ठिरः ।
स विस्फार्य महच्चापं शङ्खं प्रध्माप्य भैरवम् ॥ ४८
ततो रथसहस्रेण गजानां च शतैस्त्रिभिः ।
वाजिभिः पञ्चसाहस्रैस्त्रिसाहस्रैः प्रभद्रकैः ।
वृतः शिखण्डी त्वरितो राजानं पृष्ठतोऽन्वयात् ॥
ततो भेरीः समाजघ्नुः शङ्खान्दध्मुश्च दंशिताः ।
पाञ्चालाः पाण्डवाश्चैव युधिष्ठिरपुरोगमाः ॥ ५०
ततोऽब्रवीन्महाबाहुर्वासुदेवो धनंजयम् ।
एष प्रयाति त्वरितो क्रोधाविष्टो युधिष्ठिरः ।
जिघांसुः सूतपुत्रस्य तस्योपेक्षा न युज्यते ॥ ५१
एवमुक्त्वा हृषीकेशः शीघ्रमश्वानचोदयत् ।
दूरं च यातं राजानमन्वगच्छज्जनार्दनः ॥ ५२
तं दृष्ट्वा सहसा यान्तं सूतपुत्रजिघांसया ।
शोकोपहतसंकल्पं दह्यमानमिवाग्निना ।
अभिगम्याब्रवीद्व्यासो धर्मपुत्रं युधिष्ठिरम् ॥ ५३
कर्णमासाद्य संग्रामे दिष्ट्या जीवति फल्गुनः ।
सव्यसाचिवधाकाङ्क्षी शक्तिं रक्षितवान्हि सः ॥५४
न चागाद्द्वैरथं जिष्णुर्दिष्ट्या तं भरतर्षभ ।
सृजेतां स्पर्धिनावेतौ दिव्यान्यस्त्राणि सर्वशः ॥५५
वध्यमानेषु चास्त्रेषु पीडितः सूतनन्दनः ।
वासवीं समरे शक्तिं ध्रुवं मुञ्चेद्युधिष्ठिर ॥ ५६
ततो भवेत्ते व्यसनं घोरं भरतसत्तम ।
दिष्ट्या रक्षो हतं युद्धे सूतपुत्रेण मानद ॥ ५७
वासवीं कारणं कृत्वा कालेनापहृतो ह्यसौ ।
तवैव कारणाद्रक्षो निहतं तात संयुगे ॥ ५८
मा क्रुधो भरतश्रेष्ठ मा च शोके मनः कृथाः ।
प्राणिनामिह सर्वेषामेषा निष्ठा युधिष्ठिर ॥ ५९
भ्रातृभिः सहितः सर्वैः पार्थिवैश्च महात्मभिः ।
कौरवान्समरे राजन्नभियुध्यस्व भारत ।
पञ्चमे दिवसे चैव पृथिवी ते भविष्यति ॥ ६०
नित्यं च पुरुषव्याघ्र धर्ममेव विचिन्तय ।
आनृशंस्यं तपो दानं क्षमां सत्यं च पाण्डव ॥६१
सेवेथाः परमप्रीतो यतो धर्मस्ततो जयः ।
इत्युक्त्वा पाण्डवं व्यासस्तत्रैवान्तरधीयत ॥ ६२

इति श्रीमहाभारते द्रोणपर्वणि
अष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥

१५९

संजय उवाच ।

घटोत्कचे तु निहते सूतपुत्रेण तां निशाम् ।
दुःखामर्षवशं प्राप्तो धर्मपुत्रो युधिष्ठिरः ॥ १
दृष्ट्वा भीमेन महतीं वार्यमाणां चमूं तव ।
धृष्टद्युम्नमुवाचेदं कुम्भयोनिं निवारय ॥ २
त्वं हि द्रोणविनाशाय समुत्पन्नो हुताशनात् ।
सशरः कवची खड्गी धन्वी च परतापनः ।
अभिद्रव रणे हृष्टो न च ते भीः कथंचन ॥ ३
जनमेजयः शिखण्डी च दौर्मुखिश्च यशोधनः ।
अभिद्रवन्तु संहृष्टाः कुम्भयोनिं समन्ततः ॥ ४
नकुलः सहदेवश्च द्रौपदेयाः प्रभद्रकाः ।

द्रुपदश्च विराटश्च पुत्रभ्रातृसमन्वितौ ॥ ५
सात्यकिः केकयाश्चैव पाण्डवश्च धनंजयः ।
अभिद्रवन्तु वेगेन भारद्वाजवधेप्सया ॥ ६
तथैव रथिनः सर्वे हस्त्यश्वं यच्च किंचन ।
पादाताश्च रणे द्रोणं प्रापयन्तु महारथम् ॥ ७
तथाज्ञप्तास्तु ते सर्वे पाण्डवेन महात्मना ।
अभ्यद्रवन्त वेगेन कुम्भयोनिं युयुत्सया ॥ ८
आगच्छतस्तान्सहसा सर्वोद्योगेन पाण्डवान् ।
प्रतिजग्राह समरे द्रोणः शस्त्रभृतां वरः ॥ ९
ततो दुर्योधनो राजा सर्वोद्योगेन पाण्डवान् ।
अभ्यद्रवत्सुसंक्रुद्ध इच्छन्द्रोणस्य जीवितम् ॥ १०
ततः प्रववृते युद्धं श्रान्तवाहनसैनिकम् ।
पाण्डवानां कुरूणां च गर्जतामितरेतरम् ॥ ११
निद्रान्धास्ते महाराज परिश्रान्ताश्च संयुगे ।
नाभ्यपद्यन्त समरे कांचिच्चेष्टां महारथाः ॥ १२
त्रियामा रजनी चैषा घोररूपा भयानका ।
सहस्रयामप्रतिमा बभूव प्राणहारिणी ।
वध्यतां च तथा तेषां क्षतानां च विशेषतः ॥ १३
अहो रात्रिः समाजज्ञे निद्रान्धानां विशेषतः ।
सर्वे ह्यासन्निरुत्साहाः क्षत्रिया दीनचेतसः ।
तव चैव परेषां च गतास्त्रा विगतेषवः ॥ १४
ते तथा पारयन्तश्च ह्रीमन्तश्च विशेषतः ।
स्वधर्ममनुपश्यन्तो न जहुः स्वामनीकिनीम् ॥ १५
शस्त्राण्यन्ये समुत्सृज्य निद्रान्धाः शेरते जनाः ।
गजेष्वन्ये रथेष्वन्ये हयेष्वन्ये च भारत ॥ १६
निद्रान्धा नो बुबुधिरे कांचिच्चेष्टां नराधिपाः ।
तेऽन्योन्यं समरे योधाः प्रेषयन्त यमक्षयम् ॥ १७
स्वप्नायमानास्त्वपरे परानिति विचेतसः ।
आत्मानं समरे जघ्नुः स्वानेव च परानपि ॥ १८
नानावाचो विमुञ्चन्तो निद्रान्धास्ते महारणे ।
योद्धव्यमिति तिष्ठन्तो निद्रासंसक्तलोचनाः ॥ १९
संमर्द्यान्ये रणे केचिन्निद्रान्धाश्च परस्परम् ।
जघ्नुः शूरा रणे राजंस्तस्मिंस्तमसि दारुणे ॥ २०
हन्यमानं तथात्मानं परेभ्यो बहवो जनाः ।
नाभ्यजानन्त समरे निद्रया मोहिता भृशम् ॥ २१
तेषामेतादृशीं चेष्टां विज्ञाय पुरुषर्षभः ।
उवाच वाक्यं बीभत्सुरुच्चैः संनादयन्दिशः ॥ २२
श्रान्ता भवन्तो निद्रान्धाः सर्व एव सवाहनाः ।
तमसा चावृते सैन्ये रजसा बहुलेन च ॥ २३
ते यूयं यदि मन्यध्वमुपारमत सैनिकाः ।
निमीलयत चात्रैव रणभूमौ मुहूर्तकम् ॥ २४
ततो विनिद्रा विश्रान्ताश्चन्द्रमस्युदिते पुनः ।
संसाधयिष्यथान्योन्यं स्वर्गाय कुरुपाण्डवाः ॥ २५
तद्वचः सर्वधर्मज्ञा धार्मिकस्य निशम्य ते ।
अरोचयन्त सैन्यानि तथा चान्योन्यमब्रुवन् ॥ २६
चुक्रुशुः कर्ण कर्णेति राजन्दुर्योधनेति च ।
उपारमत पाण्डूनां विरता हि वरूथिनी ॥ २७
तथा विक्रोशमानस्य फल्गुनस्य ततस्ततः ।
उपारमत पाण्डूनां सेना तव च भारत ॥ २८
तामस्य वाचं देवाश्च ऋषयश्च महात्मनः ।
सर्वसैन्यानि चाक्षुद्राः प्रहृष्टाः प्रत्यपूजयन् ॥ २९
तत्संपूज्य वचोऽक्रूरं सर्वसैन्यानि भारत ।
मुहूर्तमस्वपन्राजञ्श्रान्तानि भरतर्षभ ॥ ३०
सा तु संप्राप्य विश्रामं ध्वजिनी तव भारत ।
सुखमाप्तवती वीरमर्जुनं प्रत्यपूजयत् ॥ ३१
त्वयि वेदास्तथास्त्राणि त्वयि बुद्धिपराक्रमौ ।
धर्मस्त्वयि महाबाहो दया भूतेषु चानघ ॥ ३२
यच्चाश्वस्तास्तवेच्छामः शर्म पार्थ तदस्तु ते ।
मनसश्च प्रियानर्थान्वीर क्षिप्रमवाप्नुहि ॥ ३३
इति ते तं नरव्याघ्रं प्रशंसन्तो महारथाः ।

निद्रया समवाक्षिप्तास्तूष्णीमासन्विशां पते ॥ ३४
अश्वपृष्ठेषु चाप्यन्ये रथनीडेषु चापरे ।
गजस्कन्धगताश्चान्ये शेरते चापरे क्षितौ ॥ ३५
सायुधाः सगदाश्चैव सखड्गाः सपरश्वधाः ।
सप्रासकवचाश्चान्ये नराः सुप्ताः पृथक्पृथक् ॥३६
गजास्ते पन्नगाभोगैर्हस्तैर्भूरेणुरूषितैः ।
निद्रान्धा वसुधां चक्रुर्घ्राणनिःश्वासशीतलाम् ॥३७
गजाः शुशुभिरे तत्र निःश्वसन्तो महीतले ।
विशीर्णा गिरयो यद्वन्निःश्वसद्भिर्महोरगैः ॥ ३८
समां च विषमां चक्रुः खुराग्रैर्विक्षतां महीम् ।
हयाः काञ्चनयोक्त्राश्च केसरालम्बिभिर्युगैः ।
सुषुपुस्तत्र राजेन्द्र युक्ता वाहेषु सर्वशः ॥ ३९
तत्तथा निद्रया भग्नमवाचमस्वपद्बलम् ।
कुशलैरिव विन्यस्तं पटे चित्रमिवाद्भुतम् ॥ ४०

ते क्षत्रियाः कुण्डलिनो युवानः
परस्परं सायकविक्षताङ्गाः ।
कुम्भेषु लीनाः सुषुपुर्गजानां
कुचेषु लग्ना इव कामिनीनाम् ॥ ४१

ततः कुमुदनाथेन कामिनीगण्डपाण्डुना ।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलंकृता ॥ ४२
ततो मुहूर्ताद्भगवान्पुरस्ताच्छशलक्षणः ।
अरुणं दर्शयामास ग्रसञ्ज्योतिःप्रभं प्रभुः ॥ ४३
अरुणस्य तु तस्यानु जातरूपसमप्रभम् ।
रश्मिजालं महच्चन्द्रो मन्दं मन्दमवासृजत् ॥ ४४
उत्सारयन्तः प्रभया तमस्ते चन्द्ररश्मयः ।
पर्यगच्छञ्शनैः सर्वा दिशः खं च क्षितिं तथा ॥
ततो मुहूर्ताद्भुवनं ज्योतिर्भूतमिवाभवत् ।
अप्रख्यमप्रकाशं च जगामाशु तमस्तथा ॥ ४६
प्रतिप्रकाशिते लोके दिवाभूते निशाकरे ।
विचेरुर्न विचेरुश्च राजन्नक्तंचरास्ततः ॥ ४७
बोध्यमानं तु तत्सैन्यं राजंश्चन्द्रस्य रश्मिभिः ।
बुबुधे शतपत्राणां वनं महदिवाम्भसि ॥ ४८
यथा चन्द्रोदयोद्धूतः क्षुभितः सागरो भवेत् ।
तथा चन्द्रोदयोद्धूतः स बभूव बलार्णवः ॥ ४९
ततः प्रववृते युद्धं पुनरेव विशां पते ।
लोके लोकविनाशाय परं लोकमभीप्सताम् ॥ ५०

इति श्रीमहाभारते द्रोणपर्वणि
एकोनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥

१६०

संजय उवाच ।

ततो दुर्योधनो द्रोणमभिगम्येदमब्रवीत् ।
अमर्षवशमापन्नो जनयन्हर्षतेजसी ॥ १
न मर्षणीयाः संग्रामे विश्रमन्तः श्रमान्विताः ।
सपत्ना ग्लानमनसो लब्धलक्ष्या विशेषतः ॥ २
तत्तु मर्षितमस्माभिर्भवतः प्रियकाम्यया ।
त एते परिविश्रान्ताः पाण्डवा बलवत्तराः ॥ ३
सर्वथा परिहीनाः स्म तेजसा च बलेन च ।
भवता पाल्यमानास्ते विवर्धन्ते पुनः पुनः ॥ ४
दिव्यान्यस्त्राणि सर्वाणि ब्रह्मास्त्रादीनि यान्यपि ।
तानि सर्वाणि तिष्ठन्ति भवत्येव विशेषतः ॥ ५
न पाण्डवेया न वयं नान्ये लोके धनुर्धराः ।
युध्यमानस्य ते तुल्याः सत्यमेतद्ब्रवीमि ते ॥ ६
ससुरासुरगन्धर्वानिमाँल्लोकान्द्विजोत्तम ।
सर्वास्त्रविद्भवान्हन्याद्दिव्यैरस्त्रैर्न संशयः ॥ ७
स भवान्मर्षयत्येनांस्त्वत्तो भीतान्विशेषतः ।
शिष्यत्वं वा पुरस्कृत्य मम वा मन्दभाग्यताम् ॥ ८
एवमुद्धर्षितो द्रोणः कोपितश्चात्मजेन ते ।
समन्युरब्रवीद्राजन्दुर्योधनमिदं वचः ॥ ९
स्थविरः सन्परं शक्त्या घटे दुर्योधनाहवे ।
अतः परं मया कार्यं क्षुद्रं विजयगृद्धिना ।

अनस्त्रविदयं सर्वो हन्तव्योऽस्त्रविदा जनः ॥ १०
यद्भवान्मन्यते चापि शुभं वा यदि वाशुभम् ।
तद्वै कर्तास्मि कौरव्य वचनात्तव नान्यथा ॥ ११
निहत्य सर्वपाञ्चालान्युद्धे कृत्वा पराक्रमम् ।
विमोक्ष्ये कवचं राजन्सत्येनायुधमालभे ॥ १२
मन्यसे यच्च कौन्तेयमर्जुनं श्रान्तमाहवे ।
तस्य वीर्यं महाबाहो शृणु सत्येन कौरव ॥ १३
तं न देवा न गन्धर्वा न यक्षा न च राक्षसाः ।
उत्सहन्ते रणे सोढुं कुपितं सव्यसाचिनम् ॥ १४
खाण्डवे येन भगवान्प्रत्युद्यातः सुरेश्वरः ।
सायकैर्वारितश्चापि वर्षमाणो महात्मना ॥ १५
यक्षा नागास्तथा दैत्या ये चान्ये बलगर्विताः ।
निहताः पुरुषेन्द्रेण तच्चापि विदितं तव ॥ १६
गन्धर्वा घोषयात्रायां चित्रसेनादयो जिताः ।
यूयं तैर्ह्रियमाणाश्च मोक्षिता दृढधन्वना ॥ १७
निवातकवचाश्चापि देवानां शत्रवस्तथा ।
सुरैरवध्याः संग्रामे तेन वीरेण निर्जिताः ॥ १८
दानवानां सहस्राणि हिरण्यपुरवासिनाम् ।
विजिग्ये पुरुषव्याघ्रः स शक्यो मानुषैः कथम् ॥
प्रत्यक्षं चैव ते सर्वं यथा बलमिदं तव ।
क्षपितं पाण्डुपुत्रेण चेष्टतां नो विशां पते ॥ २०
तं तथाभिप्रशंसन्तमर्जुनं कुपितस्तदा ।
द्रोणं तव सुतो राजन्पुनरेवेदमब्रवीत् ॥ २१
अहं दुःशासनः कर्णः शकुनिर्मातुलश्च मे ।
हनिष्यामोऽर्जुनं संख्ये द्वैधीकृत्याद्य भारतीम् ॥२२
तस्य तद्वचनं श्रुत्वा भारद्वाजो हसन्निव ।
अन्ववर्तत राजानं स्वस्ति तेऽस्त्विति चाब्रवीत् ॥
को हि गाण्डीवधन्वानं ज्वलन्तमिव तेजसा ।
अक्षयं क्षपयेत्कश्चित्क्षत्रियः क्षत्रियर्षभम् ॥ २४
तं न वित्तपतिर्नेन्द्रो न यमो न जलेश्वरः ।
नासुरोरगरक्षांसि क्षपयेयुः सहायुधम् ॥ २५
मूढास्त्वेतानि भाषन्ते यानीमान्यात्थ भारत ।
युद्धे ह्यर्जुनमासाद्य स्वस्तिमान्को व्रजेद्गृहान् ॥ २६
त्वं तु सर्वातिशङ्कित्वान्निष्ठुरः पापनिश्चयः ।
श्रेयसस्त्वद्धिते युक्तांस्तत्तद्वक्तुमिहेच्छसि ॥ २७
गच्छ त्वमपि कौन्तेयमात्मार्थेभ्यो हि माचिरम् ।
त्वमप्याशंससे योद्धुं कुलजः क्षत्रियो ह्यसि ॥ २८
इमान्किं पार्थिवान्सर्वान्घातयिष्यस्यनागसः ।
त्वमस्य मूलं वैरस्य तस्मादासादयार्जुनम् ॥ २९
एष ते मातुलः प्राज्ञः क्षत्रधर्ममनुव्रतः ।
दूर्द्यूतदेवी गान्धारिः प्रयात्वर्जुनमाहवे ॥ ३०
एषोऽक्षकुशलो जिह्मो द्यूतकृत्कितवः शठः ।
देविता निकृतिप्रज्ञो युधि जेष्यति पाण्डवान् ॥३१
त्वया कथितमत्यन्तं कर्णेन सह हृष्टवत् ।
असकृच्छून्यवन्मोहाद्धृतराष्ट्रस्य शृण्वतः ॥ ३२
अहं च तात कर्णश्च भ्राता दुःशासनश्च मे ।
पाण्डुपुत्रान्हनिष्यामः सहिताः समरे त्रयः ॥ ३३
इति ते कत्थमानस्य श्रुतं संसदि संसदि ।
अनुतिष्ठ प्रतिज्ञां तां सत्यवाग्भव तैः सह ॥ ३४
एष ते पाण्डवः शत्रुरविषह्योऽग्रतः स्थितः ।
क्षत्रधर्ममवेक्षस्व श्लाघ्यस्तव वधो जयात् ॥ ३५
दत्तं भुक्तमधीतं च प्राप्तमैश्वर्यमीप्सितम् ।
कृतकृत्योऽनृणश्चासि मा भैर्युध्यस्व पाण्डवम् ॥३६
इत्युक्त्वा समरे द्रोणो न्यवर्तत यतः परे ।
द्वैधीकृत्य ततः सेनां युद्धं समभवत्तदा ॥ ३७

इति श्रीमहाभारते द्रोणपर्वणि
षष्ट्यधिकशततमोऽध्यायः ॥ १६० ॥

१६१

संजय उवाच ।

त्रिभागमात्रशेषायां रात्र्यां युद्धमवर्तत ।

कुरूणां पाण्डवानां च संहृष्टानां विशां पते ॥ १
अथ चन्द्रप्रभां मुष्णन्नादित्यस्य पुरःसरः ।
अरुणोऽभ्युदयांचक्रे ताम्रीकुर्वन्निवाम्बरम् ॥ २
ततो द्वैधीकृते सैन्ये द्रोणः सोमकपाण्डवान् ।
अभ्यद्रवत्सपाञ्चालान्दुर्योधनपुरोगमः ॥ ३
द्वैधीभूतान्कुरून्दृष्ट्वा माधवोऽर्जुनमब्रवीत् ।
सपत्नान्सव्यतः कुर्मि सव्यसाचिन्निमान्कुरून् ॥४
स माधवमनुज्ञाय कुरुष्वेति धनंजयः ।
द्रोणकर्णौ महेष्वासौ सव्यतः पर्यवर्तत ॥ ५
अभिप्रायं तु कृष्णस्य ज्ञात्वा परपुरंजयः ।
आजिशीर्षगतं दृष्ट्वा भीमसेनं समासदत् ॥ ६

भीम उवाच ।

अर्जुनार्जुन बीभत्सो शृणु मे तत्त्वतो वचः ।
यदर्थं क्षत्रिया सूते तस्य कालोऽयमागतः ॥ ७
अस्मिंश्चेदागते काले श्रेयो न प्रतिपत्स्यसे ।
असंभावितरूपः सन्नानृशंस्यं करिष्यसि ॥ ८
सत्यश्रीधर्मयशसां वीर्येणानृण्यमाप्नुहि ।
भिन्ध्यनीकं युधां श्रेष्ठ सव्यसाचिन्निमान्कुरु ॥ ९

संजय उवाच ।

स सव्यसाची भीमेन चोदितः केशवेन च ।
कर्णद्रोणावतिक्रम्य समन्तात्पर्यवारयत् ॥ १०
तमाजिशीर्षमायान्तं दहन्तं क्षत्रियर्षभान् ।
पराक्रान्तं पराक्रम्य यतन्तः क्षत्रियर्षभाः ।
नाशक्नुवन्वारयितुं वर्धमानमिवानलम् ॥ ११
अथ दुर्योधनः कर्णः शकुनिश्चापि सौबलः ।
अभ्यवर्षञ्शरव्रातैः कुन्तीपुत्रं धनंजयम् ॥ १२
तेषामस्त्राणि सर्वेषामुत्तमास्त्रविदां वरः ।
कदर्थीकृत्य राजेन्द्र शरवर्षैरवाकिरत् ॥ १३
अस्त्रैरस्त्राणि संवार्य लघुहस्तो धनंजयः ।
सर्वानविध्यन्निशितैर्दशभिर्दशभिः शरैः ॥ १४
उद्धूता रजसो वृष्टिः शरवृष्टिस्तथैव च ।
तमश्च घोरं शब्दश्च तदा समभवन्महान् ॥ १५
न द्यौर्न भूमिर्न दिशः प्राज्ञायन्त तथा गते ।
सैन्येन रजसा मूढं सर्वमन्धमिवाभवत् ॥ १६
नैव ते न वयं राजन्प्रज्ञासिष्म परस्परम् ।
उद्देशेन हि तेन स्म समयुध्यन्त पार्थिवाः ॥ १७
विरथा रथिनो राजन्समासाद्य परस्परम् ।
केशेषु समसज्जन्त कवचेषु भुजेषु च ॥ १८
हताश्वा हतसूताश्च निश्चेष्टा रथिनस्तदा ।
जीवन्त इव तत्र स्म व्यदृश्यन्त भयार्दिताः ॥ १९
हतान्गजान्समाश्लिष्य पर्वतानिव वाजिनः ।
गतसत्त्वा व्यदृश्यन्त तथैव सह सादिभिः ॥ २०
ततस्त्वभ्यवसृत्यैव संग्रामादुत्तरां दिशम् ।
अतिष्ठदाहवे द्रोणो विधूम इव पावकः ॥ २१
तमाजिशीर्षादेकान्तमपक्रान्तं निशाम्य तु ।
समकम्पन्त सैन्यानि पाण्डवानां विशां पते ॥ २२
भ्राजमानं श्रिया युक्तं ज्वलन्तमिव तेजसा ।
द्रोणं दृष्ट्वारयस्त्रेसुश्चेलुर्मम्लुश्च मारिष ॥ २३
आह्वयन्तं परानीकं प्रभिन्नमिव वारणम् ।
नैनं शशंसिरे जेतुं दानवा वासवं यथा ॥ २४
केचिदासन्निरुत्साहाः केचित्क्रुद्धा मनस्विनः ।
विस्मिताश्चाभवन्केचित्केचिदासन्नमर्षिताः ॥ २५
हस्तैर्हस्ताग्रमपरे प्रत्यपिंषन्नराधिपाः ।
अपरे दशनैरोष्ठानदशन्क्रोधमूर्छिताः ॥ २६
व्याक्षिपन्नायुधानन्ये ममृदुश्चापरे भुजान् ।
अन्ये चान्वपतन्द्रोणं त्यक्तात्मानो महौजसः ॥२७
पाञ्चालास्तु विशेषेण द्रोणसायकपीडिताः ।
समसज्जन्त राजेन्द्र समरे भृशवेदनाः ॥ २८
ततो विराटद्रुपदौ द्रोणं प्रतिययू रणे ।
तथा चरन्तं संग्रामे भृशं समरदुर्जयम् ॥ २९

द्रुपदस्य ततः पौत्रास्त्रय एव विशां पते ।
चेदयश्च महेष्वासा द्रोणमेवाभ्ययुर्युधि ॥ ३०
तेषां द्रुपदपौत्राणां त्रयाणां निशितैः शरैः ।
त्रिभिर्द्रोणोऽहरत्प्राणांस्ते हता न्यपतन्भुवि ॥ ३१
ततो द्रोणोऽजयद्युद्धे चेदिकेकयसृञ्जयान् ।
मत्स्यांश्चैवाजयत्सर्वान्भारद्वाजो महारथः ॥ ३२
ततस्तु द्रुपदः क्रोधाच्छरवर्षमवाकिरत् ।
द्रोणं प्रति महाराज विराटश्चैव संयुगे ॥ ३३
ततो द्रोणः सुपीताभ्यां भल्लाभ्यामरिमर्दनः ।
द्रुपदं च विराटं च प्रैषीद्वैवस्वतक्षयम् ॥ ३४
हते विराटे द्रुपदे केकयेषु तथैव च ।
तथैव चेदिमत्स्येषु पाञ्चालेषु तथैव च ।
हतेषु त्रिषु वीरेषु द्रुपदस्य च नप्तृषु ॥ ३५
द्रोणस्य कर्म तद्दृष्ट्वा कोपदुःखसमन्वितः ।
शशाप रथिनां मध्ये धृष्टद्युम्नो महामनाः ॥ ३६
इष्टापूर्तात्तथा क्षात्राद्ब्राह्मण्याच्च स नश्यतु ।
द्रोणो यस्याद्य मुच्येत यो वा द्रोणात्पराङ्मुखः॥३७
इति तेषां प्रतिश्रुत्य मध्ये सर्वधनुष्मताम् ।
आयाद्द्रोणं सहानीकः पाञ्चाल्यः परवीरहा ।
पाञ्चालास्त्वेकतो द्रोणमभ्यघ्नन्पाण्डवान्यतः ॥ ३८
दुर्योधनश्च कर्णश्च शकुनिश्चापि सौबलः ।
सोदर्याश्च यथा मुख्यास्तेऽरक्षन्द्रोणमाहवे ॥ ३९
रक्ष्यमाणं तथा द्रोणं समरे तैर्महात्मभिः ।
यतमानापि पाञ्चाला न शेकुः प्रतिवीक्षितुम् ॥४०
तत्राक्रुध्यद्भीमसेनो धृष्टद्युम्नस्य मारिष ।
स एनं वाग्भिरुग्राभिस्ततक्ष पुरुषर्षभ ॥ ४१
द्रुपदस्य कुले जातः सर्वास्त्रेष्वस्त्रवित्तमः ।
कः क्षत्रियो मन्यमानः प्रेक्षेतारिमवस्थितम् ॥ ४२
पितृपुत्रवधं प्राप्य पुमान्कः परिहापयेत् ।
विशेषतस्तु शपथं शपित्वा राजसंसदि ॥ ४३
एष वैश्वानर इव समिद्धः स्वेन तेजसा ।
शरचापेन्धनो द्रोणः क्षत्रं दहति तेजसा ॥ ४४
पुरा करोति निःशेषां पाण्डवानामनीकिनीम् ।
स्थिताः पश्यत मे कर्म द्रोणमेव व्रजाम्यहम् ॥४५
इत्युक्त्वा प्राविशत्क्रुद्धो द्रोणानीकं वृकोदरः ।
दृढैः पूर्णायतोत्सृष्टैर्द्रावयंस्तव वाहिनीम् ॥ ४६
धृष्टद्युम्नोऽपि पाञ्चाल्यः प्रविश्य महतीं चमूम् ।
आससाद रणे द्रोणं तदासीत्तुमुलं महत् ॥ ४७
नैव नस्तादृशं युद्धं दृष्टपूर्वं न च श्रुतम् ।
यथा सूर्योदये राजन्समुत्पिञ्जोऽभवन्महान् ॥ ४८
संसक्तानि व्यदृश्यन्त रथवृन्दानि मारिष ।
हतानि च विकीर्णानि शरीराणि शरीरिणाम् ॥४९
केचिदन्यत्र गच्छन्तः पथि चान्यैरुपद्रुताः ।
विमुखाः पृष्ठतश्चान्ये ताड्यन्ते पार्श्वतोऽपरे ॥५०
तथा संसक्तयुद्धं तदभवद्भृशदारुणम् ।
अथ संध्यागतः सूर्यः क्षणेन समपद्यत ॥ ५१

इति श्रीमहाभारते द्रोणपर्वणि
एकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥

१६२

संजय उवाच ।

ते तथैव महाराज दंशिता रणमूर्धनि ।
संध्यागतं सहस्रांशुमादित्यमुपतस्थिरे ॥ १
उदिते तु सहस्रांशौ तप्तकाञ्चनसप्रभे ।
प्रकाशितेषु लोकेषु पुनर्युद्धमवर्तत ॥ २
द्वंद्वानि यानि तत्रासन्संसक्तानि पुरोदयात् ।
तान्येवाभ्युदिते सूर्ये समसज्जन्त भारत ॥ ३
रथैर्हया हयैर्नागाः पादाताश्चापि कुञ्जरैः ।
हया हयैः समाजग्मुः पादाताश्च पदातिभिः ।
संसक्ताश्च वियुक्ताश्च योधाः संन्यपतन्रणे ॥ ४
ते रात्रौ कृतकर्माणः श्रान्ताः सूर्यस्य तेजसा ।

क्षुत्पिपासापरीताङ्गा विसंज्ञा बहवोऽभवन् ॥ ५
शङ्खभेरीमृदङ्गानां कुञ्जराणां च गर्जताम् ।
विस्फारितविकृष्टानां कार्मुकाणां च कूजताम् ॥ ६
शब्दः समभवद्राजन्दिविस्पृग्भरतर्षभ ।
द्रवतां च पदातीनां शस्त्राणां विनिपात्यताम् ॥ ७
हयानां हेषतां चैव रथानां च निवर्तताम् ।
क्रोशतां गर्जतां चैव तदासीत्तुमुलं महत् ॥ ८
विवृद्धस्तुमुलः शब्दो द्यामगच्छन्महास्वनः ।
नानायुधनिकृत्तानां चेष्टतामातुरः स्वनः ॥ ९
भूमावश्रूयत महांस्तदासीत्कृपणं महत् ।
पततां पतितानां च पत्त्यश्वरथहस्तिनाम् ॥ १०
तेषु सर्वेष्वनीकेषु व्यतिषक्तेष्वनेकशः ।
स्वे स्वाञ्जघ्नुः परे स्वांश्च स्वे परांश्च परान्परे ॥११
वीरबाहुविसृष्टाश्च योधेषु च गजेषु च ।
असयः प्रत्यदृश्यन्त वाससां नेजनेष्विव ॥ १२
उद्यतप्रतिपिष्टानां खड्गानां वीरबाहुभिः ।
स एव शब्दस्तद्रूपो वाससां निज्यतामिव ॥ १३
अर्धासिभिस्तथा खड्गैस्तोमरैः सपरश्वधैः ।
निकृष्टयुद्धं संसक्तं महदासीत्सुदारुणम् ॥ १४
गजाश्वकायप्रभवां नरदेहप्रवाहिनीम् ।
शस्त्रमत्स्यसुसंपूर्णां मांसशोणितकर्दमाम् ॥ १५
आर्तनादस्वनवतीं पताकावस्त्रफेनिलाम् ।
नदीं प्रावर्तयन्वीराः परलोकप्रवाहिनीम् ॥ १६
शरशक्त्यर्दिताः क्लान्ता रात्रिमूढाल्पचेतसः ।
विष्टभ्य सर्वगात्राणि व्यतिष्ठन्गजवाजिनः ।
संशुष्कवदना वीराः शिरोभिश्चारुकुण्डलैः ॥ १७
युद्धोपकरणैश्चान्यैस्तत्र तत्र प्रकाशितैः ।
क्रव्यादसंघैराकीर्णं मृतैरर्धमृतैरपि ।
नासीद्रथपथस्तत्र सर्वमायोधनं प्रति ॥ १८
मज्जत्सु चक्रेषु रथान्सत्त्वमास्थाय वाजिनः ।
कथंचिदवहञ्श्रान्ता वेपमानाः शरार्दिताः ।
कुलसत्त्वबलोपेता वाजिनो वारणोपमाः ॥ १९
विह्वलं तत्समुद्भ्रान्तं सभयं भारतातुरम् ।
बलमासीत्तदा सर्वमृते द्रोणार्जुनावुभौ ॥ २०
तावेवास्तां निलयनं तावार्तायनमेव च ।
तावेवान्ये समासाद्य जग्मुर्वैवस्वतक्षयम् ॥ २१
आविग्नमभवत्सर्वं कौरवाणां महद्बलम् ।
पाञ्चालानां च संसक्तं न प्राज्ञायत किंचन ॥ २२
अन्तकाक्रीडसदृशे भीरूणां भयवर्धने ।
पृथिव्यां राजवंशानामुत्थिते महति क्षये ॥ २३
न तत्र कर्णं न द्रोणं नार्जुनं न युधिष्ठिरम् ।
न भीमसेनं न यमौ न पाञ्चाल्यं न सात्यकिम् ॥
न च दुःशासनं द्रौणिं न दुर्योधनसौबलौ ।
न कृपं मद्रराजं वा कृतवर्माणमेव च ॥ २५
न चान्यान्नैव चात्मानं न क्षितिं न दिशस्तथा ।
पश्याम राजन्संसक्तान्सैन्येन रजसावृतान् ॥ २६
संभ्रान्ते तुमुले घोरे रजोमेघे समुत्थिते ।
द्वितीयामिव संप्राप्ताममन्यन्त निशां तदा ॥ २७
न ज्ञायन्ते कौरवेया न पाञ्चाला न पाण्डवाः ।
न दिशो न दिवं नोर्वीं न समं विषमं तथा ॥२८
हस्तसंस्पर्शमापन्नान्परान्वाप्यथ वा स्वकान् ।
न्यपातयंस्तदा युद्धे नराः स्म विजयैषिणः ॥ २९
उद्धूतत्वात्तु रजसः प्रसेकाच्छोणितस्य च ।
प्रशशाम रजो भौमं शीघ्रत्वादनिलस्य च ॥ ३०
तत्र नागा हया योधा रथिनोऽथ पदातयः ।
पारिजातवनानीव व्यरोचन्रुधिरोक्षिताः ॥ ३१
ततो दुर्योधनः कर्णो द्रोणो दुःशासनस्तथा ।
पाण्डवैः समसज्जन्त चतुर्भिश्चतुरो रथाः ॥ ३२
दुर्योधनः सह भ्रात्रा यमाभ्यां समसज्जत ।
वृकोदरेण राधेयो भारद्वाजेन चार्जुनः ॥ ३३

तद्घोरं महदाश्चर्यं सर्वे प्रैक्षन्समन्ततः ।
रथर्षभाणामुग्राणां संनिपातममानुषम् ॥ ३४
रथमार्गैर्विचित्रैश्च विचित्ररथसंकुलम् ।
अपश्यन्रथिनो युद्धं विचित्रं चित्रयोधिनाम् ॥३५
यतमानाः पराक्रान्ताः परस्परजिगीषवः ।
जीमूता इव घर्मान्ते शरवर्षैरवाकिरन् ॥ ३६
ते रथान्सूर्यसंकाशानास्थिताः पुरुषर्षभाः ।
अशोभन्त यथा मेघाः शारदाः समुपस्थिताः ॥३७
स्पर्धिनस्ते महेष्वासाः कृतयत्ना धनुर्धराः ।
अभ्यगच्छंस्तथान्योन्यं मत्ता गजवृषा इव ॥ ३८
न नूनं देहभेदोऽस्ति काले तस्मिन्समागते ।
यत्र सर्वे न युगपद्व्यशीर्यन्त महारथाः ॥ ३९
बाहुभिश्चरणैश्छिन्नैः शिरोभिश्चारुकुण्डलैः ।
कार्मुकैर्विशिखैः प्रासैः खड्गैः परशुपट्टिशैः ॥ ४०
नालीकक्षुरनाराचैर्नखरैः शक्तितोमरैः ।
अन्यैश्च विविधाकारैर्धौतैः प्रहरणोत्तमैः ॥ ४१
चित्रैश्च विविधाकारैः शरीरावरणैरपि ।
विचित्रैश्च रथैर्भग्नैर्हतैश्च गजवाजिभिः ॥ ४२
शून्यैश्च नगराकारैर्हतयोधध्वजै रथैः ।
अमनुष्यैर्हयैस्त्रस्तैः कृष्यमाणैस्ततस्ततः ॥ ४३
वातायमानैरसकृद्धतवीरैरलंकृतैः ।
व्यजनैः कङ्कटैश्चैव ध्वजैश्च विनिपातितैः ॥ ४४
छत्रैराभरणैर्वस्त्रैर्माल्यैश्च सुसुगन्धिभिः ।
हारैः किरीटैर्मुकुटैरुष्णीषैः किङ्किणीगणैः ॥ ४५
उरस्यैर्मणिभिर्निष्कैश्चूडामणिभिरेव च ।
आसीदायोधनं तत्र नभस्तारागणैरिव ॥ ४६
ततो दुर्योधनस्यासीन्नकुलेन समागमः ।
अमर्षितेन क्रुद्धस्य क्रुद्धेनामर्षितस्य च ॥ ४७
अपसव्यं चकाराथ माद्रीपुत्रस्तवात्मजम् ।
किरञ्शरशतैर्हृष्टस्तत्र नादो महानभूत् ॥ ४८
अपसव्यं कृतः संख्ये भ्रातृव्येनात्यमर्षिणा ।
सोऽमर्षितस्तमप्याजौ प्रतिचक्रेऽपसव्यतः ॥ ४९
ततः प्रतिचिकीर्षन्तमपसव्यं तु ते सुतम् ।
न्यवारयत तेजस्वी नकुलश्चित्रमार्गवित् ॥ ५०
सर्वतो विनिवार्यैनं शरजालेन पीडयन् ।
विमुखं नकुलश्चक्रे तत्सैन्याः समपूजयन् ॥ ५१
तिष्ठ तिष्ठेति नकुलो बभाषे तनयं तव ।
संस्मृत्य सर्वदुःखानि तव दुर्मन्त्रितेन च ॥ ५२

इति श्रीमहाभारते द्रोणपर्वणि
द्विषष्ट्यधिकशततमोऽध्यायः ॥ १६२ ॥

१६३

संजय उवाच ।

ततो दुःशासनः क्रुद्धः सहदेवमुपाद्रवत् ।
रथवेगेन तीव्रेण कम्पयन्निव मेदिनीम् ॥ १
तस्यापतत एवाशु भल्लेनामित्रकर्शनः ।
माद्रीसुतः शिरो यन्तुः सशिरस्त्राणमच्छिनत् ॥ २
नैनं दुःशासनः सूतं नापि कश्चन सैनिकः ।
हृतोत्तमाङ्गमाशुत्वात्सहदेवेन बुद्धवान् ॥ ३
यदा त्वसंगृहीतत्वात्प्रयान्त्यश्वा यथासुखम् ।
ततो दुःशासनः सूतं बुद्धवान्गतचेतसम् ॥ ४
स हयान्संनिगृह्याजौ स्वयं हयविशारदः ।
युयुधे रथिनां श्रेष्ठश्चित्रं लघु च सुष्ठु च ॥ ५
तदस्यापूजयन्कर्म स्वे परे चैव संयुगे ।
हतसूतरथेनाजौ व्यचरद्यदभीतवत् ॥ ६
सहदेवस्तु तानश्वांस्तीक्ष्णैर्बाणैरवाकिरत् ।
पीड्यमानाः शरैश्चाशु प्राद्रवंस्ते ततस्ततः ॥ ७
स रश्मिषु विषक्तत्वादुत्ससर्ज शरासनम् ।
धनुषा कर्म कुर्वंस्तु रश्मीन्स पुनरुत्सृजत् ॥ ८
छिद्रेषु तेषु तं बाणैर्माद्रीपुत्रोऽभ्यवाकिरत् ।
परीप्संस्त्वत्सुतं कर्णस्तदन्तरमवापतत् ॥ ९

वृकोदरस्ततः कर्णं त्रिभिर्भल्लैः समाहितैः ।
आकर्णपूर्णैरभ्यघ्नन्बाह्वोरुरसि चानदत् ॥ १०
संन्यवर्तत तं कर्णः संघट्टित इवोरगः ।
तदभूत्तुमुलं युद्धं भीमराधेययोस्तदा ॥ ११
तौ वृषाविव संक्रुद्धौ विवृत्तनयनावुभौ ।
वेगेन महतान्योन्यं संरब्धावभिपेततुः ॥ १२
अभिसंश्लिष्टयोस्तत्र तयोराहवशौण्डयोः ।
अभिन्नशरपातत्वाद्गदायुद्धमवर्तत ॥ १३
गदया भीमसेनस्तु कर्णस्य रथकूबरम् ।
बिभेदाशु तदा राजंस्तदद्भुतमिवाभवत् ॥ १४
ततो भीमस्य राधेयो गदामादाय वीर्यवान् ।
अवासृजद्रथे तां तु बिभेद गदया गदाम् ॥ १५
ततो भीमः पुनर्गुर्वीं चिक्षेपाधिरथेर्गदाम् ।
तां शरैर्दशभिः कर्णः सुपुङ्खैः सुसमाहितैः ।
प्रत्यविध्यत्पुनश्चान्यैः सा भीमं पुनराव्रजत् ॥ १६
तस्याः प्रतिनिपातेन भीमस्य विपुलो ध्वजः ।
पपात सारथिश्चास्य मुमोह गदया हतः ॥ १७
स कर्णे सायकानष्टौ व्यसृजत्क्रोधमूर्छितः ।
ध्वजे शरासने चैव शरावापे च भारत ॥ १८
ततः पुनस्तु राधेयो हयानस्य रथेषुभिः ।
ऋष्यवर्णाञ्जघानाशु तथोभौ पार्ष्णिसारथी ॥ १९
स विपन्नरथो भीमो नकुलस्याप्लुतो रथम् ।
हरिर्यथा गिरेः शृङ्गं समाक्रामदरिंदमः ॥ २०
तथा द्रोणार्जुनौ चित्रमयुध्येतां महारथौ ।
आचार्यशिष्यौ राजेन्द्र कृतप्रहरणौ युधि ॥ २१
लघुसंधानयोगाभ्यां रथयोश्च रणेन च ।
मोहयन्तौ मनुष्याणां चक्षूंषि च मनांसि च ॥२२
उपारमन्त ते सर्वे योधास्माकं परे तथा ।
अदृष्टपूर्वं पश्यन्तस्तद्युद्धं गुरुशिष्ययोः ॥ २३
विचित्रान्पृतनामध्ये रथमार्गानुदीर्यतः ।
अन्योन्यमपसव्यं च कर्तुं वीरौ तदैषतुः ।
पराक्रमं तयोर्योधा ददृशुस्तं सुविस्मिताः ॥ २४
तयोः समभवद्युद्धं द्रोणपाण्डवयोर्महत् ।
आमिषार्थं महाराज गगने श्येनयोरिव ॥ २५
यद्यच्चकार द्रोणस्तु कुन्तीपुत्रजिगीषया ।
तत्तत्प्रतिजघानाशु प्रहसंस्तस्य पाण्डवः ॥ २६
यदा द्रोणो न शक्नोति पाण्डवस्य विशेषणे ।
ततः प्रादुश्चकारास्त्रमस्त्रमार्गविशारदः ॥ २७
ऐन्द्रं पाशुपतं त्वाष्ट्रं वायव्यमथ वारुणम् ।
मुक्तं मुक्तं द्रोणचापात्तज्जघान धनंजयः ॥ २८
अस्त्राण्यस्त्रैर्यदा तस्य विधिवद्धन्ति पाण्डवः ।
ततोऽस्त्रैः परमैर्दिव्यैर्द्रोणः पार्थमवाकिरत् ॥ २९
यद्यदस्त्रं स पार्थाय प्रयुङ्क्ते विजिगीषया ।
तस्यास्त्रस्य विघातार्थं तत्तत्स कुरुतेऽर्जुनः ॥ ३०
स वध्यमानेष्वस्त्रेषु दिव्येष्वपि यथाविधि ।
अर्जुनेनार्जुनं द्रोणो मनसैवाभ्यपूजयत् ॥ ३१
मेने चात्मानमधिकं पृथिव्यामपि भारत ।
तेन शिष्येण सर्वेभ्यः शस्त्रविद्भ्यः समन्ततः ॥३२
वार्यमाणस्तु पार्थेन तथा मध्ये महात्मनाम् ।
यतमानोऽर्जुनं प्रीत्या प्रत्यवारयदुत्स्मयन् ॥ ३३
ततोऽन्तरिक्षे देवाश्च गन्धर्वाश्च सहस्रशः ।
ऋषयः सिद्धसंघाश्च व्यतिष्ठन्त दिदृक्षया ॥ ३४
तदप्सरोभिराकीर्णं यक्षराक्षससंकुलम् ।
श्रीमदाकाशमभवद्भूयो मेघाकुलं यथा ॥ ३५
तत्र स्मान्तर्हिता वाचो व्यचरन्त पुनः पुनः ।
द्रोणस्य स्तवसंयुक्ताः पार्थस्य च महात्मनः ।
विसृज्यमानेष्वस्त्रेषु ज्वालयत्सु दिशो दश ॥ ३६
नैवेदं मानुषं युद्धं नासुरं न च राक्षसम् ।
न दैवं न च गान्धर्वं ब्राह्मं ध्रुवमिदं परम् ।
विचित्रमिदमाश्चर्यं न नो दृष्टं न च श्रुतम् ॥ ३७

अति पाण्डवमाचार्यो द्रोणं चाप्यति पाण्डवः ।
नानयोरन्तरं द्रष्टुं शक्यमस्त्रेण केनचित् ॥ ३८
यदि रुद्रो द्विधाकृत्य युध्येतात्मानमात्मना ।
तत्र शक्योपमा कर्तुमन्यत्र तु न विद्यते ॥ ३९
ज्ञानमेकस्थमाचार्ये ज्ञानं योगश्च पाण्डवे ।
शौर्यमेकस्थमाचार्ये बलं शौर्यं च पाण्डवे ॥ ४०
नेमौ शक्यौ महेष्वासौ रणे क्षेपयितुं परैः ।
इच्छमानौ पुनरिमौ हन्येतां सामरं जगत् ॥ ४१
इत्यब्रुवन्महाराज दृष्ट्वा तौ पुरुषर्षभौ ।
अन्तर्हितानि भूतानि प्रकाशानि च संघशः ॥ ४२
ततो द्रोणो ब्राह्ममस्त्रं प्रादुश्चक्रे महामतिः ।
संतापयन्रणे पार्थं भूतान्यन्तर्हितानि च ॥ ४३
ततश्चचाल पृथिवी सपर्वतवनद्रुमा ।
ववौ च विषमो वायुः सागराश्चापि चुक्षुभुः ॥ ४४
ततस्त्रासो महानासीत्कुरुपाण्डवसेनयोः ।
सर्वेषां चैव भूतानामुद्यतेऽस्त्रे महात्मना ॥ ४५
ततः पार्थोऽप्यसंभ्रान्तस्तदस्त्रं प्रतिजघ्निवान् ।
ब्रह्मास्त्रेणैव राजेन्द्र ततः सर्वमशीशमत् ॥ ४६
यदा न गम्यते पारं तयोरन्यतरस्य वा ।
ततः संकुलयुद्धेन तद्युद्धं व्याकुलीकृतम् ॥ ४७
नाज्ञायत ततः किंचित्पुनरेव विशां पते ।
प्रवृत्ते तुमुले युद्धे द्रोणपाण्डवयोर्मृधे ॥ ४८
शरजालैः समाकीर्णे मेघजालैरिवाम्बरे ।
न स्म संपतते कश्चिदन्तरिक्षचरस्तदा ॥ ४९

इति श्रीमहाभारते द्रोणपर्वणि
त्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥

१६४

संजय उवाच ।

तस्मिंस्तथा वर्तमाने नराश्वगजसंक्षये ।
दुःशासनो महाराज धृष्टद्युम्नमयोधयत् ॥ १
स तु रुक्मरथासक्तो दुःशासनशरार्दितः ।
अमर्षात्तव पुत्रस्य शरैर्वाहानवाकिरत् ॥ २
क्षणेन स रथस्तस्य सध्वजः सहसारथिः ।
नादृश्यत महाराज पार्षतस्य शरैश्चितः ॥ ३
दुःशासनस्तु राजेन्द्र पाञ्चाल्यस्य महात्मनः ।
नाशकत्प्रमुखे स्थातुं शरजालप्रपीडितः ॥ ४
स तु दुःशासनं बाणैर्विमुखीकृत्य पार्षतः ।
किरञ्शरसहस्राणि द्रोणमेवाभ्ययाद्रणे ॥ ५
प्रत्यपद्यत हार्दिक्यः कृतवर्मा तदन्तरम् ।
सोदर्याणां त्रयश्चैव त एनं पर्यवारयन् ॥ ६
तं यमौ पृष्ठतोऽन्वैतां रक्षन्तौ पुरुषर्षभौ ।
द्रोणायाभिमुखं यान्तं दीप्यमानमिवानलम् ॥ ७
संप्रहारमकुर्वंस्ते सर्वे सप्त महारथाः ।
अमर्षिताः सत्त्ववन्तः कृत्वा मरणमग्रतः ॥ ८
शुद्धात्मानः शुद्धवृत्ता राजन्स्वर्गपुरस्कृताः ।
आर्यं युद्धमकुर्वन्त परस्परजिगीषवः ॥ ९
शुक्लाभिजनकर्माणो मतिमन्तो जनाधिपाः ।
धर्मयुद्धमयुध्यन्त प्रेक्षन्तो गतिमुत्तमाम् ॥ १०
न तत्रासीदधर्मिष्ठमशस्त्रं युद्धमेव च ।
नात्र कर्णी न नालीको न लिप्तो न च वस्तकः ॥
न सूची कपिशो नात्र न गवास्थिर्गजास्थिकः ।
इषुरासीन्न संश्लिष्टो न पूतिर्न च जिह्मगः ॥ १२
ऋजून्येव विशुद्धानि सर्वे शस्त्राण्यधारयन् ।
सुयुद्धेन परांल्लोकानीप्सन्तः कीर्तिमेव च ॥ १३
तदासीत्तुमुलं युद्धं सर्वदोषविवर्जितम् ।
चतुर्णां तव योधानां तैस्त्रिभिः पाण्डवैः सह ॥१४
धृष्टद्युम्नस्तु तान्हित्वा तव राजन्रथर्षभान् ।
यमाभ्यां वारितान्दृष्ट्वा शीघ्रास्त्रो द्रोणमभ्ययात् ॥
निवारितास्तु ते वीरास्तयोः पुरुषसिंहयोः ।
समसज्जन्त चत्वारो वाताः पर्वतयोरिव ॥ १६

द्वाभ्यां द्वाभ्यां यमौ सार्धं रथाभ्यां रथपुंगवौ ।
समासक्तौ ततो द्रोणं धृष्टद्युम्नोऽभ्यवर्तत ॥ १७
दृष्ट्वा द्रोणाय पाञ्चाल्यं व्रजन्तं युद्धदुर्मदम् ।
यमाभ्यां तांश्च संसक्तांस्तदन्तरमुपाद्रवत् ॥ १८
दुर्योधनो महाराज किरञ्शोणितभोजनान् ।
तं सात्यकिः शीघ्रतरं पुनरेवाभ्यवर्तत ॥ १९
तौ परस्परमासाद्य समीपे कुरुमाधवौ ।
हसमानौ नृशार्दूलावभीतौ समगच्छताम् ॥ २०
बाल्ये वृत्तानि सर्वाणि प्रीयमाणौ विचिन्त्य तौ ।
अन्योन्यं प्रेक्षमाणौ च हसमानौ पुनः पुनः ॥२१
अथ दुर्योधनो राजा सात्यकिं प्रत्यभाषत ।
प्रियं सखायं सततं गर्हयन्वृत्तमात्मनः ॥ २२
धिक्क्रोधं धिक्सखे लोभं धिङ्मोहं धिगमर्षितम् ।
धिगस्तु क्षात्रमाचारं धिगस्तु बलमौरसम् ॥ २३
यत्त्वं मामभिसंधत्से त्वां चाहं शिनिपुंगव ।
त्वं हि प्राणैः प्रियतरो ममाहं च सदा तव ॥ २४
स्मरामि तानि सर्वाणि बाल्ये वृत्तानि यानि नौ ।
तानि सर्वाणि जीर्णानि सांप्रतं नौ रणाजिरे ।
किमन्यत्क्रोधलोभाभ्यां युध्यामि त्वाद्य सात्वत ॥
तं तथावादिनं राजन्सात्यकिः प्रत्यभाषत ।
प्रहसन्विशिखांस्तीक्ष्णानुद्यम्य परमास्त्रवित् ॥ २६
नेयं सभा राजपुत्र न चाचार्यनिवेशनम् ।
यत्र क्रीडितमस्माभिस्तदा राजन्समागतैः ॥ २७

दुर्योधन उवाच ।

क्व सा क्रीडा गतास्माकं बाल्ये वै शिनिपुंगव ।
क्व च युद्धमिदं भूयः कालो हि दुरतिक्रमः ॥ २८
किं नु नो विद्यते कृत्यं धनेन धनलिप्सया ।
यत्र युध्यामहे सर्वे धनलोभात्समागताः ॥ २९

संजय उवाच ।

तं तथावादिनं तत्र राजानं माधवोऽब्रवीत् ।
एवंवृत्तं सदा क्षत्रं यद्धन्तीह गुरूनपि ॥ ३०
यदि तेऽहं प्रियो राजञ्जहि मां मा चिरं कृथाः ।
त्वत्कृते सुकृताँल्लोकान्गच्छेयं भरतर्षभ ॥ ३१
या ते शक्तिर्बलं चैव तत्क्षिप्रं मयि दर्शय ।
नेच्छाम्येतदहं द्रष्टुं मित्राणां व्यसनं महत् ॥ ३२
इत्येवं व्यक्तमाभाष्य प्रतिभाष्य च सात्यकिः ।
अभ्ययात्तूर्णमव्यग्रो निरपेक्षो विशां पते ॥ ३३
तमायान्तमभिप्रेक्ष्य प्रत्यगृह्णात्तवात्मजः ।
शरैश्चावाकिरद्राजञ्शैनेयं तनयस्तव ॥ ३४
ततः प्रववृते युद्धं कुरुमाधवसिंहयोः ।
अन्योन्यं क्रुद्धयोर्घोरं यथा द्विरदसिंहयोः ॥ ३५
ततः पूर्णायतोत्सृष्टैः सात्वतं युद्धदुर्मदम् ।
दुर्योधनः प्रत्यविध्यद्दशभिर्निशितैः शरैः ॥ ३६
तं सात्यकिः प्रत्यविद्धत्तथैव दशभिः शरैः ।
पञ्चाशता पुनश्चाजौ त्रिंशता दशभिश्च ह ॥ ३७
तस्य संदधतश्चेषून्संहितेषुं च कार्मुकम् ।
अच्छिनत्सात्यकिस्तूर्णं शरैश्चैवाभ्यवीवृषत् ॥ ३८
स गाढविद्धो व्यथितः प्रत्यपायाद्रथान्तरम् ।
दुर्योधनो महाराज दाशार्हशरपीडितः ॥ ३९
समाश्वस्य तु पुत्रस्ते सात्यकिं पुनरभ्ययात् ।
विसृजन्निषुजालानि युयुधानरथं प्रति ॥ ४०
तथैव सात्यकिर्बाणान्दुर्योधनरथं प्रति ।
प्रततं व्यसृजद्राजंस्तत्संकुलमवर्तत ॥ ४१
तत्रेषुभिः क्षिप्यमाणैः पतद्भिश्च समन्ततः ।
अग्नेरिव महाकक्षे शब्दः समभवन्महान् ॥ ४२
तत्राभ्यधिकमालक्ष्य माधवं रथसत्तमम् ।
क्षिप्रमभ्यपतत्कर्णः परीप्संस्तनयं तव ॥ ४३
न तु तं मर्षयामास भीमसेनो महाबलः ।
अभ्ययात्त्वरितः कर्णं विसृजन्सायकान्बहून् ॥ ४४
तस्य कर्णः शितान्बाणान्प्रतिहन्य हसन्निव ।

धनुः शरांश्च चिच्छेद सूतं चाभ्यहनच्छरैः ॥ ४५
भीमसेनस्तु संक्रुद्धो गदामादाय पाण्डवः ।
ध्वजं धनुश्च सूतं च संममर्दाहवे रिपोः ॥ ४६
अमृष्यमाणः कर्णस्तु भीमसेनमयुध्यत ।
विविधैरिषुजालैश्च नानाशस्त्रैश्च संयुगे ॥ ४७
संकुले वर्तमाने तु राजा धर्मसुतोऽब्रवीत् ।
पाञ्चालानां नरव्याघ्रान्मत्स्यानां च नरर्षभान् ॥४८
ये नः प्राणाः शिरो ये नो ये नो योधा महाबलाः ।
त एते धार्तराष्ट्रेषु विषक्ताः पुरुषर्षभाः ॥ ४९
किं तिष्ठत यथा मूढाः सर्वे विगतचेतसः ।
तत्र गच्छत यत्रैते युध्यन्ते मामका रथाः ॥ ५०
क्षत्रधर्मं पुरस्कृत्य सर्व एव गतज्वराः ।
जयन्तो वध्यमाना वा गतिमिष्टां गमिष्यथ ॥ ५१
जित्वा च बहुभिर्यज्ञैर्यक्ष्यध्वं भूरिदक्षिणैः ।
हता वा देवसाद्भूत्वा लोकान्प्राप्स्यथ पुष्कलान् ॥
ते राज्ञा चोदिता वीरा योत्स्यमाना महारथाः ।
चतुर्धा वाहिनीं कृत्वा त्वरिता द्रोणमभ्ययुः ॥ ५३
पाञ्चालास्त्वेकतो द्रोणमभ्यघ्नन्बहुभिः शरैः ।
भीमसेनपुरोगाश्च एकतः पर्यवारयन् ॥ ५४
आसंस्तु पाण्डुपुत्राणां त्रयोऽजिह्मा महारथाः ।
यमौ च भीमसेनश्च प्राक्रोशन्त धनंजयम् ॥ ५५
अभिद्रवार्जुन क्षिप्रं कुरून्द्रोणादपानुद ।
तत एनं हनिष्यन्ति पाञ्चाला हतरक्षिणम् ॥ ५६
कौरवेयांस्ततः पार्थः सहसा समुपाद्रवत् ।
पाञ्चालानेव तु द्रोणो धृष्टद्युम्नपुरोगमान् ॥ ५७
पाञ्चालानां ततो द्रोणोऽप्यकरोत्कदनं महत् ।
यथा क्रुद्धो रणे शक्रो दानवानां क्षयं पुरा ॥ ५८
द्रोणास्त्रेण महाराज वध्यमानाः परे युधि ।
नात्रसन्त रणे द्रोणात्सत्त्ववन्तो महारथाः ॥ ५९
वध्यमाना महाराज पाञ्चालाः सृञ्जयास्तथा ।
द्रोणमेवाभ्ययुर्युद्धे मोहयन्तो महारथम् ॥ ६०
तेषां तूत्साद्यमानानां पाञ्चालानां समन्ततः ।
अभवद्भैरवो नादो वध्यतां शरशक्तिभिः ॥ ६१
वध्यमानेषु संग्रामे पाञ्चालेषु महात्मना ।
उदीर्यमाणे द्रोणास्त्रे पाण्डवान्भयमाविशत् ॥ ६२
दृष्ट्वाश्वनरसंघानां विपुलं च क्षयं युधि ।
पाण्डवेया महाराज नाशंसुर्विजयं तदा ॥ ६३
कच्चिद्द्रोणो न नः सर्वान्क्षपयेत्परमास्त्रवित् ।
समिद्धः शिशिरापाये दहन्कक्षमिवानलः ॥ ६४
न चैनं संयुगे कश्चित्समर्थः प्रतिवीक्षितुम् ।
न चैनमर्जुनो जातु प्रतियुध्येत धर्मवित् ॥ ६५
त्रस्तान्कुन्तीसुतान्दृष्ट्वा द्रोणसायकपीडितान् ।
मतिमाञ्श्रेयसे युक्तः केशवोऽर्जुनमब्रवीत् ॥ ६६
नैष युद्धेन संग्रामे जेतुं शक्यः कथंचन ।
अपि वृत्रहणा युद्धे रथयूथपयूथपः ॥ ६७
आस्थीयतां जये योगो धर्ममुत्सृज्य पाण्डव ।
यथा वः संयुगे सर्वान्न हन्याद्रुक्मवाहनः ॥ ६८
अश्वत्थाम्नि हते नैष युध्येदिति मतिर्मम ।
तं हतं संयुगे कश्चिदस्मै शंसतु मानवः ॥ ६९
एतन्नारोचयद्राजन्कुन्तीपुत्रो धनंजयः ।
अन्ये त्वरोचयन्सर्वे कृच्छ्रेण तु युधिष्ठिरः ॥ ७०
ततो भीमो महाबाहुरनीके स्वे महागजम् ।
जघान गदया राजन्नश्वत्थामानमित्युत ॥ ७१
भीमसेनस्तु सव्रीडमुपेत्य द्रोणमाहवे ।
अश्वत्थामा हत इति शब्दमुच्चैश्चकार ह ॥ ७२
अश्वत्थामेति हि गजः ख्यातो नाम्ना हतोऽभवत् ।
कृत्वा मनसि तं भीमो मिथ्या व्याहृतवांस्तदा ॥
भीमसेनवचः श्रुत्वा द्रोणस्तत्परमप्रियम् ।
मनसा सन्नगात्रोऽभूद्यथा सैकतमम्भसि ॥ ७४
शङ्कमानः स तन्मिथ्या वीर्यज्ञः स्वसुतस्य वै ।

हतः स इति च श्रुत्वा नैव धैर्यादकम्पत ॥ ७५
स लब्ध्वा चेतनां द्रोणः क्षणेनैव समाश्वसत् ।
अनुचिन्त्यात्मनः पुत्रमविषह्यमरातिभिः ॥ ७६
स पार्षतमभिद्रुत्य जिघांसुर्मृत्युमात्मनः ।
अवाकिरत्सहस्रेण तीक्ष्णानां कङ्कपत्रिणाम् ॥ ७७
तं वै विंशतिसाहस्राः पाञ्चालानां नरर्षभाः ।
तथा चरन्तं संग्रामे सर्वतो व्यकिरञ्शरैः ॥ ७८
ततः प्रादुष्करोद्द्रोणो ब्राह्ममस्त्रं परंतपः ।
वधाय तेषां शूराणां पाञ्चालानाममर्षितः ॥ ७९
ततो व्यरोचत द्रोणो विनिघ्नन्सर्वसोमकान् ।
शिरांस्यपातयच्चापि पाञ्चालानां महामृधे ।
तथैव परिघाकारान्बाहून्कनकभूषणान् ॥ ८०
ते वध्यमानाः समरे भारद्वाजेन पार्थिवाः ।
मेदिन्यामन्वकीर्यन्त वातनुन्ना इव द्रुमाः ॥ ८१
कुञ्जराणां च पततां हयौघानां च भारत ।
अगम्यरूपा पृथिवी मांसशोणितकर्दमा ॥ ८२
हत्वा विंशतिसाहस्रान्पाञ्चालानां रथव्रजान् ।
अतिष्ठदाहवे द्रोणो विधूमोऽग्निरिव ज्वलन् ॥ ८३
तथैव च पुनः क्रुद्धो भारद्वाजः प्रतापवान् ।
वसुदानस्य भल्लेन शिरः कायादपाहरत् ॥ ८४
पुनः पञ्चशतान्मत्स्यान्षट्सहस्रांश्च सृञ्जयान् ।
हस्तिनामयुतं हत्वा जघानाश्वायुतं पुनः ॥ ८५
क्षत्रियाणामभावाय दृष्ट्वा द्रोणमवस्थितम् ।
ऋषयोऽभ्यागमंस्तूर्णं हव्यवाहपुरोगमाः ॥ ८६
विश्वामित्रो जमदग्निर्भारद्वाजोऽथ गौतमः ।
वसिष्ठः कश्यपोऽत्रिश्च ब्रह्मलोकं निनीषवः ॥ ८७
सिकताः पृश्नयो गर्गा बालखिल्या मरीचिपाः ।
भृगवोऽङ्गिरसश्चैव सूक्ष्माश्चान्ये महर्षयः ॥ ८८
त एनमब्रुवन्सर्वे द्रोणमाहवशोभिनम् ।
अधर्मतः कृतं युद्धं समयो निधनस्य ते ॥ ८९
न्यस्यायुधं रणे द्रोण समेत्यास्मानवस्थितान् ।
नातः क्रूरतरं कर्म पुनः कर्तुं त्वमर्हसि ॥ ९०
वेदवेदाङ्गविदुषः सत्यधर्मपरस्य च ।
ब्राह्मणस्य विशेषेण तवैतन्नोपपद्यते ॥ ९१
न्यस्यायुधममोघेषो तिष्ठ वर्त्मनि शाश्वते ।
परिपूर्णश्च कालस्ते वस्तुं लोकेऽद्य मानुषे ॥ ९२
इति तेषां वचः श्रुत्वा भीमसेनवचश्च तत् ।
धृष्टद्युम्नं च संप्रेक्ष्य रणे स विमनाभवत् ॥ ९३
स दह्यमानो व्यथितः कुन्तीपुत्रं युधिष्ठिरम् ।
अहतं वा हतं वेति पप्रच्छ सुतमात्मनः ॥ ९४
स्थिरा बुद्धिर्हि द्रोणस्य न पार्थो वक्ष्यतेऽनृतम् ।
त्रयाणामपि लोकानामैश्वर्यार्थे कथंचन ॥ ९५
तस्मात्तं परिपप्रच्छ नान्यं कंचिद्विशेषतः ।
तस्मिंस्तस्य हि सत्याशा बाल्यात्प्रभृति पाण्डवे ॥ ९६
ततो निष्पाण्डवामुर्वीं करिष्यन्तं युधां पतिम् ।
द्रोणं ज्ञात्वा धर्मराजं गोविन्दो व्यथितोऽब्रवीत् ॥
यद्यर्धदिवसं द्रोणो युध्यते मन्युमास्थितः ।
सत्यं ब्रवीमि ते सेना विनाशं समुपैष्यति ॥ ९८
स भवांस्त्रातु नो द्रोणात्सत्याज्ज्यायोऽनृतं भवेत् ।
अनृतं जीवितस्यार्थे वदन्न स्पृश्यतेऽनृतैः ॥ ९९
तयोः संवदतोरेवं भीमसेनोऽब्रवीदिदम् ।
श्रुत्वैव तं महाराज वधोपायं महात्मनः ॥ १००
गाहमानस्य ते सेनां मालवस्येन्द्रवर्मणः ।
अश्वत्थामेति विख्यातो गजः शक्रगजोपमः ॥ १०१
निहतो युधि विक्रम्य ततोऽहं द्रोणमब्रुवम् ।
अश्वत्थामा हतो ब्रह्मन्निवर्तस्वाहवादिति ॥ १०२
नूनं नाश्रद्दधद्वाक्यमेष मे पुरुषर्षभः ।
स त्वं गोविन्दवाक्यानि मानयस्व जयैषिणः ॥ १०३
द्रोणाय निहतं शंस राजञ्शारद्वतीसुतम् ।
त्वयोक्तो नैष युध्येत जातु राजन्द्विजर्षभः ।

सत्यवान्हि नृलोकेऽस्मिन्भवान्ख्यातो जनाधिप ॥
तस्य तद्वचनं श्रुत्वा कृष्णवाक्यप्रचोदितः ।
भावित्वाच्च महाराज वक्तुं समुपचक्रमे ॥ १०५
तमतथ्यभये मग्नो जये सक्तो युधिष्ठिरः ।
अव्यक्तमब्रवीद्राजन्हतः कुञ्जर इत्युत ॥ १०६
तस्य पूर्वं रथः पृथ्व्याश्चतुरङ्गुल उत्तरः ।
बभूवैवं तु तेनोक्ते तस्य वाहास्पृशन्महीम् ॥ १०७
युधिष्ठिरात्तु तद्वाक्यं श्रुत्वा द्रोणो महारथः ।
पुत्रव्यसनसंतप्तो निराशो जीवितेऽभवत् ॥ १०८
आगस्कृतमिवात्मानं पाण्डवानां महात्मनाम् ।
ऋषिवाक्यं च मन्वानः श्रुत्वा च निहतं सुतम् ॥
विचेताः परमोद्विग्नो धृष्टद्युम्नमवेक्ष्य च ।
योद्धुं नाशक्नुवद्राजन्यथापूर्वमरिंदम ॥ ११०
तं दृष्ट्वा परमोद्विग्नं शोकोपहतचेतसम् ।
पाञ्चालराजस्य सुतो धृष्टद्युम्नः समाद्रवत् ॥ १११
य इष्ट्वा मनुजेन्द्रेण द्रुपदेन महामखे ।
लब्धो द्रोणविनाशाय समिद्धाद्धव्यवाहनात् ॥ ११२
स धनुर्जैत्रमादाय घोरं जलदनिस्वनम् ।
दृढज्यमजरं दिव्यं शरांश्चाशीविषोपमान् ॥ ११३
संदधे कार्मुके तस्मिञ्शरमाशीविषोपमम् ।
द्रोणं जिघांसुः पाञ्चाल्यो महाज्वालमिवानलम् ॥
तस्य रूपं शरस्यासीद्धनुर्ज्यामण्डलान्तरे ।
द्योततो भास्करस्येव घनान्ते परिवेशिनः ॥ ११५
पार्षतेन परामृष्टं ज्वलन्तमिव तद्धनुः ।
अन्तकालमिव प्राप्तं मेनिरे वीक्ष्य सैनिकाः ॥ ११६
तमिषुं संहितं तेन भारद्वाजः प्रतापवान् ।
दृष्ट्वामन्यत देहस्य कालपर्यायमागतम् ॥ ११७
ततः स यत्नमातिष्ठदाचार्यस्तस्य वारणे ।
न चास्यास्त्राणि राजेन्द्र प्रादुरासन्महात्मनः ॥ ११८
तस्य त्वहानि चत्वारि क्षपा चैकास्यतो गता ।
तस्य चाह्नस्त्रिभागेन क्षयं जग्मुः पतत्रिणः ॥ ११९
स शरक्षयमासाद्य पुत्रशोकेन चार्दितः ।
विविधानां च दिव्यानामस्त्राणामप्रसन्नताम् ॥ १२०
उत्स्रष्टुकामः शस्त्राणि विप्रवाक्याभिचोदितः ।
तेजसा प्रेर्यमाणश्च युयुधे सोऽतिमानुषम् ॥ १२१
अथान्यत्स समादाय दिव्यमाङ्गिरसं धनुः ।
शरांश्च ब्रह्मदण्डाभान्धृष्टद्युम्नमयोधयत् ॥ १२२
ततस्तं शरवर्षेण महता समवाकिरन् ।
व्यशातयच्च संक्रुद्धो धृष्टद्युम्नममर्षणः ॥ १२३
तं शरं शतधा चास्य द्रोणश्चिच्छेद सायकैः ।
ध्वजं धनुश्च निशितैः सारथिं चाप्यपातयत् ॥ १२४
धृष्टद्युम्नः प्रहस्यान्यत्पुनरादाय कार्मुकम् ।
शितेन चैनं बाणेन प्रत्यविध्यत्स्तनान्तरे ॥ १२५
सोऽतिविद्धो महेष्वासः संभ्रान्त इव संयुगे ।
भल्लेन शितधारेण चिच्छेदास्य महद्धनुः ॥ १२६
यच्चास्य बाणं विकृतं धनूंषि च विशां पते ।
सर्वं संछिद्य दुर्धर्षो गदां खड्गमथापि च ॥ १२७
धृष्टद्युम्नं ततोऽविध्यन्नवभिर्निशितैः शरैः ।
जीवितान्तकरैः क्रुद्धः क्रुद्धरूपं परंतपः ॥ १२८
धृष्टद्युम्नरथस्याश्वान्स्वरथाश्वैर्महारथः ।
अमिश्रयदमेयात्मा ब्राह्ममस्त्रमुदीरयन् ॥ १२९
ते मिश्रा बह्वशोभन्त जवना वातरंहसः ।
पारावतसवर्णाश्च शोणाश्च भरतर्षभ ॥ १३०
यथा सविद्युतो मेघा नदन्तो जलदागमे ।
तथा रेजुर्महाराज मिश्रिता रणमूर्धनि ॥ १३१
ईषाबन्धं चक्रबन्धं रथबन्धं तथैव च ।
प्रणाशयदमेयात्मा धृष्टद्युम्नस्य स द्विजः ॥ १३२
स छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
उत्तमामापदं प्राप्य गदां वीरः परामृशत् ॥ १३३
तामस्य विशिखैस्तीक्ष्णैः क्षिप्यमाणां महारथः ।

निजघान शरैर्द्रोणः क्रुद्धः सत्यपराक्रमः ॥ १३४
तां दृष्ट्वा तु नरव्याघ्रो द्रोणेन निहतां शरैः ।
विमलं खड्गमादत्त शतचन्द्रं च भानुमत् ॥ १३५
असंशयं तथाभूते पाञ्चाल्यः साध्वमन्यत ।
वधमाचार्यमुख्यस्य प्राप्तकालं महात्मनः ॥ १३६
ततः स्वरथनीडस्थः स्वरथस्य रथेषया ।
अगच्छदसिमुद्यम्य शतचन्द्रं च भानुमत् ॥१३७
चिकीर्षुर्दुष्करं कर्म धृष्टद्युम्नो महारथः ।
इयेष वक्षो भेत्तुं च भारद्वाजस्य संयुगे ॥ १३८
सोऽतिष्ठद्युगमध्ये वै युगसंनहनेषु च ।
शोणानां जघनार्धेषु तत्सैन्याः समपूजयन् ॥१३९
तिष्ठतो युगपालीषु शोणानप्यधितिष्ठतः ।
नापश्यदन्तरं द्रोणस्तदद्भुतमिवाभवत् ॥ १४०
क्षिप्रं श्येनस्य चरतो यथैवामिषगृद्धिनः ।
तद्वदासीदभीसारो द्रोणं प्रार्थयतो रणे ॥ १४१
तस्याश्वान्रथशक्त्यासौ तदा क्रुद्धः पराक्रमी ।
सर्वानेकैकशो द्रोणः कपोताभानजीघनत् ॥ १४२
ते हता न्यपतन्भूमौ धृष्टद्युम्नस्य वाजिनः ।
शोणाश्च पर्यमुच्यन्त रथबन्धाद्विशां पते ॥ १४३
तान्हयान्निहतान्दृष्ट्वा द्विजाग्र्येण स पार्षतः ।
नामृष्यत युधां श्रेष्ठो याज्ञसेनिर्महारथः ॥ १४४
विरथः स गृहीत्वा तु खड्गं खड्गभृतां वरः ।
द्रोणमभ्यपतद्राजन्वैनतेय इवोरगम् ॥ १४५
तस्य रूपं बभौ राजन्भारद्वाजं जिघांसतः ।
यथा रूपं परं विष्णोर्हिरण्यकशिपोर्वधे ॥ १४६
सोऽचरद्विविधान्मार्गान्प्रकारानेकविंशतिम् ।
भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं प्रसृतं सृतम् ॥ १४७
परिवृत्तं निवृत्तं च खड्गं चर्म च धारयन् ।
संपातं समुदीर्णं च दर्शयामास पार्षतः ॥ १४८
ततः शरसहस्रेण शतचन्द्रमपातयत् ।
खड्गं चर्म च संबाधे धृष्टद्युम्नस्य स द्विजः ॥१४९
ते तु वैतस्तिका नाम शरा ह्यासन्नघातिनः ।
निकृष्टयुद्धे द्रोणस्य नान्येषां सन्ति ते शराः ॥१५०
शारद्वतस्य पार्थस्य द्रौणेर्वैकर्तनस्य च ।
प्रद्युम्नयुयुधानाभ्यामभिमन्योश्च ते शराः ॥ १५१
अथास्येषुं समाधत्त दृढं परमसंशितम् ।
अन्तेवासिनमाचार्यो जिघांसुः पुत्रसंमितम् ॥१५२
तं शरैर्दशभिस्तीक्ष्णैश्चिच्छेद शिनिपुंगवः ।
पश्यतस्तव पुत्रस्य कर्णस्य च महात्मनः ।
ग्रस्तमाचार्यमुख्येन धृष्टद्युम्नममोचयत् ॥ १५३
चरन्तं रथमार्गेषु सात्यकिं सत्यविक्रमम् ।
द्रोणकर्णान्तरगतं कृपस्यापि च भारत ।
अपश्येतां महात्मानौ विष्वक्सेनधनंजयौ ॥१५४
अपूजयेतां वार्ष्णेयं ब्रुवाणौ साधु साध्विति ।
दिव्यान्यस्त्राणि सर्वेषां युधि निघ्नन्तमच्युतम् ।
अभिपत्य ततः सेनां विष्वक्सेनधनंजयौ ॥ १५५
धनंजयस्ततः कृष्णमब्रवीत्पश्य केशव ।
आचार्यवरमुख्यानां मध्ये क्रीडन्मधूद्वहः ॥ १५६
आनन्दयति मां भूयः सात्यकिः सत्यविक्रमः ।
माद्रीपुत्रौ च भीमं च राजानं च युधिष्ठिरम् ॥१५७
यच्छिक्षयानुद्धतः सन्रणे चरति सात्यकिः ।
महारथानुपक्रीडन्वृष्णीनां कीर्तिवर्धनः ॥ १५८
तमेते प्रतिनन्दन्ति सिद्धाः सैन्याश्च विस्मिताः ।
अजय्यं समरे दृष्ट्वा साधु साध्विति सात्वतम् ।
योधाश्चोभयतः सर्वे कर्मभिः समपूजयन् ॥१५९

इति श्रीमहाभारते द्रोणपर्वणि
चतुःषष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥

१६५

संजय उवाच ।

क्रूरमायोधनं जज्ञे तस्मिन्राजसमागमे ।

रुद्रस्येव हि क्रुद्धस्य निघ्नतस्तु पशून्यथा ॥ १
हस्तानामुत्तमाङ्गानां कार्मुकाणां च भारत ।
छत्राणां चापविद्धानां चामराणां च संयुगे ॥ २
भग्नचक्रै रथैश्चापि पातितैश्च महाध्वजैः ।
सादिभिश्च हतैः शूरैः संकीर्णा वसुधाभवत् ॥ ३
बाणपातनिकृत्तास्तु योधास्ते कुरुसत्तम ।
चेष्टन्तो विविधाश्चेष्टा व्यदृश्यन्त महाहवे ॥ ४
वर्तमाने तथा युद्धे घोरे देवासुरोपमे ।
अब्रवीत्क्षत्रियांस्तत्र धर्मराजो युधिष्ठिरः ।
अभिद्रवत संयत्ताः कुम्भयोनिं महारथाः ॥ ५
एष वै पार्षतो वीरो भारद्वाजेन संगतः ।
घटते च यथाशक्ति भारद्वाजस्य नाशने ॥ ६
यादृशानि हि रूपाणि दृश्यन्ते नो महारणे ।
अद्य द्रोणं रणे क्रुद्धः पातयिष्यति पार्षतः ।
ते यूयं सहिता भूत्वा कुम्भयोनिं परीप्सत ॥ ७
युधिष्ठिरसमाज्ञप्ताः सृञ्जयानां महारथाः ।
अभ्यद्रवन्त संयत्ता भारद्वाजं जिघांसवः ॥ ८
तान्समापततः सर्वान्भारद्वाजो महारथः ।
अभ्यद्रवत वेगेन मर्तव्यमिति निश्चितः ॥ ९
प्रयाते सत्यसंधे तु समकम्पत मेदिनी ।
ववुर्वाताः सनिर्घातास्त्रासयन्तो वरूथिनीम् ॥ १०
पपात महती चोल्का आदित्यान्निर्गतेव ह ।
दीपयन्तीव तापेन शंसन्तीव महद्भयम् ॥ ११
जज्वलुश्चैव शस्त्राणि भारद्वाजस्य मारिष ।
रथाः स्वनन्ति चात्यर्थं हयाश्चाश्रूण्यवासृजन् ॥ १२
हतौजा इव चाप्यासीद्भारद्वाजो महारथः ।
ऋषीणां ब्रह्मवादानां स्वर्गस्य गमनं प्रति ।
सुयुद्धेन ततः प्राणानुत्स्रष्टुमुपचक्रमे ॥ १३
ततश्चतुर्दिशं सैन्यैर्द्रुपदस्याभिसंवृतः ।
निर्दहन्क्षत्रियव्रातान्द्रोणः पर्यचरद्रणे ॥ १४
हत्वा विंशतिसाहस्रान्क्षत्रियानरिमर्दनः ।
दशायुतानि तीक्ष्णाग्रैरवधीद्विशिखैः शितैः ॥ १५
सोऽतिष्ठदाहवे यत्तो विधूम इव पावकः ।
क्षत्रियाणामभावाय ब्राह्ममात्मानमास्थितः ॥ १६
पाञ्चाल्यं विरथं भीमो हतसर्वायुधं वशी ।
अविषण्णं महात्मानं त्वरमाणः समभ्ययात् ॥ १७
ततः स्वरथमारोप्य पाञ्चाल्यमरिमर्दनः ।
अब्रवीदभिसंप्रेक्ष्य द्रोणमस्यन्तमन्तिकात् ॥ १८
न त्वदन्य इहाचार्यं योद्धुमुत्सहते पुमान् ।
त्वरस्व प्राग्वधायैव त्वयि भारः समाहितः ॥ १९
स तथोक्तो महाबाहुः सर्वभारसहं नवम् ।
अभिपत्याददे क्षिप्रमायुधप्रवरं दृढम् ॥ २०
संरब्धश्च शरानस्यन्द्रोणं दुर्वारणं रणे ।
विवारयिषुराचार्यं शरवर्षैरवाकिरत् ॥ २१
तौ न्यवारयतां श्रेष्ठौ संरब्धौ रणशोभिनौ ।
उदीरयेतां ब्राह्माणि दिव्यान्यस्त्राण्यनेकशः ॥ २२
स महास्त्रैर्महाराज द्रोणमाच्छादयद्रणे ।
निहत्य सर्वाण्यस्त्राणि भारद्वाजस्य पार्षतः ॥ २३
स वसातीञ्शिबींश्चैव बाह्लीकान्कौरवानपि ।
रक्षिष्यमाणान्संग्रामे द्रोणं व्यधमदच्युतः ॥ २४
धृष्टद्युम्नस्तदा राजन्गभस्तिभिरिवांशुमान् ।
बभौ प्रच्छादयन्नाशाः शरजालैः समन्ततः ॥ २५
तस्य द्रोणो धनुश्छित्त्वा विद्ध्वा चैनं शिलीमुखैः ।
मर्माण्यभ्यहनद्भूयः स व्यथां परमामगात् ॥ २६
ततो भीमो दृढक्रोधो द्रोणस्याश्लिष्य तं रथम् ।
शनकैरिव राजेन्द्र द्रोणं वचनमब्रवीत् ॥ २७
यदि नाम न युध्येरञ्शिक्षिता ब्रह्मबन्धवः ।
स्वकर्मभिरसंतुष्टा न स्म क्षत्रं क्षयं व्रजेत् ॥ २८
अहिंसा सर्वभूतेषु धर्मं ज्यायस्तरं विदुः ।
तस्य च ब्राह्मणो मूलं भवांश्च ब्रह्मवित्तमः ॥ २९

श्वपाकवन्म्लेच्छगणान्हत्वा चान्यान्पृथग्विधान् ।
अज्ञानान्मूढवद्ब्रह्मन्पुत्रदारधनेप्सया ॥ ३०
एकस्यार्थे बहून्हत्वा पुत्रस्याधर्मविद्यथा ।
स्वकर्मस्थान्विकर्मस्थो न व्यपत्रपसे कथम् ॥ ३१
स चाद्य पतितः शेते पृष्टेनावेदितस्तव ।
धर्मराजेन तद्वाक्यं नातिशङ्कितुमर्हसि ॥ ३२
एवमुक्तस्ततो द्रोणो भीमेनोत्सृज्य तद्धनुः ।
सर्वाण्यस्त्राणि धर्मात्मा हातुकामोऽभ्यभाषत ।
कर्ण कर्ण महेष्वास कृप दुर्योधनेति च ॥ ३३
संग्रामे क्रियतां यत्नो ब्रवीम्येष पुनः पुनः ।
पाण्डवेभ्यः शिवं वोऽस्तु शस्त्रमभ्युत्सृजाम्यहम् ॥
इति तत्र महाराज प्राक्रोशद्द्रौणिमेव च ।
उत्सृज्य च रणे शस्त्रं रथोपस्थे निवेश्य च ।
अभयं सर्वभूतानां प्रददौ योगयुक्तवान् ॥ ३५
तस्य तच्छिद्रमाज्ञाय धृष्टद्युम्नः समुत्थितः ।
खड्गी रथादवप्लुत्य सहसा द्रोणमभ्ययात् ॥ ३६
हाहाकृतानि भूतानि मानुषाणीतराणि च ।
द्रोणं तथागतं दृष्ट्वा धृष्टद्युम्नवशं गतम् ॥ ३७
हाहाकारं भृशं चक्रुरहो धिगिति चाब्रुवन् ।
द्रोणोऽपि शस्त्राण्युत्सृज्य परमं साम्यमास्थितः ॥ ३८
तथोक्त्वा योगमास्थाय ज्योतिर्भूतो महातपाः ।
दिवमाक्रामदाचार्यः सद्भिः सह दुराक्रमम् ॥ ३९
द्वौ सूर्याविति नो बुद्धिरासीत्तस्मिंस्तथा गते ।
एकाग्रमिव चासीद्धि ज्योतिर्भिः पूरितं नभः ।
समपद्यत चार्काभे भारद्वाजनिशाकरे ॥ ४०
निमेषमात्रेण च तज्ज्योतिरन्तरधीयत ।
आसीत्किलकिलाशब्दः प्रहृष्टानां दिवौकसाम् ।
ब्रह्मलोकं गते द्रोणे धृष्टद्युम्ने च मोहिते ॥ ४१
वयमेव तदाद्राक्ष्म पञ्च मानुषयोनयः ।
योगयुक्तं महात्मानं गच्छन्तं परमां गतिम् ॥ ४२
अहं धनंजयः पार्थः कृपः शारद्वतो द्विजः ।
वासुदेवश्च वार्ष्णेयो धर्मराजश्च पाण्डवः ॥ ४३
अन्ये तु सर्वे नापश्यन्भारद्वाजस्य धीमतः ।
महिमानं महाराज योगयुक्तस्य गच्छतः ॥ ४४
गतिं परमिकां प्राप्तमजानन्तो नृयोनयः ।
नापश्यन्गच्छमानं हि तं सार्धमृषिपुंगवैः ।
आचार्यं योगमास्थाय ब्रह्मलोकमरिंदमम् ॥ ४५
वितुन्नाङ्गं शरशतैर्न्यस्तायुधमसृक्क्षरम् ।
धिक्कृतः पार्षतस्तं तु सर्वभूतैः परामृशत् ॥ ४६
तस्य मूर्धानमालम्ब्य गतसत्त्वस्य देहिनः ।
किंचिदब्रुवतः कायाद्विचकर्तासिना शिरः ॥ ४७
हर्षेण महता युक्तो भारद्वाजे निपातिते ।
सिंहनादरवं चक्रे भ्रामयन्खड्गमाहवे ॥ ४८
आकर्णपलितः श्यामो वयसाशीतिपञ्चकः ।
त्वत्कृते व्यचरत्संख्ये स तु षोडशवर्षवत् ॥ ४९
उक्तवांश्च महाबाहुः कुन्तीपुत्रो धनंजयः ।
जीवन्तमानयाचार्यं मा वधीर्द्रुपदात्मज ॥ ५०
न हन्तव्यो न हन्तव्य इति ते सैनिकाश्च ह ।
उत्क्रोशन्नर्जुनश्चैव सानुक्रोशस्तमाद्रवत् ॥ ५१
क्रोशमानेऽर्जुने चैव पार्थिवेषु च सर्वशः ।
धृष्टद्युम्नोऽवधीद्द्रोणं रथतल्पे नरर्षभम् ॥ ५२
शोणितेन परिक्लिन्नो रथाद्भूमिमरिंदमः ।
लोहिताङ्ग इवादित्यो दुर्दर्शः समपद्यत ।
एवं तं निहतं संख्ये ददृशे सैनिको जनः ॥ ५३
धृष्टद्युम्नस्तु तद्राजन्भारद्वाजशिरो महत् ।
तावकानां महेष्वासः प्रमुखे तत्समाक्षिपत् ॥ ५४
ते तु दृष्ट्वा शिरो राजन्भारद्वाजस्य तावकाः ।
पलायनकृतोत्साहा दुद्रुवुः सर्वतो दिशम् ॥ ५५
द्रोणस्तु दिवमास्थाय नक्षत्रपथमाविशत् ।
अहमेव तदाद्राक्षं द्रोणस्य निधनं नृप ॥ ५६

ऋषेः प्रसादात्कृष्णस्य सत्यवत्याः सुतस्य च ।
विधूमामिव संयान्तीमुल्कां प्रज्वलितामिव ।
अपश्याम दिवं स्तब्ध्वा गच्छन्तं तं महाद्युतिम् ॥
हते द्रोणे निरुत्साहान्कुरून्पाण्डवसृञ्जयाः ।
अभ्यद्रवन्महावेगास्ततः सैन्यं व्यदीर्यत ॥ ५८
निहता हयभूयिष्ठाः संग्रामे निशितैः शरैः ।
तावका निहते द्रोणे गतासव इवाभवन् ॥ ५९
पराजयमथावाप्य परत्र च महद्भयम् ।
उभयेनैव ते हीना नाविन्दन्धृतिमात्मनः ॥ ६०
अन्विच्छन्तः शरीरं तु भारद्वाजस्य पार्थिवाः ।
नाध्यगच्छंस्तदा राजन्कबन्धायुतसंकुले ॥ ६१
पाण्डवास्तु जयं लब्ध्वा परत्र च महद्यशः ।
बाणशब्दरवांश्चक्रुः सिंहनादांश्च पुष्कलान् ॥ ६२
भीमसेनस्ततो राजन्धृष्टद्युम्नश्च पार्षतः ।
वरूथिन्यामनृत्येतां परिष्वज्य परस्परम् ॥ ६३
अब्रवीच्च तदा भीमः पार्षतं शत्रुतापनम् ।
भूयोऽहं त्वां विजयिनं परिष्वक्ष्यामि पार्षत ।
सूतपुत्रे हते पापे धार्तराष्ट्रे च संयुगे ॥ ६४
एतावदुक्त्वा भीमस्तु हर्षेण महता युतः ।
बाहुशब्देन पृथिवीं कम्पयामास पाण्डवः ॥ ६५
तस्य शब्देन वित्रस्ताः प्राद्रवंस्तावका युधि ।
क्षत्रधर्मं समुत्सृज्य पलायनपरायणाः ॥ ६६
पाण्डवास्तु जयं लब्ध्वा हृष्टा ह्यासन्विशां पते ।
अरिक्षयं च संग्रामे तेन ते सुखमाप्नुवन् ॥ ६७
ततो द्रोणे हते राजन्कुरवः शस्त्रपीडिताः ।
हतप्रवीरा विध्वस्ता भृशं शोकपरायणाः ॥ ६८
विचेतसो हतोत्साहाः कश्मलाभिहतौजसः ।
आर्तस्वरेण महता पुत्रं ते पर्यवारयन् ॥ ६९
रजस्वला वेपमाना वीक्षमाणा दिशो दश ।
अश्रुकण्ठा यथा दैत्या हिरण्याक्षे पुरा हते ॥ ७०
स तैः परिवृतो राजा त्रस्तैः क्षुद्रमृगैरिव ।
अशक्नुवन्नवस्थातुमपायात्तनयस्तव ॥ ७१
क्षुत्पिपासापरिश्रान्तास्ते योधास्तव भारत ।
आदित्येन च संतप्ता भृशं विमनसोऽभवन् ॥ ७२
भास्करस्येव पतनं समुद्रस्येव शोषणम् ।
विपर्यासं यथा मेरोर्वासवस्येव निर्जयम् ॥ ७३
अमर्षणीयं तद्दृष्ट्वा भारद्वाजस्य पातनम् ।
त्रस्तरूपतरा राजन्कौरवाः प्राद्रवन्भयात् ॥ ७४
गान्धारराजः शकुनिस्त्रस्तस्त्रस्ततरैः सह ।
हतं रुक्मरथं दृष्ट्वा प्राद्रवत्सहितो रथैः ॥ ७५
वरूथिनीं वेगवतीं विद्रुतां सपताकिनीम् ।
परिगृह्य महासेनां सूतपुत्रोऽपयाद्भयात् ॥ ७६
रथनागाश्वकलिलां पुरस्कृत्य तु वाहिनीम् ।
मद्राणामीश्वरः शल्यो वीक्षमाणोऽपयाद्भयात् ॥ ७७
हतप्रवीरैर्भूयिष्ठं द्विपैर्बहुपदातिभिः ।
वृतः शारद्वतोऽगच्छत्कष्टं कष्टमिति ब्रुवन् ॥ ७८
भोजानीकेन शिष्टेन कलिङ्गारट्टबाह्लिकैः ।
कृतवर्मा वृतो राजन्प्रायात्सुजवनैर्हयैः ॥ ७९
पदातिगणसंयुक्तस्त्रस्तो राजन्भयार्दितः ।
उलूकः प्राद्रवत्तत्र दृष्ट्वा द्रोणं निपातितम् ॥ ८०
दर्शनीयो युवा चैव शौर्ये च कृतलक्षणः ।
दुःशासनो भृशोद्विग्नः प्राद्रवद्गजसंवृतः ॥ ८१
गजाश्वरथसंयुक्तो वृतश्चैव पदातिभिः ।
दुर्योधनो महाराज प्रायात्तत्र महारथः ॥ ८२
गजान्रथान्समारुह्य परस्यापि हयाञ्जनाः ।
प्रकीर्णकेशा विध्वस्ता न द्वावेकत्र धावतः ॥ ८३
नेदमस्तीति पुरुषा हतोत्साहा हतौजसः ।
उत्सृज्य कवचानन्ये प्राद्रवंस्तावका विभो ॥ ८४
अन्योन्यं ते समाक्रोशन्सैनिका भरतर्षभ ।
तिष्ठ तिष्ठेति न च ते स्वयं तत्रावतस्थिरे ॥ ८५

धुर्यान्प्रमुच्य तु रथाद्धतसूतान्स्वलंकृतान् ।
अधिरुह्य हयान्योधाः क्षिप्रं पद्भिरचोदयन् ॥ ८६
द्रवमाणे तथा सैन्ये त्रस्तरूपे हतौजसि ।
प्रतिस्रोत इव ग्राहो द्रोणपुत्रः परानियात् ॥ ८७
हत्वा बहुविधां सेनां पाण्डूनां युद्धदुर्मदः ।
कथंचित्संकटान्मुक्तो मत्तद्विरदविक्रमः ॥ ८८
द्रवमाणं बलं दृष्ट्वा पलायनकृतक्षणम् ।
दुर्योधनं समासाद्य द्रोणपुत्रोऽब्रवीदिदम् ॥ ८९
किमियं द्रवते सेना त्रस्तरूपेव भारत ।
द्रवमाणां च राजेन्द्र नावस्थापयसे रणे ॥ ९०
त्वं चापि न यथापूर्वं प्रकृतिस्थो नराधिप ।
कर्णप्रभृतयश्चेमे नावतिष्ठन्ति पार्थिवाः ॥ ९१
अन्येष्वपि च युद्धेषु नैव सेनाद्रवत्तदा ।
कच्चित्क्षेमं महाबाहो तव सैन्यस्य भारत ॥ ९२
कस्मिन्निदं हते राजन्रथसिंहे बलं तव ।
एतामवस्थां संप्राप्तं तन्ममाचक्ष्व कौरव ॥ ९३
तत्तु दुर्योधनः श्रुत्वा द्रोणपुत्रस्य भाषितम् ।
घोरमप्रियमाख्यातुं नाशकत्पार्थिवर्षभः ॥ ९४
भिन्ना नौरिव ते पुत्रो निमग्नः शोकसागरे ।
बाष्पेण पिहितो दृष्ट्वा द्रोणपुत्रं रथे स्थितम् ॥ ९५
ततः शारद्वतं राजा सव्रीडमिदमब्रवीत् ।
शंसेह सर्वं भद्रं ते यथा सैन्यमिदं द्रुतम् ॥ ९६
अथ शारद्वतो राजन्नार्तिं गच्छन्पुनः पुनः ।
शशंस द्रोणपुत्राय यथा द्रोणो निपातितः ९७

कृप उवाच ।

वयं द्रोणं पुरस्कृत्य पृथिव्यां प्रवरं रथम् ।
प्रावर्तयाम संग्रामं पाञ्चालैरेव केवलैः ॥ ९८
ततः प्रवृत्ते संग्रामे विमिश्राः कुरुसोमकाः ।
अन्योन्यमभिगर्जन्तः शस्त्रैर्देहानपातयन् ॥ ९९
ततो द्रोणो ब्राह्ममस्त्रं विकुर्वाणो नरर्षभः ।
अहनच्छात्रवान्भल्लैः शतशोऽथ सहस्रशः ॥ १००
पाण्डवाः केकया मत्स्याः पाञ्चालाश्च विशेषतः ।
संख्ये द्रोणरथं प्राप्य व्यनशन्कालचोदिताः ॥ १०१
सहस्रं रथसिंहानां द्विसाहस्रं च दन्तिनाम् ।
द्रोणो ब्रह्मास्त्रनिर्दग्धं प्रेषयामास मृत्यवे ॥ १०२
आकर्णपलितः श्यामो वयसाशीतिपञ्चकः ।
रणे पर्यचरद्द्रोणो वृद्धः षोडशवर्षवत् ॥ १०३
क्लिश्यमानेषु सैन्येषु वध्यमानेषु राजसु ।
अमर्षवशमापन्नाः पाञ्चाला विमुखाभवन् ॥ १०४
तेषु किंचित्प्रभग्नेषु विमुखेषु सपत्नजित् ।
दिव्यमस्त्रं विकुर्वाणो बभूवार्क इवोदितः ॥ १०५
स मध्यं प्राप्य पाण्डूनां शररश्मिः प्रतापवान् ।
मध्यंगत इवादित्यो दुष्प्रेक्ष्यस्ते पिताभवत् ॥ १०६
ते दह्यमाना द्रोणेन सूर्येणेव विराजता ।
दग्धवीर्या निरुत्साहा बभूवुर्गतचेतसः ॥ १०७
तान्दृष्ट्वा पीडितान्बाणैर्द्रोणेन मधुसूदनः ।
जयैषी पाण्डुपुत्राणामिदं वचनमब्रवीत् ॥ १०८
नैष जातु परैः शक्यो जेतुं शस्त्रभृतां वरः ।
अपि वृत्रहणा संख्ये रथयूथपयूथपः ॥ १०९
ते यूयं धर्ममुत्सृज्य जयं रक्षत पाण्डवाः ।
यथा वः संयुगे सर्वान्न हन्याद्रुक्मवाहनः ॥ ११०
अश्वत्थाम्नि हते नैष युध्येदिति मतिर्मम ।
हतं तं संयुगे कश्चिदाख्यात्वस्मै मृषा नरः ॥ १११
एतन्नारोचयद्वाक्यं कुन्तीपुत्रो धनंजयः ।
अरोचयंस्तु सर्वेऽन्ये कृच्छ्रेण तु युधिष्ठिरः ॥ ११२
भीमसेनस्तु सव्रीडमब्रवीत्पितरं तव ।
अश्वत्थामा हत इति तच्चाबुध्यत ते पिता ॥ ११३
स शङ्कमानस्तन्मिथ्या धर्मराजमपृच्छत ।
हतं वाप्यहतं वाजौ त्वां पिता पुत्रवत्सलः ॥ ११४
तदतथ्यभये मग्नो जये सक्तो युधिष्ठिरः ।

अश्वत्थामानमाहेदं हतः कुञ्जर इत्युत ।
भीमेन गिरिवर्ष्माणं मालवस्येन्द्रवर्मणः ।। ११५
उपसृत्य तदा द्रोणमुच्चैरिदमभाषत ।
यस्यार्थे शस्त्रमाधत्से यमवेक्ष्य च जीवसि ।
पुत्रस्ते दयितो नित्यं सोऽश्वत्थामा निपातितः ।।
तच्छ्रुत्वा विमनास्तत्र आचार्यो महदप्रियम् ।
नियम्य दिव्यान्यस्त्राणि नायुध्यत यथा पुरा ।। ११७
तं दृष्ट्वा परमोद्विग्नं शोकोपहतचेतसम् ।
पाञ्चालराजस्य सुतः क्रूरकर्मा समाद्रवत् ।। ११८
तं दृष्ट्वा विहितं मृत्युं लोकतत्त्वविचक्षणः ।
दिव्यान्यस्त्राण्यथोत्सृज्य रणे प्राय उपाविशत् ।।
ततोऽस्य केशान्सव्येन गृहीत्वा पाणिना तदा ।
पार्षतः क्रोशमानानां वीराणामच्छिनच्छिरः ।।१२०
न हन्तव्यो न हन्तव्य इति ते सर्वतोऽब्रुवन् ।
तथैव चार्जुनो वाहादवरुह्यैनमाद्रवत् ।। १२१
उद्यम्य बाहू त्वरितो ब्रुवाणश्च पुनः पुनः ।
जीवन्तमानयाचार्यं मा वधीरिति धर्मवित् ।।१२२
तथापि वार्यमाणेन कौरवैरर्जुनेन च ।
हत एव नृशंसेन पिता तव नरर्षभ ।। १२३
सैनिकाश्च ततः सर्वे प्राद्रवन्त भयार्दिताः ।
वयं चापि निरुत्साहा हते पितरि तेऽनघ ।।१२४

संजय उवाच ।

तच्छ्रुत्वा द्रोणपुत्रस्तु निधनं पितुराहवे ।
क्रोधमाहारयत्तीव्रं पदाहत इवोरगः ।। १२५

इति श्रीमहाभारते द्रोणपर्वणि
पञ्चषष्ट्यधिकशततमोऽध्यायः ।। १६५ ।।

।। समाप्तं द्रोणवधपर्व ।।

१६६

धृतराष्ट्र उवाच ।

अधर्मेण हतं श्रुत्वा धृष्टद्युम्नेन संजय ।
ब्राह्मणं पितरं वृद्धमश्वत्थामा किमब्रवीत् ।। १
मानुषं वारुणाग्नेयं ब्राह्ममस्त्रं च वीर्यवान् ।
ऐन्द्रं नारायणं चैव यस्मिन्नित्यं प्रतिष्ठितम् ।। २
तमधर्मेण धर्मिष्ठं धृष्टद्युम्नेन संजय ।
श्रुत्वा निहतमाचार्यमश्वत्थामा किमब्रवीत् ।। ३
येन रामादवाप्येह धनुर्वेदं महात्मना ।
प्रोक्तान्यस्त्राणि दिव्यानि पुत्राय गुरुकाङ्क्षिणे ।। ४
एकमेव हि लोकेऽस्मिन्नात्मनो गुणवत्तरम् ।
इच्छन्ति पुत्रं पुरुषा लोके नान्यं कथंचन ।। ५
आचार्याणां भवन्त्येव रहस्यानि महात्मनाम् ।
तानि पुत्राय वा दद्युः शिष्यायानुगताय वा ।। ६
स शिल्पं प्राप्य तत्सर्वं सविशेषं च संजय ।
शूरः शारद्वतीपुत्रः संख्ये द्रोणादनन्तरः ।। ७
रामस्यानुमतः शास्त्रे पुरंदरसमो युधि ।
कार्तवीर्यसमो वीर्ये बृहस्पतिसमो मतौ ।। ८
महीधरसमो धृत्या तेजसाग्निसमो युवा ।
समुद्र इव गाम्भीर्ये क्रोधे सर्पविषोपमः ।। ९
स रथी प्रथमो लोके दृढधन्वा जितक्लमः ।
शीघ्रोऽनिल इवाक्रन्दे चरन्क्रुद्ध इवान्तकः ।। १०
अस्यता येन संग्रामे धरण्यभिनिपीडिता ।
यो न व्यथति संग्रामे वीरः सत्यपराक्रमः ।। ११
वेदस्नातो व्रतस्नातो धनुर्वेदे च पारगः ।
महोदधिरिवाक्षोभ्यो रामो दाशरथिर्यथा ।। १२
तमधर्मेण धर्मिष्ठं धृष्टद्युम्नेन संयुगे ।
श्रुत्वा निहतमाचार्यमश्वत्थामा किमब्रवीत् ।। १३
धृष्टद्युम्नस्य यो मृत्युः सृष्टस्तेन महात्मना ।
यथा द्रोणस्य पाञ्चाल्यो यज्ञसेनसुतोऽभवत् ।। १४
तं नृशंसेन पापेन क्रूरेणात्यल्पदर्शिना ।
श्रुत्वा निहतमाचार्यमश्वत्थामा किमब्रवीत् ।। १५

संजय उवाच ।
छद्मना निहतं श्रुत्वा पितरं पापकर्मणा ।
बाष्पेणापूर्यत द्रौणी रोषेण च नरर्षभ ॥ १६
तस्य क्रुद्धस्य राजेन्द्र वपुर्दिव्यमदृश्यत ।
अन्तकस्येव भूतानि जिहीर्षोः कालपर्यये ॥ १७
अश्रुपूर्णे ततो नेत्रे अपमृज्य पुनः पुनः ।
उवाच कोपान्निःश्वस्य दुर्योधनमिदं वचः ॥ १८
पिता मम यथा क्षुद्रैर्न्यस्तशस्त्रो निपातितः ।
धर्मध्वजवता पापं कृतं तद्विदितं मम ।
अनार्यं सुनृशंसस्य धर्मपुत्रस्य मे श्रुतम् ॥ १९
युद्धेष्वपि प्रवृत्तानां ध्रुवौ जयपराजयौ ।
द्वयमेतद्भवेद्राजन्वधस्तत्र प्रशस्यते ॥ २०
न्यायवृत्तो वधो यस्तु संग्रामे युध्यतो भवेत् ।
न स दुःखाय भवति तथा दृष्टो हि स द्विजः ॥
गतः स वीरलोकाय पिता मम न संशयः ।
न शोच्यः पुरुषव्याघ्रस्तथा स निधनं गतः ॥२२
यत्तु धर्मप्रवृत्तः सन्केशग्रहणमाप्तवान् ।
पश्यतां सर्वसैन्यानां तन्मे मर्माणि कृन्तति ॥२३
कामात्क्रोधादवज्ञानाद्दर्पाद्बाल्येन वा पुनः ।
वैधर्मिकानि कुर्वन्ति तथा परिभवेन च ॥ २४
तदिदं पार्षतेनेह महदाधर्मिकं कृतम् ।
अवज्ञाय च मां नूनं नृशंसेन दुरात्मना ॥ २५
तस्यानुबन्धं स द्रष्टा धृष्टद्युम्नः सुदारुणम् ।
अनार्यं परमं कृत्वा मिथ्यावादी च पाण्डवः ॥२६
यो ह्यसौ छद्मनाचार्यं शस्त्रं संन्यासयत्तदा ।
तस्याद्य धर्मराजस्य भूमिः पास्यति शोणितम् ॥२७
सर्वोपायैर्यतिष्यामि पाञ्चालानामहं वधे ।
धृष्टद्युम्नं च समरे हन्ताहं पापकारिणम् ॥ २८
कर्मणा येन तेनेह मृदुना दारुणेन वा ।
पाञ्चालानां वधं कृत्वा शान्तिं लब्धास्मि कौरव ॥
यदर्थं पुरुषव्याघ्र पुत्रमिच्छन्ति मानवाः ।
प्रेत्य चेह च संप्राप्तं त्राणाय महतो भयात् ॥ ३०
पित्रा तु मम सावस्था प्राप्ता निर्बन्धुना यथा ।
मयि शैलप्रतीकाशे पुत्रे शिष्ये च जीवति ॥ ३१
धिङ्ममास्त्राणि दिव्यानि धिग्बाहू धिक्पराक्रमम् ।
यन्मां द्रोणः सुतं प्राप्य केशग्रहणमाप्तवान् ॥ ३२
स तथाहं करिष्यामि यथा भरतसत्तम ।
परलोकगतस्यापि गमिष्याम्यनृणः पितुः ॥ ३३
आर्येण तु न वक्तव्या कदाचित्स्तुतिरात्मनः ।
पितुर्वधममृष्यंस्तु वक्ष्याम्यद्येह पौरुषम् ॥ ३४
अद्य पश्यन्तु मे वीर्यं पाण्डवाः सजनार्दनाः ।
मृद्नतः सर्वसैन्यानि युगान्तमिव कुर्वतः ॥ ३५
न हि देवा न गन्धर्वा नासुरा न च राक्षसाः ।
अद्य शक्ता रणे जेतुं रथस्थं मां नरर्षभ ॥ ३६
मदन्यो नास्ति लोकेऽस्मिन्नर्जुनाद्वास्त्रवित्तमः ।
अहं हि ज्वलतां मध्ये मयूखानामिवांशुमान् ।
प्रयोक्ता देवसृष्टानामस्त्राणां पृतनागतः ॥ ३७
कृशाश्वतनया ह्यद्य मत्प्रयुक्ता महामृधे ।
दर्शयन्तोऽऽत्मनो वीर्यं प्रमथिष्यन्ति पाण्डवान् ॥
अद्य सर्वा दिशो राजन्धाराभिरिव संकुलाः ।
आवृताः पत्रिभिस्तीक्ष्णैर्द्रष्टारो मामकैरिह ॥ ३९
किरन्हि शरजालानि सर्वतो भैरवस्वरम् ।
शत्रून्निपातयिष्यामि महावात इव द्रुमान् ॥ ४०
न च जानाति बीभत्सुस्तदस्त्रं न जनार्दनः ।
न भीमसेनो न यमौ न च राजा युधिष्ठिरः ॥४१
न पार्षतो दुरात्मासौ न शिखण्डी न सात्यकिः ।
यदिदं मयि कौरव्य सकल्पं सनिवर्तनम् ॥ ४२
नारायणाय मे पित्रा प्रणम्य विधिपूर्वकम् ।
उपहारः पुरा दत्तो ब्रह्मरूप उपस्थिते ॥ ४३
तं स्वयं प्रतिगृह्याथ भगवान्स वरं ददौ ।

वव्रे पिता मे परममस्त्रं नारायणं ततः ॥ ४४
अथैनमब्रवीद्राजन्भगवान्देवसत्तमः ।
भविता त्वत्समो नान्यः कश्चिद्युधि नरः क्वचित् ॥
न त्विदं सहसा ब्रह्मन्प्रयोक्तव्यं कथंचन ।
न ह्येतदस्त्रमन्यत्र वधाच्छत्रोर्निवर्तते ॥ ४६
न चैतच्छक्यते ज्ञातुं को न वध्येदिति प्रभो ।
अवध्यमपि हन्याद्धि तस्मान्नैतत्प्रयोजयेत् ॥ ४७
वधः संख्ये द्रवश्चैव शस्त्राणां च विसर्जनम् ।
प्रयाचनं च शत्रूणां गमनं शरणस्य च ॥ ४८
एते प्रशमने योगा महास्त्रस्य परंतप ।
सर्वथा पीडितो हि स्यादवध्यान्पीडयन्रणे ॥ ४९
तज्जग्राह पिता मह्यमब्रवीच्चैव स प्रभुः ।
त्वं वर्षिष्यसि दिव्यानि शस्त्रवर्षाण्यनेकशः ।
अनेनास्त्रेण संग्रामे तेजसा च ज्वलिष्यसि ॥ ५०
एवमुक्त्वा स भगवान्दिवमाचक्रमे प्रभुः ।
एतन्नारायणादस्त्रं तत्प्राप्तं मम बन्धुना ॥ ५१
तेनाहं पाण्डवांश्चैव पाञ्चालान्मत्स्यकेकयान् ।
विद्रावयिष्यामि रणे शचीपतिरिवासुरान् ॥ ५२
यथा यथाहमिच्छेयं तथा भूत्वा शरा मम ।
निपतेयुः सपत्नेषु विक्रमत्स्वपि भारत ॥ ५३
यथेष्टमश्मवर्षेण प्रवर्षिष्ये रणे स्थितः ।
अयोमुखैश्च विहगैर्द्रावयिष्ये महारथान् ।
परश्वधांश्च विविधान्प्रसक्ष्येऽहमसंशयम् ॥ ५४
सोऽहं नारायणास्त्रेण महता शत्रुतापन ।
शत्रून्विध्वंसयिष्यामि कदर्थीकृत्य पाण्डवान् ॥ ५५
मित्रब्रह्मगुरुद्वेषी जाल्मकः सुविगर्हितः ।
पाञ्चालापसदश्चाद्य न मे जीवन्विमोक्ष्यते ॥ ५६
तच्छ्रुत्वा द्रोणपुत्रस्य पर्यवर्तत वाहिनी ।
ततः सर्वे महाशङ्खान्दध्मुः पुरुषसत्तमाः ॥ ५७
भेरीश्चाभ्यहनन्हृष्टा डिण्डिमांश्च सहस्रशः ।
तथा ननाद वसुधा खुरनेमिप्रपीडिता ।
स शब्दस्तुमुलः खं द्यां पृथिवीं च व्यनादयत् ॥
तं शब्दं पाण्डवाः श्रुत्वा पर्जन्यनिनदोपमम् ।
समेत्य रथिनां श्रेष्ठाः सहिताः संन्यमन्त्रयन् ॥ ५९
तथोक्त्वा द्रोणपुत्रोऽपि तदोपस्पृश्य भारत ।
प्रादुश्चकार तद्दिव्यमस्त्रं नारायणं तदा ॥ ६०

इति श्रीमहाभारते द्रोणपर्वणि
षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥

१६७

संजय उवाच ।

प्रादुर्भूते ततस्तस्मिन्नस्त्रे नारायणे तदा ।
प्रावात्सपृषतो वायुरनभ्रे स्तनयित्नुमान् ॥ १
चचाल पृथिवी चापि चुक्षुभे च महोदधिः ।
प्रतिस्रोतः प्रवृत्ताश्च गन्तुं तत्र समुद्रगाः ॥ २
शिखराणि व्यदीर्यन्त गिरीणां तत्र भारत ।
अपसव्यं मृगाश्चैव पाण्डुपुत्रान्प्रचक्रिरे ॥ ३
तमसा चावकीर्यन्त सूर्यश्च कलुषोऽभवत् ।
संपतन्ति च भूतानि क्रव्यादानि प्रहृष्टवत् ॥ ४
देवदानवगन्धर्वास्त्रस्ता आसन्विशां पते ।
कथं कथाभवत्तीव्रा दृष्ट्वा तद्व्याकुलं महत् ॥ ५
व्यथिताः सर्वराजानस्तदा ह्यासन्विचेतसः ।
तद्दृष्ट्वा घोररूपं तु द्रौणेरस्त्रं भयावहम् ॥ ६

धृतराष्ट्र उवाच ।

निवर्तितेषु सैन्येषु द्रोणपुत्रेण संयुगे ।
भृशं शोकाभितप्तेन पितुर्वधममृष्यता ॥ ७
कुरूनापततो दृष्ट्वा धृष्टद्युम्नस्य रक्षणे ।
को मन्त्रः पाण्डवेष्वासीत्तन्ममाचक्ष्व संजय ॥ ८

संजय उवाच ।

प्रागेव विद्रुतान्दृष्ट्वा धार्तराष्ट्रान्युधिष्ठिरः ।
पुनश्च तुमुलं शब्दं श्रुत्वार्जुनमभाषत ॥ ९

आचार्ये निहते द्रोणे धृष्टद्युम्नेन संयुगे ।
निहते वज्रहस्तेन यथा वृत्रे महासुरे ॥ १०
नाशंसन्त जयं युद्धे दीनात्मानो धनंजय ।
आत्मत्राणे मतिं कृत्वा प्राद्रवन्कुरवो यथा ॥ ११
केचिद्भ्रान्तै रथैस्तूर्णं निहतपार्ष्णियन्तृभिः ।
विपताकध्वजच्छत्रैः पार्थिवाः शीर्णकूबरैः ॥ १२
भग्ननीडैराकुलाश्वैरारुह्यान्ये विचेतसः ।
भीताः पादैर्हयान्केचित्त्वरयन्तः स्वयं रथैः ।
युगचक्राक्षभग्नैश्च द्रुताः केचिद्भयातुराः ॥ १३
गजस्कन्धेषु संस्यूता नाराचैश्चलितासनाः ।
शरार्तैर्विद्रुतैर्नागैर्हृताः केचिद्दिशो दश ॥ १४
विशस्त्रकवचाश्चान्ये वाहनेभ्यः क्षितिं गताः ।
संछिन्ना नेमिषु गता मृदिताश्च हयद्विपैः ॥ १५
क्रोशन्तस्तात पुत्रेति पलायन्तोऽपरे भयात् ।
नाभिजानन्ति चान्योन्यं कश्मलाभिहतौजसः ॥ १६
पुत्रान्पितॄन्सखीन्भ्रातॄन्समारोप्य दृढक्षतान् ।
जलेन क्लेदयन्त्यन्ये विमुच्य कवचान्यपि ॥ १७
अवस्थां तादृशीं प्राप्य हते द्रोणे द्रुतं बलम् ।
पुनरावर्तितं केन यदि जानासि शंस मे ॥ १८
हयानां हेषतां शब्दः कुञ्जराणां च बृंहताम् ।
रथनेमिस्वनश्चात्र विमिश्रः श्रूयते महान् ॥ १९
एते शब्दा भृशं तीव्राः प्रवृत्ताः कुरुसागरे ।
मुहुर्मुहुरुदीर्यन्तः कम्पयन्ति हि मामकान् ॥ २०
य एष तुमुलः शब्दः श्रूयते लोमहर्षणः ।
सेन्द्रानप्येष लोकांस्त्रीन्भञ्ज्यादिति मतिर्मम ॥ २१
मन्ये वज्रधरस्यैष निनादो भैरवस्वनः ।
द्रोणे हते कौरवार्थं व्यक्तमभ्येति वासवः ॥ २२
प्रहृष्टलोमकूपाः स्म संविग्नरथकुञ्जराः ।
धनंजय गुरुं श्रुत्वा तत्र नादं सुभीषणम् ॥ २३
क एष कौरवान्दीर्णानवस्थाप्य महारथः ।
निवर्तयति युद्धार्थं मृधे देवेश्वरो यथा ॥ २४

अर्जुन उवाच ।

उद्यम्यात्मानमुग्राय कर्मणे धैर्यमास्थिताः ।
धमन्ति कौरवाः शङ्खान्यस्य वीर्यमुपाश्रिताः ॥ २५
यत्र ते संशयो राजन्न्यस्तशस्त्रे गुरौ हते ।
धार्तराष्ट्रानवस्थाप्य क एष नदतीति ह ॥ २६
ह्रीमन्तं तं महाबाहुं मत्तद्विरदगामिनम् ।
व्याख्यास्याम्युग्रकर्माणं कुरूणामभयंकरम् ॥ २७
यस्मिञ्जाते ददौ द्रोणो गवां दशशतं धनम् ।
ब्राह्मणेभ्यो महार्हेभ्यः सोऽश्वत्थामैष गर्जति ॥ २८
जातमात्रेण वीरेण येनोच्चैःश्रवसा इव ।
हेषता कम्पिता भूमिर्लोकाश्च सकलास्त्रयः ॥ २९
तच्छ्रुत्वान्तर्हितं भूतं नाम चास्याकरोत्तदा ।
अश्वत्थामेति सोऽद्यैष शूरो नदति पाण्डव ॥ ३०
योऽद्यानाथ इवाक्रम्य पार्षतेन हतस्तथा ।
कर्मणा सुनृशंसेन तस्य नाथो व्यवस्थितः ॥ ३१
गुरुं मे यत्र पाञ्चाल्यः केशपक्षे परामृशत् ।
तत्र जातु क्षमेद्द्रौणिर्जानन्पौरुषमात्मनः ॥ ३२
उपचीर्णो गुरुर्मिथ्या भवता राज्यकारणात् ।
धर्मज्ञेन सता नाम सोऽधर्मः सुमहान्कृतः ॥ ३३
सर्वधर्मोपपन्नोऽयं मम शिष्यश्च पाण्डवः ।
नायं वक्ष्यति मिथ्येति प्रत्ययं कृतवांस्त्वयि ॥ ३४
स सत्यकञ्चुकं नाम प्रविष्टेन ततोऽनृतम् ।
आचार्य उक्तो भवता हतः कुञ्जर इत्युत ॥ ३५
ततः शस्त्रं समुत्सृज्य निर्ममो गतचेतनः ।
आसीत्स विह्वलो राजन्यथा दृष्टस्त्वया विभुः ॥ ३६
स तु शोकेन चाविष्टो विमुखः पुत्रवत्सलः ।
शाश्वतं धर्ममुत्सृज्य गुरुः शिष्येण घातितः ॥ ३७
न्यस्तशस्त्रमधर्मेण घातयित्वा गुरुं भवान् ।
रक्षत्विदानीं सामात्यो यदि शक्नोषि पार्षतम् ॥ ३८

ग्रस्तमाचार्यपुत्रेण क्रुद्धेन हतबन्धुना ।
सर्वे वयं परित्रातुं न शक्ष्यामोऽद्य पार्षतम् ॥ ३९
सौहार्दं सर्वभूतेषु यः करोत्यतिमात्रशः ।
सोऽद्य केशग्रहं श्रुत्वा पितुर्धक्ष्यति नो रणे ॥ ४०
विक्रोशमाने हि मयि भृशमाचार्यगृद्धिनि ।
अवकीर्य स्वधर्मं हि शिष्येण निहतो गुरुः ॥ ४१
यदा गतं वयो भूयः शिष्टमल्पतरं च नः ।
तस्येदानीं विकारोऽयमधर्मो यत्कृतो महान् ॥ ४२
पितेव नित्यं सौहार्दात्पितेव स हि धर्मतः ।
सोऽल्पकालस्य राज्यस्य कारणान्निहतो गुरुः ॥ ४३
धृतराष्ट्रेण भीष्माय द्रोणाय च विशां पते ।
विसृष्टा पृथिवी सर्वा सह पुत्रैश्च तत्परैः ॥ ४४
स प्राप्य तादृशीं वृत्तिं सत्कृतः सततं परैः ।
अवृणीत सदा पुत्रान्मामेवाभ्यधिकं गुरुः ॥ ४५
अक्षीयमाणो न्यस्तास्त्रस्त्वद्वाक्येनाहवे हतः ।
न त्वेनं युध्यमानं वै हन्यादपि शतक्रतुः ॥ ४६
तस्याचार्यस्य वृद्धस्य द्रोहो नित्योपकारिणः ।
कृतो ह्यनार्यैरस्माभी राज्यार्थे लघुबुद्धिभिः ॥ ४७
पुत्रान्भ्रातृन्पितृन्दारान्जीवितं चैव वासविः ।
त्यजेत्सर्वं मम प्रेम्णा जानात्येतद्धि मे गुरुः ॥४८
स मया राज्यकामेन हन्यमानोऽप्युपेक्षितः ।
तस्मादवाक्शिरा राजन्प्राप्तोऽस्मि नरकं विभो ॥४९
ब्राह्मणं वृद्धमाचार्यं न्यस्तशस्त्रं यथा मुनिम् ।
घातयित्वाद्य राज्यार्थे मृतं श्रेयो न जीवितम्॥५०

इति श्रीमहाभारते द्रोणपर्वणि
सप्तषष्ट्यधिकशततमोऽध्यायः ॥ १६७ ॥

१६८

संजय उवाच ।

अर्जुनस्य वचः श्रुत्वा नोचुस्तत्र महारथाः ।
अप्रियं वा प्रियं वापि महाराज धनंजयम् ॥ १
ततः क्रुद्धो महाबाहुर्भीमसेनोऽभ्यभाषत ।
उत्स्मयन्निव कौन्तेयमर्जुनं भरतर्षभ ॥ २
मुनिर्यथारण्यगतो भाषसे धर्मसंहितम् ।
न्यस्तदण्डो यथा पार्थ ब्राह्मणः संशितव्रतः ॥ ३
क्षतात्त्राता क्षताज्जीवन्क्षान्तस्त्रिष्वपि साधुषु ।
क्षत्रियः क्षितिमाप्नोति क्षिप्रं धर्मं यशः श्रियम् ॥४
स भवान्क्षत्रियगुणैर्युक्तः सर्वैः कुलोद्वहः ।
अविपश्चिद्यथा वाक्यं व्याहरन्नाद्य शोभसे ॥ ५
पराक्रमस्ते कौन्तेय शक्रस्येव शचीपतेः ।
न चातिवर्तसे धर्मं वेलामिव महोदधिः ॥ ६
न पूजयेत्त्वा को न्वद्य यत्त्रयोदशवार्षिकम् ।
अमर्षं पृष्ठतः कृत्वा धर्ममेवाभिकाङ्क्षसे ॥ ७
दिष्ट्या तात मनस्तेऽद्य स्वधर्ममनुवर्तते ।
आनृशंस्ये च ते दिष्ट्या बुद्धिः सततमच्युत ॥ ८
यत्तु धर्मप्रवृत्तस्य हृतं राज्यमधर्मतः ।
द्रौपदी च परामृष्टा सभामानीय शत्रुभिः ॥ ९
वनं प्रव्राजिताश्चास्म वल्कलाजिनवाससः ।
अनर्हमाणास्तं भावं त्रयोदश समाः परैः ॥ १०
एतान्यमर्षस्थानानि मर्षितानि त्वयानघ ।
क्षत्रधर्मप्रसक्तेन सर्वमेतदनुष्ठितम् ॥ ११
तमधर्ममपाक्रष्टुमारब्धः सहितस्त्वया ।
सानुबन्धान्हनिष्यामि क्षुद्रान्राज्यहरानहम् ॥ १२
त्वया तु कथितं पूर्वं युद्धायाभ्यागता वयम् ।
घटामश्च यथाशक्ति त्वं तु नोऽद्य जुगुप्ससे ॥१३
स्वधर्मं नेच्छसे ज्ञातुं मिथ्या वचनमेव ते ।
भयार्दितानामस्माकं वाचा मर्माणि कृन्तसि ॥ १४
वपन्व्रणे क्षारमिव क्षतानां शत्रुकर्शन ।
विदीर्यते मे हृदयं त्वया वाक्शल्यपीडितम् ॥ १५
अधर्ममेतद्विपुलं धार्मिकः सन्न बुध्यसे ।
यत्त्वमात्मानमस्मांश्च प्रशंस्यान्न प्रशंससि ।

यः कलां षोडशीं त्वत्तो नार्हते तं प्रशंससि ॥१६
स्वयमेवात्मनो वक्तुं न युक्तं गुणसंस्तवम् ।
दारयेयं महीं क्रोधाद्विकिरेयं च पर्वतान् ॥ १७
आविध्य च गदां गुर्वीं भीमां काञ्चनमालिनीम् ।
गिरिप्रकाशान्क्षितिजान्भञ्जेयमनिलो यथा ॥ १८
स त्वमेवंविधं जानन्भ्रातरं मां नरर्षभ ।
द्रोणपुत्राद्भयं कर्तुं नार्हस्यमितविक्रम ॥ १९
अथ वा तिष्ठ बीभत्सो सह सर्वैर्नरर्षभैः ।
अहमेनं गदापाणिर्जेष्याम्येको महाहवे ॥ २०
ततः पाञ्चालराजस्य पुत्रः पार्थमथाब्रवीत् ।
संक्रुद्धमिव नर्दन्तं हिरण्यकशिपुं हरिः ॥ २१
बीभत्सो विप्रकर्माणि विदितानि मनीषिणाम् ।
याजनाध्यापने दानं तथा यज्ञप्रतिग्रहौ ॥ २२
षष्ठमध्ययनं नाम तेषां कस्मिन्प्रतिष्ठितः ।
हतो द्रोणो मया यत्तत्किं मां पार्थ विगर्हसे ॥२३
अपक्रान्तः स्वधर्माच्च क्षत्रधर्ममुपाश्रितः ।
अमानुषेण हन्त्यस्मानस्त्रेण क्षुद्रकर्मकृत् ॥ २४
तथा मायां प्रयुञ्जानमसह्यं ब्राह्मणमब्रुवम् ।
माययैव निहन्याद्यो न युक्तं पार्थ तत्र किम् ॥२५
तस्मिंस्तथा मया शस्ते यदि द्रौणायनी रुषा ।
कुरुते भैरवं नादं तत्र किं मम हीयते ॥ २६
न चाद्भुतमिदं मन्ये यद्द्रौणिः शुद्धगर्जया ।
घातयिष्यति कौरव्यान्परित्रातुमशक्नुवन् ॥ २७
यच्च मां धार्मिको भूत्वा ब्रवीषि गुरुघातिनम् ।
तदर्थमहमुत्पन्नः पाञ्चाल्यस्य सुतोऽनलात् ॥ २८
यस्य कार्यमकार्यं वा युध्यतः स्यात्समं रणे ।
तं कथं ब्राह्मणं ब्रूयाः क्षत्रियं वा धनंजय ॥ २९
यो ह्यनस्त्रविदो हन्याद्ब्रह्मास्त्रैः क्रोधमूर्छितः ।
सर्वोपायैर्न स कथं वध्यः पुरुषसत्तम ॥ ३०
विधर्मिणं धर्मविद्भिः प्रोक्तं तेषां विषोपमम् ।
जानन्धर्मार्थतत्त्वज्ञः किमर्जुन विगर्हसे ॥ ३१
नृशंसः स मयाक्रम्य रथ एव निपातितः ।
तन्माभिनन्द्यं बीभत्सो किमर्थं नाभिनन्दसे ॥३२
कृते रणे कथं पार्थ ज्वलनार्कविषोपमम् ।
भीमं द्रोणशिरश्छेदे प्रशस्यं न प्रशंससि ॥ ३३
योऽसौ ममैव नान्यस्य बान्धवान्युधि जघ्निवान् ।
छित्त्वापि तस्य मूर्धानं नैवास्मि विगतज्वरः ॥३४
तच्च मे कृन्तते मर्म यन्न तस्य शिरो मया ।
निषादविषये क्षिप्तं जयद्रथशिरो यथा ॥ ३५
अवधश्चापि शत्रूणामधर्मः शिष्यतेऽर्जुन ।
क्षत्रियस्य ह्ययं धर्मो हन्याद्धन्येत वा पुनः ॥ ३६
स शत्रुर्निहतः संख्ये मया धर्मेण पाण्डव ।
यथा त्वया हतः शूरो भगदत्तः पितुः सखा ॥३७
पितामहं रणे हत्वा मन्यसे धर्ममात्मनः ।
मया शत्रौ हते कस्मात्पापे धर्मं न मन्यसे ॥ ३८
नानृतः पाण्डवो ज्येष्ठो नाहं वाधार्मिकोऽर्जुन ।
शिष्यध्रुङ्निहतः पापो युध्यस्व विजयस्तव ॥ ३९

इति श्रीमहाभारते द्रोणपर्वणि
अष्टषष्ट्यधिकशततमोऽध्यायः ॥ १६८ ॥

१६९

धृतराष्ट्र उवाच ।

साङ्गा वेदा यथान्यायं येनाधीता महात्मना ।
यस्मिन्साक्षाद्धनुर्वेदो ह्रीनिषेधे प्रतिष्ठितः ॥ १
तस्मिन्नाक्रुश्यति द्रोणे महर्षितनये तदा ।
नीचात्मना नृशंसेन क्षुद्रेण गुरुघातिना ॥ २
यस्य प्रसादात्कर्माणि कुर्वन्ति पुरुषर्षभाः ।
अमानुषाणि संग्रामे देवैरसुकराणि च ॥ ३
तस्मिन्नाक्रुश्यति द्रोणे समक्षं पापकर्मिणः ।
नामर्षं तत्र कुर्वन्ति धिक्क्षत्रं धिगमर्षितम् ॥ ४
पार्थाः सर्वे च राजानः पृथिव्यां ये धनुर्धराः ।

श्रुत्वा किमाहुः पाञ्चाल्यं तन्ममाचक्ष्व संजय ॥ ५
संजय उवाच ।
श्रुत्वा द्रुपदपुत्रस्य ता वाचः क्रूरकर्मणः ।
तूष्णींबभूवू राजानः सर्व एव विशां पते ॥ ६
अर्जुनस्तु कटाक्षेण जिह्मं प्रेक्ष्य च पार्षतम् ।
सबाष्पमभिनिःश्वस्य धिग्धिग्धिगिति चाब्रवीत् ॥
युधिष्ठिरश्च भीमश्च यमौ कृष्णस्तथापरे ।
आसन्सुव्रीडिता राजन्सात्यकिरिदमब्रवीत् ॥ ८
नेहास्ति पुरुषः कश्चिद्य इमं पापपूरुषम् ।
भाषमाणमकल्याणं शीघ्रं हन्यान्नराधमम् ॥ ९
कथं च शतधा जिह्वा न ते मूर्धा च दीर्यते ।
गुरुमाक्रोशतः क्षुद्र न चाधर्मेण पात्यसे ॥ १०
याप्यस्त्वमसि पार्थैश्च सर्वैश्चान्धकवृष्णिभिः ।
यत्कर्म कलुषं कृत्वा श्लाघसे जनसंसदि ॥ ११
अकार्यं तादृशं कृत्वा पुनरेव गुरुं क्षिपन् ।
वध्यस्त्वं न त्वयार्थोऽस्ति मुहूर्तमपि जीवता ॥ १२
कस्त्वेतद्व्यवसेदार्यस्त्वदन्यः पुरुषाधमः ।
निगृह्य केशेषु वधं गुरोर्धर्मात्मनः सतः ॥ १३
सप्तावरे तथा पूर्वे बान्धवास्ते निपातिताः ।
यशसा च परित्यक्तास्त्वां प्राप्य कुलपांसनम् ॥ १४
उक्तवांश्चापि यत्पार्थं भीष्मं प्रति नरर्षभम् ।
तथान्तो विहितस्तेन स्वयमेव महात्मना ॥ १५
तस्यापि तव सोदर्यो निहन्ता पापकृत्तमः ।
नान्यः पाञ्चालपुत्रेभ्यो विद्यते भुवि पापकृत् ॥ १६
स चापि सृष्टः पित्रा ते भीष्मस्यान्तकरः किल ।
शिखण्डी रक्षितस्तेन स च मृत्युर्महात्मनः ॥ १७
पाञ्चालाश्चलिता धर्मात्क्षुद्रा मित्रगुरुद्रुहः ।
त्वां प्राप्य सहसोदर्यं धिक्कृतं सर्वसाधुभिः ॥ १८
पुनश्चेदीदृशीं वाचं मत्समीपे वदिष्यसि ।
शिरस्ते पातयिष्यामि गदया वज्रकल्पया ॥ १९
सात्वतेनैवमाक्षिप्तः पार्षतः परुषाक्षरम् ।
संरब्धः सात्यकिं प्राह संक्रुद्धः प्रहसन्निव ॥ २०
श्रूयते श्रूयते चेति क्षम्यते चेति माधव ।
न चानार्यं शुभं साधुं पुरुषं क्षेप्तुमर्हसि ॥ २१
क्षमा प्रशस्यते लोके न तु पापोऽर्हति क्षमाम् ।
क्षमावन्तं हि पापात्मा जितोऽयमिति मन्यते ॥ २२
स त्वं क्षुद्रसमाचारो नीचात्मा पापनिश्चयः ।
आ केशाग्रान्नखाग्राच्च वक्तव्यो वक्तुमिच्छसि ॥ २३
यः स भूरिश्रवाश्छिन्ने भुजे प्रायगतस्त्वया ।
वार्यमाणेन निहतस्ततः पापतरं नु किम् ॥ २४
व्यूहमानो मया द्रोणो दिव्येनास्त्रेण संयुगे ।
विसृष्टशस्त्रो निहतः किं तत्र क्रूर दुष्कृतम् ॥ २५
अयुध्यमानं यस्त्वाजौ तथा प्रायगतं मुनिम् ।
छिन्नबाहुं परैर्हन्यात्सात्यके स कथं भवेत् ॥ २६
निहत्य त्वां यदा भूमौ स विक्रामति वीर्यवान् ।
किं तदा न निहंस्येनं भूत्वा पुरुषसत्तमः ॥ २७
त्वया पुनरनार्येण पूर्वं पार्थेन निर्जितः ।
यदा तदा हतः शूरः सौमदत्तिः प्रतापवान् ॥ २८
यत्र यत्र तु पाण्डूनां द्रोणो द्रावयते चमूम् ।
किरञ्शरसहस्राणि तत्र तत्र प्रयाम्यहम् ॥ २९
स त्वमेवंविधं कृत्वा कर्म चाण्डालवत्स्वयम् ।
वक्तुमिच्छसि वक्तव्यः कस्मान्मां परुषाण्यथ ॥ ३०
कर्ता त्वं कर्मणोग्रस्य नाहं वृष्णिकुलाधम ।
पापानां च त्वमावासः कर्मणां मा पुनर्वद ॥ ३१
जोषमास्स्व न मां भूयो वक्तुमर्हस्यतः परम् ।
अधरोत्तरमेतद्धि यन्मा त्वं वक्तुमिच्छसि ॥ ३२
अथ वक्ष्यसि मां मौर्ख्याद्भूयः परुषमीदृशम् ।
गमयिष्यामि बाणैस्त्वां युधि वैवस्वतक्षयम् ॥ ३३
न चैव मूर्ख धर्मेण केवलेनैव शक्यते ।
तेषामपि ह्यधर्मेण चेष्टितं शृणु यादृशम् ॥ ३४

वञ्चितः पाण्डवः पूर्वमधर्मेण युधिष्ठिरः ।
द्रौपदी च परिक्लिष्टा तथाधर्मेण सात्यके ॥ ३५
प्रव्राजिता वनं सर्वे पाण्डवाः सह कृष्णया ।
सर्वस्वमपकृष्टं च तथाधर्मेण बालिश ॥ ३६
अधर्मेणापकृष्टश्च मद्रराजः परैरितः ।
इतोऽप्यधर्मेण हतो भीष्मः कुरुपितामहः ।
भूरिश्रवा ह्यधर्मेण त्वया धर्मविदा हतः ॥ ३७
एवं परैराचरितं पाण्डवेयैश्च संयुगे ।
रक्षमाणैर्जयं वीरैर्धर्मज्ञैरपि सात्वत ॥ ३८
दुर्ज्ञेयः परमो धर्मस्तथाधर्मः सुदुर्विदः ।
युध्यस्व कौरवैः सार्धं मा गाः पितृनिवेशनम् ॥ ३९
एवमादीनि वाक्यानि क्रूराणि परुषाणि च ।
श्रावितः सात्यकिः श्रीमानाकम्पित इवाभवत् ॥ ४०
तच्छ्रुत्वा क्रोधताम्राक्षः सात्यकिस्त्वाददे गदाम् ।
विनिःश्वस्य यथा सर्पः प्रणिधाय रथे धनुः ॥ ४१
ततोऽभिपत्य पाञ्चाल्यं संरम्भेणेदमब्रवीत् ।
न त्वां वक्ष्यामि परुषं हनिष्ये त्वां वधक्षमम् ॥
तमापतन्तं सहसा महाबलममर्षणम् ।
पाञ्चाल्यायाभिसंक्रुद्धमन्तकायान्तकोपमम् ॥ ४३
चोदितो वासुदेवेन भीमसेनो महाबलः ।
अवप्लुत्य रथात्तूर्णं बाहुभ्यां समवारयत् ॥ ४४
द्रवमाणं तथा क्रुद्धं सात्यकिं पाण्डवो बली ।
प्रस्कन्दमानमादाय जगाम बलिनं बलात् ॥ ४५
स्थित्वा विष्टभ्य चरणौ भीमेन शिनिपुंगवः ।
निगृहीतः पदे षष्ठे बलेन बलिनां वरः ॥ ४६
अवरुह्य रथात्तं तु ह्रियमाणं बलीयसा ।
उवाच श्लक्ष्णया वाचा सहदेवो विशां पते ॥ ४७
अस्माकं पुरुषव्याघ्र मित्रमन्यन्न विद्यते ।
परमन्धकवृष्णिभ्यः पाञ्चालेभ्यश्च माधव ॥ ४८
तथैवान्धकवृष्णीनां तव चैव विशेषतः ।
कृष्णस्य च तथास्मत्तो मित्रमन्यन्न विद्यते ॥ ४९
पाञ्चालानां च वार्ष्णेय समुद्रान्तां विचिन्वताम् ।
नान्यदस्ति परं मित्रं यथा पाण्डववृष्णयः ॥ ५०
स भवानीदृशं मित्रं मन्यते च यथा भवान् ।
भवन्तश्च यथास्माकं भवतां च तथा वयम् ॥ ५१
स एवं सर्वधर्मज्ञो मित्रधर्ममनुस्मरन् ।
नियच्छ मन्युं पाञ्चाल्यात्प्रशाम्य शिनिपुंगव ॥५२
पार्षतस्य क्षम त्वं वै क्षमतां तव पार्षतः ।
वयं क्षमयितारश्च किमन्यत्र शमाद्भवेत् ॥ ५३
प्रशाम्यमाने शैनेये सहदेवेन मारिष ।
पाञ्चालराजस्य सुतः प्रहसन्निदमब्रवीत् ॥ ५४
मुञ्च मुञ्च शिनेः पौत्रं भीम युद्धमदान्वितम् ।
आसादयतु मामेष धराधरमिवानिलः ॥ ५५
यावदस्य शितैर्बाणैः संरम्भं विनयाम्यहम् ।
युद्धश्रद्धां च कौन्तेय जीवितस्य च संयुगे ॥ ५६
किं नु शक्यं मया कर्तुं कार्यं यदिदमुद्यतम् ।
सुमहत्पाण्डुपुत्राणामायान्त्येते हि कौरवाः ॥ ५७
अथ वा फल्गुनः सर्वान्वारयिष्यति संयुगे ।
अहमप्यस्य मूर्धानं पातयिष्यामि सायकैः ॥ ५८
मन्यते छिन्नबाहुं मां भूरिश्रवसमाहवे ।
उत्सृजैनमहं वैनमेष मां वा हनिष्यति ॥ ५९
शृण्वन्पाञ्चालवाक्यानि सात्यकिः सर्पवच्छ्वसन् ।
भीमबाह्वन्तरे सक्तो विस्फुरत्यनिशं बली ॥ ६०
त्वरया वासुदेवश्च धर्मराजश्च मारिष ।
यत्नेन महता वीरौ वारयामासतुस्ततः ॥ ६१
निवार्य परमेष्वासौ क्रोधसंरक्तलोचनौ ।
युयुत्सवः परान्संख्ये प्रतीयुः क्षत्रियर्षभाः ॥ ६२

इति श्रीमहाभारते द्रोणपर्वणि
एकोनसप्तत्यधिकशततमोऽध्यायः ॥ १६९ ॥

१७०

संजय उवाच।

ततः स कदनं चक्रे रिपूणां द्रोणनन्दनः ।
युगान्ते सर्वभूतानां कालसृष्ट इवान्तकः ॥ १
ध्वजद्रुमं शस्त्रशृङ्गं हतनागमहाशिलम् ।
अश्वकिंपुरुषाकीर्णं शरासनलतावृतम् ॥ २
शूलक्रव्यादसंघुष्टं भूतयक्षगणाकुलम् ।
निहत्य शात्रवान्भल्लैः सोऽचिनोद्देहपर्वतम् ॥ ३
ततो वेगेन महता विनद्य स नरर्षभः ।
प्रतिज्ञां श्रावयामास पुनरेव तवात्मजम् ॥ ४
यस्माद्युध्यन्तमाचार्यं धर्मकञ्चुकमास्थितः ।
मुञ्च शस्त्रमिति प्राह कुन्तीपुत्रो युधिष्ठिरः ॥ ५
तस्मात्संपश्यतस्तस्य द्रावयिष्यामि वाहिनीम् ।
विद्राव्य सत्यं हन्तास्मि पापं पाञ्चाल्यमेव तु ॥ ६
सर्वानेतान्हनिष्यामि यदि योत्स्यन्ति मां रणे ।
सत्यं ते प्रतिजानामि परावर्तय वाहिनीम् ॥ ७
तच्छ्रुत्वा तव पुत्रस्तु वाहिनीं पर्यवर्तयत् ।
सिंहनादेन महता व्यपोह्य सुमहद्भयम् ॥ ८
ततः समागमो राजन्कुरुपाण्डवसेनयोः ।
पुनरेवाभवत्तीव्रः पूर्णसागरयोरिव ॥ ९
संरब्धा हि स्थिरीभूता द्रोणपुत्रेण कौरवाः ।
उदग्राः पाण्डुपाञ्चाला द्रोणस्य निधनेन च ॥ १०
तेषां परमहृष्टानां जयमात्मनि पश्यताम् ।
संरब्धानां महावेगः प्रादुरासीद्रणाजिरे ॥ ११
यथा शिलोच्चये शैलः सागरे सागरो यथा ।
प्रतिहन्येत राजेन्द्र तथासन्कुरुपाण्डवाः ॥ १२
ततः शङ्खसहस्राणि भेरीणामयुतानि च ।
अवादयन्त संहृष्टाः कुरुपाण्डवसैनिकाः ॥ १३
ततो निर्मथ्यमानस्य सागरस्येव निस्वनः ।
अभवत्तस्य सैन्यस्य सुमहानद्भुतोपमः ॥ १४
प्रादुश्चक्रे ततो द्रौणिरस्त्रं नारायणं तदा ।
अभिसंधाय पाण्डूनां पाञ्चालानां च वाहिनीम् ॥
प्रादुरासंस्ततो बाणा दीप्ताग्राः खे सहस्रशः ।
पाण्डवान्भक्षयिष्यन्तो दीप्तास्या इव पन्नगाः ॥ १६
ते दिशः खं च सैन्यं च समावृण्वन्महाहवे ।
मुहूर्ताद्भास्करस्येव राजँल्लोकं गभस्तयः ॥ १७
तथापरे द्योतमाना ज्योतींषीवाम्बरेऽमले ।
प्रादुरासन्महीपाल कार्ष्णायसमया गुडाः ॥ १८
चतुर्दिशं विचित्राश्च शतघ्न्योऽथ हुताशदाः ।
चक्राणि च क्षुरान्तानि मण्डलानीव भास्वतः ॥ १९
शस्त्राकृतिभिराकीर्णमतीव भरतर्षभ ।
दृष्ट्वान्तरिक्षमाविग्नाः पाण्डुपाञ्चालसृञ्जयाः ॥ २०
यथा यथा ह्ययुध्यन्त पाण्डवानां महारथाः ।
तथा तथा तदस्त्रं वै व्यवर्धत जनाधिप ॥ २१
वध्यमानास्तथास्त्रेण तेन नारायणेन वै ।
दह्यमानानलेनेव सर्वतोऽभ्यर्दिता रणे ॥ २२
यथा हि शिशिरापाये दहेत्कक्षं हुताशनः ।
तथा तदस्त्रं पाण्डूनां ददाह ध्वजिनीं प्रभो ॥ २३
आपूर्यमाणेनास्त्रेण सैन्ये क्षीयति चाभिभो ।
जगाम परमं त्रासं धर्मपुत्रो युधिष्ठिरः ॥ २४
द्रवमाणं तु तत्सैन्यं दृष्ट्वा विगतचेतनम् ।
मध्यस्थतां च पार्थस्य धर्मपुत्रोऽब्रवीदिदम् ॥ २५
धृष्टद्युम्न पलायस्व सह पाञ्चालसेनया ।
सात्यके त्वं च गच्छस्व वृष्ण्यन्धकवृतो गृहान् ॥
वासुदेवोऽपि धर्मात्मा करिष्यत्यात्मनः क्षमम् ।
उपदेष्टुं समर्थोऽयं लोकस्य किमुतात्मनः ॥ २७
संग्रामस्तु न कर्तव्यः सर्वसैन्यान्ब्रवीमि वः ।
अहं हि सह सोदर्यैः प्रवेक्ष्ये हव्यवाहनम् ॥ २८
भीष्मद्रोणार्णवं तीर्त्वा संग्रामं भीरुदुस्तरम् ।
अवसत्स्याम्यसलिले सगणो द्रौणिगोष्पदे ॥ २९

कामः संपद्यतामस्य बीभत्सोराशु मां प्रति ।
कल्याणवृत्त आचार्यो मया युधि निपातितः ॥३०
येन बालः स सौभद्रो युद्धानामविशारदः ।
समर्थैर्बहुभिः क्रूरैर्घातितो नाभिपालितः ॥ ३१
येनाविब्रुवता प्रश्नं तथा कृष्णा सभां गता ।
उपेक्षिता सपुत्रेण दासभावं नियच्छती ॥ ३२
जिघांसुर्धार्तराष्ट्रश्च श्रान्तेष्वश्वेषु फल्गुनम् ।
कवचेन तथा युक्तो रक्षार्थं सैन्धवस्य च ॥ ३३
येन ब्रह्मास्त्रविदुषा पाञ्चालाः सत्यजिन्मुखाः ।
कुर्वाणा मज्जये यत्नं समूला विनिपातिताः ॥ ३४
येन प्रव्राज्यमानाश्च राज्याद्वयमधर्मतः ।
निवार्यमाणेनास्माभिरनुगन्तुं तदेषिताः ॥ ३५
योऽसावत्यन्तमस्मासु कुर्वाणः सौहृदं परम् ।
हतस्तदर्थे मरणं गमिष्यामि सबान्धवः ॥ ३६
एवं ब्रुवति कौन्तेये दाशार्हस्त्वरितस्ततः ।
निवार्य सैन्यं बाहुभ्यामिदं वचनमब्रवीत् ॥ ३७
शीघ्रं न्यस्यत शस्त्राणि वाहेभ्यश्चावरोहत ।
एष योगोऽत्र विहितः प्रतिघातो महात्मना ॥ ३८
द्विपाश्वस्यन्दनेभ्यश्च क्षितिं सर्वेऽवरोहत ।
एवमेतन्न वो हन्यादस्त्रं भूमौ निरायुधान् ॥ ३९
यथा यथा हि युध्यन्ते योधा ह्यस्त्रबलं प्रति ।
तथा तथा भवन्त्येते कौरवा बलवत्तराः ॥ ४०
निक्षेप्स्यन्ति च शस्त्राणि वाहनेभ्योऽवरुह्य ये ।
तान्नैतदस्त्रं संग्रामे निहनिष्यति मानवान् ॥ ४१
ये त्वेतत्प्रतियोत्स्यन्ति मनसापीह केचन ।
निहनिष्यति तान्सर्वान्रसातलगतानपि ॥ ४२
ते वचस्तस्य तच्छ्रुत्वा वासुदेवस्य भारत ।
ईषुः सर्वेऽस्त्रमुत्स्रष्टुं मनोभिः करणेन च ॥ ४३
तत उत्स्रष्टुकामांस्तानस्त्राण्यालक्ष्य पाण्डवः ।
भीमसेनोऽब्रवीद्राजन्निदं संहर्षयन्वचः ॥ ४४
न कथंचन शस्त्राणि मोक्तव्यानीह केनचित् ।
अहमावारयिष्यामि द्रोणपुत्रास्त्रमाशुगैः ॥ ४५
अथ वाप्यनया गुर्व्या हेमविग्रहया रणे ।
कालवद्विचरिष्यामि द्रौणेरस्त्रं विशातयन् ॥ ४६
न हि मे विक्रमे तुल्यः कश्चिदस्ति पुमानिह ।
यथैव सवितुस्तुल्यं ज्योतिरन्यन्न विद्यते ॥ ४७
पश्यध्वं मे दृढौ बाहू नागराजकरोपमौ ।
समर्थौ पर्वतस्यापि शैशिरस्य निपातने ॥ ४८
नागायुतसमप्राणो ह्यहमेको नरेष्विह ।
शक्रो यथाप्रतिद्वंद्वो दिवि देवेषु विश्रुतः ॥ ४९
अद्य पश्यत मे वीर्यं बाह्वोः पीनांसयोर्युधि ।
ज्वलमानस्य दीप्तस्य द्रौणेरस्त्रस्य वारणे ॥ ५०
यदि नारायणास्त्रस्य प्रतियोद्धा न विद्यते ।
अद्यैनं प्रतियोत्स्यामि पश्यत्सु कुरुपाण्डुषु ॥ ५१
एवमुक्त्वा ततो भीमो द्रोणपुत्रमरिंदमः ।
अभ्ययान्मेघघोषेण रथेनादित्यवर्चसा ॥ ५२
स एनमिषुजालेन लघुत्वाच्छीघ्रविक्रमः ।
निमेषमात्रेणासाद्य कुन्तीपुत्रोऽभ्यवाकिरत् ॥ ५३
ततो द्रौणिः प्रहस्यैनमुदासमभिभाष्य च ।
अवाकिरत्प्रदीप्ताग्रैः शरैस्तैरभिमन्त्रितैः ॥ ५४
पन्नगैरिव दीप्तास्यैर्वमद्भिरनलं रणे ।
अवकीर्णोऽभवत्पार्थः स्फुलिङ्गैरिव काञ्चनैः ॥ ५५
तस्य रूपमभूद्राजन्भीमसेनस्य संयुगे ।
खद्योतैरावृतस्येव पर्वतस्य दिनक्षये ॥ ५६
तदस्त्रं द्रोणपुत्रस्य तस्मिन्प्रतिसमस्यति ।
अवर्धत महाराज यथाग्निरनिलोद्धतः ॥ ५७
विवर्धमानमालक्ष्य तदस्त्रं भीमविक्रमम् ।
पाण्डुसैन्यमृते भीमं सुमहद्भयमाविशत् ॥ ५८
ततः शस्त्राणि ते सर्वे समुत्सृज्य महीतले ।
अवारोहन्रथेभ्यश्च हस्त्यश्वेभ्यश्च सर्वशः ॥ ५९

तेषु निक्षिप्तशस्त्रेषु वाहनेभ्यश्च्युतेषु च ।
तदस्त्रवीर्यं विपुलं भीममूर्धन्यथापतत् ॥ ६०
हाहाकृतानि भूतानि पाण्डवाश्च विशेषतः ।
भीमसेनमपश्यन्त तेजसा संवृतं तदा ॥ ६१

इति श्रीमहाभारते द्रोणपर्वणि
सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥

१७१

संजय उवाच ।

भीमसेनं समाकीर्णं दृष्ट्वास्त्रेण धनंजयः ।
तेजसः प्रतिघातार्थं वारुणेन समावृणोत् ॥ १
नालक्षयत तं कश्चिद्वारुणास्त्रेण संवृतम् ।
अर्जुनस्य लघुत्वाच्च संवृतत्वाच्च तेजसः ॥ २
साश्वसूतरथो भीमो द्रोणपुत्रास्त्रसंवृतः ।
अग्नावग्निरिव न्यस्तो ज्वालामाली सुदुर्दृशः ॥ ३
यथा रात्रिक्षये राजञ्ज्योतींष्यस्तगिरिं प्रति ।
समापेतुस्तथा बाणा भीमसेनरथं प्रति ॥ ४
स हि भीमो रथश्चास्य हयाः सूतश्च मारिष ।
संवृता द्रोणपुत्रेण पावकान्तर्गताभवन् ॥ ५
यथा दग्ध्वा जगत्कृत्स्नं समये सचराचरम् ।
गच्छेदग्निर्विभोरास्यं तथास्त्रं भीममावृणोत् ॥ ६
सूर्यमग्निः प्रविष्टः स्याद्यथा चाग्निं दिवाकरः ।
तथा प्रविष्टं तत्तेजो न प्राज्ञायत किंचन ॥ ७
विकीर्णमस्त्रं तद्दृष्ट्वा तथा भीमरथं प्रति ।
उदीर्यमाणं द्रौणिं च निष्प्रतिद्वंद्वमाहवे ॥ ८
सर्वसैन्यानि पाण्डूनां न्यस्तशस्त्राण्यचेतसः ।
युधिष्ठिरपुरोगांश्च विमुखांस्तान्महारथान् ॥ ९
अर्जुनो वासुदेवश्च त्वरमाणौ महाद्युती ।
अवप्लुत्य रथाद्वीरौ भीममाद्रवतां ततः ॥ १०
ततस्तद्द्रोणपुत्रस्य तेजोऽस्त्रबलसंभवम् ।
विगाह्य तौ सुबलिनौ माययाविशतां तदा ॥ ११
न्यस्तशस्त्रौ ततस्तौ तु नादहद्स्त्रजोऽनलः ।
वारुणास्त्रप्रयोगाच्च वीर्यवत्त्वाच्च कृष्णयोः ॥ १२
ततश्चकृषतुर्भीमं तस्य सर्वायुधानि च ।
नारायणास्त्रशान्त्यर्थं नरनारायणौ बलात् ॥ १३
अपकृष्यमाणः कौन्तेयो नदत्येव महारथः ।
वर्धते चैव तद्घोरं द्रौणेरस्त्रं सुदुर्जयम् ॥ १४
तमब्रवीद्वासुदेवः किमिदं पाण्डुनन्दन ।
वार्यमाणोऽपि कौन्तेय यद्युद्धान्न निवर्तसे ॥ १५
यदि युद्धेन जेयाः स्युरिमे कौरवनन्दनाः ।
वयमप्यत्र युध्येम तथा चेमे नरर्षभाः ॥ १६
रथेभ्यस्त्ववतीर्णास्तु सर्व एव स्म तावकाः ।
तस्मात्त्वमपि कौन्तेय रथात्तूर्णमपाक्रम ॥ १७
एवमुक्त्वा ततः कृष्णो रथाद्भूमिमपातयत् ।
निःश्वसन्तं यथा नागं क्रोधसंरक्तलोचनम् ॥ १८
यदापकृष्टः स रथान्न्यासितश्चायुधं भुवि ।
ततो नारायणास्त्रं तत्प्रशान्तं शत्रुतापनम् ॥ १९
तस्मिन्प्रशान्ते विधिना तदा तेजसि दुःसहे ।
बभूवुर्विमलाः सर्वा दिशः प्रदिश एव च ॥ २०
प्रववुश्च शिवा वाताः प्रशान्ता मृगपक्षिणः ।
वाहनानि च हृष्टानि योधाश्च मनुजेश्वर ॥ २१
व्यपोढे च ततो घोरे तस्मिंस्तेजसि भारत ।
बभौ भीमो निशापाये धीमान्सूर्य इवोदितः ॥२२
हतशेषं बलं तत्र पाण्डवानामतिष्ठत ।
अस्त्रव्युपरमाद्धृष्टं तव पुत्रजिघांसया ॥ २३
व्यवस्थिते बले तस्मिन्नस्त्रे प्रतिहते तथा ।
दुर्योधनो महाराज द्रोणपुत्रमथाब्रवीत् ॥ २४
अश्वत्थामन्पुनः शीघ्रमस्त्रमेतत्प्रयोजय ।
व्यवस्थिता हि पाञ्चालाः पुनरेव जयैषिणः ॥ २५
अश्वत्थामा तथोक्तस्तु तव पुत्रेण मारिष ।
सुदीनमभिनिःश्वस्य राजानमिदमब्रवीत् ॥ २६

नैतदावर्तते राजन्नस्त्रं द्विर्नोपपद्यते ।
आवर्तयन्निहन्त्येतत्प्रयोक्तारं न संशयः ॥ २७
एष चास्त्रप्रतीघातं वासुदेवः प्रयुक्तवान् ।
अन्यथा विहितः संख्ये वधः शत्रोर्जनाधिप ॥२८
पराजयो वा मृत्युर्वा श्रेयो मृत्युर्न निर्जयः ।
निर्जिताश्चारयो ह्येते शस्त्रोत्सर्गान्मृतोपमाः ॥ २९

दुर्योधन उवाच ।

आचार्यपुत्र यद्येतद्दिरस्त्रं न प्रयुज्यते ।
अन्यैर्गुरुघ्ना वध्यन्तामस्त्रैरस्त्रविदां वर ॥ ३०
त्वयि ह्यस्त्राणि दिव्यानि यथा स्युस्त्र्यम्बके तथा ।
इच्छतो न हि ते मुच्येत्क्रुद्धस्यापि पुरंदरः ॥ ३१

धृतराष्ट्र उवाच ।

तस्मिन्नस्त्रे प्रतिहते द्रोणे चोपधिना हते ।
तथा दुर्योधनेनोक्तो द्रौणिः किमकरोत्पुनः ॥ ३२
दृष्ट्वा पार्थांश्च संग्रामे युद्धाय समवस्थितान् ।
नारायणास्त्रनिर्मुक्तांश्चरतः पृतनामुखे ॥ ३३

संजय उवाच ।

जानन्पितुः स निधनं सिंहलाङ्गूलकेतनः ।
सक्रोधो भयमुत्सृज्य अभिदुद्राव पार्षतम् ॥ ३४
अभिद्रुत्य च विंशत्या क्षुद्रकाणां नरर्षभः ।
पञ्चभिश्चातिवेगेन विव्याध पुरुषर्षभम् ॥ ३५
धृष्टद्युम्नस्ततो राजञ्ज्वलन्तमिव पावकम् ।
द्रोणपुत्रं त्रिषष्ट्या तु राजन्विव्याध पत्रिणाम् ॥३६
सारथिं चास्य विंशत्या स्वर्णपुङ्खैः शिलाशितैः ।
हयांश्च चतुरोऽविध्यच्चतुर्भिर्निशितैः शरैः ॥ ३७
विद्ध्वा विद्ध्वानदद्द्रौणिः कम्पयन्निव मेदिनीम् ।
आददत्सर्वलोकस्य प्राणानिव महारणे ॥ ३८
पार्षतस्तु बली राजन्कृतास्त्रः कृतनिश्रमः ।
द्रौणिमेवाभिदुद्राव कृत्वा मृत्युं निवर्तनम् ॥ ३९
ततो बाणमयं वर्षं द्रोणपुत्रस्य मूर्धनि ।
अवासृजदमेयात्मा पाञ्चाल्यो रथिनां वरः ॥ ४०
तं द्रौणिः समरे क्रुद्धश्छादयामास पत्रिभिः ।
विव्याध चैनं दशभिः पितुर्वधमनुस्मरन् ॥ ४१
द्वाभ्यां च सुविकृष्टाभ्यां क्षुराभ्यां ध्वजकार्मुके ।
छित्त्वा पाञ्चालराजस्य द्रौणिरन्यैः समार्दयत् ॥४२
व्यश्वसूतरथं चैनं द्रौणिश्चक्रे महाहवे ।
तस्य चानुचरान्सर्वान्क्रुद्धः प्राच्छादयच्छरैः ॥४३
प्रदुद्राव ततः सैन्यं पाञ्चालानां विशां पते ।
संभ्रान्तरूपमार्तं च शरवर्षपरिक्षतम् ॥ ४४
दृष्ट्वा च विमुखान्योधान्धृष्टद्युम्नं च पीडितम् ।
शैनेयोऽचोदयत्तूर्णं रथं द्रौणिरथं प्रति ॥ ४५
अष्टभिर्निशितैश्चैव सोऽश्वत्थामानमार्दयत् ।
विंशत्या पुनराहत्य नानारूपैरमर्षणम् ।
विव्याध च तथा सूतं चतुर्भिश्चतुरो हयान् ॥ ४६
सोऽतिविद्धो महेष्वासो नानालिङ्गैरमर्षणः ।
युयुधानेन वै द्रौणिः प्रहसन्वाक्यमब्रवीत् ॥ ४७
शैनेयाभ्यवपत्तिं ते जानाम्याचार्यघातिनः ।
न त्वेनं त्रास्यसि मया ग्रस्तमात्मानमेव च ॥ ४८
एवमुक्त्वार्करश्म्याभं सुपर्वाणं शरोत्तमम् ।
व्यसृजत्सात्वते द्रौणिर्वज्रं वृत्रे यथा हरिः ॥ ४९
स तं निर्भिद्य तेनास्तः सायकः सशरावरम् ।
विवेश वसुधां भित्त्वा श्वसन्बिलमिवोरगः ॥ ५०
स भिन्नकवचः शूरस्तोत्रार्दित इव द्विपः ।
विमुच्य सशरं चापं भूरिव्रणपरिस्रवः ॥ ५१
सीदन्रुधिरसिक्तश्च रथोपस्थ उपाविशत् ।
सूतेनापहृतस्तूर्णं द्रोणपुत्राद्रथान्तरम् ॥ ५२
अथान्येन सुपुङ्खेन शरेण नतपर्वणा ।
आजघान भ्रुवोर्मध्ये धृष्टद्युम्नं परंतपः ॥ ५३
स पूर्वमतिविद्धश्च भृशं पश्चाच्च पीडितः ।
ससाद युधि पाञ्चाल्यो व्यपाश्रयत च ध्वजम् ॥

तं मत्तमिव सिंहेन राजन्कुञ्जरमर्दितम् ।
जवेनाभ्यद्रवञ्शूराः पञ्च पाण्डवतो रथाः ॥ ५५
किरीटी भीमसेनश्च वृद्धक्षत्रश्च पौरवः ।
युवराजश्च चेदीनां मालवश्च सुदर्शनः ।
पञ्चभिः पञ्चभिर्बाणैरभ्यघ्नन्सर्वतः समम् ॥ ५६
आशीविषाभैर्विंशद्भिः पञ्चभिश्चापि ताञ्शरैः ।
चिच्छेद युगपद्द्रौणिः पञ्चविंशतिसायकान् ॥ ५७
सप्तभिश्च शितैर्बाणैः पौरवं द्रौणिरार्दयत् ।
मालवं त्रिभिरेकेन पार्थं षड्भिर्वृकोदरम् ॥ ५८
ततस्ते विव्यधुः सर्वे द्रौणिं राजन्महारथाः ।
युगपच्च पृथक्चैव रुक्मपुङ्खैः शिलाशितैः ॥ ५९
युवराजस्तु विंशत्या द्रौणिं विव्याध पत्रिणाम् ।
पार्थश्च पुनरष्टाभिस्तथा सर्वे त्रिभिस्त्रिभिः ॥ ६०

तततोऽर्जुनं षड्भिरथाजघान
द्रौणायनिर्दशभिर्वासुदेवम् ।
भीमं दशार्धैर्युवराजं चतुर्भि-
र्द्वाभ्यां छित्त्वा कार्मुकं च ध्वजं च ।
पुनः पार्थं शरवर्षेण विद्ध्वा
द्रौणिर्घोरं सिंहनादं ननाद ॥ ६१
तस्यास्यतः सुनिशितान्पीतधारा-
न्द्रौणेः शरान्पृष्ठतश्चाग्रतश्च ।
धरा वियद्द्यौः प्रदिशो दिशश्च
छन्ना बाणैरभवन्घोररूपैः ॥ ६२
आसीनस्य स्वरथं तूग्रतेजाः
सुदर्शनस्येन्द्रकेतुप्रकाशौ ।
भुजौ शिरश्चेन्द्रसमानवीर्य-
स्त्रिभिः शरैर्युगपत्संचकर्त ॥ ६३
स पौरवं रथशक्त्या निहत्य
छित्त्वा रथं तिलशश्चापि बाणैः ।
छित्त्वास्य बाहू वरचन्दनाक्तौ
भल्लेन कायाच्छिर उच्चकर्त ॥ ६४
युवानमिन्दीवरदामवर्णं
चेदिप्रियं युवराजं प्रहस्य ।
बाणैस्त्वरावाञ्ज्वलिताग्निकल्पै-
र्विद्ध्वा प्रादान्मृत्यवे साश्वसूतम् ॥ ६५

तान्निहत्य रणे वीरो द्रोणपुत्रो युधां पतिः ।
दध्मौ प्रमुदितः शङ्खं बृहन्तमपराजितः ॥ ६६
ततः सर्वे च पाञ्चाला भीमसेनश्च पाण्डवः ।
धृष्टद्युम्नरथं भीतास्त्यक्त्वा संप्राद्रवन्दिशः ॥ ६७
तान्प्रभग्नांस्तथा द्रौणिः पृष्ठतो विकिरञ्शरैः ।
अभ्यवर्तत वेगेन कालवत्पाण्डुवाहिनीम् ॥ ६८
ते वध्यमानाः समरे द्रोणपुत्रेण क्षत्रियाः ।
द्रोणपुत्रं भयाद्राजन्दिक्षु सर्वासु मेनिरे ॥ ६९

इति श्रीमहाभारते द्रोणपर्वणि
एकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥

१७२

संजय उवाच ।

तत्प्रभग्नं बलं दृष्ट्वा कुन्तीपुत्रो धनंजयः ।
न्यवारयदमेयात्मा द्रोणपुत्रवधेप्सया ॥ १
ततस्ते सैनिका राजन्नैव तत्रावतस्थिरे ।
संस्थाप्यमाना यत्नेन गोविन्देनार्जुनेन च ॥ २
एक एव तु बीभत्सुः सोमकावयवैः सह ।
मत्स्यैरन्यैश्च संधाय कौरवैः संन्यवर्तत ॥ ३
ततो द्रुतमतिक्रम्य सिंहलाङ्गूलकेतनम् ।
सव्यसाची महेष्वासमश्वत्थामानमब्रवीत् ॥ ४
या शक्तिर्यच्च ते वीर्यं यज्ज्ञानं यच्च पौरुषम् ।
धार्तराष्ट्रेषु या प्रीतिः प्रद्वेषोऽस्मासु यश्च ते ।
यच्च भूयोऽस्ति तेजस्तत्परमं मम दर्शय ॥ ५
स एव द्रोणहन्ता ते दर्पं भेत्स्यति पार्षतः ।
कालानलसमप्रख्यो द्विषतामन्तको युधि ।

समासाद्य पाञ्चाल्यं मां चापि सहकेशवम् ॥ ६

धृतराष्ट्र उवाच ।

आचार्यपुत्रो मानार्हो बलवांश्चापि संजय ।
प्रीतिर्धनंजये चास्य प्रियश्चापि स वासवेः ॥ ७
न भूतपूर्वं बीभत्सोर्वाक्यं परुषमीदृशम् ।
अथ कस्मात्स कौन्तेयः सखायं रूक्षमब्रवीत् ॥ ८

संजय उवाच ।

युवराजे हते चैव वृद्धक्षत्रे च पौरवे ।
इष्वस्त्रविधिसंपन्ने मालवे च सुदर्शने ॥ ९
धृष्टद्युम्ने सात्यकौ च भीमे चापि पराजिते ।
युधिष्ठिरस्य तैर्वाक्यैर्मर्मण्यपि च घट्टिते ॥ १०
अन्तर्भेदे च संजाते दुःखं संस्मृत्य च प्रभो ।
अभूतपूर्वो बीभत्सोर्दुःखान्मन्युरजायत ॥ ११
तस्मादनर्हमश्लीलमप्रियं द्रौणिमुक्तवान् ।
मान्यमाचार्यतनयं रूक्षं कापुरुषो यथा ॥ १२
एवमुक्तः श्वसन्क्रोधान्महेष्वासतमो नृप ।
पार्थेन परुषं वाक्यं सर्वमर्मघ्नया गिरा ।
द्रौणिश्चुकोप पार्थाय कृष्णाय च विशेषतः ॥ १३
स तु यत्तो रथे स्थित्वा वार्युपस्पृश्य वीर्यवान् ।
देवैरपि सुदुर्धर्षमस्त्रमाग्नेयमाददे ॥ १४
दृश्यादृश्यानरिगणानुद्दिश्याचार्यनन्दनः ।
सोऽभिमन्त्र्य शरं दीप्तं विधूममिव पावकम् ।
सर्वतः क्रोधमाविश्य चिक्षेप परवीरहा ॥ १५
ततस्तुमुलमाकाशे शरवर्षमजायत ।
ववुश्च शिशिरा वाताः सूर्यो नैव तताप च ॥ १६
चुक्रुशुर्दानवाश्चापि दिक्षु सर्वासु भैरवम् ।
रुधिरं चापि वर्षन्तो विनेदुस्तोयदाम्बरे ॥ १७
पक्षिणः पशवो गावो मुनयश्चापि सुव्रताः ।
परमं प्रयतात्मानो न शान्तिमुपलेभिरे ॥ १८
भ्रान्तसर्वमहाभूतमावर्जितदिवाकरम् ।
त्रैलोक्यमभिसंतप्तं ज्वराविष्टमिवातुरम् ॥ १९
शरतेजोभिसंतप्ता नागा भूमिशयास्तथा ।
निःश्वसन्तः समुत्पेतुस्तेजो घोरं मुमुक्षवः ॥ २०
जलजानि च सत्त्वानि दह्यमानानि भारत ।
न शान्तिमुपजग्मुर्हि तप्यमानैर्जलाशयैः ॥ २१
दिशः खं प्रदिशश्चैव भुवं च शरवृष्टयः ।
उच्चावचा निपेतुर्वै गरुडानिलरंहसः ॥ २२
तैः शरैर्द्रोणपुत्रस्य वज्रवेगसमाहितैः ।
प्रदग्धाः शत्रवः पेतुरग्निदग्धा इव द्रुमाः ॥ २३
दह्यमाना महानागाः पेतुरुर्व्यां समन्ततः ।
नदन्तो भैरवान्नादाञ्जलदोपमनिस्वनान् ॥ २४
अपरे प्रद्रुतास्तत्र दह्यमाना महागजाः ।
त्रेसुस्तथापरे घोरे वने दावाग्निसंवृताः ॥ २५
द्रुमाणां शिखराणीव दावदग्धानि मारिष ।
अश्ववृन्दान्यदृश्यन्त रथवृन्दानि चाभिभो ।
अपतन्त रथौघाश्च तत्र तत्र सहस्रशः ॥ २६
तत्सैन्यं भगवानग्निर्ददाह युधि भारत ।
युगान्ते सर्वभूतानि संवर्तक इवानलः ॥ २७
दृष्ट्वा तु पाण्डवीं सेनां दह्यमानां महाहवे ।
प्रहृष्टास्तावका राजन्सिंहनादान्विनेदिरे ॥ २८
ततस्तूर्यसहस्राणि नानालिङ्गानि भारत ।
तूर्णमाजघ्निरे हृष्टास्तावका जितकाशिनः ॥ २९
कृत्स्ना ह्यक्षौहिणी राजन्सव्यसाची च पाण्डवः ।
तमसा संवृते लोके नादृश्यत महाहवे ॥ ३०
नैव नस्तादृशं राजन्दृष्टपूर्वं न च श्रुतम् ।
यादृशं द्रोणपुत्रेण सृष्टमस्त्रममर्षिणा ॥ ३१
अर्जुनस्तु महाराज ब्राह्ममस्त्रमुदैरयत् ।
सर्वास्त्रप्रतिघाताय विहितं पद्मयोनिना ॥ ३२
ततो मुहूर्तादिव तत्तमो व्युपशशाम ह ।
प्रववौ चानिलः शीतो दिशश्च विमलाभवन् ॥ ३३

तत्राद्भुतमपश्याम कृत्स्नामक्षौहिणीं हताम् ।
अनभिज्ञेयरूपां च प्रदग्धामस्त्रमायया ॥ ३४
ततो वीरौ महेष्वासौ विमुक्तौ केशवार्जुनौ ।
सहितौ संप्रदृश्येतां नभसीव तमोनुदौ ॥ ३५
सपताकध्वजहयः सानुकर्षवरायुधः ।
प्रबभौ स रथो मुक्तस्तावकानां भयंकरः ॥ ३६
ततः किलकिलाशब्दः शङ्खभेरीरवैः सह ।
पाण्डवानां प्रहृष्टानां क्षणेन समजायत ॥ ३७
हताविति तयोरासीत्सेनयोरुभयोर्मतिः ।
तरसाभ्यागतौ दृष्ट्वा विमुक्तौ केशवार्जुनौ ॥ ३८
तावक्षतौ प्रमुदितौ दध्मतुर्वारिजोत्तमौ ।
दृष्ट्वा प्रमुदितान्पार्थांस्त्वदीया व्यथिताभवन् ॥ ३९
विमुक्तौ च महात्मानौ दृष्ट्वा द्रौणिः सुदुःखितः ।
मुहूर्तं चिन्तयामास किं त्वेतदिति मारिष ॥ ४०
चिन्तयित्वा तु राजेन्द्र ध्यानशोकपरायणः ।
निःश्वसन्दीर्घमुष्णं च विमनाश्चाभवत्तदा ॥ ४१
ततो द्रौणिर्धनुर्न्यस्य रथात्प्रस्कन्द्य वेगितः ।
धिग्धिक्सर्वमिदं मिथ्येत्युक्त्वा संप्राद्रवद्रणात् ॥
ततः स्निग्धाम्बुदाभासं वेदव्यासमकल्मषम् ।
आवासं च सरस्वत्याः स वै व्यासं ददर्श ह ॥ ४३
तं द्रौणिरग्रतो दृष्ट्वा स्थितं कुरुकुलोद्वह ।
सन्नकण्ठोऽब्रवीद्वाक्यमभिवाद्य सुदीनवत् ॥ ४४
भो भो माया यदृच्छा वा न विद्मः किमिदं भवेत् ।
अस्त्रं त्विदं कथं मिथ्या मम कश्च व्यतिक्रमः ॥ ४५
अधरोत्तरमेतद्वा लोकानां वा पराभवः ।
यदिमौ जीवतः कृष्णौ कालो हि दुरतिक्रमः ॥ ४६
नासुरामरगन्धर्वा न पिशाचा न राक्षसाः ।
न सर्पयक्षपतगा न मनुष्याः कथंचन ॥ ४७
उत्सहन्तेऽन्यथा कर्तुमेतदस्त्रं मयेरितम् ।
तदिदं केवलं हत्वा युक्तामक्षौहिणीं ज्वलत् ॥ ४८
केनेमौ मर्त्यधर्माणौ नावधीत्केशवार्जुनौ ।
एतत्प्रब्रूहि भगवन्मया पृष्टो यथातथम् ॥ ४९

व्यास उवाच ।

महान्तमेतमर्थं मां यं त्वं पृच्छसि विस्मयात् ।
तत्प्रवक्ष्यामि ते सर्वं समाधाय मनः शृणु ॥ ५०
योऽसौ नारायणो नाम पूर्वेषामपि पूर्वजः ।
अजायत च कार्यार्थं पुत्रो धर्मस्य विश्वकृत् ॥ ५१
स तपस्तीव्रमातस्थे मैनाकं गिरिमास्थितः ।
ऊर्ध्वबाहुर्महातेजा ज्वलनादित्यसंनिभः ॥ ५२
षष्टिं वर्षसहस्राणि तावन्त्येव शतानि च ।
अशोषयत्तदात्मानं वायुभक्षोऽम्बुजेक्षणः ॥ ५३
अथापरं तपस्तप्त्वा द्विस्ततोऽन्यत्पुनर्महत् ।
द्यावापृथिव्योर्विवरं तेजसा समपूरयत् ॥ ५४
स तेन तपसा तात ब्रह्मभूतो यदाभवत् ।
ततो विश्वेश्वरं योनिं विश्वस्य जगतः पतिम् ॥ ५५
ददर्श भृशदुर्दर्शं सर्वदेवैरपीश्वरम् ।
अणीयसामणीयांसं बृहद्भ्यश्च बृहत्तरम् ॥ ५६
रुद्रमीशानमृषभं चेकितानमजं परम् ।
गच्छतस्तिष्ठतो वापि सर्वभूतहृदि स्थितम् ॥ ५७

दुर्वारणं दुर्दृशं तिग्ममन्युं
महात्मानं सर्वहरं प्रचेतसम् ।
दिव्यं चापमिषुधी चाददानं
हिरण्यवर्माणमनन्तवीर्यम् ॥ ५८
पिनाकिनं वज्रिणं दीप्तशूलं
परश्वधिं गदिनं स्वायतासिम् ।
सुभ्रुं जटामण्डलचन्द्रमौलिं
व्याघ्राजिनं परिघं दण्डपाणिम् ॥ ५९
शुभाङ्गदं नागयज्ञोपवीतिं
विश्वैर्गणैः शोभितं भूतसंघैः ।
एकीभूतं तपसां संनिधानं

वयोतिगैः सुष्टुतमिष्टवाग्भिः ॥ ६०
जलं दिवं खं क्षितिं चन्द्रसूर्यौ
तथा वाय्वग्नी प्रतिमानं जगच्च ।
नालं द्रष्टुं यमजं भिन्नवृत्ता
ब्रह्मद्विषघ्नममृतस्य योनिम् ॥ ६१
यं पश्यन्ति ब्राह्मणाः साधुवृत्ताः
क्षीणे पापे मनसा ये विशोकाः ।
स तन्निष्ठस्तपसा धर्ममीड्यं
तद्भक्त्या वै विश्वरूपं ददर्श ।
दृष्ट्वा चैनं वाङ्मनोबुद्धिदेहैः
संहृष्टात्मा मुमुदे देवदेवम् ॥ ६२
अक्षमालापरिक्षिप्तं ज्योतिषां परमं निधिम् ।
ततो नारायणो दृष्ट्वा ववन्दे विश्वसंभवम् ॥ ६३
वरदं पृथुचार्वङ्ग्या पार्वत्या सहितं प्रभुम् ।
अजमीशानमव्यग्रं कारणात्मानमच्युतम् ॥ ६४
अभिवाद्याथ रुद्राय सद्योऽन्धकनिपातिने ।
पद्माक्षस्तं विरूपाक्षमभितुष्टाव भक्तिमान् ॥ ६५
त्वत्संभूता भूतकृतो वरेण्य
गोप्तारोऽद्य भुवनं पूर्वदेवाः ।
आविश्येमां धरणीं येऽभ्यरक्ष-
न्पुरा पुराणां तव देव सृष्टिम् ॥ ६६
सुरासुरान्नागरक्षःपिशाचा-
न्नरान्सुपर्णानथ गन्धर्वयक्षान् ।
पृथग्विधान्भूतसंघांश्च विश्वां-
स्त्वत्संभूतान्विद्म सर्वांस्तथैव ।
ऐन्द्रं याम्यं वारुणं वैत्तपाल्यं
मैत्रं त्वाष्ट्रं कर्म सौम्यं च तुभ्यम् ॥ ६७
रूपं ज्योतिः शब्द आकाशवायुः
स्पर्शः स्वाद्यं सलिलं गन्ध उर्वी ।
कामो ब्रह्मा ब्रह्म च ब्राह्मणाश्च
त्वत्संभूतं स्थास्नु चरिष्णु चेदम् ॥ ६८
अद्भ्यः स्तोका यान्ति यथा पृथक्त्वं
ताभिश्चैक्यं संक्षये यान्ति भूयः ।
एवं विद्वान्प्रभवं चाप्ययं च
हित्वा भूतानां तत्र सायुज्यमेति ॥ ६९
दिव्यावृतौ मानसौ द्वौ सुपर्णा-
ववाक्शाखः पिप्पलः सप्त गोपाः ।
दशाप्यन्ये ये पुरं धारयन्ति
त्वया सृष्टास्ते हि तेभ्यः परस्त्वम् ।
भूतं भव्यं भविता चाप्यधृष्यं
त्वत्संभूता भुवनानीह विश्वा ॥ ७०
भक्तं च मां भजमानं भजस्व
मा रीरिषो मामहिताहितेन ।
आत्मानं त्वामात्मनोऽनन्यभावो
विद्वानेवं गच्छति ब्रह्म शुक्रम् ॥ ७१
अस्तौषं त्वां तव संमानमिच्छ-
न्विचिन्वन्वै सवृषं देववर्य ।
सुदुर्लभान्देहि वरान्ममेष्टा-
नभिष्टुतः प्रतिकार्षीश्च मा माम् ॥ ७२
तस्मै वरानचिन्त्यात्मा नीलकण्ठः पिनाकधृक् ।
अर्हते देवमुख्याय प्रायच्छदृषिसंस्तुतः ॥ ७३

नीलकण्ठ उवाच ।

मत्प्रसादान्मनुष्येषु देवगन्धर्वयोनिषु ।
अप्रमेयबलात्मा त्वं नारायण भविष्यसि ॥ ७४
न च त्वा प्रसहिष्यन्ति देवासुरमहोरगाः ।
न पिशाचा न गन्धर्वा न नरा न च राक्षसाः ॥
न सुपर्णास्तथा नागा न च विश्वे वियोनिजाः ।
न कश्चित्त्वां च देवोऽपि समरेषु विजेष्यति ॥ ७६
न शस्त्रेण न वज्रेण नाग्निना न च वायुना ।
नार्द्रेण न च शुष्केण त्रसेन स्थावरेण वा ॥ ७७

कश्चित्तव रुजं कर्ता मत्प्रसादात्कथंचन ।
अपि चेत्समरं गत्वा भविष्यसि ममाधिकः ॥ ७८

व्यास उवाच ।

एवमेते वरा लब्धाः पुरस्ताद्विद्धि शौरिणा ।
स एष देवश्चरति मायया मोहयञ्जगत् ॥ ७९
तस्यैव तपसा जातं नरं नाम महामुनिम् ।
तुल्यमेतेन देवेन तं जानीह्यर्जुनं सदा ॥ ८०
तावेतौ पूर्वदेवानां परमोपचिताबृषी ।
लोकयात्राविधानार्थं संजायेते युगे युगे ॥ ८१
तथैव कर्मणः कृत्स्नं महतस्तपसोऽपि च ।
तेजो मन्युश्च विद्वंस्त्वं जातो रौद्रो महामते ॥ ८२
स भवान्देववत्प्राज्ञो ज्ञात्वा भवमयं जगत् ।
अवाकर्षस्त्वमात्मानं नियमैस्तत्प्रियेप्सया ॥ ८३
शुभमौर्वं नवं कृत्वा महापुरुषविग्रहम् ।
ईजिवांस्त्वं जपैर्होमैरुपहारैश्च मानद ॥ ८४
स तथा पूज्यमानस्ते पूर्वदेवोऽप्यतूतुषत् ।
पुष्कलांश्च वरान्प्रादात्तव विद्वन्हृदि स्थितान् ॥ ८५
जन्मकर्मतपोयोगास्तयोस्तव च पुष्कलाः ।
ताभ्यां लिङ्गेऽर्चितो देवस्त्वयार्चायां युगे युगे॥८६
सर्वरूपं भवं ज्ञात्वा लिङ्गे योऽर्चयति प्रभुम् ।
आत्मयोगाश्च तस्मिन्वै शास्त्रयोगाश्च शाश्वताः॥८७
एवं देवा यजन्तो हि सिद्धाश्च परमर्षयः ।
प्रार्थयन्ति परं लोके स्थानमेव च शाश्वतम् ॥ ८८
स एष रुद्रभक्तश्च केशवो रुद्रसंभवः ।
कृष्ण एव हि यष्टव्यो यज्ञैश्चैष सनातनः ॥ ८९
सर्वभूतभवं ज्ञात्वा लिङ्गेऽर्चयति यः प्रभुम् ।
तस्मिन्नभ्यधिकां प्रीतिं करोति वृषभध्वजः ॥ ९०

संजय उवाच ।

तस्य तद्वचनं श्रुत्वा द्रोणपुत्रो महारथः ।
नमश्चकार रुद्राय बहु मेने च केशवम् ॥ ९१
हृष्टलोमा च वश्यात्मा नमस्कृत्य महर्षये ।
वरूथिनीमभिप्रेत्य अवहारमकारयत् ॥ ९२
ततः प्रत्यवहारोऽभूत्पाण्डवानां विशां पते ।
कौरवाणां च दीनानां द्रोणे युधि निपातिते ॥ ९३
युद्धं कृत्वा दिनान्पञ्च द्रोणो हत्वा वरूथिनीम् ।
ब्रह्मलोकं गतो राजन्ब्राह्मणो वेदपारगः ॥ ९४

इति श्रीमहाभारते द्रोणपर्वणि
द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥

१७३

धृतराष्ट्र उवाच ।

तस्मिन्नतिरथे द्रोणे निहते तत्र संजय ।
मामकाः पाण्डवाश्चैव किमकुर्वन्नतः परम् ॥ १

संजय उवाच ।

तस्मिन्नतिरथे द्रोणे निहते पार्षतेन वै ।
कौरवेषु च भग्नेषु कुन्तीपुत्रो धनंजयः ॥ २
दृष्ट्वा सुमहदाश्चर्यमात्मनो विजयावहम् ।
यदृच्छयागतं व्यासं पप्रच्छ भरतर्षभ ॥ ३
संग्रामे निघ्नतः शत्रूञ्शरौघैर्विमलैरहम् ।
अग्रतो लक्षये यान्तं पुरुषं पावकप्रभम् ॥ ४
ज्वलन्तं शूलमुद्यम्य यां दिशं प्रतिपद्यते ।
तस्यां दिशि विशीर्यन्ते शत्रवो मे महामुने ॥ ५
न पद्भ्यां स्पृशते भूमिं न च शूलं विमुञ्चति ।
शूलाच्छूलसहस्राणि निष्पेतुस्तस्य तेजसा ॥ ६
तेन भग्नानरीन्सर्वान्मद्भग्नान्मन्यते जनः ।
तेन दग्धानि सैन्यानि पृष्ठतोऽनुदहाम्यहम् ॥ ७
भगवंस्तन्ममाचक्ष्व को वै स पुरुषोत्तमः ।
शूलपाणिर्महान्कृष्ण तेजसा सूर्यसंनिभः ॥ ८

व्यास उवाच ।

प्रजापतीनां प्रथमं तैजसं पुरुषं विभुम् ।
भुवनं भूर्भुवं देवं सर्वलोकेश्वरं प्रभुम् ॥ ९

ईशानं वरदं पार्थ दृष्टवानसि शंकरम् ।
तं गच्छ शरणं देवं सर्वादिं भुवनेश्वरम् ॥ १०
महादेवं महात्मानमीशानं जटिलं शिवम् ।
त्र्यक्षं महाभुजं रुद्रं शिखिनं चीरवाससम् ।
दातारं चैव भक्तानां प्रसादविहितान्वरान् ॥ ११
तस्य ते पार्षदा दिव्या रूपैर्नानाविधैर्विभोः ।
वामना जटिला मुण्डा ह्रस्वग्रीवा महोदराः ॥ १२
महाकाया महोत्साहा महाकर्णास्तथापरे ।
आननैर्विकृतैः पादैः पार्थ वेषैश्च वैकृतैः ॥ १३
ईदृशैः स महादेवः पूज्यमानो महेश्वरः ।
स शिवस्तात तेजस्वी प्रसादाद्याति तेऽग्रतः ।
तस्मिन्घोरे तदा पार्थ संग्रामे लोमहर्षणे ॥ १४
द्रोणकर्णकृपैर्गुप्तां महेष्वासैः प्रहारिभिः ।
कस्तां सेनां तदा पार्थ मनसापि प्रधर्षयेत् ।
ऋते देवान्महेष्वासाद्बहुरूपान्महेश्वरात् ॥ १५
स्थातुमुत्सहते कश्चिन्न तस्मिन्नग्रतः स्थिते ।
न हि भूतं समं तेन त्रिषु लोकेषु विद्यते ॥ १६
गन्धेनापि हि संग्रामे तस्य क्रुद्धस्य शत्रवः ।
विसंज्ञा हतभूयिष्ठा वेपन्ति च पतन्ति च ॥ १७
तस्मै नमस्तु कुर्वन्तो देवास्तिष्ठन्ति वै दिवि ।
ये चान्ये मानवा लोके ये च स्वर्गजितो नराः ॥
ये भक्ता वरदं देवं शिवं रुद्रमुमापतिम् ।
इह लोके सुखं प्राप्य ते यान्ति परमां गतिम् ॥१९
नमस्कुरुष्व कौन्तेय तस्मै शान्ताय वै सदा ।
रुद्राय शितिकण्ठाय कनिष्ठाय सुवर्चसे ॥ २०
कपर्दिने करालाय हर्यक्ष्णे वरदाय च ।
याम्यायाव्यक्तकेशाय सद्वृत्ते शंकराय च ॥ २१
काम्याय हरिनेत्राय स्थाणवे पुरुषाय च ।
हरिकेशाय मुण्डाय कृशायोत्तरणाय च ॥ २२
भास्कराय सुतीर्थाय देवदेवाय रंहसे ।
बहुरूपाय शर्वाय प्रियाय प्रियवाससे ॥ २३
उष्णीषिणे सुवक्त्राय सहस्राक्षाय मीढुषे ।
गिरिशाय प्रशान्ताय पतये चीरवाससे ॥ २४
हिरण्यबाहवे चैव उग्राय पतये दिशाम् ।
पर्जन्यपतये चैव भूतानां पतये नमः ॥ २५
वृक्षाणां पतये चैव अपां च पतये तथा ।
वृक्षैरावृतकायाय सेनान्ये मध्यमाय च ॥ २६
स्रुवहस्ताय देवाय धन्विने भार्गवाय च ।
बहुरूपाय विश्वस्य पतये चीरवाससे ॥ २७
सहस्रशिरसे चैव सहस्रनयनाय च ।
सहस्रबाहवे चैव सहस्रचरणाय च ॥ २८
शरणं प्राप्य कौन्तेय वरदं भुवनेश्वरम् ।
उमापतिं विरूपाक्षं दक्षयज्ञनिबर्हणम् ।
प्रजानां पतिमव्यग्रं भूतानां पतिमव्ययम् ॥ २९
कपर्दिनं वृषावर्तं वृषनाभं वृषध्वजम् ।
वृषदर्पं वृषपतिं वृषशृङ्गं वृषर्षभम् ॥ ३०
वृषाङ्कं वृषभोदारं वृषभं वृषभेक्षणम् ।
वृषायुधं वृषशरं वृषभूतं महेश्वरम् ॥ ३१
महोदरं महाकायं द्वीपिचर्मनिवासिनम् ।
लोकेशं वरदं मुण्डं ब्रह्मण्यं ब्राह्मणप्रियम् ॥ ३२
त्रिशूलपाणिं वरदं खड्गचर्मधरं प्रभुम् ।
पिनाकिनं खण्डपरशुं लोकानां पतिमीश्वरम् ।
प्रपद्ये शरणं देवं शरण्यं चीरवाससम् ॥ ३३
नमस्तस्मै सुरेशाय यस्य वैश्रवणः सखा ।
सुवाससे नमो नित्यं सुव्रताय सुधन्विने ॥ ३४
स्रुवहस्ताय देवाय सुखधन्वाय धन्विने ।
धन्वन्तराय धनुषे धन्वाचार्याय धन्विने ॥ ३५
उग्रायुधाय देवाय नमः सुरवराय च ।
नमोऽस्तु बहुरूपाय नमश्च बहुधन्विने ॥ ३६
नमोऽस्तु स्थाणवे नित्यं सुव्रताय सुधन्विने ।

नमोऽस्तु त्रिपुरघ्नाय भगघ्नाय च वै नमः ॥ ३७
वनस्पतीनां पतये नराणां पतये नमः ।
अपां च पतये नित्यं यज्ञानां पतये नमः ॥ ३८
पूष्णो दन्तविनाशाय त्र्यक्षाय वरदाय च ।
नीलकण्ठाय पिङ्गाय स्वर्णकेशाय वै नमः ॥ ३९
कर्माणि चैव दिव्यानि महादेवस्य धीमतः ।
तानि ते कीर्तयिष्यामि यथाप्रज्ञं यथाश्रुतम् ॥ ४०
न सुरा नासुरा लोके न गन्धर्वा न राक्षसाः ।
सुखमेधन्ति कुपिते तस्मिन्नपि गुहागताः ॥ ४१
विव्याध कुपितो यज्ञं निर्भयस्तु भवस्तदा ।
धनुषा बाणमुत्सृज्य सघोषं विननाद च ॥ ४२
ते न शर्म कुतः शान्तिं लेभिरे स्म सुरास्तदा ।
विद्रुते सहसा यज्ञे कुपिते च महेश्वरे ॥ ४३
तेन ज्यातलघोषेण सर्वे लोकाः समाकुलाः ।
बभूवुर्वशगाः पार्थ निपेतुश्च सुरासुराः ॥ ४४
आपश्चुक्षुभिरे सर्वाश्चकम्पे च वसुंधरा ।
पर्वताश्च व्यशीर्यन्त दिशो नागाश्च मोहिताः ॥४५
अन्धाश्च तमसा लोका न प्रकाशन्त संवृताः ।
जघ्निवान्सह सूर्येण सर्वेषां ज्योतिषां प्रभाः ॥ ४६
चुक्रुशुर्भयभीताश्च शान्तिं चक्रुस्तथैव च ।
ऋषयः सर्वभूतानामात्मनश्च सुखैषिणः ॥ ४७
पूषाणमभ्यद्रवत शंकरः प्रहसन्निव ।
पुरोडाशं भक्षयतो दशनान्वै व्यशातयत् ॥ ४८
ततो निश्चक्रमुर्देवा वेपमाना नताः स्म तम् ।
पुनश्च संदधे दीप्तं देवानां निशितं शरम् ॥ ४९
रुद्रस्य यज्ञभागं च विशिष्टं ते न्वकल्पयन् ।
भयेन त्रिदशा राजञ्शरणं च प्रपेदिरे ॥ ५०
तेन चैवातिकोपेन स यज्ञः संधितस्तदा ।
यत्ताश्चापि सुरा आसन्यत्ताश्चाद्यापि तं प्रति ॥५१
असुराणां पुराण्यासंस्त्रीणि वीर्यवतां दिवि ।
आयसं राजतं चैव सौवर्णमपरं महत् ॥ ५२
आयसं तारकाक्षस्य कमलाक्षस्य राजतम् ।
सौवर्णं परमं ह्यासीद्विद्युन्मालिन एव च ॥ ५३
न शक्तस्तानि मघवान्भेत्तुं सर्वायुधैरपि ।
अथ सर्वेऽमरा रुद्रं जग्मुः शरणमर्दिताः ॥ ५४
ते तमूचुर्महात्मानं सर्वे देवाः सवासवाः ।
रुद्र रौद्रा भविष्यन्ति पशवः सर्वकर्मसु ।
निपातयिष्यसे चैनानसुरान्भुवनेश्वर ॥ ५५
स तथोक्तस्तथेत्युक्त्वा देवानां हितकाम्यया ।
अतिष्ठत्स्थाणुभूतः स सहस्रं परिवत्सरान् ॥ ५६
यदा त्रीणि समेतानि अन्तरिक्षे पुराणि वै ।
त्रिपर्वणा त्रिशल्येन तेन तानि बिभेद सः ॥ ५७
पुराणि न च तं शेकुर्दानवाः प्रतिवीक्षितुम् ।
शरं कालाग्निसंयुक्तं विष्णुसोमसमायुतम् ॥ ५८
बालमङ्कगतं कृत्वा स्वयं पञ्चशिखं पुनः ।
उमा जिज्ञासमाना वै कोऽयमित्यब्रवीत्सुरान् ॥५९
बाहुं सवज्रं शक्रस्य क्रुद्धस्यास्तम्भयत्प्रभुः ।
स एष भगवान्देवः सर्वलोकेश्वरः प्रभुः ॥ ६०
न संबुबुधिरे चैनं देवास्तं भुवनेश्वरम् ।
सप्रजापतयः सर्वे बालार्कसदृशप्रभम् ॥ ६१
अथाभ्येत्य ततो ब्रह्मा दृष्ट्वा च स महेश्वरम् ।
अयं श्रेष्ठ इति ज्ञात्वा ववन्दे तं पितामहः ॥ ६२
ततः प्रसादयामासुरुमां रुद्रं च ते सुराः ।
अभवच्च पुनर्बाहुर्यथाप्रकृति वज्रिणः ॥ ६३
तेषां प्रसन्नो भगवान्सपत्नीको वृषध्वजः ।
देवानां त्रिदशश्रेष्ठो दक्षयज्ञविनाशनः ॥ ६४
स वै रुद्रः स च शिवः सोऽग्निः शर्वः स सर्ववित् ।
स चेन्द्रश्चैव वायुश्च सोऽश्विनौ स च विद्युतः ॥६५
स भवः स च पर्जन्यो महादेवः स चानघः ।
स चन्द्रमाः स चेशानः स सूर्यो वरुणश्च सः ॥६६

स कालः सोऽन्तको मृत्युः स यमो रात्र्यहानि च ।
मासार्धमासा ऋतवः संध्ये संवत्सरश्च सः ॥ ६७
स च धाता विधाता च विश्वात्मा विश्वकर्मकृत् ।
सर्वासां देवतानां च धारयत्यवपुर्वपुः ॥ ६८
सर्वैर्देवैः स्तुतो देवः सैकधा बहुधा च सः ।
शतधा सहस्रधा चैव तथा शतसहस्रधा ॥ ६९
ईदृशः स महादेवो भूयश्च भगवानजः ।
न हि सर्वे मया शक्या वक्तुं भगवतो गुणाः ॥७०
सर्वैर्ग्रहैर्गृहीतान्वै सर्वपापसमन्वितान् ।
स मोचयति सुप्रीतः शरण्यः शरणागतान् ॥ ७१
आयुरारोग्यमैश्वर्यं वित्तं कामांश्च पुष्कलान् ।
स ददाति मनुष्येभ्यः स चैवाक्षिपते पुनः ॥ ७२
सेन्द्रादिषु च देवेषु तस्य चैश्वर्यमुच्यते ।
स चैव व्याहृते लोके मनुष्याणां शुभाशुभे ॥ ७३
ऐश्वर्याच्चैव कामानामीश्वरः पुनरुच्यते ।
महेश्वरश्च भूतानां महतामीश्वरश्च सः ॥ ७४
बहुभिर्बहुधा रूपैर्विश्वं व्याप्नोति वै जगत् ।
अस्य देवस्य यद्वक्त्रं समुद्रे तदतिष्ठत ॥ ७५
एष चैव श्मशानेषु देवो वसति नित्यशः ।
यजन्त्येनं जनास्तत्र वीरस्थान इतीश्वरम् ॥ ७६
अस्य दीप्तानि रूपाणि घोराणि च बहूनि च ।
लोके यान्यस्य कुर्वन्ति मनुष्याः प्रवदन्ति च ॥७७
नामधेयानि लोकेषु बहून्यत्र यथार्थवत् ।
निरुच्यन्ते महत्त्वाच्च विभुत्वात्कर्मभिस्तथा ॥ ७८
वेदे चास्य समाम्नातं शतरुद्रीयमुत्तमम् ।
नाम्ना चानन्तरुद्रेति उपस्थानं महात्मनः ॥ ७९
स कामानां प्रभुर्देवो ये दिव्या ये च मानुषाः ।
स विभुः स प्रभुर्देवो विश्वं व्याप्नुवते महत् ॥८०
ज्येष्ठं भूतं वदन्त्येनं ब्राह्मणा मुनयस्तथा ।
प्रथमो ह्येष देवानां मुखादस्यानलोऽभवत् ॥ ८१
सर्वथा यत्पशून्पाति तैश्च यद्रमते पुनः ।
तेषामधिपतिर्यच्च तस्मात्पशुपतिः स्मृतः ॥ ८२
नित्येन ब्रह्मचर्येण लिङ्गमस्य यदा स्थितम् ।
महयन्ति च लोकाश्च महेश्वर इति स्मृतः ॥ ८३
ऋषयश्चैव देवाश्च गन्धर्वाप्सरसस्तथा ।
लिङ्गमस्यार्चयन्ति स्म तच्चाप्यूर्ध्वं समास्थितम् ॥८४
पूज्यमाने ततस्तस्मिन्मोदते स महेश्वरः ।
सुखी प्रीतश्च भवति प्रहृष्टश्चैव शंकरः ॥ ८५
यदस्य बहुधा रूपं भूतभव्यभवत्स्थितम् ।
स्थावरं जङ्गमं चैव बहुरूपस्ततः स्मृतः ॥ ८६
एकाक्षो जाज्वलन्नास्ते सर्वतोक्षिमयोऽपि वा ।
क्रोधाद्यश्चाविशल्लोकांस्तस्माच्छर्व इति स्मृतः ॥ ८७
धूम्रं रूपं च यत्तस्य धूर्जटिस्तेन उच्यते ।
विश्वे देवाश्च यत्तस्मिन्विश्वरूपस्ततः स्मृतः ॥ ८८
तिस्रो देवीर्यदा चैव भजते भुवनेश्वरः ।
द्यामपः पृथिवीं चैव त्र्यम्बकश्च ततः स्मृतः ॥८९
समेधयति यन्नित्यं सर्वार्थान्सर्वकर्मसु ।
शिवमिच्छन्मनुष्याणां तस्मादेष शिवः स्मृतः ॥९०
सहस्राक्षोऽयुताक्षो वा सर्वतोक्षिमयोऽपि वा ।
यच्च विश्वं महत्पाति महादेवस्ततः स्मृतः ॥ ९१
दहत्यूर्ध्वं स्थितो यच्च प्राणोत्पत्तिस्थितश्च यत् ।
स्थितलिङ्गश्च यन्नित्यं तस्मात्स्थाणुरिति स्मृतः ॥९२
विषमस्थः शरीरेषु समश्च प्राणिनामिह ।
स वायुर्विषमस्थेषु प्राणापानशरीरिषु ॥ ९३
पूजयेद्विग्रहं यस्तु लिङ्गं वापि समर्चयेत् ।
लिङ्गं पूजयिता नित्यं महतीं श्रियमश्नुते ॥ ९४
ऊरुभ्यामर्धमाग्नेयं सोमार्धं च शिवा तनुः ।
आत्मनोऽर्धं च तस्याग्निः सोमोऽर्धं पुनरुच्यते ॥९५
तैजसी महती दीप्ता देवेभ्यश्च शिवा तनुः ।
भास्वती मानुषेष्वस्य तनुर्घोराग्निरुच्यते ॥ ९६

ब्रह्मचर्यं चरत्येष शिवा यास्य तनुस्तया ।
यास्य घोरतरा मूर्तिः सर्वानत्ति तयेश्वरः ॥ ९७
यन्निर्दहति यत्तीक्ष्णो यदुग्रो यत्प्रतापवान् ।
मांसशोणितमज्जादो यत्ततो रुद्र उच्यते ॥ ९८
एष देवो महादेवो योऽसौ पार्थ तवाग्रतः ।
संग्रामे शात्रवान्निघ्नंस्त्वया दृष्टः पिनाकधृक् ॥ ९९
एष वै भगवान्देवः संग्रामे याति तेऽग्रतः ।
येन दत्तानि तेऽस्त्राणि यैस्त्वया दानवा हताः ॥१००
धन्यं यशस्यमायुष्यं पुण्यं वेदैश्च संज्ञितम् ।
देवदेवस्य ते पार्थ व्याख्यातं शतरुद्रियम् ॥ १०१
सर्वार्थसाधकं पुण्यं सर्वकिल्बिषनाशनम् ।
सर्वपापप्रशमनं सर्वदुःखभयापहम् ॥ १०२
चतुर्विधमिदं स्तोत्रं यः शृणोति नरः सदा ।
विजित्य सर्वाञ्शत्रून्स रुद्रलोके महीयते ॥ १०३
चरितं महात्मनो दिव्यं सांग्रामिकमिदं शुभम् ।
पठन्वै शतरुद्रीयं शृण्वंश्च सततोत्थितः ॥ १०४
भक्तो विश्वेश्वरं देवं मानुषेषु तु यः सदा ।
वरान्स कामाँल्लभते प्रसन्ने त्र्यम्बके नरः ॥१०५
गच्छ युध्यस्व कौन्तेय न तवास्ति पराजयः ।
यस्य मन्त्री च गोप्ता च पार्श्वतस्ते जनार्दनः ॥१०६

संजय उवाच ।

एवमुक्त्वार्जुनं संख्ये पराशरसुतस्तदा ।
जगाम भरतश्रेष्ठ यथागतमरिंदम ॥ १०७

इति श्रीमहाभारते द्रोणपर्वणि
त्रिसप्तत्यधिकशततमोऽध्यायः ॥ १७३ ॥

॥ समाप्तं नारायणास्त्रमोक्षपर्व ॥

॥ समाप्तं द्रोणपर्व ॥